॥ श्रीः ॥

वृद्धसूर्यारुणकर्मविपाकः ।

भगवता सूर्यनारायणेन निजपरमभक्ताय स्वसा-
रथयेऽरुणाय ऐहिकाऽऽमुष्मिकवृजिनजनि-
तदुःखार्णवसंतरणार्थं परमकारुण्येन
प्रश्नोत्तरव्याजमवलम्ब्य वर्णितः ।

टी. जी. मल्लाराध्य एवं,
स्व. वेदाराध्य जी के द्वारा
"ज्ञा" को अर्पण,
शास्त्रिभिः शोधयित्वा
१५-७-७४

खेमराज श्रीकृष्णदासश्रेष्ठिना,

मुम्बय्यां

स्वकीये "श्रीवेङ्कटेश्वर" स्टीम्-मुद्रणालये

मुद्रयित्वा प्रकाशितः ।

संवत् १९६६, शके १८३१.

अस्य पुनर्मुद्रणादयः सर्वेऽधिकाराः "श्रीवेङ्कटेश्वर" मुद्रणालयाध्यक्षेणैव
स्वायत्तीकृताः सन्ति ।

प्रस्तावना.

भवतु सुविदितं समस्तसज्जनविद्वज्जनानां पुरतः, इह खलु जगति विशुद्धविज्ञानमयवाङ्मयप्रचारप्रसारेण सकलजनाः समुपाक्रियन्ताद्ययावदनन्तावधिं कालमारभ्य श्रुतिप्रतिपाद्येनानेकावतारधारिणा परमेश्वरेणेति । तत्र च श्रुतिस्मृतिपुराणाद्यष्टादशमहाविद्यामयस्य वाङ्मयस्य बहुशः शाखाः प्रशाखाश्च समंततो विस्तार्यमाणाः सकलमहर्षिप्रमुखैः संसेवनेन सनाथीक्रियमाणाश्च सकलसांसारिकजनानिजविज्ञानमयच्छायासत्फलैः समुपकुर्वन्तीति सार्वजनीनमेवैतन्महर्षिजनानां सौजन्यं कस्य सहृदयस्य मनो नाह्लादयेत् । अथ तत्रापि प्रत्यक्षफलप्रदर्शकानि तावच्छास्त्राणि साक्षादादर्शरूपाण्येव जाग्रतितमाम् । नैतादृशानि खलु शास्त्राणि सर्वसामान्यजनसुलभाधिगमानि, किन्तु तीव्रतरतपोबलाराधितभगवत्प्रसादसमधिगतापारबुद्धिवैभवाधिगम्यान्येवेति निपुणं विमृशन्तु सन्तो महान्तः सज्जनाः । तादृशशास्त्राणां भूतले प्रचारोऽपि तावद्भूतलनिवासिनामस्मदादीनां भूयसो भाग्योत्कर्षादेवेति बाढं प्रतिभाति । अन्यथा तु दर्दह्यते केषांचिदमूल्यरत्नसाराणामपि शास्त्रपुस्तकानां मूर्खहस्तपतितत्वादिदोषेण विनाशकृतोऽपरिमितशास्त्रग्रन्थविरचनलेखनप्रयासविनाशोऽस्या भारतवसुन्धरायाः सत्पुत्रैः कतिपयैः सज्जनैर्यावच्छक्यं निराक्रियमाणोऽपि । अस्तु, एवं स्थितेऽपि 'सन्ति सन्तः कियन्तः' इति न्यायेन तानि महार्थफलानि शास्त्रपुस्तकानि गोपायन्ति कतिचन सज्जना इति महद्भागधेयं भूतलनिवासिनां सकलसज्जनानामिति साशिरःकम्पमभिनन्दयामोऽनेकविधप्राचीनग्रन्थसंरक्षणबद्धपरिकरान्सज्जनशिरोमणीन् । अथ चेदं तावत्प्रस्तुतं प्रस्तुमः—सकलशास्त्रपुस्तकानां प्रकाशनेन भूतलनिवासिनां यावच्छक्यं सेवा विधातव्येति मनसि निधायाद्ययावन्मयाऽनेके श्रुति—स्मृति—पुराणेतिहास—वेदान्त—न्याय—मीमांसा—धर्मशास्त्र—काव्य—अलंकार—च्छन्दो—नाटक—चम्पू—वैद्यक—ज्योतिष—भक्ति—नीति-प्रभृतिशास्त्रग्रंथा भाषाग्रंथाश्चापि संमुद्य प्रकाशिताः सन्ति तत्क्रमेणायमपूर्वः **श्रीवृद्धसूर्यारुणकर्मविपाक**ग्रन्थोऽपि समस्तसज्जनानां पुरतः प्रकाश्य समुपस्थापितोऽस्ति । अस्मिन्ग्रंथे च—भगवता श्रीसूर्यनारायणेन निजपरमभक्ताय अरुणाय स्वसारथये सर्वप्राणिनां भूतभविष्यद्वर्तमानकालिकसुखदुःखादिफलप्रदायकशुभाशुभकर्मविपाकः सम्यगुपदिष्टोऽस्ति । एतस्य कर्मविपाकस्य भूतले प्रसिद्धिश्च—पूर्वं सूर्यो यमायोपादिशत्, यमः शुक्राय, तथा सूर्यो बृहस्पतये, तथैव सूर्यो याज्ञवल्क्याय, तथैव गुरुसंप्रदायपरंपरया तेभ्यो यमादिभ्यो गन्धर्वसिद्धनागादिपरंपरयेति । इत्थमयं कर्मविपाकः प्रसिद्धिं भूयस्तरां प्रचयं चावाप्य समस्तसांसारिकजनानुपकरोति । तदेतत्स्फुटमेवैतद्ग्रन्थवाचनेन स्यादेव विद्वज्जनेष्विति किं विशेषोल्लेखनेन । नहि हस्तस्थिते कंकणे मुकुरनिरीक्षणेच्छा समुद्भवेच्चक्षुष्मताम् । सोऽयमेतादृशः सर्वजगदुपकारको ग्रन्थोऽद्यावधि क्वापि नामुद्यत न प्राकाश्यत चेति समवलोच्यास्माभिरेतद्ग्रन्थप्रकाशनेच्छा प्रकाशिता । अथ चैतस्यातिप्राचीनस्य **श्रीवृद्धसूर्यारुणकर्मविपाक**ग्रंथस्य हस्तलिखितपुस्तके देशदेशांतरस्थिताभ्यां परममान्ययोर्महोदययोः प्राचीनसरस्वतीभांडागाराभ्यां समुपलभ्य, तयोरादर्शपुस्तकयोः साहाय्येन प्रतिपुस्तकं जयपुरस्थकेदारनाथद्वारा—संलिख्य समानीय पण्डितश्रीनन्दलालशास्त्रिवर्यद्वारा महता परिश्रमेण संशोध्य भूयसा द्रव्यव्ययेन च स्वकीये "**श्रीवेङ्कटेश्वर**" मुद्रणालये मुद्रयित्वा सकलसज्जनानां पुरतः सोऽयं ग्रंथः प्राकाश्यमानीयत । अथ चात्र समस्तसज्जनविद्वज्जनमहाजनसद्गृहस्थान्साञ्जलिबन्धं विज्ञापयामो यदेनं सर्वथा सर्वतो दुर्लभं **श्रीवृद्धसूर्यारुणकर्मविपाक**ग्रन्थं संगृह्य सकलसांसारिकजनानां भूतभविष्यद्वर्तमानकालिकत्रिविधजन्मस्वनुबोधूयमानशुभाशुभकर्मजन्यसुखदुःखरूपफलविपाकपरिज्ञानपूर्वकमशुभकर्मफलनिरसनपुरःसरशुभकर्मफलोदयसमुचितजपतपोदानानुष्ठानविधिज्ञानार्थमुपयुञ्जन्तु—इति शम् ।

श्रीमतां कृपाकांक्षी—

खेमराज श्रीकृष्णदासश्रेष्ठी "श्रीवेङ्कटेश्वर" मुद्रणालयाध्यक्षः,—**मुंबई.**

अभिनंदनपूर्वकं धन्यवादः ।

एतस्य **श्रीवृद्धसूर्यारुणकर्मविपाकग्रन्थस्यादर्श** (प्रति) पुस्तके ययोर्महोदययोरुदारचरितयोः प्राचीनसरस्वतीभाण्डागारादुपलब्धे तयोरभिनन्दनं महताऽऽनन्देन प्रकाशयितुमुत्सहतेऽस्मदीयं मानसम् ।

१ पंजाबदेशीयलाहोरराजधानीनिवासिनां राजासाहिबदयालुपौत्रश्रीठाकुरमहान्चंद्राभिधेयानां प्राचीनपुस्तकालयादेकं प्राचीनपुस्तकमुपलब्धम्.

२ अन्यच्च—पर्वतप्रदेशस्थितातिबृहत्तरप्राचीनपुस्तकभांडागारात्तदधिपतेः सकाशात्समागतम् ।

एताभ्यामत्युदारचरिताभ्यां सज्जनाभ्यां श्रीवृद्धसूर्यारुणकर्मविपाकस्य प्राचीने प्रति (आदर्श) पुस्तके मुद्रणोपयोगिसंशोधनार्थं मिलिते । तद्वरैत्पुस्तकपाठक्रमं समुपगृह्यास्माभिरेतत्पुस्तकं साद्यंतं परिष्कृत्य मुद्रितम् । प्रोक्तमहाभ्युदयाभ्यां प्राचीनपुस्तकप्रदानसाहाय्येन वयमत्युपकृताः स्मः । अतस्तयोः सशिरःकंपमभिनन्दनपूर्वकमनन्तान्वन्यवादान्संश्लाघामहे । एतादृशपरोपकारिणोर्विमला कीर्तिर्जगत्पुनात्विति शम् ।

श्रीमतामुपकारस्मर्ता—

खेमराज श्रीकृष्णदासश्रेष्ठी.

"श्रीवेङ्कटेश्वर" मुद्रणालयाध्यक्षः—**मुंबई.**

श्रीः ।

अथ वृद्धसूर्यारुणकर्मविपाकविषयानुक्रमणिका प्रारभ्यते।

अ०	विषयाः	पृ०
१	मङ्गलाचरणम्, नृणां कर्मविपाकं धर्माधर्मौ च वेत्तुं तपस्यन्तमरुणं प्रति तत्तपसा संतुष्टस्य रवेरेतच्छास्त्रप्रतिपादनोपक्रमः, वृद्धसूर्यारुणाख्यस्यास्य शास्त्रस्य श्रवणोपासनापूर्वक कर्तव्यकथनं तच्छ्रवणपठनफलवर्णनञ्च ।	१
२	उक्तरीत्या गणितं विधाय खेचराणां साधनात् पूर्वजन्मस्येह जन्मस्यदेशजातिवयःसहायादिपरिज्ञानरीतिकथनम् ।	३
३	व्याध्याधिक्षेपकाणां सोपपत्तिकंनिरूपणम् ।	४
४	भारतवर्षप्रशंसापूर्वकं साधितसूर्यात् प्राग्भवेऽत्र जन्मनि च जीवस्य जन्मदेशपरिज्ञानम ।	५
५	साधितचन्द्रात् प्राग्भवेऽत्र जन्मनि च जातिज्ञानम् ।....	९
६	साधितभौमात् जीवेन प्राग्भवे इहजन्मनि च यास्ववस्थासुयानि शुभाशुभकर्माणि विरचितानि तासां बाल्याद्यवस्थानां परिज्ञानम् ।	१२
७	साधितबुधात् जीवस्य प्राग्जन्मन्यत्र च स्त्रीपुन्नपुंसकत्वादिज्ञानम् ।	१६
८	साधितगुरोः प्राग्भवे अत्र जन्मनि च जीवस्य शुभाशुभकर्मकरणे सहायानां निरूपणम् ।	१९
९	साधितशुक्रात् जीवस्य इह प्राग्जन्मनि च श्रद्धालुतया समाचरितधर्मपरिज्ञानम् ।	२३
१०	साधितसौरेर्जीवस्येहजन्मनिजन्मान्तरे च आयुर्माननिरूपणम् ।	२८
११	साधितराहोर्जीवस्य जन्मनि जन्मान्तरे च आचरितपापानां परिज्ञानम् ।	३१
१२	साधिकाल्केतोर्जीवस्य प्राग्जन्मनि इह शुभकर्माचरणाच्चारिष्टपरिज्ञानम् ।	३५
१३	वातगुल्मापस्मारादिरोगनिवारणार्थं-गणेशमूर्तिदानम्, गणेशमूर्तिनिर्माणप्रकारश्च ।	३८
१४	विद्याहरणजात्पापात्समुत्पन्नस्य मूकत्वरोगस्य परिहाराय सुवर्णसरस्वतीमूर्तिदानम्,सरस्वतीरूपनिरूपणञ्च ।	३९
१५	लक्ष्मीहरणजात्पापात् समुत्पन्नदारिद्र्यस्य निवारणाय लक्ष्मीमूर्तिदानम्,लक्ष्मीरूपनिरूपणञ्च ।	”
१६	समन्त्रकसूर्याराधनस्वर्णप्रतिमादानतन्मूर्तिनिरूपणम् ।	”
१७	विप्रपीडाजनितदोषोत्थरोगादिनिरसनाय चन्द्रमूर्तिदानम्,तन्मूर्तिनिर्माणकथनञ्च ।	४०
१८	भूमिसुतस्य मूर्तिनिर्माणतत्पूजनदानविधिकथनम्,दानादिफलकथनञ्च ।	”
१९	सर्वकार्यसिद्ध्यर्थं बुधमूर्तिप्रदानम्, बुधमूर्तिनिरूपणञ्च ।	४१
२०	गुरुवादादिजात्पापात् समुद्भूतानां नानाविधाशुभानां निवृत्त्यर्थं गुरुमूर्तिप्रदानम्,गुरुमूर्तिनिरूपणञ्च ।	”

अ०	विषयाः	पृ०
२१	प्रमेहरोगनिवृत्तये शुक्रस्य मूर्तेर्दानं शुक्रमूर्तिनिरूपणञ्च ।	४१
२२	सूर्यपुत्रस्य शनैश्चरस्य पूजादानविधिनिरूपणम्, शनिमूर्तिनिरूपणञ्च ।	,,
२३	राहुदानपूजाविधिकथनम्, राहुमूर्तिनिरूपणञ्च ।	४२
२४	केतुदानपूजादिविधिवर्णनम्, केतुमूर्तिनिर्माणप्रकारकथनञ्च ।	,,
२५	इन्द्रनक्षत्रजनितबालकादुत्पत्स्यमानदुःखपरिहारायेंद्रमूर्तिदानविधेः समन्त्रकस्य निरूपणम्,इन्द्रमूर्तिनिर्माणकथनञ्च ।	४३
२६	अग्निदाहजनितदोषनिवारणायाग्निमूर्तिदानम, अग्निमूर्तिनिर्माणञ्च ।	,,
२७	यमस्वरूपनिर्माणकथनं यमरूपदानविधिवर्णनञ्च ।	,,
२८	निर्ऋतिरूपनिर्माणकथनम्, निर्ऋतिमूर्तिदानविधिवर्णनञ्च ।....	४४
२९	वरुणस्वरूपनिर्माणकथनम्, वरुणमूर्तिदानं विधिवर्णनञ्च ।	,,
३०	वायुपीडानिवारणाय वायुमूर्तिनिर्माणकथनम्, वायुमूर्तिदानविधिश्च ।	,,
३१	धनापत्निवारणाय कुबेरमूर्तिप्रदानं कुबेरमूर्तिनिर्माणकथनञ्च ।	४५
३२	विप्राङ्गहिंसनप्रापनिवारणाय शिवमूर्तिपूजनदानविधेः समन्त्रकस्य निरूपणम्, शिवमूर्तिनिर्माणकथनञ्च ।	,,
३३	सर्वपापनिवृत्तये पंचवक्त्रदानम, तन्मूर्तिनिर्माणप्रकारवर्णनञ्च ।	,,
३४	आकाशस्वरूपनिर्माणकथनम्,आकाशदानकथनञ्च ।	४६
३५	भूमिमूर्तिनिर्माणकथनम्,भूमिमूर्तिदानविधिश्च ।	,,
३६	गौरीस्वरूपनिर्माणकथनम्, गौरीमूर्तिदानकथनञ्च ।	४६
३७	भैरवस्वरूपनिर्माणकथनम्, (भैरवमूर्तिदानञ्च) ।	,,
३८	स्कन्दमूर्तिदानकथनम, स्कन्दस्वरूपनिर्माणञ्च ।	,,
३९	वीरभद्रनाम्नो गणस्य मूर्तिदानकथनम्, वीरभद्रमूर्तिनिर्माणञ्च	,,
४०	कालपुरुषमूर्तिनिर्माणकथनम्, कालपुरुषस्य समंत्रकदानविधिनिरूपणम्	४७
४१	अपमृत्युविनाशाय कालचक्रदानम्, कालचक्रनिर्माणप्रकथनं च ।	४७
४२	चातुर्थिकादिज्वरपीडानिरसनायज्वरमूर्तिदानं ज्वरमूर्तिनिर्माणप्रकारकथनं च ।	४८
४३	अर्चायां दानकर्मणि शान्तिके वा परमोपयुक्तब्रह्ममूर्तिनिर्माणकथम	,,
४४	प्राग्भवे स्त्रीहिंसकस्य पुत्रस्त्रीसमुद्भवारिष्टनिवारणाय ब्रह्माणीमूर्तिदानं, ब्रह्माणीस्वरूप निर्णयकथनं ।	,,
४५	स्त्रीत्यागिनो गर्भहन्तुर्वा दोषनिवृत्तये प्रजापतिमूर्तिदानविधिकथनम्, प्रजापतिस्वरूपनिर्णयकथनं च ।	,,
४६	नानाविधनेत्ररोगनिवृत्त्यर्थं विष्णुमूर्तिदानविधिकथनम्, विष्णुस्वरूपनिर्णयकथनंच ।	,,
४७	कामलाख्यनेत्ररोगनिवारणाय गरुडमूर्तिदानविधेः कथनं गरुडस्वरूपनिर्माणकथनं च ।	९०
४८	वातपित्तोद्भवरोगनिवारणाय लक्ष्मीनारायणमूर्तिपूजादानविधिकथनम्, लक्ष्मीनारायणस्वरूपनिर्माणकथनंच	,,
४९	ब्रह्महत्यादिपापनिरसनाय गायत्रीजपसंख्याकथनम् ।	९१

अ०	विषयाः	पृ०
५०	मोक्षादिकामनासिद्धये गायत्रीजपविधिसंख्यानिरूपणम्।	५१
५१	जपं कर्तुं स्वयमशक्तस्य ब्राह्मणद्वाराजपकरणम्।	,,
५२	आजन्मोपार्जितविविधतापविनाशाय प्रशुक्तस्य गायत्रीजपस्य नियमकथनम्।	,,
५३	सर्वपापविशोधनाय गायत्रीमंत्रवद्विष्णुमंत्रजपकथनम्।	५२
५४	पापमूलमहारिष्टहरमृत्युंजयपूजाविधानम्।	,,
५५	मृत्युंजयमूर्तिविधाय तदग्रे सर्वारिष्टनिरसनाय मृत्युंजयमंत्रजपप्रयोगकथनम्।	
५६	नानाविधकार्यसाधकमृत्युंजयमंत्रान्यप्रयोगकथनम्।	५३
५७	त्र्यंबकमंत्रजपदशांशहोमार्थं वह्निकुंडादिनिर्माणप्रकारकथनम्।	,,
५८	कलशे मृत्युंजयावाहने द्वारदेवतानां कथनम्, मृत्युंजयदेवताविसर्जनमंत्रकथनं च।	,,
५९	पूर्वोक्तसांगमृत्युंजयजपप्रयोगस्य फल निरूपणम्।	,,
६०	पापशोधनाय विनिर्दिष्टानां नानाविधदानानां फलस्याक्षयतासिद्धयेद्रव्यमानकथनम्।	५४
६१	सप्तधान्याष्टादशधान्यसप्तौषधीनांविवरणम्।	,,
६२	सर्वौषधिरसषट्कसप्तधातुपंचरत्नसर्वधातूनां विवरणम्।	,,
६३	दानकर्मण्युपयुक्तानां द्रव्याणां विस्तरेण देवतानिरूपणम्।	५५
६४	भूमिदानप्रकरणे भूमिमानकथनम्।	,,
६५	सर्वदेवतामूर्तिमानकथम्।	,,

अ०	विषयाः	पृ०
६६	अष्टविधमूर्तिनिर्माणकथनम्।	५६
६७	पूजनदानादिषु मूर्तिमानकथनम्।	,,
६८	सर्वदेवतानां प्रतिष्ठाविधिकथनम्।	,,
६९	देवप्रतिष्ठांगभूतहोमतर्पणादिकथनम्।	५७
७०	शक्तियुक्तमहादेवलक्ष्मीनारायणादीनां मन्त्रकथनम्।	,,
७१	अप्रतिष्ठितदेवतापूजनादौ दोषकथनम्	,,
७२	पंचगव्यपंचामृतकथनम्।	५८
७३	देवतापूजने पुष्पगन्धधूपदीपकथनम्।	,,
७४	उपवीतवस्त्रनैवेद्यार्घ्यदानकथनम्।	५९
७५	षोडशोपचारसमर्पणेपुरुषसूक्तमंत्रकथनम्।	,,
७६	दानविधिसाफल्यार्थं संकल्पादिकथनम्।	,,
७७	सामान्यतः प्रायश्चित्तविहीनानांव्याधिरूपेण पातकचिह्नकथनम्।	६०
७८	पातकनिरसनाय ब्राह्मणोक्तप्रायश्चित्तकरणम्, तत्प्रसंगेन ब्राह्मणानांमहत्त्वकथनञ्च।	,,
७९	ब्रह्महत्यागर्भघातक्षत्रमारणैःक्षयरोगाप्राप्तिः तस्य निरसनाय प्रायश्चित्तकथनं च।	६१
८०	शूलरोगस्य निरसनार्थं शूलदानम्। नेत्रशूलनिदानं तत्प्रायश्चित्तकथनञ्च।	६२
८१	शीतज्वरादिनिदानम्, ज्वरहरपूर्वसंचितपातकप्रायश्चित्तकथनंच।....	६३
८२	कफश्वासोष्णज्वरपित्तरोगाणां निदानकथनम्, तत्प्रायश्चित्तकथनंच....	,,
८३	शोकरोगनिदानम्, तत्प्रायश्चित्तकथनं च।	६४
८४	पाण्डुरोगनिदानम्, तत्प्रायश्चित्तकथनं च।	,,
८५	शीतोष्णज्वरच्छिन्नान्त्रोद्भवरोगनिदानम्, तत्प्रायश्चित्तकथनञ्च।	,,
८६	मस्तकादिषु जायमानव्रणरोगनिदानम्, तत्प्रायश्चित्तकथनं च।	६५

अ०	विषयाः	पृ०
८७	प्लीहश्लीपदनाडीव्रणरोगनिदानं तत्प्रायश्चित्तकथनं च ।	६६
८८	पुत्रनाशकारणमुक्त्वा तत्प्रायश्चित्तकथनम् ।	,,
८९	शतद्रुनिकटदेशभूपस्य पितृमातृसुखहीनस्य जातपुत्रविनाशानिदानकथनम्, पुत्रजीवनायप्रायश्चित्तवर्णनञ्च।	६६
९०	ऐरावतीतीरसमुत्पन्नस्य पितृमातृविवर्जितस्य सहोदरधनैर्हीनस्य ब्राह्मणस्य जातपुत्रविनाशानिदानकथनम्, पुत्रजीवनप्रायश्चित्तकथनं च ।	६७
९१	जांगलदेशे रामहृदाद्याम्ये जातस्यसर्वसुखसंपन्नस्य शूद्रस्य संततिराहित्य निदानम्, तत्प्रायश्चित्तकथनं च ।	६८
९२	सरस्वत्या याम्यभागेजातस्य शूद्रस्य पुत्रविनाशानिदानम्, तत्प्रायश्चित्तकथनं च ।	,,
९३	विपाशिकदेश नृपस्यमातृपितृसमन्वितस्य स्वल्पवित्तस्य कुष्ठरोगान्वितस्य स्त्रीपुत्रराहित्यनिदानम, तत्प्रायश्चित्तकथनं च ।....	६९
९४	शतद्रुनिकटदेशे समुत्पन्नस्य कुलतिलकस्य गुणिनो द्विजस्यद्विभार्यस्य पुत्रराहित्यनिदानम, तत्प्रायश्चित्तकथनं च ।....	७०
९५	सौराष्ट्रदेशोत्पन्नस्य धर्मकर्मक्रियायुक्तस्य लोभदुःखसमन्वितस्यबहुकन्यस्य अल्पपुत्रस्य कुनाखिनो द्विजस्य पंचाशन्मितके वर्षे पुत्रा रिष्टनिदानम तत्प्रायश्चित्तकथनं च ।	,,
९६	रामहृदाद्याम्ये पष्टियोजनसंमितदेशे समुत्पन्नस्य स्वल्पवित्तस्य व्यापारनिर तस्य वलबुद्धियुतस्यवणिक्सुतस्य	

अ०	विषयाः	पृ०
	सुतहीनत्वनिदानम्, तत्प्रायश्चित्तकथनं च ।	७१
९७	पर्वते उत्पन्नस्य भूमिपालकुलजस्य बहुभार्यस्य पुत्रैर्दुःखमुपागतस्य धीमतो धनहीनतानिदानम,तत्प्रायश्चित्तकथनं च ।	७२
९८	पर्वताश्रितदशयोजनविस्तीर्णदेशे उत्पन्नस्यनृपस्य बहुभार्यस्य यशस्विनः सहोदरविहीनस्य यौवने पायूदरव्यथानिदानम,तत्प्रायश्चित्तकथनं च ।	,,
९९	शतद्रुनिकटे जातस्य पूर्वापरसहोदरैरहितस्य व्यथान्वितस्य क्षत्रियस्य द्विभार्यस्य पुत्रधननाशनिदानकथनम-तत्प्रायश्चित्तवर्णनं च ।	७४
१००	सदाचारसंपन्नाया भर्तृभक्तिमत्याः स्त्रिया रक्तस्रावादि जातोदरपीडाया द्वित्रिचतुःपंचमासेषु कस्मिंश्चिदपिमासे गर्भपतननिदानम्, तत्प्रायश्चित्तवर्णनं च ।	,,
१०१	पतिसेवामाचरंत्याः सहगमनपुण्यफलप्रशंसापूर्वकं ब्रह्महृदजातायाः साध्व्याश्चरितवर्णनम् ।	७५
१०२	पूर्वजन्मनि स्वेच्छया ब्रह्महत्याकर्तुरत्र क्षयरोगसमुत्पत्तिस्तत्प्रायश्चित्ताभावश्च	७६
१०३	अकामतो ब्राह्मणघातादसौ क्षयपीडितोऽत्र भवति, तस्य कुरुक्षेत्रादिषु सत्पात्रे सर्वस्वदानप्रायश्चित्तकथनम् ।	,,
१०४	कस्यचिद्विप्रस्य सदाचारकुशलस्य देवाग्निद्विजवत्सलस्य भार्यायाः सदाचारवत्या यौवने ऋतुहीनतानिदानकथनम्, तत्प्रायश्चित्तकथनं च ।	,,
१०५	पूर्वजन्मनि सीमावादे भूमिलोभाद् ब्राह्मणं हत्वा कर्मक्षयादत्र क्षत्रियत्व-	

अ०	विषयाः	पृ०
	मासादितं तस्य क्षयरोगसमुत्पत्तिकथनम्, तत्प्रायश्चित्ताभावकथनं च।	७७
१०६	अयोध्यायां समुत्पन्नस्य क्षत्रियाधमस्य युवावस्थायामेव क्षयरोगसंप्राप्तिस्तत्प्रायश्चित्तकथनपूर्वकं पूर्वनिदानकथनम्।	७८
१०७	पूर्वजन्मनि कामतो ब्रह्महत्यायां कृतायां स्त्रीदेहमेवाश्रित्य विनाप्रायश्चित्तं क्षयरोगेण मृतिकथनम्।	,,
१०८	पुरुषस्य पूर्वजन्मनि स्वसृघातादत्र वधिरत्वं तत्प्रायश्चित्तकथनं च।	,,
१०९	अज्ञानाद् ब्रह्मघातकरणात् स्त्रिया अत्र जन्मनि क्षयरोगपीडा तत्प्रायश्चित्तकथनञ्च।	,,
११०	कामतः पूर्वजन्मनि भ्रातृघातान्निष्कृतिरहितमूकत्वसंप्राप्तिकथनम्।	,,
१११	नार्याः प्राग्जन्मनि मोहात्कृतस्य कुक्कुटवधस्य दोषेण नासावक्रत्वं तत्प्रायश्चित्तकथनञ्च।....	,,
११२	गंगायाःप्राक्पश्चिमदेशेशतयोजनसंमिते जातस्य शूद्रस्य बलवतो धर्मशठस्य सपत्नीकस्य अपुत्रतानिदानकथनम्, तत्प्रायश्चित्तकथनञ्च।	७९
११३	विराटदेशे जातायाःक्षत्रियकन्यकाया बाल्ये क्षयरोगयुतायाःप्रायश्चितरहितं पुत्रराहित्यनिदानकथनम्।	,,
११४	प्राग्जन्मनि सारिकाहननात् स्खलितवाक्त्वं तत्प्रायश्चित्तकथनञ्च।....	८०
११५	स्त्रीणामपि सारिकाहननात्स्खलितवाक्त्वं तत्प्रायश्चित्तनिरूपणञ्च।....	,,
११६	प्राक् बकहननात्कंठरोगोऽत्रजायते तत्प्रायश्चित्तकथनम्।	,,
११७	स्त्रीणामपि तथैव।	,,
११८	कस्यचिद्विप्रकुलजस्य उदरगतवातरोगस्य अक्षिपाण्डूदरादिरोगयुक्तस्य मृतवत्साया भार्यायाः कथं स्थिरगर्भत्वं इति अरुणप्रश्नः।	,,
११९	मृतवत्सात्वनिदानकथनम्, तत्प्रायश्चित्तकथनञ्च।	,,
१२०	प्राग्जन्मनि काकघातादत्र कूर्चहीनत्वं तत्प्रायश्चित्तकथनञ्च।	८१
१२१	काकघातादत्र जन्मनि स्त्रीणां कूर्चोत्पतिस्तत्प्रायश्चित्तकथनञ्च।....	८२
१२२	प्राग्जन्मनि भक्षितादभक्ष्यादत्र क्रिमिलोदरत्वं तत्प्रायश्चित्तकथनञ्च	,,
१२३	स्त्रीणामपि तथा।	,,
१२४	प्राग्जन्मनि दुष्टस्पर्शे जातेऽपि मोहादन्नभोक्तुःकृशोदरत्वं तत्प्रायश्चित्तकथनञ्च।	८२
१२५	स्त्रीणामपि तथैव।	,,
१२६	गंगायाः पूर्वभागे द्विजवंशसमुद्भवस्य मृतपुत्रकत्वनिदाननिरूपणं तत्प्रायश्चित्तनिरूपणं च।	,,
१२७	पुत्रसंततिर्हीनाया युवभावएव क्षयरोगनिदानं तत्प्रायश्चित्तकथनं च।	८३
१२८	पूर्वजन्मन्युच्छिष्टभोजनादत्र रात्र्यन्धत्वं तत्प्रायश्चित्तञ्च।	,,
१२९	स्त्रीणामपि तथैव।	,,
१३०	विडालोच्छिष्टभोजनाद्रात्र्यंधत्वं तत्प्रायश्चित्तकथनं च।	,,
१३१	स्त्रीणामपि तथैव।	,,
१३२	पूर्वजन्मनि चाण्डालीगमनादत्राजगरत्वं मूढत्वंच तत्प्रायश्चित्तनिरूपणमपि।	८४
१३३	स्त्रीणाममि तथैव।	,,
१३४	प्राग्जन्मनि परान्नविघ्नकारिणांमजीर्णरोगप्राप्तिस्तत्प्रायश्चित्तकथनं च।	,,

अ०	विषयाः	पृ०
१३५	स्त्रीणामपि तथैव ।	८४
१३६	ब्राह्मणकुलोत्पन्नस्य सदाचारवतो दद्रुकिलासनेत्रतोदरोगवतो ब्राह्मणस्य भार्याया मृतवत्सत्वनिदानं तत्प्रायश्चित्तवर्णनं च ।	,,
१३७	प्राग्जन्मनि विप्रेण ब्राह्मणहननात् अत्र निष्कृतिं विना छर्दीरोगेण मरणकथनम् ।	८५
१३८	स्त्रीणामपि तथैव ।	८६
१३९	प्राग्जन्मनि परस्मै विषदानान्नार्याश्छर्दिरोगस्तत्प्रायश्चित्तकथनं च ।	,,
१४०	पंचनददेशे सुमुत्पन्नाया यवन्या धनवत्याः सुखैश्वर्यसमन्वितायाःपुत्रसंतानराहित्यनिदानम्, तत्प्रायश्चित्तनिरूपणं च पूर्वंभ्रातृघातादत्र मूकत्वं तत्प्रायश्चित्तञ्च ।	,,
१४१	स्त्रीणां संतानोपायवर्णनम् ।	,,
१४२	गंगाश्रयपर्वते जातस्य वहुद्रव्यान्वितस्य वाल्य एव पाण्डुरोगोत्पत्तिनिदानं तत्प्रायश्चित्तञ्च ।	,,
१४३	पूर्वं कस्यापि विषदानान्नार्याश्छर्दिरोगसमुद्भवस्तत्प्रायश्चित्तं च ।	,,
१४४	गंगापूर्वभागे समुत्पन्नस्य क्षत्रियस्य वहुद्रव्यपराक्रमस्य वहुकन्यस्य मृतपुत्रत्वनिदानम्,तत्प्रायश्चित्तकथनं च।	८७
१४५	व्यभिचारकरणप्रायश्चित्तं ततोनिष्टफलकथनं च ।	,,
१४६	ब्राह्मणवचनादपस्माररोगस्तत्प्रायश्चित्तकथनं च ।	
१४७	नार्या भर्तृघातात् मूकत्वं तत्प्रायश्चित्ताभावश्च ।	,,
१४८	पूर्वं देवद्रव्यापहरणादत्र विंशतिवर्षोर्ध्वनेत्ररोगसंप्राप्तिस्तत्प्रायश्चित्तकथनञ्च ।	८८

अ०	विषयाः	पृ०
१४९	सर्वस्नेहहरणादत्र क्षयरोगस्तत्प्रायश्चित्तञ्च ।	,,
१५०	प्राक् पातिव्रतपरिपालनादत्र ब्रह्मवादेन नार्याभर्त्रा सह शिवलोकाधिगमः ।	,,
१५१	भातृघातादत्र मूकत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१५२	कस्यचिदपि वंचनादत्र नार्या अपस्माररोगपीडा तत्प्रायश्चित्तञ्च ।	,,
१५३	कस्यचिद्विजस्य वित्तयुतस्य धर्मनिष्टस्यदद्रुकण्डूकिलासरोगयुतस्य प्रदरार्दिताया भार्याया मृतवत्सात्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१५४	वहुभोगसमन्वितायाः पुत्रान्वितायाः पतिसेवनरतायाःक्षत्रियनार्याःक्षयरोगनिदानम्, तात्प्रायश्चित्तवर्णनञ्च ।	८९
१५५	पूर्वभवे लोकवंचनादत्रापस्माररोगप्राप्तिस्तत्प्रायश्चित्तवर्णनञ्च ।	,,
१५६	चन्द्रवदनाया गौराङ्गया पतिवल्लभायाः स्वर्णकार्या धान्यधनयुतायाः पुत्रहीनत्वनिदानम्, तत्प्रायश्चित्तकथनञ्च ।	,,
१५७	पूर्वत्र वालघातादत्र मृतपुत्रत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१५८	पूर्वदेशे समुत्पन्नायाः पुत्रपौत्रधनधान्यगजाश्वोष्ट्रादियुक्तायास्त्रियाः यवनीत्वनिदानम् ।	९०
१५९	वेदविद्वरद्विजस्य प्रयागे समुत्पन्नस्य धनपुत्रयुतस्य क्षयरोगनिदानपूर्वकप्रायश्चित्तकथनम् ।	,,
१६०	यमुनातीरजातस्य धनमित्रसुखैश्वर्यमतिस्त्रीभोगयुतस्यक्षत्रियस्यभार्यायाः संतानिराहित्यनिदानम्,तत्प्रायश्चित्तवर्णनञ्च ।	,,

अ०	विषयाः	पृ०
१६१	उत्तमजातिजातस्य बंधुसौख्ययुतस्य संपत्समन्वितस्य जातसंततिदुःखनिवारणाय प्रायश्चित्तकथनम्	९१
१६२	प्राग्भवे कस्याचिद्घातादस्यां तनौ शूलरोगस्तत्प्रायश्चित्तकथनञ्च	९२
१६३	पूर्वजन्मनि मित्रघाताद्वायुरोगस्तत्प्रायश्चित्तवर्णनञ्च।	,,
१६४	गोत्रघातादत्र स्त्रीणां लूतारोगसम्प्राप्तिस्तत्प्रायश्चित्तकथनञ्च ।	,,
१६५	स्नेहहरणात् राजयक्ष्मरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१६६	प्राग्देहे जारमाश्रित्य विषेण पतिमारणादत्र बालवैधव्यं तत्प्रायश्चित्तं च।	,,
१६७	पूर्वे देवागारदाहादत्र रक्तातिसाररोग स्तत्प्रायश्चित्तकथनञ्च ।	९३
१६८	प्रायागनिकटे देशे जातस्य नानामनोरथैः पूर्णस्य धनधान्यसमेतस्य ब्राह्मणस्यापस्माररोगेणपुत्रद्वयमरणनिदानं तत्प्रायश्चित्तकथनञ्च।	,,
१६९	प्राग्भवे गर्भपातनपातकादत्र नार्या गर्भपातदुःखं तत्प्रायश्चित्तञ्च ।	,,
१७०	देवागारदाहान्नार्या अतीसारपीडा तत्प्रायश्चित्तञ्च।	,,
१७१	प्राग्जन्मनि ब्रह्महत्याकरणादत्र कुष्ठरोगस्तत्प्रायश्चित्तकथनञ्च ।	९४
१७२	पतिमित्रघातनान्नार्या वायुरोगपीडा तत्प्रायश्चित्तञ्च ।	,,
१७३	प्राग्भवे अज्ञानादोतृहंत्र्या लूतारोगपीडा तत्प्रायाश्चत्तकथनञ्च ।	,,
१७४	ब्राह्मणकुलोत्पन्नस्य वातपित्तयुतस्य शिरोरोगयुतस्य सुखिनो धीमतो धर्मवत्सलस्य द्विजस्य भार्यायाःकाकवन्ध्यात्वनिदानं तत्प्रायश्चित्तकथनञ्च।	,,
१७५	देवागारे शकृन्मूत्रोत्सर्गादत्र जन्मनि गुदरोगस्तत्प्रायश्चित्तञ्च ।	९५
१७६	अज्ञानात्स्त्रीहंतुरत्र जन्मनि कार्श्यदौर्बल्यप्राप्तिस्तत्प्रायश्चित्तञ्च ।	९५
१७७	बालघातिन्या अत्र नार्या अष्टवर्षादर्वागेव पुत्रमृतिस्तत्प्रायश्चित्तञ्च ।	,,
१७८	पुरा ज्ञानवर्जितब्राह्मणघातादत्रकुष्ठरोगस्तत्प्रायश्चित्तञ्च।	९६
१७९	प्राग्जन्मनि देवद्रव्यापहारादत्र वायुपीडा तत्प्रायश्चित्तञ्च।....	,,
१८०	देवागारे पुरा मलमूत्रोत्सर्गकारिण्या नार्या अत्र जन्मनि गुदरोगप्राप्तिस्तत्प्रायश्चित्तञ्च।	,,
१८१	विद्याधनसमन्वितस्य नानाकलाकुशलस्य विष्णुभक्तिरतस्य प्रयागे ग्रहणे सर्वस्वदानात् पुण्यसंपाकस्यापि द्विजस्य क्षत्रियागमनात् अन्यजन्मनि विपाशानिकटे वैश्यत्वप्राप्तिः, तस्य वार्धक्ये कंडूरोगस्तत्प्रायश्चित्तं च ।	,,
१८२	काममोहितः कामात्पतिव्रतां हन्ति तस्य कार्श्यरोगेण विना प्रायश्चित्तं मृतिकथनम्।	,,
१८३	कन्यकावधादस्मिञ्जन्मनि कन्यकासंततिजननं तत्प्रायश्चित्तकथनञ्च ।	९७
१८४	नार्याःप्राग्जन्मनि देवद्रव्यापहरणादत्र वायुपीडा तत्प्रायश्चित्तकथनञ्च।	,,
१८५	गंगायमुनयोर्मध्ये समुत्पन्नस्य क्षत्रियस्य क्रूरकर्मिण उग्रमशालिनःकुष्ठरोगनिदानम.	,,
१८६	कस्मिंश्चिदपि पर्वते क्षात्रकुले समुत्पन्नाया राज्ञ्या बाल्ये आधिव्याधियुतत्वस्य वार्धक्ये पुत्रनाशस्य च निदानकथनं तत्प्रायश्चित्तकथनञ्च।	,,
१८७	ब्राह्मणकुलोत्पन्नस्य कस्यचित्सदाचारवतो दयान्वितस्य क्रयकर्तुर्नरस्य भार्यायां मृतपुत्रत्वनिदाननिरूपणम् तत्प्रायश्चित्तञ्च ।	९८

अ०	विषयाः	पृ०
१८८	प्राग्जन्मनि राजघातादत्र राजयक्ष्मरोगस्तत्प्रायश्चित्तञ्च ।	९८
१८९	पुरा जन्मनि गर्भहननादत्र जलोदररोगस्तत्प्रायश्चित्तञ्च ।	,,
१९०	शतद्रुनिकटे जातस्य द्विजस्य युवभाव एव कुष्ठक्षयनिदानं तत्प्रायश्चित्तं च ।	,,
१९१	प्राग्वैश्यपत्न्याः पातिव्रतपालनादत्र काश्यां ब्राह्मणीत्वं प्राप्य सुखभोगोत्तरं सहगमनात्स्वर्गप्राप्तिः पत्युः पार्थिवत्वप्राप्तिश्च ।	,,
१९२	शूद्रगृहे द्विजभार्यायाःकामसेवनार्थं प्रवेशेनात्र जन्मनि दारुणवातपीडा तत्प्रायश्चित्तञ्च ।	१००
१९३	नार्याःप्राग्जन्मनि गर्भपातादत्र जलोदरपीडा तत्प्रायश्चित्तञ्च ।	,,
१९४	कामिन्याःप्राक् चौर्येण पक्वफलत्रोटनादत्राष्टवर्षादर्वागेव मृतपुत्रत्वं तत्प्रायश्चित्तञ्च।....	,,
१९५	पूर्वजन्मनि ब्राह्मणघातादत्र नार्याः कुष्ठेन मध्यवयसि पीडा, ज्ञानाकृते सति गलत्कुष्ठेन विना प्रायश्चित्तं मरणञ्च ।	,,
१९६	विपाशानिकटे सप्तयोजनसंमितदेशे जातस्य बहुलोभिनो देवतातिथिद्रूपकस्य बहुभार्यस्य भ्रातृपुत्रहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१९७	पूर्वजन्मनि अन्नहारिण्याः स्त्रिया अजीर्णरोगसंप्राप्तिस्तत्प्रायश्चित्तकथनं च ।	१०१
१९८	देवमूर्तिभंगादत्र जन्मनि अप्रतिष्ठत्वं तत्प्रायश्चित्तञ्च ।	,,
१९९	पूर्वत्र राजवधादत्र राजयक्ष्मणःसमुद्भवस्तत्प्रायश्चित्तञ्च ।	,,
२००	परगर्भघातिन्या नार्या विशेषतो जलोदरपीडा तत्प्रायश्चित्तञ्च ।	,,
२०१	पूर्वजन्मनि वादिनो वाग्विरोधादत्र मूकत्वं तत्प्रायश्चित्तकथनञ्च ।	१०२
२०२	सुखवर्जिताया: शूद्रया: पुत्रहीनतानिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
२०३	प्राग्जन्मनि परनिंदाकरणादत्र खल्वाटत्वं तत्प्रायश्चित्तञ्च ।	,,
२०४	पुरा राजवधादत्र नार्याः क्षयरोगेण विना प्रायश्चित्तं मरणकथनम्।....	,,
२०५	भर्त्रा सह वाग्विरोधादत्र मूकत्वप्राप्तिस्तत्प्रायश्चित्तञ्च ।	,,
२०६	प्राग्जन्मनि देवताप्रतिमाभंगादत्र नार्याः सर्वत्राप्रतिष्ठा तत्प्रायश्चित्तञ्च ।	१०३
२०७	मथुरामंडले देशे जातस्य धनमानरूपबहुदेशाधिकारवतो द्विजस्य सन्तानहीनत्वादिकष्टनिदानं तत्प्रायश्चित्तञ्च।	,,
२०८	वाताधिकशरीरस्य कृशांगस्य स्वल्पवृत्तेर्द्विजस्य पतिभक्तिपरायणायाः शुभाचारायाः प्रियाया मृतापत्यत्वनिदानं तत्प्रायश्चित्तञ्च ।	१०३
२०९	परनिंदाकरणान्नार्याः खल्वाटत्वबहुदोगसंप्राप्तिस्तत्प्रायश्चित्तञ्च ।	१०४
२१०	प्राग्भवे अभक्ष्यभक्षणादत्र गंडमालारोगस्तत्प्रायश्चित्तञ्च ।	,,
२११	कुलघाताद्धनपुत्रहीनत्वं प्रयागक्षेत्रे सततानिवासारव्यक्षप्रायश्चित्तञ्च।....	,,
२१२	सभायां ब्राह्मणपशुघातात् जन्मन्यत्र पक्षाघातरोगः ।	,,
२१३	अभक्ष्यभक्षणान्नार्या गंडमालारोगस्तत्प्रायश्चित्तञ्च ।	१०५
२१४	गौडजातस्य सर्वकलाभिज्ञस्य नाना शास्त्रविदो बहुस्त्रीयुतस्य पुत्रसंतति-	

अ०	विषयाः	पृ०
	हीनस्य क्षयरोगनिदानं तत्प्राय-श्चित्तञ्च ।	१०५
२१५	प्राग्भवे सुरापानादत्र मूत्रकृच्छ्ररोग-स्तत्प्रायश्चित्तकथनञ्च ।	,,
२१६	पापाक्रांते महीतले दुष्टक्षत्रविघाता-र्थं मथुरायां हरेरवतारः ।	,,
२१७	स्वर्णापहरणादत्र कुनखित्वं तत्प्राय-श्चित्तञ्च ।	१०६
२१८	राज्ञो घातादत्र नार्या राजयक्ष्मरोग-संभवस्तत्प्रायश्चित्तञ्च ।	,,
२१९	निरपराधिनो वैश्यस्य हननाद्रक्ता-र्बुदरोगप्राप्तिस्तत्प्रायश्चित्तञ्च ।	,,
२२०	मेरोः समागताया मथुरामंडलं प्रा-ताया नार्या अत्र अद्भुतकार्याणि कृत्वा पुनः स्वस्थाने प्रापणकथनम् ।	,,
२२१	अन्यजन्मनि वैश्यहननादत्र रक्ता-र्बुदरोगः	,,
२२२	पुराभवे सुरापानान्नार्या अत्र मूत्र-कृच्छ्ररोगस्तत्प्रायश्चित्तञ्च ।	
२२३	कस्यचिद्विजस्य कासश्वासार्दितस्य कृपिवाणिज्याभ्यां क्रयविक्रयकारिणो पस्माररोगप्राप्तिस्तत्प्रायश्चित्तञ्च ।	१०७
२२४	ब्राह्मण्याः सुरापानादत्र प्रदररोग-स्तत्प्रायश्चित्तञ्च ।	१०८
२२५	पौनःपुन्येन प्राग्जन्मनि सुरापाना-त्सप्तजन्मपर्यंतं मूत्रकृच्छ्रेण मृत्युर-ज्ञानतः करणे तत्प्रायश्चित्तञ्च ।	,,
२२६	सारस्वतदेशे समुत्पन्नायाः क्षत्रिया-याःयुवभावे क्षयरोगस्तत्प्रायश्चित्तञ्च।	,,
२२७	बलोत्कर्षात्परस्त्रीकामनया अत्र यौ-वने उन्मादरोगस्तत्प्रायश्चित्तञ्च ।	,,
२२८	परस्वर्णापहरणादत्र नार्याः कुनख-रोगस्तत्प्रायश्चित्तञ्च ।	,,
२२९	वैश्यहंत्र्या नार्या आत्रार्बुदरोग-प्राप्तिस्तत्प्रायश्चित्तञ्च ।	१०९
२३०	रौप्यहरणादस्मिञ्जन्मनि चित्रकुष्ट-प्राप्तिस्तत्प्रायश्चित्तञ्च ।	१०९
२३१	सिंधोः पश्चिमभागे नानाभोगसम-न्वितस्य पुत्रस्त्रीसहितस्य म्लेच्छस्य नृपतेः पञ्चाशेऽब्देऽरिष्टप्राप्तिस्तत्प्रा-यश्चित्तकथनञ्च ।	
२३२	पूर्वजन्मनि पुरुषमन्यं रममाणाया नार्या अत्रोन्मादरोगस्तत्प्रायश्चित्तञ्च।	,,
२३३	त्रपुहरणादत्र श्लेष्मरोगप्राप्तिस्तत्प्रा-यश्चित्तञ्च ।	११०
२३४	पत्यौ विद्यमानेऽपि जाराद्गर्भधारण-तोऽत्र गर्भधारणाभावस्तत्प्रायश्चि-त्तञ्च ।	,,
२३५	आखेटं विना हस्तिघातादत्र सर्व-कार्येष्वसिद्धिकथनम् ।	,,
२३६	त्रपुहरणादस्मिन् जन्मनि श्लेष्मरो-गस्तत्प्रायश्चित्तञ्च ।	,,
२३७	विप्रवंशे समुत्पन्नस्य किंचिद्रोग-समन्वितस्योदरार्तिवतो नार्या मृत-पुत्रात्वनिदानकथनं तत्प्रायश्चित्तञ्च।	,,
२३८	ताम्रहारिण्या अस्मिञ्जन्मनि औदुंब-राख्यरोगस्तत्प्रायश्चित्तञ्च ।	१११
२३९	आसन्नगर्भाऽजामांसभक्षणादत्र ज-न्मनि गर्भधारणाभावस्तत्प्रायश्चि-त्तञ्च ।	,,
२४०	मृगयायां गजराजवधादस्मिञ्जन्मनि गजचर्मरोगस्तत्प्रायश्चित्तञ्च।	११२
२४१	परसिद्धान्नहरणादत्र जन्मनि शूल रोगप्राप्तिस्तत्प्रायश्चित्तञ्च ।	,,
२४२	यमुनातटे समुत्पन्नस्य चारणस्य-गोवधप्रायश्चित्ताकरणे षष्टिमिते वर्षेऽरिष्टप्राप्तिकथनम् ।	,,
२४३	शतद्रुनिकटे निवसतो बलात्कारेण शूद्रकन्यादूषणकर्तुः शूद्रस्य षण्ढ-त्वकथनम् ।	,,

अ०	विषयाः	पृ०
२४४	मार्गे परलुंठनादत्र जन्मनि पादरोगस्तत्प्रायश्चित्तञ्च ।	११२
२४५	पर्वतभागे जातस्य वामनस्य सन्मंत्रपरस्य राजसन्मानवतो महोग्रस्यक्षत्रियस्य पुत्रहीनत्वनिदानं तत्प्रायश्चित्तञ्च ।	,,
२४६	क्षात्रवंशसमुद्भवस्य गुल्माद्युदरपीडितस्य द्विभार्यस्य निष्फलव्यापारस्य स्त्रीगर्भस्थिरीभवनोपायकथनम् ।	११३
२४७	वैश्यांगनाया नानाविभूतिपशुसुखभोगयुताया वर्षत्रयपर्यंतं गर्भमोचनदुःखाकुलत्वं तत्प्रायश्चित्तकथनञ्च।	११४
२४८	विपाशानिकटदेशे समुत्पन्नस्य द्विजस्य बहुस्त्रीधनसंयुक्तस्य जातपुत्रविहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	११५
२४९	पूर्वजन्मन्यजाहननादत्राधिकांगत्वंतत्प्रायश्चित्तकथनञ्च ।	,,
२५०	पूर्वं लोहहरणादत्र जन्मनि वर्वराङ्ग्याख्यरोगपीडा तत्प्रायश्चित्तञ्च ।	,,
२५१	राजकुलजाया विलासानुपभुज्य सर्वं कुटुंबगतानां मरणविलोकनदुःखाद्यनुभवः ।	,,
२५२	पुरा अजमुतघातादत्र नार्या अंगाधिकत्वं तत्प्रायश्चित्तञ्च ।	११६
२५३	प्राग्भवे लोहहरणादत्र नार्या वर्वराङ्गान्वितत्वं तत्प्रायश्चित्तञ्च ।	,,
२५४	मोहात्प्राग्यावधीन्नारीं अंजां सात्राधिकांगीं तत्प्रायश्चित्तञ्च ।	,,
२५५	क्षात्रकुलोत्पन्नस्य गुल्मवातोदरामयस्य धनधान्यसमन्वितस्य नारीद्वययुतस्यापि पुत्रसंततिराहित्यनिदानं तत्प्रायश्चित्तञ्च ।	,,
२५६	माथुरमंडले जातायाः सुखदुःखसमाक्रांतायाः क्षत्रियस्त्रियो जातसंततिनाशनिदानं तत्प्रायश्चित्तञ्च ।	११७
२५७	पुरा जन्मनि शुनो वधादत्र चक्रपादरोगस्तप्रायश्चित्तकथनञ्च ।	,,
२५८	प्राग्भवे शूद्रघाताद्दन्तपातनरोगनिरूपणं तत्प्रायश्चित्तञ्च ।	११८
२५९	शुनो वधान्नारीणां अस्मिञ्जन्मनि चक्रपादरोगस्तत्प्रायश्चित्तञ्च ।	
२६०	शूद्रघातादत्र नार्या दन्तपातनजरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
२६१	गोदावरीतीरे जातस्य शूद्रस्य पूर्वं धनिनो मध्येऽते च दुःखिनो मध्यमवर्णस्य जातपुत्रविनाशनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
२६२	पूर्वजन्मनि वभ्रुघातादत्र वभ्रुमंडलरोगपीडा तत्प्रायश्चित्तञ्च ।	११९
२६३	पूर्वं नानाविधजीवाश्रयवनदाहादत्र नार्याः शूद्रया जातसंततिहीनत्वं कुष्ठरोगश्च तन्निवृत्तये प्रायश्चित्तकथनञ्च ।	,,
२६४	पूर्वं शशघातादत्र कुब्जवर्णत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
२६५	स्वपत्न्याः पण्यस्त्रीकर्मत उपजीवनादस्मिञ्जन्मनि पंढत्वं तत्प्रायश्चित्ताभावश्च ।	,,
२६६	पूर्वं नकुलघातादत्र जन्मनि वभ्रुमंडलाख्यरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
२६७	क्षात्रकुले जातस्योदरार्तियुतस्य कटिपृष्ठोरुवंशेषु बाल्ये ग्रहणीगदयुतस्य भार्यायाः सन्ततिहीनत्वं तत्प्रायश्चित्तञ्च ।	१२०
२६८	स्त्रीणामपि तथा ।	,,

अ०	विषयाः	पृ०
२६९	प्राग्जन्मनि दिवाभीतघातादत्र पाण्डुरोगस्तत्प्रायश्चित्तकथनञ्च ।	१२१
२७०	गंगायाः प्राक्परदेशे जातस्य शूद्रस्य अपुत्रत्वनिदानं तत्प्रायश्चित्तञ्च।	”
२७१	शतद्रोः पूर्वभागे क्षत्रकुलोत्पन्नस्य भ्रातृमित्रधनपुत्रस्य सौम्यस्य स्त्रीद्वययुतस्य नार्या मृतप्रजत्वनिदानं तत्प्रायश्चित्तञ्च ।	१२२
२७२	कुरुक्षेत्राद्याम्ये जातस्य वैश्यकुलजस्य बहुपुत्रसमन्वितस्य जातपुत्रविहीनत्वनिदानं तत्प्रायश्चित्तञ्च ।	”
२७३	पंचनददेशसमुत्पन्नस्य द्विजस्य पित्ताधिकस्येष्टमनोरथहीनस्य पुत्रसंततिदुःखनिदानं तत्प्रायश्चित्तञ्च ।	१२३
२७४	ऐरावतीनिकटे त्रिंशद्योजनान्तर्देशे जातस्य वैश्यस्य मनोदुःखसमन्वितस्य यौवन एव नेत्ररोगस्तत्प्रायश्चित्तञ्च ।	१२४
२७५	गंगायाः सप्तयोजनसंमितपश्चिमभागे जातस्य वणिक्सुतस्य जातसंततिनाशनिदानं तत्प्रायश्चित्तं च ।....	”
२७६	कुरुजांगले जातस्य ब्राह्मणस्य शिशुनाशनिदानं तत्प्रायश्चित्तं च ।	१२५
२७७	शतद्रोः समीपे वंदिषु जातस्य गौरस्य श्रद्धान्वितस्य भार्याया गर्भधारणाभावनिदानं तत्प्रायश्चित्तं च।	१२६
२७८	शतद्रोः पूर्वभागे जातस्य शूद्रस्य पूर्वजन्मनि ब्राह्मणीगमनदोषख्यापनम।	”
२७९	पूर्वत्र द्रव्यहरणादस्मिन्देहे गलगंडरोगस्तत्प्रायश्चित्तञ्च ।....	१२७
२८०	भोजनसमये चाण्डालवचःश्रवणात्पित्तोद्रेकपाण्डुरत्वरोगस्तत्प्रायश्चित्तञ्च।	”
२८१	पुराखरकाकादिमांसभक्षणादत्र स्फोटरोगस्तत्प्रायश्चित्तञ्च।	”
२८२	अनिर्दशाया गोः पयःपानेस्फोटरोगस्तत्प्रायश्चित्तञ्च ।	१२८
२८३	स्वामिद्रोहाद् देवब्राह्मणधनहरणाच्चास्मिञ्जन्मनि वातरोगस्तत्प्रायश्चित्तकथनञ्च ।	”
२८४	सवर्णागमनाद् वातरक्तरोगः लशुनगृंजनतालफलाशनाद्वातापित्तरोगस्तत्प्रायश्चित्तकथनञ्च।	”
२८५	वैद्यशास्त्रमदादोषमन्यथा कृत्वाप्रयुञ्जानस्य रक्तपित्तरोगस्तत्प्रायश्चित्तकथनञ्च ।	१२९
२८६	त्रपुहरणादत्र श्लेष्मरोगस्तत्प्रायश्चित्तकथनञ्च ।	”
२८७	धूर्तताकरणादत्रापस्माररोगस्तत्प्रायश्चित्तकथनञ्च ।	”
२८८	नागहरणाच्छीर्षरोगस्तत्प्रायश्चित्तकथनम्, गुरूपरोधाच्छीर्षरोगस्तत्प्रायश्चित्तकथनम्, ब्रह्मचारिणो भिन्नपात्रभोजने शिरोरोगस्तत्प्रायश्चित्तञ्च ।	”
२८९	धर्मकर्माण्युपक्रम्य मध्ये तत्त्यागात्पूतिवक्त्ररोगस्तत्प्रायश्चित्तञ्च ।	१३०
२९०	पक्वान्नहरणाज्जिह्वारोगस्तत्प्रायश्चित्तकथनञ्च ।	”
२९१	आमान्नहरणाद्दन्तपीडारोगस्तत्प्रायश्चित्तकथनञ्च ।	”
२९२	परेषां निष्ठुरवचनात्खरोक्तिहास्यकरणाच्च मूकत्वं तत्प्रायश्चित्तञ्च ।	”
२९३	लवणस्यापहारणात् घ्राणाङ्घ्रिपाणिशीर्णत्ववर्बरस्वरत्वरोगतत्प्रायश्चित्तकथनञ्च ।	१३१
२९४	कुक्कुटहननाद्वक्रनासिकात्वं तत्प्रायश्चित्तञ्च ।	१३२
२९५	देवद्विजगृहे मूत्रपुरीषकरणाद्दुरोगस्तत्प्रायश्चित्तकथनञ्च ।	१३३

अ०	विषयाः	पृ०
२९६	प्राग्जन्मनि ब्रह्मधातात्पाण्डुकुष्ठरोगस्तत्प्रायश्चित्तकथनञ्च ।	१३४
२९७	इक्षुविकारहरणादुदरगुल्मरोगस्तत्प्रायश्चित्तनिरूपणञ्च ।	,,
२९८	गर्भपातनाद्यकृत्प्लीहाजलोदररोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
२९९	मन्दाग्निरोगजनकपातकनिरूपणंतत्प्रायश्चित्तकथनञ्च ।	१३५
३००	वेदाध्ययनसमये गुरुणाअननुयातस्य प्रज्ञाहीनत्वजडत्वसंप्राप्तिस्तत्प्रायश्चित्तञ्च ।	,,
३०१	मूत्रकृच्छ्ररोगजनकपातककथनंतत्प्रायश्चित्तञ्च ।	,,
३०२	चाण्डालीगमनात्प्रमेहरोगसंप्राप्तिस्तत्प्रायश्चित्तकथनञ्च ।	१३६
३०३	मातृगमने लिङ्गनाशश्चांडालीगमने हीनकुष्ठरोगश्च, समासेन तत्प्रायश्चित्तकथनम् ।	,,
३०४	गुदरोगजनकदोषकथनं तत्प्रायश्चित्तकथनञ्च ।	१३७
३०५	स्मार्ताग्निशमनकरणादतिसाररोगस्तत्प्रायश्चित्तकथनञ्च, हरिवंशश्रवणविधिनिरूपणञ्च ।	,,
३०६	चतुर्विधबंध्यात्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	१३८
३०७	स्त्रीणांस्रवद्गर्भनिदानकथनंतत्प्रायश्चित्तविधिकथनञ्च ।	१३९
३०८	रजस्वलागमनतदुच्छिष्टभोजनजनितरोगकथनं तत्प्रायश्चित्तकथनञ्च अरुणस्याधीगत्वकारणनिरूपणञ्च ।	१४०
३०९	कर्णो साक्षाज्जातिस्मरत्वं कस्येति प्रश्ने श्रीकृष्णावतारकथनम् ।	१४२
३१०	गंगासमीपदेशे राजकुलोत्पन्नस्य मतिमतो रत्नचयान्वितस्य धर्मशास्त्रक्रियाहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	१४२
३११	नर्मदातटे जातायाराजकन्यायायवन्या महाविभूतियुतायाः पुत्रभ्रातृविहीनायाः पूर्वापरजन्मकथनम् ।	१४३
३१२	सिंधुमंडले रम्यपर्वते जातस्य सुखैश्वर्यधनान्वितस्य पंढत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
३१३	पुष्करात्प्राक्परदेशे जातस्य महाभूमिभुजां म्लेच्छानां वंशे समुत्पन्नस्य प्राक्परलोकनिर्णयकथनम् ।	,,
३१४	भर्त्रा सहानुगामिनीनां नारीणां गतिवर्णनम् ।	१४४
३१५	कामतो ब्रह्महत्याकरणात्क्षयरोगो जन्मत्रयात्पापमुक्तिकथनञ्च ।	,,
३१६	पूर्वजन्मन्यज्ञानतो ब्रह्मघातेऽपि क्षयरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
३१७	कस्यचिन्महासाधोश्चारुवर्णस्य द्विजस्य स्वाचारकुलधर्मज्ञस्य भार्यायाः पातिव्रतपरायाः ऋतुहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
३१८	प्राक् सीमावादे ब्राह्मणघातादत्र क्षत्रियत्वमासाद्यजीवस्य पुत्रमरणोत्तरं क्षयरोगेण स्वमरणकथनम् ।	१४६
३१९	अयोध्याभिधदेशे समुत्पन्नस्य वैश्यस्य गौरवर्णस्य दक्षस्य महोद्यमिनो युवभावे क्षयरोगप्राप्तिनिदानकथनं तत्प्रायश्चित्तकथनञ्च ।	,,
३२०	कामात् पूर्वजन्मनि ब्रह्मघातादत्र नार्याः क्षयरोगेण मरणकथनम्	,,
३२१	स्वसृघातादस्मिञ्जन्मनि बाधिर्यरोगस्तत्प्रायश्चित्तञ्च ।	१४७

अ०	विषयाः	पृ०
३२२	पुरा अज्ञानतो ब्रह्मघातादत्र नार्याः क्षयरोगप्राप्तिस्तत्प्रायश्चित्तकथनञ्च ।	१४८
३२३	प्राग्जन्मनिमोहात्कुक्कुटघातादत्र नार्या नासावक्रत्वरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
३२४	गंगायाः प्राक्पश्चिमदेशे जातस्य शूद्रस्य अपुत्रत्वनिदानं तत्प्रायश्चित्तकथनञ्च।	,,
३२५	विराटदेशे जातायाः क्षत्रियायाबाल्ये क्षयरोगयुताया अनपत्यायाः पूर्ववृत्तकथनं तस्याविना प्रायश्चित्तं त्रयोविंशे वर्षे मरणनिरूपणञ्च ।	१४८
३२६	पूर्वे जन्मनि सारिकाघातादत्र जन्मनि स्खलितवाक्त्वं तत्प्रायश्चित्तञ्च ।	,,
३२७	स्त्रीणामपि तथा ।	,,
३२८	वकघातादत्र जन्मनि लम्बकण्ठत्वं तत्प्रायश्चित्तञ्च ।	,,
३२९	स्त्रीणामपि तथा ।	,,
३३०	कस्यचिद्विजकुलजस्य धर्मिष्ठस्य वित्तवतो गुल्मादिवातरोगयुतस्य शीर्षपीडायुतस्य भार्याया मृतवत्सात्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
३३१	पूर्वजन्मनि काकघातादत्र कूर्चहीनत्वं तत्प्रायश्चित्तञ्च ।	१५०
३३२	स्त्रीणामपि तथा ।	,,
३३३	पूर्वभवे अभक्ष्यभक्षणादत्र कृमिलोदरत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
३३४	स्त्रीणामपि तथा ।	,,
३३५	दुष्टस्पृष्टपदार्थभक्षणादत्र जन्मनि कृशोदरत्वरोगस्तत्प्रायश्चित्तञ्च ।	,,
३३६	स्त्रीणामपि तथा ।	,,
३३७	गंगापूर्वभागे जातस्य द्विजस्य बन्धुस्त्रीसौख्ययुतस्य भार्याया गर्भदोषनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
३३८	कस्याश्चिद्विजभार्यायाः पुत्रसंततिहीनायाः क्षयरोगनिदानं तत्प्रायश्चित्तञ्च ।	१५१
३३९	पूर्वजन्मनि श्वोच्छिष्टभक्षणाद्रात्र्यंधत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
३४०	स्त्रीणामपि तथा ।	,,
३४१	विडालोच्छिष्टभोजनादपि रात्र्यंधत्वं तत्प्रायश्चित्तकथनञ्च ।....	,,
३४२	स्त्रीणामपि तथा ।	१५२
३४३	चांडालीगमनादजगरत्वं मूढत्वं च, तत्प्रायश्चित्तनिरूपणमपि ।	१५३
३४४	स्त्रीणामपि तथा ।	,,
३४५	पूर्वभवे परान्नविघ्नकरणादत्र जन्मनि अजीर्णरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
३४६	स्त्रीणामपि तथा ।	,,
३४७	द्विजकुलोत्पन्नस्य धर्मवत्सलस्य किलासदद्रुकण्ड्वादिरोगयुतस्य भार्याया वातव्यथायुताया मृतवत्सात्वप्रश्नः ।	,,
३४८	पूर्वाध्यायोक्तद्विजभार्याया मृतवत्सात्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
३४९	प्राग्जन्मनि ब्राह्मणघातार्थं विषदानादत्र छर्दिरोगेण विनाप्रायश्चित्तं मृत्युकथनम् ।	१५४
३५०	स्त्रीणामपि तथा ।	,,
३५१	द्विजेतराय विषदानादपि छर्दिरोगपीडा तत्प्रायश्चित्तकथनम् ।	,,
३५२	कामतो भ्रातृघाते विनाप्रायश्चित्तं मूकत्वम् ।	,,
३५३	पञ्चनददेशे जातायाः सुखैश्वर्यसमन्वितायाः यवन्याः पुत्रसंततिराहित्यनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
३५४	देवद्रव्यापहरणादत्र जन्मनि पाण्डुरोगप्राप्तिस्तत्प्रायश्चित्तञ्च ।	,,

अ०	विषयाः	पृ०
३९५	कस्मैचिदपि पूर्वभवे विषदानान्नार्या अत्र जन्मनि छर्दीरोगस्तत्प्रायश्चित्तञ्च।	१९५
३९६	गंगाया दशयोजनसंमिते क्षत्रियकुले जातस्य वहुकन्यायुतस्य जातपुत्रभृतिनिदानं तत्प्रायश्चित्तनिरूपणञ्च ।	,,
३९७	पूर्वं व्यभिचारेण नरकयातना उपभुज्य पुनरत्र व्यभिचाररतायाः काशीनिवासप्रायश्चित्तकथनञ्च ।	,,
३९८	प्राग्जन्मनि द्विजवंचनादत्रापस्मारोगस्तत्प्रायश्चित्तकथनञ्च।	,,
३९९	पूर्वभवे भ्रातृघातादत्र जन्मनि नार्या मूकत्वं तत्प्रायश्चित्तकथनञ्च ।	१९६
३६०	क्षत्रियस्य अक्षिप्रपीडितस्य पूर्वजन्मनि देवद्रव्यापहरणाद्विंशेवर्षे व्यतीते देहभंगस्तत्प्रायश्चित्तञ्च ।	,,
३६१	सवस्नेहहरणादत्र जन्मनि क्षयरोगप्राप्तिस्तत्प्रायश्चित्तकथनञ्च ।	,,
३६२	पूर्वब्रह्मवादरतस्य पतिव्रताया भार्यायाः पतिदोषात् मानुषत्वं तस्माच्छ्वलोकप्राप्तिश्च ।	,,
३६३	प्राग्भवेऽज्ञानाद्भ्रातृवधकारिण्या मूकत्वं तत्प्रायश्चित्तनिरूपणञ्च ।	,,
३६४	पूर्वं कस्यचिदपि वंचनान्नार्या अपस्माररोगस्तत्प्रायश्चित्तवर्णनञ्च ।	,,
३६५	कस्यचिद् ब्राह्मणस्य उदरे वायुरोगयुतस्य शिरःपीडायुतस्य भार्यायामृतवत्सात्वनिदानं तत्प्रायश्चित्तं च ।	,,
३६६	पूर्वजन्मनि स्नेहहरणान्नार्याः क्षयरोगस्तत्प्रायश्चित्तकथनञ्च ।	१९७
३६७	पूर्वभवे धौर्त्येन लोकवंचनादत्रापस्मारोगस्तत्प्रायश्चित्तञ्च ।	,,
३६८	स्वर्णहरणान्नार्याः सुवर्णकारस्त्रीत्वं तत्र पुत्राभावे प्रायश्चित्तकथनञ्च ।	,,
३६९	अन्नहरणादजीर्णरोगस्तत्प्रायश्चित्तकथनञ्च ।	१९८
३७०	प्राग्जन्मनि मोहतो भ्रातृघातादत्र नार्या मूकत्वं तत्प्रायश्चित्तकथनञ्च।	,,
३७१	पूर्वजन्मनि बालघातादत्र मृतपुत्रत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
३७२	पुत्रपौत्रधनधान्यगजाश्वोष्ट्रवाहनादियुताया यवन्याः पूर्ववृत्तकथनम् ।	,,
३७३	कस्यचित्सर्वविद्याविशारदस्य धनपुत्रयुतस्य द्विजस्य क्षयरोगनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
३७४	कुरुक्षेत्राद्दशयोजनोत्तरभागे जातस्य क्षत्रियस्य शोभनस्त्रीभृत्यसुखैश्वर्यनानावाहनभोगभुजो जातपुत्रविनाशनिदानकथनं तत्प्रायश्चित्तञ्च ।	,,
३७५	सर्वपापविशोधनप्रायश्चित्तम् ।	१९०
३७६	तीर्थमार्गे ब्राह्मणलुंठनाद्धनलुब्धब्राह्मणमरणे राज्ञः पुत्राभावस्तत्प्रायश्चित्तकथनञ्च ।	,,
३७७	पूर्वजन्मनि उलूकघातान्नार्याः पाण्डुरोगोत्र जन्मनि तत्प्रायश्चित्तकथनञ्च।	,,
३७८	लोहितनदसमीपे रम्यस्थलदेशे जातस्य प्रियाधनबुद्धियुतस्य द्विजस्य मनोदुःखनिदानं तत्प्रायश्चित्तञ्च ।	,,
३७९	सर्वरोगनिवारणाय परमायुःकामस्य शान्तिपुष्टिकरप्रयोगकथनम् ।	,,
३८०	स्नेहहरणादत्र जन्मनि राजयक्ष्मरोगस्तत्प्रायश्चित्तकथनञ्च ।....	१९१
३८१	प्राग्भवे जाराश्रयेण विषदानात्पतिघ्न्या नार्या अत्र बाल्यएव विधवात्वं तत्प्रायश्चित्तकथनञ्च ।	,,
३८२	पुरा देवागारदाहादत्र रक्तातिसाररोगतत्प्रायश्चित्तकथनञ्च ।	१९२

अ०	विषयाः	पृ०
३८३	प्रयागनिकटे जातस्य सर्वशास्त्रार्थको-विदस्य विविधधनधान्ययुतस्य द्विजस्य संततिदुःखनिदानं तत्प्रायश्चित्तञ्च।	१६२
३८४	प्राग्जन्मनि गर्भपातनपापान्नार्या अत्र गर्भपातदुःखं तत्प्रायश्चित्तञ्च।	,,
३८५	प्राग्देवागारदाहकर्त्र्या नार्या अत्रातीसारपीडा तत्प्रायश्चित्तञ्च।	१६३
३८६	पूर्वजन्मनि पतिमित्रघातादत्र नार्या वायुरोगपीडा तत्प्रायश्चित्तञ्च।	,,
३८७	पुरा अज्ञानाद्गोत्रघातकरणे नार्या अत्रत्नूतारोगपीडा तत्प्रायश्चित्तञ्च।	,,
३८८	अल्पद्रव्यस्य पित्तवायुपीडितस्य सद्वृत्तस्य सुखिनो द्विजस्य शुभाचारायाः भार्यायाः काकवन्ध्यात्वनिदानं तत्प्रायश्चित्तकथनञ्च।....	,,
३८९	पूर्वजन्मनि देवतागृहे शकृन्मूत्रकर्तुर्गुदरोगार्तिस्तत्प्रायश्चित्तकथनञ्च।	१६४
३९०	अज्ञानात्पूर्वजन्मनि स्त्रीघातकस्य बलनाशककार्श्यरोगस्तत्प्रायश्चित्तकथनञ्च।	
३९१	प्राग्भवे बालघातिन्या अत्राष्टवर्षादर्वाक् बालमरणं तत्प्रायश्चित्तञ्च।	,,
३९२	ब्राह्मणघातादत्र कुष्ठरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
३९३	देवद्रव्यहरणादत्र जन्मनि वायुपीडा तत्प्रायश्चित्तनिरूपणञ्च।	१६५
३९४	देवागारे मूत्रपुरीषोत्सर्गादत्र नार्या गुदरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
३९५	विपाशानिकटे सप्तयोजनदूरे जातस्य क्षत्रियाधमस्य सर्वसौख्ययुतस्य-वार्धक्ये कण्डुरोगनिदानं तत्प्रायश्चित्तं च।	,,
३९६	कामात्साध्वीस्त्रीघातकस्येहजन्मनि कार्श्यरोगेण मरणकथनम्।	,,
३९७	पूर्वभवे कन्यावधादत्र कन्याप्रजत्वं तत्प्रायश्चित्तकथनञ्च।	१६५
३९८	देवद्रव्यापहरणादत्र नार्या वातपीडा तत्प्रायश्चित्तकथनञ्च।	१६६
३९९	पूर्वजन्मनि ब्राह्मणलुंठनात्तन्मरणे अत्र जन्मनि क्षत्रियस्य कुष्ठरोगस्तत्प्रायश्चित्तकथनञ्च	,,
४००	क्षात्रकुले समुत्पन्नायाः पतिप्रियरतायाः सुखैश्वर्ययुताया वार्धक्ये पुत्रवर्जननिदानं तत्प्रायश्चित्तकथनञ्च।	,,
४०१	विप्रकुलजस्य सदाचारवतो दयानियमतत्परस्य क्रयविक्रयकर्तुर्भार्यायाः पतिभक्तिपरायणाया मृतपुत्रत्वनिदानं तत्प्रायश्चित्तकथनञ्च।	१६७
४०२	राजघातादत्र राजयक्ष्मरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
४०३	पुरा गर्भपातनादत्र जन्मनि जलोदररोगस्तत्प्रायश्चित्तकथनञ्च।	१६८
४०४	शतद्रुनिकटे जातस्य द्विजस्य वेदाभ्यासकरणात्सकुष्ठक्षयप्राप्तिस्तन्निदानकथनपूर्वकं प्रायश्चित्तकथनञ्च।	,,
४०५	काश्यां पातिव्रतपरायाः सर्वसौख्ययुताया भर्तृतोषिण्याः सद्गतिकथनं पूर्ववृत्तकथनञ्च।	,,
४०६	पूर्वशूद्रगृहाग्निःश्वहननेऽत्र वातरोगपीडा तत्प्रायश्चित्तकथनञ्च।	१६९
४०७	प्राक्स्वगर्भपातनेनात्र जलोदररोगपीडा तत्प्रायश्चित्तकथनञ्च।	,,
४०८	पूर्वजन्मनि भक्षणार्थं फलचौर्यकारिण्या नार्या अत्र अष्टवर्षादर्वाक् पुत्रनिधनं तत्प्रायश्चित्तकथनञ्च।	,,
४०९	पूर्वं ब्राह्मणघातादत्र जन्मनि तस्मिन्नेव वयसि कुष्ठरोगेण मृतिः।	,,

अ०	विषयाः	पृ०
४१०	विपाशानिकटेदेशे जातस्य शूद्रस्य भ्रातृपुत्रविहीनत्वनिदानं तत्प्रायश्चित्तञ्च ।	१६९
४११	पूर्वजन्मनि परान्नहरणादत्र देहे नार्या अजीर्णरोगस्तत्प्रायश्चित्तञ्च ।	१७०
४१२	देवागारे परस्थापितां मूर्तिं भंक्त्वा सर्वत्राप्रतिष्ठाप्राप्तिस्तत्प्रायश्चित्तकथनञ्च।	,,
४१३	मोहाद्राजवधे कृतेऽत्र राजयक्ष्मपीडा तत्प्रायश्चित्तकथनञ्च ।	,,
४१४	पूर्वभवे परगर्भाणां पातनेऽत्र जलोदरपीडा तत्प्रायश्चित्तकथनञ्च ।	,,
४१५	पूर्वजन्मनि वादिनां वाग्विरोधेनात्र मूकत्वं तत्प्रायश्चित्तकथनञ्च ।	१७१
४१६	पुरासपत्नीगर्भपातनादत्र नार्याः शूद्रदेहगतायाः सर्वदुःखार्दितायाः सुताभावस्तत्प्रायश्चित्तकथनञ्च ।	,,
४१७	पूर्वं राजवधादत्र नार्यास्तस्मिन्काले क्षयरोगपीडा तत्प्रायश्चित्तकथनञ्च ।	,,
४१८	प्राग्भवे परनिंदाकर्तुः प्रायश्चित्तकथनम् ।	,,
४१९	पूर्वभवे भर्तुर्वाग्विरोधिनी अत्र मूका भवति तत्प्रायश्चित्तकथनम् ।	,,
४२०	पूर्वभवे देवागारस्थितमूर्तिभेदनान्नार्या अत्र प्रतिष्ठाभावस्तत्प्रायश्चित्तकथनञ्च ।	,,
४२१	प्राग्जन्मनि द्विजद्रव्यापहारादस्मिन् भवे सुरूपस्त्रीसुखोज्झितस्य संतान सुखहीनत्वं तत्प्रायश्चित्तञ्च ।	१७२
४२२	वाताधिकशरीरस्य क्षामाङ्गस्य नेत्रतोदयुतस्य द्विजकुलोत्पन्नस्य भार्यायाः पतिभक्तियुताया मृतापत्यत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
४२३	पूर्वंमोहात्परनिंदाकरणेऽत्रनार्याः खल्वाटत्वं तत्प्रायश्चित्तञ्च ।	१७३
४२४	प्राग्जन्मनि अभक्ष्यभक्षणादत्र जन्मनिगंडमालारोगस्तत्प्रायश्चित्तकथनञ्च।	,,
४२५	पुरा कुलघातिन्या अत्र संकरोत्पन्नाया धनपुत्रहीनत्वं तत्प्रायश्चित्त कथनञ्च ।	,,
४२६	पूर्वभवे अभक्ष्यभक्षणान्नार्या अत्र गंडमालारोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
४२७	ब्राह्मणार्थे ब्राह्मणहननादत्र जन्मनि पुत्रसंततिरहितस्य क्षयरोगस्तत्प्रायश्चित्तकथनञ्च ।	१७४
४२८	पूर्वं विनापराधं परपक्षघातिन्या नार्या अत्र पक्षघातरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
४२९	पूर्वजन्मनि सुरायास्त्रिविधायाःपानाज् जन्मन्यत्र मूत्रकृच्छ्ररोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	,,
४३०	मथुरायां जातविष्ण्ववतारकथनम् ।	१७५
४३१	पूर्वभवे स्वर्णापहरणादत्र कुनखित्वं तत्प्रायश्चित्तकथनञ्च ।	,,
४३२	पुराभवे राजघातकारिण्यानार्या अत्र तस्मिन्वयसि राजयक्ष्मरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
४३३	पुराभवे अनागसं वैश्यं हत्वा अत्र रक्तार्बुदरोगतः पीडनं तत्प्रायश्चित्तकथनञ्च ।	,,
४३४	मेरोः समागतानां मथुरामंडलजानां प्रशंसासमन्वितं पुनस्तत्रैवगमनम् ।	,,
४३५	अन्यजन्मनि मोहाद्वैश्यघातेनात्र रक्तार्बुदरोगपीडनं तत्प्रायश्चित्तकथनञ्च ।	,,
४३६	पूर्वजन्मनि सुरापानान्नार्या अत्र भवे मूत्रकृच्छ्ररोगपीडा तत्प्रायश्चित्तकथनञ्च ।	,,

अ०	विषयाः	पृ०
४३७	कस्यचिद्विप्रस्याल्पवित्तस्य कासश्वासोदरपीडायुतस्य क्रयविक्रयकर्तुः प्रियायाः स्ववाक्यप्रतिपादिन्या रजोर्त्या पीडिताया अपत्यमृतिनिदानं तत्प्रायश्चित्तकथनञ्च ।	१७६
४३८	मोहात्प्राग्जन्मनि सुरापानादत्र जन्मनि नार्याः प्रदररोगपीडा तन्निरसनाय प्रायश्चित्तकथनञ्च ।	१७७
४३९	पुराभवे त्रिविधसुरापानादस्मिञ्जन्मनि मूत्रावरोधरोगेण मृत्युप्राप्तिः, सप्तमे जन्मनि सान्तपनाख्यप्रायश्चित्तकथनं प्रतिजन्मनिसुरापानचिह्नकथनं च ।	”
४४०	प्राग्भवे अकामतो वैश्यवधादत्र नार्या रक्तार्बुदरोगस्तत्प्रायश्चित्तकथनञ्च ।	”
४४१	प्राग्जन्मनि कंठपाशादिसंभवदुस्तरपापादत्र क्षयरोगस्तत्प्रायश्चित्तकथनञ्च ।	”
४४२	पूर्वजन्मनि बालोत्कर्षणात् परस्त्रीकामिनोऽत्रोन्मादरोगस्तत्प्रायश्चित्तकथनञ्च ।	”
४४३	पुरा परद्रव्यापहारादत्र नार्याः कुनखत्वरोगस्तत्प्रायश्चित्तकथनञ्च ।	”
४४४	पूर्वभवे वैश्यहननादत्र नार्या रक्तार्बुदरोगपीडा तत्प्रायश्चित्तकथनञ्च ।	१७८
४४५	पूर्वभवे रौप्यहरणादत्र चित्रकुष्टस्तत्प्रायश्चित्तञ्च ।	”
४४६	सिंधोः पश्चिमभागे शतयोजनसंमिते म्लेच्छदेशसमुद्भवस्य यधनस्य राजैश्वर्यभोगिनो पञ्चाशेऽब्देऽरिष्टप्राप्तिनिदानं तत्प्रायश्चित्तकथनञ्च ।	”
४४७	पुराभवे परपुरुषेण रतौ कृतायामत्र नार्या उन्मादरोगस्तत्प्रायश्चित्तकथनञ्च ।	१७८
४४८	पत्यौ पुत्रे च विद्यमाने जाराद्गर्भधारणे अत्र नार्याः शूद्रा गर्भधारणाभावस्तत्प्रायश्चित्तकथनञ्च ।	१७९
४४९	मृगयां विना हस्तिमारणे अत्र जन्मनिसर्वकार्येष्वसिद्धिस्तत्प्रायश्चित्तञ्च ।	”
४५०	बलोत्कर्षेण ब्राह्मणीगमनादत्रोन्मादरोगस्तत्प्रायश्चित्तकथनञ्च ।	”
४५१	पूर्वजन्मनि त्रपुहरणादत्र श्लेष्मरोगस्तत्प्रायश्चित्तकथनञ्च ।....	”
४५२	धनधान्यसम्पन्नस्य द्विजस्योदरार्तिमतो बहुकन्यस्य भार्याया मृतपुत्रत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	”
४५३	पूर्वजन्मनि ताम्रहरणादत्रौदुंबररोगस्तत्प्रायश्चित्तकथनञ्च ।	१८०
४५४	आसन्नप्रसवाजावधादत्र जन्मनि नार्या गर्भधारणाभावस्तत्प्रायश्चित्तकथनञ्च ।	”
४५५	पूर्वजन्मनि परसिद्धान्नहरणादत्र मूलरोगपीडा तत्प्रायश्चित्तकथनञ्च ।	१८१
४५६	नेत्ररोगार्दितस्य जातसंततिनाशनिदानं तत्प्रायश्चित्तकथनञ्च ।	”
४५७	पूर्वभवे रीत्यपहारकस्यात्रापिंगलाक्षत्वं तत्प्रायश्चित्तकथनञ्च ।	१८२
४५८	पूर्वजन्मनि खरहननादत्र खररोमत्वं तत्प्रायश्चित्तकथनञ्च ।	”
४५९	प्राग् गर्भपुष्टयर्थमंडभक्षणादत्र संकरजातौ समुत्पद्य न गर्भधारणं तत्प्रायश्चित्तकथनञ्च ।	”
४६०	पूर्वभवे खरहननादत्र नार्या अपि खररोमत्वं तत्प्रायश्चित्तकथनञ्च ।	”

अ०	विषयाः	पृ०
४६१	पुरा रीतिहरणादस्मिन् भवे नार्याः पिंगाक्षित्वं तत्प्रायश्चित्तकथनञ्च ।	१८३
४६२	प्राग्जन्मनि परासिद्धान्नहरणादत्र नार्याः शूलरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
४६३	पुरा उष्ट्रघातादत्रविकृतस्वरत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
४६४	वन्ध्यायाः सन्ततिजनकोपायः ।....	,,
४६५	प्राग्जन्मनि कांस्यहरणादत्र शीर्षरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
४६६	पञ्चनददेशे जातस्य क्षत्रियाधरस्य सुखेश्वर्यधनयुतस्यबहुकन्यस्य ज्येष्ठभार्याया मृतपुत्रत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
४६७	पूर्वं कांस्यहरणाच्छीर्षरोगस्तत्प्रायश्चित्तकथनञ्च ।	१८४
४६८	स्त्रीणामपि तथा ।	,,
४६९	पूर्वजन्मनि कांस्यहरणान्नार्या विकृत स्वरत्वं तत्प्रायश्चित्तञ्च ।	,,
४७०	पूर्वभवे मोहात्परघृतहरणेन नेत्ररोगस्तत्प्रायश्चित्तकथनञ्च ।....	,,
४७१	प्राग्भवे स्वशरीरविवृद्ध्यर्थं मृगभक्षणाद्गायत्रीलक्षजपः ।	१८५
४७२	पुरा गुडहरणान्नार्या अत्र गुल्मरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
४७३	पूर्वजन्मनि स्त्रीपरित्यागादत्र स्त्रीविवर्जितत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
४७४	मृगयां विना मृगवधेऽत्र तस्मिन्काले षण्ढत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
४७५	पूर्वभवे परतैलापहरणादत्र कण्डूरोगस्तत्प्रायश्चित्तकथनञ्च ।	१८६
४७६	पूर्वजन्मनि राजामात्यस्य राजपत्न्यां गर्भधारणादत्र जाङ्गलदेशे जातस्य शूद्रस्य षण्ढत्वम् ।	,,
४७७	पुरा गर्भघातकरणादत्र नार्या गर्भपातनदुःखं तत्प्रायश्चित्तकथनञ्च ।	१८६
४७८	क्षात्रेकुले समुत्पन्नस्य पाण्डुरद्युतेर्बाल्ये ग्रहणीरोगिणो भार्याया गर्भास्थिरत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
४७९	पूर्वजन्मनि तुरंगघातादत्र वक्रकंठरोगस्तत्प्रायश्चित्तकथनञ्च ।	१८७
४८०	पुराभवे शृगालवातादत्र पादवातस्तत्पीडानिवृत्तये प्रायश्चित्तकथनञ्च।	,,
४८१	गंगातीरे समुत्पन्नस्य शूद्रस्य धनपुत्र समन्वितस्य युवभावे चक्षुर्हीनत्वनिदानं तत्प्रायश्चित्तञ्च ।	,,
४८२	पूर्वजन्मनि शृगालघातादत्र नार्या ऊर्ध्वपतनात्पादभंगस्तत्प्रायश्चित्तकथनञ्च ।	१८८
४८३	यमुनातीरे समुपन्नस्य क्षत्रियस्य धनसौख्ययुतस्य पितृभातृविहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
४८४	पूर्वजन्मनि बलात्कारेण शूद्रकन्यादूषणादत्रतस्यषण्ढत्वकथनं तत्प्रायश्चित्तञ्च ।	१८९
४८५	पुरा मार्गे परलुंठनादत्र पादरोगस्तत्प्रायश्चित्तञ्च ।	,,
४८६	पुराभक्षणार्थमजाघातादत्राङ्गाधिकत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
४८७	परवित्तस्यलुंठनादस्मिञ्जन्मनि पुत्रहीनत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
४८८	क्षात्रवंशसमुत्पन्नस्य गुल्मादिवातपीडितस्य भार्याद्वयवता मृतपुत्रत्वविदानं तत्प्रायश्चित्तकथनञ्च ।	,,
४८९	पुरा वालवत्सवधादत्र जन्मन्यन्द्वयेऽरिष्टप्राप्तिस्तन्निवृत्तये प्रायश्चित्तकथनञ्च ।	१९१

अ०	विषयाः	पृ०
४९०	विपाशानिकटे जातस्य द्विजस्य जातपुत्रविहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	१९१
४९१	पुरा अजासुतहननादत्राधिकाङ्गत्वं तत्प्रायश्चित्तकथनञ्च ।	१९२
४९२	लोंहहरणादस्मिञ्जन्मनि वर्वराख्यरोगस्तत्प्रायश्चित्तकथनञ्च ।	”
४९३	राजकुलजायाः शतद्रुसमीपे समुत्पन्नाया अष्टोत्तरशततमे वर्षे वंशजानां मरणोत्तरं मृतिनिदानं तत्प्रायश्चित्तञ्च ।	”
४९४	पूर्वजन्मनि लोहहरणान्नार्या वर्वराख्यरोगस्तन्निवारणाय प्रायश्चित्तञ्च ।	”
४९५	प्राग्भवेऽजघातान्नार्या अधिकांगत्वं तत्प्रायश्चित्तवर्णनञ्च ।	”
४९६	क्षात्रकुलसमुत्पन्नस्य गुल्मवातोदरामयस्य धनधान्ययुतस्य बहुकन्यस्यपुत्राभावनिदानं तत्प्रायश्चित्तकथनञ्च ।	”
४९७	माथुरमण्डलजायाः क्षत्रियनार्याः सुखदुःखाक्रान्ताया जातसंततिंनाशविनाशनिदानं तत्प्रायश्चित्तकथनञ्च ।	१९३
४९८	पूर्वजन्मनि शुनो घातादत्र चक्रपादरोगस्तत्प्रायश्चित्तकथनञ्च ।	१९४
४९९	प्राग्भवे शूद्रघाताद्दन्तपातनजाद्रोगात्पीडा तत्प्रायश्चित्तकथनञ्च ।	”
५००	पुराभवे शुनो नाशान्नार्या अपि चक्रपादरोगस्तत्प्रायश्चित्तकथनञ्च ।	”
५०१	प्राग्जन्मनि शूद्रघातान्नार्या दन्तपातनजरोगस्तत्प्रायश्चित्तकथनञ्च ।	”
५०२	गोदावरीसमीपदेशसमुद्भवस्य शूद्रस्य जातपुत्रविनाशनिदानं तत्प्रायश्चित्तकथनञ्च ।	”
५०३	वभ्रुहननादस्मिञ्जन्मनि वभ्रुमंडलरोगस्तत्प्रायश्चित्तकथनञ्च ।	१९५
५०४	कस्याश्चिच्छूद्रया जातसंततिहीनायाः कुष्ठरोगनिदानं तत्प्रायश्चित्तकथनञ्च ।	”
५०५	शशघातादत्र भवे कुब्जकर्णरोगस्तत्प्रायश्चित्तकथनञ्च ।	”
५०६	पुरा पण्यशालायां स्थापितायाः पत्न्याः पण्यस्त्रीकर्मत उपजीवनात् पंढत्वम् ।	”
५०७	पूर्वभवे नकुलहननान्नार्या अस्मिञ्जन्मनि वभ्रुमंडलरोगस्तत्प्रायश्चित्तकथनञ्च ।	”
५०८	क्षात्रकुलजस्य वातपीडितस्य महार्दितस्य बाल्ये ग्रहणीगदवतो भार्यायाःसदाचारवत्या पितृमातृसुखोज्झितायाः सन्ततिहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।....	१९६
५०९	प्राग्भवे उलूकघातात्पाण्डुरोगस्तत्प्रायश्चित्तकथनञ्च ।	१९७
५१०	नार्या अपि तथैव ।	”
५११	लोहितनदसमीपे जातस्य द्विजस्य नार्या गर्भधारणाभावनिदानं तत्प्रायश्चित्तकथनञ्च ।	”
५१२	पूर्वजन्मनि सीमावादे भूमिलोभाद्ब्राह्मणहननतोत्र क्षत्रियदेहे क्षयरोगस्तत्प्रायश्चित्तकथनञ्च ।	१९८
५१३	अयोध्यादेशे जातस्य क्षत्रियस्य महोद्यमिनो दक्षस्य यौवने क्षयरोगस्तत्प्रायश्चित्तकथनञ्च ।	१९९
५१४	कामतो द्विजघाते कृतेऽत्र नार्या अपि क्षयरोगतो मृतिनिरूपणम् ।	”
५१५	पूर्वजन्मनि स्वसृघातादत्र वाधिर्यरोगस्तत्प्रायश्चित्तकथनञ्च ।	’

अ०	विषयाः	पृ०
५१६	पुरा अकामतो द्विजघातेननार्याः क्षयरोगसंप्राप्तावपि तन्निरसनायप्रायश्चित्तकथनञ्च ।	१९९
५१७	पुरा भातृघातिनोत्र जनुषि जीवस्य मूकत्वं कामतः कृते प्रायश्चित्तकथनञ्च ।	,,
५१८	पूर्वं कुक्कुटघातेऽत्र पंगुत्वंतत्प्रायश्चित्तकथनञ्च ।	२००
५१९	गंगायाः प्राक्परदेशे शतयोजनतः परं जातस्य शूद्रस्य पित्तविकारिणः स्वल्पवित्तस्य भार्याया मृतवत्सत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
५२०	विराटदेशे समुत्पन्नायाः क्षत्रियाया अपुत्राया यौवने क्षयरोगतो मृतिनिदानम् ।	,,
५२१	सारिकाहननादस्मिञ्जन्मनि स्खलितवाक्त्वं तत्प्रायश्चित्तकथनञ्च ।	२०१
५२२	स्त्रीणामपि तथैव ।	,,
५२३	वकघातादिह भवे लंबकण्ठत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
५२४	नार्या अपि वकघातात्कंठरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
५२५	कस्यचिद्विजकुलजातस्य गुल्मादुदरोगवतो धनसम्पन्नस्य भार्याया मृतवत्सात्वनिदानं तत्प्रायश्चित्तञ्च ।	,,
५२६	पुरा काकघातादत्र जन्मनि कूर्चहीनत्वं तत्प्रायश्चित्तकथनञ्च ।	२०२
५२७	स्त्रीणामपि तथैव कूर्चोत्पत्तिः	२०३
५२८	अभक्ष्यभक्षणादत्र जन्मनि कृमिलोदरत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
५२९	स्त्रीणामपि तथैव ।	,,
५३०	दुष्टस्पृष्टान्नभक्षणादिह जन्मनि कृशोदरत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
५३१	स्त्रीणामपि तथैव ।	,,
५३२	गंगापूर्वभागे समुत्पन्नस्य द्विजकुलजस्यैव मृतपुत्रत्वनिदानं तत्प्रायश्चित्तकथनञ्च	,,
५३३	विप्रनार्याः पुत्रसंततिहीनायाः क्षयरोगस्यनिदानं तत्प्रायश्चित्तकथनञ्च ।	२०४
५३४	उच्छिष्टान्नभक्षणाद्रात्र्यंधत्वं तत्प्रायश्चित्तविचारश्च ।	,,
५३५	स्त्रीणामपि तथैव ।	,,
५३६	पूर्वजन्मनि विडालोच्छिष्टभोजनाद्रात्र्यंधत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
५३७	स्त्रिणामपि तथैव ।	,,
५३८	प्राग्भवे चाण्डालीगमनादत्राजगरत्वमूढत्वे तत्प्रायश्चित्तकथनञ्च ।	२०५
५३९	स्त्रीणामपि तथैव ।	,,
५४०	द्विजकुलोत्पन्नस्य सदाचारसाधुसेवापरस्य किलासदद्रुकण्डूयुतस्य भार्याया वातोदरपीडिताया मृतवत्सत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
५४१	विषदानेन द्विजघातादत्र जन्मनि छर्दिरोगेण निष्कृतिं विना यौवने मृतिः ।	२०६
५४२	स्त्रीणमपि तथैव ।	,,
५४३	विषदानेन द्विजेतरघातादिह छर्दिरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
५४४	पूर्वभवे भातृघातादत्र मूकत्वं ज्ञानतः कृते भातृवधे प्रायश्चित्ताभावश्च-	२०७
५४५	प्राग्भवे पुत्राभिलाषाद्यवनसंसर्गेऽत्र यवनीत्वे अपत्यराहित्यं तत्प्राप्त्युपायकथनञ्च ।	,,
५४६	देवद्रव्यापहारेणात्र भवे पाण्डुरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
५४७	पूर्वजन्मनि कस्मैचिदपि विषदानादत्र नार्याश्छर्दिरोगेण पीडा तत्प्रायश्चित्तकथनञ्च ।	,,

अ०	विषयाः	पृ०
५४८	गंगायाः पूर्वभागे दशयोजनसंमितदेशे जातस्य क्षत्रियस्य जातपुत्रमृतिनिदानकथनं तत्प्रायश्चित्तकथनञ्च।	२०७
५४९	पूर्वं कृतव्यभिचारेण नरकयातनाउपभुज्यात्रागतायाः पुनर्व्यभिचारे नार्याः प्रवृत्तिस्तत्प्रायश्चित्तकथनम्, पूर्वत्र धूर्ततया ब्राह्मणवचनादत्रापस्माररोगेण मृतिश्च।	२०८
५५०	भ्रातृघातादिह भवे नार्या मूकत्वं ज्ञात्वा कृते प्रायश्चित्ताभावश्च।	,,
५५१	पूर्वजन्मनि देवद्रव्यापहरणादत्र नेत्रपीडा तत्प्रायश्चित्तविधिकथनञ्च।	,,
५५२	सर्वस्नेहहरणादिह भवे क्षयरोगतः पीडातत्प्रायश्चित्तकथनञ्च।	,,
५५३	पूर्वं ब्रह्मवादरताया नार्याः पतिदोषान्मानुषीतनुमाश्रित्य भोगभोगाच्छिवपदावाप्तिकथनम्।	२०९
५५४	अज्ञानात्पूर्वजन्मनि भ्रातृघातेनात्र मूकत्वं तत्प्रायश्चित्तकथनञ्च।	,,
५५५	लोकवंचनादिह जन्मनि नार्या अपस्माररोगस्तत्प्रायश्चित्तकथनञ्च।....	,,
५५६	कस्यचिदतिश्रेष्ठवर्णस्य शिरोर्तिमतो दद्रुकंडूयुतस्य प्रदरार्तिमत्या भार्यायामृतवत्सत्वनिदानं तत्प्रायश्चित्तकथनञ्च।	,,
५५७	सर्वस्नेहहरणादस्मिञ्जन्मनि नार्याः क्षयरोगप्राप्तिस्तत्प्रायश्चित्तकथनञ्च	२१०
५५८	धूर्तकर्मणा लोकवंचनादत्रापस्माररोगस्तत्प्रायश्चित्तकथनञ्च।	,,
५५९	स्वर्णहरणादत्र नार्याः स्वर्णकारस्त्रीत्वमापन्नायाः पुत्रहीनत्वं तत्प्रायश्चित्तकथनञ्च।	,,

अ०	विषयाः	पृ०
५६०	पूर्वजन्मनि सिद्धान्नहरणादत्र जन्मनि अजीर्णरोगस्तत्प्रायश्चित्तकथनञ्च।	२१०
५६१	अज्ञानान्नार्याः पूर्वभवे भ्रातृघातादत्र मूकत्वं तत्प्रायश्चित्तकथनञ्च।	,,
५६२	प्राग्जन्मनि बालघातादत्र मृतपुत्रत्वं तत्प्रायश्चित्तकथनञ्च।	,,
५६३	क्रमतः सूकरनिषादशूद्रदेहानासाद्य चरमदेहे नार्यास्तीर्थराजसेवनाद्धनादिसंपन्नायाः पूर्वपापाद्यवनीत्वप्राप्तिकथनम्।	,,
५६४	प्रयागे स्थितस्य द्विजस्य धनपुत्रयुतस्य क्षयरोगनिदानं तत्प्रायश्चित्तकथनञ्च।	,,
५६५	यमुनाप्रदेशे ब्राह्मणादधो जातस्य पित्ताधिक्यात्प्राप्तमनोरथस्य जातपुत्रविनाशनिदानं तत्प्रायश्चित्तकथनञ्च।	२११
५६६	सर्वपापविशेषविशोधनम्।	२१२
५६७	जात्युत्तमानां जनुषि सदासंपत्समृद्धिमते जातवैष्णवीमतिपरिवर्तनस्य जातसंततिविनाशनिदानं तत्प्रायश्चित्तकथनञ्च।	,,
५६८	प्राग्भवे पुरुषघातान्नार्या अत्र शूलरोगपीडा तत्प्रायश्चित्तकथनञ्च।	२१३
५६९	अज्ञानात्पूर्वभवे सुतमित्रयोर्घातेनात्र वायुरोगेण पीडनं तत्प्रायश्चित्तकथनञ्च।	,,
५७०	गोत्रघातादिह लूताख्यरोगतः पीडा तत्प्रायश्चित्तकथनञ्च।	,,
५७१	पुराभवे स्नेहहरणादस्मिञ्जन्मनि राजयक्ष्मरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
५७२	पूर्वजन्मनि जारमाश्रित्य पतिघ्न्या नार्या अत्र बालवैधव्यं तत्प्रायश्चित्तकथनञ्च।	,,

अ०	विषयाः	पृ०
५७३	पूर्वं देवागारदाहादत्र रक्तातिसार-रोगस्तत्प्रायश्चित्तकथनञ्च ।	२१४
५७४	प्रयागनिकटे जातस्य द्विजस्य सर्व-भक्षस्य स्वल्पपापरतस्यापस्माररोगेण सुतद्वयमृतिनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
५७५	पूर्वं नार्या गर्भपातपापेनेहभवे गर्भ-पातनदुःखं तत्प्रायश्चित्तकथनञ्च ।	,,
५७६	देवागारदाहेनेह जन्मनि नार्या अती-सारतः पीडा तत्प्रायश्चित्तकथनञ्च ।	,,
५७७	पूर्वजन्मनि ब्रह्मघातादत्र जन्मनि तस्मिन्वयसि परपीडा ।	२१५
५७८	पतिमित्रघातादत्र नार्या वायुरोग-स्तत्प्रायश्चित्तं च ।	,,
५७९	गोत्रघातकरणादत्र नार्या व्रताल्यरो-गस्तत्प्रायश्चित्तकथनञ्च ।	,,
५८०	द्विजकुलोत्पन्नस्य वातपित्तयुतस्य शिरोर्तिमतो भार्यायाः काकवन्ध्या-त्वनिदानंतत्प्रायश्चित्तं च ।	,,
५८१	देवमंदिरे शकृन्मूत्रपरित्यागाद्भुदरोग स्तत्प्रायश्चित्तञ्च ।	२१६
५८२	अज्ञानात्स्त्रीघातिनोऽत्र देहे बलरहि-तस्यकार्श्यरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
५८३	पुराभवे बालघातादस्मिञ्जन्मनि नार्या मृतपुत्रत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
५८४	ब्राह्मणहननाद्दिह कुष्ठरोगस्तत्प्राय-श्चित्तकथनञ्च ।	२१७
५८५	देवद्रव्यहरणादत्र वायुपीडातत्प्राय-श्चित्तकथनञ्च ।	,,
५८६	देवागारे मूत्रपुरीषोत्सर्गान्नार्या गुद-रोगस्तत्प्रायश्चित्तञ्च ।	,,
५८७	विपाशानिकटे देशे क्षत्रियादधो-जातस्य किञ्चित्पापरतस्य स्त्रीपुत्रध-नसंयुतस्य वार्धक्ये कंडूरोगनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
५८८	देवागारे मूत्रपुरीषोत्सर्गादत्र गुदरो-गस्तत्प्रायश्चित्तकथनञ्च ।	,,
५८९	पापविमोहितस्य कामात्साध्वीस्त्रीघा-तिनोऽत्र कार्श्येनैव मृतिकथनम् ।	२१८
५९०	कन्यावधाद्बहुकन्यात्वं तन्निवृत्तौ प्रा-यश्चित्तकथनञ्च ।	,,
५९१	देवद्रव्यापहारेणात्र शरीरे वायुपीडा तत्प्रायश्चित्तकथनञ्च ।	,,
५९२	गंगायमुनयोर्मध्ये जातस्य क्रूरकर्मणो महोद्यमिनः कुष्ठरोगप्राप्तिनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
५९३	क्षात्रकुलभवाया राज्ञ्या अपुत्राया-वार्धके कुष्ठरोगपीडानिदानं तत्प्रा-यश्चित्तकथनञ्च ।	,,
५९४	विप्रकुलोद्भवस्य क्रयविक्रयकर्तुः सदाचारस्य भार्याया असृग्वातग-दार्तायां अपुत्रत्वनिदानं तत्प्रायश्चि-त्तकथनञ्च ।	२१९
५९५	पूर्वभवे नृपघातादत्र राजयक्ष्मरो-गस्तत्प्रायश्चित्तकथनञ्च ।	२२०
५९६	प्राग्जन्मनि परगर्भपातादिह देहे जलोदररोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
५९७	स्वज्ञातीयस्यान्यस्य वा वृत्तिलोपा-दत्र जन्मनि कुष्ठरोगस्तत्प्रायश्चित्त-कथनं च ।	,,
५९८	पातिव्रतपरायाः कस्याश्चिद्वैश्यप-त्न्याः स्वर्गलोकप्राप्तिकथनम् ।	२२१
५९९	गृहाश्रितशूद्रीघातादत्र वायुरोगेण दारुणापीडा तत्प्रायश्चित्तकथनञ्च ।	,,
६००	पापमोहात्स्वगर्भपातेनेह जलोदर-पीडा तदासन्नपीडानिवारकप्राय-श्चित्तञ्च ।	,,

अ०	विषयाः	पृ०
६०१	सगर्भायाः फललालसायाः फलचौर्यादिह जन्मनि पुत्रहीनत्वं तत्प्रायश्चित्तकथनञ्च ।	२२१
६०२	प्राग्भवे ब्राह्मणघातादत्र जन्मनि तस्मिन्नेव वयसि कुष्ठरोगप्राप्तिस्तत्प्रायश्चित्तञ्च ।	,,
६०३	विपाशानिकटे जातस्य शूद्रस्य देवतातिथिपूजकस्य भ्रातृपुत्रहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
६०४	पूर्वभवे परान्नहरणादत्र नार्या अजीर्णरोगपीडा तत्प्रायश्चित्तकथनञ्च ।	२२२
६०५	देवतागारे परस्थापितमूर्तेर्भंगात्सर्वत्राप्रतिष्ठा तत्प्रायश्चित्तञ्च ।	,,
६०६	मोहात्पूर्वभवे राजवधतोऽत्र राजयक्ष्मरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
६०७	पूर्वजन्मनि परगर्भघातादिह नार्या जलोदररोगस्तत्प्रायश्चित्तञ्च ।	२२३
६०८	वादिनां वाग्विरोधकरणेनात्र देहे मूकत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
६०९	सपत्न्या गर्भनाशतोऽत्र जन्मनि सुतराहित्यं तत्प्रायश्चित्तकथनञ्च ।	,,
६१०	पुराभवे परनिंदाकरणात्खल्वाटता तत्प्रायश्चित्तकथनञ्च ।	,,
६११	प्राग्भवे राजवधादिह नार्याः क्षयरोग पीडा तत्प्रायश्चित्तकथनञ्च ।	,,
६१२	पूर्वं भर्तुर्वाग्विरोधादिह नार्या मूकत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
६१३	पूर्वभवे परस्थापितप्रतिमाभंगादत्राप्रतिष्ठा तत्प्रायश्चित्तकथनञ्च ।	,,
६१४	प्राग्जन्मनि परद्रव्यापहारात् संतानसुखहीनत्वं तत्प्रायश्चित्तकथनञ्च ।	२२४
६१५	कस्यचिद्भूमिदेवकुलोत्पन्नस्य वाताधिकशरीरवन्ते देवतातिथिभक्तस्य किंचित्क्लेशकारिण्या भार्याया मृतापत्यत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	२२४
६१६	परनिंदाकरणादत्र नार्याः खल्वाटत्वं दुष्प्रोगश्च तच्छमनाय प्रायश्चित्तमपि ।	२२५
६१७	पूर्वभवे अभक्ष्यभक्षणादिहगंडमाला रोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
६१८	कुलहननादत्र जन्मनि नार्या धनपुत्रविहीनत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
६१९	प्राग्भवे सभायां ब्राह्मणपक्षपातात् पक्षाघातरोगस्तत्प्रायश्चित्तकथनञ्च ।	२२६
६२०	अभक्ष्यभक्षणान्नार्या गंडमालाख्यरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
६२१	पूर्वजन्मनि द्विजपुत्रहननादिह भवे क्षयरोगपुत्रसंततिनाशौतत्प्रायश्चित्तकथनञ्च ।	,,
६२२	विनापराधं परपक्षघातिन्या नार्याः पक्षाघातरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
६२३	प्राग्जन्मनि सुरापानादत्र जनुषि मूत्रकृच्छ्ररोगतः पीडा तच्छिवार्थं प्रायश्चित्तकथनञ्च।	२२७
६२४	वैकुंठादागतस्य घोरे कलौ दुष्करं कर्म कृत्वा पुनर्वैकुंठे प्रयाणकथनम् ।	,,
६२५	स्वर्णापहरणात् प्राग्भवे अत्र कुनखित्वं तत्प्रायश्चित्तकथनञ्च ।	,,
६२६	नार्या राजयक्ष्मनिवारणार्थं प्रायश्चित्तविधिकथनम ।	,,
६२७	विनापराधं वैश्यहननादिह रक्तार्बुद रोगेण मरणम् ।	,,
६२८	मेरोः समागतस्य कलियुगे अद्भुतकर्माणि कृत्वा स्वस्थाने गमनम् ।	,,
६२९	मोहाद्वैश्यघाते कृते रक्तार्बुदरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
६३०	ब्राह्मण्याः प्राग्भवे सुरापानान्मूत्रकृच्छ्रतः पीडा तत्प्रायश्चित्तकथनञ्च ।	२२८

अ०	विषयाः	पृ०
६३१	कासश्वासादिपीडायुतस्य किंचिद्वित्तयुतस्य क्रयविक्रयकर्तुर्द्विजस्य भार्यायाः रजोदोषात् पीडितायाः अपत्यमरणनिदानं तत्प्रायश्चित्तकथनञ्च ।	२२८
६३२	ब्राह्मण्या मोहात्सुरापाने कृते अत्र नार्याःप्रदररोगतः पीडा तत्प्रायश्चित्तकथनञ्च।	२२९
६३३	पूर्वजन्मनि विप्रस्य सुरापानादत्र मूत्रावरोधरोगस्तत्प्रायश्चित्तञ्च।	,,
६३४	अकामतो नार्या वैश्यघातादत्र रक्तार्बुदरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
६३५	नार्याः कंठपाशादिसंभवपापतः परजन्मनि क्षयरोगेण पीडा तत्प्रायश्चित्तञ्च ।	,,
६३६	अतिबलोत्कर्षात्परस्त्रीकामत इह जन्मनि यौवने उन्मादरोगस्तत्प्रायश्चित्तकथनञ्च ।	२३०
६३७	नार्याः सुवर्णापहरणादत्र भवे कुनखित्वं तत्प्रायश्चित्तकथनञ्च ।	,,
६३८	वैश्यहत्या नार्या इह रक्तार्बुदरोगतः पीडा तत्प्रायश्चित्तविधिश्च ।	,,
	रौप्यहरणादिह जंतोश्चित्रकुष्ठस्तत्प्रायश्चित्तकथनञ्च ।	,,
६३९	म्लेच्छकुलोत्पन्नस्य स्वधर्मनिरतस्य केरलदेशगतस्य स्वामिधर्मपरस्यापि प्रजापीडनादग्रिमभवे पंचाशेऽब्दे रिष्टप्राप्तिस्तत्प्रायश्चित्तञ्च ।	,,
६४०	स्वेच्छया यौवने बलात्कारेण परपुरुषतो रतिकारिण्या अग्रिमजन्मनि नार्या उन्मादरोगस्तत्प्रायश्चित्तकथनञ्च ।	२३१
६४१	पूर्वभवे त्रपुहरणान्म्लेच्छरोगस्तत्प्रायश्चित्तञ्च ।	,,
६४२	विद्यमाने भर्तरि जारादूर्भधारिण्या इह गर्भधारणाभावस्तत्प्रायश्चित्तञ्च।	,,
६४३	आखेटं विना हस्तिघातादत्र सर्वकार्येषु असिद्धिर्विंशन्मितेब्दे कालशस्त्रान्मृतिश्च ।	२३१
६४४	पूर्वं ब्राह्मणीगमने उन्मादरोगस्तत्प्रायश्चित्तं च।	,,
६४५	त्रपुहरणान्नार्या इह जन्मनि श्लेष्मरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
६४६	पूर्वजन्मनि द्रव्यलोभात्स्वकन्याया वृद्धार्पणतो जन्मान्तरे मृतपुत्रत्वं तत्प्रायश्चित्तकथनञ्च ।	२३२
६४७	पूर्वं ताम्रहरणादिह औदुंबररोगस्तत्प्राप्तिनिवारणाय प्रायश्चित्तञ्च।	२३३
६४८	पूर्वं गर्भासन्नाजाभक्षणान्नार्या इह गर्भधारणाभावस्तत्प्रायश्चित्तकथनञ्च ।	,,
६४९	मृगयायां गजराजवधादिह गजचर्मरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
६५०	परसिद्धान्नहरणादत्र जन्मनि शूलरोगतः पीणा तत्प्रायश्चित्तकथनञ्च ।	,,
६५१	बालवत्सवधादिह जातसंततिदुःखार्तित्वं तत्प्रायश्चित्तकथनञ्च ।	,,
६५२	पूर्वजन्मनि रीतिहरणादत्र भवे पिंगलाक्षत्वं तत्प्रायश्चित्तकथनञ्च ।	२३४
६५३	खरहननादत्र जन्मनि खररोमत्वंतत्प्रायश्चित्तकथनञ्च।	,,
६५४	गर्भपोषणायकुक्कुटांडभक्षणादत्र गर्भधारणाभावस्तत्प्रायश्चित्तकथनञ्च ।	,,
६५५	स्वर्णकारकुलजस्य नानाचौर्य क्रियायुतस्य लोकवंचनतत्परस्य नानास्त्रीसुखसंयुतस्य पुत्रविवर्जननिदानं तत्प्रायश्चित्तकथनञ्च।	,,
६५६	पुराभवे रीतिहरणान्नार्याः पिंगाक्षित्वं तत्प्रायश्चित्तकथनञ्च ।	२३५
६५७	पूर्वं परसिद्धान्नहरणादत्र जन्मनि-नार्याः शूलरोगस्तत्प्रायश्चित्तकथनञ्च।	,,

अ०	विषयाः	पृ०
६५८	पूर्वजन्मन्युष्ट्रघातादत्र जन्मनि विकृतस्वरत्वं तत्प्रायश्चित्तकथनञ्च।	२३५
६५९	पूर्वं गर्भपातरताया अत्र भवे नार्या वन्ध्यात्वं तत्प्रायश्चित्तकथनञ्च।	,,
६६०	प्राक् कांस्यहरणादिह शीर्षरोगस्तत्प्रायश्चित्तकथनञ्च।	२३६
६६१	पञ्चनददेशे जातस्य बाहुजाऽधमस्य जातपुत्रविनाशकत्वनिदानं तत्प्रायश्चित्तकथनञ्च।	,,
६६२	प्राग्भवे कांस्यहरणादत्र शीर्षरोगतः पीडा तत्प्रायश्चित्तकथनञ्च।	२३७
६६३	वन्ध्यायाः पुत्रविधायकप्रायश्चित्तकथनम्।	,,
६६४	सतीं स्वभार्यां परमां संत्यज्य परस्त्रीगमनात् ग्रहणीरोगः द्विजस्त्रीगमने तु प्रायश्चित्ताभाव एव।	,,
६६५	प्राग्भवे कांस्यहरणान्नार्याः शीर्षरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
६६६	उष्ट्रघातान्नार्या अत्र भवे विकृतस्वरूपत्वं तत्प्रायश्चित्तञ्च।	,,
६६७	परघृतहरणादस्मिञ्जन्मनि नेत्ररोगस्तत्प्रायश्चित्तकथनञ्च।	,,
६६८	स्वपतिं परित्यज्य पुरुषमन्यं संगतायाइह जन्मनि ग्रहणीरोगस्तत्प्रायश्चित्तञ्च।	,,
६६९	पूर्वजन्मनि परघृतापहारादिह नेत्ररोगस्तत्प्रायश्चित्तकथनञ्च।	२३८
६७०	विप्रकुलोत्पन्नस्य किंचिद्वित्तसमन्वितस्योदरे वातरोगिणो भार्यायाः पतिव्रताया मृतापत्यत्वनिदानं तत्प्रायश्चित्तञ्च।	,,
६७१	वन्ध्यायाः सुपुत्रजननयोगविधिः।	२३९
६७२	पूर्वं देवद्रव्यापहरणादत्र भवे विंशतिवर्षे व्यतीते नेत्रभङ्गस्तत्प्रायश्चित्तकथनञ्च।	,,
६७३	पुरा वृषभमुष्कनिकृन्तनतोऽत्र भवे षण्ढत्वं तत्प्रायश्चित्तकथनञ्च।	२३९
६७४	पूर्वं मोहात्परघृतहरणे नार्या नेत्ररोगस्तत्प्रायश्चित्तकथनञ्च।	,,
६७५	पूर्वभवे महिषीविघादत्र भवे कृष्णगुल्मरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
६७६	धनभृत्यादैश्वर्यवत्याः श्रुत्वा गौरवर्णाया पुत्रसंततिहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च।	२४०
६७७	प्राग्जन्मनि दुग्धहरणादत्र बहुमूत्रत्वं तत्प्रायश्चित्तकथनञ्च।	,,
६७८	स्त्रीणामपि तथा।	,,
६७९	पुरा नवयौवनमहिषीघातकस्येह कृष्णगुल्मरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
६८०	पूर्वं द्विजमुष्कनिकृन्तनादत्र निष्कृतिरहितं षण्ढत्वम्।	,,
६८१	पूर्वजन्मनि पक्वाम्रफलानां पातापहारतः परजनुषि पुत्रहीनता तत्प्रायश्चित्तकथनञ्च।	,,
६८२	पुराभवे महिषीघातनान्नार्याः कृष्णगुल्मरोगस्तत्प्रायश्चित्तकथनञ्च।	२४१
६८३	वृषभनासाग्रवेधादत्र भवे नासाग्रच्छेदः।	,,
६८४	सिंधोः पश्चिमभागे महाभूमिभुजां कुले समुत्पन्नस्य सुखैश्वर्यसमायुक्तस्य पंचपंचाशे वर्षे रिष्टनिदानं तत्प्रायश्चित्तं च।	,,
६८५	पूर्वं तरक्षुघातेऽत्र जन्मनि नेत्रकानत्वं तत्प्रायश्चित्तकथनञ्च।	,,
६८६	पुरा देवालये परस्थापितदीपापहरणादिह चक्षुःपीडा तत्प्रायश्चित्तकथनञ्च।	२४२
६८७	पूर्वं तरक्षुघातादिह भवे नार्याः कातराक्षीत्वं तत्प्रायश्चित्तकथनञ्च।	,,

अ०	विषयाः	पृ०
६८८	ब्राह्मणस्य मुष्कभेदात्सप्तजन्मपर्यंतं षण्ढत्वं तत्प्रायश्चित्ताभावश्च ।	२४२
६८९	क्षात्रकुलभवस्य शौर्यादिगुणवतो भार्यायाः सप्रायश्चित्तं मृतापत्यनिरूपणम् ।	,,
६९०	प्राग्भवे मोहान्माक्षिकहरणेनात्र नार्या दुर्गन्धाढ्यत्वं तत्प्रायश्चित्तञ्च ।	२४३
६९१	अगम्यागमनातिसेवनादिह वधबंधनादिषु क्रूरकर्मसु नियोगप्राप्तिः ।	,,
६९२	जन्मान्तरे विपदानेन सपत्नीकुमारवाताद्वितीयभवे कन्यावस्थायामेव कुष्ठान्वितत्वं तृतीये यवनीत्वमासाद्य चतुर्विंशतिमितेऽग्निदाहः ।	,,
६९३	पूर्वं वाराहहननेऽत्र दन्तुरत्वरोगस्तत्प्रायश्चित्तकथनं च ।	,,
६९४	पुराभवे गुडहरणादत्र गुल्मरोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	२४४
६९५	यमुनानदीतीरे जातायाः शूद्रया बाल्यवयसि कुष्ठरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
६९६	पूर्वभवे वृषभस्य नासाग्रभंगान्मुष्कभंगाच्च सिन्धुमंडले षण्ढयवनदेहप्राप्तिस्तत्प्रायश्चित्तकथनञ्च ।	,,
६९७	पुरा नार्या वराहनाशे कृते इह दन्तुरत्वं तत्प्रायश्चित्तञ्च ।	,,
६९८	पूर्वं तैलहरणात्कंडूरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
६९९	विना प्रयोजनं स्वस्त्रीत्यागादत्र नपुंसकत्वं तत्पापविशुद्धये प्रायश्चित्ताभावश्च ।	,,
७००	स्वभक्षार्थं मृगवधादत्र भवे वायुपीडा तत्प्रायश्चित्तकथनञ्च ।	२४५
७०१	स्वपतिं परित्यज्य परपुंसा रताया इह ग्रहणीरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
७०२	विप्रवर्णकुलोद्भवस्य उदरे जातवातोरुपीडस्य किंचित्क्रोधलोभवित्तवतोऽत्र सदाचारवत्या भार्यायाः मृतपुत्रकत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	२४५
७०३	धनभृत्याश्वभोगाढ्यैर्युतायाः शूद्रीसमाया गौरवर्णायाः पुत्रसंततिहीनत्वनिदानं तत्प्रायश्चित्तञ्च ।	२४६
७०४	प्राग्भवे दुग्धहरणादत्र बहुमूत्ररोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	,,
७०५	स्त्रीणामपि तथैव ।	,,
७०६	प्राग्भवे महिषीघातादिह कृष्णगुल्मरोगस्तत्प्रायश्चित्तञ्च ।	,,
७०७	पुरा ब्रह्मपुत्रस्य मुष्कनिकुण्ठनतोत्र भवे षण्ढत्वं तत्प्रायश्चित्तकथनञ्च ।	२४७
७०८	पूर्वं फलापहरणादास्मिन्भवे नार्याः पुत्रविहीनत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
७०९	पूर्वं दधिहरणादत्र मेदसा पार्श्वपीडनं तत्प्रायश्चित्तञ्च ।	,,
७१०	पुराभवे महिषीघातादस्मिन् जन्मनि नार्याः कृष्णगुल्मरोगस्तत्प्रायश्चित्तञ्च ।	,,
७११	वृषभानां नासावेधादिह जन्मनि नासाच्छेदस्तत्प्रायश्चित्तकथनञ्च ।	,,
७१२	सिंधोः पश्चिमभागे जातस्य म्लेच्छवंशभवस्य सर्वविद्याविशारदस्य सुखैश्वर्यधनवाहनसंयुतस्य पंचपंचाशे वर्षे रिष्टकारणकथनं तत्परिहारोपायश्च ।	,,
७१३	पूर्वं दधिहरणादिह नार्या मेदःपीडा तत्प्रायश्चित्तकथनञ्च ।	२५
७१४	तरक्षुहनने नेत्रकातरत्वं तत्प्रायश्चित्तकथनञ्च ।	,,

अ०	विषयाः	पृ०
७१५	नानाधातुमयदीपपात्रहरणादत्र चक्षुःपीडा तत्प्रायश्चित्तकथनञ्च ।	२४८
७१६	पूर्वं मधुहरणतोऽत्र दुष्टगंधयुतत्वं तत्प्रायश्चित्तकथनञ्च ।	”
७१७	तरक्षुघातादिह नार्याश्चक्षूरोगेण कातराक्षित्वं तत्प्रायश्चित्तकथनञ्च ।	”
७१८	पूर्वं द्विजाण्डच्छेदात्सप्तजन्मसु पण्ढत्वं प्रायश्चित्ताभावश्च ।	”
७१९	क्षात्रकुलजस्य शौर्यौदार्यशोभनयशोयुतस्योदरे किंचिद्वातविकारस्य भार्याया यौवने पुष्पशान्तिनिदानं तत्प्रायश्चित्तकथनञ्च ।	२४९
७२०	पूर्वभवे माक्षिकहरणादत्र नार्या दुर्गंधाढ्यत्वं तत्प्रायश्चित्तकथनञ्च ।	”
७२१	अगम्यागमनादिह जन्मनि पंढत्वं तत्प्रायश्चित्ताभावश्च ।	२५०
७२२	पूर्वं धनलोभात्सपत्नीसुतस्य विपतो घातादत्र बाल्ये कुष्ठरोगतो नार्या अविवाह्यत्वं तत्प्रायश्चित्ताभावश्च ।	”
७२३	वराहस्य घातेनेह जन्मनि दन्तुरत्वं तत्प्रायश्चित्तवर्णनञ्च ।	”
७२४	प्राग्भवे गुडापहरणतोऽत्र गुल्मोदररोगस्तत्प्रायश्चित्तं च ।	”
७२५	यमुनानदीतीरजायाः कस्याश्चिच्छूद्रा बाल्ये कुष्ठप्राप्तिनिदानं तत्प्रायश्चित्तकथनञ्च ।	”
७२६	पूर्वभवे वृषस्य नासामुष्कच्छेदनादत्र यवनदेहे पण्ढत्वं तत्प्रायश्चित्ताभावश्च ।	”
७२७	पूर्वं वराहघातादस्मिन् भवे नार्या दंतुरत्वं तत्प्रायश्चित्तञ्च ।	२५१
७२८	तैलहरणादत्र कण्डूरोगस्तत्प्रायश्चित्तकथनञ्च ।	”
७२९	पूर्वजन्मनि स्त्रीपरित्यागादत्र पंढत्वं प्रायश्चित्ताभावश्च ।	२५१
७३०	स्वभक्षणार्थं मृगवधादत्र खञ्जतारोगस्तत्प्रायश्चित्तकथनञ्च ।	”
७३१	पुरा गुडहरणान्नार्या अत्र गुल्मोदरपीडा तत्प्रायश्चित्तकथनञ्च ।	”
७३२	पुरा स्वस्त्रियं परित्यज्य परदारगमनादत्र स्त्रीवर्जितत्वं तत्प्रायश्चित्तकथनञ्च ।	”
७३३	नृपं विना प्राङ्मृगवधादिह मृगहंतुः खञ्जत्वं तत्प्रायश्चित्तकथनञ्च ।	२५२
७३४	परतैलापहरणादत्र नार्याः कंडूरोगप्राप्तिस्तत्प्रायश्चित्तकथनञ्च ।	”
७३५	पूर्वभवे राजपत्न्यां गर्भधारणादत्र शूद्रदेहे पण्ढत्वं तत्प्रायश्चित्ताभावश्च	”
७३६	स्वगर्भपालनार्थं पूर्वं मृगघातादत्र नार्यास्तद्घातकाले खञ्जत्वं तत्प्रायश्चित्तकथनञ्च ।	”
७३७	क्षात्रकुलसमुद्भवस्य पाण्डुरदद्युतेर्दानदाक्षिण्यपरस्य ग्रहणीवातपीडितस्य भार्यायाः सदाचारवत्या गर्भास्थिरतानिदानकथनम् ।	”
७३८	पुरा नानागर्भविहिंसनादत्र वंध्यात्वं तन्निष्कृतिकथनञ्च ।	२५३
७३९	पूर्वं तुरंगघातादत्र बकंठरोगस्तत्प्रायश्चित्तकथनञ्च ।	२५४
७४०	प्राग्भवे शृगालघातादिह पादहीनत्वं तत्प्रायश्चित्तकथनञ्च ।	”
७४१	गंगातीरे जातस्य शुभाचारस्य कस्य चिच्छूद्रस्ययुवभावे चक्षुर्हीनत्वं तत्प्रायश्चित्तञ्च ।	”
७४२	पूर्वं शृगालघातादस्मिन्भवे नार्या ऊर्द्ध्वतः पातात्पादभंगस्तत्प्रायश्चित्तञ्च ।	”

अ०	विषयाः	पृ०
७४३	पुरा अश्वघातादिह नार्या वक्रकंठरोगस्तत्प्रायश्चित्तञ्च ।	२५४
७४४	यमुनातीरे क्षत्रियकुलप्रसूतस्य धनसौख्यान्वितस्य पूर्वकृतदोषचिह्नवतो बहुस्त्रीकस्य पुत्रवृद्धयभावनिदानं तत्प्रायश्चित्तकथनञ्च ।....	,,
७४५	कस्यचिच्छूद्रस्य प्राप्तसर्वमनोरथस्य षण्ढत्वनिदानं तत्प्रायश्चित्तञ्च ।	२५५
७४६	पुरा मार्गे धनलोभेन परलुंठकस्येह पादसंभवमहापीडा तत्प्रायश्चित्तकथनञ्च ।	,,
७४७	पर्वतभागे जातस्य बाह्लजस्य महोग्रस्य वामनस्य मंत्रपारगस्य पुत्रहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
७४८	क्षात्रकुलजस्य गुल्माद्युदरपीडावतो निष्फलोद्यमस्य भार्याद्वययुतस्य मृतवत्सत्वनिदानं तत्प्रायश्चित्तकथनञ्च।	२५६
७४९	वेश्यांगनाया नानाविभूतियुतायाः सुखभोगवत्या युवभावे गर्भतो दुःखनिदानं तत्प्रायश्चित्तविधिकथनञ्च ।	२५७
७५०	विपाशानिकटे जातस्य द्विजस्य जातपुत्रविनाशनिदानं तत्प्रायश्चित्तञ्च ।	,,
७५१	अज्ञानादजासुतवधादिहाधिकांगत्वं तत्प्रायश्चित्तञ्च ।	२५८
७५२	लोहहरणात्पूर्वमत्र बर्बराख्यरोगस्तत्प्रायश्चित्तञ्च ।	,,
७५३	प्राग्भवे नकुलवधादिह सर्ववंशीयमरणदुःखनिरीक्षणम् ।	,,
७५४	अजनंदनघातादिह गोधिकात्वप्राप्तिः ।	२५९
७५५	लोहहरणादिह बर्बराख्यरोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।....	,,
७५६	अजवधान्नार्या इहाधिकाङ्गत्वं तत्प्रायश्चित्तकथनञ्च ।	२५९
७५७	क्षात्रकुलजस्य गुल्मोदरामयपीडितस्य कृपणस्य वित्तवतो दायादैः शत्रुवत्पीडितस्यमृतपुत्रनिदानंतत्प्रायश्चित्तकथनञ्च ।	,,
७५८	माथुरमंडले जाताया क्षत्रियपत्न्याजातसंततिनाशननिदानं प्रायश्चित्तञ्च ।	,,
७५९	प्राग्भवे शुनो वधान्नार्या इह चक्रपादरोगस्तत्प्रायश्चित्तकथनञ्च ।....	२६०
७६०	पुरा शूद्रवधादिह भवे दन्तपातनजरोगस्तत्प्रायश्चित्तकथनञ्च । ...	,,
७६१	प्राग्भवे शुनो वधान्नार्या इह चक्रपादरोगस्तत्प्रायश्चित्तकथनञ्च ।....	,,
७६२	पुरा शूद्रघातादिह नार्या दंतपातनजरोगस्तत्प्रायश्चित्तकथनञ्च ।....	२६१
७६३	स्वजात्यां वीर्यदानादत्र जातपुत्रविनाशस्तत्प्रायश्चित्तकथनञ्च । ...	,,
७६४	बंधुनाशादत्र जन्मनि वभ्रुनामकरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
७६५	शूद्रकुलवत्या जातसंततिहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।....	,,
७६६	स्वपत्न्याः पण्यशालास्थापनात्पण्यस्त्रीकर्मतः स्वोपजीवनतश्चेह षण्ढत्वं तत्प्रायश्चित्ताभावश्च ।	२६२
७६७	पूर्वं नकुलघातादत्र नार्या वभ्रुमंडलरोगस्तत्प्रायश्चित्तञ्च ।	,,
७६८	क्षात्रकुलोद्भवस्य नानारक्तानिलपीडितस्य भार्यायाः संपत्तिहीनतानिदानं तत्प्रायश्चित्तञ्च ।	,,
७६९	ब्रह्मघातात्क्षयरोगस्तत्प्रायश्चित्तविधिकथनञ्च ।	२६३

अ०	विषयाः	पृ०
७७०	अन्नहरणादिह जन्मनिशूलरोगस्तत्प्रायश्चित्तकथनञ्च।	२६३
७७१	पूर्वजन्मनिक्रूरकर्मनिषेवणाच्छीतज्वरपीडा तत्प्रायश्चित्तकथनञ्च।	२६४
७७२	कृतघ्नस्य देहान्तरे कफश्वासादिपीडा तत्प्रायश्चित्तकथनञ्च।	,,
७७३	राजमार्गनदीतीरादौ मूत्रकरणादिह शिरोर्तिस्तत्प्रायश्चित्तकथनञ्च।	२६५
७७४	देवद्विजद्रव्यहरणादन्त्यजागमनाच्चेह पाण्डुरोगस्तत्प्रायश्चित्तकथनञ्च।	२६६
७७५	प्राग्भवे यज्ञविघ्नकरणादिह अन्त्रवृद्धिरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
७७६	पूर्वभवे जात्युत्तमस्त्रीगमनात् अत्र हृदयव्रणरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
७७७	अतिमानातिक्रोधातिस्नेहभयाद्धर्मनिश्चयज्ञानान्यथाकरणेन पूयशोणितव्रणरोगतः परमपीडा तत्प्रायश्चित्तकथनञ्च।	२६७
७७८	पुरा परेषां मर्मभेदान्मुष्टिपातादसत्यवचनादत्र भवे प्लीहारोगतः पीडा तदुपरि प्रायश्चित्तकथनञ्च।	,,
७७९	परद्रव्यहरणाद्गुरुवंचनादभक्ष्यभक्षणाच्चेह गण्डमालारोगस्तत्प्रायश्चित्तञ्च।	२६८
७८०	चाण्डालवचःश्रवणेऽपि भोजनादिह पाण्डुरोगस्तत्प्रायश्चित्तञ्च।	,,
७८१	पुराभवे खरकाकादिमांसभक्षणादिह स्फोटरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
७८२	अनिर्दशाया गोः पयः पीत्वेह स्फोटवान्भवति तच्छमनाय प्रायश्चित्तकथनम्।	२६९
७८३	पूर्वभवे देवब्राह्मणधनापहरणात्स्वामिद्रोहाच्चात्र वातरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
७८४	पूर्वं सवर्णागमनेऽत्र वातरक्तविकारस्तत्प्रायश्चित्तकथनञ्च।	२६९
७८५	पुरा विनावैद्यशास्त्राध्ययनं रुग्णोपचप्रदानादत्र रक्तपित्तरोगो मद्यपानादपि, तद्दोषशमनाय प्रायश्चित्तकथनञ्च।	,,
७८६	पूर्वं त्रपुहरणादिह जन्मनि श्लेष्मरोगतः पीडा तत्प्रायश्चित्तञ्च।	२७०
७८७	पुरा धूर्ततया जनवंचनादत्रापस्माररोगस्तत्प्रायश्चित्तकथनञ्च।	,,
७८८	पुरा भवे नागापहरणादस्मिन्भवे शीर्षरोगस्तत्प्रायश्चित्तकथमञ्च।....	,,
७८९	धर्मं क्रमादुपक्रम्य तस्य मध्ये परित्यागादत्रातिचक्राख्यरोगपीडा तत्प्रायश्चित्तकथनञ्च।	
७९०	पूर्वं पक्वान्नहरणादिह नरस्याशुजिह्वारोगस्तत्प्रायश्चित्तञ्च।	२७१
७९१	पूर्वं छात्रवर्गाय विद्याऽप्रदानादिह छर्दिरोगतः पीडा तत्प्रायश्चित्तञ्च।	,,
७९२	पूर्वमामान्नापहरणेनात्र दन्तपीडा तत्प्रायश्चित्तकथनञ्च।	,,
७९३	परेषां कटुवचनतः पीडकस्येह खरस्वनत्वं तत्प्रायश्चित्तकथनञ्च।	,,
७९४	पूर्वभवे लवणापहरणादिह बर्बरस्वरत्वं तत्प्रायश्चित्तञ्च।	२७२
७९५	पुरा जन्मनि कुक्कुटहननादत्र वक्रनासत्वं तत्प्रायश्चित्तकथनञ्च।	,,
७९६	दद्रुरोगोपशमनाय प्रायश्चित्तविधेर्विस्तरेण निरूपणम्।	२७३
७९७	पूर्वं विनिहतेऽश्वेत्र वक्रकण्ठत्वं तत्प्रायश्चित्तकथनञ्च।	२७४
७९८	पारावतप्राणघातादिह जन्मनि पाणिहीनत्वं तत्प्रायश्चित्तञ्च। ...	,,
७९९	इक्षुविकारहरणादत्रोदरे गुल्मरोगतः पीडा तत्प्रायश्चित्तकथनञ्च	२७५

अ०	विषयाः	पृ०
८००	पुरा गर्भपातनतोऽत्र यकृत्प्लीहज-लोदरतः पीडा तत्प्रायश्चित्तकथनञ्च ।	२७५
८०१	मन्दाग्निरोगजनकदोषतत्प्रायश्चित्त-कथनम् ।	,,
८०२	पूर्वभवे सिद्धान्नहरणतोऽत्र मंदाग्नित्वा दजीर्णरोगस्तत्प्रयश्चित्तकथनञ्च ।	,,
८०३	पूर्वं गुरोरनुज्ञामनवाप्य वेदाध्ययन-करणादिह प्रज्ञाहानित्वं तत्प्राय-श्चित्तञ्च ।	२७६
८०४	पूर्वं गुरुजायाभिगमनतोऽत्र मूत्रकृच्छ्रं तत्प्रायश्चित्तकथनञ्च ।	,,
८०५	पूर्वं मातृगमनादिह जन्मनि लिंगवि-नाशस्तत्प्रायश्चित्तकथनञ्च	२७७
८०६	सुरालये जलेऽन्यत्र वा शकृन्मूत्रकर णादत्र गुदरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
८०७	पूर्वं स्मार्ताग्निशमनादिह भवेऽतिसार रोगप्राप्तिस्तच्छमनाय प्रायश्चित्तवि धिनिरूपणञ्च ।	२७८
८०८	पुरा वत्सवियोजनतोऽत्र चतुर्विधवं-ध्यात्वं तत्प्रतीकाराय प्रायश्चित्तक थनञ्च ।	,,
८०९	अनन्यगतिकामदुष्टां भार्यां विना प्रयो जनं परित्यज्य व्यवहर्तुरत्र ग्रहणी-रोगस्तत्प्रायश्चित्तकथनञ्च ।	२७९
८१०	हरिणादिपशुहनने इहजन्मनि खञ्ज-त्वादिरोगास्तत्प्रायश्चित्तानि च ।	,,
८११	व्यर्थभाषणादिह त्वग्दोषस्तत्प्रायश्चि-त्तकथनञ्च ।	२८०
८१२	मातृपितृगुरुदेवब्राह्मणनिंदाश्रवणात् कर्णाभ्यामत्रपूयशोणितप्रस्रवस्तत्प्रा-यश्चित्तकथनञ्च ।	,,
८१३	पुरा ब्रह्महन्तुरिह जन्मनि पाण्डु कुष्ठरोगस्तत्प्रायश्चित्तकथनञ्च ।	२८१
८१४	क्षुत्पिपासातुरतया भर्तारमवमत्य स्वयं मिष्टान्नभक्षणादिह नार्या यौ-वनेऽपि पुष्पनाशस्तत्प्रायश्चित्त-कथनञ्च ।	२८३
८१५	पूर्वभवे विधवागमनात् अत्र रक्तार्बुद-रोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
८१६	दधिचौर्यतो जातस्य किल्बिषस्या-पहाराय प्रायश्चित्तं सर्वांगवेदना-निदानकथनपूर्वकं तत्प्रायश्चित्तक-थनञ्च ।	,,
८१७	शतद्रोः पूर्वभागे समुत्पन्नस्य भ्रातृ-मित्रधनयुक्तस्य द्विजस्य ज्येष्ठभार्या-या मृतापत्यत्वनिदानं तत्प्रायश्चित्त-कथनञ्च ।	२८४
८१८	कुरुक्षेत्राद्याम्यभागे कस्यचिद्वणिक्-सुतस्य स्वल्पवित्तस्य वातपित्तद्वययु-तस्य जातपुत्रविनाशनिदानं तत्प्रा-यश्चित्तकथनञ्च ।	२८५
८१९	पञ्चनददेशे जातस्य गौरवर्णस्य पित्ताधिकस्य पुत्रसंततिदुःखनिदानं तत्प्रायश्चित्तकथनञ्च ।....	२८६
८२०	ऐरावतीनदीतीरे जातस्य क्षत्रियस्य पुत्रदारधनयुतस्य यौवने नेत्ररोग-निदानं तत्प्रायश्चित्तकथनञ्च ।	,,
८२१	यामुनदेशभवस्य कस्यचित् वाहु-जस्य पुत्रसौख्यराहित्यनिदानं त-त्प्रायश्चित्तकथनञ्च ।	२८७
८२२	कुरुजाङ्गलजातस्य द्विजस्य जातशिशु-नाशनिदानं तत्प्रायश्चित्तकथनं च ।	२८८
८२३	शतद्रुनिकटे जातस्य वंदिनो मधुर-वचसो लोके पुत्राभावनिदानं तत्प्रा-यश्चित्तञ्च ।	,,
८२४	शतद्रुनिकटे जातस्य शूद्रस्य धनवतः पितृभक्तियुतस्य नैकस्त्री-भोगसंयुतस्य मृतपुत्रत्वनिदानं तत्प्रायश्चित्तकथनञ्च	२८९

अ०	विषयाः	पृ०
८२५	शतद्रुनिकटे जातस्य क्षत्रियस्य पितृमातृसुखहीनस्य जातपुत्रविनाशनिदानं तत्प्रायश्चित्तकथनञ्च ।	२९०
८२६	ऐरावतीतारे जातस्य द्विजस्य मृतपुत्रत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
८२७	रामह्रदाद्याम्ये जाङ्गलदेशसमुद्भवस्य शूद्रस्य सन्ततिराहित्यनिदानं तत्प्रायश्चित्तकथनञ्च ।	२९१
८२८	सरस्वत्या याम्यभागे जातस्य स्वल्पधनस्य चिंतापरस्य जातपुत्रविनाशनिदानं तत्प्रायश्चित्तकथनञ्च।	,,
८२९	विपाशादेशे जातस्य क्षत्रियस्य पूर्वजन्मनि ब्राह्मणस्य यत्र यत्र कृता घातास्तत्र तत्र कुष्ठरोगयुतस्य स्त्रीपुत्रहीनत्वकथनं तत्प्रायश्चित्तकथनञ्च ।	२९२
८३०	शतद्रुनिकटे जातस्य द्विजस्य पित्तकफान्वितस्य भार्याद्वययुतस्य ज्येष्ठभार्याया अपुत्रत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	२९३
८३१	सौराष्ट्रदेशे जातस्य द्विजस्य दुःखसमन्वितस्य राजोपसेवकस्य पुत्रहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च	२९४
८३२	रामह्रदाद्याम्ये षष्टियोजनसंमितेदेशे जातस्य वणिक्सुतस्य स्वल्पवित्तस्य भार्याया गर्भदुःखाकुलत्वं तत्प्रायश्चित्तञ्च ।	,,
८३३	पर्वतोपरि भूमिपालकुलजस्य बहुव्ययपरस्य बहुभार्यस्य सुखान्वितस्यं पुत्रेभ्योऽति दुःखप्राप्तिनिदानं तत्प्रायश्चित्तकथनञ्च ।	२९५
८३४	पर्वताश्रितशतयोजनविस्तीर्णप्रदेशे जातस्य भूपस्य वयसो द्वादशवर्षे राज्याधिरूढस्य यौवने पादोदरव्यथायुक्तस्य त्रिंशन्मिताब्दके महारिष्टप्राप्तिस्तन्निष्कृतिश्च ।....	२९५
८३५	शतद्रुनिकटे जातस्य क्षत्रियस्य भार्यायाः सुस्नेहायाः सदाचारायाउदरे रक्तस्रावार्पाडावत्या गर्भास्थिरतानिदानं तत्प्रायश्चित्तञ्च ।	२९७
८३६	कुरुक्षेत्रे जातस्य क्षत्रियस्य पुत्रविवर्जितस्य यौवने क्षयप्राप्तिनिदानं तत्प्रायश्चित्तञ्च ।	२९८
७३७	शूद्रस्य कस्यचित् स्त्रीमित्रसंयुतस्यैश्वर्यवतो मृतपुत्रत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
८३८	विपाशैरावतीमध्ये क्षत्रियस्य स्वल्पवित्तस्य बहुभार्यस्य जातपुत्रविनाशनिदानं तत्प्रायश्चित्तकथनञ्च ।	२९९
८३९	पर्वते जातस्य क्षत्रियस्य देवब्राह्मणपूजकस्य भार्याद्वयवंध्यात्वनिदानं तत्प्रायश्चित्तकथनञ्च ।....	,,
८४०	रामह्रदाद्याम्ये दशयोजनाभ्यंतरे जातस्य वणिजो धनिनां कुले समुत्पन्नस्य जातसंततिनाशनिदानं तत्प्रायश्चित्तकथनञ्च ।	३००
८४१	पर्वते दुष्टक्षात्रियकुलजस्य विद्याभ्यासरतस्य सुखैश्वर्यवतो भार्याद्वयस्यपुत्रविहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	३०१
८४२	पुष्करसमीपे जातस्य क्षत्रियस्य सुखिनो विद्यावतो वाग्मिनः पंचचत्वारिंशे वयसो वर्षे महारिष्टनिदानं तत्प्रायश्चित्तकथनं च ।	३०२
८४३	पञ्चनददेशे जाबस्य ब्राह्मणस्य जातपुत्रविनाशनिदानं तत्प्रायश्चित्तञ्च ।	,,

अ०	विषयाः	पृ०
८४४	सरस्वतीपरभागे जातस्य क्षत्रियस्य पुत्राभावनिदानं तत्प्रायश्चित्तकथनं च ।	३०३
८४५	पुरा तिर्यग्गमनादिह शूलप्रमेहरोगो तत्प्रायश्चित्तञ्च ।	३०४
८४६	पूर्वभवे विषदानाद्बालकहननेन नार्या अत्र स्रवद्गर्भत्वं तत्प्रायश्चित्तञ्च ।	,,
८४७	प्राग्भव परमौक्तिकहरणादिह पुत्रसुखाभावस्तत्प्रायश्चित्तकथनञ्च ।	३०६
८४८	पूर्वं रीत्यपहरणादत्र जन्मनिपिङ्गलाक्षत्वं तत्प्रायश्चित्तकथनञ्च ।	३०७
८४९	पुरा खरहननादत्र खररोमत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
८५०	पूर्वं गर्भपुष्ट्यर्थं कुक्कुटाण्डभक्षणादिह संकरजाताया नार्या गर्भधारणाभावस्तत्प्रायश्चित्तञ्च ।	,,
८५१	स्वर्णकारकुले जातस्य लोभपरस्य धूर्तस्य राजजनप्रियस्य सुखैश्वर्यधनयुक्तस्य पुत्रहीनत्वं तत्प्रयश्चित्तं च ।	,,
८५२	पूर्वं खरहननादिह नार्याः खररोमत्वं तत्प्रायश्चित्तकथनञ्च ।....	३०८
८५३	पुरा रीत्यपहरणादिह भवे नार्याः पिङ्गाक्षित्वं तत्प्रायश्चित्तकथनञ्च ।	,,
८५४	पूर्वं परसिद्धान्नहरणादिह शूलरोगस्तत्प्रायश्चित्तञ्च ।	,,
८५५	पुराभवे उष्ट्रघातादिह विकृतस्वरत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
८५६	गर्भपातरताया इह भवे वन्ध्यात्वं तत्प्रायश्चित्तञ्च ।	,,
८५७	पूर्वं कांस्यहरणादत्र शीर्षरोगस्तत्प्रायश्चित्तञ्च ।	,,
८५८	पञ्चनददेशे जातस्य वैश्यस्य सुखैश्वर्ययुतस्य जातपुत्रविनाशकत्वं तत्प्रायश्चित्तञ्च ।	३०९
८५९	प्राग्भवे कांस्यहरणात् शीर्षरोगस्तत्प्रायश्चित्तकथनं च ।	३०९
८६०	वन्ध्यात्वहरप्रायश्चित्तम् ।	,,
८६१	सतीं स्वभार्यां परित्यज्यान्यस्त्रीगमनादत्र ग्रहणीरोगस्तत्प्रायश्चित्तञ्च।	३१०
८६२	कांस्यहरणादिह नार्याः शीर्षरोगस्तत्प्रायश्चित्तञ्च ।	,,
८६३	पूर्वं मोहादुष्ट्रस्य नाशे कृतेऽत्र नार्या विकृतस्वरत्वं तत्प्रायश्चित्तञ्च ।	,,
८६४	पुरा घृतहरणादिह नेत्ररोगयुतत्वं तत्प्रायश्चित्तञ्च ।	,,
८६५	पूर्वं स्वकं पतिं परित्यज्य परपुरुषसेवनादिह जन्मनि नार्या ग्रहणीरोगस्तत्प्रायश्चित्तञ्च ।	,,
८६६	विप्रवर्णकुलोत्पन्नस्य रक्ताक्षदर्शनस्य उदरेवातरोगवतः किंचिद्वित्तसमन्वितस्य भार्याया मृतपुत्रत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
८६७	वन्ध्यात्वहरप्रायश्चित्तस्य प्रकारान्तरेण निरूपणम् ।	३११
८६८	देवद्रव्यापहरणादत्र विंशद्वर्षोत्तरं नेत्रभङ्गस्तत्प्रायश्चित्तकथनञ्च ।	,,
८६९	पूर्वभवे वृषभस्य मुष्कनिष्कुट्टनादिह षण्ढत्वम् ।	३१२
८७०	पूर्वजन्मनि परघृतहरणादिह नार्या नेत्रपीडा तत्प्रायश्चित्तकथनञ्च ।	,,
८७१	पूर्वभवे महिषीहननादत्र कृष्णगुल्मरोगस्तत्प्रायश्चित्तञ्च ।	,,
८७२	धनभृत्याश्वभोगाद्यैर्युतायाः शूद्रयाः पुत्रसंततिहीनत्वनिदानं तत्प्रायश्चित्तञ्च ।	,,
८७३	पूर्वजन्मनि दुग्धहरणादिह बहुमूत्रत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
८७४	स्त्रीणामपितथैव ।	३१३

अ०	विषयाः	पृ०
८७५	पूर्वं नवयौवनमहिषीघातादिह कुष्ठ-गुल्मरोगस्तत्प्रायश्चित्तकथनञ्च।	३१३
८७६	वृषस्य मुष्कनिकृन्तनादिह भवे षण्ढत्वं ज्ञानाज्ञानकृतेऽपि प्रायश्चित्ताभावश्च।	,,
८७७	पूर्वभवे प्रमादेन फलहरणादिह नार्याः पुत्रहीनत्वं तत्प्रायश्चित्तकथनञ्च।	,,
८७८	दधिहरणादत्र भवे मेदोरोगस्तच्छमनार्थं प्रायश्चित्तकथनं च।	,,
८७९	पूर्वजन्मनि महिषीघातादिह कृष्ण-गुल्मरोगस्तत्प्रायश्चित्तकथनं च।	,,
८८०	वृषभानां नासाग्रच्छेदादिह युवावस्थायां नासाच्छेदस्तत्प्रायश्चित्तञ्च।	३१४
८८१	गंगापश्चिमभागे मायापुरे जातस्य द्विजस्य राजमान्यस्य विष्णुभक्तिपरस्य पुत्रविहीनत्वनिदानं तत्प्रायश्चित्तञ्च।	,,
८८२	महाभूमिभुजां वंशे जातस्य यवनस्य सर्वविद्याविशारदस्य सुखैश्वर्यसमायुक्तस्य पञ्चषष्टिमितवर्षे महारिष्टनिदानं तत्प्रायश्चित्तञ्च।	३१५
८८३	पूर्वभवे तरक्षुघातादिह नेत्रेषु कातरत्वं तत्प्रायश्चित्तकथनञ्च।	,,
८८४	पुरा देवमंदिरगतधातुमयदीपपात्रापहरणादिह नार्याश्चक्षुःपीडा तन्निकृत्तये प्रायश्चित्तकथनञ्च।	,,
८८५	पुरा मधुहरणादत्र जन्मनि दुष्टगंधत्वं तत्प्रायश्चित्तकथनञ्च।	,,
८८६	पूर्वं तरक्षुघातान्नार्या इह कातराक्षीत्वं तत्प्रायश्चित्तकथनञ्च।	३१६
८८७	पुरा विप्रस्य मुष्कनिकृन्तनादत्र भवे जातस्य शूद्रस्य षण्ढत्वं तत्प्रायश्चित्ताभावश्च।	,,
८८८	क्षात्रकुलजस्य वातरक्तपीडितस्य भार्यायाः एकापत्यानंतरं पुष्पविनाशनिदानं तत्प्रायश्चित्तञ्च।	,,
८८९	पूर्वभवे माक्षिकहरणादिह नार्या दुर्गन्धाढ्यत्वं तत्प्रायश्चित्तकथनञ्च।	३१७
८९०	अगम्यागमनतः पूर्वमत्र षंढत्वं तत्प्रायश्चित्ताभावश्च।	,,
८९१	पुरा सपत्न्याः कुमारस्य विषेण कृताद्घातादिह नार्या बाल्ये कुष्ठसमुद्भवकथनम्।	,,
८९२	वराहघातादत्र जन्मनि दन्तुरत्वं तत्प्रायश्चित्तकथनञ्च।	,,
८९३	पुरा भवे गुडहरणादत्र गुल्मरोगेण पीडा तच्छमनोपायकथनञ्च।	,,
८९४	यमुनातीरे जातायाः शूद्रयाः पतिसेवापरायाः बाल्ये कुष्ठरोगनिदानं तत्प्रायश्चित्तञ्च।	,,
८९५	सिंधुमंडले जातस्य यवनस्य सुखैश्वर्यधनान्वितस्य षंढत्वं तस्य सद्गतये प्रायश्चित्तकथनञ्च।	३१८
८९६	पुरा वराहघातेन दन्तुरात्वं तत्प्रायश्चित्तकथनञ्च।	,,
८९७	पूर्वं तैलहरणादिह नार्याः कण्डुरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
८९८	पूर्वं स्त्रीपरित्यागादिह जातस्य षंढत्वं तत्प्रायश्चित्तकथनञ्च।	,,
८९९	पुरा स्वभक्ष्यार्थं मृगघातादिह अत्यंतखंजत्वं तत्प्रायश्चित्तकथनञ्च।	,,
९००	पूर्वं गुडहरणादिह जन्मनि गुल्मोदररोगस्तत्प्रायश्चित्तकथनञ्च।	,,
९०१	पर्वतदेशे समुत्पन्नमहाविभवयुतस्य स्त्रीवर्जितत्वनिदानम्।	३१९
९०२	नृपं विना मृगघातादत्र खञ्जत्वं तत्प्रायश्चित्तकथनं च।	,,

अ०	विषयाः	पृ०
९०३	परतैलापहरणादिहभवे कंडूरोगस्तत्प्रायश्चित्तकथनञ्च ।	३१९
९०४	पूर्वं राजपत्न्यां गर्भधारणादिह विना प्रायश्चित्तं स्त्रीपुत्रसुखहीनत्वम् ।	,,
९०५	स्वगर्भपरिपोषाय पूर्वं मृगवधादत्र नार्यास्तद्घातकाले खंजत्वं तत्प्रायश्चित्तकथनञ्च ।....	,,
९०६	क्षात्रकुलभवस्य दानदाक्षिण्यपरस्य मेहादिपीडितस्य भार्यायाः सदाचारत्वात्या गर्भास्थिरत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	३२०
९०७	पूर्वजन्मनि तुरंगघातादिह वक्रकण्ठत्वं तत्प्रायश्चित्तकथनञ्च ।	३२१
९०८	पूर्वं शृगालघातेनात्र भवे पादहीनत्वं तत्प्रायश्चित्तकथनञ्च।	,,
९०९	गंगातीरे जातस्य शूद्रस्य धनपुत्रान्वितस्य युवभावे चक्षुर्हीनत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
९१०	पूर्वं शृगालवातादिह भवे नार्याः पादभंगस्तत्प्रायश्चित्तकथनञ्च ।....	,,
९११	पुरा वाजिघातादिह नार्या वक्रकंठत्वं तत्प्रायश्चित्तवर्णनञ्च ।....	,,
९१२	यमुनातीरे क्षत्रियवंशभवस्य धनसौख्यलोभवतो मितप्रदस्य बहुस्त्रीकस्य विशेषतो बुद्धिमतः पुत्राभावनिदानं तत्प्रायश्चित्तकथनञ्च।	३२२
९१३	पूर्वं रीत्यपहरणादिह भवेपिंगलाक्षत्वं तत्प्रायश्चित्तकथनञ्च ।....	,,
९१४	पुरा खरघातादत्र खररोमत्वं तच्छमनाय प्रायश्चित्तकथनञ्च ।	,,
९१५	प्राग्भवे गर्भपुष्ट्यर्थं कुक्कुटांडभक्षणादिह नार्या गर्भधारणाभावस्तत्प्रायश्चित्तकथनञ्च ।	,,
९१६	स्वर्णकारकुले जातस्य सुखैश्वर्यधनयुक्तस्य स्त्रीसुखिनो लोकवंचकस्य पुत्ररहितत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।....	,,
९१७	पुरा खरघातादिह भवे नार्याः खररोमत्वं तत्प्रायश्चित्तकथनञ्च ।	३२३
९१८	पूर्वं रीत्यपहरणादिह नार्याः पिङ्गाक्षित्वं तत्प्रायश्चित्तञ्च ।	,,
९१९	प्राग्भवे परसिद्धान्नहरणादिह नार्याः शूलरोगस्तत्प्रायश्चित्तवर्णनञ्च ।....	३२४
९२०	पूर्वं जघ्नुवातादत्र नरस्य विकृतस्वरत्वं तत्प्रायश्चित्तकथनं च ।	,,
९२१	पूर्वं गर्भपातादत्र यवनीत्वं प्राप्यवन्ध्यात्वं तत्प्रायश्चित्तकथनं च ।	,,
९२२	कांस्यहरणादिह नरस्य शीर्षपीडा तच्छमनाय प्रायश्चित्तकथनञ्च ।....	,,
९२३	पञ्चनददेशे जातस्य वैश्यस्य सुखैश्वर्यधनयुक्तस्य जातपुत्रविनाशकत्वनिदानं तत्प्रायश्चित्तञ्च ।	,,
९२४	पूर्वं कांस्यहरणादिह भवे शीर्षरोगस्तत्प्रायश्चित्तकथनञ्च ।	३२५
९२५	वन्ध्यायाः पुत्रसन्तानोत्पत्तिविधानकथनम् ।	,,
९२६	साध्वीं स्वभार्यां परित्यज्य परदारगमनादिह भवे ग्रहणीरोगस्तत्प्रायश्चित्तकथनञ्च	,,
९२७	पुरा जन्मनि कांस्यहरणादिह नार्याः शीर्षपीडा तत्प्रायश्चित्तञ्च ।	,,
९२८	पूर्वं नार्या उष्ट्रघातदोषादत्र विकृतस्वरत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
९२९	पूर्वं परघृतापहरणात् अत्र भवे नेत्ररोगस्तत्प्राप्तिनाशाय प्रायश्चित्तकथनञ्च ।	३२६

अ०	विषयाः	पृ०
९३०	स्वपतिं परित्यज्य पूर्वभवे परपुरुषगमनात् नार्या ग्रहणीरोगस्तत्प्रायश्चित्तकथनञ्च ।	३२६
९३१	विप्रवर्णकुलोत्पन्नस्य उदरे वातपीडितस्य आदिपुत्रविनाशोत्तरं अपत्याभावनिदानं तत्प्रायश्चित्तं च ।	,,
९३२	वृषस्य मुष्कनिकुट्टनतोत्र नरस्य षण्ढत्वं तत्प्रायश्चित्ताभावश्च ।	३२७
९३३	मोहात्परघृतप्राशनत इह नार्या नेत्ररोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	,,
९३४	पूर्वभवे महिषीवधादत्र कृष्णगुल्मरोगेण नरस्य परमपीडा तत्प्रायश्चित्तकथनञ्च ।	,,
९३५	प्राग्गोघातादत्र भवे नार्याः पुत्रसंततिहीनत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
९३६	प्राग्भवे दुग्धहरणादत्र नरस्य बहुमूत्ररोगस्तत्प्रायश्चित्तञ्च ।	,,
९३७	पूर्वभवे परदुग्धहरणादिह नार्या बहुमूत्ररोगस्तत्प्रायश्चित्तकथनञ्च ।	३२८
९३८	मोहान्महिषीघातेनात्र नरस्य कृष्णगुल्मरोगस्तत्प्रायश्चित्तकथनञ्च ।....	,,
९३९	वृषस्य मुष्कनिकुट्टनतोत्र भवे षण्ढत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
९४०	पक्वफलाहरणादिहात्यंतं पुत्रविनाशस्तत्प्रायश्चित्तकथनञ्च ।	,,
९४१	पूर्वं दधिहरणादिह नरस्य मेदोरोगेण पीडा तत्प्रायश्चित्तकथनञ्च ।	,,
९४२	पूर्वभवे महिषीघातादिह कृष्णगुल्मरोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	,,
९४३	पूर्वजन्मनि वृषभानां नासाग्रच्छेदादत्र नरस्य नासाच्छेदस्तत्प्रायश्चित्तञ्च ।	३२९
९४४	भूमिभुजां म्लेच्छानां कुले जातस्य पञ्चपञ्चाशत्तमे वयसि महारिष्टप्राप्तिनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
९४५	पूर्वं दधिहर्त्र्या नार्या अत्र मेदोरोगतःपरमपीडा तत्प्रायश्चित्तकथनञ्च।	३२९
९४६	पूर्वभवे तरक्षुहननादत्र नेत्रयोः कातरत्वं तत्प्रायश्चित्तवर्णनञ्च ।	,,
९४७	पुरा देवालयस्थधातुमयदीपपात्रहरणादिह नार्याश्चक्षुःपीडा तत्प्रायश्चित्तकथनञ्च ।	,,
९४८	पुरा मधुहरणादत्र जन्मनि नरस्य पूतिगंधित्वं तत्प्रायश्चित्तवर्णनञ्च ।	३३०
९४९	पूर्वं तरक्षुघातादत्र भवे नार्याः कातराक्ष्या नेत्रपीडा तत्प्रायश्चित्तकथनञ्च ।	,,
९५०	पञ्चनददेशे जातस्य शूद्रस्य सकलैश्वर्यसंपन्नस्य षण्ढत्वनिदानकथनम् ।	,,
९५१	क्षात्रकुलजस्य शौर्यौदार्यशौधनयुतस्य वातपीडावतो भार्यायाः शुभाचारवत्याः पुष्पनाशनिदानं तत्प्रायश्चित्तवर्णनञ्च ।	,,
९५२	पूर्वभवे वाक्षिकहरणादत्र नार्याः पूतिगन्धित्वं तत्प्रायश्चित्तकथनं च।	३३१
९५३	पुरा अगम्यागमनादत्र नरस्य षण्ढत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
९५४	सपत्न्याः सुतस्य विषदानेन प्राणहरणादिह भवे नार्या बाल्ये कुष्ठरोगप्राप्तिश्चतुर्विंशन्मिते वर्षे मरणञ्च ।	,,
९५५	पूर्वं वराहहननादिह नरस्य दन्तुरत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
९५६	पूर्वं गुडहरणादिह नरस्य गुल्मोदराख्यरोगप्राप्तिस्तत्प्रायश्चित्तकथनञ्च ।	,,
९५७	यमुनातीरजायाः शूद्रया बाल्ये कुष्ठरोगप्राप्तिनिदानं तत्प्रायश्चित्तकथनञ्च ।	३३२

अ०	विषयाः	पृ०
९५८	पर्वताश्रितसिंधुमंडलेजातस्य यवनस्य सुखैश्वर्यधनान्वितस्य षण्ढत्वनिदानकथनम्।	३३२
९५९	पूर्वभवे वराहघातादत्र नार्या दन्तुरत्वं तत्प्रायश्चित्तकथनञ्च।	,,
९६०	पूर्वं तैलहरणादत्र नरस्य कण्डूरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
९६१	पूर्वभवे विनापराधं भार्यापरित्यागादत्र षण्ढत्वं तत्प्रायश्चित्तकथनाभावश्च।	,,
९६२	पुरा स्वभक्ष्यार्थं मृगहननादत्र नरस्य खंजत्वं तत्प्रायश्चित्तकथनञ्च।	,,
९६३	प्राग्भवे मोहात् परगुडापहरणादत्र नार्या गुल्मोदरपीडा तत्प्रायश्चित्तकथनञ्च।	३३३
९६४	शुभाननां सुस्वरूपां स्वस्त्रियं परित्यज्य परदारगमनादत्र स्त्रीविवर्जितत्वं तन्निष्कृतिकथनञ्च।	,,
९६५	नृपं विना मृगघातादत्र तद्घातकाले मृगहन्तुः खंजत्वं तत्प्रायश्चित्तकथनञ्च।	,,
९६६	पुराभवे परतैलापहरणतोऽत्र नार्याः कण्डूरोगतः पीडातन्निष्कृतिकथनञ्च	,,
९६७	पुरा राजपत्न्यां गर्भधारणादत्र भवे सर्वधर्मबहिष्कृतिकरषण्ढत्व तत्प्रायश्चित्तकथनञ्च।	३३४
९६८	स्वगर्भपालनार्थं पुरा मृगहननादिह नार्यास्तत्काले खंजत्वं तन्निष्कृतिकथनञ्च।	,,
९६९	क्षत्रकुलसमुद्भवस्य दानदाक्षिण्यपरस्य मेहादिविकारपीडितस्य भार्याया गर्भस्थिरताऽभावनिदानं तत्प्रायश्चित्तकथनञ्च।	,,
९७०	पूर्वजन्मनि तुरंगवातादिह नरस्य वक्रकण्ठत्वं तत्प्रायश्चित्तकथनञ्च।	३३५
९७१	पुराभवे शृगालघातादत्र विशेषतः पादहीनत्वं तत्प्रायश्चित्तकथनञ्च।	,,
९७२	गंगातीरे जातस्य शूद्रस्य धनपुत्रसमन्वितस्य युवावस्थायां चक्षुर्हीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च।	,,
९७३	पूर्वजन्मनि शृगालघातादत्र नार्या ऊर्ध्वपातात्पादभंगस्तत्प्रायश्चित्तकथनञ्च।	,,
९७४	पूर्वमश्वघातादिह नार्या वक्रकंठत्वं तच्छमनाय प्रायश्चित्तकथनञ्च।....	३३६
९७५	यमुनातीरे जातस्य क्षत्रियस्य मृतपुत्रत्वनिदानं तत्प्रायश्चित्तकथनञ्च।	,,
९७६	कामतः प्राग्भवे ब्रह्मघातादत्र नरस्य क्षयरोगप्राप्तिकथनम्।	,,
९७७	पूर्वजन्मनि मोहादकामतो द्विजघातादत्र क्षयरोगस्तत्प्रायश्चित्तकथनञ्च।	३३७
९७८	भर्तुर्मरणानंतरं सहगमनतः स्त्रीणां गतिवर्णनम्।	,,
९७९	कुंभलग्नोगरे जातस्य क्षत्रियस्य क्षयरोगप्राप्तिनिदानं तदग्रे क्षयरोगेणैव पुत्रादिस्वजनमरणप्राप्तिश्च।	,,
९८०	विशेषतो वृद्धस्य जितसकलभूपस्य अयोध्याभिधदेशे जातस्य क्षत्रियस्य युवभावे क्षयरोगोत्पत्तिनिदानं तन्निवृत्युपायकथनञ्च।	,,
९८१	पूर्वभवे मोहात्कुक्कुटवधादत्र नार्या नासावक्रत्वं तत्प्रायश्चित्तकथनञ्च।	३३
९८२	पुराभवे ब्राह्मणहनना नार्या अत्र क्षयरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
९८३	पुरा स्वसृघातादत्र नरस्य बधिरत्वं तत्प्रायश्चित्तकथनञ्च।	,,

अ०	विषयाः	पृ०
९८४	प्राग्वज्रवातजपादादिह नार्या क्षयरोगपीडा तत्प्रायश्चित्तकथनञ्च ।	३३८
९८५	गंगायाः प्राक्तारदेशे जातस्य शूद्रस्य स्वल्पवित्तस्य जातपुत्रविनाशनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
९८६	विराटदेशे जातायाः पतिशुश्रूषणपरायाः धनधर्माढ्यायाः क्षयरोगयुक्तायाः पुत्राभावनिदानं तत्प्रायश्चित्तकथनञ्च ।	३३९
२८७	पूर्वजन्मनि सारिकावातादत्र नरस्य स्खलितवाक्त्वं तत्प्रायश्चित्तकथनञ्च।	,,
९८८	नार्या अपि तथा ।	,,
९८९	पूर्वजन्मनि वकवातादत्र नरस्य लंबकण्ठत्वं तत्प्रायश्चित्तकथनञ्च ।	३४०
९९०	स्त्रीणामपि तथैव ।	,,
९९१	कस्यचिद्द्विजकुलजस्य वातपीडावतो धर्मनिष्ठावतो वित्तयुतस्य भार्यायाः सदाचारवत्या मृतवत्सनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
२९२	पूर्वमभक्ष्यभक्षणतोऽत्र नरस्य कृमिलोदरत्वं तत्प्रायश्चित्तकथनञ्च ।....	३४१
९९३	स्त्रीणामपि तथैव ।	,,
९९४	दुष्टस्पर्शादत्र नार्याः कृशोदरीत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
९९५	गंगायाःपूर्वभागे द्विजवंशसमुद्भवस्य बन्धुस्त्रीसुखसंयुतस्य मृतपुत्रत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
९९६	द्विजभार्यायाः क्षयान्वितायाः पुत्रसंततिहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	३४२
९९७	उच्छिष्टभक्षणादत्र नरस्य रात्र्यंधत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
९९८	पूर्वभवे रसलोभादुच्छिष्टभक्षगतो नार्या अपि रात्र्यंधत्वं तत्प्रायश्चित्तञ्च ।	,,
९९९	पुरा विडालोच्छिष्टभोजनतोऽत्र नरस्य रात्र्यंधत्वं तत्प्रायश्चित्तकथनञ्च ।	
१०००	स्त्रीणामपि तथैव ।	३४३
१००१	चांडालीगमनादत्राजगरवन्मूढत्वंतत्प्रायश्चित्तकथनञ्च ।	,,
१००२	पूर्वं चांडालपुरुषसंगमादिह नार्या अजगरवन्मूढत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१००३	परान्नविघ्नकरणादिह भवे अजीर्णरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१००४	परान्नविघ्नकरणान्नार्या अजीर्णरोगस्तत्प्रायश्चित्तविधिकथनञ्च ।	,,
१००५	द्विजकुलोद्भवस्य किलासदद्रुकंडूनेत्रतोदवतो भार्यायाः मृतवत्सत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१००६	पूर्वजन्मनि द्विजाय घातार्थं विषदानादत्र च्छार्दिरोगेण यौवनएव प्राणहानिकथनम् ।	३४५
१००७	पुरा द्विजाय विषदानादिह नार्या च्छार्दिरोगेण यौवनएव मरणकथनम्।	,,
१००८	द्विजेतरस्मै कस्मैचिदपि विषदानादिह च्छार्दिरोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	,,
१००९	भ्रातृवातान्मूकत्वम् ।	,,
१०१०	पुत्राभिलाषात्पूर्वं यवनपुरुषसंभोगादत्र यवनीत्वे पुत्रसंततिवर्जितत्वं तत्प्रायश्चित्तञ्च ।	,,
१०११	गंगाश्रयपर्वते जातस्य भूरुस्य भूतदयावतो बाल्ये पांडुरोगप्राप्तिनिदानं तत्प्रायश्चित्तञ्च ।	,,
१०१२	पूर्वभवे द्विजेतरस्मै विषदानादत्र नार्याश्छर्दिरोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	३४६
१०१३	गंगायाः पूर्वभागे जातस्य क्षत्रियस्य बहुद्रव्यपराक्रमस्य जातपुत्रविनाश-	

अ०	विषयाः	पृ०
	निदानं तच्छमनाय प्रायश्चित्तकथनञ्च ।	३४६
१०१४	क्षत्रियकुलभवाया दुःखाकुलाया दयितोज्झिताया वन्ध्यात्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	"
१०१५	भ्रातृघातकरणादत्र नार्या मूकत्वम् ।	"
१०१६	देवद्रव्यापहरणादक्षिपीडातो विंशतिपौत्तरं नेत्रभंगस्तदुपायकथनञ्च ।	३४७
१०१७	सर्वस्नेहहरणादत्र भवे नरस्य क्षयरोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	"
१०१८	पूर्वभवे ब्रह्मवादरताया इह किंचित्पतिदोषात्तनुमंगकृत्यान्ते पार्वतीसमीपताप्राप्तिकथनम् ।	"
१०१९	अज्ञानात् पूर्वभवे भ्रातृघाततो मूकत्वं—नरस्य पुत्रसंतानलाभाय प्रायश्चित्तविधिनिरूपणञ्च ।	"
१०२०	क्षत्रियकुलभवाया धनभोगवत्या नार्याः पुत्रान्विताया: क्षयरोगप्राप्तिस्तच्छमनप्रायश्चित्तञ्च ।	"
१०२१	धूर्तकर्मणा लोकवंचनादत्र भवे अपस्माररोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	३४८
१०२२	पूर्वभवे स्वर्णापहरणादिह पुत्रहीनत्वं तत्प्रायश्चित्तकथनञ्च ।	"
१०२३	पुरा बालघातादिह नरस्य मृतपुत्रत्वं तत्प्रायश्चित्तकथनञ्च ।	"
१०२४	पूर्वदोषात्सूकरादियोनीरुपभुज्य यवनीत्वमापन्नाया नार्या भर्त्रा सह तीर्थराजसेवनात्सर्वैश्वर्यप्राप्ति कथनम् ।	"
१०२५	पूर्वं सर्वस्नेहहरणादिह प्रयागे जातस्य धनपुत्रवतो वेदवक्तुर्द्विजस्य क्षयरोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	"
१०२६	यमुनायां जातस्य क्षत्रियस्य धनमित्रसुखैश्वर्यनानास्त्रीभोगयुतस्याप्राप्तमनोरथस्य जातपुत्रविनाशनिदानं तत्प्रायश्चित्तकथनञ्च ।	३४९
१०२७	जात्युत्तमानां जन्तुषि प्राप्तस्य सर्वसंपत्समृद्धस्य बन्धुसौख्ययुतस्य जोतसंततिदुःखनिदानं तत्प्रायश्चित्तकथनञ्च ।	३५०
१०२८	पूर्वं पुरुषघातादत्र नार्याः शूलरोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	"
१०२९	पूर्वजन्मनि नरघाताद्वा मित्रघातादत्र वायुरोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	
१०३०	ज्ञानपूर्वककर्मकर्तुर्भोगादेव कर्मणः क्षयकथनम् ।	३५१
१०३१	पूर्वभवे स्नेहहरणतो नरस्य क्षयरोगतः पीडा तच्छमनोपायवर्णनञ्च ।	"
१०३२	पुरा जाराश्रयात्पतिहन्त्र्या नार्या अत्र भवे वाल्ये वैधव्यकथनं तदुपाय कथनञ्च ।	"
१०३३	पूर्वं देवतागारदाहादत्र रक्तातीसाररोगतः पीडा तच्छमनोपायश्च ।	"
१०३४	प्रयागनिकटे जातस्य सर्वशास्त्रार्थकोविदस्य द्विजस्य सन्ततिदुःखनिदानं तच्छान्त्युपायवर्णनञ्च ।	"
१०३५	पुरा गर्भपातनपापकरणादत्र नार्या गर्भपातनदुःखं तदुपायश्च ।	३५२
१०३६	देवागारघातादिह नार्या अतिसारतः परमपीडा तत्प्रायश्चित्तकथनञ्च।	"
१०३७	कुष्ठरोगप्राप्तिनिदानं तत्प्रायश्चित्तकथनञ्च ।	"
१०३८	पूर्वभवे पत्युर्मित्रघातिन्या नार्या अत्र वायुरोगपीडा तत्प्रायश्चित्तकथनञ्च ।	"

अ०	विषयाः	पृ०
१०३९	पुरा भवे गोत्रघातकरणान्नार्या क्षुतारोगपीडा तन्निवृत्त्युपायकथनञ्च।	३९२
१०४०	द्विजकुलोत्पन्नस्य वातपित्तयुतस्य किञ्चिद्वित्तसमन्वितस्य भार्यायाः पतिव्रताया काकवंध्यात्वनिदानं तदुपायवर्णनञ्च ।	,,
१०४१	पुरा नारीघातादिह कृशस्य नरस्य बलविवर्जितत्वं तच्छमनविधिवर्णनञ्च ।	३९३
१०४२	इरावतीचन्द्रभागान्ते जातस्य द्विजस्य नातिवित्तयुतस्य सकन्यस्य पुत्रनाशनिदानं तत्प्रायश्चित्तकथनं च ।	,,
१०४३	वातूलल्लक्षणाढ्यस्य नरस्य तद्दोषनिवृत्तये प्रायश्चित्तकथनम् ।	३९४
१०४४	पूर्वं विप्रद्रव्यापहरणादत्राधिव्याधिपीडा तच्छमनाय प्रायश्चित्तकथनञ्च।	,,
१०४५	राजकुलोत्पन्नाया मुख्यनृपांगनायाः प्रजापीडनपराया वातपित्तादिरोगपीडिताया अपुत्रत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१०४६	पुरा स्वगोत्रजनार्यां वीर्यनिषेकादिह संततिराहित्यं तदुपायकथनञ्च ।	३९५
१०४७	द्विजद्रव्यापहरणादिह जन्मनि मृतपुत्रत्वं तत्प्रायश्चित्तकथनञ्च ।	३९६
१०४८	राजघातादिह भवे राजयक्ष्मरोगतः पीडा तत्र प्रायश्चित्ताभावश्च ।	३९७
१०४९	शतद्रुनिकटे जातस्य द्विजस्य युवभावे कुष्ठक्षयरोगनिदानं तत्प्रायश्चित्तकथनञ्च	,,
१०५०	भर्तृसुहृद्वचनमेव परधर्ममभिमन्यमानायाः पतिव्रताया भाविकुलजात्वकथनम्।	,,
१०५१	पूर्वं शूद्रगृहाश्रितस्य नरस्येह भवे वातरोगेण पीडा तत्प्रायश्चित्तकथनञ्च ।	३९७
१०५२	पूर्वं पापमोहनाद्भर्महंत्र्या नार्या अत्र जलोदरपीडा तत्प्रायश्चित्तकथनञ्च ।	३९८
१०५३	पूर्वं फलचौर्यादिह भवे नार्याः फलहीनत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१०५४	पूर्वजन्मनि द्विजघातादत्र नार्याः कुष्ठरोगवातिकथनं तत्प्रायश्चित्तञ्च।	,,
१०५५	विपाशानिकटे देशे सच्छूद्रकुलजस्य देवतातिथिपूजकस्य संततिराहित्यनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१०५६	पूर्वं परान्नहरणादिह जन्मनि नार्या उदरे अजीर्णतो रात्रंदिनमतिपीडा तत्प्रायश्चित्तकथनञ्च ।	,,
१०५७	पुरा देवागारस्थितमूर्तिभंगतोऽत्र न क्वापि प्रतिष्ठा तदुपायकथनञ्च ।	३९९
१०५८	प्राङ् नृवधकरणादिह नरस्य क्षयरोगतः पीडा तन्निवृत्तये प्रायश्चित्तकथनञ्च ।	,,
१०५९	प्राग्जन्मनि परगर्भघातादिह नार्या जलोदरतः पीडा तच्छमनार्थमुपायश्च ।	,,
१०६०	पूर्वजन्मनि वादिनो वाग्विरोधकरणादिह भवे मूकत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१०६१	पूर्वं सपत्नीगर्भनाशादिह जन्मनि नार्या वन्ध्यात्वं तत्प्रायश्चित्तकथनञ्च	३९०
१०६२	पुरा परनिंदाकरणादिह खल्वाटत्वं तत्प्रायश्चित्तकथनञ्च ।....	,,
१०६३	पूर्वभवे राजवधकरणान्नार्या इह क्षयरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१०६४	पूर्वं भर्तुर्वाग्विरोधादिह कामिन्या मूकत्वं तत्प्रायश्चित्तकथनञ्च ।	,,

अ०	विषयाः	पृ०
१०६५	देवागारे परस्थापितायाः देवप्रतिमायाः भंगकरणादिह नार्या अप्रतिष्ठा तदुपायश्च ।	३६०
१०६६	मथुरामंडलदेशे जातस्य द्विजस्य सुरूपस्त्रीसुखोज्झितस्यसुतासौख्यहेतुकथनं तत्प्रायश्चित्तकथनञ्च ।	,,
१०६७	द्विजकुलजस्य कृशांगस्य देवब्राह्मणभक्तस्य कस्यचित् पतिव्रताया भार्यायाः मृतापत्यत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	३६१
१०६८	प्राग्भव परनिंदाकरणादिह नार्याः खल्वाटत्वं तत्प्रायश्चित्तकथनञ्च ।	३६२
१०६९	अभक्ष्यभक्षणादिह गंडमालारोगस्तदुपायश्च ।....	,,
१०७०	पूर्वं कुलवातादिह संकरमातुर्नीत्वमाश्रित्य धनपुत्रविहीनत्वं नार्यास्तत्प्रायश्चित्तकथनञ्च ।	,,
१०७१	पुरा सभायां ब्राह्मणस्य पक्षाघातकरणादिह पक्षाघातरोगस्तदुपायकथनं च ।	,,
१०७२	पुरा अभक्ष्यभक्षणादिह नार्या गंडमालारोगस्तत्प्रायश्चित्तकथनञ्च।	,,
१०७३	कस्यचिद्गौडदेशीयस्य धनधान्ययुतस्य सकलकलाशास्त्रविशारदस्य पुत्रसंततिरहितस्य क्षयरोगतत्प्रायश्चित्तकथनञ्च !	,,
१०७४	पूर्वभवे द्विजघातात्तिविधसुरापानाच्चेह मूत्रकृच्छ्रं तत्प्रायश्चित्तकथनञ्च ।	३६३
१०७५	वैकुंठादागतस्य मथुरायां जातस्य भारावतरणं कृत्वा पुनर्विष्णोः स्वर्गगमनम् ।	,,
१०७६	पुरास्वर्णापहरणादत्र कुनखित्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१०७७	पूर्वं राजघातकारणादिह नार्याः क्षयरोगतः पीडा तच्छमनोपायश्च ।	३६४
१०७८	प्राग्भवे विनापराधं वैश्यघातकरणादिह रक्तार्बुदरोगतः पीडा तदुपायश्च	३६४
१०७९	पुरा मोहाद्वैश्यवातेन नरस्य रक्तार्बुदोत्पत्तिदर्शनं तत्प्रायश्चित्तञ्च ।	,,
१०८०	कस्याश्चिन्नार्याः मेरोः समागत्य माथुरमंडले स्थित्वा सर्वोपाधिवर्जितं देशं कृत्वा च पुनः स्वलोकगमनम् ।	,,
१०८१	पुरा भवे सुरापानादत्र नार्या मूत्रकृच्छ्ररोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	,,
१०८२	कस्यचिद्विप्रस्याल्पद्रव्यसमन्वितस्य कासश्वासादिव्याधितस्य कृषिवाणिज्यकर्तुः प्रियाया अगत्यगमननिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१०८३	पूर्वं सुरापानादत्र भवे नार्याः प्रदररोगतः पीडा तदुपायकथनञ्च ।	३६५
१०८४	पुरा त्रिविधसुरापानादिह विप्रस्य मूत्रकृच्छ्ररोगतः पीडा ।	,,
१०८५	अकामतः पुरा वैश्यघातादिह नार्या रक्तार्बुदरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१०८६	अतिबलोत्कर्षात्परस्त्रीकामनया इह नरस्योन्मादरोगस्तदुपायश्च ।	,,
१०८७	प्राग्भवे स्वर्गापहरणादिह नार्याः खल्वाटत्वं तत्प्रायश्चित्तञ्च ।	३६६
१०८८	भवे पूर्वं वैश्यहत्या नार्या अत्र विशेषतः रक्तार्बुदेन रोगेण पीडा तच्छान्तिरुक्ता ।	,,
१०८९	पूर्वं रौप्यहरणादिह पुरुषस्य चित्रकुष्ठरोगतः शरीरवैवर्ण्यं तत्प्रायश्चित्तञ्च ।	,,

अ०	विषयाः	पृ०
१०९०	म्लेच्छदेशसमुद्भवस्य म्लेच्छस्य राज्ञः स्त्रीपुत्रसहायतः सुखमुपभुज्य मरणोत्तरं सद्गतिकथनं तत्पूर्वजन्मवृत्तकथनञ्च ।	,,
१०९१	यौवने स्वेच्छया परपुरुषसंगमकर्त्र्या नार्या इहोन्मादरोगस्तदुपायकथनञ्च ।	३६७
१०९२	पूर्वं त्रपुहरणादिह श्लेष्मरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१०९३	पुरा विद्यमानेऽपि भर्तरि जाराद्गर्भधारणादिह नार्या गर्भधारणाभावस्तत्प्रायश्चित्तकथनञ्च ।	,,
१०९४	आखेटं विना हस्तिघातादत्र कार्यासिद्धिस्तत्प्रायश्चित्तकथनञ्च ।	,,
१०९५	पुरा त्रपुहारिण्या नार्या अत्र श्लेष्मरोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	,,
१०९६	पूर्वं कन्याविक्रयकरणादिह मृतपुत्रत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१०९७	पूर्वभवे ताम्रहरणादिहोदुंबररोगतः पीडा तच्छमनोपायश्च ।	३६८
१०९८	पूर्वं गर्भासन्नाजाभक्षणतोऽत्र नार्या गर्भधारणाभावस्तत्प्रायश्चित्तञ्च ।	३६९
१०९९	मृगयायां गजराजघातादिह गजचर्मवर्मरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
११००	परसिद्धान्नहरणादिह शूलरोगत उदरे पीडा तदुपायकथनञ्च	,,
११०१	यमुनातटे जातस्य चारणस्य धर्मनिरतस्य पुत्राप्राप्तिनिदानं तत्प्रायश्चित्तञ्च ।	,,
११०२	परकन्यापहरणतोऽत्र भवे षण्ढत्वं तत्प्रायश्चित्ताभावश्च ।	,,
११०३	मार्गलुंठनतत्परस्येह जन्मनि पादरोगतः पीडा तदुपशमोपायकथनञ्च ।	३७०
११०४	क्षत्रियस्य पर्वतभागे जातस्य मन्त्रपारगस्य महोग्रस्य पुत्रहीनत्वनिदानं तत्प्रायश्चित्तञ्च ।	३७०
११०५	क्षात्रवंशसमुद्भवस्य निष्फलव्यापारस्य गुल्माद्युदरपीडावतो भार्याद्वयस्याऽपि मृतवत्साव्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
११०६	कस्याश्चिद्वैश्याङ्गनाया नानाभूषणादिभिर्युक्ताया गर्भमोचनाभावनिदानं तत्प्रायश्चित्तकथनञ्च ।	३७१
११०७	विपाशानिकटदेशे जातस्य द्विजस्य क्रूरचेष्टस्य महालोभिनः पुत्रहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	३७२
११०८	अज्ञानादजाहन्तुरत्र भवे अधिकांगत्वनिरूपणं तत्प्रायश्चित्तकथनञ्च ।	,,
११०९	पुरा लोहहरणादत्र जन्मुपि घर्घराख्यरोगतो महादुःखं तदुपशमनोपायश्च !	,,
१११०	पूर्वं नकुलकुलघातादिह भवे नार्याः स्ववंशमरणदुःखदर्शनं तत्प्रायश्चित्तञ्च ।	३७३
१११९	स्वगर्भपोषणार्थं पक्षिमांसभक्षणत इह गोधिकादेहप्राप्तिः प्रायश्चित्ताभावश्च ।	,,
१११२	पुरा भवे लोहहरणादत्र नार्या घर्घराख्यरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१११३	तीर्थजहननादिह गोधिकात्वप्राप्तिस्तत्प्रायश्चित्तकथनञ्च।	,,
१११४	क्षात्रकुलसमुद्भवस्य गुल्मवातोदरामयवतो धनधान्यसुखोपेतस्य कृपणस्य नारीद्वयवतो बहुकन्यस्य पुत्राभावनिदानं तत्प्रायश्चित्तञ्च ।	,,
१११५	माथुरमंडले जातायाः क्षत्रियायाः सुखदुःखसमाक्रान्तायाः जातसंततिनाशनिदानं तत्प्रायश्चित्तकथनञ्च।	३७४

अ०	विषयाः	पृ०
११११६	पूर्वं शुनो वधादिह नरस्य चक्रपादरोगस्तत्प्रायश्चित्तकथनञ्च ।	३७५
१११७	पुरा शूद्रघातादिह भवे नरस्य दन्तपातनपीडा तत्प्रायश्चित्तकथनञ्च ।	,,
१११८	पुरा शुनो घातादिह नार्याश्चक्रपादरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१११९	शूद्रघातकरणादिह नार्या दन्तपातनाख्यरोगस्तच्छमनोपायश्च ।	,,
११२०	गोदावरीसमीपे जातस्य शूद्रस्यातिचिन्तायुतस्य दाने स्वल्पमते जातपुत्रविनाशकत्वंनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
११२१	पुरा वह्निहननान्नरस्येह बह्निमंडलरोगस्तत्प्रायश्चित्तकथनञ्च ।	३७६
११२२	शूद्रजातिमापन्नाया कुष्ठरोगत्या जातसंततिनाशनिदानं तत्प्रायश्चित्तञ्च ।	,,
११२३	चरमावस्थायां पुत्रशोकाकुलकारिदोषनिरूपणम् ।	,,
११२४	गंगायाः परदेशे जातस्य शूद्रस्य पैतृकस्वल्पवित्तवतो बंधुभृत्यसमन्वितस्य पुत्रराहित्यनिदानं तन्निष्कृतिकथनञ्च ।....	३७७
११२५	पुरा सुरापानाद्ब्राह्मण्या अत्र प्रदररोगतः पीडा तत्प्रायश्चित्तञ्च ।	३७८
११२६	शतद्रुसरस्वतीमध्यदेशे जातस्य द्विजस्य स्त्रीपुत्रधनयुक्तस्य तिलधेनुदानग्रहणतः कासरोगस्तत्प्रायश्चित्तकथनञ्च ।....	,,
११२७	पूर्वं मृगवधादत्र पाददुःखपीडनं तत्प्रायश्चित्तकथनञ्च ।	३७९
११२८	पुष्करे म्लेच्छवंशसमुद्भवस्य सकलैश्वर्यवित्ताढ्यस्य धर्मात्मनो बहुभृत्यस्य वयसः पंचचत्वारिंशे वर्षे रिष्टप्राप्तिनिदानम् ।	,,
११२९	मृतं पतिं विलोक्य तेनेतः परलोकगमनायोद्यताया गतिवर्णनम् ।....	३८०
११३०	पुरा ब्रह्महत्याकरणादिह क्षयरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
११३१	कस्यचिद्विप्रस्य चारुवर्णस्याचारकुलधर्मज्ञस्य देवाग्निगुरुवत्सलस्य किंचित्क्लेशकारिण्या भार्यायाः पुत्रहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
११३२	पूर्वं सीमावादप्रसंगतो ब्राह्मणघातादिह नरस्य षष्टिमितवर्षे रिष्टप्राप्तिकथनम् ।....	३८१
११३३	अयोध्याभिधदेशे जातस्य वैश्यस्य महोद्यमिनो युवभावे क्षयरोगनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
११३४	स्वेच्छया ब्रह्मघातादिह नार्याः क्षयरोगतो नाशकथनम् ।....	,,
११३५	पुरा भवे स्वसृघातादिह नरस्य बाधिर्यरोगस्तत्प्रायश्चित्तकथनञ्च ।	३८२
११३६	नार्याः कस्याश्चित्पूर्वभवे ब्राह्मणघातादिह क्षयरोगस्तत्प्रायश्चित्तकथनञ्च ।	३८३
११३७	पूर्वं भ्रातृघातादिह नरस्य मूकत्वम् ।	,,
११३८	पुरा कुक्कुटघातादत्र वक्रनासात्वं तत्प्रायश्चित्तकथनञ्च ।	,,
११३९	गंगायाः प्राग्देशे जातस्य शूद्रस्य सपत्नीकस्य बन्धुभृत्ययुतस्यापुत्रत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।....	,,
११४०	कस्याश्चिन्नार्याः पूर्वं द्विजगृहदाहे तत्पुत्रमारणेनेह बाल्यमारभ्य क्षययुतायाः अपुत्रात्वं त्रयोविंशेऽरिष्टेन मरणञ्च ।	३८४
११४१	पुरा सारिकाहननादिह नरस्य स्खलितवाक्त्वं तत्प्रायश्चित्तकथनञ्च	,,

अ०	विषयाः	पृ०
११४२	पुरा नार्याः सारिकाहननादिह स्खलितवाक्त्वं तत्प्रायश्चित्तकथनञ्च।	३८४
११४३	पुरा भवे वकघातादिह नरस्य लंबकंठत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
११४४	वकहननान्नार्या अपि लंबकंठत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
११४५	द्विजकुलजस्य धार्मिकस्य वित्तयुतस्य स्वल्पवीर्यस्य सदाचारवत्या भार्याया मृतवत्सात्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	३८५
११४६	काकानां प्राणघातादिह नरस्य कूर्चहीनत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
११४७	काकघातान्नार्या अपि कूर्चहीनत्वं तत्प्रायश्चित्तकथनञ्च ।	३८६
११४८	पूर्वभवे अभक्ष्यभक्षणादत्र नरस्य क्रिमिलोदरत्वं तत्प्रायश्चित्तकथनञ्च।	,,
११४९	पुरा अभक्ष्यभक्षणादत्र नार्याः क्रिमिलोदरत्वं तत्प्रायाश्चित्तकथनञ्च ।	,,
११५०	दुष्टस्पृष्टसिद्धान्नभक्षणादिह नरस्य कृशोदरत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
११५१	दुष्टस्पृष्टसिद्धान्नभक्षणादत्र नार्या अपि कृशोदरत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
११५२	गंगापूर्वभागे जातस्य द्विजवंशभवस्य मृतपुत्रकत्वं तत्प्रायश्चित्तकथनञ्च ।	३८७
११५३	पुरा द्विजद्रव्यापहरणादिह नार्याः पुत्रहीनत्वं तदुपायकथनञ्च ।	,,
११५४	पूर्वभवे उच्छिष्टभोजनात् अत्र नरस्य रात्र्यंधत्वं तत्प्रतीकारविधिकथनञ्च ।	,,
११५५	पुरोच्छिष्टान्नसेवनतो नार्या अपि रात्र्यंधत्वं तत्प्रायश्चित्तकथनञ्च ।	३८८
११५६	विडालोच्छिष्टभोजनतः सर्वथा नरस्य रात्र्यंधत्वं तत्प्रायश्चित्तं च ।....	,,
११५७	विडालोच्छिष्टभोजिन्या नार्या अपि रात्र्यंधत्वं तत्प्रायश्चित्तकथनञ्च ।	३८८
११५८	पुरा चाण्डालीगमनादिह नरस्याजगरवन्मूढत्वं तत्प्रायाश्चित्तकथनञ्च ।	,,
११५९	पूर्वभवे चाण्डलसंगमादत्र नार्या अपि मूढत्वमजगरवत्तत्प्रायश्चित्तकथनञ्च ।	,,
११६०	पूर्वं परान्नविघ्नकरणादिह नरस्याजीर्णरोस्तत्प्रायश्चित्तञ्च ।	,,
११६१	परान्नविघ्नकारिण्या नार्या अजीर्णरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
११६२	द्विजकुलजस्य सदाचारवतः साधुसेवकस्य भार्यायाः स्त्रीधर्मव्रतकारिण्या मृतवत्सात्वं तत्प्रायश्चित्तकथनञ्च ।	,,
११६३	परस्मै विषदानादिह नरस्य छर्दिरोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	३९०
११६४	पुरा भ्रातृघातादिह नरस्य मूकत्वं तत्प्रायश्चित्तकथनाभावश्च ।	,,
११६५	पुत्राभिलाषाद्यवनसंगताया अत्र यवनीत्वमासाद्य पुत्रसंततिवर्जितत्वं तत्प्रायश्चित्तञ्च ।	,,
११६६	गंगाश्रये पर्वते जातस्य क्षत्रियस्यसर्वसंपत्समन्वितस्य पाण्डुरोगनिदानं तदुपायश्च ।	,,
११६७	यस्य कस्यापि विषदानादत्र नार्याः परमच्छर्दिपीडा तत्प्रायश्चित्तकथनञ्च ।	,,
११६८	गंगायाः पूर्वभागे जातस्य क्षत्रियस्य वहुद्रव्यपराक्रमस्य पुत्राभावनिदानं-तत्प्रायश्चित्तञ्च ।	३९१
११६९	पुरा कृताद्यभिचारतोऽत्र नार्या वन्ध्यात्वकथनम्।	,,

अ०	विषयाः	पृ०
११७०	धूर्ततया पुरा द्विजवंचनादत्र नरस्यापस्माररोगतः पीडा तदुपायकथनञ्च ।	३९१
११७१	पुराभ्रातृघातिन्या इह नार्या मूकत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
११७२	पूर्वं देवद्रव्यापहरणादत्र नरस्येह विंशे वर्षे नेत्रभंगस्तद्रक्षणोपायश्च ।	३९२
११७३	पूर्वभवे सर्वस्नेहहरणादिह नरस्य ज्वररोगतः पीडा तत्प्रायश्चित्तकथननञ्च ।	,,
११७४	ब्रह्मवादरताया अपि पतिदोषान्मानुषीत्वमाश्रित्य पुनः पार्वतीसामीप्यलाभवर्णनम् ।	,,
११७५	अज्ञानात्पूर्वभवे भ्रातृघातादिह मूकत्वं, अज्ञानतः कृते प्रायश्चित्तकथनम्, पुरा लोकवंचनादिह नार्या अपस्मारपीडा तत्प्रायश्चित्तंच ।	,,
११७६	कस्यचिद्विजस्य धर्मिष्ठस्य वित्तवतो वायुनोदरे पीडितस्य भार्यायाः मृतवत्सात्वनिदानं तत्प्रायश्चित्तकथननञ्च ।	,,
११७७	स्नेहहरणात्क्षयरोगप्राप्तिः ।	३९३
११७८	पुरा धौर्त्येन लोकवंचनादिह नरस्यापस्माररोगप्राप्तिः ।	,,
११७९	गर्भनाशकरपातककथनं तन्निष्कृतिकथनञ्च ।	,,
११८०	प्राग्भवे पुरुषघातादिह नार्याः शूलरोगतः पीडा तदुपायकथनञ्च ।	३९४
११८१	पुरा अज्ञानान्मित्रनाशिनो नरस्य वायुरोगतः पीडा तत्प्रायश्चित्तकथननञ्च ।	,,
११८२	पूर्वं गोत्रघातकरणादिह नार्या व्रतारोगप्राप्तिस्तत्प्रायश्चित्तकथनञ्च ।	,,
११८३	सर्वस्नेहहरणतः क्षयरोगतोऽत्र पीडा तच्छमोपायश्च ।	,,
११८४	पुरा जाराश्रयेण विषप्रदानात् स्वपतिघ्न्या अत्र विधवात्वं तत्प्रायश्चित्तकथनञ्च ।	३९५
११८५	प्राग्जन्मनि देवागारदाहादत्र नरस्य रक्तातिसारपीडा तदुपशमविधिकथनञ्च ।	,,
११८६	प्रयागनिकटे जातस्य द्विजस्य सर्वसुखयुतस्य अपस्मारोगतो मृतपुत्रद्वयस्य सन्ततिदुःखनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
११८७	पुरा गर्भपातनपापादिह नार्या गर्भस्थैर्याभावकथनं तत्प्रायश्चित्तकथनञ्च ।	,,
११८८	पुरा भवे देवागारदाहकारिण्या नार्या इहातीसारोगपीडा तत्प्रायश्चित्तकथनञ्च ।	३९६
११८९	ब्रह्मघ्नस्येह जन्मनि तस्मिन्नेव वयसि कुष्ठतः पीडा ।	,,
११९०	पूर्वं पत्युर्मित्रघातादत्र नार्या वायुरोगस्तत्प्रायश्चित्तकथननञ्च ।	,,
११९१	अज्ञानाद्गोत्रघातिन्या नार्या इह भवे लूतारोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	,,
११९२	भूमिदेवकुलजस्य वायुपित्ततो नेत्रतोदवतः किंचिद्वित्तवतो धर्मिष्ठस्य पत्न्याः काकवन्ध्यात्वनिदानं तत्प्रायश्चित्तकथननञ्च ।	,,
११९३	देवागारे शकृन्मूत्रस्रष्टुरिह भवे गुदरोगस्तत्प्रायश्चित्तकथनञ्च ।	३९
११९४	पूर्वभवे स्त्रीघातादत्र नरस्य बलवर्जितस्य कृशत्वरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
११९५	पूर्वं बालघातिन्या नार्या अत्र बालमृतिस्तन्निष्कृतिकथनञ्च	,,

अ०	विषयाः	पृ०
११९६	पूर्वं ब्राह्मणघातादिह नरस्य कुष्ठरोगान्वितत्वं तत्प्रायश्चित्तकथनञ्च ।	३९८
११९७	पुरा देवद्रव्यापहरणाद् वायुपीडा तदुपशमोपायश्च ।	,,
११९८	देवागारे मूत्रपुरीषत्यागिन्या गुदरोगस्तदुपायश्च ।	,,
११९९	विपाशानिकटदेशे जातस्य क्षत्रियोद्भवस्य स्त्रीपुत्रधनसंयुतस्य वार्धके कंडूरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१२००	पुराभवे देवागारे मूत्रपुरीषोत्सर्गादिह नार्या गुदरोगस्तत्प्रायश्चित्तकथनञ्च ।	३९९
१२०१	पुरा कामात् पापविमोहितस्य स्त्रीघातादत्र प्राणहारककार्श्यरोगस्तत्प्रायश्चित्ताभावश्च ।	,,
१२०२	पुरा जन्मनि कन्याघातादिह कन्यासंततिस्तत्प्रायश्चित्तकथनञ्च ।	,,
१२०३	पूर्वं देवद्रव्यापहरणादिह नार्या वायुपीडा तत्प्रायश्चित्तकथनञ्च ।	,,
१२०४	गंगायमुनयोर्मध्ये जातस्य क्षत्रियस्य महोद्यमवतो द्विजघातात्कुष्ठरोगस्तत्प्रशमोपायश्च ।	,,
१२०५	पर्वते जातायाः क्षत्रियपत्न्याः पतिप्रियरतायाः सन्ततिवर्जितत्वनिदानं तदुपायश्च ।	,,
१२०६	विप्रकुलजस्य सदाचारस्य क्रयविक्रयकर्तुर्भार्यायां मृतपुत्रत्वनिदानं तत्प्रायश्चित्तञ्च ।	४००
१२०७	प्राग्भवे राजघातादिह नरस्य राजयक्ष्मरोगस्तत्प्रायश्चित्तकथनञ्च ।	४०१
१२०८	पूर्वं परगर्भघातिनो नरस्येह जलोदररोगतः पीडा तत्प्रायश्चित्तञ्च ।	,,
१२०९	शतद्रुनिकटे जातस्य द्विजस्य युवावस्थायां कुष्ठक्षयप्राप्तिस्तत्प्रायश्चित्तकथनञ्च ।	,,
१२१०	भर्तृप्रियकरणान्नार्याः सद्गतिलाभकथनम् ।	४०२
१२११	पुरा शूद्रगृहाश्रितान्नभक्षणादिह नरस्य वातरोगस्तत्प्रायश्चित्तञ्च ।	,,
१२१२	पूर्वभवे स्वगर्भपातनादिह नार्या जलोदरपीडा तत्प्रायश्चित्तकथनञ्च ।	,,
१२१३	सदा भर्तृपरायणाया दानधर्मरतायाः सुभगाया नार्याः पुत्राभावनिदानं तत्प्रायश्चित्तञ्च ।	,,
१२१४	जन्मान्तरे ब्राह्मणघातादिह नार्याः कुष्ठरोगतः पीडा ।	,,
१२१५	विपाशानिकटे शूद्रकुलजस्य बहुलोभिनो बहुस्त्रीकस्य पुत्रसंततिराहित्य निदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१२१६	पुरा भवे परान्नहरणादिह नार्या अजीर्णरोगतः पीडा तच्छमनोपायश्च ।	४०३
१२१७	देवागारस्थितदेवमूर्तेर्भंगतोत्र नरस्य कुत्रापि प्रतिष्ठाभावकथनं तदुपायश्च।	,,
१२१८	राजवधादत्र राजयक्ष्मतः पीडा तत्प्रायश्चित्तकथनञ्च ।....	,,
१२१९	गर्भघातादिह नार्या जलोदरतः पीडा तदुपशमोपायश्च ।	४०४
१२२०	वादिनो वाग्विरोधकस्येह मूकत्वं तत्प्रायश्चित्तकथनञ्च ।....	,,
१२२१	सपत्नीसुतनाशनादिह नार्या वन्ध्यात्वं तदुपायश्च ।	,,
१२२२	परनिन्दाकरणादिह नरस्य खल्वाटत्वं तन्निष्कृतिश्च ।	,,
१२२३	पुरा राजवधकर्त्र्या नार्या अत्र तत्काल एव क्षयरोगतः पीडा ।....	,,
१२२४	भर्त्रा सह वाग्विरोधिन्या अत्र नार्या मूकत्वं तत्प्रायश्चित्तञ्च ।	,,
१२२५	देवप्रतिमाभंगादिह नार्या अप्रतिष्ठा ।	४०५

अ०	विषयाः	पृ०
१२२६	मथुरामंडलजस्य द्विजस्य लोभिनः क्रूरस्य संतानसुखहीनत्वनिदानं तन्निष्कृतिकथनञ्च ।	४०५
१२२७	पुरा भवे द्विजद्रव्यापहरणादिह संतानाभावस्तत्प्रतीकारश्च ।	,,
१२२८	कस्यचिद्विजस्य देवब्राह्मणभक्तस्य भार्याया मृतापत्याया उदरस्थितगर्भस्य वृद्धिपतनाभावनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१२२९	परनिन्दाकरणादिह नार्याः खल्वाटत्वं तत्प्रायश्चित्तकथनञ्च ।	४०७
१२३०	अभक्ष्यभक्षणान्नानाविधपीडाकर - गंडमालारोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१२३१	कुलघातादत्र धनपुत्रहीनत्वं नार्यास्तन्निष्कृतिकथनञ्च ।	,,
१२३२	ब्राह्मणस्य पक्षघातादिह पक्षघातरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१२३३	अभक्ष्यभक्षणान्नार्या अत्र गलगंडरोगस्तत्प्रायश्चित्तञ्च ।	,,
१२३४	विप्रबालकघातादिह पुत्रसंततिरहितस्य नरस्य क्षयरोगाकुलत्वं तदुपायवर्णनञ्च ।	,,
१२३५	विनापराधं परपक्षघातादिह नार्याः पक्षघातेन पीडातत्प्रायश्चित्तकथनञ्च ।	४०८
१२३६	वैकुंठादागतस्य मथुरायामवतीर्य भूभारहरणोत्तरं भगवतः पुनर्वैकुंठागमनम् ।	,,
१२३७	पुरा स्वर्णापहरणात्कुनखित्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१२३८	पुरा राजघातकरणादिह नार्या राजयक्ष्मरोगस्तन्निष्कृतिकथनञ्च ।	,,
१२३९	किंनापराधं वैश्यहननादिह नरस्य रक्तार्बुदरोगस्तन्निवृत्त्युपायाभावश्च ।	,,
१२४०	मोहवशाद्वैश्यघातादत्र रक्तार्बुदरोगतः पीडा तत्प्रायश्चित्तञ्च ।	४०८
१२४१	मेरोर्मथुरामंडले सर्वोपकाराय समागतायाः शक्तेः कलियुगे अद्भुतानि कृत्वा पुनः प्रयाणम् ।	४०९
१२४२	मोहात्सुरापानकर्त्र्या नार्या अत्र मूत्रकृच्छ्ररोगस्तत्प्रायश्चित्तञ्च ।	,,
१२४३	कस्यचिद्विप्रस्य किंचिद्वित्तवतः कासश्वासपीडितस्य भार्यायाः प्रिये प्रेमपरायाः कदाप्यमुदिताया यौवनेन संमानिताया रजोदोषात् परमपीडानिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१२४४	ब्राह्मण्याः प्राग्जन्मनि सुरापानादिह प्रदररोगस्तदुपायकथनञ्च ।	४१०
१२४५	पूर्वजन्मनि यौवनोन्मादात् कृतसुरापानतो मूत्रकृच्छ्ररोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	,,
१२४६	अकामतो वैश्यघातादिह नार्या रक्तार्बुदरोगतः पीडा ।	,,
१२४७	सारस्वतदेसमुद्भवाया नार्या युवभावे क्षयरोगनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१२४८	पुराभवे परस्त्रीकामुकस्य पुरुषस्येहोन्मादरोगस्तत्प्रायश्चित्तञ्च ।	४११
१२४९	पूर्वं स्वर्णापहरणादत्र नार्याः कुनखत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१२५०	पुरा वैश्यघातादत्रापुत्रस्य नरस्य रक्तार्बुददरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१२५१	सिन्धोः पश्चिमभागे जातस्य कस्यचिन्म्लेच्छभूपस्य स्त्र्यपत्यसौख्ययुतस्य बहुविद्याविशारदस्य पंचाशत्तमेऽब्दे युद्धमध्येऽरिष्टप्राप्तिनिदानं तदुपायश्च ।	,,

अ०	विषयाः	पृ०
१२५२	बलात्कारेण यौवने जारेण कृतसंभोगाया नार्या इहोन्मादरोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	४१२
१२५३	पूर्वं त्रपुहरणादिह श्लेष्मरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१२५४	पत्यौ जीवति : जारादूर्भधारिण्या अत्र शूद्रया गर्भधारणाभावस्तत्प्रायश्चित्तकथनञ्च ।	,,
१२५५	आखेटं विना हस्तिहननादिह सर्वकर्मस्वसिद्धिस्तत्प्रायश्चित्तकथनञ्च ।	,,
१२५६	बलात्कारेण ब्राह्मणीरमणादिह नरस्य महोन्मादरोगतो मरणञ्च ।	,,
१२५७	पुरा- जन्मनि त्रपुहरणादिह नार्याः श्लेष्मरोगस्तच्छमनोपायश्च ।	,,
१२५८	विप्रवंशसमुत्पन्नस्य धनधान्यसुखयुतस्य किंचिद्व्याधिसमन्वितस्य भार्याया मृतपुत्रत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	४१३
१२५९	पुरा ताम्रहरणान्नार्या इहोदुंबररोगतः पीडा तदुपायश्च ।	४१४
१२६०	पूर्वं द्विजाङ्गताडनादत्र दद्रूरोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	,,
१२६१	गंगाप्रान्तरे जातस्य क्षत्रियस्य पैतृकस्वल्पवित्तवतो बन्धुभृत्यसुखान्वितस्य जातपुत्रविनाशनिदानं तन्निष्कृतिकथनञ्च ।	,,
१२६२	कस्यचिद्वणिजः स्त्रीसुखान्वितस्य पितृमातृसुखहीनस्य जातपुत्रनाशनिदानं तत्प्रायश्चित्तकथनञ्च ।	४१५
१२६३	प्रभासदेशे जातस्य शूद्रस्य राजकर्मरतस्य द्रव्यहीनस्य पुत्रसंततिदुःखनिदानं तन्निष्कृतिकथनञ्च।	४१६
१२६४	कस्यचिच्छूद्रस्य शुभाचारस्य ब्राह्मणीगमनाज्जन्मान्तरे शुभयोगतो ब्राह्मणत्वे त्रिंशे वर्षे क्षयरोगतो देहपातः-	,,
१२६५	ऐरावतीपरभागे जातस्य क्षत्रियस्य सुरूपस्य राजजनप्रियस्य स्त्रीपुत्रसुखहीननानिदानं तत्प्रायश्चित्तकथनञ्च ।	४१६
१२६६	वैषाशिकदेशजस्य क्षत्रियस्य बहुस्त्रीपुत्रमित्राढ्यस्य सुखैश्वर्यसमन्वितस्य मनोदुःखप्राप्तिनिदानं तत्प्रायश्चित्तकथनञ्च ।	४१८
१२६७	सरस्वतीपरदेशे जातस्य क्षत्रियस्य गौरस्य सुरूपस्य व्यापारनिरतस्य भार्यायाः पुत्रविवर्जितत्वनिदानं तत्प्रायश्चित्तकथनञ्च।	,,
११६८	गंगायाः प्रान्तरदेशे जातस्य भूपतेर्मधुरवचसो धनधान्यसुतान्वितस्य सुतनाशनिदानं तत्प्रायश्चित्तकथनञ्च ।	४१९
१२६९	मृगयायां गजवधादिह नरस्य गजचर्मरोगस्तत्प्रायश्चित्तकथनञ्च।	४२०
१२७०	परसिद्धान्नहरणादिह नरस्य शूलपीडा तदुपायकथनञ्च ।	,,
१२७१	यमुनातटे जातस्य चारणस्य बहुद्रव्ययुतस्य जातसंततिदुःखनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१२७२	पूर्वभवे रीत्यपहरणादिह नरस्य पिंगलाक्षत्वं तत्प्रायश्चित्तकथनञ्च ।	४२१
१२७३	पुरा खरघातादिह नरस्य खररोमत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१२७४	स्वगर्भपुष्ट्यर्थमंडभक्षणतोऽत्र नार्या गर्भधारणाभावस्तत्प्रायश्चित्तकथनञ्च ।	,,
१२७५	स्वर्णकारकुलजस्य नानाचौर्यतो लोकवंचनापरस्य सुखैश्वर्यस्त्रीवतः पुत्रवर्जितत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	४२२

अ०	विषयाः	पृ०
१२७६	पूर्वजन्मनि खरमारणादिह नार्याः खररोमत्वं तत्प्रायश्चित्तकथनञ्च ।	४२२
१२७७	पुरा रीतिहरणादिह नार्याः पिंगाक्षीत्वं तत्प्रायश्चित्तकथनञ्च ।	"
१२७८	परसिद्धान्नहरणादत्र नार्याः शूलरोगतः पीडा तन्निष्कृतिकथनञ्च ।	"
१२७९	पूर्वं राष्ट्रघातादिह जन्मनि नरस्य विकृतस्वरत्वं तत्प्रायश्चित्तकथनञ्च ।	४२३
१२८०	पूर्वजन्मनिगर्भपातादत्र नार्या वन्ध्यात्वं तन्निष्कृतिनिरूपणञ्च ।	"
१२८१	कांस्यहरणादत्र नरस्य शीर्षरोगस्तत्प्रायश्चित्तकथनञ्च ।	"
१२८२	पञ्चनददेशे जातस्य वैश्यस्य यौवने सुखैश्वर्यधनस्थानयुतस्य जातपुत्रविनाशनिदानं तत्प्रायश्चित्तकथनञ्च ।	"
१२८३	पूर्वं कांस्यहरणादिह शीर्षरोगस्तत्प्रायश्चित्तञ्च ।	४२४
१२८४	वन्ध्यायाः प्रायश्चित्तविधिनिरूपणम् ।	"
१२८५	सर्वगुणोपेतां स्वस्त्रियं विहाय परदाररतस्यात्र ग्रहणीरोगतो मृत्युकथनम् ।	"
१२८६	प्राग्भवे कांस्यहरणादिह नार्याः शीर्षरोगस्तदुपायकथनञ्च ।	"
१२८७	पुराष्ट्रघातादत्र नार्या विकृतस्वरत्वं तदुपायकथनञ्च ।	"
१२८८	पुरा भवे परघृतहरणादिह नरस्य नेत्ररोगस्तदुपशमनसाधनकथनञ्च ।	४२५
१२८९	स्वपतिं परित्यज्य पुरुषान्तरगमनान्नार्या इह ग्रहणीरोगस्तत्प्रायश्चित्तञ्च ।	"
१२९०	विप्रवर्णजस्य किंचिद्वित्तवतो वातरोगवतः पतिभक्तिपरायाः भार्यायाः मृतपुत्रत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	"
१२९१	वन्ध्यायाः पुत्रजननप्रयोगकथनम् ।	४२६
१२९२	पुराभवे देवद्रव्यापहरणादत्र नरस्याक्षिपीडा तन्निवृत्त्युपायकथनञ्च ।	"
१२९३	पूर्वं वृषमुष्कनिकुट्टनादिह नरस्य पण्ढत्वकथनतत्प्रायश्चित्तञ्च । ...	"
१२९४	पुरा परघृतहरणतोऽत्र नार्या नेत्ररोगतः पीडा तदुपायकथनञ्च ।	"
१२९५	पूर्वभवे महिषीवधादिह नरस्य लघुगुल्मयुतत्वं तत्प्रायश्चित्तञ्च ।	"
१२९६	शूद्रनार्याः कस्याश्चिद्धनभृत्याश्वभोगादिनानाविभवसंयुतायाः पुत्रहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	४२७
१२९७	पुराभवे दुग्धहरणादिह नरस्य बहुमूत्रत्वं तत्प्रतीकारकथनञ्च ।	"
१२९८	नार्याः पुरा दुग्धहरणादत्र बहुमूत्रत्वं तत्प्राथश्चित्तञ्च ।	"
१२९९	पुरा महिषीघातादिह कृष्णगुल्मरोगस्तत्प्रायश्चित्तकथनञ्च ।	"
१३००	वृषमुष्कनिकुट्टनतोऽत्र नरस्य पण्ढत्वं तत्प्रायश्चित्तकथनञ्च ।	"
१३०१	पूर्वं फलहरणादत्र नार्याः फलहीनत्वं तत्प्रायश्चित्तञ्च ।	४२८
१३०२	पूर्वं दधिहरणादत्र नरस्य मेदोरोगतः पीडा तन्निष्कृतिकथनञ्च ।	"
१३०३	पुरा महिषीहननान्नार्या अत्र कृष्णगुल्मरोगस्तत्प्रायश्चित्तञ्च ।	"
१३०४	पूर्वं वृषनासाग्रवेधनादिह नरस्य नासाच्छेदकथनम् ।	"
१३०५	सिंधोः पश्चिमभागे म्लेच्छवंशभवस्य सर्वविद्याविशारदस्य सुखैश्वर्यसमायुतस्य पञ्चपञ्चाशत्तमे वर्षेऽरिष्टकथनं तत्प्रायश्चित्तञ्च ।	"

अ०	विषयाः	पृ०
१३०६	दधिहरणान्नार्या अत्र भवे मेदोरोगस्तत्प्रायश्चित्तकथनञ्च।....	४२९
१३०७	पूर्वं तरक्षुहननादिह नेत्रकातरत्वं तत्प्रायश्चित्तकथनञ्च।....	,,
१३०८	चण्डिकामंदिरे दीपदानादत्र पुत्रादिसुखप्राप्तिः, तत्रत्यदीपपात्रहरणादिह नार्याश्चक्षुःपीडा तत्प्रायश्चित्तकथनञ्च।	,,
१३०९	पूर्वं मधुहरणादिह नरस्य पूतिगंधित्वं तत्प्रायश्चित्तकथनञ्च।	,,
१३१०	तरक्षुघातादिह नार्याः कातराक्षित्वं तत्प्रायश्चित्तञ्च।	,,
१३११	पञ्चनददेशे शूद्रकुलजस्य विवर्णस्य पापमतेः पण्ढत्वनिदानम्।	,,
१३१२	कस्यचित्क्षत्रियकुलजस्य नानासौख्यरतस्य किंचिज्जातवातोदरपीडस्य पत्न्या दानदाक्षिण्यशालिन्याः प्रियभक्तिरतायाःसंततिरोधनिदानं तत्प्रायश्चित्तकथनञ्च।	४३०
१३१३	पूर्वं माक्षिकहरणादिह नार्याः पूतिगंधित्वं तत्प्रायश्चित्तकथनञ्च।	,,
१३१४	विषदानेन सपत्नीसुतघातादिह यवनीत्वे चतुर्विंशे वर्षे अग्निदाहेन मरणकथनम्।	,,
१३१५	पुरा अगम्यागमनादत्र नरस्य पण्ढत्वनिरूपणम्।	४३१
१३१६	पुराभवे वराहहननादिह नरस्य दंतुरत्वं तत्प्रायश्चित्तकथनञ्च।	,,
१३१७	पूर्वं गुडहरणादिह गुल्मरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
१३१८	यमुनातीरे शूद्रीदेहमापन्नाया बाल्य एव कुष्टरोगसमन्वितत्वं तदुपायश्च।	,,
१३१९	सिंधुमंडले जातस्य यवनस्य सुखैश्वर्यसमन्वितस्य पुरुषस्य षण्ढत्वनिदानं तत्प्रायश्चित्ताभावश्च।	,,
१३२०	पुरा वाहनहननादत्र नार्या दन्तुरत्वं तन्निवृत्तिकथनञ्च।	४३२
१३२१	पुरा तैलहरणादिह नरस्य कण्डूरोगस्तत्प्रतिनिवृत्तिकथनञ्च।	,,
१३२२	पुरा विनापराधतो नारीं परित्यज्येह भवे नपुंसकत्वकथनम्।	,,
१३२३	स्वभक्ष्यार्थं पुरा मृगघातादत्र नरस्य खंजत्वं तत्प्रायश्चित्ताभावश्च।	,,
१३२४	पूर्वभवे गुडहरणादत्र नार्या गुल्मरोगतः पीडा तदुपायकथनञ्च।	,,
१३२५	कस्यचिद्राज्ञो महाविभवसंयुतस्य देशेदेशेऽतिविख्यातस्य स्त्रीविवर्जितत्वनिदानं तत्प्रायश्चित्तञ्च।	,,
१३२६	विना नृपं मृगघातादत्र मृगघातकाले नरस्य खंजत्वं तत्प्रायश्चित्तञ्च।	४३३
१३२७	परतैलापहरणादिह नार्याः कण्डुरोगस्तत्प्रायश्चित्तकथनञ्च।	'
१३२८	राज्ञपत्न्यां गर्भधारणादत्र नरस्य षण्ढत्वकथनम्।	,,
१३२९	स्वगर्भपालनार्थं मृगघातादत्र नार्या स्तद्घातकाले कुताश्चित्पतनात्खंजत्वं तदुपायश्च।	,,
१३३०	क्षत्रकुलभवस्य कस्यचिद्व्रताचारायाः पत्न्या रक्तस्रावादिपीडाघत्या गर्भास्थिरतानिदानं तत्प्रायश्चित्तकथनञ्च।	,,
१३३१	पूर्वभवे तुरंगघातादत्र नरस्य वक्रकंठत्वं तत्प्रायश्चित्तकथनञ्च।	४३४
१३३२	पुरा शृगालघातादिह नरस्य पादहीनत्वं तत्प्रायश्चित्तकथनञ्च।	'
१३३३	गंगातीरे जातस्य शूद्रस्य धनपुत्रसमन्वितस्य युवभावे चक्षुर्हीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च।	,,

अ०	विषयाः	पृ०
१३३४	पूर्वं शृगालघातिन्या नार्या अत्र पादभंगस्तदुपायकथनञ्च ।	४३४
१३३५	पूर्वमश्वहननादत्र नार्या वक्रकंठत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१३३६	यमुनातीरजस्य क्षत्रियस्य धनसौख्यसमन्वितस्य बहुस्त्रीकस्य बुद्धिमतो मनोदुःखसमन्वितस्य पुत्राभावनिदानं तत्प्रायश्चित्तकथनञ्च ।	४३५
१३३७	कन्याया बलात्कारेण दूषणादिह नरस्य षण्ढत्वकथनम्।	४३६
१३३८	परकुंठनार्थं मार्गहन्तुः पादरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१३३९	भक्ष्यार्थमजघातादिह नरस्याधिकांगत्वकथनम् ।	,,
१३४०	पर्वतभागे जातस्य क्षत्रियस्य महोग्रस्य मन्त्रनिपुणस्य पुत्रहीनत्वं तत्प्रायश्चित्तञ्च ।	,,
१३४१	गुल्मरोगवतः क्षत्रियस्य निष्फलव्यापारस्य नार्यायद्वयुतस्य पुत्रहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	४३७
१३४२	वेश्यांगनायाः सर्वैश्वर्यसुखान्वितायायुवभावे पूर्णगर्भत्वेऽपि प्रसूत्यभावनिदानं तत्प्रायश्चित्तञ्च ।	४३८
१३४३	विपाशानिकटदेशे जातस्य क्षत्रियस्य बहुस्त्रीधनयुक्तस्य जातपुत्रविहीनत्वं तदुपायश्च ।	,,
१३४४	पूर्वभवेऽजासुतघातादत्राधिकाङ्गत्वं तत्प्रायश्चित्तकथनञ्च ।	४३९
१३४५	पुरा लोहहरणादिह जन्मनि नरस्य वर्वराख्यरोगस्तत्प्रायश्चित्तञ्च ।	,,
१३४६	पूर्वं सकुलनकुलनिकृंतनादत्र नार्याः सर्वस्वजनमरणदुःखमनुभूयाष्टोत्तरशततमे वर्षे मरणकथनम्।	,,
१३४७	स्वगर्भपोषणार्थं कृताजानंदमघातादत्र गोधिकात्वप्राप्तिः ।	४४०

अ०	विषयाः	पृ०
१३४८	पुरा जन्मनि लोहहरणादिह नार्या वर्वरांगत्वं तन्निष्कृतिकथनञ्च ।	४४
१३४९	विधिवर्जिताजघातादिह प्रायश्चित्ताकरणे नार्या अग्रे गोधिकात्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१३५०	क्षत्रकुलजस्य गुल्मवातोदरामयस्य धनधान्ययुतस्य पुत्रहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१३५१	मथुरामंडलजातायाः क्षत्रियायाः सुखदुःखसमाक्रान्तायाः सन्ततिनाशनिदानं तत्प्रायश्चित्तञ्च ।	४४
१३५२	पुरा शुनो घातादिह नरस्य चक्रपादरोगतः पीडा तत्प्रायश्चित्तकथनञ्च।	,,
१३५३	पूर्वभवे शूद्रघातादिह नरस्य दन्तपातनपीडा तदुपायकथनञ्च ।	,,
१३५४	पुरा भवे शुनो हननादत्र नार्याश्चक्रपादरोगतः पीडा तदुपायकथनञ्च ।	,,
१३५५	पुराभवे शूद्रघातकरणादिह नार्या दन्तपातरोगस्तत्प्रायश्चित्तकथनञ्च ।	४४
१३५६	गोदावरीसमीपदेशे जातस्य शूद्रस्य जातपुत्रविनाशकयोगनिरूपणं तदुपायश्च ।	,,
१३५७	पूर्वं वभ्रुहननादिह नरस्य वभ्रुमंडलरोगपीडा तदुपायश्च ।	,,
१३५८	कस्याश्चिच्छूद्रया जीवघातदोषात्पूर्वजन्मीयात्कुष्ठरोगवत्या जातसंततिहीनत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१३५९	पुरा शशघातादिह नरस्य कुब्जवर्णत्वं तत्प्रायश्चित्तकथनञ्च ।	४
१३६०	द्रव्याभावात्स्वस्त्रीपिण्यतः स्वोदरपूरणादिह नरस्य षण्ढत्वं तत्प्रायश्चित्ताभावश्च ।	,,
१३६१	पुरा जन्मनि नकुलघातादिह नार्या बभ्रुमंडलरोगस्तदुपशमविधिकथनञ्च ।	,,

अ०	विषयाः	पृ०
१३६२	क्षत्रियकुलजस्य नानाविधाल्परोगवतः सदाचारवत्या भार्यायाः सन्ततिहीनत्वनिदानं तत्प्रायश्चित्तञ्च।	४४३
१३६३	पूर्वमुलूकवातादिह नरस्य पाण्डुरोगस्तत्प्रायश्चित्तकथनञ्च ।	४४४
१३६४	पुरोलूकघातिन्या नार्या अत्र पांडुरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१३६५	ज्येष्ठां ऋतुमतीं परित्यज्य विना ऋतुकनिष्ठासंभोगतोत्रापुत्रत्वं तत्प्रायश्चित्तकथनञ्च ।	४४५
१३६६	उलूकघातादत्र नरस्य पांडु रोगनिदानं तत्प्रायश्चित्तकथनञ्च।	,,
१३६७	पुरा कुक्कुटवधादत्र नरस्य नासावक्त्वं तत्प्रायश्चित्तकथनञ्च।	,,
१३६८	पुराभवे चटकनाशिन्या नार्या अत्र पांडुरोगतः पीडा तदुपशमविधिश्च ।	,,
१३६९	पूर्वं मार्जारघातादिह नरस्य पिंगेक्षणत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१३७०	कस्यचिद्वैश्यकुलसंभवस्य वातरक्तपीडितस्य भार्यायाः सदाचारवत्या मृतवत्सात्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	४४६
१३७१	पुरा मार्जारघातादिह नरस्य पिंगेक्षणत्वं तत्प्रायश्चित्तञ्च ।....	४४७
१३७२	पूर्वजन्मनि मार्जारीघातादत्र नार्याः पिंगाक्षीत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१३७३	पुराभवे शुकघातादत्र नरस्य स्वप्रतिबंधकवाक्त्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१३७४	गोदावरीसमीपे जातस्य क्षत्रियस्य सर्वैश्वर्ययुतस्य मृतपुत्रत्वनिदानं तत्प्रायश्चित्तञ्च ।	,,
१३७५	शशकवधादत्र नरस्य कुब्जकर्णत्वं तत्प्रायश्चित्तकथनञ्च ।....	४४८
१३७६	पुरा मोहतो मूषकघातादत्र कुब्जकर्णत्वं तत्प्रायश्चित्तञ्च ।....	,,
१३७७	पूर्वभवे मोहात्कुक्कुटवधेऽत्र नासावक्त्वं तदुपायकथनं च ।	४४८
१३७८	पुरा पारावतघातादत्र नरस्य पीतपाणित्वविदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१३७९	कस्यचिद्वैश्यकुलजस्य विष्णुभक्तस्य ब्राह्मणप्रियस्य प्रियाया पतिभक्ताया वन्ध्यात्वनिदानं तदुपायश्च ।	,,
१३८०	पूर्वं मूषकवधादिह नार्याः कुब्जत्वं तन्निष्कृतिकथनञ्च ।	४४९
१३८१	पुरा मयूरघातादिह नरस्य बभ्रुमंडलरोगार्तत्वं तत्प्रायश्चित्तकथनञ्च।	४५०
१३८२	शुकप्राणघातादिह नार्याः स्खलितवाक्त्वं तन्निष्कृतिकथनञ्च ।	,,
१३८३	मयूरघातादिह नार्याः कृष्णमण्डलरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१३८४	पुरा हंसघातादत्र नरस्य श्वेतमंडलरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१३८५	पूर्वं पारावतघातादत्र नार्याः पीतपाणित्वथा तन्निवृत्त्युपायकथनञ्च ।	,,
१३८६	पूर्वं हंसघातादत्र नार्याः श्वेतमंडलरोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	,,
१३८७	पुरा पितृघातादिह नरस्य चेतनारहितत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१३८८	गंगायाः प्रान्तरे देशे जातस्य भूपस्य मधुरवाचो लोकविश्रुतस्य पुत्रमरणादिदुःखनिदानं तन्निष्कृतिकथनञ्च	४५१
१३८९	पण्यशालायां पण्यस्त्रीकर्मणा नार्या उपजीविकाकरणादत्र नरस्य षण्ढत्वम् ।	,,
१३९०	नकुलघातादत्र नार्या बभ्रुमंडलरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१३९१	अज्ञानान्मातृहन्त्र्या नार्या अत्र चक्षुर्विहीनत्वं तत्प्रायश्चित्तकथनञ्च ।	४५२

अ०	विषयाः	पृ०
१३९२	पूर्वं सुखलोभेनपक्वान्नहरणादत्र जिह्वापरिपाकतः पीडा तत्प्रायश्चित्तकथनञ्च ।	४५२
१३९३	नार्मददेशे जातस्य वणिक्सुतस्य सुखदुःखसमावृतस्य जातपुत्रविनाशनिदानं तदुपायश्च ।	"
१३९४	पूर्वभवे मातृघातात्सप्तजन्मपर्यंतं नेत्रांध्यकथनम् ।	४५३
१३९५	पुरा भवे परमान्नहरणादिह नार्याः परमन्नहीनत्वं तत्प्रायश्चित्तकथनञ्च ।	"
१३९६	अज्ञानान्मातृघातकरणेन नार्या नेत्रांध्यं तत्प्रायश्चित्तकथनञ्च ।	"
१३९७	स्त्रीपुरुषयो राजकुलजयोरपस्मारादिपीडितयो राज्ञ्या यौवनेऽतिदुःखप्राप्तिनिदानं तत्प्रायश्चित्तकथनञ्च ।	"
१३९८	पूर्वं गर्भपातनादिह नार्याः पुत्रसंतानाभावस्तदुपायकथानकञ्च ।	४५४
१३९९	कस्यचित्सूतस्य देवाग्निद्विजवल्लभस्याचारकुलधर्मज्ञस्य पतिप्राणायाः सुव्रतकांक्षिण्या ऋतुहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।....	४५५
१४००	पूर्वजन्मनि शशघातादत्र नरस्य कुब्जकर्णत्वं तत्प्रायश्चित्तकथनञ्च ।	"
१४०१	पण्यशालायां पत्नीस्थापनत उपजीविकाकरणादिह नरस्य षण्ढत्वं तन्निष्कृत्यभावश्च ।	४५६
१४०२	पूर्वभवे नकुलप्राणहरणादत्र नार्या बभ्रुमंडलरोगतः पीडा तन्निवृत्त्युपायश्च ।	"
१४०३	कस्यचित्क्षत्रियकुलजस्य नानाबंध्युदरपीडावतः कटिपृष्ठोदरपीडितस्य भार्यायाः पतिप्रियायाः संततिहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	"
१४०४	पूर्वमुलूकघातादिह नरस्य पांडुरोगस्तत्प्रायश्चित्तकथनञ्च ।	४५७
१४०५	पुरोलूकघातिन्या नार्या अत्र पांडुरोगस्तत्प्रायश्चित्तकथनञ्च ।	४५७
१४०६	पूर्वं व्यभिचारकरणादिह मनुष्यस्य पुत्रहीनता तत्प्रायश्चित्तकथनञ्च ।	
१४०७	यमुनाप्रान्तरदेशे जातस्य ब्राह्मणस्य सुखैश्वर्यसमायुतस्य जातपुत्रविनाशकयोगकथनं तत्प्रायश्चित्तञ्च ।	४५८
१४०८	पूर्वभवे सुरापानादत्र नार्याः प्रदररोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	"
१४०९	चंद्रभागैरावतीप्रान्ते जातस्य ब्राह्मणस्य स्वाधिकाराच्चलाचलस्य यौवने स्त्रीदुःखवतो बहुकन्यकस्य पुत्रसुखाभावनिदानं तत्प्रायश्चित्तञ्च ।	४५९
१४१०	कस्यचिद्द्विजस्य क्लेशचिंताभीत्याढ्यस्य भार्याया मृतप्रजात्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	४६०
१४११	सरस्वतीदेशे जातस्य वन्दिनः सुरूपस्य पितृसौख्यविवर्जितस्य पुत्रसौख्यराहित्यनिदानं तत्प्रायश्चित्तकथनञ्च ।	"
१४१२	ऐरावतीदेशे जातस्य द्विजस्य किंचिज्जठरपीडावतः पुत्रसंततिवर्जितत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	४६१
१४१३	ऐरावतीनदीतीरे जातस्य द्विजस्य पितृमातृविवर्जितस्य कुटुंबे क्षयरोगपीडानिदानं तत्प्रायश्चित्तकथनञ्च ।	४६२
१४१४	आचारकुलधर्मज्ञस्य देवाग्निद्विजवत्सलस्य किंचिद्वित्तवतः पत्न्याः पुत्रजीवनोपायकथनम् ।	"
१४१५	कस्यचित्क्षत्रियस्य कृशस्य क्षयरोगतो बंधुपुत्रमरणनिदानं तस्य क्षयेण मरणञ्च ।	४६३
१४१६	अयोध्याभिधदेशे जातस्य वैश्यस्य युवभावे क्षयरोगप्राप्तिनिदानं तत्प्रायश्चित्तकथनञ्च ।	४६[illegible]

अ०	विषयाः	पृ०
१४१७	पूर्वभवे ब्राह्मणघातादत्र नार्याः क्षयरोगतो मरणकथनम्।	४६४
१४१८	स्वस्त्रीघातादत्र नरस्य बधिरत्वं तत्प्रायश्चित्तकथनञ्च।	४६५
१४१९	पुरा आत्मघातकारिण्या नार्या अत्र क्षयरोगपीडा तत्प्रायश्चित्तकथनञ्च।	,,
१४२०	पुराभवे भ्रातृघातादत्र नरस्य मूकत्वं तत्प्रायश्चित्तकथनं च।	,,
१४२१	पूर्वं कुक्कुटघातकरणान्नार्या इह नासावक्रत्वकथनं तत्प्रायश्चित्तकथनञ्च।	,,
१४२२	गंगाप्रांतरदेशे जातस्य शूद्रस्य पैतृकस्वल्पवित्तवतोऽपुत्रत्वनिदानं तत्प्रायश्चित्तकथनञ्च।	,,
१४२३	कस्याश्चित्क्षत्रियनार्याः पतिशुश्रूषणकारिण्याः क्षयरोगप्राप्तिपुत्रराहित्यनिदानं त्रयोविंशे वर्षे क्षयतो मरणञ्च।	४६६
१४२४	पूर्वं सारिकाहननान्नरस्येह स्खलितवाक्त्वं तत्प्रायश्चित्तकथनञ्च।	,,
१४२५	पुराभवे सारिकावातादत्र नार्याः स्खलितवाक्त्वं तत्प्रायश्चित्तकथनञ्च।	,,
१४२६	पूर्वं काकहन्तुर्नरस्येह भवे लंबकण्ठत्वं तत्प्रायश्चित्तकथनञ्च।	,,
१४२७	पूर्वजनुषि वकहंत्र्या नार्या इह कंठरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
१४२८	कस्यचिद्विप्रकुलजस्य भार्यायाः सदाचारवत्याः संतोषप्रियकारिण्या मृतवत्सात्वनिदानं तदुपायश्च।	,,
१४२९	काकवातादिह नरस्य कूर्चहीनत्वं तत्प्रायश्चित्तकथनञ्च।	४६८
१४३०	पुरा काकवधादिह नार्याः कूर्चयुक्तत्वं तत्प्रायश्चित्तकथनञ्च।	,,
१४३१	पुराभवे अभक्ष्यभक्षणादत्र नरस्य क्रिमिलोदरत्वं तत्प्रायश्चित्तकथनञ्च।	,,
१४३२	अभक्ष्यभक्षणान्नार्या अप्युदरे इह क्रिमिपीडा तदुपशमविधिश्च।	,,
१४३३	दुष्टस्पृष्टसिद्धान्नभक्षणादत्र नरस्य कृशोदरत्वं तत्प्रायश्चित्तकथनञ्च।	४६८
१४३४	दुष्टस्पृष्टसिद्धान्नभक्षणान्नार्या इह कृशोदरीत्वं तत्प्रायश्चित्तकथनञ्च।	,,
१४३५	गंगायाः पूर्वभागे जातस्य द्विजस्य बंधुस्त्रीसुखवतो मितदस्य मृतपुत्रत्वनिदानं तत्प्रायश्चित्तकथनञ्च।	,,
१४३६	कस्याश्चिद्विप्रपत्न्याः पुत्रसंततिहीनाया युवभावे क्षयरोगप्राप्तिनिदानं तत्प्रायश्चित्तकथनञ्च।	४६९
१४३७	पुरोच्छिष्टान्नभक्षणादिह नरस्य रात्र्यंधत्वं तत्प्रायश्चित्तकथनञ्च।	,,
१४३८	विडालोच्छिष्टभोजनादत्र नरस्य रात्र्यंधत्वं तत्प्रायश्चित्तकथनञ्च।	,,
१४३९	विडालोच्छिष्टभोजिन्या नार्या अत्र रात्र्यंधत्वं तत्प्रायश्चित्तकथनञ्च।	४७०
१४४०	चांडालीगमनेनात्र नरस्य अजगरवन्मूढत्वं तत्प्रायश्चित्तकथनञ्च।	,,
१४४१	चाण्डालगमनतो नार्या अत्राजगरवन्मूढत्वं तदुपायकथनञ्च।	,,
१४४२	द्विजकुलभवस्य कस्यचित्साधुसेवकस्य भार्यायाः मृतवत्सात्वनिदानं तत्प्रायश्चित्तकथनञ्च।	,,
१४४३	विप्राय विषं दत्तवतो नरस्यात्र छर्दिरोगतः पीडा तेनैव मरणञ्च।	४७१
१४४४	पुरा द्विजाय विषं दत्त्वा तत्प्राणहरणतो नार्या अत्र छर्दिरोगेण मरणकथनम्।	,,
१४४५	अन्यस्मै विषदानादिह नरस्य छर्दिरोगतः पीडा तत्प्रायश्चित्तकथनञ्च।	४७२
१४४६	पूर्वं भ्रातृघातादिह नरस्य मूकत्वम्।	,,
१४४७	पूर्वस्मिन्भवे पुत्राभिलाषेण यवनसंगादत्र यवनीत्वप्राप्तावपि पुत्रराहित्यकथनं तत्प्रायश्चित्तञ्च।	,,
१४४८	पुरा देवद्रव्यापहरणादिह नरस्य पांडुरोगकथनम्।	,,

अ०	विषयाः	पृ०
१४४९	प्राग्भवे कस्यापि विषदानादत्र नार्या-श्छर्दिरोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	४७२
१४५०	गंगायाः पूर्वभागे जातस्य क्षत्रियस्य बहुद्रव्यपराक्रमस्य जातपुत्रमृतिनिदानं तत्प्रायश्चित्तकथनञ्च ।	"
१४५१	पूर्वं व्यभिचारकरणादिह नार्या व्यभिचारप्रवृत्तिस्तत्प्रायश्चित्तकथनञ्च।	४७३
१४५२	पुरा धूर्ततया ब्राह्मणवंचनादत्र नरस्यापस्माररोगपीडा ।	"
१४५३	पूर्वं भ्रातृघातिन्या नार्या अत्र मूकत्वकथनम् ।....	"
१४५४	देवताद्रव्यापहरणतोऽत्र नरस्याक्षिप्रपीडनम् ।	"
१४५५	पूर्वभवे सर्वस्नेहहरणादिह नरस्य क्षयरोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	"
१४५६	ब्रह्मवादरताया नार्याः पतिदोषान्मानुषत्वमाश्रित्य महेश्वरपदप्राप्तिकथनम् ।	४७४
१४५७	अज्ञानात्पूर्वभवे भ्रातृवधतोऽत्र मूकत्वं तत्प्रायश्चित्तकथनञ्च ।	"
१४५८	धूर्ततया जनवंचनादत्र नार्या अपस्मारोगस्तत्प्रायश्चित्तञ्च ।	"
१४५९	कस्यचिद्विप्रस्य धर्मिष्ठस्य वित्तवतो वायुपीडितोदरस्य भार्यायाः पतिप्रीतिपराया मृतवत्सात्वं तत्प्रायश्चित्तकथनञ्च ।	"
१४६०	पुरा भवे स्नेहहरणादत्र नार्याः क्षयरोगाकुलत्वं तन्निष्कृतिश्च ।	४७५
१४६१	धौर्त्येन लोकवचनादिह नरस्यापस्माररोगस्तत्प्रायश्चित्तकथनञ्च ।	"
१४६२	पूर्वं स्वर्णापहरणादत्र नार्याः स्वर्णकारीत्वप्राप्तावप्यपुत्रत्वं तत्प्रायश्चित्तकथनञ्च ।	

अ०	विषयाः	पृ०
१४६३	पूर्वमन्नापहरणतोऽत्र नरस्याजीर्णरोगस्तत्प्रायश्चित्तकथनञ्च ।	४७६
१४६४	अज्ञानतः पुरा भवे भ्रातृवधादत्र नार्या मूकत्वं तत्प्रायश्चित्तकथनञ्च ।	"
१४६५	पुरा बालघातादत्र नरस्य मृतपुत्रत्वं तत्प्रायश्चित्तकथनञ्च ।	"
१४६६	प्रयागे जातस्य द्विजवरस्य विद्युपोधनपुत्रसमायुक्तस्य क्षयरोगस्तत्प्रायश्चित्तकथनञ्च ।	४७६
१४६७	यमुनायां जातस्य कस्यचिद्विप्रस्याधमस्य पंचाशद्दन्तं जातपुत्रविनाशनिदानं तत्प्रायश्चित्तकथनञ्च।	"
१४६८	सर्वपापविशोधनकरविधिनिरूपणम्।	४७७
१४६९	दानधर्मकृतः सर्वसंपत्समान्वितस्य वैष्णवमते स्थितस्य जातसंततिदुःखनिदानं तत्प्रायश्चित्तकथनञ्च ।	"
१४७०	पूर्वजन्मनि पुरुषताडनान्नार्या इह शूलतः पीडा तदुपायकथनञ्च ।....	४७८
१४७१	अज्ञानात्पूर्वभवे सुतघाताद्वा मित्रघातादत्र वायुरोगस्तत्प्रायश्चित्तञ्च।	"
१४७२	पुरा गोत्रघातकारिण्या नार्या अत्र क्षूतारोगस्तदुपायश्च।	"
१४७३	पूर्वं स्नेहहरणादत्र नरस्य राजयक्ष्मरोगस्तत्प्रायश्चित्तकथनञ्च ।	"
१४७४	जारमाश्रित्य विषदानेन पतिघातिन्या नार्या अत्र बाल्ये वैधव्यं तदुपायश्च ।	"
१४७५	पुरा देवागारस्य दाहादत्र नरस्य रक्तातिसाररोगतः पीडा तदुपायकथनञ्च।	
१४७६	प्रयागनिकटे जातस्य द्विजन्मनः शठस्यापस्मारतो मृतपुत्रद्वयस्य कष्टप्राप्तिनिदानं तत्प्रायश्चित्तकथनञ्च ।	४८०
१४७७	पूर्वं गर्भपातनतोऽत्र नार्या गर्भपतनं तत्प्रायश्चित्तञ्च ।	"
१४७८	पुरा देवागारदाहिन्या नार्या इह अतिसारतः पीडा तत्प्रायश्चित्तकथनञ्च ।	"

अ०	विषयाः	पृ०
१४७९	प्राग्भवे ब्रह्महन्तुरिह नरस्य नरकवद्दारुणपीडा।	४७९
१४८०	पुरा पत्युर्मित्रहंत्र्या नार्या वायुरोगतः पीडा तत्प्रायश्चित्तकथनञ्च।	४८०
१४८१	पुरा अज्ञानाद् या नारी गोत्रहंत्री तस्या अत्र लूतारोगतः पीडा तत्प्रायश्चित्तञ्च।	,,
१४८२	कस्यचिद्विजस्य किंचिद्वित्तसमन्वितस्यसद्वृत्तस्य भार्यायाःसदाचारवत्याः काकवंध्यात्वनिदानं तत्प्रायश्चित्तकथनञ्च।	,,
१४८३	पुरा देवागारे शक्रन्मूत्रत्पुरत्ननराधमस्य गुदरोगस्तत्प्रायश्चित्तकथनञ्च।	४८१
१४८४	पूर्वं नारीघातादत्र जन्मनि नरस्य बलवर्जितस्य कार्श्यरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
१४८५	पुरा बालघातिन्या अत्र बालमरणं तदुपायश्च।	,,
१४८६	अज्ञानात्पूर्वं ब्रह्मघ्नस्येह भवे कुष्ठरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
१४८७	पुरा देवद्रव्यहरणादिह नरस्य वायुपीडा तत्प्रायश्चित्तकथनञ्च।	४८२
१४८८	देवागारे मलमूत्रविसर्जनादिह नार्या गुदरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
१४८९	विपाशानिकटे जातस्य वैश्यस्य स्त्रीपुत्रधनसंयुतस्य वार्धके कंडुरोगतः पीडा तत्प्रायश्चित्तञ्च।	,,
१४९०	देवागारे जले गोष्ठे वा मलमूत्रत्यागादत्र नार्या गुदरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
१४९१	कामात्पापविमोहितस्य नारीघातादिह कार्श्यरोगस्तत्प्रायश्चित्तकथनञ्च	,,
१४९२	कन्यावधादत्र नरस्य कन्याप्रजत्वं तत्प्रायश्चित्तकथनञ्च।	४८३
१४९३	पूर्वं देवद्रव्यापहरणादिह नार्या वायुरोगतः पीडा तत्प्रायश्चित्तकथनञ्च।	,,
१४९४	सरस्वतीतीरे जातस्य वन्दिनः सुखैश्वर्यसमाकुलस्य पुत्रसौख्यराहित्यनिदानं तत्प्रायश्चित्तकथनञ्च।	४८३
१४९५	नर्मदापश्चिमदेशे जातस्य शूद्रस्य भ्रातृहीनस्याल्पवित्तस्य पुत्रसौख्यराहित्यनिदानं तत्प्रायश्चित्तकथनञ्च।	४८४
१४९६	यमुनायां जातस्य शूद्रस्य सुकर्मणोऽमितदस्यापुत्रत्वनिदानं तत्प्रायश्चित्तकथनञ्च।	४८५
१४९७	शतद्रुनिकटे जातस्य शूद्रस्य पुत्रपौत्रसमन्वितस्य कटेरूर्ध्वं रोगतः पीडा तत्प्रायश्चित्तकथनञ्च।	,,
१४९८	तुलाघृतादिहरणादिह कुष्ठरोगस्तदुपशमश्च।	,,
१४९९	पूर्वभवे कन्याघातादत्र नरस्य मृतपुत्रत्वं तत्प्रायश्चित्तञ्च।	४८६
१५००	यवन्याः पूर्वपापनिवृत्तये क्षेत्रराजसेवनम्।	,,
१५०१	कुष्ठनिवारणाय सामान्यतः प्रायश्चित्तकथनम्।	
१५०२	क्षात्रकुलोत्पन्नाया सर्वसुखसंपन्नाया वार्धके तत्पुत्रदुःखनिदानं तत्प्रायश्चित्तकथनञ्च।	,,
१५०३	कस्यचिद्विजकुलभवस्य सदाशिवाचरणरतस्य पतिसेवापरायाः पन्न्या मृतपुत्रत्वनिदानं तदुपशमश्च।	४८७
१५०४	पुरा राजघातिनोऽत्र भवे तस्मिन्नेव वयसि राजयक्ष्मरोगतः प्राणनाशः।	४८८
१५०५	परगर्भहननादिह जलन्धराख्यरोगस्तत्प्रायश्चित्तञ्च।	
१५०६	शतद्रुनिकटे जातस्य द्विजस्य यौवने रिष्टप्राप्तिस्तत्प्रायश्चित्तञ्च।	,,
१५०७	पतिव्रतायाः सद्वृत्तिकथनम्।	,,
१५०८	पूर्वं धनाढ्यगृहे स्थित्वा चौर्येण रसभक्षणे कृतेऽत्र वातरोगतः पीडा तदुपशमश्च।	४८९

अ०	विषयाः	पृ०
१९०९	पुरा स्वगर्भपातनादत्र जलोदरपीडा तत्प्रायाश्चित्तकथनञ्च ।....	४८९
१९१०	सुमुख्याः सदा भर्तृसेवनपरायाः सुभगायाः नार्याः पुत्रहीनत्वनिदानं तत्प्रायश्चित्तञ्च ।	"
१९११	पूर्वजन्मनि ब्राह्मणघातादिह तस्मिन्वयसि जाताद्बलत्कुष्ठान्मरणकथनम्।	"
१९१२	विपाशानिकटे जातस्य शूद्रस्य महोद्यमिनः पुत्रसन्ततिराहित्यनिदानं तत्प्रायश्चित्तञ्च ।	"
१९१३	देवागारस्थितदेवमूर्तिभंगादिहाप्रतिष्ठा तत्प्रायाश्चित्तकथनञ्च।	४९०
१९१४	पुरा राजवधादत्र नरस्य राजयक्ष्मरोगस्तत्प्रायश्चित्तञ्च ।....	"
१९१५	परगर्भघातादत्र नार्या जलोदररोगस्तदुपशमकथनञ्च ।	"
१९१६	पूर्वजन्मनि वादकर्तुर्वस्तिरोधादत्र मूकत्वं तत्प्रायश्चित्तञ्च ।	"
१९१७	पूर्वभवे सपत्न्या गर्भघाताच्छूद्रीत्वमापन्नाया नार्याः सुतराहित्यं तदुपायश्च ।	४९१
१९१८	परनिंदाकरणेनात्र नरस्य स्वल्पांगत्वं तत्प्रायश्चित्तकथनञ्च ।	"
१९१९	राजवधादत्र नार्याः क्षयरोगतः प्राणनाशकथनम्।	"
१९२०	नार्या भर्तुर्वाग्विरोधिन्या अत्र मूकत्वं तत्प्रायश्चित्तकथनञ्च ।	"
१९२१	अपरस्थापितदेवमूर्तिभंजनादत्राप्रतिष्ठा तदुपायकथनञ्च ।	"
१९२२	मथुरामण्डले जातस्य द्विजस्य सुरूपस्त्रीसुखेज्झितस्य सन्तानसुखहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	"
१९२३	द्विजकुलभवस्य स्वल्पवृत्तिर्जीवनस्य पत्न्याः पातिव्रतपराया मृतापत्यायाया उदरस्थितगर्भस्य प्रसूतिपतनाभावनिदानं तत्प्रायश्चित्तकथनञ्च ।	४९२
१९२४	परनिंदाकरणादत्र नार्याः खल्वाटरोगस्तत्प्रायश्चित्तकथनञ्च ।	४९
१९२५	पूर्वकृतव्यभिचारदोषतः संकरजात्युत्पन्नाया धनपुत्रविहीनत्वं तदुपशमकथनञ्च ।	"
१९२६	सभायां ब्राह्मणस्य पक्षघातकरणादत्र पक्षघातरोगस्तत्प्रायश्चित्तञ्च ।	"
१९२७	पूर्वमभक्ष्यभक्षणादत्र नार्या गंडमालारोगस्तत्प्रायश्चित्तकथनञ्च ।	"
१९२८	पूर्वं ब्राह्मणबालकघातादत्र क्षयरोगयुतस्य नरस्य पुत्रसंततिराहित्यनिरूपणं तत्प्रायश्चित्तकथनञ्च ।	"
१९२९	पूर्वं विनापराधं परपक्षघातिन्या नार्या अत्र पक्षाघाताद्वहुपीडा तत्प्रायश्चित्तकथनञ्च ।	४९४
१९३०	पूर्वं त्रिविधसुरापानादत्र मूत्रकृच्छ्रं तत्प्रायश्चित्तञ्च ।	"
१९३१	मथुरायां जातस्य भगवतः क्षत्रियाणां भारमवतार्य पुनः स्वलोकप्रयाणम्।	"
१९३२	पूर्वं स्वर्णापहरणादत्र कुलघ्नत्वं तत्प्रायश्चित्तञ्च ।	"
१९३३	राजघातकरणान्नार्या अत्र तस्मिन्समये क्षयरोगस्तत्प्रायश्चित्तञ्च ।	४९५
१९३४	मेरोः समागताया दुष्टनाशं कृत्वा पुनः स्वस्थानगमनम्।	"
१९३५	मोहाद्वैश्यघातादत्र नरस्य रक्तार्बुदरोगस्तत्प्रायश्चित्तकथनञ्च ।	"
१९३६	मोहात्सुरापानो नार्या अत्र मूत्रकृच्छ्ररोगस्तत्प्रायश्चित्तकथनञ्च ।	"
१९३७	कस्यचिद्विप्रस्य क्रयविक्रयकर्तुः कृषिवाणिज्यजीविकस्य भार्यायाः अपत्यमृतिनिदानं तत्प्रायश्चित्तकथनञ्च ।	"
१९३८	नार्या मोहात्सुरापानतोत्र प्रदररोगस्तत्प्रायश्चित्तकथनञ्च ।	४९

अ०	विषयाः	पृ०
१९३९	पूर्वं त्रिविधसुरापानादत्र नरस्य मूत्रावरोधरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
१९४०	पुरा वैश्यघातादत्र नार्या रक्तार्बुदतो मृत्युप्राप्तिकथनम्।	४९७
१९४१	देशे सारस्वते जायमानाया बाहुजायाः क्षयरोगनिदानं तत्प्रायश्चित्तकथनञ्च।	,,
१९४२	यौवनावस्थायां नरस्योन्मादरोगनिदानं तत्प्रायश्चित्तञ्च।	,,
१९४३	पूर्वं परस्वर्णापहरणादत्र नार्या कुनखात्वं तत्प्रायश्चित्तकथनञ्च।	,,
१९४४	पूर्वभवे वैद्यहत्त्या नार्या अत्र रक्तार्बुदरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
१९४५	पूर्वं गोप्यहरणादत्र नरस्य चित्रकुष्टस्तत्प्रायश्चित्तकथनञ्च।	,,
१९४६	सिंधोः पश्चिमभागे जातस्य म्लेच्छस्य सर्वभोगैश्वर्ययुतस्य पंचाशदब्दे रिष्टप्राप्तिनिदानं तत्परिहारोपायश्च।	,,
१९४७	पूर्वं स्वेच्छया परपुरुषेण सह रममाणाया अत्रोन्मादरोगस्तत्प्रायश्चित्तकथनञ्च।	४९८
१९४८	पूर्वं त्रपुहरणादत्र नरस्य श्लेष्मरोगस्तत्प्रायश्चित्तञ्च।	,,
१९४९	पूर्वं विद्यमानेपि पत्यौ जारतो गर्भधारणादत्र नार्या गर्भग्रहणाभावस्तत्प्रायश्चित्तञ्च।	,,
१९५०	मृगयां विना हस्तिघातादत्र नरस्य कुत्राप्यसिद्धकार्यस्य विंशेऽब्दे शस्त्राघातान्मृतिः।	४९९
१९५१	बलोत्कर्षेण ब्राह्मणीरमणादत्र नरस्य महोन्मादरोगतः प्राणनाशः।	,,
१९५२	त्रपुहरणादत्र नार्याःश्लेष्मरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
१९५३	विप्रवंश्यस्य धनधान्ययुतस्य मेहरोगवतो भार्यायाः सदाचारत्वात्याः पुत्रहीनत्वनिदानं तत्प्रायश्चित्तञ्च।	,,
१९५४	पूर्वं मातृप्रहरणादत्र नार्या औदुंबराख्यरोगस्तत्प्रायश्चित्तकथनञ्च।....	५००
१९५५	गर्भसत्रमकृत्वैवाविधिना गर्भधारणादत्र गर्भधारणाभावस्तत्प्रायश्चित्तञ्च।	,,
१९५६	मृगयायां गजराजवधादत्र नरस्य गजचर्मत्वं तत्प्रायश्चित्तकथनञ्च।	,,
१९५७	पूर्वं परसिद्धान्नहरणादत्र शूलरोगतो नरस्य पीडा तत्प्रायश्चित्तकथनञ्च।	,,
१९५८	कस्यचिच्चारणस्य बहुद्रव्यसमन्वितस्य नेत्ररोगान्वितस्य जातसंततिमरणदुःखनिदानं तत्प्रायश्चित्तकथनञ्च।	५०१
१९५९	पूर्वं रीत्यपहरणादिह नरस्य पिंगलाक्षित्वं तत्प्रायश्चित्तञ्च।....	,,
१९६०	पुरा खरघातादत्र नरस्य खररोमत्वं तत्प्रायश्चित्तकथनञ्च।	,,
१९६१	स्वगर्भवृद्ध्यर्थं कुक्कुटांडभक्षणतोऽत्र संकरजात्युत्पन्नाया नार्या गर्भधारणाभावस्तत्प्रायश्चित्तञ्च।	५०२
१९६२	स्वर्णकारकुले जातस्य महाभिमानिनो राजकुलप्रियस्य सुखैश्वर्ययुतस्य पुत्राहित्यनिदानं तत्प्रायाश्चित्तञ्च।	,,
१९६३	प्राग्भवे खरहननादत्र नार्याः खररोमसमानरोमत्वं तत्प्रायश्चित्तञ्च।	,,
१९६४	पुरा रीतिहरणादत्र नार्याः पिङ्गाक्षीत्वं तत्प्रायश्चित्तञ्च।	,,
१९६५	परसिद्धान्नहरणादिह नार्याः शूलरोगतः पीडा तत्प्रायश्चित्तञ्च।	५०३
१९६६	केदारमंडले जातस्य क्षत्रियस्य सर्वकार्यविचक्षणस्य रोगक्लेशयुतभार्यस्य मृतपुत्रत्वनिदानं तत्प्रायाश्चित्तकथनञ्च।	,,
१९६७	हिमालये जातस्य द्विजस्य मनोदुःखसमाक्रांतस्य वातशूलपीडितोदरस्य वंशच्छेदनिदानं तत्प्रायश्चित्तकथनञ्च।	,,

अ०	विषयाः	पृ०
१९६८	वाराणसीक्षेत्रे जातस्य ब्राह्मणस्य पितृमातृभ्रातृगुर्वादिरहितस्य पुत्रस्त्रीसुखवर्जितत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	५०४
१९६९	गंगातीरे केदारमंडले जातस्य क्षत्रियस्य जातपुत्रविनाशनिदानं तत्प्रायश्चित्तञ्च ।	५०६
१९७०	पूर्वपुण्यवशेन धनिनां कुले जातस्य नरस्य पूर्ववयसि ज्वरतो महापीडा तत्प्रायश्चित्तञ्च ।	५०७
१९७१	केदारदेशे जातस्य देवद्विजपरायणस्य स्त्रीपुत्रसुखहीनत्वनिदानं तत्प्रायश्चित्तञ्च ।	५०८
१९७२	केदारमंडले जातस्य राजकार्यतत्परस्य बहुपुत्रसुखैर्हीनस्य परकार्यविनाशकत्वादिनिदानं तत्प्रायश्चित्तकथनञ्च ।	५०९
१९७३	गंगायाः पूर्वभागे राज्ञां वंशभवस्य बहुभृत्यधनैश्वर्यसुखवाहनसंयुतस्य चित्तास्थैर्यनिदानं तत्प्रायश्चित्तकथनञ्च ।	५१०
१९७४	केदारमंडले जातस्य बाहुजस्य राजसमानिनः किंचिद्वित्तसमन्वितस्य मृतपुत्रत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	५११
१९७५	पुरासतीं स्वभार्यां परित्यज्यान्यस्त्रीगमनतोऽत्र नरस्य ग्रहणीरोगतस्तन्मरणञ्च ।	५१२
१९७६	पुरा कांस्यहरणादिह नार्याः शीर्षरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१९७७	पूर्वमद्यघातिन्या नार्या अत्र विकृतस्वरत्वं तत्प्रायश्चित्तञ्च ।	,,
१९७८	पूर्वं परघृतहरणादिह नरस्य नेत्ररोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१९७९	स्वकं पतिं परित्यज्य परपुरुषसंगान्नार्या अत्र ग्रहणीरोगस्तत्प्रायश्चित्तञ्च।	,,
१९८०	विप्रवंशसमुद्भवस्य किंचिद्वित्तवतो वातरक्ताक्षिदर्शनस्य मृतपुत्रत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	५१३
१९८१	वन्ध्यात्वनिवारकप्रयोगाणां संक्षेपतो विवरणम् ।	५१३
१९८२	पूर्वं देवद्रव्यापहरणादत्र भवे नरस्य विंशतिवर्षनिवृत्तौ नेत्रभंगस्तत्प्रायश्चित्तञ्च ।	,,
१९८३	पूर्वभवे वृषस्य मुष्कनिकुट्टनतोऽत्र नरस्य षंढत्वं तत्प्रायश्चित्तकथनञ्च ।	५१४
१९८४	पूर्वं परघृतहरणादत्र योषितो नेत्ररोगस्तदुपायश्च ।	,,
१९८५	पुरा जनुषि महिषीघातादिह नरस्य कृष्णगुल्मरोगस्तत्प्रायश्चित्तञ्च ।....	,,
१९८६	कस्याश्चिच्छूद्रया गौरवर्णायाः धनभृत्याश्वभोगाद्यैश्वर्यवत्याः संततिहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१९८७	पुराभवे दुग्धहरणादत्र नरस्य बहुमूत्रत्वं तत्प्रायश्चित्तञ्च ।	,,
१९८८	पूर्वं दुग्धहरणादत्र नार्या बहुमूत्ररोगाकुलत्वं तत्प्रायश्चित्तञ्च ।	,,
१९८९	नवयौवनमहिषीघातादत्र कृष्णगुल्मरोगस्तत्प्रायश्चित्तञ्च ।	५१
१९९०	वृषमुष्कनिकुट्टनतोऽत्र नरस्य षंढत्वकथनम् ।	,,
१९९१	पूर्वं फलापहरणतोऽत्र नार्याः संततिरोधस्तत्प्रायश्चित्तञ्च ।	,,
१९९२	दधिहरणान्मेदोरोगस्तदुपायश्च ।	,,
१९९३	प्राग्भवे महिषीघातादत्र नार्याःकृष्णगुल्मरोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	,,
१९९४	वृषनासाग्रवेधादिह नरस्य नासाच्छेदकथनम् ।	,,
१९९५	सिंधोः पश्चिमभागे यवनराजकुलसंभवस्य सर्वैश्वर्यसौख्यभाजः पंच-	

अ०	विषयाः	पृ०
	पंचाशे वर्षेऽरिष्टप्राप्तिनिदानं तत्प्रायश्चित्तकथनञ्च।	५१६
१५९६	दधिहरणतोऽत्र नरस्य मेदोरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
१५९७	पूर्वभवे तरक्षुहननादिह नेत्रकातरत्वं तत्प्रायश्चित्तकथनञ्च।	,,
१५९८	देवागारस्थधातुमयान्यस्थापितदीपपात्रहरणादत्र नार्याश्चक्षुःपीडा तत्प्रायश्चित्तकथनञ्च।	,,
१५९९	पूर्वं मधुहरणादिह नरस्य दुर्गन्धियुतत्वं तत्प्रायश्चित्तकथनञ्च।	,,
१६००	तरक्षुघातान्नार्या अप्यत्र कातराक्षीत्वं तत्प्रायश्चित्तकथनञ्च।	५१७
१६०१	गजक्रियान्वितस्यात्र नरस्य षण्ढत्वकथनम्।	,,
१६०२	क्षात्रकुलजस्य नानासौख्यरतस्य शुभाचारायां भार्यायां एकपुत्रप्रसवोत्तरं पुष्पनाशनिदानं तत्प्रायश्चित्तकथनञ्च।	,,
१६०३	प्राग्भवे माक्षिकहरणादत्र नार्या दुर्गन्धाढ्यत्वं तत्प्रायश्चित्तकथनञ्च।	५१८
१६०४	पुरा अगम्यागमनान्नरस्यात्र षण्ढत्वकथनं तत्प्रायश्चित्ताभावश्च।	,,
१६०५	द्रव्यलोभेन सपत्नीसुतघातादिह नार्या बाल्य एव कुष्ठरोगतः पीडा।	,,
१६०६	पूर्वजन्मनि वराहघातादत्र नरस्य दन्तुररोगस्तदुपायकथनञ्च।	,,
१६०७	गुडहरणादत्र गुल्मरोगस्तत्प्रायश्चित्तञ्च।	,,
१६०८	यमुनातीरजातायाः शूद्रया बाल्ये कुष्ठरोगप्राप्तिस्तत्प्रायश्चित्तञ्च।	,,
१६०९	सिंधुमंडलजातस्य यवनस्य सुखैश्वर्यधनान्वितस्य षंढत्वनिदानं तत्प्रायश्चित्तञ्च।	,,
१६१०	वराहघातिन्या नार्या अत्र दन्तुरत्वं तत्प्रायश्चित्तञ्च।	५१९
१६११	पुरा भवे तैलहरणादत्र नरस्य कंडूरोगस्तत्प्रायश्चितञ्च।	५१९
१६१२	स्वदारपरित्यागदोषादत्र नरस्य षण्ढत्वं तत्प्रायश्चित्ताभावश्च।	,,
१६१३	स्वभक्ष्यार्थं मृगघातादिह नरस्य षण्ढत्वम्।	,,
१६१४	पूर्वभवे परस्य गुडापहरणान्नार्या अत्र गुल्मोदरपीडा तदुपायश्च।	,,
१६१५	शुभाचारां स्वस्त्रियं परित्यज्य परस्त्रीगमनतोत्र नरस्य स्त्रीवर्जितत्वं तदुपायश्च।	,,
१६१६	नृपं विना मृगघातादत्र नरस्य तद्घातकाले षण्ढत्वं तत्प्रायश्चितञ्च।	५२०
१६१७	परतैलापहरणादिह नार्याः कंडूरोगस्तत्प्रायश्चित्तञ्च।	,,
१६१८	राजपत्न्या गमनतोऽत्र नरस्य षण्ढत्वं तत्प्रायश्चित्तञ्च।	,,
१६१९	गर्भवत्यश्वीघातादिह नार्याः खञ्जत्वं तन्निष्कृतिकथनञ्च। ...	,,
१६२०	क्षात्रकुलजस्य दानदाक्षिण्यपरस्य मेहादिपीडितस्य भार्यायां सदाचारवत्याः सत्या गर्भास्थिरत्वनिदानं तत्प्रायश्चित्तञ्च।	५२१
१६२१	पूर्वभवे तुरंगघातादिह वक्रकंठरोगस्तन्निष्कृतिकथनञ्च।	,,
१६२२	सृगालघातादिह नरस्य पादहीनत्वं तत्प्रायश्चित्तकथनञ्च।	५२२
१६२३	गंगातीरे जातस्य शूद्रस्य युवभावे चक्षुर्हीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च।	,,
१६२४	यमुनातीरभवस्य क्षत्रियस्य धनसौख्यसमन्वितस्य अपुत्रत्वनिदानं तत्प्रायश्चित्तञ्च।	,,
१६२५	गंगायाः पूर्वभागे जातायां ब्राह्मण्याः किशोरावस्थायामेव पतित्यक्तत्वनिदानं तत्प्रायश्चित्तकथनञ्च।	५२३

अ०	विषयाः	पृ०
१६२६	पुरा बलात्कारेण कन्यादूषणादिह नरस्य षण्ढत्वं तत्प्रायश्चित्ताभावश्च।	५२४
१६२७	परलुण्ठनतत्परस्य मार्गहंतुरत्र पादरोगस्तन्निष्कृतिकथनञ्च ।	"
१६२८	अज्ञानादजघातेनात्र पुरुषस्याङ्गाधिक्यं तत्प्रायश्चित्तञ्च ।	"
१६२९	गंगायाः पूर्वभागे जातस्य क्षत्रियस्य चपलस्य रोगयुक्तत्वनिदानं तदुपाय कथनञ्च ।	"
१६३०	हिमालये गंगापूर्वभागे जातस्य क्षणिक्षुतस्य जातपुत्रविनाशनिदानं तदुपायकथनञ्च ।	५२५
१६३१	हिमालये गंगापूर्वभागे जातस्य द्विजस्य धनयशोवतो बहुस्त्रीकस्य पुत्रविनाशनिदानं तत्प्रायश्चित्तकथनञ्च।	"
१६३२	पर्वतभागे जातस्य पादजस्य मन्त्रपारगस्य राजमानवतो मृतपुत्रत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	५२६
१६३३	क्षात्रवंशभवस्य निष्फलव्यवहारवतो भार्याया गर्भवत्या मृतप्रजायाःप्रसूतिक्षरणाभावनिदानं तत्प्रायश्चित्तंच	५२७
१६३४	कस्याश्चिच्छूद्रभार्याया नानाविभववत्या गर्भधारणाभावनिदानं तत्प्रायश्चित्तवर्णनञ्च ।	५२८
१६३५	विपाशानिकटे जातस्य ब्राह्मणस्य मानभोगसुखैश्वर्यवतो जातपुत्रविनाशनिदानं तत्प्रायश्चित्तकथनञ्च ।	"
१६३६	पूर्वमज्ञानादजाघातेनात्र नरस्याधिकाङ्गत्वं तत्प्रायश्चित्तकथनञ्च ।	५२९
१६३७	पूर्वं लोहहरणादत्र वर्वराख्यरोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	"
१६३८	पुरा नकुलकुलनाशादत्र सर्वस्वजनमरणदुःखमनुभूय दुःखेन मरणकथनम् ।	"
१६३९	लोहहरणादिह नार्या अपि वर्वरांगत्वनिरूपणं तदुपशमोपायकथनञ्च ।	"

अ०	विषयाः	पृ०
१६४०	मोहात्पूर्वभवेऽजघातेनात्र नार्या अप्यधिकाङ्गत्वं तत्प्रायश्चित्तकथनञ्च ।	५३
१६४१	क्षात्रकुलभवस्य गुल्मनातोदरामयस्य धनधान्यसुखोपेतस्य पुत्रसंततिराहित्यनिदानं तत्प्रायश्चित्तकथनञ्च ।	"
१६४२	माथुरमंडले जातायाः क्षत्रियपत्न्या जातसंततिनाशनिदानं तत्प्रायश्चित्तकथनञ्च ।	५३१
१६४३	पूर्वभवे शुनो वधादिह चक्रपादरोगस्तत्प्रायश्चित्तञ्च ।	"
१६४४	पुरा शूद्रघातादत्र नरस्य दन्तपातनजरोगतः पीडा तत्प्रायश्चित्तञ्च ।	"
१६४५	पूर्वं शुनो घातान्नार्या अत्र चक्रपादरोगतः पीडा तत्प्रायश्चित्तञ्च ।	"
१६४६	शूद्रघातकरणादत्र नार्या दन्तपातनजरोगस्तत्प्रायश्चित्तञ्च ।	"
१६४७	गोदावरीसमीपदेशे जातस्य शूद्रस्य जातपुत्रविनाशनिदानं तत्प्रायश्चित्तञ्च ।	५३२
१६४८	पुरा वभ्रुहननादिह नरस्य वभ्रुमंडलरोगार्तत्वं तत्प्रायश्चित्तकथनञ्च ।	"
१६४९	कस्याश्चित्पादजाया जातसंततिहीनाया अत्र कुष्ठरोगस्तत्प्रतीकारश्च ।	"
१६५०	पूर्वं शशघातादत्र नरस्य कुब्जकर्णत्वं तत्प्रायश्चित्तकथनञ्च ।	"
१६५१	पूर्वं स्वपत्न्याः पण्यशालास्थापनेन पण्यस्त्रीकर्मतो जीविकाकर्तुरत्र पण्डत्वम् ।	५३३
१६५२	नकुलघातादिह नार्या वभ्रुमंडलरोगस्तत्प्रायश्चित्तकथनञ्च ।	"
१६५३	क्षात्रकुलभवस्य नानावृत्त्यातिलाभवतो भार्यायाः संततिहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	"
१६५४	पूर्वजन्मनि दिवांधघातादत्र पुरुषस्य पाण्डुरोगस्तत्प्रायश्चित्तकथनञ्च ।	५३४

अ०	विषयाः	पृ०
१६५५	उल्लूकघातान्नार्या अप्यत्र पांडुरोगतः पीडा तदुपायकथनञ्च।	५३४
१६५६	ऋतुप्राप्तामपि ज्येष्ठस्त्रियं परित्यज्य कनिष्ठागमनतोऽत्र नरस्य स्त्रीवशित्वं तत्प्रायश्चित्तकथनञ्च।....	,,
१६५७	कामतो ब्रह्मघातादत्र नरस्य क्षयरोगतः प्राणनाशस्तत्प्रायश्चित्ताभावश्च।	,,
१६५८	अकामतो द्विजघाते क्षयरोगस्तदुपशमाय प्रायश्चित्तकथनञ्च।	,,
१६५९	कस्यचिद्विप्रस्य सदाचारकुलधर्मज्ञस्य वातपित्तसंयुतस्य भार्यायाः सदाचारवत्या ऋतुहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च।....	५३५
१६६०	कस्यचित्क्षत्रियकुलभवस्य क्षयरोगवतो मृतपुत्रत्वनिदानम्।	५३६
१६६१	कस्यचित्क्षत्रियाधमस्यायोध्याप्रदेशे जातस्य युवभावे क्षयरोगनिदानं तत्प्रायश्चित्तञ्च।	५३७
१६६२	ब्रह्महत्याकरणादत्र नार्याः क्षयरोगप्राप्तिकथनम्।	,,
१६६३	पूर्वं स्वसृघातादत्र नरस्य बधिरताप्राप्तिस्तत्प्रायश्चित्तञ्च।	,,
१६६४	प्राग्भवे अज्ञानतो ब्रह्मघातान्नार्याः क्षयरोगस्तत्प्रायश्चित्तकथनञ्च।....	,,
१६६५	पूर्वं भ्रातृघातादत्र नरस्य मूकत्वकथनम्	,,
१६६६	पूर्वं कुक्कुटघातादत्र नार्या नासावक्रत्वं तत्प्रायश्चित्तकथनञ्च।	५३८
१६६७	गंगाप्रान्तरदेशे जातस्य शूद्रस्य जातपुत्रविनाशनिदानं तत्प्रायश्चित्तकथनञ्च।	,,
१६६८	विराटदेशे जातायाः क्षत्रियपत्न्याः पतिसेवापराया बाल्ये क्षयरोगप्राप्तिनिदानं तत्प्रायश्चितञ्च।	,,
१६६९	पुरा सारिकाहननादत्र नरस्य स्खलितवाक्त्वं तत्प्रायश्चित्तकथनञ्च।	५३९
१६७०	सारिकाहंत्र्या नार्या इह भवे स्खलितवाक्त्वं तत्प्रायश्चित्तकथनञ्च।....	५३९
१६७१	पूर्वं वकघातादत्र नरस्य लंबकंठत्वं तत्प्रायश्चित्तकथनञ्च।	,,
१६७२	पुरा वकघातादिह नार्या अपि लंबकंठत्वं तत्प्रायश्चित्तकथनञ्च।	,,
१६७३	कस्यचिद्विप्रकुलभवस्य वित्तवतो भार्यायाः सदाचारवत्याःसंतोषप्रियकारिण्या मृतवत्सात्वनिदानं तत्प्रायश्चित्तकथनञ्च।	,,
१६७४	काकघातादत्र कूर्चहीनत्वं तत्प्रायश्चित्तञ्च।	५४०
१६७५	पुरा काकवधकरणादत्र नार्याः कूर्चयुक्तत्वं तत्प्रायश्चित्तकथनञ्च।	५४१
१६७६	पुरा अभक्ष्यभक्षणतोऽत्र नरस्य कृमिलोदरत्वं तत्प्रायश्चित्तकथनञ्च।	,,
१६७७	नार्या अप्यभक्ष्यभक्षणतोत्र कृमिलोदरत्वं तत्प्रायश्चित्तकथनञ्च।	,,
१६७८	दुष्टस्पृष्टान्नभक्षणतोऽत्र नरस्य कृशोदरत्वरोगस्तदुपायकथनञ्च।	,,
१६७९	द्विजभार्यायाः पूर्वं दुष्टस्पृष्टान्नभक्षणतोऽत्र कृशोदरत्वं तदुपायश्च।	,,
१६८०	ज्येष्ठां भार्यां ऋतुमतीं परित्यज्य कनिष्ठासंगमतोऽत्र नरस्य मृतपुत्रत्वं तत्परिहारोपायश्च।	,,
१६८१	विप्रकुलजायाः कस्याश्चिन्नार्याः क्षयान्वितायाः पुत्रहीनत्वनिदानं तत्प्रायश्चित्तञ्च।	५४२
१६८२	उच्छिष्टान्नभक्षणादिह नरस्य रात्र्यंधत्वं तत्प्रायश्चित्तकथनञ्च।	,,
१६८३	श्वोच्छिष्टभक्षणतोऽत्र नार्या नक्तांधता तत्प्रायश्चित्तकथनञ्च।	,,
१६८४	पूर्वं विडालोच्छिष्टान्नभक्षणतोऽत्र पुरुषस्य नक्तांधता तदुपायकथनञ्च।	,,
१६८५	विडालोच्छिष्टान्नसेवनतोऽत्र नार्या अपि नक्तांधता तदुपायकथनञ्च।	,,

अ०	विषयाः	पृ०
१६८६	पुराभवे चाण्डालीगमनतोऽत्राजगरवन्मूढत्वं तत्प्रायश्चित्तकथनञ्च ।	५४३
१६८७	पूर्वं चाण्डालसंगान्नार्या अप्यत्राजगरवन्मूढत्वं तदुपशमोपायकथनञ्च ।	,,
१६८८	परान्नविघ्नकरणादिह नरस्याजीर्णरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१६८९	पुराभवे परान्नविघ्नकरणान्नार्या अप्यजीर्णरोगोत्र तत्प्रायश्चित्तकथनञ्च ।	,,
१६९०	कस्यचिद्विप्रकुलभवस्य सत्यनित्यसदाचारस्य भार्यायां मृतवत्सात्वनिदानं तदुपायश्च ।	,,
१६९१	पुरा विप्राय विषदानादत्र नरस्य छर्दिरोगतः पीडा तेनैवास्य देहनाशश्च ।	५४४
१६९२	विप्राय विषदानादत्र नार्या अपि छर्दिरोगतो नाशकथनम् ।	५४५
१६९३	ब्राह्मणेतराय विषदानादिह नरस्य छर्दिरोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	,,
१६९४	पूर्वं भ्रातृघातादिह नरस्य मूकत्वकथनम् ।	,,
१६९५	पुत्राभिलाषाद्ब्राह्मण्यायवनगमनादत्र यवनीत्वेऽपि पुत्रहीनत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१६९६	पूर्वजन्मनि देवद्रव्यापहरणादत्र नरस्य बाल्य एव पाण्डुरोगस्तत्प्रायश्चित्तञ्च।	,,
१६९७	पूर्वं द्विजेतराय विषदानान्नार्या अत्र छर्दिरोगस्तत्प्रायश्चित्तकथनञ्च ।....	,,
१६९८	गंगापूर्वभागे जातस्य क्षत्रियस्य बहुद्रव्यपराक्रमस्य बहुकन्यस्यापुत्रत्व निदानं तत्प्रायश्चित्तकथनञ्च ।	५४६
१६९९	पूर्वं व्यभिचारपराया अत्रापि व्यभिचारप्रवृत्तिस्तत्प्रायश्चित्तकथनञ्च ।	,,
१७००	पुरा धूर्ततया द्विजवंचनादत्र नरस्यापस्मारोगतः प्राणनाशः ।	,,

अ०	विषयाः	पृ०
१७०१	भ्रातृघातादत्र नार्या मूकत्वं तत्प्रायश्चित्तकथनञ्च ।	५४७
१७०२	पूर्वं देवद्रव्यापहरणादत्र नरस्य विंशति वर्षानंतरं नेत्रभंगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१७०३	पुरा द्विजघातादत्र नरस्य क्षयरोगस्तत्प्रायश्चित्तकथनञ्च ।	५४८
१७०४	ब्रह्मबादरतायां नार्यां अत्र किंचिद्दोषवशात्स्त्रीत्वमाप्येतः शिवलोकगमनम् ।	,,
१७०५	अज्ञानाद् भ्रातृघातिनोऽत्र नरस्य मूकत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१७०६	धूर्ततया परवंचनकर्त्र्यां नार्यां दोषनिवृत्तये प्रायश्चित्तकथनम् ।	,,
१७०७	कस्यचिद् द्विजस्य धर्मिष्ठस्य प्रीतिपरायां भार्यायाः प्रदरार्तायां मृतवत्सात्वनिदानं तत्प्रायश्चित्तविवरणञ्च ।	,,
१७०८	धौर्त्येन लोकवंचनादत्रापस्माररोगस्तत्प्रायश्चित्तकथनञ्च ।	५४८
१७०९	पूर्वं स्वर्णापहरणतोऽत्र नार्याः स्वर्णकार्याः पुत्रहीनत्वं तत्प्रायश्चित्तञ्च।	,,
१७१०	अन्नहरणतोऽत्र नरस्य विशेषतो जठरे अजीर्णता तत्प्रायश्चित्तञ्च ।	,,
१७११	मोहतो भ्रातृवधकारिण्या नार्या अत्र मूकत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१७१२	पुराभवे बालघातादत्र नरस्य मृतपुत्रत्वकथनं तत्प्रायश्चित्तकथनञ्च ।	,,
१७१३	पूर्वं नानाविधपातककारिण्या अपि नार्यास्तीर्थराजसेवनाद् यवनीत्वेपि धनपुत्रैश्वर्यसुखयुक्तत्वकथनम्।	५४९
१७१४	स्नेहहरणतोऽत्र नरस्य क्षयरोगप्राप्तिस्तत्प्रायश्चित्तकथनञ्च ।	,,
१७१५	कुरुक्षेत्रसमीपे जातस्य क्षत्रियस्य धान्यधनसंग्रहवतः स्त्रीभूत्याद्यैश्वर्यवतो	

अ०	विषयाः	पृ०
	जातपुत्रविनाशकत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	५४९
१७१६	पूर्वसंचितपातकविनाशनोपायवर्णनम् ।	५५०
१७१७	पूर्वभवे स्नेहहरणादत्र नरस्य राजयक्ष्मपीडा तत्प्रायश्चित्तकथनञ्च ।	,,
१७१८	पुरा जारमाश्रित्य पतिहन्त्र्या नार्या अत्र बाल्य एव विधवात्वं तत्प्रायश्चित्तकथनञ्च ।....	,,
१७१९	देवालयविदारकस्यात्र नरस्य रक्तातिसाररोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	,,
१७२०	प्रयागनिकटे जातस्य द्विजस्य धनधान्ययुतस्यापस्माररोगतो मृतपुत्रद्वयस्यापुत्रत्वनिदानं तत्प्रायश्चित्त कथनञ्च ।	५५१
१७२१	पुरा गर्भपातनकारिण्या नार्या अत्र गर्भपातनदुःखं तत्प्रायश्चित्तकथनञ्च ।	,,
१७२२	देवागारदाहादत्र नार्या अतिसाररोगतः पीडा तदुपायकथनञ्च ।	,,
१७२३	ब्रह्महन्तुस्तिर्यक्त्वमुपभुज्य नरदेहे कुष्ठरोगतः पीडाकथनम् ।	,,
१७२४	पत्युर्मित्रघातादत्र नार्या वायुरोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	५५२
१७२५	अज्ञानतो गोत्रघातादिह नार्या क्लूतारोगस्तत्प्रायश्चित्तकथनञ्च ।....	,,
१७२६	द्विजकुलभवस्य वातपित्तवतो धर्मवत्सलस्य शुभाचारायाः भार्यायाः काकवन्ध्यात्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१७२७	देवागारे शकृन्मूत्रकरणादत्र नरस्य गुदरोगस्तत्प्रायश्चित्तकथनञ्च ।....	५५३
१७२८	पूर्वभवे नारीघातादिह बलविवर्जितस्य नरस्य कृशत्वरोगस्तत्प्रायश्चित्तविवरणञ्च ।	,,
१७२९	पूर्वं देवद्रव्यापहरणादत्र नरस्य वायुपीडा तत्प्रायश्चित्तकथनञ्च । ...	५५३
१७३०	देवागारे मूत्रपुरीषोत्सर्गकरणान्नार्या अत्र भवे गुदरुक्पीडा तत्प्रायश्चित्तञ्च ।	,,
१७३१	विपाशानिकटे जातस्य क्षत्रियाधरस्य स्त्रीपुत्रधनयुतस्य वार्धके पाण्डुरोगस्तदुपायश्च ।	,,
१७३२	देवागारे मूत्रपुरीषोत्सर्गतो नार्या अत्र गुदरोगस्तत्प्रायश्चित्तकथनञ्च ।	५५४
१७३३	पुरा स्त्रीघातादत्र नरस्य जन्मतः कासरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१७३४	कन्यानाशादिह जन्मनि नरस्य कन्या संततिवृद्धिस्तत्प्रायश्चित्तकथनञ्च ।	,,
१७३५	गंगायमुनयोर्मध्ये जातस्य द्विजहन्तुः क्षत्रियस्य क्रूरकर्मणः कुष्ठरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१७३६	क्षत्रियकुलजाया नृपपत्न्या कुष्ठव्याधियुताया वार्धके सुखराहित्यनिदानं तदुपायकथनञ्च ।	५५५
१७३७	कस्यचिद्विप्रकुलजस्य सदाचारस्य भार्यायाः असृग्वातगदार्तायाः मृतपुत्रत्वनिदानं तदुपायश्च ।	,,
१७३८	पुरा भवे राजघातादत्र नरस्य राजयक्ष्मरोगस्तत्प्रायश्चित्तकथनञ्च ।	५५६
१७३९	ज्ञानवर्जितस्य परगर्भहननादिह नरस्य जलोदररोगस्तत्प्रायश्चित्तञ्च ।	,,
१७४०	शतद्रुनिकटे जातस्य द्विजस्य कुष्ठक्षयान्वितत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	५५७
१७४१	वैश्यकुलभवायाः पतिव्रतायाः अग्निमवृत्तकथनम् ।	,,
१७४२	शूद्रगृहाश्रितस्य तदन्नसेवनतोऽत्र नरस्य वातरोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	,,

अ०	विषयाः	पृ०
१७४३	गर्भवत्याः पूर्वं चौर्थतः फलभक्षणादत्र सदाचारात्या अपि पुत्रराहित्यं तदुपायश्च ।	५५७
१७४४	विपाशानिकटे जातस्य शूद्रस्य देवतातिथिपूजकस्य पुत्रसंततिवर्जितत्व निदानं तत्प्रायश्चित्तवर्णनञ्च ।	,,
१७४५	परान्नहरणादत्र नार्या अजीर्णरोगस्तत्प्रायश्चित्तकथनञ्च ।	५५८
१७४६	देवागारस्थितदेवतामूर्तिभंगात्सर्वत्राप्रतिष्ठा तत्प्रायश्चित्तकथनञ्च ।	,,
१७४७	मोहात्पूर्वं राजघाततोऽत्र नरस्य राजयक्ष्मरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१७४८	परगर्भघातिन्या नार्या अत्र भवे जलोदररोगस्तत्प्रायश्चित्तकथनञ्च ।	५५९
१७४९	परगर्भघातादत्रजलोदराख्यरोगतो नार्याः पीडा तदुपायकथनञ्च ।....	,,
१७५०	वादिनो वाग्विरोधकरणादिह नरस्य मूकत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१७५१	पूर्वं सपत्नीगर्भनाशादत्र नार्याः सुतवर्जितत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१७५२	परनिंदाकरणजन्यदोषनिवारणाय प्रायश्चित्तकथनञ्च ।	,,
१७५३	पूर्वजन्मनि राजघातकारिण्या नार्या अत्र तत्समय एव क्षयरोगप्राप्तिकथनम् ।	,,
१७५४	भर्तुर्वाग्विरोधतोऽत्र नार्या मूकत्वं तत्प्रायश्चित्तकथनञ्च।	,,
१७५५	मंदिरे परस्थापितदेवमूर्तिभंगकरणान्नार्या अप्यत्राप्रतिष्ठा तत्प्रायश्चितञ्च।	५६०
१७५६	मथुरामंडलजातस्य द्विजस्य संतानस्त्रीसुखराहित्यनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१७५७	वाताधिकशरीरस्य द्विजकुलभवस्य भार्याया मृतापत्याया गर्भस्य पतनप्रसूत्यभावनिदानं तदुपायश्च ।	,,
१७५८	पूर्वं परनिंदाकरणादत्र नार्या वागिन्द्रियविनाशस्तत्प्रायश्चित्तकथनञ्च ।	५६१
१७५९	पुरा भवे अभक्ष्यभक्षणतोऽत्र नरस्य गंडमालाख्यरोगस्तत्प्रायश्चित्तञ्च ।	५६१
१७६०	पुरा कुलहन्त्र्या नार्या अत्र धनपुत्रादिहीनत्वं तत्प्रायश्चित्तकथनञ्च ।	५६२
१७६१	अभक्ष्यभक्षणोत्तरं विना प्रायश्चित्तं मृताया अत्र पुनर्गंडमालारोगस्तत्प्रायश्चित्तं च ।	,,
१७६२	गौडदेशे जातस्य द्विजस्य धनधान्ययुतस्य क्षयरोगाकुलस्य पुत्रसंततिवर्जितत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१७६३	विनापराधं परपक्षकरणतोत्र नार्याः पक्षाघातरोगस्तत्प्रायश्चित्तकथनञ्च।	,,
१७६४	पुरा त्रिविधसुरापानाद्विप्रस्य मूत्रकृच्छ्ररोगस्तत्प्रायश्चित्तकथनञ्च ।	५६३
१७६५	वैकुण्ठादागतस्य मथुरायां जातस्य भूभारक्षत्रियसंहारोत्तरं भगवतो वैकुंठे पुनः प्रयाणम् ।	,,
१७६६	स्वर्णापहरणादिह नरस्य कुनखित्वं तत्प्रायश्चित्तञ्च ।	,,
१७६७	पूर्वभवे राजघातकरणान्नार्या इह तास्मिन्वयसि राजयक्ष्मान्वितत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१७६८	विनापराधं वैश्यहननादत्र रक्तार्बुदरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१७६९	सर्वभूतोपकाराय मेरोः समागतायाः शक्तेर्मथुरमंडलेऽद्भुतकार्याणि कृत्वा पुनरपि तत्रैव गमनम् ।	,,
१७७०	मोहाद्वैश्यहननेनात्र नरस्य रक्तार्बुदरोगस्तत्प्रायश्चित्तकथनञ्च ।	५६४
१७७१	ब्राह्मण्याः सुरापानादिह मूत्रकृच्छ्ररोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१७७२	कस्यचिद्विप्रकुलभवस्य कृषिवाणिज्यसंयुतस्य भार्याया मृतापत्याया रजोदोषादुदरार्तिनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,

अ०	विषयाः	पृ०
१७७३	सुरापानाद्ब्राह्मण्या अत्र प्रदररोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	५६५
१७७४	त्रिविधसुरापानाद्विप्रस्य भवेऽस्मिन्मूत्रावरोधस्तत्प्रायश्चित्तकथनञ्च ।	,,
१७७५	पूर्वं वैश्यघातकरणादत्र नार्या रक्तार्बुदरोगस्तत्प्रायश्चित्ताभावश्च ।	,,
१७७६	सारस्वतदेशभवायाः क्षत्रियायाः क्षयरोगोत्पत्तिस्तारुण्य एव तन्निष्कृतिश्च ।	,,
१७७७	पूर्वं स्वर्णापहरणादत्र नार्याः कुनखत्वं तत्प्रायश्चित्तकथनञ्च ।	५६६
१७७८	पूर्वं वैश्यहन्त्र्याः पतिव्रताया अपि रक्तार्बुदरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१७७९	रौप्यहरणादिह नरस्य चित्रकुष्ठत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१७८०	सिन्धोः पश्चिमभागे जातस्य म्लेच्छस्य बहुविद्याविशारदस्य पृथिवीपतेःपुत्रपौत्रयुतस्य पंचाशेऽब्देऽरिष्टयोगनिदानं तत्प्रायश्चित्तञ्च ।	,,
१७८१	परपुरुषरमणान्नार्या अत्रोन्मादरोगस्तत्प्रायश्चित्तकथनञ्च ।	५६७
१७८२	पूर्वं त्रपुहरणादिह नरस्य श्लेष्मरोगस्तत्प्रायश्चित्तवर्णनञ्च ।....	,,
१७८३	पत्यौ जीवमाने जारादूर्भधारणतोऽत्र नार्या गर्भाधारणंतत्प्रायश्चित्तञ्च ।	,,
१७८४	आखेटं विना हस्तिनो घातादत्र नरस्य सर्वकालं कार्यासिद्धिर्विंशत्यब्दे मरणं च ।	,,
१७८५	बलात्कारेण ब्राह्मणीगमनादिह नरस्योन्मादरोगतः प्राणनाशकथनम् ।	,,
१७८६	पूर्वभवे त्रपुहरणादत्र नार्याः श्लेष्मरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१७८७	विप्रकुलसंभवस्य सुव्रतस्य धनधान्यसंयुतस्य भार्यायाः सदाचारवत्या बहुकन्यकायाः पुत्रराहित्यनिदानंतत्प्रायश्चित्तकथनञ्च ।	५६८
१७८८	पुरा ताम्रहरणादत्र नार्या औदुम्बररोगस्तत्प्रायश्चित्तञ्च ।....	५६९
१७८९	गर्भवत्या आसन्नप्रसवाजामांसभक्षणादिह नार्या गर्भधारणाभावस्तत्प्रायश्चित्तकथनञ्च ।	५६९
१७९०	यमुनातटे जातस्य कस्यचिच्चारणस्य बहुद्रव्यसमन्वितस्यनेत्ररोगान्वितस्य चत्वारिंशन्मिते वर्षे सर्वसन्ततिनाशनिदानं तत्प्रायश्चित्तञ्च ।	,,
१७९१	पूर्वं रौप्यपहारकस्य पिङ्गलाक्षित्वं तत्प्रायश्चित्तञ्च ।	५७०
१७९२	पुरा खरहननादत्र नरस्य खररोमत्वं तत्प्रायश्चित्तञ्च ।	,,
१७९३	गर्भपुष्ट्यर्थं कुक्कुटांडभक्षणादिह नार्यो गर्भधारणाभावस्तत्प्रायश्चित्तकथनञ्च ।	,,
१७९४	कस्यचित्स्वर्णकारकुलजस्य धूर्तस्य लोभरतस्यराजजनप्रियस्य नानास्त्रीसुखयुतस्य सन्ततिहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१७९५	प्राग्भवे खरघातान्नार्या अप्यत्र खररोमत्वं तत्प्रायश्चित्तकथनञ्च ।	५७१
१७९६	रीतिहरणादिह नार्याः पिंगाक्षीत्वंतत्प्रायश्चित्तकथनञ्च ।	,,
१७९७	पूर्वं परसिद्धान्नहरणान्नार्या अत्र शूलरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१७९८	पूर्वभवे उष्ट्रघातादत्र नरस्य विकृतस्वरत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१७९९	पूर्वं गर्भपातनादत्र नार्या वन्ध्यात्वं तत्प्रायश्चित्तकथनञ्च ।....	,,
१८००	प्राग्देशे जातस्य बाहुजाधरस्य सुखैश्वर्यधनस्थानयुतस्य जातपुत्रविनाशनिदानं तत्प्रायश्चित्तकथनञ्च।	,,
१८०१	कांस्यहरणादत्र नरस्य शीर्षरोगस्तत्प्रायश्चित्तकथनञ्च ।	५७२
१८०२	कांस्यहारिण्या नार्या अप्यत्र शीर्षरोगस्तत्प्रायश्चित्तञ्च ।....	,,
१८०३	मोहादुष्ट्रघातिन्या नार्या अत्र विकृतस्वरत्वं तत्प्रायश्चित्तकथनञ्च ।	,,

अ०	विषयाः	पृ०
१८०४	पुरा परघृतहरणादिह नरस्य नेत्ररोगस्तत्प्रायश्चित्तकथनञ्च।	५७३
१८०५	स्वकं पतिं परित्यज्य परपुंगमनान्नार्या अत्रग्रहणीरोगस्तत्प्रायश्चित्तकथनञ्च।	"
१८०६	विप्रकुलभवस्य वातरोगवतो लोभिनः किंचिद्वित्तयुतस्य भार्यायाः पतिव्रताया मृतपुत्रत्वनिदानं तत्प्रायश्चित्तकथनञ्च।	"
१८०७	कस्याश्चिच्छूद्रया धनभृत्याश्वभोगादिविभवसंयुतायाः पुत्रसंततिहीनत्वं तत्प्रायश्चित्तकथनञ्च।	५७४
१८०८	पुरा दुग्धहरणादिह नरस्य बहुमूत्रत्वं तत्प्रायश्चित्तकथनञ्च।	"
१८०९	दुग्धहरणान्नार्या अपि बहुमूत्रत्वं तत्प्रायश्चित्तकथनञ्च।	"
१८१०	मोहान्महिषीघातादत्र नरस्य कृष्णगुल्मरोगस्तत्प्रायश्चित्तकथनञ्च।	"
१८११	पुरा भवे वृषभमुष्कनिकृंतनादिह नरस्य षण्ढत्वकथनम्।	"
१८१२	पूर्वं फलापहरणोत्थदोषतोऽत्र नार्याः पुत्रविहीनत्वं तत्प्रायश्चित्तकथनञ्च।	५७५
१८१३	दधिहरणतोऽत्र नरस्य मेदोरोगस्तत्प्रायश्चित्तकथनञ्च।	"
१८१४	पुरा महिषीघातादिह नार्याः कृष्णगुल्मरोगस्तत्प्रायश्चित्तकथनञ्च।....	"
१८१५	वृषनासाग्रवेधादिह नरस्य युवभावे नासाच्छेदस्तत्प्रायश्चित्ताभावश्च।	"
१८१६	सिंधोः पश्चिमभागे जातस्य भूमिभुजां म्लेच्छानां कुलभवस्य सर्वविद्याकुशलस्य सुखैश्वर्यवतो धनयुतस्य पंचपंचाशे वर्षे रिष्टनिदानं तदुपायश्च।	"
१८१७	दधिहरणान्नार्या अत्र मेदोरोगस्तत्प्रायश्चित्तकथनञ्च।	५७६
१८१८	तरक्षुघातादत्र नरस्य नेत्रकातरत्वं तत्प्रायश्चित्तकथनञ्च।	"

अ०	विषयाः	पृ०
१८१९	देवालयस्थितधातुमयदीपपात्रापहरणादिह नरस्य नार्या वा चक्षुःपीडा तदुपायश्च।	५७
१८२०	पुराभवे मधुहरणादत्र नरस्य पूतिगंधित्वं तत्प्रायश्चित्तकथनञ्च।	"
१८२१	तरक्षुनाशादिह नार्याश्चक्षुषो रोगतः कचराक्षित्वं तत्प्रायश्चित्तकथनञ्च।	"
१८२२	पञ्चनददेशे जातस्य अधमशूद्रस्यविवर्णस्य षण्ढत्वं तत्प्रायश्चित्ताभावश्च।	"
१८२३	क्षात्रकुलभवस्य शौर्यौदार्ययशोधनवतः किंचिद्वातपीडावतो भार्यायाः शुभाचारवत्या एकं पुत्रं प्रसूयपुण्यनाशस्य निदानं तत्प्रायश्चित्तञ्च।	५
१८२४	अगम्यामननोऽत्र नरस्य षण्ढत्वं तन्निष्कृत्यभावश्च।	"
१८२५	सपत्नीपुत्रस्य विषदानेन नाशादत्र नार्या बाल्ये कुष्ठरोगवत्याश्चतुर्विंशे वर्षे मरणकथनम्।	
१८२६	पूर्वभवे वराहघातादिह नरस्य दन्तुरत्वं तत्प्रायश्चित्तकथनञ्च।	५
१८२७	प्राग्भवे गुडहरणादत्र नरस्य गुल्मोदरत्वं तत्प्रायश्चित्तकथनञ्च।	
१८२८	यामुनतीरभवायाः शूद्रया बाल्ये कुष्ठरोगप्राप्तिनिदानं तत्प्रायश्चित्तकथनञ्च।	
१८२९	पुराभवे वराहघातान्नार्या अत्र दन्तुरत्वं तत्प्रायश्चित्तकथनञ्च।	
१८३०	तैलहरणादत्र नरस्य कंडूरोगस्तत्प्रायश्चित्तकथनञ्च।	
१८३१	विनापराधं भार्यापरित्यागान्नरस्य षण्ढत्वं तत्प्रायश्चित्ताभावश्च।	
१८३२	स्वभक्षार्थं मृगहननादिह नरस्य खंजत्वं तत्प्रायश्चित्ताभावश्च।	
१८३३	पूर्वभवे गुडापरणादत्र नार्या गुल्मोदरपीडा तत्प्रायश्चित्तकथनञ्च।	

अ०	विषयाः	पृ०
१८३४	स्वस्त्रियं परित्यज्य परांगनारतस्य नरस्येह भवे स्त्रीविवर्जितत्वं तत्प्रायश्चित्तकथनञ्च।	५७९
१८३५	नृपं विना मृगघातादिह नरस्य मृगघातकाले खंजत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१८३६	पूर्वभवे परतैलापहरणादत्र नार्याः कंडूरोगस्तत्प्रायश्चित्तकथनञ्च ।....	,,
१८३७	राजपत्न्यां गर्भधारणतोऽत्र नरस्य सर्वधर्मबहिष्कृतस्य पण्ढत्वकथनम्।	५८०
१८३८	स्वगर्भपोषणार्थं मृगघातादत्र नार्याः खंजायागर्भपातनदुःखप्राप्तिस्तदुपायश्च ।	,,
१८३९	क्षात्रकुलभवस्य कस्यचिन्मेहादिपीडितस्य भार्याया गर्भास्थिरत्वनिदानं तत्प्रायश्चित्तकथनञ्च।	,,
१८४०	पूर्वभवे तुरंगघातिनो नरस्यात्रवक्रकण्ठत्वं तत्प्रायश्चित्तकथनञ्च ।	५८१
१८४१	प्राग्जन्मनि शृगालघातादत्र नरस्य पादहीनत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१८४२	गंगातीरे जातस्य शूद्रस्य नानाविभवसंपन्नस्य युवभावे चक्षुर्हीनत्वनिदानं तत्प्रायश्चित्तञ्च ।	,,
१८४३	पूर्वभवे शृगालघातादनुज्ञानाद्वाऽत्र नरस्य नार्या वा खंजत्वं तदुपायकथनञ्च ।	५८२
१८४४	पूर्वमश्वघातादत्र नार्या वक्रकण्ठत्वं तत्प्रायश्चित्तकथनञ्च ।....	,,
१८४५	यमुनातीरे जातस्य वाहुजस्य धनसौख्यसमन्वितस्य स्त्रीयुतस्यानपत्यत्वनिदानं तदुपायश्च ।	,,
१८४६	बलात्कारतो वालिकासंभोगादत्र नरस्य पण्ढत्वं तत्प्रायश्चित्तकथनञ्च।	५८३
१८४७	पुरा परलुण्ठनतत्परस्य मार्गहन्तुः पादरोगस्तत्प्रायश्चित्तञ्च ।	,,
१८४८	पर्वतभागे जातस्य क्षत्रियस्य राजसम्मानिनो बुद्धिमतः पुत्रहीनत्वनिदानंतत्प्रायश्चित्तञ्च ।	,,
१८४९	क्षत्रवंशभवस्य गुल्माद्युदरबाधावतो निष्फलोद्यमस्य भार्याद्वययुतस्य मृतवत्सत्वनिदानं तत्प्रायश्चित्तं च ।	५८३
१८५०	पूर्वजन्मनि खरघातादिह नरस्य खररोमत्वं तत्प्रायश्चित्तकथनञ्च।	५८५
१८५१	गर्भपुष्ट्यर्थं कुक्कुटांडभक्षणादत्र नार्या गर्भधारणाभावस्तत्प्रायश्चित्तकथनञ्च ।	,,
१८५२	स्वर्णकारकुलजस्य धूर्तस्य राजसंमाननीयस्य नानाचौर्यक्रियायुतस्य पुत्रवर्जितत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१८५३	पुरा खरघातान्नार्याः खररोमत्वं तदुपायश्च ।....	,,
१८५४	पूर्वभवे रौप्यापहरणतोऽत्र नार्याः पिङ्गाक्षीत्वं तत्प्रायश्चित्तकथनञ्च ।....	५८६
१८५५	प्राग्भवे परसिद्धान्नहरणान्नार्याः इह शूलरोगस्तत्प्रायश्चित्तकथनञ्च ।....	,,
१८५६	उष्ट्रघातादिह नरस्य विकृतस्वरत्वं तत्प्रायश्चित्तकथनञ्च।	,,
१८५७	पूर्वं गर्भपातनपराया अत्र नार्या वन्ध्यात्वं तत्प्रायश्चित्तञ्च ।	,,
१८५८	पुरा कांस्यहरणात्पुरुषस्य शीर्षरोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	,,
१८५९	पंचनददेशभवस्य वाहुजाधरस्य कुलेष्टस्य सुखैश्वर्यधनस्थानवतो जनप्रियस्य जातपुत्रविनाशकत्वनिदानं तत्प्रायश्चित्तकथनञ्च।	,,
१८६०	कांस्यहरणादत्र नरस्य शीर्षरोगस्तत्प्रायश्चित्तञ्च ।	५८७
१८६१	वन्ध्यात्वनिवृत्तये प्रायश्चित्तविधिवर्णनञ्च ।	,,
१८६२	सतीं स्वभार्यां परित्यज्य प्रमादतोन्यस्त्रीगमनान्नरस्यात्र ग्रहणीरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१८६३	पूर्वं कांस्यहरणान्नार्या इह शीर्षरोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	,,

अ०	विषयाः	पृ०
१८६४	मोहात्पूर्वमुष्ट्रघातान्नार्या अत्र विकृतस्वरत्वं तत्प्रायश्चित्तकथनञ्च ।	५८८
१८६५	पूर्वं परघृतापहरणतोऽत्र नरस्य नेत्ररोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१८६६	स्वपतिपरित्यागपूर्वकपरपुरुषसंगमान्नार्या अत्र ग्रहणीरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१८६७	द्विजकुलभवस्य किंचिद्वित्तवतो वातरोगपीडितस्य पतिभक्तिपराया भार्यायाः पुत्रहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१८६८	ब्रह्मस्वभक्षणादिह जन्मनि नरस्य संततिनाशकथनं तत्प्रायश्चित्तकथनञ्च ।	५८९
१८६९	प्राग्भवे माक्षिकहरणादत्र नार्या दुर्गन्धाढ्यत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१८७०	नार्या द्रव्यलोभात्स्वसपत्नीसुतस्य विषप्रदानेन मारणादत्र बाल्ये कुष्टरोगान्वितायाश्चतुर्विंशे वर्षे अग्निदाहेन मरणं तत्प्रायश्चित्तञ्च ।	५९०
१८७१	पूर्वभवे वराहघातादिह नरस्य दन्तुरत्वं तत्प्रायश्चित्तञ्च ।	,,
१८७२	पूर्वं गुडापहरणादत्र नरस्य गुल्मोदररोगस्तत्प्रायश्चित्तञ्च ।	,,
१८७३	यमुनातीरे जातायाः शूद्रया बाल्ये कुष्टरोगनिदानं तत्प्रायश्चित्तञ्च ।	,,
१८७४	पर्वताश्रितसिंधुमंडले जातस्य यवनस्य षण्ढत्वनिदानं तत्प्रायश्चित्तञ्च ।	,,
१८७५	वराहघातेन्या नार्या अत्र दन्तुरत्वं तत्प्रायश्चित्तकथनञ्च ।	५९१
१८७६	पूर्वं तैलहरणादत्र नरस्यकण्डूरोगतः पीडा तत्प्रायश्चित्तञ्च ।	,,
१८७७	स्वपत्नीपरित्यागादिह नरस्य षंढत्वं तत्प्रायश्चित्ताभावश्च ।	,,
१८७८	स्वमक्ष्यार्थं मृगघातादिह नरस्य खञ्जत्वं तत्प्रायश्चित्तकथनञ्च ।	,,

अ०	विषयाः	पृ०
१८७९	मोहात्पूर्वभवे गुडापहरणतोऽत्र नार्या गुल्मोदरविपत्तिस्तत्प्रायश्चित्तकथनञ्च ।	५९
१८८०	वन्ध्यायाः स्वदोषनिवृत्तिपूर्वकमनुष्ठानविधिकथनं तत्प्रायश्चित्तकथनञ्च ।	
१८८१	देवद्रव्यापहरणतोऽत्र नरस्य चक्षुःपीडा तत्प्रायश्चित्तकथनञ्च ।	५९
१८८२	वृषभमुष्कनिकुट्टनादत्र नरस्य षण्ढत्वं तत्प्रायश्चित्ताभावश्च ।	,,
१८८३	पूर्वं परवृतहरणादत्र नार्या नेत्ररोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	,,
१८८४	पुराभवे महिषीघातादत्र नरस्य कृष्णगुल्मरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१८८५	धनभृत्यभोगाद्यैश्वर्यवत्याः शूद्रयाः पुत्रसंततिहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१८८६	पूर्वं दुग्धापहरणादिह नरस्य बहुमूत्ररोगस्तन्निवृत्तये उपायकथनञ्च ।	,,
१८८७	दुग्धापहारादत्र नार्या अपि बहुमूत्ररोगस्तत्प्रायश्चित्तकथनञ्च । ...	५९
१८८८	मोहान्महिषीघातेनात्र नरस्य कृष्णगुल्मरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१८८९	वृषभस्य मुष्कनिकुट्टनादत्र भवे नरस्य षण्ढत्वं तत्प्रायश्चित्ताभावश्च ।	,,
१८९०	पूर्वं फलापहरणादत्र जाताया नार्याः पुत्रविहीनत्वं तत्प्रायश्चित्तकथनञ्च ।	,,
१८९१	पूर्वभवे दधिहरणादत्र नरस्य मेदोरोगस्तत्प्रायश्चित्तकथनञ्च ।	,,
१८९२	पूर्वं महिषीघातनान्नार्या अत्र कृष्णगुल्मरोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	,,
१८९३	वृषनासाप्रवेधकरणान्नरस्यात्र जन्मनि युवावस्थायां नासाच्छेदस्तत्प्रायश्चित्तकथनञ्च ।	,,
१८९४	सिंधोः पश्चिमभागे जातस्य महामहीभुग्यवनवंशीयस्य सर्वसुखयुतस्य	

अ०	विषयाः	पृ०
	पंचपंचाशे वर्षेऽरिष्टनिदानं तत्प्रायश्चित्तकथनञ्च ।	५९४
१८९५	पूर्वं दधिहरणान्नार्या इह मेदोरोगस्तत्प्रायश्चित्तञ्च ।	"
१८९६	पूर्वं तरक्षुहननादत्र नरस्य नेत्रकातरत्वं तत्प्रायश्चित्तकथनञ्च ।	"
१८९७	देवालयेषु परस्थापितधातुमयदीपपात्रहरणान्नार्या इह चक्षुःपीडा तत्प्रायश्चित्तञ्च ।	"
१८९८	मधुहरणदोषतो नरस्यात्र जन्मनि पूतिगंधित्वं तत्प्रायश्चित्तकथनञ्च ।	"
१८९९	तरक्षुहन्त्र्या नार्या अत्र भवे कातराक्षीत्वं तत्प्रायश्चित्तकथनञ्च ।	५९५
१९००	पञ्चनददेशे जातस्य शूद्रस्य सकलैश्वर्यसंपन्नस्य पंढत्वकथनं तदुपायाभावश्च ।	"
१९०१	क्षात्रकुलभवस्य कस्यचिच्छौर्यौदार्यादिगुणवतो वातपीडितस्य भार्यायाः शुभाचारवत्या एकापत्योत्तरं पुष्पनाशनिदानं तत्प्रायश्चित्तकथनञ्च ।....	"
१९०२	जन्मान्तरोपार्जितदोषमोक्षणाय सौख्यकरदानव्रतकर्मनिरूपणम् ।	५९६
१९०३	कस्यचिद्विप्रस्य धनधान्यसमायुक्तस्य मृतैकभार्यस्यान्यभायातः परमपीडा तन्निदानं तदुपायश्च ।....	५९७
१९०४	कस्यचिच्छूद्रकुलजस्य पुत्रपुत्रीयुतस्य किंचिद्वित्तवतः प्रियभार्यस्य हेमंतप्रावृषोः श्वासयुक्तस्य शिरोर्तिनिदानंतत्प्रायश्चित्तकथनञ्च ।	५९९
१९०५	हिमालये जातस्य शूद्रस्य महाविभवसंयुतस्य बहुग्रामाधिपस्य चिंताक्लेशभयपुत्रान्तरसुखहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	६००
१९०६	द्विजयोषित्—धेनु—तपस्व्यग्निप्रभृतीनां पादहननतो नानाविधक्लेशनिरूपणं तत्प्रायश्चित्तञ्च ।	६०१
१९०७	हिमालये अमात्यवंशजस्य धनैश्वर्यसुखान्वितस्य वित्तक्लेशमनोयुक्तस्य अकारणोद्वेगवतो दैवबलात्पुत्रान्तरसुखाभावविषयनिदानं तत्प्रायश्चित्तञ्च ।	६०१
१९०८	मद्गर्वाभ्यां परद्रव्यापहरणात्परद्रोहाभिताप्याच्चात्र नरस्य दुर्धरज्वरपीडा तदुपशमोपायश्च ।	६०२
१९०९	मदमात्सर्यतः सत्कर्मोपरोधकरणादिह नरस्य महौषधशतैरपिप्रतिकर्तुमशक्यज्वरप्राप्तिस्तन्निष्कृतिकथनञ्च।	६०३
१९१०	अस्थिसंधिशीर्षेषु वेदनादिनानाविधलक्षणलक्षितज्वरवतः पूर्वसंचितकर्मप्रकाशनं तन्निष्कृत्युपायकथनञ्च।	"
१९११	ज्वरेण प्रतप्तांगस्य वेदनावतो दिवा रात्रौ क्षणमप्यसुखिनो हीनबलस्यौषधैरप्यशान्तज्वरस्य पूर्वकर्मप्रकाशस्तदुपायकथनञ्च ।	६०४
१९१२	वित्तव्ययभयार्दितस्य पितृदेवार्चने संकोचकरणादत्र ज्वरप्राप्तिस्तत्प्रायश्चित्तञ्च ।	६०५
१९१३	एकाहिकचातुर्थिकपाक्षिकमासिकादिज्वरप्राप्तिनिदानं तत्प्रायश्चित्तविधिकथनञ्च ।....	"
१९१४	नानाविधज्वरपीडानिवृत्तये भूतनाथादिभ्यो बलिदानविचारस्तन्मंत्रकथनञ्च ।	६०६
१९१५	गंगापूर्वभागे हिमालयसमीपे जातस्य क्षत्रियस्य सर्वलोकप्रियकरस्य जातपुत्रविनाशनिदानं तत्प्रायश्चित्तकथनञ्च ।	"
१९१६	गंगापूर्वभागे हिमालयसमीपे जातस्य शूद्रस्य धनवाहनभोगभुजो नैकस्त्रीयुतस्य ज्वरपीडा तन्निष्कृतिकथनञ्च।	६०७
१९१७	पावनेऽग्निष्टोमयज्ञे आमिषास्वादनसोमपाननिन्दाकरणादत्राकस्मान्नरस्यम्लेच्छत्वस्वीकारस्तत्प्रायश्चित्तकथनञ्च ।	६०८
१९१८	गोदावरीदक्षिणतीरे जातस्य द्विजस्य विद्यावतो धर्मरतस्य धनैश्वर्ययुतस्य जातपुत्रविनाशनिदानं तत्प्रा-	

अ०	विषयाः	पृ०
	यश्चित्तकथनञ्च ।	६०९
१९१९	पूर्वभवे नारिकेलफलापहरणादिह नरस्य मस्तकव्रणस्तत्प्रायश्चित्तञ्च ।	६११
१९२०	सर्वसाधारण्येन यवनीगमनादिह नरस्य शेफसि व्रणस्तदुपायकथनञ्च।	"
१९२१	अदत्त्वा वेतनं वेश्यागमनादत्र नरस्य शेफसि महाव्रणस्तत्प्रायश्चित्तकथनञ्च।	"
१९२२	भिल्लकैवर्तादिस्त्रीगमनतोऽत्र नरस्य शेफसि व्रणस्तदुपायकथनञ्च ।	"
१९२३	विवाहयज्ञादिशुभकर्मणि विघ्नकरणादिह नरस्यान्त्यवृद्धिरोगस्तत्प्रायश्चित्तञ्च ।	"
१९२४	कामदृष्ट्या कामतप्तांगस्य पतिव्रतास्त्रीविलोकनादिह नरस्य नेत्ररोगस्तत्प्रायश्चित्तञ्च ।	"
१९२५	लोभोपहतचेतसा पूर्वं तैलापहरणादिह नरस्याङ्गवैकृतपीडा तत्प्रायश्चित्तञ्च ।	६१२
१९२६	वर्णोत्तरजस्य कस्यचिद्धर्मवत्सलस्य कृपिकर्तुर्हस्तवामपार्श्वादिषु व्रणाकुलस्य भार्यायाःप्रदररोगतो गर्भास्थिरत्वनिदानं तत्प्रायश्चित्तकथनञ्च।	"
१९२७	हिमालये गंगापूर्वभागे राजवंशे जातायाः यौवने भर्तृसुखहीनत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	६१३
१९२८	हिमालये वर्णोत्तरकुलभवायाःकेकराक्ष्या यौवने पतिसौख्यराहित्यनिदानं तत्प्रायश्चित्तञ्च ।	"
१९२९	पर्वते क्षात्रकुलभवायाः पतिप्रियरतायाः सुखैश्वर्यवत्याः संतानवर्जितत्वनिदानं तत्प्रायश्चित्तकथनञ्च।	६१४
१९३०	हिमालये पुण्यदेशे जातायाश्चातुर्यादिगुणवत्या राजपत्न्या भर्तृपरित्यागनिदानं तत्प्रायश्चित्तञ्च ।	६१५
१९३१	कोंकणदेशे जातस्य कस्यचिद्विप्रस्य स्वजनपरित्यागपूर्वकं देशे संचरतोऽप्राप्तमनोरथस्य विद्यमानायामपि स्त्रियां तत्सुखराहित्यनिदानं तत्प्रायश्चित्तकथनञ्च ।	६१६
१९३२	कोंकणे जातस्य द्विजस्य विद्याशौर्यगाम्भीर्यधैर्यादिगुणवतःपुत्ररहितस्य पंचाशे वर्षेऽरिष्टकथननिदानं तत्प्रायश्चित्तकथनञ्च ।	६१
१९३३	वाराणस्यां जातस्य द्विजस्य मातुलसहायाद्वाणिज्यनिरतस्य सर्वधर्मवेत्तुः प्रमेहज्वरकंडूतिव्रणादिरोगवतः पुत्रहीनत्वनिदानं तत्प्रायश्चित्तञ्च ।....	६१
१९३४	गोदावरीतीरे जातस्य द्विजस्य पुत्रवर्जितस्य भार्यायाः गर्भस्थैर्यनिदानं तत्प्रायश्चित्तञ्च ।	६१८
१९३५	हिमालये जातस्य राजसेवापरस्य सेनापत्युर्वैशल्छेदकस्य जातपुत्रविनाशकत्वनिदानं तत्प्रायश्चित्तकथनञ्च।	"
१९३६	सांयात्रिकेभ्यो नियतवित्तादधिकग्राहिणो नरस्य मुखामयप्राप्तिस्तत्प्रायश्चित्तञ्च ।	६१९
१९३७	अप्रकाश्यपराच्छिद्रप्रकाशनात् साधुजनपैशुन्याद्वदनव्याधिस्तत्प्रायश्चित्तकथनञ्च ।	"
१९३८	असद्वचनादकृतद्रोपाणां महतां दोषख्यापनान्मुखदन्तक्षताभिधरोगस्तत्प्रायश्चित्तकथनञ्च ।	६२
१९३९	भेषजापहरणाच्छिरोरोगस्तत्प्रायश्चित्तकथनञ्च ।	"
१९४०	अनिच्छया प्रमादेन वा प्राणिनेत्रोपघातादत्र नरस्य नेत्रनाशरोगस्तत्प्रायश्चित्तकथनञ्च ।	"
१९४१	हंसहन्तुरत्र नरस्य श्वेतकुष्ठस्तत्प्रायश्चित्तकथनञ्च ।	,
१९४२	श्वेतवस्त्रापहरणादत्र नरस्य श्वेतमंडलरोगस्तत्प्रायश्चित्तकथनञ्च।	,
१९४३	प्राग्भवे कांस्यहरणादत्र नरस्य पुण्डरीकाख्यकुष्ठतः पीडा तत्प्रायश्चित्तकथनञ्च ।	६
१९४४	श्वेतकुष्ठप्रशान्तये द्विजातिभ्यो वैष्णवेभ्यस्ताम्बूलदानम् ।	,

अ०	विषयाः	पृ०
१९४५	आधिव्याध्यादिमहादुःखप्रदकर्मणां विचारस्तत्प्रायश्चित्तकथनञ्च ।	६२१
१९४६	काश्यां जातस्य द्विजश्रेष्ठस्य मृतवत्सत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१९४७	कस्यचित्क्षत्रियस्य काशिकानिवासिनः सन्तानसुखवर्जितत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।....	६२२
१९४८	वाराणसीक्षेत्रे जातस्य धनवतो वैश्यस्य मृतवत्सत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१९४९	वाराणस्यां जातस्य शूद्रस्य मृतापत्यत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	६२३
१९५०	काश्यां द्विजकुलभवस्य धर्मकर्मविदो मृतपुत्रत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१९५१	काश्यां जातस्य क्षत्रियस्य धनवाहनभोगयुतस्य मृतवत्सत्वनिदानं तत्प्रायश्चित्तञ्च ।	६२४
१९५२	काश्यां वणिक्कुलजस्य लोभवतः पापरतस्य मृतवत्सत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१९५३	काश्यां जातस्य शूद्रस्य चिताक्लेशसमायुक्तस्य बाल्ये पितृसुखोज्झितस्य मृतवत्सत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	६२५
१९५४	वाराणस्यां जातस्य ब्राह्मणस्य मृतवत्सत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१९५५	काश्यां जातस्य क्षत्रियस्य भार्यायां गर्भनाशनिदानं तत्प्रायश्चित्तकथनञ्च।	६२६
१९५६	काश्यां जातस्य वणिक्पुत्रस्य भृत्य धनवाहनयुतस्य सन्तानाभावनिदानं तत्प्रायश्चित्तकथनञ्च ।	६२७
१९५७	काश्यां जातस्य द्विजस्य विदुषः सर्वजनप्रियस्य वंशच्छेदनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१९५८	खशप्रान्ते जातस्य वणिजो भ्रातृपुत्रकलत्रादियुतस्य धनवतः शत्रुभयपुत्रशोकनिदानं तत्प्रायश्चित्तञ्च।	,,
१९५९	केदारमंडले जातस्य वैश्यस्य धनवाहनभोगवतो राजमान्यस्य सन्तानसुखराहित्यनिदानं तत्प्रायश्चित्तकथनञ्च ।	६२८
१९६०	हिमालये जातस्य वैश्यस्य धनवाहनभोगवतोऽतिधर्मविदः सन्तानसुखवर्जितत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	६२९
१९६१	खशप्रान्ते जातस्य ब्राह्मणस्य धनवाहनभोगयुतस्य बालमरणनिदानं तत्प्रायश्चित्तञ्च ।	६३०
१९६२	हिमालये जातस्य गौरवर्णस्य बाल्ये पितृसुखयुतस्य मृतवत्सत्वनिदानं तत्प्रायश्चित्तञ्च ।	,,
१९६३	हिमालये जाताया नार्याः पतिभक्तिपरायणाया देवद्विजपरायाः मृतवत्सात्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	६३१
१९६४	हिमालये जातस्य ब्राह्मणश्रेष्ठस्य मतिमतो राजमान्यस्य पितृमातृसुखोज्झितस्य पुत्रशोकाकुलत्वनिदानं तत्प्रायश्चित्तकथनञ्च।	६३२
१९६५	हिमालये जातस्य द्विजस्य राजमान्यस्य धनिनो मृतवत्सत्वनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१९६६	हिमालये जाताया नार्याः पतिभक्तिपरायणाया धनवाहनभोगाढ्याया ब्राह्मण्या मूढगर्भतानिदानं तत्प्रायश्चित्तकथनञ्च ।	६३३
१९६७	पर्वतप्रदेशे जाताया ब्राह्मण्याः पतिभक्तिपरायणाया धनवाहनभोगवत्याः स्वगर्भविनाशनिदानं तत्प्रायश्चित्तकथनञ्च ।	,,
१९६८	यमुनायाः पूर्वभागे जातस्य राजवंशभवस्य नीतिविदो राजप्रियस्य पितृसुखोज्झितस्य चित्तास्थैर्यवतो वातरोगवतः शूलरोगनिदानं तत्प्रायश्चित्तकथनञ्च ।	६३४

अ०	विषयाः	पृ०
१०६९	प्राग्भवे कांस्यहरणान्नार्या इह शीर्षरोगतः पीडा तत्प्रायश्चित्तकथनञ्च ।	६३५
१९७०	हिमालये पर्णविक्रयिशूद्रवंशजाया नार्या व्रतानुकांक्षिण्याः स्नानदानपराया विधवाया एकाक्ष्या दरिद्रायाः पतिमरणचिंतादिनिदानं तत्प्रायश्चित्तञ्च ।	६३५
१९७१	हिमालये द्विजकुलजाताया धर्मकर्मयुताया विधवाया निदानं तत्प्रायश्चित्तञ्च ।	६३६
१९७२	पूर्वं व्यभिचाररताया नार्या अत्र व्यभिचार एव प्रवृत्तिकथनम् ।	६३७
१९७३	हिमालये जातस्य वणिक्कुलभवस्य राजमान्यस्य सन्धिविग्रहादिचतुरस्य धनवाहनभोगाढ्यस्य ब्राह्मणातिथिपूजकस्य शत्रुपीडासर्वांगव्यथायुक्तत्वादिनिदानं तत्प्रायश्चित्तकथनञ्च ।	"
१९७४	हिमालये जातस्य द्विजस्य धनधान्यादियुतस्य सन्तानसुखवर्जितत्वादिनिदानं तत्प्रायश्चित्तकथनं च ।	६३८
१९७५	केदारमंडले जातस्य ब्राह्मणस्याधिकारप्रसंगेन निजद्रव्यविनाशवतो बुद्धिमतः कनिष्ठपुत्रमरणनिदानं तत्प्रायश्चित्तकथनञ्च ।	६३९
१९७६	केरलदेशे जातस्य द्विजवंशभवस्य धर्मकर्मविदो नरनारायणाश्रमे देवपूजकस्य सकलैश्वर्यवतः स्त्रीपुत्रजनकसुखहीनस्य देशत्यागनिदानं तत्प्रायश्चित्तकथनञ्च ।	६४०
१९७७	मथुरामंडले संकरजात्युत्पन्नस्य महाविभवविस्तरस्य धर्मकर्मविदः षण्ढत्वनिदानं गंगायां मरणतः पापक्षयकथनञ्च ।	६४१
१९७८	हिमालये जाताया क्षत्रियाया नार्याः पतिभक्तिपराया राजकार्यकरिण्याः कापट्ययुतायाः शत्रुभीत्या दुःखितायाः सर्वकार्येषु शंकाकुलायाः पुत्रशोकनिदानं तत्प्रायश्चित्तकथनञ्च ।	६४[illegible]
१९७९	नानाविधपातकावशेषतोऽत्रोत्पन्नानां रोगाणामुपशमाय दानयोग्यब्राह्मणकथनं दानप्रकारकथनं मंत्रकथनञ्च।	६४[illegible]
१९८०	भाविनः कर्मणः पुरा निमित्तानि भवंति तेनैव सर्वेषां सुखदुःखादिप्राप्तिकथनम् ।	६४[illegible]
१९८१	गृहमेधिनो गृहे स्थितानां शल्यानां संबंधेन दुःखोत्पत्तिस्तद्विचारश्च ।	"
१९८२	हिमालये जातस्य क्षत्रियस्य राजमान्यस्य शूद्रस्य धनवाहनभोगयुतस्य चिंताक्लेशरोगपुत्रदुःखादिनिदानं तत्प्रायश्चित्तकथनञ्च ।	६४[illegible]
१९८३	गोदावरीतीरे जातस्य कस्यचिन्नरस्य ब्राह्मणातिथिपूजकस्य तीर्थयात्रापरस्य स्त्रीपुत्रसुखराहित्यनिदानं तत्प्रायश्चित्तञ्च ।	६४[illegible]
१९८४	हिमालये जातस्य क्षत्रियस्य देवब्राह्मणभक्तस्य विद्याभ्यासरतस्य राजमान्यस्य स्त्रीपुत्रवर्जितस्य द्विजस्त्रीसंगादुत्पन्नलक्षणनिरूपणं तन्निवृत्तये प्रायश्चित्तविधिकथनञ्च ।	"
१९८५	हिमालये जातस्य महाज्ञानिनो संधिविग्रहादियुतस्य देवब्राह्मणपूजकस्य पुत्रमरणदुःखितस्यैतद्दुःखनिदानं तत्प्रायश्चित्तञ्च ।	६४[illegible]
१९८६	हिमालये गंगातीरे जातस्य शूद्रस्य व्यभिचाररतस्य निन्दकस्य पापबुद्धेर्वातरोगाज्जठरपीडानिदानं तत्प्रायश्चित्तकथनञ्च ।	६[illegible]
१९८७	हिमालये पुण्यदेशे जातस्य द्विजस्य धनाढ्यस्यातिप्रियंवदस्य रक्तगौरवर्णस्य मतिमतो राजमान्यस्य प्रतापिनः पित्तरोगतः पीडानिदानं तन्निवारणाय प्रायश्चित्तकथनञ्च ।	

॥ इति श्रीवृद्धसूर्यारुण--कर्मविपाकविषयानुक्रमणिका समाप्ता ॥

ॐ

अथ

* वृद्धसूर्यारुणकर्मविपाकः *

प्रारभ्यते ।

दी. जी. पन्नालाल्य एव,
ज, केदाराख्य
"का" को अर्पण,

अध्यायः १.

श्रीगणेशाय नमः ॥ श्रीसूर्याय नमः ॥

मोहान्धकारमग्नानां जनानां ज्ञानरश्मिभिः । कृतमुद्धरणं येन तं नौमि शिवभास्करम् ॥ १ ॥
अरुणः परमं ज्ञानं जिज्ञासुर्वेदलोचनम् । ज्यौतिषं वेद्यमव्यं च गुह्यमध्यात्मसंज्ञकम् ॥ २ ॥
नृणां कर्मविपाकं च मानुष्ये दुर्लभं परम् । धर्माधर्मं च यत्किंचिद्यत्र सर्वं प्रतिष्ठितम् ॥ ३ ॥
आराधयत्रविं रौद्रं तपस्तेपे सुदुस्तरम् । प्रीतो वरार्थिने तस्मै प्रोवाच भगवान्रविः ॥ ४ ॥
यत्तेऽभिलषितं सूत तत्त्वं सर्वमवाप्स्यसि । नृणां कर्मविपाकं च गुह्याद्गुह्यतमं परम् ॥ ५ ॥
गोपितं सर्वशास्त्रेषु प्रत्यक्षं सत्यप्रत्ययम् । आश्चर्यं नास्तिके लोके त्रिकालाश्रयमद्भुतम् ॥ ६ ॥
चक्षूरूपं च जन्तूनां कर्मपाशनिकृन्तनम् ॥ कर्मणा जायते जन्तुः कर्मणैव विलीयते ॥ ७ ॥
कर्मणा नरकं सूत स्वर्गं याति च कर्मणा । देवत्वमाप्नुयाज्जीवो राक्षसत्वं च कर्मणा ॥ ८ ॥
कर्मणा बन्धमायाति मोक्षमायाति कर्मणा । कर्मणा पतनोच्छ्रायौ नृणां जन्मनिजन्मनि ॥ ९ ॥
सुखं दुःखं च यत्किंचित्सर्वं कर्माश्रितं यतः । त्रिविधं संचितारब्धक्रियमाणमिति ध्रुवम् ॥ १० ॥
स्वकर्मजं फलं सूत कायवाङ्मनसोत्थितम् ॥ तन्नद्धा जन्तवो दैवान्नित्यं स्थानाश्रमान्तरे ॥ ११ ॥
नीयन्तेऽत्र यथा दुर्गाद्वनाल्लोके वनेचराः । प्रारब्धकर्मणां सूत भोगादेव क्षयो भवेत् ॥ १२ ॥
संचितक्रियमाणानां प्रायश्चित्तैस्तथैव च । कर्मणा कर्मणच्छेद इति वेदविदो विदुः ॥ १३ ॥
आयसेन यथा यत्नादायसस्य निकृन्तनम् । अतीन्द्रियं कर्मफलं गहनं व्यश्नयत्यलम् ॥ १४ ॥
शास्त्रमेतद्यथा दीपो द्रव्याणि तमसि स्थितः । धर्मशास्त्रे च यत्प्रोक्तं प्रायश्चित्तं मनीषिभिः ॥ १५ ॥
तत्सामान्यादवेह्यत्र विशेषात्पुनराभवे । किं पापं कैः कृतं कस्य साहाय्यात्तस्य किं फलम् ॥ १६ ॥
प्रारब्धाद्यं मया सार्धं फलस्यापि व्यवस्थितिः । सर्वसंकरसंचैतान् विशेषात्प्राग्भवं शृणु ॥ १७ ॥
यमो वैवस्वतः सूत साक्षाद्धर्मः सनातनः । आनन्त्याज्जीवधर्मेषु पुण्यपापेषु शङ्कितः ॥ १८ ॥
किं कर्तव्यमिति भ्रान्तः पृष्टवान्मां पुराऽनघ । प्रीतोहं प्रददौ तस्मै धर्माधर्मविनिर्णयम् ॥ १९ ॥
यमाय शास्त्रमेवैतद्यमः शुक्राय धीमते । शुक्रः प्राप्य सुरारिभ्यः सर्वान् कामानवाप्तवान् ॥ २० ॥
तथेन्द्रो वालखिल्येभ्यः क्रीडितोऽभूद्यदाण्डज । पप्रच्छ मां तदा जीवः शक्रस्यानन्दनवर्धनः ॥ २१ ॥
ततो ददावहं तस्मै शास्त्रं देवोपकारकम् । प्राप्येदं गुरुतां प्राप्तो जीवो यस्माद्दिवौकसाम् ॥ २२ ॥
गुरुवादाभिसंतप्तो याज्ञवल्क्यस्तथा मुनिः । मत्तः सर्वमिदं प्राप्य योगीशत्वमुपागतः ॥ २३ ॥
एवमाद्यैरधीत्यैनमपि सर्वे द्विजोत्तमाः । गन्धर्वसिद्धनागाद्यास्तत्त्वतोऽध्यापितास्तथा ॥ २४ ॥
श्रुतिस्मृतिपुराणाङ्गक्रियाद्युक्तफलानि वै । श्रवणोत्थानि चान्यानि भविष्यन्ति कलौ युगे ॥ २५ ॥
नैतच्चाल्पफलं सूत जीवजातिस्मरं यतः । जातिस्मृतिं कलावेवेत्युक्तं नान्यन्मनीषिभिः ॥ २६ ॥

पूर्वे सूर्यादिभक्तानां धर्मशास्त्रानुवर्तिनाम् । वेदाभ्यासाद्युक्तपुण्याज्जातिस्मृतिवतां नृणाम् ॥ २७ ॥
अत्र जन्मपरिज्ञानमन्येषां भ्रान्तिरेव च । शैशवे यूनि वार्द्धक्ये यत्र पुण्यबलादिह ॥ २८ ॥
लक्षितो लक्षणैश्चोक्तैर्जीवस्तत्रैव पृच्छति । कम्पन्ति त्रिविधाः पापाः पूर्वजन्मसमर्जिताः ॥२९॥
धर्माः समुदयन्त्यत्र श्रुते सूर्यारुणेऽण्डज । यः शृणोति नरश्चास्मिन् स्वाध्यायं विधिनाण्डज॥३०॥
सोऽत्र जन्मजपापेभ्यो मुच्यते नात्र संशयः । श्रुत्वैनं पुस्तकं यः प्राक् प्रायश्चित्तं समाचरेत्॥३१॥
तस्य सर्वाणि कार्याणि प्रसिद्ध्यन्ति ममाज्ञया । पुत्रार्थी लभते पुत्रं दारार्थी लभते स्त्रियम्॥३२॥
राज्यभ्रष्टो लभेद्राज्यं क्षीणायुर्ध्रियते न च । मुच्यतेऽत्र महारोगी कुष्ठादिभ्यः प्रपीडितः ॥३३॥
प्रायश्चित्ते कृते सूत यथोक्तेऽत्रैव जन्मनि । यथोक्तपापोपशमात्सर्वान् कामानिहाप्नुयात् ॥३४॥
मध्यान्मध्यफलं सूत कनिष्ठात्पापशोधनम् । सर्वस्वं च महापापे तदर्धमुपपातके ॥ ३५ ॥
तूर्यांशं सर्ववित्तस्य पातके पापशोधनम् । द्रव्याशुद्धौ महाभाग विधिपात्रविवर्जिते ॥ ३६ ॥
कृत्स्नं फलं तदाप्नोति द्विघ्नं त्रिघ्नं नियोजयेत् । (अकृतेऽत्र यथाशक्त्या प्रायश्चित्तं करोति यत्)॥३७॥
काम्यं कर्म च तत्सर्वं भस्मीभवति दारुवत् । तस्मात्पूर्वं प्रयत्नेन कुर्यात्पापविशोधनम् ॥ ३८ ॥
पापनाशे तथा जाते पश्चात्काम्यं प्रसिद्ध्यति । प्रायश्चित्तं तु यः कुर्याद्द्विघ्नं त्रिघ्नं चतुर्गुणम् ॥३९॥
सोऽचिरेणैव कालेन सर्वान् कामानिहाप्नुयात् । श्रुतेऽपि पापबाहुल्यादवस्थान्तरभेदतः ॥ ४० ॥
कार्यसिद्धिर्न चेदत्र शृणुयाद्विधिवत्पुनः । वारत्रयं महाभाग प्रायः पापविशोधनात् ॥ ४१ ॥
कार्यसिद्धिरवश्यं स्यादिति मे परमं वचः । तत्ते सर्वं प्रवक्ष्यामि पूर्वपापविशोधनम् ॥ ४२ ॥
नातः परतरं तज्ज्ञैः प्रायश्चित्तमुदाहृतम् । नैवं शृणोति यो मोहादाधिव्याधिप्रपीडितः ॥ ४३ ॥
तमेवेहि महापापैराक्रान्तं दैवघातितम् । न यस्य कस्यचिद्देयं ज्ञानं क्षुद्रे च दुर्जने ॥ ४४ ॥
हीनसत्त्वे दुराचारे दद्याच्चेन्निष्फलं भवेत् । पाखण्डरिक्तधूर्तेषु[1] यः श्रावयति मूढधीः ॥ ४५ ॥
स याति नरकं घोरं यः शृणोत्येवमेव वा । न चास्यालोकनं कार्यमकार्ये विनतासुत ॥ ४६ ॥
अकार्ये दृष्टवान् सूत प्रायश्चित्ती भवेत्ततः । सूर्यारुणोक्तं विख्यातं त्रिषु लोकेषु चाद्भुतम् ॥ ४७॥
अध्यायैः शतसाहस्रैर्युक्तं स्वर्गे प्रतिष्ठितम् । प्रमाणमस्य ग्रन्थस्य चतुर्लक्षं चतुर्गुणम् ॥ ४८ ॥
लक्षमेकं तु मानुष्ये जीवावर्ते मयोदितम् । तस्मिन् पुण्यकृतां जन्म लक्ष्यं पापात्मनामपि॥४९॥
तत्राष्टादशसाहस्रं होराशास्त्रमनुत्तमम् । गर्भाधानादिदेहान्तं शुभाशुभनिरूपणम् ॥ ५० ॥
पञ्चविंशतिसाहस्रं स्वर्गारोहणसंज्ञकम् । जातिस्मरं तु लक्षार्धं जीवानामण्डजोत्तम ॥ ५१ ॥
गुह्यं कर्मविपाकाख्यं वक्ष्येऽहं शृणु तत्त्वतः । पुरा कृतयुगस्यान्ते मयो नाम महासुरः ॥ ५२ ॥
भक्त्या पप्रच्छ प्राज्ञो मां त्रिस्कन्धं गणिताभिधम् । सहस्रप्रमितं सर्वं द्विधा गणितसंयुतम् ॥५३॥
तस्मै ददावहं प्रीत्या चैतत्स्कन्धत्रयं सुत । विदित्वा ह्यादिपुरुषात्स्वर्णगर्भः सनातनः ॥ ५४ ॥
ज्योतिःशास्त्रं समग्रं मां प्रादान्मय्येव संस्थितः । ब्रह्मणे चाप्यहं[2] वेधा ऋषिभ्योऽर्थिभ्य एव च॥५५॥
सूर्यः पितामहो व्यासो वशिष्ठोऽत्रिः पराशरः । च्यवनो जमदग्निश्च भृगुर्गर्गोऽङ्गिरा मुनिः ॥५६॥
शातातपो मनुर्दक्षः कश्यपो नारदस्तथा । यवनो भागुरिश्चैव भारद्वाजो यतस्त्वमी ॥ ५७ ॥
ऋषयोऽन्येपि कालज्ञा ज्योतिःशास्त्रप्रवर्तकाः । न तिथिर्न च नक्षत्रं न वारः करणं तथा ॥५८॥
आपेक्षितं क्वचित्सूत यदार्तः परिपृच्छति । न चेज्यो मृगसिंहस्थो वृद्धो बालस्तथास्तगः ॥ ५९ ॥
शुक्रो वाप्यतिचारस्थो मलमासोप्यदोषदः । तथैव पापोपशमे देशं कालं न चिन्तयेत् ॥ ६० ॥
रात्रौ निमन्त्रणं कुर्यात्पुस्तकं सूर्यदैवतम् । रजन्यां त्वत्कृते[4] तस्मिन् दिवा कुर्यात्तथोक्तवान्॥६१॥

---

१ नास्ति—खपु०। २ ण्डारक्त—खपु०। ३ ब्रह्मणो चाऽप्यहं वेदान्—इति खपु०। ४ तत्कृते—खपु०।

गन्धपुष्पाक्षतफलैर्नैवेद्यैर्विविधैस्ततः । दीपैर्विचित्रैर्विधिना धूपैर्नानाविधैस्तथा ॥ ६२ ॥
ॐ सूर्यारुणाभ्यामिति नमोऽन्तेन प्रपूजयेत् । वेष्टयेच्छुभवस्त्रेण रुक्मं तत्र निधापयेत् ॥ ६३ ॥
दैवज्ञं पूजयेत्पश्चाद्गन्धपुष्पफलाक्षतैः । वस्त्रयुग्माङ्गुलीयाद्यैर्भूषणैर्विविधैः शुभैः ॥ ६४ ॥
पश्चात्प्रदापयेन्मन्त्रमाचार्यः पृच्छकाय वै ।
ॐ नमः सूर्याय मम कर्म प्रकाशय प्रकाशय सत्यं ब्रूहि ब्रूहि स्वाहा ॥
स्त्रीशूद्रौ पृच्छकं सूत त्विदं मन्त्रमुदीरयेत् ॥ ६५ ॥
सर्वसाक्षिन् नमस्तुभ्यं जगदानन्दवर्धन । विश्वरूप त्रिलोकेश भगवन्भुष्णदीधिते ॥ ६६ ॥
विभुस्त्वं पुण्यपापानां सर्वं कर्म प्रकाशय । साक्षी त्वं सर्वभूतानां धर्माधर्मानुवर्तिनाम् ॥ ६७ ॥
एवं निमन्त्र्य विधिना परेह्नि खगेश्वर । दैवज्ञमन्दिरं प्राप्य निजं कार्यं निवेदयेत् ॥ ६८ ॥
तद्दिने प्रातरुत्थाय स्नात्वा प्रयतमानसः । फलाक्षततिलैः पुष्पैर्दधिदूर्वाकुरैः शुभैः ॥ ६९ ॥
रक्तचन्दनरेभिः सूर्यायार्घ्यं प्रदापयेत् । तल्लिंगमन्त्रैर्विधिवन्नमस्कृत्य च भास्करम् ॥ ७० ॥
देयं पापघटं तत्र घृतपूर्णं सदक्षिणम् । आहूय मनसा कुम्भे पातकान् पूर्वजन्मजान् ॥ ७१ ॥
स्थापयेच्च गणेशादीन् कलशं चैव पूरयेत् । पात्रं ताम्रमयं श्रेष्ठं पलैः शतमितैः शुभम् ॥ ७२ ॥
तस्यार्धं च तदर्धं वा शक्त्या वार्धं प्रकल्पयेत् । वेष्टयेत् पट्टवस्त्रेण कुशवारिसमन्वितम् ॥ ७३ ॥
अर्चयेद्गन्धपुष्पाद्यैर्मन्त्रैश्चापि विशेषतः । रवेस्तु प्रतिमा कार्या पलेनार्धपलेन वा ॥ ७४ ॥
सार्धपञ्चाद्दशभिर्वापि तदर्धार्धेन वा पुनः । हिरण्मयी यथाकारा लेख्या पद्मोपमापि वा ॥ ७५ ॥
पूजनीया च विधिवदुपचारैश्च षोडशैः । अष्टोत्तरेण मन्त्रेण स्थाप्या वै कलशोपरि ॥ ७६ ॥

मन्त्रः–ॐ नमो नारायणाय।

तदग्रे वाचयेद्यत्नात्पुस्तकं सूर्यदैवतम् । वाचकाय प्रदेया सा श्रवणान्ते विधानतः ॥ ७७ ॥
गां दद्याद्विधिवत्तस्मै वस्त्राण्याभरणानि च । भूशय्याश्चासनादीनि शक्त्या च प्रतिपादयेत् ॥७८॥
अत्र जन्मजपापेभ्यो मुक्तः स्यान्नात्र संशयः । श्रुत्वानेन विधानेन विधिज्ञं तं विसर्जयेत् ॥७९॥
अत्र चावाहयेद्विद्वान् वेदशास्त्रसमन्वितान् । दैवज्ञांश्चार्चयेद्द्रव्यैर्विविधैर्भोजनैः शुभैः ॥ ८० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके शास्त्रोपासनाध्यायः प्रथमः ॥ १ ॥

अरुण उवाच ।

भगवन् गणितं सर्वं शास्त्रस्यास्य विधानतः । जानास्यत्र कथं ब्रूहि प्राग्जन्तुर्भवनं तथा ॥ १ ॥

श्रीसूर्य उवाच ।

शृणु सूत प्रवक्ष्यामि गणितं प्राणिनामिह । पूर्वजन्मोद्भवानां च मनुजानां परिस्फुटम् ॥ २ ॥
स्वर्मोक्षनरकस्थानां तिर्यक्स्थानां परत्र च । नादेयं चातिभक्तानां जातिस्मृतिमहात्मनाम् ॥३॥

गणितम्–

फलाक्षराणि विन्यस्य तथा नामाक्षराणि च । योजयेच्छतमध्याङ्के क्षेपान् व्याध्याधिजांस्तथा ४
लग्नं तात्कालिकं योज्यं पङ्क्तिरेषा स्फुटा भवेत्।सा द्विधा विभजेदेनां नागत्र्योमेन्दु१०८भिस्ततः॥५॥

१–२ नास्ति–खपु०। ३ पृच्छकौ–खपु०।४ दैवज्ञं गृहमाह्वय–इति पाठान्तरम्–खपु०।५ अष्टाक्षरेण इति–खपु०। ६ वाचयेद्भक्त्या-खपु०। ७ "प्रश्ने द्वितीये पूर्वोक्तं श्रावयित्वा यथाविधि । तृतीये पूर्वकथितं द्वयं चोक्त्वा वदेन्नवम्" इत्यधिकं मध्ये–खपु० ।

लब्धं नियोजयेत्पङ्क्तौ शेषोऽर्को बीजसंस्कृतः । द्विस्था वेदगुणा भक्त्या ह्यष्टोत्तरशतेन सः ॥ ६
लब्धान्विता पुनः शेषे चन्द्रो ज्ञेयो मनीषिभिः । द्विस्था साष्टखचन्द्रैः१०८सा लब्धा युक्तावशेषके
भौमो ज्ञेयस्तु तत्काले स्फुटो बीजान्वितः सदा।पङ्क्तिर्द्विधा द्विगुणिता गजपूर्णेन्दु१०८भाजिता
लब्धेन सा पुनर्योज्या शेषे तद्वद् बुधः स्फुटः।श्रेण्यधः स्थापनीया तु साङ्गाष्टाभ्रनिशाकरैः१०८॥९
लब्धान्विता ततः शेषे गुरुर्बीजेन संयुतः । द्विधा खेन्दुहता श्रेणी रसोनाष्टाधिकेन तु ॥ १०
शतेनाप्तयुता शेषे शुक्रो बीजान्वितोनितः। द्विस्था पङ्क्तिः शरैर्निघ्ना विहता साष्टखेन्दुभिः॥११
लब्धान्वितावशेषे तु शनिर्बीजान्वितः स्फुटः । सा द्विधा सप्तगुणिता गजपूर्णेन्दुभाजिता ॥ १२
लब्धान्विता पुनर्भक्ता तैरेव विहगेश्वर । स्वबीजसंस्कृतौ शेषौ राहुकेतू स्फुटौ स्मृतौ ॥ १३
राशेर्नवांशकाद्वापि बीजान्युक्तानि तद्बलात् । नवांशकानां संख्याङ्कमष्टोत्तरशतं त्विह ॥ १४।
विचार्य स्वमृणं कृत्वा साधयेत् खेचरान् स्फुटान्।सूर्यादेशस्य विज्ञानं चन्द्राज्जातेस्तथैव च ॥१५।
भौमाच्च वयसो ज्ञानं बुधात्स्त्रीपुंनपुंसकम् । जीवात्सहाया विज्ञेयाः शुक्रात्प्राग्धर्मनिर्णयः ॥ १६।
मन्दादायुस्त्वगोः पापं केतोरिष्टं च सूचितम् । ग्रहशेषैक्यमर्काढ्यं चन्द्रहीनं कुजान्वितम् ॥१७।
बुधघ्नं गुरुशुक्राभ्यां युक्तं मन्दोनितं तथा । दशघ्नं चन्द्रसंयुक्तं पूर्णनैर्हृतं सुत ॥ १८।
तत्त्वाब्धेयं कादिघ्नं स्वबीजोनयुतं च यत् । अध्याये तन्मिते वत्स दैवज्ञो हि प्रकाशयेत् ॥ १९ ॥
स्नानं दानं जपं होमं स्वाध्यायं देवतार्चनम् । गोविप्रगुरुवृद्धानामतिथीनां च पूजनम् ॥ २० ॥
मयाश्राद्धं व्रतं चैव पुण्यतीर्थाधिवासनम् । पापघ्नं सर्वमित्याद्यं स्वाध्यायोक्तं य आचरेत् ॥ २१॥
तत्कार्यं तस्य जीवस्य सर्वं सिध्यति नान्यथा ।
सूर्यारुणोक्तमिति यः शृणुयान्मनुष्यः स्वाध्यायजं निखिलमत्र पुराभवोत्थम् ।
सर्वश्रुताध्ययनजन्यफलान्यवाप्य सक्रीडयत्यमरवत्तिमिरारिलोके ॥ २२ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके गणिताध्यायो द्वितीयः ॥ २ ॥

श्रीसूर्य उवाच ।

वर्णस्वरांकान् क्षेपांकानाधिव्याधिस्वरूपजान् । वक्ष्येऽहं मन्त्ररूपांस्तान् सर्वं तेरेव सिद्ध्यति ॥१।
कराश्विवाणाष्टनवाष्टदस्रा रामाब्धिचन्द्राद्रिरसाः स्वरांकाः ।
नगांगपातालकुदस्रदस्रा वाणाष्टपञ्चांकदगग्निवेदाः ॥ २ ॥
कुसप्ततर्का नगतर्कवेदाः कुनन्ददस्रा शरनागवाणाः ।
अष्टाश्विरामाब्धिकुपर्वताश्च वर्णांकसंख्या क्रमशश्च कार्या ॥ ३ ॥

अथ व्याध्याधिक्षेपकाः ।

श्रीसूर्य उवाच ।

प्रष्टुरुक्तिसमा योज्या क्षेपा व्याध्याधिजाः सुतः।प्रश्ने द्वित्रिचतुर्थोक्ते योज्याः क्षेपाश्च तन्मिताः॥४।
क्रमशो वक्ष्यमाणाश्च नामसंकीर्तनादिह । आयुर्भये राजयक्ष्मकासश्वासभगंदराः ॥ ५ ।
शूलशोफव्रणं गण्डमालाछर्द्यर्शसंज्ञकाः । क्षेपास्तेषां मया प्रोक्ताः शृणु पुत्र प्रयत्नतः ॥ ६ ।
विंशोत्तरं शतं पञ्च वेदविश्वसुरैर्मिताः । नवाष्टमनुदिग्रुद्रादित्याश्च क्षेपका मताः ॥ ७ ।
ततः पाण्डुरपस्मारपित्तवातकफाभिधाः । मन्दाग्न्यजीर्णप्रदराः काश्यमेहाश्मरीयुताः ॥ ८ ।
क्षेपा भूपेन्द्रतिथयश्चतुराशीतिसंमिताः । जिनधृतिकृतित्रिंशदशघ्नाः पञ्चदिक्स्वराः ॥ ९ ।

१ राहु—खपु० । २ मतः—खपु० । ३ ङ्कांश्चाधि—खपु० ।

पुनर्विसर्पिग्रहणीकृच्छ्रवल्मीकसंज्ञकाः । शिरोमुखनसाक्षुःकर्णकण्ठभुजांघ्रिजाः ॥ १० ॥
तत्क्षेपकाश्चाष्टमिता द्व्याद्यैर्विंशान्तकैर्हताः । वातरक्तोदरव्याध्योः क्षेपकौ नवदिङ्मितौ ॥ ११ ॥
गुदलिङ्गरुजोरत्र क्षेपकाः षष्टिसंमिताः । दुस्त्वग्दुश्चर्मदद्रूणां क्षेपः षड्द्व्यष्टषड्गुणः ॥ १२ ॥
सर्वकुष्ठे महाभाग क्षेपास्त्वष्टादश स्मृताः । सर्वाङ्गरोगजश्चात्र षडष्टमितिसंगुणः ॥ १३ ॥
तदर्धोन्मादजः सूत तस्यार्धः सर्वदुःखजः । भूतावेशादिकस्त्रिघ्नः स एव क्षेपकः स्मृतः ॥ १४ ॥
कार्यसिद्धेस्तथा पञ्चैकादशघ्नः प्रकीर्तितः । एकादशमितैर्निघ्नास्त्वेकादशमिताः सुत ॥ १५ ॥
महत्पदाप्त्यै क्षेपोऽयं पूर्वपुण्यैः प्रसिद्ध्यति । एकादशमिता द्विघ्ना लक्ष्मीक्षेपस्तथैव च ॥ १६ ॥
स त्रिघ्नः पक्षिशार्दूल क्षेपः सर्वसुखावहः । तथा नवगुणाः पञ्च क्षेपाः पुत्रसुखार्थकाः ॥ १७ ॥
एवं सप्तगुणाः सप्त स्त्रीसुखक्षेपकाः स्मृताः । सप्ताष्टगुणितक्षेपो विचारे भर्तृजेऽण्डज ॥ १८ ॥
स्त्रीदोषानप्यहं वक्ष्ये विशेषाद्गरुडाग्रज । अपुष्पसंभवा वन्ध्या गर्भरक्तस्रवा तथा ॥ १९ ॥
कन्यासूर्मृतवत्सा च वंध्या त्वेकसुता तथा । बालवत्सा मृतोत्पन्ना सप्तदोषैरपुत्रिणी ॥ २० ॥
दोषक्षेपाः क्रमात्पंच हतास्त्वेकादिसप्तकैः । एषा ते कथिता सूत क्षेपकोत्पत्तिरुत्तमा ॥ २१ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाके क्षेपकाध्यायस्तृतीयः ॥ ३ ॥

अरुण उवाच ।

जन्मदेशपरिज्ञानं प्राग्भवे त्वत्र जन्मनि । तदाचक्ष्व त्रिलोकेश कथं सूर्यस्फुटात्स्फुटम् ॥ १ ॥

श्रीसूर्य उवाच ।

किराता यस्य पूर्वेऽन्त्ये पश्चिमे यवनाः स्मृताः । उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ॥ २ ॥
वर्षं तद्भारतं नाम कर्मक्षेत्रं भुवि स्थितम् । शुभाशुभानि कर्माणि तस्मिन् बीजानि चाण्डज ॥ ३ ॥
सुखस्वर्गापवर्गाणां प्राप्तिः पुण्यफलं स्मृतम् । तिर्यङ्नरकदुःखानां भोगः पापफलं तथा ॥ ४ ॥
पूर्वादिदिक्क्रमादैन्द्रं ताम्रपर्णं गभस्तिमान् । वारुणं खण्डकं तस्मिन् गान्धर्वमथ नागकम् ॥ ५ ॥
सौम्यं कशेरुखण्डं स्यादेषु सर्वेऽन्त्यजाः स्थिताः । मध्ये कुमारिकाखण्डमत्र वर्णव्यवस्थितिः ॥ ६ ॥
जातिस्मराणां सततं प्रसूतिरिह जायते । पूर्वपुण्यवशेनैव कदाचिद्गरुडाग्रज ॥ ७ ॥
एतत्ते सर्वमाख्यातं कर्मक्षेत्रं हि भारतम् । प्रागत्र क्व स्थितिश्चास्मिञ्जन्तूनामन्यथोच्यते ॥ ८ ॥

---

१ "त्वेकादिजा तथा" इति स्वसंज्ञकपुस्तकस्थपाठः। २ अत्रेदं स्पष्टम्—आयुः १२०, भय ५, राजयक्ष्म ४, कासश्वास १३, भगन्दर ३३, शूल ९, शोफ ८, व्रण १४, छर्दि ११, अर्शः १२, पाण्डु १६, अपस्मार १४, पित्त १५, वात ८४, कफ ४, मंदाग्नि १८, अजीर्ण २०, प्रदर ३०, कार्श्य ५०, प्रमेह १००, अश्मरी ७०, विसर्प १६, संग्रहिणी २४, मूत्रकृच्छ्र ३२, वाल्मीक ४०, आस्यपाकतालुव्रणजिह्वास्तम्भजिह्वाव्रणदन्तरोगस्खलद्वाणीत्वादिसंग्रहः । क्षेपक एकविध एव । नासारोग ६४, नेत्ररोग ७२, कर्णरोग ८०, कण्ठरोग ८८, भुजस्तम्भ ९६, पादरोग १०४, वातरक्त २५, उदररोग १०, गुदलिङ्गरोग ६०, व्रणरोग ३६, दुश्चर्म १२, दद्रुरोग ४८, सर्वकुष्ठ १८, सर्वांगरोग ४८, उन्माद २४, सर्वदुःखभव १२, भूतावेशादि ३६, कार्यसिद्धि ५५, महत्पदाप्ति १२१, लक्ष्मीसुख १२२, सर्वसुख ६६, पुत्रसुख ४५, स्त्रीसुख ४२, भर्तृसुखादिविचारक्षेपः ५६, अपुष्पसंभवक्षेपः ५, वन्ध्या १०, गर्भरक्तस्राव १५, कन्याप्रसूति २०, मृतवत्सा २५, एकादिवन्ध्या ३०, बालवत्समृतोत्पन्नादिः ३५, इति रोगसमक्षेपाः । कार्यसमक्षेपाश्च द्वित्रिप्रभृतन्मितक्षेपाः ।

मानुषीं तनुमाश्रित्य यस्मिन् देशेऽजनि स्वयम् । जीवोऽयं प्राग्भवे त्वत्र नानाकर्मफलैर्वृतः ॥९
तद्देशजन्मकर्मादिव्यवस्था क्रमतो भृशम् । सूर्यादिभ्यो मया प्रोक्ता विनतानन्दवर्धन ॥ १०
सूर्याभिधे तु प्रथमे रवौ हि गरुडाग्रज । प्राग्भवेऽयं प्रयागेऽभूत्काश्यां जातोऽत्र जन्मनि ॥११
अर्यमाख्ये द्वितीये तु देशे पञ्चनदेऽजनि । स्वयं प्राक्संभवे सूत मथुरायां तु सांप्रतम् ॥ १२ ।
तृतीये तु भवे नाम्नि पूर्वजन्मन्यभूत्सुत । प्रादुर्भूतस्त्वयोध्यायां कामरूपेऽत्र जन्मनि ॥ १३ ।
हस्तिबन्धे पुरा जातो ह्यभवत्त्वाष्ट्रसंज्ञके । कोशलाख्येऽत्र जनुषि प्रादुर्भूतश्चतुर्थके ॥ १४ ।
स्वयं प्राङ् मिथिलाजातो जातश्चात्र भवेऽण्डज । वनवासाभिधे देशे पञ्चमे पूषसंज्ञके ॥ १५ ।
षष्ठेऽर्कसंज्ञके ह्यासीत्प्राग्भवे जनितस्त्वसौ । भूचक्रदेशेऽत्र भवे सार्णवेऽवन्तिके तथा ॥ १६ ।
किरातदेशे प्रागासीत्सवितर्यत्र जन्मनि । प्रादुर्भूतो विदर्भेऽसौ सप्तसंख्ये च पुत्रक ॥ १७ ।
पूर्वेऽजनि स्वयं जन्तुर्देशे खेटपुराभिधे । जन्मन्यत्राष्टमे जातः सिंहले रविसंज्ञके ॥ १८ ॥
गभस्तिहस्तेर्नवमे मलयाचलमाश्रिते । देशे जातः पुरा सूत कान्यकुब्जेऽत्र जन्मनि ॥ १९ ।
ताप्याश्रिते महादेशे प्रागभूदत्र जन्मनि । गौडे जातोंऽजसंज्ञे दशसंख्ये खगेश्वर ॥ २० ॥
कालाख्ये प्राग्भवे सूत स्वेकादशमिते ह्यसौ । प्रकाशसंज्ञके देशे मागधे चात्र जन्मनि ॥ २१ ॥
मृत्युनाम्न्यभवत्पूर्वे भवे द्वादशसंज्ञके । वङ्गदेशेऽत्र जनुषि कौङ्कणे गुर्जरे तथा ॥ २२ ॥
नासिकाख्ये महादेशे पुरासीद्धात्रिसंज्ञके । प्रादुर्भूतस्त्वसौ देशे मालवाख्ये त्रयोदशे ॥ २३ ॥
अथो प्रभाकरे नाम्नि चतुर्दशमितेऽण्डज । स्त्रीराज्ये प्रागसौ जातश्चोडिपाणाभिधेऽधुना ॥ २४ ॥
ततः पञ्चदशे सूत पृथिव्याख्ये पुराभवे । पुलिन्दसंज्ञके जात इदानीं यमुनाश्रिते ॥ २५ ॥
प्राङ् मद्रदेशे ह्यभवज्जातो लाटाभिधे त्वसौ । जनुरत्र भवे चाप्सुसंज्ञके षोडशेऽण्डज ॥ २६ ॥
ततस्तेजसि संज्ञे प्रागभूत्सप्तदशे सुत । पाण्डुदेशेऽथ कामाख्ये चात्र ब्रह्मर्षिसंज्ञके ॥ २७ ॥
नेपालसंज्ञके सूत सोऽयमत्रैव जन्मनि । ऊनविंशन्मिते वत्स वाय्वाख्ये पूर्वसंभवे ॥ २८ ।
खेनाम्न्यष्टादशे जातो जलदेशे पुराभवे । जातः सिंहलसंज्ञेऽसाविदानीं खससंज्ञके ॥ २९ ।
परायणाभिधे विंशन्मिते प्राग्गरुडाग्रज । संभूतो भृगुदेशे तु किष्किन्धायामिहाण्डज ॥ ३० ।
ततः सोमाख्यकेष्वेकविंशत्संख्येऽजनि स्वयम् । श्रीकण्ठेऽत्र भवे देशे गज्जने वामराटके ॥ ३१ ।
द्वाविंशन्मितके जातः प्राक्पारेताभिधेऽधुना । युगंधरेऽथ वा देशे कट्यसंज्ञे बृहस्पतौ ॥ ३२ ।
शुक्राख्ये प्राक् त्रयोविंशन्मिते जन्माभवत्सुत । देशे भोजाभिधे गङ्गाश्रितेऽत्र जनुषि ध्रुवम् ॥३३।
केरलाख्ये पुरा देशे प्रादुर्भूतोऽत्र जन्मनि । स्त्रीराज्ये बुधसंज्ञे तु चतुर्विंशन्मितेऽण्डज ॥ ३४ ।
प्रागासीन्मलये सूत नाशिके चात्र जन्मनि । पञ्चविंशन्मिते जन्तुरंगारे विनतात्मज ॥ ३५ ।
षड्विंशन्मितके त्विन्द्रनाम्नि जातः पुराभवे । करहाटाभिधे देशे जन्मन्यत्र च पर्वते ॥ ३६ ।
कुन्तलाख्ये महाभाग प्रादुर्भूतो भवत्यसौ । रेवातटेऽत्र जनुषि सप्तविंशे विवस्वति ॥ ३७
अष्टाविंशन्मिते जातो देशेऽसौ बर्बरे पुरा । चिरेन्द्र्यामत्र जनुषि जीवोऽसौ कश्यपात्मज ॥ ३८
पाञ्चाले प्राग्भवे जीवः सूतश्चात्र भवेऽण्डज । वङ्गसंज्ञे महादेशे ऊनत्रिंशन्मिते शुचौ ॥ ३९
त्रिंशन्मिते सौरिसंज्ञे ह्यासीत्पूर्वभवे सुत । संभूतः पाण्डुदेशेऽसौ सौराष्ट्रे चात्र जन्मनि ॥४०
एकत्रिंशन्मिते जन्माभवद्देशे किरातजे । शनैश्चरेत्र जनुषि सिद्धपीठे खगाधिप ॥ ४१

१ शक्राख्ये—खपु० । २ तटे—खपु० । ३ त्रिवेण्याम्—खपु० । ४ किरातने—खपु० ।

द्वात्रिंशन्मितके जातः पूर्वजन्मनि गुर्जरे। ब्रह्मसंज्ञेऽत्र जन्वपि देशे सारस्वते ह्यसौ ॥ ४२ ॥
त्रित्रिंशन्मितके विष्णौ मालवे पूर्वजन्मनि। संभूतः सांप्रतं सूत काश्मीरे जनितः स्वयम् ॥४३॥
नेपालसंज्ञके जातः प्राग्भवे त्वत्र जन्मनि। देशे शतद्रुके रुद्रे चतुस्त्रिंशन्मितेऽण्डज ॥ ४४ ॥
पञ्चत्रिंशन्मिते स्कन्दनाम्नि पूर्वभवे त्वसौ। ततः कर्णाटके देशे प्रयागे सांप्रतं सुत ॥ ४५ ॥
जालंधरे महापीठे जातो वैश्रवणे पुरा। ऐरावतीप्रदेशे तु षट्त्रिंशत्प्रमितेऽधुना ॥ ४६ ॥
यमाख्ये प्राग्भवे सप्तत्रिंशत्संख्ये पुरा सुत। जननं खुरसाणाख्ये देशे मत्स्याभिधेऽधुना ॥ ४७ ॥
अष्टत्रिंशन्मिते नाम्नि वेद्रुते जनितस्त्वसौ। प्राग्भवे त्वङ्गदेशेऽभूदत्र पञ्चनदे सुत ॥ ४८ ॥
चत्वारिंशन्मित ऊने कामदेशेऽजनि स्वयम्। प्राग्भवे गुर्जराख्ये तु सांप्रतं जठराभिधे ॥ ४९ ॥
ततोऽग्निसंज्ञके सूत चत्वारिंशन्मिते पुरा। प्रादुर्भूतस्त्वसौ ताप्यामिदानीं जङ्गलाभिधे ॥ ५० ॥
गौडदेशे पुरोत्पन्नस्त्वत्र केदारमण्डले। चत्वारिंशन्मिते क्राढ्ये त्वैन्धनाख्ये खगेश्वर ॥ ५१ ॥
चत्वारिंशन्मिते द्व्याढ्ये तेजसां पितृसंज्ञके। प्राग्जातः सार्णवे भोजे चात्र वेत्रवतीतटे ॥ ५२ ॥
काश्यां पूर्वभवे ह्यासीज्जननं यामुनेऽधुना। चत्वारिंशन्मिते त्र्याढ्ये नाम्नि धर्मध्वजेऽण्डज ॥५३॥
चत्वारिंशच्चतुर्युक्ते वेदकर्भारिसंज्ञके। भूचक्रदेशे प्राग्जातश्चान्तर्वेद्यां तु सांप्रतम् ॥ ५४ ॥
पंचहीनेऽथ पंचाशन्मिते वेदाङ्गसंज्ञके। वल्मीके प्रागसौ सूत पीठे जालंधरेऽधुना ॥ ५५ ॥
चत्वारिंशन्मिते सूत षडयुक्ते वेदवाहने। वंगदेशे पुरोत्पन्नो मरुत्संज्ञेऽत्र जन्मनि ॥ ५६ ॥
पंचाशन्मितके त्र्यूने कृतसंज्ञे पुराभवे। संभूतः कौङ्कणे देशे सांप्रतं हस्तिबंधने ॥ ५७ ॥
प्रादुर्भूतो विदेहेऽसौ देशेऽयोध्याभिधेऽधुना। पंचाशन्मितके द्व्यूने त्रेतासंज्ञे च पुत्रक ॥ ५८ ॥
द्वापरे चोनपंचाशन्मिते प्रारंभवत् खसे। गङ्गायमुनयोर्मध्ये देशे जातस्तु सांप्रतम् ॥ ५९ ॥
आसीत्पूर्वभवे सूत पंचाशन्मितके कलौ। दण्डकारण्यकेऽत्रैव जातोऽसौ सिन्धुमण्डले ॥ ६० ॥
कलाभिदेकपंचाशन्मितकेऽभूत्पुराभवे। स्त्रीराज्यदेशे जनितस्त्वत्रावन्त्यभिधेऽण्डज ॥ ६१ ॥
द्विपंचाशन्मिते जातः सौराष्ट्रे प्राग्भवे ह्यसौ। मिथलायां महाभाग काष्ठाख्ये चात्र जन्मनि ॥ ६२ ॥
प्राङ्मुहूर्तेऽजनि त्र्याढ्ये पंचाशन्मितके गुरौ। सरस्वतीसूर्यपुत्र्योरन्तर्देशेऽत्र जन्मनि ॥ ६३ ॥
चतुराढ्येऽथ पंचाशत्संख्ये प्रागजनि स्वयम्। भोजदेशे क्षपाख्येऽत्र पाण्डुसंज्ञेऽथ कैकये ॥६४॥
यामाख्ये पंचपंचाशत्संख्ये सूत पुराभवे। द्यूपुरेऽत्र भवे जातो देशे त्वैरावतेऽण्डज ॥ ६५ ॥
क्षणाभिधे तु षड्युक्ते पंचाशत्संख्यकेऽभवत्। कुन्तले प्राग्विदेहाख्ये देशे जातोऽधुना सुत ॥६६॥
संवत्सरकरे त्र्यूने षष्टिसंख्ये ह्यभूत् खग। गौडदेशेऽत्र जननं देशे सूकरसंज्ञके ॥ ६७ ॥
अश्वत्थसंज्ञके द्व्यूने षष्टिसंख्येऽजनि स्वयम्। देशे नासिकसंज्ञे प्राङ्मद्रदेशेऽत्र जन्मनि ॥ ६८ ॥
कालचक्रे तथौकूने षष्टिसंख्ये पुराऽजनि। बर्बरे यावने देशे कर्मनाशातटेऽत्र च ॥ ६९ ॥
प्राग्जातष्टंकणे देशे जन्मन्यत्र च बर्बरे। जीवोऽयं चाङ्गदेशे वा षष्टिसंख्ये विभावसौ ॥ ७० ॥
एकषष्टिमिते त्वासीत्पुरुषाख्ये पुराभवे। जनितो गुर्जरे देशे शूरसेनाभिधेऽधुना ॥ ७१ ॥
बभूव केरले देशे प्राग्जनुष्यत्र जन्मनि। पाञ्चाले जननं व्याढ्ये शाश्वते षष्टिसंमिते ॥ ७२ ॥
योगिसंज्ञे त्रियुक्तेऽभूत् षष्टिसंख्ये पुराजनि। गान्धारदेशे संभूतो गयायामत्र जन्मनि ॥ ७३ ॥

---

१ गर्भारिसंज्ञके—खपु०। २ ण्डज—खपु०। ३ खग—खपु०। ४ व्यथाकाले—खपु०।

व्यक्ताव्यक्ते चतुर्युक्ते षष्टिसंख्ये पुराजनि । देशेऽर्बुदे पुनः सिन्धौ जातो मध्याभिधेऽधुना॥७४।
पश्चाढ्ये षष्टिसंख्ये प्राग्जीवोऽयं जनितोऽण्डज । देशे द्रविडसंज्ञे तु द्वारावत्यां तु सांप्रतम् ॥७५।
षड्युक्ते षष्टिसंख्ये तु कालाध्यक्षे पुराऽभवत् । प्रादुर्भूतो गिरौ रम्ये विपाशाख्येऽत्र जन्मनि ॥७६॥
न्यूने सप्ततिसंख्ये प्राक् प्रजाध्यक्षेऽजनि स्वयम् । पाण्डुदेशे पुनः काश्यामार्यावर्तेऽथवाण्डज॥७७॥
अष्टषष्टिमिते जातः प्राग्भवे विश्वकर्मणि । पाञ्चाले त्वान्ध्रदेशे तु कलिङ्गे वात्र जन्मनि ॥७८॥
नवषष्टिमिते ह्यासीत्प्रयागे प्राक्तमोनुदे । ताप्यामत्र भवेज्जन्म दृषद्वत्यामथापि वा ॥ ७९ ॥
अथ सप्ततिसंख्ये प्राग्वरुणे जननं ह्यभूत् । देशे मालवसंज्ञे तु सरयूनिकटेऽधुना ॥ ८० ॥
गंगायां प्राक् सागरांशे कुसप्ततिमितेऽजनि । शतद्रुकसरस्वत्योरन्तरे चात्र जन्मनि ॥ ८१ ॥
द्विसप्ततिमिते ह्यासीज्जामूते जननं पुरा । सौराष्ट्रे केरले त्वत्र काञ्चिकायामथापि वा ॥ ८२ ॥
त्रिसप्ततिमिते जातो जीवने प्राग्भवे त्वसौ । भूचरे चोलदेशे वा चर्मण्वत्यां तु सांप्रतम् ॥ ८३ ॥
चतुःसप्ततिसंख्ये प्रागरिहाख्ये पुराभवत् । कोशले कौरिहाटेऽत्र देशे खेटपरेऽथवा ॥ ८४ ॥
भूताश्रये तु पञ्चोनेऽशीतिसंख्ये पुराऽभवत् । प्रादुर्भूतो जले देशे ब्रह्मावर्तेऽत्र जन्मनि ॥ ८५ ॥
षट्सप्ततिमिते जातः पुरा भूतपतौ सुत । गन्धारदेशे जननं सांप्रतं सिन्धुमण्डले ॥ ८६ ॥
सप्तसप्ततिसंख्ये प्राक् सर्वदेवनमस्कृते । सूत केकयदेशे तु चन्द्रभागाश्रितेऽधुना ॥ ८७ ॥
द्व्यूनेऽशीतिमिते चासीत्स्वष्टाख्ये पूर्वसंभवे । जातो नेपालदेशेऽसौ जन्तुरत्र विराटके ॥ ८८ ॥
नवसप्ततिसंख्ये तु संवर्ते प्रागभूदयम् । जन्तुः पुलिन्ददेशेऽत्र कीरे वा कौशिकीतटे ॥ ८९ ॥
अथाऽशीतिमिते वह्निसंज्ञकेऽभूत्पुरा जनुः । यामुने जनितो देशेऽत्र भवे च हिमाश्रये ॥ ९० ॥
एकशीतिमितिके सर्वस्यादिसंज्ञे पुराभवत् । कीरदेशे समुत्पन्नः कुरुक्षेत्रेऽत्र जन्मनि ॥ ९१ ॥
कालिङ्गे लोलपे जातो द्व्यशीतिमितके पुरा । शतद्रुकविपाशान्ते देशे चात्रैव जन्मनि ॥ ९२॥
ततो मनसिसंज्ञे प्राक् त्र्यशीतिमितकेऽजनि । सिंहलाख्येऽत्र जनुषि देशे ब्रह्मर्षिसंज्ञके॥९३ ॥
सुपर्णाख्ये चतुर्युक्तेऽशीतिसंख्ये पुराभवत् । काश्मीरे कामदेशेऽत्र कावेर्यां जनितोऽथवा ॥ ९४॥
भूताद्रिसंज्ञके जातः पञ्चाशीतिमिते पुरा । देशे पंचालसंज्ञेऽसौ जन्तुर्वैपाशिकेऽधुना ॥ ९५ ॥
षडशीतिमिते त्वासीच्छीघ्रगे जननं पुरा । पुंलिङ्गे गण्डकीतीरे कर्णाटे चात्र जन्मनि ॥ ९६ ॥
न्यूने नवतिसंख्ये प्राक् प्राणाधारेऽजनि स्वयम् । खसदेशे महाभाग द्रविडे सांप्रतं ह्यसौ ॥९७॥
धन्वन्तरौ पुरा जातस्त्वष्टाशीतिमितेऽण्डज । देशे नेपालसंज्ञेऽत्र जाङ्गले कुन्तलेऽथवा ॥ ९८ ॥
नवाशीतिमिते सूत धूमकेतौ पुराभवत् । देशे पुलिन्दसंज्ञे तु पुष्कराश्रितजेऽधुना ॥ ९९ ॥
प्राग्गान्धारेऽजनि त्वादिदेवे नवतिसंमिते । ऐरावतीचन्द्रभागामध्यदेशेऽत्र जन्मनि ॥ १०० ॥
पुरादितिसुते सूत काढ्ये नवतिसंमिते । कान्यकुब्जेऽत्र वाह्लीकदेशे वामरकण्टके ॥ १०१ ॥
द्व्याढ्ये नवतिसंख्ये प्राग् द्वादशात्मन्यभूज्जनुः । आन्ध्रे बर्बरदेशे वा गोदावर्यां तु सांप्रतम् १०२
आन्विते त्वरविन्दाक्षे जातो नवतिसंमिते । प्राक् पर्वते किरातेऽत्र वितस्ताश्रितजेऽथवा ॥ १०३
चतुर्नवतिसंख्ये प्राक् पितृनाम्न्यजनि स्वयम् । केदारे टङ्कणे देशे त्वत्र वा हस्तिनापुरे॥ १०४
पंचोने शतके लाटदेशेऽभून्मातृसंज्ञके । जननं त्वत्र भूचक्रे मायापुर्यामथापि वा ॥ १०५

---

१ पुराण्डज—खपु०।२ जनि स्वयम्—खपु०।३ पारिहाटे—खपु०।४ स्वष्ट्राख्ये—खपु०। ५ जातः—खपु०
६ वैयासके—खपु०। ७ कलिंगे खपु०। ८ वाल्मकि—खपु०।

पैतामहे चतुर्न्यूने शतसंख्ये पुराऽजनि । देशे द्रविडसंज्ञे च गान्धारे वात्र केरले ॥ १०६ ॥
न्यूने शतमिते तस्य स्वर्गद्वारे पुराभवत् । स्वर्गभूमिजन्युर्जात आर्यावर्तेऽत्र जन्मनि ॥ १०७ ॥
प्रजाद्वारे पुरा जातो द्वयूने शतमिते सुत । नासिक्याख्येऽत्र जनुषि कुरुक्षेत्रप्रदेशके ॥ १०८ ॥
क्रूने शतमिते चासीन्मोक्षद्वारे पुराभवे । च्युतोपवर्गाद्[1]धुना मध्यदेशेऽजनि स्वयम् ॥ १०९ ॥
त्रिविष्टपाख्यके सूत शतसंज्ञेऽभवत्पुरा । संभूतः कच्छदेशेऽसौ पुष्कराख्येऽत्र जन्मनि॥ ११० ॥
कुयुक्ते शतसंख्ये प्राग्देहे कर्तरिसंज्ञके । जनितो[4] बर्बरे देशे नैमिषारण्यकेऽधुना ॥ १११ ॥
द्व्याढ्ये शतमिते सूत प्रशान्तात्मनि वै पुरा । देशे मागधसंज्ञेऽभूदत्र गङ्गाश्रिते खग ॥ ११२ ॥
विश्वात्मनि पुरा जातस्त्र्यन्विते शतसंज्ञके । देशे भूचक्रसंज्ञे तु जलाधीशाश्रितेऽधुना ॥ ११३ ॥
चतुर्युक्ते शते पूर्वसंभवे विश्वतोमुखे । रेवातटेऽधुना जातो मध्यदेशेऽथवा खग ॥ ११४ ॥
चराचरात्मन्यभवद्गौडे पञ्चोत्तरे शते । विपाशैरावतीमध्यदेशे जातोऽत्र जन्मनि ॥ ११५ ॥
पञ्चोत्तरशते त्वासीत्सूक्ष्मात्मनि पुराभवे । अङ्गदेशे समुत्पन्नः सांप्रतं यमुनाश्रिते ॥ ११६ ॥
मैत्रेण मलये सूत सप्तोत्तरशते पुरा । चन्द्रभागावितस्तान्ते देशेऽसौ चात्र जन्मनि ॥ ११७ ॥
कुन्तले प्राग्भवे जातः शतद्रुनिकटेऽधुना । अष्टोत्तरशते सूत करुणान्वितसंज्ञके ॥ ११८ ॥
एष ते कथितो वत्स देशभागविनिर्णयः । जातिस्मराणां जन्तूनां भूयः किं परिपृच्छसि ॥११९॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके जन्मदेशनिर्णयाध्यायश्चतुर्थः ॥ ४ ॥

अरुण उवाच ।

चन्द्राज्जातिपरिज्ञानं यत्त्वयोक्तं पुरा विभो । तन्मे ब्रूहि महाभाग श्रोतुमिच्छामि तत्त्वतः ॥ १ ॥

श्रीसूर्य उवाच ।

यस्यां जातौ बभूव प्राक्संभवे चात्र जन्मनि । यस्यां व्यवस्थितः सूत जीवोऽयंते पृथक्पृथक् ॥ २ ॥
हिमांशुपूर्वे विज्ञेये वक्ष्यामि त्वां पतत्रिण । हिमांशुसंज्ञके ह्याद्ये जीवोऽसौ ब्राह्मणोऽभवत् ॥ ३ ॥
प्राक्संभवे जनुष्यत्र जातो वै ब्राह्मणोऽण्डज । चंद्राख्यके द्वितीये [2]प्रागासीद्वैश्यकुलोद्भवः ॥ ४ ॥
जन्मन्यत्र महाबाहो बाहुजः कथितस्त्वसौ । ततस्तृतीयके सूत शूद्रः पूर्वभवेऽभवत् ॥ ५ ॥
जन्मन्यत्र पुनर्वैश्यो जातश्चंद्रमसि त्वसौ । प्रागिन्दुसंज्ञके शूद्रो बभूव विनतात्मज ॥ ६ ॥
तथा चतुर्थके जातः सांप्रतं पादजोऽण्डज । ततः कुमुदबंधौ प्रागभवद्यवनेश्वरः ॥ ७ ॥
पंचमे त्वत्र संभूतो यवनानां महाकुले । बिधुसंज्ञे ततः षष्ठे बाहुजः पूर्वसंभवे ॥ ८ ॥
ह्यभवदत्र जनुषि जातो मूर्धाभिषिक्तकः । सुधांशौ सप्तमे सूत शूद्रोऽभूत्पूर्वजन्मनि ॥ ९ ॥
सांप्रतं जनितोऽम्बष्ठो विनतानन्दवर्धन । औषधीशेऽष्टमे जातः पूर्वजन्मनि वै द्विजः ॥ १० ॥
जन्मन्यत्र महीपालः संभूतो महतां कुले । अथो नवमिते ह्यासीच्छुभ्रांशौ पादजोऽण्डज ॥११॥
निषादश्चात्र जनुषि जीवोऽयं जनितस्त्वयम् । निशापतौ द्विजश्चासीत् प्राग्भवे गरुडाग्रज ॥ १२ ॥
दशसंख्ये पुनर्वैश्यो जातोऽसौ चात्र जन्मनि । अब्जाख्यकेभवच्छूद्रस्त्वेकादशमितेऽण्डज ॥१३॥
यवनानां कुले जात इदानीं कश्यपात्मज । द्वादशे पक्षिशार्दूल नाम्नि जैवातृकेऽभवत् ॥ १४ ॥
प्राग्भवे मागधश्चात्र संभवे मागधः स्मृतः । सोमनाम्नि बभूव प्राक्संभवे ब्राह्मणस्त्वसौ ॥ १५ ॥
त्रयोदशमिते शूद्रकुले जातस्तु सांप्रतम् । मृगाङ्कसंज्ञके सूत चतुर्दशमिते पुरा ॥ १६ ॥

---

१ वार्तारि—खपु० । २ सूतात्मनि—खपु० । ३ प्राक्सिद्धानां तु कुलोद्भवः—खपु० । ४ जनितः स्वयम्—खपु० । ५ दशमस्थे—खपु० ।

क्षात्रे कुलेऽभवज्जन्म चोग्रसंज्ञोऽत्र जन्मनि । ग्लौनाम्नि पञ्चदशके बाहुजः पूर्वसंभवे ॥ १७
द्विजवंशे वरे जात इदानीं कश्यपात्मज । अथो कलानिधौ नाम्नि षोडशे प्राग्भवेऽभवत् ॥१८
वैश्यश्चात्र भवे जातः करणो विनतात्मज । त्र्यूने विंशन्मिते सूत द्विजराजभूत्पुरा ॥ १९
क्षत्रियश्चात्र जनुषि पादजः परिकीर्तितः । ततोऽष्टदशके विप्रः प्रागासीद्दण्डजोत्तम ॥ २०
यवनश्चात्र संभूतो द्विजराजाभिधेऽधुना । कूनविंशन्मिते सूत द्विजः प्राक्संभवे पुरा ॥ २१
क्षपाकरेऽत्र जनुषि सूतपुत्रः प्रकीर्तितः । ततो विंशन्मिते ह्यासीच्छीतांशौ पूर्वजन्मनि ॥ २२
पादजश्चात्र जनुषि संभूतः क्षत्रियोऽण्डज । क्काढ्ये विंशन्मिते शीतरश्मिसंज्ञे बभूव तु ॥ २३
वैश्यः प्राक्संभवे जातो वैदेहश्चात्र जन्मनि । ततो हिमकरे नाम्नि द्वाविंशन्मितके पुरा ॥ २४
शूद्रोऽभूदत्र जनुषि चण्डालः कथितस्त्वसौ । तुहिनांशौ त्रयोविंशन्मिते प्राग्गरुडाग्रज ॥ २५
वैश्योऽभवदिदानीं तु पादजः परिकीर्तितः । तमोग्रासे चतुर्विंशन्मितिकेऽभूत्पुराभवे ॥ २६ ॥
क्षत्रियो मागधश्चात्र संभवे संभवः सुत । ततस्तुहिनरश्मौ तु पञ्चाविंशान्मितेऽभवत् ॥ २७ ॥
वैश्यः पूर्वभवे विप्रो भवेदत्र पतत्रिण । जैत्रातृकेऽथ षड्विंशन्मिते शूद्रः पुराभवत् ॥ २८ ॥
वन्दीजन इति ख्यातः संभूतश्चात्र जन्मनि । त्र्यूने त्रिंशन्मिते सूत निर्मलांशौ पुराभवे ॥२९ ॥
बभूव बाहुजो जातश्चात्र जन्मनि वै वणिक् । द्व्यूने त्रिंशन्मिते ह्यासीच्छ्वेतांशौ प्राग्भवेऽभवत्३०॥
शूद्रः क्षत्तार इत्येव संभूतश्चात्र जन्मनि । कूनत्रिंशन्मिते सूत रात्रिपे प्राग्वणिक्सुतः ॥ ३१ ॥
बभूव यवनस्त्वत्र संभवे विनतात्मज । क्षपेशसंज्ञके त्रिंशन्मिते त्वासीत्पुराभवे ॥ ३२ ॥
क्षत्रियो यवनश्चात्र संभूतो गरुडाग्रज । क्षपापतौ महाभाग त्वेकत्रिंशन्मिते पुरा ॥ ३३ ॥
बभूव पादजश्चासौ जीवः संप्रति वै द्विजः । द्वात्रिंशान्मितके त्वासीत्कलानाथे पुराभवे ॥ ३४ ॥
वैश्यश्चात्र भवे सूत संभूतो रथकारकः । तारापतौ पुरा जीवस्त्रिंशन्मितके ह्यभूत् ॥ ३५ ॥
बाहुजश्चात्र जनुषि संकरः कथितस्त्वसौ । उडुपे प्राक्चतुस्त्रिंशन्मिते तु गरुडाग्रज ॥ ३६ ॥
ब्राह्मणोऽभूदिदानीं तु जातो वन्दीजनस्त्वसौ । द्विजाधिपतिसंज्ञे प्राक्पंचत्रिंशन्मितेऽण्डज॥३७॥
पादजोऽभूदथो जन्मन्यत्रैव मुखजः स्मृतः । षट्त्रिंशान्मितके ह्यासीच्छशाङ्के पूर्वजन्मनि ॥३८॥
वैश्योऽथ पादजो जातः सांप्रतं विनतात्मज । चत्वारिंशन्मिते त्र्यूने द्विजपे प्राक् खगाधिप॥३९॥
वैश्यो बभूव जीवोऽसौ जन्मन्यत्र वणिक्सुतः । चत्वारिंशन्मिते द्व्यूने पुत्र पूर्वभवेऽभवत् ॥४०॥
मूर्धाभिषिक्तो जीवोऽसौ जन्मन्यत्र खगाधिप । नवत्रिंशन्मिते वत्स द्विजेशे पूर्वजन्मनि ॥ ४१ ॥
ब्राह्मणो ह्यभवदत्र जातो वैश्यस्तथाण्डज । चत्वारिंशन्मिते सूत तारेशे प्राग्भवेऽभवत् ॥ ४२ ॥
अम्बष्ठश्चात्र जनुषि पादजः कथितोण्डज । क्षत्ता तु प्राग्भवे ह्यासीदत्र जन्मनि चोरुजः ॥ ४३ ॥
द्विजनाथे कुयुक्ते तु चत्वारिंशान्मिते सुत । तथोडुपतिसंज्ञे प्राक् चत्वारिंशे पुराभवे ॥ ४४ ॥
द्वियुक्ते त्वभवच्छूद्रो निषादश्चात्र जन्मनि । चत्वारिंशन्मिते त्र्याढ्ये क्षपाध्यक्षे खगेश्वर ॥४५ ॥
पूर्वजन्मन्यसौ क्षत्री ह्यभवद्ब्राह्मणोऽधुना । चत्वारिंशच्चतुर्युक्ते ताराध्यक्षे बभूव तु ॥ ४६ ॥
वैश्यः पूर्वभवे चात्र संभवे मागधोऽण्डज । पंचहीनेऽथ पंचाशन्मितके भपतौ पुरा ॥ ४७ ॥
ह्यासीच्छूद्रोऽत्र जनुषि पादजः कथितो भृशम् । चत्वारिंशन्मिते सूत षड्युक्ते रात्रिपेऽभवत् ४८॥
बाहुजःपूर्वजनुषि जन्मन्यत्रोग्रकः सुतः । पंचाशन्मितिके त्र्यूने ब्राह्मणेशे पुराभवत् ॥४९ ॥
ब्राह्मणश्चात्र जनुषि बाहुजः कथितो ह्यसौ । पंचाशन्मितके द्व्यूने भूदेवेशे बभूव तु ॥ ५० ॥

१ स जातो गरुडाग्रज—खपु०।

नागश्चासौ पुरा चात्र ब्राह्मणः कथितोऽण्डज। चत्वारिंशन्मिते सूत नवाढ्ये पूर्वजन्मनि॥५१॥
जातोऽसौ यवनश्चात्र यामिनीशे तु संकरः। अथो ब्राह्मणपे सूत पञ्चाशन्मितकेऽभवत् ॥५२॥
करणः प्राग्भवे जन्तुरत्र जन्मनि वाहुजः। कुपञ्चाशन्मिते सूत भूदेवपतिसंज्ञके ॥ ५३ ॥
प्रागासीदुरुजो वैश्यश्चात्र जन्मनि काश्यप। रजनीद्रे पुरा सूत द्विपञ्चाशन्मितेऽभवत् ॥ ५४ ॥
क्षत्रियो वाहुजश्चात्र संभवे तु खगेश्वर। रात्रीशे व्यधिके पञ्चाशन्मिते पूर्वजन्मनि ॥ ५५ ॥
वैश्यश्चासीन्महाभाग जातः शूद्रोग्रसंभवे। चतुर्युक्तेऽथ पञ्चाशन्मिते प्राग्गरुडाग्रज ॥ ५६ ॥
क्षणदेशे भवे विप्रः प्रागत्रोरुजवंशजः। वाहुजः प्राग्भवे जन्तुर्यवनश्चात्र संभवे ॥ ५७ ॥
क्षपानाथेऽत्र पञ्चाढ्ये पञ्चाशन्मितकेऽण्डज। षट्पञ्चाशन्मिते सूत रात्रिनाथे पुराभवत्॥ ५८ ॥
पादजो ब्राह्मणश्चैव जातोऽसावत्र जन्मनि। विभावरीशे प्राक् न्यूने सूत षष्टिमितेऽण्डज॥ ५९ ॥
वैश्योऽभवत्पुनश्चैव चण्डालश्चात्र संभवे। तमीपतौ महाभाग द्व्यूने षष्टिमितेऽभवत् ॥ ६० ॥
क्षत्रियः प्राग्भवे त्वत्र संभवे पादजः स्मृतः। तमिस्रेशे महाभाग कूने षष्टिमितेऽभवत् ॥ ६१ ॥
दिव्योऽयं पूर्वजन्मापि जन्तुष्यत्र च वाहुजः। अथ षष्टिमिते वत्स तमीशेऽभूद्द्विजोत्तमः ॥ ६२ ॥
प्राग्भवेऽत्र भवे चायं संकरः कथितो भृशम्। क्वाढ्ये षष्टिमिते सूत तमीनाथेऽभवत्पुरा॥ ६३ ॥
यवनः प्राग्भवे जन्तुर्यवनश्चात्र जन्मनि। पद्मवधावसौ पूर्वे द्व्याढ्ये षष्टिमिते ह्यभूत् ॥ ६४ ॥
ब्राह्मणश्चाण्डजश्रेष्ठ जातो वन्दीजनोऽधुना। त्रिपष्टिसंज्ञके पूर्वभवे भुर्वशिवन्दिते ॥ ६५ ॥
वैश्यश्चात्र भवे जातो मागधः कश्यपात्मजः। तुषारांशौ चतुःपष्टिसंमिते विनतात्मज ॥ ६६ ॥
वभूव वाहुजः पूर्वे ब्राह्मणश्चात्र जन्मनि। वारिजे प्राङ् महाभाग पञ्चषष्टिमिते ह्यभूत् ॥ ६७ ॥
वैश्यश्चात्र भवे जन्तुर्जातो वैश्यकुलोद्भवः। षट्षष्टिसंमिते ह्यासीत्प्राक् समुद्रसुतेऽण्डज ॥ ६८ ॥
वाहुजश्चात्र जन्तुपि वाहुजः कथितोऽधुना। सप्तषष्टिमिते वत्स पीयूषांशौ पुराभवे ॥ ६९ ॥
ब्राह्मणोऽभूदिदानीं तु संभूतो ब्राह्मणस्त्वसौ। सुधाकरे पुरा ह्यासीदष्टषष्टिमितेऽण्डज ॥ ७० ॥
शूद्रः पूर्वभवे चात्र संभवे यवनो महान्। ऊनसप्ततिसंख्ये तु सुधांशौ पूर्वजन्मनि ॥ ७१ ॥
मागधोऽभूत्तथा जातः श्रवयोगोऽत्र जन्मनि। अथो सप्ततिसंख्ये प्रागभूद्वैश्योऽत्र संभवे ॥७२॥
रथकारगृहे जातस्त्वमृतांशौ खगाधिप। कुसप्ततिमिते सूत सुधारश्मौ पुराभवे ॥ ७३ ॥
वाहुजश्चाभवत्सूत ब्राह्मणस्त्वत्र संभवे। द्विसप्ततिमिते सूत रोहिणीशे तु पादजः ॥ ७४ ॥
प्रागासीद्यवनश्चायं संभूतश्चात्र जन्मनि। त्रिसप्ततिमिते चन्द्रे नाम्नि प्राक्संभवे ह्यभूत् ॥७५॥
वैश्योऽसौ जन्तुरत्रैव वाहुजः कथितोऽण्डज। चतुःसप्ततिसंख्ये तु हरिणांकाभिधेऽभवत् ॥७६ ॥
ब्राह्मणः प्राग्भवे जन्तुरिह जन्मनि वै द्विजः। अब्धिजे प्राग्भवे ह्यासीत्पञ्चसप्ततिसंमिते ॥७७॥
पादजश्चारणश्चात्र संभवे गरुडाग्रज। वैश्यः पूर्वभवे सूत संभूतो ब्राह्मणोऽधुना ॥ ७८ ॥
षट्सप्ततिमिते जन्तुरत्रिसूनौ पतत्रिणा। सप्तसप्ततिसंख्ये प्राग्रोहिणीशे बभूव तु ॥ ७९ ॥
संसूतश्चारणो जीवो वाहुजश्चात्र जन्मनि। अष्टसप्ततिसंख्ये तु प्रागभूदात्रिजे द्विजः ॥८०॥
जन्मन्यत्र महाभाग ब्राह्मणः कथितस्त्वसौ। जलांशौ प्राग्भवे चासीन्नवसप्ततिसंमिते ॥ ८१ ॥
जातो वैश्यो महाभाग इदानीं रथकारकः। क्षत्रियः पूर्वसंभूतो यवनश्चात्र जन्मनि ॥ ८२ ॥
अशीतिमितके जन्तुरत्रिपुत्रे च पुत्रक। क्वशीतिमितके नाम्नि शिशिरांशौ पुराभवे ॥ ८३ ॥
बभूव दिव्यजातोऽसावत्र जन्मनि चोरुजः। द्व्यशीतिमितके नाम्नि तारकेशे पुराऽभवत् ॥ ८४ ॥

१ तुर्वशिवन्दिते—खपु०। २ विम्बे नाम्ना—खपु०।

वैश्योऽत्र संभवे सूत संकरः कथितस्त्वसौ । सुधातनौ महाभाग त्र्यशीतिमितकेऽभवत् ॥ ८५ ॥
शूद्रः प्राक्संभवे वैश्यो जातोऽसावत्र जन्मनि । चतुरशीतिके शीतवृणौ भूत्प्राग्भवे सुत ॥ ८६ ॥
संभूतो ब्राह्मणश्चासावम्बष्ठश्चात्रसंभवे । सुधामये महाबाहो पंचाशीतिमितेऽभवत् ॥ ८७ ॥
पादजः प्राग्भवे त्वत्र बाहुजः कथितस्त्वसौ । षडशीतिमिते नाम्नि सुधोस्रे प्राग्भवे ह्यभूत् ॥८८॥
ब्राह्मणो बाहुजः पश्चाद्वैश्योऽसावत्र जन्मनि । बाहुजः प्राग्भवे ह्यासीत् क्षत्रियश्चात्र जन्मनि॥८९॥
सुधामयूखसंज्ञे तु सप्ताशीतिमितेऽण्डज । जडांशुसंज्ञकेऽत्यष्टाशीतिसंख्ये बभूव तु ॥ ९० ॥
शूद्रः प्राक्संभवे त्वत्र संभवे संकरस्त्वसौ । नवाशीतिमिते सूत जडरश्म्यभिधेऽभवत् ॥ ९१ ॥
वैश्यः प्राग्जनुषि त्वत्र जातो वन्दिजनस्त्वसौ । जडोस्राख्ये नवतिके प्रागासीदुरुजोऽण्डज॥९२॥
जन्मन्यत्र महाबाहो ब्राह्मणः कथितस्त्वसौ । क्राढचे नवतिसंख्ये प्रागासीत् क्षात्रकुलोद्भवः॥९३॥
पुनर्जन्मनि वै विप्रः शूद्रश्चात्र जडांशुजे । क्षत्री पूर्वभवे भूतश्चारणश्चात्र जन्मनि ॥ ९४ ॥
केतुप्रासाभिधे द्व्याढचे नवत्याख्ये च पुत्रक । त्र्याढचे नवतिसंख्ये प्राक्संभवेऽभूत् खगाधिप॥९५॥
तुषारांशौ वणिग्विप्रो जातोऽसावत्र जन्मनि । चतुर्युक्ते नवत्याख्ये केतुभुक्ते पुराभवत् ॥ ९६ ॥
संभूतो ब्राह्मणश्चायमत्र जन्मनि वै द्विजः । पंचोने शतसंख्ये तु तुषारोस्रे पुराभवे ॥ ९७ ॥
आसीत् क्षात्रकुलोत्पन्नो जन्मन्यत्र वणिक्सुतः । षण्णवतिमिते शूद्रस्त्वभवत्पूर्वजन्मनि ॥ ९८ ॥
शीतभानौ महाभाग सूतश्चात्रैव जन्मनि । क्षत्री पूर्वभवे सूत ह्यभवच्चात्र बाहुजः ॥ ९९ ॥
लक्ष्मीवन्धौ खगश्रेष्ठ त्र्यूने शतमिते ह्यसौ । द्व्यूने शतमिते ह्यासीत्सिन्धुजे प्राग्भवेऽण्डज॥१००॥
शूद्रः क्षत्री पुनर्जातो जन्मन्यत्र भवेद्विजः । कूने शतमिते वत्स श्वेतभानौ पुराभवे ॥ १०१ ॥
बभूव बाहुजो जातश्चात्र मूर्धाभिषिक्तकः । शतसंख्येऽभवद्वैश्यः प्राग्भवे विनतात्मज ॥ १०२ ॥

त्र्योनिर्णयः ।

जडभानावसावत्र पादजः परिकीर्तितः । एकोत्तरशते सूत पादजश्चाभवत्पुरा ॥ १०३ ॥
शुद्धभानौ तथा चात्र संभवे बाहुजस्त्वसौ । द्व्याढचे शतमिते पूर्वजन्मन्यासीच्च बाहुजः ॥१०४॥
ब्राह्मणः कथितस्त्वत्र संभवेऽसौ समुद्रजे । हिमभानौ महाभाग त्र्याढचे शतमिते ह्यभूत् ॥ १०५ ॥
दिव्यः पूर्वभवे चासावत्र जन्मनि पादजः । शूद्रः प्राक्संभवे चासीच्छूद्रोऽप्यत्रैव जन्मनि ॥१०६॥
चतुर्युतशते त्वत्र नाम्नि सागरजे त्वसौ । पंचोत्तरशते सूत श्रीवन्धौ पूर्वजन्मनि ॥ १०७ ॥
बभूव वैश्योऽसौ जीवो बाहुजश्चात्र जन्मनि । षडयुक्ते शतसंख्ये प्राग्बाहुजः पूर्वसंभवे ॥१०८॥
पुनरासीद्विजः सूत बाहुजश्चात्र जन्मनि । सप्तोत्तरशते नाम्नि मासगर्भे पुराभवत् ॥ १०९ ॥
बाहुजः कथितो जन्तुरत्र जन्मनि पादजः । अष्टोत्तरशते सूत कुमुदेशेऽभवत्पुरा ॥ ११० ॥
ब्राह्मणश्चात्र जनुषि बाहुजः परिकीर्तितः । एतत्सर्वमुपाख्यातमुत्तमाधममध्यमम् ॥ १११ ॥
जातिस्वरूपं जीवानां पश्चात्कं कथयामि ते ॥ ११२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके जातिस्वरूपत्र्योनिर्णयाध्यायः पञ्चमः ॥ ५ ॥

अरुण उवाच ।

सर्वसाक्षिन्त्रिलोकेश देवदेवनमस्कृत । भौमाच्च वयसो ज्ञानं कथं ज्ञेयं मयाऽधुना ॥ १ ॥

---

१ जडांशुभे—खपु० । २ च वै द्विजः—खपु० । ३ श्रीविधौ—खपु० ।

श्रीसूर्य उवाच।

बाल्यावस्थाः संप्राप्य जीवोऽयं प्राग्भवेऽण्डज। चक्रे शुभाशुभं यच्च यां: प्राप्तोऽत्र प्रयच्छति॥२॥
ताः सर्वा भूमिजेभ्यस्तु वक्ष्यामि त्वां पतत्रिण। पूर्वजन्मनि जीवोऽसौ चक्राख्ये[2] प्रथमे कुजे॥३॥
बाल्ये शुभाशुभं चक्रे बाल्ये चात्र प्रयच्छति। प्रागारसंज्ञके भौमे द्वितीये कृतवानयम्॥४॥
शुभाद्यं खलु कौमारे यून्यत्र पृच्छति स्वयम्। सदाद्यं प्राकृतं सूत बाल्ये क्रूरदृगाभिधे॥५॥
कौमारेऽत्रैव वयसि पृच्छति स्वं मनोरथम्। आवनेये चतुर्थे प्राग् यूनि सर्वं यदर्जितम्॥६॥
जीवेन स्वेच्छया सूत मध्ये पृच्छति सांप्रतम्। अथो क्षितिसुते बाल्येऽकारि सर्वं परे भवे॥७॥
स्वयं पृच्छति वार्द्धक्ये पूर्वकर्मविचेष्टितम्। षष्ठे पृथ्वीसुते नाम्नि मध्ये प्रागर्जितं च यत्॥८॥
स्वेच्छया विहिताद्यं तु यून्यत्रापि प्रपृच्छति। कुसुते पूर्वजनुषि सदाद्यं कृतवानसौ॥९॥
कैशोर्ये त्वत्र कैशोर्ये स्वयं पृच्छति यत्नतः। भूम्यात्मजे महाभाग प्रागकारि शुभाशुभम्॥१०॥
मध्ये वयसि जीवोऽयं मध्ये प्रष्टाऽत्र जन्मनि। पूर्वकर्माश्रितं सर्वं तत्र पृच्छति सांप्रतम्॥११॥
कौमारे भूमिजे यच्च यून्यद्यं कृतवान् पुरा। क्रूराक्षसंज्ञके भौमे दशमे विनतात्मज॥१२॥
वृद्धौ यदर्जितं कर्म बाल्येऽत्र[3] प्रष्टुमुद्यतः। धरासुते पुरा सूत कौमारे कृतवानसौ॥१३॥
वार्द्धक्येऽत्रैव जनुषि परिपृच्छति वाञ्छितम्। पूर्वजन्मनि जीवोऽसौ यच्चक्रे यौवनेऽण्डज॥१४॥
यौवनेऽर्कसुते त्वत्र धरासूनौ प्रपृच्छति। जीवेनानेन यत्पूर्वे कृतं यूनि शुभाशुभम्॥१५॥
क्रूरलोचननाम्न्यत्र बाल्ये प्रष्टुं समुद्यतः। चतुर्दशे धराजे प्रागकारि गरुडाग्रज॥१६॥
यत्कर्म वृद्धौ जीवोऽयं वृद्धौ पृच्छति जन्मनि। धरात्मजे तु प्राग्यूनि कृतवान् यच्छुभाशुभम्॥१७॥
यौवने सांप्रतं सर्वं जीवः पृच्छति च स्वयम्। क्रूरनेत्रे पुरा वृद्धौ यदकारि शुभाशुभम्॥१८॥
मध्ये प्रष्टाऽत्र जनुषि जीवोऽयं स्वेच्छयाऽनिशम्। भूजाभिधे सप्तदशे चकार प्राक्शुभाशुभम्॥१९॥
कौमारे मध्यवयसि जीवः पृच्छां करोत्यसौ। क्रूरचक्षुषि यच्चक्रे सदाद्यं शैशवे पुरा॥२०॥
तन्मध्यमे स्वचरितं सांप्रतं परिपृच्छति। पृथ्वीजनाम्नि भौमे प्राग्यदकारि शुभाशुभम्॥२१॥
कौमारे बालभावेऽत्र तत्सर्वं प्रष्टुमुद्यतः। रुधिराख्ये पुरा भौमे मध्येऽकारि यदिच्छया॥२२॥
बाल्ये पृच्छति यत्सर्वमत्र विंशान्मितेऽण्डज। भूपुत्रेऽकारि यद्वृद्धावेकविंशान्मिते पुरा॥२३॥
यूनि च पृच्छको यूनि सांप्रतं प्रष्टुमुद्यतः। प्राक्संभवे कुजाख्ये तु मध्यभावे यदर्जितम्॥२४॥
प्रश्नं करोति यत्प्रष्टा कौमारेऽत्र पतत्रिण। मङ्गले मङ्गलाद्यं तु जरायां प्राकृतं च यत्॥२५॥
यौवने चात्र जनुषि तत्सर्वं परिपृच्छति। चतुर्विंशन्मिते सूत क्षितिसूनौ पुरा कृतम्॥२६॥
मध्येऽत्र जनुषि प्राप्ते जरसि प्रष्टुमुद्यतः। पूर्वजन्मनि यच्चक्रे प्राप्ते त्वङ्गारके ह्ययम्॥२७॥
यूनि वृद्धौ पुनर्यूनि प्रष्टात्र कृतकर्मणाम्। कुसंभवे पुरा सूत शुभाद्यं यदि यत्कृतम्॥२८॥
परिपृच्छति जीवोऽयं वार्द्धक्ये चात्र जन्मनि। प्राग्भवे भूमिजाते यत्कृतवान् यौवने पुनः॥२९॥
कौमारे वयसि प्राप्ते वार्धक्ये पृच्छकोऽधुना। रक्ताङ्गसंज्ञके त्वष्टा विंशत्संख्ये पतत्रिण॥३०॥
यच्चक्रे बालभावे प्राग् बाल्ये प्रष्टात्र जन्मनि। कूनत्रिंशन्मिते ह्यारे कौमारे पूर्वजन्मनि॥३१॥
कृतवानत्र तत्सर्वं यौवने परिपृच्छति। उग्राभिधे तु बाल्यायामवस्थायां परे भवे॥३२॥
यदर्जितं तु कौमारे पृष्टवानत्र सांप्रतम्। क्षोणीजेऽत्रैव जनुषि मध्येऽसौ पृच्छति स्वयम्॥३३॥
यच्चक्रे यौवने सूत सदाद्यं परसंभवे। ज्यासूनौ बालभावे प्राक् शुभाशुभमुपार्जितम्॥३४॥

---

१ कल्पे चात्र प्रयच्छति—खपु०। २ वक्राख्ये—खपु०। ३ बात्र प्रष्टुं समुद्यतः—खपु०।

तस्य सर्वस्य प्रष्टायमत्र जन्मनि यौवने । इलापुत्रे पुरा चक्रे मध्ये वयसि चाण्डज ॥ ३५
तत्सर्वं यौवने प्राप्ते सांप्रतं प्रष्टुमुद्यतः । चतुस्त्रिंशन्मिते कर्म यच्च क्षितिभवे पुरा ॥ ३६
कैशोर्ये कृतवानत्र कौमारे परिपृच्छति । भूसूनौ मध्यवयसि पंचत्रिंशन्मितेऽण्डज ॥ ३७
प्रागर्जितं मध्यभावे तस्य प्रष्टाऽत्र जन्मनि । षट्त्रिंशन्मितके क्रूरनयने यौवने पुरा ॥ ३८
यदर्जितं शुभाद्यं तत्कौमारे परिपृच्छति । उर्वीजाख्ये जरायां प्राक् शुभाद्यं कृतवानसौ ॥ ३९
बालभावे च तत्सर्वं पृच्छति स्वमनोगतम् । कुपुत्रे पूर्वजनुपि कौमारे भृशमर्जितम् ॥ ४०
वृद्धौ शुभाद्यं तत्सर्वं पृष्टवानस्ति सांप्रतम् । चत्वारिंशन्मिते कूने प्राक् पृथ्वीभवसंज्ञके ॥ ४१
यत्सदाद्यमसौ चक्रे यूनि यून्यत्र पृच्छति । क्षमासुते युवभावे पूर्वजन्मार्जितं सुत ॥ ४२
शैशवे तत्समस्तस्य प्रष्टाऽयं गरुडाग्रज । रसात्मजे पुरा सर्वं सदाद्यं कृतवानसौ ॥ ४३
वार्द्धक्ये जरसि प्राप्ते सर्वं प्रश्नं करोत्यसौ । प्राग्भावे त्वचलाजेऽयं बाल्ये चक्रे यदिच्छया ॥४४
शुभाशुभं यदत्रैव यौवने परिपृच्छति । लोहितांगे पुरा सूत यत्कृतं सदसत्पुरा ॥ ४५
वार्द्धक्ये मध्यभावेऽत्र सर्वं प्रश्नं करोत्यसौ । चत्वारिंशन्मिते सूत चतुर्युक्ते महीभवे ॥ ४६
कौमारे कृतवान् यः प्राङ् मध्ये संप्रति पृच्छति । पिङ्गलाख्ये पुरा वत्स बालभावे शुभाशुभम् ४७
यत्कृतं तस्य प्रष्टाऽयं मध्यभावेऽत्र जन्मनि । रसापुत्रेऽत्र जनुषि बाल्ये पृच्छति च स्वयम् ॥४८
कुमारवयसि प्राप्ते यच्चक्रेऽसौ शुभाशुभम् । चत्वारिंशन्मिते पूर्वे सप्तयुक्ते च मध्यके ॥ ४९
मेदिनीजे कृतं कर्म बाल्येऽयं प्रष्टुमुद्यतः । पृथ्वीसूनौ पुरा वृद्धौ कृतवान् सदसत्सुत ॥ ५०
स्वयं यून्यत्र जनुषि परिपृच्छति यत्नतः । पञ्चाशत्संख्यके कूने क्षमाजे मध्ये पुरा कृतम् ॥५१
शुभाद्यं पृष्टवानस्ति जन्मन्यत्र कुमारके । महीभवे पुरा वृद्धौ पुनर्यूनि शुभाशुभम् ॥ ५२
यच्चक्रे यौवने त्वत्र प्रष्टाऽयं गरुडाग्रज । क्षोणीसुतेऽकुपञ्चाशत्संख्यके पूर्वजन्मनि ॥ ५३
मध्यभावेऽर्जितं वृद्धौ चात्र प्रश्नं करोत्यसौ । द्विपञ्चाशन्मिते भौमे वृद्धौ प्रागर्जितं च यत् ॥५४
सदाद्यमधुना सूत कौमारे परिपृच्छति । ज्यासुते प्राग्भवे सर्वं सदाद्यं कृतवानसौ ॥ ५५
पृष्टवानस्ति तत्सर्वं जरायामत्र जन्मनि । इलाजनाम्नि प्राग्यूनि कौमारे पुनरप्ययम् ॥ ५६
यच्चक्रे सदसत्कर्म वृद्धौ प्रष्टाऽत्र जन्मनि । कुभवे बालभावे प्राक् कृतं यच्च शुभाशुभम् ॥ ५७
बालभावेऽधुना सूत परिपृच्छति चेच्छया । क्षमानन्दने पुरा सर्वमर्जितं यत्कुमारके ॥ ५८
तदत्र जनुपि प्राप्ते युवभावे प्रपृच्छति । कुसूनुसंज्ञके सप्तपञ्चाशन्मितके पुरा ॥ ५९
बालभावे कृतं चात्र यूनि प्रश्नं करोत्यसौ । पञ्चाशदष्टमितके पृथ्वीपुत्रे पुराभवे ॥ ६०
यौवने कृतवान् यश्च मध्येऽसौ प्रष्टुमुद्यतः । एकोनषष्टिसंख्ये प्राग्बालभावे रसाभवे ॥ ६१
चक्रे सदाद्यं यत्सर्वं जरायां पृष्टवानिह । क्षौणेये षष्टिसंख्ये प्राङ् मध्यभावे यदर्जितम् ॥ ६२
युवभावेऽत्र जनुपि परिपृच्छति चाण्डज । क्रूरेक्षणे ह्यपचितं पुरा सर्वं शुभाशुभम् ॥ ६३
तारुण्येऽप्यत्र कैशोर्ये प्रष्टाऽसौ गरुडाग्रज । द्विषष्टिमितके भूमिसूनौ प्राक्संभवेऽत्र च ॥ ६४
मध्ये यदर्जितं सर्वं मध्यमे पृच्छको ह्यसौ । क्षित्यात्मजे पुरा यूनि शुभं वाशुभमर्जितम् ॥ ६५
यत्तत्पृच्छत्यसौ जीवः कौमारेऽत्रैव जन्मनि । चतुःषष्टिमिते वृद्धौ यत्कृतं प्राग् धराभवे ॥ ६६
पृष्टवानस्ति तस्यात्र कर्मणः शैशवे फलम् । भूसुते प्राग्भवे सूत कौमारे कृतवानसौ ॥ ६७

१ इलाजाख्ये—खपु०। २ बाल्येऽयम्—खपु०। ३ स्वयं पृच्छति—खपु०।

यत्कर्म तस्य प्रष्टाऽयं जरायामत्र जन्मनि। ज्यापुत्रलंज्ञके पूर्वे यच्चक्रे यौवने शुभम् ॥ ६८ ॥
पापं वा काश्यपेयात्र यौवने परिपृच्छति। महीसूनौ पुरा सर्वमर्जितं यौवनेऽधुना ॥ ६९ ॥
बालभावे महाभाग तस्य पृच्छां करोत्यसौ। कुनन्दने पूर्वभवे शुभाद्यं यच्च सूचितम् ॥ ७० ॥
जरायामत्र जनुषि वार्द्धक्ये पृच्छको ह्ययम्। कूनसप्ततिमे पूर्वे माहेये कृतवानसौ ॥ ७१ ॥
बाल्येऽत्र यूनि वयसि स्वेच्छया परिपृच्छति। प्राग्भूमितनये सर्वं जरायां समुपार्जितम् ॥ ७२ ॥
मध्यमे वयसि प्राप्ते पृष्टवानस्ति सांप्रतम्। उर्वीसूनौ पुरा सर्वं शुभाद्यं यदुपार्जितम् ॥ ७३ ॥
कौमारेऽत्रैव वयसि मध्ये प्रश्नं करोत्यसौ। स्थिरात्मजे पूर्वजन्मन्यशुभं वा शुभं च यत् ॥७४ ॥
बालभावेऽर्जितं त्वत्र मध्यमे प्रष्टुमुद्यतः। महीसुते यत्कौमारे कृतवानिच्छया पुरा ॥ ७५ ॥
बालभावे च तत्सर्वं परिपृच्छति चाण्डज। चतुःसप्ततिमे मध्ये यच्चक्रे क्ष्मासुते पुरा ॥ ७६ ॥
पृष्टवानस्ति तत्सर्वं बालभावेऽत्र जन्मनि। स्थिराभवे पुरा सूत पंचसप्ततिसंख्यके ॥ ७७ ॥
यत्कर्म कृतवान् वृद्धौ यून्यत्र प्रष्टुमुद्यतः। रसासुते प्राङ्मध्ये यत्कृतं कर्म सदादिकम् ॥ ७८ ॥
कौमारे स्वेच्छया तस्य पृच्छकः सांप्रतं ह्यसौ। सप्तसप्ततिमे वृद्धावुर्वीपुत्रे पुराभवे ॥ ७९ ॥
पुनर्यूनि कृतं कर्म यौवनेऽत्र प्रपृच्छति। इलाभवे पुरा सर्वं मध्यमे यत्समर्जितम् ॥ ८० ॥
जरायामत्र जनुषि सर्वं प्रश्नं करोत्यसौ। कूने भूतनयेऽशीतिमिते जरसि यत्कृतम् ॥ ८१ ॥
कौमारे वयसि प्राप्ते प्रष्टाऽयं चात्र जन्मनि। ज्यात्मजेऽशीतिसंख्ये प्राग्युवभावे यदर्जितम्॥८२॥
सर्वं तत्कर्मणः पाकं वृद्धौ पृच्छां करोत्यसौ। ततो भूप्रसवे पूर्वभवे सर्वमुपार्जितम् ॥ ८३ ॥
कौमारे सदसत्सूत वृद्धौ पृच्छति सांप्रतम्। बालभावेऽर्जितं कर्म स्वेच्छया विनतात्मज ॥ ८४ ॥
प्राग्भवे शैशवे चात्रकुभवे परिपृच्छति। त्र्यशीतिमितके नाम्नि क्षितिपुत्रे पुराऽण्डज ॥ ८५ ॥
कौमारे कृतवान् कर्म यौवने प्रष्टुमुद्यतः। इलात्मजे पुरा सूत यच्चक्रे शुभमन्यथा ॥ ८६ ॥
शैशवे चात्र कौमारे सर्वं प्रश्नं करोत्यसौ। पंचाशीतिमिते सूत भूमिपुत्रे पुरार्जितम् ॥ ८७ ॥
यौवने सदसत्कर्म मध्ये प्रष्टाऽत्र जन्मनि। क्षोणीसूनौ पुरा बाल्ये शुभं वाशुभमर्जितम् ॥ ८८ ॥
युवभावे च तत्सर्वमत्र प्रष्टुं समुद्यतः। सप्ताशीतिमिते नाम्नि रसाजे प्राग्भवेऽण्डज ॥ ८९ ॥
यच्चक्रे सदसन्मध्ये यूनि प्रष्टाऽत्र जन्मनि। क्ष्मापुत्रे प्राग्भवे सर्वं कौमारे यदुपार्जितम् ॥ ९० ॥
कैशोर्ये चात्र जनुषि परिपृच्छति चेच्छया। कूने नवतिसंख्ये प्रागर्जितं यत्पुराण्डज ॥ ९१ ॥
मध्ये प्राप्ते स्थिरासूनौ मध्ये प्रश्नं करोत्यसौ। रसासूनौ कृतं यच्च यौवने पूर्वजन्मनि ॥ ९२ ॥
सदाद्यं तस्य प्रष्टाऽयं कौमारे गरुडाग्रज। उर्वीसुनौ कुनवतिमिते प्राग्जरसि कृतम् ॥ ९३ ॥
यच्छुभाद्यं च तत्सर्वं शैशवे प्रष्टुमुद्यतः। अथो भूमिसुते पूर्वे कौमारे कृतवांश्च यत् ॥ ९४ ॥
वार्द्धक्ये पृच्छकश्चासौ जन्मन्यत्र पतत्रिण। यच्चक्रे यौवने कर्म प्राग्भवे च शुभाशुभम् ॥ ९५ ॥
क्षोण्यात्मजेऽत्र नवतित्रियुते यूनि पृच्छति। ज्याभवे यत्पुरा यूनि कृतवान् पृच्छको ह्यसौ ९६॥
सदाद्यं तत्समस्तं तु बाल्येऽत्र प्रष्टुमुद्यतः। क्षितिजे पंचनवतिमिते प्राग्जरसि कृतम् ॥९७ ॥
यद्यच्छुभाशुभं सूत वृद्धौ प्रष्टात्र जन्मनि। पण्णवत्या मिते पूर्वे महीपुत्रे यदर्जितम् ॥ ९८ ॥
बाल्ये शुभाशुभं यूनि स्वेच्छया परिपृच्छति। त्र्यूने शतमिते यत्प्राक् क्ष्मासुते कृतवानसौ ९९॥
वृद्धभावेऽत्र जरसि स्वेच्छया पृच्छतेऽण्डज। नवत्यष्टयुते पूर्वे चक्रे चोर्व्यात्मजे शुभम्॥ १०० ॥
पापं वा सूत कौमारे मध्येऽत्र प्रष्टुमुद्यतः। नवत्यङ्कयुते भूजे त्वर्जितं शुभमन्यथा ॥१०१ ॥

---

१ जनुषि–खपु०।

मध्यमे वयसि प्राप्ते प्रष्टायं चात्र जन्मनि। मह्यात्मजे प्राक्कौमारे शतसंख्ये कृतं च यत् ॥१
शुभाद्यं शैशवेऽत्रैव पृष्टवानस्ति काश्यप । उर्वीभवे कुयुक्ते प्राग्यौवने शतसंख्यके ॥ १८
यच्चके सदसत्तस्य यूनि प्रष्टाऽयमण्डज । वृद्धौ यदर्जितं कर्म द्वियुक्ते शतसंख्यके ॥ १०
प्राग्भवे पृच्छकश्चात्र यूनि भूमिभवेऽण्डज । अरुणाङ्गे पुरा सर्वं शुभाद्यं कृतवांश्च यत् ॥ १८
मध्ये वयसि संप्राप्ते कौमारे पृच्छति स्वयम् । चतुष्काढ्यशते ज्यैजे प्राक्कृतं जरसि ध्रुवम् ॥
पुनर्यूनि शुभाद्यं च यदसौ पृच्छकोऽधुना । क्षोणीजाते पुरा सूत मध्ये यद्यत्समर्जितम् ॥ १८
प्रष्टायं कर्मणस्तस्य वृद्धौ संप्रति चाण्डज । षड्युते शतसंख्ये प्राग् यच्चके शुभमन्यथा॥१८
रक्ताक्षे जनुषि प्राप्ते कौमारेऽत्र प्रपृच्छति । अरुणाक्षे पुरा यूनि यत्कृतं स्वेच्छयाण्डज ॥१८
युवभावेऽत्र जनुषि पृच्छकः पूर्वकर्मणाम् । अष्टयुक्ते शते रक्तचक्षुःसंज्ञे पुराभवे ॥ ११८
यच्चके यूनि कौमारे त्वत्र वृद्धौ प्रपृच्छति । बाल्ये द्वादशवर्षान्तः किशोरो द्विगुणस्तथा ॥१२

अथ बाल्याद्यवस्थामाह-

द्वयूनपञ्चाशदब्दान्तस्तरुणः परिकीर्तितः। पञ्चषष्टिमिताब्दान्तो मध्यमः कथितोऽण्डज॥१३
तत्परो जीवनान्तस्तु वृद्धो ज्ञेयो मनीषिभिः । एतत्ते कथितं सर्वं वयोमानं नृणां सुत ॥१४
लक्षणीयं सदा विज्ञैः पुनः किं परिपृच्छसि ॥
इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाके वयोनिर्णयाध्यायः षष्ठः ॥ ६ ॥

अरुण उवाच ।

नामभिर्बहुभिर्वद्धा बुधाद्य दिवसेश्वर । नाम्ना केनात्र विज्ञेयास्त्रिधा स्त्रीपुंनपुंसकाः ॥ १

श्रीसूर्य उवाच-

स्त्रीपुंनपुंसके भावे संभूतः प्राग्यथाचरन् । जीवोऽयमत्र जनुषि यत्र रूपे व्यवस्थितः ॥ २
तत्स्वरूपान्महावाहो पापपुण्यसमुद्भवान् । वक्ष्येऽहं क्रमतो यत्नाद् बुधादिभ्योऽत्र जन्मनि॥ ३
पूर्वजन्मनि जीवोऽसौ प्रथमे बुधसंज्ञके । बभूव पुरुषः सूत जन्मन्यत्रास्ति वै नरः ॥ ४
ज्ञसंज्ञके द्वितीये प्राग्जन्मनि स्त्री पतत्रिण । स्त्री बभूव पुनर्जन्मन्यत्र नारी च जन्मनि ॥ ५
आसीत्प्राक्संभवे नारी तृतीये रजनीशजे । सर्वसाधनतत्त्वज्ञः पुरुषश्चात्र जन्मनि ॥ ६
विन्नाम्नि पूर्वजनुषि ह्यभूत् षण्ढश्चतुर्थके । नररूपधरः पश्चादस्त्यत्रापि नपुंसकः ॥ ७
चान्द्रिख्याते पुरा षण्ढो बभूव विनतात्मज । पूर्वपापादयं चास्ति सांप्रतं वै नपुंसकः ॥ ८
षष्ठे हिमांशुजे सूत प्राग्भवे ना ह्यभूदयम् । पुनर्जन्मनि वै षण्ढे वनितात्रैव जन्मनि ॥ ९
सप्तमे बोधनाख्ये तु पूर्वजन्मन्यभूत्पुमान् । वनितात्रैव जनुषि जीवोऽसावस्ति चाण्डज ॥ १०
पूर्वे चन्द्रसुते सूत बभूव वनिताष्टमे । पूर्वजन्मनि वै नारी पुरुषोऽस्त्यत्र जन्मनि ॥ ११
सोमाख्ये नवमे जीवः पुरुषोऽभूदथाण्डज । जनुष्यत्राप्यसौ षण्ढो जातः पापविशेषतः ॥ १२
अथेन्दुभवसंज्ञे प्राग्दशमे वनिता पुनः । संभवे योषिता सूत सांप्रतं च नपुंसकः ॥ १३
सुधांशुजे कुदशके षण्ढः पूर्वभवेऽभवत् । अत्र जन्मन्यसौ जीवः पुरुषोऽस्ति पतत्रिण ॥ १४
वत्स सोमात्मजे नाम्नि द्वादशे प्राङ् नरो ह्यभूत् । पुनर्जन्मन्यसौ नारी पुरुषश्चात्र जन्मनि॥१५
शशाङ्कपुत्रे नार्यासीत् प्राग्भवे तु त्रयोदशे । नपुंसकोऽत्र जनुषि विनतानन्दवर्धन ॥ १६

१क्ष्माजे-खपु०। २ यथाण्डज-खपु० ।

नपुंसकः पुरा सूत ग्लौसुते च चतुर्दशे। पुनर्योषा पुनर्नारी जन्मन्यत्र विनिर्णयात् ॥ १७ ॥
पंचयुक्ते दशमितेऽब्जभवे पूर्वजन्मनि। योषिदासीत्पुनर्नारी जन्मन्यत्र पतत्रिण ॥ १८ ॥
शुभ्रांशुपुत्रे ह्यभवत्प्राङ्नारी पुनरप्यसौ। पुरुषश्चात्र जनुषि वनिता विनतात्मज ॥ १९ ॥
षण्ढः प्राक्संभवे सूत सुधांशुसुतसंज्ञके। दशसप्तमिते नारी जाताऽसौ चात्र जन्मनि ॥ २० ॥
इंदुजेऽष्टादशे षण्ढः पूर्वजन्मन्ययं पुनः। नपुंसकोऽत्र जनुषि पुरुषश्चास्ति काश्यप ॥ २१ ॥
सोमपुत्रे नरोऽभूत्प्राक्पुरुषश्च पुनर्भवे। एकोनविंशतिमिते षण्ढश्चात्रैव जन्मनि ॥ २२ ॥
ग्लौभवे पूर्वजन्मन्यसौ षण्ढो ह्यभवत्सुधीः। विंशन्मिते महाभाग पुरुषस्त्वत्र जन्मनि ॥ २३ ॥
शुभ्रांशुसूनौ वनिता प्राग्भवे ना पुनर्भवे। तृतीये संभवे नास्ति क्लाढ्ये विंशन्मितेऽण्डज ॥ २४ ॥
द्वाविंशन्मितके पातपीतजे पूर्वजन्मनि। पूरुषोऽयमभूत्पुत्रो वनिता चात्र जन्मनि ॥ २५ ॥
विधुपुत्रे त्रयोविंशे पूर्वजन्मनि मानद। पुरुषोऽयं पुनः षण्ढश्चासीदत्रैव संभवे ॥ २६ ॥
चतुर्विंशन्मिते चेन्दुसंभवे परजन्मनि। नपुंसकोऽयमभवद्वनितात्रैव संभवे ॥ २७ ॥
अब्जपुत्रे महाभाग पञ्चविंशतिसंमिते। प्राङ् नारी क्लीवसंज्ञश्च बभूवात्र पुनर्नरः ॥ २८ ॥
शशाङ्कसूनौ षड्विंशन्मिते प्राक्पुरुषोऽभवत्। जन्मन्यत्र पुमानस्ति विनतानन्दवर्धन ॥ २९ ॥
रौहिणेये पुरा षण्ढः सप्तविंशात्मके पुनः। बभूव षण्ढो जीवोऽयमिदानीं वनिताण्डज ॥ ३० ॥
अष्टाविंशन्मिते ब्राह्म्यसंभवे गरुडाग्रज। पूर्वजन्मन्यभून्नारी पुरुषश्चात्र जन्मनि ॥ ३१ ॥
ततः शशाङ्कजे ह्यासीत्कूने त्रिंशन्मिते पुरा। पुरुषो नर एव प्राक्संभवे सांप्रतं नरः ॥ ३२ ॥
रात्रीशपुत्रे प्राक् त्रिंशन्मितके गरुडाग्रज। वनितासीत्पुरा नारी जातासौ भर्तृवल्लभा ॥ ३३ ॥
शीतरश्मिभवे पुत्र बभूव प्राङ् नपुंसकः। नारी परभवे विज्ञा पुरुषोस्त्यत्र जन्मनि ॥ ३४ ॥
क्षपेशपुत्रे प्रागासीत्पुरुषोऽप्यत्र जन्मनि। नपुंसको महापापात्पूर्वजन्मकृतात्सुत ॥ ३५ ॥
त्रित्रिंशन्मितके पूर्वभवे सूत द्विजेशजे। ना बभूव पुनर्नारी पुनः षण्ढोऽत्र जन्मनि ॥ ३६ ॥
क्षपाकरसुते षण्ढश्चतुस्त्रिंशन्मिते ह्यभूत्। पूर्वजन्मनि पक्षीन्द्र जन्मन्यत्र नपुंसकः ॥ ३७ ॥
वत्स चन्द्रभवे ह्यासीत्पुरुषः पूर्वसंभवे। स्त्री पुनः संभवे चैव वनिताप्यत्र संभवे ॥ ३८ ॥
पुनरैन्दवसंज्ञे प्राक् षट्त्रिंशन्मितकेऽण्डज। वनिता प्राग्भवे जन्मन्यत्रैवास्ति नपुंसकः ॥ ३९ ॥
पूर्वजन्मनि पक्षीन्द्र षण्ढो विधुसुते ह्यभूत्। नारी पुनर्भवे क्लीवः सर्वधर्मबहिष्कृतः ॥ ४० ॥
सुधांशुसंभवे द्व्यूने चत्वारिंशन्मिते पुरा। बभूव पुरुषः सूत सांप्रतं पुरुषस्त्वसौ ॥ ४१ ॥
कूने शुभ्रांशुजे चत्वारिंशत्संख्ये पतत्रिण। वनिता प्राग्भवे क्लीवः पुनरास्ति नपुंसकः ॥ ४२ ॥
षण्ढोऽब्जसूनौ प्राक्सूत चत्वारिंशन्मितेऽभवत्। वनितावेषधृक्चास्ति जीवोऽयं त्वत्र जन्मनि॥४३॥
सोमजे पक्षिशार्दूल कुचत्वारिंशके पुरा। पुमान् षण्ढः पुनर्जन्मन्यस्त्यसौ पुरुषोऽत्र च ॥ ४४ ॥
चत्वारिंशन्मिते द्व्याढ्ये ग्लौपुत्रे प्राङ् नपुंसकः। जन्मन्यत्र महाभाग पुरुषोऽस्ति पतत्रिण॥४५॥
शशाङ्कपुत्रे त्रियुते चत्वारिंशन्मितेऽण्डज। प्राग्योषाभूत्पुनः षण्ढश्चात्र जन्मनि वै नरः ॥ ४६ ॥
रोहिणीजे महाभाग पूर्वजन्मन्यसौ भवेत्। पुरुषो वनितावेषी जन्मन्यत्र परिस्फुटः ॥ ४७ ॥
ब्राह्मसूनौ पुरा ह्यासीज्जीवोऽयं च नपुंसकः। पुरुषश्च परे जन्मन्यत्र जन्मनि योषिता ॥ ४८ ॥
हिमांशुसूनौ षडयुक्ते चत्वारिंशन्मितेऽण्डज। वनिता प्राग्भवे ह्यासीदत्र जन्मनि योषिता ॥४९॥

१ षण्ढो जातश्चात्रैव—खपु०।

श्वेतांशुपुत्रे सप्ताढ्ये चत्वारिंशन्मिते पुरा । पुरुषः पुरुषश्चासीद्वनिता चात्र जन्मनि ॥ ५०
शशाङ्कसूनौ द्व्यूने प्राक् पञ्चाशन्मितकेऽण्डज । पूर्वजन्मन्यसौ षण्ढश्चासीत्क्लीबोऽत्र जन्मनि ५१
पञ्चाशत्संख्यके द्व्यूने ह्यभूच्छीतांशुजे पुरा । वनिता पुरुष पश्चात् क्लीवोप्यस्त्यत्र जन्मनि ॥५२
रात्रीशसंभवे सूत पञ्चाशन्मितकेऽभवत् । पूर्वजन्मन्ययं जीवः पुरुषोऽत्र नपुंसकः ॥ ५३
क्षपेशसूनौ प्रागासीत् षण्ढश्चापि परे भवे । पुरुषः पुरुषोऽप्यस्ति जन्मन्यत्र पतत्रिण ॥ ५४
पञ्चाशद्व्यन्विते पूर्वभवे योषाऽभवत्सुत । द्विजेशपुत्रे नास्त्यत्र विनतानन्दवर्धन ॥ ५५ ।
चन्द्रजे प्राग्भवे ह्यासीत्त्रिपञ्चाशन्मितेऽण्डज । पुरुषः पुरुषोऽप्यस्ति जीवोऽयं चात्र जन्मनि॥५६।
क्षपाकरजसंज्ञे प्राग्वनिताभूत्पतत्रिण । चतुराढ्ये तु पञ्चाशन्मितकेऽत्रनपुंसकः ॥ ५७ ।
पञ्चाशत्पञ्चयुक्ते प्राग्बभूव पुरुषोऽण्डज । चन्द्रसूनौ जनुष्यत्र नररूपधरोऽस्त्वसौ ॥ ५८ ।
षट्पञ्चाशन्मिते सूतेन्द्वात्मजे वनिताऽभवत् । प्राग्जन्मन्यथ योषासीदत्र जन्मनि योषिता॥५९।
व्यूने षष्टिमिते जन्मन्यभूद्योषा पुराण्डज । विधुसूनावसावत्र जीवोयं नररूपधृक् ॥ ६० ।
द्व्यूने षष्टिमिते षण्ढः पूर्वजन्मन्यभूत्पुनः । सुधांशुपुत्रे पुरुषः क्लीवश्चात्रैव जन्मनि ॥ ६१ ।
कूनेऽब्जजे षष्टिमिते प्राग्भवेऽभून्नपुंसकः । जन्मन्यत्र पुनः षण्ढो जातोऽसौ विनतात्मज ॥६२॥
सोमसूनौ पुरा सूत षष्टिसंख्ये भवेन्नरः । क्लीवः परभवे नारी जन्मन्यत्रास्ति सुन्दरी ॥ ६३ ॥
रजौजे कुषष्टिमितके पुरुषः पूर्वजन्मनि । जन्मन्यत्र महाभाग जीवोयं स्त्रीस्वरूपधृक् ॥ ६४ ॥
शशांकसुतसंज्ञे प्राद्विषष्टिमितके पुरा । बभूव वनिता नारी पुनरत्र च वै नरः ॥ ६५ ॥
रोहिणीपुत्रसंज्ञे प्राक् त्रिषष्टिमितके ह्यभूत्। नररूपधरो जीवः पश्चादत्र नपुंसकः ॥ ६६ ॥
ब्राह्मजे वनिता ह्यासीत्पूर्वे जन्मनि मानदः । पूर्वजन्मनि योषाभूत् क्लीवश्चात्रैव जन्मनि ॥ ६७ ॥
हिमांशुसंभवे सूत पंचषष्टिमितेऽभवत् । षण्ढः प्राक्संभवे चात्र संभवे पुरुषोऽस्त्ययम् ॥ ६८ ॥
श्वेतांशुसूनौ षट्षष्टिमिते क्लीवः पुराभवे । बभूव वनिता चापि पुरुषश्चात्र संभवे ॥ ६९ ॥
शशाङ्कात्मजसंज्ञे प्राक् सप्तषष्टिमितेऽभवत् । नारी तथात्र जनुषि षण्ढरूपधरस्त्वसौ ॥ ७० ।
अष्टषष्टिमिते पूर्वभवे शीतांशुपुत्रके । षण्ढोऽभूद्वनिता पश्चान्नारी चात्रैव जन्मनि ॥ ७१ ।
कूने सप्ततिसंख्ये प्राग्वनिता विनतात्मज । जन्मन्यत्रास्त्यसौ जीवः स्त्रीस्वरूपधरो भृशम् ॥७२।
शीतरश्मिभवे पूर्वभवे सप्ततिसंमिते । बभूव नारी ना पश्चान्नारी चात्रैव जन्मनि ॥ ७३
अमृतांशुसुते सूत कुसप्ततिमिते पुरा । नपुंसको भवेज्जीवो वनिता त्वत्र जन्मनि ॥ ७४
द्विजेशसूनौ षण्ढः प्राक् द्विसप्ततिमितेऽण्डज । पुनर्जन्मन्यभूत्षण्ढः पुरुषश्चात्र संभवे ॥ ७५
द्विजराजात्मजे नाभूत् प्राक् त्रिसप्ततिसंख्यके । ना परे जनुषि प्राप्ते षण्ढश्चात्रैव जन्मनि ॥ ७६
चन्द्रपुत्रे पुरा सूत चतुःसप्ततिसंख्यके । षण्ढो बभूव जीवोऽयमत्र जन्मनि वै नरः ॥ ७७
पञ्चसप्ततिसंख्याके वनितेन्दुसुते पुरा । नरो ह्यासीत्पुमान्पश्चाज्जन्मन्यत्र पतत्रिण ॥ ७८
विधुजेऽभूत्पुमान्पूर्वे षट्सप्ततिमितेऽण्डज । वनितारूपभृच्चासावत्र जन्मनि निश्चयात् ॥ ७९
सुधांशुसूनौ प्रागासीत्त्र्यूनेऽशीतिमिते पुमान् । पश्चात्षण्ढोऽत्र जनुषि क्लीवोऽसौ चास्ति मानद८०
शुभ्रांशुसंभवे द्व्यूनेऽशीतिसंख्ये पुराभवे । नपुंसकोऽभवच्चात्र योषिता विनतात्मज ॥ ८१
अब्जात्मजे पुरा योषा कूनेऽशीतिमितेऽभवत् । नपुंसकस्तथा पश्चात्पुमानत्रैव जन्मनि ॥ ८२

१ पापादत्र—खपु० । २ वापि—खपु० ।

अथाऽशीतिमिते पूर्वभवे सोमभवेऽण्डज। बभूव पुरुषो जन्मन्यत्रायं नररूपधृक् ॥ ८३ ॥
एकाशीतिमिते सूत ग्लौसूनौ प्राग्भवेऽभवत्। नपुंसकः पुनः षण्डो वनिता त्वत्र जन्मनि ॥ ८४ ॥
शशांकभवसंज्ञे प्राग् बभूव वनिता ह्यसौ। नररूपधरो जीवश्चात्र जन्मनि सुव्रत ॥ ८५ ॥
अथो व्यशीतिमितके रोहिणीसुतसंज्ञके। प्रागासीत्पुरुषः पश्चान्नरः प्रतिभवे नरः ॥ ८६ ॥
ब्राह्मात्मजे चतुर्युक्तेऽशीतिसंख्ये पुराभवे। बभूव वनिता सूत जन्मन्यत्रास्ति योषिता ॥ ८७ ॥
हिमांशुपुत्रे प्रागासीत्पश्चाशीतिमितेऽण्डज। नपुंसकः पुनर्नारी पुरुषश्चात्र जन्मनि ॥ ८८ ॥
षडशीतिमिते पूर्वभवे शीतांशुसंभवे। पुरुषोऽभूदसौ जीवो जन्मन्यत्र नपुंसकः ॥ ८९ ॥
रात्रीशसूनौ सप्ताढ्येऽशीतिसंख्ये नरोऽभवत्। पुनर्जन्मनि नारी च षण्ढः संप्रति पुत्रक ॥ ९० ॥
शीतरश्म्यात्मजे चासीदष्टाशीतिमिते पुरा। नपुंसकोऽत्र जन्तुषि नपुंसोऽस्ति पतत्रिण ॥ ९१ ॥
नवाशीतिमिते वत्स द्विजराजसुतेऽभवत्। पुरुषः प्राग्भवे नारी पश्चान्नार्यत्र जन्मनि ॥ ९२ ॥
चन्द्रात्मजे महाभाग नार्यभूत् प्राग्भवे पुनः। नपुंसकोऽत्र जन्तुषि जीवोऽयं गरुडाग्रज ॥ ९३ ॥
कुयुक्तनवतिप्राप्ते चन्द्रपुत्रे पुराभवे। षण्ढोऽभवत्पुरा नारी षण्ढश्चात्रैव जन्मनि ॥ ९४ ॥
ग्लावात्मजेऽथ नवतिद्वियुक्ते पूर्वजन्मनि। बभूव पुरुषः सूत जन्मन्यत्र नरोऽस्त्यसौ ॥ ९५ ॥
रोहिणीसंभवे नारी पूर्वजन्मन्यभूदसौ। नपुंसकः पुनः क्लीवो जन्मन्यत्र च पुत्रक ॥ ९६ ॥
ब्राह्मपुत्रे पुरा षण्ढः षड्नवे शतसंख्यके। बभूव वनिता त्वत्र विनतानन्दवर्धन ॥ ९७ ॥
श्वेतांशुजे महाबाहो पंचोने शतसंमिते। प्राग्भवे पुरुषो ह्यासीत् षण्डो नाप्यत्र जन्मनि ॥ ९८ ॥
शीतांशुसूनौ प्रागासीच्चतुर्हीने शतेऽण्डज। षण्ढः प्राक्संभवे ह्यत्र संभवे पुरुषोऽस्त्यसौ ॥ ९९ ॥
न्यूने शते महाभाग शशाङ्कात्मजसंज्ञके। प्राङ्नारी त्वपरे षण्ढो बभूव ह्यस्ति सांप्रतम्॥१००॥
द्व्यूने शतमिते सूत चन्द्रसूनौ पुराभवे। आसीन्नरः पुनर्नारी जन्मन्यत्र पतत्रिण ॥ १०१ ॥
रोहिण्यात्मजसंज्ञे प्राक्ऊने शतमितेऽण्डज। षण्ढोऽभवन्नरः पश्चाद्वनिता त्वत्र जन्मनि ॥ १०२ ॥
शतसंख्येऽभवत्सूत पुरा श्वेतांशुसंभवे। वनिता वनिता पश्चाज्जीवोऽयं चात्र जन्मनि ॥ १०३ ॥
शशाङ्कसंज्ञके सूत कुयुक्तेः शतसम्मिते। बभूव पुरुषः पूर्वं ना पुनर्वनिताऽधुना ॥ १०४ ॥
ततो ब्राह्मभवे ह्यासीत्प्राग्भवे द्वियुते शते। नपुंसको महाभाग सांप्रतं च नपुंसकः ॥ १०५ ॥
तमीनाथभवे वत्स त्रियुक्ते शतसंख्यके। प्राग्योषा ना भवेत्पश्चात्पुनः क्लीवोऽत्र जन्मनि॥१०६॥
चतुर्युक्ते शते सूत पुरा ब्राह्मसुतेऽभवत्। पुरुषः षण्ढ एवास्ति जन्मन्यत्र पतत्रिण ॥ १०७ ॥
पंचोत्तरशते ह्यासीदमृतांशुजसंज्ञके। षण्ढः प्राक् पुरुषः पश्चादत्र जन्मनि वै नरः ॥ १०८ ॥
षडुत्तरशते सूत कलानाथजसंज्ञेक। वनिता प्राग्भवे ह्यासीत्पुरुषश्चात्र जन्मनि ॥ १०९ ॥
अमृतांशुसुते पूर्वे सप्तोत्तरशतेऽभवत्। जीवोऽयं पुरुषो जन्मन्यत्रास्ति पुरुषोऽण्डज ॥ ११० ॥
कलानाथसुते त्वष्टयुक्शतेऽसौ पुरा भवे। वनिताऽभूदथो सूत षण्ढश्चात्रैव जन्मनि ॥ १११ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके स्त्रीपुंनपुंसकस्वरूपनिर्णयाध्यायः सप्तमः ॥ ७ ॥

अरुण उवाच।

जीवात्सहायाः कथिताः प्राग्भवे त्वत्र जन्मनि। सव्यवस्थाः कथं देव नियोज्या वक्तुमर्हसि ॥ १ ॥

---

१ संप्रति वै नरः—खपु०।

श्रीसूर्य उवाच ।

सहायैर्यैः समायुक्तश्चक्रे यच्चत्पुरानघ । जीवोऽसौ तानहं वक्ष्ये पुण्यपापसमुद्भवान् ॥ २
यथा व्यवस्थितान् जन्मन्यत्राधोऽथोक्तलक्षितान्[1]सहायान् क्रमयोगेन जीवाद्यैः शृणु तत्त्वतः॥३
जीवाख्ये प्रथमे सूत पूर्वजन्मन्यभूद् ध्रुवम् । सहायैः पञ्चभिर्युक्तः शुभाशुभनिरूपणे ॥ ४
जीवेनानेन यत्पूर्वं शुभाशुभमुपार्जितम् । मिलित्वा सप्तभिस्त्वत्र सहायैरपरे गुरौ ॥ ५
तृतीये प्राग्भवे सूत सुनासीरपुरोधसि । चक्रे शुभाशुभं यत्तत्सहायैस्त्रिभिरप्यसौ ॥ ६
सहायैः केन युक्तोऽभूत्प्राग्जन्मनि खगेश्वर । चतुर्थेऽङ्गिरसे प्राप्ते तद्व्यवस्थामिह[2] शृणु ॥ ७
बृहस्पतौ पञ्चमिते सहायैपरितः पुनः । कृतवान् यदयं जीवः पूर्वजन्मनि तच्छृणु ॥ ८
देवेज्यसंज्ञके षष्ठे जीवेनानेन यत्कृतम् । प्राग्भवे सदसत्कर्म सहायैर्बहुभिः स्फुटम् ॥ ९
आचार्ये सप्तमे सूत सहायाभ्यां युतस्त्वसौ । यच्चक्रे प्राग्जनुष्यत्र व्यवस्थां शृणु तद्वयोः ॥१०
यच्चकार परे जन्मन्यष्टमे गरुडाग्रज । शचीपतीज्ये नवभिः सहायैस्तान् वृणोम्यहम् ॥ ११
नवमे शक्रपूज्ये प्राक्कृतं षड्भिः सहायकैः । शुभाद्यमिह तान्वक्ष्ये सव्यवस्थान् सहायजान् ॥१२
देवामात्ये दशमिते मिलित्वा पूर्वजन्मनि । यैश्चकार शुभं पापं तानहं वच्मि सांप्रतम् ॥ १३ ॥
वाचस्पतौ महाभाग ह्येकादशमिते पुरा । दशभिर्यत्कृतं कर्म मिलित्वा तदिह शृणु ॥ १४ ॥
सहायैरष्टभिः सूत पुरा चक्रे यदिच्छया । व्यवस्थितिमथाष्टानां वक्ष्ये वज्रीज्यकेऽधुना ॥ १५ ॥
त्रयोदशे शक्रमान्ये स्त्रीसहायेन यत्कृतम् । तद्व्यवस्थामहं वक्ष्ये जन्मन्यत्र पतत्रिण ॥ १६ ॥
पञ्चभिर्यत्पुरा चक्रेऽप्यत्र तेषां व्यवस्थितिः । वक्ष्ये चतुर्दशे देवाचार्ये शृणु तु पुत्रक ॥ १७ ॥
कृतं पंचदशे रौद्रे सुरामात्ये सहायकैः । जीवेन यैर्मिलित्वा तान्यहं वच्म्यत्र जन्मनि ॥ १८ ॥
यदर्जितं पुरा सूत सहायैः केनकेन वै । इन्द्रमंत्रिणि तत्सर्वं व्यवस्थां शृणु सांप्रतम् ॥ १९ ॥
अथो सप्तदशे वत्स स्वर्गेशेज्ये सहायकैः । यैरेकादशभिः सार्धं कृतवान् शृणु तानिह ॥ २० ॥
अमरार्हे महाभाग पुराष्टादशके कृतम् । सहायाभ्यां मिलित्वात्र तयोर्वक्ष्ये व्यवस्थितिम् ॥ २१ ॥
गीर्वाणमान्ये कूने प्रागथ विंशन्मितेऽण्डज । यैर्युक्तस्त्वमितैश्चक्रे सहायैरत्र वच्मि तान् ॥ २२
पुरा जिते सहायैर्यैर्मिलित्वा कर्म चाद्भुतम् । तान् वृणोम्यत्र जन्मनि वासवेज्ये सहायकान्॥२३
विंशन्मिते कुयुक्ते तु मघवार्हे पुरार्जितम् । यैः सहायैः शुभं चान्यत्तानहं वच्मि चाधुना ॥ २४
सहायैकादशैः कर्म यच्चक्रे मिलितस्त्वसौ । द्वाविंशन्मितके सर्वान् सुरमंत्रिणि वच्मि तान्॥२५
दैत्यारीज्ये त्रयोविंशन्मितके पूर्वजन्मनि । मिलित्वा त्रिसहायैर्यच्चक्रे वक्ष्येऽत्र तानहम् ॥ २६
त्रयोदशैः पुरा सूत युक्तोऽभूच्च सहायकैः । चतुर्विंशन्मिते पुत्र प्राप्ते सुरगुरौ भृशम् ॥ २७
देवमंत्रिणि यच्चक्रे पंचविंशन्मिते पुरा । एकादशैः सहायैस्तानत्राहं विवृणोम्यथ ॥ २८
वृन्दारकेज्ये षड्विंशन्मितके पूर्वजन्मनि । युक्तो विंशत्सहायैश्च वक्ष्येऽत्र तद्व्यवस्थितिम् ॥ २९
सप्तविंशन्मिते वत्स सुराचार्येऽभवन्पुरा । पुरुषोऽयं महाभागश्चासहायो ह्यतन्द्रितः ॥ ३०
चक्रे यदशुभं कर्म राजसाहाय्यतोऽण्डज । इन्द्रामात्ये परे जन्मन्यष्टाविंशन्मितेऽण्डज ॥ ३१
नपुंसकसहायाच्च प्राग्भवे समुपार्जितम् । यत्पापं देवपूज्येऽत्र कूने त्रिंशन्मितेऽण्डज ॥ ३२
त्रिंशन्मिते तु शक्रार्हे स्त्रीसाहाय्याद्यदर्जितम् । तद्व्यवस्थां महाभाग शृणुष्वावहितोऽण्डज॥३३

---

१ इतः—खपु० । २ रहितः—खपु० ।

अथो भृत्यसहायात्प्राक् शुभं वा यदि वाशुभम्। कुत्रिंशन्मितके सूत नाकेशार्चितके स्फुटम्॥३४॥
गीर्वाणवन्द्ये तु रणात्साहाय्यात्कृतवानसौ। तद्वयवस्थामहं वक्ष्ये चात्र जन्मनि मानद॥ ३५॥
त्रिंशन्मिते सुरेज्ये प्राक् सहायाद्वृषभादयम्। कृतवान् यत्त्रियुक्ते तु तद्वक्ष्याम्यत्र तत्त्वतः॥३६॥
म्लेच्छसङ्गात्सहायाद्यच्छुभाशुभमुपार्जितम्। प्राग्भवे खग तत्स्पष्टममरार्जितसंज्ञके॥ ३७॥
पञ्चत्रिंशन्मिते सूत लेखामात्ये पुराभवे। वेश्यासङ्गान्महत्पापं कृतवान्, शृणु यत्नतः ३८॥
चाण्डालसङ्गात्सततं यच्चक्रे खग चाद्भुतम्। तद्वयवस्थाविवरणं ज्ञेयमिन्द्रपुरोधसि॥ ३९॥
दूतिकासङ्गजात्पूर्वभवे यत्कृतवानसौ। सप्तत्रिंशन्मितेऽत्रैव वृषमन्त्रिणि च स्फुटम्॥ ४०॥
चक्रार वटुभिः सार्धं यज्ञीवः पूर्वजन्मनि। त्रिदशार्हेऽत्र तत्सर्वमष्टत्रिंशन्मिते सुत॥ ४१॥
विबुधेज्ये तथा कूने चत्वारिंशन्मितेऽण्डज। स्त्रीसहायाच्चकारासौ तद्वयवस्थामवेह्यथ॥ ४२॥
चत्वारिंशन्मिते यत्प्राक् कृतवान् गरुडाग्रज। स्वर्गाचार्ये सहायाभ्यां शुभमन्यत्परिस्फुटम्॥४३॥
चत्वारिंशत्कुयुक्ते प्रागर्जितं यच्छुभाशुभम्। भवेज्येऽत्र जानीहि सहायरहितं च यत्॥ ४४॥
सूत्रामपूज्ये चाण्डाल्याः सङ्गमाद्यदुपार्जितम्। तत्फलं चात्र जनुषि सहायस्थां व्यवस्थितिम्॥४५॥
यवनीसङ्गमात्सूत यच्चक्रे प्राक् शुभाशुभम्। सुरार्हिते व्यवस्थाहं वक्ष्येऽत्र जनुषि स्फुटम्॥ ४६॥
ब्राह्मण्याः सङ्गमात्पूर्वं यच्चक्रे शुभमन्यथा। तस्या विवरणं सूत वृषाचार्ये मयोदितम्॥ ४७॥
स्वर्गेशेज्ये पुरा सूत चकार कुटिलच्छलात्। चत्वारिंशन्मिते पञ्चयुक्ते वै ह्यत्र जन्मनि॥४८॥
स्वर्देवपूज्ये षट्चत्वारिंशत्संख्ये पुराभवे। यत्कृतं सदसत्कर्म सहायरहितं शृणु॥ ४९॥
यत्सहायाद्विधिज्ञानां फलं सदसदर्जितम्। तत्त्रिहीनेऽत्र देवार्हे पञ्चाशन्मितके स्फुटम्॥ ५०॥
द्यूनेऽमरेज्यसंज्ञे प्राक् पञ्चाशन्मितकेऽण्डज। सहायाद्योगिनां चक्रे तद्वयवस्थामथो शृणु॥५१॥
अस्वप्नामात्यके कूने पञ्चाशन्मितके पुरा। त्रिसहायैः कृतं सार्धं तद्वयवस्थां प्रवक्ष्यहम्॥ ५२॥
पञ्चाशन्मितके नाक्षीन्द्रेज्ये पूर्वभवेऽण्डज। सहायान्नृपतेर्यच्च चकारासौ च तच्छृणु॥ ५३॥
अथो नर्तनशीलस्य साहाय्यादर्जितं पुरा। गीर्वाणार्हे कुपञ्चाशन्मितकेऽतत्परिस्फुटम्॥ ५४॥
वृन्दारकार्चिते द्वयाढ्ये पञ्चाशन्मितके पुरा। जीवघातकशीलानां सङ्गाद्यत्कृतवान् शृणु॥ ५५॥
पुरंदरेज्ये प्राक् सूत सहायैर्द्विजसत्तमैः। यत्कृतं तद्वृणोम्यत्र विनतानन्दवर्धन॥ ५६॥
सहायैर्धर्मयुक्तैः प्रागर्जितं यच्छुभं खग। लेखपूज्ये चतुर्युक्ते पञ्चाशन्मितके स्फुटम्॥ ५७॥
पञ्चाशत्पञ्चयुक्ते प्राग्वासवार्हे शुभाशुभम्। स्वगात्रेजात्सहायाच्च यदकारि च तत्स्फुटम्॥५८॥
आखण्डलार्चिते वेदहीने षष्टिमितेऽण्डज। स्वज्ञातिजसहायात्प्रागर्जितं शुभमन्यथा॥ ५९॥
आदित्येज्ये पुरा द्यूने यत्कृतं षष्टिसंमिते। तत्सहायैकयुक्ते तच्चात्र जन्मनि वक्ष्यहम्॥ ६०॥
द्यूने षष्टिमिते पूर्वभवे चक्रे यदिच्छया। जिष्णुपूज्ये महाभाग सहायाभ्यां च तत्स्फुटम्॥६१॥
एकोनषष्टिमितके सुरराजेज्यसंज्ञके। प्रागर्जितं सहायैर्यद्बहुभिश्चात्र वक्ष्यथ॥ ६२॥
षष्टिसंख्ये पुराकारि वृत्रहेज्ये शुभाशुभम्। स्फुटमत्र महाभाग स्त्रीसाहाय्यात्पतत्रिण॥ ६३॥
स्वर्देवेज्ये पुरा चक्रे कुषष्टिमितकेऽण्डज। यत्सदाद्यं समस्तं तत्सहायाभ्यां वृणोम्यहम्॥ ६४॥
गीर्वाणामात्यके प्राग्यच्छुभं वा यदि वाशुभम्। सहायान्मंत्रिणश्चक्रे द्विषष्टिमितके स्फुटम्॥६५॥
इन्द्रामात्ये त्रियुक्ते प्रागर्जितं षष्टिसंमिते। नीचसङ्गाद्वयवस्थाहं तद्वृणोम्यत्र जन्मनि॥ ६६॥
पुरन्दरार्हे प्राक् सूत चतुःषष्टिमिते कृते। शुभाशुभं सहायाभ्यां स्फुटं भवति सांप्रतम्॥ ६७॥

१ जीवश्चेतनशीलस्य—खपु०।

पंचषष्टिमिते वत्स सुपर्वेज्ये चकार यत् । प्राग्भवे चोरसंगाच्च तद्व्यवस्थां वृणोम्यहम् ॥ ६८ ॥
षड्युक्ते षष्टिसंख्ये यत्सदाद्यं प्राक् समर्जितम् । सहायैस्त्रिभिरप्यत्र वृषामात्ये त्ववेहि तत्॥६९॥
सप्तषष्टिमिते सूत शक्रामात्ये पुराभवे । सहायाद्व्रजजात्सर्वं यदकारि च तच्छृणु ॥ ७० ॥
वृन्दारकार्हे प्राग्जन्मन्यष्टषष्टिमितेऽण्डज । सहायरहितश्चासौ चक्रे सर्वं शुभाशुभम् ॥ ७१ ॥
कूने सप्ततिसंख्ये प्राङ् मघवार्हे यदर्जितम् । तद्व्यवस्थां शृणुष्वाथ यतश्चात्रैव जन्मनि ॥७२॥
अथ सप्ततिसंख्ये प्राक् त्रिदशेज्ये चकार यत् । सदाद्यमत्र जनुषि शृणु मत्तो व्यवस्थितिम्॥७३॥
कुसप्ततिमिते वत्स प्रागस्वप्नार्चिते च यत् । कृतवान् वैष्णवानां तु प्रसङ्गादत्र तत्स्फुटम् ॥७४॥
न च सङ्गात्पुरा सूत यदकारि शुभाशुभम् । द्विसप्ततिमितेऽस्वप्नामात्ये त्वत्र व्यवस्थितिम् ॥७५॥
योगीश्वराणां सङ्गाच्च शुभं सर्वमकारि वै । त्रिसप्ततिमिते त्वत्र सुरराजपुरोधसि ॥ ७६ ॥
चतुःसप्ततिमे सूत देवेशेज्ये पुरा कृतम् । व्यवस्थितिं पुनस्त्वत्र धर्मिष्ठानां च सङ्गमात् ॥ ७७ ॥
पंचसप्ततिमे सर्वमर्जितं यत्पुराभवे । देवेशपूज्ये सकलं विबुधानां प्रसङ्गतः ॥ ७८ ॥
शैवानां खलु संगात्प्रागर्जितं सदसत्पुरा । षड्युक्त सप्ततिमिते देवेशार्हे परिस्फुटम् ॥ ७९ ॥
स्त्रीपुंसोः संगमात्सूत सप्तसप्ततिमेऽर्जितम् । सर्वं सुरपतीज्ये तद्वक्ष्येऽहं चात्र जन्मनि ॥ ८० ॥
सूर्यभक्तिपराणां यत्सङ्गमात्समुपार्जितम् । द्व्यूनेऽशीतिमिते सूत ज्ञेयं त्रिदशमंत्रिणि ॥ ८१ ॥
पुरुहूतार्चिते कूने प्राग्भवेऽशीतिसंमिते । कुटिलात्संगमात्सर्वं यदकार्यत्र जन्मनि ॥ ८२ ॥
अशीतिमितके सूत मरुत्पूज्ये पुराभवे । शाक्तानां सहयोगात्तु यत्कृतं तद्वृणोम्यहम् ॥ ८३ ॥
वारस्त्रीयोगतः पापं यच्चक्रे पितृसङ्गमात् । शुभं कृशीतिमितके मरुदीज्ये परिस्फुटम् ॥ ८४
पुंस्त्रीसङ्गान्महाभाग यदकारि पुराभवे । द्व्यूढचेऽशीतिमितेऽवेहि पुरुहूतप्रियेऽधुना ॥ ८५ ॥
साहाय्यादेवभक्तानां यत्पुण्यं समुपार्जितम् । तान् सहायानहं वक्ष्ये शक्राचार्ये व्यशीतिके ॥८६॥
संक्रन्दनेज्ये प्राक् सूत चतुराढ्ये त्वशीतिके । रजकासंगतश्चक्रे यदत्र शृणु पुत्रक ॥ ८७
मातृसङ्गात्सदा सर्वमर्जितं पूर्वजन्मनि । आखण्डलार्हे निखिलं पञ्चाशीतिमिते शृणु ॥ ८८
राजपत्नीप्रसङ्गाद्यच्चक्रे शुभमथाशुभम् । षडशीतिमिते त्वत्रावेहि वृद्धश्रवार्हके ॥ ८९
सप्ताशीतिमिते पूर्वभवे नाकेशवन्दिते । म्लेच्छसङ्गात्कृतं यद्यच्छुभाद्यं शृणु पुत्रक ॥ ९०
परस्त्रीसङ्गमात्पूर्वभवे सर्वं यदर्जितम् । तत्सर्वं पुरुहूतस्यामात्येऽवेहि पतत्रिण ॥ ९१
दूतीसङ्गात्पुरा चक्रे पापं पुण्यं द्विजन्मनः । वज्रिवन्द्ये नवाशीतिमिते सर्वं विवेचितम् ॥ ९२
अथोः नवतिसंख्ये प्राक्कर्णधारसहायतः । यत्पापं कृतवानत्र मरुद्वन्द्येऽप्यवेहि तत् ॥ ९३
ब्राह्मणस्य साहाय्यात्प्राग्यच्छुभं समुपार्जितम् । निर्जरेज्ये स्फुटं ज्ञेयं कुनवत्या मितेऽण्डज॥९४॥
अथो वह्निमुखार्हे तु द्विनवत्या मितेऽण्डज । नटीसाहाय्याद्यार्त्किंचिदर्जितं प्राग्वदाम्यहम्॥ ९५
अन्त्यजासङ्गतश्चक्रे यत्पापं भ्रातृतः शुभम् । त्रिनवत्या मिते जिष्णुमान्ये तच्छृणु पुत्रक॥९६॥
स्वैरिणीसङ्गमाद्वत्स कृतवान् पूर्वजन्मनि । जिष्णुवन्द्ये तु सर्वं तत् षडूने शतके स्फुटम् ॥ ९७
दिवस्पतीज्ये पञ्चोने शतसंख्ये पुराभवे । सवर्णस्त्रीसाहाय्याच्च यत्कृतं शृणु तत्खग ॥ ९८
स्त्रीषण्ढयोगात्सततं साहाय्यात्पूर्वजन्मनि । सुपर्वाणार्चिते वक्ष्ये षण्णवत्या मितेऽण्डज ॥ ९९
पितृमातृसाहाय्यात्प्राक् शुभं वाप्यशुभं कृतम् । लेखाचार्ये त्रिहीनेऽत्र शते सर्वं मयोदितम्॥१००
अमर्त्यपूज्ये निखिलं शुभाशुभमुपार्जितम् । राजपत्नीसाहाय्यात्प्राग् द्व्यूने शतमिते स्फुटम्॥१०१

---

१ सुरपूज्ये—खपु० ।

कूने शतमिते सूत प्राग्भवे यत्समर्जितम्। अमृतान्धसमान्ये तत्सहाभ्यां प्रदर्शितम् ॥ १०२ ॥
ततोऽमर्त्यार्चिते सूत शतसंख्ये पुराभवे। सहायैर्बहुभिर्युक्तश्चासीद्वृक्ष्ये व्यवस्थितिम् ॥ १०३ ॥
ऋभुपूज्ये कुयुक्ते प्राक् शतसंख्ये पतत्रिण। सहायैः शतशोयुक्तः प्रागभूत्पृच्छकस्त्वसौ ॥ १०४ ॥
द्वियुक्ते शतसंख्ये यद्गुरुसंगाच्च पुत्रक। कृतं शृणु पुरा सर्वमत्रास्वम्नार्हके स्फुटम् ॥ १०५ ॥
गुर्वङ्गनासाहाय्याच्च चक्रे पापं शुभं च यत्। ऋभवैः पूज्यजीवे प्रागत्र सर्वं प्रतिष्ठितम् ॥ १०६ ॥
सहायान्मित्रसंबन्धादर्जितं प्राग्भवेऽण्डज। चतुर्युतशते ज्ञेयं सर्वं गीर्वाणपूजिते ॥ १०७ ॥
पंचोत्तरशते पूर्वभवे तु ऋभवार्चिते। गुर्विण्यास्तु साहाय्याद्वै यत्कृतं शृणु पुत्रक ॥ १०८ ॥
षडुत्तरशते सूत वृषपूज्ये पुराभवे। महापातकिनां संगाद्यज्जातं शृणु सांप्रतम् ॥ १०९ ॥
सप्तोत्तरशतेऽकारि यत्पूर्वं सदसत्सुत। विषदातृसहायाद्वै संगाद्धरिहरार्चनम् ॥ ११० ॥
अष्टोत्तरशते पुत्र लेखेज्ये यत्कृतं पुरा। परवंचनसंगाद्वै जन्मन्यत्र प्रवक्ष्यथ ॥ १११ ॥
स्वाध्याये लक्षणीयेयं सहायानां व्यवस्थितिः। येषांते कथिता यत्नात्पुनः किं श्रोतुमर्हसि ११२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके सहायनिर्णयाध्यायोऽष्टमः ॥ ८ ॥

अरुण उवाच।

दृढकर्मार्जितो धर्मः प्रागानूके दिवाकर। शुक्राज्ज्ञेयः कथं सर्वविवेकाद्वद सांप्रतम् ॥ १ ॥

श्रीसूर्य उवाच।

धर्मो बहुविधः सूक्ष्मो दुर्विज्ञेयो नरैर्यतः। तथापि धर्मतत्त्वज्ञैर्निर्णीतश्च यथा शृणु ॥ २ ॥
यस्तर्केणानुसंधत्ते[1] श्रुतिस्मृत्यविरोधतः। स धर्मः परमो ज्ञेयो ह्यधर्मस्तद्विपर्ययात् ॥ ३ ॥
वेदेषु बहुधा गीतं धर्म एव सतां गतिः। ज्ञात्वेत्थं विविधाँल्लोकान्प्राप्नुयादविचारतः ॥ ४ ॥
धर्मादायुस्तथा राज्यं धर्मात्पुत्रविवर्धनम्। धर्मादर्थस्तथा कामो धर्मादरिष्टनाशनम् ॥ ५ ॥
धर्माच्चशोभिवृद्धिः स्याद्धर्मात्पापक्षयस्तथा। धर्मात्स्वर्गापवर्गश्च धर्माद्रोगविनाशनम् ॥ ६ ॥
धर्मात्सुखं महाबाहो तस्माद्धर्मं समाचरेत्। मानुषीं तनुमाश्रित्य देहभृत्कृतवानसौ ॥ ७ ॥
यद्धर्माञ्श्रद्धया युक्तः प्राग्भवे गरुडाग्रज। तत्त्वमेकमना भूत्वा मत्तो धर्मभृतां वर ॥ ८ ॥
शृणुष्वावहितः सर्वं शुक्रेभ्यश्च पृथक्पृथक्। शुक्रे दानं कुरुक्षेत्रे कृतवान् प्रथमेऽण्डज ॥ ९ ॥
हिरण्यभूतिलानि प्राग्जीवोऽयमयनद्वये। भार्गवे त्वपरे पूर्वभवे प्रादात्कुटुम्बिने ॥ १० ॥
वस्त्रान्नपानगोभूमिफलानि विविधानि च। तृतीये प्रददौ जन्तुः सर्वस्वं च पुराभवे ॥ ११ ॥
गङ्गायां मकरे प्राप्ते सूर्ये दैत्यगुरावसौ। काव्ये चतुर्थसंज्ञे प्रागददद्गोसहस्रकम् ॥ १२ ॥
दानं ब्रह्माण्डसंज्ञं च विश्वचक्रं तथा सुत। कामरत्नाभिधे धेनुमहाभूतघटाभिधम् ॥ १३ ॥
कल्पवृक्षमसौ जीवो नर्मदायां खगेश्वर। तथोशनसि संज्ञे प्राक् पंचमे प्राणधारकः ॥ १४ ॥
ददौ सोपस्करं रम्यं ददौ वेदविदेऽण्डज। कविसंज्ञे पुरा षष्ठे कन्योद्वाहे विधानतः ॥ १५ ॥
चकार विविधैर्द्रव्यैर्ब्राह्मपुण्यविवर्धनम्। सिद्धान्नदानं बहुधा भिक्षुकेभ्यश्च शक्तितः ॥ १६ ॥
ततो ददावसौ दासीदासदानं च केवलम्। घृतपक्वं च पात्राणि वस्त्राण्याभरणानि च ॥ १७ ॥
रविसंक्रमणे पुण्ये व्यतीपातेऽन्यपर्वसु। सप्तसंख्ये भृगौ जन्तुः पूर्वजन्मनि मानद ॥ १८ ॥
आस्फुजित्संज्ञके चाष्टमिते प्रादात्पुराभवे। गोयूथं धनधान्यानि यानशय्यासनानि च ॥ १९ ॥

---

१ सूर—खपु०। २ णानुसन्धश्च—खपु०।

सप्तसागरकं दानं हिरण्याश्वरथादिकम् । संनिहत्यां कुरुक्षेत्रे राहुग्रस्ते दिवाकरे ॥ २० ।
नत्वमे भृगुपुत्रे प्राक् चक्रेऽसौ गरुडाग्रज । गयाश्राद्धं च विधिवत् पितॄणां प्रीतिकारकम्॥ २१ ।
तत्र काम्यानि श्राद्धानि विविधानि फलाप्तये । दानान्यपि च विप्रेभ्यो यथावित्तानुसारतः॥२२।
ततो दशमिते प्रादादसुरेज्ये पुराभवे । रथं वृषयुगोपेतमन्नपूर्णं तुरंगमम् ॥ २३ ।
सासनं चामरोपेतं सुवर्णाभरणैर्युतम् । सांकुशं मत्तमातङ्गं करटीपञ्चभिर्युतम् ॥ २४ ॥
प्राप्ते मृगमुखे भानौ प्रयागे गरुडाग्रज । विप्राय वेदविदुषे दरिद्राय कुटुम्बिने ॥ २५ ।
अथैकादशके दैत्याधिपतौ पूर्वजन्मनि । पञ्चपर्वसु विप्रेभ्यो गोभ्यश्चैवाशनादिकम् ॥ २६ ।
सहिरण्यान्नवस्त्राणि विचित्राण्यददत्पुरा । फलैश्चेक्षुरसोपेतैर्भक्ष्यैश्च द्विजभोजनम् ॥ २७ ॥
ततो द्वादशके चक्रे ब्रह्माराधनकं परम् । तीर्थाटनं प्रकुर्वन् स व्रती भृगुसुते पुरा ॥ २८ ॥
दनुजाधिपतौ प्रादान्त्रयोदशमितेऽब्दज । दानं कल्पलतासंज्ञं सहस्रद्विजभोजनम् ॥ २९ ॥
तुलापुरुषदानं च प्राग्जन्मनि खगेश्वर । ततश्चतुर्दशे वत्स भृगुनन्दनसंज्ञके ॥ ३० ॥
ब्राह्मणस्य विवाहेन कन्यायाश्च पुराभवे । जीवेनानेन सततं प्रपादानमनुत्तमम् ॥ ३१ ॥
लेखारीज्ये पुरा चक्रे विप्राणां प्रतिपालनम् । पूजनं पथिकानां च सद्भ्राणां श्रद्धया तथा॥३२॥
जन्तुः पञ्चदशे चासौ विंशितकश्यपात्मज । षोडशे भृगुजे सूत चकारासौ प्रयत्नतः ॥ ३३ ॥
गोरोगभञ्जनं दिव्यैरोषधैः पूर्वजन्मनि । सत्पात्रेषु तथा दानमन्नवस्त्राश्वकाञ्चनम् ॥ ३४ ॥
ततः सप्तदशे प्रादाद्दानवेज्ये पुराभवे । कार्तिक्यां पूर्णिमायां तु शशाङ्कग्रहणेऽण्डज ॥ ३५ ॥
भक्ष्यभोज्यानि वस्त्राणि सुवर्णाभरणानि च । ददावष्टादशे सूत दैत्यपूज्ये विधानतः ॥ ३६ ॥
कल्पवृक्षं च सिद्धान्नं शिबुकेषु पुराभवे । गोप्रदानं सुविप्राय हेमवस्त्रसमन्वितम् ॥ ३७ ॥
तुलाराशिगते सूर्ये जीवोऽसौ श्रद्धयान्वितः । कूनविंशन्मिते वत्स दानवाधिपतौ पुरा ॥ ३८ ।
कृतवान् पुण्यतीर्थादौ स्नानं दानं च शक्तितः । ततो विंशन्मिते सूत भृगुसंभवसंज्ञके ॥ ३९ ॥
गोदानं विधिवच्चक्रे तथा प्राक् पितृपूजनम् । विंशन्मिते कुयुक्ते प्राग्दैत्यामात्ये विधानतः ॥४०॥
धर्मोपदेशं प्रददौ शक्त्या ब्राह्मणभोजनम् । पुराणश्रवणं चापि चकारासौ पुराभवे ॥ ४१ ।
अथो सुरेज्ये द्वाविंशन्मिते पूर्वभवेऽण्डज । प्रादद्विधिवच्छ्राद्धं गयायां च पुनःपुनः ॥ ४२
भोजनं चापि विप्राणां दानं हव्यं च शक्तितः । देवारिवन्द्ये विधिवत्त्रयोविंशन्मिते पुरा ॥ ४३
प्रददौ कपिलादानं पूर्वजन्मनि मानद । कार्तिके च तथा स्वर्णं विप्रेभ्यः श्रद्धयान्वितः ॥ ४४
दीपांश्च मथुरायां वा घृतेनापूर्य बोधितान् । चतुर्विंशन्मिते प्रादादैत्यमन्त्रिणि पुत्रक ॥ ४५ ।
सत्पात्रेषु पुरा दानमन्नवस्त्रधनादिकम् । परोपकारकरणं तथा धर्मोपदेशनम् ॥ ४६ ।
कृतवान् विष्णुभक्तिं च जीवोऽसौ कश्यपात्मज । पञ्चविंशन्मिते सूत शक्रारीज्ये पुराभवे ॥ ४७
घटशय्यासनादीनि पक्वान्नानि च शक्तितः । दत्तवान् भोजनं विप्रान् गोदानं च पतत्रिण ॥४८
षड्विंशे प्राग्भवे प्रादाद्धैमं हस्तिरथं शुभम् । कुङ्कुमागुरुकर्पूरचन्दनानि फलानि च ॥ ४९
द्राक्षादीन्यपि चाम्बूनि पुष्पाणि सुरभीणि च । दैत्याचार्ये च रत्नानि गङ्गासागरसङ्गमे ॥ ५०
दनुजेज्येऽददत्पूर्वभवेऽसौ श्रद्धयान्वितः । धान्याचलं विधानेन ब्राह्मणाय तपस्विने ॥ ५१
सप्तविंशन्मिते चापि सुवर्णाश्वं गजं तथा । शक्रार्यमात्ये प्रददावष्टाविंशन्मिते पुरा ॥ ५२

---

१ पुरा-खपु०।

वस्त्रभूषणभक्ष्याणि फलानि विविधानि च । सत्पात्रेषु तथा दानं पर्वस्वप्यण्डजोत्तम ॥ ५३ ॥
त्रिंशन्मिते तथैकोने सिताख्ये कृतवानसौ । कृष्णाजिनमहादानं स्वर्णगर्भं तथा पुरा ॥ ५४ ॥
सुरारिवन्द्ये ह्यददत्पूर्वजन्मन्यसौ सुत । विविधान्नानि विप्रेभ्यस्त्रिंशत्संख्ये च पर्वसु ॥ ५५ ॥
चक्रे शिवार्चनं तद्वच्छिवभक्तिपरायणः । एकत्रिंशन्मिते वत्स दानवार्हे च दत्तवान् ॥ ५६ ॥
मधुधेनुमसौ तद्वच्चकार हरिपूजनम् । द्वात्रिंशन्मितके प्रादाद्दानवाचार्यसंज्ञके ॥ ५७ ॥
रत्नाचलं पुरा दानं सिद्धान्नानि द्विजेष्वपि । लेखार्यमात्ये त्रित्रिंशन्मिते प्रागददात्स्वयम् ॥ ५८ ॥
घृतधेनुहिरण्याश्वगोभूम्यन्नानि शक्तितः । देवारीज्ये चतुस्त्रिंशन्मिते प्राकृतवानसौ ॥ ५९ ॥
घृतमिष्टान्नभक्ष्यादिदानान्यपि हरेर्व्रतम् । नासाविन्द्रार्यमात्ये प्राग्दानं चक्रेऽण्डजाधिप ॥ ६० ॥
हरभक्तिरतश्चासीत्पञ्चत्रिंशन्मिते तदा । दैत्यवन्द्येऽथ षट्त्रिंशन्मितेऽसावददात्पुरा ॥ ६१ ॥
तिलधेन्वन्नभाण्डानि तथा चोभयतोमुखीम् । सप्तत्रिंशन्मिते प्रादात्तदा भृगुभवे पुरा ॥ ६२ ॥
रत्नरूप्याचले तद्वद्गुडाचलतिलाचले । दशधेन्वाभिधं दानं विप्रेभ्यः श्रद्धयान्वितः ॥ ६३ ॥
अयने विषुवे चैव व्यतिपातादिपर्वसु । देवार्यमात्ये द्यूने प्राक् चत्वारिंशन्मिते ह्यदात् ६४ ॥
सस्वर्णं गोप्रदानं च वस्त्रान्नाभरणानि च । लवणाज्येक्षुजातानि पर्वस्वपि च शक्तितः ॥ ६५ ॥
नवत्रिंशन्मिते वत्स दनुजार्हे पुराभवे । शतधेनुप्रदानं प्राग्ददावन्नं चतुर्विधम् ॥ ६६ ॥
सूक्ष्माणि पट्टवस्त्राणि विप्रेभ्यश्चायनद्वये । ततो भृग्वात्मजे चक्रे चत्वारिंशन्मिते पुरा ॥ ६७ ॥
गोशय्याघटपक्वान्नवस्त्रान्नोपानहोऽण्डज । छत्रं दण्डं च विधिवद्दानं वै विप्रतर्पणम् ॥ ६८ ॥
चत्वारिंशन्मिते क्राढ्ये सुराचार्ये ददत्तवान् । प्राग्भवे पुस्तकं सान्नं चामरं व्यजनं पुरा ॥ ६९ ॥
ददावसौ महाभाग सस्वर्णं धेनुपंचकम् । भृगुसूनौ तथा द्यूनाढ्ये चत्वारिंशन्मिते पुरा ॥ ७० ॥
त्रियुक्ते प्रागसौ प्रादाच्चत्वारिंशन्मितेऽण्डज । विविधान्नानि गोदानं चक्रे च शिवपूजनम् ॥ ७१ ॥
पूजनं चातिथीनां च वत्स दैत्यपुरोधसि । चत्वारिंशन्मिते सूत चतुर्युक्ते पुराभवे ॥ ७२ ॥
विद्यादानं च विप्रेभ्यो प्रादाल्लेखारिवन्दिते । पञ्चहीने चकारासौ पञ्चाशन्मितके पुरा ॥ ७३ ॥
विधिवत्कपिलादानं तथा सूर्यप्रपूजनम् । तद्व्रताचरणं पुण्यममरारिप्रपूजिते ॥ ७४ ॥
ततो देवगृहं चक्रे प्रतिमास्थापनादिकम् । पक्वान्नदानं विप्रेभ्यस्तथा श्रद्धासमन्वितः ॥ ७५ ॥
षट्चत्वारिंशके मर्त्यारीज्ये पूर्वभवेऽण्डज । पञ्चाशन्मितके द्यूने दैत्यामात्ये शिवालये ॥७६ ॥
स्थितिं चकारासौ सूत रुद्रभक्तिपरायणः । ददौ द्विजानामशनं स्वेच्छया याचितं तथा ॥ ७७ ॥
विविधान्नानि चान्येभ्यः पूर्वजन्मनि निश्चयात् । पञ्चाशन्मितके द्यूने मर्त्यारिविभुसंज्ञके ॥७८॥
शालग्रामशिलादानं चक्रे सोपस्करं तथा । अस्वप्नशत्रुवन्द्ये प्रागददान्महिषीं युवाम् ॥ ७९ ॥
वस्त्रैराभरणैर्युक्तां तथा शय्यासनादिकम् । जीवोऽसौ कूनपञ्चाशत्संमिते विनतात्मज ॥ ८० ॥
पञ्चाशन्मितके वत्स तथेन्द्रारिप्रपूजिते । संन्यासग्रहणं तत्र ब्रह्मचर्यादिधारणम् ॥ ८१ ॥
तीर्थाटनं चकारासौ प्राग्भवे कश्यपात्मज । कुपञ्चाशन्मिते प्रादाल्लेखाचार्यरिपौ पुरा ॥ ८२ ॥
बहुपुस्तकदानं च कृतवांश्च शिवालयम् । स्थापनं शिवलिङ्गस्य ब्राह्मणानां च तर्पणम् ॥ ८३ ॥
द्विपञ्चाशन्मिते चासौ स्वधर्मपरिपालकः । बभूव प्राग्भवे जन्तुरतिथीनां तथैव च ॥ ८४ ॥
सुरारिपूज्ये विधिवद्दानप्रस्थे समाश्रितः । त्रिपञ्चाशन्मिते प्रादाद्दानवार्ये पुराभवे ॥ ८५ ॥
शर्करापर्वतं साङ्गमिष्टदानानि चाण्डज । खेटयज्ञादिके यानि ऋत्विग्भ्यः कथितानि च ॥ ८६ ॥

---

१ तीर्थानां च तथैव च—खपु० ।

ततो वृषारिवन्द्ये प्रागददात्प्राणधारकः । नानाफलानि द्रव्याणि सुगन्धीनि च पर्वसु ॥ ८७
भक्ष्याण्यन्यानि सुमहत्पुष्पाणि सुरभीणि च । चतुराढ्ये तु पञ्चाशन्मितेऽसौ कश्यपात्मज॥८८
इन्द्रार्यर्हे तु पंचाशन्मिते पंचाधिके पुरा । रुद्रभक्तिं चकारासौ श्रद्धया द्विजपूजनम् ॥ ८९
सोपस्करं गृहं दानं चान्ते तीर्थाधिवासनम् । षट्पंचाशन्मिते सूत कृतवान् पूर्वजन्मनि ॥ ९०
गोदानं विप्रमुख्याय विधिवच्चण्डकार्चनम् । गणेशपूजनं चापि पुण्यं शक्रारिवन्दिते ॥ ९१
देवारिमान्ये सप्ताढ्ये पंचाशन्मितके पुरा । विधिना कन्यकोद्वाहमकरोन्मनुजोऽण्डज ॥ ९२
वैवाहिकानि द्रव्याणि ददौ तत्र प्रयत्नतः । वृषारिमंत्रिणि द्व्यूने षष्टिसंख्ये पुराददात् ॥ ९३
वस्त्रान्नपानमुष्णीषमुपवीतं च वैधृतौ । रुद्रवीर्ये तथा कूने षष्टिसंख्ये ददावसौ ॥ ९४
विष्णुपूजोपकरणं तथैवातिथिपूजनम् । सावित्र्याश्च जपं चक्रे विधिवत्कुरुमण्डले ॥ ९५
ततो दानवबन्द्ये प्राक् षष्टिसंख्ये पुराभवे । प्रादात् षोडश दानानि विप्रेभ्यः श्रद्धयान्वितः॥९६
सर्वपर्वसु जीवोऽसौ वस्तूनि विविधानि च । चन्द्रसूर्योपरागेषु विधिवद्विनतात्मज ॥ ९७
अमरारीज्यसंज्ञे प्राक् कुपष्टिमितकेऽण्डज । चकार पंचदेवानां पूजनं पूर्वजन्मनि ॥ ९८
वस्त्रान्नपानभक्ष्यैश्च विविधैर्द्विजपूजनम् । दीपदानं च कार्तिक्यां नानास्थालेष्वयं ददौ ॥ ९९
वृषारिमान्ये प्रददौ द्विषष्टिमितके पुरा । विविधानि च वस्त्राणि राजोपकरणानि च ॥ १०० ॥
नानामृगाश्वाजाद्यानि विविधानि फलानि च । त्रिषष्टिमितके वत्स सुरारीज्ये च दत्तवान्॥१०१
सूर्यग्रहेऽतिदानानि पितृतृप्तिकराणि च । हव्यानि च यथाशक्त्या जीवोऽसौ पूर्वजन्मनि ॥ १०२
चतुःषष्टिमिते प्रादाच्छुभां शय्यां सतूलिकाम् । इन्द्रारिमान्ये प्रागन्नपात्रभक्ष्यासनानि च ॥१०३
वृषारिपूज्ये ह्यददत्पंचषष्टिमिते ह्यसौ । पुरा तैजसपात्राणि सुवर्णाभरणानि च ॥ १०४
राजतानि च विप्रेषु नानापर्वसु चाण्डज । षट्षष्टिमितके प्रादात्सासनाश्वं सतूणकम् ॥ १०५
सन्नाहं कृपिभूमिं च शस्त्राणि विविधानि च । पुरादनुजमान्येऽसौ जीवश्चन्द्रग्रहे सुत ॥ १०६
सप्तषष्टिमिते दानं कृतवान्सर्वरेतसि । प्राग्भवे चान्नवस्त्राणि पुनर्जन्मनि मानद ॥ १०७
ददावसौ गयाश्राद्धं पितृणां तुष्टिहेतवे । अथाष्टपष्टिसंख्ये प्रागददद्ग्रहसंभवे ॥ १०८
दानं सर्वरसोपेतमन्नं विविधसंस्कृतम् । सुगन्धीनि च द्रव्याणि तथा दनुजपूजिते ॥ १०९
कूनसप्ततिमे प्रादादिन्द्रारीज्ये पुराभवे । सोपस्करं गृहं रम्यं शालग्रामं सकाञ्चनम् ॥ ११०
ततः सप्ततिमे सूत दत्तवान् पूर्वजन्मनि । नानाधातुमयाँल्लिङ्गात् जीवोऽसौ श्रद्धयान्वितः ॥ १११
विधिवल्लिंगपूजान्ते विप्रेभ्यो भोजनं तथा । शिवयागसमारंभे चान्ते वृन्दारिमान्यके ॥ ११२
कुसप्ततिमिते चक्रे दानमात्मप्रियं शुभम् । दिवौकसश्च सौवर्णान् ददौ पूर्वभवेऽण्डज ॥ ११३
शक्रारिपूज्ये विधिवद्दानं चोभयतो मुखीम् । द्विसप्ततिमिते वत्स शिववीर्ये पुराभवे ॥ ११४
नित्यदानमसौ चक्रे श्राद्धं च द्विजतर्पणम् । सप्तोनेऽशीतिसंख्ये तु कृतवाञ्श्रद्धयान्वितः ॥ ११५
लक्षधेनुप्रदानं प्राग्जन्तुर्जीवारिमंत्रिणि । ततो देवारिवन्द्ये प्रागददात्पूर्वजन्मनि ॥ ११६
मधुधेनुं तथा दानं धेनुं कार्पाससंभवाम् । विद्यापुस्तकदानं च चतुःसप्ततिभेऽण्डज ॥ ११७
वृषार्यमात्ये प्राग्वत्स पंचोनेऽशीतिसंमिते । नानावाहनदानं च शकटान्दोलनादिकम् ॥ ११८
भक्ष्यं चतुर्विधं चान्नं भूशय्यासनमद्भुतम् । गोवस्त्रं भूषणादीनि बहुमूल्यानि पर्वसु ॥ ११९
सत्पात्रेषु च विप्रेषु सुगन्धान्यददात्पुरा । ततो लेखार्यमात्ये प्राक् षट्सप्ततिमिते सुत ॥ १२

आषाढ्यां पौर्णमास्यां वै दत्तवाञ् श्रद्धयान्वितः । घृतयुक्तानि पात्राणि रत्नानि च धनानि च१२१
प्रददौ भर्तृदानं च जीवोऽसौ कुरुजाङ्गले । मघवेज्यरिपौ द्व्यूनेऽशीतिसंख्ये पुराभवे ॥ १२२ ॥
विप्रैः प्रार्थितवस्तूनि तथैवात्महितानि च । दत्तवाञ् शिविकादीनि भक्ष्याणि विविधानि च॥१२३॥
तीर्थस्नानादिपुण्यानि देवतायतनानि च । चक्रे स्वशक्तितश्चासौ जन्तुः श्रद्धासमन्वितः ॥१२४॥
कूनेऽशीतिमिते प्रादात्प्राग्भवे कश्यपात्मज ।:सर्वरत्नानि विधिवदौषधानि च यत्नतः ॥ १२५ ॥
विद्यापुस्तकभाराणि तथैवान्नानि पर्वसु । इन्द्रारिवन्द्ये विप्रेभ्यश्चातिथिभ्यश्च संक्रमे ॥ १२६ ॥
अथाऽशीतिमिते सूत वृषारीज्ये पुराभवे । सूक्ष्माणि पट्टवस्त्राणि सस्वर्णानि ददावसौ ॥ १२७ ॥
विप्राणामौषधैश्चापि कृतवान् रोगभञ्जनम् । कुयुक्तेऽशीतिसंख्ये प्राग्दानवेन्द्रे प्रदत्तवान् ॥१२८॥
सोमपाने महायागे नानावस्तूनि शक्तितः । विप्रेभ्यः संस्कृतं चान्नं वस्त्रादीन्यपि शक्तितः॥१२९॥
बलिपूज्ये महाभाग द्व्याढ्येऽशीतिमिते पुरा । अनाथब्राह्मणोद्वाहं कृतवान् पृच्छकस्त्वसौ॥१३०॥
तस्मै प्रादान्महाभाग शय्यान्नोपस्कराणि च। त्रियुक्तेऽशीतिसंख्ये प्राक् शम्भुरेतसि शक्तितः१३१
कृतवान्पितृभक्तिं च गयाश्राद्धं विधानतः । बहूनि तत्र दानानि पितृतृप्तिकराणि च ॥ १३२ ॥
भृगूद्भवे चतुर्युक्तेऽशीतिसंख्ये पतत्रिण । विप्रेभ्यः श्रद्धयोपेतः प्रादाच्चासौ पुराभवे ॥ १३३ ॥
वृषभान् स्वर्णशृङ्गाढ्यान् वस्त्रोपेतांश्च पर्वसु । तथा तिलमयीं धेनुं बहुकाञ्चनसंयुताम् ॥१३४॥
प्राप्ते चंद्रग्रहे सूत विप्रायैव कुटुम्बिने । लेखारिपूज्ये पञ्चाढ्येऽशीतिसंख्ये पुरा ददौ ॥ १३५ ॥
पक्षिणामभयं दानं भूस्वर्णाम्बरवाहनम् । षडशीतिमिते चासौ कृतवान् पूर्वजन्मनि ॥ १३६ ॥
परिक्रमणकं भूमेस्तीर्थानां दर्शनं तथा । स्नानान्ते तु महाभाग जपं होमं विधानतः ॥ १३७ ॥
सुरारिभान्ये च तथा ब्रह्मचर्यस्य धारणम् । बलिवन्द्येऽण्डजश्रेष्ठ सप्ताशीतिमिते पुरा ॥ १३८ ॥
चक्रे गङ्गादितीर्थेषु वसतिं प्राददात्तथा । धनानि विविधान्येष वस्त्राण्याभरणानि च ॥ १३९ ॥
भक्ष्यान्सर्वरसोपेतान् ब्राह्मणेभ्यः स्वशक्तितः । पूर्वदेवाधिपेऽष्टाढ्येऽशीतिसंख्ये शिवार्चनम् १४०
काश्यां चक्रे यथा शम्भोर्दानानि प्राग्भवे ह्यसौ । कूने नवतिसंख्ये प्राङ् मघवारीज्यकेऽण्डज१४१
सर्वस्वमददात्पूर्वं विप्रेभ्यः कृतवानसौ । प्रारब्धयोगकर्मणां साधनं गुरुपूजनम् ॥ १४२ ॥
ततो नवतिसंख्येऽसौ शक्रेज्यरिपुसंज्ञके । शुश्रूषां मातृपित्रोश्च चकार प्राग्भवेऽण्डज ॥ १४३ ॥
करुणां सर्वभूतेषु तथा दानं स्वशक्तितः । द्व्याढ्ये नवतिसंख्ये प्राक्चक्रे चासुरपूजिते ॥ १४४ ॥
रुद्रस्याराधनं तद्वदतिथीनां च पूजनम् । क्षीरदानं भूषणोपेतं जीवो वेदविदेऽण्डज ॥ १४५ ॥
ऋभुपूज्यरिपौ सूत द्व्याढ्ये नवतिसंख्यके । स्वधर्मसाधनं तद्वत्पुण्यतीर्थाधिवासनम् ॥ १४६ ॥
जपहोमादिकं चासौ कृतवान्प्राग्भवे ह्ययम् । ततोऽमर्त्यार्यमार्त्ये प्राक्कृतवानिष्टसाधनम्॥१४७॥
नानोपकरणैर्वस्त्रं स्वधर्मपरिपालनम् । धर्मोपदेशनं चापि त्र्याढ्ये नवतिसंख्यके ॥ १४८ ॥
स्मृतिधर्मानुचरणमादितेयारिवंदिते । स्नानं गङ्गादितीर्थेषु दानं तत्र स्वशक्तितः ॥ १४९ ॥
चतुर्नवतिसंख्ये प्राक्चकारासौ महातपः । विबुधेज्यरिपौ तद्वत्पञ्चोने शतसंख्यके ॥ १५० ॥
दानं विप्रवरेभ्यः प्राग्दत्तवांश्च स्वशक्तितः । वेदस्य श्रवणं चापि चक्रे भूदेवपूजनम् ॥ १५१ ॥
धारणं ब्रह्मचर्यस्य व्रतमाचरणं तथा । तीर्थस्नानं च विधिवत्कृतवान् प्राग्भवे ह्यसौ ॥ १५२ ॥

---

१ ह्यसौ—खपु० । २ कार्तिक्यां वनितादानं यथोपस्करसंयुतम् । त्र्यूनेऽशीतिमिते पूर्वदेवेज्ये प्राग्भवे ऽण्डज । कृतवान् कन्यकोद्वाहं ब्राह्मणस्य विधानतः । नानादिव्यानि वस्त्राणि भक्ष्याण्याभरणानि च । इति श्लोकद्वयमधिकम्—खपु० । ३ काश्यप—खपु० । ४ पूर्वै—खपु० ५ कृतवांस्तथा—खपु०।

षण्णवत्या मिते जीवे वोलमान्ये पतत्रिण । न्यूने शतमिते सूत लेखार्यहं पुराभवे ॥ १५३
विष्णोः सन्तोषणं दानैर्ब्रह्मचर्यादिधारणैः । पुनर्जन्मनि पक्षीन्द्र संन्यासग्रहणं तथा ॥ १५४
चकार विधिवत्तत्र सर्वधर्ममहोत्कटम् । सुरार्यमात्ये प्राक्सूत द्वचूने शतमितेऽददत् ॥ १५५
रथाश्वगजभूदानं गोकन्यागृहमद्भुतम् । दास्यारामसुवर्णाद्यं ग्रहणे चन्द्रसूर्ययोः ॥ १५६
कूने शतमिते प्रादात् प्राग्भवे वलिमंत्रिणि । सूर्यग्रहे कुरुक्षेत्रे शक्त्या दानं पतत्रिण ॥ १५७
स्नानं च विधिवच्छ्राद्धं दानं पुण्यविवर्धनम् । ततः शतमिते सूत शक्रार्यहं पुराभवे ॥ १५८
दत्तवान्वनितादानं सर्वस्वं च स्वशक्तितः । सोमग्रहे महापुण्ये विधिवत्कश्यपात्मज ॥ १५९
एकोत्तरशते सूत दानवेन्द्रगुरौ पुरा । दुष्टानां दण्डनं चक्रे प्रजायाः परिपालनम् ॥ १६०
न्यायेन कोशवृद्धिं च पापिनां घातनं तथा । द्व्याढ्ये शतमिते वत्स पुरा वलिपुरोधसि ॥ १६१
चकार विधिवज्जीवः संन्यासग्रहणं पुरा । वृषोत्सर्गं तथा चक्रे सुरमन्त्रिणि संज्ञके ॥ १६२
न्याढ्ये शतामिते सूत पितॄणां तृप्तिकारकम् । दानवामात्यसंज्ञे प्राक्चतुर्युतशते पुरा ॥ १६३
धारणं ब्रह्मचर्यस्य कृतवान्पृच्छको ह्यसौ । अमर्त्यारिगुरौ सूत पंचोत्तरशते पुरा ॥ १६४
नानादेवव्रतानां तु चक्रे ह्याचरणं सुधीः । अस्वप्नेज्यरिपौ पूर्वं षडुत्तरशतेऽण्डज ॥ १६५
वानप्रस्थमसौ जीवः कृतवान् विधिपूर्वकम् । ऋभवारीज्यसंज्ञे तु गृहस्थपदनिश्चयम् ॥ १६६
चकार वनितादानं सर्वोपकरणैर्युतम् । सप्तोत्तरशते वत्स तथैवातिथिपूजनम् ॥ १६७
अष्टोत्तरशते तद्वन्निर्जरारिगुरावसौ । तीर्थाटनं विधानेन कृतवान्यर्मसाधनम् ॥ १६८
एतत्ते कथितं सर्वं विविधं प्राणिनां पुरा । धर्मस्याचरणं सूत पश्चात्किं श्रोतुमिच्छसि ॥ १६९

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके धर्मनिर्णयाध्यायो नवमः ॥ ९ ॥

अरुण उवाच ।

आयुर्ज्ञाने यतः सर्वे लोका भ्रान्ता दिवस्पते । तस्मान्मन्दात्कथं ह्यायुर्ज्ञातुं शक्नोमि यत्नतः ॥

श्रीसूर्य उवाच ।

देहेऽस्मिन्नण्डजश्रेष्ठ यावत्प्राणपरिस्थितिः । तदुक्तं जीवनं विज्ञैस्तावत्तस्य शुभाशुभम् ॥ २
सौरमानेन जीवानां वर्षैर्यावन्मितैरिह । भोगः शुभाशुभानां च कर्मणां श्रोतुमर्हसि ॥ ३
आद्ये शनैश्चरे नाम्नि विनतानन्दवर्धन । आयुर्वर्षशतं प्रोक्तमेकादशसमन्वितम् ॥ ४
सूर्यपुत्रे द्वितीये च चतुःपंचाशदब्दकम् । जीवनं प्रोक्तमथवाष्टादशाढ्यं शतं त्विह ॥ ५
कुषष्टिमितवर्षान्तं कथितं प्राणधारणम् । तृतीये शनिसंज्ञे तु प्रष्टुस्त्रैव जन्मनि ॥ ६
सूर्यसूनाविति ख्याते चतुर्थे गरुडाग्रज । आयुर्वलं मया प्रोक्तं ततः पंचाशदब्दकम् ॥ ७
पंचमे त्वसिते नाम्नि द्विपंचाशत्समान्तकम् । जीवनं कथितं जन्तोः स्फुटमत्र पुरातनैः ॥ ८
सूर्यात्मजे पुनः षष्ठे ह्यायुरत्रैव जन्मनि । कूनषष्टिमिताब्दान्तं कथितं तत्त्वदर्शिभिः ॥ ९
त्वाष्ट्रे सप्तमिते सूत वर्षैः पंचदशान्वितम् । शतमत्र स्फुटं प्रोक्तं प्राणिनां प्राणधारणम् ॥ १०
ततोऽष्टसंख्यके प्रोक्तमायुः सूर्यसुतेऽण्डज । त्रिपञ्चाशन्मिताब्दान्तं भोगाय विनतात्मज ॥ ११
पातङ्गिसंज्ञके त्वत्र नवसंख्ये खगाधिप । नवोत्तरशताब्दान्तं जीवनं त्वत्र जन्मनि ॥ १२
ततो दशमिते सर्वमायुः प्रोक्तं मनीषिभिः । सूर्यजे पक्षिशार्दूल षोडशाढ्यं शताब्दकम् ॥ १३
सौरनाम्नि महाबाहो त्वेकादशमितेऽधुना । हायनानां शतं सैकं जीवनं कथितं मया ॥ १४

पौषे द्वादशसंख्ये तु स्थितिरत्रैव जन्मनि। जन्तोः षष्टिमिताब्दान्तं नियतं विनतात्मज ॥ १५ ॥
अथार्किलंज्ञके सूत त्रयोदशमितेऽधुना। भोगः प्रोक्तस्तु संसारे वर्षाणां विंशतिं ध्रुवम् ॥ १६ ॥
चतुर्दशेऽर्कजे नाम्नि जीवोऽयं कश्यपात्मज। त्रिंशन्मितानि वर्षाणि जन्मन्यत्र च तिष्ठति॥ १७॥
ततः पञ्चदशे प्रोक्तमजपुत्रे खगाधिप। चत्वारिंशन्मिताब्दान्तमायुरत्रैव जन्मनि ॥ १८ ॥
षोडशेऽर्कसुते ह्यायुर्दायमुक्तं मनीषिभिः। चतुःसप्ततिवर्षान्तमखिलं त्वत्र संभवे ॥ १९ ॥
सावित्रसंज्ञके वत्स दशसप्तमिते स्फुटम्। षड्डुत्तरं शतं त्वायुः पञ्चपञ्चाशदब्दकम् ॥ २० ॥
ततोऽष्टादशसंख्ये तु न्यूनं शतमितं स्थितिः। वर्षाणां रविजे नाम्नि जनुष्यत्र स्फुटं स्मृतम्२१॥
अथार्कसूनौ सततमायुर्दायं चिरंतनैः। कूने विंशन्मिते प्रोक्तं कूनं शतमितं त्विह ॥ २२ ॥
ततोऽर्कसंभवे विंशन्मितेऽत्रैव पतत्रिण। जीवनं कथितं स्पष्टं पञ्चोनं शरदां शतम् ॥ २३ ॥
रविपुत्रे महाभाग त्वेकविंशन्मिते ध्रुवम्। पञ्चसप्ततिवर्षान्तमायुरत्र प्रकीर्तितम् ॥ २४ ॥
ततोऽजजे स्थितिर्जन्तोरत्रोक्ता शरदां शतम्। षड्डूनमखिलं सूत द्वाविंशन्मितके ध्रुवम् ॥ २५ ॥
त्रयोविंशन्मितेऽत्रैव कालजे गरुडाग्रज। न्यूनं सप्ततिवर्षान्तमायुरुक्तं मनीषिभिः ॥ २६ ॥
अजात्मके चतुर्विंशन्मिते त्वत्र पतत्रिण। षडशीतिमितिः प्रोक्ता स्थितिर्जन्तोर्न संशयः ॥२७॥
पञ्चविंशतिसंख्ये तु जन्तुरत्रैव तिष्ठति। कशीतिमितवर्षान्तं भोगाय रविसंभवे ॥ २८ ॥
ततोऽजसुतसंज्ञे तु षड्विंशे विनतात्मज। त्रिसप्ततिरिहायुः स्याच्छरदामग्रजन्मनि ॥ २९ ॥
सप्तविंशन्मितेऽत्रैव रविसूनौ पतत्रिण। त्रिषष्टिवत्सरान्तं हि स्फुटमायुः प्रकीर्तितम् ॥ ३० ॥
अष्टविंशन्मिते प्रोक्तं कालपुत्रे च पुत्रक। कुपञ्चाशन्मिताब्दान्तं जीवनं त्वत्र जन्मनि ॥ ३१ ॥
ततो रविसुते सूत कूने त्रिंशन्मितेऽखिलम्। प्रोक्तमायुस्त्रिवर्षान्तं त्रियुक्तं वासरं स्फुटम् ॥३२॥
त्रिंशत्संख्येऽजसूनौ तु प्राणिनां प्राणसंस्थितिः। चतुरशीतिरब्दान्तं भोगायात्रैव संभवे॥ ३३ ॥
क्राढ्ये त्रिंशन्मिते वत्स मृत्युपुत्रेऽत्र पुत्रक। जीवनं त्वष्टवर्षान्तमथ विंशोत्तरं शतम् ॥ ३४ ॥
कालात्मजे महाभाग द्वात्रिंशन्मितके ध्रुवम्। द्वायनानां नवाशीतिः स्थितिः प्रोक्ता ऽत्र जन्मनि३५
त्रिंत्रिंशत्संमिते प्रोक्तमायुर्दायं पुरातनैः। मृत्युसूनौ शताब्दान्तं द्वूनमैत्रैव जन्मनि ॥ ३६ ॥
ततो मृत्युसुते नाम्नि चतुस्त्रिंशन्मितेऽण्डज। षट्षष्टिमितवर्षाणि कथितं प्राणधारणम् ॥ ३७ ॥
कालसूनौ महाभाग पञ्चत्रिंशन्मितेऽधुना। द्वादशाब्दान्तमखिलमायुर्जन्तोः प्रतिष्ठितम्॥ ३८ ॥
षट्त्रिंशन्मितके सूत नाम्नि मृत्युभवे त्विह। जीवनं कथितं सर्वं षडब्दान्तं मनीषिभिः॥ ३९ ॥
अथो कालसुते न्यूने चत्वारिंशन्मिते सुत। अष्टादशमिताब्दान्तमायुरुक्तं मयाऽधुना ॥ ४० ॥
अष्टत्रिंशन्मिते धात्रो भवे तु प्राणसंस्थितिः। त्रयोदशमिताब्दान्तं तैर्युतं वा शतं त्विह ॥ ४१ ॥
चत्वारिंशन्मिते कूने मृत्युजेऽब्दद्वयान्तकम्। प्राणस्थितिरमितैरब्दैर्वात्रैव जन्मनि ॥ ४२ ॥
धातृपुत्रे महाभाग चत्वारिंशन्मितेऽधुना। आयुः पञ्चमिताब्दान्तमथ पञ्चोत्तरं शतम् ॥ ४३ ॥
प्रभाकरसुते प्रोक्तं जीवनं त्वत्र संभवे। चत्वारिंशन्मिते क्राढ्ये नववर्षाण्यसंशयम् ॥ ४४ ॥
धातृसूनौ द्वियुक्ते च चत्वारिंशे पतत्रिण। चतुर्दशमिताब्दान्तमथवा तैर्युतं शतम् ॥ ४५ ॥
आयुर्वेदमिताब्दान्तमथवाष्टोत्तरं शतम्। दीप्तांशुजे त्रियुक्ते तु चत्वारिंशन्मितेऽण्डज ॥ ४६ ॥
धातृजेऽत्र चतुर्युक्ते चत्वारिंशन्मिते सुत। पञ्चविंशतिवर्षाणि प्रोक्तमायुर्बलं त्विह ॥ ४७ ॥
शुचिपुत्रे दशाब्दान्तं वा दशाढ्यं शतं स्थितिः। चत्वारिंशन्मिते युक्ते पञ्चभिः परमा सुत४८ ॥

१ संख्येये—खप०। २ प्रोक्तो वर्षोऽत्र जन्मनि—खपु०।३ तैर्युतं वासनं त्विह—खपु०।

चत्वारिंशन्मिते ज्ञेय षडयुक्ते धातृसंभवे । पञ्चत्रिंशन्मिताब्दान्तं प्रोक्तमायुः पुरातनैः ॥ ४९
प्रभाकरौ तथा ऊने पञ्चाशत्संख्यके स्थितिः।सप्तवर्षमिताब्दान्तं शतं सप्तोत्तरं तथा ॥ ५०
ब्रह्मपुत्रे महाभाग जीवनं कथितं त्विह । षोडशाब्दमितं द्वयूने पंचाशत्संख्यकेऽखिलम् ॥ ५१
शुचिजे कूनपंचाशत्संख्यके विनतात्मज । हायनैरूयूनविंशद्भिरायुरग्रे प्रतिष्ठितम् ॥ ५२
विष्णुपुत्रे स्थितिर्जन्तोरत्रोक्ता शतवत्सरम् । चतुर्वर्षयुतं सूत पञ्चाशत्संमितेऽखिलम् ॥ ५३
शुचिसूनौ तथा प्रोक्तं जीवनं प्रथमाब्दकम् । द्व्याढ्यं शतमितं वापि कुपंचाशन्मितेऽखिलम् ॥
द्विपञ्चाशन्मिते ह्यायुर्वर्षैरेकादशैस्त्विह । ब्रह्मजे तैर्युतं वापि शतमत्र प्रकीर्तितम् ॥ ५५
त्रिपञ्चाशन्मितेऽप्युक्ता स्थितिरत्रैव संभवे । कूनविंशत्समान्तं हि मुनिभिः शुचिसंभवे ॥ ५६
दशपञ्चमिताब्दान्तं जीवोदेहेऽत्र तिष्ठति । चतुर्युक्ते हि पञ्चाशत्संमिते ब्रह्मसंभवे ॥ ५७
ब्रह्मसूनौ मया प्रोक्तमायुर्वलमशीतिकम् । पञ्चवर्षयुतं पञ्च पञ्चाशत्संमितेऽधुना ॥ ५८
षट्पञ्चाशन्मिते वत्स ब्रह्मसूनौ हि जीवनम् । जन्तोरेकयुतं विंशत्समान्तं चात्र जन्मनि ॥५९
ऊने षष्टिमिते त्वत्र रौद्राख्ये गरुडाग्रज । कूनविंशत्समान्तं हि निर्याणं प्राणिनामिह ॥ ६०
पञ्चाशदष्टयुक्ते तु मन्दगे विनतात्मज । त्रिचत्वारिंशदब्दान्तमायुरत्र प्रकीर्तितम् ॥ ६१
कूने षष्टिमिते रुद्रसंभवे गरुडाग्रज । द्वियुक्तं विंशदब्दान्तमिह लोके स्थितिर्मता ॥ ६२
अथो षष्टिमिते सूत विष्णुजे जीवनं मतम् । द्व्यूनषष्टिमिताब्दा-तं ध्रुवमत्र परिस्फुटम् ॥ ६३
रुद्रपुत्रे महाभाग कुषष्टिमितके तथा । त्रयोविंशतिवर्षाणि ह्यायुर्वलमुदाहृतम् ॥ ६४
आयुर्दायं दृढं प्रोक्तं कूनपञ्चाशदब्दकम् । मन्दाख्येऽत्र महाभाग द्विषष्टिप्रमितेऽखिलम् ॥६५
त्रिषष्टिसंख्यके सूत कथितं रुद्रजेऽधुना । ह्यष्टाविंशतिवर्षान्ते मरणं प्राणिनामिह ॥ ६६
कोणसंज्ञे मया प्रोक्तं चतुःषष्टिमितेऽण्डज । निधनं सप्तपञ्चाशदब्दान्ते नात्र संशयः ॥ ६७
पञ्चषष्टिमिते सूत रुद्रसूनौ च जीवनम् । सप्तविंशतिवर्षाणि नात्र कार्या विचारणा ॥ ६८
रुद्रात्मजेऽथ षट्षष्टिमिते ह्यायुरुदीरितम् । द्व्यूनपञ्चाशदब्दान्तं जन्मन्यत्र परिस्फुटम् ॥ ६९
सप्तषष्टिमिते त्वत्र यमजे कश्यपात्मज । पञ्चविंशतिवर्षाणि ह्यायुर्दायमुदीरितम् ॥ ७०
द्व्यूने सप्ततिसंख्ये तु नाम्नि रुद्रसुतेऽण्डज । चत्वारिंशन्मिते क्वाढ्ये वर्षान्ते निधनं स्मृतम् ७१
यमात्मजे महाभाग कूने सप्ततिसंमिते । प्रोक्तमायुश्चतुर्विंशदब्दान्तं प्राणिनामिह ॥ ७२
अश्वत्थजे तथा चोक्ता स्थितिरत्रैव संभवे । प्राणिनां तु नवत्रिंशत्समान्तं पूर्वसूरिभिः ॥ ७३
कृतात्मजे महाभाग कुसप्ततिमितेऽधुना । त्रित्रिंशन्मितवर्षाणि जीवनं कथितं मया ॥ ७४
द्विसप्ततिमितेऽश्वत्थसूनावत्रैव संस्थितिः । षडयुक्तित्रशत्समान्तं हि प्राणिनां विनतात्मज ॥ ७५
कृतसूनौ तथा प्रोक्तं जीवनं प्राणधारिणाम् । सप्तत्रिंशन्मिताब्दान्तं त्रिसप्ततिमितेऽधुना ॥ ७६
आयुर्वलं मया प्रोक्तं पट्टनेऽशीतिसंमिते । ऊनपञ्चाशदब्दान्तं कृतजे त्वत्र संभवे ॥ ७७
पञ्चसप्ततिसंख्येऽत्र यमसूनौ च पुत्रक । जीवनं प्राणिनां प्रोक्तं द्वित्रिंशद्वायनान्तकम् ॥ ७८
षट्चत्वारिंशदब्दान्तं कथितं प्राणधारणम् । षट्सप्ततिमिते त्वत्र कृतपुत्रे च पुत्रक ॥ ७९
यमपुत्रे महाभाग ऊनेऽशीतिमितेऽधुना । त्रिंशत्कयुक्तवर्षान्ते निर्याणं परिकीर्तिम् ॥ ८०
द्व्यूनेऽशीतिमितेऽश्वत्थपुत्रेऽत्र कथितं ध्रुवम् । द्विचत्वारिंशदब्दान्तमखिलं प्राणधारणम् ॥ ८१
कूनेऽशीतिमिते त्रेतासुतेऽत्र जनुषि ध्रुवम् । अष्टत्रिंशत्समान्तं हि जीवनं कथितं स्फुटम् ॥ ८२

१ हायनैः कूनविंशद्भिः—खपु०।२ त्र—खपु०।

कृतवीर्ये महाभाग त्वायुर्दायमुदीरितम्। चतुस्त्रिंशन्मिताब्दान्तमशीतिमितके ध्रुवम् ॥ ८३ ॥
कृशीतिमितके त्रेतासूनावत्र च पुत्रक। चत्वारिंशच्चतुर्युक्तमब्दान्तं प्राणधारणम् ॥ ८४ ॥
त्रेताजे तु मया प्रोक्तमायुर्बलमिह स्फुटम्। एकोनविंशदब्दाढ्यं शतसंख्यं द्व्यशीतिके ॥८५॥
व्यशीतिमितके सूत कालजे जीवनं स्मृतम्। पञ्चोनमत्र पञ्चाशदब्दान्तं त्वखिलं ध्रुवम् ॥८६॥
चतुर्युक्तेऽशीतिमिते त्रेतापुत्रे पतत्रिण। दशसप्तान्वितं चायुर्बलं हि शरदां शतम् ॥ ८७ ॥
कलिसूनौ महाभाग पञ्चाशीतिमितेऽण्डज। द्विपष्टिमितवर्षाणि प्राणिनां देहधारणम् ॥ ८८ ॥
ततस्त्रेताभवे नाम्नि षडशीतिमिते खग। द्वादशाब्दाधिकं प्रोक्तमायुर्हायं शतं स्फुटम् ॥ ८९ ॥
सप्तान्वितेऽशीतिमिते द्वापरात्मजसंज्ञके। षट्पञ्चाशन्मिताब्दान्तं निर्याणं कीर्तितं त्विह ॥ ९० ॥
अथ त्रेतात्मजे सूत ह्यष्टाशीतिमितेऽधुना। हायनानां शतं युक्तं चतुर्भिर्जीवनं स्फुटम् ॥ ९१ ॥
कूने नवतिसंख्येऽत्र त्रेताजाते परिस्फुटे। द्व्यशीतिमितवर्षाणि देहिनां देहधारणम् ॥ ९२ ॥
चतुःषष्टिमिताब्दान्तं जीवनं कथितं त्विह। तथा नवतिसंख्ये तु कलिपुत्रेऽत्र पुत्रक ॥ ९३ ॥
मित्रसूनौ कुयुक्ते नवति संख्येऽत्र काश्यप। अशीतिमितवर्षाणि प्रोक्तमायुः पुरातनैः ॥ ९४ ॥
ततो नवतिसंख्येऽत्र द्व्याढ्ये मित्रात्मजेऽण्डज। प्रोक्तं सप्ततिवर्षान्तं निधनं देहधारिणाम् ॥९५॥
भूतादिसूनौ कथितं व्याढ्ये नवतिसंमिते। प्रोक्तमायुर्महाभाग सप्तोनं शरदां शतम् ॥ ९६ ॥
पङ्क्ते शतसंख्ये तु मित्रपुत्रेऽत्र पुत्रक। व्यूनं नवतिवर्षान्तं कथितं देहधारणम् ॥ ९७ ॥
भूतादिपुत्रे कथितं पञ्चोने शतसंख्यके। पञ्चषष्टिमिताब्दान्तं स्फुटमायुर्मनीषिभिः ॥ ९८ ॥
षण्णवत्या मिते सूत नियतं मित्रसंभवे। कुसप्ततिमिताब्दान्तं जीवनं कथितं त्विह ॥ ९९ ॥
व्यूने भूतात्मजे त्वत्र शतसंख्ये पुरातनैः। प्रोक्तमायुर्बलं सूत कूनाशीतिमिताब्दकम् ॥ १०० ॥
द्व्यूने शतमिते वत्स मित्रजे जीवनं स्मृतम्। अष्टषष्टिमितान्यत्र वर्षाणि परमं स्फुटम् ॥१०१॥
भूतादिजे महाबाहो कूने शतमितेऽधुना। प्रोक्तमायुर्बलं प्रष्टुरष्टोनं शरदां शतम् ॥ १०२ ॥
त्रेताजसंज्ञके प्रोक्तं शतसंख्ये खगेश्वर। ह्यष्टाशीतिमिताब्दान्तं प्राणिनां प्राणधारणम् ॥१०३॥
कुयुक्ते शतसंख्येऽत्र मैत्राख्ये शरदां शतम्। चतुर्भिरूनं कथितमायुर्दायं परिस्फुटम् ॥ १०४ ॥
दीप्तांशुजेऽण्डजश्रेष्ठ द्वियुक्ते शतसंख्यके। सप्तसप्ततिवर्षान्तं जीवनं चात्र जन्मनि ॥ १०५ ॥
मित्रजाते त्रियुक्ते तु शतसंख्येऽत्र संभवे। कूनसप्ततिवर्षान्तमायुर्बलमुदाहृतम् ॥ १०६ ॥
अशीतिमितवर्षाणि कथितं देहधारणम्। चतुर्युक्ते शतमिते नाम्नि धर्मांशुजेऽण्डज ॥ १०७ ॥
दीप्तांशुसूनौ सतते पञ्चाढ्ये शतसंख्यके। द्व्यूनाशीतिमिताब्दान्तमायुर्बलमुदाहृतम् ॥१०८॥
ततो नवतिवर्षान्तं देहिनां देहधारणम्। धर्मांशुसूनौ षड्युक्ते शतसंख्येऽत्र जन्मनि ॥ १०९ ॥
सप्तयुक्ते शतमिते नाम्नि तीक्ष्णांशुजेऽण्डज। षट्सप्ततिमिताब्दान्तं कथितं जीवनं त्विह ११०॥
तीक्ष्णांशुसूनावष्टाढ्ये शतसंख्ये खगाधिप। क्राढ्यं नवतिवर्षान्तमायुर्बलमुदाहृतम् ॥ १११ ॥
एतदायुर्बलं प्रोक्तं मनुजानां परिस्फुटम्। बह्वल्पं पुण्यपापाभ्यां भूयः किं प्रष्टुमर्हसि ॥ ११२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके आयुर्निर्णयाध्यायो दशमः ॥ १० ॥

अरुण उवाच।

तमसोद्भवपापानि कृतवान् पृच्छकस्त्वसौ। तानि मे ब्रूहि भगवन्पूर्वजन्मनि निश्चयात् ॥ १ ॥

श्रीसूर्य उवाच।

स्वर्गादेः पतनं पापात्पापादायुःप्रणाशनम्। तिर्यक्लं प्राप्नुयात्पापात्पापाच्च नरकं व्रजेत् ॥ २ ॥

पापाद्दिष्टं भयं पापात्पापात्संततिनाशनम् । राज्यभङ्गस्तथा पापात्पापाद्रोगविवर्धनम् ॥ ३
धनस्यापाद्यशुभं पापात्पापान्द्रधनसङ्कटे । पापाद्दुःखं महाभाग तस्मात्पापं न वाचरेत् ॥ ४
अर्वाग्द्वादशवर्षेभ्यः पापान्यज्ञानतस्तथा । प्राक्पापौघान्यसौ जन्तुस्तान्यल्पान्यल्पशोधनैः ॥ ५
तीर्थस्नानादिकैश्चात्र दग्धधान्यवदण्डज । नश्यन्त्येव प्ररोहन्ति न पुनर्जन्मनि ध्रुवम् ॥ ६
व्याध्यादिरूपं यत्पापं गणितेन दृढोदितम् । मत्कृतैः शोधनैरेव नाशमायाति नान्यथा ॥ ७
भोगाद्वापि महाभाग नात्र कार्या विचारणा । तान्यहं यत्नतो वक्ष्ये राह्वादिभ्यः पतत्रिण ॥ ८
राह्वाख्ये प्रथमे वत्स जीवोऽसौ कृतवान्पुरा । राजघातं छलैर्दुष्टैरतिलोभसमन्वितः ॥ ९
गते तमसि संज्ञे प्राग्द्वितीये विनतात्मज । अभक्ष्यभक्षकश्चासौ परदारविमर्दकः ॥ १०
सूचकः पररन्ध्रस्य बभूव विनतात्मज । अगुसंज्ञे तृतीये तु मार्गलुण्ठनतत्परः ॥ ११
परद्रव्यापहारी च पूर्वजन्मनि चाभवत् । चतुर्थे ह्यसुराख्ये प्राग्देवद्रव्यापहारकः ॥ १२
परस्वहारको वत्स त्वासीत्स्वामिद्रुहान्वितः । पञ्चमे त्वाननाख्ये तु परपुंसि रता ह्यसौ ॥ १३
पूर्वजन्मनि पक्षीन्द्र बभूव वनिता सती । तथा सिंहीसुते षष्ठे महापातकसंयुतः ॥ १४
स्वभावात्पूर्वजनुषि विनतानन्दवर्धन । सप्तमे चन्द्रहाख्ये तु चक्रे पूर्वभवेऽण्डज ॥ १५
अदण्ड्यदण्डनं पापं गवां पीडाप्रदायकम् । वक्राख्ये त्वष्टमे वत्स जीवोऽसौ स्थापितं धनम् ॥ १६
परेण नाददात्पूर्वं तथा घातितवान्नरम् । ततो नवमिते सूत नाम्नि सूर्यान्तके पुरा ॥ १७
आततायी बभूवासौ प्राणवान् कश्यपात्मज । अथो दशमिते राहौ मुखसंज्ञे खगाधिप ॥ १८
त्यक्त्वा पूर्वभवे योनिं मुखे मैथुनवानसौ । सोमहाख्ये पुरा जीव एकादशमितेऽण्डज ॥ १९
चक्रे ब्रह्मवधं घोरमपराधविवर्जितम् । जीवोऽसौ प्राग्भवे दुष्टो गृहीत्वा लोभतो धनम् ॥ २०
शास्त्रार्थमन्यथा चक्रे द्वादशे रविमर्दने । चन्द्रान्तके तथा पूर्वभवे विश्वमितेऽण्डज ॥ २१
जीवोऽयं शूद्रमवधीच्छलेन गरुडाग्रज । संकल्पितप्रदानं च बलादाकृष्य भक्षणम् ॥ २२
निक्षेपहरणं चापि पापं मिश्रसमुद्भवम् । कृतवान्पृच्छकश्चासौ सिंहीजे मनुसंमिते ॥ २३
ब्राह्मणस्यादद् दुःखं पूर्वजन्मनि निर्भयः । वत्सासौ प्राणवान् पञ्चदशसंख्ये विधुंतुदे ॥ २४
चकार स्त्रीवधं घोरं महापापं च पुत्रक । सोमान्तके प्राणधरः[1] षोडशे पूर्वजन्मनि ॥ २५
ततः सप्तदशे वत्स धूम्रलोचनसंज्ञके । महोग्रं कृतवान्पापं व्यभिचारसमुद्भवम् ॥ २६
शीर्षभारसमुत्पन्नं पापमाचरितं पुरा । जीवेनानेन सततं शीर्षाख्येऽष्टादशेऽण्डज ॥ २७
श्वमार्जारादिसंस्पर्शं कृतवान्भोजनं त्वसौ । गुरोर्वाक्यविरोधं च पूर्वजन्मनि निश्चयात् ॥ २८
कूने विंशन्मिते सिंहीसूनुनाम्नि पतत्रिण । परान्नहारी जीवोऽसावभवत्पूर्वजन्मनि ॥ २९
सूर्यारिसंज्ञके विंशन्मिते तु गरुडाग्रज । एकविंशन्मिते भानुरिपुसंज्ञे पुराभवे ॥ ३०
दानविघ्नकरश्चासौ बभूव विनतात्मज । परस्त्रीं दृष्टवान्नग्नां चोदयास्तगतं रविम् ॥ ३१
गृध्रकः प्राग्भवे वत्स द्वाविंशे वदनाभिधे । गर्भघातकरी चासावभवत्पूर्वजन्मनि ॥ ३२
अर्कान्तके त्रयोविंशन्मिते प्राणी पतत्रिण । स्वामिद्रोहं महापापं चकार मदसंयुतः ॥ ३३
प्राग्भवे तु चतुर्विंशन्मिते दैत्येन्द्रसंज्ञके । पञ्चविंशन्मिते सूत सूर्यहाख्ये पुरा भवे ॥ ३४
निजघ्निवानसौ वैश्यमपराधविवर्जितम् । भान्वन्तके महाभाग षड्विंशन्मितके ह्यसौ ॥ ३५
विषप्रदोऽभवत्पूर्वभवे पापविमोहितः । सप्तविंशन्मिते सूत मित्रशत्रौ पुराभवे ॥ ३६

१ प्राणवधः—खपु० । २ पृच्छकः—खपु० ।

जीवोऽसावुक्तवान् वाक्यं निष्ठुरं दुष्टसंमतम्। अष्टविंशन्मिते ह्यासीत्तथा त्वष्टान्तसंज्ञके ॥३७॥
खगोत्रविघ्नकर्तासौ पूर्वजन्मनि मानवः। अजच्छादनसंज्ञेऽसौ कूनत्रिंशन्मिते पुरा ॥ ३८ ॥
कृतवानेहिदाहं प्रागाततायिकसंज्ञकः। त्रिंशन्मितेऽथ हंसारिसंज्ञके पूर्वजन्मनि ॥ ३९ ॥
वृक्षच्छेद्यभवच्चापि परवासविनाशकः। अयोनिगामी जीवोऽसौ बभूव परसंभवे ॥ ४० ॥
कुत्रिंशत्संमिते शुक्लाङ्गारिसंज्ञे पतत्रिण। अथ छात्रवधं चक्रे पूर्वजन्मनि मानद ॥ ४१ ॥
द्व्याढ्ये त्रिंशन्मिते चासावजशत्रौ भयानकः। छायान्तके पुरा चक्रे त्रित्रिंशन्मितकेऽण्डज ॥४२॥
बालविक्रयजं पापं ह्यपरं बालघातजम्। पिङ्गारिसंज्ञके चासीच्चतुस्त्रिंशन्मितेऽण्डज ॥ ४३ ॥
परान्नहरणे दक्षोऽदक्षः[1] पापविमोचने[2]। पञ्चत्रिंशन्मिते वत्स मित्रच्छादकसंज्ञके ॥ ४४ ॥
स्त्रीत्यागं कृतवान् पापं जीवोऽसौ परसंभवे। षट्त्रिंशन्मितके सूत सिंहिकात्मजसंज्ञके ॥ ४५ ॥
शंखमुक्ताफलादीनां हारकश्चाभवत्पुरा। परद्रव्यापहरणं कृतवान्[3] प्राणधारकः ॥ ४६ ॥
सप्तत्रिंशन्मिते पूर्वं शशाङ्गारौ प्रयत्नतः। भगान्तके सवर्णास्त्रीगामी चाभूत्पुराभवे ॥ ४७ ॥
अष्टत्रिंशन्मिते कामलोभाद्वै गरुडाग्रज। चत्वारिंशन्मिते कूने चोत्तमाङ्गे पतत्रिण ॥ ४८ ॥
हृतवान्[4] प्राक् परस्वर्णं पुनर्जन्मनि चार्भकः। कृतवान् गोवधं घोरं पूर्वजन्मनि पृच्छकः ॥४९॥
कालरूपे महाघोरे चत्वारिंशन्मितेऽण्डज। भगारिसंज्ञके क्राढ्ये चत्वारिंशन्मिते पुरा ॥ ५० ॥
स्वात्मलोभादसौ चक्रे परपुष्पविनाशनम्। ऋणाप्रदायी ह्यभवत्पूर्वजन्मनि निश्चयात् ॥ ५१ ॥
सूर्यशत्रौ द्वियुक्ते तु चत्वारिंशन्मितेऽण्डज। चन्द्रघातकः संज्ञे प्राक् पशुघातनतत्परः ॥ ५२ ॥
जीवो रामाऽन्विते चत्वारिंशत्संख्ये बभूव यः। सहस्रांशुरिपौ प्रादादौषधं प्राक् परस्य च ॥ ५३ ॥
निधनार्थे चतुर्युक्ते चत्वारिंशन्मिते सुत। पञ्चहीनेऽथ पञ्चाशन्मितेऽपग्रहसंज्ञके ॥ ५४ ॥
कृतवान् भिन्नितं पापं बहुदुःखप्रदायकम्। स्वधर्मत्यागवांश्चासौ जीवः पूर्वभवेऽण्डज ॥ ५५ ॥
चतुर्भिरूने पञ्चाशन्मितकेऽर्कप्रच्छादके। पञ्चाशन्मितके न्यूने प्रभाकरिरिपौ पुरा ॥ ५६ ॥
कृतवान् घोरपापानि दुष्टो दुष्टफलानि च। द्व्यूने जातकसंज्ञे प्राक् मृगशावकभक्षणम् ॥ ५७ ॥
निःशङ्कजीवघातं चान्वष्टिकाश्राद्धवर्जनम्। प्राणिद्वेषकरं चक्रे पञ्चाशन्मितके ह्यसौ ॥ ५८ ॥
पञ्चाशत्संख्यके कूने सुपर्णार्यभिधेऽण्डज। ब्रह्मस्वहारकश्चासावभवत्पूर्वसंभवे ॥ ५९ ॥
क्षेत्रमारी[5] बभूवासौ पञ्चाशन्मितके पुरा। पतङ्गशत्रौ सततं जलापाध्यादिनाण्डज ॥ ६० ॥
कुपञ्चाशन्मिते सूत सोमच्छादकसंज्ञके। परजन्मनि जीवोऽसावभवद्बालविक्रयी ॥ ६१ ॥
द्विपञ्चाशन्मिते चासौ शिरःसंज्ञे पुराभवे। योषापण्योपजीव्योऽसावभवत्कश्यपात्मज ॥ ६२ ॥
त्रिपञ्चाशन्मिते नाम्नि शीतभान्वन्तकेऽण्डज। घोरं कन्यावधं चक्रे प्राण्यसौ पूर्वजन्मनि ६३॥
अज्ञात्वा धर्मशास्त्रं तु प्रायश्चित्तप्रदायकः। प्राग्बभूव विलोमाख्ये षड्ने षष्टिसंमिते ॥ ६४ ॥
पञ्चयुक्तेऽथ पञ्चाशन्मिते पूर्वभवे खग। सदा वक्रे च गुरवे दृष्टवान् वरंभावतः ॥ ६५ ॥
षट्पंचाशन्मिते वत्स सूर्यघातिनि चाभवत्। जीवोऽसौ बहुसत्त्वानां घातकः परसंभवे ॥ ६६ ॥
न्यूने षष्टिमिते जन्तुः शशिसूर्यविमर्दने। कुरुक्षेत्रादितीर्थेषु कालेषु ग्रहणादिषु ॥ ६७ ॥
प्रतिग्राही बभूवासौ प्राग्भवे गरुडाग्रज। द्व्यूने षष्टिमिते सूर्यारिपौ पूर्वभवे सुत ॥ ६८ ॥
अभक्ष्यभक्षकश्चासीत्पृच्छकः कश्यपात्मज। शशांकशत्रुसंज्ञे प्रागूनषष्टिमितेऽण्डज ॥ ६९ ॥
मार्गदाह्यभवच्चासौ लोकानां भयदायकः। अथ षष्टिमिते वत्स शशिग्राहकसंज्ञके ॥ ७० ॥

---

१ त्वपरे—खपु०। २ परपापविमोचने—खपु०। ३ कृतवान्—खपु०। ४ छेत्रमारी—खपु०।

अगम्यागमनं जन्तुः कृतवान् पूर्वजन्मनि । शुक्रान्तके कुयुक्ते प्राग्जीवोऽसौ षष्टिसंज्ञके ॥७१
चक्रे ब्रह्मवधं घोरं ब्रह्मस्वहरणं तथा । शस्त्रघातेन हननं शास्त्रवाह्योपजीवनम् ॥ ७२
द्विषष्टिमितके चक्रे भास्करच्छादकेऽण्डज । प्राक् परेषां फलानां च हरणं लोभसंयुतः ॥ ७३
सुवर्णहरणं द्यूतं कृतवान् पृच्छकस्त्वसौ । त्रिषष्टिमितके पूर्वं प्रभाकरविमर्दने ॥ ७४
चतुःषष्टिमिते सूत नद्यादौ कृतवान् पुरा । ष्ठीवनं च शकृन्मार्गे विघ्नं परकृतौ तथा ॥ ७५
जीवोऽसौ पापवान्मोहाद्भानुशत्रौ पतत्रिण । ततः शशिरिपौ वत्स पञ्चषष्टिमिते पुरा ॥ ७६
मातृपितृगुरूणां च विप्राणां भक्तिवर्जितः । निन्दाश्रावी बभूवासौ जीवो विप्रियकारकः ॥ ७७
ततः सोमरिपौ पूर्वभवे षट्षष्टिसंमिते । नित्यानुष्ठानरहितश्चासीद्वस्त्रापहारकः ॥ ७८
न्यूने सप्ततिसंख्ये तु प्राग्भवे शुचिघातिनि । पितृघाती महाभाग जीवोऽसौ चाभवत्सुधीः ॥७९
बालघाती तथा वत्स जन्तुर्वै मित्रघातिनि । द्व्यूने सप्ततिसंख्ये तु बभूव परसंभवे ॥ ८०
कूने सप्ततिमे चक्रे शुचिमर्दनसंज्ञके । धातूनां हरणं मोहात्प्राप्यसौ प्राग्भवेऽण्डज ॥ ८१
अथ सप्ततिमे वत्स मित्रद्विट्संज्ञके पुरा । चकार स्वेच्छया दुष्टो गुरोर्विप्रस्य घातनम् ॥ ८२
कुसप्ततितमे चक्रे शाकादिहरणं पुरा । नाम्नि स्कन्दरिपौ मोहाद्विनतानन्दवर्धन ॥ ८३
पक्षपातं सभायां वै चकाराधर्मतः पुरा । द्विसप्ततितमे तत्र पातारख्ये च पतत्रिण ॥ ८४
ततो यमरिपौ सूत त्रिसप्ततिमिते पुरा । बहुविप्रविरोधं च कृतवान् पृच्छकस्त्वसौ ॥ ८५
जीवोऽसौ रसहारी प्राग्बभूव विनतात्मज । चतुःसप्ततिसंख्ये तु धूमकेतौ प्रयत्नतः ॥ ८६
पञ्चसप्ततिसंख्ये तु दानवाख्ये पुराभवे । चक्रे भ्रातृवधं गेहात्पापं मोहाच्छलादसौ ॥८७
विप्ररत्नापहरणं कृतवान् पूर्वजन्मनि । सूर्यचन्द्ररिपौ सूत षट्सप्ततिमे छलात् ॥ ८८
सप्तसप्ततिसंख्ये प्राग्बहुपापसमुद्भवः । निशाचरो बभूवासौ पूतनाग्रहविग्रहः ॥ ८९
हंसान्तके तथा द्व्यूनेऽशीतिसंख्ये पुराभवे । पक्षिघातनयुक्तोऽसौ बभूव विनतात्मज ॥ ९०
खेचराख्ये तथा कूनेऽशीतिसंख्ये चकार वै । दत्तापहरणं पूर्वं तथा वेदस्य विक्रयम् ॥ ९१
अदृष्टेऽशीतिसंख्ये प्राग्दृष्टवान् कामतः स्त्रियम् । परदृष्टिविनाशं च कृतवान् पृच्छकस्त्वसौ ॥९२
प्रदीप्तारौ कुयुक्ते चाशीतिसंख्ये पतत्रिण । प्रारब्धस्य व्रतस्यापि त्यागी पूर्वभवेऽभवत् ॥ ९३
धूम्रवर्णाभिधे द्व्याढ्येऽशीतिसंख्ये पुराभवे । दुष्टप्रतिग्रहं जीवः कृतवान् कश्यपात्मज ॥ ९४
परसन्तानहरणं चक्रे पूर्वभवेऽप्यसौ । अग्नीभवे किले न्याढ्येऽशीतिसंख्ये च पुत्रक ॥ ९५
धनरूपे चतुर्युक्तेऽशीतिसंख्ये ततोऽण्डज । अविक्रयाणां सततं विक्रयी चाभवत्पुरा ॥ ९६
पञ्चाशीतिमिते वत्स तिलाङ्गाख्ये पुराभवे । पापकर्मरतश्चासौ बभूव प्राणधारकः ॥ ९७
अमेध्यदानं सततं सर्पघाती तथाभवत् । षडशीतितमे प्राणी सर्पाख्ये पूर्वजन्मनि ॥ ९८
न्यूने नवतिसंख्ये प्राग्धूमाङ्गे प्राणधारकः । धूर्तो बभूव सततं कन्यकाविक्रयी तथा ॥ ९९
चन्द्रारिसंज्ञके चासीत्पिशुनः पूर्वजन्मनि । अष्टाशीतिमिते प्राणी विनतानन्दवर्धन ॥ १००
हिमांशुः शत्रुसंज्ञे प्राङ् नवाशीतिमिते पुरा । परवध्वपहरणं कृतवान् पृच्छकस्त्वसौ ॥ १०१
ततो नवतिसंख्येऽसौ घनान्ते परसंभवे । अनिवेद्य सुरादिभ्यो भोक्तासीच्च पतत्रिण ॥ १०२
शीतदीधितिशत्रौ प्राक्काढ्ये नवतिसंमिते । निर्वाणं कृतवांश्चासावयं मृत्युवशेन वै ॥ १०३
क्काढ्ये नवतिसंख्ये तु जठराग्नौ पुराभवे । जीवोऽयं चाभवत्सूत देवद्रव्यापहारकः ॥ १०४

१ मोहात्—खपु०।

धर्मध्वजरिपौ पूर्वरिपौ सप्तोनिते सति । पतिघातकरश्चासौ बभूव प्राणधारकः ॥ १०५ ॥
यज्ञविघ्नकरः प्राणी प्रागासीद्बुद्धिवर्जितः । शुक्लाङ्गशत्रुसंज्ञे तु चतुर्नवतिसंमिते ॥ १०६ ॥
प्राग्दुःखदायी ह्यभवत्पूर्वजन्मनि चाण्डज । अजारिसंज्ञके जन्तुः पञ्चोने शतसंख्यके ॥ १०७ ॥
कृष्णाङ्गे च चतुर्हीने शतसंख्ये पतत्रिण । नीचस्त्रीसंगमाज्जीविश्चके पापं पुराभवे ॥ १०८ ॥
परदुःखप्रदानं च तथैवानृतभाषणम् । छेदनं परजिह्वायाः कृतवान् पृच्छकस्त्वयम् ॥ १०९ ॥
द्यूने सप्तमिते सूत जिह्वारूपे पूर्वजन्मनि । द्यूने शतमिते पुत्र नीलवर्णे पुराभवे ॥ ११० ॥
मद्यपानरतश्चासौ जीवोऽभूत्पापमोहितः । तथा शुक्लाङ्गके कूने शतसंख्येऽभवत्कुधीः ॥ १११ ॥
देवद्विजोपाधिकारी प्राण्यसौ परसंभवे । ततः शतमिते सूत महीरूपे विधानतः ॥ ११२ ॥
सुगन्विहरणं पापं कृतवान् पूर्वजन्मनि । महापातकसंयुक्तोऽसावभूत्पूर्वसंभवे ॥ ११३ ॥
आकाशसंज्ञके वत्स त्वेकोत्तरशते तथा । द्वियुक्ते शतसंख्ये प्राग्धूम्राक्षे कृतवानसौ ॥ ११४ ॥
कूटसाक्ष्यजपापर्पं च परमर्मप्रकाशनम् । देवशायी महाभाग बभूव परसंभवे ॥ ११५ ॥
त्रियुक्ते शतसंख्ये तु देवशत्रौ च पृच्छकः । मातृहासौ पुरा जीवो भगच्छादकसंज्ञके ॥ ११६ ॥
शतसंख्ये चतुर्युक्ते महापातकसंयुतः । पञ्चाढ्ये शतसंख्ये तु ग्रहेन्द्रे पूर्वजन्मनि ॥ ११७ ॥
नानामिश्रितपापेभ्यो महाग्रहसमाकुलः । जात्युत्तमस्त्रीगमनं चक्रेऽसौ प्राणधारकः ॥ ११८ ॥
प्राक्संभवे तथोत्पाते षडयुक्ते शतसंख्यके । सप्तोत्तरशते त्वासीद्बहुरूपे पतत्रिण ॥ ११९ ॥
जीवघातकरश्चासावभवत्पूर्वजन्मनि । अष्टोत्तरशते पूर्वभवे तु भ्रमसंज्ञके ॥ १२० ॥
पशुचौरोऽभवच्चासौ जीवोऽयं गरुडाग्रज । एतत्सर्वमुपाख्यातं पापमाचरणं सुत ॥ १२१ ॥
यत्कृते परमं दुःखं जीवो यात्यकृते सुखम् ॥ १२२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके पापनिर्णयाध्याय एकादशः ॥ ११ ॥

अरुण उवाच ।

कर्तो रिष्टं त्वया प्रोक्तं तद्वदस्व दिवस्पते । सत्यायुषि महाभाग कथं मृत्युः प्रजायते ॥ १ ॥

श्रीसूर्य उवाच ।

ज्ञानाज्ञानकृतं पापं दृढं प्रागदृढं तथा । रिष्टं तद्विविधं ज्ञेयं दृढमप्यदृढं पुनः ॥ २ ॥
उभयोः काश्यपेयात्र प्रायश्चित्तैः क्षयो भवेत् । प्रायश्चित्ते कृते सूत रिष्टं नैव प्रशाम्यति ॥ ३ ॥
नश्येदायुर्बलं तत्तु दीपो वाय्वादिना यथा । रिष्टयोगे समुत्पन्ने चतुर्धा मुनिभिः स्मृतम् ॥ ४ ॥
स्वनाशः पुत्रनाशो वा स्त्रीनाशश्चार्थनाशनम् । अष्टोत्तरशतानां तु केतूनां गरुडाग्रज ॥ ५ ॥
नामतुल्यान्यरिष्टानि खड्गादिषु यथाक्रमम् । वक्ष्ये यथायथाकाले तानि त्वं श्रोतुमर्हसि ॥ ६ ॥
खड्गाभिधे महाकेतौ प्रथमे विनतात्मज । चत्वारिंशन्मिते वर्षे रिष्टमत्रातिदारुणम् ॥ ७ ॥
क्षुरसंज्ञे द्वितीये च काश्यपेयात्र जन्मनि । रिष्टं षट्त्रिंशदब्दे तु क्षुरवन्नात्र संशयः ॥ ८ ॥
घनाभिधे तृतीये तु रिष्टमत्र प्रकीर्तितम् । पञ्चविंशन्मिते वर्षे घनगर्जसमं सुत ॥ ९ ॥
श्यामनाम्नि महाबाहो चतुर्थेऽत्रैव जन्मनि । द्वाविंशन्मितके वर्षे रिष्टं प्रोक्तं खगाधिप ॥ १० ॥
पीताभिधे पञ्चमेऽत्र केतौ तु विनतात्मज । चतुस्त्रिंशन्मिते रिष्ट हायने चात्र जन्मनि ॥ ११ ॥
षष्ठिमते कृष्णवर्णाख्ये कालरूपेऽत्र संभवे । ह्येकविंशन्मिते सूत हायने रिष्टमद्भूतम् ॥ १२ ॥

---

१ शुक्लाङ्गके—खपु० । २ षडभिधे—खपु० ।

यमाभिधे महारिष्टं यमरूपं षडब्दके । सप्तसंख्येऽत्र कथितं विनतानन्दवर्धन ॥ १३
मुद्गराख्ये महाघोरमष्टमेऽत्रैव जन्मनि । यमस्य मुद्गरं घोरमष्टमे कश्यपात्मज ॥ १४
त्रासनाख्ये महाकेतौ नवसंख्ये पतत्रिण । षड्विंशन्मितके वर्षे रिष्टमत्र प्रकीर्तितम् ॥ १५
उल्काख्ये दशमे वापि वत्साष्टाविंशदब्दके । रिष्टं तद्रौरवाकारमत्र जन्मनि मानद ॥ १६
ततो वज्राभिधेऽत्रैव रौद्रे रुद्रमितेऽण्डज । ह्येकोनविंशदब्दे तु रिष्टमुक्तं मनीषिभिः ॥ १७
आयुधाख्ये तथा ज्ञेयं द्वादशे गरुडाग्रज । न्यूने त्रिंशन्मिते रिष्टं हायनेऽत्रैव जन्मनि ॥ १८
केत्वभिधे तथा चोक्तं त्रयोदशमितेऽण्डज । अष्टादशमिते सूत हायने रिष्टमद्भुतम् ॥ १९
शीर्षसंज्ञे मनुमिते प्रोक्तमत्र खगाधिप । षोडषाब्दमिते रिष्टं शीर्षपातनवद्दृढम् ॥ २०
पुच्छसंज्ञे ततः केतौ तृतीयेऽब्दे त्वरिष्टकम् । सर्पाख्ये पञ्चदिग्वर्षे ह्युत्पातोऽत्र महान् सुत ॥ २१
गुदाभिधे ततोरिष्टं वर्षे द्वादशसंमिते । अष्टादशमिते सूत रिष्टं मनुमितेऽब्दके ॥ २२
चापाख्ये प्रथमे वर्षे रिष्टं प्रोक्तं मयाऽधुना । केता विंशन्मिते सूत वाणसंज्ञेऽत्र जन्मनि ॥ २३
द्विचत्वारिंशदब्दे तु रिष्टं देहान्तकृद्भवेत् । कुन्ताभिधे महाबाहो कालरूपं लवाब्दके ॥ २४
लम्बके रिष्टमत्रोक्तं द्वितीयेऽब्दे न संशयः । घटसंज्ञे त्रयोविंशे केतावत्रैव जन्मनि ॥ २५
वेदवेदमिते वर्षे रिष्टं हि गरुडाग्रज । ततो गुह्याभिधे सूत मृत्युर्वर्षे चतुर्मिते ॥ २६
विषगर्भेऽण्डजश्रेष्ठ पञ्चविंशन्मिते ध्रुवम् । चत्वारिंशन्मिते वर्षे न्यधिके मरणं स्मृतम् ॥ २७
ततः कालाभिधे सूत रिष्टं प्रोक्तं मयाऽधुना । चत्वारिंशन्मिते वर्षे पञ्चयुक्तेऽत्र पुत्रक ॥ २८
ग्रहान्तके महाबाहो ऋक्षसंख्ये त्वरिष्टकम् । पञ्चाशदेकहीनेऽब्दे जन्मन्यत्रोदितं ध्रुवम् ॥ २९
ध्वजसंज्ञेऽधुना प्रोक्तमष्टाविंशन्मितेऽण्डज । रिष्टमष्टाधिके चत्वारिंशदब्दे भयानकम् ॥ ३०
कूनत्रिंशन्मिते त्वत्र क्षत्राख्ये गरुडाग्रज । द्विपञ्चाशन्मिते वर्षे रिष्टं सर्वहरं स्मृतम् ॥ ३१
वृक्षसंज्ञे तथा केतौ त्रिंशत्संख्येऽण्डजाधिप । पञ्चाधिके तु पञ्चाशदब्दे प्रोक्तमरिष्टकम् ॥ ३२
ग्रहाधिपे तथा त्वत्र नाशः प्रोक्तो मनीषिभिः । पञ्चाशदेकयुक्तेऽब्दे चतुर्था तत्त्वदर्शिभिः ॥ ३३
वीणाख्येऽत्र महोत्पाते द्वात्रिंशन्मितसंख्यके । रिष्टं च दारुणं प्रोक्तं त्रिपञ्चाशन्मितेऽब्दके ॥ ३४
व्याढ्ये त्रिंशन्मिते केतौ नर्तनाख्येऽत्र पुत्रक । द्वयूने षष्टिमिते वर्षे रिष्टं स्यान्नर्तनोपमम् ॥ ३५
मृदङ्गसंज्ञके जन्मन्यत्रैव ध्रुवमद्भुतम् । चतुःपञ्चाशदब्दे तु पुत्रारिष्टं मयोदितम् ॥ ३६
पाशसंज्ञेऽत्र जनुषि पञ्चत्रिंशन्मितेऽण्डज । रिष्टं पाशसमं प्रोक्तं पञ्चाशत्सप्तवत्सरे ॥ ३७
पुष्पनाम्नि महाबाहो केतौ षट्त्रिंशसंख्यके । षडन्विते तु पञ्चाशदब्दे प्रोक्तमरिष्टकम् ॥ ३८
फलाभिधे महापुच्छे रिष्टमुक्तं मया चलम् । एकोनषष्टिवर्षे तु जन्मन्यत्रैव दारुणम् ॥ ३९
यष्ट्याभिधेऽत्र ध्वजके त्वष्टत्रिंशन्मितेऽण्डज । एकाधिके तु षष्ट्यब्दे जन्मन्यत्र भयानकम् ॥ ४०
हीनाङ्गे काश्यपेयात्र महारिष्टं मयोदितम् । द्विषष्टिमितके वर्षे बन्धनाद्यैर्भयानकम् ॥ ४१
मुरजे तु महोत्पाते चत्वारिंशन्मिते ध्रुवम् । चत्वारिंशन्मिते वर्षे सप्तयुक्ते त्वरिष्टकम् ॥ ४२
अन्तकाख्ये तथा केतौ त्रिषष्टिमितवत्सरे । महारिष्टं मया प्रोक्तं पतत्रिण यमोपमम् ॥ ४३
केतौ खेचरसंज्ञे तु रिष्टं वर्षेऽष्टषष्टिके । यथाकाशात्प्रपतने तथा रिष्टमिहाण्डज ॥ ४४
चत्वारिंशन्मिते व्याढ्येऽनन्ताख्ये कथितं त्विह । चतुःषष्टिमिते वर्षे पुत्रानन्तभयप्रदम् ॥ ४५
शय्याभिधे ततः प्रोक्तं रिष्टमत्र खगाधिप । चत्वारिंशन्मिते वर्षे त्वेकाढ्ये नात्र संशयः ॥ ४६

१ आसनाख्ये—खपु०। २ पञ्चदशके—खपु०। ३ संख्ये विंशे चतुर्युते—खपु०।

पञ्चवेदमिते त्वत्र पत्रसंज्ञे त्वरिष्टकम्। चतुर्विंशन्मिते वर्षे जायते विनतात्मज ॥ ४७ ॥
केतौ भूचरसंज्ञे तु ह्येकहीने पतत्रिण। वर्षे त्रिंशन्मिते रिष्टं दारुणं कथितं मया ॥ ४८ ॥
अन्तरिक्षाभिधे तद्वद्वर्षे त्रिंशन्मिते ध्रुवम्। रिष्टं स्यादत्र जनुषि विनतानन्दवर्धन ॥ ४९ ॥
केतौ रज्ज्वाभिधे सूत द्वात्रिंशन्मितवत्सरे। रज्जुबन्धादिकं रिष्टं जायतेऽत्रैव जन्मनि ॥ ५० ॥
हरिताख्ये महाकेतौ रिष्टमत्र मयोदितम्। पञ्चाशन्मितके नूनं ह्यष्टत्रिंशन्मितेऽब्दके ॥ ५१ ॥
नीलसंज्ञे महोत्पाते रिष्टमुक्तं तु काश्यप। पञ्चत्रिंशन्मिते वर्षे चात्र जन्मनि निश्चयात् ॥ ५२ ॥
नीलाङ्गाख्ये महाकेतौ सूत रिष्टं प्रकीर्तितम्। चत्वारिंशन्मिते वर्षे ह्येकहीनेऽत्र जन्मनि॥ ५३ ॥
द्विपञ्चाशन्मिते वर्षे मुसलाख्ये पत्रत्रिण। रिष्टं मुसलवत्प्रोक्तं वर्षे षष्टिमितेऽण्डज ॥ ५४ ॥
त्रिपञ्चाशन्मिते केतौ बन्धनाख्ये त्वरिष्टकम्। विंशन्मितेऽब्दे बन्धाद्यैर्व्याढ्ये षष्टिमिते मृतिः॥५५॥
पीताङ्गसंज्ञके सूत ततश्चोक्तमरिष्टकम्। चत्वारिंशन्मिते वर्षे षडद्युक्तेऽत्रैव जन्मनि ॥ ५६ ॥
कृष्णाङ्गसंज्ञके केतावत्रारिष्टं प्रकीर्तितम्। एकादशमिते वर्षे काश्यपेयमहद्भुते ॥ ५७ ॥
श्यामाङ्गसंज्ञके सूत महाकेतौ महद्भुतम्। रिष्टं निगदितं वर्षे दशसप्तमितेऽण्डज ॥ ५८ ॥
गौराभिधे ततश्चूने[1] षष्टिसंख्ये त्वरिष्टकम्। व्याढ्ये त्रिंशन्मिते वर्षे जन्मन्यत्र खगाधिप ॥५९॥
गौराङ्गनाम्नि सुमहदरिष्टमुदितं मया। सप्तत्रिंशन्मिते वर्षे चात्र जन्मनि काश्यप ॥ ६० ॥
धूम्रवर्णे महाकेतौ पञ्चाशन्मितवत्सरे। रिष्टमुक्तं मया चात्र विनतानन्दवर्धन ॥ ६१ ॥
नीलवर्णाभिधे सूत प्रोक्तं षष्टिमिते ध्रुवम्। पञ्चषष्टिमिते रिष्टं हायनेऽत्रैव जन्मनि ॥ ६२ ॥
त्रिशूलसंज्ञके केतौ जन्मन्यत्र पतत्रिण। सप्तसप्तषष्टिमिते त्रिधा रिष्टं त्रिशूलवत् ॥ ६३ ॥
चतुःशूलाभिधे सूत द्व्याढ्ये षष्टिमिते ध्रुवम्। षट्षष्टिमितकेऽब्दे तु रिष्टमत्र चतुर्विधम् ॥ ६४ ॥
पञ्चशूले तु पञ्चाब्दे रिष्टमुक्तं मनीषिभिः। धूमध्वजे तु विश्वाब्दमिते मृत्युः खगाधिप ॥६५॥
चन्द्रारिसंज्ञके वर्षे त्रयोविंशे त्वरिष्टकम्। अर्कान्तके सप्तमेऽब्दे रिष्टं चार्कग्रहोपमम् ॥ ६६ ॥
धूम्राक्षेऽब्दे दशमिते कालरिष्टं प्रकीर्तितम्। सोमहाख्ये तथा केतावष्टषष्टिमिते ध्रुवम् ॥ ६७ ॥
रिष्टं तु त्रिंशदब्दे तु सोमग्रहसमं सुत। शूलाङ्गनाम्नि केतौ तु वेदद्रिभूमितवत्सरे ॥ ६८ ॥
महाशूलोद्भवं रिष्टमत्र जन्मनि कीर्तितम्। शूलाभिधे तथा केतौ रिष्टमत्रैव जन्मनि ॥ ६९ ॥
वर्षे सप्ततिसंख्ये च एकसप्ततिसंख्यके। द्विसप्ततिमिते वर्षे रिष्टमुक्तं भयानकम् ॥ ७० ॥
सोमपाख्ये ध्वजे सूत कुसप्ततिमितेऽधुना। सप्तायुधाख्ये सततं रिष्टं प्रोक्तं खगाधिप ॥ ७१ ॥
एकोनसप्ततिमिते वत्सरे चात्र जन्मनि। सप्तशूलाभिधे केतौ रिष्टं शूलवदद्भुतम् ॥ ७२ ॥
चतुःसप्ततिमे वर्षे त्रिसप्ततिमितेऽधुना। वज्रासने हि ध्वजके रिष्टं वज्रप्रपातवत् ॥ ७३ ॥
वर्षे सप्ततिमे सूत कुयुक्ते नात्र संशयः। मुद्गराख्ये महाकेतौ रिष्टं मुद्गरपातवत् ॥ ७४ ॥
सप्तसप्ततिमेऽब्दे तु कालरूपे पतत्रिण। षट्सप्ततिमिते सूत मुद्गराङ्गे त्वरिष्टकम् ॥ ७५ ॥
त्रिसप्ततिमिते चात्र हायने गरुडाग्रज। रक्ताङ्गसंज्ञके पुच्छे सप्तसप्तमितेऽधुना ॥ ७६ ॥
पञ्चसप्तमिते वर्षे रिष्टं रक्तप्रवर्षणम्। भौमाङ्गसंज्ञके केतावष्टसप्ततिसंमिते ॥ ७७ ॥
तस्मिन्वर्षे तदाप्नोति रिष्टमत्रैव दारुणम्। तमोरूपाभिधे सर्पे वर्षेऽशीतिमिते सुत ॥ ७८ ॥
जायतेऽत्र महारिष्टं ध्रुवं पापसमुद्भवम्। तमोव्यापकजे नाम्नि पुच्छे वेदाष्टकेऽब्दके ॥ ७९ ॥
दुष्टरिष्टं मया प्रोक्तमशीतिमितकेऽण्डज। नवसप्ततिवर्षान्ते रिष्टं षष्टिमितेऽथवा ॥ ८० ॥

---

१ द्व्यूने—खपु०। २ ऽण्डज—खपु०।

एकाशीतिमिते केतौ चन्दनाङ्गाभिधे सुत । उपग्रहे महारिष्टं षट्सप्ताब्दमितेऽब्दके ॥ ८१
वायुरूपे तथा प्रोक्तं पंचाढ्येऽशीतिवत्सरे । वेदाशीतिमिते केतावनिलाष्टकसंज्ञके ॥ ८२
सप्ताशीतिमिते वर्षे रिष्टं प्रोक्तमिहाण्डज । नभोगसंज्ञके रिष्टमेकाशीतिमितेऽब्दके ॥ ८३
पञ्चाशन्मितके वापि पञ्चाशीतिमितेऽधुना । ग्रहारिसंज्ञकेऽशीतिवर्षे नवमितेऽण्डज ॥ ८४
सप्तत्रिंशन्मिते वापि रिष्टमत्र खगाधिप । भ्रमाभिधाने चारिष्टं वर्षे नवतिसंमिते ॥ ८५
देवारिसंज्ञकेऽशीतिद्वियुक्ते हायने भयम् । नवाशीतिमिते केतौ कालरूपाभिधानके ॥ ८६
वर्षे ह्यशीतिमितके[1] कालरूपं न संशयः । संहारसंज्ञके पुच्छे महारिष्टं मयोदितम् ॥ ८७
वर्षे नवतिसप्ताढ्ये संहारोऽत्र यथा तथा । मृत्युनाम्नि महोत्पाते रिष्टं मृत्युसमं सुत ॥ ८८
षडशीतिमिते वर्षे षट्त्रिंशत्संमितेऽथवा । भ्रमसंज्ञे ततो रिष्टं प्रोक्तमत्रैव जन्मनि ॥ ८९
द्व्योत्तरशते वर्षे चतुस्त्रिंशन्मितेऽथवा । अदृष्टसंज्ञके पुच्छे चतुर्नवतिसंमिते ॥ ९०
व्यधिके शतवर्षेऽत्र त्वदृष्टादृष्टमद्भुतम् । ध्वजके घोररूपेऽत्र रिष्टं घोरं प्रकीर्तितम् ॥ ९१
कुयुक्ते तु नवत्यब्दे त्रिपञ्चाशन्मितेऽथवा । अदृश्ये तु तथा सूत रिष्टमत्रैव जन्मनि ॥ ९२
पञ्चपञ्चाशदब्दे वा वर्षे नवतिषडयुते । मणिवर्णे शते व्यूने केतौ सप्तोत्तरे शते ॥ ९३
चतुःपञ्चाशदब्दे वा रिष्टमत्रैव जन्मनि । जलाभिधे ध्वजे सूत वर्षे नवतिसंमिते ॥ ९४
द्वियुक्तेऽत्र तरो रिष्टं चतुर्विंशत्समे तथा । भयानके कूनशते[3] रिष्टमत्र भयानकम् ॥ ९५
चतुर्नवतिसंख्येऽब्दे ह्यष्टविंशतिमेऽपि वा । पातसंज्ञे शतमिते रिष्टं प्रोक्तं मयाऽधुना ॥ ९६
षडुत्तरशते वर्षे त्रिचत्वारिंशकेऽथवा । काढ्ये शते घोररूपे रिष्टं नवतिवत्सरे ॥ ९७
त्रिसंयुक्ते महाभाग व्यूने वा षष्टिसंमिते । वामनाख्ये शते व्याढ्ये द्वाभ्यामूने शतेऽब्दके[4] ॥ ९८
द्व्याढ्ये पञ्चाशदब्दे वा रिष्टमत्रातिदारुणम्[5] । घोरकाले महाकेतौ वर्षे शतमिते ध्रुवम् ॥ ९९
रिष्टं घोरं महावाहो षड्विंशेऽब्दे तथाऽधुना । दाहसंज्ञे शते द्व्याढ्ये रिष्टं दाहोपमं स्मृतम् ॥१००
पञ्चाधिके नवत्यब्दे ह्यष्टत्रिंशन्मितेऽथवा । पञ्चोत्तरशते केतौ प्रलयाख्ये पतत्रिण ॥ १०१
द्व्यूने शतमिते वर्षे रिष्टं त्रिंशन्मितेऽपि च । दिग्दाहः षडयुतशते वर्षे चैकोत्तरे शते ॥ १०२
द्व्यूने विंशन्मिते वापि रिष्टमुक्तं खगाधिप । संहाराख्ये सप्तशते[6] रिष्टं संहारवत्सुत ॥ १०३
पञ्चोत्तरशते वर्षे पञ्चाशव्यधिकेऽपि वा । अष्टोत्तरशते केतौ महाप्रलयसंज्ञके ॥ १०४
प्रलयान्तोपमं रिष्टं त्वष्टोत्तरशतेऽब्दके । शिशूनां रिष्टजं ज्ञानं पित्रोः प्रश्नविलग्नतः ॥ १०५
ज्ञेयं द्वादशवर्षान्तं स्वाधिकारस्ततः परम् । मातृरिष्टैर्मृताः केचित्पितृरिष्टैस्तथा परे ॥ १०६
केचित्पुत्राद्यरिष्टैस्तु म्रियन्ते नात्र संशयः ॥ १०७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके रिष्टनिर्णयाध्यायो द्वादशः ॥ १२ ॥

श्रीसूर्य उवाच ।

शृणु सूत प्रवक्ष्यामि देवरूपविनिर्णयम् । यत्रावाँराश्रिता देवा दाने पूर्णफलप्रदाः ॥
विघ्नराजः प्रकर्तव्यो गजवक्त्रश्चतुर्भुजः । शूलं तथाक्षमाला च तस्य दक्षिणहस्तयोः ॥
जलपूर्णं तथा पात्रं परशुश्चैव वामतः । दन्तश्चास्य प्रकर्तव्यो गर्भाऽरिष्टनिषूदनः ॥
जलपूर्णे[6] पुनः पात्रे कराग्रं तस्य कारयेत्[7] । लम्बोदरस्तथा कार्यो मूषकोपरिसंस्थितः ॥

---

१ त्र्यशीतिमितके—खपु० । २ चत्वारिंशन्मितेथवा—खपु० । ३ कूने—खपु० । ४ संभूतारिष्टजं ज्ञ खपु० । ५ यन्त्राधारा—खपु० । ६ जलपूर्णं पुनःपात्रं कराग्रे तस्य कारयेत्—खपु० ।

व्याघ्रचर्माम्बरधरो व्यालयज्ञोपवीतवान्। उपविष्टोऽथवा कार्यः पद्मासनसमन्वितः॥ ५॥
कृत्वैवं विधिवद्यात्रणाधीशं प्रयत्नतः। नापमृत्युभयं चापि सर्वविघ्नविनाशनम्॥ ६॥
वातगुल्मविनाशार्थं यो दद्यात्रणनायकम्। विमुच्यते महारोगाद्वातरोगात्पतत्रिण॥ ७॥
अथापस्मारयुक्तस्तु प्रदद्याच्छिवनन्दनम्। बहुरत्नैः समायुक्तं मन्त्रैरभ्यर्च्य यत्नतः॥ ८॥
सोऽपस्मारान्महारोगान्मुच्यते नात्र संशयः। अथ भाद्रपदे शुक्ले चतुर्थ्यां गणनायकम्॥ ९॥
पूजयेन्मोदकाहारैः कृत्वा रूपं हिरण्मयम्। देयस्तत्र विधिज्ञाय भयेभ्यो मुच्यतेऽधुना॥ १०॥
नित्यं पूज्यो गणाध्यक्षः कामेष्वपि विशेषतः। अनार्चितो विघ्नकरः सर्वकार्येषु यो नृणाम्॥ ११॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके गणेशनिरूपणाध्यायस्त्रयोदशः॥ १३॥

श्रीसूर्य उवाच।

चतुर्भुजा तथा कार्या सर्वाभरणभूषिता। देवी सरस्वती सूत सुमुखी सा समुच्छ्रिता॥ १॥
पुस्तकं चाक्षमालां च तस्या दक्षिणहस्तयोः। वामयोश्च तथा कार्या वेणवी च कमण्डलुः॥ २॥
समपादप्रतिष्ठा च कार्या सर्वाङ्गशोभना। पूजयित्वा शुभैर्गन्धैर्वस्त्रैर्मन्त्रैर्विधानतः॥ ३॥
(सा देया वेदविदुषे शुभबुद्धेर्विवृद्धये। अथवा शक्तितो दद्याद्धैमीं वा राजतीं शुभाम्॥ ४॥
प्रतिमां पक्षिशार्दूल सरस्वत्या विधानतः। जपेल्लक्षं च तन्मन्त्रमर्धं वायुतसंख्यकम्॥ ५॥
विद्याहरणजात्पापान्मुच्यते पूर्वसंभवात्। मूकत्वहरणं प्रोक्तं दानमेतत्पतत्रिण॥ ६॥
नित्यं यः पूजयेद्भक्त्या विधिना भारतीं नरः। धनविद्यान्वितश्चात्र ज्ञानवानपि जायते॥ ७॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके सरस्वतीरूपनिर्णयाध्यायश्चतुर्दशः॥ १४॥

श्रीसूर्य उवाच।

हरेः समीपे कर्तव्या लक्ष्मीस्तु द्विभुजा ततः। दिव्यरूपाम्बुजकरा सर्वाभरणभूषिता॥ १॥
श्वेताम्बरधरा देवी रूपेणाप्रतिमा भुवि। पृथक् चतुर्भुजा कार्या देवी सिंहासने स्थिता॥ २॥
सिंहासनेऽस्याः कर्तव्यं कमलं चारुकर्णिकम्। अष्टपत्रं महाभाग कर्णिकायां तु सा स्थिता॥ ३॥
लिखित्वा शोभने पत्रे[3] हिरण्याढ्ये प्रयत्नतः। पूजयित्वा तु विविधैस्तन्मन्त्रैश्चोपचारकैः॥ ४॥
जपित्वा विधिवत्तत्र लक्षाद्यं होमयेत्ततः। ब्राह्मणाय विधिज्ञाय सा देया शक्तितोऽण्डज॥ ५॥
लक्ष्मीहरणजात्पापात्पूर्वजन्मसमर्जितात्। मुच्यतेऽत्र महाभाग दरिद्रत्वहरं परम्॥ ६॥
नित्यं यः पूजयेल्लक्ष्मीं दीपावल्यां तथा निशि। लक्ष्मीवृद्धिर्भवेत्तस्य जन्मन्यत्रापरे तथा॥ ७॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके लक्ष्मीरूपनिरूपणाध्यायः पञ्चदशः॥ १५॥

श्रीसूर्य उवाच।

सूर्यः कार्यः शुभाकारः सर्वाभरणभूषितः। चतुर्बाहुर्महातेजाः कवचेनापि संवृतः॥ १॥
रश्मयस्तस्य कर्तव्या वामदक्षिणहस्तयोः। एकचक्रेऽथ सप्ताश्वे षडारे वा रथोत्तमे॥ २॥
उपविष्टस्तु कर्तव्यो देवोऽर्कोऽरुणसारथिः। यथोक्तेन विधानेन कृत्वा धातुमयं रविम्॥ ३॥
संपूज्य रक्तपुष्पैस्तु सूर्यमन्त्रेण मन्त्रवित्। ब्राह्मणाय प्रदद्याच्च भ्रमदोषोपशान्तये॥ ४॥

---

१ समुद्रजा–खपु०। २ ( ) नास्ति–खपु०। ३ पात्रे–खपु०।

सूर्यमन्त्रः ।

"ॐ नमो भगवते भास्कराय सर्वलोकप्रकाशकाय मम हृदि प्रकाशं कुरुकुरु स्वाहा ॥"
यो जप्त्वा विधिना मन्त्रं कोट्यर्धार्धार्धसंमितम् । होमयेत्तिलमध्वाज्यैः शक्त्यां संपूज्य भास्करम्
स प्राप्नोति परां सिद्धिं मन्त्रतन्त्रसमुद्भवाम् । सप्तम्यां माघशुक्लायां विशेषात्पूजयेद्रविम् ॥ ६
वाञ्छितार्थो भवेच्छीघ्रं मम मन्त्रप्रभावतः । अथार्चयेन्नरो नित्यं भक्तिमान्मामिहाण्डज ॥ ७
रूपारोग्यसुखैश्वर्ययुतः स्यान्नात्र संशयः । अष्टपद्मदलाकारं लिखित्वा च प्रपूजयेत् ॥ ८
ब्राह्मणाय प्रदद्याच्च सर्वरोगापनुत्तये । यस्य पञ्चमभावस्थो रविः पुत्रविनाशकृत् ॥ ९
स्त्रीभयं सप्तमभावस्थः स्त्रीणां पतिभयंकरः । पित्रोश्चतुर्थदशमे सहजे चाग्रजे भयम् ॥ १०
तेनाराध्यो महाभक्त्या जपहोमार्चनादिभिः । हिरण्मयस्तथा देवो विधिज्ञाय विधानतः ॥ ११
तस्य पुत्रविवृद्धिः स्यादवश्यं विनतात्मज । नार्चयेद्यस्तु मां नित्यं मूढो ज्ञानविवर्जितः ॥ १२
जन्मजन्मन्यसौ रोगी शोकभाग्जायते नरः ॥ १३ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाके सूर्यरूपनिर्णयाध्यायः षोडशः ॥ १६ ॥

श्रीसूर्य उवाच ।

चन्द्रः श्वेतवपुः कार्यस्तथा श्वेताम्बरो विभुः । चतुर्बाहुर्महातेजाः सर्वाभरणवांस्तथा ॥ १
कुमुदौ द्वौ तथा कार्यौ तस्य देवस्य हस्तयोः । चिह्नं तथास्य सिंहाङ्कं वामपार्श्वेऽर्कवद्भवेत् ॥ २
केयूरमुकुटाढ्यं च दिव्यरुक्मरथे स्थितम् । यः कृत्वा विधिवत्सोमं सौवर्णं राजतं तथा ॥ ३
पूजयित्वा शुभैर्गन्धैर्धूपैर्दिव्यैर्विशेषतः । विप्राय दद्याद्विधिवत्पातकेभ्यः प्रमुच्यते ॥ ४
विप्रपीडादिजं पापं पूर्वजन्मसमुद्भवम् । तत्क्षणान्मुच्यते चापि दानस्यास्य प्रभावतः ॥ ५
नित्यं यश्चार्चयेच्चन्द्रं द्विजराजं महाबलम् । न तस्य ग्रहजा पीडा भविष्यति कदाचन ॥ ६
पौर्णमास्यां च यो दद्याद्धिमांशुं प्रयतः शुचिः । सोपवासान्वितो भक्त्या सर्वारिष्टविनाशनम् ॥ ७
क्रूरयुक्तस्तथा चन्द्रो जन्मन्यत्र यदा भवेत् । मनोजातसमुद्भूताचिन्ताशङ्कातुरो भवेत् ॥ ८
तद्दोषशमनायैव दद्याद्धैमं निशाकरम् । संपूज्य मन्त्रैर्विधिवज्जित्वा हुत्वाऽयुतादिकम् ॥ ९

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाके चन्द्ररूपनिर्णयाध्यायः सप्तदशः ॥ १७ ॥

श्रीसूर्य उवाच ।

भौमोऽग्निरूपः कर्तव्यः संस्थितः काञ्चने रथे । किरीटी द्विभुजः कान्तस्त्रिकोणे वा रथे स्थितः
तन्मूर्तिं पूजयेद्यस्तु रक्तपुष्पैर्विशेषतः । धूपैर्नानेवदनैर्दिव्यैः कुंकुमाक्षतचन्दनैः ॥ २
न जायत ऋणग्रस्तश्चात्र जन्मनि सुव्रतः । भौमवारे च यो दद्याद्ब्राह्मणाय विधानतः ॥
न च भौमग्रहान्पीडापीडितश्चात्र जन्मनि । सोपवासी नरो यस्तु कृत्वा भौमं हिरण्मयम्
पूजयित्वा विधानेन ब्राह्मणाय निवेदयेत् । स रक्तजान्महादोषान्मुच्यते नात्र संशयः ॥
अथ पञ्चमभावस्थो भौमः पुत्रविनाशकः । आलोकयति तद्भावमपि दुष्टप्रदो भृशम् ॥ ४
सप्तमस्थः स्त्रियं हन्ति स्त्रीणां पतिविनाशकः । लग्नान्तिमान्ततुर्यस्थो द्यूनदूषणकारकः ॥
ज्ञात्वा भौमं महाभाग कृत्वा शुद्धं हिरण्मयम् । पूर्वोक्तविधिना रूपं तथा जप्त्वायुतादिकम्
हुत्वा संपूज्य तन्मन्त्रैं रक्तगन्धाम्बरान्वितैः । तं च दद्याद्विधिज्ञाय सर्वारिष्टविनाशनम् ॥
अनेन विधिना भौमं योऽर्चयेद् बुद्धिमान्नरः । सर्वं भौमफलं दुष्टं तत्क्षणादेव नश्यति ॥ १

अथ भौममहादानं वक्ष्यामि त्वां खगेश्वर। तरुणं वृषभं रक्तं सुवर्णमलंकृतम् ॥ ११ ॥
प्रवालताम्रसद्रत्नैर्मणिभिर्बहुभिर्युतम्। रक्तपुष्पैश्च तद्दोणीं कृत्वा चोभयपार्श्वयोः ॥ १२ ॥
गोधूमान्नमसृग्भ्यां पूरितां सगुडां सुत। तं दद्याद्वेदविदुषे भौमरूपसमन्वितम् ॥ १३ ॥
भौमारिष्टविनाशाय भवत्येव न संशयः ॥ १४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके भौमरूपनिर्णयाध्यायोऽष्टादशः ॥ १८ ॥

श्रीसूर्य उवाच।

विष्णुतुल्यो बुधः कार्यः सौवर्णः स्यन्दने स्थितः। भौमवद्वा प्रकर्तव्यो चलः पीताम्बरावृतः॥ १॥
दद्याच्च विप्रमुख्याय कृत्वा रूपं विधानतः। सर्वरोगहरः सौम्यः सर्वकार्यार्थसिद्धिदः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके बुधरूपनिर्णयाध्याय एकोनविंशः ॥ १९ ॥

श्रीसूर्य उवाच।

तप्तजाम्बूनदाकारो द्विभुजश्च बृहस्पतिः। पुस्तकं चाक्षमालां च करयोस्तस्य कारयेत् ॥ १ ॥
सर्वाभरणयुक्तश्च तथा पीताम्बरैर्वृतः। अष्टाश्वे काञ्चने दिव्ये रथे दृष्टिमनोहरे ॥ २ ॥
महापर्वसु यो दद्याद्धेमं हेममयं शुभम्। विप्राय वेदविदुषे विधिज्ञाय प्रयत्नतः ॥ ३ ॥
गुरुवादादिजात्पापात्पूर्वजन्मसमर्जितात्। मुच्यते नात्र संदेहो वाक्शुभत्वं च जायते ॥ ४ ॥
सर्वरोगहरं चैतद्दानमुक्तं गुरोः परम्। यः कृत्वा विधिना सूत पूजयेच्च बृहस्पतिम् ॥ ५ ॥
नित्यं शुभमना भूत्वा गुरुपीडां न पश्यति। चापमीनौ सुतस्थौ च जीवो वा सुतगो बली ॥ ६ ॥
पुत्रविघ्नप्रदः प्रोक्तो महद्भिस्तत्त्वदर्शिभिः। तद्दोषशमनायैव दद्याद्धेममयं गुरुम् ॥ ७ ॥
विधिज्ञाय सुसंपूज्य जपहोमायुतादिभिः। प्रयोगोऽयं महाभाग पुत्रपौत्रसुखप्रदः ॥ ८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके गुरुरूपनिर्णयाध्यायो विंशः ॥ २० ॥

श्रीसूर्य उवाच।

शुक्रः श्वेतवपुः कार्यः श्वेताम्बरधरस्तथा। द्वौ करौ कथितौ तस्य विधिपुस्तकसंयुतौ ॥ १ ॥
दशाश्वे च रथे कार्यो राजतो भृगुनन्दनः। संपूज्य विधिना मन्त्रैर्वैदिकैश्चोपचारकैः ॥ २ ॥
देयो विप्राय शक्त्या च प्रमेहान्मुच्यते गदात्। संस्थाप्य कलशे शुक्रं राजतं च स्वशक्तितः ॥३॥
संपूज्य गन्धपुष्पाद्यैर्जपहोमैर्विशेषतः। क्षीराज्यवस्त्रान्नयुतं ब्राह्मणाय प्रदापयेत् ॥ ४ ॥
न चाशुभफलं पश्येन्नारीसंसुखशुक्रजम्। दक्षिणस्थात्तथा चास्तगताद्दो पाच्च यत् फलम्॥ ५ ॥
अथवा पूजयेद्भक्त्या राजतं भृगुनन्दनम्। नित्यं नाशुभमाप्नोति शुक्रदोषसमुद्भवम् ॥ ६ ॥
तावत्प्रपूजयेद्देवं यावन्नोदयते पुनः ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके शुक्ररूपनिर्णयाध्याय एकविंशः ॥ २१ ॥

श्रीसूर्य उवाच।

पादहीनस्तथा कृष्णः शनिः कार्यः शिरातः। दण्डाक्षमालासंयुक्तः करद्वितयभूषितः ॥ १ ॥
कार्ष्णोपस्थे रथे लोहमये चाष्टतुरङ्गमे। पूजयित्वा शनिं देवं नित्यं गन्धादिभिः सुत ॥ २ ॥
प्रदद्याद्वेदविदुषे सर्वदोषापनुत्तये। अधोमुखं शने रूपं कृत्वा स्वर्णमितं शुभम् ॥ ३ ॥
वरयेद् ब्राह्मणान्विज्ञान्वस्त्राभरणकाञ्चनैः। संपूज्य गन्धपुष्पाद्यैः षोडशोरूपचारकैः ॥ ४ ॥

१ पीताम्बरैर्वृतः—खपु० ।

संस्थाप्य कलशे पूर्णे नीलचैलसमावृते । कोटिलक्षायुतं जप्त्वा शनिमन्त्रं प्रयत्नतः ॥ ५
तदग्रे होमयेद्यत्नात्स्वगृह्योक्तविधानतः । माषैस्तिलैः सर्षपैश्च घृतेनापि शमीफलैः ॥ ६
जपोपकल्पितां दद्याद्दक्षिणां च हिरण्मयीम् । पूर्णाहुतिं ततः कुर्यात्कर्ता शुचिरलंकृतः ॥ ७
वलालोध्रतिलैः कृष्णैः शतपुष्पघनाञ्जनैः । सलाजैः प्लवनं कुर्याल्लोहपात्रसुसंस्थितैः ॥ ८
शनिदोषोपशान्त्यर्थं यजमानः प्रयत्नतः । कृष्णां गां विधिवद्दद्यात्कपिलां च पयस्विनीम् ॥ ९
सालंकारां सुवर्णाढ्यां शनेः प्रीतिकरां पराम् । ब्राह्मणान् भोजयेत्पश्चाद्भक्त्या दद्याच्च दक्षिणाम्[1] ॥
ना य एवं प्रकुरुते शनिशान्तिं विधानतः । न तस्य दुरितं किंचिन्न शनैश्चरजं भयम् ॥ ११
जन्माष्टद्वादशे तुर्ये द्वितीये गोचराश्रितः । महाविघ्नकरः सौरो दुष्टाङ्गस्थोऽपि भाषितः ॥ १२
क्षेत्रे सिंहासने दुर्गे देशे कर्माश्रितेऽपि च । राज्यभङ्गप्रदो लग्नात्पञ्चमे पुत्रविघ्नकृत् ॥ १३
सर्वमेतत्फलाद् दुष्टाद् दुष्टाच्चापि चतुर्विधात् । न किंचिद्भयमाप्नोति शनियागप्रभावतः ॥ १४
राज्यभ्रष्टो लभेद्राज्यं सुखी स्यात्सर्वतो भृशम् । अथ लोहमयं सर्वमष्टाङ्गुलमितं सुत ॥ १५
लिखित्वा तु नराकारं पादहीनमधोमुखम् । स्नापयित्वा तु तैलेन नीलचैलसमावृतम् ॥ १६
श्यामपुष्पैस्तिलाद्यैर्गन्धैर्नैवेद्यैः शुभैः । संस्थाप्य तैलपात्रे तु शनिमन्त्रेण धीमता ॥ १७
एवं प्रपूजयेन्नित्यं शनिवारे विशेषतः । जप्त्वा हुत्वा प्रयोगान्ते ब्राह्मणाय समर्पयेत् ॥ १८
अनेन विधिना यस्तु सूर्यपुत्रं प्रपूजयेत् । तुष्टिं याति न संदेहः पीडां मुक्त्वा शनैश्चरः ॥ १९

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके शनिस्वरूपनिर्णयाध्यायो द्वाविंशः ॥ २२ ॥

श्रीसूर्य उवाच ।

राहुर्धूम्रवपुः कार्यो रथेऽष्टाश्वे तु राजते । संस्थितो द्विभुजः क्रूरश्चोर्ध्वकेशो भयानकः ॥ १
दक्षिणं तु करं शून्यं वामं पुस्तकसंयुतम् । संपूज्य राहुमन्त्रेण ब्राह्मणाय निवेदयेत् ॥ २
अष्टांगुलाधिकं कांस्यपात्रं शर्करया युतम् । पञ्चरत्नान्वितं दद्याद्राहोः प्रीतिकरं परम् ॥ ३
नृपजन्मर्क्षगो राहुः केतुर्वा यदि चाण्डज । दुर्गनामर्क्षगो वापि जन्माष्टद्वादशेऽपि वा ॥ ४
राज्यभङ्गप्रदो ज्ञेयो देशवेधकरस्तथा । ज्वरव्याध्यादिरोगांश्च दुष्टारिष्टं करोत्यसौ ॥ ५
तद्दोषशमनायैव दद्याद्धेममयं स्वगुम् । पूजयित्वा तु गन्धाद्यैर्मन्त्रैश्चापि विशेषतः ॥ ६
कोटिलक्षायुतं जप्त्वा हुत्वा च तिलसर्षपैः । जापकेभ्यः प्रदद्याच्च दक्षिणां वै हिरण्मयीम् ॥ ७
यथा ग्रहस्तथाचार्यः पूजनीयः प्रयत्नतः । पट्टवस्त्राश्वरत्नाद्यैर्भूषणैर्वहुभिर्युतैः ॥ ८
य एवं कुरुते शक्त्या राहुपूजां नृपोत्तमः । राहुरिष्टभयं घोरं न पश्यति ममाज्ञया ॥ ९
न तस्य देशभङ्गः स्यान्न च दुःखमवाप्नुयात् ॥ १० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके राहुस्वरूपनिर्णयाध्यायस्त्रयोविंशः ॥ २३ ॥

श्रीसूर्य उवाच ।

उलूकसंस्थः कर्तव्यः केतुर्मूर्ध्ना विवर्जितः । द्विभुजो दक्षिणः शून्यः करो वामः सपुस्तकः ॥
अष्टाश्वे वा रथे दिव्ये संस्थितो भौमवत्तथा । वातव्याधिविनाशाय यो दद्यात्काञ्चनं ध्वजम् ॥
वातव्याधिभयान्मुक्तस्तत्क्षणाज्जायते नरः । तथा केतुकृते रिष्टे दद्याद्धेमं तथा कृतम् ॥ ३
राजतं वा यथाशक्त्या जप्त्वा हुत्वा विधानतः । भोजयेद्ब्राह्मणांस्तत्रशक्त्या दद्याच्च दक्षिणाम् ॥

---

[1] पश्चाच्छांत्या—खपु० ।

दृष्ट्वाद्भुतं नृपो मोहान्न कुर्यात्केतुपूजनम् । नृपविघ्नकरं ज्ञेयं षण्मासान्तं न संशयः ॥ ५ ॥
राज्ञां रिष्टकरं ज्ञेयं प्रयोगेष्विदमद्भुतम् । यस्मिन् कृते महाभाग शमयेत्केतुजाद्भुतम् ॥६॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके केतुस्वरूपनिर्णयाध्यायश्चतुर्विंशः ॥ २४ ॥

श्रीसूर्य उवाच ।

सुरेश्वरस्तु कर्तव्यो गजराजोपरिस्थितः । सर्वाभरणसंयुक्तः सुवर्णाभश्चतुर्भुजः ॥ १ ॥
नीलपट्टाम्बरधरस्तथा तिर्यग्दृशः प्रभुः । किरीटी दक्षहस्तौ तु पद्माङ्कुशविभूषितौ ॥ २ ॥
शचीपृष्ठगतं वाममपरं वज्रभूषितम् । वामभागे शची दिव्या सर्वाभरणभूषिता ॥ ३ ॥
पार्श्वयोरुभयोर्द्वे तु दिव्यव्यजनसंयुते । यो दद्यात्स्वर्गकामस्तु महेन्द्रं विनतात्मज ॥ ४ ॥
हैमं कृत्वा पलमयं स नरः स्वर्गभाग्भवेत् । पुत्रकामस्तु यो दद्यादेवेशं पलसंमितम् ॥ ५ ॥
संपूज्य विधिना सूत जप्त्वा हुत्वा विशेषतः । सप्तम्यामुपवासी तु लभेत्पुत्रं न संशयः ॥ ६ ॥

मन्त्रः ।

ॐनमो विश्वरूपाय शचीपतये स्वर्गकामफलप्रदाय मम कामफलं कुरुकुरु स्वाहा ॥

इन्द्रर्क्षे रोगमापन्ने कृत्वेन्द्रं हेमजं सुत । संपूज्य गन्धपुष्पाद्यैरिन्द्रमन्त्रेण मन्त्रवित् ॥ ७ ॥
दद्याद्वेदविधिज्ञाय सर्वरोगापनुत्तये । जनितश्चेन्द्रभे बालः स दुःखाय न संशयः ॥ ८ ॥
तद्दोषशमनायैव हैमं कुर्यात्सुरेश्वरम् । जप्त्वा शक्रमन्त्रेण शक्त्या हुत्वा विधानतः ॥ ९ ॥
तदग्रे पूजयित्वा तु गन्धपुष्पाक्षतैरलम् । स्नात्वा च दैवतैर्मन्त्रैः सर्वौषधिसमन्वितैः ॥ १० ॥
दद्याद्वेदविधिज्ञाय तस्माद्दोषात्प्रमुच्यते । इन्द्रर्क्षशान्तिं मनुजो यो न कुर्याद्विधानतः ॥ ११ ॥
चतुर्थपादजातस्य पितृरिष्टकरं भवेत् । कुले ज्येष्ठस्य रिष्टं वा सहजानामथापि वा ॥ १२ ॥
तृतीये मातृपक्षस्य द्वितीये धननाशनम् । प्रथमे शुभदं प्रोक्तं शान्त्या च गरुडाग्रज ॥ १३ ॥
ज्येष्ठान्त्ये षट् कला निन्द्या नान्या रिष्टकराः स्मृताः ॥ १४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके इन्द्रमूर्तिनिर्णयाध्यायः पञ्चविंशः ॥ २५ ॥

श्रीसूर्य उवाच ।

कुर्याज्जटाधरं वह्निं रक्ताङ्गं धूम्रवाससम् । ज्वालाकुलं महासौम्यं नेत्रत्रयविभूषितम् ॥ १ ॥
चतुर्भुजं श्मश्रुयुक्तं चतुर्दंष्ट्रं महाबलम् । चतुर्भिश्च शुकैर्युक्ते रथे धूमाङ्किते शुभे ॥ २ ॥
वायुसारथिसंयुक्ते संस्थितं विनतात्मज । अग्नेर्वामगता स्वाहा रत्नपात्रकरान्विता ॥ ३ ॥
नित्यं यः पूजयेदग्निं कृत्वा हैमस्वरूपकम् । गन्धाद्यैरग्निमन्त्रेण दत्त्वा विप्राय धीमते ॥ ४ ॥
निर्धनो धनमाप्नोति प्रयोगस्य प्रभावतः । अथवाग्नेर्महामूर्तिं सौवर्णीं यः प्रयच्छति ॥ ५ ॥
स चाग्निदाहजात्पापान्मुच्यते नात्र संशयः ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अग्निस्वरूपनिर्णयाध्यायः षड्विंशः ॥ २६ ॥

श्रीसूर्य उवाच ।

नीलाम्बुदाभः कीनाशस्तप्तचामीकराम्बरः । महिषस्थस्तु कर्तव्यः सर्वाभरणभूषितः ॥ १ ॥
दण्डखड्गावुभौ हस्तौ ज्वालामालाविभूषितौ । वामोत्सङ्गगता कार्या धूम्रोर्णा दिव्यरूपिणी॥२॥
तस्य दक्षिणभागे तु चित्रगुप्तं निधापयेत् । द्विभुजं सौम्यवदनं लेखनीपत्रसंयुतम् ॥ ३ ॥
वामे पाशधरः कार्यः कालो विकटदर्शनः । सौवर्णीं प्रतिमां यस्तु धर्मराजस्य चाण्डज ॥ ४ ॥

दशम्यां च चतुर्थ्यां वा पूजयित्वा विधानतः । दद्यात्तां वेदविदुषे यथा रिष्टोपशान्तये ॥ ५
महापर्वसु यो दद्याद्यमरूपं हिरण्मयम् । संपूज्य गन्धपुष्पाद्यैस्तन्मन्त्रैरर्चनैः शुभम् ॥ ६
न पश्यति महाघोरां विविधां यमशासनाम् । भुक्त्वा भोगान्महाभाग स्वर्गस्थो नात्र संशयः॥[1] ७

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके यमस्वरूपनिर्णयाध्यायः सप्तविंशः ॥ २७ ॥

श्रीसूर्य उवाच ।

ऊर्ध्वकेशः श्मश्रुयुक्तो द्विबाहुर्भीषणाननः । विवृतास्यो विरूपाक्षः प्रांशुर्दंष्ट्रोज्ज्वलाननः॥ १
कृष्णरक्ताङ्गवर्णश्च कृष्णाम्बरधरस्तथा । सर्वाभरणभूषाढ्यो दण्डपाशधरस्तथा ॥ २
भार्या च तस्य कर्तव्या देवी निर्ऋतिवामगा । अपमृत्युभयं घोरं नैव पश्यति मानवः ॥ ३
रोगार्तो मुच्यते रोगाद्दानाद्वा पूजनाच्छुभम् । मूलजातस्य बालस्य सर्वदोषोपशान्तये ॥ ४
जपित्वा निर्ऋतेर्मन्त्रमयुतार्धं विधानतः । हुत्वा निर्ऋतिमन्त्रेण स्नात्वा मन्त्रैस्तु वारुणैः ॥ ५
प्रतिमा या प्रयत्नेन निर्ऋतेर्गरुडाग्रज । ब्राह्मणाय च तां दद्यान्मूलदोषाऽपनुत्तये ॥ ६
मूलारिष्टहरं सूत परं दानं मयोदितम् ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके निर्ऋतिरूपनिर्णयाध्यायोऽष्टाविंशः॥ २८ ॥

श्रीसूर्य उवाच ।

ईषत्प्रलंबजठरो मुक्ताहारविभूषितः । सर्वाभरणवान्राजा महाकायश्चतुर्भुजः ॥ १
सप्तहंसा रथे कार्या वरुणो यादसांपतिः । वैडूर्यमणिसंकाशः श्वेताम्बरधरः प्रभुः ॥ २
पद्मपाशौ तथा कार्यौ देवदक्षिणहस्तयोः । शंखं च रत्नपात्रं च वामयोस्तस्य कारयेत् ॥ ३
वामभागे तथा कार्या तद्भार्या वारुणी शुभा । वामदक्षिणयोर्भागे यमुना जाह्नवी तथा ॥ ४
जलराजं महाभाग यो दद्याद्धेमजं शुभम् । राजतं वा शुभं रूपं ब्राह्मणाय कुटुम्बिने ॥ ५
जलजातकृतात्पापात्पूर्वजान्मुच्यतेऽधुना । यो नित्यं पूजयेद्देवं वरुणं श्रद्धयान्वितः ॥ ६
पूर्वपापविशुद्धात्मा स गच्छेद्वारुणं पदम् ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके वरुणस्वरूपनिर्णयाध्याय एकोनत्रिंशः ॥ २९ ॥

श्रीसूर्य उवाच ।

वायुर्महाबलः कार्यो द्विभुजो मृगवाहनः । नीलाम्बरधरो देवस्तथाकारस्तु शीघ्रगः ॥ १
चतुश्चक्रे रथे सूत सप्ताश्वे वा स्थितः प्रभुः । मुद्गरं चादिमे हस्ते द्वितीये चापसंयुतः[2] ॥ २
वायुपीडान्वितो यस्तु ददाति पवनं सुत । हैमं शक्त्या यथाकारं ब्राह्मणाय विधानतः ॥ ३
स वायुजान्महारोगान्मुच्यते नात्र संशयः । अथवा कारयेद्धैमं हरिणं वायुवाहनम् ॥ ४
शृङ्गे च राजते कार्ये पर्वत्रयसमन्विते । पत्रे लेख्यं प्रयत्नेन सर्वरत्नविभूषितम् ॥ ५
कांस्यपात्रे स्थितं चैव तण्डुलोपरि संस्थितम् । भूषितं पट्टवस्त्रेण पलार्धार्धेन संमितम्॥ ६
संपूज्य गन्धपुष्पाद्यैर्वायुमन्त्रेण धीमता । हुत्वा तेनैव मंत्रेण जप्त्वा पूर्वविधानतः ॥ ७
दद्याद्विप्रवरायैव महावातोपशान्तये ॥ ८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके वायुरूपनिर्णयाध्यायस्त्रिंशः ॥ ३० ॥

---

१ अनयोः (३० । ३१) अध्याययोर्विपर्ययः—ख्पु० । २ संयुगे ख्पु० ।

श्रीसूर्य उवाच ।

चामीकराभो वरदः कर्तव्यो नरवाहनः । लम्बोदरश्चतुर्बाहुर्वामपिङ्गललोचनः ॥ १ ॥
गदाशक्ती च कर्तव्ये वामदक्षिणहस्तयोः । शङ्खपद्मनिधी कार्यौ वामे च धनदस्य च ॥ २ ॥
उदीच्यवेषः कवची हारी च विनतात्मज । द्वे च दंष्ट्रे मुखे तस्य कर्तव्ये श्मश्रुसंयुतः ॥ ३ ॥
योऽर्चयेत्प्रत्यहं सूत निधिनाथं प्रयत्नतः । गन्धपुष्पोपचारैश्च स दारिद्र्यं न पश्यति ॥ ४ ॥
स्वरूपवांश्च धनवाञ्जायते बहुजन्मनि । दरिद्रो लभते लक्ष्मीं धनदस्य च पूजनात् ॥ ५ ॥
धनापदाग्रस्ततनुर्यो दद्यान्नरवाहनम् । सौवर्णं सर्वरत्नाढ्यं लक्ष्मीं प्राप्नोत्यसंशयः ॥ ६ ॥
धनेश्वरं महाभाग सौवर्णं रत्नसंयुतम् । यो दद्यादत्र संपूज्य मन्त्रैर्विप्रवराय च ॥ ७ ॥
स पूर्ववित्तहरणात्पापाज्झटिति मुच्यते ॥ ८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके कुबेरस्वरूपनिर्णयाध्याय एकत्रिंशः ॥ ३१ ॥

श्रीसूर्य उवाच ।

शिवः कार्यस्त्रिनेत्रस्तु जटामुकुटमण्डितः । चतुर्भुजो वृषारूढश्चन्द्रशेखरः प्रभुः ॥ १ ॥
वामो भागो युतो देव्या चापरो वरदस्तथा । गङ्गाधरोऽतिभस्माङ्गो गजचर्माम्बरान्वितः ॥ २ ॥
वामोत्सङ्गगता कार्या शिवा परमसुन्दरी । स्त्रीपुत्रैः सहितो वापि रहितो वापि कुत्रचित् ॥ ३ ॥
उक्तस्वरूपं यः कृत्वा हैमं वा राजतं शिवम् । संपूज्य गन्धपुष्पाद्यैः शिवमन्त्रेण धीमता ॥ ४ ॥
जप्त्वा हुत्वा विधानेन देयो विप्रवराय च । घोराज्जीववधात्पापात्प्राग्जातान्मुच्यतेऽधुना ॥ ५ ॥
स्त्रीपुत्रकामो यो दद्याच्छिवं स्त्रीपुत्रसंयुतम् । संपूज्य पूर्वविधिना चतुर्दश्यामुपोषितः ॥ ६ ॥
हैमं पलमितं कृत्वा तदर्धार्धमितं तथा । स्त्रीपुत्रपौत्रवृद्धिः स्याज्जन्मन्यत्र पतत्रिण ॥ ७ ॥
अथोमयान्वितं देवं सौवर्णं च स्वशक्तितः । यो दद्याद्देवविदुषे गन्धपुष्पैः प्रपूजितम् ॥ ८ ॥
विप्राङ्गहिंसनात्पापात्पूर्वजन्मसमर्जितात् । नाशमायाति स क्षिप्रं दद्रुरोगश्च दारुणः ॥ ९ ॥
कृशत्वहरणं चापि दानमेतत्परं त्विह ॥ १० ॥
'ॐ नमः शिवाय' इत्यखिलशिवस्वरूपपूजने मन्त्रः ॥
'ॐ जूँसः' इति जपादौ महारिष्टहरमृत्युञ्जयमन्त्रः ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके शिवस्वरूपनिर्णयाध्यायो द्वात्रिंशः ॥ ३२ ॥

श्रीसूर्य उवाच ।

देवदेवं महादेवं वृषारूढं तु कारयेत् । तस्य वक्त्राणि कार्याणि पञ्च भो गरुडाग्रज ॥ १ ॥
सर्वाणि सौम्यरूपाणि दक्षिणं विकटं मुखम् । कपालमालिनं भीमं जगत्संहारकारकम् ॥ २ ॥
त्रिनेत्राणि च सर्वाणि वदनं तूत्तरं विना । जटाकलापे महति तस्य चन्द्रकला भवेत् ॥ ३ ॥
तस्योपरिष्टाद्वदनं पञ्चमं तु विधीयते । यज्ञोपवीतं च तथा वासुकिं तत्र कारयेत् ॥ ४ ॥
दशबाहुस्तथा कार्यो देवदेवो महेश्वरः । अक्षमाला त्रिशूलं च चर्म दण्डमथोत्पलम् ॥ ५ ॥
तस्य दक्षिणहस्तेषु कर्तव्यानि महाभुज । वामेषु मातुलिङ्गं च चापादर्शौ कमण्डलुः ॥ ६ ॥
तथा चर्म च कर्तव्यं देवदेवस्य शूलिनः । कुण्डलश्चास्य कर्तव्यश्चन्द्रांशुसदृशप्रभः ॥ ७ ॥
सर्वपापप्रशमनं [illegible] महेश्वरम् । यो दद्याद्विधिना सूत तस्य सर्वं प्रसिद्ध्यति ॥ ८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके पञ्चवक्त्रशिवस्वरूपनिर्णयाध्यायस्त्रयस्त्रिंशः ॥ ३३ ॥

श्रीसूर्य उवाच ।

अथातो रूपनिर्माणं वक्ष्म्यहं गगनस्य तु । नीलोत्पलाभं कर्तव्यं तद्वदम्बरधारि तत् ॥ १
द्विभुजं सौम्यवदनं चन्द्रसूर्यविभूषितम् । चतुरस्रं भवेत्सूत्रं ततो वृत्तं खगेश्वर ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके आकाशस्वरूपनिर्णयाध्यायश्चतुस्त्रिंशः ॥ ३४ ॥

श्रीसूर्य उवाच ।

शुभवर्णा मही कार्या दिव्याभरणभूषिता । चतुर्भुजा सौम्यमुखा चन्द्रार्काशुसमावृता ॥ १
रत्नपात्रं सस्यपात्रं पात्रमौषधसंयुतम् । पद्मं करेऽथ कर्तव्यं पृथिव्या विनतात्मज ॥ २
दिङ्नागानां चतुर्णां च भूमिं पृष्ठे ततो न्यसेत् । सर्वौषधियुता देवी शुक्लवर्णा[1] ततः स्मृता ॥ ३

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके पृथिवीरूपनिर्णयाध्यायः पञ्चत्रिंशः ॥ ३५ ॥

श्रीसूर्य उवाच ।

गौरी कार्या दिव्यरूपा श्वेतवस्त्रधरा शुभा । द्विभुजा दिव्यपीठस्था सर्वाङ्गाभरणान्विता ॥ १
रत्नहारधरा देवी कौशेयवसना तथा । पद्मप्रकाशसंकाशा कुमुदोत्पललोचना ॥ २
स्त्रीपुत्रसुखवृद्ध्यर्थं सा देया कार्यसाधनी ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसम्वादे कर्मविपाके गौरीस्वरूपनिर्णयाध्यायः षट्त्रिंशः ॥ ३६ ॥

श्रीसूर्य उवाच ।

महात्मनो भैरवस्य रूपं शृणु हि पुत्रक । लम्बोदरं च कर्तव्यं कृष्णपिङ्गललोचनम् ॥ १
दंष्ट्राकरालवदनं फुल्लनासापुटं तथा । कपालमालि वै रौद्रं सर्वतः सर्पभूषणम् ॥ २
व्यालेन त्रासयत्तच्च देवीं पर्वतनन्दिनीम् । सजलाम्बुदसंकाशं गजचर्मोत्तरच्छदम् ॥ ३
बाहुभिर्बहुभिर्व्याप्तं सर्वायुधविभूणम् । बृहच्छालप्रतीकाशं तथा तीक्ष्णमुखैः शुभम् ॥ ४
साचीकृतमिदं रूपं भैरवस्य प्रकीर्तितम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके भैरवस्वरूपनिर्णयाध्यायः सप्तत्रिंशः ॥ ३७ ॥

श्रीसूर्य उवाच ।

कुमारः षण्मुखः कार्यः सर्वाभरणभूषितः । चतुर्बाहुर्महातेजाः कवचेनाभिसंवृतः ॥ १
रक्ताम्बरधरो रम्यो मयूरवरवाहनः । कुक्कुटश्च तथा घण्टा तस्य दक्षिणहस्तयोः ॥ २
पताका वैजयन्ती च शक्तिः कार्या च वामयोः । कृत्वा हिरण्मयं स्कन्दं राजतं वा स्वशक्तितः
संपूज्य विधिवद्गन्धैः स्कन्दमंत्रेण धीमता । हुत्वाग्रेऽष्टोत्तरशतं तिलैर्वा गौरसर्षपैः ॥ ४
जप्त्वा पूर्वविधानेन देयोऽसौ विजयप्रदः ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके स्कन्दरूपनिर्णयाध्यायोऽष्टत्रिंशः ॥ ३८ ॥

श्रीसूर्य उवाच ।

नन्दी कार्यस्त्रिनेत्रस्तु चतुर्बाहुर्महाभुजः । सिन्दूरारुणसंकाशो व्यालयज्ञोपवीतकः ॥ १
त्रिशूलभिन्दिपाले च करयोस्तस्य कारयेत् । शिराततं तृतीयं तु वर्जयन्तं तथाऽपरम् ॥ २
आलोकयानं कर्तव्यं दूरादावशिकं जनम् । अनेनैव तु रूपेण वीरभद्रं विदुर्बुधाः ॥ ३

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके वीरभद्रगणस्वरूपनिर्णयाध्याय एकोनचत्वारिंशः ॥ ३९ ॥

---

१ युक्तवर्णा—खपु० ।

श्रीसूर्य उवाच ।

कालः करालवदनो बृहत्कर्णो द्विपाद्विभुः । दीर्घदंष्ट्रो विरूपाक्षो दिग्भुजश्च त्रिलोचनः ॥ १ ॥
कृशोदरो विरूपाढ्यः सर्पयज्ञोपवीतवान् । सर्पवृश्चिकरोमाढ्यः कर्णे स्वर्णविभूषितः ॥ २ ॥
मुक्ताहारधरः कण्ठे तथा चोन्नतनासिकः । नीलपट्टधरो देवो नरमानोच्चसंमितः ॥ ३ ॥
द्विहस्तो हस्तमात्रो वा सहस्रपलसंमितः । मध्यः श्रेष्ठो द्विगुणितः कनिष्ठश्च तदर्धकः ॥ ४ ॥
धनुस्तस्यादिमे हस्ते द्वितीये लोष्टभेदनम् । चर्मसूत्रं तृतीये तु तुर्ये वाणं मनोहरम् ॥ ५ ॥
पञ्चमे शृङ्खला लौही दक्षहस्ते तु वामके । मुद्गरं चादिमे खड्गं द्वितीये च तृतीयके ॥ ६ ॥
पाशं चतुर्थे मुसलं पञ्चमे स्वर्णकुम्भकम् । कुर्यात्तस्य नखाग्राणि तीक्ष्णानि च खगेश्वर॥ ७ ॥
माणिक्यानि च नेत्रेषु स्थापनीयानि यत्नतः । दन्ताश्च राजताः कार्या जिह्वा कार्या हिरण्मयी८
लिङ्गे वज्रं प्रदातव्यं पुष्परागं तथाण्डयोः । नीलं च निर्मलं सूत गुदरन्ध्रे प्रदापयेत् ॥ ९ ॥
एवं लक्षणसंयुक्तं कुर्यात्कालनरं तथा । तस्य संबन्धजाः सर्वाः प्रतिमा ब्राह्मणादिकाः ॥१०॥
धातुजास्तास्तथा कार्याः स्वस्वमानसमन्विताः । स्वर्णादिधातुजाश्चोक्ता योज्याः कालनरे सुत११
संपूज्य गन्धपुष्पाद्यैः कालमन्त्रेण धीमता । बलिदाने पशुः कार्यः स्वदेहरुधिरं तथा ॥ १२ ॥
उभे ते प्रतिमे देये कालाख्यनरधातुजे । ब्राह्मणाय विधिज्ञाय ह्येकस्मै च कुटुम्बिने ॥ १३ ॥
सूर्यभक्ताय शान्ताय कर्मप्राकाशिकाय च । तत्र दाता पठेन्मन्त्रमुक्तवच्छ्रद्धयान्वितः ॥ १४ ॥

प्रतिग्राही पठेच्चैनं मन्त्रं कालस्य कालवित् ।

ॐ नमः कालपुरुषाय सर्वभूतभयंकराय यजमानोपकाराय मां रक्षरक्ष स्वाहा ॥

गृहीत्वा प्रतिमे द्वे तु मन्त्रेणानेन वै द्विजः ॥ १५ ॥
तेनैव च्छेदयेद् दृष्टी द्वयोरपसरन्सुत । स्वर्णमूर्तेश्चतुर्थांशं विप्रेभ्यः प्रतिपादयेत् ॥ १६ ॥
जप्त्वा शक्त्याऽथ गायत्रीं शुद्धो भवति तत्क्षणात् । स्वर्णमूर्तियुते कालदाने त्वेष विधिः स्मृतः॥ १७॥
स्वर्णादन्यस्वरूपाढ्ये केवले वा समन्विते । स्वस्वमानमिते स्वर्णपलैः कार्ये न कुत्रचित् ॥१८॥
ऊने तत्त्वमिते स्वर्णपलैर्देये खगेश्वर । नैवं विधानं यः कुर्याल्लोभान्मोहाद्विशेषतः ॥ १९ ॥
अपि दातृप्रतिग्राह्योर्वर्षान्ते मरणं भवेत् । पूजयित्वा तु गन्धाद्यैर्वस्त्राभरणकाञ्चनैः ॥ २० ॥
गजाश्वशस्त्रैर्विविधैर्ब्राह्मणं तं विसर्जयेत् । नालोकयेन्मुखं तस्य सर्पिष्यात्मानमीक्षयेत् ॥ २१ ॥
तन्मुखालोकने रिष्टं भवत्येव न संशयः । एवं कालनरं दद्यात्सर्वारिष्टप्रशान्तये ॥ २२ ॥
दिव्यभौमान्तरिक्षेषु चोत्पातेषु च यत्फलम् । रिष्टं तन्नाशमायाति दत्ते कालनरे सुत ॥ २३ ॥
महादानमिदं चैतद्दानानां मस्तके स्थितम् । नहीदृशं मया प्रोक्तं दानं रिष्टहरं परम् ॥ २४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके कालपुरुषरूपनिर्णयाध्यायश्चत्वारिंशः ॥ ४० ॥

श्रीसूर्य उवाच ।

अथ ते सांप्रतं सूत कालचक्रविनिर्णयम् । वक्ष्ये चक्राकृतिं सूत सौवर्णे राजतं तथा ॥ १ ॥
सुवर्णदशकं श्रेष्ठं मध्यं पलमितं सुत । तदर्धं च कनिष्ठं स्यादपकृष्टं तदर्धकम् ॥ २ ॥
रश्मियुक्तं शुभाकारं अहरूपसमन्वितम् । सूर्यरूपं च तन्मध्ये माणिक्यादि यथाक्रमम् ॥ ३ ॥
संपूज्य कालमन्त्रेण गन्धपुष्पोपचारकैः । तच्च दद्याद्विधिज्ञाय सर्वरोगापनुत्तये ॥ ४ ॥
यजमानो महाभाग मन्त्रमेतमुदीरयन् । "इदं ते हेमजं चक्रं रत्नजालसमाकुलम् ॥ ५ ॥
अपमृत्युविनाशाय ददामीति शुभं कुरु । " स्वगृह्योक्तविधानेन स्थाप्यस्तत्र हुताशनः ॥ ६ ॥

जुहुयात्कालमन्त्रेण मितमष्टोन्तरं शतम् । सहस्रं वा तथा जप्त्वा मन्त्रं मृत्युंजयाभिधम् ॥ ७ ॥
ब्राह्मणान्भोजयेच्छक्त्या पश्चाद्दद्याच्च दक्षिणाम् । देयमेतन्महाभाग सर्वरोगभयापहम् ॥ ८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके कालचक्ररूपदानानिर्णयाध्याय एकचत्वारिंशः ॥ ४१ ॥

श्रीसूर्य उवाच ।

रोगराजस्य यत्नेन रूपं शृणु हि पुत्रक । यत्स्वरूपं गजा दृष्ट्वा नाशमायान्ति तत्क्षणात् ॥ १ ॥
ज्वरस्त्रिपादः कर्त्तव्यो दीर्घरूपो भयानकः । वृहत्त्रिनेत्रैर्वदनैस्त्रिभिश्च दशनैर्दृढः ॥ २ ॥
भस्मप्रहरणो रौद्रस्त्रिबाहुर्व्याकुलेक्षणः । ऊर्ध्वकेशो महाकायो ज्वलत्कान्तिर्यमोपमः ॥ ३ ॥
पलार्धार्धमिते हेमपत्रे लेख्यःस वै बुधैः । प्रोक्तश्चोष्णज्वरो रौद्रः शीतलो वैष्णवज्वरः ॥ ४ ॥
ज्वरमूर्तिं च यो दद्यात्सौवर्णीं शक्तितोऽण्डज । महापर्वसु संपूज्य गन्धपुष्पाक्षतैरलम् ॥ ५ ॥
स मुच्यते महारौद्राज्ज्वररोगान्न संशयः । शिवोऽपि पूजनीयोऽत्र ज्वरदेवः प्रयत्नतः ॥ ६ ॥
अथाष्टम्यां चतुर्दश्यामेकादश्यां विशेषतः । संपूज्य वैष्णवैर्मन्त्रैर्गन्धाद्यैर्विष्णुमव्ययम् ॥ ७ ॥

ज्वरं हैमं तथा सूत स्वमन्त्रेणोपचारकैः ।

मन्त्रः—ॐ नमो महाज्वराय विष्णुरुद्रगणाय भीममूर्तये सर्वलोकभयंकराय मम तापं हरहर स्वाहा ।

संपूज्य जप्त्वा हुत्वा च तिलैर्वा गौरसर्षपैः ॥ ८ ॥

भोजयित्वा द्विजाञ्शक्त्या दद्याद्धैमीं च दक्षिणाम् । एवं कृत्वा च यो दद्याद्रोगराजमिहाण्डज ॥ ९ ॥
विप्राय वेदविदुषे ज्वराच्छीतात्प्रमुच्यते । अथ ताम्रमयं कुम्भं पञ्चरत्नसमन्वितम् ॥ १० ॥
कुर्याच्छतपलैर्वापि तदर्धार्धमितं तथा । अशक्तो मृन्मयं वापि रक्तवर्णं सुशोभनम् ॥ ११ ॥
घृतेन मधुना वापि गुडशर्करयापि च । पूरयित्वा च तं तत्र विन्यसेत्तण्डुलोपरि ॥ १२ ॥
प्रमाणं तण्डुलानां तु पञ्चद्रोणमुदाहृतम् । वेष्टयेत्पट्टवस्त्रेण गन्धाद्यैश्च प्रपूजयेत् ॥ १३ ॥
ज्वरमूर्तिं तथा हैमीं ज्वरमन्त्रेण बुद्धिमान् । संपूज्य गन्धपुष्पाद्यैः स्थापयेत्तद्घटोपरि ॥ १४ ॥
ज्वरदेवौ तथा पूज्यौ विष्णुः स्मरहरश्च तौ । स्वस्वमन्त्रविधानेन धूपगन्धादिभिस्ततः ॥ १५ ॥
पूर्वं जप्त्वा च तन्मन्त्राञ्ज्वरमन्त्रं च यत्नतः । होमयेद्विधिवत्कुण्डे स्थण्डिले वा विधानतः ॥ १६ ॥

दत्त्वा स्वर्णं जापकेभ्यो भोजयित्वा द्विजांस्तथा ।

ज्वरदानमन्त्रः—"भस्मप्रहरणो रौद्रस्त्रिशिरास्त्र्यूर्ध्वलोचनः ॥ १७ ॥

दानेनानेन सुप्रीतो ज्वरः पातु सदा मम । एकान्तरं सन्निपातं तार्तीयिकचातुर्थिकौ ॥ १८ ॥
पाक्षिकं मासिकं वापि सांवत्सरिकमेव च । नाशयेतां मम क्षिप्रं वासुदेवमहेश्वरौ" ॥ १९ ॥
इत्युच्चार्य ज्वरी दद्याज्ज्वरमूर्तिं खगेश्वर । न तस्य ज्वरजा पीडा भवत्येव ममाज्ञया ॥ २० ॥
चातुर्थिकेऽतिविषमे कृत्वा प्राक् पापशोधनम् । पश्चाद्विधिरयं यस्मात्पापजो मृत्युकृज्ज्वरः ॥ २१ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ज्वरस्वरूपनिर्णयाध्यायो द्विचत्वारिंशः ॥ ४२ ॥

श्रीसूर्य उवाच ।

ब्रह्माणं कारयेद्विद्वान्देवं सौम्यं चतुर्मुखम् । बद्धपद्मासनं तुष्टं तथा कृष्णाजिनाम्बरम् ॥ १ ॥
जटाधरं चतुर्बाहुं चतुर्हंसे रथे स्थितम् । वामे [illegible]करं तस्यैकं दोर्युगं भवेत् ॥ २ ॥
एकस्मिन्दक्षिणे पाणावक्षमाला शुभा तथा । कमण्डलुर्द्वितीये च सर्वाभरणधारिणम् ॥ ३ ॥

सर्वोस्यं श्मश्रुयुक्तं च शान्तिरूपं तथाण्डज। पद्मपत्रदलाग्राभं ध्यानसंमीलितेक्षणम् ॥ ४ ॥
अर्चायां कारयेद्देवं दाने वा शान्तिकर्मणि।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ब्रह्मस्वरूपनिर्णयाध्यायस्त्रिचत्वारिंशः ॥ ४३ ॥

श्रीसूर्य उवाच।

अथ ब्राह्मी चतुर्वक्त्रा षड्भुजा हंससंस्थिता। पिङ्गाभा भूषणोपेता मृगचर्मोत्तरीयिका ॥ १ ॥
चरुं सूत्रं स्रुवं धत्ते दक्षवाहुत्रये क्रमात्। वामे च पुस्तकं कुण्डं बिभ्रती चाक्षमालिकाम्॥ २ ॥
यः कृत्वा ब्रह्मणो रूपं सौवर्णं राजतं तथा। सस्त्रीकं शक्तितोऽभ्यर्च्य पर्वस्वपि च पक्षतः ॥३॥
दद्याद्वेदविधिज्ञाय लभेत्पुत्राञ्छुभानिह। अनेन विधिना दद्यात्स्त्रीकामो वा स्त्रियं लभेत् ॥ ४ ॥
स्त्रीनाशे च महोत्पाते पुत्रनाशे च दारुणे। यो दद्याद्ब्रह्मणो रूपं सभार्यं विनतात्मज ॥ ५ ॥
न तस्य पुत्रजं रिष्टं न च भार्योद्भवं तथा। भविष्यति महाबाहो नात्र कार्या विचारणा ॥ ६ ॥
स्त्रीघाती प्राग्भवे यस्तु बालघाती तथैव च। शक्त्या दद्याच्च विप्रेशं हंसमभ्यर्च्य यत्नतः ॥
स्त्रीबालघ्नजातपापान्मुच्यते पूर्वजन्मजात् ॥ ८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ब्रह्माणीस्वरूपनिर्णयाध्यायश्चतुश्चत्वारिंशः ॥ ४४ ॥

श्रीसूर्य उवाच।

अथ प्रजापतेर्मूर्तिं वक्ष्यामि त्वां पतत्रिण। हंसयानश्च कर्तव्यो न च कार्यश्चतुर्भुजः ॥ १ ॥
ब्रह्मोक्तं परमं रूपं सर्वं कार्यं प्रजापतेः। स्त्रीत्यागी पुरुषो यस्तु भ्रूणहा च परे भवे ॥ २ ॥
कृत्वा प्रजापतेर्मूर्तिं सौवर्णीं रत्नसंयुताम्। संपूज्य गन्धपुष्पाद्यैर्नैवेद्यैर्विविधैस्तथा ॥ ३ ॥
दद्याद्विप्राय विदुषे प्राक्पापान्मुच्यतेऽधुना। ब्रह्मरूपमथाश्वत्थं रविवारेऽथ पर्वसु ॥ ४ ॥
योऽर्चयेन्मासिमास्यत्र वर्षमेकं पतत्रिण। फलैरष्टोत्तरशतैरष्टाविंशतिकैरथ ॥ ५ ॥
अष्टभिर्वा प्रयत्नेन परिक्रम्य प्रपूजयेत्। गन्धैः पुष्पैर्धूपदीपैः फलैर्दिव्यैर्विशेषतः ॥ ६ ॥
घृतपक्वैस्तथा विप्रान्भोजयेच्च स्वशक्तितः। जपित्वा ब्रह्ममन्त्रेण वर्षान्ते होमयेत्ततः ॥ ७ ॥
दक्षिणां शक्तितो दद्यात्सर्वकार्यप्रसाधिनीम्। अनेन विधिना यस्तु प्रजेशं पूजयेत्सुत ॥ ८ ॥
प्रजाविवृद्धिस्तस्य स्यात्प्रजेशस्य प्रसादतः।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके प्रजाप्रतिस्वरूपनिर्णयाध्यायः पञ्चचत्वारिंशः ॥ ४५ ॥

श्रीसूर्य उवाच।

देवदेवं तथा विष्णुं कारयेद्गरुडध्वजम्। कौस्तुभोद्भासितोरस्कं सर्वाभरणधारिणम् ॥ १ ॥
सजलाम्बुदवच्छ्यामं पीतदिव्याम्बरं तथा। मुखाश्च कार्याश्चत्वारो बाहवो द्विगुणाः स्मृताः॥२॥
सौम्येन्दुवदनं पूर्वं नारसिंहं तु दक्षिणम्। कापिलं पश्चिमं वक्त्रं तथा वाराहमुत्तरम् ॥ ३ ॥
तस्य दक्षिणहस्तेषु बाणार्कमुसलादयः। पद्मेन्दुचापचर्माणि वामेषु वनमालिनः ॥ ४ ॥
कृत्वा हिरण्मयं विष्णुं शंखचक्रगदाधरम्। योऽर्चयेद्विष्णुमन्त्रेण षोडशोपचारकैः ॥ ५ ॥
स याति परमं स्थानं यद्गत्वा न निवर्तते। अथ विष्णोर्महामूर्तिं हैमीं कृत्वा सुशोभनाम् ॥ ६ ॥
द्वादश्यां श्रवणर्क्षे वा महापर्वसु वा तथा। संपूज्य गन्धपुष्पाद्यैस्तन्मन्त्रेण खगाधिप ॥ ७ ॥

१ चतुर्मुखः—खपु०।

मृन्मये कलशे स्थाप्य गन्धपुष्पैरलंकृते । गर्भस्थं रक्षणार्थं तां ब्राह्मणाय निवेदयेत् ॥ ८
न तस्य गर्भपतनं जायतेऽस्य प्रसादतः । कृत्वा तु वैष्णवीं सूत प्रतिमां राजतीं शुभाम् ॥ ९
हैमीं वा शक्तितोऽभ्यर्च्य गन्धाद्यैस्तंडुले स्थितम् । दद्यात्स मुच्यते नेत्ररोगान्नक्तान्धजादिह ॥ १०

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके विष्णुस्वरूपनिर्णयाध्यायः षट्चत्वारिंशः ॥ ४६ ॥

श्रीसूर्य उवाच ।

तार्क्ष्यो मारकतः प्रोक्तः कौशिकाकारनासिकः । चतुर्भुजस्तु कर्त्तव्यो वृत्तनेत्रमुखस्तथा ॥ १
गृध्रोरुजानुचरणः पक्षद्वयविभूषितः । पक्षौ स्वर्णमयौ सूत कलापेन विवर्जितः ॥ २
छत्रं च पूर्णं कुम्भं च करयोस्तस्य कारयेत् । करद्वयं तु कर्तव्यं तथा विरचिताञ्जलिः ॥ ३
यदास्य भगवान्पृष्ठे छत्रकुम्भधरा करौ । न कर्तव्यौ च कर्तव्यौ देवपादधरावुभौ ॥ ४
किंचिल्लम्बोदरः कार्यः सर्वाभरणभूषितः । कृत्वा तार्क्ष्यं महाभाग पलेनार्धपलेन वा ॥ ५
तद्दायज्ञा तु संपूज्य गन्धपुष्पाक्षतैः शुभैः । तं दद्याद्दानमन्त्रेण नेत्ररोगात्प्रमुच्यते ॥ ६

दानमन्त्रः ।

श्रीकृष्ण परमानन्द जगतः परिपालक । तव वाहनदानेन नेत्ररोगः स कामलः ॥ ७
नाशमायातु तत्क्षिप्रं पूर्वपापसमुद्भवम् ।

गरुडगायत्री ।

ॐ गरुडाय विद्महे पक्षिराजाय धीमहि । तन्नो गरुडः प्रचोदयात् ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके गरुडस्वरूपनिर्णयाध्यायः सप्तचत्वारिंशः ॥ ४७ ॥

श्रीसूर्य उवाच ।

लक्ष्मीनारायणौ कार्यौ संयुक्तौ दिव्यरूपिणौ । दक्षिणस्था विभोर्मूर्तिर्लक्ष्मीमूर्तिस्तु वामगा ॥ १
दक्षिणः कण्ठलग्नोऽस्य वामो हस्तः सरोजधृक् । विभोर्वामकरो लक्ष्म्याः कुक्षिभागस्थितः सदा ॥ २
सर्वावयवसंपूर्णा सर्वालंकारशोभिता । सिद्धिः कार्या समीपस्था चामरग्राहिणी शुभा ॥ ३
उक्तप्रकारा कर्तव्या पलेनार्धार्धमानतः । सौवर्णी प्रतिमा सूत राजती वा यथोक्तवत् ॥ ४
तन्मन्त्रेण च संपूज्य षोडशोपचारकैः । देया वेदविधिज्ञाय सर्वकार्यप्रसाधिनी ॥ ५
योऽर्चयेन्नित्यमव्यक्तं लक्ष्मीनारायणं विभुम् । मन्त्रैः पुरुषसूक्तैश्च स याति परमां गतिम् ॥ ६
हिरण्मयं च यो दद्याल्लक्ष्मीनारायणं त्विह । संपूज्य विधिवद्देवं मन्त्रैस्तल्लिंगजैरलम् ॥ ७
वातपित्तोद्भवाद्रोगान्मुच्यते नात्र संशयः । सौवर्णं राजतं वापि दद्यात्पलमितं त्विह ॥ ८
नारायणं विधानेन विद्धि रोगविनाशकृत् । स्वाध्यायोक्तप्रमाणेन सौवर्णं राजतं तथा ॥ ९
लक्ष्मीनारायणं देवं यः कुर्यात्पापशोधनम् । संपूज्य विधिवत्तत्र जप्त्वा हुत्वा विशेषतः ।
स्तुत्वा नारायणं देवं मन्त्रेणानेन बुद्धिमान् ॥ ११ ॥

"देवदेव जगन्नाथ जगदानन्दकारक । ददेऽहं त्वां त्रिलोकेश सर्वकामप्रदो भव ॥" १०
इत्युच्चार्य नरो दद्यात्पूर्वपापात्प्रमुच्यते । सर्वान्कामानिहाप्नोति दानस्यास्य प्रभावतः ॥ १२
लक्ष्मीनारायणं दानं पुत्रपौत्रविवर्धनम् । सर्वारिष्टहरं पुण्यमेतदुक्तं मनीषिभिः ॥ १३
ॐ लक्ष्मीनारायणाय सर्वकामफलप्रदाय मम दुःखं भञ्जयभञ्जय ॐ लक्ष्मीनारायण नमः ॥ (इति मूलमन्त्रः ।)

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके लक्ष्मीनारायणस्वरूपनिर्णयाध्यायोऽष्टाचत्वारिंशः ॥ ४८ ॥

श्रीसूर्य उवाच।

प्रयोगं शृणु सावित्र्याः सर्वकामफलप्रदम्। रहस्यं परमं पुण्यं महापातकनाशनम् ॥ १ ॥
ब्रह्महा कोटिमेकं तु जप्त्वा शुद्धिं समाचरेत्। तथैव पक्षिशार्दूल पितृमातृवधो यतः ॥ २ ॥
सुवर्णहारी सततं मद्यपश्च विशेषतः। गुरुतल्पगतो यस्तु लक्षं जप्त्वा विशुद्ध्यति ॥ ३ ॥
महापातकिनां सङ्गी सोऽपि लक्षात्प्रमुच्यते। गोघ्नः कृतघ्नो बालघ्नः स्त्रीघाती द्विजद्रव्यहृत् ॥ ४ ॥
ब्राह्मण्यां च स्वगोत्रायां व्यभिचारपरो नरः। जप्यमानस्तु सावित्र्या लक्षार्धं शुद्धिमाप्नुयात् ॥ ५ ॥
व्यभिचारी स्वगोत्रघ्नो कन्याघातनतत्परः। स्वामिद्रोहादिपापेभ्यस्तदर्धान्मुच्यते ध्रुवम् ॥ ६ ॥
परस्वभूमिहरणात्परपीडाप्रदानतः। जीवघातान्महापापादग्निदाहकृतात्तथा ॥ ७ ॥
दुष्टप्रतिग्रहात्पापाद्देवभङ्गात्प्रमादतः। कूटसाक्ष्यप्रदानाच्च नित्यलोपादिपापतः ॥ ८ ॥
गायत्र्यष्टसहस्रं तु जप्त्वा शुद्धिं लभेदिह ॥ ९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके गायत्रीजपनिर्णयाध्यायः एकोनपञ्चाशः ॥ ४९ ॥

श्रीसूर्य उवाच।

अथ काम्यं प्रवक्ष्यामि गायत्रीजपमुत्तमम्। मोक्षकामो जपेत्कोटिं लक्षं वा स्वर्गकामतः ॥ १ ॥
लक्षार्धं धनकामश्च पुत्रस्त्रीकामुकस्तथा। जपेत्कोटिं प्रयत्नेन राज्यकामस्तथाण्डज ॥ २ ॥
श्रीकामः शान्तिकामो वा पुष्ट्यायुर्वृष्टिकामुकः। जपेद्विंशतिसाहस्रमधिकारोदयेषु च ॥ ३ ॥
महाधिकारकृत्यादौ लक्षं वार्द्धं जपेत्सुधीः। पञ्चविंशतिसाहस्रं सर्वरोगोपशान्तये ॥ ४ ॥
नानारिष्टोपशमने जपेत्त्रिंशत्सहस्रकम्। लक्षमर्धं तदर्धं वा जपेद्बन्धनपीडितः ॥ ५ ॥
सर्वार्थसाधने तद्वद्धोमयेच्च दशांशतः। शक्त्या वा होमयेत्कुण्डे तिलाज्ययवतण्डुलैः ॥ ६ ॥
भोजयेच्च द्विजाञ्शक्त्या तेभ्यो दद्याच्च दक्षिणाम् ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके गायत्रीविध्यध्यायः पञ्चाशः ॥ ५० ॥

श्रीसूर्य उवाच।

अशक्तो ब्राह्मणद्वारा जपं कुर्याद्विधानतः। आसनैर्भूषणैर्वस्त्रैः पात्रै रत्नैश्च पूजयेत् ॥ १ ॥
स्वशक्त्या दक्षिणां दद्याद्यथोक्तां कार्यसाधिनीम्। अयुतस्य जपस्यात्र सुवर्णमितिसंयुताम् ॥ २ ॥
प्राङ्मुखश्चोदङ्मुखो वा द्विवासाः[1] शुद्धमानसः। प्रशस्तमालया विद्वाञ्जपं कुर्याद्विधानतः ॥ ३ ॥
तर्जन्या न स्पृशेन्मालां करभ्रष्टां न कारयेत् ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके गायत्रीविधिकथननामाध्यायः एकपञ्चाशः ॥ ५१ ॥

श्रीसूर्य उवाच।

न कम्पयेच्छिरो ग्रीवां दन्तान्नैव प्रकाशयेत्। उपलिप्ते शुचौ देशे निराहारो जितेन्द्रियः ॥ १ ॥
एवं जप्त्वा तु सावित्रीं सर्वकामान्प्रसाधयेत्। अकामतो जपेद्यस्तु सूर्यलोकमवाप्नुयात् ॥ २ ॥
कामतः साधयेत्सर्वान्कार्यान्नात्र विचारणा। न सावित्र्याः परो मन्त्रो मुनिभिः समुदाहृतः ॥ ३ ॥
यो जप्त्वा विधिना मन्त्रं गायत्र्यास्तु[2] विधानतः। कोटिलक्षं तदर्धं वा होमयेत्स्वदशांशतः ॥ ४ ॥
गामेकां कपिलां दद्यात्सर्वस्वार्धं तदर्धकम् ॥ दक्षिणां ब्राह्मणेभ्यश्च स याति परमां गतिम् ॥ ५ ॥
आजन्मोपार्जितं पापं त्रिविधं नाशमानुयात् ॥ ६ ॥

१. सुवासाः—खपु०। २ गायत्यत्र विधानतः—खपु०।

शोधनं सर्वपापानां प्रयोगमिदमद्भुतम् । अकृत्वा शोधनं चैतत्पङ्के गौरिव सीदति ॥ ७

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके गायत्रीविध्यध्यायो द्विपञ्चाशः ॥५२॥

श्रीसूर्य उवाच ।

एवमष्टोत्तरं मन्त्रं जपेद्विष्णोर्विधानतः । होमयेदुक्तविधिना तथा दद्याच्च दक्षिणाम् ॥ १
विप्रेभ्यश्चाण्डजश्रेष्ठ सर्वपापान्विशोधयेत् । प्रयोगं वैष्णवं चैतत्सर्वपापप्रणोदनम् ॥ २
स्वर्गमोक्षप्रदं चैतत्सर्वं विष्णोः प्रसादतः ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके विष्णुमन्त्रजपनिर्णयाध्यायस्त्रिपंचाशः ॥ ५३ ॥

अरुण उवाच ।

नश्यन्त्यखिलरिष्टानि पापमूलानि भास्कर । यत्कृते तदहं त्वत्तः श्रोतुमिच्छामि तत्त्वतः ॥ १

श्रीसूर्य उवाच ।

महारिष्टहरं पुण्यं मृत्युंजयविधानकम् । शृणु सूत प्रवक्ष्यामि सर्वदुःखविनाशनम् ॥ २
वरयेद्ब्राह्मणान्भक्त्या फलवस्त्रविभूषणैः । कारयेन्मण्डलं तत्र शुचिदेशे विधानतः ॥ ३
चतुरस्रं चतुर्द्वारं त्रिरेखं पद्मगर्भितम् । हस्तत्रयप्रमाणं तु तण्डुलैर्मण्डलं लिखेत् ॥ ४
भैरवीभैरवान्सिद्धिदिशानागानुपग्रहान् । पीठोपपीठसंयुक्तदिक्पालादिसमन्वितान् ॥ ५
देवतानां चतुःषष्टिं लिखेत्पद्मे सुशोभने । एकैकपद्मपत्रेषु वसुसंख्या दलेदले ॥ ६
प्रणवादिनमोन्तैस्तु नाममन्त्रैः प्रपूजयेत् । गन्धपुष्पाक्षतैर्धूपदीपनैवेद्यादिकैः ॥ ७
अर्चयेत्पद्मपत्रेषु सर्वकार्यप्रसाधकान् ॥ ८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके मृत्युंजयपूजाध्यायश्चतुःपञ्चाशः ॥ ५४ ॥

श्रीसूर्य उवाच ।

सौवर्णं त्र्यम्बकं कुर्यात्पलेनार्धपलेन वा । गोमयेन गुडेनापि यथा वित्तानुसारतः ॥ १
मृत्युंजयेन मन्त्रेण पूजयेदुपचारकैः । सौम्यद्वारे महाभाग देवदेवं घटे न्यसेत् ॥ २
जपेन्मृत्युंजयं मन्त्रं तदग्रेऽष्टसहस्रकम् । देवीसूक्तं जपेत्तावद्रुद्राध्यायं विशेषतः ॥ ३
अथवा बहुभिर्विप्रैः कोटिलक्षायुतादिकम् । जप्त्वा पूर्वं विघ्नराजं सर्वकार्यप्रसाधनम् ॥ ४
षण्मासं राज्यकामस्तु पुत्रकामस्तथैव च । शत्रुनाशनकामश्च वर्षान्तमपि कारयेत् ॥ ५
षण्मासं पूजयेद्विद्वान्महारोगैः प्रपीडितः । मासमेकं तु मासार्धं कुर्याद्रोगाकुलीकृतः ॥ ६
बन्दिवेश्मनि दुर्गे वा बद्धो मुच्येत बन्धनात् । षाण्मासिकप्रयोगाच्च द्विगुणान्नात्र संशयः ॥ ७
महारिष्टभयग्रस्तः प्रयोगमिममाचरेत् । न चारिष्टभयं घोरं प्राप्नुयादिति मे वचः ॥ ८
महापापसमुद्भूतं दृढकर्मसमर्जितम् । चतुर्विधं महारिष्टं मदुक्तं गरुडाग्रज ॥ ९
स्वाध्यायोक्तेन विधिना कृत्वा तच्छोधनं त्विह । प्रयोगात्र्यम्बकाख्याच्च न चारिष्टभयं क्वचित्[1] ॥ १०
एतन्मण्डलमध्यस्थोऽभिषिक्तः पुरुषो यदा । ततः प्रभृतियुद्धेषु शत्रूञ्जयति निश्चितम् ॥ ११
राज्यभ्रष्टो लभेद्राज्यं क्षीणायुर्म्रियते न च । मुक्त्वा पीडां ग्रहाः सर्वे शान्तिं कुर्वन्ति नित्यशः ॥ १२
प्रयोगस्य प्रभावेण नात्र कार्या विचारणा ॥ १३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके मृत्युंजयप्रयोगाध्यायः पंचपञ्चाशः ॥ ५५ ॥

---

१ प्रेतपीडा खपु० ।

श्रीसूर्य उवाच।

प्रयोगं परमं वक्ष्ये रहस्यं त्र्यम्बकाभिधम्। सर्वार्थसाधकं पुण्यं सर्वोपद्रवनाशनम् ॥ १ ॥
यत्कृते सर्वराजानो राजपुत्राश्च मन्त्रिणः। राष्ट्रस्थाः सर्वलोकाश्च तत्क्षणात्तद्वशेऽनुगाः ॥ २ ॥
अवश्या वश्यतां यान्ति दुष्टस्त्रीक्षुद्रजन्तवः। वैरिणो वशगास्तस्य प्रयोगस्य प्रभावतः ॥ ३ ॥
सिद्ध्यन्त्यखिलकार्याणि दुर्लभान्यपि तस्य तु। तदादौ पूजयेद्देवं गणेशं विधिवत्सुधीः ॥ ४ ॥
लिङ्गानेकादशमितान्पूजयेद् गुडसंभवान्। पार्थिवान्वा प्रयत्नेन तदलाभे प्रपूजयेत् ॥ ५ ॥
रक्तवस्त्रैस्तथा गन्धैरुपचारैः समन्त्रकैः। पूजयेच्च तथा देवीं पठेच्चण्डीं विधानतः ॥ ६ ॥
कोटिलक्षार्धकं जप्त्वा मन्त्रं मृत्युञ्जयाभिधम्। ॐ जूँ स इति वै मन्त्रस्त्र्यम्बकाख्यः सनातनः ॥७॥

इति श्रीबृहद्सूर्यारुणसंवादे कर्मविपाके त्र्यम्बकप्रयोगाध्यायः षट्पञ्चाशः ॥ ५६ ॥

श्रीसूर्य उवाच।

कुण्डे षडस्रसंयुक्ते त्र्यस्रे वा विधिवत्कृते। स्वगृह्योक्तविधानेन स्थाप्य तत्र हुताशनम् ॥ १ ॥
होमयेत्तद्दशांशेन मध्वाज्यतिलसर्पपैः। आलिखेन्मण्डलं तत्र तण्डुलैः शोभनं बुधः ॥ २ ॥
चतुरस्रं चतुर्द्वारं त्रिरेखं पद्मगर्भितम्। साधकस्य त्रिभिर्हस्तैर्मितं हीनाधिकं न तत् ॥ ३ ॥
तन्मध्ये शोभनं पद्मं कृत्वा वाष्टदलान्वितम्। एकैकपद्मपत्रे तु वसुसंख्या दलेदले ॥ ४ ॥
भैरवीभैरवान्सिद्धिग्रहान्नागानुपग्रहान्। पीठोपपीठसंयुक्तान्दिक्पालैरष्टभिर्युतान् ॥ ५ ॥
चतुःषष्टिमितान् देवान्विधिना स्थाप्य तण्डुलैः। गन्धपुष्पोपचारैश्च नैवेद्यैर्विविधैस्तथा ॥ ६ ॥
प्रणवादिनमोन्तैश्च नाममन्त्रैश्च पूजयेत् ॥ ७ ॥

इति श्रीबृहद्सूर्यारुणसंवादे कर्मविपाके त्र्यम्बकप्रयोगाध्यायः सप्तपञ्चाशः ॥ ५७ ॥

श्रीसूर्य उवाच।

पूर्वद्वारे गणेशेन्द्रौ शिवमुत्तरतस्तथा। वरुणं पश्चिमे देवं यमं याम्ये विधुं तथा ॥ १ ॥
ऐशान्यां कलशं स्थाप्य तीर्थवारिसमन्वितम् ॥ २ ॥
मृत्युंजयेन मन्त्रेण शतवाराभिमन्त्रितम्। संपूज्य विधिवद्राजा विसर्जनमथाचरेत् ॥ ३ ॥
यान्तु देवगणाः सर्वे पूजामादाय मामकीम्। इष्टकामफलार्थाय पुनरागमनाय च ॥ ४ ॥

इति श्रीबृहद्सूर्यारुणसंवादे कर्मविपाके त्र्यम्बकप्रयोगाध्यायोऽष्टपञ्चाशः ॥ ५८ ॥

श्रीसूर्य उवाच।

अभिषिञ्चेत्ततो वीरं संग्रामे विजयी भवेत्। एतन्मण्डलमध्यस्थोऽभिषिक्तः पुरुषो यदा ॥ १ ॥
ततः प्रवर्तिते युद्धे शत्रूञ्जयति निश्चितम्। राज्यभ्रष्टो लभेद्राज्यं क्षीणायुर्भ्रियते न च ॥ २ ॥
मुक्त्वा पीडां ग्रहाः सर्वे शान्तिं कुर्वन्ति नित्यशः। श्रद्धयापि कृते ह्यस्मिन्प्रयोगे त्र्यम्बकाभिधे॥२॥
यथेप्सितमवाप्नोति फलं रुद्रप्रभावतः। अश्रद्धयाल्पकरणात्फलमल्पं प्रजायते ॥ ४ ॥
यथाविभवतश्चापि महदैश्वर्यमाप्नुयात्। ऋत्विग्भ्यो दक्षिणां दद्यात्प्रयोगस्य प्रसिद्धये ॥ ५ ॥
यथाशक्तिस्तथा दद्यादाचार्याय विशेषतः। ब्राह्मणान्भोजयेच्छक्त्या स्वयं भुञ्जीत मानवः ॥ ६ ॥

इति श्रीबृहद्सूर्यारुणसंवादे कर्मविपाके त्र्यम्बकप्रयोगाध्याय एकोनषष्टितमः ॥ ५९ ॥

---

१ द्रुद्रसंभवान्—खपु० । २ मन्त्रितः-खपु० ।

अरुण उवाच ।

पापशोधनकं[1] सर्वं ब्रूहि मे परमेश्वर । दानस्याक्षयकृच्चैव विधानं वदतांवर ॥ १

श्रीसूर्य उवाच ।

वैनतेय महाभाग दानस्याक्षयकारकम् । द्रव्यमानं च द्रव्याणि तद्देवांश्चापि पूजनम् ॥ २
विधानं स्नानदानाद्यं वक्ष्यथो पापशोधनम् । यवद्वयस्य गुञ्जास्यान्माषो गुञ्जा ष्टकस्य च ॥
सुवर्णो दशमाषः स्यात्ते चत्वारः पलं स्मृतम् । सुवर्णकर्षौ तुल्यौ स्तो माने रजतकाञ्चने ॥
तुला पलशतैर्ज्ञेया भारः स्याद्विंशतिस्तुलाः । एवं ताम्रादिधातूनां मानं प्रोक्तं मनीषिभिः ॥
वक्ष्यामि सर्वधान्यानां मानमत्र खगेश्वर । पलद्वयं तु प्रसृतं द्विगुणं कुडवं स्मृतम् ॥ ३
चतुर्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वार आढकः । आढकैस्तैश्चतुर्भिश्च द्रोणस्तु कथितो बुधैः ॥
कुण्डो द्रोणद्वयं प्रोक्तः खारी द्रोणास्तु षोडश । मापटङ्काक्षविल्वानि कुडवप्रस्थमाढकम् ॥ ४
राशिर्गोणी तथा खारी यथोत्तरचतुर्गुणाः । पलमेकं तथा मुष्टिः कुञ्चिदष्टौ तु मुष्टिकम् ॥ ५
तेऽष्टौ पुष्कलसंज्ञं तैश्चतुर्भिः पूर्णपात्रकम् ॥ १० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके द्रव्यमाननिर्णयाध्यायः षष्टितमः ॥ ६० ॥

सप्त धान्यानि ।

श्रीसूर्य उवाच ।

यवगोधूमधान्यानि तिलाः कंगुस्तथैव च । श्यामाकं चणकं चैव सप्तधान्यमुदाहृतम् ॥ १

अथाष्टादश धान्यानि ।

यवगोधूमधान्यानि तिलाः कंगुलिकस्तका । मापमुद्गमसूराश्च निष्पावाश्च ससर्षपाः ॥ २
गवेधुकाश्च नीवारा आढकाश्च सतीनकाः । चणकस्थान्दगदका धान्यान्यष्टादशैव तु ॥ ३
यवाभावे तु गोधूमा व्रीहिणामपि शालयः । आज्यद्रव्यमनादेशे जुहोतिषु विधीयते ॥ ४

सप्तौषधयः ।

व्रीहयः शालयो मुद्गा गोधूमा अणवस्तिलाः । यवाश्चौषधयः सप्त विपदो घ्नन्ति काश्यप ॥ १

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकषष्टितमः ॥ ६१ ॥

सर्वौषधिगणः ।

श्रीसूर्य उवाच ।

मुरा मांसी वचा कुष्ठं शैलेयं रजनीद्वयम् । साठी चम्पकमुस्तं च सर्वौषधिगणः स्मृतः ॥ १

रसषट्कम् ।

मधुरोऽम्लश्च लवणः कषायस्तिक्त एव च । कटुकश्चेति पक्षीन्द्र रसषट्कमुदाहृतम् ॥ २

सप्त धातवः ।

सुवर्णं रजतं मुक्ता आरकूटं तथैव च । लोहं त्रपु तथा सीसं धातवः सप्त कीर्तिताः ॥ १

पञ्च रत्नानि ।

सुवर्णं रजतं मुक्ता राजावर्तं प्रवालकम् । रत्नपञ्चकमाख्यातं शेषं वसु ब्रवीम्यहम् ॥

---

१ शोधनजं—खपु० । २ वसाक—खपु० ।

सर्वधातवः ।

मौलकं च शिला वज्रमञ्जनं श्याममेव च । काक्षी कांसीसमाक्षीकं गैरिकं सर्वधातवः ॥ ९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो द्विषष्टितमः ॥ ६२ ॥

द्रव्यदेवताः ।

श्रीसूर्य उवाच ।

वक्ष्यमाणोक्तद्रव्याणां सांप्रतं देवताः शृणु । प्राजापत्यो गजः प्रोक्तस्तुरगश्चार्कदैवतः ॥ १ ॥
महिषश्च तथा याम्यश्चोष्ट्रो वै यमदैवतः । रौद्री धेनुर्विनिर्दिष्टा छागो वै चाग्निदैवतः ॥ २ ॥
एडकं वारुणं विद्याद्वराहो विष्णुदैवतः । आरण्याः कथिताः सर्वे पशवो वायुदेवताः ॥ ३ ॥
जलाश्रयाणि सर्वाणि वारिधारा कमण्डलुः । कुम्भं च करकं चैव वारुणानि विनिर्दिशेत् ॥ ४ ॥
समुद्रजातरत्नानि सामुद्राणि तथाण्डज । आग्नेयं कनकं प्रोक्तं सर्वलोहानि वा पुनः ॥ ५ ॥
प्राजापत्यानि सस्यानि पक्वान्नानि विशेषतः । ज्ञेयानि सर्वगन्धानि गान्धर्वाणि विचक्षणैः ॥ ६ ॥
बार्हस्पत्यं स्मृतं वासः सौम्यान्यत्र रसानि च । पक्षिणश्च तथा सर्वे वायव्याः परिकीर्तिताः ॥७ ॥
विद्या ब्राह्मी विनिर्दिष्टा विद्योपस्करणानि च । सारस्वतानि रागाणि पुस्तकाद्यानि वै खग ॥ ८॥
सर्वेषां शिल्पिनां जाने विश्वकर्माधिदैवतम् । द्रुमाणामथ पुष्पाणां शाकानां हरितां स ह ॥ ९ ॥
फलानामपि सर्वेषां देवो यत्र वनस्पतिः । मत्स्यमांसं विनिर्दिष्टं प्राजापत्यं तथैव च ॥ १० ॥
अभयं सर्वदैवत्यं पृथिवी विष्णुदेवता । दासी दासस्तथा कन्या प्राजापत्याः प्रकीर्तिताः ॥ ११ ॥
छत्रं कृष्णाजिनं शय्या रथमासनमेव च । उपानहौ तथा यानं यच्चान्यत्प्राणवर्जितम् ॥ १२ ॥
उक्ताश्चांगिरसस्त्वेतत्प्रतिगृह्णीत मानवः । पर्जन्या ये तथा सीरः शस्त्रचर्मध्वजादिकम् ॥ १३ ॥
रणोपकरणं सर्वं कथितं शक्रदैवतम् । गृह्णन्तु सर्वदैवत्यं ताम्बूलं नागदैवतम् ॥ १४ ॥
यदनुक्तं महाभाग तज्ज्ञेयं विष्णुदैवतम् । यस्य द्रव्यस्य यद्रूपं प्रतिमासु खगेश्वर ॥ १५ ॥
सा ह्येव देवता तस्य दानकाले समुच्चरेत् ॥ १६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्रिषष्टितमः ॥ ६३ ॥

श्रीसूर्य उवाच ।

यवोदरैरष्टसंख्यैरंगुलं परिकीर्तितम् । षडंगुलं पदं प्राहुर्वितस्तिर्द्विगुणा स्मृता ॥ १ ॥
वतस्तिमितो हस्तो ब्रह्मतीर्थाद्विचेष्टनैः । चतुर्हस्तो भवेद्दण्डो मानकाले खगेश्वर ॥ २ ॥
क्रोशो धनुःसहस्रे द्वे गव्यूतिर्द्विगुणा स्मृता । योजनं द्विगुणं तस्मात्प्रोक्तं मानं खगाधिप ॥ ३ ॥
दशहस्तेन दण्डेन त्रिंशद्दण्डैर्निवर्तनम् । दश तान्येव गोचर्म भूमिमानमितीरितम् ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुःषष्टितमः ॥ ६४ ॥

श्रीसूर्य उवाच ।

प्रमाणं सर्वदेवानां मूर्तीनां शृणु चाण्डज । मुनिनागासुराणां च मनुष्यपशुपक्षिणाम् ॥ १ ॥
गजोन्माना गणेशस्य नरमाना शिवस्य च । लक्ष्मीनारायणौ तद्वन्नरमानोच्चसंमितौ ॥ २ ॥
प्रासादस्थास्तु ताः सर्वास्त्रिहस्तमितिकाः सुत । द्विहस्तमितिकाः केचित्केचिद्धस्तमिताः शुभाः ३॥

---

१ तालकम्–खपु० । २ कासी–खपु० । ३ त्यक्तान्नानि–खपु० ।

प्रासादस्था महाभाग गृहस्था न च शोभनाः । सप्तांगुलात्समारभ्य यावच्च द्वादशांगुलम् ॥ ४
गृहेष्वर्च्याः समाख्याताः प्रासादे वाधिकाः शुभाः । स्थापनेऽप्यत्र लिङ्गानां व्यवस्थेतिरियं स्मृता
नहि लिङ्गार्चनात्सूत पुण्यमभ्यधिकं क्वचित् । शालग्रामशिला चैव नर्मदोत्था विशेषतः ॥ ६
यथा लाभस्तथा ग्राह्या मानहीनाधिका हि सा । सर्वकामप्रदा कर्तुरन्ते स्वर्गफलप्रदा ॥ ७

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पञ्चषष्टितमः ॥ ६५ ॥

श्रीसूर्य उवाच ।

प्रतिमाष्टविधा सूत सौवर्णी राजती तथा । ताम्री रत्नमयी कार्या रीत्या धात्वन्विता तथा ॥ १
ताम्रकांस्यमयी चैव शुभदारुमयी शुभा । वितस्तिमानं यावत्स्याद्गुष्ठात्पर्वसंमिता ॥ २
गृहेष्वर्च्या शुभा प्रोक्ता नाधिका गरुडाग्रज । गोब्राह्मणेषु वाग्वह्नौ हृदि स्वे प्रतिमासु च ॥ ३
शालग्रामे खौ वापि पूजनं शुभदं पटे । दाने स्वभावजा लेख्या घटितेति त्रिधाण्डज ॥ ४
सर्वपापहरा ज्ञेयाः सर्वकामफलप्रदाः । लेख्या चतुर्विधा प्रोक्ता श्रेष्ठा मध्या कनिष्ठिका ॥ ५
अपकृष्टा तु फलदा तत्क्रमान्नात्र संशयः । दैर्घ्ये त्वेकाङ्गुला श्रेष्ठा विस्तारेऽष्टांगुला मता ॥ ६
मध्याष्टांगुलिका दैर्घ्ये विस्तारे च षडङ्गुला । षडङ्गुला तदा दैर्घ्ये हीना वेदाङ्गुलायते ॥ ७
चतुरङ्गुलिका दैर्घ्ये चायामे चापकृष्टिका ॥ ८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षट्षष्टितमः ॥ ६६ ॥

श्रीसूर्य उवाच ।

अङ्गुष्ठपर्वन्यूनतो हीना दानेन शोभना।पलाभ्यां प्रतिमा न्यूना श्रेष्ठा कार्यालिपकापि चेत् ॥ १
वक्ष्यमाणस्वरूपा वा देवादीनां विधानतः । एवं सर्वा द्विजातीनां कार्याः स्वर्णादिधातुजाः ॥ २
नराकाराः समालेख्याः सर्वावयवसंयुताः । श्रेष्ठामध्याकनिष्ठाश्च तथा चैवापकृष्टिकाः ॥ ३
सर्वा वितस्तिमानोना विस्तारे तास्त्रयः स्मृताः । स्त्रीपुत्रसहिता कार्या रहिता वाथ कुत्रचित् ॥ ४
चतुष्कोणा सुघटिता मन्त्रैरावर्तनादिकैः । अनाज्ञया द्विजानां वै न तासां घटनं स्मृतम् ॥ ५
एवमश्वगजोष्ट्राणां गवादीनां च पक्षिणाम् । स्वाकाराङ्क्याश्च सततं कार्याश्चार्चाविधानतः ॥ ६
पत्रे लेख्या सुवर्णाद्ये वेदाङ्गुलिमिताधिके । सुगन्धैर्विविधैर्वापि लेख्या कार्या प्रयत्नतः ॥ ७
प्रणवादिनमोऽन्तेन नाममन्त्रेण चाण्डज । आवर्तनं च घटनं प्रतिष्ठाऽऽवाहनादिकम् ॥ ८
पूजनं प्रतिमानां च स्वैस्वैर्मन्त्रैश्च कारयेत् । प्रासादे चातिफलदा पूजनीया प्रतिष्ठिता ॥ ९
देवताः सफलाः सूत पूजने च प्रतिष्ठिताः ॥ १० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायःसप्तषष्टितमः ॥ ६७ ॥

अरुण उवाच ।

प्रतिष्ठां सर्वदेवानां ब्रूहि मेऽत्र दिवाकर । यां कृत्वा विधिना पूर्णं देवपूजाफलं लभेत् ॥ १

श्रीसूर्य उवाच ।

प्रतिष्ठां सर्वदेवानां कारयेत्क्रमतो नरः । नारायणादयो देवा निवसन्ति सुरालये ॥ २
भक्तानुग्रहतो मर्त्ये समायान्ति च भूतले । सौम्यायने सिते पक्षे गुरुशुक्रोदिते दिने ॥ ३
सुमुहूर्ते यजेद्देवान्नानाविभवविस्तरैः । वरयेद्ब्राह्मणान्पूर्वं वस्त्रासनविभूषणैः ॥ ४

१ खे—खपु० । २ कार्यालिपकास्ति चेत्—खपु० । ३ पटनं—खपु० । ४ देवाः स्वफलदाः सूत—खपु
५ पूर्वं—खपु ।

जप्त्वा तद्देवमन्त्रांश्च कोटिलक्षायुतादिकान्। स्नात्वा पञ्चामृतेनैव दिव्यैस्तीर्थोदकैस्तथा ॥ ५ ॥
लिप्त्वा सुगन्धैर्विविधैर्माल्यैर्वस्त्रैश्च दीपकैः। धूपैर्निवेदितैर्भक्ष्यैः फलैस्तदनुसंभवैः ॥ ६ ॥
तथा मङ्गलदीपैश्च व्यजनैश्चामरैः शुभैः। नानावाद्यैर्मनोज्ञैश्च प्रीतिमुत्पादयेत्सुरान् ॥ ७ ॥
देवाग्रे च स्वपेद्भूमावशक्तौ जागरे निशि। ततः प्रातः समुत्थाय स्नातः शुचिरलंकृतः ॥ ८ ॥
देवमावाहयेन्मन्त्रैस्तल्लिङ्गैः प्राग्वदर्चयेत्। षोडशोपचारैस्तु नान्यथा देवता विशेत् ॥ ९ ॥
ज्ञात्वा देवांश्च घटितान्सुवर्णाद्यैर्विनिर्मितान्। शालग्रामशिलादौ वा जीवमन्त्रसमावृतान् ॥ १० ॥
पत्रे लेख्यांस्तथारूपाञ्शास्त्रलक्षणलक्षितान्। स्वकीयासनसंस्थांश्च स्वस्वोपस्करसंयुतान् ॥ ११ ॥
एतन्ते त्वेष वै चेति मन्त्राभ्यां सुप्रतिष्ठितान्। कुर्याद्देवान्विधानेन ततः कामफलप्रदाः ॥ १२ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोऽष्टषष्टितमः ॥ ६८ ॥

श्रीसूर्य उवाच।

देवाग्रे होमयेन्मन्त्रैर्दशांशेन प्रयत्नतः। तर्पयेच्छ्रद्धया चानुशक्त्या विप्रांश्च भोजयेत् ॥ १ ॥
जापकेभ्यः प्रदद्याच्च सुवर्णमयुतस्य च। तत्र दानानि देयानि देवप्रीतिकराणि च ॥ २ ॥
गावो वस्त्राणि चान्नानि रत्नानि विविधानि च। यथा देवं द्विजं तद्वद्विधिज्ञं वेदपारगम् ॥ ३ ॥
तोषयेन्मृदुभिर्वस्त्रैर्गोभूम्यश्वासनादिकैः। विविधैर्भूषणैर्दिव्यैर्ब्राह्मणं तं विसर्जयेत् ॥ ४ ॥
प्रार्थयेच्च तदग्रेऽत्र मन्त्रमेनमुदीरयेत् ॥ ५ ॥
देवाधीनं जगत्सर्वं मन्त्राधीनाश्च देवताः। ते मन्त्रा ब्राह्मणाधीनास्तस्माद् भूदेवता द्विजाः ॥ ६ ॥
तत्प्रसादादिमे देवास्तिष्ठन्तु मम मन्दिरे। पूजां गृह्णन्तु मे नित्यं कुर्वन्तो मन्मनोरथान् ॥ ७ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकोनसप्ततितमः ॥ ६९ ॥

श्रीसूर्य उवाच।

शक्तियुक्तं महादेवं प्रतिष्ठेद्देवमेव हि। लक्ष्मीनारायणं वापि मन्त्रभेदात्तथैव च ॥ १ ॥
वक्ष्ये मन्त्रांस्तु वेदोक्तान्सुराणां भावितात्मनाम्। मन्त्रो विष्णोरिदं विष्णुर्नमस्त इति शाम्भवः २
ब्रह्मणो ब्रह्मजज्ञानमम्बेऽम्बायाः प्रकीर्तितः। आकृष्णेति सहस्रांशोर्मन्त्रः प्रोक्तो मनीषिभिः ॥ ३ ॥
श्रीश्चत इति लक्ष्म्यास्तु पार्वत्याः शुचिपार्णिकाम्। गणानां त्वेति मन्त्रस्तु विघ्नराजस्य कीर्तितः ४
विष्णोरराडिति वा मन्त्रः प्रोक्तः सनातनः। समुद्रायेति शंखस्य रुद्राक्षस्य च त्र्यम्बकम् ॥ ५ ॥
दिक्पालानां तथा मन्त्रास्त्रातारेत्यादिकाः स्मृताः नवग्रहाणां मन्त्राश्च श्रुतौ देवाधिदेवताः ॥ ६ ॥
बहुविस्तरतः प्रोक्ता ऋषिभिस्तत्त्वदर्शिभिः। लक्ष्मीनारायणाभ्यां च नमोन्त इति कीर्तितः ॥ ७ ॥
सरस्वत्यादिकानां च मन्त्राः प्रोक्ताः सविस्तराः। मन्त्राः पुरुषसूक्तोत्थास्तथा नरहरेः प्रभोः ८ ॥
यन्त्रोद्धारे प्रतिष्ठायां मन्त्रास्तल्लिङ्गदैवजाः। अथवाऽष्टाक्षरो मन्त्रो द्वादशाक्षर एव च ॥ ९ ॥
नारायणप्रतिष्ठायां योज्यौ धर्मार्थकामदौ। प्रणवादिनमोन्तैश्च नाममन्त्रैर्यथोदितैः ॥ १० ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्ततितमः ॥ ७० ॥

श्रीसूर्य उवाच।

प्रतिष्ठातो हि देवानां सर्वकामफलं स्मृतम्। अथवाऽऽगमजैर्मन्त्रैः प्रतिष्ठेत्सर्वकामदैः ॥ १ ॥
तैर्मन्त्रैश्च जपं कुर्यात्पूजान्ते धर्मवित्सदा। अनेन विधिना मन्त्रैर्यस्तु देवान्प्रतिष्ठयेत् ॥ २ ॥

१ देवाग्निमर्चयेत्—खपु० । २ ब्रह्मणे ब्रह्मजज्ञाममेत्यायाः प्रकीर्तितः—खपु० । ३ प्रतिष्ठे सर्वदेवानां—खपु० ।

स याति परमं स्थानं यद्गत्वा न निवर्तते । इह लोके परे चापि नाशुभं तस्य विद्यते ॥ ३
अप्रतिष्ठितदेवांश्च पूजयेद्यस्तु मूढधीः । न तत्फलमाप्नोति स नरो देवदूषकः ॥ ४
अप्रतिष्ठितदेवानां दानेऽप्यल्पफलं भवेत् । दाने बहुफला देवा मन्त्रमात्रप्रतिष्ठिताः ॥ ५
पूजारम्भेऽत्र देवानां पादस्पर्शे तथाद्भुते । विकारे प्रतिमायां च स्पृष्टे म्लेच्छजनैस्तथा ॥ ६
महापातकिभिः स्त्रीभी रजोयुक्ताभिरेव च । अपूज्ये वा चिरं देवे ह्येवमेव गृहे स्थिते ॥ ७ ।
कुर्याद्देवप्रतिष्ठां च न कुर्यान्निरयं व्रजेत् । सर्वदुःखानथाप्नोति नात्रः कार्या विचारणा ॥ ८ ।
विवाहोत्सवयज्ञेषु महादाने तथैव च । देवतायाः प्रतिष्ठायां ग्रहपूजां च कारयेत् ॥ ९ ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकसप्ततितमः ॥ ७१ ॥

श्रीसूर्य उवाच ।

उपलिप्ते शुचौ देशे कर्ता शुचिरलंकृतः । आचामेत्पञ्चगव्येन ततः शुद्धेन वारिणा ॥ १ ॥

पञ्चगव्यम् ।

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । पञ्चगव्यमिति प्रोक्तं पवित्रं कायशोधनम् ॥ २ ॥
विष्णुवह्नीन्द्रवाय्वर्का दैवतानि यथाक्रमम् । कुशोदकस्य पक्षीन्द्र पितरो देवताः स्मृताः ॥ ३ ।

पञ्चामृतम् ।

दधि क्षीरं मधु घृतं सिता च गरुडाग्रज । पञ्चामृतमिदं प्रोक्तं पवित्रं पापनाशनम् ॥ ४ ।
पलानां द्वे सहस्रे तु महास्नानं प्रकीर्तितम् । (स्नाने पलशतं दद्यादभ्यङ्गे पञ्चविंशतिः ॥ ५ ॥
यथाशक्त्याथवा सूत स्नापयेच्छ्रद्धयान्वितः ।) षट्त्रिंशदङ्गुलं पात्रमुत्तमं परिकीर्तितम् ॥ ६ ॥
चतुर्विंशतिकं मध्यं कनिष्ठं द्वादशाङ्गुलम् । वस्वङ्गुलं विहीनं तु न पात्रं कारयेत्क्वचित् ॥ ७ ।
सौवर्णं राजतं ताम्रं पात्रं मणिमयादिकम् । प्रशस्तपुटकाद्यं तु शुभदं देवपूजने ॥ ८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो द्विसप्ततितमः ॥ ७२ ॥

अथ पुष्पाणि ।

श्रीसूर्य उवाच ।

निर्गन्धीन्युग्रगन्धीनि कुसुमानि विवर्जयेत् । गन्धहीनमपि ग्राह्यं पवित्रं यत्कुशादिकम् ॥ १ ।
पुष्पैरारण्यसंभूतैः पत्रैर्वा पर्वतोद्भवैः । अपर्युषितनिक्षिप्तैः प्रोक्षितैर्जन्तुवर्जितैः ॥ २ ।
आत्मारामोद्भवैः पुष्पैः पूजयेत्प्रतिमां सुधीः । दत्त्वा दश सुवर्णस्य निष्कानां लभते फलम् ॥ ३ ।
तदेककरवीरेण सूर्याय विनिवेदयेत् । रक्तैश्च करवीरैश्च यस्तु पूजयते रविम् ॥ ४ ।
कल्पकोटिसहस्राणि सूर्यलोके वसेन्नरः । करवीरशतेनैव यो मे मालां प्रयच्छति ॥ ५
स याति शिवलोकं तु मोदते तत्र देववत् ॥ ६ ॥

अथ गन्धः ।

चत्वारः कौङ्कुमा भागाश्चन्दनस्य च षोडश ॥ ६ ॥
कस्तूरिकाया द्वौ भागौ कर्पूरस्य चतुष्टयम् । सर्वगन्धमिदं सूत देवाङ्गे लेपयेत्सुधीः ॥ ७

अथ धूपः ।

कर्पूरमगुरुं चैव चन्दनं गुग्गुलं तथा । गुग्गुलं सर्वदेवानां साज्यं चैव सितागुरुम् ॥ ८
समभागमुशीरं च धूपो देवप्रियः सुत ।

---

१ श्लोकोऽयं नास्ति—खपु० ।

अथ दीपः ।

दद्यादीपांश्च देवाग्रे गोघृतेन प्रपूरितान् ॥ ९ ॥
अथवा तिलतैलेन सार्षपेणाप्यभावतः । अन्यस्नेहैर्वसाद्यैश्च दीपान्नैव प्रबोधयेत् ॥ १० ॥
दीपदश्च शुभाँल्लोकान्याति दीपशतैर्वृतः ॥ ११ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायत्रिसप्ततितमः ॥ ७३ ॥

श्रीसूर्य उवाच ।

तथोपवीतदानेन सुरेभ्यो ब्राह्मणाय च । जातः पृथिव्यां कालेन भवेद्विप्रः पतिर्भुवः ॥ १ ॥
दद्याद्वस्त्राणि देवेभ्यः श्वेतपीतारुणानि च । क्षौमानि विविधान्येव बहुवर्णानि चाण्डज ॥ २ ॥
दिव्यवस्त्रान्वितो दाता स्वर्गलोकमवाप्नुयात् ॥ ३ ॥

अथ नैवेद्यम् ।

संयावकृशरापूपपायसं यावकं तथा ।
दध्योदनं रसालांश्च मोदकान्गुडपूपकान् । शालितण्डुलकं प्रस्थं कुर्यादन्नं सुसंस्कृतम् ॥ ४ ॥
फलानि विविधान्येव देवाय च निवेदयेत् । सर्वदुःखविनिर्मुक्तः स नरः स्वर्गभाग्भवेत् ॥ ५ ॥

अथार्घ्यदानम् ।

आपः क्षीरं कुशाग्राणि दध्यक्षततिलास्तथा । यवाः सिद्धार्थकाश्चैवमर्घोऽष्टाङ्गः प्रकीर्तितः ॥६॥
पूजादौ भानवे ह्यर्घ्यं गायत्र्या च प्रदापयेत् । नमो विवस्वते ब्रह्मन्निति मन्त्रेण वाण्डज ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके पूजोपकरणाध्यायश्चतुःसप्ततितमः ॥ ७४ ॥

श्रीसूर्य उवाच ।

अथोपचारान् पूजायाः षोडश शृणु पुत्रक । आद्येनावाहयेद्देवं मन्त्रेण पुरुषोत्तमम् ॥ १ ॥
द्वितीयेनासनं दद्यात्ततः पाद्यं प्रदापयेत् । चतुर्थेनार्घ्यदानं च ततश्चाचमनीयकम् ॥ २ ॥
षष्ठेन स्नपनं दद्यात्सप्तमेनापि वाससी । अष्टमेनोपवीतं च नवमेन विलेपनम् ॥ ३ ॥
दशमेनैव पुष्पाणि दद्याद्देवस्य चाण्डज । एकादशेन मन्त्रेण धूपं चैव प्रदापयेत् ॥ ४ ॥
दीपं द्वादशकेनैव त्रयोदशमितेन वै । नैवेद्यं विविधं दद्याद्भक्ष्यं भोज्यं च पायसम् ॥ ५ ॥
चतुर्दशेन मन्त्रेण दद्यात्सुमनसोऽञ्जलिम् । ततः पञ्चदशेनैव कारयेच्च प्रदक्षिणाम् ॥ ६ ॥
वाद्यादीनि च तेनैव षोडशेन विसर्जनम् । स्नानोपवीतवस्त्रेषु नैवेद्ये कश्यपात्मज ॥ ७ ॥
दद्यादाचमनीयानि सर्वदेवेष्वयं विधिः । स्वैस्स्वैर्मन्त्रैर्विधानेन देवांस्तत्र प्रसादयेत् ॥ ८ ॥
गन्धपुष्पे तथा धूपदीपनैवेदनानि च । अशक्तौ पञ्च वा कुर्यादुपचारांश्च पूजने ॥ ९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके पूजोपचाराध्यायः पञ्चसप्ततितमः ॥ ७५ ॥

श्रीसूर्य उवाच ।

स्नात्वा नित्यक्रियां कृत्वा कर्ता शुचिरलंकृतः । ब्राह्मणान्देयवस्तूनि गन्धाद्यैरर्चयेत्सुत ॥ १ ॥
दानं ददेऽहममुकं दद्याद्विप्रकरे जलम् । ददस्वेति द्विजेनोक्तमिति दानविधिः स्मृतः ॥ २ ॥
ॐतत्सत्पूर्वमुच्चार्य गृहीत्वा तु करे जलम् । सतिलकुशहस्तस्तु कालज्ञानं समुच्चरन्[2] ॥ ३ ॥
प्राङ्मुखश्चोदङ्मुखो वा पैत्रे याम्यमुखः स्थितः । वामेन पाणिना स्पृष्ट्वा स्मरेत्तद्वस्तुदैवते ॥४॥

१ दुग्धोदनम्–खपु० । २ समुच्चरेत्–खपु० ।

विप्रायामुकगोत्रायामुककामो ह्यहं ददे । नमस्तेत्युत्सृजेदेतद्द्विजहस्ते जलं खग ॥ ५
स्वस्तीत्युक्तेन विप्रेण दानमक्षयतां नयेत् । संप्रदानमिति प्रोक्तमन्यत्त्यागमिति स्मृतम् ॥ ६
कन्यादानं त्रिपुरुषगोत्रोच्चारणपूर्वकम् । गोकन्याप्रतिमा शय्यास्त्वकैकस्य प्रदापयेत् ॥ ७
विभक्तविधिना दाता न तत्फलमवाप्नुयात् । प्रतिष्ठासर्वदानानां स्वर्णमक्षयकारकम् ॥ ८
दानमक्षयतां याति संप्रदानेन यत्कृतम् । अभावे ब्राह्मणादीनां दानमल्पफलं भवेत् ॥ ९
तीर्थादौ त्यागविधिना संप्रदानसमं फलम् । तावद्धेनुषु धेनुत्वं देवत्वं प्रतिमासु च ॥ १०
यावद्विप्रो न गृह्णीयात्स्वस्तीत्युक्तेति तद्ध्रुवं ॥ ? ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके दानविधानाध्यायः षट्सप्ततितमः ॥ ७६ ॥

अरुण उवाच ।

सामान्येन विधिं ब्रूहि सर्वलोकहिताय वै । पापिनां कर्मदुष्टानां प्रायश्चित्तं परं वद ॥ १
प्रायश्चित्तविहीनानां का गतिः परमेश्वर । श्रोतुमिच्छाम्यहं त्वत्तः सर्वज्ञस्त्वं यतः प्रभो ॥ २ ।

श्रीसूर्य उवाच ।

प्रायश्चित्तविहीनानां महापातकिनां नृणाम् । नरकान्ते भवेज्जन्म चिह्नाङ्कितशरीरिणाम् ॥ ३ ।
प्रतिजन्म भवेत्तेषां चिह्नं तत्पापसूचकम् । प्रायश्चित्ते कृते याति पश्चात्तापवतां पुनः ॥ ४ ।
महापातकजं चिह्नं सप्तजन्माभिजायते । उपपापोद्भवं पञ्च त्रीणि पापसमुद्भवम् ॥ ५ ।
दुष्कर्मजा नृणां रोगा यान्ति चैव क्रमाच्छमम् । जपैः सुरार्चनैर्होमैर्दानैस्तेषां शमं भवेत् ॥ ६ ॥
पूर्वजन्मकृतं पापं नरकान्ते परीक्षयेत् । बाधते व्याधिरूपेण तस्य कृच्छ्रादिभिः शमः ॥ ७ ॥
कृतकर्मक्षयो नास्ति कल्पकोटिशतैरपि । अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ॥ ८ ।
पूर्वजन्मकृतं पापं व्याधिरूपेण तिष्ठति । कुष्ठं च राजयक्ष्मा च प्रमेहो ग्रहणी तथा ॥ ९ ।
मूत्रकृच्छ्राश्मरीकासा अतीसारभगन्दरौ । दुष्टव्रणं गण्डमाला पक्षाघातोऽक्षिनाशनम् ॥ १०
इत्येवमादयो रोगा महापापोद्भवाः स्मृताः । जलोदरयकृत्प्लीहशूलशोफव्रणास्तथा ॥ ११
श्वासाजीर्णज्वरच्छर्दिभ्रममोहगलग्रहाः । रक्तार्बुदविसर्पाद्या उपपापोद्भवा गदाः ॥ १२
दण्डपातकिनश्चित्रवपुःकफविचर्चिकाः । वाल्मीकपुण्डरीकाद्या रोगाः पापसमुद्भवाः ॥ १३
अर्शआद्या नृणां रोगा अभिशापाद्भवन्ति हि । अन्ये च बहुधा रोगा जायन्ते दोषसंकराः ॥ १४
उच्यन्तेऽथ निदानानि प्रायश्चित्तानि च क्रमात् । महापापेषु सर्वस्वं तदर्धं तूपपातके ॥ १५
दद्यात्पापेषु षष्ठांशं तुर्यं चाथ खगेश्वर ॥ १६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके सामान्यविचाराध्यायः सप्तसप्ततितमः ॥ ७७ ॥

श्रीसूर्य उवाच ।

दश पञ्चाथ चतुर उपदेश्य द्विजाञ्छुभान् । तेषामनुज्ञया सर्वं प्रायश्चित्तमुपक्रमेत् ॥ १
विधाय वैष्णवं श्राद्धं संकल्पं निजकाम्यया । धेनुं दद्याद्द्विजेभ्योऽयं दक्षिणाश्च स्वशक्तितः ॥ २
अलंकृत्य यथाशक्त्या वस्त्रालंकरणैर्द्विजान् । याचेत दण्डवन्नत्वा प्रायश्चित्तं यथोचितम् ॥ ३

---

१ आदर्शपुस्तक एतदध्यायांते ग्रंथत्रुटित इत्युक्तम् । अन्यलब्धपुस्तके तु त्रुटितग्रंथस्यालाभान्निरुपायैरस्माभिर्यथावन्मुद्रितोयं ग्रंथः । यदित्रुटितग्रंथस्य प्रेषणेन कैश्चिन्महाशयैरनुग्रहः क्रियेत तर्हि द्वितीयावृत्तौ ग्रंथं स्वस्थले संनिवेश्य मुद्रयिष्याम इति । २ सप्तजन्मनि—खपु० ।

व्रतच्छिद्रं तपश्छिद्रं यच्छिद्रं यज्ञकर्मणि । सर्वं भवति चाऽच्छिद्रं यस्य चेच्छन्ति वै द्विजाः॥४॥
ब्राह्मणा यानि भाषन्ते मन्यन्ते तानि देवताः । सर्वदेवमया विप्रा न तद्वचनमन्यथा ॥ ५ ॥
उपवासो व्रतं चैव स्नानं तीर्थफलं तपः । विप्रैः संपादितं यस्य संपन्नं तस्य तद्भवेत् ॥ ६ ॥
ब्राह्मणा जङ्गमं तीर्थं निर्जलं सार्वकौमिकम् । तेषां वाक्योदकेनैव शुद्ध्यन्ति मलिना जनाः ॥७॥
संपन्नमिति यद्वाक्यं वदन्ति क्षितिदेवताः । प्रणम्य शिरसा धार्यमग्निष्टोमफलं भवेत् ॥ ८ ॥
तेभ्योऽनुज्ञामिति प्राप्य प्रपद्येत यथाऽऽशिषः । भोजयित्वा द्विजाञ्शक्त्या भुञ्जीत सह बन्धुभिः॥९॥
गोदानं च तथा तेषु कर्तव्यं पापशोधनम् । एका कृच्छ्रेऽतिकृच्छ्रे द्वे तिस्रश्चान्द्रायणे व्रते ॥१०॥
गवामभावे निष्पावा साशीतिः शतकृच्छ्रदा । षाड्वार्षिके महाभाग प्रायश्चित्ते यथोदिते ॥ ११ ॥
अशीत्युत्तरशतं कृच्छ्राणां भवति ध्रुवम् । त्रिविधा हि महाबाहो कर्मजा दोषजास्तथा ॥ १२ ॥
तथोभयसमुद्भूता नृणां दोषाः पतत्रिण ॥ १३ ॥
कर्मप्रकोपेण कदाचिदेते दोषप्रकोपेण भवन्ति चान्ये ।
तथा परे प्राणिषु कर्मदोषप्रकोपजाः कायमनोविकारात् ॥ १४ ॥
प्रायश्चित्तमकृत्वा तु न कुर्यात्कर्म किंचन । अनिस्तीर्यमघं नित्यं वर्धते द्विगुणं पुनः ॥ १५ ॥
दानैर्दयाभिरतिथिद्विजदेवतागोदेवार्चनप्रणतिभिश्च जपैस्तपोभिः ।
इत्युक्तपुण्यनिचयैरपचीयमानं प्राक्पापजातमशुभं प्रशमं नयंति ॥ १६ ॥
निष्कृत्या कर्मजन्मत्थो दोषजस्त्वौषधेन हि । उभयाज्जायमानस्तु निष्कृत्यौषधसेवया ॥ १७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके दोषविभागाध्यायोऽष्टसप्ततितमः ॥ ७८ ॥

श्रीसूर्य उवाच ।

ब्रह्महा क्षयरोगी स्यादिति वेदविदो विदुः । धर्मशास्त्रादविज्ञाय प्रायश्चित्तं ददाति यः ॥ १ ॥
राजयक्ष्मा भवेत्तस्य रोगपीडातिदारुणा । क्षयी स्याद्गर्भघातेन तथा क्षेत्रस्य मारणे ॥ २ ॥
क्षयेणात्र क्षयं यान्ति धातवः सर्वदेहिनाम् । प्रायश्चित्तं परं तस्य शृणु यत्नेन चाण्डज ॥ ३ ॥
कारयेत्कदलीं दिव्यां पर्णैः सर्वत्र संयुताम् । फलपूगेन संयुक्तां सुवर्णस्य पलेन तु ॥ ४ ॥
यथाविभवतः कुर्याद्वस्त्रेणावेष्ट्य सूत्रकैः । ब्राह्मणान्भोजयेच्चापि भक्ष्यैर्नानाविधैः शुभैः ॥ ५ ॥
होमं च कारयेत्तत्र पूर्ववद्ब्राह्मणेन च । तस्मै तां कदलीं दद्याद्वस्त्रालंकारपूर्विकाम् ॥ ६ ॥
पूजिताय दरिद्राय वृत्तस्थायात्मवेदिने । धर्मज्ञायातिदान्ताय मन्त्रेणानेन तत्क्षयी ॥ ७ ॥

दानमन्त्रः ।

"हिरण्यगर्भ पुरुष परात्पर जगन्मय । रम्भादानेन देवेश क्षयं क्षपय मे प्रभो" ॥ ८ ॥
पुण्याहवाचनं कार्यं ब्राह्मणैर्वेदपारगैः । शिष्टैरिष्टैर्बन्धुभिश्च सहभोजनमाचरेत् ॥ ९ ॥
जपहोमौ यथाशक्ति पूजामन्त्रश्च त्र्यम्बकम् । राजहा राजयक्ष्मी स्याद्दोषात्तस्यातिनिष्कृतिः॥१०॥
गोभूहिरण्यमिष्टान्नजलवस्त्रप्रदानतः । घृतधेनुप्रदानेन तिलकुम्भप्रदानतः ॥ ११ ॥
दातव्यानि समस्तानि व्यस्तानि चाप्यकल्पतः ॥ १२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके क्षयरोगाध्याय एकोनाशीतितमः ॥ ७९ ॥

---

१ सर्वकामदम्–खपु० । २ अथवा पलमेकं तु सुवर्णं गोसमं फले इत्यधिकं–खपु० । ३ हेम्नः पलैर्वै दामितैर्वेहिः कार्य्यो द्विजातिभिः । जपं लक्षमितं वह्नेः सर्वेषां कार्यसाधकम्, इत्यर्धकम् । खपु० ।

श्रीसूर्य उवाच ।

शूली स्यादन्नहर्ता च जन्मन्यत्र पतत्रिण । हिंसको वा मनुष्याणां शूलरुक्पीडितोऽधुना ॥
पलार्धेन तदर्धेन तदर्धेनापि वा कृतम् । सौवर्णं राजतं वापि शूलं कुर्यात्प्रयत्नतः ॥
ताम्रेण वाऽयसा वापि वदरेणाथवा पुनः । शुभवस्त्रेण संवेष्ट्य तिलानामुपरि न्यसेत् ॥
तिलानां परिमाणं तु द्रोणं चापि तदर्धकम् । तदर्धं च यथाशक्त्या प्रजपेद्ब्राह्मणः शुचिः ॥
ततो हुतवते शूलं पूजयित्वा स्वशक्तितः । दद्यात्सदक्षिणां तत्तु प्राङ्मुखो वाप्युदङ्मुखः ॥
त्वं शूल ब्रह्मणा सृष्टं त्रिपुराणां विनाशने । दैत्यानां दानवानां च शङ्करस्यायुधं तथा ॥
कुक्षिस्थमथ पार्श्वस्थमथवा पृष्ठसंगतम् । शूलं विनाशय त्वं मे महादेवेन राधितम् ॥
ततः स्नात्वाथ भुञ्जीत ब्राह्मणैः सह वन्धुभिः । नमः शिवायेति केचित्प्रणवादि पठन्ति च ।
(त्र्यम्बकं यजेति । अरुचिशूले श्रद्धाहीनो धनवान् दानेष्वरतिस्तामसदानाद्वा यः सोऽरुचि शूली जायते तत्रायं विस्तरः ।)
साक्षाद्धन्ति गवादीनि यः पुनर्जननान्तरे । शिरोरोगी श्रोत्ररोगी शूली चारुचिमान्भवेत् ॥
(अत्र गोहननं यज्ञसाधनत्वादिगुणविशिष्टगोहननं प्रायश्चित्तस्य गुरुत्वात् ।)
विश्वस्तं विषदाता च ह्रीहवाञ्जायते नरः ।
(वा-च-शब्दाच्छूली च जठरशूले ।)
श्रुत्यध्ययनसम्पन्नं याचितारमकिंचनम् ॥ १० ॥
ब्राह्मणं दान्तमाहूय दानार्थं न ददाति यः । स भवेज्जठरे शूली तथाध्मानी च कर्हिचित् ॥ ११
पूर्वजन्मनि नास्तिक्यात्क्षयलेशाद्वचशब्दवान् । निष्कविंशतिकं दद्याद्ब्राह्मणाय कुटुम्बिने ॥ १२
विष्णुप्रकाशकान्मन्त्राञ्जपेद्रोगोपशान्तये । अपामार्जनपाठेन मन्त्रितं स जलं पिबेत् ॥ १३

भोजनं ब्राह्मणेभ्यः ।

नग्नां परस्त्रियं दृष्ट्वा सूर्यं वास्तमयोदये । नेत्रशूली भवेत्सोऽपि नेक्षितुं क्षमते दृशा ॥ १४
वर्चो मे देहि मन्त्रेण होमः स्यादथवायुतम् । वयः सुवर्ण इति च नेत्रे सिञ्चेच्च वारिणा ॥ १५
अक्षीभ्यां त इति जपेन्नेत्रशूलं प्रशाम्यति । (परस्त्रियं दृष्ट्वेति कामतस्तथा सूर्यमपि
वर्चोदा असि वर्चो मे देहीति दशाक्षरो मन्त्रः ।
सर्वेषु स्थलेषु । होमकाले स्वाहान्तः ।
मूपरोपरता येन जायते वपुयातनः । (?) ॥ १६ ॥
सोऽन्नदानं प्रकुर्वीत तथा रुद्रं जपेद्बुधः । अनुक्तेषु च रोगेषु रोगाग्निज्वलितेक्षणम् ॥ १७
भ्रूभङ्गभीषणं शक्तिं शूलं पाशांकुशौ दधत् । चक्रखड्गगदावज्रशरक्षुरधनूंषि च ॥ १८
नासाग्रन्यस्ततर्जन्या तर्जयन्पारिपार्श्वगान् । दंष्ट्रादंष्ट्राधीरपुटं दूरात्पाणिमदक्षिणम् ॥ १९
उद्यन्तमभिमुखं धावत्प्रहर्तुं पार्श्वयोः कृशम् । विशीर्णकेशरोगाणां प्रतिरूपं प्रकल्पयेत् ॥ २०

१-२-३ टीकाग्रन्थोऽयं मूले पतित इति प्रतिभाति । ४ सस्यशब्दवान्-खपु० । ५ टीकाग्रन्थोऽयं पतित इति प्रतिभाति ।

शान्तं तस्यार्धमर्धं वा हेम्नो निष्कानि तेन तु । तदेव प्रतिमामानं कर्मशान्तिष्वपि स्वतः॥ २१ ॥
येये रोगाः प्रबाधन्ते देहस्थाः सततं तु माम् । गृहाण प्रतिरूपं तु सह रोगैर्द्विजोत्तम ॥ २२ ॥
मन्त्रेणानेन तं दद्यात्पूर्वरीत्या कृतार्चनः ॥ २३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके शूलरोगाध्यायोऽशीतितमः ॥ ८० ॥

श्रीसूर्य उवाच ।

ये पुनः क्रूरकर्माणः पापाः पिशुनचेतसः । ते भवेयुः सदा शीतज्वरवन्तस्तदेनसः ॥ १ ॥
यज्ञलेषु च कार्येषु सततं कोपमाचरेत् । उष्णज्वराभिभूतस्य तत्पापस्यापनुत्तये ॥ २ ॥
जातवेदसमन्त्रेण ब्राह्मणान्भोजयेत्ततः । सुरामांसोपहारार्घैर्बलिः सर्वत्र शस्यते ॥ ३ ॥
सहस्रकलशस्नानं शतभोजनमेव च ।
रोगगुरुलघुभावेन जपे गुरुलघुभाव इति सर्वत्र द्रष्टव्यम् । सुरादिभिर्बलिरधिकारभेदेन ॥
उष्णज्वरे महेशस्य प्रकुर्यादभिषेचनम् ॥ ४ ॥

रुद्रेण शतरुद्रेण नमकानुवाकैरित्यर्थः । अत्र मृत्युञ्जयस्याप्युपलक्षणम् ॥

देवस्वहरणाच्चैव जायते विविधज्वरः । ज्वरो महाज्वरश्चैव रौद्रो वैष्णव एव च ॥ ५ ॥
ज्वरे रुद्रजपं कुर्यान्महारुद्रो महाज्वरे । महारुद्रं जपेद्रौद्रे वैष्णवे तु द्वयं जपेत् ॥ ६ ॥
(अथवा तच्छब्देन बुद्धिस्थानि वैष्णवा विष्णुहृदयस्तोत्राणि परामृश्यन्ते ।)

आगारदाही ज्वरवाञ् जायते तत्र निष्कृतिः । नवकुम्भं समानीय मृन्मयं चाव्रणं दृढम् ॥ ७ ॥
लोहितं काष्ण्यरहितं स्थापयेत्तण्डुलोपरि । परिमाणं तण्डुलानां द्रोणपञ्चकमिष्यते ॥ ८ ॥
विशुद्धास्तण्डुला ग्राह्याः श्वेतवस्त्रेण वेष्टयेत् । मधुनाऽप्यथवाज्येन खण्डेनाथ गुडेन वा ॥ ९ ॥
तैलेनाप्यम्भसा वाथ पूजयेच्छक्तितो नरः । श्वेतपुष्पैरर्चयेत्तं गन्धपुष्पोपहारकैः ॥ १० ॥
होमश्च पूर्ववत्कार्यः समिदाज्यचरूत्करैः । सुवर्णेन यथाशक्त्या ब्राह्मणाय निवेदयेत् ॥ ११ ॥
तस्मै कृतवते वृत्तश्रुतशीलाय सत्कृतम् । मन्त्रेणानेन विधिवत्पूजयित्वा ज्वरी नरः ॥ १२ ॥
महेश देवदेवेश वासुदेव परात्पर । कुम्भेनानेन दत्तेन ज्वरः क्षिप्रं प्रशाम्यतु ॥ १३ ॥
एकान्तरं सांनिपातं तृतीयकचतुर्थकौ । पाक्षिकं मासिकं चापि सांवत्सरिकमेव च ॥ १४ ॥
नाशयेतां मम क्षिप्रं वासुदेवमहेश्वरौ ॥ १५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ज्वराध्याय एकाशीतितमः ॥ ८१ ॥

श्रीसूर्य उवाच ।

कृतघ्नो जायते मर्त्यः कफवाञ् श्वासकासवान् । उष्णज्वरी च नित्यं हि पित्तरोगसमन्वितः॥१॥
चान्द्रायणत्रयं कुर्यात् पञ्चाशद्विप्रभोजनम् । अग्निं दूताख्यसूक्तेन जपं कुर्याद्विजोत्तमान् ॥ २ ॥
पूजयेद्भोजयेद्दद्यात्तन्मना नान्यमानसः । कृच्छ्राकरणे गोदानं तद्विष्णोः परमं पदम् ॥ ३ ॥
तत्र देयं मधुसर्पिर्हिरण्यवासांसि । अग्निदूतं वृणीमहे होतारं विश्ववेदसम् । (अस्य यज्ञस्य शुक्रं तु ।)
कुरुक्षेत्रादिदेशेषु कालेषु ग्रहणादिषु । महादानानि गृह्णीयान्निषिद्धान्यथवा स्वयम् ॥ ४ ॥
अपात्रभूतो दातृभ्यो निषिद्धेभ्यश्च मानवः । सपामाश्वासकासैश्च कुक्षिषु कृमिभिस्तथा ॥ ५ ॥
कण्डूत्या चैव पीडयेत तद्रोगस्य प्रशान्तये । महिषीं यमदैवत्यां दद्याद्वित्तानुसारतः ॥ ६ ॥
(स्वयमपात्रभूतो वेदनित्यकर्मानुष्ठानादिरहित इत्यर्थः । निषिद्धेभ्यो दातृभ्यः ।)

१-२-३-४-५ टीकाग्रन्थोऽयं मूले पतित इति प्रतिभाति । खपुस्तके इतोप्यधिको दृश्यते ।

कामम्रृत्युस्वरूपां तां महिषीं रक्तभूषणाम् । सालंकारां प्रदास्यामि मम शान्तिं प्रयच्छतु॥ ७
पिशुनो नरकस्यान्ते जायते श्वासकासवान् । घृतं तेन प्रदातव्यं सहस्रपलसंख्यया ॥ ८
उद्यन्नद्य जपः कार्यो होमश्चर्वाज्ययोरपि ॥ ९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके श्वासरोगहराध्यायो द्व्यशीतितमः ॥ ८२ ॥

श्रीसूर्य उवाच ।

राजमार्गे नदीतीरे छायायां पुष्टिते नरः । मूत्रं पुरीषं वल्मीके पायुं मुञ्चेज्जलेऽपि वा ॥ १
श्वयथुव्याधिमाप्नोति ह्येवमाह सदाशिवः । शोफी कृच्छ्रत्रयं कुर्याद्गायत्र्या अयुतं जपम् ॥ २
तिलहोमसहस्रं च जपेन्मृत्युञ्जयं तथा । विघ्नकर्ता भवेत्क्रूरः शोफी भवति मानवः ॥ ३
तस्य कर्मविपाकोऽल्पव्याधिनाशनमुत्तमम् । क्षौमवस्त्रं समानीय बहुमूल्यं च यद्भवेत् ॥ ४
मुक्ताफलानि वस्त्रीयाद्वस्त्रप्रान्ते समन्ततः । कुंकुमेनांकितं सम्यक्कर्पूरागरुधूपितम् ॥ ५
तण्डुलोपरि संस्थाप्य तण्डुलांश्च स्वशक्तितः । आचार्यायाथ तद्वस्त्रं दद्यात्तच्च सदक्षिणम् ॥ ६
ऋषीणां प्रवरोऽगस्त्यो लोपामुद्रापतिः प्रभुः । क्षौमवस्त्रप्रदानेन तुष्टो व्याधिं व्यपोहतु ॥ ७

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके शोफहराध्यायस्त्र्यशीतितमः ॥ ८३ ॥

श्रीसूर्य उवाच ।

देवद्विजद्रव्यहारी पाण्डुरोगी भवेन्नरः । कृच्छ्रातिकृच्छ्रे कुर्याच्च चान्द्रायणमतन्द्रितः ॥ १
कुर्यात्कूष्माण्डहोमं च स्वर्णचन्द्रेण वाससी । ब्राह्मणेभ्यो यथाशक्ति पाण्डुरोगस्य शान्तये ॥२
[चन्द्रेण राजतेनेत्यर्थः]
अग्निष्टोमादिकर्माणि प्रक्रम्य न समापयेत् । स पाण्डुरोगी भवति शिरोवेदनवांस्तथा ॥ ३
अन्त्यजागमने मर्त्यः पाण्डुरोगी प्रजायते ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके पाण्डुरोगहराध्यायश्चतुरशीतितमः ॥ ८४ ॥

श्रीसूर्य उवाच ।

छिन्नान्यन्त्राणि जायन्ते वैश्यहन्तुस्ततः परम् । ज्वरैः शीतोष्णकौ दाहस्तत्पाने तन्निवर्तते ॥ १
कृच्छ्रातिकृच्छ्रं कुर्याच्च शतब्राह्मणभोजनम् । उद्यन्मृचाजपश्च स्यादयुतत्रयसंख्यया ॥ २
अन्तसूक्तेन वर्चाज्यं जुहुयाच्छतमष्ट च । अथवा महिषीं दद्यात्पतिरूपेण काञ्चनीम् ॥ ३
यज्ञविघ्नकरो मर्त्यो जायते चात्र वृद्धिमान् । कुर्यात्स्वर्णमयीं मूर्तिं शुभां नारायणस्य तु ॥ ४
व्यावहारिकनिष्ठाभ्यामेकेनापि तदर्धतः । नारायणश्चतुर्बाहुः शंखं चक्रं तथोत्तरे ॥ ५
दक्षिणे तु गदां पद्मं नीलजीमूतसन्निभः । वामे श्रीवल्लकीहस्ता पुष्टिः पद्मकरा परा ॥ ६
प्रक्षाल्य पञ्चगव्येन स्थापयेत्कुंकुमोपरि । श्वेतवस्त्रेण संवेष्ट्य गन्धमाल्यैः समर्चयेत् ॥ ७
उपचारैः षोडशभिराचार्यो वैष्णवः शुचिः । सर्वशास्त्रार्थतत्त्वज्ञो ब्रह्मविद्यासु निष्ठितः ॥ ८
होमं च कारयेत्तत्र ह्याग्नेय्यां दिशि शास्त्रतः । समिदाज्यतिलैश्चैव जुहुयान्मूलमन्त्रतः ॥ ९
रोगी तथार्चयेद्देवं नारायणमनामयम् । मूलमन्त्रेण विधिवन्नैवेद्यं चरुरिष्यते ॥ १०
नमोऽनन्ताय सोङ्कारं मूलमन्त्रः प्रकीर्तितः। ततस्तां प्रतिमां दद्यात्प्राङ्मुखाय ह्युदङ्मुखः॥११

---

१ अपान्ते—खपु० ।

नारायण जगन्नाथ शंखचक्रगदाधर । पूर्वजन्मनि यज्ञादौ विघ्नं यद्वै कृतं मम ॥ १२ ॥
अत्र वृद्धिमहारोगं दानेनानेन तोषितः । चक्रहस्त गदापाणे शमयाशु जगत्पते ॥ १३ ॥
विप्राणां भोजनं दद्यात्स्नात्वा भुञ्जीत बन्धुभिः । एवं कृत्वा समाप्नोति नीरोगत्वं नरो भुवि॥ १४॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके वृद्धाध्यायः पंचाशीतितमः ॥ ८५ ॥

श्रीसूर्य उवाच ।

जात्युत्तमस्त्रीगमनाज्जायते मस्तकव्रणी । तत्पातकविशुद्ध्यर्थं प्राजापत्यचतुष्टयम् ॥ १ ॥
कर्मकाले कुक्कुटं च खरादीन्पाप ईक्षते । स नासिकाव्रणी च स्यादार्द्रनेत्रश्च जायते ॥ २ ॥
[तत्र[1] स्वर्णहरिणीदानं धेनुदानं वा ।]
स्वजातिजायागमने जायते हृदयव्रणी । तत्पातकविशुद्ध्यर्थं प्राजापत्यद्वयं चरेत् ॥ ३ ॥
[स्वजातियागमनमित्यस्यार्थः[2] ब्राह्मणस्य ब्राह्मणी एवं क्षत्रियादेरपि क्षत्रियादिः, स वंशपुरुषस्तस्य भार्येत्यर्थः ।]
जलाग्निबन्धनप्रायनिमित्तेन म्रियेत यः ॥ ४ ॥
भवेदुरसि दुष्टं हि व्रणं तस्यापि निष्कृतिः । स दद्याद्गोद्वयं तस्य पञ्चाशद्विप्रभोजनम् ॥ ५ ॥
दक्षिणां च यथाशक्ति मुक्तो भवति रोगतः ।
[अनधिकारिणाऽविहितमार्गेण[3] जलादिमरणे ।] पितृष्वसाभिगमने वामाङ्गे तु व्रणी भवेत् ।
तेनापि निष्कृतिः कार्या अजादानेन यत्नतः ॥ ६ ॥
मातृष्वसाभिगमने वामाङ्गे तु व्रणी भवेत् । तेनापि निष्कृतिः कार्या सम्यग्दासीप्रदानतः ॥ ७ ॥
[शक्त्यनुसारेणालंकृत्य दद्यादित्यर्थः[4] ।]
अदण्ड्यांस्तर्जयेद्यो वै स वा गुल्मव्रणी भवेत् । जपहोमादिकं कार्यं धेनुदानं प्रयत्नतः ॥ ८ ॥
हीनजातिस्त्रीगमनाज्जायते चरणव्रणी । तत्पातकविशुद्ध्यर्थं प्राजापत्यं समाचरेत् ॥ ९ ॥
मृते भर्तरि या नारी ब्रह्मचर्याभिघातिनी । सा भवेद्व्रणदोषेण संभोक्तुं क्षमते न च ॥ १० ॥
संभोगान्नूतनं तीव्रवेदना पुरुषस्य च । दद्यान्नीलवृषांस्त्रीन्वै मधुसर्पिस्तिलानपि ॥ ११ ॥
[चशब्दात्स्त्रीपुंसयोरपि तीव्रवेदना भवतीति[5] ।]
लोहितो यः सवर्णेन मुखे पुच्छे च पाण्डुरः ॥ १२ ॥
श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते । योगं हित्वा द्विजो मोहान्नियुक्तो धर्मनिश्चये॥ १३॥
भगन्दरो भवेत्तस्य ह्यधर्मं वदतो मुखे । आर्यभार्याभिगमने भगंदरयुतो भवेत् ॥ १४ ॥
[अत्र[6] प्रतिकृतिमाह ।]
माणिक्यं पद्मरागं च वज्रवैडूर्यमेव च । गोमेदं च मरकतं पुष्परागं च मौक्तिकम् ॥ १५ ॥
हरितं च नवैतानि स्वर्णपात्रोपरि न्यसेत् । अथवा राजते ताम्रे गवाज्येन प्रपूरयेत् ॥ १६ ॥
स्वलिङ्गैश्चैव मन्त्रैश्च होमः कार्यस्तु पूर्ववत् । ततो ब्राह्मणमाहूय सर्वशास्त्रार्थकोविदम् ॥ १७ ॥
आदित्यादिग्रहाः सर्वे नवरत्नप्रदानतः । विनाशयन्तु मे दोषान्क्षिप्रमेव भगंदरम् ॥ १८ ॥
अनेन कर्मणा नूनं यथावद्विहितेन तु । ततो नैरुज्यमाप्नोति निःसंदिग्धं भगंदरी ॥ १९ ॥

१-६ टीकाग्रन्थोऽयम् ।

[हरितं हरितरत्नम् । यस्मिन् स्वर्णादिपात्रे च रत्नानि स्थापितानि तत्पात्रं गव्येनाज्येन पूरयित्वेति ग्रहणम् ।]

स्वगोत्रस्त्रीप्रसङ्गेन जायते च भगन्दरी । तेनापि निष्कृतिः कार्या मेषीदानेन यत्नतः ॥ २०

[तत्र रजतमयो मेषः स्वर्णखुरादि च ।]

श्रीसूर्य उवाच ।

अतिमानादतिक्रोधादतिस्नेहाद्भयादपि । यो धर्मनिश्चयज्ञानमन्यथा कुरुते नरः ॥ २१
स पूयशोणितवहुव्रणी तच्छान्तयेऽथ तु । अतिकृच्छ्रं प्रकुर्याच्च तिलप्रस्थप्रदो भवेत् ॥ २२
होमश्चरुघृताभ्यां च तिलैरष्टोत्तरं शतम् । सहस्रं वा व्याहृतिभिः कुर्याद्ब्राह्मणभोजनम् ॥ २३

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके व्रणाद्यध्यायः षडशीतितमः ॥ ८६ ॥

श्रीसूर्य उवाच ।

परेषां मर्मभेदेन मुष्टिघातेन चैव हि । असत्यवचनाच्चैव ह्रीहश्रीपदयुग् भवेत् ॥ १
नाडीव्रणश्च जायेत तद्रोगस्यापनुत्तये । चान्द्रायणं चातिकृच्छ्रं वातिचान्द्रायणं चरेत् ॥ २
कूष्माण्डहोमः कर्तव्यः सोमरुद्रजपस्तथा ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ह्रीहाद्यध्यायः सप्ताशीतितमः ॥ ८७ ॥

श्रीसूर्य उवाच ।

पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । धूर्तः सकन्योऽतिशठश्चिन्तादुःखसमन्वितः ॥ १
ब्राह्मण्यां वीर्यदानात्प्राक् तद्द्यान्मृतपुत्रकः[३] । लक्ष्मैतदत्र लग्नाच्च सोमः पापान्वितो रिपौ ॥ २
गोस्त्रीविप्रवधाः पापाः पुत्रनाशकरा यतः । स्त्रीसहायकृतात्पापात्पूर्वं गर्भसमुद्भवात् ॥ ३
अत्र जन्मनि सा नारी ज्येष्ठा सन्ततिवर्जिता । लक्षितो लक्षणैश्चोक्तैः पृच्छकश्चात्र जन्मनि ।
वक्ष्यामि निष्कृतिं तस्य पूर्वपापविशोधिनीम् । ब्राह्मण्याः प्रतिमा कार्या पलैर्वेदमितैः शुभा ।
हिरण्मयी सगर्भा च पत्रे लेख्या प्रयत्नतः । तदर्धार्धमिता वापि त्रिषु वित्तानुसारतः ॥ ६
संपूज्य गन्धपुष्पाद्यैः सा देया मन्त्रपूर्विका । सुवर्णैकमितं दद्याच्छिवं पापप्रणाशनम् ॥ ७
राजतं च तथा दद्यात्सोमं सार्धपलात्मकम् । गायत्र्यष्टसहस्रं च होमयेत्तद्दशांशतः ॥ ८
ब्राह्मणान्भोजयेत्पश्चात्पूर्वपापात्प्रमुच्यते । य एवं कुरुते सूत पूर्वपापविशोधनम् ॥ ९
तस्य पुत्रविवृद्धिः स्यात्स्त्रीभ्यामत्रैव जन्मनि । नैवं करोति यो मोहात्प्रायश्चित्तं त्रिधा मतम्
न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः । प्रायश्चित्ते कृते ह्यायुः षडशीतिमिताब्दकम् ॥
प्रायश्चित्तेऽकृतेरिष्टं वर्षं षष्टिमिते ध्रुवम् ॥ १२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके पुत्रजीवनाध्यायोऽष्टाशीतितमः ॥ ८८ ॥

श्रीसूर्य उवाच ।

बभूव बाहुजः कश्चिद्ग्रामाध्यक्षो विराटजः । दत्तानि तेन दानानि गोभूम्यश्वादिकानि च ॥
ब्राह्मणेषु गृहस्थेषु सत्पात्रेषु विशेषतः । अथान्यद्ग्रामपस्यापि क्षत्रियस्य महात्मनः ॥
एकपुत्रस्य पुत्रो वै भुजमूले पुराऽनघ । घातितस्तेन खड्गेन निशायां चौर्यकर्मणा ॥
समृतस्तेन दुःखेन भाविनोऽर्थस्य गौरवात् । तन्माता पुत्रदुःखेन मृता दुःखप्रपीडिता ॥

१–२–टीकाग्रन्थः । ३ तद्वधान्मृतपुत्रकः–खपु० ।

ईश्वरभावरतैर्नैव कृतं कर्मातिदारुणम् । एवं बहुतिथे काले गतोऽसौ यमशासनम् ॥ ५ ॥
भुक्त्वा पापाच्च नरकं पुण्यात्स्वर्गफलं तथा । पूर्वपुण्यप्रभावेण स जातो बाहुजोऽधुना ॥ ६ ॥
गतद्युनिकटे देशे मेषेर्के शनिसंयुते । पितृमातृसुखैर्हीनो भृत्यस्त्रीबन्धुसंयुतः ॥ ७ ॥
मात्रदानादिदं सर्वं फलं पापफलं शृणु । पूर्वे बालवधात्पापादिह जन्मनि चाण्डज ॥ ८ ॥
द्विवेदमितवर्षान्ते जातपुत्रविनाशकः । तथा ग्राम्बाहुजवधाद्ग्रामबाहुविवर्जितः ॥ ९ ॥
लक्षणैर्लक्षयेदेतैः पृच्छकं चात्र जन्मनि । निष्कृतिं तस्य वक्ष्यामि पूर्वपापविशोधिनीम् ॥ १० ॥
पुत्रवृद्धिकरीं धन्यां सर्वारिष्टविनाशिनीम् । पलपञ्चमितं कुर्याद्बाहुजं च हिरण्मयम् ॥ ११ ॥
तन्मातरं च सौवर्णीं सुवर्णैकमितां शुभाम् । लक्ष्मीनारायणं तद्वद्राजतं त्रिपलात्मकम् ॥ १२ ॥
तन्मितां राजतीं गौरीं दद्यान्मन्त्रैः प्रपूजिताम् । गायत्र्यष्टसहस्रं तु जपेदष्टाक्षरं तथा ॥ १३ ॥
शृणुयाद्धरिवंशं वा शतावृत्तिविधानतः । लक्षरुद्रं त्रिगुणितं कुर्याद्वा विधिपूर्वकम् ॥ १४ ॥
यो न कुर्याद्विधानैकं त्रिष्वप्येतेषु निश्चितम् । न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः॥ १५॥
वेदवेदमितेऽरिष्टं वर्षे चैव प्रकीर्तितम् । यः कुर्याद्विधिवत्सूत प्रायश्चित्तं प्रयत्नतः ॥ १६ ॥
तस्य पुत्रविवृद्धिः स्यादत्र जन्मनि निश्चयात् । एकाशीतिमितायुः स्याच्चैत्रादौ घटभे मृतिः॥ १७॥
जन्मादिमरणान्तं हि सर्वं ते कथितं मया ॥ १८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकोननवतितमः ॥ ८९ ॥

श्रीसूर्य उवाच ।

कीरदेशे समुत्पन्नः कश्चित्क्षात्रे कुले[1] सुधीः । विप्रोत्सङ्गगतस्तत्र प्रयागे मकरे वसन् ॥ १ ॥
कृतवान् विधिवत्स्नानं दानं स्वल्पं स्वशक्तितः । दैवयोगाद्गृहं प्राप्य कृतवान्कर्म दारुणम् ॥ २॥
कामलोभेन सततं शूद्री गमनकार्यसौ । स्त्रीभ्यां तु हासयुक्तेन पापमाचरितं तथा ॥ ३ ॥
विविधैरौषधैस्तस्या गर्भपातः कृतः पुरा । एवं सर्वैर्मिलित्वा तु पातनं बहुधा कृतम् ॥ ४ ॥
ततो बहुतिथे काले प्राप्तास्ते यमशासनम् । भुक्त्वा पापफलं पापात्पुण्यात्स्वर्गफलं तथा ॥ ५ ॥
तीर्थराजप्रभावेण स जातो ब्राह्मणोऽधुना । सेज्ये शनौ सिंहगते सूर्ये कन्यागते कुजे ॥ ६ ॥
मृगे ह्यैरावतीतीरे नात्युच्चो न लघुर्घृणी । श्लिष्टवाक् स्वल्पधर्माढ्यः पितृमातृविवर्जितः॥ ७ ॥
सहोदरधनैर्हीनो जातः पुत्रविनाशकः । परदाराभिगमनाद्गर्भपातनदोषजात् ॥ ८ ॥
पापात्पूर्वकृतात्सूत लक्षणैर्लक्षयेदिह । स्त्रीसाहाय्यात्तथा सूत प्राक्पापात्समुपार्जितात् ॥ ९ ॥
तेनैका तत्र पत्नी या तयोः पुत्रैः[2]शुचान्विता । तथैका बहुपापाद्यद्भ्रातुः पत्न्यग्रजस्य च ॥ १० ॥
पुत्रभर्तृविहीनात्र पूर्वपापात्प्रदृश्यते । वक्ष्यामि निष्कृतिं सूत पूर्वपापविशोधिनीम् ॥ ११ ॥
सार्धवेदमितैः स्वर्णैः पद्मं कुर्याद्धिरण्मयम् । सनालमष्टपत्राढ्यं शुभं तद्ब्रह्मदैवतम् ॥ १२ ॥
पूरयेत्पारदेनैव[3] तस्य नालं प्रयत्नतः । दद्याद्वेदविदे सूत विधिना संपठन्सुधीः ॥ १३ ॥
ब्रह्मयोनिमिदं पद्ममाद्यं स्थानं च शाश्वतम् । गर्भधारणपापोत्थदोषनाशकरं परम् ॥ १४ ॥
ददेऽहं विप्रमुख्याय पूर्वपापविशुद्धये । इत्युच्चार्य नरो दद्यात्तस्माद्दोषात्प्रमुच्यते ॥ १५ ॥
राजतं च ततो दद्याद्ब्रह्माणं तन्मितं सुत । रुद्राणामथवा लक्षं पूजयेद्विधिनाऽण्डज ॥ १६ ॥
गायत्रीं च यथाशक्त्या जपेच्चैवाघमर्षणम् । नैवं विधानं यः कुर्याल्लोभान्मोहाद्विशेषतः ॥ १७ ॥

---

१ शूद्रकुले—खपु० । २ पुत्रहीना शुचान्विता । खपु० । ३ पायसेनैव । खपु० ।

न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः । श्रुत्वैनं विधिवत्कुर्याद्विधानैकं समाहितः ॥ १
न तस्य पुत्रमरणं भविष्यति ममाज्ञया । धनपुत्रान्वितो मध्ये ह्यायुरष्टाद्रिसंमितम् ॥ १९
रिष्टं षष्टिमितेऽब्दे तु तस्य चाकृतनिष्कृतेः ॥ २० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो नवतितमः ॥ ९० ॥

श्रीसूर्य उवाच ।

आसीद्राजकुलोत्पन्नः पूर्वजन्मनि यो मुने । धनधान्यसमायुक्तो रुद्रभक्तिपरोऽण्डज ॥
दत्तानि तत्र दानानि पर्वस्वपि च शक्तितः । अथो भाविबलात्सूत ब्राह्मणेन तपस्विना ॥
तद्गृहे स्थापितं द्रव्यं पुनर्दत्तं न तेन च । सहायैकयुतेनैव ब्रह्मस्वं भक्षितं पुरा ॥ ३
स च कालवशं प्राप्य भुक्त्वा पापफलं महत् । पुण्यात्पुण्यफलं तत्र स शूद्रो जाङ्गलेऽधुना ॥
देशे रामहृदाद्याम्ये तत्त्वयोजनसम्मिते । कृष्णस्तनौ सुते यस्मात्क्रूराः पश्यन्ति पापिनः ॥
ह्रस्वो मध्यधनाढ्यस्तु श्रेष्ठोऽमितसुखान्वितः । स्त्रीभृत्यभ्रातृसंयुक्तो मध्यान्ते सुखभागिह ॥
ब्रह्मस्वहरणात्पूर्वं चात्र सन्ततिवर्जितः । दाने स्वल्पमतिर्धूर्तः पापात्सर्वमिदं सुत ॥ ७
अथो भ्रातृसहायात्तु ब्राह्मणस्वं हृतं पुरा । तेन तत्सहजो ज्येष्ठः पुत्रहीनोऽत्र जन्मनि ॥ ८
लक्ष्योऽत्र लक्षणैरेभिः पृच्छको विनतासुत । तन्निष्कृतिं प्रवक्ष्यामि पूर्वपापविशोधिनीम् ॥ ९
लक्ष्मी च राजती कार्या पलैर्दशमितैः शुभा । सर्वावयवसंयुक्ता पीतवस्त्रविभूषिता ॥ १०
ब्राह्मणाय च सा देया मन्त्रेणानेन धीमता । "लक्ष्मि त्वं सर्वभूतानां कामदा मोक्षदायिनी ॥ ११
पूर्वजन्मार्जितात्पापान्मां रक्ष शरणागतम् ।" इत्युच्चार्य नरो दद्याद्विप्रद्रव्याघनाशनम् ॥ १२
तथा पञ्चपलैः सोमो राजतश्चोक्तरूपवत् । पलद्वयमितैस्तद्वद्धनाधिपदिनेश्वरौ ॥ १३
पूजयित्वा तु गन्धाद्यैर्दद्यात्सर्वान्दिवौकसः । जपेत्पञ्चसहस्रं तु गायत्र्या होमयेत्तथा ॥ १४
ब्राह्मणान्भोजयेच्छक्त्या शिवभक्तान्विधानतः । अनेन विधिना यस्तु प्रायश्चित्तं समाचरेत् ॥ १५
तस्यात्र पुत्रयुगलं कन्यैका च भविष्यति । न करोति च यो मोहाद्विधिवत्पापशोधनम् ॥ १६
पञ्चपञ्चमिताब्दान्तं न च पुत्रसुखं त्विह । आयुश्चात्र तदब्दान्तं प्रायश्चित्तेऽकृतेऽधुना ॥ १७
प्रायश्चित्ते कृते चायुरुत्तराधिका सप्ततिः समाः ॥ १८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकनवतितमः ॥ ९१ ॥

श्रीसूर्य उवाच ।

अभूद्वैश्यकुलोत्पन्नो धनधान्यसमन्वितः । सरस्वत्याश्च निकटे विष्णुधर्मरतः क्वचित् ॥
दत्तानि बहुदानानि ब्राह्मणेषु च शक्तितः । सर्वाण्यपि च तेनैव श्रद्धाहीनेन चेतसा ॥
दैवाद्गां द्विजस्याऽथ प्राप्तां वै गर्भसंयुताम् । वैरिभावाद्घातयित्वा भुक्त्वा तेन विजानता ॥
तत्सुतश्च तथा सूत पापमाचरितं त्विदम् । धर्माधर्मफलं भुक्त्वा गत्वा तत्र यमालयम् ॥
पूर्वपुण्यवशात्सूत स जातः पादजोऽधुना । सरस्वत्या याम्यभागे विंशद्योजनसंमिते ॥
स रक्तकृष्णः क्षीणाङ्गो विष्णुभक्तिसमन्वितः । पित्ताधिकोऽस्वल्पधनी स्त्रीभ्रातृसुखसंयुतः
पुण्यादिदं तथा पापाज्जातः पुत्रविनाशकृत् । स्त्रीसाहाय्यागतो यस्मात्सा स्त्री पुत्रमपीडिता
तस्य चिह्नमिदं ज्ञेयं मेषः पञ्चमभावगः । पापयुक्तस्तथा दृष्टो राहुरेकादशे स्थितः ॥

---

१ लेपनं विधिवत् खपु० । २ पापगाः—खपु० । ३ वित्ताऽधिको—खपु० ।

लक्षणैर्लक्षितं प्रोक्तैरवेहि गरुडाग्रज। (निष्कृतिं वद मे स्वामिन्सर्वारिष्टनिषूदनीम् ॥ ९ ॥
इह पुत्रकरीं धन्यां लोकानां हितकाम्यया)। निष्कृतिं तस्य वक्ष्यामि येन पापक्षयो भवेत्॥१०॥
पलैर्द्वादशभिः कार्या मेषी गर्भसमन्विता।

दानमन्त्रः।

"ब्राह्मणस्य ददाम्यस्मान्मेषीं रौप्यमयीं शुभाम्। देवो वैश्वानरो यस्मात्पशुघातात्प्रमुञ्चतु"११॥
यथा वैश्वानरो देवो देयो वार्धप्रमाणतः ॥ १२ ॥

जपेद्धौताशनम्।

तण्डुलाज्ययवान्हुत्वा तिलान्संमिश्र्य यत्नतः।ब्राह्मणान्भोजयेच्छक्त्या तेभ्यो दद्याच्च दक्षिणाम् १३
य एवं कुरुते सूत पूर्वपापविशोधनम्। तस्य वंशप्रवृद्धिः स्यादकृते वंशनाशनम् ॥ १४ ॥
मेषीवच्चाण्डजश्रेष्ठ नात्र कार्या विचारणा। पुत्राणां सुखवृद्धिः स्यादायुरब्दाब्धिसप्ततिः ॥ १५ ॥
प्रायश्चित्तेऽकृतेऽरिष्टं पङ्क्तेर्दमितकेऽब्दके। यदन्तरगतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ १६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो द्विनवतितमः ॥ ९२ ॥

श्रीसूर्य उवाच।

वैनतेय महाभाग शृणु चास्य विचेष्टितम्। कश्चिद्विप्रोऽभवत्पूर्वं वङ्गदेशेऽपि ग्रामपः ॥ १ ॥
धर्मशास्त्रक्रियाहीनः पित्रोः सुखसमन्वितः। दत्तानि तेन दानानि ब्राह्मणेषु च शक्तितः ॥ २ ॥
सत्पात्रेषु गृहस्थेषु श्रद्धापूतेन चेतसा। मृगयायां गतो विप्रः कदाचिद्दैवयोगतः ॥ ३ ॥
घोरकर्म कृतं तेन प्रारम्भे यौवनस्य च। लुण्ठितो ब्राह्मणस्तत्र प्रहारैर्दुःखितो भृशम् ॥ ४ ॥
हतोऽप्यायुर्वलेनैव न स मृत्युवशं गतः। ब्रह्मस्वमिति तज्ज्ञात्वा न भुक्तं केनचिद्गृहे ॥ ५ ॥
तेनैव भक्षितं सूत येन विप्रः प्रपीडितः। स गत्वा यमलोकं तु भुक्त्वा तु यमशासनम् ॥ ६ ॥
पात्रदानवशात्सूत स जातः क्षत्रियोऽधुना। देशे विपाशिके लग्ने चापसंज्ञे ऽस्तगे रवौ ॥ ७ ॥
मेषगे राहुयुक्तेऽथ सोमर्क्षविधुसंयुते। स गौरो दर्शनीयाक्षः ससत्त्वं स्वल्पवित्तभाक् ॥ ८ ॥
धर्मे चाल्पमतिर्मानी मातृपितृसमन्वितः। दानादिकं गृहस्थेषु फलं पापफलं शृणु ॥ ९ ॥
यत्रयत्र कृता घाताः प्राग्भवे ब्राह्मणस्य च। इह जन्मनि तत्रास्ति बाल्ये कुष्ठगदान्वितः ॥१०॥
अथो स्त्रीपुत्रहीनोऽत्र जायते गरुडाग्रज। यौवनेऽपि च वार्द्धक्ये तस्येदं कर्मणः फलम् ॥ ११ ॥
एभिश्च लक्षणैः सूत लक्षणीयोऽत्र पृच्छकः। निष्कृतिं परमां सूत वक्ष्यामि शृणु तत्त्वतः॥१२॥
गायत्रीं विधिना जप्त्वा कोटिं शुद्धिमवाप्नुयात्। प्रयागे निवसन्धीरः काश्यां वा कुरुजाङ्गले॥१३॥
अथवाष्टसहस्राणि जप्त्वा कुर्यादिमं विधिम्। हिरण्मयौ सोमविप्रौ कार्यौ स्वर्णाष्टकावुभौ ॥१४॥
पत्रेऽर्धेनैव वा लेख्यौ सर्वलक्षणसंयुतौ। देयौ द्विजाय विधिवत्पूजयित्वाऽथ यत्नतः ॥ १५ ॥
प्रायश्चित्ते कृते श्वेतकुष्ठहानिः प्रजायते। स्त्रीपुत्रसुखमत्रैव भवत्येव न संशयः ॥ १६ ॥
प्रायश्चित्तं न कुर्याच्चेद्भवेद्रोगविवर्धनम्। न पुत्रसुखमाप्नोति स जीवति कदाचन ॥ १७ ॥
अरिष्टं द्वात्रिंशदब्दे तु जीवनं ह्यष्टसप्ततिः। आनन्त्यात्खलु जीवानां विस्तारो नोदितो मया ॥ १८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्रिनवतितमः ॥ ९३ ॥

---

१ अरुणवाक्यमिदं प्रतिभाति। २ क्षात्रश्च खपु०। ३ सूत–खपु०।

श्रीसूर्य उवाच ।

पृच्छको विनतासूनो दानधर्मरतोऽभवत् । वैश्यः पूर्वभवे सूत व्यापारकुशलः सदा ॥
दानयज्ञरतो नित्यं ब्राह्मणाऽतिथिपूजकः । तद्गृहे धान्यराशिं तु भक्षयन्ती क्षुधार्तिनी ॥
आसन्नप्रसवा सूत सुरभिः कालमोहिता । भृशं तेन हता कुक्षौ लोभोपहतचेतसा ॥
बालवत्सो मृतस्तत्र गर्भस्थश्चातिताडनात् । तद्दुःखेन मृता सा तु धेनुराक्रन्दती पुरा ॥
एवं निवसतस्तत्र मृतः स यमशासनम् । प्राप्य स्वर्गं बहून्भोगान्भुक्त्वा पापफलं तथा ॥
शतद्रुनिकटे देशे जातोऽयं ब्राह्मणोऽधुना । धनुर्लग्नगते सौरौ गुरौ मीनेऽप्यलौ रवौ ॥
कुलाग्रणीः कार्यकरो गुणी पित्तकफान्वितः । मध्यरूपयुतः श्रीमान्द्विभार्यो याति संयुतः ॥
चन्द्रे पापयुतेऽत्युग्रे कन्यायां समवस्थिते । गोबालवत्सकवधात्पापात्पूर्वादपुत्रकः ॥
स्त्रीसाहाय्ययुतो यस्मात्पूर्वजन्मन्यभूदसौ । तेन कर्मविपाकेन स्त्री ज्येष्ठा पुत्रवर्जिता
प्रायश्चित्ते कृते त्वत्र कनिष्ठायां भविष्यति ॥ ९ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं स्वामिन् येन पापक्षयो भवेत् । कथ्यतां दिवसेशान लोकानां हितकाम्यया॥१०

श्रीसूर्य उवाच ।

प्रायश्चित्तं प्रवक्ष्यामि शृणुष्वाथ खगेश्वर । सुवर्णदशका सूत धेनुः कार्या सगर्भिका ॥ ११
सर्वालंकारयुक्ता च पत्रे लेख्या यथोक्तवत् ॥ १२ ॥
तदर्धार्धप्रमाणा वा यथावित्तानुसारतः । संपूज्य नाममन्त्रैस्तु सा देया ब्राह्मणाय गौः ॥१३

मन्त्रः ।

"यन्मया पूर्वजनुषि पापं गोघातजं कृतम् । तदत्र पापनाशाय ददेऽहं गां हिरण्मयीम्" ॥१४
मन्त्रमेनं समुच्चार्य दद्याद्विप्राय धीमते । गायत्र्यष्टसहस्रं तु होमयेत्तदनन्तरम् ॥ १५
आसन्नप्रसवामेकां दद्याद्गां भोजयेद्द्विजान् । अनेन विधिना यस्तु प्रायश्चित्तं समाचरेत् ॥ १६
तस्य संततिवृद्धिः स्यादत्र जन्मनि वै सुत । न करोति यदा श्रुत्वा प्रायश्चित्तं त्रिधा मतम् ॥ १७
इह जन्मन्यपुत्रः स्यान्मृतो नरकमाप्नुयात् । एकहीनेऽथ पञ्चाशन्मृत्युरब्दे ज्वरेण वै ॥ १८
प्रायश्चित्ते कृते स्वायुः षष्टिस्त्वङ्गयुताः समाः । कन्यागते रवौ चन्द्रे मीनस्थे मरणं ध्रुवम्

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुर्नवतितमः ॥ ९४ ॥

अरुण उवाच ।

भूमिदेवकुलोत्पन्नः पूर्वजन्मन्यथात्र च । पृच्छको जगतां नाथ तस्य कर्म प्रकाशय ॥

श्रीसूर्य उवाच ।

आसीत्पूर्वभवे विप्रो गिरिवासी जितेन्द्रियः । विद्याभ्यासरतो नित्यं सत्यधर्मपरायणः ॥
दत्तानि तत्र दानानि ब्राह्मणेभ्यो हि शक्तितः । पर्वस्वपि च तेनैवाध्यापिता ब्राह्मणाः खग
अथ भाविवलात्सूत ब्राह्मणेन तपस्विना । स्थापितं तद्गृहे स्वर्णं लोभयुक् तत्र दत्तवान् ॥
ततो बहुतिथे काले कालधर्ममुपेयिवान् । स्वर्णापहारी सततं गतो हि यमशासनम् ॥
पापात्पापफलं भुक्त्वा पुण्यात्पुण्यफलं तथा । पूर्वपुण्यप्रभावेण जातोऽयं ब्राह्मणोऽधुना ॥
सौराष्ट्रे च तुलालग्ने कृशो नातिलघुः सुधीः । धर्मकर्मक्रियायुक्तो लोभदुःखसमन्वितः ॥
गौरवर्णः शनिर्यस्माल्लग्नगः सुतगः शशी । बहुकन्योऽल्पपुत्रश्च तस्माज्ज्ञेयोऽधुनाऽण्डज ॥

यौवने स्त्रीसुखं त्वग्रे द्विपञ्चाशन्मितेऽब्दके । भृशं पुत्रसुखप्राप्तिः पूर्वे ब्राह्मणपूजनात् ॥ ९ ॥
कर्कटस्थौ सूर्यजीवौ तस्माद्राजोपसेवकः । सुवर्णहरणाद्दोषात्पूर्वजन्मनि मानद ॥ १० ॥
कुनखी ह्यत्र विज्ञेयो लक्षणैस्त्वैहिकैरसौ । अथो भ्रातृसहायात्तु ब्राह्मणस्वं हृतं पुरा ॥ ११ ॥
तेन तत्सहजो ज्येष्ठः पुत्रहीनोऽत्र जन्मनि । पृच्छकस्य तथा वर्षे पञ्चाशन्मितके ध्रुवम् ॥ १२ ॥
पुत्रे रिष्टं विजानीयात्स्वदेहे वापि निश्चितम् ।

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन्पुत्ररिष्टविनाशिनीम् ॥ १३ ॥
त्वत्तोऽहं श्रोतुमिच्छामि सर्वलोकोपकारक ।

श्रीसूर्य उवाच ।

पलपञ्चसुवर्णाढ्यां गां दद्याद्ब्राह्मणाय वै ॥ १४ ॥
तदर्धार्धयुतां वापि श्रेष्ठमध्यकनिष्ठिकाम् । त्रिषु वित्तानुसारेण न न्यूनाधिककल्पना ॥ १५ ॥
सुवर्णहरणात्पापाद्गोदानान्मुच्यतेऽधुना । षट्पञ्चाशत्तमे वर्षे रिष्टं चाकृतनिष्कृतेः ॥ १६ ॥
प्रायश्चित्ते कृते सूत पूर्णायुर्जायते नरः । सप्तसप्ततिवर्षाणि सपुत्रो जीवति ध्रुवम् ॥ १७ ॥
कार्तिके कृष्णपञ्चम्यां शशिन्यार्द्रागतेऽण्डज । वृषलग्ने च निधनं पृच्छकस्य भविष्यति ॥ १८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचनवतितमः ॥ ९५ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यभूत्कश्चिद्वैश्यो धर्मपरायणः । मथुरायां महाभाग भिषग्वृत्तिविशारदः ॥ १ ॥
भञ्जिताश्च महारोगा गवां तेन महात्मना । दत्तानि तत्र दानानि पर्वस्वपि च शक्तितः ॥ २ ॥
पापमाचरितं तेन कामलुब्धेन चेतसा । स्वजातिवनितायां वै व्यभिचारं चकार सः ॥ ३ ॥
तस्यास्तत्राभवद्गर्भः पातनं हि चकार सा । महौषधैश्छेदनजैः परीवादादथाण्डज ॥ ४ ॥
सा मृता तेन दुःखेन गर्भपातेन निश्चितम् । पत्नीसाहाय्यात्सततं सर्वमेतदुपार्जितम् ॥ ५ ॥
ततो यमपुरं प्राप्तः ससहायोऽण्डजोत्तम । भुक्त्वा पापफलं पापात्पुण्यात्पुण्यफलं तथा ॥ ६ ॥
गवां दुःखापहारेण पुण्येनात्र वणिक्सुतः । जातो रामह्रदाद्याम्ये षष्टियोजनसंमिते ॥ ७ ॥
नात्युच्चः श्यामलो भव्यः स्वल्पवित्तसमन्वितः । व्यापारनिरतः क्रोधी बलबुद्धियुतोऽग्रणीः ॥८॥
भ्रातृयुक्तः पितृसुखाद्धीनः स्त्रीप्रियसंयुतः । गर्भपातनजात्पापात्प्रागत्र सुतवर्जितः ॥ ९ ॥
चिह्नमङ्गात्पञ्चमे तु शुभदृष्टिविवर्जिते । चन्द्रे मिथुनराशिस्थे भौमदृष्टे च पुत्रकः ॥ १० ॥
सहायलक्षणं सर्वं शृणुष्वात्र खगेश्वर । या स्त्री पूर्वे सहायाऽऽसीद्गर्भपातनकर्मणि ॥ ११ ॥
पृच्छकस्य तु सा नारी गर्भदुःखाकुलात्र च । वक्ष्यामि निष्कृतिं तस्या सर्वपापप्रणाशिनीम् १२॥
माषैस्त्रिंशन्मितैरत्र कार्या वैश्या हिरण्मयी । अपि गर्भयुता लेख्या सुगन्धैश्चित्रिता सुत ॥१३॥
तदर्धमितिका वापि द्वयोर्वित्तानुमानतः । सा देया तु विधिज्ञाय मन्त्रमेनमुदीरयेत् ॥ १४ ॥

मन्त्रः ।

"वैश्यामेनां च सौवर्णीं वस्त्राढ्यां विधिदैवताम् । ददेऽहं विप्रमुख्याय पूजिताय विधानतः॥१५॥
गर्भपातनजाद्दोषात्पूर्वपापविशुद्धये" । इत्युच्चार्य नरो दद्यात्सर्वपापविशोधनम् ॥ १६ ॥

---

१ प्रकः—खपु० ।

सार्धं सहस्रद्वितयं गायत्रीं त्र्यम्बकं तथा । जपेद्धुत्वा दशांशेन पूर्वपापप्रणोदनम् ॥ १७ ।
ब्राह्मणान्भोजयेच्छक्त्या दद्याच्चैव तु दक्षिणाम् । एवं विधानं यः कुर्याद्विधिना पापशोधनम् ॥
उत्पत्तिर्जायते तस्य संततेर्नात्र संशयः । न कुर्याद्विधिवत्तत्र लोभान्मोहाद्विशेषतः ॥ १९ ।
इह जन्मन्यपुत्रत्वं जायते चान्यजन्मनि । पञ्चसप्तमितायुः स्यात्प्रायश्चित्तेऽकृते सति ॥ २० ।
चत्वारिंशन्मिते रिष्टं तस्य चाकृतनिष्कृतेः ॥ २१ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षण्णवतितमः ॥ ९६ ॥

श्रीसूर्य उवाच ।

राजपुत्रोऽभवत्पूर्वं क्रूरकर्मा प्रतापवान् । धनधान्यसमृद्धोऽपि वङ्गदेशे वसन्सदा ॥ १ ॥
याचकेभ्यः प्रदत्तानि गोभूम्यश्वादिकानि च । अथो भाविबलात्सूत लोभोपहतचेतसा ॥ २ ॥
सीम्नि वादे (हृतं द्रव्यं ब्राह्मणानामधर्मतः । द्विजेनैकेन सहायेन कृतं तत्कर्म दारुणम् ॥ ३ ॥
भूमिवादे) मृतस्तत्र संग्रामे कालनोदितः । भुक्त्वाभोगाञ्छुभान्स्वर्गे पापात्पापफलानि च ॥ ४ ॥
पूर्वपुण्यप्रभावेण स जातः पर्वतेऽधुना । भिपालकुलेऽत्युग्रे सिंहलग्ने गुरावजे ॥ ५ ॥
सूर्ये मेषगते चेन्दौ चापस्थे पापसंयुते । गौरः शूरो महोग्रस्तु बहुकन्यः कृती शुभः ॥ ६ ॥
ददाति शक्तितो धीमान्नात्युच्चो बन्धुसंयुतः । बहुव्ययपरो नित्यं पैत्तिकः प्रियवाग्घृणी ॥ ७ ॥
बहुभार्यो यशस्वी च भृत्यवाहनसंयुतः । अष्टविंशन्मिते वर्षे स्वल्पपुत्रसुखान्वितः ॥ ८ ॥
ह्यन्तरायोद्भवैः पुत्रैरतिदुःखसमन्वितः । ब्रह्मस्वहरणात्पूर्वं धनहीनोऽत्र दृश्यते ॥ ९ ॥
सहायद्विजयुक्तश्च पूर्वेऽभूद्विनतात्मज । तुलायां सोऽनुजो जातो जन्मन्यत्राल्पपुत्रकः ॥ १० ॥
शृणु सूत प्रवक्ष्यामि निष्कृतिं पापकर्मणः । यां कृत्वा विधिवज्जन्तुरिह पापात्प्रमुच्यते ॥ ११ ॥
पुण्येऽह्नि विप्रकथिते धेनूनां पञ्चकं सुत । दद्याच्च वृषभं गौरं पृष्ठवस्त्रयुगान्वितम् ॥ १२ ॥
सुवर्णशृङ्गसहितं तथा क्षितियुतं शुभम् । मन्त्रेणानेन विप्रेभ्यः प्रष्टा श्रद्धासमन्वितः ॥ १३ ॥

मन्त्रः ।

"भूमिभागयुतं गौरं वृषभं रुद्रदैवतम् । ददेऽहं सीम्नि द्रव्योत्थपापनाशाय वै द्विज" ॥ १४ ॥
अथो स्वर्णद्वयाढ्यं हि शुभं दद्यात्तुरङ्गमम् । कर्मप्रकाशकायैव मन्त्रमेनमुदीरयेत् ॥ १५ ॥

मन्त्रः ।

"सोपस्करं काञ्चनाढ्यमश्वं तुभ्यमहं ददे । ब्रह्मस्वहरणात्पापान्मोक्षं कुरु ममानघ" ॥ १६ ॥
एवमुच्चार्य दद्याच्च पूजिताय द्विजातये । मुच्यते पूर्वपापाच्च ब्रह्मस्वहरणाद् ध्रुवम् ॥ १७ ॥
शृणुयाद्धरिवंशं च त्रिरावर्त्य विधानतः । होमयेदशसाहस्रं ब्राह्मणानां च पूजनम् ॥ १८ ॥
य एवं कुरुते सूत विधिना पापशोधनम् । तस्य संततिवृद्धिः स्यादिहैव फलमश्नुते ॥
नेमां कुर्याच्च वित्तस्योरिष्टाद्दारिद्र्यजं भयम् ॥ १९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्तनवतितमः ॥ ९७ ॥

श्रीसूर्य उवाच ।

पृच्छकोऽयमयोध्यायामभूच्छूद्रश्च धार्मिकः । धनधान्यसमृद्धस्तु यशस्वी पितृवल्लभः ॥ १ ॥

---

१ वाचकेभ्यः—खपु० । २ ( ) पाठोयं नास्ति—खपु० । ३ बलसंयुतः—खपु० । ४ प्रियवान् गुणी—खपु० । ५ वित्तस्यारिष्टारिष्टार्दितं भयम्—खपु० ।

गयायां द्वादशे वर्षे गतो मात्रा सहैव च । सानुजश्च सपत्नीकः सहायत्रयसंयुतः ॥ २ ॥
कृतवांश्च गयाश्राद्धं नानाविभवविस्तरैः । काम्यश्राद्धानि तत्रैव दत्तानि गरुडाग्रज ॥ ३ ॥
तस्य पुत्रप्रभावेण पितरश्च दिवं गताः । अथागत्य गृहं वर्षे चत्वारिंशन्मिते ध्रुवम् ॥ ४ ॥
कृतवान्दारुणं कर्म यौवने काममोहितः । स्वज्ञातिजं धर्मशीलं शूद्रं हत्वा महौषधैः ॥ ५ ॥
पत्नीत्वे स्थापिता तस्य भार्या कामविमोहिता । सर्वस्वं तस्य यत्किंचिद् गृहीतं विविधैश्छलैः॥६॥
तस्याः पुत्राश्च ये जाता ते हतास्तस्य भार्यया । सापत्न्यभावदुःखेन कृतं कर्मातिदारुणम् ॥७॥
पृच्छकस्य तु या माता तस्याप्यनुमतं त्विदम् । त्रिसहायान्वितस्तत्र गतस्तु यमशासनम्॥ ८ ॥
पापात्पापफलं भुक्त्वा पुण्यात्पुण्यफलं तथा । गयाश्राद्धप्रभावेण स जातः पृथिवीपतिः ॥ ९ ॥
दशयोजनविस्तीर्णे देशे पर्वतमाश्रिते । पितृभक्तिविशेषात्तु चैहिकं लक्षणं त्विदम् ॥ १० ॥
पितृभे जननं चास्य गुरुचन्द्रौ तु सिंहगौ । वृषराशिगते भानौ धर्मे शेषा नभश्चराः ॥ ११ ॥
जनुषो द्वादशे वर्षे राज्यप्राप्तिर्न संशयः । जातोऽत्र रक्तकृष्णोऽसौ देवब्राह्मणपूजकः ॥ १२ ॥
पितृभक्तिरतो विद्वान्गीतनृत्यप्रियः कविः । देशेदेशे तु विख्यातो दाता भोक्ता बलान्वितः॥१३॥
पित्तवाताधिको भीरुर्ह्रस्वः स्थूलोऽतिचञ्चलः।चौरेशः शिथिलः कार्ये लोभी पापरतः क्वचित्॥१४॥
सभायां चतुरो दक्षो बहुबन्धुसमन्वितः । सहोदरविहीनस्तु बहुपुत्रो बहुप्रियः ॥ १५ ॥
बहुभार्यो यशस्वी च क्षयवृद्धिधनान्वितः । पादजस्य वधात्पूर्वं पापादत्र च पृच्छकः ॥ १६ ॥
पायूद्दरव्यथायुक्तो यौवने जायते ध्रुवम् । त्रिसहायैर्युतः पूर्वं शृणुष्वाथ खगेश्वर ॥ १७ ॥
या धर्मपत्नी पूर्वासीत्सा ज्येष्ठात्र गतप्रजा । बालघातकृतं यस्मात्पूर्वेऽत्र विनतासुत ॥ १८ ॥
योऽनुजः पूर्वजन्मापि गयायां च सहायकः । स जातः कर्कटे जीवे पृच्छकस्य सुतोऽधुना ॥१९॥
वसुभे मिथुनस्थेऽर्के सोऽपि राजा भविष्यति । याऽभवत्पूर्वजन्मापि मातास्य विनतासुत ॥ २० ॥
पापस्यानुमतात्पूर्वं ह्यत्र भर्तृविहीनता । पूर्वजन्मनि या शूद्रं हत्वा नीता शुभानना ॥ २१ ॥
शूद्रस्य चाथ सर्वस्वं तस्य कर्मफलं शृणु । अत्र जन्मनि सा नारी मृता त्रिंशन्मितेऽब्दके॥२२॥
कुचत्वारिंशके वर्षे शूद्रघातः कृतः पुरा । जन्मतस्तन्मिते वर्षे प्रष्टुर्मृत्युर्भविष्यति ॥ २३ ॥
देशोत्पातो भृशं तत्र हाहाकारश्च लुण्ठनम् । अथवा सर्वं ज्येष्ठस्य सुतस्य मरणाद्भवेत् ॥ २४ ॥

अरुण उवाच ।

का तस्य निष्कृतिः स्वामिन् पूर्वपापनिषूदिनी । कथ्यतां दिवशेषान लोकानां हितकाम्यया २५

श्रीसूर्य उवाच ।

शृणु सूत प्रवक्ष्यामि निष्कृतिं तस्य कर्मणः ॥
यां कृत्वा विधिवज्जन्तुरिह रिष्टात्प्रमुच्यते । श्रुत्वैनं पुस्तकं पुत्र प्रष्टा श्रद्धासमन्वितः ॥ २६ ॥
पूर्वं चाज्यघटं दत्त्वा पश्चात्कर्म समाचरेत् । वृषगेहे शुचि स्थाने स्नात्वा तु विमले जले ॥ २७ ॥
देवान्पितॄन्समभ्यर्च्य सुमनाः सुसमाहितः । पूजयित्वेष्टदेवं च पश्चात्काम्यं समाचरेत् ॥ २८ ॥
शूद्रस्य प्रतिमा कार्या पलैः शतमितैः शुभा । हिरण्मयी यथोक्ता हि तदर्धार्धेन वा पुनः ॥२९॥
एवं कालस्य मूर्तिश्च कार्या लोहमयी शुभा । द्विजाय प्रतिमे देये मन्त्रेणानेन धीमता ॥ ३० ॥

---

१ पापघटं–खपु० ।

मन्त्रः ।

"काममोहात्कृतं पूर्वं यन्मया शूद्रघातनम् । तस्मात्तन्निष्कृतिं विप्र ददेऽहं तुभ्यमत्र च ॥ ३१
काल त्वं सर्वभूतानां भयदश्च क्षयंकरः । मां रक्ष पूजितोऽसि त्वं रिष्टात्पापसमुद्भवात्" ॥ ३२
दिक्पालानां हिरण्मय्यो मूर्तयश्चाष्ट भो खग । अष्टानामिह ता देया विप्रेभ्यो दोषनाशकाः ॥ ३३
अथ रुक्ममयीं मूर्तिं विष्णोर्दद्यात्पलत्रिकां । विप्राय वेदविदुषे ततो विप्रांश्च भोजयेत् ॥ ३४
शिवस्य पूजनं कुर्यात्पूर्वपापविशुद्धये । पुत्रपौत्रधनैर्युक्त इह जन्मनि जायते ॥ ३५
श्रुत्वैनं पुस्तकं सूत नेमां कुर्याच्च यः कृतिम् । इह पुत्रविहीनः स्यादेकवेदमितेऽब्दके ॥ ३६
द्विसप्ततिमिते वर्षे मृत्युश्चाकृतनिष्कृतेः ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोऽष्टनवतितमः ॥ ९८ ॥

श्रीसूर्य उवाच ।

आसीत्पूर्वभवे कश्चिद्विराटे ब्राह्मणोऽण्डज । विद्याभ्यासविहीनश्च कृषिकर्मरतः सदा ॥ १
स्वल्पवित्तयुतस्त्यागी बन्धुमान्योऽतितामसः । स्ववर्णधर्मरहितोऽतिथीनां पूजने रतः ॥ २
अथो तस्य गृहे काश्चिद्द्विजः स्थापितवान्धनम् । तस्मै द्विजाय लोभाद्वै पुनर्दत्तं न तद्वसु ॥ ३
दम्पतिभ्यां मिलित्वा तु ब्रह्मस्वं भक्षितं पुरा । गत्वा धर्मपुरं दैवाच्छुभं वा यदि वाऽशुभम् ॥ ४
फलं भुक्त्वाऽधुना जातः शतद्वुनिकटे खग । रवौ केतुयुते चन्द्रे मेषराशिगतेऽण्डज ॥ ५
मध्यमो रक्तगौरश्च पूर्वापरसहोदरैः । रहितो बाहुजस्त्यागी सुखी बन्धुरतः सदा ॥ ६
धूर्तो व्ययान्वितो वाग्मी वातपित्तविवर्जितः । स्त्रीसाहाय्ययुतो यस्मात्पूर्वजन्मनि मानद ॥ ७
कृतवान्दारुणं कर्म तस्य वक्ष्यामि लक्षणम् । अत्र जन्मनि सा नारी मृता सा बहुकन्यका ॥ ८
पुत्रहीना च विंशेऽब्दे प्रष्टुर्ब्रह्मस्वभक्षणात् । ततो द्विभार्यः पूर्वाभ्यां सुताभ्यां विनतासुत ॥ ९
हीनो ज्येष्ठकनिष्ठाभ्यामत्र चाकृतनिष्कृतेः । ब्रह्मस्वभक्षणात्सूत द्रव्यतप्तोऽत्र दृश्यते ॥ १०
पूजनादतिथीनां प्राक् स्वल्पसन्तापसंयुतः । प्राग्वर्णधर्महीनत्वाज्जातोऽयं ब्राह्मणादधः ॥ ११
एतैर्लक्षणसंयुक्तो जायते नान्यथा पुनः । वक्ष्यामि निष्कृतिं तस्य पूर्वपापविशोधिनीम् ॥ १२
पलत्रिकार्धार्धेनाढ्यां त्रिषु वित्तानुसारतः । कपिलां गां सुवर्णेन सर्वाभरणभूषिताम् ॥ १३
संप्रदद्यात्तु विप्राय पूजिताय प्रयत्नतः । तथैकस्मै विधिज्ञाय मन्त्रमेतत्पठन् सुधीः ॥ १४
प्राग्धृतं ब्राह्मणस्य स्वं लोभोपहतचेतसा । स्त्रीसाहाय्ययुतेनैव तस्येमां पापशोधिनीम् ॥ १५
निष्कृतिं कपिलां देवीं ददेऽहं ब्राह्मणाय वै । इत्युच्चार्य नरो दद्यात्पूर्वपापविशुद्धये ॥ १६
ततः प्रभृति पुत्राणां वृद्धिरत्र भविष्यति । धनवृद्धिस्तथात्रैव जायते गरुडाग्रज ॥ १७
न करोति यदा श्रुत्वा प्रायश्चित्तं प्रयत्नतः । स पुत्रधनशोकाभ्यां दुःखितो म्रियतेऽधुना ॥ १८
एतत्सर्वमुपाख्यातं प्रायश्चित्तं विधानतः । पञ्चपञ्चमिते वर्षे रिष्टं चाकृतनिष्कृतेः ॥ १९
प्रायश्चित्ते कृते ह्यायुः समाः स्युः पञ्चसप्ततिः । ज्येष्ठे मासि सिते पक्षे त्रयोदश्यां दिनोदये ॥ २०
कर्कलग्ने तु निर्याणं कीर्तितं विनतासुत ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकोनशततमः ॥ ९९ ॥

श्रीसूर्य उवाच ।

क्षात्रे कुले समुत्पन्नः पूर्वजन्मनि मानद । धनधान्यसमृद्धोऽपि देशे स्त्रीराज्यके सुत ॥ १
मोहादिपीडितो नित्यं कृशाङ्गः पाण्डुरद्युतिः । ऊर्ध्ववातादिना पीडा बाल्येऽस्य ग्रहणीगदः ॥ २

१ निष्कृतिम्— खपु० । २ वातादिगा—खपु० ।

तस्य भार्या सदाचारा सुस्नेहा भर्तृभक्तितः। रक्तस्रावादिना पीडा जायते चोदरानिलः ॥ ३ ॥
तस्याश्चोदरतो गर्भपातं कुर्याच्च पृष्ठतः। द्वित्रैश्च पञ्चभिर्मासैश्चतुर्भिः सप्तभिस्तथा ॥ ४ ॥

केनं कर्मविपाकेन गर्भो न स्थिरतां व्रजेत्।

श्रीसूर्य उवाच।

वैनतेय महावाहो शृणु तस्या विचेष्टितम् ॥ ५ ॥
व्यभिचारभयाद्वापि तया गर्भश्च पातितः। अतिकष्टाद्वैनतेय गर्भपातः कृतो यतः ॥ ६ ॥
अपरं च कृतं कर्म व्यभिचारो यतस्ततः। नानाद्रव्यापहर्त्री च कुलटा वाक्यलङ्घनात् ॥ ७ ॥
भर्तुस्तच्चौरिणीवृत्तिरिष्टसंगतिचारणात्। तेन दुष्टेन यद्द्रव्यं हृतं तस्करबुद्धिना ॥ ८ ॥
भुक्तं ताभ्यां वैनतेय ब्रह्मस्वं तत्र जन्मनि। कालेन तद्धनं भुक्त्वा पीडितो दारुणैर्ग्रहैः ॥ ९ ॥
यातना बहुधा प्राप्ता पश्चान्मानुषतां गता। किंचित्पुण्यप्रभावेण चात्रेयं जन्मतो भुवि ॥ १० ॥
इदं च तृतीयं जन्म गर्भपातोऽभिजायते। उभाभ्यां च कृतं कर्म भुज्यते जन्मजन्मनि ॥ ११ ॥

अरुण उवाच।

प्रायश्चित्तं कथं देव येन पापक्षयो भवेत्। निष्कृतिं ब्रूहि विश्वेश येन गर्भः स्थिरो भवेत् ॥ १२ ॥

श्रीसूर्य उवाच।

सुशुभं भूप्रदेशं तु गोमयेनोपलेपयेत्। कुर्यादष्टदलं पद्मं राजतं शुक्लतण्डुलैः ॥ १३ ॥
तन्मध्ये स्थापयेत्कुम्भमव्रणं शुभलक्षणम्। सुशीतसलिलैः पूर्णं सरत्नौषधपल्लवम् ॥ १४ ॥
तस्योपरि न्यसेत्पात्रं वंशजं वर्तुलाकृति। तन्मध्ये स्थापयेन्मूर्तिं निष्कद्वयविनिर्मिताम् ॥ १५ ॥
सुवर्णस्य विशुद्धां च दापयेद्वेदवादिने। प्रतिष्ठां पूजनं कृत्वा ततो गां वै सवत्सकाम् ॥ १६ ॥
संकष्टान्मोचयेद्धेनुं दद्यातां दम्पती च तौ। एवं कृतविधेः सूत निश्चला संततिर्भवेत् ॥ १७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः शततमः ॥ १०० ॥

अरुण उवाच।

भगवन्देवदेवेश श्रुतमेतन्महाद्भुतम्। सदानुगामिन्या नार्या गतिं मे ब्रूहि भास्कर ॥ १ ॥

श्रीसूर्य उवाच।

मृतं प्रतीक्ष्य भर्तारं या विशेद्धि हुताशनम्। तत्सार्धं सा महापुण्या ज्ञेयाऽत्र सहगामिनी ॥ २ ॥
श्रुत्वा मृतपतिं यात्र विदेशस्थं प्रतिव्रता। तद्वस्त्रेण विशेदग्नौ सा ज्ञेया चानुगामिनी ॥ ३ ॥
धर्मात्प्रतिक्रिया पूर्वे भवेन्मोक्षगतिर्द्वयोः। अथैकाभून्महासाध्वी जाता ब्रह्महदेऽण्डज ॥ ४ ॥
ब्राह्मणी तपसा युक्ता सदा भर्तृपरायणा। दानशीलरता पुण्या पुण्यकर्मान्विता सती ॥ ५ ॥
दृष्ट्वा मृतपतिं सा तु दिव्याभरणभूषिता। प्राप्ताग्नौ विधिना सूत कृत्वा पूजां हरेर्भृशम् ॥ ६ ॥
सा गता यमराजस्य स्कन्धे दत्त्वा पदाम्बुजम्। वैकुण्ठे चाण्डजश्रेष्ठ यद्गत्वा न निवर्तते ॥ ७ ॥
तल्लत्तातलघातेन मूर्च्छितोऽभूद्यमाधिपः। तत्काले च तदा पृष्टो नारदेन महात्मना ॥ ८ ॥
धर्मराज वदैतन्मे त्वत्तः परतरश्च कः। दण्डप्रदो महाभाग येन त्वं चालितोऽधुना ॥ ९ ॥
तमुवाच ऋषिश्रेष्ठ गतेयं या शुभानना। सती तत्पादभारेण पीडितोऽहं भृशं द्विज ॥ १० ॥

---

१ अरुणवाक्यमिदं स्यात्। २ दृढं च त्रितयं–खपु०।

मोक्षं गता महासाध्वी गृहीत्वा तु स्वकं पतिम् । महापापसमाक्रान्तं नरकस्थं द्विजोत्तम ॥ ११
साऽऽगमिष्यंति चैवात्र पतेः पापावशेषतः । ब्राह्मणी योगयुक्ता च भविष्यति कलौ युगे ॥१२।
काश्यां मृत्युस्तयोर्यस्माच्छिवत्वमुपगच्छतः ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकाधिकशततमः ॥ १०१ ॥

श्रीसूर्य उवाच ।

यः कामतश्चरेत्पूर्वं ब्रह्महत्यां नराधमः । क्षयरोगान्वितः सोऽपि जायते चात्र जन्मनि ॥ १
घोराद्ब्रह्मघ्नजात्पापाद्घातकर्मकृतात्सुत । प्रायश्चित्तं मया नोक्तं पापान्मुक्तिस्त्रिजन्मनि ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो द्व्यधिकशततमः ॥ १०२ ॥

श्रीसूर्य उवाच ।

ब्राह्मणं घातयेद्यस्तु पूर्वजन्मनि मानवः । मोहादकामतः सोऽपि क्षयरोगसमन्वितः ॥ १
क्षयेणात्र क्षयं यान्ति धातवः सर्वदेहिनाम् । धातुक्षयेऽतिकष्टेन नष्टायुर्जायते पुमान् ॥ २
सर्वस्वदानादत्रैव क्षयरोगः प्रशाम्यति । कुरुक्षेत्रादितीर्थेषु सत्पात्रेषु विधानतः ॥ ३

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्र्यधिकशततमः ॥ १०३ ॥

अरुण उवाच ।

कश्चिद्विप्रो महासाधुश्चारुवर्णः प्रतापवान् । आचारकुलधर्मज्ञो देवाग्निद्विजवत्सलः ॥ १
संयुतो वायुपित्ताभ्यां किञ्चिद्वित्तसमन्वितः । तस्य भार्या सदाचारा किंचिदुत्क्लेशकारिणी ॥२ ॥
पतिभक्ता पतिप्राणा व्रतानामनुकाङ्क्षिणी । ऋतुहीना कथं जाता कस्येदं कर्मणः फलम् ॥३।

श्रीसूर्य उवाच ।

नारीणां जारगर्भाणामसतीनां कुलच्छिदम् । यद्वा चिरप्रसूतानां शीघ्रं गर्भं समुद्भवेत् ॥ ४
औषधैश्छेदनैर्दुष्टैः प्रलेपैर्दुष्टभक्षणैः । संवाहनैस्तथा घातैरन्यैर्वा वस्तिकर्मभिः ॥ ५
गर्भस्य पातनोपायं करोत्यपि च कीर्तयेत् । पुंस्कृतं नैव तत्कर्म स्त्रीकृतं नात्र संशयः ॥ ६
नारी जन्मान्तरे प्राप्ते न सा गर्भं बिभर्ति हि । पूर्वं वैश्यकुले जाता सपत्नीसहिता खग ॥ ७
नार्या तयेर्ष्यया चैव संततेर्नाशनाय च । औषधैश्छेदनाद्यैस्तु तस्यार्थे कल्पितो गदः ॥ ८
सपत्नैः प्रेरयामास विविधान्येव[1] तद्गदः । तया वै ऋतुभावाच्च तद्वै पीतं महौषधम् ॥ ९
पुष्पं प्रणाशितं तस्यास्तस्मिञ्जन्मनि मानद । ऋतावृतौ च संप्राप्ते जाता सा विविधा रुजा॥१०
वेदना जायते नित्यमसृग्वातोदरामयः । पुष्पे नष्टे फलं नष्टं कदाचिद्गर्भपातनम् ॥ ११
एतत्कर्म कृतं तत्र त्रिविधं गर्भदोषकृत् । तथापि फलहन्त्रीणां द्वितीयं सुकृतं कृतम् ॥ १२
बुद्ध्या वा दुष्टबुद्ध्या चं कृतं वै पूर्वजन्मनि । तेनैव कर्मणा वत्स विविधाः पुष्पबन्धनाः ॥ १३
गर्भाशयमधिश्रित्य स्रवते शोणितं बहु । छिद्यन्ति इव चान्त्राणि सूचीभिरिव तुद्यते ॥ १४
वेदनायाः पुरा भगवन्स्त्रीणां गर्भनिपातने । यावत्कालं प्रदेशीयं तासां गर्भमपातयत् ॥ १५
तावानेव च तद्गर्भः पतेद्वा नास्य संभवः । एवं तु लक्षणैर्ज्ञात्वा कर्माणि स्त्री समाचरेत् ॥ १६
एकवासा विधिं चैव दम्पती तीर्थसंगमे । शुशुभे भूप्रदेशे तु पुराणोक्तविधानतः ॥ १७
संप्रणाशाय दुष्टस्य प्रायश्चित्तमिहैनसः । पौष्टपद्यां तृतीयायां शुक्लायां व्रतमाचरेत् ॥ १८

---

१ विधिनान्येव—खपु० ।

यत्नेन गार्भिकं संज्ञमुपोषणपरायणा । पुष्पैर्नानाविधैः शुभ्रैरर्चयेद्गिरिजाप्रियम् ॥ १९ ॥
केतकैर्गर्भसंयुक्तैश्चम्पकैः कुमुदोत्पलैः । सौवर्णीं राजतीं ताम्रीं मूर्तिं गौर्याः प्रकल्पयेत् ॥२०॥
हारनूपुरमुकुटकुण्डलाभरणादिकम् । नैवेद्यैः शुभ्रकासारमोदकापूपपायसैः ॥ २१ ॥
उपतिष्ठेत विधिवद्भवानीं प्रियवल्लभाम् । पतिपुत्रवतीभिस्तु स्त्रीभिः सह शुचिस्मिता ॥ २२ ॥
रात्रौ जागरणं कुर्याद्गीतनृत्यादिपूर्वकम् । फलैर्नानाविधैरर्घ्यं दद्यान्मंत्रपुरःसरम् ॥ २३ ॥
फलपुष्पाक्षतोपेतमज्जनं मूर्ध्नि निक्षिपेत् । नमस्तेऽस्तु महादेवि नमस्ते गिरिशप्रिये ॥ २४ ॥
गृहाणार्घ्यमिदं देवि पुत्रान्मह्यं यशस्विनः । पतिपुत्रवती नारी गिरिजावत्प्रसूयते ॥ २५ ॥
एवं रात्रौ विधानेन पूजयेत्परमेश्वरीम् । ततः प्रभाते विमले कृतप्रातःक्रिया सती ॥ २६ ॥
देवीमुद्दिश्य विधिवद्भोजयेत्षोडश स्त्रियः । नानाविधैर्भक्ष्यभोज्यैर्ब्राह्मणानथ षोडश ॥ २७ ॥
प्रत्येकं वैणवं पात्रं सप्तधान्यसमन्वितम् । सौभाग्याष्टकसंयुक्तं वस्त्रयुग्मेन संयुतम् ॥ २८ ॥
दातव्यं गिरिजाप्रीत्यै पुत्रसौभाग्यकाम्यया । सगर्भां च वृषोपेतां सिताङ्गां वस्त्रसंयुताम् ॥२९॥
सहिरण्यां च गां दद्याद्विप्राय गुणशालिने । अपातयं पुरा गर्भं दुष्टस्त्रीणामुपार्जितम् ॥ ३० ॥
यद्ययं वन्ध्यताहेतुस्तस्मान्मुञ्चय चाम्बिके । तव दानेन पुत्रा मे भवेयुः शुभगामिनः ॥ ३१ ॥
इमं मन्त्रं समुच्चार्य दत्त्वा विप्रं विसर्जयेत् । एवंव्रतेन नार्य्या वै गर्भपातो न जायते ॥ ३२ ॥
जायन्ते पुत्रपौत्राद्याः स्वपत्या सह मोदते । न लभेद्गर्भपातं सा पतिपुत्रसुखं लभेत् ॥ ३३ ॥
तृतीये वा चतुर्थे वा मासि गर्भं स्रवेद्यदि । रजस्तस्य पलाभ्यां वै कोशं गर्भाशयाकृतिम् ॥३४॥
निष्कं च स्वर्णगर्भं च कृत्वा दत्त्वा द्विजन्मने । गर्भपातं प्रकुर्वन्त्या मया प्राक्तनजन्मनि ॥३५॥
यदिदं वन्धकृत्प्राप्तं तस्मान्मुच्येऽत्र जन्मनि । जन्म जात्यादिकं वत्स न वदेदिह कर्मणाम् ॥ ३६ ॥
इदं चतुर्थं वै जन्म भूमिदेवकुलोद्भवम् । सपत्नीसहिता येन न सा गर्भस्य दोषकृत् ॥ ३७ ॥
तस्येदमपि संचिन्त्य लक्षणानीहजन्मनि । यस्याः प्राक् पतितो गर्भः सपत्न्याः पतिवर्जितः॥३८॥
दीनानाथविरोधः स्यात्सविरोधात्तया सुत । अनुमन्त्रितयोक्ता तु पितृमातृसुखोज्झिता ॥ ३९ ॥
बन्धुसंततिदुःखेन भर्यादाद्यनवस्थितिः । शोकः स्यादुदरे बाधा तावत्प्लीहादिविभ्रमः ॥ ४० ॥
अन्तरास्पन्दमानो वा गर्भः सन्नोपलक्ष्यते । पाणौ मुष्टितलाघातजानुनी सक्थिजानुनी ॥ ४१ ॥
दोषजो वाग्निजो वापि शस्त्रजोऽश्मादिजोऽपि वा । ब्राह्मणान्भोजयेद्भक्त्या सर्पिष्यात्मानमीक्षयेत्४२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुरधिकशततमः ॥ १०४ ॥

श्रीसूर्य उवाच ।

सीमावादरतः कश्चिद्ब्राह्मणः पूर्वजन्मनि । तेन तत्र द्विजः सूत घातितो भूमिलोभतः ॥ १ ॥
सहायपञ्चयुक्तेन कृतं कर्मातिदारुणम् । तत्पापजान्महाघोरान्नरकान्प्राप्य दारुणान् ॥ २ ॥
तथा च तिर्यक्कं सूत विभुज्याधर्मतः स्वयम् । कर्मक्षये हि पुण्यात्प्राक् सोऽत्र जातो हि बाहुजः॥३॥
क्षयरोगयुतः सूत कृशो दुःखातुरो भृशम् । लग्ने कुम्भाभिधे सूत सौमचन्द्रयुतेऽण्डज ॥ ४ ॥
रिष्टं षष्टिमिते वर्षे जायतेऽकृतनिष्कृतेः । सहायाः पूर्वजा ये तु तेषां वक्ष्यामि लक्षणम् ॥ ५ ॥
तदग्रे ते मृताश्चात्र पुत्राः क्षयरुजान्विताः । रिष्टेन वायुगो भङ्गो दृढपापान्न निष्कृतिः ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचाधिकशततमः ॥ १०५ ॥

---

१ सौभाग्याकरसंयुक्तं–खपु० । २ सविरोधात्तया सुत–खपु० ।

श्रीसूर्य उवाच ।

राजपुत्रोऽभवत्कश्चिद्धर्मशास्त्रार्थकोविदः । गत्वा शत्रुपुरं सूत कदाचिन्मदसंयुतः ॥ १
ददाह तत्पुरं शत्रोस्तत्क्षणे लुण्ठितः पुनः । तत्रैको ब्राह्मणो दग्धो वृद्धो विद्याविशारदः ॥ २
पापमाचरितं तेन चाज्ञानाद्ब्रह्मघातजम् । अथो ममाज्ञया सर्वा भुक्ता नरकयातनाः ॥ ३
पुण्यशेषादथाऽत्रापि स जातः क्षात्रियाधमः । देशेऽयोध्याभिधे गौरो लघुर्दक्षो महोद्यमी ॥ ४
युवभावे महाभाग राजयक्ष्मप्रपीडितः । ब्रह्महा क्षयरोगी स्यादिति वेदविदो विदुः ॥ ५
निष्कृतिं तत्प्रवक्ष्यामि यां कृत्वा मुच्यतेऽधुना । कार्यास्तत्र त्रिदेवानां मूर्तयस्तु यथोदिताः ॥६
ब्रह्मविष्णुमहेशानां सर्वरोगविनाशकाः । सुवर्णजास्तथा कार्याः कदलीपत्रसंयुताः ॥ ७
यथावित्तानुसारेण वित्तशाठ्यं विवर्जयेत् । देयास्ता विप्रमुख्येभ्यः क्षयरोगोपशान्तये ॥ ८
ब्राह्मणान्भोजयेच्छक्त्या होमयेच्च जपेत्तथा । गायत्रीं विधिना सूत पूर्वपापापनुत्तये ॥ ९
एवं कृते महाबाहो क्षयस्तस्यात्र शाम्यति । नैवं कुर्यात्तु यो मोहाद्रिष्टं विंशन्मितेऽब्दके ॥ १०

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षडधिकशततमः ॥ १०६ ॥

श्रीसूर्य उवाच ।

या योषिदाचरेत्कामात्पूर्वजन्मनि निश्चयात् । ब्रह्महत्यामथात्रैव सा ज्ञेया क्षयरुग्युता ॥ १
तत्तस्याः[1] पापशमनं मयोक्तं न पतत्रिण । महापापकृताद्रोगान्मृत्युरेव न संशयः ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्ताधिकशततमः ॥ १०७ ॥

श्रीसूर्य उवाच ।

स्वसृघाती च पुरुषः पूर्वजन्मनि मानद । बधिरो जायते तत्र प्रायश्चित्तं च तच्छृणु ॥ १
चान्द्रायणव्रतं[2] कुर्यात्सुवर्णकर्षसंयुतम् । पुस्तकं विधिना दद्यात्तस्मात्पापात्प्रमुच्यते ॥ २
भोजयेच्च यथाशक्ति होमयेच्च स्वशक्तितः ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोऽष्टाधिकशततमः ॥ १०८ ॥

श्रीसूर्य उवाच ।

या काचिदाचरेन्नारी पापं प्राग्ब्रह्मघातजम् । अज्ञानादत्र जन्तुपि क्षयरुक्पीडिता हि सा ॥ १
महापापकृताद्घोराद्यस्मात्सर्वस्वदानतः । क्षयरोगात्प्रमुच्येत नात्र कार्या विचारणा ॥ २
प्रयागे मकरस्थेऽर्के स्नानादत्रैव जन्मनि । काश्यां वासात्तथा सूत मुच्यते ब्रह्महत्यया ॥ ३

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो नवाधिकशततमः ॥ १०९ ॥

श्रीसूर्य उवाच ।

मूकोऽत्र जायते जन्तुर्यः पूर्वं भ्रातृघातकः । बभूव कामतः सूत प्रायश्चित्तं न तत्समम् ॥ १

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो दशाधिकशततमः ॥ ११० ॥

श्रीसूर्य उवाच ।

कलिङ्गदेशे प्राक् सूत काचिद्द्विजवराङ्गना । पतिप्रिया धर्मशीला दानभोगरता सदा ॥ १
नारी याऽघातयत्पूर्वभवे मोहाच्च कुक्कुटम् । नासावक्रत्वमाप्नोति सात्र जन्मनि निश्चयात् ॥ २

---

१ च प्रवक्ष्यामि–खपु० । २ न तस्याः पापशमनं–खपु० । ३ चान्द्रायणत्रयं–खपु० ।

हेमनिष्कत्रयं दद्यात्पर्वस्वेव प्रयत्नतः । ब्राह्मणाय महाभाग पापनाशकरं परम् ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकादशाधिकशततमः ॥ १११ ॥

श्रीसूर्य उवाच ।

बभूव बाहुजः कश्चिद्देशे पञ्चनदे पुरा । धनधान्यसमायुक्तः पापकर्मा महोद्यमी ॥ १ ॥
विप्रोत्सङ्गगतः सोऽपि प्रयागे गरुडाग्रज । स स्नातो मृगगे भानौ धूर्तः कर्मक्रियोदितः ॥ २ ॥
संप्राप्य स्वगृहं शीघ्रं कृतवान्कर्म दारुणम् । ग्रामे निवसित स्यान्यक्षत्रियस्य पतत्रिण ॥ ३ ॥
ददाह भवनं रम्यं वैरभावात्पुरानघ । तत्रैका वत्सरी दग्धा जीवाश्चापि विशेषतः ॥ ४ ॥
कालयोगेन संप्राप्तः स गत्वा यमशासनम् । भुक्त्वा पापफलं पापात्पुण्यात्पुण्यफलं तथा ॥ ५ ॥
पूर्वपुण्यप्रभावेण स जातः पादजोऽधुना । गङ्गायाः प्राक्[1] परे देशे शतयोजनसंमिते ॥ ६ ॥
स मध्यरूपो बलवान्धर्मे स्वल्पमतिः शठः । बुद्ध्याधिकप्रचारी च पैत्तिकः स्वल्पशिश्नभाक्[2]॥ ७॥
सकन्यश्च सपत्नीको बन्धुभृत्यसमन्वितः । पुण्यादिदं फलं पापात्पूर्वादत्र शृणु द्विज ॥ ८ ॥
गोबालवत्सकवधाज्जीववधातादपुत्रकः । सप्तवेदमिताब्दान्तं जातपुत्रविनाशकः ॥ ९ ॥
गोस्त्रीविप्रवधाः पापाः पुत्रनाशकरा[3] यतः । गोराशिगे शनौ सोमात्षष्ठे जीवे मृगस्थिते ॥ १० ॥
लक्ष्मैतदण्डजश्रेष्ठ पृच्छकस्यात्र जन्मनि । पूर्वे या स्त्री सहायासीन्मृतवत्साऽत्र सा सुत ॥ ११ ॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन्सर्वपापनिषूदनीम् । पुत्रवृद्धिकरीं धन्यामत्र जन्मनि निश्चयात् ॥ १२ ॥

श्रीसूर्य उवाच ।

शृणु सूत प्रवक्ष्यामि निष्कृतिं पापशोधनीम् । पञ्चस्वर्णमिता कार्या सुरभी च हिरण्मयी ॥ १३॥
तदर्धमितिका वापि द्वयोर्वित्तानुसारतः । संपूज्य विधिवन्मन्त्रैर्देया विप्राय धीमते ॥ १४ ॥
माषैर्वह्निमितैर्देयस्तथा पशुपतिः सुत । माषाभ्यां च तथा वह्निर्जीवा माषचतुष्कजाः ॥ १५ ॥
देयाश्च विधिना सूत पूर्वपापापनुत्तये । जपेत्पशुपतेर्मन्त्रं सहस्रं रिष्टनाशनम् ॥ १६ ॥
होमयेदष्टशतकं रुद्रस्याग्रे विधानतः । यः कुर्याद्विधिवत्सूत प्रायश्चित्तं त्रिधा मतम् ॥ १७ ॥
जीविष्यन्ति च तत्पुत्रा जन्मन्यत्र ममाज्ञया । नैवं कुर्याच्च यः शक्त्या त्रिष्वेकं पापशोधनम्॥१८॥
न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः । नवसप्तमितायुः स्यात्प्रायश्चित्ते कृतेऽधुना ॥ १९ ॥
सप्तवेदमिते वर्षे रिष्टं चाकृतनिष्कृतेः ।
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो द्वादशाधिकशततमः ॥ ११२ ॥

श्रीसूर्य उवाच ।

काश्मीरमण्डले पूर्वं काचिद्विजवराङ्गना । पतिप्रिया शीलयुक्ता दानभोगरता सदा ॥ १ ॥
वैरभावैस्तया सूत गृहं दग्धं द्विजस्य च । वैरिणस्तत्सुतो दग्धो गृहदाहे पतत्रिण ॥ २ ॥
सहायात्स्वामिनः सर्वं प्राग्भवे समुपार्जितम् । तत्पापजं महापापात्फलं प्राप्य वियोनिजाम् ॥ ३ ॥
सैव जाता विराटेऽत्र पतिशुश्रूषणात्सुत । क्षत्रिया धनधर्माढ्या पूर्वपुण्यात्तथा सती ॥ ४ ॥
क्षयरोगयुता बाल्ये बालघातादपुत्रिणी । महाग्निदग्धपुत्राच्च प्रायश्चित्तं न तत्समम् ॥ ५ ॥
त्रयोविंशान्मिते वर्षे रिष्टेनैवात्र नश्यति । सहायात्तत्पतिश्चात्र पुत्रहीनः क्षयान्वितः ॥ ६ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्रयोदशाधिकशततमः ॥ ११३ ॥

---

१ पाश्चिमेदेशे–खपु०।२ वधात्पात्पात्–खपु०।३नाशपराय च खपु०।४ तत्पापं तन्महापापात्–खपु०।

श्रीसूर्य उवाच ।

सारिकां यो महाभाग निहन्यात्पापमोहितः । तस्य च स्खलिता वाणी भवत्यत्रैव जन्मनि ॥ १
दद्याद्धिरण्मयीं तत्र सारिकां शुभलक्षणाम् । तथात्र पुस्तकं दद्याच्छास्त्रस्य विधिनाण्डज ॥ २
पूर्वपापाद्विमुच्येत नरोऽत्र गतकिल्बिषः ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुर्दशाधिकशततमः ॥ ११४ ॥

श्रीसूर्य उवाच ।

सारिकां याऽवधीन्नारी पूर्वं पापविमोहिता । सात्र जन्मनि जायेत वचनस्खलिताण्डज ॥ १
तया देया सुवर्णस्य सारिका ब्राह्मणाय च । पूर्वपापात्प्रमुच्येत तद्दानाद्विनतासुत ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचदशाधिकशततमः ॥ ११५ ॥

श्रीसूर्य उवाच ।

वकघाती च पृरुषः पूर्वजन्मनि मानद । लम्बकण्ठः प्रजायेत सोऽत्र जन्मनि निश्चयात् ॥ १
गां दद्याद्विधिवच्छ्वेतां सर्वाभरणभूषिताम् । मुच्यते कण्ठजाद्रोगान्नात्र कार्या विचारणा ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षोडशाधिकशततमः ॥ ११६ ॥

श्रीसूर्य उवाच ।

या नारी पूर्वजनुषि घातयेद्गरुडाग्रज । वकं सा कण्ठरोगेण बाध्यते चात्र जन्मनि ॥ १
गां दद्याद्विधिवत्सूत श्वेतामत्र पयस्विनीम् । यथोपस्करसंयुक्तां तस्मात्पापात्प्रमुच्यते ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्तदशाधिकशततमः ॥ ११७ ॥

अरुण उवाच ।

कश्चिद्विप्रकुले जातो धर्मिष्ठो वित्तसंयुतः । उदरे वाजता रोगा गुल्माद्याश्चोर्ध्वहृद्व्यथाः ॥ १
मेहाद्याः स्वल्पवीर्याश्च अक्षिपाण्डूदरामयः । जायते शीर्षजा पीडा बाल्ये स्याद्ग्रहणीगदः ॥ २
शरीरे जायते चिह्नमुपघातव्रणादिकम् । पौत्राणां मातुलानां तु विधवार्तिः स्वस्रादिषु ॥ ३
दायादाच्छ्रुवत्पीडा भूमिद्रव्यविलिप्सया । ऐहिकानि च लक्ष्माणि जायंते तस्य वर्ष्मणि ॥ ४
तस्य भार्या सदाचारा कदाचिद्रोषवादिनी । गौरवर्णा रम्यवाणी संतोषप्रियकारिणी ॥ ५
मृतवत्सा कथं जाता स्थिरगर्भमवाप्नुयात् । दशमासानतिक्रम्य गर्भं चोदरसौख्यभाक् ॥ ६
केन कर्मविपाकेन सत्यं कथय भास्कर ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोष्टादशाधिकशततमः ॥ ११८ ॥

श्रीसूर्य उवाच ।

पुस्कृतं नैव तत्कर्म स्त्रीकृतं नात्र संशयः । पूर्वजन्मनि सा क्षात्री संजाता विनतासुत ॥ १
अज्ञानतिमिरान्धेन स्त्रीणां कर्म दुरात्मनाम् । अजानती कुलस्त्रीणामाचारमनुकम्पनात् ॥ २
सर्वभूतेषु चात्मानं स्थावरेषु चरेषु च । प्रमादाद्दीपिनं हत्वा सदा निष्ठुरमानसा ॥ ३
तस्य गेहाश्रिता नित्यं मार्जारश्वानपूर्वकम् । पातालक्रीडनपरा गेहे संकलिता भृशम् ॥ ४
तप्तेषु वालुकाग्न्यम्बुतप्तभस्मचयादिषु । अविक्षिप्ता तदा चाग्नौ प्राक्षिपत्पापचेतसा ॥ ५
बालगर्भाशया बालानभियष्ठाखिलेन्द्रियान् । तँदृष्ट्वा त्यजते माता बालानामनुकम्पया ॥ ६

१ कच्छघाती—खपु० । २ तं दृष्ट्वा—खपु० ।

मायावन्धनमातॄणां बालगर्भाश्रिता तदा । अन्यतद्धर्मिणां दृष्ट्वा क्षिप्यन्ते वह्निभस्मसात् ॥ ७ ॥
विनिघ्नन्ति प्रमादाद्यैर्भेदसंततिदुःखभाक् । संततिर्दुःखितायास्तु नानादुःखं प्रजायते ॥ ८ ॥
अनयाग्निं समासाद्य तेषां वैनाशनाय च । तथाविधेषु जीवेषु मृतेष्वपि च तद्वशात् ॥ ९ ॥
म्रियन्ते शिशवस्तेऽपि तस्याग्नेर्दोषचिह्निताः । पाताले ज्वलिते ताभिर्बहवो लघुपाणिनः ॥ १० ॥
गर्भयुक्ता मृता मातृक्षमयापि तथा तया । मार्गो न लभ्यते तत्र मृतास्ते दुःखजन्तवः ॥ ११ ॥
तेन कर्मविपाकेन स्थिरगर्भा मृतप्रजा । त्रिविधापत्यजा बाधा प्राप्यते जन्तुरन्तरे ॥ १२ ॥
जन्तवो गर्भिणो ये के स्वकृतं कर्मबन्धनात् । उभयोः कर्मणो हेतून्वश्यावश्यं प्रयोजकम् ॥ १३ ॥
इदं तु तृतीयं जन्म ब्रह्मवंशसमुद्भवम् । स्थिरगर्भा मृतापत्यपुत्रहीना पतत्रिण ॥ १४ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं नाथ येन गर्भः प्रजायते । ममोपरि कृपां कृत्वा सत्यं वद दिवस्पते ॥ १५ ॥

श्रीसूर्य उवाच ।

सुदिष्टे समनुप्राप्ते ग्रहेऽहनि शुभोदये । प्रागुदक्प्रवणे देशे गोमयाद्युपलिप्तके ॥ १६ ॥
तत्रोपर्यविकं तीर्यं नानाचित्रविचित्रकम् । द्रोणमानं तिलानां तु मध्ये गर्भं प्रपूरयेत् ॥ १७ ॥
निष्कमानं सुवर्णस्य शकलं मध्यतः क्षिपेत् । तस्य पूर्वे च दिग्भागे तण्डुलद्रोणपर्वते ॥ १८ ॥
शुद्धतोयं भृशं ताम्रपात्रं दशपलोन्मितम् । स्थापयेद्राजतं पद्मं तन्मध्ये पलनिर्मितम् ॥ १९ ॥
पूजयेच्च सपत्नीकं कश्यपस्य प्रजापतेः । दण्डं साक्षात्करे दक्षे वामे चाथ कमण्डलुम् ॥ २० ॥
कृत्वा प्रतिष्ठितप्राणां मूर्तिं च शुभलक्षणाम् । अर्चयेद्गन्धपुष्पाद्यैरुपचारैः पृथक्पृथक् ॥ २१ ॥
सम्यक् श्रद्धावती नारी त्रिविधापत्यदुःखिनी । विप्राय वेदविदुषे पूजयेद्विविधैर्धनैः ॥ २२ ॥
ततस्ते तु सपत्नीकं मुनीनां विन्मयेदिति । सदक्षिणं जगत्स्रष्टा पत्नी च तपसो बले ॥ २३ ॥
सा मया तिलसंख्यावदथो भीस्तीव्रवेदनम् । लङ्घिताज्ञीजनाचारामज्ञानत्वाद्यात्मकम् ॥ २४ ॥
नाशयेत्तस्य पापस्य देवि प्राप्तं विगर्हितम् । सम्यक् श्रद्धावती नारी मृतसंततिदुःखिनी ॥ २५ ॥
सपत्नीकस्य सौवर्णैर्निर्मितं सम्यगर्चितम् । विप्राय वेदविदुषे प्रदद्याद्गुणशालिने ॥ २६ ॥
एवमामन्त्र्य ता मूर्तीः समादाय पृथक्पृथक् । प्रदद्याद्दानविधिना श्रद्धया च सदक्षिणाः ॥ २७ ॥
दानान्ते कीर्तयेन्मन्त्रं तिष्ठन्ती विहिताञ्जलिः ।

मन्त्रः ।

न्मया पूर्वजनुषि दयारहितचित्तया । कृतं चाऽप्यशुभं स्वामिंश्छिन्धि तद्दिष्टकारणम्" ॥ २८ ॥
दत्त्वा दानं च विप्राय सर्पिष्यात्मानमीक्षयेत् ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकोनविंशत्यधिकशततमः ॥ ११९ ॥

श्रीसूर्य उवाच ।

काकघाती महाभाग प्राग्भवे चात्र जन्मनि । कूर्चहीनो भवेन्मर्त्यः स च तत्पापलाञ्छितः ॥ १ ॥
कृष्णधेनुप्रदानेन विधिनाऽत्र खगाधिप । मुच्यते दुष्टपापाच्च कूर्चयुक् चात्र जन्मनि ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो विंशत्यधिकशततमः ॥ १२० ॥

---

१ स्पलपजन्तवः—खपु० । २ जलसंख्या—खपु० । ३ मम कृत्वा दयात्मना—खपु० । ४ नाशाय तस्य—खपु० ।

श्रीसूर्य उवाच ।

या नारी घातयेत्काकं विनतानन्दवर्धन । सात्र जन्मनि पक्षीन्द्र कूर्चयुक्ता भवेदलम् ॥
कृष्णधेनुप्रदानेन यथोक्तं गरुडाग्रज । पूर्वकर्मविशुद्धिः स्यादत्र जन्मनि सुव्रत ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकविंशत्यधिकशततमः ॥ १२१ ॥

श्रीसूर्य उवाच ।

अभक्ष्यभक्षको यस्तु भवेत्प्राङ्मा नवोऽण्डज । सोऽत्र जन्मनि पक्षीन्द्र जायते क्रिमिलोदरः ॥
सभीष्मपञ्चकादत्र व्रतात्पुण्यसमर्जनात् । मुच्यते पूर्वरोगात्तद्दुष्टात्स क्रिमिलोदरात् ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो द्वाविंशत्यधिकशततमः ॥ १२२ ॥

श्रीसूर्य उवाच ।

याऽभक्ष्यं भक्षये न्नारी प्राग्भवे गरुडाग्रज । जायते जठरे तस्याः क्रिमिजोत्थरुजा सुत ॥
तत्पापनाशनं कार्यं भीष्मपञ्चव्रतं शुभम् । कार्तिके शुक्लपक्षे च प्रान्तस्थं दिनपञ्चकम् ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽव्यायस्त्रयोविंशत्यधिकशततमः ॥ १२३ ॥

श्रीसूर्य उवाच ।

दुष्टस्पर्शेन यो मोहाद्भक्षयेद्विधिवर्जितः । सिद्धान्नानि पुरा सूत जायतेऽत्र कृशोदरः ॥
विष्णुव्रतान्महापुण्यात्सर्वपापप्रणोदनम् । तदा कृशोदरत्वं च रुजं नात्र प्रपश्यति ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुर्विंशत्यधिकशततमः ॥ १२४ ॥

श्रीसूर्य उवाच ।

भुक्तं यया पुरा सूत सिद्धान्नं द्विजभार्यया । दुष्टास्पर्शेन सततं सात्र स्याच्च कृशोदरी ॥
सा वैष्णवव्रतात्पुण्यात्तस्मात्पापात्प्रमुच्यते । कृशोदरव्यथा नश्येत्तत्पापस्य क्षणाशनात् ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्ययः पंचविंशत्यधिकशततमः ॥ १२५ ॥

श्रीसूर्य उवाच ।

द्विजः पूर्वभवे कश्चिदासीद्धर्मान्वितः सदा । सभार्यो नर्मदातीरे धनसौख्यसमन्वितः ॥
कृतानि तेन दानानि नानापर्वसु शक्तितः । वेदयुक्तेषु विप्रेषु सत्पात्रेषु विधानतः ॥
यथा पापं भृशं चक्रे व्यभिचारसमुद्भवम् । ज्येष्ठां त्यक्त्वा ऋतुप्राप्तां धर्मशीलयुतां प्रियाम्
रतिं ददौ कनिष्ठायामनृतौ च विमोहितः । ततो यमपुरे प्राप्तः ससहायो द्विजोत्तमः ॥
भुक्त्वा पापफलं पापात्पुण्यात्स्वर्गफलानि च । श्रद्धादानवशात्सोऽत्र गङ्गायाः पूर्वभागजः ।
लघुर्घृणी त्वमितदो द्विजवंशसमुद्भवः । सर्वमेतत्फलं दानात्स्त्रीत्यागान्मृतपुत्रकः ॥
स्त्रीत्यागी भ्रूणहा लोके इति पौराणिका विदुः । येषां साहाय्यतः पूर्वं शृणुष्व विनतासुत
प्राग्भवे या कनिष्ठाभूत्सा ज्येष्ठात्र गतप्रजा । गर्भदोषयुता चेति लक्षणैर्लक्षयेत्खग ॥
वक्ष्यामि निष्कृतिं तस्य पूर्वपापविनाशनीम् । कुर्यात्पलैर्वेदमितैर्गणेशं विघ्ननाशनम् ।
तदर्धार्धमितं देयं त्रिषु वित्तादिमं पठन् । त्यक्ता वरानना शुद्धा पूर्वं पापं समर्जितम् ॥
तत्पापस्य विनाशाय ददेऽहं गणनायकम् । माषसप्तमितां लक्ष्मीं शुभां लेख्यां हिरण्मयीम्

१ प्रेषयां च विशुद्धिः स्यात्–खपु० । २ पूर्वरोगात्तु–खपु० ।

ददेऽहं विप्रमुख्ये वै वेदशास्त्रविशारदे । ब्राह्मणान्वरयेत्तत्र शक्त्या दद्याच्च दक्षिणाम् ॥ १२ ॥
एवं विधानं यः कुर्याज्जीविष्यन्ति च तत्सुताः। श्रुत्वैनं शक्तिमान्यस्तु न कुर्याच्छोधनं गदे ॥१३॥
स पुत्रान्नैव चाऽऽप्नोति रिष्टं पञ्चाशदब्दके । प्रायश्चित्ते कृते त्वत्र जीवनं वर्षसप्ततिम् ॥ १४ ॥
अन्यजन्मादिकं ज्ञेयं विस्तरं नोदितं मया ।
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षड्विंशत्यधिकशततमः ॥ १२६ ॥

श्रीसूर्य उवाच ।

देशे पञ्चनदे जाता बाहुजा पूर्वजन्मनि । सात्र जन्मनि वै विप्रा जाता प्राग्विप्रपूजनात् ॥ १ ॥
प्राग्यत्तया कृतं कर्म शृणुष्वात्र खगेश्वर । ब्राह्मणेन महद्द्रव्यं तद्गृहे स्थापितं च यत् ॥ २ ॥
न तद्दत्तं पुनस्तस्मै भुक्तं सर्वमशेषतः । मृतो द्विजस्तद्दुःखेन क्षुधितस्तु पतत्रिण ॥ ३ ॥
पापमाचरितं पूर्वं ब्रह्मघातसमं तया । पञ्चत्ववशमापन्ना भुक्त्वा तु यमशासनम् ॥ ४ ॥
पुत्रसंततिहीनात्र युवभावे क्षयान्विता । निष्कृतिं परमां तस्या वक्ष्येऽहं पापनाशनीम् ॥ ५ ॥
सर्वस्वेन तदर्धेन कार्या स्वर्णमयी शुभा । कदलीपत्रसंयुक्ता देया विप्राय धीमते ॥ ६ ॥
दानेनानेन सुप्रीता ब्रह्मविष्णुमहेश्वराः । क्षयनाशकराः सर्वे भविष्यन्त्यत्र जन्मनि ॥ ७ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्तविंशत्यधिकशततमः ॥ १२७ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि भो सूत चोच्छिष्टं भक्षयेत्तु यः । रात्र्यन्धो जायते सोऽपि जन्मन्यत्र च मानवः ॥१॥
भोजयेद्ब्राह्मणाञ्छक्त्या गोमूत्रं प्राशयेत्तथा । मुच्यते तत्क्षणात्सूत नक्तान्धत्वान्न संशयः ॥२ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोऽष्टाविंशत्यधिकशततमः ॥ १२८ ॥

श्रीसूर्य उवाच ।

या भक्षयेत्पुरा नारी चोच्छिष्टं सा शुभानना । नक्तान्धा जायते ह्यत्र व्यथिता नेत्रपीडया ॥१॥
गोमूत्रप्राशनादत्र ब्राह्मणेभ्यश्च भोजनात् । नक्तान्ध्यरोगान्मुक्ता स्यादत्र जन्मनि सुव्रत ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकोनत्रिंशदधिकशततमः ॥ १२९ ॥

श्रीसूर्य उवाच ।

बिडालोच्छिष्टभोजी च रात्र्यन्धो जायतेऽधुना । स तत्पापविशुद्ध्यर्थं गोमूत्रं विधिवत्पिबेत् ॥ १॥
भोजयेच्च तथा विप्राञ्छक्त्या दद्याच्च दक्षिणाम् । रात्र्यन्ध्यरोगात्सततं मुक्तो भवति मानवः॥२॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्रिंशदधिकशततमः ॥ १३० ॥

श्रीसूर्य उवाच ।

बिडालोच्छिष्टभुङ् नारी प्राग्भवे विनतासुत । रात्र्यन्ध्यरोगयुक्ता सा चात्र जन्मनि जायते ॥१॥
द्विजेभ्यो भोजनाच्चैव गोमूत्रप्राशनात्तथा । विमुच्यते प्राक्पापात्तु बिडालोच्छिष्टभोजनात् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकत्रिंशदधिकशततमः ॥ १३१ ॥

---

१ पुत्रान्नो पसर्पन्ति इति–खपु० ।

श्रीसूर्य उवाच ।

चाण्डाल्यां गमनात्पूर्वभवे च गरुडाग्रज । जायतेऽजगरश्चात्र मूढो जन्मनिजन्मनि ॥
चान्द्रायणव्रतादत्र शतावृत्तिकृतात्सुत । स मुच्यतेऽजगरत्वाच्छुद्धबुद्धिर्भवेदिह ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो द्वात्रिंशदधिकशततमः ॥ १३२ ॥

श्रीसूर्य उवाच ।

या काचिदधमा नारी प्राग्भवे विनतासुत । चण्डालं प्राप्नुयात्सात्राजगरी जायतेऽण्डज ॥
प्राजापत्यव्रतबलात्कृतात्पञ्चापवर्तनैः । मुच्यते पूर्वपापात्सा जन्मन्यत्रपतत्रिण ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्रयस्त्रिंशदधिकशततमः ॥ १३३ ॥

श्रीसूर्य उवाच ।

परान्नविघ्नकारी यो भवेद्वै पूर्वजन्मनि । सोऽजीर्णेनातिरोगेण जन्मन्यत्र प्रपीड्यते ॥
विधिना लक्षहोमेन कृतेन गरुडाग्रज । मुच्यतेऽजीर्णजाद्रोगादत्र जन्मनि वै ध्रुवम् ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुस्त्रिंशदधिकशततमः ॥ १३४ ॥

श्रीसूर्य उवाच ।

विघ्नं प्रकुरुते सूत या नारी पूर्वजन्मनि । परान्नेषु सदा मोहाच्छृणु तत्र पतत्रिण ॥
अजीर्णेनैव रोगेण बाध्यते पीडया महत् । लक्षहोमेन सततं तत्पापान्मुच्यतेऽधुना ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचत्रिंशदधिकशततमः ॥ १३५ ॥

अरुण उवाच ।

भूमिदेवकुलोत्पन्नो धर्मिष्ठो धर्मवत्सलः । सत्यनित्यसदाचारः साधुसेवकसंयुतः ॥
तस्य देहे भवेच्चिह्नं पापजं चात्र जन्मनि । किलासा दद्रुकण्डूश्च नेत्रतोदो[1] विरश्मिता ॥
किंचिद्गदः प्रजायेत तद्भूते कारणं विना । तस्य भार्या सुतन्वङ्गी स्त्रीधर्मव्रतचारिणी ॥
तस्याः कुक्षौ व्यथा वातैर्मूर्ध्नि पीडा प्रजायते । मृतवत्सा कथं जाता पुत्रपुत्र्यो मृता तथा ॥
केन कर्मविपाकेन सत्यं कथय भास्कर ।

श्रीसूर्य उवाच ।

पूर्वे वैश्यसमुत्पन्ना प्रिया शूद्रापतारिता ॥ ५ ॥

बहुव्यापारनिरता बहुद्रव्यसमन्विता । शूद्रायान्ते च संबन्धो बहुकालो गतागतः ॥
अन्योन्यं प्रीतिवशतः किंचित्कालो यथा गतः । उभयोः कर्मणो हेतुर्धनापहरणं यतः ॥
तयोः शूद्रोऽभवद्योऽसौ तेन तत्रैव जन्मनि । ब्राह्मणस्य सुतः श्रेष्ठः स्वर्णालंकरणैर्युतः ।
धनलोभाद्धतस्तेन भाविनोऽर्थस्य वै बलात् । तस्याथ मातापितरौ पुत्रदुःखेन दुःखितौ ।
द्वित्रिवर्षैस्तथा मासैर्वयसा च समन्वितौ । धनलोभवशात्तौ वै दुष्टचित्तेन संगतौ ॥
अचिराच्च मृतौ तत्र गतौ वै यमशासनम् । तद्गेहमुद्वसं जातं ब्राह्मणस्य ततः खग ॥
तेन कर्मविपाकेन नरके पाचितौ भृशम् । पश्चान्मानुषमापन्नौ व्रतदानप्रभावतः ॥
इदं चतुर्थकं जन्म मृतापत्यं खगेश्वर । द्वित्र्यादिमासैर्जातानां[2] मृतिर्द्वित्र्यादिहायनैः ॥
मृतः पुत्रो भवत्यत्र जातोजात स्तथैव च । इदं जीवेदिदं जीवेदित्याशामपि च[3] ब्रुवन् ।

१ नेत्रस्वेदो—खपु० । २ मृत—खपु० ३ । वाप्नुयात्—खपु० ।

ताजाता विनश्यन्ति न कृता तस्य निष्कृतिः।एवं यदि चिरं स्थित्वा नाऽचिरान्म्रियते परम्१५
पुणाश्च सुरूपाश्च ललनाश्चाटुकारिणः । नश्यत्सु जातजातेषु जन्मजन्मसु तेषु च ॥ १६ ॥
ाध्यन्तरे भवेद्व्याधिर्ग्रस्तो व्यसनवानयम् । नास्ति सौख्यलवोऽप्यस्य नानाशङ्कितचेतसः ॥१७॥
मस्ति तथाप्यत्र परापत्त्यानि पश्यतः । लक्षणानि पुरोक्तानि चास्येमान्यपि कीर्तयेत् ॥१८॥
ोदरे म्रियते बालः स वै ब्राह्मण उच्यते । मृतवत्सोद्भवं चिह्नं पूर्ववत्प्रतिपादयेत् ॥ १९ ॥
वंशस्यापि विच्छेदो द्रव्यहानिर्यतस्ततः । दौर्मनस्यं महानाधिः शोकसंघः प्रजायते ॥२०॥
दृष्टगुणलावण्या अदृष्टाननकान्तयः । म्रियन्ते जातमात्रा वै पुत्रा अकृतचाटवः ॥ २१ ॥

एवं तु कर्माणि ज्ञाते प्रायश्चित्तमथाचरेत् ।

अरुण उवाच ।

। तस्य निष्कृतिरिह कर्मपाशनिषूदनी । कथ्यतां दिवसेशान नारीणां हितकाम्यया॥ २२ ॥

श्रीसूर्य उवाच ।

शृणु सूत प्रवक्ष्यामिं मृतवत्सावनाशिनीम् ॥ २३ ॥
ष्कृतिं विधिवत्ताक्ष्यं संततेः सौख्यहेतवे । यजमानः सपत्नीको विधिवद्विधिमाचरेत् ॥ २४ ॥
ऽद्भिः शान्तिसूक्तानि ब्राह्मणैः सहितोऽर्थवित् । सिद्धार्थाक्षतदूर्वाभिः कृतरक्षः प्रतिष्ठितः ॥२५॥
ापयेदौषधैर्मन्त्रैर्वारुणैर्विष्णुसूक्तिभिः । सुदिने सुशुभे देशे गोमयाद्युपलिप्तके ॥ २६ ॥
ोपर्याविकं स्तीर्त्वा कृष्णाजिनमथापि वा । द्रोणमानं तिलानां तु कृष्णवस्त्रेण संयुतम्॥२७॥
ापयेद्राजतं पद्मं तन्मध्ये पलनिर्मितम् । सौवर्णीं प्रतिमां तत्र बालगोपालसंयुताम् ॥ २८ ॥
त्वा प्रतिष्ठितप्राणां मूर्तित्वशुभलक्षणैः । अर्चयेद्गन्धपुष्पाद्यैरुपचारैर्यथाविधि ॥ २९ ॥
म्यक् श्रद्धावती नारी मृतसंततिदुःखिनी । आहूय विदुषो विप्रांस्तथैव वेदवादिनः ॥ ३० ॥
लोलुपान्सदाचारान्संपूज्याऽर्घ्यादिकैश्च तान् । "पूर्वजन्मार्जितं पापं द्रोहमापाद्य बालके ॥३१॥
मिद्रविणहेमाद्यलिप्सया तद्धि नश्यतु । नाशयत्वस्य पापस्य फलं ह्यशुभलक्षणम् ॥ ३२ ॥
तस्तु मम संप्राप्तं मृतसंततिजं चकम् । तस्मान्मोच्या महाभागार्पितगोदानतोषितः ॥" ३३ ॥
ति तं त्रिःपरिक्रम्य प्रार्थयेत विचक्षणा । अग्नेनयेति मन्त्रेण विसृज्य प्रीतमानसा ॥ ३४ ॥
नुं दद्यात्सवत्सां च सहिरण्यां यथाविधि । ब्राह्मणान्भोजयेत्सम्यक् शतं साग्रं यथाविधि॥३५॥
र्पिष्यात्मानमालोक्य भोजयेदिष्टवान्धवान् । इहैव लक्ष्म विज्ञेयं मातृवन्धुमुखोदितम् ॥ ३६ ॥
सुतासुखसौख्यानां संतोषो निजपुत्रवत् । विरुध्यन्तेऽप्यपत्यानि तादृशानि मिथः कियान् ३७
कारो विकृतौ लीयाद्गमने पादवैकृतम् । पैतृजा मातुलान्यां तु कासगुल्मभवा व्यथा ॥ ३८ ॥
तापत्यार्दितस्तस्याः पतिः पापादिभेदतः । तथातथात्र दुःखानि जायन्तेऽस्य मुहुर्मुहुः ॥३९॥

पूर्वकर्मार्जितं पापं चिह्नं तस्य च वर्ष्मणि ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षट्त्रिंशदधिकशततमः ॥ १३६ ॥

श्रीसूर्य उवाच ।

प्राय यो विषं दद्याद्धातार्थं पूर्वजन्मनि । सोऽत्र जन्मनि पक्षीन्द्र च्छर्दिरोगेण बाध्यते ॥ १ ॥
ष्कृतिर्नास्ति तस्यात्र पापस्य दृढकर्मणः । छर्दिरोगेण सततं यूवा नाशमवाप्नुयात् ॥ २ ॥
प्रायश्चित्तं न तस्यात्र दानैरपि सहस्रशः ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्तत्रिंशदधिकशततमः ॥ १३७ ॥

१ निजपुत्रजात्–खपु० ।

श्रीसूर्य उवाच ।

या नारी प्राग्भवे सूत विषं दद्याद्विजातये । छर्दिरोगेण सात्रैव निश्चितं नाशमाप्नुयात ॥
न पापशोधनं प्रोक्तं तस्यास्तु गरुडाग्रज । ब्राह्मणस्य वधात्तस्य प्रायश्चित्तं क्व विद्यते ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोष्टत्रिंशदधिकशततमः ॥ १३८ ॥

श्रीसूर्य उवाच ।

परस्मै या विषं दद्यात्पूर्वजन्मनि मानद । छर्दिरोगेण सात्रैव बाध्यते पीडया मुहुः ॥
धेनूनां दशकं दद्यात्सर्वोपस्करसंयुतम् । मुच्यते च्छर्दिरोगाच्च जन्मन्यत्र पतात्रिण ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकोनचत्वारिंशदधिकशततमः ॥ १३९ ॥

श्रीसूर्य उवाच ।

या काचिन्मागधी ह्यासीज्जाता ब्रह्महृदे सुत । सा चात्र यवनी देशे शुभे पञ्चनदेऽण्डज ॥
पुत्राभिलाषिणी यस्मादभजद्यवनं पुरा । तस्मात्सा यवनी जाता पुत्रसंततिवर्जिता ॥
नानाधनयुता दानात्कुरुक्षेत्रे पुराऽनघ । शिवभक्तिपरा तस्मात्सुखैश्वर्यसमन्विता ॥
अत्र जन्मनि सा चेद्वै विष्णुभक्तिरता भवेत् । तेन पुत्रसुखप्राप्तिर्नान्यथा गरुडाग्रज ॥
मृकोऽत्र जायते जन्तुर्यः पूर्वं भ्रातृघातकः । बभूव कामतः सूत प्रायश्चित्तं न तत्समम् ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चत्वारिंशदधिकशततमः ॥ १४० ॥

श्रीसूर्य उवाच ।

कोटिः कोट्यर्धं लक्षं वा रुद्रपूजनजाद्व्रतात् । पुत्रपौत्रयुता नारी भवत्येव न संशयः ॥
अथवा हरिवंशस्य शतावृत्तेर्विधानतः । श्रवणात्पूर्वजात्पापान्मुच्यते विनतासुत ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकचत्वारिंशदधिकशततमः ॥ १४१ ॥

श्रीसूर्य उवाच ।

देवालयेऽवसत्कश्चिद्ब्राह्मणः पूर्वजन्मनि । विष्णुपूजारतो नित्यं द्रव्यलोभेन चाण्डज ॥
चौर्येणापहृतं द्रव्यं यत्स्थितं देवताश्रये । तेनेदं दुष्कृतं सूत कृतं कर्मातिदारुणम् ॥
स तेन कर्मणा युक्तो भुक्तवान्पापजं फलम् । जातो गङ्गाश्रये क्षत्री पर्वते पूजनाद्धरेः ॥
बहुद्रव्यान्वितो भूपः सर्वसंपत्सुखान्वितः । बाले हि पाण्डुरोगार्तश्चात्र जन्मनि मानवः ॥
देवद्रव्यापहारीति पाण्डुरोगी प्रजायते । तत्पापनाशनं पुण्यमुपायं शृणु तत्त्वतः ॥
कुर्याद्धिरण्मयीं पृथ्वीं ससमुद्रां पलात्मिकाम् । सवनां सागरोपेतां सप्तद्वीपां वसुंधराम् ॥
गन्धपुष्पैरलंकृत्य दद्याद्विप्राय धीमते । पाण्डुरोगाद्विमुक्तः स्यादत्र जन्मनि मानवः ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो द्विचत्वारिंशदधिकशततमः ॥ १४२ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे प्रादाद्विषं कस्यापि काश्यप । सात्र जन्मनि रोगेण च्छर्दिसंज्ञेन पीड्यते
धेनूनां दशकं दद्यादशक्तौ गरुडाग्रज । सवत्सां कपिलां दद्यात्सा तद्दोषाद्विमुच्यते ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्रिचत्वारिंशदधिकशततमः ॥ १४३ ॥

---

१ सा चैव—खपु० ।

श्रीसूर्य उवाच।

कश्चिद्विप्रो ह्यभूदङ्ग प्राग्भवे धर्मसंयुतः। परस्य कन्यायाश्चासावुद्वाहमकरोत्सुधीः ॥ १ ॥
ज्ञानाल्पत्वान्महाभाग चकाराल्पविधानतः। स चचार वने सूत मार्गलुण्ठनतत्परः ॥ २ ॥
काचित्सुनयना सूत प्राप्ता भाविबलात्तदा। नानाभरणयुक्ता सा पूर्णगर्भसमन्विता ॥ ३ ॥
ता लुण्ठिताऽत्र त्रसिता तेन पापधियाण्डज। सहायैः सा परित्यक्ता ताडनादाकुला भृशम् ॥४॥
तद्गर्भाद्वै च्युतौ पुत्रौ पापमाचिरितं त्विदम्। ततो धर्मपुरं प्राप्तः पुण्यपापसमन्वितः ॥ ५ ॥
पुण्यात्पुण्यफलं भुक्त्वा पापात्पापं पतत्रिण। परकन्याविवाहेन स जातो बाहुजोऽधुना ॥ ६ ॥
गङ्गायाः पूर्वभागे तु दशयोजनसंमिते। गौरस्वरूपः क्षीणाङ्गो बहुद्रव्यपराक्रमः ॥ ७ ॥
पित्ताधिकोऽतिमतिमान्बहुपुत्रीभिरन्वितः। जातपुत्रैर्मृतैस्तत्र पूर्वपापात्तथाण्डज ॥ ८ ॥
विन्मयं तत्प्रवक्ष्यामि येन पापात्प्रमुच्यते। पलार्धार्धमितेनैव कार्या सुघटिता सुत ॥ ९ ॥
बाहुजा गर्भसंयुक्ता सौवर्णी भूषणान्विता। पूर्वपापविनाशाय सा देया ब्राह्मणाय वै ॥ १० ॥
गन्धैः पुष्पैः समभ्यर्च्य मन्त्रैः प्रणवपूर्वकैः। वेधसं तत्र सौवर्णं सुवर्णैकमितं शुभम् ॥ ११ ॥
दद्याज्जपेच्च मन्त्रांश्च तल्लिङ्गान्विधिपूर्वकम्। होमयेच्च यवांस्तत्र युतांस्तण्डुलसर्षपैः ॥ १२ ॥
ब्राह्मणान्भोजयेत्पश्चात्तेभ्यो दद्याच्च दक्षिणाम्। शृणुयाद्धरिवंशं वा शतावृत्त्या विधानतः ॥ १३ ॥
गायत्र्यष्टशतं जप्त्वा तस्माद्दोषात्प्रमुच्यते। तस्मात्पुत्रसुखं लाभश्चात्र जन्मनि वै ध्रुवम् ॥१४॥
अरिष्टं पञ्चाशद्वब्दे तु प्रायश्चित्तेऽकृते सुत। वेदसप्तमितायुः स्यात्प्रायश्चित्ते कृतेऽत्र वै ॥ १५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुश्चत्वारिंशदधिकशततमः ॥ १४४ ॥

श्रीसूर्य उवाच।

व्यभिचाररता पूर्वं यात्रापि व्यभिचारिणी। साऽऽगता नरकाद्घोरादसती पापजाण्डज ॥ १ ॥
न शुध्यत्यशुभाचारा प्रायश्चित्तैः शतैरपि। वाराणस्यां गतिश्चास्या वासोऽत्र विनतासुत ॥ २॥
मुच्यते सर्वपापाच्च पूर्वजन्मकृताद्दृढात्। वाराणस्यां चतुर्दश्यां शिवपूजनजाद्व्रतात् ॥ ३ ॥
बाहुजेयं महाभाग पूर्वेऽप्यत्रापि बाहुजा। वन्ध्या प्राग्जायते दुःखाकुला साऽत्रापि पक्षिराट् ॥४॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचचत्वारिंशदधिकशततमः ॥ १४५ ॥

श्रीसूर्य उवाच।

यः कृत्वा धूर्ततां पूर्वं वञ्चयेद् ब्राह्मणं सुत। सोऽत्रापस्माररोगेण पीड्यते बहुपीडया ॥ १ ॥
तेनैव पापरोगेण म्रियतेऽत्र पतत्रिण। प्रायश्चित्तं मया नोक्तं पापे ब्राह्मणवंचने ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षट्चत्वारिंशदधिकशततमः ॥ १४६ ॥

श्रीसूर्य उवाच।

या भ्रातृघातिनी नारी प्राग्भवे विनता सुत। सात्र जन्मनि मूकत्वं भजत्येव न संशयः ॥ १ ॥
ज्ञानान्महापापकृतान्न चोक्ता निष्कृतिर्मया। ज्ञात्वा ब्रह्मवधे सूत प्रायश्चित्तं न तत्समम् ॥ २ ॥
सप्तजन्मनि मूकत्वं जायते महदेनसः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्तचत्वारिंशदधिकशततमः ॥ १४७ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यसौ विप्रश्चात्र जन्मनि वाहुजः । देवद्रव्यापहरणात्प्रागत्राऽक्षिप्रपीडनम् ॥ १
विंशद्वर्षे व्यतीते च नेत्ररोगः प्रजायते । तद्रक्षार्थमहं वक्ष्ये दानं पापहरं परम् ॥ २
कृत्वा देवगृहं रम्यं प्रतिष्ठाप्य सुराधिपम् । गन्धपुष्पैः समभ्यर्च्य दीपा देयाः सुवर्णजाः ॥ ३
राजताश्च महाभाग नेत्ररोगं न पश्यति । भोजयेच्छक्तितो विप्रान्वैष्णवाञ्छ्रद्धया सुत ॥ ४
कृत्वाऽनेन विधानेन रिष्टं नैव प्रपश्यति ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोऽष्टचत्वारिंशदधिकशततमः ॥ १४८ ॥

श्रीसूर्य उवाच ।

सर्वस्नेहहरः कश्चिद्योऽभवत्पूर्वजन्मनि । सोऽत्र जन्मनि जायेत क्षयरोगसमन्वितः ॥ १
प्रायश्चित्तं परं तस्य वित्ततुर्यांशभागतः । कालचक्राभिधं दानं दद्याद्दोषोपशान्तये ॥ २
ब्राह्मणान्भोजयेत्पश्चाद्धोमयेच्च स्वशक्तितः । कालचक्राख्यदानेन रोगा नश्यन्ति पापजाः ॥ ३

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायं एकोनपंचाशदधिकशततमः ॥ १४९ ॥

श्रीसूर्य उवाच ।

ब्रह्मवादरता ह्यत्र या पूर्वेऽभूत्पतिव्रता । पतिपापप्रभावात्तु गतिं प्राप्य हि मानुषीम् ॥ १
त्यक्त्वा शरीरं सा देवी पार्वत्या सह मोदते । भुनक्ति भोगान्सर्वान्वै पतिं प्राप्य तपस्विनी ॥ २
गच्छेत्सा परमं स्थानं यत्र देवो महेश्वरः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचाशदधिकशततमः ॥ १५० ॥

श्रीसूर्य उवाच ।

यो ज्ञानात्कृतवान्सूत प्राग्भवे भ्रातृघातनम् । सोऽत्र जन्मनि मूकत्वं लभते क्वापि मानवः ॥ १
चान्द्रायणव्रतं कुर्याद्विधिवत्पापशोधनम् । पुस्तकं च तथा दद्यात्सुवर्णपलसंयुतम् ॥ २
एवं यः कुरुते सूत स तत्पापात्प्रमुच्यते । न जायतेऽत्र मूकत्वं कदाचिद्विनतासुत ॥ ३

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायएकपंचाशदधिकशततमः ॥ १५१ ॥

श्रीसूर्य उवाच ।

या धूर्ता वञ्चयेत्क्वापि लोभात्पूर्वभवेऽण्डज । साऽत्र जन्मनि रोगेणाऽपस्मारेण प्रपीडिता ॥ १
प्रायश्चित्तं प्रवक्ष्यामि पापनाशकरं सुत । ब्रह्मकूर्चत्रयं कुर्याद्दद्याद्धेनुं पयस्विनीम् ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो द्विपंचाशदधिकशततमः ॥ १५२ ॥

अरुण उवाच ।

कश्चिद्द्विजोत्तमो जातो धर्मिष्ठो वित्तसंयुतः । उदरे वायुरल्पीयाञ्छिरोऽर्तिश्च प्रजायते ॥ १
शरीरे जायते चिह्नं किंचिद्वर्णसमन्वितम् । दट्टकण्डूकिलासानां गमने पादवैकृतिः ॥ २
कर्मानुसारतो व्याधिचिह्नं तस्य सहायितम् । भार्या प्रीतिपरा नित्यं कदाचित्कलहप्रिया ॥ ३
रोषयुक्ता मिताहारा प्रदरार्तिः प्रजायते । मृतवत्सा कथं जाता कस्येदं कर्मणः फलम् ॥ ४

श्रीसूर्य उवाच ।

स्वस्त्रिया सहितो विप्रः कुलीनो वहुयाचकः । गतश्चैव महारण्येऽवर्तत गर्भसंयुता ॥ ५
वहवोऽन्ये समायाताः शत्रुभिः परिवेष्टिता । तत्र भीता तदा स्त्रीणां त्रस्यन्ती च महावने ॥ ६

गर्भपातोऽभवत्तत्र सत्वरं च ततो मृतः। तेन कर्मविपाकेन म्रियन्तेऽस्या हि बालकाः ॥ ७ ॥
केचिज्जीवन्ति षण्मासं केचिद्वर्षाधिकं सुत। बहुकालो भवेत्किञ्चिन्मृतिचिह्नं प्रजायते ॥ ८ ॥

अरुण उवाच।

देवदेवं जगन्नाथ लोकानां हितकाम्यया। कथयस्व प्रसादेन कर्मणस्तस्य निष्कृतिम् ॥ ९ ॥

श्रीसूर्य उवाच।

साधु पृष्टं महाबाहो प्रश्न एष सुदुर्लभः। तेनेदं मुनिभिः प्रोक्तं प्रायश्चित्ताघनाशनम् ॥ १० ॥
गोत्रयं वै सुवर्णार्द्धं सौवर्णं निष्कसंयुतम्। पुष्पितं फलितं वृक्षं वस्त्रयुग्मं गुरोरपि ॥ ११ ॥
कर्मप्रकाशकं विप्रं पूजयेद्विधिपूर्वकम्। एवं प्रकुरुते वत्स निष्कृतिस्तस्य कर्मणः ॥ १२ ॥
पुत्रपौत्रादिसंयुक्तो धनधान्यसमन्वितः। न करोति च यो मोहाल्लोभाद्वा कर्मनिष्कृतिम् ॥ १३ ॥
स याति पापदोषेण भूमिं जन्मनिजन्मनि। एवं यः कुरुते भक्त्या प्राप्नोति पुत्रपौत्रकम् ॥ १४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्रिपंचाशदधिकशततमः ॥ १५३ ॥

श्रीसूर्य उवाच।

पूर्वजन्मन्यभूत्काचिन्नारी भर्तृप्रियान्विता। दक्षा सर्वक्रियास्वेव बहुदानप्रदायिका ॥ १ ॥
पार्श्वस्थस्य च शूद्रस्य गृहान्नीतानि मानद। सर्वस्नेहानि चौर्येण सर्वशून्यगृहात्पुरा ॥ २ ॥
भुक्तानि बहुभिः सूत मिलित्वा च सुतादिकैः। पूर्वजन्मकृतात्सर्वं कर्मणोऽत्रैव जन्मनि ॥ ३ ॥
सा जाता बाहुजा नारी धनभोगसमन्विता। पुत्रान्विता विचित्रा च भर्तुः शुश्रूषणे रता ॥ ४ ॥
क्षयरोगाकुला जाता तथा स्नेहहरा यतः। निष्कृतिं चास्य पक्षीन्द्र पूर्वपापौघनाशनीम् ॥ ५ ॥
कथयामि प्रयत्नेन वित्ततुर्यांशभागतः। कृत्वा तु कदलीं रम्यां पत्रयुक्तां सुवर्णजाम् ॥ ६ ॥
दद्याद्विद्विविधिज्ञाय क्षयदोषोपशान्तये।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुःपंचाशदधिकशततमः ॥ १५४ ॥

श्रीसूर्य उवाच।

यो लोकान्वञ्चयेत्काश्चित्पुरा धूर्तस्तु कर्मणा। सोऽत्र जन्मन्यपस्माररोगेण महताकुलः ॥ १ ॥
धेनुं दद्यान्महाभाग सवत्सां विधिसंयुताम्। ब्रह्मकूर्चत्रयं कुर्यात्तस्मात्पापात्प्रमुच्यते ॥ २ ॥
न भवेत्तस्य रोगस्य वेदना पापशोधनात्।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचपंचाशदधिकशततमः ॥ १५५ ॥

श्रीसूर्य उवाच।

अस्त्यत्र चन्द्रवदना गौराङ्गी पतिवल्लभा। धनधान्यसमायुक्ता स्वर्णकारी सुखान्विता ॥ १ ॥
दक्षा भर्तृहिते नित्यं पूर्वं सा द्विजवल्लभा। स्वर्णापहारजात्पापादत्र सा स्वर्णकारजा ॥ २ ॥
पुत्रहीना महाभाग परद्रव्यापहारणात्। कुरुक्षेत्रे शशिग्रस्ते स्वर्णं दद्याच्च शक्तितः ॥ ३ ॥
तद्दत्त्वाशु लभेत्पुत्रानत्र जन्मनि वै सुत।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षट्पंचाशदधिकशततमः ॥ १५६ ॥

श्रीसूर्य उवाच।

बालघाती भवेद्यस्तु पूर्वजन्मनि मानवः। वैनतेयात्र जनुषि मृतपुत्रः प्रजायते ॥ १ ॥

१ अध्यायोऽयं नास्ति–खपु० ।

श्रवणाद्धरिवंशस्य विधिवच्चात्र जन्मनि । ब्राह्मणोद्वाहनाच्चैव पूजनाच्छङ्करस्य च ॥ २
जीविष्यन्ति च तत्पुत्रा नात्र कार्या विचारणा ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्तपंचाशदधिकशततमः ॥ १५७ ॥

श्रीसूर्य उवाच ।

शूकरे याऽभवत्पूर्वं निषादी पुनरेव सा । शूद्राधमा पञ्चनदे जातात्र विनतासुत ॥ १
पुत्रपौत्रधनैर्धान्यैर्गजाश्वोष्ट्रादिवाहनैः । युक्ता सा यवनी सूत तीर्थराजस्य सेवनात् ॥ २
भर्तृसङ्गयुता पूर्वं पूर्वं तद्धितवाञ्छनात् । यवनी पूर्वपापाच्च तत्र तस्योपसेवनात् ॥ ३

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोऽष्टपंचाशदधिकशततमः ॥ १५८ ॥

श्रीसूर्य उवाच ।

कश्चित्प्रागभवद्विप्रः सर्वविद्याविशारदः । वेदाभ्यासरतः श्रीमान्प्राप्तसर्वमनोरथः ॥ १
तुलाधृतानि स्नेहानि विप्राणां स्नेहभागिनाम् । गृहीतवान्स चौर्येण लोभोपहतचेतसा ॥ २
यस्माद्दानकृतं चैव प्राग्भवे तत्फलं शृणु । सोऽत्र विप्रः प्रयागेऽस्ति द्विजो वेदविदां वरः ॥ ३
धनपुत्रसमायुक्तः क्षयरोगसमन्वितः । वेदाभ्यासात्तथा दानात्तीर्थेषु च प्रयत्नतः ॥ ४
सौ देयात्र विधिज्ञाय मन्त्रमुच्चारयन्निमम् । ब्रह्मणा निर्मिता देवी पापमाचरितं मया ॥ ५
तत्पापशमनायैव त्वां ददेऽहं हिरण्मयीम् । ब्राह्मणाय महाभाग पापं गच्छति तद् भृशम् ॥ ६
सोमं च राजतं दद्यात्तन्मानं पापशान्तये । लक्ष्मीनारायणं चापि हैमं सौवर्णसंमितम् ॥ ७
गायत्र्यष्टसहस्रं तु त्र्यम्बकं तन्मितं जपेत् । मन्त्रमष्टाक्षरं तद्वज्जप्त्वा शुद्धिमवाप्नुयात् ॥ ८
होमयेत्तद्दशांशेन तिलाज्यवयवतण्डुलैः । ब्राह्मणान्भोजयेत्पश्चात्पूजयेच्च विधानतः ॥ ९
लक्षरुद्रं त्रिगुणितं नानाविभवविस्तरैः । पूजयेद्वा विधानेन तस्मात्पापात्प्रमुच्यते ॥ १०
य एवं विधिना सूत प्रायश्चित्तं समाचरेत् । तस्य संततिवृद्धिः स्यान्नात्र कार्या विचारणा॥ ११
ब्रह्मलोकमवाप्नोति पूर्वपापविशोधनात् । प्रायश्चित्तेऽकृते रिष्टं वर्षं षष्टिमिते ध्रुवम् ॥ १२
आयुर्नवतिवर्षान्तमत्र पापविशोधनात् । प्रायश्चित्तं द्वयोरेकं न कुर्याल्लोभमोहितः ॥ १३
न भवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः । न च सद्गतिमाप्नोति पापस्यास्य प्रभावतः ॥१४
जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् । अष्टाक्षरं त्रिसाहस्रं जप्त्वा शुद्धिमवाप्नुयात् ॥१५
होमयेत्तद्दशांशेन शतं विप्रांश्च भोजयेत् । शृणुयाद्धरिवंशं वा दशावृत्त्या विधानतः ॥ १६
य एवं कुरुते सूत द्वयोः पापविशोधनम् । तस्य पुत्रविवृद्धिः स्यात्स्त्रीभ्यामत्रैव जन्मनि॥१७
नाधयो व्याधयस्तस्य न चारिष्टभयं क्वचित् । नैवं करोति यो मोहाल्लोभात्पापविशोधनम् ॥१८
न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः । पञ्चत्रिंशन्मिते वर्षे रिष्टं देहधनान्तकम् ॥ १९
त्रिसप्ततिमिताब्दायुः प्रायश्चित्ते कृतेऽधुना । गतिमप्युत्तमां याति त्वन्यथा ह्याततायिनाम्॥२०
जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् । नाशः स्यात्क्षयरोगस्य चात्र जन्मनि चाण्डज॥२१
दोषात्स्वल्पात्फलैर्युक्तो जीवेद्वर्षशतं ध्रुवम् ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकोनषष्ट्यधिकशततमः ॥ १५९ ॥

श्रीसूर्य उवाच ।

बभूव ब्राह्मणः कश्चिद्वङ्गदेशे वसन्सुधीः । धर्मशास्त्रक्रियायुक्तो धनपुत्रादिसंयुतः ॥ १
दत्तानि तेन विप्रेभ्यो दानान्यल्पानि शक्तितः । सत्पात्रेभ्यः परं सूत पर्वस्वपि विधानतः ॥ २

१ तुला ।

पापमाचरितं तेन कामलोभेन चाण्डज। ब्राह्मण्यां धारितो गर्भो भाविनोऽर्थस्य गौरवात् ॥ ३ ॥
स्त्रीसाहाय्यात्तथा तत्र कृतं तद्गर्भपातनम्। सा मृता तेन दुःखेन गर्भपातोद्भवेन च ॥ ४ ॥
एवं किंचिद्गते काले स प्राप्तो यमशासनम्। भुक्त्वा पापाच्च नरकं पुण्यात्स्वर्गांश्च शाश्वतान् ॥५॥
पूर्वपुण्यप्रभावेन स जातो ब्राह्मणाद्यः। यमुनायां महाभाग गौरः पित्ताधिको घृणी ॥ ६ ॥
धनमित्रसुखैश्वर्यमतिस्त्रीभोगभाग्नरः। दक्षः कार्येषु चार्वङ्गो धर्मिष्ठो लाभसंयुतः ॥ ७ ॥
मानी यशस्वी पुरुषः कान्तिमान्प्रियभाषणः। पुण्यादिदं तथा पापाल्लोभात्पापरतः[1] क्वचित् ॥८॥
धूर्तः शठः क्रोधपरो धनवृद्धिक्षयान्वितः। चिन्तातुरः पापशेषादत्राप्राप्तमनोरथः ॥ ९ ॥
ब्राह्मण्यां वीर्यदानात्प्राक् तथा तद्गर्भपातनात्। अत्र पञ्चाशदब्दान्ते जातपुत्रविनाशकः ॥ १० ॥
चिद्रमङ्गगृहे सूत चन्द्रः सूर्यगृहाश्रितः। पापाभ्यां पुत्रभावेऽपि समाक्रान्तेऽत्र जन्मनि ॥ ११ ॥
स्त्री सहाया तथा पूर्वं सात्र संततिदुःखिता। लक्षणैरेभिराद्यस्य प्रायश्चित्तं वदाम्यहम् ॥ १२ ॥
कार्यात्र ब्राह्मणी लेख्या सुवर्णाष्टपलैर्मिता। तदर्धार्धमिता वापि त्रिषु वित्तानुसारतः ॥ १३ ॥
पात्रे गर्भान्वितां भव्यां बहुभूषणसंयुताम्। गन्धपुष्पाक्षतैर्धूपैर्वस्त्रैः पूजां समाचरेत् ॥ १४ ॥
एवं कृत्वा यथा पक्षिन्गर्भपापात्प्रमुच्यते।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षष्ट्यधिकशततमः ॥ १६० ॥

अरुण उवाच।

कथयस्व दिवानाथ लोकानां हितकाम्यया। पृच्छामि तेऽत्र देवेश च्छिन्धि मे सर्वसंशयान् ॥१॥
जात्युत्तमानां जनुषि सदा संपत्तयः शुभाः। पूर्वजन्मनि पुण्यत्वात्सुखसंपत्समन्वितः ॥ २ ॥
बन्धूनामतिसौख्यं च वैष्णवी मतिरत्र च। जातसंततिदुःखार्तः कस्येदं कर्मणः फलम् ॥ ३ ॥

श्रीसूर्य उवाच।

ब्राह्मणी गर्भयुक्ता च प्रयाणे भर्तृसंयुता। सर्वाभरणभूषाढ्या नानारत्नसमन्विता ॥ ४ ॥
बहुभिस्सार्धमेतेन तस्या आभरणं हृतम्। तत्र कोलाहलो जातो गर्भपातोऽभवत्तदा ॥ ५ ॥
तेन पापेन बालानां गर्भनाशः प्रजायते।

अरुण उवाच।

का तस्य निष्कृतिः स्वामिन् येन पापं क्षयं व्रियात् ॥ ६ ॥
एतद्धि विस्तराद्ब्रूहि लोकानां हितकाम्यया।

श्रीसूर्य उवाच।

एकवासा विधिं कुर्याल्लक्षपूजां ततः परम् ॥ ७ ॥
सगर्भा गौः प्रदातव्या भोजनं शतसंमितम्। गर्भाशयगतो गर्भो निषेकः समयादनु ॥ ८ ॥
पञ्चमे वाथ षष्ठे वा मासि पातः स्रवश्च यः। तयोः कर्मविशेषांश्च कथयिष्यामि योषिताम् ॥ ९ ॥
सा चापि मृतकल्पा स्यादुत्पन्नैः सूतिकामयैः। शोकदामोदरे ढोपः शूलं गौरवकम्पनम् ॥ १०॥
रक्तस्रावाद् विवर्णाऽस्माज्जायते कर्मणेरितात्। रजस्तस्याः पलाभ्यां तु कोशं गर्भाशयाकृतिम् ११
कुसुम्भैर्वेष्टितं तेन रक्तवस्त्रेण वेष्टयेत्। मधुना पूरयेत्तत्र शलाका रूप्यवर्तिता ॥ १२ ॥
तन्मध्ये हेमशकलान् क्षिपेत्तदपि यत्नतः। दद्याद्विप्राय विधिवद्यथाश्रुतिनिरूपितम् ॥ १३ ॥

---

१ पापरतो—खपु०।

"यन्मया पूर्वतः स्वामिन् गर्भपातः कृतो हि यः। एतद्दानं विशुद्ध्यर्थं गर्भकोशं ददाम्यहम्॥१४।
मया मूढेन यद्वेतोर्निषिद्धाचरणं कृतम्। ततोऽनपत्यत्वं प्राप्तं तस्मान्मां मोचय प्रभो" ॥१५।
एवं कृतविधेः सूत गर्भपाताघनाशनम्। ब्राह्मणान्भोजयेत्सम्यग्गां दद्याच्च सवत्सकाम् ॥ १६ ।
सर्पिष्यात्मानमालोक्य भुंजीत सह बंधुभिः।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकषष्ट्यधिकशततमः ॥ १६१ ॥

श्रीसूर्य उवाच ।

यो नारी घातयेत्कंचित्पुरुषं प्राग्भवेऽण्डज। साऽत्र जन्मनि रोगेण शूलेनैव प्रपीड्यते ॥ १ ।
सुवर्णदानाद्विधिवत्तथा रुद्रजपादिह। पूजनाच्छङ्करस्यापि शूलरोगाद्विमुच्यते ॥ २ ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो द्विषष्ट्यधिकशततमः ॥ १६२ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि योऽज्ञानान्नरो वै घातयेत्सुत। मित्रं च वायुरोगेण पीड्यते चात्र जन्मनि ॥ १ ।
तत्र कुर्यान्महाबाहो मन्त्रैस्तद्वायुदैवतैः। पूजनं वायुदेवस्य गन्धपुष्पैश्च धूपकैः ॥ २ ।
नैवेद्यैर्बहुभक्ष्यैश्च वायुर्नश्यति तत्क्षणात्। इह जन्मनि पक्षीन्द्र पूजा वित्तानुसारतः ॥ ३ ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्रिषष्ट्यधिकशततमः ॥ १६३ ॥

श्रीसूर्य उवाच ।

गोत्रघातकरी या च पुरा ज्ञानेन काश्यप। सात्र जन्मनि लूताढ्या भवत्येव मयोदितम् ॥ १ ॥
तीर्थस्नानव्रतादीनि निष्फलान्यत्र चाण्डज। ज्ञानपूर्वं कृतात्पापाद्रोगादेवक्षयो भवेत् ॥ २ ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुःषष्ट्यधिकशततमः ॥ १६४ ॥

श्रीसूर्य उवाच ।

कश्चिच्छूद्रो महाभाग बभूव प्राग्भवे धनी। व्यापारनिरतो दक्षः क्रयविक्रयकर्मसु ॥ १
नीतं स्नेहं तथा तेन मिलित्वा चार्धसीरिणाम्। लोभात्कालेन तस्मिन्वै स्नेहे मौल्याधिके सुत॥२
शेषंपापफलाद्घोराद्भरत्वमुपागतः। ततः पुण्याच्छुभान्भुक्त्वा पुण्याज्जातोऽत्र पर्वते ॥ ३
शूद्रः पुण्यकलायुक्तो भूमिदानात्सुरार्चनात्। स्नेहहारी यतः पूर्वं राजयक्ष्मप्रपीडितः ॥ ४
सर्वस्नेहातिदानाद्वै स्ववित्ततुर्यभागतः। स्वर्णदानात्तथा चात्र क्षयरोगाद्विमुच्यते ॥ ५

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचषष्ट्यधिकशततमः ॥ १६५ ॥

श्रीसूर्य उवाच ।

विषं दत्त्वा पतिं सूत प्राग्या जाराश्रिताऽसती। पतिघ्नी सा महादुष्टा बाल्येऽत्र विधवा सुत ॥ १
विष्णोराराधनादेव गङ्गाया उपसेवनात्। गतिं शुभां सा प्राप्नोति व्रतकृच्छ्रोपसेवनात् ॥ २
धर्मादत्र महाभाग परत्र च शुभा गतिः।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षट्षष्ट्यधिकशततमः ॥ १६६ ॥

---

१ अध्यायोऽयं नास्ति—खपु० । २ भुक्त्वा पापफलान् घोरात्—खपु० । सदार्चनात्—खपु० ।

श्रीसूर्य उवाच।

देवागारं दहेद्यस्तु प्राग्जन्मन्यथ पुत्रक । रक्तातिसाररोगेण बाध्यतेऽत्रैव जन्मनि ॥ १ ॥
तदेयदानाद्विप्राय स्थापनाद्वा विधानतः । मुच्यते पापजाद्रोगादतिसाराद्विनिश्चितम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्तषष्ट्यधिकशततमः ॥ १६७ ॥

श्रीसूर्य उवाच।

मूर्धाभिषिक्तो यः कश्चिन्मथुरायामभूत्सुधीः । राजसेवी महाशूर आखेटकरतः सदा ॥ १ ॥
मृगयायां गतो दैवाद्धातिता मृगसूकराः । तत्रैका हरिणी सूत घातिता गर्भसंयुता ॥ २ ॥
गर्भस्थौ हतौ तत्र शुभौ द्वौ मृगशावकौ । सहायाभ्यां युतेनैव कृतं कर्मातिदारुणम् ॥ ३ ॥
ताभ्यां मिलित्वा तौ भुक्तावमायां चाण्डजाधिप । सोऽपि काले महाभाग प्राप्तः शत्रुवशं पुरा४॥
स शौर्यकर्मणा सूत घातयित्वा रिपून् बहून् । घातितः सोऽपि बहुभिः प्रहारैरतिदारुणैः ॥ ५ ॥
संग्रामभूमौ स मृतः प्राप्तः स्वर्गपुरं तदा । भुक्त्वा नानाविधान्भोगान्स जातो ब्राह्मणोऽधुना॥ ६ ॥
देशे प्रयागनिकटे सर्वशास्त्रार्थकोविदः । जातः कर्कटगे जीवे लग्नस्थे हि महातपाः ॥ ७ ॥
धनैर्नानाविधैर्युक्तो गौराङ्गो रक्तलोचनः । शिवपूजनजात्पुण्यात्प्राक्कृतात्सकलैः सुखैः ॥ ८ ॥
नानामनोरथैश्चापि पूर्णश्चात्रैव जन्मनि । राज्यप्रचार्यत्युग्रश्च पुण्यात्पापात्फलं शृणु ॥ ९ ॥
धूर्तः शठः सर्वभक्षः स्वल्पपापरतः क्वचित् । सहायलक्षणमतः शृणु पुत्र यथा तथा ॥ १० ॥
याभ्यां मिलित्वा भुक्तौ द्वौ मृगशावौ खगाधिप । पृच्छकस्य च तौ पुत्रावुभौ ज्येष्ठकनिष्ठकौ ११
ह्यपस्मारेण रोगेण मृतौ चात्रैव जन्मनि । एवं संततिदुखार्तः स विप्रो विधिवर्जनात् ॥ १२ ॥
मांसभोजनपापस्य प्रायश्चित्तं वदाम्यहम् । पूजयेच्छिवलक्षं तु तदर्धं वा तदर्धकम् ॥ १३ ॥
हिरण्मयौ तथा देयौ द्वावत्र मृगशावकौ । पूजयेच्च तथा वायुं विधिना मृगदैवतम् ॥ १४ ॥
तन्मन्त्रैर्धूपगन्धाद्यैर्नानाभक्ष्यैर्विधानतः । प्रायश्चित्तवियुक्तस्य न च पुत्रसुखं भवेत् ॥ १५ ॥
रिष्टेन मरणं चापि वर्षे वेदाब्धिकेऽण्डज । प्रायश्चित्ते कृते तस्य जीवनं पञ्चसप्ततिम् ॥ १६ ॥
चैत्राष्टम्यां च निधनं शुक्लायां गरुडाग्रज ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोऽष्टषष्ट्यधिकशततमः ॥ १६८ ॥

श्रीसूर्य उवाच।

गर्भपातनपापाढ्या बभूव प्राग्भवेऽण्डज । साऽत्रेयं तेन पापेन गर्भपातनदुःखिनी ॥ १ ॥
विप्रकन्याविवाहाद्वै विधिवच्चात्र जन्मनि । मुच्यते तेन पापेन गर्भस्थैर्यं भवेदिह ॥ २ ॥
अथवा पार्वतीं दद्यादेवीं दशसुवर्णजाम् । युक्तां गणेशस्कन्दाभ्यां नानाभरणभूषिताम् ॥ ३ ॥
तदर्धार्धमितां वापि पूजयित्वा विधानतः । मुच्यते पूर्वपापाच्च गर्भपातनजात्सुत ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकोनसप्तत्यधिकशततमः ॥ १६९ ॥

श्रीसूर्य उवाच।

या काचिद्दाहयेन्नारी देवागारं पतत्रिण । साऽतिसारेण महता पीडया पीडयतेऽधुना ॥ १ ॥
शङ्करप्रतिमादानान्मूर्तेर्विष्णोश्च दानतः । न जायते महापीडा रक्तातीसारसंभवा ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्तत्यधिकशततमः ॥ १७० ॥

श्रीसूर्य उवाच ।

ब्रह्महा प्राग्भवे सूत तिर्यक्त्वं प्राप्य निश्चयात् । नरकान्दारुणांश्चैव जायतेऽत्रैव जन्मनि ॥ १
कर्मक्षयेऽतिकुष्ठेन ह्यस्मि न्वयसि पीडितः ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकसप्तत्यधिकशततमः ॥ १७१ ॥

श्रीसूर्य उवाच ।

या काचिद्भातयेन्नारी पतेर्मित्रं च प्राग्भवे । नियतं वायुरोगेण पीडयते बहुपीडया ॥ १
पापं प्रतीक्ष्य विप्रादेः सर्वस्वार्धार्धजेन च । वायुं हिरण्मयं कुर्यान्मृगं विहितलक्षणम् ॥ २
पूजयित्वा विधानेन गन्धैर्वस्त्रैर्विशेषतः । मन्त्रैश्च वायुजैः सूत दद्याद्विप्राय धीमते ॥ ३
वायुरोगोपशमनं दानेनानेन जायते ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो द्विसप्तत्यधिकशततमः ॥ १७२ ॥

श्रीसूर्य उवाच ।

अज्ञानादथ या नारी गोत्रघातकरी पुरा । बभूव सततं चात्र लूतरोगप्रपीडिता ॥ १
श्रवणादितिहासानां प्राजापत्यव्रतात्सुत । लूतरोगं न पश्येत्तु सात्र जन्मनि चाण्डज ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्रिसप्तत्यधिकशततमः ॥ १७३ ॥

अरुण उवाच ।

भूमिदेवकुलोत्पन्नः किंचिद्वित्तसमन्वितः । संयुतो वायुपित्ताभ्यां नेत्रखेदः शिरोर्तिमान् ॥ १
सद्वृत्तश्च सुखी धीमान् धर्मिष्ठो धर्मवत्सलः । व्रणो रेखाशिरा वापि बाल्ये स्याद्ग्रहणीगदः ॥ २
कण्ठपृष्ठाभिघाताढ्यो व्रणो वाताग्निदर्शनम् । परोक्षमपवादं च ब्रुवते कारणं विना ॥
तस्य प्रिया शुभाचारा सती व्रतपरायणा । काकवन्ध्या कथं जाता कस्येदं कर्मणः फलम् ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि वैश्योऽयं भार्या विप्रस्य सात्त्विकी । यातौ वेश्म तदा तस्य ब्राह्मणो ज्ञानसत्तमः
अप्रसूता प्रिया तस्य चपला चारुलक्षणा । वैश्येन कथयित्वा तु लोभमोहादिविभ्रमैः ॥
अज्ञानात्कामयिच्छन्ती बभूवाऽथ बलीयसा । तावत्कालवशेनैव ब्राह्मणो जनिताऽधवान् ॥
स वैश्यो दैवयोगाच्च भाविनोऽर्थस्य वै बलात् । तां तथा धर्षयामास बहुकालं खगेश्वर ॥
व्यभिचारवशात्तत्र अन्यतस्तद्धृतं धनम् । गृहीतं तद्धनं तेन धूर्तया लोभचेतसा ॥
ब्राह्मणी निधनं प्राप्ता लोके विस्तार्य विश्रुतिम् । तेन दुःखेन विप्रोऽसौ ब्राह्मणीं चात्यजत्पुरा
निर्वंशोऽभूत्तदा तत्र ब्राह्मणश्च खगेश्वर । तेन कर्मविपाकेन तादृशं च भवेदिह ॥
पश्चान्मानुषमापन्नो बहुशोकाकुलो भृशम् । इदं द्वितीयं जन्मास्य ब्रह्मवंशसमुद्भवम् ॥
प्राप्यते चानपत्यत्वमेकापत्यत्वमत्र च ।

अरुण उवाच ।

प्रायश्चित्तं कथं स्वामिन्येन वन्ध्यत्वनाशनम् । एकापत्यभवं दुःखमनपत्यभवं तथा ॥

१ अध्यायोऽयं नास्ति—खपु० । २ समृद्धश्च—खपु० । ३ रेखाशिरो वापि—खपु० ।

श्रीसूर्य उवाच ।

मार्गशीर्षे शुभे मासि शुक्लपक्षादितः खग ॥ १० ॥
प्रत्यक्षं सुतसौख्याप्तिव्रतं तु प्रतिवासरम् । षोडशाब्दानि नारीणां कर्तव्यं विधिपूर्वकम् ॥ ११॥
गौरीव्रतमिदं दीप्तं सुतसौख्यफलप्रदम् । प्रातर्नियममास्थाय दन्तधावनपूर्वकम् ॥ १२ ॥
अद्याहं शिवयोः प्रीतिमाचरिष्ये शुभव्रतम् । स्थाप्योपवासनिरता निशि जागरतत्परा ॥ १३ ॥
ततो मध्याह्नसमये स्नात्वा कुंकुमवाससी । परिधायार्चयेद्गौरीं पतिपुत्रवतीः स्त्रियः ॥ १४ ॥
कुंकुमैः कज्जलैरेभिः करणैः पुष्पमालया । ताम्बूलैस्तु सकर्पूरैः सौभाग्याष्टकवस्तुभिः ॥ १५ ॥
ततश्चास्तमिते भानौ वर्तिं षोडशतन्तुभिः । विधाय तिलतैलेन दीपं कुर्याच्छिवाग्रतः ॥ १६ ॥
गीतवादित्रनिर्घोषैः पुराणश्रवणादिभिः । नैवेद्यं विधिवद्दद्यादपूपातिलतण्डुलैः ॥ १७ ॥
तथा षोडशसंख्यानि शूर्पाणि वैणवानि च । पतिपुत्रसुखायैव पूजयन्ती गिरेः सुताम् ॥ १८ ॥
भोजयेत्षोडश नारीः शुभास्ताः पतिसंयुताः । एवं विधिं समास्थाय भोजयेद्दम्पतीञ्शुभान्॥१९॥
नानाभोज्यैस्तथा पुष्पैः पक्षिभ्यो वलिमाहरेत् । दीनान्धकृपणेभ्योऽन्नं सर्पिष्यात्मानमीक्षयेत्२०
एतद्गौरीव्रतं नाम मार्गशीर्षे समाचरेत् । एवं कृते विधौ सूत प्राप्यंते पुत्रपौत्रकाः ॥ २१ ॥
नारी नियमसंपूर्णं व्रतं कुर्यात्प्रयत्नतः । सुतसौभाग्ययुक्ता सा पतिपुत्रसुखाप्तये ॥ २२ ॥
ऐहिक लक्षणं तस्य नारीणां चात्र जायते । स्वसुर्मातृस्वसुर्वापि सपत्न्याः शोकसंभवः ॥ २३ ॥
उदरार्तिरसृक्स्रावः पार्श्वे पादकरादिषु । मिथ्याभिशंसनं क्वापि वातदोषो धनच्युतिः ॥ २४ ॥
स्वज्ञातिनिन्दाहीनत्वं परेभ्यो मर्मतोदनम् ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःसप्तत्यधिकशततमः ॥ १७४ ॥

श्रीसूर्य उवाच ।

शकृन्मूत्रं सृजेद्यस्तु देवागारे नराधमः । गुदरोगमवाप्नोति सोऽत्र जन्मनि मानवः ॥ १ ॥
मासैकं पूजयेद्विष्णुं शिवं वा विधिनाण्डज । प्राजापत्यं चरेत्कृच्छ्रं दद्याद्गोमिथुनं सुत ॥ २ ॥
न पश्यति तदा पीडां गुदजामत्र जन्मनि ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचसप्तत्यधिकशततमः ॥ १७५ ॥

श्रीसूर्य उवाच ।

घातयेद्यः पुरा नारीमज्ञानात्पूर्वजन्मनि । सोऽत्र जन्मनि जायेत कृशो बलविवर्जितः ॥ १ ॥
शर्कराधेनुदानेन दशसंख्येन चाण्डज । विमुच्यते कृशत्वाच्च शतब्राह्मणभोजनात् ॥ २ ॥
होमात्स्वस्त्ययनाज्जापाद्गायत्रीजपतोऽत्र च । तीर्थस्नानादाज्यदानाद्बली भवति नान्यथा ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षट्सप्तत्यधिकशततमः ॥ १७६ ॥

श्रीसूर्य उवाच ।

बालानां घातिनी चेयमभवत्पूर्वजन्मनि । तेनाष्टाब्दमिताद्वर्षादर्वाग्बालो न जीवति ॥ १ ॥
क उपायोऽत्र कर्तव्य इति चिन्तयती ध्रुवम् । न जीवन्ति च तत्पुत्राः पूर्वपापात्तथाण्डज ॥ २ ॥
प्रायश्चित्तं शृणुष्वाथ जीवेयुर्येन तत्सुताः । श्रवणाद्धरिवंशस्य दशावृत्त्या खगेश्वर ॥ ३ ॥
पञ्चत्र्येकमितावद्वर्षात्पापात्पूर्वकृतादिह । मुच्यते नात्र संदेहः सत्यंसत्यं वचो मम ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायःसप्तसप्तत्यधिकशततमः ॥ १७७ ॥

श्रीसूर्य उवाच ।

यः कश्चिद्घातयेत्पूर्वं ब्राह्मणं ज्ञानवर्जितम् । कुष्ठरोगान्वितः सोऽपि जायतेऽत्रैव जन्मनि ॥
दद्यात्कालनरं सूत सर्वोपस्करसंयुतम् । सर्वस्वं वा महापापे दानमुक्तं मनीषिभिः ॥
सर्वस्वदानात्कुष्ठस्य पीडा नश्यति तत्क्षणात् ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोऽष्टसप्तत्यधिकशततमः ॥ १७८ ॥

श्रीसूर्य उवाच ।

देवद्रव्यं हरेत्सूत पूर्वजन्मनि यो नरः । सोऽत्र जन्मनि जायेत वायुपीडाभिरन्वितः ॥
प्रायश्चित्तं परं वायोर्नाशनं तस्य वच्म्यहम् । जपेन्मृत्युंजयं मन्त्रं सावित्रीं च विशेषतः ॥
होमयेत्तद्दशांशेन ब्राह्मणान्भोजयेत्तथा । वायुरोगोपशान्त्यर्थं शक्त्या दद्याच्च दक्षिणाम् ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकोनाशीत्यधिकशततमः ॥ १७९ ॥

श्रीसूर्य उवाच ।

देवागारे तु या काचित्प्राग्भवे विनतासुत । सृजेन्मूत्रं पुरीषं च मोहादत्रैव जन्मनि ॥
गुदरोगान्विता सापि नारी पापप्रणाशनम् । वक्ष्ये गोमिथुनं दद्यात्प्राजापत्यं चरेद्व्रतम् ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोऽशीत्यधिकशततमः ॥ १८० ॥

श्रीसूर्य उवाच ।

बभूव मुखजः कश्चिद्विद्याधनसमन्वितः । नानाकलासु कुशलो विष्णुभक्तिपरायणः ॥
ग्रहणे वै प्रयागे तु सर्वस्वमददात्पुरा । तत्र भाविबलात्सूत पापमाचरितं त्विदम् ॥
धर्षिता क्षत्रिया यूना कामलोभाच्छुभानना । प्रताडितः पतिस्तस्यास्तेन दैवहतेन तु ॥
ततो मृत्युवशं प्राप्तः स गत्वा यमशासनम् । शुभाच्छुभफलं भुक्त्वा चाशुभं चातिदारुणम् ॥
अन्यजन्मनि दानेन स जातः क्षत्रियादधः । देशे विपाशानिकटे सप्तयोजनसंमिते ॥
सुरूपदेहः सद्बुद्धिः स्त्रीपुत्रधनसंयुतः । शूरो दाता प्रधानश्च देशेदेशेऽतिविश्रुतः ॥
किंचित्पापरतो धूर्तो मनो दुःखाकुलो भृशम् । क्षत्रियाधर्षणात्पूर्वं भर्तृसंताडनात्तथा ॥
वार्द्धक्ये कण्डुरोगार्तो निश्चयादत्र जन्मनि । लक्ष्मैतदण्डजश्रेष्ठ सूर्यशुक्रौ चतुर्थगौ ॥
वक्ष्यामि तस्य पापस्य निष्कृतिं पापशोधनीम् । लक्ष्मीनारायणं दद्यात्पलेनार्धं पलेन वा ॥
हिरण्मयं सुघटितं सर्वाभरणभूषितम् । पूजयित्वा तु गन्धैश्च पुष्पैर्नानाविधैस्तथा ॥
दीपैर्विचित्रैर्विधिना दद्याद्विप्राय धीमते । गणनार्थं तथा दद्यात्सौवर्णं दशमाषकम् ॥
एवं विधानं यः कुर्यात्पूर्वपापविशोधनम् । न तस्य दद्रुः कण्डूश्च तस्माद्दोषात्प्रमुच्यते ॥
अकालमरणं तस्य प्रायश्चित्तेऽकृतेऽत्र च । प्रायश्चित्ते कृते त्वत्र जीवनं सप्तसप्ततिम् ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकाशीत्यधिकशततमः ॥ १८१ ॥

श्रीसूर्य उवाच ।

घातयेद्यः स्त्रियं साध्वीं कामात्पापविमोहितः । प्राग्भवे नियतं सोऽत्र कार्श्यं भजति जन्मनि ॥
तेनैव मृत्युमाप्नोति रोगेणैव पतत्रिण । प्राप्ते रिष्टेऽथ नष्टायुर्जायते महदेनसः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्यशीत्यधिकशततमः ॥ १८२ ॥

श्रीसूर्य उवाच ।

कन्यकावधजात्पूर्वं पापात्कन्याप्रजा भवेत् । जन्मन्यत्र महाभाग तस्माज्जातमिदं फलम् ॥ १ ॥
पूजनाल्लक्षरुद्राणां तदर्धार्धाणां च पक्षिराट् । मुच्यते पूर्वपापाच्च घोरात्कन्यावधादिह ॥ २ ॥
अथवा विधिना सूत तडागोत्सर्गपुण्यतः । विप्राणां भोजनात्तस्मिंस्तडागे गोप्रदानतः ॥ ३ ॥
पूर्वपापाद्विमुच्येत नात्र कार्या विचारणा ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्र्यशीत्यधिकशततमः ॥ १८३ ॥

श्रीसूर्य उवाच ।

या च पूर्वभवे नारी देवद्रव्यापहारिणी । सात्र जन्मनि पक्षीन्द्र भवेद्वायुप्रपीडिता ॥ १ ॥
देवालयं सुरुचिरं कृत्वा प्रस्थाप्य देवताम् । वायुरोगोपशमनं निश्चितं जायतेऽण्डज ॥ २ ॥
भोजयेत्तत्र वै विप्रान्वायुप्रीत्यै पतत्रिण । दानं वित्तानुसारेण वित्तशाठ्यं न कारयेत् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरशीत्यधिकशततमः ॥ १८४ ॥

श्रीसूर्य उवाच ।

काश्चित्क्षात्रकुले सूत पूर्वजन्मन्यभूद्भुवम् । गिरिवासी महादुष्टश्चौर्यकर्मरतो दृढः ॥ १ ॥
लुण्ठितो ब्राह्मणस्तत्र मार्गे संताडितो भृशम् । संताडनान्महाबाहो मृतः काले द्विजोत्तमः ॥ २ ॥
गते बहुतिथे काले स जातो ब्रह्महाऽधुना । गङ्गायमुनयोर्मध्ये क्रूरकर्मा महोद्यमी ॥ ३ ॥
प्राक् शिवाराधनात्पुण्याद्बाहुजः कुष्ठसंयुतः । वक्ष्यामि निष्कृतिं तस्य सर्वपापौघनाशनीम् ॥ ४ ॥
सर्वस्वस्य समः कार्यो वृषभोऽत्र हिरण्मयः । क्षौमवस्त्रयुतो भव्यो शृङ्गाभ्यां संयुतो महान् ॥ ५ ॥
स देयो वेदविदुषे कुष्ठदोषोपशान्तये । दानेनानेन सततं प्रीतो भवति वै शिवः ॥ ६ ॥
तस्माच्छिवप्रसादाद्वै कुष्ठस्तस्य प्रशाम्यति ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाशीत्यधिकशततमः ॥ १८५ ॥

श्रीसूर्य उवाच ।

आगासीद्बाहुजा काचिद्भर्तुः प्रियरता सदा । दानधर्मरता साध्वी विप्राणां पूजने रता ॥ १ ॥
तथा दैवात्सा सुभगा द्रव्यलोभरता सदा । सपत्नीपुत्रमददाद्विषं चैतद्वशानुगम् ॥ २ ॥
मृतस्तद्विषयोगेन गृहीतं तद्धनं तया । तद्दुःखेन पतिस्तस्या मृतः पुत्रशुचान्वितः ॥ ३ ॥
पापमाचरितं चोग्रं स्वपुत्रवधसंज्ञकम् । प्राप्ता यमपुरं भुक्त्वा पूर्वपुण्यफलं शुभम् ॥ ४ ॥
तद्वत्पापफलं सूत घोरान्नरकसंज्ञकान् । पूर्वपुण्यप्रभावेण सा जाता पर्वतेऽधुना ॥ ५ ॥
क्षात्रे कुले महापुण्ये राज्ञ्यत्रास्ति पतत्रिण । सा रक्तगौरा धर्मज्ञा सदा पुण्यपरा खग ॥ ६ ॥
मध्यस्वरूपा सिद्धार्था सुशीला गौरवान्विता । नातिव्ययायुता पुण्या स्वकुलेषु प्रियंवदा ॥ ७ ॥
पतिप्रियरता चोग्रा सुखैश्वर्यधनान्विता । पुण्यादिदं तथा पापाल्लोभाढ्या स्वल्पपुत्रका ॥ ८ ॥
स्वल्पपापरता बाल्ये चाधिव्याधिसमन्विता । यौवने भर्तृसंयुक्ता वार्द्धक्ये पुत्रवर्जिता ॥ ९ ॥
सपत्नीपुत्रवधजात्पूर्वपापात्पतत्रिण । लक्षणैरेभिराढ्यायाः प्रायश्चित्तं वदाम्यहम् ॥ १० ॥
विष्णुः कार्यः शतैर्मांषैः सौवर्णो विश्वयोनिभृत् । तद्वन्महेश्वरं कुर्याद्गन्धैः पुष्पैरलंकृतम् ॥ ११ ॥
देयौ विप्रेषु पात्रेषु पूर्वपापापनुत्तये । जपेदष्टशतं मन्त्रमयुतं होमयेत्ततः ॥ १२ ॥

१ भूद्विजः—खपु० ।

गायत्रीं च जपेत्तद्वद्दद्याद्वाश्च तथा सुत । भोजयेच्छक्तितो विप्रांस्तेभ्यो दद्याच्च दक्षिणाम् ॥ १३
एवं कुर्यात्प्रयत्नेन पूर्वपापविशोधनम् । न तस्याः पुत्रमरणं तदग्रे जायते ध्रुवम् ॥ १४
नैवं या कुरुते नारी प्रायश्चित्तं विधानतः । सपत्नी पुत्रवधतस्तस्याः पुत्रविनाशनम् ॥ १५
विप्राणां पूजनाद्दानात्तस्याः संततिवर्धनम् । जीवनं कथितं तस्या वर्षाणामष्टसप्ततिम् ॥ १६
रिष्टं षष्टिमितादब्दाद् ध्रुवं चाकृतनिष्कृतेः ॥ १७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडशीत्यधिकशततमः ॥ १८६ ॥

अरुण उवाच ।

कश्चिद्विप्रकुलोत्पन्नो दृढावयवसंयुतः । सदाचारः सुशोभाढ्यो दयानियमतत्परः ॥ १
क्रयविक्रयकर्ता च किंचिद्व्यापारवान्भुवि । तस्य प्रिया शुभाचारा पतिभक्तिपरायणा ॥ २
मातृपक्षं विना सा च पोषिता भर्तृमातुलैः । असृग्वातगदार्तायाः बाल्ये स्याद्व्रहणीगदः ॥ ३
काष्ठलोष्टाश्मशस्त्राद्यैर्घातश्च करपादयोः । बहुपुत्रप्रसूता च अपुत्रा जायते भुवि ॥ ४
अथवा मृतपुत्रत्वं जायते केन मानद । जातमात्रमृताः केचित्केचिच्चौगण्डमाश्रिताः ॥ ५
केचिद्दृष्टानना वापि मृतपुत्रोऽग्निमासकः । रक्तस्रावो भृशा पीडा मासेमासे कृताऽनघ ॥ ६
केन कर्मविपाकेन सत्यं वद दिवस्पते ॥ ७ ॥

श्रीसूर्य उवाच ।

पूर्वं क्षात्रसमुत्पन्नः किंचिद्भूमिपतिस्तथा । तावज्जन्मनि वैश्यस्तु परवित्तापहारकः ॥ ८
दूतिकाकर्मनिरतो नानालोकभिदन्वहम् । ग्रामाधीशोऽभवत्सोऽपि तेन राज्ञे प्रभाषितम् ॥ ९
एकग्रामे वसन्विप्रः शान्तो दान्तः क्षमः सदा । पुत्र्यः पञ्च तथा सप्त चापुत्रो वित्तसंयुतः ॥ १०
कालेनैव मृतो विप्रः सर्वस्वं तस्य नीतवान् । निराधाराः सुता जाता न कृतं द्विजभोजनम् ॥ ११
क्रियाकर्म कृतं नव सव राज्ञा हृतं च तत् । एवं कृतापराधोऽसौ क्षत्री जातो विशा सह ॥ १२
गते तु किंचित्काले वै अचिरात्स मृतस्तदा । म्लेच्छैर्विनिहतो मार्गे गतोऽसौ यमशासनम् ॥ १३
केचित्केचिद्विपच्यन्ते नरके भृशदारुणे । दानधर्मादिना केचिदिह जन्मनि मानद ॥ १४
विप्रवंशे समुत्पन्ना भवन्ति चेह जन्मनि । इदं तु द्वितीयं जन्म विप्रत्वं जायते भुवि ॥ १५
पूर्वकर्मविपाकेन कन्यापत्यं प्रजायते । ब्रह्मस्वहरणाच्चैव मृतपुत्रः प्रजायते ॥ १६
नानापत्यानि पच्यन्ते नानाकर्मोद्भवानि च । पुराकृतानि कर्माणि भुज्यन्ते जन्मजन्मनि ॥

अरुण उवाच ।

प्रायश्चित्तं वद स्वामिन् येन पुत्रश्चिरं भवेत् । कन्यापत्यप्रशमनं बहुपुत्रः प्रजायते ॥ १८

श्रीसूर्य उवाच

सुशुभे भूमिदेशे तु गोमयाद्युपलिप्तके । तत्रोपर्याविकं स्तीर्यमथवा ह्यजिनं शुभम् ॥
छादयेच्छुक्लवस्त्रेण तण्डुलद्रोणपर्वतम् । तत्रोपरि न्यसेत्पात्रं ताम्रं दशपलात्मकम् ॥
स्थापयेत्काञ्चनीं मूर्तिं सौवर्णीं शुभलक्षणाम् । मुक्तायज्ञोपवीताढ्यां निष्कसौवर्णनिर्मिताम् ॥
दधानां करयुग्मेन चाक्षमालां कमण्डलुम् । इयप द्वामभागे तु त्वदितिं विश्वमातरम् ॥
सौवर्णीं स्थापयेत्सूत सुवर्णद्वयनिर्मिताम् । एवं तौ दम्पती सम्यगर्चयेत्पर्वतोपरि ॥
कृत्वा प्रतिष्ठितप्राणां पूजयेद्विविधैर्गुणैः । रत्नगर्भं फलं देयं नानापुष्पैः समर्चयेत् ॥
अभ्यर्च्य दम्पती तौ तु मन्त्रमेनमुदीरयेत् । "यन्मया पूर्वजनुषि विप्राणां हि हृतं धनम्

दूतीकर्मानुरक्तेन वाक्यदोषादि यत्कृतम्। तत्सर्वं क्षम्यतां देव तव मूर्तिं ददाम्यहम्" ॥ २६ ॥
अदितिं च प्रणम्याथ कृताञ्जलिरिदं ब्रुवन्। "अदिते विश्वमातस्त्वं शरण्यं शरणार्थिनाम्॥२७॥
प्रजादुःखौघसंतप्तहृदयं मामिहेश्वरि। संप्रणाशय दुःखौघं प्रजां देहि यशस्विनीम्" ॥ २८ ॥
एवं कृतविसर्जोऽयं ब्राह्मणान्भोजयेत्ततः। शालग्रामशिलां शुद्धां सोमकान्तमणिं तथा ॥ २९ ॥
चन्द्रसूर्योपरागे तु ब्राह्मणाय समर्पयेत्। एवं कृतविधिः सूत कृष्णां गां दापयेत्ततः ॥ ३० ॥
सर्पिष्यात्मानमालोक्य भोजयेच्च समृद्धिभिः। ऐहिकं लक्षणं यस्य शरीरेऽप्युपजायते ॥ ३१ ॥
काष्ठलोष्टादिशस्त्राद्यैः करपादे व्रणो भवेत् ॥ ३२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्ताशीत्यधिकशततमः ॥ १८७ ॥

श्रीसूर्य उवाच।

राजानं घातयेद्यस्तु पुरुषः प्राग्भवेऽण्डज। स राजयक्ष्मरोगेण युक्तः स्यादत्र जन्मनि ॥ १ ॥
तस्मिन्वयसि पक्षीन्द्र सोऽपि प्राणैर्वियुज्यते। महापापोद्भवाद्रोगान्न चोक्तं विन्मयं मया ॥ २ ॥
अपि ज्ञानकृतं पापं रिष्टरूपेण काश्यप। नाशयत्यमरं सिद्धं पूर्णायुषमपि ध्रुवम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोऽष्टाशीत्यधिकशततमः ॥ १८८ ॥

श्रीसूर्य उवाच।

परगर्भं तु यः कश्चिद्धायेज्ज्ञानवर्जितः। जलोदरेण सततं रोगेणात्र प्रपीडितः ॥ १ ॥
जलधेनुप्रदानेन विधिना गरुडाग्रज। ताम्ररौप्यसुवर्णानां दानात्पापप्रणाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकोननवत्यधिकशततमः ॥ १८९ ॥

श्रीसूर्य उवाच।

ब्राह्मणोऽभूत्कुरुक्षेत्रे कृषिकृद्वेदपारगः। स्वज्ञातीयस्य चानेन वृत्तिलोपः कृतः खलु ॥ १ ॥
तत्संबन्धेऽभवद्युद्धं द्वयोरेको मृतस्तदा। वृत्तिलोपी द्विजः काले गतो हि यमशासनम् ॥ २ ॥
भुक्त्वा यत्पापजं सर्वं शतद्रुनिकटेऽधुना। स वै जातो द्विजश्चात्र वेदाभ्यासाच्च पुत्रक ॥ ३ ॥
कुष्ठक्षयान्वितश्चात्र युवभावे पतत्त्रिण। तत्पापनाशनं सर्वं प्रायश्चित्तं प्रवक्ष्यहम् ॥ ४ ॥
वेदाभ्यासान्महासूत सावित्रीजपतस्तथा। गङ्गायां वासतः सोऽयं पूर्वपापात्प्रमुच्यते ॥ ५ ॥
न कुष्ठवृद्धिरत्रास्ति तत्कृते शमनं भवेत्। जीवेत्पष्टिमिताब्दान्तं रिष्टं चैव प्रशाम्यति ॥ ६ ॥
गतिस्तस्य महाभाग वेदाभ्यासाज्जपात्तथा। भविष्यति शुभा लोके परत्र च खगेश्वर ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो नवत्यधिकशततमः ॥ १९० ॥

श्रीसूर्य उवाच।

कुलद्वयानन्दकरी पूर्वजन्मनि वैश्यजा। बभूव भर्तृसुखदा तदाज्ञापालिनी सती ॥ १ ॥
अत्र जन्मनि सा विप्रा काश्यां जाता हि पुत्रक। व्रतदानपराऽत्रापि भर्तृतोषणसंयुता ॥ २ ॥
पञ्चपञ्चाशदब्दान्तं प्रविशत्यत्र जन्मनि। स्वर्गकामा चितावग्नौ तु नात्र कार्या विचारणा ॥ ३ ॥
सा गमिष्यति वै स्वर्गं चात्र जन्मनि वै नरः। भविष्यति महाराज कुले राजातिधार्मिकः ॥४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकनवत्यधिकशततमः ॥ १९१ ॥

---

१ महत्–खपु०।

श्रीसूर्य उवाच ।

पीड्यते वातरोगेण दारुणेन पतत्रिण । पूर्वजन्मनि पश्चाद्या किल शूद्रगृहे स्थिता ॥ १ ।
प्रायश्चित्तं परं तस्य व्रतं चान्द्रायणं चरेत् । व्रतान्ते कपिलां दद्यात्सर्वपापापनुत्तये ॥ २
पापक्षये क्षयं याति रोगस्तत्पापजास्त्विह ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो द्विनवत्यधिकशततमः ॥ १९२ ॥

श्रीसूर्य उवाच ।

स्वगर्भपातात्पूर्वं या नारी पापविमोहिता । जलोदरकृता पीडा जायते चात्र जन्मनि ॥ १
रजतस्वर्णताम्राणां दानाद्गोविनाशनम् । जलधेनुप्रदानेन तथैव विनतासुत ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्रिनवत्यधिकशततमः ॥ १९३ ॥

श्रीसूर्य उवाच ।

अस्त्यत्र सुमुखी सूत सदा भर्तृपरायणा । दानधर्मरता भव्या सुभगा पुत्रवर्जिता ॥ १ ।
पूर्वमासीच्च सुभगा सगर्भा फललालसा । त्रोटितं च फलं पक्वं भक्षार्थं चौर्यकर्मणा ॥ २ ।
तेन कर्मविपाकेन फलहीनात्र जन्मनि । भवन्ति खलु ये पुत्रा अर्वाग् वर्षाष्टतोऽण्डज ॥ ३ ।
पश्चत्वमाप्नुवन्त्यत्र यस्मादकृतनिष्कृतिः । निष्कृतिं तत्प्रवक्ष्यामि पूर्वपापप्रणाशनीम् ॥ ४ ।
शनिवारेऽण्डजश्रेष्ठ निमन्त्र्याश्वत्थकं सुत । तत्तले ब्राह्मणान्सूर्यदिने षष्ठ्यां तु भोजयेत् ॥ ५ ।
नानाफलैस्तथा पक्वैः सपूपै रससंयुतैः । फलानि विकिरेत्तत्र कृत्वाऽश्वत्थप्रदक्षिणाम् ॥ ६ ।
पूजयेत्तं महाभाग जीवेत्तस्याश्च वै सुतः ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुर्नवत्यधिकशततमः ॥ १९४ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि या काचिद्घातयेद्ब्राह्मणं सुत । सात्र जन्मनि कुष्ठेन मध्ये वयसि पीडिता ॥ १ ।
जायते म्रियते या च गलत्कुष्ठेन चाण्डज । पापाज्ज्ञानकृतात्पूर्वान्न चोक्तं विन्मयं मया ॥ २ ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचनवत्यधिकशततमः ॥ १९५ ॥

श्रीसूर्य उवाच ।

देशे हि यामुने ह्यासीत्पूर्वं बाहुजसंज्ञकः । गङ्गास्नानं कृतं पूर्वं बाहुजानां सहायतः ॥ १
शंकटेन कुटुम्बस्य जानता पातकं कृतम् । एकस्मिन्वै दिने गत्वा ददाह वनमद्भुतम् ॥ २
बलाद्दैवस्य संप्राप्ता जीवा दग्धा महाकुलाः । बन्धुसाहाय्यतस्तत्र कृतं कर्मातिदारुणम् ॥ ३
शुभाच्छुभानि भुक्ताऽथ पापाच्च नरकांस्तथा । विपाशानिकटे देशे योजने सप्तसंमिते ॥ ४
भव्यो महोद्यमी गौरः कृशाङ्गो लोचनेऽल्पदृक् । बहुलोभी बहुस्त्रीको देवताऽतिथिदूषकः ॥ ५
भ्रातृहीनः शठो धूर्तः पुत्रसंततिवर्जितः । पञ्चमे भवने राहुर्भौमयुक्तोऽल्पसंततिः ॥ ६
लक्षणैर्लक्षितश्चोक्तैरत्रेहि गरुडाग्रज । बन्धुसाहाय्यतः पापात्पूर्वजन्मसमुद्भवात् ॥ ७
तस्माद्भ्रातृपुत्रहीनो जायतेऽत्रैव जन्मनि ॥ ८ ॥

अरुण उवाच ।

विन्मयं कथ्यतां देव सुतसौख्यविवर्धनम् । सर्वपापप्रशमनं लोकानां हितकारणम् ॥ ९

१ अध्यायोऽयं नास्ति-खपु० । २ सकष्टेन-खपु० ।

श्रीसूर्य उवाच।

विन्मयं तत्प्रवक्ष्यामि जन्तुदग्धविनाशनम्। वनदेवी वरा कार्या यत्नेनार्धपलेन वा ॥ १० ॥
हिरण्मयी शुभा लेख्या पत्रे तच्चतुरस्रके। वनजीवास्तथा लेख्याः सर्वे तद्रूपसंज्ञकाः ॥ ११ ॥
प्रजापतिस्तथा कार्यो माषत्रयविनिर्मितः। राजतं पलमेकं तु गणाध्यक्षं शिवात्मजम् ॥ १२ ॥
संपूज्य गन्धपुष्पाद्यैः सा देया कार्यसाधिनी। देया वेदविधिज्ञाय सर्वपापापनुत्तये ॥ १३ ॥
प्रजापतिस्तथा देवः सर्वकल्मषनाशनः। शृणुयाद्वारतं वापि पारायणमुभाषितम् ॥ १४ ॥
अष्टाक्षरं तथा मन्त्रं जपेच्च विधिपूर्वकम्। दशायुतं तदर्धं वा तदर्धं वा प्रयत्नतः ॥ १५ ॥
होमयेत्तद्दशांशेन भोजनं तद्दशांशतः। तथामितं सूर्यमन्त्रं जपेत्प्रणवपूर्वकम् ॥ १६ ॥
विप्रेभ्यो दक्षिणां दद्यात्तस्मात्पापात्प्रमुच्यते। य एवं कुरुते सूत पूर्वपापविनाशनम् ॥ १७ ॥
तस्य पुत्रविवृद्धिश्च इह जन्मनि जायते। अकृते तु यथाशक्त्या रिष्टं षट्पञ्चके तथा ॥ १८ ॥
प्रायश्चित्ते कृतेऽब्दानां जीवनं नवसप्ततिम्। जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् ॥ १९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षण्णवत्यधिकशततमः ॥ १९६ ॥

श्रीसूर्य उवाच।

परान्नं या हरेन्नारी पूर्वजन्मनि सुव्रत। साऽत्राजीर्णेन रोगेण दुःखिता जायते ध्रुवम् ॥ १ ॥
कुर्यान्नानाविधं चान्नं रसैः सर्वैः समन्वितम्। विप्रेभ्यो भोजनं दद्याच्छक्त्या दद्याच्च दक्षिणाम् २
होमयेच्च तथाऽन्नानि गायत्र्या त्र्यम्बकेण तु। मुच्यतेऽजीर्णरोगाच्च पूर्वपापाच्च पुत्रक ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्तनवत्यधिकशततमः ॥ १९७ ॥

श्रीसूर्य उवाच।

देवमूर्तिं च यः कश्चिद्देवागारे स्थितां सुत। भग्नां कुर्यान्नरो मोहात्परेण स्थापितां यदि ॥ १ ॥
अप्रतिष्ठो भवेदत्र जन्मन्यथ खगाधिप। वर्षत्रयं तथाश्वत्थपूजनात्पापनाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोऽष्टनवत्यधिकशततमः ॥ १९८ ॥

श्रीसूर्य उवाच।

यश्चाचरेद्राजवधं[1] मोहात्पूर्वभवे नरः। स राजयक्ष्मी विज्ञेयो घोरपापसमुद्भवः ॥ १ ॥
प्रायश्चित्तं महाभाग शृणु चात्र प्रयत्नतः। गोभूहिरण्यमिष्टान्नातिलवस्त्रान्नदानतः ॥ २ ॥
घृतधेनुप्रदानेन क्षयरोगं न पश्यति। दानं यथानुमानेन सर्वस्वार्धार्धमेव च ॥ ३ ॥
देयं द्विजवधादौ तु विचार्यात्र प्रयत्नतः। तत्क्षणे काश्यपेयात्र क्षयरोगः प्रशाम्यति ॥ ४ ॥
रिष्टेनैव विनाशः स्यात्तथा चाकृतनिष्कृतेः ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोऽनवनवत्यधिकशततमः ॥ १९९ ॥

श्रीसूर्य उवाच।

या नारी घातयेत्काचित्परगर्भं पतत्रिण। जलोदरेण रोगेण पीड्यते चात्र जन्मनि ॥ १ ॥
गङ्गास्नानेन सततं विधिनार्के मृगे स्थिते। तथा तज्जलपानेन तस्मात्पापात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो द्विशततमः ॥ २०० ॥

---

१ सूर्यमन्त्रं सहस्रं च—खपु०। २ यश्चाचरद् गोवधं हि—खपु०।

SRI JAG[illegible] VISHWARADH
INANA [illegible]

श्रीसूर्य उवाच ।

वाग्विरोधी भवेद्यश्च पूर्वजन्मनि वादिनः । सोऽत्र जन्मनि मूकत्वं भजत्येव न संशयः ॥ १
मोहादिदं चरेत्सूत देयं दानं द्विजातये । वेदानां पुस्तकं रम्यं पूजयित्वा विधानतः ॥ २
संछाद्य वस्त्रैनः शुद्धैः क्षौमजैर्गरुडाग्रज । तत्पापनाशनं सर्वं प्राग्जन्मोक्तं परंतप ॥ ३

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकाधिकद्विशततमः ॥ २०१ ॥

श्रीसूर्य उवाच ।

अत्र जन्मन्यसौ वन्ध्या प्राग्भवे विनतासुत । अयोध्यायां तु सुमुखी धनभर्तृसमन्विता ॥ १
पूर्वपापप्रभावेण सपत्न्या गर्भनाशनात् । जातेयं पादजात्रैव दुःखार्ता सुतवर्जिता ॥ २
प्रायश्चित्तं प्रवक्ष्यामि सर्वपापप्रणाशनम् । काश्यां गत्वात्र विधिना शिवमाराध्य यत्नतः ॥ ३
व्रतैर्दानैर्महापुण्यैर्नानाविभवविस्तरैः । शिवरात्रौ ततः पश्चाद्दीपमालादिनाण्डज ॥ ४
अर्द्धरात्रे महानद्या मध्ये स्नानं तु कारयेत् । मन्त्रैर्वरुणसूक्तैश्च नौकायां वा पतत्रिण ॥ ५
या चैवं कुरुते सूत तस्याः स्यात्संततिर्ध्रुवम् ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो द्व्यधिकद्विशततमः ॥ २०२ ॥

श्रीसूर्य उवाच ।

परनिन्दां तुः य कश्चित्प्राग्भवे विनतासुत । कुर्याद् दुर्मतिमापन्नः खल्वाटो जायतेऽधुना॥ १
दद्यात्स कपिलां धेनुं सर्वोपस्करसंयुताम् । ब्राह्मणाय दरिद्राय तस्माद्दोषात्प्रमुच्यते ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्र्यधिकद्विशततमः ॥ २०३ ॥

श्रीसूर्य उवाच ।

या काचित्प्राग्भवे नारी कुर्याद्राजवधं सुत । सात्र जन्मनि तत्काले क्षयरोगप्रपीडिता ॥ १
यक्ष्मणात्र क्षयं यान्ति धातवः क्षयरोगिणाम् । धातुक्षये क्षयं याति तच्छरीरमशाश्वतम् ॥
दृढकर्मकृतं पापं तस्मान्नोक्तः प्रतत्रिण । पापनाशकरः कश्चिदुपायस्त्वत्र जन्मनि ॥ ३

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुरधिकद्विशततमः ॥ २०४ ॥

श्रीसूर्य उवाच ।

या वाग्विरोधिनी नारी भर्तुः पूर्वभवे सुत । मूकत्वं जायते तस्माच्चात्र जन्मनि निश्चयात् ॥
तत्पापनाशनं दानं दद्याद्वेदस्य पुस्तकम् । ब्रह्मणे वेदविदुषे पूर्वपापात्प्रमुच्यते ॥ २
होमयेच्च तिलान् भक्त्या भोजयेद्ब्राह्मणांस्तथा ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचाधिकद्विशततमः ॥ २०५ ॥

श्रीसूर्य उवाच ।

या काचिद्भञ्जनं कुर्यान्नारी पूर्वभवेऽण्डज । प्रतिमां देवतागारे स्थापितामपरेण च ॥
अप्रतिष्ठान्विता सा च जायते वै पतत्रिण । वर्षत्रयं ब्रह्मवृक्षपूजनात्पापनाशनम् ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षडधिकद्विशततमः ॥ २०६ ॥

श्रीसूर्य उवाच ।

कश्चिद्द्विजो महाभाग ह्यासीदङ्गे हि धार्मिकः । गयायां द्वादशे वर्षे कृतं श्राद्धं विधानतः ॥
विधिना तत्र दत्तानि काम्यश्राद्धानि मानद । ततो भाविबलात्सूत ब्राह्मणेन तपस्विना ॥

---

१ शोधनम्—खपु० ।

स्थापितं तद्गृहे द्रव्यं लोभाद्दत्तं न तद्धनम् । सर्वैर्मिलित्वा तद्धुक्तं स्त्रीपुत्रभ्रातृभिः सह ॥ ३ ॥
ततो बहुतिथे काले गतो हि यमशासनम् । शुभात्स्वर्गफलं भुक्तं पापाच्च नरकं भृशम् ॥ ४ ॥
पूर्वपुण्यप्रभावेण स जातोऽत्रापि वै द्विजः । मथुरामण्डले देशे रम्ये पुण्यस्थले शुभे ॥ ५ ॥
विशालाक्षो धनी मानी सुरूपोऽमितदो घृणी । बहुदेशाधिकारी च पुण्यात्सर्वं फलं त्विदम् ॥ ६ ॥
लोभी क्रूरो महाक्षुद्रः सदा चिन्तासमन्वितः । सन्तानसुखहीनस्तु स्वरूपस्त्रीसुखोज्झितः ॥ ७ ॥
बन्धुहीनो व्ययी क्षीणः सर्वं तत्पापतः फलम् । वक्ष्यामि निष्कृतिं तस्य पवित्रां पापशोधनीम् ८
कुबेरप्रतिमां रौक्मीं पञ्चस्वर्णमितां शुभाम् । तदर्धार्धमितां वापि त्रिषु वित्तानुसारतः ॥ ९ ॥
संपूज्य गन्धपुष्पाद्यैः सा देया ब्राह्मणाय च । लक्ष्मीनारायणं दद्यात्सुवर्णसंमितं शुभम् ॥ १०॥
लेख्यं पत्रे पवित्रं च पुत्रसंततिवर्धनम् । य एवं कुरुते भक्त्या तस्य रिष्टं न लिप्यते ॥ ११ ॥
प्रायश्चित्ते कृते त्वत्र चायुः सप्ततिवत्सरम् ॥ १२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायःसप्ताधिकद्विशततमः ॥ २०७ ॥

अरुण उवाच ।

भूमिदेवकुलोत्पन्नो वाताधिकशरीरवान् । क्षामाङ्गः क्षीणवर्णाभः स्वल्पवृत्तिश्च जीवति ॥ १ ॥
देवब्राह्मणभक्तश्च किंचिद्वादपरायणः । करपादकुशस्त्रेण दंष्ट्रिशृङ्गिविघातनः ॥ २ ॥
ब्रह्मत्वं जायते दीर्घनेत्रस्तोदो[1] विराशिमता । परोक्षमपवादं च ब्रुवते लोकतोऽन्वहम् ॥ ३ ॥
प्रिया तस्य शुभाचारा पतिभक्तिपरायणा । अनृतं वदते किंचित्किंचित् क्लेशस्य कारिणी ॥ ४ ॥
अपत्यानि मृतानीह एको वा द्वित्रयोऽपि वा । वर्षत्रयमिता बाला म्रियन्ते मासमंमिताः ॥ ५ ॥
केन कर्मविपाकेन मृतापत्या तु याऽनघ । एकोदरे स्थितो गर्भो न प्रसूतिर्न पातनम् ॥ ६ ॥
पृथगेवं कुमार[2]तृणां मृतापत्या प्रजापते । गतो बहुतरः कालः कस्येदं कर्मणः फलम् ॥ ७ ॥

श्रीसूर्य उवाच ।

अतः पूर्वं वैनतेय तृतीयेऽत्रैव जन्मनि । क्षात्रे कुले समुत्पन्नः कश्चिद्भूमिपतिस्तथा ॥ ८ ॥
दानव्रतदयायुक्तः प्रियाप्रीतिः परस्परम् । तस्याप्यपरमातुस्तु पुत्रः परमसुन्दरः ॥ ९ ॥
एको वै पादचारस्तु तृतीयस्तु स्तनंधयः[3] । गर्भयुक्तश्चतुर्थस्तु पिता मृत्युवशंगतः ॥ १० ॥
क्रियाकर्म कृतं पुत्रैर्वित्तेन सदृशं खग । मासैस्त्रिभिर्व्यतिक्रान्तैर्ज्येष्ठेनैव दुरात्मना[4] ॥ ११ ॥
निहता भ्रातरः सर्वे भाविनोऽर्थस्य वै बलात् । पुत्रदुःखेन शोकार्ता हृदयं ताडितं भृशम् ॥ १२॥
अभिघाताच्छिलाभूता गर्भयुक्ता दिवं गता । अचिरात्तेन कालेन ज्येष्ठश्चौरेण घातितः ॥ १३ ॥
इदं जन्म द्वितीयं तु मृतापत्यं प्रजायते । पुराकृतानि कर्माणि भुज्यन्ते चेह मानवैः ॥ १४ ॥

अरुण उवाच ।

प्रायश्चित्तं वद स्वामिन् येन पापक्षयो भवेत् । गर्भस्थानां मृतापत्यैऽलघूनामलघुश्च यः ॥ १५ ॥
तस्य पापस्य शुद्ध्यर्थं निष्कृतिं वद मे प्रभो ॥ १६ ॥

श्रीसूर्य उवाच ।

सौम्यायने तु संप्राप्ते सानुकूलग्रहे दिने । सपत्नीकः शुचिः स्नातः पञ्चगव्येन चाण्डज ॥ १७॥
उपोषणं दिवा रात्रौ व्रतस्यानुदिते रवौ । सुरभेर्वै सगर्भाया गोमयेनानुलेपयेत् ॥ १८ ॥

---

१ नेत्रस्वेदो–खपु० । २ कुभ्रातृणां–खपु० । ३ धनंजयः–खपु० । ४ पापिष्ठेन–खपु० ।

सुशुभे भूप्रदेशे तु कुङ्कुमाद्युपचर्चिते । कुर्यादष्टदलं पद्मं चित्रवर्णं सुशोभनम् ॥ १
तन्मध्ये रुक्मिणीयुक्तं माधवं कलशेऽर्चयेत् । सौवर्णे राजते पद्मे सायुधं च चतुर्भुजम् ॥ २
उपचारैः शुभैर्गन्धैर्धूपैश्च कुसुमादिभिः । जनन्या सह संभूतान्प्रद्युम्नाद्यांस्तथार्चयेत् ॥ २
चारुदेहं सुवेषं च चारुगुप्तं यशोन्वितम् । इभवाहं चतुर्बाहुं सुचारुं पूजयेत्क्रमात् ॥ २
पूजनं विष्णुभक्तेन तथा श्रीरसकोविदैः । पुष्पस्रग्धूपगन्धाढ्यैरर्चयेद्विविधैर्गुणैः ॥ २
तद्विप्रे चाथ तद्विष्णौ रतो देवांश्च पूजयेत् । शतमष्टोत्तरं हुत्वा चरुणा पायसेन च ॥ २
होमान्ते विप्रभोजान्ते मन्त्रमेनमुदीरयेत् । "यन्मया पापकर्माणि कृतानि पूर्वजन्मनि ॥ २
सपत्नानां पञ्चकं तु जिघांसां कृतवानहम् । स्वकुलहननाद्वापि भूमिद्रव्यादिलिप्सया ॥ २
लघूनामलघूनां च हन्ता वै पूर्वजन्मनि । ततोऽघं वै मया प्राप्तं दुःखं नानाविधं त्विदम् ॥ २
तत्तदेनोविनाशाय दानं संप्रददे त्विदम् । स्वस्त्यस्तु चेति तत्रोक्ता कोदादिति विसर्जनम् ॥
सर्पिष्यात्मानमालोक्य भोजयेदिष्टभोजनम् । ऐहिकं लक्ष्म विज्ञेयं पूर्वकर्माभिशंसनम् ॥ २
काष्ठलोष्टादिशस्त्रौघैर्घातः स्याद्बालक्रीडनात् । जलादग्न्यादिना वाधा व्रणो वा तस्य जायते
स्त्रीणामङ्गे च विकृतिर्व्याधिस्तनव्रणादिकम् । पैत्रो वै मातुलानीनां नेत्रस्वेदो विरश्मिता ॥ ३
स्वसुमार्तृष्वसुर्वापि बाल्ये वैधव्यताऽपि च ॥ ३२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अ० अष्टाधिकद्विशततमः ॥ २०८ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे प्राह परानिन्दां च कारयेत् । खल्वाटा हृद्रुजायुक्ता जायतेऽत्रैव जन्मनि ॥ १
धेनुं दद्यान्महाभागे विधियुक्तां सकम्बलाम् । तस्माद्रोगाद्विमुच्येत नात्र कार्या विचारणा ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अ० नवाधिकद्विशततमः ॥ २०९ ॥

श्रीसूर्य उवाच ।

अभक्ष्यं भक्षयेद्यस्तु पूर्वजन्मनि मानवः । गण्डमालाख्यरोगेण स युक्तो जायतेऽधुना ॥ १
पुण्यदेशे महाभाग संक्रान्त्यादिषु पर्वसु । गृहीत्वा कम्बलं शुद्धं नवं तद्वेदपाठिने ॥ २
कुटुम्बिने दरिद्राय दद्याद्दोषापनुत्तये । गण्डमालां हरत्येतद्दानमुक्तं मया त्विह ॥ ३

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अ० दशाधिकद्विशततमः ॥ २१० ॥

श्रीसूर्य उवाच ।

कुलघ्नीयं महादुष्टा पूर्वमासीत्पतत्रिण । अत्र पूर्वकृतात्पुण्यान्मानुषी संकरा स्मृता ॥ १
धनपुत्रविहीना सा चात्र जन्मनि दृश्यते । निष्कृतिं तत्प्रवक्ष्यामि प्रयागे सततं सुत ॥
वासात्पापं क्षयं याति पूर्वजन्मकृतं दृढम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अ० एकादशाधिकद्विशततमः ॥ २११ ॥

श्रीसूर्य उवाच ।

पक्षघातं तु यः कुर्यात्सभायां ब्राह्मणस्य च । पक्षाघातेन रोगेण पीडितोत्र च जायते ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अ० द्वादशाधिकद्विशततमः ॥ २१२ ॥

---

१ मातुलान्यायां—खपु० । २ न तत्पापं क्षयं याति—खपु० । ३ अध्यायोऽयं नास्ति—खपु० ।

श्रीसूर्य उवाच ।

अभक्ष्यं भक्षयेत्पूर्वं यां नारीं द्विजवल्लभा । गण्डमालाख्यरोगेण संयुक्ता जायते ध्रुवम् ॥ १ ॥
पुण्यदेशे महाभाग संक्रान्त्यादिषु पर्वसु । पूर्वपापहरं पुण्यं दद्यादत्र च कम्बलम् ॥ २ ॥
नवं शुद्धं कुलीनाय तस्मात्पापात्प्रमुच्यते । द्विजानामिच्छया दद्याद्भोजनं पापनाशनम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्रयोदशाधिकद्विशततमः ॥ २१३ ॥

श्रीसूर्य उवाच ।

यः कश्चिद्बालकं चाहन्ब्राह्मणस्य खगाधिप । वङ्गदेशे वसन्पूर्वं सोऽत्र जन्मनि गौडजः ॥ १ ॥
धीरः सर्वकलाभिज्ञो नानाशास्त्रविशारदः । धनधान्यरतश्चात्र बहुस्त्रीसुखभोगभाक् ॥ २ ॥
विद्यादानात्कृतात्पूर्वं शृणु पापफलं तथा । क्षयरोगाकुलः क्षीणः पुत्रसंततिवर्जितः ॥ ३ ॥
बालघातनजात्पापाद्ब्राह्मणस्य पतत्रिण । महाक्रोधपरो लोभी नानादुःखैस्तथाकुलः ॥ ४ ॥
वक्ष्यामि निष्कृतिं तस्य ब्रह्मघातविमोचनीम् । प्रयागे वा कुरुक्षेत्रे पुष्करे वा महास्थले ॥ ५ ॥
नैमिषारण्यके क्षेत्रे पूजयेद्विधिवच्छिवान् । गन्धपुष्पैस्तथा धूपैर्लक्षसंख्यान्विधानतः ॥ ६ ॥
ब्रह्मचर्यरतो नित्यं तदन्ते होमयेत्तथा । षडस्रे चतुरस्रे वा कुण्डे चाज्यतिलाञ्शुभान् ॥ ७ ॥
शक्त्या च भोजयेद्विप्राञ्शैवान्काशारलड्डुकैः । नानाभक्ष्यफलैश्चैव वस्त्रैर्माल्यैस्तथार्चयेत् ॥ ८ ॥
विविधां दक्षिणां दद्याद्रुद्रप्रीतिकरां तथा । यश्चानेन विधानेन प्रायश्चित्तं समाचरेत् ॥ ९ ॥
स बालघातजात्पापान्मुच्यते नात्र संशयः । चतुर्दश्यामथाष्टम्यां नक्तं कुर्याद्विधानतः ॥ १० ॥
मम ध्यानपरः सूत नित्यं भूत्वा ममाग्रतः । पूजयेदर्घ्यपाद्याद्यैर्नैवेद्यैर्विविधैस्तथा ॥ ११ ॥
तं च तत्सर्वपापेभ्यो विमोक्ष्यामि खगेश्वर । आयुरब्दाः शतं प्रोक्तं पञ्चहीनं न संशयः ॥ १२ ॥
प्रायश्चित्ते कृते यत्नात्पञ्चम्यां चन्द्रवासरे । विन्मये त्वकृते सूत चत्वारिंशन्मिताब्दके ॥ १३ ॥
रिष्टं स्यात्क्षयरोगेण बालघातेन निश्चितम् । ब्रह्मघातान्महापापात्पूर्वजन्मकृताद्दृढात् ॥ १४ ॥
न मुच्यते महादानैः सप्तजन्मकृतैरपि । बाध्यते क्षयरोगेण सप्तजन्मसु निश्चयात् ॥ १५ ॥
ब्रह्महा क्षयरोगी स्यादिति वेदविदो विदुः । नहीदृशं महापुण्यं क्षयरोगनिवर्तने ॥ १६ ॥
पुत्रवृद्धिकरं चात्र यथा प्रोक्तं शिवार्चनम् ॥ १७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुर्दशाधिकद्विशततमः ॥ २१४ ॥

श्रीसूर्य उवाच ।

यो विप्रः प्राग्भवे मोहात्सुरां त्रिविधजां पिबेत् । मूत्रकृच्छ्रेण रोगेण पीडितः सोऽत्र जन्मनि १॥
गृहवित्तानुसारेण पलेनार्धपलेन वा । कुर्याद्धिरण्मयं पद्मं चाष्टपत्रसमन्वितम् ॥ २ ॥
आवाह्य तत्र ब्रह्माणं प्रभुं सर्वोपचारकैः । पूजयित्वा तु गन्धाद्यैर्दद्याद्विप्राय यत्नतः ॥ ३ ॥
दानेनानेन सततं मूत्रकृच्छ्रं न पश्यति ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचदशाधिकद्विशततमः ॥ २१५ ॥

श्रीसूर्य उवाच ।

वैकुण्ठादागतस्तत्र मथुरायां पतत्रिण । जातोऽयं पुण्डरीकाक्षः सर्वभूताभयप्रदः ॥ १ ॥

---

१ ब्राह्मणान् भोजयेन्नित्यं–खपु० । २ सप्तजन्मसु निश्चयात्–खपु० । ३ अर्ध्यर्धश्लोकोऽयं नास्ति-खपु० । ४ अर्धश्लोकोऽयं नास्ति–खपु० । ५ अमक्षितोऽयमध्यायइति प्रतिभाति ।

घोरे कलियुगे प्राप्ते पापाक्रांते महीतले । भारावतारणार्थाय क्षत्रियाणां क्षयाय च ॥ २
कृत्वा तु दुष्करं कर्म पुनर्यास्यति वै दिवि ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षोडशाधिकद्विशततमः ॥ २१६ ॥

श्रीसूर्य उवाच ।

स्वर्णापहारी सततं पुरुषः प्राग्भवेऽण्डज । कुनखी जायते चात्र महापापेन लाञ्छितः ॥ १
सुवर्णशतकं दद्यात्स तद्दोषविनाशनम् । चान्द्रायणव्रतं कुर्यात्तथाः तद्दोषशान्तये ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्तदशाधिकद्विशततमः ॥ २१७ ॥

श्रीसूर्य उवाच ।

राजघातकरी प्रोक्ता या पूर्वं घातयेन्नृपम् । राजयक्ष्मान्विता सात्र तस्मिन्वयसि भामिनी ॥
प्रायश्चित्तं परं तस्याः शृणुष्वाथ खगेश्वर । यत्कृते विधिना सर्वं पूर्वजन्माघनाशनम् ॥
स्वर्णगोधूममिष्टान्नघृतधेनुतिलानि च । देयानि श्रद्धया सूत क्षयरोगापनुत्तये ॥ ३
रिष्टं त्रिंशन्मितेऽब्दे तु प्रायश्चित्तेऽकृतेऽधुना ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अ० अष्टादशाधिकद्विशततमः ॥ २१८ ॥

श्रीसूर्य उवाच ।

निरपराधं यः कंचिद्वैश्यं चाहन्पतत्रिण । प्राग्जन्मन्यथ युक्तोऽसौ रक्तार्बुदरुजा भृशम् ॥
भविष्यति न संदेहस्तस्य मृत्युः खगाधिप । अपि दानशतैर्वापि दत्तैरत्रैव जन्मनि ॥
त्रिंशद्वर्षे महारिष्टं रक्ताधिक्यान्महाबलात् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अ० एकोनविंशत्यधिकद्विशततमः ॥ २१९ ॥

श्रीसूर्य उवाच ।

मेरोः[1] समागता येयं प्राप्ता माथुरमण्डले । सर्वभूतोपकाराय दुष्टनाशकराय च ॥
प्राप्ते कलियुगे घोरे सर्वपुण्यविवर्जिते । कृत्वा चाद्भुतकर्माणि पुनस्तत्रैव यास्यति ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो विंशत्यधिकद्विशततमः ॥ २२० ॥

श्रीसूर्य उवाच ।

यो मोहाद्घातयेद्वैश्यमन्यजन्मनि मानवः । सोऽत्र जन्मनि विज्ञेयो रक्तार्बुदसमन्वितः ॥
प्राजापत्यचतुष्केण व्रतेन[2] नियमेन च । सप्तधान्यप्रदानेन पूर्वजन्माघनाशनम् ॥
पापक्षये महाभाग क्षयः स्यात्पापकृद्भुजः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अ० एकविंशत्यधिकद्विशततमः ॥ २२१ ॥

श्रीसूर्य उवाच ।

या काचिद्ब्राह्मणी पूर्वभवे मोहात्सुरां पिबेत् । सात्र जन्मनि वै मूत्रकृच्छ्रेणातिनिपीडिता ॥
प्रायश्चित्तं परं तस्या घोरपापहरं सुत । सुपूजिताय विप्राय सवत्सां[3] गां निवेदयेत् ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोद्वाविंशत्यधिकद्विशततमः ॥ २२२ ॥

---

१ गोभूमि—खपु० । २ अयमपि श्लोकक्षिप्तोऽध्याय इति प्रतिभाति । ३ यत्नेन—खपु० । ४ विनिवेदयेत्—खपु० ।

अरुण उवाच।

श्चिद्विप्रोत्तमो जातः किंचिद्वित्तसमन्वितः। कासश्वासादिना बाधा उदरार्तिः प्रजायते ॥ १ ॥
यविक्रयकर्त्ता च कृषिवाणिज्यशासनः। प्रिया प्रीतिपरा नित्यं व्रतानामनुकाङ्क्षिणी ॥ २ ॥
कचित् क्रोधश्च जायेत अवाक्यं वाक्यकारिणी। उदरे वातजा रोगाः शिरोऽर्तिर्नेत्रतोदकृत्॥ ३ ॥
पस्मारी भवत्येव एकद्वित्र्यन्तरे दिने। केन कर्मविपाकेन सत्यं कथय भास्कर ॥ ४ ॥

श्रीसूर्य उवाच।

तूकर्म कृतं नैव स्त्रीकृतं नात्र संशयः। पूर्वजन्मनि शूद्री सा द्विजभक्तिपरायणा ॥ ५ ॥
तानि विविधान्येव कृतानि भुवि मानद। स्वगृहे धान्यराशिं सा भक्षणायानयत्पुरा ॥ ६ ॥
वत्सा ब्राह्मणस्य गौर्नित्यं जग्धवती च तम्। तया गृहीत्वा लकुटीं भृशं कुक्षौ प्रताडिता ॥७॥
गर्भायाः सुरभ्या वै गर्भकुक्ष्युपघातनात्। मृतोऽसौ गर्भमध्यस्थः प्रसवो दुःखिता भृशम्॥८॥
शुदुःखेन सुरभी भृशमाक्रन्दती मृता। तेन कर्मविपाकेन नरकं प्राप्य दारुणम् ॥ ९ ॥
श्वान्मानुषमापन्ना व्रतदानप्रभावतः। इदं तु तृतीयं जन्म मृतापत्यं खगेश्वर ॥ १० ॥
प्तजन्म प्रजायेत गोस्त्रीब्रह्मप्रघातिका। नानादुष्कर्मणा सा च नानापत्यार्थदुःखभाक् ॥११ ॥

अरुण उवाच।

ायश्चित्तं वद स्वामिन् येनापत्यं प्रजीवति। अनुग्राह्योऽस्म्यहं देव लोकानां हितकाम्यया ॥१२॥

श्रीसूर्य उवाच।

ासे नभसि संप्राप्ते सानुकूल्यहेऽहनि। सपत्नीकः शुचिः स्नात औषधैः स्नानमन्त्रतः ॥ १३ ॥
पोषणं दिवा रात्रौ त्रयोदश्यां च भक्तितः। पौर्णमास्यां दिनं प्राप्य प्रातश्चानुदिते रवौ ॥१४॥
पुरभ्यास्तु सगर्भाया गोमयेनानुलेपयेत्। तत्रोपरि गवां स्थानं लिखेत्तत्र दिवानिशम् ॥ १५ ॥
मर्हणाद्युपचारैश्च कुंकुमाद्युपचार्चयेत्। कुर्यादष्टदलं पद्मं चित्रवर्णं सुशोभनम् ॥ १६ ॥
त्रोपरि न्यसेद्देवं माधवं कलशेऽर्चयेत्। सौवर्णे राजते पद्मे सायुधं सचतुर्भुजम् ॥ १७ ॥
पचारैः शुभैर्गन्धैर्धूपैश्च कुसुमादिभिः। विष्णुसूक्तेन सूक्तेन श्रियाः सूक्तेन पूजनम् ॥ १८ ॥
पुष्पैश्च धूपगन्धाद्यैरर्चयेद्विविधैर्गुणैः। रुद्रैकादशभिश्चैव जपेद्रुद्रं विधानतः ॥ १९ ॥
पूजालक्षमिदं पुण्यमर्चयेद्गन्धवारिभिः। शतमष्टोत्तरं हुत्वा चरुणा पायसेन च ॥ २० ॥
रुद्रस्यायुतहोमश्च समिधाज्यसमाहुतिः। एवं पृथग्विधानेन विष्णुरुद्रादिपूजनम् ॥ २१ ॥
होमान्ते विप्रभोजान्ते मन्त्रमेनमुदीरयेत्। "यन्मया कर्मवशतः पुरा जन्मन् दुरात्मना ॥ २२ ॥
गोसगर्भोपघातानां लकुट्या कुक्षिताडनम्। तेन कर्मवशात्प्राप्तं मृतगर्भादिकं भृशम् ॥ २३ ॥
मृतसंततिदुःखानि प्राप्यन्ते महदेनसः। तत्तदेनोविनाशार्थं दानं संप्रददे त्विदम्" ॥ २४ ॥
स्वस्त्यस्तु चेति तत्रोक्ता कोऽदादिति विसर्जनम्। सर्पिष्यात्मानमालोक्य अन्यान्वै तोषयेद्द्विजान्
भूमिद्रविणवासांसि दानं दत्त्वा विधानतः। व्रतान्ते सुरभिं दद्याद्धैमीं द्रव्यादिशक्तितः ॥ २६ ॥
अहःशेषं ततः शेषं भोजयेदिष्टबन्धुभिः। ऐहिकं लक्षणं तस्य शरीरेऽप्युपजायते ॥ २७ ॥

---

१ पाठोऽयं नास्ति–खपु०। २ तत्र मन्त्रितः–खपु०। ३ त्रयोदश्यामुभक्तितः–खपु०। ४ लिखेदथ समाविशेत्–खपु०।

काष्ठलोष्टादिशस्त्राद्यैर्हतः स्यादुपलेखनात्। शृङ्गिणां चोपघाताच्च जायन्ते व्रणजातयः॥
जलाकुलोत्थः स्पर्शाग्निस्तादृशस्तत्र जायते। स्त्रीणांऽगे विकृतिर्व्याधिस्तिलव्रणमयादिकः[1]
पैतृजामातुलानीनां वैधव्यार्त्तिः स्वसादिषु ॥ ३० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्रयोविंशत्यधिकद्विशततमः ॥ २२३ ॥

श्रीसूर्य उवाच।

या काचिद्ब्राह्मणी पूर्वभवे मोहात्सुरां पिबेत्। प्रदरेणातिदुःखेन सात्र जन्मनि पीडिता
प्रायश्चित्तं परं तस्याः प्रदरस्य निवारकम्। दद्याद्रुक्ममयं पद्मं सपत्रं ब्रह्मदैवतम्
ब्राह्मणाय सुशीलाय पूजिताय निवेदयेत् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुर्विंशत्यधिकद्विशततमः ॥ २२४ ॥

श्रीसूर्य उवाच।

पूर्वजन्मनि यो विप्रस्त्रिविधां वै सुरां पिबेत्। मूत्राविरोधरोगेण सोऽत्र मृत्युवशं नयेत्॥
चिह्नेन श्यावदन्तेन लक्षितः पापजः सदा। सप्तजन्मनि रोगेण मूत्रकृच्छ्रेण नश्यति॥
दृष्टात्प्राक्पापजात्सूत प्रायश्चित्तं न विद्यते। पापक्षयेऽवशेषे च कृच्छ्रं सान्तपनं चरेत्॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचविंशत्यधिकद्विशततमः ॥ २२५ ॥

श्रीसूर्य उवाच।

काचित्पूर्वभवे पुण्या मुखजात्र च बाहुजा। देशे सारस्वते ब्राह्म्यां सर्वधर्मान्विता सती॥
क्षयरोगयुता चात्र युवभावे पतत्रिण। प्राक्पापाद्दुस्तरात्सूत कण्ठपाशादिसंभवात्॥
निष्कृतिं कदलीं दद्यात्सुवर्णत्रयसंयुताम्। भोजयेद्ब्राह्मणान्सूत शिवपूजनतत्परान्॥
या त्वेवं कुरुते भक्त्या कदलीदानमुत्तमम्। नश्येत्क्षयरुजा तस्या अपि प्राणप्रणाशिनी॥
आयुर्वर्षाणि तच्चोक्तान्यत्र सप्ततिसंख्यया ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षड्विंशत्यधिकद्विशततमः ॥ २२६ ॥

श्रीसूर्य उवाच।

यो नरोऽतिबलोत्कर्षात्परस्त्रीं कामयेत्पुरा। अधुना यौवने प्राप्ते सोन्मादी जायते भृशम्।
दद्यात्प्रजापतिं देवं सौवर्णं शक्तितोऽण्डज। मृगं स्वर्णमयं तद्वत्पूजयित्वा विधानतः॥
भोजयेद्ब्राह्मणान्भक्त्या होमयेच्च जपेत्तथा। गायत्रीं विधिना सूत ह्युन्मादान्मुच्यतेऽधुना।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्तविंशत्यधिकद्विशततमः ॥ २२७ ॥

श्रीसूर्य उवाच।

या नारी प्राग्भवे सूत परस्वर्णापहारिणी। सात्र जन्मनि रोगेण कुनखेन निपीड्यते॥
दद्यात्सुवर्णशतकं विप्राय विनतात्मज। सुवर्णस्तेयपापेन मुच्यतेऽत्रैव जन्मनि॥
चान्द्रायणत्रयं कुर्यात्कार्तिके मासि शोभने ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोऽष्टाविंशत्यधिकशततमः ॥ २२८ ॥

---

१ व्याधिः कुलव्रणः—खपु० । २ ब्राह्म—खपु० ।

श्रीसूर्य उवाच।

ह्यग्नी या भवेत्पूर्वं भवे नारी पतिव्रता। रक्तार्बुदेन रोगेण बाध्यते चात्र जन्मनि ॥ १ ॥
तं चरेन्महाभाग प्राजापत्यचतुष्टयम्। सप्तधान्येन दानेन रक्तार्बुदविनाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकोनत्रिंशदधिकद्विशततमः ॥ २२९ ॥

श्रीसूर्य उवाच।

ष्यहारी च पुरुषश्चित्रकुष्ठी प्रजायते। स तत्पापविशुद्ध्यर्थं ब्राह्मणाय प्रदापयेत् ॥ १ ॥
र्णं पलत्रयं शुद्धं कुरुक्षेत्रे पतत्रिण। प्राजापत्यत्रयं सूत चरेत्पापप्रणाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्रिंशदधिकद्विशततमः ॥ २३० ॥

श्रीसूर्य उवाच।

श्चिन्म्लेच्छकुलोत्पन्नो बहुद्रव्यान्वितः सुधीः। स्वधर्मनिरतश्चापि दयालुः सत्यसंयुतः ॥ १ ॥
गी शूरो महोत्साही देशे केरलके सुत। स्वामिधर्मपरो नित्यं सपत्नीकः सपुत्रकः ॥ २ ॥
जाः पालयतस्तस्य शूरस्यापि महात्मनः। दुष्टाः प्रजाः क्रोधयुक्ता बभूवुर्विमुखास्तदा ॥ ३ ॥
स्मिन्काले ह्यभूद्युद्धं घोरं तस्मिन्पुरे सुत। संग्रामभूमौ स मृतो यवनश्च सपुत्रकः ॥ ४ ॥
स्य पत्नी महाभागा साध्वी पतिपरायणा। तस्मिन्मृते मृता सा तु भर्तुः प्राणावलम्बिनी ॥५॥
ातयित्वा तु शस्त्रेण स्वशरीरं पतिव्रता। मृते पत्यौ न जीवामीत्युक्त्वा मृतवती तथा ॥ ६ ॥
द्रुणादन्तकालेऽपि दिवं प्राप्ता सभर्तृका। भुक्त्वा तत्र महाभोगानपूर्वान्स्वामिना सह ॥ ७ ॥
ानाप्रजाघातनजात्पापात्पूर्वसमुद्भवात्। क्षीणपुण्या तथा सूत म्लेच्छदेशे समुद्गता ॥ ८ ॥
सिन्धोः पश्चिमभागे तु शतयोजनसंमिते। गौरः सुरूपो दीर्घश्च बहुविद्याविशारदः ॥ ९ ॥
ानाभोगसुखैर्युक्तो[1] गजयूथैः समावृतः। पत्त्यश्वरथसंकीर्णस्तथा भैरवशासनः ॥ १० ॥
होग्रपुत्रपौत्राढ्यश्चाद्यन्तसुखसंयुतः। देशेदेशेऽधिकाराढ्यः स म्लेच्छः पृथिवीपतिः ॥ ११ ॥
ीसहाय आत्मभोगी तथा पुत्रसहायतः। सुखैश्वर्ययुता सापि यवनी तद्वशादिह ॥ १२ ॥
ाक्सहायश्च सोऽप्यत्र सपुत्रश्च महाप्रभुः। एवं जन्मफलं प्रोक्तं ससहायं पतत्रिण ॥ १३ ॥
ामिधर्मकृतात्पुण्यात्तदर्थमरणात्तथा। भविष्यति गतिस्तेषां पूर्वपुण्यात्पतत्रिण ॥ १४ ॥
श्वाशीतिमितायुश्च न चारिष्टे भवेन्मृतिः। रिष्टं पञ्चाशदब्दे तु स्वदेहान्तसमं सुत ॥ १५ ॥
स्त्रप्रहारैर्विविधैः प्राप्ते त्वत्र रणाङ्गणे। प्रजापीडनजात्पापात्तद्वर्षे नात्र संशयः ॥ १६ ॥
द्यात्कालनरं तत्र ब्राह्मणाय कुटुम्बिने। देयं हिरण्मयं तद्वद्गजं शतपलात्मकम् ॥ १७ ॥
कुरुक्षेत्रादितीर्थेषु संक्रान्त्यादिषु पर्वसु। सर्वोपस्करसंयुक्तं द्वयमेतच्च पुत्रक ॥ १८ ॥
हारिष्टहरं प्रोक्तं प्रायश्चित्तं परं खग। नातःपरतरं किंचिद्दानं कालनरात्क्वचित् ॥ १९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकत्रिंशदधिकद्विशततमः ॥ २३१ ॥

श्रीसूर्य उवाच।

ा काचिद्यौवने नारी रमते स्वेच्छया परम्। बलात्कारेण पुरुषं सात्रोन्मादेन पीडिता ॥ १ ॥
त्पापशमनं सर्वमुपायं शृणु यत्नतः। कृत्वा सुवर्णजं वायुं मृगं हैमं च वाहनम् ॥ २ ॥
र्वोपस्करसंयुक्तं दद्याद्विप्राय धीमते। न प्राप्नोति तदोन्मादभावं दानप्रभावतः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो द्वात्रिंशदधिकद्विशततमः ॥ २३२ ॥

---

१ सुखैश्वर्यगज–खपु० । २ पाठोऽयं नास्ति–खपु० ।

काष्ठलोष्टादिशस्त्राद्यैर्हतः स्यादुपलेखनात् । शृङ्गिणां चोपघाताच्च जायन्ते व्रणजातयः ॥
जलाकुलोत्थः स्पर्शाग्निस्तादृशस्तत्र जायते । स्त्रीणांऽगे विकृतिर्व्याधिस्तिलव्रणमयादिकम्[1] ॥
पैतृजामातुलानीनां वैधव्यार्त्तिः स्वसादिषु ॥ ३० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्रयोविंशत्यधिकद्विशततमः ॥ २२३ ॥

श्रीसूर्य उवाच ।

या काचिद्ब्राह्मणी पूर्वभवे मोहात्सुरां पिबेत् । प्रदरेणातिदुःखेन सात्र जन्मनि पीडिता ॥
प्रायश्चित्तं परं तस्याः प्रदरस्य निवारकम् । दद्याद्रुक्ममयं पद्मं सपत्रं ब्रह्मदैवतम् ॥
ब्राह्मणाय सुशीलाय पूजिताय निवेदयेत् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुर्विंशत्यधिकद्विशततमः ॥ २२४ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि यो विप्रस्त्रिविधां वै सुरां पिबेत् । मूत्राविरोधरोगेण सोऽत्र मृत्युवशं नयेत् ॥
र्चिह्नेन श्यावदन्तेन लक्षितः पापजः सदा । सप्तजन्मनि रोगेण मूत्रकृच्छ्रेण नश्यति ॥
दृढात्प्राक्पापजात्सूत प्रायश्चित्तं न विद्यते । पापक्षयेऽवशेषे च कृच्छ्रं सान्तपनं चरेत् ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचविंशत्यधिकद्विशततमः ॥ २२५ ॥

श्रीसूर्य उवाच ।

काचित्पूर्वभवे पुण्या मुखजात्र च वाहुजा । देशे सारस्वते ब्राह्म्यां[2] सर्वधर्मान्विता सती ॥
क्षयरोगयुता चात्र युवभावे पतत्रिण । प्राक्पापाद्दुस्तरात्सूत कण्ठपाशादिसंभवात् ॥
निष्कृतिं कदलीं दद्यात्सुवर्णत्रयसंयुताम् । भोजयेद्ब्राह्मणान्सूत शिवपूजनतत्परान् ॥
या त्वेवं कुरुते भक्त्या कदलीदानमुत्तमम् । नश्येत्क्षयरुजा तस्या अपि प्राणप्रणाशिनी ॥
आयुर्वर्षाणि तच्चोक्तान्यत्र सप्ततिसंख्यया ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षड्विंशत्यधिकद्विशततमः ॥ २२६ ॥

श्रीसूर्य उवाच ।

यो नरोऽतिबलोत्कर्षात्परस्त्रीं कामयेत्पुरा । अधुना यौवने प्राप्ते सोन्मादी जायते भृशम् ॥
दद्यात्प्रजापतिं देवं सौवर्णं शक्तितोऽण्डज । मृगं स्वर्णमयं तद्वत्पूजयित्वा विधानतः ॥
भोजयेद्ब्राह्मणान्भक्त्या होमयेच्च जपेत्तथा । गायत्रीं विधिना सूत ह्युन्मादान्मुच्यतेऽधुना ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्तविंशत्यधिकद्विशततमः ॥ २२७ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे सूत परस्वर्णापहारिणी । सात्र जन्मनि रोगेण कुनखेन निपीडयते ॥
दद्यात्सुवर्णशतकं विप्राय विनतात्मज । सुवर्णस्तेयपापेन मुच्यतेऽत्रैव जन्मनि ॥
चान्द्रायणत्रयं कुर्यात्कार्तिके मासि शोभने ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोऽष्टाविंशत्यधिकशततमः ॥ २२८ ॥

---

१ व्याधिः कुलव्रणः—खपु० । २ ब्राह्म—खपु० ।

श्रीसूर्य उवाच।

वैश्यघ्नी या भवेत्पूर्वं भवे नारी पतिव्रता। रक्तार्बुदेन रोगेण बाध्यते चात्र जन्मनि ॥ १ ॥
व्रतं चरेन्महाभाग प्राजापत्यचतुष्टयम्। सप्तधान्येन दानेन रक्तार्बुदविनाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकोनत्रिंशदधिकद्विशततमः ॥ २२९ ॥

श्रीसूर्य उवाच।

रौप्यहारी च पुरुषश्चित्रकुष्ठी प्रजायते। स तत्पापविशुद्ध्यर्थं ब्राह्मणाय प्रदापयेत् ॥ १ ॥
स्वर्णं पलत्रयं शुद्धं कुरुक्षेत्रे पतत्रिण। प्राजापत्यत्रयं सूत चरेत्पापप्रणाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायत्रिंशदधिकद्विशततमः ॥ २३० ॥

श्रीसूर्य उवाच।

कश्चिन्म्लेच्छकुलोत्पन्नो बहुद्रव्यान्वितः सुधीः। स्वधर्मनिरतश्चापि दयालुः सत्यसंयुतः ॥ १ ॥
त्यागी शूरो महोत्साही देशे केरलके सुत। स्वामिधर्मपरो नित्यं सपत्नीकः सपुत्रकः ॥ २ ॥
प्रजाः पालयतस्तस्य शूरस्यापि महात्मनः। दुष्टाः प्रजाः क्रोधयुक्ता बभूवुर्विमुखास्तदा ॥ ३ ॥
तस्मिन्काले ह्यभूद्युद्धं घोरं तस्मिन्पुरे सुत। संग्रामभूमौ स मृतो यवनश्च सपुत्रकः ॥ ४ ॥
तस्य पत्नी महाभागा साध्वी पतिपरायणा। तस्मिन्मृते मृता सा तु भर्तुः प्राणावलम्बिनी ॥५॥
घातयित्वा तु शस्त्रेण स्वशरीरं पतिव्रता। मृते पत्यौ न जीवामीत्युक्त्वा मृतवती तथा ॥ ६ ॥
तद्पुण्यादन्तकालेऽपि दिवं प्राप्ता सभर्तृका। भुक्त्वा तत्र महाभोगानपूर्वान्स्वामिना सह ॥ ७ ॥
नानाप्रजाघातनजात्पापात्पूर्वसमुद्भवात्। क्षीणपुण्या तथा सूत म्लेच्छदेशे समुद्गता ॥ ८ ॥
सिन्धोः पश्चिमभागे तु शतयोजनसंमिते। गौरः सुरूपो दीर्घश्च बहुविद्याविशारदः ॥ ९ ॥
नानाभोगसुखैर्युक्तो[1] गजयूथैः समावृतः। पत्त्यश्वरथसंकीर्णस्तथा भैरवशासनः ॥ १० ॥
महोग्रपुत्रपौत्राढ्यश्चाद्यन्तसुखसंयुतः। देशेदेशेऽधिकाराढ्यः स म्लेच्छः पृथिवीपतिः ॥ ११ ॥
स्त्रीसहाय आत्मभोगी तथा पुत्रसहायतः। सुखैश्वर्ययुता सापि यवनी तद्वशादिह ॥ १२ ॥
प्राक्सहायश्च सोऽप्यत्र सपुत्रश्च महाप्रभुः। एवं जन्मफलं प्रोक्तं ससहायं पतत्रिण ॥ १३ ॥
स्वामिधर्मकृतात्पुण्यात्तदर्थमरणात्तथा। भविष्यति गतिस्तेषां पूर्वपुण्यात्पतत्रिण ॥ १४ ॥
पञ्चाशीतिमितायुश्च न चारिष्टे भवेन्मृतिः। रिष्टं पञ्चाशदब्दे तु स्वदेहान्तसमं सुत ॥ १५ ॥
शस्त्रप्रहारैर्विविधैः प्राप्ते त्वत्र रणाङ्गणे। प्रजापीडनजात्पापात्तद्वर्षे नात्र संशयः ॥ १६ ॥
दद्यात्कालनरं तत्र ब्राह्मणाय कुटुम्बिने। देयं हिरण्मयं तद्वद्गजं शतपलात्मकम् ॥ १७ ॥
कुरुक्षेत्रादितीर्थेषु संक्रान्त्यादिषु पर्वसु। सर्वोपस्करसंयुक्तं द्वयमेतच्च पुत्रक ॥ १८ ॥
महारिष्टहरं प्रोक्तं प्रायश्चित्तं परं खग। नातःपरतरं किंचिद्दानं कालनरात्क्वचित् ॥ १९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकत्रिंशदधिकद्विशततमः ॥ २३१ ॥

श्रीसूर्य उवाच।

या काचिद्यौवने नारी रमते स्वेच्छया परम्। बलात्कारेण पुरुषं सात्रोन्मादेन पीडिता ॥ १ ॥
तत्पापशमनं सर्वमुपायं शृणु यत्नतः। कृत्वा सुवर्णजं वायुं मृगं हैमं च वाहनम् ॥ २ ॥
सर्वोपस्करसंयुक्तं दद्याद्विप्राय धीमते। न प्राप्नोति तदोन्मादभावं दानप्रभावतः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो द्वात्रिंशदधिकद्विशततमः ॥ २३२ ॥

---

१ सुखैश्वर्यगज–खपु० । २ पाठोऽयं नास्ति–खपु० ।

श्रीसूर्य उवाच ।

पुत्रहारी च यः पूर्वं जन्मन्यत्रैव जन्मनि । श्लेष्मरोगेण सततं बाध्यते विनतासुत ॥
दद्यात्तत्पापनाशाय त्रपुं विप्राय धीमते । पलानां त्रिंशतं तस्मात्तस्माद्रोगाद्विमुच्यते ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्रयस्त्रिंशदधिकद्विशततमः ॥ २३३ ॥

श्रीसूर्य उवाच ।

विद्यमाने पतौ पुत्र जाराद्गर्भं धृतं पुरा । सा चात्र पादजा दुष्टा न च गर्भं दधाति वै ॥
काश्यां वासान्महाभाग श्रद्धया रुद्रपूजनात् । कन्याविवाहात्सततं दरिद्रद्विजपालनात् ॥
धारयिष्यति सा गर्भं प्रायश्चित्तं यथोदितम् । प्रायश्चित्तेऽकृते रिष्टं चत्वारिंशन्मितेऽब्दके ॥
प्रायश्चित्ते कृते सूत षडशीत्यब्दजीवितम् ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुस्त्रिंशदधिकद्विशततमः ॥ २३४ ॥

श्रीसूर्य उवाच ।

आखेटकं विना यस्तु हस्तिनं घातयेत्[2]पुरा । सोऽत्र जन्मनि जायेत सर्वकार्येष्वसिद्धिकृत् ॥
तस्मिन्नेव तथाकाले तस्य रिष्टं प्रकीर्तितम् । विंशन्मितेऽब्दे पक्षीन्द्र कालशस्त्रान्मृतिं वदेत् ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचत्रिंशदधिकद्विशततमः ॥ २३५ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि या नारी लोभान्मोहात्त्रपुं हरेत् । सात्र जन्मनि पक्षीन्द्र श्लेष्मरुक्संयुता भवेत् ॥
शतत्रयपलं दद्यात्त्रपुं तस्यापनुत्तये । तस्मिन्पापे क्षये सूत श्लेष्मरोगस्य नाशनम् ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षट्त्रिंशदधिकद्विशततमः ॥ २३६ ॥

अरुण उवाच ।

विप्रवंशे समुत्पन्नः शक्तिमान्वेदपारगः । धनधान्यसमायुक्तो विशाल[3]श्चासनोर्जितः ॥
सव्रतः शक्तिमान्धीरः किंचिद्व्याधिसमन्वितः । इन्द्रियाणां बलं हत्वा गेहानां जायते भृशम् ॥
उदरार्तिरसृग्वातः किंचिद्देहे प्रवर्तते । तस्य प्रिया शुभाचारा पतिभक्तिपरायणा ॥
सत्यवाक्सत्यजा लोके व्रतानामनुकांक्षिणी । बहुपुत्रप्रसूता च किंचित्पुत्रा प्रजायते ॥
अथवा मृतपुत्रा च पुत्रीषु जीवितास्वपि । केन कर्मविपाकेन सत्यं वद दिवस्पते ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि विप्रस्तु स जातः पञ्चमे त्विह । तस्य गेहे च प्रवृत्ता कन्यायाः प्रौढता दृढम् ॥
भूरिद्रविणलोभेन वृद्धविप्राय दापिता । तद्दत्तदाहृतं वित्तं सर्वस्वं तद्वशादपि ॥
यावत्कन्या भवेत्प्रौढा वरार्थं गुणशालिनी । पतिभक्तिपरा नित्यं यावत्कन्या सुतार्थिनी ॥
किंचिद्वर्षे व्यतिक्रान्ते तावद्विप्रो मृतश्च सः । सा बाला विधवा जाता पत्यपत्यर्थदुःखिनी ॥
व्रततीर्थरता नित्यं सत्यानामनुकाङ्क्षिणी । बहुवर्षैस्तया यावन्नियमैः शोषितं वपुः ॥
पितुर्गृहे धनं भूरि त्वर्पितं च तया भृशम् । किंचित्कालवशात्प्राप्ता मृतिं सा ब्राह्मणी खग ॥
सा पुत्री ह्युदरे भूत्वा सागमज्जन्मजन्मनि । कन्या बहुविधास्तस्य निराधारा मृता हि वै ॥
तेन कर्मविपाकेन पूर्वकन्याः बहुप्रजा । तस्य भर्तुर्भवेद्गर्भमायातो मृत्युमिच्छति ॥

---

१ सम्यक्—खपु० । २ घातयेन्नरः—खपु० । ३ शालिभिश्च शतार्जितः—खपु० । ४ मृतपत्य खिनी—खपु० । ५ शतमृच्छति—खपु० ।

पुनर्जन्म पुनर्मृत्युस्तत्कर्मनिष्कृतिं विना। कन्याविक्रयकर्ता च रौरवे नरके मतः ॥ १४ ॥
यातनां बहुधा भुक्त्वा वर्षाणां च सहस्रकम्। पश्चान्मानुषमापन्नो व्रतदानप्रभावतः ॥ १५ ॥
चतुर्थे त्वत्र वै जन्म बहुपुत्री प्रजायते। मृतपुत्रो मृतो गर्भस्तेन गर्भभवादिह ॥ १६ ॥
भार्या तस्यापि विप्रस्य पूर्वजन्मनि मानद। भर्तृविद्वेषिणी नित्यं चिरापत्यानुगामिनी ॥ १७ ॥
तेन कर्मविपाकेन भूरिकन्या मृतः सुतः॥ १८ ॥

अरुण उवाच।

प्रायश्चित्तं कथं देव येन पापं प्रशाम्यति। निष्कृतिं वद विश्वात्मन्पृथक् त्वं मे प्रकाशय॥ १९॥

श्रीसूर्य उवाच।

पुत्रिका यस्य जीवन्ति पुत्राणां नाशनं भवेत्। कर्मभेदेन येनेह शृणु त्वं कश्यपात्मज ॥ २० ॥
स्वकन्या वरयोग्या सा चेत्थं चिन्तासमाकुला। दशाब्दाश्चैव मानाय यथा भावं यथामति॥ २१॥
कन्यां रूपवतीं शान्तां समस्तगुणशालिनीम्। अलंकृतां यथाशक्ति वराय गुणशालिने ॥ २२ ॥
ब्राह्मणाय च विधिना दद्याच्च बहुदक्षिणाम्। महापापौघशमनं कन्यादानमतन्द्रितः ॥ २३ ॥
कन्याविवाहसमये महादानविधिं चरेत्। एवं कृतविधिः सूत कन्यां दत्त्वा विधानतः ॥ २४ ॥
शान्तिः कार्या च सर्वत्र विस्तारैर्ऋत्विगादिभिः। भूमिद्रविणवासांसि कन्यावासांसि दापयेत् २५॥
गृहदानं ततो दद्याद्यथोपस्करसंयुतम्। वर्षे वर्षे तु संपूर्णे अन्नवस्त्रादि चोत्सृजेत् ॥ २६ ॥
एवं कृतविधिः सूत बहुपुत्रा यशस्विनी। पापं पुत्रविनाशाख्यं कन्यापत्योदयश्च यत् ॥ २७ ॥
तस्य पापस्य नाशार्थं कन्यादानविधिः स्मृतः। नाशयेत्तत्कृतं पापं द्विजानां चैव पूजनात्॥ २८॥
यजन् यज्ञविधानेन ब्राह्मणान् स्वस्ति वाचयेत्। विनायकाम्बिकामूर्तीर्हेमनिष्कप्रमाणतः ॥ २९॥
आचार्याय ददेत्राऽसौ नानाकर्माघशान्तये। ऐहिकं लक्षणं तस्य शरीरे चोपजायते ॥ ३० ॥
जिह्वारसनादन्तोष्ठव्रणो वातादिदोषकृत्। नृपचौराग्निहानिश्च वित्तं यातमितस्ततः ॥ ३१ ॥
तप्यमानेन मनसा दूयते भृशमाधिना। सर्पिष्यात्मानमालोक्य प्रायश्चित्तमितीरितम् ॥ ३२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके सप्तत्रिंशदधिकद्विशततमः ॥ २३७ ॥

श्रीसूर्य उवाच।

या ताम्रहारिणी नारी लोभात्पूर्वभवे सुत। औदुम्बरेण रोगेण पीड्यते बहुपीडया ॥ १ ॥
पापं विचार्य यत्नेन ताम्रं दद्याच्च शक्तितः। तस्माद्दानान्महाभाग पापं नश्यति तत्क्षणात्॥ २॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अष्टत्रिंशदधिकद्विशततमः ॥ २३८ ॥

श्रीसूर्य उवाच।

गर्भवत्यानया भुक्तं पूर्वजन्मनि मानद। आसन्नगर्भा जायास्तु मासं गर्भस्य धारणात् ॥ १ ॥
तेन कर्मविपाकेन बाहुजा सात्र कीर्तिता। पूर्वजन्मन्यसौ विप्रा न च गर्भं दधात्यलम् ॥ २ ॥
प्रायश्चित्तमिदं तस्याश्चात्र सर्वाघमोचनम्। कृत्वाऽजां गर्भसंयुक्तां राजतीं षट्पलात्मिकाम् ॥ ३॥
वैश्वानरस्तथा कार्यः पञ्चमाषैर्हिरण्मयः। पूजयित्वा ततो दद्याद्विजाय विधिनाण्डज ॥ ४ ॥
यैवं कुर्याद्विधानेन सर्वपापापनोदनम्। तस्याः पुत्रविवृद्धिः स्यादिह जन्मनि वै ध्रुवम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके एकोनचत्वारिंशदधिकद्विशततमः ॥ २३९ ॥

श्रीसूर्य उवाच ।

मृगयां प्राप्य पक्षीन्द्र गजराजवधात्पुरा । जायते गजचर्मा वै स नरोऽत्रैव जन्मनि ॥ १
गणेशप्रतिमां दद्यात्सौवर्णीं द्विपलात्मिकाम् । गन्धपुष्पैश्च संपूज्य तस्माद्रोगाद्विमुच्यते ॥ २
कारयेद्गणनाथस्य लक्षजापं विधानतः । होमयेत्तद्दशांशेन मुच्यते सर्वकिल्बिषात् ॥ ३

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चत्वारिंशदधिकद्विशततमः ॥ २४० ॥

श्रीसूर्य उवाच ।

यो हरेत्परसिद्धान्नं प्राक् क्षुत्पीडाप्रपीडितः । सोऽत्र जन्मनि पक्षीन्द्र शूलरुक् पीडितोऽधुना ॥ १
अन्नदानेन विप्राणां रसदानाद्विशेषतः । मुच्येत शूलजाद्रोगान्नात्र कार्या विचारणा ॥ २
सुवर्णशूलदानाद्वा विप्रायात्र कुटुम्बिने । शूलदोषोपशमनमिह जन्मनि वै ध्रुवम् ॥ ३

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकचत्वारिंशदधिकद्विशततमः ॥ २४१ ॥

श्रीसूर्य उवाच ।

मूर्धाभिषिक्तः प्राक् सूत बभूव पुरुषोत्तमः । स्वजातिषु महाभाग दृढकर्मक्रियापरः ॥ १
वैराटदेशे निवसन् राजकार्ये रतः सदा । कृतवान् गोगृहं तत्र शत्रूणां भयदायकः ॥ २
बालवत्सा मृतातत्र पुरे तस्मिन् खगोत्तम । पापमाचरितं तेन नृपाज्ञाकारिणा दृढम् ॥ ३
ततो यमपुरं प्राप्तो भुक्त्वा भोगांस्तदुक्तवत् । विष्णुपूजनजात्पुण्यात्प्राप्तोऽत्र यमुनातटे ॥ ४
चारणो धर्मनिरतो बहुपापात्प्रमुच्यते । एवंकृतविधेः सूत सर्वपापविनाशनम् ॥ ५
तेन पुत्रविवृद्धिः स्यादिह जन्मति जायते । अकृते तु यथाशक्त्या प्रायश्चित्तं यथोचितम् ॥ ६
रिष्टं षष्टिमिते वर्षे दारुणं शत्रुवैकृतम् । प्रायश्चित्ते कृतेऽब्दानां जीवनं पञ्चसप्ततिम् ॥ ७
जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् ॥ ८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो द्विचत्वारिंशदधिकद्विशततमः ॥ २४२ ॥

श्रीसूर्य उवाच ।

शूद्रोऽभवन्महाभाग प्राग्जन्मन्यतिकोविदः । ग्रामवासी सदा सौम्यः शतद्रुनिकटेऽण्डज ॥ १
शूद्रकन्या च तेनैव हृद्या षोडशवार्षिकी । भुक्तातिकामलोभेन बलात्कारेण दूषिता ॥ २
स चाथ मम पुत्रस्य भुक्त्वा भैरवशासनम् । पूजनाच्छिवलिङ्गानां प्रागत्रापि च पक्षिराट् ॥ ३
षण्ढस्तेन विपाकेन प्राप्तसर्वमनोरथः । महोद्यमी महोत्साहो महाविभवविस्तरः ॥ ४
मृत्युश्चास्यात्र गङ्गायां पुण्याच्च शिवपूजनात् । भविष्यति महाभाग पापान्ते चात्र सद्गतिः ॥ ५

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्रिचत्वारिंशदधिकद्विशततमः ॥ २४३ ॥

श्रीसूर्य उवाच ।

पादरोगयुतः सूत जायते सोऽत्र जन्मनि । यो मार्गहा पुरा लोके परलुण्ठतत्परः ॥ १
सोऽश्वदानाद्विधानेन ब्राह्मणाय पतत्रिण । न पश्यति महापीडां पादजां चाण्डसंभव ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुश्चत्वारिंशदधिकद्विशततमः ॥ २४४ ॥

श्रीसूर्य उवाच ।

अभवत्प्राग्भवे विप्रो ग्रामवासी वनाश्रितः । चोराधिपो महोग्रश्च तत्संसर्गी खगाधिप ॥ १
दत्तानि तेन ग्रहणे दानानि विविधानि च । गोभूम्यश्वादिकान्येव ब्राह्मणेभ्योऽतिशक्तितः[1] ॥ २

१ सोऽत्र दानात्-खपु० ।

स भुक्त्वा नरकान् घोरान् पापात्पुण्याच्च शाश्वतान्।स्वर्गान्पर्वतभागे तु स जातो बाहुजोधुना॥३॥
वामनो राजसम्मानी महोग्रो मन्त्रपारगः। पुत्रहीनोऽप्यसौ सूत परवित्तस्य लुण्ठनात् ॥ ४ ॥
भवन्त्यत्र च ये पुत्रा म्रियन्ते नात्र संशयः। प्रायश्चित्तं प्रवक्ष्यामि येन पापं प्रशाम्यति ॥ ५ ॥
कृत्वा वेदघटान् सूत सौवर्णान् घृतपूरितान्। तदभावे राजतांश्च विप्रेभ्यः प्रतिपादयेत् ॥ ६ ॥
हरिवंशविधानेन शृणुयाद्भक्तितोऽण्डज। रौद्रं व्रतं चरेत्पश्चात्पूर्वपापविशुद्धये ॥ ७ ॥
नैतत्प्रकुर्याद्यः श्रुत्वा स नरः पुत्रवर्जितः। जायतेऽत्रैव पक्षीन्द्र कुर्यात्तत्पुण्यवर्धनम् ॥ ८ ॥
आयुरष्टौ तथाशीतिर्वर्षाणां कृतनिष्कृतेः ॥ ९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचचत्वारिंशदधिकद्विशततमः ॥ २४५ ॥

अरुण उवाच।

क्षात्रवंशे समुत्पन्नो वातदेहरुजाकरः। गुल्माद्या ह्युदरे बाधाः शिरोऽर्तिर्जायते सदा ॥ १ ॥
व्यापारो निष्फलस्तस्य किंचित्सेवादिना भवेत्। तस्य भार्याद्वयं चास्ति किंचिद्भक्तिपरायणम् २
अन्योन्यद्वेषभावाच्च किंचित्प्रीतिकरा परा। मृतवत्सा कथं जाता सत्यं कथय भास्कर ॥ ३ ॥
एको[1] गर्भः स्थिरीभूतो न प्रसूतिर्न पातनम्। केनोपायेन तन्मुक्तिः कथयस्व दिवाकर ॥ ४ ॥

श्रीसूर्य उवाच।

पूर्वजन्मनि शूद्रस्तु क्रयविक्रयकारकः। दानधर्मपरो नित्यं देवव्रतपरायणः ॥ ५ ॥
अन्योन्यद्वेषभावाच्च वर्तते च विधिस्ततः। कश्चिद्विप्रो धर्मपरो वेदशास्त्रार्थसाधकः ॥ ६ ॥
कदाचिद्दैवयोगाच्च भाविनोऽर्थस्य वै बलात्। तद्वित्तं ग्राहयामास शूद्रो म्लेच्छजनस्य[2] च ॥ ७ ॥
लङ्घनाय मतिं चक्रे ब्राह्मणो भार्यया सह। भर्त्सनैस्तर्जनाद्यैस्तु तद्धनं च न दापितम् ॥ ८ ॥
कतिपयैरेव शूद्रेण चान्येभ्यो वित्तासुत। म्लेच्छात्क्षयं तदा ज्ञात्वा ब्राह्मणः क्रोधसंकुलः ॥९॥
तदर्थमपि संक्रुद्ध आत्मघातं चकार ह। गर्भयुक्ता च भार्या वै भर्तारं पृष्ठतोऽन्वगात् ॥ १० ॥
हतं तस्यापि तत्सर्वं म्लेच्छराजेन तत्तदा। तावत्कालेन शूद्रोऽपि तेन म्लेच्छेन घातितः ॥११॥
ततो वै निरये वत्स वर्षायुतसहस्रशः। पाचितो नरके घोरे शूद्रो देहेन वै तदा ॥ १२ ॥
पश्चान्मानुषमापन्नो दानधर्मप्रभावतः। इदं तु तृतीयं जन्म शूद्रवंशस्समुद्भवम् ॥ १३ ॥
तेनैव कर्मणा युक्त अपत्यं नैव जायते ॥ १४ ॥

अरुण उवाच।

प्रायश्चित्तं वद स्वामिन् येन पापक्षयो भवेत्। निष्कृतिं सकलां ब्रूहि नारीणां हितकाम्यया॥१५॥

श्रीसूर्य उवाच।

संवत्सरं तीर्थसेवा एकाचित्तेन दम्पती। श्रवणं हरिवंशस्य विप्रस्योद्वाहनं तथा ॥ १६ ॥
तावत्यां क्रियया भूयः क्रमेणानेन यस्तदा। सुशुभे भूप्रदेशे तु गोमयाद्युपचर्चिते ॥ १७ ॥
कुर्यादष्टदलं पद्मं चित्रवर्णं सुशोभनम्। तन्मध्ये रुक्मिणीयुक्तं माधवं कलशेऽर्चयेत् ॥ १८ ॥
सौवर्णं राजतं पद्मं सायुधं सचतुर्भुजम्। उपचारैः शुभैर्गन्धैर्धूपैश्च कुसुमादिभिः ॥ १९ ॥
जननीसहितान्भूयः प्रद्युम्नाद्यांस्तथार्चयेत्। चारुदेहं चारुबाहुं चारुगुप्तं[3] यशस्विनम् ॥ २० ॥

---

१ भोज्यभावाच्चेति–खपु०। २ 'एकोऽपरै स्थिरीभूते'इति–खपु०। ३ नूढेति–खपु०। ४ तावद्भिश्च कृतो भूय इति–खपु०।

श्रीवत्साङ्कं पीतवस्त्रं सुचारुं पूजयेत्क्रमात्। पूजनं विष्णुभक्तेन तथा श्रीरसकोविदैः ॥ २१
पुष्पैः सगन्धधूपैश्च चार्चयेद्धुताहुतैः। ताद्विप्रासोऽथ तद्विष्णो विष्णो क्रमत नित्यशः ॥ २२
शेइतो देवाग्नि तथो विष्णो रेता देवाभिवद्भावेतो। शतमष्टोत्तरं हुत्वा चरुणा पायसेन वै ॥ २३
होमान्ते विप्रभोजान्ते मन्त्रमेतमुदीरयेत्। यन्मया पापभावेन कर्मान्धेन दुरात्मना ॥ २४
म्लेच्छराज्ये च व्यापारे सदा वै दुष्कृतं कृतम्। ब्राह्मणानां हृतं द्रव्यं नीतं वै भक्षणे बलात्॥ २५
द्रव्यापहरणात्प्राप्तं दुःखं नानाभवान्तरे। स्थिरगर्भं मृतापत्यं प्राप्तं तत्कर्मणः फलम् ॥ २६
तत्तदेनोविनाशाय दानं संप्रददे त्विदम्। स्वस्त्यस्त्वाति च तत्रोक्ता कोऽदादिति विसर्जनम्॥ २७
सर्पिष्यात्मानमालोक्य भोजयेद्दिष्टवान्धवान्। ऐहिकं लक्षणं तस्य शरीरे चोपजायते ॥ २८
हृद्दुःखं दीर्घनिःश्वासो लोचने साश्रुकर्दिते। काष्ठलोष्टादिशस्त्राद्यैर्घातः स्यादुपलेखनात् ॥ २९
जलाकुलत्वं स्पर्शेऽग्निस्तादृशा व्रणसंभवाः। क्षीणाङ्गो विकृतिर्व्याधौ तिलव्रणमुखादिकम् ॥ ३०
पितृजा मातुलान्यास्तु विधवार्तिः स्वस्रादिषु। स्वकुले प्रेतजा पीडा दुःखं वै पश्वपत्यजम् ॥ ३१
कर्मानुसारतो व्याधिश्चिह्नं तस्य सहायकम्। स्वकुले केऽपि वर्तन्ते पतिताचारचारिणः ॥ ३२
एवं तु लक्षयित्वा वै प्रायश्चित्तं ततो वदेत् ॥ ३३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षट्चत्वारिंशदधिशद्विशततमः ॥ २४६ ॥

श्रीसूर्य उवाच।

पूर्वं ह्याभीरजा काचिद्भूद्भर्तृपरायणा। महद्भिर्गोधनैर्युक्ता गवां पालनतत्परा ॥ १
गावस्तृषार्ताः सततं प्रपायां प्रेरितास्तथा। निदाघकाले संप्राप्ते बहिर्ग्रामाज्जलाशये ॥ २
अथान्यगावः सततं तस्मिन्नेव जलाशये। शनैः पानं प्रकुर्वन्त्यो जलं शीतलमुत्तमम् ॥ ३
ताडितास्ता भृशं गावो लकुटेन दृढेन वै। तत्रैकाऽति तृषायुक्ता गर्भभारान्विताऽपि या ॥ ४
न च त्यक्तं जलं सूत ताडितापि भृशं तया। तस्मिन् काले तदा सूत पतितो गर्भसंस्थितः ॥ ५
वत्सस्तत्ताडनाद्दुष्टान्मृतश्चापि च तत्क्षणात्। विचेष्टितमिदं यस्या सैवा वैश्याङ्गनाऽभवत् ॥ ६
नानाविभूतिसंयुक्ता नानापशुभिरन्विता। सुखभोगधनैर्धान्यैर्वाञ्छितार्थैस्समन्विता ॥ ७
प्राग्गोसेवनजात्पुण्यात्सर्वं प्राप्तं फलं त्विदम्। अथात्र गर्भपूर्णत्वे युवभावे खगाधिप ॥ ८
न मोचयति सा गर्भं दुःखेनाकुलिता भृशम्। एवं वर्षत्रयं यावन्मोचयिष्यति वै सुत ॥ ९
रिष्टमध्यत्रयं सूत वालवत्सवधादिह ॥ १० ॥

अरुण उवाच।

प्रायश्चित्तं वद स्वामिन् येन पापक्षयो भवेत्। उपकाराय लोकानां यतस्त्वं सर्वदर्शकः ॥ ११

श्रीसूर्य उवाच।

दद्याद्गां कपिलामेकां स्वर्णशृङ्गादिकान्विताम्। विप्राय वेदविदुषे तद्दोषशमनाय च ॥ १२
सुवर्णद्रामितां तद्वल्लेखां गां गर्भसंयुताम्। दद्याद्वेदविदुषाय पूर्वपापात्प्रमुच्यते ॥ १३
भोजयेच्च तथा शक्त्या विप्रान्वै होमयेत्तिलान्। मुच्यते गर्भजाद्दोषान्नात्र कार्या विचारणा॥ १४

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्तचत्वारिंशदधिकद्विशततमः ॥ २४७ ॥

---

१ शेरतो देवाग्नेतथो विप्रो रेता देवाभिषेद्भावतोदति—खपु० ।

श्रीसूर्य उवाच ।

बभूव पार्थिवः कश्चिद् गुर्जरे विनतासुत । धर्मकर्मसमायुक्तो देवतातिथिपूजकः ॥ १ ॥
पितृभक्तिपरो नित्यं दानानि विधिपूर्वकम् । दत्तानि च विशिष्टेभ्यो ब्राह्मणेभ्योऽतिशक्तितः ॥२॥
दैवाच्छत्रुगृहं गत्वा कृतं कर्म रुषा सुत । वैरिपुत्रः पुरा सूत पादभागेषु घातितः ॥ ३ ॥
कुन्तेनापि च तीक्ष्णेन दिवा वै शौर्यकर्मणा । स मृतस्तेन दुःखेन तन्माता ह्येकपुत्रिणी ॥४ ॥
पुत्रदुःखान्मृता सापि दत्त्वा शापं हि दारुणम् । यथा पुत्रविहीनाहं गच्छामि च यमालयम् ॥५॥
तथैव पुत्रशोकार्तो जन्मजन्मनि यास्यति । ततो बहुतिथे काले गतोऽसौ यमशासनम् ॥ ६ ॥
धर्मात्स्वर्गफलं भुक्त्वा पापाच्च नरकं तथा । पूर्वपुण्यप्रभावेण स जातो मुखजोऽधुना ॥ ७ ॥
विपाशानिकटे देशे वृषलग्ने विधुस्थिते । श्यामांगो धूसरस्तीक्ष्णः प्रभुर्देशाटने रतः ॥ ८ ॥
बहुस्त्रीधनसंयुक्तो मित्रप्रियंवदान्वितः । मानभोगसुखाढ्यश्च मितदो लोभसंयुतः ॥ ९ ॥
धर्मात्सर्वं फलं सूत भृशं पापफलं शृणु । क्रूरचेष्टो महालोभी सदा मात्सर्यसंयुतः ॥ १० ॥
जातपुत्रविहीनोऽसाविह जन्मनि जायते । प्रायश्चित्तं प्रवक्ष्यामि सर्वपापविशोधनम् ॥ ११ ॥
लोकानामुपकाराय शृणु सूत प्रयत्नतः । पलैर्दशमितैः कुर्याद्राजतं बाहुजं सुत ॥ १२ ॥
स्त्रीजनं तत्सुतं वापि तन्मातरमसंयुताम् । पूजयित्वा तु गन्धाद्यैः षोडशोरूपचारकैः ॥ १३ ॥
सूर्यभक्ताय शान्ताय तां दद्याद्धि कुटुम्बिने । पलपञ्चमितं रौक्मं कुर्याद्धरिहरात्मकम् ॥ १४ ॥
तथैव गणनाथं च लेख्यं पञ्चोपचारकैः । संपूज्य विधिवद्दद्यात्सर्वपापविशुद्धये ॥ १५ ॥
अष्टाक्षरं तथा मन्त्रं वैदिकं सूर्यदैवतम् । जपेदष्टसहस्रं तु तथा प्रणवपूर्वकम् ॥ १६ ॥
गायत्रीं पञ्चसाहस्रं दुष्टपापविमोचनीम् । कुर्याद्धोमं दशांशेन पश्चाद्ब्राह्मणभोजनम् ॥ १७ ॥
एवं कुर्याद्विधानेन प्रायश्चित्तं यथाविधि । न प्राप्नोति तदा रिष्टं षड्विंशाब्दं प्रकीर्तितम् ॥ १८ ॥
पञ्चवेदमिताब्दान्तमायुस्तस्य प्रकीर्तितम् ॥ १९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अ० अष्टचत्वारिंशदधिकद्विशततमः ॥ २४८ ॥

श्रीसूर्य उवाच ।

अज्ञानादवधीद्यश्च पूर्वजन्मन्यजां सुत । भविष्यत्यत्र पुरुषो ह्यधिकांगः कदाचन ॥ १ ॥
कस्तूरिकापलं दद्यात्स तत्पापविनाशनम् । अजमेकं सवस्त्रं च मुच्यते महदेनसः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अ० एकोनपञ्चाशदधिकद्विशततमः ॥ २४९ ॥

श्रीसूर्य उवाच ।

लोहहारी च पुरुष इह जन्मनि जायते । बर्बराङ्गाख्यरोगेण पीडितो वाऽत्र जन्मनि ॥ १ ॥
दद्यात्पलशतं लोहं विधिना पापशोधनम् । प्राजापत्यं चरेदेकं ततो वाऽनशनं परम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचाशदधिकद्विशततमः ॥ २५० ॥

श्रीसूर्य उवाच ।

सर्वैर्मनोरथैर्युक्ता काचिदासीन्मनोहरा । प्राग्भवेऽण्डज तत्सर्वं चेष्टितं शृणु सांप्रतम् ॥ १ ॥
नकुलानां बिले कृत्वा चातितप्तं हि वालुकम् । पूरितं च तथा सर्वं तद्वातार्थं पतत्रिण ॥ २ ॥
मृतः स तेन दाहेन नकुलः सकुलः खग । सापि मृत्युवशं प्राप्ता भुक्त्वा तु यमशासनम् ॥ ३ ॥

१ बन्धुस्त्रीति—खपु० । २ सप्तपञ्चमितेति—खपु० ।

पूर्वं शतद्रुदेशोत्था ह्यभूदत्र च पर्वते । पूर्वं राजकुले जाताऽत्रापि राजकुले सुत ॥ ४
प्राग्दानव्रतजात्पुण्यात्ततः पापफलाच्छृणु । सर्वे तद्देशजाः सूत तत्रैव मरणं गताः ॥ ५
जीवनं चात्र तस्याश्च वर्षमष्टोत्तरं शतम् । न मुच्यते महापापाद्दृढाज्जन्मत्रयेऽपि वा ॥ ६
कुरुक्षेत्रादिवासाच्च पापं नश्यति सांप्रतम् ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकपंचाशदधिकद्विशततमः ॥ २९१ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे पुत्र घातयेदजनन्दनम् । सगर्भा गर्भपुष्ट्यर्थं जायतेंगाधिका तु सा ॥ १
भोगादेव क्षयः प्रोक्तः समारब्धस्य कर्मणः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो द्विपंचाशदधिकद्विशततमः ॥ २९२ ॥

श्रीसूर्य उवाच ।

लोहं हरति याऽन्यस्य नारी बुद्धिविवर्जिता । अत्र जन्मनि सा नारी वर्वराङ्गान्विता भवेत् ॥ १
दद्यात्पलशतं लोहं सद्वुवर्णं द्विजातये । मुच्यते पापजाद्रोगाद्वर्वराङ्गाभिधात्सुत ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्रिपंचाशदधिकद्विशततमः ॥ २९३ ॥

श्रीसूर्य उवाच ।

मोहात्प्राग्याऽधीत्सूत नार्यजां विधिवर्जितम् । साङ्गाधिकात्र जनुषि भविष्यति वरानना ॥ १
अजां दद्याद्विधानेन कस्तूरीपलसंयुताम् । सवस्त्रां वेदविदुषे तदोषशमनं त्विह ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुःपंचाशदधिकद्विशततमः ॥ २९४ ॥

अरुण उवाच ।

क्षात्रे कुले समुत्पन्नो गुल्मवातोदरामयः । वित्ततः कृपणश्चैव सहोदरसमन्वितः ॥ १
धनधान्यसमोपेतः किंचिद्व्यापारवान्भुवि । दायादाच्छङ्कवत्पीडा मिथः क्लेशश्च जायते ॥ २
तस्य नारीद्वयं चास्ति संजातं चात्र जन्मनि । वह्व्यः पुत्र्यः प्रसूताश्च न तु पुत्रः प्रजायते ॥ ३
कदाचिज्जातमात्रस्तु मृतः पुत्रोऽग्निमासकः । एका पुष्पवती भार्या संजाता तस्य भास्कर ॥ ४
केन कर्मविपाकेन सत्यं कथय मे विभो ॥ ५ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि सै क्षत्रः किंचिद्भूमिपतिस्तथा । अवर्ततार्थलुब्धः स ग्रामाधीशः प्रतापवान् ॥ ६
ग्राममध्ये स्तुतिं चक्रे ब्राह्मणो ज्ञानसत्तमः । पुत्र्यः पंच तथा सप्त ह्यपुत्रो वित्तसंयुतः ॥ ७
कालेन मृत्युमापन्नो धनलुब्धो निराश्रयः । तस्य भार्या महासाध्वी साहसं कृतवान्खग ॥ ८
क्रियाकर्म विना तस्य तेन तत्र मृता खग । क्षत्रियेण चिन्तयित्वा नीतं द्रव्यमपुत्रिणः ॥ ९
निराधाराः सुता जाता पित्रभावेन दुःखिताः । सर्वस्वहरणाद्वापि मृताः कन्या इतस्ततः ॥ १०
गृहस्य तस्य चोद्वासः संजातस्त्वत्र कर्मणा । क्षत्रियस्य गृहे पुत्रो जातः सर्वाङ्गसुन्दरः ॥ ११
यो वै क्षात्रगृहे पुत्रः स वै ब्राह्मण ईरितः । एवं ब्रह्मस्वकं प्राप्तमभुंक्त क्षत्रियाधमः ॥ १२

---

१ वैश्यस्तु इति—खपु० । २ तन्मातुर्मातृपक्षे काचित्पौत्रमनागसम् । इति खपु० ।

पुराकृतानि कर्माणि भुज्यन्ते चेह मानवैः । तेन कर्मविपाकेन कन्यापत्यो मृतः सुतः ॥ १३ ॥
तस्य पापस्य नाशाय निष्कृतिः कथ्यते शुभा ॥ १४ ॥

अरुण उवाच ।

का तस्य निष्कृतिः स्वामिन्येन पापक्षयो भवेत् । संततिं लभते सौख्यं लोकानां हितकाम्यया १५

श्रीसूर्य उवाच ।

शुभे त्ववसरे प्राप्ते ह्ययने शुभवासरे । प्रारभेद्धरिभक्तश्च संवत्सरविधिं सुत ॥ १६ ॥
प्रत्यहं परमेशानं विष्णुमव्यक्तमव्ययम् । पौरुषेणेह सूक्तेन अर्चयेद्विधिपूर्वकम् ॥ १७ ॥
कुंकुमागरुकर्पूरश्चैन्दनैस्तुलसीदलैः । अर्चयेद्विविधैः पुष्पैरुपचारैः पृथक्पृथक् ॥ १८ ॥
भौमाप्यनाभसस्तेजोवायव्यैः पञ्चभिस्तथा । एवं व्रतपरा नारी भर्तृभक्तिपरायणा ॥ १९ ॥
अर्चयन्ती हरिं पूर्णवर्षावधि समाचरेत् । शुभे मासे शुभे पक्षे चैकादश्यामुपोषिता ॥ २० ॥
शुभनक्षत्रयुक्तायां द्वादश्यां पुत्रकाम्यया । पूर्ववद्धरिमभ्यर्च्य ऋग्भिः षोडशभिः प्रभुम् ॥ २१ ॥
विधिवद्वह्निमास्थाय अर्चयेद्वैष्णवं चरुम् । आज्यभागावसानेन कपिलाज्याहुतिस्ततः ॥ २२ ॥
पौरुषेण तु सूक्तेन यावत्षोडशसंख्यया । अश्वत्थसमिधस्तिस्रो जुहुयात्षोडशैव तु ॥ २३ ॥
पुनराज्यं ततो हुत्वा जुहुयाच्चरुमप्यथ । होमान्ते द्विजभोजान्ते दानमेतत्समाचरेत् ॥ २४ ॥
हिरण्यभूमिवासांसि धेनुं वत्ससमन्विताम् । विप्रस्योद्वाहनं कृत्वा कन्यां सालंकृतामपि ॥ २५ ॥
दक्षिणां प्रतिपाद्याथ च्छलकौटिल्यवर्जिताम् । प्राश्नीयात्तद्धविःशेषं सह पत्न्या हरिं स्मरेत् २६
इति कृत्वा विधिं नारी पुत्रं प्राप्नोति वै[1] ध्रुवम् । सुभगा च सुरूपा च भवेद्विगतकिल्बिषा॥२७॥
ऐहिकं लक्षणं चिन्त्यं पूर्वकर्मानुसारतः । गुल्मार्श उदरे बाधा गुदान्तवृषणार्तयः ॥ २८ ॥
वातरक्ताक्षिशिरसो नेत्रे कर्णेऽतियुग्रणः । स्तनेऽतिगौरवं दद्रुः सीमन्ते[2] पादवैकृतिः ॥ २९ ॥
जनश्रुतिर्विनिन्द्या च जायते कारणं विना । हानिस्तु सर्ववस्तूनां द्रव्यनाशो जराभयम् ॥ ३० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचपंचाशदधिकद्विशततमः ॥ २५५ ॥

श्रीसूर्य उवाच ।

अथ शूद्रकुले पूर्वमासीत्पुण्या वराङ्गना । तदा दानरता जाता कुरुक्षेत्रे पतत्रिण ॥ १ ॥
सर्वैः सुखैः सदोपेता सर्वसंपत्तिसंयुता । तया कृतं महापापं भाविनोऽर्थस्य वै बलात् ॥ २ ॥
समीपे वासिनश्चास्या ब्राह्मणस्य नवं गृहम् । निर्दग्धं चाग्निना सूत वैरभावे पतत्रिण ॥ ३ ॥
तत्र दग्धा महाभाग गौरपापा गृहान्तगा । कृत्वैतदद्भुतं[3] कर्म भुक्त्वा तु नरकान्सुत ॥ ४ ॥
दानधर्मकृतात्पुण्यात्सात्र जाता हि वाहुजा । माथुरे मण्डले पुण्ये वृषलग्रोपलक्षिते ॥ ५ ॥
सुखदुःखसमाक्रान्ता जातसंततिनाशकृत् । दुःखैरनेकैर्युक्ताऽत्र मध्यभावात्खगाधिप ॥ ६ ॥
प्रायश्चित्तं परं चास्या गङ्गायां पितृतर्पणम् । कुरुक्षेत्राधिवसनं प्राक्पापानां विनाशनम् ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षट्पंचाशदधिकद्विशततमः ॥ २५६ ॥

श्रीसूर्य उवाच ।

चक्रपादरुजा युक्तश्चात्र जन्मनि जायते । पूर्वजन्मनि वै मोहाद्धने शुनि पतत्रिण ॥ १ ॥-

---

१ वैष्णवमिति खपु० । २ करे पादे च वैकृतिरिति खपु० । ३ कृतमिति–खपु० । ४ वध्याच्छ्वान मिति–भवेत् ।

निष्कत्रयं प्रदातव्यं सुवर्णं वेदपारगे । दानेनानेन विधिना पूर्वपापात्प्रमुच्यते ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्तपंचाशदधिकद्विशततमः ॥ २५७ ॥

श्रीसूर्य उवाच ।

यः शूद्रं घातयेन्मोहात्पूर्वजन्मनि मानवः । दन्तपातनजाद्रोगात्पीडामाप्नोति निश्चयात् ॥ १ ॥
दद्याद्धेनुं सवत्सां च सर्वालंकारभूषिताम् । प्राजापत्यं चरेदेकं विधिना रोगनाशनम् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोऽष्टपंचाशदधिकद्विशततमः ॥ २५८ ॥

श्रीसूर्य उवाच ।

या नारी मोहतो हन्याच्छ्वानं हि गरुडाग्रज । पूर्वजन्मनि सा चात्र चक्रपादेन पीडिता ॥ १ ॥
तया तद्दोषशुद्ध्यर्थं स्वर्णं निष्कत्रयं सुत । देयं विप्राय विधिना चक्रपादप्रणाशनम् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकोनषष्ट्यधिकद्विशततमः ॥ २५९ ॥

श्रीसूर्य उवाच ।

शूद्रघातकरी पूर्वं या काचित्पापमोहिता । सात्र जन्मनि दुःखार्ता दन्तपातनजाद्ददात् ॥ १ ॥
विधिवद्धेनुदानाच्च ब्राह्मणाय कुटुम्बिने । प्राजापत्याद्व्रतादेकात्तस्मात्पापात्प्रमुच्यते ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षष्ट्यधिकद्विशततमः ॥ २६० ॥

श्रीसूर्य उवाच ।

कश्चिदासीत्पुरा सूत चारणो ज्ञानदुर्बलः[1] । शिवभक्तिपरो नित्यं देवतातिथिपूजकः ॥ १ ॥
देशे मालवके पुण्ये स्थले पूर्वभवेऽण्डज । तत्र दानानि दत्तानि ब्राह्मणस्य करग्रहे ॥ २ ॥
तेनैकदा महाभाग पापमाचरितं त्विदम् । स्वजात्यां वै धृतो गर्भः कामलोभेन निश्चयात्[2] ॥ ३ ॥
यत्ने कृते तु तत्रैव चोसीद्गर्भस्य पातनम् । मृता सा तेन दुःखेन गर्भपातेन चाण्डज ॥ ४ ॥
एवं बहुतिथे काले गतः स यमशासनम् । भुक्त्वा पापफलं दुःखं पुण्याँल्लोकाञ्शुभानिह ॥ ५ ॥
पूर्वपुण्यप्रभावेण स जातः पादजोऽधुना । गोदावर्याः समीपे तु देशेऽन्यस्मिन्कलाश्रये ॥ ६ ॥
स रक्तकृष्णो मतिमान्दीर्घो मध्यः पृथुः सुधीः[3] । आदिभागे धनी भोगी मध्यमेऽन्ते न सौख्यभाक्[4] ॥ ७ ॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । चिन्तादिसहितश्चात्र दाने स्वल्पमतिः शठः ॥ ८ ॥
स्वजात्यां वीर्यदानाच्च जातपुत्रविनाशवान् । लक्ष्मैतदण्डजश्रेष्ठ जन्माङ्गात्षष्ठभावगः ॥ ९ ॥
भौमः सुतेश्वरः पापग्रहैर्युतनिरीक्षितः । लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥ १० ॥
पलद्वयमिता कार्या बाहुजा गर्भसंयुता । सर्वावयवसंयुक्ता सौवर्णभूषणान्विता ॥ ११ ॥
तदर्धार्धमिता वापि त्रिषु वित्तानुसारतः । संपूज्य वेदविदुषे दद्याद्दोषापनुत्तये ॥ १२ ॥
माषैः सप्तमितैर्दैयो भौमः स्वर्णमयः शुभः । गायत्रीमयुतं जप्त्वा त्र्यम्बकं तु सहस्रकम् ॥ १३ ॥
होमयेत्तद्दशांशेन कपिलैका[5] प्रदापयेत् । य एवं कुरुते सूत प्रायश्चित्तांघनाशनम् ॥ १४ ॥
तस्य पुत्रविवृद्धिः स्याज्जन्मन्यत्रैव जायते । नैवं करोति यो मोहाल्लोभात्पापाविशोधनम् ॥ १५ ॥

१ कामदुर्बल इति—खपु० । २ नासीदिति—खपु० । ३ मध्यमेऽन्तेतिसौख्येति—खपु० । ४ कपिलैः प्रदीयते इति—खपु० ।

न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः । आगुरष्टाद्विवर्षाणि प्रायश्चित्ते कृतेऽधुना ॥ १६ ॥
प्रायश्चित्तेऽकृते रिष्टं पञ्चाशन्मितकेऽब्दके ॥ १७ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकषष्ट्यधिकद्विशततमः ॥ २६१ ॥

श्रीसूर्य उवाच ।

यश्च बभ्रुं महाभाग हन्यान्मोहान्नराधमः । बभ्रुमण्डलरोगार्तः सोऽत्र जन्मनि जायते ॥ १ ॥
निष्कद्वयहिरण्यस्य कृत्वात्र नकुलं शुभम् । बभ्रुमण्डलनाशार्थं ब्राह्मणाय प्रदापयेत् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो द्विषष्ट्यधिकद्विशततमः ॥ २६२ ॥

श्रीसूर्य उवाच ।

काचिच्चारणजा नारी बभूव प्रियवादिनी । व्रतदानरता साध्वी पूर्वजन्मनि चाण्डज ॥ १ ॥
तया ग्रामान्तरे गत्वा निर्दग्धं गह्वरं वनम् । निर्दग्धा बहवस्तत्र जीवास्तस्याश्रयं गताः ॥ २ ॥
ततो बहुतिथे काले प्राप्य तज्जनितं फलम् । तत्र दानवशात्पूर्वादत्र सा पादजा स्मृता ॥ ३ ॥
जीवघातात्तथा पूर्वात्पापात्रैव जन्मनि । जातसंततिहीना सा कुष्ठरोगेण पीडिता ॥ ४ ॥
प्रायश्चित्तं प्रवक्ष्यामि येन संपद्यते सुखम् । गृहवित्तषडंशेन देया जीवाः सुवर्णजाः ॥ ५ ॥
घटयित्वा विधानेन नानारूपा महोरगाः । शक्त्या संभोज्य विप्रेन्द्रास्तस्मात्पापात्प्रमुच्यते ॥ ६ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्रिषष्ट्यधिकद्विशततमः ॥ २६३ ॥

श्रीसूर्य उवाच ।

शशघाती महाभाग कुब्जवर्णः प्रजायते । निष्कृतिं तस्य पापस्य शृणु चात्र पतत्रिण ॥ १ ॥
शक्त्या सोपस्करं दद्याद्वेदवेदाङ्गपारगे । तस्माद्दोषात्प्रमुच्येत नात्र कार्या विचारणा ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुःषष्ट्यधिकद्विशततमः ॥ २६४ ॥

श्रीसूर्य उवाच ।

कश्चिच्छूद्रोऽभवत्पूर्वं दानधर्मक्रियापरः । द्विजानां पूजको दक्षः सिन्धुमण्डलजोऽण्डज ॥ १ ॥
देवद्रव्यविहीनोऽभूत्कृतं कर्मापि चाद्भुतम् । स्वपत्नी स्थापिता पण्यशालायां हि पतत्रिण ॥ २ ॥
पण्यस्त्रीकर्मतश्चासौ चकार ह्युपजीवनम् । ततो मृत्युवशं प्राप्तो भुक्त्वा तत्पापजं फलम् ॥ ३ ॥
प्राग्दानवशतश्चात्र जन्मन्यस्ति च वर्तते । शूद्राधमोऽथ वै षण्ढः पूर्वपापाच्छृणुष्व तत् ॥ ४ ॥
निष्कृतिस्तस्य पापस्य दृढत्वान्नहि भाषिता ॥ ५ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचषष्ट्यधिकद्विशततमः ॥ २६५ ॥

श्रीसूर्य उवाच ।

या नारी नकुलं पूर्वं घातयेद्विनतासुत । सात्र जन्मनि रोगेण बभ्रुमण्डलजेन च ॥ १ ॥
पापोद्भवेन सततं पीडिता भवतिः ध्रुवम् । तद्रोगनाशनं दद्याद्बभ्रुं निष्कद्वयस्य च ॥ २ ॥
ब्राह्मणान्भोजयेत्पश्चात्पूर्वपापापनोदने ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षट्षष्ट्यधिकद्विशततमः ॥ २६६ ॥

---

१ अध्यायोऽयं नास्ति—खपु० ।

अरुण उवाच ।

कोऽश्वत्क्षात्रकुले[1] जातो नानावृत्तिनिरोधकः । नानासन्धौ भवेद्बाधा उदरार्तिः प्रजायते ॥ १ ॥
मेहं[2] वै कुरुते नित्यं नेत्रे तोदो विरश्मिता । कटिपृष्ठोरुवंशेषु बाल्ये स्याद्ग्रहणीगदः ॥ २ ॥
तस्य भार्या सदाचारा विज्ञेया व्रतकारिणी । सौभाग्यसुखसंपन्ना पितृमातृसुखोज्झिता ।
केन संततिहीना च कथं पापेन लिप्यते ॥ ३ ॥

श्रीसूर्य उवाच ।

पूर्वे वर्णोत्तरे जातस्तस्करो वस्त्रहारकः । निषादैः सह संभूय तस्करैः कर्मतत्परः ॥ ४ ॥
वनानामन्तरे प्राप्तः कश्चिद्विप्रः समागतः । गृहीतं तस्य सर्वस्वं यत्किंचिच्चार्जनात्कृतम् ॥ ५ ॥
तेन वै निहतो विप्रस्तस्करेण दुरात्मना । तस्करोऽसौ मृतश्चापि जातश्च वनपन्नगः ॥ ६ ॥
स पश्चान्नरके घोरे पातितोऽयुतसंख्यया । पश्चान्मानुषमापन्नः किंचित्पुण्यप्रभावतः ॥ ७ ॥
स्वर्णकारगृहे जातः पूर्वजन्मनि मानद । इदं जन्म चतुर्थं हि वन्ध्यत्वं चोपजायते ॥ ८ ॥
व्यभिचारवशाज्जातस्तस्करः पूर्वजन्मनि । तेन कर्मविपाकेन स्त्रीपुंसोर्जायते त्विह ।
वन्ध्यत्वं पुत्रहीनत्वं सूत जन्मनिजन्मनि ॥ ९ ॥

अरुण उवाच ।

प्रायश्चित्तं ब्रूहि देव वन्ध्यायाँ[3] या हितकाम्यया । आप्नुयात्संततेः सौख्यं येन पापक्षयो भवेत्॥१०॥

श्रीसूर्य उवाच ।

शुभे त्ववसरे प्राप्ते शुभतीर्थादिसंगमे । विधिवद्विहितं पूर्वैः कृतं स्मृत्योपभाषितम् ॥ ११ ॥
विप्रस्योद्वाहनं कृत्वा गृहदानं यथाविधि । धनधान्यादिकं दत्त्वा तोषयेद्विप्रयाचकान् ॥ १२ ॥
विष्टिपाते व्यतीपाते संक्रान्तौ ग्रहणे किल । पुण्याहे विधिमातिष्ठेदनपत्याघनाशनम् ॥ १३ ॥
सुशुभे भूप्रदेशे तु समे कम्वलवस्त्रिते । विदधीत तिलद्रोणैस्त्रिभिः पर्वतमुत्तमम् ॥ १४ ॥
परितो रत्निमात्रं तु द्रोणमानैश्च तण्डुलैः । विदध्यात्पर्वतावेव[5] देवद्रुमविभूषितौ ॥ १५ ॥
ततस्तौ दम्पती शुद्धौ स्नातावहतवाससी । दधानौ शुभवेषाढ्यौ चिन्तयानौ प्रजापतिम् ॥ १६ ॥
सूर्योदये च तत्पत्न्याः कुर्यान्मूर्तिं प्रजापतेः । शुद्धवर्णसुवर्णस्य निष्कद्वयविनिर्मिताम् ॥ १७ ॥
हेमयज्ञोपवीतां च साक्षमालाकमण्डलुम् । अदितेरपि केयूरहारग्रैवेयभूषिताम् ॥ १८ ॥
तदर्धार्धविभागेन तनौ[6] तस्याः शुभाकृतिः । शैशवीमर्चयेन्मूर्तिं विष्णोर्वामनरूपिणः ॥ १९ ॥
तन्मूर्तित्रितयं सम्यक् कृतसंस्कारमर्चयेत् । कृत्वा प्रतिष्ठितप्राणं ज्ञातकर्माथ पुंस्त्रियोः ॥ २० ॥
बाललीलाधरं विष्णुं वामनं परिचिन्तयेत् । मातरं द्रष्टुमिच्छन्तं हरिं प्रापणकांक्षया ॥ २१ ॥
ततस्तदाश्रमतटात्सुमेरोस्तिलपर्वतात् । प्रत्यग्गिरिं प्रगच्छन्तं मार्गैः स्वपदभूषितैः[7] ॥ २२ ॥
आदितिं तमपश्यन्तीं विरहाकुलचेतसम् । रुदन्तीमिति तं द्रष्टुमार्हयंतीं परान्मुनीन्[8] ॥ २३ ॥
एवं ध्यात्वाथ तां मन्त्रैर्मन्त्रार्थोदितलक्षणैः । पुष्पस्रग्धूपगन्धाद्यैरर्चयेदतिविह्वलाम्[9] ॥ २४ ॥
तद्विप्रासोऽथ तद्विष्णोर्विष्णोः कर्माणि पश्यत । ततस्तां वैष्णवीं मूर्तिं मातुरुत्सङ्गगामिनीम् २५
कृत्वा तस्याः प्रतिष्ठां तां लब्धपुत्रां विचिन्तयेत् । अपश्यंतीमिमं मन्त्रं मन्त्रार्थगुणलक्षणम् २६

---

१ मोहो वै—खपु० । २ वांते—खपु० । ३ वन्ध्यामे—खपु० ।४ याजकैः—खपु०।५ पर्वतावेवं—खपु० । ६ स्तनौ तस्याः शुभाकृती—खपु० । ७गिरीमच्छन्तं—खपु०। ८ विह्वला—खपु० ।

पुत्रेण सहितां देवीमर्चयेद्विविधैर्गुणैः। ततो ब्राह्मणमध्ये तु समाहूय गुणान्वितम् ॥ २७ ॥
तस्मै तां प्रतिमां दद्यात्सपुत्रामदितेः श्रुताम्। यन्मया निहतो विप्रो धनं हृत्वा वने वने ॥२८॥
चौराणां संगमे पापं प्राप्तमेवोल्वणं महत्। तस्य पापस्य नाशाय दानमेतद्ददाम्यहम् ॥ २९ ॥
सौवर्णीं प्रतिमामेनामनघोहं भवेदिति। भोजयेच्च शतं विप्रान्सर्पिष्यात्मानमीक्षयेत् ॥ ३० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्तषष्ट्यधिकद्विशततमः ॥ २६७ ॥

श्रीसूर्य उवाच।

उलूकघातेन पूर्वं जन्मन्यत्र च पुत्रक। पाण्डुरोगेण सततं पीडितो वै भवेद् भृशम् ॥ १ ॥
कस्तूरिकापलं चैकं दद्याद्विप्राय पर्वणि। उलूकघातजं पापं सर्वं नश्यति तत्क्षणात् ॥ २ ॥
तस्मिन्पापोपशमने पाण्डुरोगो विनश्यति ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षष्ट्यधिकद्विशततमः ॥ २६८ ॥

श्रीसूर्य उवाच।

या नारी घातयेत्काचिदुलूकं पूर्वजन्मनि। पाण्डुरोगेण सततं पीड्यते चात्र जन्मनि ॥ १ ॥
दद्यादत्र विधिज्ञाय पलमेकं पतत्रिण। कस्तूरिकाया विप्रस्य पाण्डुरुग्नाशनं परम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकोनसप्तत्यधिकद्विशततमः ॥ २६९ ॥

श्रीसूर्य उवाच।

बभूव बाहुजः कश्चिद्देशे पञ्चनदे पुरा। धनधान्यसमायुक्तः पापकर्मा महोद्यमी ॥ १ ॥
विप्रोत्सङ्गगतः सोऽपि प्रयागे गरुडाग्रज। स स्नातो मृगगे भानौ धूर्तो धर्मक्रियोज्झितः ॥ २ ॥
संप्राप्य स्वगृहं शीघ्रं कृतवान्कर्म दारुणम्। ग्रामे निवसतोन्यास्य क्षत्रियस्य पतत्रिण ॥ ३ ॥
ददाह भवनं रम्यं वैरिभावात्पुरानघ। तत्रैका वत्सरी दग्धा जीवाश्चापि विशेषतः ॥ ४ ॥
कालयोगेन संप्राप्तः[2] स मृत्वा यमशासनम्। भुक्त्वा पापफलं पापात्पुण्यात्पुण्यफलं तथा ॥ ५ ॥
पूर्वपुण्यप्रभावेण स जातः पादजोऽधुना। गङ्गायाः प्राक् परे देशे शतयोजनसंमिते ॥ ६ ॥
स मध्यरूपो[3] बलवान्धर्मे स्वल्पमतिः शठः। वुद्ध्यधिकप्रचारी[4] च पैत्तिकः स्वल्पवित्तभाक् ॥७॥
सकन्यश्च सपत्नीको वन्धुभृत्यसुखान्वितः। पुण्यादिदं फलं पूर्वात्पापादत्र शृणुष्व च ॥ ८ ॥
गोवालवत्सकवधाज्जीववधातादपुत्रकः। सप्तवेदमिताब्दान्तं जातपुत्रविनाशकः ॥ ९ ॥
गोस्त्रीविप्रवधाः पापाः पुत्रनाशकरा यतः। गोराशिगे शनौ सोमात्षष्ठे जीवे मृगस्थिते ॥१०॥
लक्ष्मैतदण्डजश्रेष्ठ पृच्छकस्यात्र जन्मनि। पूर्वं या स्त्री सहायासीन्मृतवत्सात्र सा सुत ॥ ११॥

अरुण उवाच।

निष्कृतिं वद मे स्वामिन्पूर्वपापनिषूदनीम्। पुत्रवृद्धिकरीं धन्यामत्र जन्मनि निश्चयात् ॥ १२ ॥

श्रीसूर्य उवाच।

शृणु सूत प्रवक्ष्यामि निष्कृतिं पापशोधनीम्। पञ्चस्वर्णमिता कार्या सुराभिश्च हिरण्मयी ॥१३॥
तदर्धमितिका वापि देया वित्तानुसारतः। संपूज्य विधिवन्मन्त्रैर्देया विप्राय धीमते ॥ १४ ॥

---

१ मनघोऽहं—खपु०। २ संप्राप्तः—खपु०। ३ तमःस्वरूपः—खपु०। ४ वुधाधिक—खपु०।

माषैर्वाद्विमितैर्देयस्तथा पशुपतिः सुत । माषाभ्यां च तथा वह्निर्जीवा माषचतुष्कजाः ॥ २५
देयाश्च विधिना सूत पूर्वपापापनुत्तये । जपेत्पशुपतेर्मन्त्रं सहस्रं रिष्टनाशनम् ॥ २६
होमयेदष्टशतकं रुद्रस्याग्रे प्रयत्नतः । शृणुयाद्धरिवंशं वा दशावृत्तिविधानतः ॥ २७
यः कुर्याद्विधिवत्सूत प्रायश्चित्तं त्रियामतम् । जीविष्यन्ति च तत्पुत्रा जन्मन्यत्र ममाज्ञया॥ २८
नैवं कुर्याच्च यः शक्त्या त्रिष्वेकं पापशोधनम् । न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः॥ २९
नवसप्तमितायुः स्यात्प्रायश्चित्ते कृतेऽधुना । सप्तवेदमिते वर्षे रिष्टं चाकृतनिष्कृतेः ॥ ३०

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्तत्यधिकद्विशततमः ॥ २७० ॥

श्रीसूर्य उवाच ।

वणिक् पूर्वभवे कश्चिदासीद्धर्मपरायणः । द्विभार्यः सिद्धपीठस्थो धनधान्यसमन्वितः ॥ १
दत्तानि तेन दानानि पर्वस्वपि च शक्तितः । ब्राह्मणेषु गृहस्थेषु सत्पात्रेषु विशेषतः ॥ २
अथात्र कृतवान्पापं कामलोभेन नित्यशः । ज्येष्ठां त्यक्त्वा तु संप्राप्तां सुशीलां प्रियवादिनीम्॥ ३
रतिं ददौ कनिष्ठायामनृतावपि मोहितः । ततो मृत्युवशं प्राप्तः ससहायो वणिक्सुतः ॥ ४
भुक्त्वा पापफलं पापात्पुण्यात्पुण्यफलं तथा । विधिपुण्यवशात्सोऽत्र शतद्रोः पूर्वभागजः ॥ ५
कुम्भस्थेऽर्कसुते कीटे जीवे सिंहे मृगे विधौ । स रक्तगौरो मतिमान् पितृमातृसुखान्वितः॥ ६
भ्रातृमित्रधनैर्युक्तः सौम्यः पितृवचोऽनुगः । घृणी ह्रस्वोऽथ मितदः क्षत्रवंशसमुद्भवः ॥ ७
दानादेदं फलं सर्वं स्त्रीत्यागान्मृतपुत्रकः । स्त्रीत्यागी भ्रूणहा यैश्चेदिति वेदविदो विदुः ॥ ८
स्त्रीसाहाय्ययुतः पूर्वं शृणुष्वाथ खगेश्वर । प्राग्भवे या कनिष्ठाभूत्सा ज्येष्ठात्र मृतप्रजा ॥ ९
गर्भदोषरतां चेति लक्षणैर्लक्षयेत्सुत । वक्ष्यामि निष्कृतिं तस्य पूर्वपापापनोदनीम् ॥ १०
कुर्यात्पलै रसमितैर्ब्रह्माणं कमलोद्भवम् । विश्वमूर्तिं त्रिलोकेशं सौवर्णं लिखितं शुभम् ॥ ११
तदर्धार्धमितं देवं त्रिषु वित्तादिमं पठन् । " त्यक्त्वा वराङ्गनां शुद्धां यत्पूर्वं पापमर्जितम् ॥ १२
तेनाहमत्र ब्रह्माणं प्रायश्चित्तं ददे द्विजः[2]" । गौरी तु राजती देया द्विपलार्कश्च तन्मितः ॥ १३
माषपञ्चमितां विष्णोः सौवर्णीं ब्राह्मणाय वै । हिरण्मयी तथा लक्ष्मीर्देया माषाष्टका शुभा॥ १४
ब्राह्मणान्वरयेत्पश्चाद् गृह्यङ्गं समाचरेत् । भोजयेच्च यथाशक्त्या ब्राह्मणान्गरुडाग्रज ॥ १५
एवं विधानं यः कुर्याज्जीविष्यन्ति च तत्सुताः । ज्येष्ठायां च कनिष्ठायां नात्र कार्या विचारणा
श्रुत्वैनं शक्तिमान्यस्तु न कुर्यात्पापशोधनम् । न जीवन्ति सुतास्तस्य रिष्टं वेदत्रिकेऽब्दके ॥ १७
प्रायश्चित्ते कृते त्वत्र पुत्रपौत्रविवर्धनम् । भविष्यति तथा ह्यायुः सप्तसप्तमिताः समाः ॥ १८
जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् ॥ १९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाक अध्याय एकसप्तत्यधिकद्विशततमः ॥ २७१ ॥

श्रीसूर्य उवाच ।

स्वशदेशे ह्यभूत्कश्चिच्छूद्रो धर्मप्रियस्ततः[3] । विवाहं कृतवान्सूत कन्यायाः पूर्वजन्मनि ॥ १
दाने स्वल्पमतिस्तस्माच्चकारालपविधानतः[4] । चौर्यकर्मरतः सोऽपि कदाचिद्दैवयोगतः ॥ २
चचार पर्वते सूत मार्गलुण्ठनतत्परः । अथो भाविबलात्सूत प्राप्ता काचिद्वरानना ॥ ३
पूर्णगर्भसमायुक्ता नानाभरणभूषिता । सा लुण्ठिता भयग्रस्ता तेन क्रूरधियाऽण्डज ॥ ४

१ यस्मादिति–खपु० । २ द्विज–खपु० । ३ धर्मप्रिय–खपु० । ४ एने–खपु० ।

सहायैस्तु परित्यक्ता ताडनान्महदाकुला । तस्या गर्भच्युतौ तत्र कन्यापुत्रौ बभूवतुः ॥ ५ ॥
असहायेन तेनैव पापमाचरितं पुरा । ततो यमपुरं प्राप्तो धर्माधर्मसमन्वितः ॥ ६ ॥
पापात्पापफलं भुक्त्वा पुण्यात्पुण्यफलं तथा । कन्यादानप्रभावेण स जातोऽत्र वणिक्सुतः ॥ ७ ॥
कुरुक्षेत्राद्याम्यभागे त्रिंशद्योजनसंमिते । स रक्तकृष्णः क्षीणाङ्गः स्वल्पवित्तसमन्वितः ॥ ८ ॥
वातपित्तसमद्वन्द्वो बहुपुत्रीभिरन्वितः । प्रियस्त्रीसंयुतो लोभी पितृभक्तिसमन्वितः ॥ ९ ॥
जातपुत्रविहीनश्च पापात्पुण्यात्तथा फलम् । चिह्नमङ्गादिदं सूत चन्द्रो मिथुनराशिगः ॥ १० ॥
न पश्यति सुतं कर्के लाभे शुक्रः प्रपश्यति । तस्माद्बहुत्वं कन्याया न च पुत्रसुखं क्वचित् ॥ ११ ॥
निष्कृतिं तत्प्रवक्ष्यामि पूर्वपापविशोधनीम् । शूद्रायाः प्रतिमा कार्या पलार्धार्धमितेन तु ॥ १२ ॥
लेख्यौ गर्भच्युतौ बालौ तौ वरौ भूषणान्वितौ । सा देया तु विधिज्ञाय पूर्वपापविशुद्धये ॥ १३ ॥
देवः पञ्चमितैर्मासैस्तथा वेदनिधिः सुत । जपेच्च वेधसो मन्त्रं वैष्णवं त्र्यम्बकं तथा ॥ १४ ॥
पूर्वपापविशुद्ध्यर्थं सहस्रं प्रतिदैवतम् । होमयेच्च तिलांस्तत्र सघृतान्स्थण्डिले शुभे ॥ १५ ॥
स्वगृह्योक्तविधानेन स्थापयित्वा हुताशनम् । ब्राह्मणान्भोजयेद्भक्त्या तेभ्यो दद्याच्च दक्षिणाम् ॥ १६ ॥
ततो रुद्रव्रतं कुर्यात्सर्वपापविशोधनम् । चतुर्दश्यां निराहारो रुद्रपूजनतत्परः ॥ १७ ॥
य एवं कुरुते सूत प्रायश्चित्तं प्रयत्नतः । तस्य पुत्रविवृद्धिः स्यादत्र जन्मनि वै ध्रुवम् ॥ १८ ॥
नैवं विधानं यः कुर्यान्नैव पुत्रसुखं लभेत् । प्रायश्चित्तेऽकृते रिष्टं चत्वारिंशन्मितेऽब्दके ॥ १९ ॥
कृते त्वायुश्चतुरशीतिश्चतुर्भिरधिकाः समाः ॥ २० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो द्विसप्तत्यधिकद्विशततमः ॥ २७२ ॥

श्रीसूर्य उवाच ।

आसीत्पूर्वभवे कश्चिद्बङ्गदेशे द्विजो धनी । विद्याभ्याससयुतो नित्यं धर्मशास्त्रक्रियान्वितः ॥ १ ॥
दत्तानि तेन चाल्पानि दानान्यपि विजानता । पर्वस्वपि च तेनैवाध्यापिता ब्राह्मणास्तथा ॥ २ ॥
पापमाचरितं तेन भाविनोऽर्थस्य वै बलात् । कालयोगेन संप्राप्य ब्राह्मणेन कुटुम्बिना ॥ ३ ॥
स्थापितं तद्गृहे द्रव्यं घटे ताम्रमये स्थितम् । पुनर्दत्तं न तत्तस्मै लोभोपहतचेतसा ॥ ४ ॥
सर्वैर्मिलित्वा तद्बुद्धं स्त्रीपुत्रभ्रातृभिस्त्रिभिः । ततो यमपुरं प्राप्तः ससहायो द्विजोत्तमः ॥ ५ ॥
भुक्त्वा पापफलं पापात्पुण्यात्पुण्यफलं तथा । विद्यादानादिपुण्येन जातोऽसौ ब्राह्मणोऽधुना ॥ ६ ॥
देशे पञ्चनदे प्राप्य गौरः पित्ताधिको घृणी । वाचा मधुरया युक्तो राजसश्चतुरः सुधीः ॥ ७ ॥
दर्शनीयो नातिह्रस्वो नात्युच्चः क्रोधवर्जितः । सुखस्त्रीमानसंयुक्तः स दासोऽतिधनैर्युतः ॥ ८ ॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । धूर्तः शठोऽल्पदो मन्दः स्वल्पधर्मक्रियान्वितः ॥ ९ ॥
इष्टैर्मनोरथैर्हीनः पुत्रसंततिदुःखदः । ब्रह्मस्वभक्षणोत्पूर्वं फलमत्रास्ति निश्चितम् ॥ १० ॥
लक्ष्मैतदण्डजश्रेष्ठ पृच्छकस्यात्र जन्मनि । जन्मलग्नात्सुते राशौ घटः पापसमन्वितः ॥ ११ ॥
सहायलक्षणं सर्वं वक्ष्याम्यथ खगेश्वर । पुत्राभावो भ्रातृहीनः स्त्रीसुतालपत्वसंयुतः ॥ १२ ॥
लक्षणैरेभिराढ्यस्य पृच्छकस्यात्र जन्मनि । प्रायश्चित्तं प्रवक्ष्यामि सर्वपापविशोधनम् ॥ १३ ॥
लक्ष्मीनारायणः कार्यः सुवर्णद्विमितः शुभः । तदर्धं वाथ सौवर्णं देयं वित्तानुसारतः ॥ १४ ॥
स्थापयित्वा घटे ताम्रे सघृते वस्त्रवेष्टिते । संपूज्य गन्धपुष्पाद्यैर्ब्राह्मणाय प्रदापयेत् ॥ १५ ॥

---

१ राजत इति–खपु० । २ स्वहरणात्–खपु० । ३ द्वयोरिति–खपु० ।

चतुर्विंशत्सहस्राणि गायत्रीं च जपेत्ततः । होमयेच्च यथाशक्त्या कुण्डे वा स्थण्डिले शुभे ॥ १७
घृतमिश्रांस्तिलांस्तत्र शक्त्या विप्रांश्च भोजयेत् । मम जन्मदिने पश्चादाचरेद्व्रतमुत्तमम् ॥ १८
य एवं कुरुते सूत प्रायश्चित्तं प्रयत्नतः । तस्य पुत्रविवृद्धिः स्यात्स्त्रीभ्यामत्रैव जन्मनि ॥ १९
नैवं विधानं यः कुर्याद्विप्रद्रव्याघनाशनम् । पुत्रसौख्यस्य लाभो न न तस्य परमा गतिः ॥ २०
प्रायश्चित्ते कृतेऽरिष्टं पञ्चाशन्मितकेऽब्दके । प्रायश्चित्ते कृते ह्यायुः सप्तसप्तिमिताब्दकम् ॥ २१
जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् ॥ २१ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायत्रिसप्तत्यधिकद्विशततमः ॥ २७३ ॥

श्रीसूर्य उवाच ।

गान्धारदेशेऽभूत्कश्चिद्बाहुजो धर्मसंयुतः । ग्रामाधिपश्चोग्रदण्डो ब्रह्मभक्तिपरो दृढः ॥ १
स गत्वा तु कुरुक्षेत्रं सर्वस्वं विधिनाऽददात् । प्राप्ते सूर्यग्रहे सुत विप्राय च कुटुम्बिने ॥ २
पापमाचरितं तेन भाविनोऽर्थस्य गौरवात् । यौवने धर्षिता विप्रपत्नी चातिशुभानना ॥ ३
कामलोभेन सततं पतिस्तस्याः प्रपीडितः । एवं निवसतस्तत्र गतस्तु यमशासनम् ॥ ४
पापात्पापफलं भुक्त्वा पुण्यात्पुण्यफलं तथा । पूर्वपुण्यप्रभावेण स जातो बाहुजाधरः ॥ ५
ऐरावत्यास्तु निकटे त्रिंशद्योजनसंमिते । शूरः सुरूपो मतिमान् यशस्वी प्रियदर्शनः ॥ ६
पुत्रदारधनैर्युक्तो बहुमित्रः प्रतापवान् । राजसेव्यातिविख्यातः[2] सुखैश्वर्ययुतो नृपः ॥ ७
देशेदेशेऽधिकाराढ्य आद्यन्ते सुखभागिह । दाता भोक्ता प्रधानश्च बहुपालनतत्परः ॥ ८
धर्मादिदं तथा पापात्क्रोधी दण्डरतोऽव्ययी[3] । पूर्वस्त्रीसुखहेतोस्तु मनोदुःखसमन्वितः ॥ ९
धर्षणाद्विजयोषायाः प्राक् पतेस्तत्र ताडनात् । यौवने नेत्ररोगाढ्यश्चात्र जन्मनि निश्चयात्[4] ॥ १०
चिह्नमङ्गादिदं चन्द्रो भौमयुक्तस्तृतीयगः । वक्ष्यामि निष्कृतिं तस्य सर्वपापविशोधनीम् ॥ ११
हेम्नः पलैर्वेदमितैः शिवः कार्यो विधाननः । सर्वोपचारैः संपूज्य दद्याद्विप्राय धीमते ॥ १२
गोभूहिरण्यदानानि कृत्वा च सुखमेधते ॥ १३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःसप्तत्यधिकद्विशततमः ॥ २७४ ॥

श्रीसूर्य उवाच ।

सुखेन पाल्यते तेन कुटुम्बः शकटादिना । दैवात्स च वनं गत्वा ददाह वनमल्पकम् ॥ १
तस्मिन्दाहे तु निर्दग्धा जीवास्तत्र खगाधिप । पापमाचरितं काष्ठसंबन्धाद्भाविनो बलात् ॥ २
स्त्रीसाहाय्ययुतस्तत्र गतस्तु यमशासनम् । भुक्त्वा पापाच्च नरकं पुण्यात्स्वर्गं तथाण्डज ॥ ३
पूर्वपुण्यप्रभावेण स जातोऽत्र वणिक्सुतः । गङ्गायाः पश्चिमे भागे सप्तयोजनसंमिते ॥ ४
स रक्तगौरो वाचालो धूर्तो मध्यमरूपधृक् । स्वल्पवित्तयुतो लोभी सभार्यो बुद्धिमान्नरः ॥ ५
द्विपञ्चाशन्मिताब्दान्तं जातसंततिनाशकृत् । तस्य चिह्नमिदं प्रोक्तं पापदृष्टयुतः सुतः ॥ ६
पापभांशगतश्चन्द्रः पापालोकनसंयुतः । लक्षणैर्लक्षितंचोक्तैरवेहि गरुडाग्रज ॥ ७
स्त्रीसाहाय्योद्भवात्पापादमुक्ता पूर्वजन्मनि । तस्मात्सा योषितां[5] त्वत्र मृतपुत्रा प्रपीडिता ॥ ८

---

१ गौर इति—खपु० । २ राजसेवीति—खपु० । ३ दण्डनत इति कपु० । ४ यो बाल्ये—खपु० ।
५ धिपश्चन्द्रो भौमक्षेत्रेऽब्जिनीपतिः—खपु० । ६ योषितेत्येतच्चिन्त्यम् ।

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन्पुत्रदुःखनिषूदनीम् । रिष्टात्प्राक् दिवसाध्यक्ष लोकानां हितकाम्यया॥९॥

श्रीसूर्य उवाच ।

निष्कृतिं तत्प्रवक्ष्यामि जीवदाहविमोचनीम् । यां कृत्वा विधिवत्सूत वंशवृद्धिः प्रजायते ॥१०॥
षट्पले राजते पत्रे वेदाङ्गुलमिताधिके । वनजीवास्तथा लेख्याः सुगन्धैः पञ्चभिर्युताः ॥ ११ ॥
सर्पवृश्चिकगोधाढ्याः पक्षिणश्च पलोन्मिताः । देया विप्राय विधिना पूजयित्वा कुटुम्बिने ॥१२॥
तदर्धमितकैर्वापि देया वित्तानुसारतः । वनदेवी तथा कार्या खवेदमितमाषकैः ॥ १३ ॥
माषद्वयहिरण्येन तथा कुर्याद्धुताशनम् । संपूज्य दद्याद्विप्राय इमं मन्त्रमुदीरयेत् ॥ १४ ॥
"वनान्तरगताः पूर्वं ये जीवा दाहिता मया । वनदेव्यादिदानात्तु गच्छन्तु मम पातकाः"॥१५॥
इत्युच्चार्य नरः सर्वं ब्राह्मणाय निवेदयेत् । शृणुयाद्धरिवंशं वा त्रिरावर्त्य विधानतः ॥ १६ ॥
जपेत्सहस्रद्वितयं देव्या मन्त्रमथोक्तवत् ॥ १७॥
मन्त्रः–'ॐ ह्रीं वनान्तरागतायै नमः ॥' मम जन्मदिने पश्चादाचरेद्विधिना व्रतम् ॥ १८ ॥
एवं यः कुरुते सूत त्रिषु पापविशोधनम् । तस्य पुत्रविवृद्धिस्तु जायतेऽत्रैव जन्मनि ॥ १९ ॥
नैवं कुर्याच्च यो मोहात्तस्य पुत्रविनाशनम् । द्विपञ्चाशन्मिते रिष्टमायुषश्चाद्विवत्सराः ॥ २० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचसप्तत्यधिकद्विशततमः ॥ २७५ ॥

श्रीसूर्य उवाच ।

कश्चिद्विप्रोऽभवत्पूर्वं धर्मकर्मपरायणः । गौडदेशेऽतितेजस्वी चोग्रदण्डः प्रतापवान् ॥ १ ॥
सप्तविंशत्तमे वर्षे गयाश्राद्धमकारि च । काम्यश्राद्धानि तत्रैव दत्तान्यल्पविधानतः ॥ २ ॥
स मन्त्रविदथो शूरो राज्ञः शत्रोः पुरं गतः । स्वामिधर्मरतो दैवात्कृतवान् गोगृहं पुरा ॥ ३ ॥
तत्रैका सुरभी सूत ह्यासन्नप्रसवा हृता । तेनाज्ञानेन केनापि ताडिता गर्भदुःखिता ॥ ४ ॥
शल्यंगतेन दुःखेन मृता सा कालनोदिता । गर्भस्थोऽपि मृतो वत्सो भाविनोऽर्थस्य गौरवात् ॥ ५॥
प्रतापलोभयुक्तेन पापमुग्रमुपार्जितम् । सहायैकसमायुक्तः स गत्वा यमशासनम् ॥ ६ ॥
पापात्पापफलं भुक्त्वा पुण्यात्पुण्यफलं तथा । पूर्वपुण्यप्रभावेण स जातः कुरुजाङ्गले ॥ ७ ॥
द्विजो मध्यमरूपाढ्यः पितृभक्तः कुलाग्रणीः । सुखैश्वर्ययुतो दाता महाधनसमन्वितः ॥ ८ ॥
देशेदेशेऽधिकाराढ्यः स्त्रीभोगभ्रातृसंयुतः । मध्येऽन्तेऽतिधनैर्युक्तो मतिमाँल्लोकविश्रुतः ॥ ९ ॥
प्राक् श्राद्धस्मितवर्षेऽत्र जातपुत्रसमन्वितः । गयाश्राद्धादिदं सर्वं पापात्पापफलं शृणु ॥ १० ॥
क्रूरचेष्टोऽतिदुष्टात्मा दुर्धर्षः क्रोधसंयुतः । नैककन्यो महालोभी धर्मपूर्णोऽस्ति चाण्डज ॥११॥
गोवालवत्सकवधात्पृच्छकः शिशुनाशकः । यस्मात्प्रतापलोभेन गोभ्यो दत्तं भयं पुरा ॥ १२ ॥
तस्मात्प्रतापकालान्ते मध्ये वापि भयं त्विह । श्राद्धस्याल्पविधानात्प्राग्धनहानिः प्रजायते॥१३॥
चिह्नमेतच्छशी लग्ने शुभपापान्वितोऽस्तगः । योऽभूदस्य सहायः प्राक् पृच्छकस्य सुतस्त्विह॥१४॥
लक्षितो लक्षणैस्त्वेतैरेवं हि गरुडाग्रज । वक्ष्यामि निष्कृतिं तस्य पूर्वपापविशोधनीम् ॥ १५ ॥
पलैरर्कमितैः कार्या धेनुरत्र हिरण्मयी । पत्रे लेख्या सवत्सा च तदर्धार्धमिता तथा ॥ १६ ॥
सा देया तु विधिज्ञाय गन्धपुष्पैरलंकृता । तथा पशुपतिर्देयः सुवर्णैकमितः प्रभुः ॥ १७ ॥

---

१ दानधर्म–खपु० ।

नारायणगणेशार्का देयास्तद्वन्मितास्तथा । गायत्र्यष्टसहस्रं तु त्र्यम्बकं दिक्सहस्रकम् ॥ १
अष्टाक्षरं जपेत्तद्वत्पूर्वपापविशोधनम् । होमयेच्च दशांशेन शक्त्या विप्रांश्च भोजयेत् ॥ १
ततः शिवं सदा ध्यायेत्सर्वकार्यार्थसिद्धिदम् । य एवं कुरुते सूत पूर्वपापविशोधनम् ॥ २
न चास्य दुरितं व्याधिर्न च शत्रुभयं क्वचित् । पुत्रपौत्रधनादीनां वृद्धिरत्रैव न क्षयः ॥ २
नैवं विधानं यः कुर्याल्लोभान्मोहात्प्रयत्नतः । न च पुत्रधनादीनां वृद्धिरत्र प्रजायते ॥ २
प्रायश्चित्ते कृते पुत्र रिष्टं षष्टिमितेऽब्दके । प्रायश्चित्ते कृतेऽशीतिसमाः स्युरायुषां त्विह ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षट्सप्तत्यधिकद्विशततमः ॥ २७६ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यसौ वैश्यो बभूव कुरुजाङ्गले । बहुभृत्यसुखैर्युक्तः क्रोधी वित्तमदान्वितः ॥ १
विवाहं कृतवान् पूर्वं कन्याया ब्राह्मणस्य च । हठी धर्मक्रियाहीनो दुःसहायसमन्वितः ॥ २
ज्येष्ठां स्त्रियं धर्मयुक्तां सुशीलां रूपसंयुताम् । परित्यज्याकरोद्यत्नाद्विवाहं भयसंयुतः ॥ ३
ऋतुप्राप्तां तदा तां च परित्यज्य शुभाननाम् । प्रादद्यात्प्राक् कनिष्ठायां रतिं कामातुरोऽन्वयम्
स तेन कर्मणा युक्तो भुक्त्वा पापं शुभं फलम् । सहायद्वययुक्तश्च जातो बन्धुजनोऽधुना ॥ ४
शतद्रोश्च समीपे तु गौरः श्रद्धान्वितः सुखी । सहायाढ्योऽल्पवित्तश्च त्यागी देवद्विजार्चकः ॥
वाचा मधुरया युक्तः पुत्रोत्पत्तिविवर्जितः । प्राग्भवे यः सहायोऽभूत्सोऽत्र पुत्रविवर्जितः ॥ ७
सहजः पृच्छकस्यापि मृतो भ्राताऽधुनाण्डजाया स्त्री प्राक् तु सहायासीत्कनिष्ठा साप्यपुत्रिणी
अत्र जन्मनि भार्या सा गर्भं नैव दधात्यसौ । लक्षणैरङ्कितं सर्वैरवेहि गरुडाग्रज ॥ ९
प्रायश्चित्तं प्रवक्ष्यामि येन पापक्षयो भवेत् लक्ष्मीनारायणं दद्याच्चतुःषष्टिपलात्मकम् ॥ १०
तदर्धार्धपलैर्वापि द्विजाय विधिपूर्वकम् । पूजयित्वा तु गन्धाद्यैः पुत्रपौत्रविवर्धनम् ॥ ११
कलशे स्थापयेत्ताम्रे नानाऋग्भिश्च प्रपूजिते । तदग्रे होमयेद्धीमांस्तिलानष्टाक्षरेण तु ॥ १२
ब्राह्मणान्भोजयेत्पश्चाच्छक्त्या दद्याच्च दक्षिणाम् । एवं यः कुरुते सूत मुच्यते भ्रूणहत्यया ॥ १३
पुत्रपौत्रविवृद्धिः स्यादिह जन्मनि चाण्डज । एवं कुर्यात्प्रयत्नेन प्रायश्चित्तं खगेश्वर ॥ १४
तस्य जीवेच्च संतानं भविष्यति न संशयः । पञ्चाशदब्दपर्यं तु रिष्टं चाकृतनिष्कृतेः ॥ १५
प्रायश्चित्ते कृतेऽशीतिमितायुः कीर्तितं मया । ज्येष्ठकृष्णचतुर्दश्यां निर्याणं कथितं ध्रुवम् ॥ १६

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्तसप्तत्यधिकद्विशततमः ॥ २७७ ॥

श्रीसूर्य उवाच ।

प्रागासीत्क्षत्रियः कश्चिज्जाङ्गले च प्रतापवान् । धर्मशास्त्रक्रियाध्यक्षो ग्रामाध्यक्षो धनान्वितः ॥
दत्तानि तेन दानानि प्राप्ते सोमग्रहे सुत । पर्वस्वपि च विप्रेभ्यः श्रद्धापूतेन चेतसा ॥ २
पापमाचरितं तेन भाविनोऽर्थस्य वै बलात् । ब्राह्मण्यां धारितो गर्भः कामलोभेन निश्चयात् ॥
यत्ने कृतेऽपि तत्रैव नासीद्गर्भस्य पातनम् । ततो लोकभयात्सूत विषं भुक्त्वा तु सा मृता ॥ ४
अर्भकोऽपि मृतस्तस्या गर्भे चोत्पातपीडनात् । सहायैकयुतेनैवं कृतं प्राक्कर्म दारुणम् ॥ ५
ततो मृत्युवशं प्राप्तः सहायाढ्यो हि बाहुजः । गत्वा चान्द्रमसं लोकं भुक्त्वा भोगांश्च शाश्वतान् ॥
पापात्पापफलं भुक्त्वा नरकांश्चातिदारुणान् । महापापकृतादोषाद्गतिर्वै क्षत्रियादधः ॥ ७
शतद्रोः पूर्वभागे तु दशयोजनसंमिते । देशे जातः पूर्वपुण्यात्स शूद्रश्चात्र जन्मनि ॥ ८

सुकर्माभिरतः साधू रक्तः श्यामश्च मध्यमः। धनी सुधीः पितृभक्तोऽनेकस्त्रीभोगसंयुतः ॥ ९ ॥
आद्यन्तसुखयुक्तश्च मतिमाँल्लोकविश्रुतः ॥ १० ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोऽष्टसप्तत्यधिकद्विशततमः ॥ २७८ ॥

श्रीसूर्य उवाच।

गलगण्डगलो द्रव्यहर्ता भवति मानवः। दानेन तत्प्रतीकारं वक्ष्यामि शृणु चाण्डज ॥ १ ॥
अध्यापयति शिष्यांस्तु यः प्रतार्थं गुरुस्तथा। शिष्यो गुरुं वञ्चयित्वा योऽधीते तस्य तस्य च ॥ २ ॥
जायते गलगण्डाख्यो रोगस्तदुपशान्तये।

तथा च।

अभक्ष्यभक्षपापी वा गण्डमाली भवेन्नरः ॥ ३ ॥
माणिक्यं पद्मरागं वा वज्रं मौक्तिकमेव च। वैडूर्यं पुष्परागं च वज्रं मारकतं तथा ॥ ४ ॥
हेमालां प्रकुर्वीत तत्र मध्येऽत्र राजतम्। अलाभे मौक्तिकीं मालां तस्मै दानं प्रकल्पयेत् ॥ ५ ॥
ताम्रपात्रे विनिक्षिप्य तिलानामुपरि न्यसेत्। तिलानां परिमाणं हि द्रोणपञ्चकमिष्यते ॥ ६ ॥
यद्वा तदर्धमेवं स्यात्स्वशक्त्या वापि कारयेत्। महाशान्तिं तथा कुर्याद्ब्राह्मणैर्वेदपारगैः ॥ ७ ॥
आचार्यस्तु शुचिर्दक्षः सर्वशास्त्रार्थकोविदः। श्रुतवित्तोपसंपन्नः सर्वप्राणिहिते रतः ॥ ८ ॥
एवंविधं पूजयित्वा वस्त्रमाल्यानुलेपनैः। होमं च कारयेत्तेन समिदाज्यचरूत्करम् ॥ ९ ॥
आसत्येन तथा मन्त्रः सोमराजानमित्यपि।

मन्त्रः।

"मालेयं सर्वदैवत्या ब्रह्मविष्णुशिवादिभिः ॥ १० ॥
इन्द्रादिलोकपालैश्च तथा सर्वागमैरपि। इयं मे कण्ठमाला या धारिता प्रीतिपूर्वकम् ॥ ११ ॥
ब्राह्मणेभ्यः प्रदानात्तु गलगण्डं व्यपोहतु।" ग्रहशान्तिः कृता यैस्तु तेभ्यो दद्याच्च दक्षिणाः ॥ १२ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकोनाशीत्यधिकद्विशततमः ॥ २७९ ॥

श्रीसूर्य उवाच।

चांडालादिवचः शृण्वन् यो भुञ्जानस्तथैव हि। भुंक्ते स पाटलतनुः पित्तोद्रेकी च जायते ॥ १ ॥
प्राणवानपि वा दद्यात्तिलान्वेदविदे तथा। मम सूक्तेन विप्रेन्द्र सर्पिषा मधुसूदने ॥ २ ॥
सहस्रं जुहुयादन्नं मम प्रीत्यर्थमेव च। चाण्डालादिवचः शृण्वन् भोजनं दोषजं मतम् ॥ ३ ॥

अत्र वृद्धगौतमवचः।

[अत्र वृद्धगौतमस्तु स्वर्णमजदानं प्रदर्शयति।]

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽशीत्यधिकद्विशततमः ॥ २८० ॥

श्रीसूर्य उवाच।

खरकाकादिमांसानां भक्षकः स्फोटवान्भवेत्। पार्श्वयोस्तस्य कृच्छ्रं चान्द्रायणं तथा ॥ १ ॥
चाण्डालकृतवापीषु तडागे कूपकादिषु। स्नात्वा पीत्वा च सर्वाङ्गे दाहवान्हस्तपादयोः ॥ २ ॥
स्फोटयुक्तश्च स भवेत्कृच्छ्रं सान्तपनं चरेत्। गां हिरण्यं च वासश्च दद्याच्छक्त्यानुसारतः ॥ ३ ॥

---

१ प्रीतवानपि भवते–खपु०। २ यमसूक्तेन इति–खपु०। ३ भोजनं कालकामतः–खपु०।

नारायणगणेशार्का देयास्तद्वन्मितास्तथा । गायत्र्यष्टसहस्रं तु त्र्यम्बकं दिक्सहस्रकम् ॥ १९
अष्टाक्षरं जपेत्तद्वत्पूर्वपापविशोधनम् । होमयेच्च दशांशेन शक्त्या विप्रांश्च भोजयेत् ॥ २०
ततः शिवं सदा ध्यायेत्सर्वकार्यार्थसिद्धिदम् । य एवं कुरुते सूत पूर्वपापविशोधनम् ॥ २१
न चास्य दुरितं व्याधिर्न च शत्रुभयं क्वचित् । पुत्रपौत्रधनादीनां वृद्धिरत्रैव न क्षयः ॥ २२
नैवं विधानं यः कुर्याल्लोभान्मोहात्प्रयत्नतः । न च पुत्रधनादीनां वृद्धिरत्र प्रजायते ॥ २३
प्रायश्चित्ते कृते पुत्र रिष्टं षष्टिमितेऽब्दके । प्रायश्चित्ते कृतेऽशीतिसमाः स्युरायुषां त्विह ॥ २४

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षट्सप्तत्यधिकद्विशततमः ॥ २७६ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यसौ वैश्यो बभूव कुरुजाङ्गले । बहुभृत्यसुखैर्युक्तः क्रोधी वित्तसमन्वितः ॥ १
विवाहं कृतवान् पूर्वं कन्याया ब्राह्मणस्य च । हठी धर्मक्रियाहीनो दुःसहायसमन्वितः ॥ २
ज्येष्ठां स्त्रियं धर्मयुक्तां सुशीलां रूपसंयुताम् । परित्यज्याकरोद्यत्नाद्विवाहं भयसंयुतः ॥ ३
ऋतुप्राप्तां तदा तां च परित्यज्य शुभाननाम् । प्रादद्दात्माक् कनिष्ठायां रतिं कामातुरोऽन्यथा ॥
स तेन कर्मणा युक्तो भुक्त्वा पापं शुभं फलम् । सहायद्वययुक्तश्च जातो वन्द्यजनोऽधुना ॥ ५
शतद्रोश्च समीपे तु गौरः श्रद्धान्वितः सुखी । सहायाढ्योऽल्पवित्तश्च त्यागी देवद्विजार्चकः ॥ ६
वाचा मधुरया युक्तः पुत्रोत्पत्तिविवर्जितः । प्राग्भवे यः सहायोऽभूत्सोऽत्र पुत्रविवर्जितः ॥ ७
सहजः पृच्छकस्यापि मृतो भ्राताऽधुनाण्डजाया स्त्री प्राक् तु सहायासीत्कनिष्ठा साप्यपुत्रिणी ॥ ८
अत्र जन्मनि भार्या सा गर्भं नैव दधात्यसौ । लक्षणैराङ्कितं सर्वैरवेहि गरुडाग्रज ॥ ९
प्रायश्चित्तं प्रवक्ष्यामि येन पापक्षयो भवेत् लक्ष्मीनारायणं दद्याच्चतुःषष्टिपलात्मकम् ॥ १०
तदर्धार्धपलैर्वापि द्विजाय विधिपूर्वकम् । पूजयित्वा तु गन्धाद्यैः पुत्रपौत्रविवर्धनम् ॥ ११
कलशे स्थापयेत्ताम्रे नानारत्नैर्भिश्च प्रपूजिते । तदग्रे होमयेद्धीमांस्तिलानष्टाक्षरेण तु ॥ १२
ब्राह्मणान्भोजयेत्पश्चाच्छक्त्या दद्याच्च दक्षिणाम् । एवं यः कुरुते सूत मुच्यते भ्रूणहत्यया ॥ १३
पुत्रपौत्रविवृद्धिः स्यादिह जन्मनि चाण्डज । एवं कुर्यात्प्रयत्नेन प्रायश्चित्तं खगेश्वर ॥ १४
तस्य जीवेच्च संतानं भविष्यति न संशयः । पञ्चाशदष्टवर्षे तु रिष्टं चाकृतनिष्कृतेः ॥ १५
प्रायश्चित्ते कृतेऽशीतिमितायुः कीर्तितं मया । ज्येष्ठकृष्णचतुर्दश्यां निर्याणं कथितं ध्रुवम् ॥ १६

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्तसप्तत्यधिकद्विशततमः ॥ २७७ ॥

श्रीसूर्य उवाच ।

प्रागासीत्क्षत्रियः कश्चिज्जाङ्गले च प्रतापवान् । धर्मशास्त्रक्रियाध्यक्षो ग्रामाध्यक्षो धनान्वितः ॥ १
दत्तानि तेन दानानि प्राप्ते सोमग्रहे सुत । पर्वस्वपि च विप्रेभ्यः श्रद्धापूतेन चेतसा ॥ २
पापमाचरितं तेन भाविनोऽर्थस्य वै बलात् । ब्राह्मण्यां धारितो गर्भः कामलोभेन निश्चयात् ॥ ३
यत्ने कृतेऽपि तत्रैव नासीद्गर्भस्य पातनम् । ततो लोकभयात्सूत विषं भुक्त्वा तु सा मृता ॥ ४
अर्भकोऽपि मृतस्तस्या गर्भे चोत्पातपीडनात् । सहायैकयुतेनैवं कृतं प्राक्कर्म दारुणम् ॥ ५
ततो मृत्युवशं प्राप्तः सहायाढ्यो हि बाहुजः । गत्वा चान्द्रमसं लोकं भुक्त्वा भोगांश्च शाश्वतान् ॥ ६
पापात्पापफलं भुक्त्वा नरकांश्चातिदारुणान् । महापापकृतादोषाद्गतिर्वै क्षत्रियादधः ॥ ७
शतद्रोः पूर्वभागे तु दशयोजनसंमिते । देशे जातः पूर्वपुण्यात्स शूद्रश्चात्र जन्मनि ॥ ८

सुकर्माभिरतः साधू रक्तः श्यामश्च मध्यमः। धनी सुधीः पितृभक्तोऽनेकस्त्रीभोगसंयुतः ॥ ९ ॥
आद्यन्तसुखयुक्तश्च मतिमाँल्लोकविश्रुतः ॥ १० ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोऽष्टसप्तत्यधिकद्विशततमः ॥ २७८ ॥

श्रीसूर्य उवाच।

गलगण्डगलो द्रव्यहर्ता भवति मानवः। दानेन तत्प्रतीकारं वक्ष्यामि शृणु चाण्डज ॥ १ ॥
अध्यापयति शिष्यांस्तु यः प्रतार्य गुरुस्तथा। शिष्यो गुरुं वञ्चयित्वा योऽधीते तस्य तस्य च ॥२॥
जायते गलगण्डाख्यो रोगस्तदुपशान्तये।
तथा च।
अभक्ष्यभक्षपापी वा गण्डमाली भवेन्नरः ॥ ३ ॥
माणिक्यं पद्मरागं वा वज्रं मौक्तिकमेव च। वैडूर्यं पुष्परागं च वज्रं मारकतं तथा ॥ ४ ॥
रत्नमालां प्रकुर्वीत तत्र मध्येऽत्र राजतम्। अलाभे मौक्तिकीं मालां तस्मै दानं प्रकल्पयेत् ॥५॥
ताम्रपात्रे विनिक्षिप्य तिलानामुपरि न्यसेत्। तिलानां परिमाणं हि द्रोणपञ्चकमिष्यते ॥ ६ ॥
यद्वा तदर्धमेवं स्यात्स्वशक्त्या वापि कारयेत्। महाशान्तिं तथा कुर्याद्ब्राह्मणैर्वेदपारगैः ॥ ७ ॥
आचार्यस्तु शुचिर्दक्षः सर्वशास्त्रार्थकोविदः। श्रुतवित्तोपसंपन्नः सर्वप्राणिहिते रतः ॥ ८ ॥
एवंविधं पूजयित्वा वस्त्रमाल्यानुलेपनैः। होमं च कारयेत्तेन समिदाज्यचरूत्कटम् ॥ ९ ॥
आसत्येन तथा मन्त्रः सोमराजानमित्यपि।
मन्त्रः।
"मालेयं सर्वदैवत्या ब्रह्मविष्णुशिवादिभिः ॥ १० ॥
इन्द्रादिलोकपालैश्च तथा सर्वागमैरपि। इयं मे कण्ठमाला या धारिता प्रीतिपूर्वकम् ॥ ११ ॥
ब्राह्मणेभ्यः प्रदानात्तु गलगण्डं व्यपोहतु।" ग्रहशान्तिः कृता यैस्तु तेभ्यो दद्याच्च दक्षिणाः ॥१२॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकोनाशीत्यधिकद्विशततमः ॥ २७९ ॥

श्रीसूर्य उवाच।

चांडालादिवचः शृण्वन् यो भुञ्जानस्तथैव हि। भुंक्ते स पाटलतनुः पित्तोद्रेकी च जायते ॥ १ ॥
प्राणवानपि वा दद्यात्तिलान्वेदविदे तथा। मम सूक्तेन विप्रेन्द्र सर्पिषा मधुसूदने ॥ २ ॥
सहस्रं जुहुयादन्नं मम प्रीत्यर्थमेव च। चाण्डालादिवचः शृण्वन् भोजनं दोषजं मतम् ॥ ३ ॥
अत्र वृद्धगौतमवचः।
[अत्र वृद्धगौतमस्तु स्वर्णमजदानं प्रदर्शयति।]
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽशीत्यधिकद्विशततमः ॥ २८० ॥

श्रीसूर्य उवाच।

खरकाकादिमांसानां भक्षकः स्फोटवान्भवेत्। पार्श्वयोस्तस्य कृच्छ्रं चान्द्रायणं तथा ॥१॥
चाण्डालकृतवापीषु तडागे कूपकादिषु। स्नाता पीत्वा च सर्वाङ्गे दाहवान्हस्तपादयोः ॥ २ ॥
स्फोटयुक्तश्च स भवेत्कृच्छ्रं सान्तपनं चरेत्। गां हिरण्यं च वासश्च दद्याच्छक्त्यानुसारतः ॥३॥

---

१ प्रीतवानपि भवते–खपु०। २ यमसूक्तेन इति–खपु०। ३ भोजनं कालकामतः–खपु०।

अवमन्य तु भर्तारं जारमालिङ्गयतेऽनघ । सार्धं क्रीडति या नारी: तमेवानुस्मरत्यपि ॥
तस्यास्तु स्तनयोः स्फोटा जायन्ते जननान्तरे । भगे च रक्तं स्रवति तद्रोगस्य प्रशान्तये ॥
दद्याद्गां पञ्चलवणं हरिद्रां धान्यमेव च । उमामहेश्वरं चैव पूजयेच्च धने सति ॥
निष्कद्वादशकं दद्याज्जपेन्नामत्रिसूक्तकम् ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकाशीत्यधिकद्विशततमः ॥ २८१ ॥

श्रीसूर्य उवाच ।

अनिर्दशाया गोः पीत्वा पयः स स्फोटवान्भवेत् । उपवासत्रयं कुर्याद्धोजयेद्विंशतिं द्विजान् ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोऽशीत्यधिकद्विशततमः ॥ २८२ ॥

श्रीसूर्य उवाच ।

देवानां ब्राह्मणानां वा धनाहरणतस्तथा । स्वामिद्रोहाद्वातरोगी भवेदस्यापि निष्कृतिः ॥ १
कृच्छ्रातिकृच्छ्रे कुर्वीत चान्द्रायणमथापरम् ॥ २ ॥

[अत्र हिरण्यदानं कर्मविपाके ।]

गुर्वप्रीतिकरो यस्तु वातरोगी भवेन्नरः । नामत्रयेण कुर्वीत जपं होमं च शान्तये ॥ ३
होमयित्वा परान्नं तु भुङ्क्ते वस्तु विगर्हितम् । सोन्मादवातयुक्तः स्यात्कृच्छ्रं चान्द्रायणं तथा
कुर्यात्सारस्वतं मन्त्रं जपेद्ब्राह्मणतर्पणम् ॥ ४ ॥

अनिच्छतीमिच्छतीं यामुपभुङ्क्ते परस्त्रियम् । बलादाक्रम्य स नरः सर्वसन्धिषु वेदनाम् ॥ ५
तीव्रामाप्नोति रुगियं चतुर्वातयुता भवेत् । ज्वरी तदुपलुप्त्यर्थं महिषीदानमाचरेत् ॥ ६
च्छ्रातिकृच्छ्रे कुर्वीत चान्द्रायणमथापरम् । उद्यन्नद्यजपश्चैव शक्त्या ब्राह्मणभोजनम् ॥ ७
नामत्रयं जपेन्मर्त्यो रोगशान्त्यर्थमात्मनः । सहस्रनामकं वापि स्तोत्रं सम्यग्विधानतः ॥ ८
अच्युतानन्त गोविन्देत्येतन्नामत्रयं द्विज । अच्युतत्रितयावृत्त्या जपेद्रोगस्य शान्तये ॥ ९
पुरुषसूक्तं जपेद्विद्वांस्ततो रोगात्प्रमुच्यते ॥ १० ॥

[अत्र महिषीदानम् ।]

सभायां पक्षपाती च जायते पक्षघातकः । स्याच्चतुर्माषकः स्वर्णः सनिष्कष्टङ्क एव हि ॥ ११
योऽकृत्वा ब्राह्मणे भुङ्क्ते स्नानहोमजपादिकम् । स हिक्कारोगसंयुक्तस्तत्पापस्यापशुत्तये ॥ १२
चान्द्रायणत्रयं कुर्याद्त्रीन्कृच्छ्रांश्च समाचरेत् । तामग्निवर्णामिति च जपेत्सूक्तं समाहितः ॥ १३

[अत्र स्वर्णमृगदानम् ।]

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्र्यशीत्यधिकद्विशततमः ॥ २८३ ॥

श्रीसूर्य उवाच ।

सवर्णागमने वातरक्तवाञ्जायते नरः ॥ १ ॥

[तत्र लक्ष्मीनारायणं स्वर्णरूपम् । पादघातपितृहननार्थमिदं दानम् ।]

लशुनं गृञ्जनं तालफलं वाश्नाति यो द्विजः । स वातपित्तरोगी च भवेच्चान्द्रायणं चरेत् ॥ २

[औषधिव्यतिरेकेण लशुनादिभक्षणे चान्द्रायणम् ।]

---

१ तदनुप्रीत्यर्थं—कपु० । २ सहस्रेत्यारभ्याच्युतेत्यन्तः पाठः—खपु० नास्तीति बोध्यम् ।

रक्तवस्त्रप्रवालानां हारी स्याद्रक्तवातवान्। चान्द्रायणं द्विजः कुर्यादेतद्रोगस्य शान्तये ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुरशीत्यधिकद्विशततमः ॥ २८४ ॥

श्रीसूर्य उवाच।

वैद्यशास्त्रमदाघस्तु कृत्वोषधमथान्यथा। प्रयोजयेदन्यथा हि रक्तपित्तयुतो भवेत् ॥ १ ॥
कृच्छ्रचान्द्रायणे कार्यं तथा ब्राह्मणभोजनम् ॥ २ ॥
[गोदानम्]
मद्यपो रक्तपित्ती स्यात्स दद्यात्सर्पिषो घटम्। मधुनोऽर्धघटं चैव साहिरण्यं विशुद्धये ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पञ्चाशीत्यधिकद्विशततमः ॥ २८५ ॥

श्रीसूर्य उवाच।

त्रपुहारी च पुरुषो जायते श्लेष्मणः सदा। उपोष्य दिवसं सोऽपि दद्यात्पलशतं त्रपु ॥ १ ॥
नित्यानुष्ठानविमुखः कफरोगी भवेन्नरः। पराभवं समाप्नोति चेत्याह भगवान्यमः ॥ २ ॥
तच्छान्तये मासमेकं यावकं भक्षयेन्नरः। सहस्रनामपाठश्च होमश्चाष्टोत्तरायुतः ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायःषडशीत्यधिकद्विशततमः ॥ २८६ ॥

श्रीसूर्य उवाच।

धूर्तोऽपस्माररोगी स्यात्स तद्दोषोपशान्तये। ब्रह्मकूर्चत्रयं कृत्वा धेनुं दद्यात्सदक्षिणाम् ॥ १ ॥
[ब्रह्मकूर्चलक्षणं कृच्छ्रप्रकरणे दर्शितम्।]
गुरौ यो गर्ववद्द्रष्टा[1] प्रतिकूलं समाचरेत्। सोऽपस्मारी भवेत्तत्र कुर्याच्चान्द्रायणं नरः ॥ २ ॥
[विनायकप्रतिमादानम्।]
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्ताशीत्यधिकद्विशततमः ॥ २८७ ॥

श्रीसूर्य उवाच।

नागहारी च सततं पुरुषः शीर्षरोगवान्। सीसं पलशतं दद्यादुपोष्य स तु वासरम् ॥ १ ॥
गुरूपरोधी शिरसि रोगवाञ्जायते नरः। कृच्छ्रातिकृच्छ्रे कुर्वीत चान्द्रायणमथापि वा ॥ २ ॥
औषधानि प्रदद्याच्च तिलपात्रं तथैव च। प्रायोपवेशनादीनां व्रतानां त्यागकारणात् ॥ ३ ॥
शिरोरोगयुतो भूयात्तल्लिष्कृतिरथोच्यते। गोहत्यायां व्रतं कुर्यात्पञ्चाशद्भिक्षभोजनम् ॥ ४ ॥
[कूष्माण्डसंभवः।]
ब्रह्मचारी यदाश्नीयाद्भिन्नपात्रे विशेषतः। एकांशेन शिरोरोगी भवतीत्याह नारदः ॥ ५ ॥
अक्षीभ्यान्त इत्येव सूक्तमष्टोत्तरं शतम्। जपेच्चरुघृताभ्यां यो जुहुयाच्च तथैव हि ॥ ६ ॥
[भिन्नपात्रे भिन्नकांस्ये भोजनमित्यर्थः।]
औषधस्यापि हरणात्सूर्यावर्तः प्रजायते। तेन सूर्यः प्रदातव्यो निष्कैकस्य यथाविधि ॥ ७ ॥
[अत्र चोपवीतदानं शंसन्ति।]
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोऽष्टाशीत्यधिकद्विशततमः ॥ २८८ ॥

---

१ योगारिव द्रष्टादि–कपु०।

श्रीसूर्य उवाच ।

धर्मकर्माण्युपक्रम्य मध्ये त्यजति यो नरः । अविद्यमानं दोषं वा परेषां यः प्रकाशयेत् ।
स भवेत्पूतिवक्त्रस्तु कुर्याच्चान्द्रायणं व्रतम् ॥ १ ॥
धूपस्रक्चन्दनादीनि सुगन्धीनि च शक्तितः । दद्याद्विप्राय पञ्चाशद्ब्राह्मणान्भोजयेत्तथा ॥ २ ॥

अनु च ।

परवाचां विघ्नकर्ता मुखरोगी प्रजायते । धर्मोद्घाटनतोऽन्येषां मुखरोगः प्रजायते ॥ ३ ॥
भुक्तं मार्जारसंस्पृष्टं भुक्त्वा दुर्गन्धवान्भवेत् । पीत्वा त्रिरात्रं गोमूत्रं भोजयेद्ब्राह्मणत्रयम् ॥ ४ ॥

अनु च ।

कूटसाक्षी भवेद्वक्त्ररोगी शोणितपित्तवान् । कृच्छ्रातिकृच्छ्रे कुर्वीत चान्द्रायणमथापरम् ॥ ५ ॥
कुर्यात्कूष्माण्डहोमं च गायत्रीमयुतं जपेत् । दद्याद्धिरण्यं व्रीहींश्च मुखरोगस्य शान्तये ॥ ६ ॥
वाग्विरोधं गुरौ कृत्वा मुखरोगी भवेन्नरः । तस्य दानेन विहितो गजरूपकसाङ्गतः ॥ ७ ॥
[स्वर्णगजदानमित्यर्थः ।]

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकोननवत्यधिकद्विशततमः ॥ २८९ ॥

श्रीसूर्य उवाच ।

पक्वान्नहरणे चैव जिह्वारोगः प्रजायते । गायत्र्याः स जपेल्लक्षं दशांशं जुहुयात्तिलैः ॥ १ ॥

अनु च ।

परेषां दुःखकरणात्सर्वदानृतभाषणात् । जिह्वाच्छेदात्तथाऽन्येषां पक्षपाताच्च संसदि ॥ २ ॥
जिह्वारोगी भवेदास्ये व्रणी चैवाभिजायते । पराकद्वितयं चैव होमः कूष्माण्डसंज्ञकः ॥ ३ ॥
कयानश्चित्रसूक्तस्य जपहोमस्तथैव च । व्रीह्यादीनां तथा दानमौषधस्य च संस्मृतम् ॥ ४ ॥
इत्यसौ छर्दिरोगी स्याद्गां च दद्यात्पयस्विनीम् ॥ ५ ॥
[चकारादेकः कृच्छ्रः सौरमन्त्रजपश्च समुच्चीयत इति ।]

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो नवत्यधिकद्विशततमः ॥ २९० ॥

श्रीसूर्य उवाच ।

आमान्नहरणे चैव दन्तपीडा प्रजायते । स दद्यादाश्विनौ हेमनिष्कद्वयविनिर्मितौ ॥ १ ॥
सूकरे निहते चैव दन्तुरो जायते नरः । स दद्यात्तद्विशुद्ध्यर्थं घृतकुम्भं सदक्षिणम् ॥ २ ॥
सुरापी श्यावदन्तः स्यात्प्राजापत्याष्टकं चरेत् । शर्करायास्तुलाः सप्त दद्यात्पापविशुद्धये ॥ ३ ॥
जपित्वा तु महारुद्रं दशांशं जुहुयात्तिलान् । ततोऽभिषेकः कर्तव्यो मन्त्रैर्वारुणदैवतैः ॥ ४ ॥
[आत्मसमाः शर्करातुला दद्यादित्यर्थः ।]

मंत्रः ।

"त्वं तुले सर्वभूतानां परिमाणं प्रकीर्तितम् । मां तोलयसि संसारादुद्धरस्व नमोऽस्तुते" ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकनवत्यधिकद्विशततमः ॥ २९१ ॥

श्रीसूर्य उवाच ।

परेषां तर्ककरणान्निष्ठुरोक्तिः प्रजायते । खरोक्तिहास्यकरणाद्दद्यान्मौक्तिककाञ्चने ॥ १ ॥
[खरोक्तिर्नीरसोक्तिः, गर्दभस्य रववद्रवो यस्य, स्वपरोद्वेगजनकस्य वा ।]

मूको भ्रातृवधाच्चैव तस्येयं निष्कृतिः परा । तेन कर्मविशुद्ध्यर्थं व्रतं चान्द्रायणत्रयम् ॥ २ ॥
व्रतान्ते पुस्तकं दद्यात्सुवर्णपलसंयुतम् । ब्राह्मणाय यजुर्वेदविदे वस्त्रेण तद्युतम् ॥ ३ ॥
इमं मन्त्रं समुच्चार्य ब्राह्मणं तं विसर्जयेत् ॥ ४ ॥

मन्त्रः ।

"सरस्वति जगन्मातः शब्दब्रह्माधिदैवते । दुष्कर्मकारिणं पापं रक्ष मां परमेश्वरि ।" ॥
स्वरोपघाती वाचां च हर्ता मूकः प्रजायते ॥ ५ ॥
[वाचां हर्ता गुर्वनुज्ञामृते वेदादिहर्ता पुस्तकहर्ता च ।]
कुर्यात्स्वर्णमयं पद्मं पलार्धेन तदर्धतः । यथास्वविभवं सम्यग्वित्तशाठ्यं न कारयेत् ॥ ६ ॥
रक्तवस्त्रेण संवेष्ट्य ताम्रपात्रे परित्यजेत् । ताम्रपात्रपरीमाणं पलानामष्टकं विदुः ॥ ७ ॥
आढकद्वितयं मानं तिलराशौ प्रयत्नतः । उपचारैः षोडशभिरभ्यर्च्य सर्वशास्त्रवित् ॥ ८ ॥
रक्तचन्दनपुष्पाद्यैर्मन्त्रेणानेन पूजयेत् ॥ ९ ॥

मंत्रः ।

"ब्रह्मणे तु नमस्तुभ्यं विष्णोरमितनाभिज । अतिप्रीतिकरो भानोस्तथा रुद्रस्य चैव हि ॥
पूजां मम गृहाण त्वं सर्वक्लेशविनाशक" ॥ १० ॥
आग्नेय्यां दिशि वै होमः कर्तव्यो मन्त्रपूर्वकः । समिदाज्यतिलैश्चैव समिधाष्टाक्षरेण तु ॥ ११ ॥
[चित्रमित्यनयार्चा ।]
तस्मै हुतवते पद्मं दद्यात्स्मृत्वा चतुर्मुखम् । यत्प्राग्वाचां निरोधेन वैरूप्यं मम देहजम् ॥ १२ ॥
स्वरोपघातजं तीव्रं दुःखं रोगकरं तथा । तत्सर्वं नाशयन्त्वद्य ब्रह्मविष्णुशिवाग्नयः ॥ १३ ॥
त्रिदशाद्यश्च ये देवा हविष्मन्तस्तथा भुवि । एवं दत्त्वा तु तत्पद्ममाचार्यायातिभक्तितः ॥ १४॥
पृष्ठतस्तु ह्यनुव्रज्य स्वरभेदाद्विमुच्यते ॥ १५ ॥
[आज्यहोमे 'चित्रं देवानाम्' इति मन्त्रः ।]
वेदं वा धर्मशास्त्रं वा विक्रीणीयाद्द्विजो नरः । अधीतं तस्य नायाति जिह्वायां शबलं भवेत् ॥१६॥
अपरिस्फुटवक्त्रो वा जिह्वायां व्रणवानपि । कृच्छ्रातिकृच्छ्रे कुर्वीत चान्द्रायणमथापरम् ॥१७॥
सूक्तं तामग्निवर्णाख्यं जपेच्चैवायुतत्रयम् । दद्याद्धिरण्यं विप्रेभ्यो भोजनं च स्वशक्तितः ॥ १८ ॥
[वेदं वा धर्मशास्त्रं वा विक्रीणीयादिति भृतकाध्यापक इत्यर्थः ।]
वाग्विरोधं गुरोः कृत्वा भवेद्गद्गदवाङ् नरः ॥ १९ ॥
[तत्र स्वर्णसरस्वतीदानम् ।]
उष्ट्रे विनिहते चैव जायते विकृतस्वरः । स तत्पापविशुद्ध्यर्थं कृच्छ्रमेकं चरेद्बुधः ॥ २० ॥
कर्पूरस्य पलं दद्यात्क्षीरद्रव्याणि शक्तितः ॥ २१ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो द्विनवत्यधिकद्विशततमः ॥ २९२ ॥

श्रीसूर्य उवाच ।

लवणस्यापहर्ता च शीर्णघ्राणाङ्घ्रिपाणिकः । बर्बरस्वरवांश्चैव जायते तस्य निष्कृतिः ॥ १ ॥

---

१ यति इति–क० पु० ।

उद्यन्नद्यभृचं चैव जपेत्तिष्ठंस्त्रिरायुतम् । जुहुयाच्चरुसर्पिर्भ्यां रक्तवासांसि दापयेत् ॥ २॥
दद्याद्देवद्विजगवां कुर्यात्पूजां च शक्तितः॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्रिनवत्यधिकद्विशततमः ॥ २९३ ॥

श्रीसूर्य उवाच ।

कुक्कुटे निहते चैव वक्रनासः प्रजायते । तेन निष्कः प्रदातव्यो ब्राह्मणाय प्रयत्नतः ॥ १ ॥
परदृष्टिविधानेन मिषङ्मिथ्याचरेण च । कामात्परस्त्रियं दृष्ट्वा नेत्ररोगी भवेन्नरः ॥ २ ॥
चान्द्रायणं पराकं च पञ्चाशद्विप्रभोजनम् । वर्चोदा इति मन्त्रं तु जपेदाज्यं सकाञ्चनम् ॥ ३ ॥
दद्याद्विप्राय विधिवन्नेत्ररोगः प्रशाम्यति ॥ ४ ॥

[एतच्च भोजनं मुद्गप्रधानम् ।]

मुद्गान्नं ब्राह्मणंदद्यान्नेत्ररोगापनुत्तये ॥ ५ ॥
दम्पतिभ्यां प्रवृत्तं तु मैथुनं यो निरीक्षयेत् । स नेत्रपूययुक्तः स्यादक्षिभ्यामिति मन्त्रतः ॥ ६ ॥
जपहोमौ च कुर्वीत शक्त्या ब्राह्मणभोजनम् । सहस्रकलशैः स्नानं रवेः कुर्याद्द्विजोत्तमः ॥ ७ ॥

[अतिप्रचुरदूषिका पूयमित्यभिधीयते ।]

घृतचौरस्तु पुरुषो जायते नेत्ररोगवान् । उपोष्य संप्रदद्याद्वै घृतधेनुं विधानतः ॥ ८ ॥

[अन्धत्वं प्रतिबद्धदृष्टित्वं नोत्पाटितनेत्रत्वं राज्यन्धत्वं वा ।]

पितृहा चेतनाहीनो मातृहान्धश्च जायते । नरकान्ते प्रकुर्वीत प्रायश्चित्तं यथाविधि ॥ ९ ॥

[चेतनाहीनो निश्चेष्टो निर्बुद्धिश्च, अस्यापि वक्ष्यमाणम् ।]

प्राजापत्यानि कुर्वीत त्रिंशच्छास्त्रविधानतः । व्रतान्ते कारयेन्नावं सुवर्णपलसंख्यया ॥ १० ॥
स्तम्भं रौप्यमयं चैव ताम्रपात्रं च पूर्ववत् । नौका द्विजाय दातव्या सर्वोपस्करसंयुता ॥ ११ ॥

[नौकेत्युपलक्षणं स्तम्भोऽपि विष्णुप्रतिमा च दातव्या सोपस्करेति । उपस्करो नौकादण्डः सोऽपि सौवर्ण एव ।]

मन्त्रः ।

"वासुदेव जगद्बन्ध सर्वभूताशयस्थित । पापार्णवे सुमग्नं मां तारयाश्रिततारक" ॥ १२ ॥
इत्युदीर्य प्रणम्याथ ब्राह्मणं तं विसर्जयेत् ॥ १३ ॥

[इति चेतनाहीनत्वहरेऽपि ।]

शाकहारी च पुरुषो जायते नीललोचनः । ब्राह्मणाय प्रदातव्यं महानीलमणिद्वयम् ॥ १४ ॥

कपिलाक्षित्वे--

रीतिहृत्कपिलाक्षः स्यादुपोष्यं दिवसद्वयम् । रीतेः पलशतं दद्यादलंकृत्य द्विजातये ॥ १५ ॥

[रीतिर्नाम ताम्रप्रकृतिको धातुविशेषः पित्तलमिति ।]

उच्छिष्टः सन्य आदित्यं पश्यन्नुद्यन्तमम्बरे । मध्यंगतमथास्तं च जातमुच्छिष्ट एव सन् ॥
नक्षत्राण्यथवा चन्द्रं स भवेन्मन्ददृष्टियुक् ॥ १६ ॥
घृतेन चरुणा नेत्ररश्मिहीनो हुताशने । जुहुयादयुतं सम्यगिति शास्त्रस्य निश्चयः ॥ १७ ॥
दद्यादन्नं वरं कृत्वा वासांसि व्याधिशान्तये ॥ १८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुर्नवत्यधिकद्विशततमः ॥ २९४ ॥

---

१ रक्तवासं च तं न्यसेत् इति—कपु० ।

श्रीसूर्य उवाच ।

कुर्यान्मूत्रं पुरीषं यो दद्रुरोगच्युतो भवेत् । शक्त्या तत्पापशान्त्यर्थं दद्याच्छम्भुं हिरण्मयम्॥ १॥
देवद्विजगृहे तीर्थे पुण्यस्थाधिष्ठितं परम् । चतुर्भुजं तु द्विभुजामुमां कुर्याद्विचक्षणः ॥ २ ॥
लक्षणैः सोपि संयुक्तो वित्तशाठ्यं न कारयेत् । वृषोपि रूप्यजः कार्यो घण्टासालंकृतो भवेत्॥ ३॥
वस्त्रैर्माल्यैस्तथा गन्धैर्मूलमन्त्रेण पूजयेत् । ततो ब्राह्मणमाहूय दरिद्रं धर्मकोविदम् ॥ ४ ॥
श्रुतवित्तोपसंपन्नं ज्ञातं चैवात्मवेदिनम् । वस्त्रांगुलीयकैस्तस्य पूजां भक्त्या प्रकल्पयेत् ॥ ५ ॥
होमं च कारयेत्तेन समिदाज्यतिलैरपि । मन्त्रश्च रुद्रगायत्री सर्वत्रेति विनिश्चयः ॥ ६ ॥

रुद्रगायत्री लिंगपुराणे विहिता यथा–

" सर्वेश्वराय विद्महे शूलहस्ताय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥"

यद्वा त्र्यम्बकमन्त्रेण समिधो जुहुयात्सुधीः । कष्टाद्रुदेति मन्त्रेण जुहुयादाज्यमावृतः ॥ ७ ॥

[मूलमन्त्रः–पञ्चाक्षरी वा रुद्रगायत्री वा ।]

कैलासवासी भगवानुमया सहितः परः । त्रिनेत्रश्च हरो दद्रुरोगमाशु व्यपोहतु ॥ ८ ॥
ततश्च ब्राह्मणान्सम्यक् प्रणिपत्य क्षमापयेत् । ब्राह्मणान्भोजयेत्पश्चात्स्वयं भुञ्जीत वाग्यतः ॥९॥
एवं दत्त्वा महादानं दद्रुरोगात्प्रमुच्यते । गोघ्नहा लूतकी चैव प्राजापत्यं समाचरेत् ॥ १० ॥
व्रतान्ते मेदिनीं दद्याच्छृणुयाच्चैव भारतम् ॥ ११ ॥

[भूमेरभावे मेदिनीप्रतिनिधित्वेन गां पयस्विनीं दद्यात् । भारतश्रवणं शास्त्रोक्तप्रकारेणेति ।]

लोहहारी च पुरुषो भवेद्वै बर्बराङ्गकः । लोहं पलशतं दद्यादुपोष्य शतवासरम् ॥ १२ ॥
कारुकाणां वधे कृष्णो रूक्षाङ्गश्च प्रजायते । तेन तत्पापशुद्ध्यर्थं दद्याद्वै वृषभं सितम् ॥ १३ ॥

[कारुकाः शिल्पिनः ।]

तैलचौर्येण भवति नरः कण्डूयनः सदा । उपोष्य सोऽपि विप्राय दद्यात्तैलघटद्वयम् ॥ १४ ॥
वस्त्रहारी च शीर्णाङ्गः स प्रदद्यात्सुशोभनम् । हेम निष्कत्रयमितं वस्त्रयुग्मं च दापयेत् ॥ १५ ॥
स्वाम्यङ्गनाभिगमने जायते दद्रुमण्डलः । कृत्वा लोहमयीं धेनुं पलषष्टिप्रमाणतः ॥ १६ ॥
कार्पासभारसंयुक्तां सप्तधान्यसमन्विताम् । दद्याद्विप्राय विदुषे पापं मे क्षीयतामिति ॥ १७ ॥
विश्वस्तभार्यागमने गजचर्म प्रजायते । तत्पापस्य विनाशाय प्रायश्चित्तं विधीयते ॥ १८ ॥

[विश्वस्तभार्यागमने गुरुतल्पगप्रायश्चित्तादि दोषवशात् प्रायश्चित्तेन निष्कृतिरभिधीयते । सा च कृच्छ्रादितपोदानरूपा । तत्र साङ्गं गोदानम् ।]

मयूरघातेन चैव जायते कृष्णमण्डलः । निष्कत्रयमिता देया तेन स्वर्णमयी शिखी ॥ १९ ॥
हंसघाती भवेद्यस्तु तस्य स्याच्छ्वेतमण्डलम् । रौप्यं पलत्रयमितं हंसं दद्याद्विशुद्धये ॥ २० ॥
अमेध्यस्य प्रदाता च विसर्पिव्याधिमान्भवेत् । मासं पयोव्रतं कुर्याद्दद्याद्धेनुं पयस्विनीम् ॥२१॥

[तत्र सर्पिर्मूर्तिदानम् ।]

सौगन्धिकस्य हरणाद्दुर्गन्धाङ्गः प्रजायते । लक्षमेकं तु पद्मानां जुहुयाज्जातवेदसम् ॥ २२ ॥
स दद्यान्मधुधेनुं च उपोष्याय द्विजातये ॥ २३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचनवत्यधिकद्विशततमः ॥ २९५ ॥

श्रीसूर्य उवाच ।

ब्रह्महा नरकस्यान्ते पाण्डुकुष्ठी प्रजायते । प्रायश्चित्तं प्रकुर्वीत तत्पातकविशुद्धये ॥ १ ॥
[प्रायश्चित्तं षाङ्वार्षिकं कुर्वीत पापस्योपभोगेन क्षयत्वात् । पश्चात्कृते प्रायश्चित्ते-]
चत्वारः कलशाः कार्याः पञ्चपल्लवसंयुताः । पञ्चरत्नसमायुक्ताः सितवस्त्रेण वेष्टिताः ॥ २ ॥
[अत एव स्थानादिमृद्युक्तास्तीर्थोदकेन पूरिता युता इत्यर्थः ।]
गजे विनिहते वाश्वे कृमिकुक्षिः प्रजायते ॥ ३ ॥
मृते भर्तरि या नारी नीलं वस्त्रं प्रधारयेत् । सा मृता नरकं याति कृमिकुक्षिस्ततः परम् ॥ ४ ॥
[नरकभोगादनन्तरं मनुष्यशरीरमासाद्येत्यर्थः ।]
स नीलवृषभान्पञ्च दद्याच्चान्द्रायणं व्रतम् । कुर्यात्त्रिंशद्द्विजा भोज्या दद्याच्छक्त्या तदौषधम् ॥ ५ ॥
नीलवृषभलक्षणं भगव्रणहरे-
भुक्त्वा वा स्पृश्यमस्पृश्यं जायते स कृशोदरः । त्रिरात्रं वैष्णवं कुर्यात्पातकाद्वै प्रमुच्यते ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षण्णवत्यधिकद्विशततमः ॥ २९६ ॥

श्रीसूर्य उवाच ।

इक्षोर्विकारस्य हरी भवेदुदरगुल्मवान् । गुडधेनुः प्रदातव्या तेन दोषस्य शान्तये ॥ १ ॥
गुरुप्रत्यर्थितां यातो गुल्मवाञ्जायते नरः । आचरेत्तन्निवृत्त्यर्थं[1] मासमेकं पयोव्रतम् ॥ २ ॥
[वातगुल्मवानित्यर्थः ।]
मुञ्चामि त्वेति सूक्तेन घृतेन चरुसर्पिषा । जुहुयादयुतं सम्यग्वात आवातु भेषजम् ॥ ३ ॥
एतत्सूक्तं जपेद्दद्यादन्नदानं च शक्तितः[2] ॥ ४ ॥
[वात आवात्विति सूक्तं तत्र विनायकदानम् ।]

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्तनवत्यधिकद्विशततमः ॥ २९७ ॥

श्रीसूर्य उवाच ।

गर्भपातनजा रोगा यकृत्प्लीहजलोदराः । तेषां प्रशमनार्थाय प्रायश्चित्तमिदं स्मृतम् ॥ १ ॥
एतेषु दद्याद्विप्राय जलधेनुं विधानतः । सुवर्णरूप्यताम्राणां पलत्रयसमन्विताम् ॥ २ ॥
भृतकाध्यापको यस्तु कन्यादूषणतत्परः । प्लीहवान्स भवेद्विप्रो जपेच्छ्रीसूक्तमेव हि ॥ ३ ॥
अयुतत्रयसंख्याकं प्लीहोदरविमुक्तये ॥ ४ ॥
यो ब्रह्मविष्णुरुद्राणां भेदं युक्तिकदंबकैः । साधयेदुदरव्याधियुक्तो भवति मानवः ॥ ५ ॥
कुर्यात्कृच्छ्रातिकृच्छ्रे तु चान्द्रायणमथाऽपरम् । सहस्रकलशस्नानमीश्वरस्य तु कारयेत् ॥ ६ ॥
जपेदयुतसंख्याकमुद्यन्नद्येत्यृचं तथा । राज्ञा कर्मातियुक्तेन नियुक्तो धर्मनिश्चये ॥ ७ ॥
पुरोहितः स्वाधिकारात्सचिवश्चान्यथाचरेत् । जलोदरत्वमाप्नोति तस्य वक्ष्यामि निष्कृतिम् ॥ ८ ॥
पयसा वर्तयेन्मासत्रितयं व्रतमुत्तमम् । सहस्रकलशस्नानमीश्वरस्य तु कारयेत् ॥ ९ ॥
उदरव्याधियुक्तस्तु भवेद् गुर्वङ्गनागमे । कुर्यात्तु मकरं सम्यग्राजतं ताम्रमेव वा ॥ १० ॥
[कृत्वा मकरं ब्राह्मणाय दद्यादित्यर्थः ।]

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोऽष्टनवत्यधिकद्विशततमः ॥ २९८ ॥

---

१ आरभेत्तन्निवृत्त्यर्थं—इति—खपु० । २ त्र्यर्चेन इति—खपु० ।

श्रीसूर्य उवाच ।

मन्दोदराग्निर्भवति शतिद्रव्येण वै जपेत् । प्राजापत्यत्रयं कृत्वा भोजयेत्सततं द्विजान् ॥ १ ॥
[शतिद्रव्यं कदन्नमिति पाठः ।]
गोमांसखादको मन्दजठराग्निर्भवेन्नरः । अकारणं गरं दत्त्वा प्रमापयति यः पुनः ॥ २ ॥
स मन्दाग्निर्भवत्येव मृतकः स्वल्पकालतः[1] । अग्निमान्द्यं भवेत्तस्य यस्त्रेताग्निविनाशकः ॥ ३ ॥
[तत्र मेषदानं स्वर्णस्य तण्डुलदानं च ।]

श्रीसूर्य उवाच ।

अन्नहर्ता त्वजीर्णान्नो भवेदस्य तु निष्कृतिः । उपवासत्रयं कृत्वा प्राजापत्यमथापि वा ॥ ४ ॥
जुहुयाच्चरुसर्पिर्भ्यामग्निमश्मीतृचाऽनया । परान्नविघ्नकरणाद्[2]जीर्णमपि जायते ॥ ५ ॥
लक्षहोमं प्रकुर्वीत प्रायश्चित्तं यथाविधि ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो नवनवत्यधिकाद्विशततमः ॥ २९९ ॥

श्रीसूर्य उवाच ।

गुरुणा नानुयातो यो वेदाध्ययनमाचरेत् । स जडः प्रज्ञया हीनः संसारे जायते नरः ॥ १ ॥
[चरेत्कुर्यादित्यर्थः ।]
वक्ष्यामि तत्प्रतीकारं शुद्धकांस्यमयीं दृढाम् । शोभनां कारयेद्घण्टां शुभरेखाविभूषिताम् ॥ २ ॥
पलैस्तु कुर्याद्विंशत्या त्रिंशत्या वा तदर्धतः । सुस्वरां चायतीं श्लक्ष्णां पञ्चगव्येन स्नापयेत् ॥ ३ ॥
श्वेतवस्त्रेण संवीतां तण्डुलोपरि विन्यसेत् ॥ ४ ॥
[ब्राह्मणाय देयं मन्त्रस्तु ब्रह्मजज्ञानमिति ।]
पितृहा चेतनाहीनो मातृहांधश्च[3] जायते । नरकान्ते प्रकुर्वीत प्रायश्चित्तं यथाविधि ॥ ५ ॥
[अस्य प्रायश्चित्तं नेत्ररोगहरणप्रकरणेऽन्धत्वहर प्रपञ्चितम् ।]

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्रिशततमः ॥ ३०० ॥

श्रीसूर्य उवाच ।

गुरुजायाभिगमनान्मूत्रकृच्छ्रः प्रजायते । तेनापि निष्कृतिः कार्या शास्त्रदृष्टेन वर्त्मना ॥ १ ॥
[अनेन विधिना निष्कृतिरुच्यते, तत्रैकादशप्राजापत्यादिव्रतरूपा । अपरा प्रतिमादानजप-होमब्राह्मणभोजनरूपा ।]
स्थापयेत्कुम्भमेकं तु पश्चिमायां शुभं दिशि । नीलवस्त्रसमाच्छन्नं नीलमाल्यविभूषितम् ॥ २ ॥
तस्योपरि न्यसेद्देवं लोहपात्रे प्रचेतसम् । सुवर्णनिष्कषट्केन निर्मितं यादसां पतिम् ॥ ३ ॥
यजेत्पुरुषरूपेण वरुणं विश्वरूपिणम् ॥ ४ ॥
[वरुणमूर्तिः पाशवरदकरा मकरवाहना च भवति ।]
"यादसामाधिपो देवो विश्वेषामपि पावनः । संसाराब्धिकर्णधारो वरुणः पावनोऽस्तु मे" ॥ ५ ॥
इमं मन्त्रं समुच्चार्य आचार्याय यथाविधि । दद्यादेवमलंकृत्वा मूत्रकृच्छ्रप्रशान्तये ॥ ६ ॥

---

१ स्वल्पकभयात् इति–कपु० । २ हरणात् इति–कपु० । ३ पितृत्वचेतनाहीनोहीनो मातृत्वजायते इति–कपु० ।

पशुयोनौ च गमनान्मूत्रकृच्छ्रं प्रजायते । तिलपात्रत्रयं चैव स दद्यादात्मशुद्धये ॥ ७
तत्र तिलपात्रदानमाह ।
ताम्रपात्रे तिलान्कृत्वा पलषोडशकल्पिते । सहिरण्यं स्वशक्त्या वा विप्राय प्रतिपादयेत् ॥ ८
नाशयेत्त्रिविधं पापं वाङ्मनःकायसंभवम् । तिलपात्रं त्रिधा प्रोक्तं कनिष्ठाधममध्यमम् ॥ ९
स्वर्णमेकं जघन्ये तु द्विगुणं मध्यमे क्षिपेत् । त्रिगुणं चोत्तमे तद्वत्सुवर्णं परिकीर्तितम् ॥ १०
मत्सरी गुरुणा यश्च विधवामधिगच्छति । सभवेन्मूत्रकृच्छ्री तु गुरुतल्पार्धमाचरेत् ॥ ११
[गुरुतल्पार्धप्रायश्चित्तं पाड्वार्षिकमित्यर्थः । पद्मदानं वा देयम् ।]
मातुः सपत्नीगमने जायते चाश्मरी गदः । स तु पापविशुद्ध्यर्थं प्रायश्चित्तं समाचरेत् ॥ १२
[प्रायश्चित्तमत्र त्रैमासिकम् ।]
दद्याद्विप्राय विदुषे मधुधेनुं यथोदितम् । तिलद्रोणशतं चैव हिरण्येन समन्वितम् ॥ १३
दुग्धचौरस्तु पुरुषो जायते बहुमूत्रवान् । स दद्याद्दुग्धधेनुं च ब्राह्मणाय यथाविधि ॥ १४
सोदर्यागमने रोगो जायते बहुमूत्रता ॥ १५ ॥
[पराकद्वितयं ब्राह्मणभोजनं सहस्रात्मसूक्तस्य पौरुषस्य स्वशक्तितः पाठः कार्यः ।]
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकाधिकत्रिशततमः ॥ ३०१ ॥

श्रीसूर्य उवाच ।

चाण्डालीगमनात्सर्वः प्रमेहव्याधिमान्भवेत् । क्षुत्पिपासातुरश्चैव जायते तस्य निष्कृतिः ॥ १
चान्द्रायणत्रयं कुर्याद्यवमध्यं तथा पदम् । तिर्यग्गामी सशूलेन प्रमेहेन युतो भवेत् ॥ २
कुर्यात्सान्तपनादीति प्रायश्चित्तं यथाविधि । सर्वव्यवायी मनुजः कन्यागामी तथैव च ॥ ३
वातप्रमेहयुक्तः स्यात्कुर्याच्चान्द्रायणत्रयम् । मधुमेही मातृगामी सततं जायते नरः ॥ ४
पितृभार्याभिगामी च जलमेही नराधमः । यो गच्छेद्भगिनीं नित्यविक्षुमेहीति निश्चयः ॥ ५
[पितृभार्या सपत्नजननीत्यर्थः ।]
प्रायश्चित्तं क्रमात्र षड्वर्षाण्यथ पञ्च च । अब्दमित्याचरेत्सम्यक्ततो रोगात्प्रमुच्यते ॥ ६
ब्राह्मणः स्वर्णहारी च प्रमेही जायते नरः । धेनुं स्वर्णमयीं कुर्यात्पूर्वेण विधिना ततः ॥ ७
[तत्र विष्णुप्रतिमा यथोक्तदानम् ।]

मंत्रः ।

"चक्रं सुदर्शनं यस्य चिह्नानि विविधानि च । प्रमेहं हरतु क्षिप्रं विष्णुर्गरुडवाहनः" ॥ ८
तपस्विनीप्रसङ्गेन प्रमेहो जायते गदः । मासं रुद्रजपं कुर्याद्दद्याद्धेनुं च काञ्चनम् ॥ ९
[प्रसङ्गेन गमनेनेत्यर्थः ।]
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्यधिकत्रिशततमः ॥ ३०२ ॥

श्रीसूर्य उवाच ।

मातृगामी भवेद्यो हि लिङ्गं तस्य विनश्यति ॥ १ ॥
चाण्डालीगमने चैव हीनकुष्ठः प्रजायते । तस्य प्रतिक्रियां कर्तुं कुम्भमुत्तरतो न्यसेत् ॥ २
[उत्तरतः शुद्धलिप्तदेशस्योत्तरदिग्भागे उदकादिपूरितं कलशं स्थापयेत् । कलशस्थापनविधिनेत्यर्थः ।]

कृष्णवस्त्रसमाच्छन्नं कृष्णमाल्यविभूषितम् । तस्योपरि न्यसेत्कांस्यपात्रे देवं धनेश्वरम् ॥ ३ ॥
सुवर्णनिष्कपट्टेन निर्मितं नरवाहनम् । यजेत्पुरुषसूक्तेन धनदं विश्वरूपिणम् ॥ ४ ॥
[यजेत्पूजयेत् ।]
"निधीनामधिपो देवः शङ्करस्य प्रियः सखा । स देवाधिपतिः श्रीमान्मम पापं व्यपोहतु"॥५॥
इमं मन्त्रं समुच्चार्य आचार्याय यथाविधि । दद्यादेवं हीनकुष्ठी लिङ्गनाशी च शुद्ध्यति ॥ ६ ॥
दुष्टवादी तु षण्ढः स्यात्स दद्याच्च द्विजातये । रूप्यं पलत्रयं दुग्धघटत्रयसमन्वितम् ॥ ७ ॥
नृपो भृत्यादिहस्तादीनपराधं विनैव यः । छेदयेत्तस्य देहस्तु भवेद्दग्ध इवाग्निना ॥ ८ ॥
शिलापृष्ठसदृक्षश्च सव्रणश्चापि जायते । रुधिरं प्रस्रवेत्पश्चात्तस्येयं निष्कृतिः परा ॥ ९ ॥
शतरुद्रं जपेत्सम्यगष्टोत्तरसहस्रकम् । यतिचान्द्रायणं चैव कुर्याद्दद्याच्च गां ततः ॥ १० ॥
जायते वृषणौपम्यव्याधिः परमदारुणः । जपित्वा दशसाहस्रं मुच्यते रुद्रसंहिताम् ॥ ११ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्र्यधिकत्रिशततमः ॥ ३०३ ॥

श्रीसूर्य उवाच ।

सुरालये जले मार्गे सकृद्विष्ठां करोति यः । गुदरोगो भवेत्तस्य पापरूपः स दारुणः ॥ १ ॥
मासं सुरार्चनेनैव गोदानद्वितयेन च । प्राजापत्येन चैकेन शमयेद्गुदजा रुजः ॥ २ ॥
[यद्यपि सुरार्चनमिति सामान्येनाभिहितं तथापि सूर्यप्राधान्येन रुद्रविष्णू पूज्यौ । 'आरोग्यं भास्करादिच्छेत्' इति स्मृतिः ।]

प्रसवगुदरोगे ।

विण्मूत्रोत्सर्जनं कृत्वा यः कृत्वा शौचकर्म तु । भुङ्क्ते जन्मान्तरे मर्त्यो भवेत्स प्रसवागुदः ॥ ३॥
भवेच्च दारुणा पीडा तत्र कृच्छ्रातिकृच्छ्रकः । चान्द्रायणं च कर्तव्यं तथा च क्षीरसर्पिषा ॥४॥
अक्षीभ्यामिति सूक्तेन सहस्रं जुहुयाद्बुधः । उद्यन्नद्यतृचं चैव जपेत्पूर्वोक्तसंख्यया ॥ ५ ॥
अध्यापयेच्च जुहुयाज्जपेद्वार्शोयुतो भवेत् ॥ ६ ॥
[तन्निवृत्तौ प्रकुर्वीत कण्ठं चैव विष्णुहृदयं जपेत्तथा]
तामग्निवर्णामिति च जपेत्सूक्तं समाहितः । हिरण्यं सघृतं दद्याच्छ्रोत्रियाय कुटुम्बिने ॥ ७ ॥
[तत्र धेनुदानं च प्रशंसन्ति बोधायनः गोपालदानम् ।]

दानमन्त्रमाह ।

"वर्हापीडकसंयुक्तं वेणुवादनतत्परम् । गोपीजनैः परिवृतं वनपुष्पावतंसकम् ॥
ददामि प्रीतये तस्य सर्वपापहरं परम् " ॥ ८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुरधिकत्रिशततमः ॥ ३०४ ॥

श्रीसूर्य उवाच ।

स्मार्ताग्निं शमयेद्यस्तु सोऽतिसारयुतो भवेत् । अग्निरश्मीत्यृचं जप्त्वा दशांशं जुहुयात्तिलान्॥१॥
सर्पिषा चाप्लुतं दद्याद्धिरण्यं ब्राह्मणाय च ।
[स्मार्ताग्निरौपासनाग्निः ।]

---

१ मुक्तस्तु भवेद्दग्धो विवा-खपु० ।

अत एवासुमादाय चित्तं त्रैमासि दम्पत्योरनुकूले शुभे दिने स्वस्तिवाचनं कृत्वा स्वशक्त्या सारेण पूजां विधाय ' पुत्रकामनया हरिवंशश्रवणं करिष्ये ' इति संकल्पयेत् । ' दम्पत्य श्रवणकर्तृकत्वेन करिष्यावहे ' इति प्रयोगो वा । अन्यतरकर्तृकत्वे कारयिष्ये एवं संकल्प्य श्रुताध्ययनसंपन्नं ब्राह्मणं विभवानुसारेण वस्त्रमुद्रिकाकुण्डलादिभिः संपूज्य तं श्रावणे ' एभिश्चन्दनताम्बूलादिभिर्हरिवंशश्रवणे त्वामहं वृणे ' इति प्रयोगः । ततश्च प्रतिदिनम सनप्रतिबन्धे स्नातावलंकृतौ दम्पती तदेकचित्ततया शृणुयाताम् । नारिकेलपूगादि शमदमवान्प्रतिदिनमाचार्यं पुस्तकं च पूजयेत् । अन्ते च स्वलंकृतां गां पयस्विनीं सव स्वर्णशृङ्गीं रौप्यखुरां ताम्रपृष्ठां कांस्यदोहनां सवस्त्रां सदक्षिणां च दद्यात् । संकल्प स्वर्णादिमहादानानि दद्याद्यथाशक्ति । गोदानमन्त्रः गोदानविधौ । विनायकशान्ति शान्तिसारे । प्रकृतमनुसरामः । ब्राह्मणोद्वाहनमेकं प्रायश्चित्तम् । अपरं हरिवंशश्रवणं परिशे न्महारुद्रं रुद्रमपि तृतीयं प्रायश्चित्तम् । अत एव वचनस्थिताः स्वशब्दार्थाः । एतानि त्रीण्य शक्त्याद्यपेक्षया व्यस्तानि समस्तानि वा योज्यानि । महारुद्रलक्षणं दशांशहोमप्रकारो रुद्रा वाकानामार्यादिसर्वपरिभाषा रुद्रविधाने समुपवर्णिता । एकादशपशून् परत्र गौः रुद्र गामिति श्रुतौ । दुर्मनाश्चैव जायेत तस्य निष्कृतिः परा ।

कृच्छ्रचान्द्रायणे कुर्याद्धोमः कूष्माण्डसंज्ञकः । कर्तव्यो होमविधिश्च स्वर्णदानं तथा परम् ॥ २
कन्यादानं च पञ्चम्यां श्राद्धं कुर्वीत यत्नतः । सहस्रनामजापी च न चेदेवं विशुद्ध्यति ॥ ३

एतान्यष्टकादिश्राद्धरहितादीनि पञ्चापि पृथक्पृथङ्निर्मितानि । अतो यावद्व्याधिप्रमोक्षस्त त्सहस्रनामस्तोत्रं पठेत् ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाधिकत्रिशततमः ॥ ३०५ ॥

श्रीसूर्य उवाच ।

चतुर्विधा तु या वन्ध्या भवेद्वत्सावियोजनम् । वक्ष्ये तस्य प्रतीकारं तत्स्वरूपं निबोधयेत ॥ १
मृतवत्सा भवेत्काचित्काचिदेकप्रसूतिका । कन्याप्रसूतिरूपा च काकवन्ध्या चतुर्थिका ॥ २

[अप्रसूतेत्यर्थः]

सर्वास्ताः पापघोरेण जायन्ते पूर्वजन्मनि । मृतवत्सा द्रव्यहरणादेकसूताऽसुघातनात् ॥ ३
कन्याप्रजर्णसंबन्धात्काकवन्ध्याविरोधतः ।

[तत्र स्वर्णधेनुदानम् ।]

हिरण्येन यथाशक्त्या सवत्सां कारयेद्दृढाम् ॥ ४ ॥
धेनुं यत्नेन वत्सं च पादेन गुरुरब्रवीत् । धेनुं रूप्यखुरां रत्नं तस्याः पुच्छे नियोजयेत् ॥ ५
घण्टा गलेन बध्नीयात्ताम्रं पृष्ठे निधापयेत् । सर्वोपचारैः षोडशभिर्नैवेद्यं पायसं भवेत् ॥ ६
मोदकं च तथा पूपं गुडं लवणमेव च । जीरकं च सुविस्तीर्णं शूर्पं वेणुमये दृढे ॥ ७
धेनोरेवं प्रदातव्यं ब्राह्मणस्त्रिषु चैव हि ।

[मोदकादिपरिपूर्णपात्राणि षडष्टौ दश वा दद्यात् ।]

ब्राह्मणं सर्वशास्त्रज्ञं कुशलं धर्मवेदिनम् ॥ ८ ॥
विद्याविनयसंपन्नं शान्तं च विजितेन्द्रियम् । अलोलुपं सर्वजनप्रियं कल्मषवर्जितम् ॥ ९
आहूय भक्त्या संपूज्य वस्त्राद्यैर्गन्धपुष्पकैः । तेनैव कारयेत्पूजां मातृतो धेनुवत्सयोः ॥ १०

होमं च कारयेत्तत्र समुच्चार्य ततः पुनः।
"अस्य गौतम ऋषिर्धेनुर्देवताऽनुष्टुप् छन्दः। विनियोगः।"
प्राङ्मुखायोपविष्टाय प्रदद्यात्तामुदङ्मुखः॥ ११॥
मन्त्रेणानेन विधिवत्पुच्छे हस्तं निधाय च।

सार्धद्वयेन।

"धेनुर्यागिरसामन्त्रेण प्रतिष्ठा सुरभेश्च या। दुहिता या तथा भानोरग्नेश्च वरुणस्य च॥ १२॥
याश्च गावः प्रवर्तन्ते वनेपूपवनेषु च। प्रीणन्तु ता मम सदा पुत्रपौत्रसुखप्रदाः॥ १३॥
प्रयच्छन्तु दिवारात्रमविच्छेदं च शान्तये।" एवं दत्त्वा च तद्दानं प्रणिपत्य विसर्जयेत्॥ १४॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडधिकत्रिशततमः॥ ३०६॥

श्रीसूर्य उवाच।

[अत्र कर्माणि स्त्रीपुंसयोर्मिलितयोः प्रत्येकं वा यथा नियतमधिकारः। अथ गर्भस्रावे यज्ञोपवीतदानम्।]

स्रवद्गर्भा भवेत्सा तु बालकं हन्ति या विषैः। यज्ञोपवीतं कुर्वीत काञ्चनं तु स्वशक्तितः॥ १॥
अत्यन्तवर्णापेक्षेण राजतं चोत्तरीयकम्। पलार्धेन तदर्धेन तदर्धेनाथवा पुनः॥ २॥
ग्रन्थिप्रदेशे देयं तु मौक्तिकं वज्रमेव च। प्रक्षाल्य पञ्चगव्येन गायत्र्या ताम्रभाजने॥ ३॥
द्रोणप्रमाणं तस्मिंस्तु निःक्षिपेत्तद्धिमध्यतः। ताम्रस्योपरि संस्थाप्यमुपवीतं सुपूजितम्॥ ४॥
गन्धपुष्पाक्षतैर्धूपैर्नैवेद्यैरपि भक्तितः॥ ५॥

[दधि ताम्रभाजनोपरि आज्यं तत्प्रमाणं यथालाभोपपन्नं वा आज्यमुपवीतं स्थाप्यं महोत्तरीयं च।]

ततो ब्राह्मणमाहूय होमं तत्र प्रकल्पयेत्। तिलैराज्येन मधुना मिश्रैरष्टोत्तरं शतम्॥ ६॥
तस्मै हुतवते देयं वस्त्राद्यैः पूजिताय तु। मन्त्रेणानेन विधिवत्प्राङ्मुखायोपवीतकम्॥ ७॥
"उपवीतं परमिदं ब्रह्मणा विधृतं पुरा। भवनौकाप्रदानेन गर्भं संधारयाम्यहम्।"॥ ८॥

[अयमर्थः—संसारे द्विजकर्मा।]

धनान्यन्यब्राह्मणेभ्यस्तस्मिन्काले प्रदापयेत्। अनुव्रज्य तथा कार्यं प्रणिपत्य समापयेत्॥ ९॥
गर्भस्रावकरादोषादेवं कृत्वा विमुच्यते॥ १०॥

[अस्मिन्कर्मणि स्त्रियोऽधिकारः।]

मासोपवासिनी नारी यतः प्रस्रावयेद्यदि। यदि संपर्कदोषेण जायत सान्यजन्मनि॥ ११॥
स्रवद्रक्ता सदा योनौ तन्निष्कृतिरिहोच्यते। मासोपवासं कुर्वीत तथा मासं पयोव्रतम्॥ १२॥
क्षीरं मुष्णाति या नारी पूर्वजन्मनि सुव्रत। जन्मान्तरे तु तस्या वै क्षीरं न वितरेत्स्तने॥ १३॥
क्षीरान्नं भोजयेद्विप्रान् साज्यं समधुमण्डकम्। अनुलिम्पेच्च तेनैवाक्षिदिगन्तःस्वशक्तितः॥ १४॥
विप्रपादोदकैश्चापि क्षालयेत्कुचमण्डलम्। सुरामांसघृतक्षौद्रघृतैर्वा गन्धपुष्पकैः॥ १५॥
भूतेभ्यश्च वलिं दद्याद्भूतान्यत्र च संशृणु। मधुश्च नवनीतश्च पिण्डमाल्यो ह्यचिन्तकः॥ १६॥
भूतभैष्यः स्वशक्तिश्च भूतानां पञ्चकं त्विदम्॥ १७॥

[स्वशक्तिरिति मध्वादीनां विशेषणम्। अत्र सुरादीनि वलिद्रव्याण्यविहितानि तेषु ब्राह्मणादिभिर्निषिद्धान्येवाग्राह्याणि।]

ज्येष्ठभ्रातर्यनूढे तु यो वोद्वहति च स्वयम् । स भवेन्मृतपत्नीक उष्णज्वरसमन्वितः ॥
प्राजापत्यत्रयं कुर्याद्वैवं च त्रयमेव च । तामग्निरिति चार्चेन चरुणाष्टोत्तरायुतम् ॥
जुहुयाद्घोजयेद्विप्रानेवं पापाद्विमुच्यते ॥ २० ॥
मित्रभार्याभिगामी च मृतभार्योभिजायते । तस्य पापविशुद्ध्यर्थं द्विजमेकं विवाहयेत् ॥
धर्मपत्न्यां सुव्रतायां सुखमैथुनकारिणः । पत्न्या विरक्तिर्भवति सुवर्णकलशेन सः ॥
उमामहेश्वरं देवं रुद्रैकादशनीजपम् । स्नापयेच्छ्रद्धया युक्तो ह्यविच्छिन्नाम्बुधारया ॥

[त्र्यम्बकमिति मन्त्रः । अथ यथाशक्त्या सुवर्णेनोमामहेश्वरप्रतिमां रजतवृषारूढां यित्वा स्थापयित्वा ब्राह्मणाय दद्यात् ।]

अथ दारिद्र्यहरधनदमूर्तिदानम् ।

दरिद्रो जायत मर्त्यो दानविघ्नं करोति यः । ऐश्वर्यं साधते येन कारिणा तच्छृणु प्रभो ॥
पलार्धेन तदर्धेन चतुर्थांशेन वा पुनः । धनदस्य प्रतिकृतिं कुर्याद्धेममयीं शुभाम् ॥
द्विभुजां वाहनोपेतां नयनानन्दकारिणीम् ।शङ्खपद्मनिधिभ्यां च युक्तां तच्छङ्खयोर्द्वयोः॥
श्वेतवस्त्रेण संवेष्ट्य तण्डुलोपरि विन्यसेत् । तण्डुलानां परीमाणं भवेद्द्रोणमितं शुभम् ॥
ऋणं दत्त्वाधिकां वृद्धिं गृह्णीयाद्यश्च योभयम् । उत्पादयति चान्येषां पाषाणेन प्रहारतः॥

[अधिवृद्धिग्रहणं नाम शास्त्रव्रतादिग्रहणम् । भयमुत्पादयतीति निमित्तमन्तरेण भयोत्पादनं तलप्रहारकृच्चैव जातो वै धनिनां कुले । धनेन रहितः प्रायो देशान्तरगतो भवेत् ॥
महाक्लेशो बहूद्वेगी उदावर्ती भवेन्नरः । कृच्छ्रातिकृच्छ्रे कुर्वीत चान्द्रायणमथापरम् ॥
कुर्यादिष्टचरुभ्यां च होमो व्याहृतिभिस्तथा । यत्किंचिदमितं सूक्तमयुतं वारुणं जपेत् ॥
अन्यायवृत्तिनृपतेः सेवनाद्विप्रहिंसनात् । महादानसमादानाद्गुरुभार्याविमर्दनात् ॥
दंष्ट्रिभ्यश्चाथ मरणादपमृत्योश्च निन्दया । वेदवाह्यस्य शास्त्रस्य पाठनात्कर्मसेवनात् ॥
विषोद्बन्धनशस्त्राद्यैर्मरणादपिसौनिकात् । उदासीनः सभामध्यभङ्गात्स्त्रीगमनात्तथा ॥
श्रुताध्ययनसंपन्नश्रोत्रियब्राह्मणस्य तु । उदासीनः सभामध्ये कृत्वा भङ्गं तु दारुणम् ॥
परीक्षासमये प्राप्ते भृतकाध्यापकस्तथा । देवब्राह्मणराज्ञां तु स्वर्णापहरणात्तथा ॥
अरण्ये निर्जने देशे ब्रह्मरक्षः प्रजायते । गयाश्राद्धं तु कृत्वापि जपहोमादिभिस्तथा ॥
देवतातीर्थसेवाभिः कन्यादानेन चैव हि । ब्रह्मराक्षसपैशाच्यान्मुच्यते मनुरब्रवीत् ॥

[ब्रह्मराक्षसत्वं पिशाचस्याप्युपलक्षणम् । तत्र निष्कृतिर्बृहन्मनुप्रोक्ता पुत्रादिभिः कार्या जपो वेदपारायणं पवमानादिसूक्तजपश्च तथा सहस्रनामादिस्तोत्रजपश्च होमोऽयुतहोमः तत्र गोभूहिरण्यदानं साङ्गमिति ।]

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्ताधिकत्रिशततमः ॥ ३०७ ॥

श्रीसूर्य उवाच ।

रजस्वलागामिनं च तदुच्छिष्टस्य भोजिनम् । प्रजाग्रहः प्रगृह्णाति ततः स ज्वरवान्भवेत् ॥
अतिसारी च कुष्ठी च गात्रे सर्वत्र वातवान् । स्त्रियश्चेद्गर्भनाशः स्यादत्रेयं निष्कृतिः परा ॥
कृच्छ्रं चान्द्रायणं चैव कुर्यात्सांतपनत्रयम् । अष्टोत्तरसहस्रं तु सर्पिषा जुहुयात्तथा ॥

---

१ सुखमैथुनकारिणम्—क० पु० । २ जायते ब्रह्मराक्षसः—ख० पु० ।

पुनर्मर्मेतुमन्त्रेण जपेत्पुरुषसूक्तकम् ॥ ४ ॥

तत्र बलिदानमाह।

ताम्रपात्रे नवे व्रीहितण्डुलानाढकोन्मितान्। निक्षिप्य जलकुम्भेन सार्धं नीत्वा चतुष्पथम्॥५॥
गन्धपुष्पादिभिस्तत्र समभ्यर्च्य बलिं क्षिपेत् ॥ ६ ॥

मन्त्रः।

"प्रगृह्णीष्व बलिं चेमं प्रजाग्रह महाबल। आतुरस्य सुखं सिद्धिं प्रयच्छ त्वं प्रजाग्रह।"॥ ७ ॥
अस्खलां च चाण्डालीं यो गच्छेत्तं ज्वरग्रहः। गृह्णाति तेन सन्तापधारी भवति मानवः ॥ ८ ॥
इन्द्रायणं सांतपनं कुर्याच्च मधुमिश्रितैः। रसालपल्लवैर्होमो जातवेदसमन्त्रतः ॥ ९ ॥
गायत्रां सहस्रं तु जपेदयुतं जातवेदसम्। शक्त्या हिरण्यदानं च ब्राह्मणान्भोजयेत्तथा ॥ १० ॥
घृतपूर्णं कांस्यपात्रे तु ध्वजैः श्वेतैः परिष्कृतम्। निक्षिप्य गन्धपुष्पाद्यैर्ग्रहपूजां विधाय च ॥
देवालये क्षिपेद्विद्वान्निःक्षिपेच्च चतुष्पथे ॥ ११ ॥

मन्त्रः।

"प्रगृह्णीष्व बलिं चेमं दाहरूप महाज्वर। आतुरस्य सुखं सिद्धिं प्रयच्छ त्वं महाग्रह" ॥ १२ ॥
तस्करो यो महापापिर्हिंसको निर्दयाश्रयः ॥ १३ ॥

अरुण उवाच।

केन कर्मफलेनाहमर्धाङ्गत्वमुपागतः। वक्तुमर्हसि देवेश श्रोतुमिच्छामि यत्नतः ॥ १४ ॥

श्रीसूर्य उवाच।

काश्यद्विजस्तपोयुक्तो विरक्तः प्राक्कुचूद्भवः। बभूव मातरं त्यक्त्वा ह्येकपुत्रां तपस्विनीम् ॥ १५ ॥
स कदाचित्कुरुक्षेत्रे प्राप्य सूर्यपरायणः। गायत्रीजपमास्थाय तपस्तेपे सुदुश्चरम् ॥ १६ ॥
ऊर्ध्ववाहुरभूत्पूर्वं पुनरासीदधोमुखः। तस्य कर्माद्भुतं दृष्ट्वा पीडिता सा जनन्यभूत् ॥ १७ ॥
तर्जितोऽपि तया तत्र तद्वाचा न कृता रुषा। स्थापयित्वा शिरो भूमौ सोऽर्धाङ्गेन तदातपत्॥१८॥
तस्मै शापं ददौ माता जन्मजन्मनि भो सुत। शरीरमर्धं संप्राप्य ज्वलत्पावकसंनिभम् ॥ १९ ॥
तमोमये महाकाशे गच्छ भ्रमवतां गतिम् ॥ २० ॥
एवं संशापितो विप्रो जनन्या स्वल्पपापकृत्। तत्क्षणादत्यजत्तत्र योगेनात्मकलेवरम् ॥ २१ ॥
प्राप्यैवं मद्विधाँल्लोकान् विनतायामिहाण्डज। प्रयागे कश्यपाज्जातः सर्वदेववलाधिकः ॥ २२ ॥
रौद्ररूपो महाकायो दुर्धर्षोऽर्धशरीरभृत्। संप्राप्य कश्यपाज्ज्ञानं प्राप्तस्त्वं मे पदं ध्रुवम् ॥ २३ ॥

अरुण उवाच।

मातृशापप्रतिकृतिं ब्रूहि मे वदतांवर। यत्कृत्वा सर्वसौख्यानि सुलभान्यत्र जन्मनि ॥ २४ ॥

श्रीसूर्य उवाच।

न काचिन्निष्कृतिः सूत मातुः शापविनाशिनी। तथापि तत्ते वक्ष्यामि शृणु गुह्यं परंतप ॥ २५॥
स्यन्दनानि महावाहो मदीयान्यद्भुतानि च। दुर्लभानि च देवानां गन्धर्वोरगरक्षसाम् ॥ २६ ॥
तान्यहं प्रेक्ष्य शून्यानि सूत हीनानि काश्यप। तावदेव मया दृष्टस्त्वं मे भक्तिपरायणः ॥ २७ ॥
स्थापितोऽसि रथे यस्मात्सर्वशास्त्रविशारद। नानासौरगणैस्सार्धं ममाग्रोदयकारकः ॥ २८ ॥

---

१ ज्वरी—ख० पु०।

त्वां दृष्ट्वा मां प्रपश्यन्तु भूलोकादिसमाश्रिताः । त्वं निष्पापोऽसि पक्षीन्द्र मम सांनिध्यभक्तित
यस्मान्मम पदे प्राप्ते सर्वकल्मषनाशने । जन्तुर्न लिप्यते पापैः पद्मपत्रमिवाम्भसा ॥ ३
एतत्ते कथितं वत्स तव कर्मफलं त्विदम् । सर्वकर्माश्रयं स्वर्गापवर्गाख्यं शुभाशुभम् ॥ ३
अतः परं किमन्यत्त्वं श्रोतुमर्हसि तद्वद ॥ ३२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोऽष्टाधिकत्रिशततमः ॥ ३०८ ॥

अरुण उवाच ।

साक्षाज्जातिस्मरो देव कलौ कोऽपि भविष्यति । प्रादुर्भूतस्तथा त्वं मे ब्रूहि कः पुरुषोत्तमः॥

श्रीसूर्य उवाच ।

शृणु सूत प्रवक्ष्यामि कथां पौराणिकीमिमाम् । यथा जातः कलौ घोरे साक्षाज्जातिस्मरः प्र
तत्र भाद्रपदे मासि कृष्णाष्टम्यां च पुत्रक । मथुरामण्डले पुण्ये निशीथे रोहिणीयुते ॥ ३
विजयाख्ये मुहूर्ते तु सूर्ये सिंहगतेऽण्डज । भारावतरणार्थाय कंसादीनां वधाय च ॥ ४
देवक्यां वसुदेवाच्च नररूपी जनार्दनः । शङ्खचक्रधरो देवः श्यामाङ्गः कमलेक्षणः ॥ ५
चतुर्भुजो महावाहुर्वनमालाविभूषितः । सकौस्तुभो गदापाणिः प्रादुर्भूतो भविष्यति ॥ ६
अदितिर्देवकी तत्र वसुदेवश्च कश्यपः । ताभ्यां जातोऽण्डजश्रेष्ठ तस्मात्स पुरुषोत्तमः ॥ ७
स एव जातिं स्मरति कलौ साक्षात्पतत्रिण । नान्यः कदापि देवोपि शरीरं प्राप्य मानुषम् ॥८
तत्र पुण्यप्रभावेण नानादेवद्विजार्चनात् । प्राकृताद्वेददानाच्च जातिं सूर्यारुणात्स्मरेत् ॥ ९
साक्षाज्जातिस्मरो विष्णुर्यस्मात्स पुरुषोत्तमः । कृत्वाऽद्भुतानि कर्माणि त्रिदशैर्दुष्कृतान्यपि १
भारोद्धारं पृथिव्याश्च गमिष्यति पदं स्वकम् । तस्य जन्मदिने सूत यः कुर्याद्विधिपूर्वकम्॥११
व्रतोपवासं संपूज्य जन्मविज्ञैर्जनार्दनम् । स गच्छेत्परमं स्थानं यत्र विष्णुः सनातनः ॥ ११
पुनः कलियुगस्यान्ते स एव भगवान्हरिः । अवतारं स्वकं कृत्वा कल्किसंज्ञं तदाद्भुतम् ॥१३
क्षयं नीत्वा जनान्दुष्टान्म्लेच्छान्धर्मपराङ्मुखान् । प्रकाश्य वेदधर्माश्च गमिष्यति परं पदम् ॥१४

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो नवाधिकत्रिशततमः ॥ ३०९ ॥

श्रीसूर्य उवाच ।

क्षीणात्पुण्यादथो कश्चिदपतत्सिद्धपुरात्सुत । स एवाऽयं महाभाग जातश्चैवात्र जन्मनि ॥ १
देशे गङ्गासमीपस्थे पुण्ये पुण्यजनाश्रिते । महीपालकुलेऽत्युग्रे महोग्रः पृथिवीपतिः ॥ २
लघुस्वरूपो मतिमान् नानारत्नचयान्वितः । महामात्यैर्दृढैर्युक्तो भूपालानां भयप्रदः ॥ ३
तपःशेषान्महापुण्यात्सर्वमेतत्फलं सुत । पापावशेषात्पापिष्ठः कामी लोभसमन्वितः ॥ ४
धर्मशास्त्रक्रियाहीनः शास्त्रवर्ती पतत्रिण । गङ्गास्नानान्महावाहो प्रायश्चित्तं परं न हि ॥ ५
यत्र गङ्गाऽण्डजश्रेष्ठ प्रायश्चित्तं हि तत्र सा । प्रायश्चित्तं परं नैवाशेषपापनिकृन्तनम् ॥ ६
शिवाराधनजात्पुण्यादत्र जन्मनि सुव्रत । इहैव सर्वसौख्यानि चान्ते रुद्रगणो नरः ॥ ७
भविष्यति महापुण्याद्रुद्रपूजनजात्फलात् । आयुस्तस्य महाभाग पञ्चपञ्चाशदब्दकम् ॥ ८

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अ० दशाधिकत्रिशततमः ॥ ३१० ॥

---

१ विनता—कपु० । २ चैतच्छेष—कपु० ।

श्रीसूर्य उवाच।

कैलासात्पार्वतीशापात्प्राग्जन्मन्यपवर्गजा । बभूव काचिद्वनिता महादानरता सदा ॥ १ ॥
पार्वत्याः क्षोभणादत्र यवन्यस्ति पतत्रिण । महाविभूत्या युक्ता सा समस्तैश्वर्यसंयुता ॥ २ ॥
पृथ्वीपतेः सा पुत्रीयं जाता वै नर्मदातटे । पुत्रभ्रातृविहीना सा देवीशापान्महासती ॥ ३ ॥
भञ्जनात्तद्व्रतस्यात्र न च पूर्णमनोरथा । सुवर्णवर्णा पद्माक्षी नानाभरणशोभिता ॥ ४ ॥
जाता कुम्भगते लग्ने स्थिते तत्र शनैश्चरे । पञ्चवेदमितायुः स्यादत्र जन्मनि वै ध्रुवम् ॥ ५ ॥
विभुज्य सर्वभोगान्सा गच्छेत्स्वर्गं महासती । अग्रे जन्मनि सा देवी भविष्यति च वाहुजा ॥ ६ ॥
पत्या सार्धं प्रविश्याग्नौ पुनर्गच्छेच्छिवालयम् ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अ० एकादशाधिकत्रिशततमः ॥ ३११ ॥

श्रीसूर्य उवाच।

प्रागासीद्ब्राह्मणः कश्चित्कृषिकर्मरतः सदा । पूजकश्चातिथीनां च भिक्षुकाणां च यत्नतः ॥ १ ॥
तद्गृहे वृषभो मत्तस्तीक्ष्णशृङ्गो भयानकः । तेन तद्वृषभस्यापि प्राग्भवे विनतासुत ॥ २ ॥
छित्त्वा नासाग्रमुष्कौ तु कृतं कर्मातिदारुणम् । तत्र जन्मनि तद्भुक्त्वा फलं पापसमुद्भवम् ॥ ३ ॥
जातोऽत्र यवनः सिन्धुमण्डले रम्यपर्वते । षण्ढस्तु तेन पापेन स चास्त्वत्र पतत्रिण ॥ ४ ॥
धर्मात्पूर्वकृतात्सोऽपि सुखैश्वर्यधनान्वितः । पापस्यात्रार्जितस्याथ प्रायश्चित्तं परं न हि ॥ ५ ॥
पूजनादतिथीनां च भविष्यति च तद्गतिः । तीर्थाश्रयेऽत्र जन्तुपि मृत्युस्तस्य प्रकीर्तितः ॥ ६ ॥
आयुः षष्टिमिताब्दान्तं रिष्टं पञ्चाशदब्दके ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो द्वादशाधिकत्रिशततमः ॥ ३१२ ॥

श्रीसूर्य उवाच।

नन्दिकेश्वरसांनिध्याच्च्युतो रुद्रगणो महान् । अभिमानान्वितस्तत्र रुद्रभक्तिपराङ्मुखः ॥ १ ॥
शप्तो नन्दीश्वरेणाथ यस्माद्रुद्रपराङ्मुखः । तस्मात्त्वं यवनो दुष्टो भविष्यसि महीतले ॥ २ ॥
प्रसादितस्तदा तेन स्तुतिभिर्नन्दिकेश्वरः । अपि स्वल्पतरे काले शापान्मुक्तिं ददौ प्रभुः ॥ ३ ॥
तस्य शापान्महाभाग जन्मन्यत्राजनि स्वयम् । महाभूमिभुजां वंशे म्लेच्छानां गरुडाग्रज ॥ ४ ॥
पुष्करात्प्राक्परे देशे शुक्रे स्वोच्चे तु लाभगे । मालव्ययोगे विख्याते सचन्द्रे वहुभिर्युते ॥ ५ ॥
गौरो यशस्वी मतिमान् नानारत्नचयैर्वृतः । गजयूथैः समाक्रान्तो वहुभूपालसेवितः ॥ ६ ॥
नानावाहनसंयुक्तो वहुभोगयुतस्तथा । सकलैश्वर्यवित्ताढ्यः स्वेच्छाद्रव्याश्चिताऽनुजः ॥ ७ ॥
दातातिशक्तितो लोके धर्मात्मा लोकविश्रुतः । रुद्रभक्त्यन्तरायश्च न तु पूर्णमनोरथः ॥ ८ ॥
वहुभृत्यैः समायुक्तो यावज्जीवं सुखान्वितः । पञ्चवेदमिते वर्षे रिष्टं शस्त्रास्त्रवन्धनात् ॥ ९ ॥
दृढकर्मकृतात्पापाद्रुद्रपूजनभङ्गजात् । प्रायश्चित्तं महाभाग नात्र जन्मनि विद्यते ॥ १० ॥
चिह्नभङ्गात्तथा सूत भौमो नीचोष्टमे स्थितः । सूर्यस्यायगताच्छुक्रात्सङ्गान्मालव्यसंज्ञकात् ॥ ११ ॥
नायुर्दायमवाप्नोति रिष्टान्तं जीवनं स्मृतम् ॥ १२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायत्रयोदशाधिकशततमः ॥ ३१३ ॥

---

१ लोभनात्—खपु० ।

अरुण उवाच ।

भगवन्देवदेवेश श्रुतमेतन्महाद्भुतम् । सहानुगामिनी नार्यो गतिं मे ब्रूहि भास्कर ॥ १

श्रीसूर्य उवाच ।

मृतं सतीक्ष्य भर्तारं या विशेच्च हुताशनम् । सार्धं तेन महापुण्या ज्ञेया सा सहगामिनी ॥ २
श्रुत्वा मृतपतिं यात्र विदेशस्थं पतिव्रता । तद्ध्वनेन विशेदग्नौ सा ज्ञेया चानुगामिनी ॥ ३
धर्मात्पतिव्रता पूर्वं भवेन्मोक्षगतिर्द्वयोः । अथैकाभून्महासाध्वी जाता ब्रह्महदेऽण्डज ॥ ४
ब्राह्मणी तपसा युक्ता सदा भर्तृपरायणा । दानशीलरता पुण्या पुण्यकर्मान्विता सती ॥ ५
दृष्ट्वा मृतपतिं सा तु दिव्याभरणभूषिता । प्राप्ताग्नौ विधिना सूत कृत्वा पूजां हरेर्भृशम् ॥ ६
सा गता यमराजस्य स्कन्धे दत्त्वा पदाम्बुजम् । वैकुण्ठे चाण्डजश्रेष्ठ यद्गत्वा न निवर्तते ॥७
तल्लत्तातलघातेन मूर्च्छितोऽभूद्यमाधिपः । तत्काले वै तत्र पृष्टो नारदेन महात्मना ॥ ८
धर्मराज वदैतन्मे त्वत्तः परतरश्च कः । दण्डप्रदो महाभाग येन त्वं चालितोऽधुना ॥ ९
तमुवाच ऋषिश्रेष्ठ गतेयं या शुभानना । सती तत्पादभारेण पीडितोऽहं भृशं द्विज ॥ १०
मोक्षं गता महासाध्वी गृहीत्वा तु स्वकं पतिम् । महापापसमाक्रान्तं नरकस्थं द्विजोत्तम ॥ ११
साऽगमिष्यति चैवात्र पत्युः पापावशेषतः । ब्राह्मणी योगयुक्ता च भविष्यति कलौ युगे ॥ १२
काश्यां मृत्युस्तयोर्यस्माच्छिवत्वमुपगच्छतः ॥ १३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुर्दशाधिकत्रिशततमः ॥ ३१४ ॥

श्रीसूर्य उवाच ।

कामतो यश्चरेत्पूर्वं ब्रह्महत्यां नराधमः । क्षयरोगान्वितः सोऽपि जायते चात्र जन्मनि ॥ १ ।
घोराद्ब्रह्मघ्नजात्पापाद्दृढकर्मकृतात्सुत । प्रायश्चित्तं मया नोक्तं पापान्मुक्तिस्त्रिजन्मनि ॥ २ ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचदशाधिकत्रिशततमः ॥ ३१५ ॥

श्रीसूर्य उवाच ।

ब्राह्मणं घातयेद्यस्तु पूर्वजन्मनि मानवः । मोहादकामतः सोऽपि क्षयरोगसमन्वितः ॥ १
क्षयेणात्र क्षयं यान्ति धातवः सर्वदेहिनाम् । धातुक्षयेऽतिकष्टेन नष्टायुर्जायते पुमान् ॥ २
सर्वस्वदानादत्रैव क्षयरोगः प्रशाम्यति । कुरुक्षेत्रादितीर्थेषु सत्पात्रेषु विधानतः ॥ ३

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अ० षोडशाधिकद्विशततमः ॥ ३१६ ॥

अरुण उवाच ।

कश्चिद्विप्रो महासाधुश्चारुवर्णः प्रतापवान् । आचारकुलधर्मज्ञो देवाग्निद्विजवत्सलः ॥ १
संयुतो वायुपित्ताभ्यां किंचिद्वित्तसमन्वितः । तस्य भार्या सदाचारा किंचिच्च क्लेशकारिणी ॥२
पतिभक्ता पतिप्राणा व्रतानामनुकाङ्क्षिणी । ऋतुहीना कथं जाता कस्येदं कर्मणः फलम् ॥३

श्रीसूर्य उवाच ।

नारीणां वै जारगानामसतीनां कुलच्छिदाम् । यद्वा वीरप्रसूतानां[1] शीघ्रगर्भसमुच्छिदाम् ॥ ४
औषधैश्छेदनैर्दुष्टैः प्रलेपैर्दुष्टभक्षणैः । संभावनैस्तथावातैरन्यैर्वा बस्तिकर्मभिः ॥ ५
गर्भस्य पातनोपायं करोत्यपि च कीर्तयेत् । पुंस्कृतं नैव तत्कर्म स्त्रीकृतं नात्र संशयः ॥ ६ ।

---

१ यद्वा चिरप्रसूतं शीघ्रगर्भं समुद्भवेत् इति—खपु० ।

नारी जन्मान्तरे प्राप्ते न सा गर्भं बिभर्ति हि। पूर्वं वैश्यकुले जाता सपत्नीसहिता खग ॥ ७ ॥
अन्याया ईर्ष्यया चैव संततेर्नाशनाय च। औषधैश्छेदनाद्यैस्तु तस्यार्थे कल्पितोऽगदः ॥ ८ ॥
सपत्न्यै प्रेरयामास विविधोऽनेन तद्वदः। तया वै ऋतुभावाच्च शीघ्रं पीतं तदौषधम् ॥ ९ ॥
पुष्पं प्रणाशितं तस्यास्तस्मिञ्जन्मनि मानद। ऋतावृतौ च संप्राप्ते जातं तद्विविधं रजः ॥ १० ॥
वेदना जायते नित्यमसृग्वातोद्रामयः। पुष्पे नष्टे फलं नष्टं कदाचिद्गर्भपातनम् ॥ ११ ॥
एतत्कर्म कृतं पूर्वभवे वै गर्भदोषकृत्। तथापि फलहन्त्रीणां द्वितीयं सुकृतं चरेत् ॥ १२ ॥
ऋजुभावादुष्टबुद्ध्या कृतं वै पूर्वजन्मनि। तेनैव कर्मणा वत्स विविधाः पुष्पबन्धनाः ॥ १३ ॥
गर्भाशयमधिश्रित्य स्रवते शोणितं बहु। छिद्यन्तीव च वान्त्राणि सूचीभिरिव सुव्रत ॥ १४ ॥
वेदनायाः पुरा भोगात्स्त्रीणां गर्भनिपातनात्। यावत्कालं निष्ठुरोयं तासां गर्भमपातयत् ॥ १५ ॥
तावान्नेन पतेद्गर्भो ह्यथवा नास्य संभवः। एवं तु लक्षणैर्ज्ञात्वा कर्माणि स्त्री समाचरेत् ॥ १६ ॥
एकमासावधिं चैव दम्पती तीर्थसङ्गमे। सुशुभे भूप्रदेशे तु पुराणोक्तविधानतः ॥ १७ ॥
संप्रनाशाय दुष्टस्य प्रायश्चित्तमिहैनसः। प्रौष्ठपद्यां तृतीयायां शुक्लायां व्रतमाचरेत् ॥ १८ ॥
नियमेन कृतं सूत व्रतं सिद्धिं ददाति तत्। पुष्पैर्नानाविधैः शुभ्रैरर्चयेद्गिरिजाप्रियम् ॥ १९ ॥
केतकैर्गर्भसंयुक्तैश्चम्पकैः कुमुदोत्पलैः। सौवर्णीं राजतीं ताम्रीं मूर्तिं गौर्याः प्रकल्पयेत् ॥ २० ॥
हारनूपुरमुकुटकुण्डलाभरणादिकम्। नैवेद्यैः शुभ्रकासारमोदकापूपपायसैः ॥ २१ ॥
उपतिष्ठेत विधिवद्भवानीप्रियवल्लभम्। पतिपुत्रवतीभिस्तु स्त्रीभिः सह शुचिस्मिता ॥ २२ ॥
रात्रौ जागरणं कुर्याद्गीतनृत्यादिपूर्वकम्। द्रव्यैर्नानाविधैरर्घ्यं दद्यान्मन्त्रपुरःसरम् ॥ २३ ॥
फलपुष्पाक्षतोपेतं मज्जनं मूर्ध्नि निक्षिपेत् ॥ २४ ॥

मन्त्रः।

"नमस्तेऽस्तु महादेवि नमस्ते गिरिशप्रिये। गृहाणार्घ्यमिदं देवि पुत्रान्मह्यं यशस्विनः ॥
देहिदेहि जगत्पूज्ये शंकरप्राणवल्लभे" ॥ २५ ॥
एवं रात्रौ विधानेन पूजयेत्परमेश्वरीम्। ततः प्रभाते विमले कृतप्रातःक्रिया सती ॥ २६ ॥
देवीमुद्दिश्य विधिवद्भोजयेत्षोडश स्त्रियः। नानाविधैर्भक्ष्यभोज्यैर्ब्राह्मणानथ षोडश ॥ २७ ॥
प्रत्येकं वैणवं पात्रं सप्तधान्यसमन्वितम्। सौभाग्याष्टकसंयुक्तं वस्त्रयुग्मेन संयुतम् ॥ २८ ॥
दातव्यं गिरिजाप्रीत्यै पुत्रसौभाग्यकाम्यया। सगर्भाश्च वृषोपेतां सितां गां वस्त्रसंयुताम् ॥ २९ ॥
सहिरण्यां ततो दद्याद्विप्राय गुणशालिने ॥ ३० ॥

मन्त्रः।

"गर्भपाताद्धि यत्पापं दुष्टस्त्रीणामुपार्जितम्।
तदत्र वन्ध्यताहेतुस्तस्मान्मुञ्चय चाम्बिके। तव दानेन पुत्रा मे भवेयं सुभगा सती" ॥ ३१ ॥
इमं मन्त्रं समुच्चार्य दत्त्वा विप्रे विसर्जयेत्। एवं व्रतपराया वै गर्भपातो न जायते ॥ ३२ ॥
अथाऽत्र पुत्रपौत्राढ्या स्वपत्या सह मोदते। न लभेद्गर्भपातं सा पतिपुत्रासुखं च न ॥ ३३ ॥
तृतीये वा चतुर्थे वा मासि गर्भः समेधते। रजतस्य पलाभ्यां वै कोशं गर्भाशयाकृतिम् ॥ ३४ ॥
निष्केण स्वर्णगर्भं च कृत्वा दत्त्वा द्विजन्मने। "गर्भपातं प्रकुर्वत्या मया प्राक्तनजन्मनि ॥ ३५ ॥

---

१ तद्धृतः इति–खपु०। २ कृतभावाय–खपु०। ३ सुगर्भा सती इति–खपु०।

यदद्य वन्ध्यत्वं प्राप्तं तस्मान्मुच्येऽत्र जन्मनि" । जन्मजात्यादिकं वत्स वद त्वमिह कर्मणः॥ ३६ ।
इदं चतुर्थकं जन्म भूमिदेवकुलोद्भवम् । सपत्नीसाहितं येन न सा गर्भस्य दोषहृत् ॥ ३७ ।
तत्रेदमपि संचिंत्य लक्षणं त्विह जन्मनि । यया प्राक् पातितो गर्भः सपत्न्याः पतिवर्जितां ॥ ३८ ।
दीनानाथविरोधः स्यात्स विरोधस्तया सुत । अनुमन्त्रिप्रयोक्ता सा पितृमातृसुखोज्झिता ॥ ३९ ।
बन्धुसंततिदुःखी स्यात्सर्वदा ह्यनवस्थितिः । शोकः स्याद्दुदरे बाधा तावत्प्लीहादिविभ्रमः॥ ४० ।
अन्तरात्स्यन्दमानो वा गर्भः सन्नोपलक्ष्यते । पाणौ मुष्टितलाघाताज्जानुना सक्थिजानुनी॥ ४१ ।
दोषजो वाग्निजो वापि शस्त्रजोऽस्माद्विजोऽपि वा । ब्राह्मणान्भोजयेद्भक्त्या सर्पिष्यात्मानमीक्षयेत् ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अ० सप्तदशाऽधिकत्रिशततमः ॥ ३१७ ॥

श्रीसूर्य उवाच ।

सीमावादरतः कश्चिद्ब्राह्मणः पूर्वजन्मनि । तेन तत्र द्विजः सूत घातितो भूमिलोभतः ॥ १ ।
सहायपञ्चयुक्तेन कृतं कर्मातिदारुणम् । तत्पापजान्महाघोरान्नरकान्प्राप्य दारुणान्॥ २ ।
तथापि तिर्यक्कं सूत विभुज्याऽधर्मतः स्वयम् । कर्मक्षयेऽथ पुण्यात्प्राक् सोऽत्र जातो हि बाहुजः ।
क्षयरोगयुतः सूत कृशोदरातुरो भृशम् । लग्ने कुम्भाभिधे सूत भौमचन्द्रयुतेऽण्डज ॥ ४ ।
रिष्टं षष्टिमिते वर्षे जायते कृतनिष्कृतेः । सहायाः पूर्वजा ये तु तेषां वक्ष्यामि लक्षणम् ॥ ५ ।
तदग्रे ते मृताश्चात्र पुत्राः क्षयरुजान्विताः । रिष्टेन वायुषो भङ्गो दृढपापान्न निष्कृतिः ॥ ६ ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टादशाधिकत्रिशततमः ॥ ३१८ ॥

श्रीसूर्य उवाच ।

राजपुत्रोऽभवत्कश्चिद्धर्मशास्त्रार्थकोविदः । गत्वा स तु पुरं सूत कदाचिन्मदसंयुतः ॥ १ ।
ददाह तत्पुरं शत्रोस्तत्क्षणे लुंठितः पुनः । तत्रैको ब्राह्मणो दग्धो वृद्धो विद्याविशारदः ॥ २ ।
पापमाचरितं तेन चाज्ञानाद्ब्रह्मघातजम् । अथो यमाज्ञया सर्पाः भुक्त्वा नरकयातनाः ॥ ३ ।
पुण्यशेषादथाऽत्रापि स जातो क्षत्रियाधरः । देशेऽयोध्याभिधे गौरो लघुर्दक्षो महोद्यमी ॥ ४ ।
युवभावे महाभाग राजयक्ष्मप्रपीडितः । ब्रह्महा क्षयरोगी स्यादिति वेदविदो विदुः ॥ ५ ।
निष्कृतिं तत्प्रवक्ष्यामि यां कृत्वा मुच्यतेऽधुना । कार्यास्तत्र त्रिदेवानां मूर्तयस्तु यथोदिताः ॥ ६ ।
ब्रह्मविष्णुमहेशानां सर्वरोगविनाशकाः । सुवर्णजास्तथा कार्या कदलीपत्रसंयुता ॥ ७ ।
निजवित्तानुसारेण वित्तशाठ्यं विवर्जयेत् । देयास्तु विप्रमुख्येभ्यः क्षयरोगोपशान्तये ॥ ८ ।
ब्राह्मणान्भोजयेच्छक्त्या होमयेच्च जपेत्तथा । गायत्रीं विधिना सूत पूर्वपापापनुत्तये ॥ ९ ।
एवं कृते महाबाहो क्षयस्तस्यात्र शाम्यति । नैव कुर्यात्तु यो मोहाद्रिष्टं विंशन्मितेऽब्दके ॥ १० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकोनविंशत्यधिकत्रिशततमः ॥ ३१९ ॥

श्रीसूर्य उवाच ।

या योषिदाचरेत्कामात्पूर्वजन्मनि निश्चयात् । ब्रह्महत्यामथात्रैव सा ज्ञेया क्षयरुग्युता ॥ १ ॥
न तस्याः पापशमनं मयोक्तं च पतत्रिण । महापापकृतादद्योगान्मृत्युरेव न संशयः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो विंशत्यधिकत्रिशततमः ॥ ३२० ॥

---

१ चातुरो–ख=गु० ।

श्रीसूर्य उवाच ।

स्वस्रघाती च पुरुषः पूर्वजन्मनि मानद । बधिरो जायतेऽत्रैव प्रायश्चित्तं च तच्छृणु ॥ १ ॥
चान्द्रायणव्रतं कुर्यात्सुवर्णैकपलान्वितम् । पुस्तकं विधिवद्दद्यात्तस्मात्पापात्प्रमुच्यते ॥ २ ॥
भोजयेच्च यथाशक्त्या होमयेच्च स्वशक्तितः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकविंशत्यधिकत्रिशततमः ॥ ३२१ ॥

श्रीसूर्य उवाच ।

या काचिदाचरेन्नारी पापं प्राग्ब्रह्मघातजम् । अज्ञानाद्वत्र जन्मापि क्षयरुक्पीडिता हि सा ॥ १ ॥
महापापकृताद्घोराद्यस्मात्सर्वस्वदानतः । क्षयरोगात्प्रमुच्येत नात्र कार्या विचारणा ॥ २ ॥
प्रयागे मकरस्थेऽर्के स्नानादत्रैव जन्मनि । काश्यां वासात्तथा सूत मुच्यते ब्रह्महत्यया ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वाविंशत्यधिकत्रिशततमः ॥ ३२२ ॥

श्रीसूर्य उवाच ।

कलिङ्गदेशे प्राक् सूत काचिद्विजवराङ्गना । पतिप्रिया धर्मशीला दानभोगरता सदा ॥ १ ॥
सा नार्यघातयत्पूर्वं भवे मोहाच्च कुक्कुटम् । नासावकृत्वमाप्नोति सात्र जन्मनि निश्चयात् ॥ २ ॥
हैमनिष्कत्रयं दद्यात्पर्वस्वेव प्रयत्नतः । ब्राह्मणाय महाभाग पापनाशकरं परम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायस्त्रयोविंशत्यधिकत्रिशततमः ॥ ३२३ ॥

श्रीसूर्य उवाच ।

बभूव बाहुजः कश्चिद्देशे पञ्चनदेऽधुना । धनधान्यसमायुक्तः पापकर्मा महोद्यमी ॥ १ ॥
विप्रोत्सङ्गगतश्चायं प्रयागे गरुडाग्रज । सुस्नातो मृगगे भानौ धूर्तः कर्मक्रियोज्झितः ॥ २ ॥
संप्राप्य स्वगृहं शीघ्रं कृतवान्कर्म दारुणम् । ग्रामे निवासितस्यान्यक्षत्रियस्य पतत्रिणः ॥ ३ ॥
ददाह भवनं रम्यं वैरिभावात्पुरानघ । तत्रैका वत्सरी दग्धा जीवाश्चापि विशेषतः ॥ ४ ॥
कालयोगे च संप्राप्ते स गत्वा यमशासनम् । भुक्त्वा पापफलं पापात्पुण्यात्पुण्यफलं तथा ॥ ५ ॥
पूर्वपुण्यप्रभावेण स जातः पादजोऽधुना । गङ्गायाः प्राक्परे देशे शतयोजनसंमिते ॥ ६ ॥
सुमध्यरूपो बलवान्धर्मे स्वल्पमतिः शठः । वृद्धचाधिकप्रचारी च पैत्तिकः स्वल्पवित्तवान् ॥ ७ ॥
सकन्यश्च सपत्नीको बन्धुभृत्यसमन्वितः । पुण्यादिदं फलं पूर्वात्पापादत्र शृणुष्व वै ॥ ८ ॥
गोबालवत्सकवधाज्जीववधात्सुतकः । सप्तवेदमिताब्दान्ते जातपुत्रविनाशकः ॥ ९ ॥
गोस्त्रीविप्रवधात्पापान्यत्र नाशकराणि च । गोराशिगः शनिः सोमात्षष्ठो जीवो मृगास्थितः ॥ १० ॥
लक्ष्मैतदण्डजश्रेष्ठ पृच्छकस्यात्र जन्मनि । पूर्वे या स्त्री सहायासीन्मृतवत्सात्र सा सुत ॥ ११ ॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन्सर्वपापनिषूदनीम् । पुत्रवृद्धिकरी धन्या सात्र जन्मनि निश्चयात् ॥ १२ ॥

श्रीसूर्य उवाच ।

शृणु सूत प्रवक्ष्यामि निष्कृतिं पापशोधनीम् । पञ्चस्वर्णामिता कार्या सुरभिश्च हिरण्मयी ॥ १३ ॥
तदर्धमितिका वापि द्वयोर्वित्तानुसारतः । संपूज्य विधिवन्मन्त्रैर्देया विप्राय धीमते ॥ १४ ॥
माषैर्वाद्विमितैर्देयस्तथा पशुपतिः सुत । मापाभ्यां च तथा वह्निर्जीवा माषचतुष्कजाः ॥ १५ ॥
देयाश्च विधिना सूत प्रायश्चित्तं विधानतः । जीविष्यन्ति च तत्पुत्रा जन्मन्यत्र ममाज्ञया ॥ १६ ॥

नैवं कुर्याच्च यः शक्त्या त्रिष्वेकं पापशोधनम् । न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः॥१७॥
नवसप्ततसमायुः स्यात्प्रायश्चित्ते कृतेऽधुना । सप्तवेदमिते वर्षे रिष्टं वा कृतनिष्कृतेः ॥ १८ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुर्विंशत्यधिकत्रिशततमः ॥ ३२४ ॥

श्रीसूर्य उवाच ।

काश्मीरमण्डले पूर्वं काचिद्विजवराङ्गना । पतिप्रिया शीलयुक्ता दानभोगरता सदा ॥ १ ॥
वैरिभावं तया स्मृत्वा गृहं दग्धं द्विजस्य च । चौर्येण तत्सुतो दग्धो गृहदाहे पतत्रिण ॥ २ ॥
साहाय्यात्स्वामिनः सर्वं प्राग्भवे समुपार्जितम् । तत्पापजान्महाघोरात्फलाज्जाता वियोनिजा ॥ ३ ॥
सैव जाता विराटेऽत्र पतिशुश्रूषणात्सुत । क्षत्रिया धनधर्माढ्या पूर्वपुण्यात्तथा सती ॥ ४ ॥
क्षयरोगयुता बाल्ये बालघातादपुत्रिणी । महाग्निदाहपापाच्च प्रायश्चित्तं न तत्समम् ॥ ५ ॥
त्रयोविंशन्मिते वर्षे रिष्टेनैवात्र नश्यति । साहाय्यात्तत्पतिश्चात्र पुत्रहीनो रुजान्वितः ॥ ६ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचविंशत्यधिकत्रिशततमः ॥ ३२५ ॥

श्रीसूर्य उवाच ।

सारिकां यो महाभाग निहन्यात्सापमोहितः । तस्य च स्खलिता वाणी भवत्यत्रैव जन्मनि॥१॥
दद्याद्धिरण्मयीं तत्र सारिकां शुभलक्षणाम् । तथा च पुस्तकं दद्याच्छास्त्रस्य विधिनाण्डज ॥२॥
पूर्वपापात्प्रमुच्येत नरोऽत्र गतकिल्बिषः ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः षड्विंशत्यधिकत्रिशततमः ॥ ३२६ ॥

श्रीसूर्य उवाच ।

सारिकां घातयेन्नारी पूर्वं पापविमोहिता । सात्र जन्मनि जायेत वचनस्खलिताण्डज ॥ १ ॥
तथा देया सुवर्णस्य सारिका ब्राह्मणाय वा । पूर्वपापात्प्रमुच्येत तद्दानाद्विनतासुत ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः सप्तविंशत्यधिकत्रिशततमः ॥ ३२७ ॥

श्रीसूर्य उवाच ।

वकवार्ती च पुरुषः पूर्वजन्मनि मानद । लम्बकण्ठः प्रजायेत सोऽत्र जन्मनि निश्चयात् ॥ १ ॥
गां दद्याद्विधिवच्छ्वेतां सर्वाभरणभूषिताम् । मुच्यते कण्ठजाद्रोगान्नात्र कार्या विचारणा ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाविंशत्यधिकत्रिशततमः ॥ ३२८ ॥

श्रीसूर्य उवाच ।

या नारी पूर्वजनुषि घातयेद्वण्डाण्डज । वक्रं सा कण्ठरोगेण बाध्यते चात्र जन्मनि ॥ १ ॥
गां दद्याद्विधिना सूत श्वेतामत्र पयस्विनीम् । यथोपस्करसंयुक्तां तस्मात्पापात्प्रमुच्यते ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकोनत्रिंशदधिकत्रिशततमः ॥ ३२९ ॥

अरुण उवाच ।

कश्चिद्विप्रकुले जातो धर्मिष्ठो वित्तसंयुतः । उदरे वातजा रोगा गुल्माद्या वोर्ध्वहृद्व्यथाः ॥ १ ॥
मोहाद्याः स्वल्पवीर्यश्च अक्षिपाण्डूदरामयः । जायते शीर्षजा पीडा बाल्ये स्याद्ग्रहणीगदः ॥ २॥
शरीरे जायते वह्निरुपघातव्रणाकुलः । पौत्राणां मातुलानां च दुःखवार्ताश्रुतिः सदा ॥ ३ ॥
दायादाच्छ्वसत्पीडा भूमिद्रव्याभिलिप्सया । ऐहिकानि च लक्ष्माणि तस्य देह भवन्ति हि ॥४॥

तस्य भार्या सदाचारा कदाचिद्रोषवादिनी । गौरवर्णा शुभा वाणीसन्तोषप्रियकारिणी ॥ ५ ॥
मृतवत्सा कथं जाता स्थिरगर्भमवाप्नुयात् । दश मासानतिक्रम्य गर्भे चोदरसौख्यभाक् ॥ ६ ॥
केन कर्मविपाके न सत्यं कथय भास्कर ॥ ७ ॥

श्रीसूर्य उवाच ।

पुंस्कृतं नैव तत्कर्म स्त्रीकृतं नात्र संशयः । पूर्वजन्मनि सा क्षात्रा संजाता विनतासुत ॥ ८ ॥
अज्ञानतिमिरान्धेन स्त्रीणां कर्म दुरात्मनाम् । अजानती कुलस्त्रीणामाचारमनुकम्पया ॥ ९ ॥
सर्वभूतेषु चात्मानं स्थावरेषु चरेषु च । प्रमादाद्द्वीपिनं[1] हत्वा सदा निष्ठुरमात्मना ॥ १० ॥
तस्य गेहाश्रिता नित्यं मार्जारश्वानपूर्वकाः । पातालक्रीडनपरा गेहे संकुलिता भृशम् ॥ ११ ॥
तत्त्यक्त्वा त्यज्यते मातृबालानामनुकम्पया । मायाबन्धनमातॄणां बालगर्ताश्रिता तदा ॥ १२ ॥
अन्यत्तद्धर्मिणां दृष्ट्वा क्षिप्यते वह्निभस्मसात् । विनिघ्नन्ति प्रमादाद्यैर्भेदं संततिदुःखभाक् ॥ १३ ॥
संततिर्दुःखितायास्तु नानादुःखाद्य जायते । अनया वित्तमासाद्य तेषां वैनाशनाय तु ॥ १४ ॥
तथाविधेषु जीवेषु मृतेष्वपि च तद्वशात् । म्रियन्ते शिशवस्तेऽपि तस्यास्तद्दोषचिह्निताः ॥ १५ ॥
पाताले[2] ज्वलिता ताभिर्बहवो लघुप्राणिनः । गर्भयुक्ता मृतामातृक्षामयापि तथाम्बया ॥ १६ ॥
गर्भं[3] न लभते तत्र मृतासौ दुःखजन्तवः । तेन कर्मविपाकेन स्थिरगर्भा मृतप्रजा ॥ १७ ॥
त्रिविधापत्यजा बाधा प्राप्यते जन्तुरन्तरे । जन्तवो गर्भिणो ये तैः स्वकृतं कर्म भुज्यते ॥ १८ ॥
उभयोः कर्मणां हेतून्वश्यावश्यप्रयोजकान् । इदं जन्म तृतीयं तु ब्रह्मवंशसमुद्भवम् ॥
स्थिरगर्भा मृतापत्या पुत्रहीना पतत्रिण ॥ १९ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं नाथ येन गर्भः प्रजायते । ममोपरि कृपां कृत्वा सत्यं वद दिवस्पते ॥ २० ॥

श्रीसूर्य उवाच ।

सुदिष्टे समनुप्राप्ते गृहेऽहनि शुभोदये । प्रागुदक्प्रवणे देशे गोमयाद्युपलिप्तके ॥ २१ ॥
तत्रोपर्याविकं स्तीर्यं नानाचित्रविचित्रकम् । द्रोणमानं तिलानां तु मध्ये गर्भं प्रपूजयेत् ॥ २२ ॥
निष्कमानं सुवर्णस्य शकलं मध्यतः क्षिपेत् । तस्य पूर्वे च दिग्भागे तण्डुलद्रोणपर्वते ॥ २३ ॥
शुद्धं सोऽयं भृशं ताम्रपात्रं दशपलोन्मितम् । स्थापयेद्राजतं पद्मं तन्मध्ये पलनिर्मितम् ॥ २४ ॥
पूजयेच्च सपत्नीकं कश्यपं च प्रजापतिम् । वेणुदण्डं करे दक्षे वामे चाथ कमण्डलुम् ॥ २५ ॥
कृत्वा प्रतिष्ठितप्राणां मूर्तिं च शुभलक्षणाम् । अर्चयेद्गन्धपुष्पाद्यैरुपचारैः पृथक्पृथक् ॥ २६ ॥
सम्यक् श्रद्धावती नारी त्रिविधापत्यदुःखिनी । विप्राय वेदविदुषे पूजयेद्विविधैर्धनैः ॥ २७ ॥
ततस्तत्तु सपत्नीकं मुनीनां विन्मयेदिति । सदक्षिणा जगत्स्रष्टा पत्नी च तपसोबला ॥ २८ ॥
सा मया तिलसंख्या वैरापोभिस्तीव्रवेदनम् । लघिता स्त्रीजनाचारमजानन्त्या दयात्मिकाम् ॥ २९ ॥
नाशयेत्तस्य पापस्य देवप्राप्तं विगर्हितम् । सम्यक् श्रद्धावती नारी मृतसंततिदुःखिनी ॥ ३० ॥
सपत्नीकं च सौवर्णं निर्मितं सम्यगर्चितम् । विप्राय वेदविदुषे प्रदद्याद्गुणशालिने ॥ ३१ ॥
एवमाश्राव्य ता मूर्तीः समादाय पृथक्पृथक् । प्रदद्याद्दानविधिना श्रद्धया च सदक्षिणाः ॥
दानान्ते कीर्तयेन्मन्त्रं तिष्ठेति विहिताञ्जलिः ॥ ३२ ॥

---

१ दोपिनम् इति—खपु० । २ ये जाता इति—खपु० । ३ मार्गं इति—खपु० ।

मन्त्रः ।

"यन्मया पूर्वजन्मनि दयारहितचित्तया । प्राप्तमत्यशुभं स्वामिञ्छिन्धि तत्कर्म दारुणम्" ॥३३॥
दत्त्वा दानं च विप्राय सर्पिष्यात्मानमीक्षयेत् ॥ ३४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिंशदधिकत्रिशततमः ॥ ३३० ॥

श्रीसूर्य उवाच ।

काकघाती महाभाग प्राग्भवे चात्र जन्मनि । कूर्चहीनो भवेन्मर्त्यः स तत्पापेन लाञ्छितः ॥१॥
कृष्णधेनुप्रदानेन विधिनात्र खगाधिप । मुच्यते तदुपायात्तु कूर्चयुक् चात्र जन्मनि ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकत्रिंशदधिकत्रिशततमः ॥ ३३१ ॥

श्रीसूर्य उवाच ।

या नारी घातयेत्काकं विनतानन्दवर्धन । सात्र जन्मनि पक्षीन्द्र कूर्चयुक्ता भवेदलम् ॥ १ ॥
कृष्णधेनुप्रदानेन कूर्चयुग् गरुडाग्रज । पूर्वपापविशुद्धिः स्यादत्र जन्मनि सुव्रत ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वात्रिंशदधिकत्रिशततमः ॥ ३३२ ॥

श्रीसूर्य उवाच ।

अभक्ष्यभक्षको यस्तु भवेत्प्राग्मानवोऽण्डज । सोऽत्र जन्मनि पक्षीन्द्र जायते कृमिलोदरः ॥ १ ॥
स भीष्मपञ्चकादत्र व्रतात्पुण्यसमर्जितात् । मुच्यते किल रोगात्तु दुष्टात्कृमिभवात्खग ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्रयस्त्रिंशदधिकत्रिशततमः ॥ ३३३ ॥

श्रीसूर्य उवाच ।

याऽभक्ष्यं भक्षयेन्नारी प्राग्भवे गरुडाग्रज । जायते जठरे तस्याः कृमिजाता रुजा सुत ॥ १ ॥
तत्पापनाशनं कार्यं भीष्मपञ्चव्रतं शुभम् । कार्तिके शुक्लपक्षे तु व्रतस्तद्दिनपञ्चकम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुस्त्रिंशदधिकत्रिशततमः ॥ ३३४ ॥

श्रीसूर्य उवाच ।

दुष्टस्पृष्टं तु यो मोहाद्भक्षयेद्विधिवर्जितः । सिद्धान्नं स पुरा सूत जायतेऽत्र कृशोदरः ॥ १ ॥
विष्णुव्रतान्महापुण्यात्सर्वपापप्रणोदनम् । तदा कृशोदरत्वं च रुजं नात्र प्रपश्यति ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचत्रिंशदधिकत्रिशततमः ॥ ३३५ ॥

श्रीसूर्य उवाच ।

भुक्तं यया पुरा सूत सिद्धान्नं द्विजभार्यया । दुष्टस्पृष्टं च सततं सात्र स्याच्च कृशोदरी ॥ १ ॥
सा वैष्णवव्रतात्पुण्यात्तस्मात्पापात्प्रमुच्यते । कृशोदरव्यथा नश्येत्तत्पापस्य प्रणाशनात् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षट्त्रिंशदधिकत्रिशततमः ॥ ३३६ ॥

श्रीसूर्य उवाच ।

द्विजः पूर्वभवे कश्चिदासीद्धर्मान्वितः सदा । सभार्यो नर्मदातीरे धनसौख्यसमन्वितः ॥ १ ॥
कृतानि तेन दानानि नानापर्वसु शक्तितः । वेदविज्ञानयुक्तेषु सत्पात्रेषु विधानतः ॥ २ ॥
अथो पापं भृशं चक्रे व्यभिचारसमुद्भवम् । त्यक्त्वा ज्येष्ठासुतस्नातां धर्मशीलयुतां प्रियाम् ॥३॥
रतिं ददौ कनिष्ठायामनृतावविमोहितः । ततो यमपुरं प्राप्तः ससहायो द्विजोत्तमः ॥ ४ ॥

भुक्त्वा पापफलं पापात्पुण्यात्पुण्यफलं तथा । श्रद्धादानवशात्सोऽत्र गङ्गायाः पूर्वभागजः ॥ ५ ॥
सिंहस्थेऽर्के सुखे राहौ जीवे कर्केऽलिगे भृगौ । स रक्तगौरो मतिमान् बन्धुस्त्रीसुखसंयुतः ॥६ ॥
लघुर्वृणी स्वमितदो द्विजबन्धुसहायकः । सर्वं त्विदं फलं दानात्स्त्रीत्यागान्मृतपुत्रकः ॥ ७ ॥
स्त्रीत्यागी भ्रूणहा लोके इति पौराणिका विदुः । योषासाहाय्यतो जातं शृणुष्व विनतासुत ॥८॥
प्राग्भवे या कनिष्ठाभूत्सा ज्येष्ठात्र गतप्रजा । गर्भदोषयुता चेति लक्षणैर्लक्ष्यते खग ॥ ९ ॥
वक्ष्यामि निष्कृतिं तस्य पूर्वपापविनाशनीम् । कुर्यात्पलैर्वेदमितैर्गणेशं विघ्ननाशनम् ॥
तदर्धार्धमितं वाऽपि त्रिषु वित्तादिमं पठेत् ॥ १० ॥

मन्त्रः ।

"त्यक्त्वा वराननां शुद्धां पूर्वं पापं समर्जितम् । तदुग्रपापनाशाय ददेऽहं गणनायकम् ॥११ ॥
मापसप्तमिता लक्ष्मीः शुभा लेख्या हिरण्मयी । ददेऽहं विप्रमुख्याय वेदशास्त्रविदे त्विह" ॥१२॥
ब्राह्मणान्वरयञ्शक्त्या शुभां दद्याच्च दक्षिणाम् । एवं विधानं यः कुर्याज्जीविष्यन्ति च तत्सुताः१३
श्रुत्वैवं शक्तिमान्यस्तु न कुर्याच्छोधनं त्वके । स पुत्रान्नोपसर्पेत रिष्टं पञ्चाशदब्दके ॥ १४ ॥
प्रायश्चित्ते कृते त्वत्र जीवनं वर्षसप्ततिम् । अत्र जन्मादिकं ज्ञेयं विस्तरं नोदितं मया ॥ १५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः सप्तत्रिंशदधिकत्रिशततमः ॥ ३३७ ॥

श्रीसूर्य उवाच ।

देशे पञ्चनदे जाता वाहुजा पूर्वजन्मनि । सात्र जन्मनि वै विप्रा जाता प्राग्विष्णुपूजनात् ॥ १ ॥
यत्कृतं दुष्कृतं तच्च शृणुष्वात्र खगेश्वर । ब्राह्मणेन महद्द्रव्यं तद्गृहे स्थापितं च यत् ॥ २ ॥
न तद्दत्तं पुनस्तस्मै भुक्तं सर्वमशेषतः । मृतो द्विजस्तद्दुःखेन क्षुधितस्तु पतत्रिण ॥ ३ ॥
पापमाचरितं पूर्वं ब्रह्मघातसमं तया । पञ्चत्ववशमाप्तापि भुक्त्वापि यमशासनम् ॥ ४ ॥
पुत्रसंततिहीनात्र युवभावे क्षयान्विता । निष्कृतिं परमां तस्या वक्ष्येऽहं पापनाशनीम् ॥ ५ ॥
सर्वस्वेन तथार्धेन कार्या स्वर्णमयी शुभा । कदलीपत्रसंयुक्ता देया विप्राय धीमते ॥ ६ ॥
दानेनानेन सुप्रीता ब्रह्मविष्णुमहेश्वराः । क्षयनाशकराः सर्वे भविष्यन्त्यत्र जन्मनि ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टत्रिंशदधिकत्रिशततमः ॥ ३३८ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि भो सूत श्वोच्छिष्टं भक्षयेत्तु यः । रात्र्यन्धो जायते सोऽपि जन्मन्यत्र च मानवः ॥१॥
भोजयेद्ब्राह्मणाञ्शक्त्या गोमूत्रं प्राशयेत्तथा । मुच्यते तत्क्षणात्सूत नक्तान्धत्वान्न संशयः ॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनचत्वारिंशदधिकत्रिशततमः ॥ ३३९ ॥

श्रीसूर्य उवाच ।

या भक्षयेत्पुरा नारी श्वोच्छिष्टं सा शुभानना । नक्तान्धा जायते त्वत्र व्यथिता नेत्रपीडया ॥१॥
गोमूत्रप्राशनादत्र ब्राह्मणेभ्यश्च भोजनात् । नक्तान्ध्यरोगान्मुक्तिः स्यादत्र जन्मनि सुव्रत ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चत्वारिंशदधिकत्रिशततमः ॥ ३४० ॥

श्रीसूर्य उवाच ।

विडालोच्छिष्टभोजी प्राग् रात्र्यन्धो जायते न हि । स तत्पापविशुद्ध्यर्थं गोमूत्रं विधिवत्पिबेत् ॥ १॥

भोजयेच्च तथा विप्रान्शक्त्या दद्याच्च दक्षिणाम्। राज्य न्ध्यरोगात्सततं मुक्तो भवति मानवः ॥२

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकचत्वारिंशदधिकत्रिशततमः ॥ ३४१ ॥

श्रीसूर्य उवाच ।

विडालोच्छिष्टभुङ् नारी प्राग्भवे विनतासुत । राज्यन्ध्यरोगयुक्ता सा चात्र जन्मनि जायते॥ १
द्विजेभ्यो भोजनाच्चैव गोमूत्रप्राशनात्तथा । मुच्यते पूर्वपापात्तु विडालोच्छिष्टभोजनात् ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायद्विचत्वारिंशदधिकद्विशततमः ॥ ३४२ ॥

श्रीसूर्य उवाच ।

चाण्डाल्यां गमने पूर्वभवे च गरुडाग्रज । जायतेऽजगरश्चात्र मूढो जन्मनि जन्मनि ॥ १
चान्द्रायणव्रतादत्र दशावृत्त्या कृतात्सुत । स मुच्यतेऽजगरत्वाच्छुचिबुद्धिर्भवेदिह ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोत्रिचत्वारिंशदधिकत्रिशततमः ॥ ३४३ ॥

श्रीसूर्य उवाच ।

या काचिदधमा नारी प्राग्भवे विनतासुत । चाण्डालं स्वीकरोत्येषाऽजगरी[1] जायतेऽण्डज ॥ १
प्रजापतिव्रताद्यत्नात्कृतात्पञ्चापवर्तनैः । मुच्यते पूर्वपापात्सा जन्मन्यत्र पतत्रिण ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुश्चत्वारिंशदधिकत्रिशततमः ॥ ३४४ ॥

श्रीसूर्य उवाच ।

परान्नविघ्नपाती तु यो भवेत्पूर्वजन्मनि । सोऽजीर्णेनातिरोगेण जन्मन्यत्र प्रपीड्यते ॥ १ ॥
विधिना लक्षहोमेन कृतेन गरुडाग्रज । मुच्यतेऽजीर्णजाद्रोगादत्र जन्मनि वै ध्रुवम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचचत्वारिंशदधिकत्रिशततमः ॥ ३४५ ॥

श्रीसूर्य उवाच ।

विघ्नं प्रकुरुते सूत या नारी पूर्वजन्मनि । परान्नेषु यदा मोहाच्छृणु तत्र पतत्रिण ॥ १ ॥
अजीर्णेनैव रोगेण बाध्यते पीडया महत् । लक्षहोमेन सततं तत्पापान्मुच्यतेऽत्र सा ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षट्चत्वारिंशदधिकत्रिशततमः ॥ ३४६ ॥

अरुण उवाच ।

भूमिदेवकुलोत्पन्नो धर्मिष्ठो धर्मवत्सलः । सत्यवक्ता सदाचारो साधुसेवनसंयुतः ॥ १ ॥
तस्य देहे भवेच्चिह्नं पापजं चात्र जन्मनि । किलासदद्रुकण्डूश्च नेत्रतोदो विरश्मिता ॥ २ ॥
किंचिद्वदः प्रजायेत तत्कथं कारणं विना । तस्य भार्या सुतन्वङ्गी स्त्रीधर्मव्रतकारिणी ॥ ३ ॥
वातोद्भवा व्यथा तस्या मूर्ध्नि तुंदे प्रजायते । मृतवत्सा कथं जाता पुत्राः पुत्र्यो मृताः कथम् ॥४॥
केन कर्मविपाकेन सत्यं कथय भास्कर ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्तचत्वारिंशदधिकत्रिशततमः ॥ ३४७ ॥

श्रीसूर्य उवाच ।

पूर्वं वैश्यसमुत्पन्ना प्रिया शूद्रा प्रतारिता । बहुव्यापारनिरता बहुद्रव्यसमन्विता ॥ १ ॥
शूद्रा याता च संबन्धं बहुकालोऽगतागतः । अन्योन्यं प्रतिवसतः किंचित्कालवशंगतः ॥ २ ॥

---

१ जर्जरा इति—खपु० ।

उभयोः कर्मणोर्हेतुर्धनहर्ता पतिर्यतः। ततस्तेन कृतं कर्म भीष्मभैत्रव जन्मनि ॥ ३ ॥
ब्राह्मणस्य सुतः श्रेष्ठः स्वर्णालंकरणैर्युतः। धनलोभाद्धृतः शीघ्रं भाविनोऽर्थस्य वै बलात् ॥ ४ ॥
तस्यापि मातापितरौ पुत्रदुःखेन दुःखितौ। द्वित्रवर्षैस्तथा मासैर्मृतौ तौ दंपती तदा ॥ ५ ॥
धनलोभवशात्सोऽसौ दुष्टचित्तः सुदुर्मनाः। तत्प्रिया च मृतौ तत्र गतौ वैश्यमशानम् ॥ ६ ॥
प्रनष्टं तद्गृहं जातं ब्राह्मणस्य ततः खग। तेन कर्मविपाकेन नरके पचितौ भृशम् ॥ ७ ॥
पश्चान्मानुषमापन्नौ व्रतदानप्रभावतः। इदं जन्म चतुर्थं स्यान्मृतापत्यं खगेश्वर ॥ ८ ॥
द्वित्रादिमासजालानां मृतिर्द्वित्रादिहायनैः। मृतपुत्रा भवत्यत्र जाताजातास्तथैव च ॥ ९ ॥
इदं जीवेदिदं जीवेदित्याशामपि च भुवन्। जाताजातां विनश्यन्ति हि तस्याकृतनिष्कृतेः ॥१०॥
एवं यदि चिरं स्थित्वा अचिराच्छ्रियते परम्। सुगुणाश्च सुरूपाश्च लालनाच्चादुकारिणः ॥११॥
नश्यत्सु जातजातेषु जन्मजन्मसु तेषु च। व्याधयन्तरो भवेद्व्याधिर्ग्रस्तो व्यसनवानयम् ॥ १२॥
नास्ति सौख्यं लभेत्तस्य नानाशङ्कितचेतसः। सौख्यं न तद्धनस्यापि परापत्यानि पश्यतः॥१३॥
लक्षणानि पुरोक्तानि तल्येमान्यपि कीर्तयेत्। स्वोदरे म्रियते बालः स वै ब्राह्मण उच्यते॥१४॥
मृतवत्सोद्भवं चिह्नं पूर्ववत्प्रतिपादयेत्। स्ववंशस्यापि विच्छेदो द्रव्यहानिर्यतस्ततः ॥ १५ ॥
दौर्मनस्यं महानाधिः शोक एवोपजायते। अदृष्टगुणलावण्या अदृष्टाननकान्तयः ॥ १६ ॥
म्रियन्ते जातमात्रा ये पुत्रा अकृतचाटवः। एवं तु कर्मणि पुरा प्रायश्चित्तमथाचरेत् ॥ १७ ॥

अरुण उवाच।

जातस्य निष्कृतिः स्वामिन्निह कर्मनिपूदनी। कथ्यतां दिवसेशान नारीणां हितकाम्यया १८॥

श्रीसूर्य उवाच।

शृणु सूत प्रवक्ष्यामि मृतवत्सावनाशनीम्। निष्कृतिं विधिवत्तात संततेः सौख्यहेतवे ॥ १९ ॥
यजमानः सपत्नीको विधिवद्विधिमाचरेत्। पठद्भिः शान्तिसूक्तानि ब्राह्मणैः सहितोऽर्थवित् २०॥
सिद्धार्थाक्षतदूर्वाभिः कृतरक्षाप्रतिष्ठितः। स्थापयेदोषधैर्मन्त्रैर्वारुणैर्वैष्णुसूक्तिभिः ॥ २१ ॥
सुदृष्टे सुशुभे देशे गोमयाद्युपलिप्तके। तत्रोपर्याविकं स्तीर्य कृष्णाजिनमथापि वा ॥ २२ ॥
द्रोणमानं तिलानां तु कृष्णवस्त्रेण संयुतम्। स्थापयेद्राजतं पद्मं तन्मध्ये पलनिर्मितम् ॥ २३॥
सौवर्णीं प्रतिमां तत्र बालगोपालमूर्तिकाम्। कृत्वा प्रतिष्ठितप्राणां मूर्तित्वे शुभलक्षणे ॥ २४ ॥
अर्चयेद्गन्धपुष्पाद्यैरुपचारैर्यथाविधि। सम्यक् श्रद्धावती नारी मृतसंततिदुःखिनी ॥ २५ ॥
आहूय विदुषो विप्रान् अन्यांश्च वेदवादिनः। अलोलुपाः सदाचाराः पूज्या अर्घ्यादिकैस्तथा ॥
यो निर्मितः पुरा द्रोहो मया च परसूनुषु। भूमिद्रविणहेमाद्यलिप्सया स प्रणश्यतु ॥ २७ ॥
नाशयेत्तन्महापापं मूर्तिश्च शुभलक्षणा। तदस्तु महदप्राप्तं मृतं संततिरात्मनः ॥ २८ ॥
तस्मान्मुच्ये महाभाग पीतगोदानतोषतः। इति तत्र परिक्रम्य त्रिस्तेनोक्तोऽवतिष्ठति ॥ २९ ॥
अग्ने नयेति मन्त्रेण विसृज्यैतमुदीरयेत्। धेनुं दद्यात्सवत्सां च सहिरण्यां यथाविधि ॥ ३० ॥
सर्पिष्यात्मानमालोक्य भोजयेदिष्टवान्धवान्। इहैव लक्ष्म विज्ञेयं मातृबन्धुसुखोज्झितम् ॥३१॥
स्वसुताः सुतसौख्याय संतोष्य निजपुत्रवत्। विरुध्यन्तेऽप्यपत्यानि तादृशानि मिथः कियत्३२॥
विकारा विकृता प्रायो गमने पादवैकृतम्। पैतृजा मातुलान्या रुक् कासगुल्मार्तित्वग्व्यथा॥३३॥

मृतापत्यार्तिदास्तेषामनुमन्त्रादिभेदतः।

---

१ विकृतिं लब्धा—खपु०।

तथातथाऽत्र दुःखानि जायन्तेऽस्य मुहुर्मुहुः । पूर्वकर्मार्जितं पापं चिह्नं तस्य सहायकम् ॥ ३४ ॥
इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टचत्वारिंशदधिकत्रिशततमः ॥ ३४८ ॥

श्रीसूर्य उवाच ।

विप्राय यो विषं दद्याद्धातार्थं पूर्वजन्मनि । सोऽत्र जन्मनि पक्षीन्द्र च्छर्दिरोगेण बाध्यते ॥ १ ॥
नास्ति तस्यात्र पापस्य निष्कृतिर्दृढकर्मणः । छर्दिरोगेण सततं युवा नाशमवाप्नुयात् ॥ २ ॥
प्रायश्चित्तं न तस्यात्र दानैरपि सहस्रशः ॥ ३ ॥
इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकोनपंचाशदधिकत्रिशततमः ॥ ३४९ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे सूत विषं दद्याद्विजातये । छर्दिरोगेण सात्रैव निश्चितं नाशमाप्नुयात् ॥ १ ॥
न पापशोधनं प्रोक्तं तस्यास्तु गरुडाग्रज । ब्राह्मणस्य वधे पापे प्रायश्चित्तं क्व विद्यते ॥ २ ॥
इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचाशदधिकत्रिशततमः ॥ ३५० ॥

श्रीसूर्य उवाच ।

परस्मिन्यो विषं दद्यात्पूर्वजन्मनि मानद । छर्दिरोगेण सोऽत्रैव बाध्यते पीडया बहु ॥ १ ॥
धेनूनां दशकं दद्यात्सर्वोपस्करसंयुतम् । मुच्यते छर्दिरोगाच्च जन्मन्यत्र पतत्रिण ॥ २ ॥
इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकपंचाशदधिकत्रिशततमः ॥ ३५१ ॥

श्रीसूर्य उवाच ।

मूकोऽत्र जायते जन्तुर्यः पूर्वं भ्रातृघातकः । बभूव कामतः सूत प्रायश्चित्तं न तत्समम् ॥ १ ॥
इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विपंचाशदधिकत्रिशततमः ॥ ३५२ ॥

श्रीसूर्य उवाच ।

या काचिन्मागधी त्वासीज्जाता ब्रह्महदे सुत । सा चात्र यवनी देशे शुभे पञ्चनदेऽण्डज ॥ १ ॥
पुत्राभिलाषिणी पूर्वमभजद्यवनं पुरा । तस्मात्सा यवनी जाता पुत्रसंततिवर्जिता ॥ २ ॥
नानाविधान्नदानात्सा कुरुक्षेत्रे पुराऽनघ । शिवभक्तिपरा यस्मात्सुखैश्वर्यसमन्विता ॥ ३ ॥
अत्र जन्मनि सा लक्षरुद्रपूजनजाद्व्रतात् । पुत्रपौत्रयुता नारी भवत्येव न संशयः ॥ ४ ॥
अथवा हरिवंशस्य शतावृत्त्या विधानतः । श्रवणात्पूर्वजात्पापान्मुच्यते विनतासुत ॥ ५ ॥
इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिपंचाशदधिकत्रिशततमः ॥ ३५३ ॥

श्रीसूर्य उवाच ।

देवालयेऽवसत्कश्चिद्ब्राह्मणो पूर्वजन्मनि । विष्णुपूजापरो नित्यं द्रव्यलोभेन चाण्डज ॥ १ ॥
चौर्येणापहृतं द्रव्यं यत्स्थितं देवतालये । तेनेदं दुष्कृतं सूत कृतं कर्मातिदारुणम् ॥ २ ॥
स तेन कर्मणा युक्तो भुक्त्वा तत्पापजं फलम् । जातो गङ्गाश्रये क्षत्री पर्वते पूजनाद्धरेः ॥ ३ ॥
बहुद्रव्यान्वितो भूपः सर्वसंपत्सुखान्वितः । बाल्ये हि पाण्डुरोगार्तश्चात्र जन्मनि मानवः ॥ ४ ॥
देवद्रव्यापहारीति पाण्डुरोगी प्रजायते । तत्पापनाशनं पुण्यमुपायं शृणु तत्त्वतः ॥ ५ ॥
कुर्याद्धिरण्मयीं पृथ्वीं ससमुद्रां पलात्मिकाम् । सवनां सागरोपेतां सप्तद्वीपां वसुंधराम् ॥ ६ ॥
गन्धपुष्पैरलंकृत्य दद्याद्विप्राय धीमते । पाण्डुरोगाद्विमुक्तः स्यादत्र जन्मनि मानवः ॥ ७ ॥
इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुःपंचाशदधिकत्रिशततमः ॥ ३५४ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे त्रादाद्विषं कस्मिंश्च काश्यप । सात्र जन्मनि रोगेण च्छर्दिसंज्ञेन पीड्यते ॥ १॥
धेनूनां दशकं दद्यादशक्तौ गरुडाग्रज । सवत्सां कपिलां दद्यात्सा तद्दोषात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचपंचाशदधिकत्रिशततमः ॥ ३९५ ॥

श्रीसूर्य उवाच ।

काश्चिद्विप्रो ह्यभूदङ्ग प्राग्भवे धर्मसंयुतः । परस्य कन्यकायाश्च विवाहमकरोत्सुधीः ॥ १ ॥
दानाल्पत्वान्महाभाग चकाराल्पविधानतः । चौर्यकर्मरतः सोऽपि कदाचिद्दैवयोगतः ॥ २ ॥
स चचार वने सूत मार्गलुण्ठनतत्परः । काचित्सुनयना तत्र प्राप्ता भाविबलाद्दृढात् ॥ ३ ॥
नानाभरणयुक्ता सा किल गर्भसमन्विता । त्रासिता लुण्ठिता साऽत्र तेन पापविया[1]ऽण्डज ॥ ४ ॥
सहायैः सा परित्यक्ता ताडनाद्दाकुला बहु । तद्गर्भाद्वो च्युतौ पापमाचरितं त्विदम् ॥ ५ ॥
ततो धर्मपुरं प्राप्तः पुण्यपापसमन्वितः । पुण्यात्पुण्यफलं भुक्त्वा पापात्पापं पतत्रिण ॥ ६ ॥
परकन्याविवाहेन स जातो बाहुजोऽधुना । गङ्गायाः पूर्वभागे तु दशयोजनसंमिते ॥ ७ ॥
गौरः प्रतापी क्षीणाङ्गः बहुद्रव्यपराक्रमः । पित्ताधिकोऽतिमतिमान् बहुपुत्रीभिरन्वितः ॥ ८ ॥
जातपुत्रैर्मृतैस्तप्तः पूर्वपापात्तथाण्डज । विन्मयं तत्प्रकक्ष्यामि येन पापात्प्रमुच्यते ॥ ९ ॥
पलार्धार्धमितेनैव कार्या सुघटिता सुत । बाहुजा गर्भसंयुक्ता सौवर्णी भूषणान्विता ॥ १० ॥
पूर्वपापविनाशाय सा देया ब्राह्मणाय वै । गन्धैः पुष्पैः समभ्यर्च्य मन्त्रैः प्रणवपूर्वकैः ॥ ११ ॥
शिवं वा तत्र सौवर्णं सुवर्णैकमितं सुत । दद्याज्जपेच्च मन्त्रांश्च तच्छिद्रान्विधिपूर्वकम् ॥ १२ ॥
होमयेच्च यवांस्तत्र सतण्डुलससर्षपान् । ब्राह्मणान्भोजयेत्पश्चात्तेभ्यो दद्याच्च दक्षिणाम् ॥ १३ ॥
शृणुयाद्धरिवंशं वा शतावृत्त्या विधानतः । गायत्र्यष्टशतं जप्त्वा तस्माद्दोषात्प्रमुच्यते ॥ १४ ॥
पुत्रसौख्यस्य लोभोऽपि चात्र जन्मनि वै ध्रुवम् । रिष्टं पञ्चाशदब्दे तु प्रायश्चित्ते कृते सुत ॥१५॥
वेदसप्तमितायुः स्यात्प्रायश्चित्ते कृते सुत ॥ १६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षट्पंचाशदधिकत्रिशततमः ॥ ३९६ ॥

श्रीसूर्य उवाच ।

व्यभिचाररता पूर्वं याऽत्रापि व्यभिचारिणी । साऽऽगता नरकाद्घोरात्सुदती पापजाण्डज ॥ १ ॥
न शुध्यत्यशुभाचारा प्रायश्चित्तैः शतैरपि । वाराणस्यां गतिश्चास्या वासेन विनतासुत ॥ २ ॥
मुच्येत सर्वपापाच्च पूर्वजन्मकृताद्दृढात् । वाराणस्यां चतुर्दश्यां शिवपूजनजाद्व्रतात् ॥ ३ ॥
बाहुजेयं महाभाग पूर्वेऽप्यत्रापि बाहुजा । वन्ध्या प्राग्या यतो दुःखाकुला च दयितान्विता ॥४॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्तपंचाशदधिकत्रिशततमः ॥ ३९७ ॥

श्रीसूर्य उवाच ।

यः कृत्वा धूर्ततां पूर्वं वञ्चयेद्ब्राह्मणं सुत । सोऽत्रापस्माररोगेण पीड्यते बहुपीडया ॥ १ ॥
तेनैव पापरोगेण म्रियतेऽत्र पतत्रिण । प्रायश्चित्तं मया नोक्तं[3] पापे ब्राह्मणवञ्चने ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोऽष्टपंचाशदधिकत्रिशततमः ॥ ३९८ ॥

---

१ विरूपो इति–खपु० । २ विवासं इति–कपु० । ३ चोक्तम् इति–खपु० ।

श्रीसूर्य उवाच ।

या भ्रातृघातिनी नारी प्राग्भवे विनतासुत । सात्र जन्मनि मूकत्वं भजत्येव न संशयः ॥ १
ज्ञानात्कृतान्महापापान्न चोक्ता निष्कृतिर्मया । ज्ञात्वा भ्रातृवधे सूत प्रायश्चित्तं कु तत्समम् ॥ २
सप्तजन्मनि मूकत्वं जायते महदेनसः ॥ ३ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाके अ० एकोनषष्ट्यधिकत्रिशततमः ॥ ३५९ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यसौ विप्रश्चात्र जन्मनि बाहुजः । देवद्रव्यापहरणात्प्रागत्राऽक्षिप्रपीडितः ॥ १
विंशद्वर्षे व्यतीते च देहभङ्गः प्रजायते । तद्रक्षार्थमहं वक्ष्ये दानं पापहरं परम् ॥ २
कृत्वा देवगृहं रम्यं प्रतिष्ठाप्य सुराधिपम् । गन्धपुष्पैः समभ्यर्च्य दीपा देयाः सुवर्णजाः ॥ ३
राजताश्च महाभाग नेत्ररोगं न पश्यति । भोजयेच्छक्तितो विप्रान् वैष्णवाञ्छ्रद्धया सुत ॥ ४
कृत्वाऽनेन विधानेन रिष्टं चैवं प्रणश्यति ॥ ५ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षष्ट्यधिकत्रिशततमः ॥ ३६० ॥

श्रीसूर्य उवाच ।

सर्वस्नेहहरः कश्चिद्यो भवेत्पूर्वजन्मनि । सोऽत्र जन्मनि जायेत क्षयरोगप्रपीडितः ॥ १
प्रायश्चित्तं परं तस्य वित्ततुर्यांशभागतः । कालचक्राभिधं दानं दद्याद्दोषोपशान्तये ॥ २
ब्राह्मणान्भोजयेत्पश्चाद्धोमयेच्च स्वशक्तितः । कालचक्राख्यदानेन रोगा नश्यन्ति पापजाः ॥ ३

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकषष्ट्यधिकत्रिशततमः ॥ ३६१ ॥

श्रीसूर्य उवाच ।

ब्रह्मवादरतस्य या पूर्वेऽभूद्वै पतिव्रता । पत्युः पापप्रभावाद्वै गतिं प्राप्ता हि मानुषीम् ॥ १
त्यक्त्वा शरीरं सा देवी पार्वत्या सह मोदते । भुङ्क्ते भोगान्समस्तान्वै पतिं प्राप्य तपस्विनी ॥ २
गच्छेत्सा परमं स्थानं यत्र देवो महेश्वरः ॥ ३ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विषष्ट्यधिकत्रिशततमः ॥ ३६२ ॥

श्रीसूर्य उवाच ।

योऽज्ञानात्कृतवान्सूत प्राग्भवे भ्रातृघातनम् । सोऽत्र जन्मनि मूकत्वं भजते किल मानवः ॥ १
चान्द्रायणत्रयं कुर्याद्विधिवत्पापशोधनम् । पुस्तकं च तथा दद्यात्सुवर्णपलसंयुतम् ॥ २
एवं यः कुरुते सूत स तत्पापात्प्रमुच्यते । न जायतेऽत्र मूकत्वं कदाचिद्विनतासुत ॥ ३

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्रिषष्ट्यधिकत्रिशततमः ॥ ३६३ ॥

श्रीसूर्य उवाच ।

या धूर्ता वञ्चयेत्कंचिल्लोमात्पूर्वभवेऽण्डज । सात्र जन्मनि रोगेणापस्मारेण प्रपीडिता ॥ १
प्रायश्चित्तं प्रवक्ष्यामि पापनाशकरं सुत । ब्रह्मकूर्चत्रयं कुर्याद्दद्याद्धेनुं पयस्विनीम् ॥ २

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःषष्ट्यधिकत्रिशततमः ॥ ३६४ ॥

अरुण उवाच ।

कश्चिद्वर्णोत्तमो जातो धर्मिष्ठो वित्तसंयुतः । उदरे वायुरल्पीयाञ्छिरोऽर्तिश्च प्रजायते ॥ १ ॥

१ मोदते पार्वती सह इति स्यात् ।

शरीरे जायते चिह्नं किंचिद्व्रणसमन्वितम्। दद्रुकण्डूविलीनाङ्गं गमने पादवैकृतम् ॥ २ ॥
कर्मानुसारतो व्याधिचिह्नं तस्य सहायकम्। भार्या प्रीतिपरा नित्यं कदाचित्कलहप्रिया ॥ ३ ॥
रोषाद्युक्ताऽमिताद्वापि प्रदरार्तिः प्रजायते। मृतवत्सा कथं जाता कस्येदं कर्मणः फलम् ॥ ४ ॥

श्रीसूर्य उवाच।

स्वस्त्रिया सहितो विप्रः कुलीनो बहुयाचकः। गत्वा चैव महारण्येऽवर्तत गर्भसंयुता ॥ ५ ॥
बहवोऽपि समायाताः शत्रवस्तैश्च वेष्टिता। जाता भीता तदा स्त्री सा त्रासयद्भिर्महावने ॥ ६ ॥
गर्भपातोऽभवत्तत्र पश्चाच्च स द्विजो मृतः। तेन कर्मविपाकेन म्रियन्ते तस्य बालकाः ॥ ७ ॥
केचिज्जीवन्ति षण्मासं केचिद्वर्षाधिकं शिशम्। बहुकालं भवेत्किंचिच्चिह्नमङ्गे प्रजायते ॥ ८ ॥

अरुण उवाच।

देवदेव जगन्नाथ लोकानां हितकाम्यया। कथयस्व प्रसादेन कर्मणस्तस्य निष्कृतिम् ॥ ९ ॥

श्रीसूर्य उवाच।

साधु पृष्टं महाबाहो किलैतच्च सुदुर्लभम्। तेनेदं मुनिभिः प्रोक्तं प्रायश्चित्तमघापहम् ॥ १० ॥
गङ्गायां वै सवर्णायां सौवर्णं निष्कसंयुतम्। पुष्पितं फलितं वृक्षं वस्त्रयुग्मं गुरोरपि ॥ ११ ॥
कर्मप्राकाशिकं विप्रं पूजयेद्विधिपूर्वकम्। एवं प्रकुरुते वत्स निष्कृतिं कर्मणः फलम् ॥ १२ ॥
पुत्रपौत्रादिकैर्युक्तो धनधान्यसमन्वितः। न करोति च यो मोहाल्लोभाद्वा कर्मनिष्कृतिम् ॥ १३ ॥
आयाति पापदोषेण भुवि जन्मनिजन्मनि। एवं यः कुरुते भक्त्या प्राप्यते पुत्रपौत्रकम् ॥ १४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचषष्ट्यधिकत्रिशततमः ॥ ३६५ ॥

श्रीसूर्य उवाच।

पूर्वजन्मन्यभूत्काचिन्नारी भर्तृप्रियान्विता। दक्षा सर्वक्रियास्वेव बहुदानप्रदायिका ॥ १ ॥
पार्श्वस्थस्यान्यशूद्रस्य गृहान्नीतानि मानवैः। सर्वस्नेहानि चौर्येण सर्वशून्यगृहात्पुरा ॥ २ ॥
भुक्तानि बहुभिः सूत मिलित्वा च सुतादिकैः। पूर्वजन्मकृतात्पापात्पक्षिजन्मैव जन्मनि ॥ ३ ॥
सा जाता बाहुजा नारी कर्मभोगसमन्विता। पुत्रान्विता विचित्रा च भर्तृशुश्रूषणे रता ॥ ४ ॥
यौवने क्षयरोगाढ्याऽऽकुला स्नेहहरा यतः। निष्कृतिं तस्य पापस्य पुण्यात्पापौघनाशनीम् ॥ ५ ॥
कथयामि प्रयत्नेन वित्ततुर्यांशभागतः। कृत्वा तु कदलीं रम्यां पत्रयुक्तां सुवर्णजाम् ॥ ६ ॥
दद्याद्वेदविधिज्ञाय क्षयदोषोपशान्तये ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः षट्षष्ट्यधिकत्रिशततमः ॥ ३६६ ॥

श्रीसूर्य उवाच।

यो लोकान्वञ्चयेत्काश्चित्पुरा धौर्त्येन कर्मणा। सोऽत्र जन्मन्यपस्माररोगेण महताऽऽकुलः ॥ १ ॥
धेनुं दद्यान्महाभाग सवत्सां विधिसंयुताम्। ब्रह्मकूर्चत्रयं कुर्यात्स तत्पापात्प्रमुच्यते ॥ २ ॥
न भवेत्तस्य रोगस्य वेदना पापशोधनात् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्तषष्ट्यधिकत्रिशततमः ॥ ३६७ ॥

श्रीसूर्य उवाच।

अस्त्यत्र चन्द्रवदना गौराङ्गी पतिवल्लभा। धनधान्यसमायुक्ता स्वर्णकारी सुखान्विता ॥ १ ॥

---

१ विलासानाम् इति—कपु०। २ रसम् इति—खपु०।

इक्षा भर्तृहिते नित्यं पूर्वं सा द्विजवल्लभा । स्वर्णापहारजात्पापादत्र सा स्वर्णकारजा ॥ २
पुत्रहीना महाभाग परद्रव्यापहारजात् । कुरुक्षेत्रे शशिग्रस्ते स्वर्णं दद्याच्च शक्तितः ॥ ३
तद्दत्वाशु लभेत्पुत्रानत्र जन्मनि वै सुत ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायोऽष्टषष्ट्यधिकत्रिशततमः ॥ ३६८ ॥

श्रीसूर्य उवाच ।

अन्नहृत्प्राग्भवे यस्तु ज्ञानादत्र पतत्रिण । सोऽजीर्णेनैव रोगेण पीड्यते बहुपीडया ॥ १
अन्नदानाच्च विप्रेभ्यो रसदानाच्च शक्तितः । सावित्रीजपतो होमात्पूर्वपापात्प्रमुच्यते ॥ २
पापक्षये क्षयं यान्ति रोगाः पापसमुद्भवाः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो नवषष्ट्यधिकत्रिशततमः ॥ ३६९ ॥

श्रीसूर्य उवाच ।

या काचिन्मोहतश्चैके नारी भ्रातृवधं पुरा । सात्र जन्मनि मूकत्वं भजेत्कापि शुभानना ॥ १
प्रायश्चित्तं प्रवक्ष्यामि तस्याश्चान्द्राणव्रतम् । वेदपुस्तकदानं च पलस्वर्णयुतं त्विह ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः सप्तत्यधिकत्रिशततमः ॥ ३७० ॥

श्रीसूर्य उवाच ।

बालघाती भवेद्यस्तु पूर्वजन्मनि मानवः । वैनतेयात्र जलुषि मृतपुत्रः प्रजायते ॥ १
श्रवणाद्धरिवंशस्य विधिवच्चात्र जन्मनि । ब्राह्मणोद्वाहनाच्चैव पूजनाच्छङ्करस्य च ॥ २
जीविष्यन्ति च तत्पुत्रा नात्र कार्या विचारणा ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकसप्तत्यधिकत्रिशततमः ॥ ३७१ ॥

श्रीसूर्य उवाच ।

शूकरे याभवेत्पूर्वं निषादी पुनरेव सा । शूद्राऽधमा पञ्चनदे जाताऽत्र विनतासुत ॥ १
पुत्रपौत्रधनैर्धान्यैर्गजाश्वोष्ट्रादिवाहनैः । युक्ता सा यवनी सूत तीर्थराजस्य सेवनात् ॥ २
सा भर्तृसंयुता पूर्वं जनुष्यथ शिवार्चनात् । यवनी पूर्वपापाच्च निंदार्हाणां च सेवनात् ॥ ३

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो द्विसप्तत्यधिकत्रिशततमः ॥ ३७२ ॥

श्रीसूर्य उवाच ।

कश्चित्प्राग्भवविप्रः सर्वविद्याविशारदः । वेदाभ्यासरतः श्रीमान् प्राप्तसर्वमनोरथः ॥ १
तुलाधृतानि स्नेहानि विप्राणां स्नेहभागिनाम् । गृहीतान्यतिचौर्येण लोभयुक्तेन चेतसा ॥ २
यस्माज्ज्ञानकृतं कर्म प्राग्भवे तत्फलं शृणु । सोऽत्र विप्रो प्रयागेऽस्ति श्रेष्ठो वेदविदांवरः ॥ ३
धनपुत्रसमायुक्तः क्षयरोगसमन्वितः । वेदाभ्यासात्तथा दानात्तीर्थराजाधिवासनात् ॥ ४
नाशः स्यात्क्षयरोगस्य चात्र जन्मनि चाण्डज । दोषात्स्वल्पात्फलैर्युक्तो जीवेद्वर्षशतं ध्रुवम् ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायस्त्रिसप्तत्यधिकत्रिशततमः ॥ ३७३ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यभूत्कश्चिद्ब्राह्मणो धर्मसंयुतः । ग्रामाध्यक्षः प्रतापाढ्यो भ्रातृपुत्रसमन्वितः ॥ १
दत्तानि तेन दानानि ब्राह्मणेभ्योऽतिशक्तितः । पर्वस्वपि च भूस्वर्णगोऽश्वशय्यासनादिकम् ॥

१ महिष्या इति—खपु० ।

तिलपात्राणि भक्ष्याणि वस्त्राणि विविधानि च । सर्वरत्नानि पात्रेषु हव्यकव्यानि चाण्डज ॥ ३॥
पापमाचरितं चापि भाविनोऽर्थस्य गौरवात् । ग्रामान्तरे स्थितस्यास्य शत्रोः सीमापहारिणः ४॥
निर्दग्धं भवनं सर्वं रात्रौ वै चौर्यकर्मणा । तस्मिन्दग्धे महाभाग दग्धः क्षात्रशिशुस्तथा ॥ ५ ॥
बहवो गृहजा जीवा दग्धास्तद्ग्रामजा ध्रुवम् । वैरिभावात्सहायैश्च पापमुग्रमुपार्जितम् ॥ ६ ॥
एवं बहुतिथे काले स प्राप्तो यमशासनम् । पुण्यात्स्वर्गांश्च विविधान्भुक्त्वा पापात्तथोत्तरान् ॥७॥
पूर्वपुण्यप्रभावेण स जातो बाहुजोऽधुना । कुरुक्षेत्रात्परे भागे दशयोजनसंमिते ॥ ८ ॥
स रक्तगौरो मतिमान्स्वक्षो बहुधनैर्युतः । यशस्वी भ्रातृमित्राढ्यः पितृभक्तो दयापरः ॥ ९ ॥
सुस्त्रीभृत्यसुखैश्वर्यनानावाहनभोगभाक् । बुद्ध्याधिकप्रचारी च पितृभाग्यविवृद्धिदः ॥ १० ॥
ह्रस्वः कृशोदरो बन्धुमान्योऽग्र्योऽमितिदः प्रभुः । आदिमध्यावसानान्तं सुखैश्वर्यसमन्वितः ११॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । बहुचिन्तातुरो धूर्तो दाने चाल्पमतिस्तथा ॥१२॥
पीड्यमानस्तथा रोगैर्यौवने वातसंभवे । क्लेशैर्भयैर्मनोदुःखैः क्वापि क्षीणाधिकारकः ॥ १३ ॥
बालघातात्पुरा पापाज्जातपुत्रविनाशवान् । चिह्नमत्र जनुर्लग्नाद् गुरुर्भावे तु पञ्चमे ॥ १४ ॥
तस्मात्पापस्तथा चन्द्रो नीचः केन्द्रेऽशुभान्वितः । सहायलक्षणं सर्वं वक्ष्याम्यत्र पतत्रिण ॥१५॥
या स्त्री पूर्वे सहायासीद्ग्रामदाहेऽतिनिष्ठुरा । ज्येष्ठा स्त्री प्रष्टुरत्रास्ति मृतवत्सा खगेश्वर ॥ १६ ॥
तथाऽपरः सहायोऽभूत्पुत्रः पूर्वभवेऽण्डज । सहजः सोऽत्र जनुषि बहुपुत्रीभिरन्वितः ॥ १७ ॥
अन्ये ये बान्धवा भृत्याः सहायाः षण्मिताः पुरा । प्रष्टुस्तेऽत्र सुता जाता भवन्ति बहुदुःखदाः॥
लक्षणैरेभिराढ्यस्य प्रष्टुरत्रैव जन्मनि । प्रायश्चित्तं प्रवक्ष्यामि येन पापक्षयो भवेत् ॥ १९ ॥
पुण्यक्षेत्रेऽष्टभिर्विप्रैः पञ्चभिस्त्रिभिरेव वा । कारयेत्पार्थिवाँल्लिङ्गानेकादशशतैर्मितान् ॥ २० ॥
गन्धपुष्पोपचारैस्तु मन्त्रैरेव प्रपूजयेत् । ततश्चाष्टपलै रुद्रं कुर्याद्धेममयं शुभम् ॥ २१ ॥
सपत्नीकं यथाकारं सर्वावयवसंयुतम् । तदर्धार्धमितं वापि त्रिषु वित्तानुसारतः ॥ २२ ॥
पूजयित्वा तु गन्धाद्यैर्विधिज्ञाय प्रदापयेत् । हिरण्मयं तथा चाग्निं माषैः पञ्चमितैः शुभैः ॥२३॥
राजते च तथा पात्रे पलद्वयमिते शुभे । लेख्या जीवास्तु बालाद्या दग्धा ये च गृहाश्रिताः २४॥
ब्राह्मणाय च ते देया दाहदोषोपशान्तये । लक्ष्मीनारायणं तद्वत्पलाष्टमितिकं सुत ॥ २५ ॥
राजतं विधिवद्दद्यात्सर्वदोषापनुत्तये । गायत्र्यष्टसहस्रं तु सहस्रं द्वादशाक्षरम् ॥ २६ ॥
अष्टाक्षरं त्रिसाहस्रं जप्त्वा शुद्धिं समाचरेत् । होमयेत्तद्दशांशेन गाश्च विप्रांश्च भोजयेत् ॥ २७ ॥
शृणुयाद्धरिवंशं वा दशावृत्त्या विधानतः । य एवं कुरुते सूत द्वयोः पापविशोधनम् ॥ २८ ॥
तस्य पुत्रविवृद्धिः स्यात्स्त्रीभ्यामत्रैव जन्मनि । नाधयो व्याधयस्तस्य न चारिष्टभयं क्वचित्२९॥
नैवं करोति यो मोहाल्लोभात्पापविशोधनम् । न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः॥३०॥
पञ्चत्रिंशन्मिते वर्षे रिष्टं देहधनान्तकम् । त्रिसप्ततिमिताब्दायुः प्रायश्चित्ते कृतेऽधुना ॥ ३१ ॥

गतिमप्युत्तमां याति त्वन्यथा ह्याततायिनाम् ।

जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् । यदन्तरगतं सूत तन्मच्छास्त्राद्विचिन्तयेत् ॥ ३२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायश्चतुःसप्तत्यधिकत्रिशततमः ॥ ३७४ ॥

---

१ क्षेत्रेषु निर्विघ्नः इति—खपु० ।

अरुण उवाच ।

प्रयच्छति च धर्मात्मा सर्वपापविशोधनम् । सर्वस्वेन यजेद्देवान्पितॄंश्च श्रद्धयान्वितः ॥ १
गयाश्राद्धादिभिः काम्यैर्दानैर्हव्यैर्विधानतः । पूर्वपापविनिर्मुक्तो याति ब्रह्मसनातनम् ॥ २

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पंचसप्तत्यधिकत्रिशततमः ॥ ३७५॥

अरुण उवाच ।

कथयस्व दिवानाथ लोकानां हितकाम्यया । त्वां पृच्छाम्यत्र देवेश च्छिन्धि मे सर्वसंशयान्॥ १

श्रीसूर्य उवाच ।

शृणु सूत महाभाग सर्वं धर्माच्छुभं भवेत् । कश्चिद्विप्रस्तीर्थमार्गे सकन्यः स्त्रीसुतान्वितः ॥ २
लुण्ठितो केनचिद्राज्ञा स मृतो धनलोभतः । तन्नाशनादपुत्रोऽयं शृणु तस्य प्रतिक्रियाम् ॥ ३
द्विजस्य प्रतिमां कृत्वा सर्वस्वेन हिरण्मयीम् । यथाकारां शिवस्यापि स पुत्रायादितेस्तु ताम् ॥४
यन्मया निहतो विप्रो धनं हृत्वा घने वने । तस्करासंगमे पापं प्राप्तमेवोल्बणं महत् ॥ ५
तस्य पापस्य नाशाय दानमेतददाम्यहम् । सौवर्णीं प्रतिमामेनामनघोऽहं भवेदिति ॥ ६
भोजयेच्च शतं विप्रान् सर्पिष्यात्मानमीक्षयेत् ॥ ७ ॥

इति श्रीबृसूर्यारुणसंवादे कर्मविपाके अध्यायः षट्सप्तत्यधिकत्रिशततमः ॥ ३७६ ॥

श्रीसूर्य उवाच ।

या नारी घातयेत्काचिदुलूकं पूर्वजन्मनि । पाण्डुरोगेण सततं पीड्यते चात्र जन्मनि ॥ १
दद्यादत्र विधिज्ञाय पलमेकं पतत्रिण । कस्तूरिकाया विप्राय पाण्डुरुग्नाशनं परम् ॥ २

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तसप्तत्यधिकत्रिशततमः ॥ ३७७ ॥

श्रीसूर्य उवाच ।

वैनतेय महाभाग शृणु प्राक्कर्मणः फलम् । कश्चिदासीत्कलिङ्गे वै द्विजो धर्मकृपापरः ॥ १
बहुस्त्रीबलसंयुक्तो गोधनैश्च समन्वितः । गयायां कृतवाञ्छ्राद्धं श्रद्धाविधिसमन्वितः ॥ २
सततं कृतवान्पापं कामान्धः स च निश्चयात् । ज्येष्ठां त्यक्तुंसमारेभे धर्मिष्ठां प्रियवादिनीम्॥
रतिं ददौ कनिष्ठायामनृतौ स्त्रीविमोहितः । जीवन्स तु चिरं कालं पश्चान्मृत्युमवाप्तवान् ॥ ४
शुभाच्छुभफलं भुक्त्वा पापान्नरकयातनाः । गयाश्राद्धप्रभावेण जातो वाऽत्रापि स द्विजः ॥ ५
देशे रम्यस्थले पुण्ये नदे लोहितसंज्ञके । मध्यरूपः प्रियायुक्तो धनबुद्धिसमन्वितः ॥ ६
शुभादिदं तथा पापान्मनोदुःखसमन्वितः । औमं माहेश्वरं रूपं हैमं सोपस्करं किल
यो दद्याद्भर्मतः पापात्स्त्रीत्यागान्मुच्यतेऽधुना ॥ ७ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टसप्तत्यधिकत्रिशततमः ॥ ३७८ ॥

श्रीसूर्य उवाच ।

शान्तिकं पौष्टिकं चेदं वक्ष्यमाणं तथाण्डज । सर्वपापहरं ज्ञेयं तथा रोगविनाशनम् ॥ १
कुर्याच्चान्द्रायणं पुण्यं त्रिविधं सर्वपापहृत् । पीडिते तु गदाद्यैस्तु दृढनेत्रो भवेन्नरः ॥ २
पिपीलिकामध्यरूपं कुर्याच्चान्द्रायणव्रतम् । अष्टोत्तरसहस्रं तु जपेत्सूक्तं च पौरुषम् ॥ ३
बलिरत्रापि ग्रहाणाममन्त्रजपपूर्ववत् । बालग्रहयुतं बालमादायोच्छिष्टयुक्त स्वयम् ॥ ४
अग्निं स्पृशति स्कन्दाख्यग्रहः संक्रमते ततः । पादयोर्हस्तयोश्चैव विकारो वायुजो भवेत् ॥ ५

बलिदानमाह ।

तिलपिष्टदधिक्षीरकृसरापूपसक्तवः । राजमाषाश्च मुद्गाश्च निष्पावाः कन्दमूलकम् ॥ ६ ॥
पक्वं मांसं सुरा वेति पूर्णकुम्भयुतश्च वै । एभिर्दद्याद्बलिं सम्यक् मध्यरात्रेण संयुतम् ॥ ७ ॥
गवाभङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश । यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च ॥ ८ ॥
सर्वभूताश्रया भूमिर्वराहेण समुद्धृता । अनन्तसाम्ये त्वद्दानाच्छान्तिं श्रेष्ठां प्रयच्छ मे ॥ ९ ॥
महर्षेर्गोत्रसंभूताः कश्यपस्य तिलाः स्मृताः । तस्मादेषां प्रदानेन मम पापं व्यपोहतु ॥ १० ॥
हिरण्यगर्भगर्भस्त्वं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ ११ ॥
शरणं सर्वलोकानां लज्जाया रक्षणं परम् । सुवेषधारि वस्त्र त्वमतः शान्तिं प्रयच्छ मे ॥ १२ ॥
सर्वदेवमयं धान्यं सर्वोत्पत्तिकरं महत् । प्राणिनां जीवनोपायश्चातः शान्तिं प्रयच्छ मे ॥ १३ ॥
यथा देवेषु विश्वात्मा प्रवरश्च जनार्दनः । सामवेदस्तु वेदानां महादेवस्तु योगिनाम् ॥ १४ ॥
प्रणवः सर्वमन्त्राणां नारीणां पार्वती यथा । तथा रसानां वै श्रेष्ठः सदा चेक्षुरसो मतः ॥
मम तस्मात्परां लक्ष्मीं ददस्व गुड सर्वदा ॥ १५ ॥
प्रीतिर्यतः पितॄणां च विष्णुशङ्करयोः सदा । शिवनेत्रोद्भवं रौप्यमतः शान्तिं प्रयच्छ मे ॥ १६ ॥
यस्मादत्र रसाः सर्वे नोत्कृष्टा लवणं विना । शम्भोः प्रीतिकरं नित्यमतः शान्तिं प्रयच्छ मे १७ ॥
पुण्यस्त्वं शंख पुण्यानां मङ्गलानां च मङ्गलम् । विष्णुना विधृतो नित्यमतः शान्तिं प्रयच्छ मे ॥
धर्मस्त्वं वृषरूपेण जगदानन्दकारक । अष्टमूर्तेरधिष्ठानमतः शान्तिं प्रयच्छ मे ॥ १९ ॥
विष्णुरश्वस्वरूपेण यस्मादमृतसंभवः । चन्द्रार्कवाहनो नित्यमतः शान्तिं प्रयच्छ मे ॥ २० ॥
यस्मादायसकार्याणि दात्राधाराश्च सर्वदा । हे लोह लाङ्गलादीनि तस्माच्छान्तिं प्रयच्छ मे ॥ २१ ॥
यस्मात्त्वं छाग यज्ञानामाहुतित्वे व्यवस्थितः । यानं विभावसोर्नित्यमतः शान्तिं प्रयच्छ मे २२ ॥
यथा रत्नेषु सर्वेषु देवाः सर्वे प्रतिष्ठिताः । तथा शान्तिं प्रयच्छन्तु रत्नदानेन मे सुराः ॥ २३ ॥
ग्रहा गावो नरेन्द्राश्च विशेषेण प्रपूजिताः । पूजकं पूजयन्त्येनं निर्दहन्त्यवमानिताः ॥ २४ ॥
आयुःकामो विधानेन प्रयोगमिममाचरेत् । मुच्यते सर्वरोगेभ्य आयुःपूर्णो भवेन्नरः ॥ २५ ॥
न प्राप्नुयान्महारिष्टं प्रयोगस्य प्रभावतः ॥ २६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकोनाशीत्यधिकत्रिशततमः ॥ ३७९ ॥

श्रीसूर्य उवाच ।

कश्चिच्छूद्रो महाभाग बभूव प्राग्भवे धनी । व्यापारनिरतो दक्षः क्रयविक्रयकर्मसु ॥ १ ॥
सर्वं स्नेहं तेन नीतं मिलित्वा चार्धसीरिणाम् । कालेन तद्धृतं लोभात्स्नेहमौपाधिकं सुत ॥ २ ॥
भुक्त्वा पापफलं घोरं भ्रमरत्वमुपागतः । ततः पुण्याच्छुभान्भुक्त्वा पुण्याज्जातोऽत्र पर्वते ॥ ३ ॥
शूद्रः पुण्यकलायुक्तो भूमिदानात्सुरार्चनात् । स्नेहहारी यतः पूर्वं राजयक्ष्मप्रपीडितः ॥ ४ ॥
सर्वस्नेहातिदानाद्वै स्ववित्तात्तुर्यभागतः । स्वर्णदानं तथा चात्र क्षयरोगाद्विमुच्यते ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायऽशीत्यधिकत्रिशततमः ॥ ३८० ॥

श्रीसूर्य उवाच ।

विषं दत्त्वा हन्ति सूत प्राग्या जाराश्रिता पतिम् । पतिघ्नी सा महादुष्टा बाल्येऽत्र विधवा सुत ॥ १ ॥

---

१ यथा तीर्थेषु वेदेषु इति–खपु० । २ मौल्याधिकमिति–खपु० ।

विष्णोराराधनादत्र गङ्गाया उपसेवनात् । गतिं शुभां सा प्राप्नोति व्रतकृच्छ्रोपसेवनात् ॥
धर्मादत्र महाभाग परत्र च शुभां गतिम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकाशीत्यधिकत्रिशततमः ॥ ३८१ ॥

श्रीसूर्य उवाच ।

देवागारं दहेद्यस्तु प्राग्जन्मन्यथ पुत्रक । रक्तातिसाररोगेण बाध्यतेऽत्रैव जन्मनि ॥ १
तस्यैव दानाद्विप्राय स्थापनाद्वा विधानतः । मुच्यते पापजाद्रोगादतिसाराद्विनिश्चितम् ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्यशीत्यधिकत्रिशततमः ॥ ३८२ ॥

श्रीसूर्य उवाच ।

मूर्धाभिषिक्तः प्राक्श्चिन्मथुरायामभूत्सुधीः । राजसेवी महाशूर आखेटकरतः सदा ॥ १
मृगयायां गतो दैवाद्धातिता मृगसूकराः । तत्रैका हरिणी सूत घातिता गर्भसंयुता ॥ २
तद्गर्भगौ हतौ तत्र शुभौ द्वौ मृगशावकौ । सहजाभ्यां युतेनैव कृतं कर्म दुरात्मना ॥ ३
ताभ्यां मिलित्वा तौ भुक्तौ शावकौ चाण्डजाधिप । सोऽपि काले महाभाग प्राप्तः शत्रुवशं पुरा ॥ ४
स शौर्यकर्मणा सूत हतवान् वै रिपून्बहून् । घातितः सोऽपि बहुभिः प्रहारैरतिदारुणैः ॥ ५
संग्रामभूमौ स मृतः प्राप्तः स्वर्गपुरं तदा । भुक्त्वा नानाविधान्भोगान्स जातो ब्राह्मणोऽधुना ॥ ६
देशे प्रयागनिकटे सर्वशास्त्रार्थकोविदः । जातकः कर्कटे जीवे लग्नस्थे हि महातपाः ॥ ७
धनैर्नानाविधैर्युक्तो गौराङ्गो रक्तलोचनः । शिवपूजनजात्पुण्यात्प्राकृतात्सकलैः सुखैः ॥ ८
नानामनोरथैश्चापि पूर्णश्चात्रैव जन्मनि । दंडप्रचार्यत्युग्रश्च पापाच्चाऽपि फलं शृणु ॥ ९
धूर्तः शठः सर्वभक्षः स्वल्पपापरतः क्वचित् । सहायस्याप्यत्र लक्ष्म शृणु पुत्र यथा तथा ॥ १०
याभ्यां मिलित्वा भुक्तौ द्वौ मृगशावौ खगाधिप । पृच्छकस्य च तौ पुत्रावुभौ ज्येष्ठकनिष्ठकौ ॥ ११
ह्यपस्मारेण रोगेण मृतौ चात्रैव जन्मनि । एवं संततिदुःखार्तः स विप्रो विधिवर्जनात् ॥ १२
मांसभोजनजात्पापात्प्रायश्चित्तं वदाम्यहम् । पूजयेच्छिवलक्षं तु तदर्धं वा तदर्धकम् ॥ १३
हिरण्मयौ तथा देयौ द्वावत्र मृगशावकौ । पूजयेच्च तथा वायुं विधिना मृगदैवतम् ॥ १४
तन्मन्त्रैर्धूपगन्धाद्यैर्नानाभक्ष्यैर्विधानतः । प्रायश्चित्तं परं तस्य पापस्य क्षयकारकम् ॥ १५
अथवा भोजयेद्विप्रान्सहस्रद्वयसंमितान् । पुत्रपौत्रविवृद्धिः स्यात्प्रायश्चित्ते कृतेऽधुना ॥ १६
प्रायश्चित्तेऽकृते त्वत्र न च पुत्रसुखं लभेत् । रिष्टेन मरणं चापि वर्षे वेदाब्धिकेऽण्डज ॥ १७
प्रायश्चित्ते कृते वाणसप्तत्यब्दं हि जीवनम् । चैत्राष्टम्यां च निधनं शुक्लायां गरुडाग्रज ॥ १८

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायश्चयशीत्यधिकत्रिशततमः ॥ ३८३ ॥

श्रीसूर्य उवाच ।

गर्भपातनपापाढ्या[1] बभूव प्राग्भवेऽण्डज । सावेयं तेन पापेन गर्भपातेन दुःखिनी ॥ १
विप्रकन्याविवाहाद्वै विधिवदत्र जन्मनि । मुच्यते तेन पापेन गर्भस्थैर्यं भवेदिह ॥ २
अथवा पार्वतीं दद्याद्देवीं दशसुवर्णजाम् । युक्तां गणेशस्कन्दाभ्यां नानाभरणभूषिताम् ॥ ३
तदर्धार्धमितां वापि पूजयित्वा विधानतः । मुच्यते पूर्वपापाच्च गर्भपातनजात्सुत ॥ ४

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायश्चतुरशीत्यधिकत्रिशततमः ॥ ३८४ ॥

---

१ विधिवद्याजनार्चनात् इति—ख०पु० ।

श्रीसूर्य उवाच।

या काचिदाहयेन्नारी देवागारं पतत्रिण। सांतीसारेण महता पीडया पीडयतेऽधुना ॥ १ ॥
शङ्करप्रतिमादानान्मूर्तोर्विष्णोः प्रपादनात्। न जायते महापीडा रक्तातीसारसंभवा ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः पञ्चाशीत्यधिकत्रिशततमः ॥ ३८५ ॥

श्रीसूर्य उवाच।

या काचिद्घातयेन्नारी पत्युर्मित्रं च प्राग्भवे। नियतं वायुरोगेण पीडयते बहुपीडया ॥ १ ॥
पापं समीक्ष्य विपदि सर्वस्वार्धार्धजेन च। वायुं हिरण्मयं कुर्यान्मृगं विहितलक्षणम् ॥ २ ॥
पूजयित्वा विधानेन गन्धैर्वस्त्रैर्विशेषतः। मन्त्रैश्च वायुजैः सूत दद्याद्विप्राय धीमते ॥ ३ ॥
वायुरोगोपशमनं दानेनानेन जायते ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः षडशीत्यधिकत्रिशततमः ॥ ३८६ ॥

श्रीसूर्य उवाच।

अज्ञानादथवा नारी गोत्रघातकरी पुरा। बभूव सततं चात्र लूतिरोगप्रपीडिता ॥ १ ॥
श्रवणादितिहासानां प्राजापत्याद्व्रतात्सुत। लूतिरोगेण पश्येत सात्र जन्मनि चाण्डज ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायस्सप्तशीत्यधिकत्रिशततमः ॥ ३८७ ॥

अरुण उवाच।

भूमिदेवकुलोत्पन्नः किंचिद्वित्तसमन्वितः। संयुतो वायुपित्ताभ्यां नेत्रतोदः शिरोर्तिमान् ॥ १ ॥
सद्वृत्तश्च सुखी धीमान् धर्मिष्ठो धर्मवत्सलः। व्रणो रेखा शरा वापि बाल्ये स्याद्ग्रहणीगदः ॥२॥
कटिपृष्ठाऽभिघाताश्च व्रणे वाताग्निदर्शनम्। परोक्षे ह्यपवादं वै ब्रूतेऽत्र कारणं विना ॥ ३ ॥
तस्य प्रिया शुभाचारा सती व्रतपरायणा। काकवन्ध्या कथं जाता कस्येदं कर्मणः फलम् ॥ ४ ॥

श्रीसूर्य उवाच।

पूर्वं जन्मनि वैश्यस्तु भार्या विप्रस्य सात्त्विकी। प्रतिवेश्म तदा तस्य ब्राह्मणो ज्ञानसत्तमः ॥५॥
अप्रसूता प्रिया तस्य चपला चारुलक्षणा। वैश्येन कथयित्वा तु लोभमोहादिविभ्रमः ॥ ६ ॥
अज्ञानात्काममिच्छन्ती उभयेपि बलीयसा। तावत्कालवशेनैव ब्राह्मणो जनतां गतः ॥ ७ ॥
स वैश्यो दैवयोगाच्च भाविनोऽर्थस्य वैभवात्। सतां वै धर्षयामास बहुकालं खगेश्वर ॥ ८ ॥
व्यभिचारवशात्तत्र अन्योन्यं तद्धृतं धनम्। गृहीतं तद्धनं तेन धूर्तया लोभचेतसा ॥ ९ ॥
ब्राह्मणी निधनं प्राप्ता लोके गृह्णाति विश्रुतिम्। तेन दुःखेन विप्रो सौ ब्राह्मणीमभजत्पुरा॥१०॥
निर्विषं जायते तत्र ब्राह्मणस्य खगेश्वर। तेन कर्मविपाकेन तादृशं च भवेदिह ॥ ११ ॥
पश्चान्मानुषमापन्नो बहुशोकाकुलो भृशम्। इदं जन्म द्वितीयं तु ब्रह्मवंशसमुद्भवम् ॥ १२ ॥
प्राप्यते चानपत्यस्य एकापत्यो थवा यदि ॥ १३ ॥

अरुण उवाच।

प्रायश्चित्तं कथं स्वामिन् येन वन्ध्यत्वनाशनम्। एकापत्यभवं दुःखमनपत्यार्थतो यदि ॥ १४ ॥

श्रीसूर्य उवाच।

मार्गशीर्षे शुभे मासि शुक्लपक्षादितः खग। प्रत्यक्षं सुखसौख्यार्थिव्रतेन प्रतिवासरम् ॥ १५ ॥
षोडशाब्दांश्च नारीणाभिः कर्तव्यं विधिपूर्वकम्। गौरीव्रतमिदं दिक्षु सुतसौख्यकरं स्मृतम् ॥१६॥

प्रातर्नियममास्थाय दन्तधावनपूर्वकम् । अद्याहं शिवयोः प्रीतिमाचरिष्ये च तद्व्रतैः ॥ १७
स्नानोपवासनिरता नक्तजागरतत्परा । ततो मध्याह्नसमये स्नात्वा कुंकुमवाससी ॥ १८
परिधायार्चयेद्गौरीं पतिपुत्रवतीं स्त्रियम् । कुंकुमैः कज्जलैरेभिः करणैः पुष्पमालया ॥ १९
ताम्बूलैस्तु सकर्पूरैः सौभाग्याष्टकसंयुतैः । ततो वास्तमिते भानौ वर्तिः षोडशतन्तुभिः ॥२०
विधाय तिलतैलेन दीपं कुर्याच्छिवाग्रतः । गीतवादित्रनिर्घोषैः पुराणश्रवणादिभिः ॥ २१
नैवेद्यं विधिवत्कुर्यादपूपतिलतण्डुलैः । तथा षोडशसंख्यानि शूर्पाणि वेणुजानि च ॥ २२
सौभाग्याष्टकयुक्तानि सप्तधान्ययुतानि च । प्रत्येकं दीपं विन्यस्य गौर्यग्रेऽपि प्रकल्पयेत् ॥२३
पतिपुत्रसुखायैव पूजयन्ती गिरेः सुताम् । भोजयेत्षोडश नार्यः सुभगाः पतिसंयुताः ॥ २४
एवं विधिं समास्थाय भोजयेद्दम्पतीञ्शुभान् । नानाभोज्यैस्तथा सूत पक्षिभ्यो बलिमाहरेत् ॥२५
दीनान्धकृपणेभ्योऽन्नं सर्पिष्यात्मानमीक्षयेत् । एतद्गौरीव्रतं नाम मार्गशीर्षे समाचरेत् ॥ २६
एवं कृतविधिः सूत प्राप्नोति पुत्रपौत्रकान् । नारी नियमसंपूर्णं व्रतं कुर्यात्प्रयत्नतः ॥ २७
सुतसौभाग्ययुक्ता सा पतिपुत्रसुखान्विते । ऐहिकं लक्षणं तस्या नार्य्याश्चैवोपजायते ॥ २८
स्वसा मातृष्वसा वापि सपत्नी शोकसंयुता । उदरार्तिरसृक्स्रावः पार्श्वे घातः करादिषु ॥ २९
मिथ्याभिशंसनं क्वापि वाक्यदोषाद्धनच्युतिः । स्वसातिनिन्दाहीनत्वं परेभ्यो मर्मतोदनम् ॥३०

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायोऽष्टाशीत्यधिकत्रिशततमः ॥ ३८८ ॥

श्रीसूर्य उवाच ।

शकृन्मूत्रं सृजेद्यस्तु देवागारे नराधमः । गुदरोगमवाप्नोति सोऽत्र जन्मनि मानवः ॥ १
एकं मासं यजेद्विष्णुं शिवं वा विधिनाण्डज । प्राजापत्यं चरेत्कृच्छ्रं दद्याद्गोमिथुनं सुत
न पश्यति तदा पीडां गुदजामत्र जन्मनि ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकोननवत्यधिकत्रिशततमः ॥ ३८९ ॥

श्रीसूर्य उवाच ।

घातयेद्यः पुरा नारीमज्ञानात्पूर्वजन्मनि । सोऽत्र जन्मनि जायेत कृशो बलविवर्जितः ॥ १
शर्कराधेनुदानैश्च दशसंख्यैस्तथाऽण्डज । विमुच्यते कृशत्वाच्च शतब्राह्मणभोजनात् ॥ २
होमात्स्वस्त्ययनात्पापाद्गायत्रीजपतोऽत्र च । तीर्थस्नानाद्घृतदानाद्बली भवति नान्यथा ॥ ३

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायो नवत्यधिकत्रिशततमः ॥ ३९० ॥

श्रीसूर्य उवाच ।

बालानां घातिनी चेयमभवत्पूर्वजन्मनि । तेनाष्टमादत्र वर्षाद्वर्षाग्बालो न जीवति ॥ १
अत्र जन्मनि भो सूत तस्मात्सा मृतपुत्रिणी । इदं जीवेदिदं जीवेदिति चिन्तयती ध्रुवम् ॥ २
न जीवन्ति च तत्पुत्राः पूर्वपापात्तथाण्डज । प्रायश्चित्तं शृणुष्वाथ येन जीवन्ति तत्सुताः ॥३
श्रवणाद्धरिवंशस्य दशावृत्त्या खगेश्वर । पञ्चत्र्येकमितावृत्त्या शिशुघातजकिल्बिषात् ॥ ४

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकनवत्यधिकत्रिशततमः ॥ ३९१ ॥

श्रीसूर्य उवाच ।

यः कश्चिद्घातयेत्पूर्वं ब्राह्मणं ज्ञानवर्जितः । कुष्ठरोगान्वितः सोऽपि जायतेऽत्रैव जन्मनि ॥ १

दद्यात्कालनरं सूत सर्वोपस्करसंयुतम् । सर्वस्वं वा महापापे दानमुक्तं मनीषिभिः ॥ २ ॥
सर्वस्वदानात्कुष्ठस्य पीडा नश्यति तत्क्षणात् ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायो द्विनवत्यधिकत्रिशततमः ॥ ३९२ ॥

श्रीसूर्य उवाच ।

देवद्रव्यं हरेद्यस्तु पूर्वं जन्मनि यो नरः । सोऽत्र जन्मनि जायेत वायुपीडाभिरन्वितः ॥ १ ॥
प्रायश्चित्तं परं वायोर्नाशनं तस्य वक्ष्यहम् । जपेन्मृत्युंजयं मन्त्रं सावित्रीं च विशेषतः ॥ २ ॥
होमयेत्तदशांशेन ब्राह्मणान्भोजयेत्तथा । वायुरोगोपशान्त्यर्थं शक्त्या दद्याच्च दक्षिणाम् ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायस्त्रिनवत्यधिकत्रिशततमः ॥ ३९३ ॥

श्रीसूर्य उवाच ।

देवागारे तु या काचित्प्राग्भवे विनतासुत । मृजेन्मूत्रं पुरीषं च मोहाद्वत्रैव जन्मनि ॥ १ ॥
गुदरोगान्विता सा तु नारी पापप्रणाशनम् । वक्ष्ये गोमिथुनं दद्यात्प्राजापत्यं चरेद्व्रतम् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायश्चतुर्नवत्यधिकत्रिशततमः ॥ ३९४ ॥

श्रीसूर्य उवाच ।

बभूव मुखजः कश्चिद्विद्याधनसमन्वितः । नानाकलासु कुशलो विष्णुभक्तिपरायणः ॥ १ ॥
सूर्यग्रहे प्रयागे तु सर्वस्वमददात्पुरा । तत्र भाविबलात्सूत पापमाचरितं त्विदम् ॥ २ ॥
धर्षिता क्षत्रिया यूना कामार्तेन शुभानना । प्रतारितः पतिस्तस्यास्तेन दैवहतेन तु ॥ ३ ॥
ततो मृत्युवशं प्राप्तः स गत्वा यमशासनम् । शुभाच्छुभफलं भुक्त्वा चाशुभादतिदारुणम् ॥४॥
अन्यजन्मनि दानेन स जातः क्षत्रियाधमः । देशे विपाशानिकटे सप्तयोजनसंमिते ॥ ५ ॥
सुरूपदेहः सद्बुद्धिः स्त्रीपुत्रधनसंयुतः । शूरो दाता प्रधानश्च देशेदेशे तु विश्रुतः ॥ ६ ॥
किंचित्पापरतो धूर्तो मनोदुःखाकुलो भृशम् । क्षत्रियार्थपणात्पूर्वं भर्तृसंताडनात्तथा ॥ ७ ॥
वार्द्धक्ये कण्डुरोगार्तो निश्चयादत्र जन्मनि । लक्ष्मैतदण्डजश्रेष्ठ सूर्यशुक्रौ चतुर्थगौ ॥ ८ ॥
वक्ष्यामि तस्य पापस्य निष्कृतिं पापशोधनीम् । लक्ष्मीनारायणं दद्यात्पलेनार्धपलेन वा ॥ ९ ॥
हिरण्मयं सुघटितं सर्वाभरणभूषितम् । पूजयित्वा तु गन्धैश्च पुष्पैर्नानाविधैस्तथा ॥ १० ॥
दीपैर्विचित्रैर्विधिना दद्याद्विप्राय धीमते । गणनाथं तथा दद्यात्सौवर्णं दशमाषकम् ॥ ११ ॥
एवं विधानं यः कुर्यात्पूर्वपापविशोधनम् । न तस्य दद्रुः कण्डूश्च तस्माद्रोपात्प्रमुच्यते ॥ १२ ॥
अकालमरणं तस्य प्रायश्चित्तेऽकृतेऽत्र च । प्रायश्चित्ते कृते त्वब्दाञ्जीवनं सप्तसप्ततिम् ॥ १३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः पंचनवत्यधिकत्रिशततमः ॥ ३९५ ॥

श्रीसूर्य उवाच ।

घातयेद्यः स्त्रियं साध्वीं कामात्पापविमोहितः । प्राग्भवे नियतं सोऽत्र कार्श्यं भजति जन्मतः ॥ १ ॥
तेनैव मृत्युमाप्नोति रोगेणैव पतत्रिण । प्राप्ते रिष्टेऽथ नष्टायुर्जायते महदेनसः ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः षण्णवत्यधिकत्रिशततमः ॥ ३९६ ॥

श्रीसूर्य उवाच ।

कन्यकावधजात्पूर्वं पापात्कन्याप्रजा भवेत् । जन्मन्यत्र महाभाग पूर्वपापादिदं फलम् ॥ १ ॥

पूजनाल्लक्षरुद्राणां तदर्धाणां तथैव च । मुच्यते पूर्वपापच्च घोरकन्यावधादिह ॥ २
अथवा विधिना सूत तडागोत्सर्गपुण्यतः । विप्राणां भोजनात्तस्मिंस्तडागे गोप्रदानतः ॥ ३
पूर्वपापात्प्रमुच्येत नात्र कार्या विचारणा ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः सप्तनवत्यधिकत्रिशततमः ॥ ३९७ ॥

श्रीसूर्य उवाच ।

या च पूर्वभवे नारी देवद्रव्यापहारिणी । सात्र जन्मनि पक्षीन्द्र भवेद्वायुप्रपीडिता ॥ १
देवालयं सुरुचिरं कृत्वा स्थाप्यात्र देवताम् । वायुरोगोपशमनं निश्चितं जायतेऽण्डज ॥ २
भोजयेत्तत्र वै विप्रान् वायुप्रीत्या पतत्रिण । दानं वित्तानुसारेण वित्तशाठ्यं न कारयेत् ॥ ३

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायोऽष्टनवत्यधिकत्रिशततमः ॥ ३९८ ॥

श्रीसूर्य उवाच ।

क्वश्चित्क्षात्रकुले सूत पूर्वजन्मन्यभूद्ध्रुवम् । गिरिवासी महादुष्टश्चौर्यकर्मरतो दृढः ॥ १
लुण्ठितो ब्राह्मणस्तत्र मार्गे संताडितो भृशम् । तत्ताडनान्महाबाहो मृतः काले द्विजोत्तमः ॥ २
गते बहुतिथे काले स जातो ब्राह्मणोऽधुना । गङ्गायमुनयोर्मध्ये क्रूरकर्मा महोद्यमी ॥ ३
प्राक् शिवाराधनात्पुण्याद्बाहुजः कुष्ठसंयुतः । वक्ष्यामि निष्कृतिं तस्य सर्वपापौघनाशनीम् ॥४
सर्वस्वस्य समः कार्यो वृषभोऽत्र हिरण्मयः । क्षौमवस्त्रयुतो भव्यः शृङ्गाभ्यां संयुतो महान् ॥५
स देयो वेदविदुषे कुष्ठदोषोपशान्तये । दानेनानेन सततं प्रीतो भवति वै शिवः ॥ ६
तस्माच्छिवप्रसादाद्वै कुष्ठस्तस्य प्रशाम्यति ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकोनचतुःशततमः ॥ ३९९ ॥

श्रीसूर्य उवाच ।

प्रागासीद्बाहुजा काचिद्भर्तृप्रियरता सदा । दानधर्मरता साध्वी विप्राणां पूजने रता ॥ १
तदा दैवात्सा सुभगा द्रव्यलोभरता सदा । सपत्नीपुत्रे त्वददाद्विषं सा पापचारिणी ॥ २
मृतस्तद्विषयोगेन गृहीतं तद्धनं तया । तद्दुःखेन पतिस्तस्या मृतः पुत्रशुचान्वितः ॥ ३
पापमाचरितं घोरं स्वपुत्रवधसंज्ञकम् । प्राप्ता यमपुरं भुक्त्वा पूर्वपुण्यफलं शुभम् ॥ ४
तद्वत्पापफलं सूत घोरं नरकसंज्ञकम् । पूर्वपुण्यप्रभावेण सा जाता पर्वतेऽधुना ॥ ५
क्षात्रे कुले महापुण्ये राज्ञस्त्रास्ति पतत्रिण । सा रक्तगौरा धर्मज्ञा सदा पुण्यपरायणा ॥ ६
मध्यस्वरूपा सिद्धार्था सुशीला गौरवान्विता । नातिव्यययुता पुण्या स्वकुलेष्टा प्रियंवदा ॥ ७
पतिप्रियरता चोग्रा सुखैश्वर्यधनान्विता । पुण्यादिदं तथा पापाल्लोभाढ्या स्वल्पपुत्रका ॥ ८
स्वल्पपापरता काले चाधिव्याधिसमन्विता । यौवने भर्तृसंयुक्ता वार्द्धक्ये पुत्रवर्जिता ॥ ९
सपत्नीपुत्रवधजात्पूर्वपापात्पतत्रिण । लक्षणैरेभिराढ्यायाः प्रायश्चित्तं वदाम्यहम् ॥ १०
विष्णुः कार्यः शतैर्मांषैः सौवर्णो विश्वयोनिभृत् । तद्वन्महेश्वरं कुर्याद्गन्धैः पुष्पैरलंकृतम् ॥११
देयौ विप्रेषु पात्रेषु पूर्वपापापनुत्तये । जपेदष्टाक्षरं मन्त्रमयुतं होमयेत्ततः ॥ १२
गायत्रीं च जपेत्तद्वद्दद्याद्वावस्तथा सुत । भोजयेच्छक्तितो विप्रांस्तेभ्यो दद्याच्च दक्षिणाम् ॥१३
एवं कुर्यात्प्रयत्नेन पूर्वपापविशोधनम् । न तस्याः पुत्रमरणं तद्ग्रे जायते ध्रुवम् ॥ १४
नवं या कुरुते सूत प्रायश्चित्तं विधानतः । तयाऽनुभूयते दुःखमसकृत्पुत्रनाशनम् ॥ १५

विप्राणां पूजनाद्दानात्तस्याः संततिवर्धनम्। जीवनं कथितं तस्या वर्षाणामष्टसप्ततिम् ॥ १६ ॥
रिष्टं षष्टिमितादब्दादूर्ध्वं वाकृतनिष्कृतेः ॥ १७ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायश्चतुःशततमः ॥ ४०० ॥

अरुण उवाच।

कश्चिद्विप्रकुलोत्पन्नो दृढाऽवयवसंयुतः। सदाचारः सुशोभाढ्यो दयानियमतत्परः ॥ १ ॥
क्रयविक्रयकर्ता च किंचिद्व्यापारवान्भुवि। तस्य प्रिया शुभाचारा पतिभक्तिपरायणा ॥ २ ॥
मातृपक्षं समाश्रित्य पोषिता भ्रातृमातुलैः। ह्यसृग्वातगदार्ता सा वाल्येऽस्याद् ग्रहणीगदः ॥३॥
काष्ठलोष्टाश्मशस्त्राद्यैर्घातश्च करपादयोः। बहुपुत्रीप्रसूता च अपुत्रा जायते भुवि ॥
अथवा मृतपुत्रत्वं जायते केन मानद ॥ ४ ॥
जातमात्रमृताः केचित्केचित्पौगण्डमाश्रिताः। केचिद्दृष्टानना वापि मृतः पुत्रोऽग्निमासकः ॥५ ॥
रक्तस्रावकृता पीडा मासेमासे सदाऽनघ। केन कर्मविपाकेन सत्यं वद दिवस्पते ॥ ६ ॥

श्रीसूर्य उवाच।

पूर्वं क्षात्रः समुत्पन्नः किंचिद्भूमिपतिस्तथा। तत्काल एव वैश्यस्तु परवित्तापहारकः ॥ ७ ॥
दूतिकाकर्मनिरतो लोकवञ्चनतत्परः। ग्रामाधीशोऽभवद्यो वै तस्याऽग्रे भाषितं खलु ॥ ८ ॥
एकग्रामेऽवसद्विप्रैः शान्तो दान्तः क्षमः सदा। पुत्र्यः पञ्च तथा सप्त चापुत्रो वित्तसंयुतः ॥ ९ ॥
कालेनैव मृतो विप्रो हर्तव्यं तद्धनं त्विति। क्रिया नैव कृता तस्य सर्वं राज्ञा हृतं च तत्॥ १०॥
एवं कृतापराधोऽसौ क्षत्री वैश्यसहायकः। कतिचिन्मासपक्षान्तमुल्लंघ्य सोचिरान्मृतः ॥ ११ ॥
म्लेच्छैर्विनिहतो मार्गे गतोऽसौ यमशासनम्। केचित्तत्र विपच्यंते नरके भृशदारुणे ॥ १२ ॥
दानधर्मादिना केचिद्धरण्यामिह मानद। विप्रवंशे समुत्पन्ना जायंते चेह जन्मनि ॥ १३ ॥
द्वितीयं जन्म तस्याऽपि विप्रत्वे जायते भुवि। पूर्वकर्मविपाकेन कन्यापत्यं प्रजायते ॥ १४ ॥
ब्रह्मस्वहरणाच्चैव मृतपुत्रः प्रजायते। नानापत्यानि पच्यन्ते नानाकर्मोद्भवानि च ॥ १५ ॥
पुराकृतानि कर्माणि भुज्यन्ते जन्मजन्मनि ॥ १६ ॥

अरुण उवाच।

प्रायश्चित्तं वद स्वामिन् यच्चिराद्युः सुतो भवेत्। कन्यापत्यप्रशमनं बहुपुत्रंकरं प्रभो ॥ १७ ॥

श्रीसूर्य उवाच।

सुशुभे भूमिदेशे तु गोमयाद्युपलिप्तके। तत्रोपर्याविकं स्तीर्यमथवा चाजिनं शुभम् ॥१८ ॥
छादयेच्छुक्लवस्त्रेण तण्डुलद्रोणपर्वतम्। तत्रोपरि न्यसेत्पात्रं तस्मिन् दशपलैर्मितम् ॥ १९ ॥
स्थापयेत्काश्यपीं मूर्तिं सौवर्णीं शुभलक्षणाम्। मुक्तायज्ञोपवीताढ्यां निष्कसौवर्णनिर्मिताम् २०॥
दधानं करयुग्मेन चाक्षमालां कमण्डलुम्। कश्यपाद्यामभागे च त्वदितिं विश्वमातरम् ॥ २१ ॥
सौवर्णीं स्थापयेत्सूत सुवर्णद्वयनिर्मिताम्। हारकेयूरमुकुटां कुण्डलाभरणान्विताम् ॥ २२ ॥
आसने वै समास्थाय ततो द्रोणान्दिशो दश। एवं तौ दम्पती सम्यगर्चयेत्पर्वतोपरि ॥ २३ ॥
कृत्वा प्रतिष्ठितप्राणां पूजयेद्विविधैर्गुणैः। नानागन्धफलैश्चैव नानापुष्पैः सुगन्धितैः ॥
अभ्यर्च्य दम्पती तौ तु मन्त्रमेतमुदीरयेत् ॥ २४ ॥

मन्त्रः ।

" यन्मया पूर्वजनुषि विप्राणामाहृतं धनम् । दूतसंगं च संप्राप्य वाक्यदोषादि यत्कृतम्
तत्सर्वं क्षम्यतां देव तव मूर्तिं ददाम्यहम् " ॥ २५ ॥
अदितिं च प्रणम्याथ कृताञ्जलिरिदं ब्रुवन् ॥ २६ ॥

मंत्रः ।

" आदिते विश्वमातस्त्वां शरण्यां शरणार्थिनाम् । प्रजादुःखौघसंतप्तो हृदये नौमि चेश्वरि
संप्रणाशाय दुःखस्य प्रजां देहि यशस्विनीम् " ॥ २७ ॥
एवं कृत्वा विसृज्याथ ब्राह्मणान्भोजयेत्ततः । शालग्रामशिलां शुद्धां सोमकान्तमणिं तथा ॥२८॥
चन्द्रसूर्योपरागे तु ब्राह्मणाय समर्पयेत् । एवं कृत्वा विधिं सूत कृष्णां गां दापयेत्ततः ॥ २९ ॥
सर्पिष्यात्मानमालोक्य भोजयेच्चैव बान्धवान् । ऐहिकं लक्षणं यत्तच्छरीरे गरुडाग्रज ॥ ३०
काष्ठलोष्टादिशस्त्राद्यैः करपादे व्रणं वदेत् ॥ ३१ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकाधिकचतुःशततमः ॥ ४०१ ॥

श्रीसूर्य उवाच ।

राजानं घातयेद्यस्तु पुरुषः प्राग्भवेऽण्डज । स राजयक्ष्मरोगेण युक्तः स्यादत्र जन्मनि ॥ १ ॥
तस्मिन्वयसि पक्षीन्द्र सोऽपि प्राणैर्वियुज्यते । महापापोद्भवाद्रोगान्न चोक्तं विन्मयं मया ॥ २ ॥
अपि ज्ञानकृतात्पापाद्दिष्टरूपाच्च काश्यप । नाशयत्यमरं सिद्धं पूर्णायुरपि च ध्रुवम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्यधिकचतुःशततमः ॥ ४०२ ॥

श्रीसूर्य उवाच ।

पुरा गर्भे तु यः कश्चित्पातयेज्ज्ञानवर्जितः । जलोदरेण सततं रोगेणात्र प्रपीडितः ॥ १ ॥
जलधेनुप्रदानेन विधिना गरुडाग्रज । ताम्ररूप्यसुवर्णादिदानात्पापप्रणाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्यधिकचतुःशततमः ॥ ४०३ ॥

श्रीसूर्य उवाच ।

ब्राह्मणोऽभूत्कुरुक्षेत्रे कृषिकृद्वेदपारगः । स्वज्ञातीयस्य चान्यस्य वृत्तिलोपं चकार सः ॥ १ ॥
तत्संबन्धेऽभवद्युद्धं द्वयोरेको मृतस्तदा । वृत्तिलोपी द्विजः काले गतो हि यमशासनम् ॥ २ ॥
भुक्त्वा तत्पापजं सर्वं शतद्वुनिकटेऽधुना । स वै जातो द्विजश्चात्र वेदाभ्यासाच्च पुत्रक ॥ ३ ॥
कुष्ठक्षयान्वितश्चात्र युवभावे पतत्त्रिण । तत्पापनाशनं सर्वं प्रायश्चित्तं प्रवच्म्यहम् ॥ ४ ॥
वेदाभ्यासान्महासूत सावित्रीजपतस्तथा । गङ्गायां वासतश्चाऽपि पूर्वपापात्प्रमुच्यते ॥ ५ ॥
न कुष्ठवृद्धिरत्रास्ति तत्कृते शमनं भवेत् । जीवेत्षष्टिमिताब्दान्तं रिष्टं चैव प्रशाम्यति ॥ ६ ॥
गतिस्तस्य महाभाग वेदाभ्यासाज्जपात्तथा । भविष्यति शुभा लोके परत्र च खगेश्वर ॥७॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरधिकचतुःशततमः ॥ ४०४ ॥

श्रीसूर्य उवाच ।

कुलद्वयानन्दकरी पूर्वजन्मनि वैश्यजा । बभूव भर्तृसुहृदा तदाज्ञापालनी सती ॥ १ ॥
अत्र जन्मनि सा विप्रा काश्यां जाता हि सुव्रत । व्रतदानपराऽत्रापि भर्तृतोषणसंयुता ॥ २ ॥
पञ्चपञ्चाशदब्दान्तं प्रवेक्ष्यत्यत्र जन्मनि । स्वर्गकामा चिताग्नौ तु नात्र कार्या विचारणा ॥ ३ ॥

सा गमिष्यति वै स्वर्गं चात्र जन्मनि वै नरः । भविष्यति महाराजकुले राजातिधार्मिकः ॥ ४ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाधिकचतुःशततमः ॥ ४०५ ॥

श्रीसूर्य उवाच ।

पीड्यते वातरोगेण दारुणेन पतत्रिण । योऽत्र तेन त्वाहृतश्चा पूर्वं शूद्रगृहाश्रितः ॥ १ ॥
प्रायश्चित्तं परं तस्य व्रतं चान्द्रायणं चरेत् । व्रतान्ते कपिलां दद्यात्सर्वपापापनुत्तये ॥ २ ॥
पापक्षये क्षयं याति रोगस्तत्पापजास्त्विह ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडधिकचतुःशततमः ॥ ४०६ ॥

श्रीसूर्य उवाच ।

स्वगर्भं पातयेत्पूर्वं या नारी पापमोहिता । जलोदरकृता पीडा तस्या अत्र प्रजायते ॥ १ ॥
रजतस्वर्णताम्राणां दानाद्रोगविनाशनम् । जलधेनुप्रदानेन तथैव विनतासुत ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सताधिकचतुःशततमः ॥ ४०७ ॥

श्रीसूर्य उवाच ।

अस्त्यत्र सुमुखी सूत सदा भर्तृपरायणा । दानधर्मरता भव्या सुभगा पुत्रवर्जिता ॥ १ ॥
पूर्वमासीच्च सुभगा सुगर्भाफललालसा । फलं पक्वं त्रोटितं वै भक्षार्थं चौरकर्मणा ॥ २ ॥
तेन कर्मविपाकेन फलहीनात्र जन्मनि । भवन्ति चैव ये पुत्रा अर्वाग्वर्षाष्टतोऽण्डज ॥ ३ ॥
पञ्चत्वमाप्नुवन्त्यत्र यस्माद्कृतनिष्कृतिः । निष्कृतिं तत्प्रवाक्ष्यामि पूर्वपापप्रणाशनीम् ॥ ४ ॥
शनिवारेऽण्डजश्रेष्ठ निबध्न्याश्वत्थकं सुत । तत्तले ब्राह्मणान्सूर्यदिने षष्ट्यां तु भोजयेत् ॥ ५ ॥
नानाफलैस्तथा पक्वैरपूपैरससंयुतैः । फलानि विकिरेत्तत्र कृत्वाऽश्वत्थप्रदक्षिणाम् ॥ ६ ॥
पूजयेत्तं महाभाग जीवेत्तस्याश्च वै सुतः ॥ ७ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाधिकचतुःशततमः ॥ ४०८ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि या काचिद्धातयेद्ब्राह्मणं सुत । सात्र जन्मनि कुष्ठेन तस्मिन्वयसि पीडिता ॥ १ ॥
जायते म्रियते सा च गलत्कुष्ठेन चाण्डज । पापाज्ज्ञानकृतात्पूर्वान्न चोक्तं विन्मयं मया ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवाधिकचतुःशततमः ॥ ४०९ ॥

श्रीसूर्य उवाच ।

देशे हि यामुने ह्यासीत्पूर्वं वाहुजवंशजः । गङ्गास्नानं कृतं पूर्वं वाहुजानां साहाय्यतः ॥ १ ॥
शकटेन कुटुम्बस्य पालनं कृतवांश्च सः । एकस्मिन्वै दिने गत्वा ददाह पनसद्रमान् ॥ २ ॥
वलाद्वैवस्य तत्रत्या जीवा दग्धा महाकुलाः । वन्ध्योः साहाय्यतस्तत्र कृतं कर्मातिदारुणम् ॥ ३ ॥
शुभाच्छुभफलं भुक्त्वा पापाच्च नरकांस्तथा । माघे तु जाह्नवीस्नानात्स जातः शूद्रजे कुले ॥ ४ ॥
विपाशानिकटे देशे योजने सप्तसंमिते । भव्यो महोद्यमी गौरः कृशाङ्गो लोचनेऽल्पदृक् ॥ ५ ॥
वहुलोभी वहुस्त्रीको देवतातिथिपूजकः । भ्रातृहीनो शठो धूर्तः पुत्रसंततिवर्जितः ॥ ६ ॥
पञ्चमे भवने राहुः भौमयुक्तोऽल्पसंततिः । लक्षणैर्लक्षितश्चोक्तैरवेहि गरुडाग्रज ॥ ७ ॥
वन्ध्योः साहाय्यतः पापात्पूर्वजन्मसमुद्भवात् । भ्रातृपुत्रविहीनोऽसौ जायतेऽत्रैव जन्मनि ॥ ८ ॥

अरुण उवाच ।

विन्मयं कथ्यतां देव सुतसौख्यविवर्धनम् । सर्वपापप्रशमनं लोकानां हितकारकम् ॥ ९ ॥

श्रीसूर्य उवाच ।

विन्मयं वै प्रवक्ष्यामि जन्तुदाहजकिल्विषे । वनदेवी तथा कार्या पलेनार्धपलेन वा ॥ १० ॥
हिरण्मयी तथा लेख्या पत्रे वै चतुरस्रके । वनजीवास्तथा लेख्याः सर्वे तद्रूपसंज्ञकाः ॥ ११ ॥
प्रजापतिस्तथा कार्यो माषत्रयविनिर्मितः । राजतं पलमानं तु गणाध्यक्षं शिवात्मजम् ॥ १२ ॥
संपूज्य गन्धपुष्पाद्यैः सा देया कार्यसाधिनी । तथा वेदविधिज्ञाय सर्वपापापनुत्तये ॥ १३ ॥
प्रजापतिस्तथा देयः सर्वकल्मषनाशकः । शृणुयाद्भारतं वापि पारायणसुभाषितम् ॥ १४ ॥
अष्टाक्षरं तथा मन्त्रं जपेच्च विधिपूर्वकम् । दशायुतं तदर्धं वा तदर्धं विनतासुत ॥ १५ ॥
होमयेत्तद्दशांशेन तद्दशांशेन भोजयेत् । तथामितं सूर्यमन्त्रं जपेत्प्रणवपूर्वकम् ॥ १६ ॥
विप्रेभ्यो दक्षिणां दद्यात्तस्मात्पापात्प्रमुच्यते । य एवं कुरुते सूत पूर्वपापप्रणाशनम् ॥ १७ ॥
तस्य पुत्रविवृद्धिः स्यादिह जन्मनि पुत्रक । अकृते तु यथाशक्त्या रिष्टं षट्पञ्चकेऽब्दके ॥ १८ ॥
प्रायश्चित्ते कृते सूत जीवनं वर्षसप्ततिम् । जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् ॥ १९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायो दशाधिकचतुःशततमः ॥ ४१० ॥

श्रीसूर्य उवाच ।

परान्नं या हरेन्नारी पूर्वजन्मनि सुव्रत । साऽत्राजीर्णेन रोगेण दुःखिता जायते ध्रुवम् ॥ १ ॥
कुर्यान्नानाविधं चान्नं रसैः सर्वैः समन्वितम् । विप्रेभ्यो भोजनं दद्याच्छक्त्या दद्याच्च दक्षिणाम् २
होमयेच्च तथा चान्नं गायत्र्या त्र्यम्बकेण तु । मुच्यतेऽजीर्णरोगाच्च पूर्वपापाच्च पुत्रक ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकादशाधिकचतुःशततमः ॥ ४११ ॥

श्रीसूर्य उवाच ।

देवमूर्तिं च यः कश्चिद्देवागारस्थितां सुत । भग्नां कुर्यान्नरो मोहात्परेण स्थापितां पुरा ॥ १ ॥
सोऽप्रतिष्ठो भवेदत्र जन्मन्यथ खगाधिप । वर्षत्रयं तदाऽश्वत्थपूजनात्पापनाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो द्वादशाधिकचतुशततमः ॥ ४१२ ॥

श्रीसूर्य उवाच ।

यश्चाचरेद्राजवधं मोहात्पूर्वभवे नरः । स राजयक्ष्मी विज्ञेयो घोरपापसमुद्भवात् ॥ १ ॥
प्रायश्चित्तं महाभागः शृणु चात्र प्रयत्नतः । गोभूहिरण्यमिष्टान्नतिलवस्त्रान्नदानतः ॥ २ ॥
घृतधेनुप्रदानेन क्षयं रोगं न पश्यति । दानं यथानुमानेन सर्वस्वार्धार्धमेव च ॥ ३ ॥
देयं द्विजवधादौ तु विचार्यात्र प्रयत्नतः । तत्क्षणे काश्यपेयात्र क्षयरोगः प्रशाम्यति ॥ ४ ॥
रिष्टेनैव विनाशः स्यात्तस्य चाऽकृतनिष्कृतेः ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोदशाधिकचतुःशततमः ॥ ४१३ ॥

श्रीसूर्य उवाच ।

या नारी पातयेत्काचित्परगर्भं पतत्रिण । जलोदरेण रोगेण पीड्यते सात्र जन्मनि ॥ १ ॥
गङ्गास्नानेन सततं विधिनार्कं मृगस्थिते । तथा तज्जलपातेन तस्मात्पापाद्विमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायश्चतुर्दशाधिकचतुःशततमः ॥ ४१४ ॥

श्रीसूर्य उवाच।

वाग्विरोधी च यो मर्त्यः पूर्वजन्मनि वादिनाम्। सोऽत्र जन्मनि मूकत्वं भजत्येव न संशयः ॥१॥
मोहादिदं चरेत्सूत देयं दानं द्विजातये। वेदानां पुस्तकं रम्यं पूजयित्वा विधानतः ॥ २ ॥
संछाद्य वन्धनैः शुद्धैः क्षौमैर्वा गरुडाग्रज। तत्पापनाशनं सर्वं प्राग्जं प्रोक्तं परंतप ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः पंचदशाधिकचतुःशततमः ॥ ४१५ ॥

श्रीसूर्य उवाच।

अत्र जन्मन्यसौ वन्ध्या प्राग्भवेऽभूत्सुतान्विता। अयोध्यायां तु सुमुखी धनभर्तृसमन्विता ॥ १॥
पूर्वपापप्रभावाच्च सपत्न्या गर्भपातजात्। जातेयं पादजात्रैव दुःखार्ता सुतवर्जिता ॥ २ ॥
प्रायश्चित्तं प्रवक्ष्यामि सर्वपापप्रणाशनम्। काश्यां गत्वा तु विधिना शिवमाराध्य यत्नतः ॥ ३॥
व्रतैर्दानैर्महापुण्यैर्नानाविभवविस्तरैः। शिवरात्रौ तथा पश्चाद्दीपमाल्यादिनेऽण्डज ॥ ४ ॥
अर्धरात्रे महानद्यां मध्ये स्नानं तु कारयेत्। मन्त्रैर्वरुणसूक्तैश्च नौकायां वा पतत्रिण ॥५॥
या ह्येवं कुरुते सूत तस्याः स्यात्संततिर्ध्रुवम् ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः षट्चत्वारिंशदधिकचतुःशततमः ॥ ४१६ ॥

श्रीसूर्य उवाच।

या काचित्प्राग्भवे नारी कुर्याद्राजवधं सुत। सात्र जन्मनि तत्काले क्षयरोगप्रपीडिता ॥ १ ॥
क्षयेणाऽत्र क्षयं यान्ति धातवः सर्वदेहिनाम्। धातुक्षये क्षयं याति तच्छरीरमशाश्वतम् ॥ २ ॥
दुष्टकर्मभवं पापं तस्मान्नोक्तोऽत्र विन्मयः। पापनाशकरः कश्चिदुपायस्त्वत्र जन्मनि ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तदशाधिकचतुःशततमः ॥ ४१७ ॥

श्रीसूर्य उवाच।

परनिन्दां तु यः कश्चित्प्राग्भवे कुरुते नरः। दद्यात्स कपिलां धेनुं सर्वोपस्करसंयुताम् ॥ १ ॥
ब्राह्मणाय दरिद्राय तस्माद्दोषात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोष्टादशाधिकचतुःशततमः ॥ ४१८ ॥

श्रीसूर्य उवाच।

या वाग्विरोधिनी नारी भर्तुः पूर्वे भवे सुत। मूकत्वं जायते तस्याश्चात्र जन्मनि निश्चितम् ॥१॥
तत्पापनाशनं दद्याद्वेदस्य पुस्तकं तथा। ब्राह्मणायैव विदुषे पूर्वपापात्प्रमुच्यते ॥ २ ॥
पूजयेच्च तिलान् भक्त्या भोजयेद्ब्राह्मणांस्तथा ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनविंशत्यधिकचतुःशततमः ॥ ४१९ ॥

श्रीसूर्य उवाच।

भग्नां कुर्याच्च या काचिन्नारी पूर्वभवेऽण्डज। प्रतिमां देवतागारे स्थापितामपरेण च ॥ १ ॥
प्रतिष्ठिता कदाचित्सा जायतेऽत्र न चाण्डज। वर्षत्रयं ब्रह्मवृक्षपूजनात्पापनाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो विंशत्यधिकचतुःशततमः ॥ ४२० ॥

श्रीसूर्य उवाच ।

कश्चिद्द्विजो महाभाग ह्यासीद्वङ्गे हि धार्मिकः । गयायां द्वादशे वर्षे कृतं श्राद्धं विधानतः ॥ १ ॥
विधिना तत्र दत्तानि काम्यश्राद्धानि मानद । ततो भाविवलात्सूत ब्राह्मणेन तपस्विना ॥ २ ॥
स्थापितं तद्गृहे द्रव्यं लोभाद्दत्तं न तद्धनम् । सर्वैर्मिलित्वा तद्भक्तं स्त्रीपुत्रभ्रातृभिः सह ॥ ३ ॥
ततो बहुतिथे काले गतो हि यमशासनम् । शुभात्स्वर्गफलं भुक्तं पापाच्च नरका भृशम् ॥४ ॥
पूर्वपुण्यप्रभावेण स जातोऽत्रापि वै द्विजः । मथुरामण्डले देशे रम्ये पुण्यस्थले शुभे ॥ ५ ॥
विशालाक्षो धनी मानी सुरूपोऽमितदो घृणी । बहुदेशाधिकाराढ्यः पुण्यात्सर्वं फलं त्विदम् ॥६॥
लोभी क्रूरो महाक्षुद्रः सदा चिन्तासमन्वितः । संतानसुखहीनस्तु सुरूपस्त्रीसुखोज्झितः ॥ ७ ॥
बन्धुहीनो व्ययक्षीणः सर्वं तत्पापजं फलम् । वक्ष्यामि निष्कृतिं तस्य पवित्रां पापशोधनीम् ॥८॥
कुबेरप्रतिमां रौक्मीं पञ्चस्वर्णमितां शुभाम् । तदर्धार्धमितां वापि त्रिषु वित्तानुसारतः ॥ ९ ॥
संपूज्य गन्धपुष्पाद्यैः सा देया ब्राह्मणाय च । लक्ष्मीनारायणं दद्यात्सौवर्णसंमितं शुभम् ॥१०॥
लेख्यां पवित्रामायुष्यां पुत्रसंततिवर्धनीम् । य एवं कुरुते भक्त्या तस्यारिष्टं न लिप्यते ॥ ११ ॥
प्रायश्चित्ते कृते त्वत्र चायुः सप्ततिवत्सरम् ॥ १२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकविंशत्यधिकचतुःशततमः ॥ ४२१ ॥

अरुण उवाच ।

भूमिदेवकुलोत्पन्नो वाताधिकशरीरवान् । क्षामाङ्गः क्षीणवर्णाभः स्वल्पवृत्तिः कृशोदरः ॥ १ ॥
देवब्राह्मणभक्तश्च किंचिद्वादपरायणः । करपादे कुशस्त्रेण दंष्ट्रिशृङ्गिविघातिना ॥ २ ॥
व्रणित्वं जायते शीघ्रं नेत्रतोदो विरश्मिता । परोक्षमपवादं च ब्रूते लोकेषु संततम् ॥ ३ ॥
प्रिया तस्य शुभाचारा पतिभक्तिपरायणा । अनृतं वदते किंचित्किंचित्क्लेशकरी सदा ॥ ४ ॥
अपत्यानि म्रियंतेऽत्र एकद्वित्रिमिताऽब्दकाः । वर्षत्रयमिता बाला म्रियन्ते मासमंमिताः ॥ ५ ॥
केन कर्मविपाकेन मृतापत्यत्वमण्डज । उदरे यः स्थितो गर्भो न प्रसूतिर्न पातनम् ॥ ६ ॥
तस्य जायेत यदि वा मृतापत्या प्रजायते । गतो बहुतरः कालः कस्येदं कर्मणः फलम् ॥ ७ ॥

श्रीसूर्य उवाच ।

अतः पूर्वं वैनतेय तृतीये चैव जन्मनि । क्षात्रे कुले समुत्पन्नः कश्चिद् भूमिपतिस्तथा ॥ ८ ॥
दानव्रतदयायुक्तः प्रियाप्रीतिसमन्वितः । तस्य प्रथमजातस्तु पुत्रः परमसुन्दरः ॥ ९ ॥
द्वितीयोऽपि च तादृक्षस्तृतीयश्च स्तनंधयः । गर्भयुक्तश्चतुर्थस्तु तदा मृत्युं गतः पिता ॥१०॥
क्रिया कृता च तैः पुत्रैर्वित्तेन सदृशा खग । मासैस्त्रिभिर्व्यतिक्रान्तैर्ज्जेष्ठेनैव दुरात्मना ॥ ११॥
विहता भ्रातरः सर्वे भाविनोऽर्थस्य वै बलात् । पुत्रदुःखेन वै मात्रा हृदयं ताडितं भृशम् ॥१२॥
अभिघाताच्छिलाभूता गर्भयुक्ता दिवं गता।स्वल्पे काले गते सोयं ज्येष्ठश्चौरेण घातितः ॥१३॥
इदं जन्म द्वितीयं तु मृतापत्यं प्रजायते । पुराकृतानि कर्माणि भुज्यन्ते चेह मानवैः ॥ १४॥

अरुण उवाच ।

प्रायश्चित्तं वद स्वामिन् येन पापक्षयो भवेत् । म्रियन्ते लघवश्चाथालघवः प्राणिनः कथम् ॥ १५॥
तत्पापस्य विशुद्ध्यर्थं निष्कृतिं वद मे प्रभो ॥ १६ ॥

श्रीसूर्य उवाच ।

सौम्यायने तु संप्राप्ते सानुकूलग्रहे दिने । सपत्नीकः शुचिः स्नातः पञ्चगव्येन चांजसा ॥१७॥
उपोषणांद्विवा रात्रौ प्रातश्चाऽनुदिते रवौ । सुरभेर्वै सगर्भाया गोमयेनोपलेपयेत् ॥ १८ ॥
सुशुभे भूप्रदेशे तु कुङ्कुमाद्युपचर्चिते । कुर्यादष्टदलं पद्मं चित्रवर्णं सुशोभनम् ॥ १९ ॥
तन्मध्ये रुक्मिणीयुक्तं माधवं कलशेऽर्चयेत् । सौवर्णे राजते पद्मे सायुधं वै चतुर्भुजम् ॥२० ॥
उपचारैः शुभैर्गन्धैर्धूपैश्च कुसुमादिभिः । जनन्या सह संभूतान्प्रद्युम्नाद्यांस्तथार्चयेत् ॥ २१ ॥
चारुदेहं सुवेषं च चारुगुप्तं यशोऽन्वितम् । इभबाहुं चारुबाहुं सुचारुं पूजयेत्क्रमात् ॥ २२ ॥
शतमष्टोत्तरं हुत्वा चरुणा पायसेन वै । होमान्ते विप्रभोजान्ते मन्त्रमेतमुदीरयेत् ॥ २३ ॥

मन्त्रः ।

"पापकर्म कृतं मौढ्याद्यन्मया पूर्वजन्मनि । सपत्नानां परेषां च पुत्राणां हननं कृतम् ॥२४॥
स्वकुलं चाऽपि हतवान्भूमिद्रव्यादिलिप्सया । लघूनामलघूनां च हंता वै पूर्वजन्मनि ॥ २५ ॥
ततोऽघं च मया प्राप्तं दुःखं नानाविधं त्विदम् । तत्तदेनोविनाशाय दानं संप्रददे त्विदम् " २६
स्वस्त्यस्त्विति च तत्रोक्त्वा कोऽदादिति विसर्जनशूासर्पिष्यात्मानमालोक्य भोजयेद्दिष्टवान्धवान्
ऐहिकं लक्ष्म विज्ञेयं पूर्वकर्माभिशंसनम् । काष्ठलोष्ठकुशस्त्राद्यैर्घातः स्याद्व्रालकुट्टनात् ॥ २८ ॥
जलादग्न्यादिना वाधा व्रणवानत्र जायते । स्त्रियोऽङ्गे विकृतिर्व्याधौ मुखे व्रणतिलादिकम्॥२९॥
पैत्रजो मातुलानीनां नेत्रे तोदो विरश्मिता । स्वसुर्मातृष्वसुश्चाऽपि वाल्ये वैधव्यमेव च ॥३०॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायो द्वाविंशत्यधिकचतुःशततमः ॥ ४२२ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे मोहात्परानिन्दां चकार वै । खल्वाटरुग्युता सात्र जायते सूत जन्मनि ॥ १॥
धेनुं दद्यान्महाभाग विधियुक्तां सकम्बलाम् । तस्माद्रोगाद्विमुच्येत नात्र कार्या विचारणा ॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोविंशत्यधिकचतुःशततमः ॥ ४२३ ॥

श्रीसूर्य उवाच ।

अभक्ष्यं भक्षयेद्यस्तु पूर्वजन्मनि मानवः । गण्डमालाख्यरोगेण संयुक्तो जायते सुत ॥ १ ॥
पुण्यदेशे महाभाग संक्रान्त्यादिषु पर्वसु । गृहीत्वा कम्बलं दिव्यं नवं तद्वेदपाठिने ॥ २ ॥
कुटुम्बिने दरिद्राय दद्यादोषापनुत्तये । गण्डमालाहरं चैतद्दानमुक्तं मया त्विह ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्विंशत्यधिकचतुःशततमः ॥ ४२४ ॥

श्रीसूर्य उवाच ।

कुलस्त्रीयं महादुष्टा पूर्वमासीत्पतिव्रिप । अत्र पूर्वकृतात्पुण्यान्मानुषी संकरा तथा ॥ १ ॥
धनपुत्रविहीना सा चात्र जन्मनि दृश्यते । निष्कृतिं तत्प्रवक्ष्यामि प्रयागे मरणात्सुत ॥ २ ॥
वासात्पापं क्षयं याति पूर्वजन्मकृतं दृढम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचविंशत्यधिकचतुःशततमः ॥ ४२५ ॥

श्रीसूर्य उवाच ।

अभक्ष्यं भक्षयेत्पूर्वं या नारी द्विजवल्लभा । गण्डमालाख्यरोगेण संयुक्ता जायतेऽधुना ॥ १ ॥

पुण्यदेशे महाभाग संक्रान्त्यादिषु पर्वसु । पूर्वपापहरं पुण्यं दद्यादत्र च कम्बलम् ॥ २ ॥
नवं शुद्धं कुलीनाय तस्मात्पापात्प्रमुच्यते । द्विजानामिच्छया दद्याद्भोजनं पापनाशनम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षड्विंशत्यधिकचतुःशततमः ॥ ४२६ ॥

श्रीसूर्य उवाच ।

यो ब्राह्मणं न्यहन्सूत ब्राह्मणार्थे खगाधिप । वङ्गदेशे वसन्पूर्वं सोऽत्रः जन्मनि गौडजः ॥ १ ॥
धीरः सर्वकलाभिज्ञो नानाशास्त्रविशारदः । धनधान्यरतश्चात्र बहुस्त्रीभोगसौख्यभाक् ॥ २ ॥
विद्यादानात्कृतात्पूर्वं शृणु पापफलं तथा । क्षयरोगाकुलः क्षीणः पुत्रसंततिवर्जितः ॥ ३ ॥
बालस्य हननात्पापाद्ब्राह्मणस्य पतत्रिप । महाक्रोधपरो लोभी नानादुःखैस्तथाकुलः ॥ ४ ॥
वक्ष्यामि निष्कृतिं तस्य ब्रह्मघातविमोचनीम् । प्रयागे वा कुरुक्षेत्रे पुष्करे वा महाकुले ॥ ५ ॥
नैमिषारण्यके क्षेत्रे पूजयेद्विधिवच्छिवाम् । गन्धैः पुष्पैस्तथा धूपैर्लक्षसंख्यैर्विधानतः ॥ ६ ॥
ब्रह्मचर्यरतो नित्यं तदन्ते होमयेत्तथा । षडस्रे चतुरस्रे वा कुण्डे चाज्यतिलान्छुभान् ॥ ७ ॥
शक्त्या च भोजयेद्विप्राञ्शैवान्कांसारलड्डुकैः । नानाभक्ष्यैः फलैश्चैव वस्त्रैर्माल्यैस्तथार्चयेत् ॥ ८ ॥
विविधां दक्षिणां दद्याद्रुद्रप्रीतिकरां तथा । यश्चानेन विधानेन प्रायश्चित्तं समाचरेत् ॥ ९ ॥
स बालघातजात्पापान्मुच्यतेऽत्र ममाज्ञया । चतुर्दश्यामथाष्टम्यां नक्तं कुर्याद्विधानतः ॥ १० ॥
मम ध्यानपरः सूत नित्यं भूत्वा समाचरेत् । पूजयेदर्घ्यपाद्याद्यैर्नैवेद्यैर्विविधैस्तथा ॥ ११ ॥
तं च तत्सर्वपापेभ्यो विमोक्ष्यामि खगेश्वर । आयुर्वर्षशतं प्रोक्तं पञ्चहीनं च पुत्रक ॥ १२ ॥
प्रायश्चित्ते कृते सूत विन्मये त्वकृते तथा । पञ्चम्यां चन्द्रवारे च चत्वारिंशन्मिताब्दके ॥ १३ ॥
रिष्टं स्यात्क्षयरोगेण बालघाताच्च निश्चितम् । ब्रह्मघातान्महापापात्पूर्वजन्मकृताद्धठात् ॥ १४ ॥
न मुच्यते महादानैः सप्तजन्मकृतैरपि । बाध्यते क्षयरोगेण सप्तजन्मनि निश्चयात् ॥ १५ ॥
ब्रह्महा क्षयरोगी स्यादिति वेदविदो विदुः । नहीदृशं महापुण्यं क्षयरोगविनाशनम् ॥ १६ ॥
पुत्रवृद्धिकरं चात्र यथा प्रोक्तं शिवार्चनम् ॥ १७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायःसप्तविंशत्यधिकचतुःशततमः ॥ ४२७ ॥

श्रीसूर्य उवाच ।

विनापराधं या नारी परपक्षं च घातयेत् । पक्षघातेन रोगेण पीडितात्रैव जन्मनि ॥ १ ॥
तया निष्कमितं स्वर्णं देयं पापविशुद्धये । मुच्यतेऽत्र महारोगात्पक्षघातान्न संशयः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाविंशत्यधिकचतुःशततमः ॥ ४२८ ॥

श्रीसूर्य उवाच ।

यो द्विजः प्राग्भवे सूत सुरां वै त्रिविधां पिबेत् । मूत्रकृच्छ्रेण रोगेण पीडितः सोऽत्र जायते ॥ १ ॥
गृहवित्तानुसारेण पलेनार्धपलेन वा । कुर्याद्धिरण्मयं पद्मं चाष्टपत्रसमन्वितम् ॥ २ ॥
आवाह्य तत्र ब्रह्माणं प्रभुं सर्वोपचारकैः । पूजयित्वा तु गन्धाद्यैर्दद्याद्विप्राय यत्नतः ॥ ३ ॥
दानेनानेन सततं मूत्रकृच्छ्रं न पश्यति ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकोनत्रिंशदधिकचतुःशततमः ॥ ४२९ ॥

श्रीसूर्य उवाच ।

वैकुण्ठादागतस्तत्र मथुरायां पतत्रिप । जातोऽयं पुण्डरीकाक्षः सर्वभूताभयप्रदः ॥ १ ॥
घोरे कलियुगे प्राप्ते पापाक्रान्ते महीतले । भारावतारणार्थाय क्षत्रियाणां वधाय च ॥२॥
कृत्वा तु दुष्करं कर्म पुनर्यास्यति वै दिवि ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिंशदधिकचतुःशततमः ॥ ४३० ॥

श्रीसूर्य उवाच ।

स्वर्णापहारी सततं पुरुषः प्राग्भवेऽण्डज । कुनखी जायते चात्र महापापेन लाञ्छितः ॥ १ ॥
सुवर्णशतकं दद्यात्स तदोषविनाशनम् । चान्द्रायणत्रयं कुर्याद्वातदोषोपशान्तये ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकत्रिंशदधिकचतुःशततमः ॥ ४३१ ॥

श्रीसूर्य उवाच ।

राजघातकरी प्रोक्ता या पूर्वं घातयेन्नृपम् । राजयक्ष्मान्विता सात्र तस्मिन्व्रयसि भामिनी ॥ १॥
प्रायश्चित्तं परं तस्याः शृणुष्वाथ खगेश्वर । यत्कृते विधिना सर्वं पूर्वजन्माघनाशनम् ॥ २ ॥
स्वर्णगोभूमिमिष्टान्नघृतधेनुतिलानि च । देयानि श्रद्धया सूत क्षयरोगापनुत्तये ॥ ३ ॥
रिष्टं त्रिंशन्मितेऽब्दे तु प्रायश्चित्ते कृते किल ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वात्रिंशदधिकचतुःशततमः ॥ ४३२ ॥

श्रीसूर्य उवाच ।

अनागसं तु यः कश्चिद्वैश्यं हन्यात्पतत्रिप । प्राग्जन्मन्यथ युक्तः स्याद्रक्तार्बुदरुजा भृशम् ॥१॥
भविष्यति न संदेहस्तस्य मृत्युः खगाधिप । अपि दानशतैर्वापि दत्तैरत्रैव जन्मनि ॥ २ ॥
त्रिंशद्वर्षे महारिष्टं रक्ताधिक्यान्महाबलात् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयस्त्रिंशदधिकचतुःशततमः ॥ ४३३ ॥

श्रीसूर्य उवाच ।

मेरोः समागता येये प्राप्ता भारतमण्डले । सर्वभूतोपकाराय दुष्टनाशकराय च ॥ १ ॥
प्राप्ते कलियुगेऽत्रैव पापेन रहितानि च । कृत्वा चाद्भुतकर्माणि यास्यंत्येव पुनस्ततः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुस्त्रिंशदधिकचतुःशततमः ॥ ४३४ ॥

श्रीसूर्य उवाच ।

यो मोहाद्घातयेद्वैश्यमन्यजन्मनि मानवः । सोऽत्र जन्मनि विज्ञेयो रक्तार्बुदसमन्वितः ॥ १ ॥
प्राजापत्यचतुष्केण व्रतेन नियमेन च । सप्तधान्यप्रदानेन पूर्वजन्माघनाशनम् ॥ २ ॥
पापक्षये क्षयं यायाद्रुजा पापसमुद्भवा ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचत्रिंशदधिकचतुःशततमः ॥ ४३५ ॥

श्रीसूर्य उवाच ।

या काचिद्ब्राह्मणी पूर्वभवे मोहात्सुरां पिबेत् । सात्र जन्मनि सूत्रेण कृच्छ्रेणातिप्रपीडिता ॥१॥
प्रायश्चित्तं परं तस्या घोरपापहरं सुत । सुवर्णपद्मं पक्षीन्द्र सत्पत्रं ब्रह्मदैवतम् ॥ २ ॥
ब्राह्मणाय विधिज्ञाय पूजिताय प्रकल्पयेत् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्त्रिंशदधिकचतुःशततमः ॥ ४३६ ॥

अरुण उवाच ।

कश्चिद्विप्रोत्तमो जातः किंचिद्वित्तसमन्वितः । कासश्वासादिना बाधा उदरार्तिः प्रजायते ॥ १
क्रयविक्रयकर्ता च कृषिवाणिज्यशासनः । प्रिया प्रीतिपरा नित्यं व्रतदानपरायणा ॥ २
समावेशेन क्रोधस्य स्ववाक्यप्रतिपादिनी । उदरे वातजा रोगाः शिरोर्तिर्नेत्रतोदजा ॥ ३
अपत्यानि म्रियन्ते च द्वित्रैर्वर्षैः खगाऽधिप । रजोऽर्त्या वै प्रपीडयेत वेदना विविधा तथा ॥ ४
केन कर्मविपाकेन सत्यं कथय भास्कर ॥ ५ ॥

श्रीसूर्य उवाच ।

भर्त्रा कर्म कृतं नैव, स्त्रीकृतं नात्र संशयः । पूर्वजन्मनि शूद्री सा द्विजभक्तिपरायणा ॥ ६
व्रतानि विविधान्येव कृतानि भुवि मानद । स्वगृहे धान्यराशीनां भक्षणादक्षतत्परा ॥ ७ ।
ब्राह्मणस्य सवत्साः गौर्धान्यभक्षणतत्परा । तया गृहीत्वा लकुटं भृशं कुक्षौ प्रताडिता ॥ ८ ।
सगर्भा सुरभी तस्या गर्भकुक्ष्युपघातनात् । मृतो वै गर्भमध्यस्थः प्रसवो दुःखिता भृशम् ॥ ९ ।
शिशुदुःखेन सुरभी भृशमाक्रन्दती मृता । तेन कर्मविपाकेन नरकं प्राप्य दारुणम् ॥ १० ।
पश्चान्मानुषमापन्ना व्रतदानप्रभावतः । इदं जन्म तृतीयं तु मृतापत्यं खगेश्वर ॥ ११ ।
सप्तजन्म प्रजायेत गोस्त्रीब्रह्मप्रघातकः । नानाप्राक्कर्मणां पाको नानापत्यार्थदुःखकृत् ॥ १२ ।

अरुण उवाच ।

प्रायश्चित्तं वदाऽपत्यं येन जीवेद्दिवाकर । अनुग्राह्योऽस्म्यहं देव लोकानां हितकाम्यया ॥ १३ ॥

श्रीसूर्य उवाच ।

मासे नभसि संप्राप्ते सानुकूलग्रहेऽहनि । सपत्नीकः शुचिः स्नात औषधैः स्नानमन्त्रतः ॥ १४ ॥
उपोषणं दिवा रात्रौ त्रयोदश्यादितश्चरेत् । पौर्णमास्यां दिनं प्राप्य प्रातरभ्युदिते रवौ ॥ १५ ।
सुरभ्यास्तु सगर्भाया गोमयेनोपलेपयेत् । तत्रोपरि गवां स्थानं चोदङ्मुखं समासनम् ॥ १६ ।
अर्हणाद्युपहारैश्च कुङ्कुमाद्युपचर्चयेत् । कुर्यादष्टदलं पद्मं चित्रवर्णं सुशोभनम् ॥ १७ ।
तत्रोपरि न्यसेद्देवं माधवं कलशेऽर्चयेत् । सौवर्णे राजते पद्मे सायुधं च चतुर्भुजम् ॥ १८ ।
उपचारैः शुभैर्गन्धैर्धूपैश्च कुसुमादिभिः । विष्णुसूक्तेन सूक्तेन श्रीसूक्तेन च पूजनम् ॥ १९ ।
पुष्पैश्च धूपगन्धाद्यैरर्चयेत्त्रिविधैर्गुणैः । रुद्रैकादशिनीभिश्च जपेद्रुद्रं विधानतः ॥ २० ।
पूजालक्ष्म त्विदं पुष्पैरर्चयेद्गन्धवारिभिः । शतमष्टोत्तरं हुत्वा चरुणा पायसेन वा ॥ २१ ।
रुद्रस्यायुतहोमश्च समध्वाज्यसमाहुतिः । एवं पृथग्विधानेन विष्णुरुद्रादिपूजनम् ।
होमान्ते विप्रभोजान्ते मन्त्रमेतमुदीरयेत् ॥ २२ ॥

मंत्रः ।

" यन्मया कर्मवशतः कृतं पापं दुरात्मना । सगर्भायाश्च गोः पूर्वं लकुट्या कुक्षिताडनात् ॥ २३ ॥
तत्कर्मवशसंप्राप्तमृतगाभ्यार्दितो भृशम् । मृतसंततिदुःखानि प्राप्तानि महदेनसः ॥
तत्तदेनोविनाशार्थं दानं संप्रददे त्विदम् " ॥ २४ ॥
स्वस्त्यस्तु चेति तत्रोक्ता कोऽदादिति विसर्जनम् ॥ २५ ॥
सर्पिष्यात्मानमालोक्य पश्चाद्वै तोषयेद्द्विजान् । भूमिद्रविणवासांसि दानं दत्त्वा विधानतः ॥ २६ ॥
व्रतान्ते सुरभीं दद्याद्धैमीं द्रव्यादिशक्तितः । अहःशेषं ततः सर्वं भोजयेदिष्टवान्धवान् ॥ २७ ।
एतद्व्रतं लक्षणं तस्य शरीरेऽप्युपजायते । काष्ठलोष्टकुशस्त्राद्यैर्घातः स्यादुपलेखनात् ॥ २८ ।

श्रृङ्गाणां चोपघातश्च जायन्ते ब्रह्मजातयः । जलाकुलत्वं स्पर्शोग्नेस्तादृशी तत्र वेदना ॥ २९ ॥
स्त्रियोऽङ्गे विकृतिर्व्याधौ मुखे व्रणतिलादिकम् । पैतृजा मातुलानीनां वैधव्यार्तिः सदातनी॥ ३० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्रिंशदधिकचतुःशततमः ॥ ४३७ ॥

श्रीसूर्य उवाच ।

या काचिद्ब्राह्मणी पूर्वभवे मोहात्सुरां पिबेत् । प्रदरेणातिदुःखेन सात्र जन्मनि पीडिता ॥ १ ॥
प्रायश्चित्तं परं तस्याः प्रदरस्य तु नाशनम् । दद्याद्रुक्ममयं पद्मं सपत्रं ब्रह्मदैवतम् ॥ २ ॥
ब्राह्मणाय सुशीलाय पूजिताय शुभे दिने ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टत्रिंशदधिकचतुःशततमः ॥ ४३८ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि यो विप्रस्त्रिविधां तु सुरां पिबेत् । मूत्रावरोधरोगेण सोऽत्र मृत्युवशं व्रियात् ॥ १ ॥
चिह्नेन श्यावदन्तेन लक्षितः पापजः सदा । सप्तजन्मनि रोगेण मूत्रकृच्छ्रेण नश्यति ॥ २ ॥
दृढात्पापात्सुत प्रायश्चित्तं न विद्यते । पापक्षयावशेषे च कृच्छ्रं सान्तपनं चरेत् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽअ० एकोनचत्वारिंशदधिकचतुःशततमः ॥ ४३९ ॥

श्रीसूर्य उवाच ।

अकामतश्च या नारी वैश्यघातनतत्परा । बभूव प्राक्तु पक्षीन्द्र सात्र जन्मनि निश्चयात् ॥ १ ॥
रक्तार्बुदसमाक्रान्ता दुष्टपापप्रयोजिता । महारिष्टेन सा याति यमलोकं पतत्रिण ॥ २ ॥
चत्वारिंशन्मिते वर्षे सत्यं सत्यं वदाम्यहम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चत्वारिंशदधिकचतुःशततमः ॥ ४४० ॥

श्रीसूर्य उवाच ।

काचित्पूर्वभवे पुण्या मुखजात्र च बाहुजा । देशे सारस्वते प्राप्ता सर्वधर्मान्विता सती ॥ १ ॥
क्षयरोगयुता चात्र युवभावे पतत्रिण । प्राक्पापाद्दुस्तरात्सूत कण्ठपाशादिसंभवात् ॥ २ ॥
निष्कृतिं कदलीं दद्यात्सुवर्णत्रयसंयुताम् । भोजयेद्ब्राह्मणान्पश्चाच्छिवपूजनतत्पराम् ॥ ३ ॥
या त्वेवं कुरुते भक्त्या कदलीदानमुत्तमम् । नश्येत्क्षयरुजा तस्या अपि प्राणप्रणाशनीम् ॥ ४ ॥
आयुरब्दास्तु षडयुक्ताश्चाऽत्र सप्ततिसंख्यकाः ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकचत्वारिंशदधिकचतुःशततमः ॥ ४४१ ॥

श्रीसूर्य उवाच ।

यो नरोऽतिबलोत्कर्षात्परस्त्रीः कामयेत्पुरा । अधुना यौवने प्राप्ते सोन्मादी जायते भृशम् ॥ १ ॥
दद्यात्प्रजापतिं देवं सौवर्णं शक्तितोऽण्डज । मृगं स्वर्णमयं तद्वत्पूजयित्वा विधानतः ॥ २ ॥
भोजयेद्ब्राह्मणाञ्शक्त्या होमयेच्च जपेत्तथा । गायत्रीं विधिना सूत सोन्मादान्मुच्यतेऽधुना ॥३॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विचत्वारिंशदधिकचतुःशततमः ॥ ४४२ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे सूत परद्रव्यापहारिणी । सात्र जन्मनि रोगेण कुनखत्वेन बाध्यते ॥ १ ॥

दद्यात्सुवर्णशतकं विप्राय विनतात्मज । सुवर्णस्तेयपापेन मुच्यतेऽत्रैव जन्मनि ॥ २
चान्द्रायणत्रयं चैव कुर्यान्मासे तु कार्तिके ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिचत्वारिंशदधिकचतुःशततमः ॥ ४४३ ॥

श्रीसूर्य उवाच ।

वश्यहंत्री भवेत्पूर्वभवे नारी पतिव्रता । रक्तार्बुदेन रोगेण बाध्यते चात्र जन्मनि ॥ १
व्रतं चरेन्महाभाग प्राजापत्यचतुष्टयम् । सप्तधान्यस्य दानेन रक्तार्बुदविनाशनम् ॥ २
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुश्चत्वारिंशदधिकशततमः ॥ ४४४ ॥

श्रीसूर्य उवाच ।

गौप्यहारी च पुरुषश्चित्रकुष्ठी प्रजायते । स तत्पापविशुद्ध्यर्थं ब्राह्मणाय प्रदापयेत् ॥ १
स्वर्णं पलत्रयं शुद्धं कुरुक्षेत्रे पतत्रिण । प्राजापत्यं चरेत्सूत सर्वपापप्रणाशनम् ॥ २
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचचत्वारिंशदधिकचतुःशततमः ॥ ४४५ ॥

श्रीसूर्य उवाच ।

कश्चिन्म्लेच्छकुलोत्पन्नो बहुद्रव्यान्वितः सुधीः । स्वधर्मनिरतश्चापि दयालुः सत्यसंयुतः ॥ १
प्रजाः पालयतस्तस्य शूरस्यापि महात्मनः । दुष्टाः प्रजाः क्रोधयुक्ता बभूवुर्विमुखास्तदा ॥ २
तस्मिन्काले ह्यभूद्युद्धं घोरं तस्मिन्पुरे सुत । संग्रामभूमौ स मृतो यवनश्च सपुत्रकः ॥ ३
तस्य पत्नी महाभाग साध्वी पतिपरायणा । तस्मिन्मृते मृता सा तु भर्तृप्राणावलम्बिनी ॥ ४
घातयित्वा तु शस्त्रेण स्वशरीरं पतिव्रता । मृते पत्यौ न जीवामीत्युक्त्वा स्मृतवती तथा ॥ ५
तद्दुष्णेनान्तकालेऽपि दिवि प्राप्ता सभर्तृका । भुक्त्वा तत्र महाभोगानपूर्वान्स्वामिधर्मतः ॥ ६
नानाप्रजाघातनजात्पापात्पूर्वसमुद्भवात् । क्षीणात्पुण्यात्तथा सूत म्लेच्छदेशे समुद्भवः ॥ ७
सिन्धोः पश्चिमभागे तु शतयोजनसंमिते । गौरः सुरूपो दीर्घश्च बहुविद्याविशारदः ॥ ८
नानाभोगसुखैर्युक्तो गजयूथैः समावृतः । पत्त्यश्वरथसंकीर्णस्तथा भैरवशासनः ॥ ९
महोग्रः पुत्रपौत्राढ्यश्चाद्यन्तसुखसंयुतः । देशेदेशेऽधिकाराढ्यः स म्लेच्छः पृथिवीपतिः ॥१०
स्त्रीसाहाय्यान्महाभाग तथा पुत्रसहायतः । सुखैश्वर्ययुता सापि युवती तद्वशादिह ॥ ११
स पुत्रः प्राक् सहायाच्च सोऽप्यत्रैव महाप्रभुः । एवं जन्मफलं प्रोक्तं ससहायं पतत्रिण ॥ १२
स्वामिधर्मकृतात्पुण्यात्तदर्थं मरणात्तथा । भविष्यति गतिस्तेषां पूर्वपुण्यात्पतत्रिण ॥ १३
पञ्चाशीतिमितायुः स्यान्न च रिष्टं न तन्मृतिः । रिष्टं पञ्चाशदब्दे तु स्वदेहान्तसमं सुत॥ १४
शस्त्रप्रहारैर्विविधैः प्राप्ते त्वत्र रणांगणे । प्रजापीडनजात्पापात्तद्वर्षं नात्र संशयः ॥ १५
दद्यात्कालनरं तत्र ब्राह्मणाय कुटुम्बिने । देयं हिरण्मयं तद्वद्व्रतं शतपलात्मकम् ॥ १६
कुरुक्षेत्रादितीर्थेषु संक्रान्त्यादिषु पर्वसु । सर्वोपस्करसंयुक्तं देयमेतच्च पुत्रक ॥ १७
महारिष्टहरं प्रोक्तं प्रायश्चित्तं परं खग । नातः परतरं प्रोक्तं दानं कालनरात्क्वचित् ॥ १८
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्चत्वारिंशदधिकचतुःशततमः ॥ ४४६ ॥

श्रीसूर्य उवाच ।

या काचिद्यौवने नारी रमते स्वेच्छया परे । बलात्कारेण पुरुषे सात्रोन्मादेन पीडिता ॥ १
तत्पापनाशनं सर्वमुपायं शृणु यत्नतः । कृत्वा सुवर्णजं वायुं मृगं हैमं च वाहनम् ॥ २

सर्वोपस्करसंयुक्तं दद्याद्विप्राय धीमते । न प्राप्नोति तदौन्मत्त्यं दानेन विनतासुत ॥ ३ ॥
दद्यात्तत्पापनाशाय विप्राय पुत्रिणेऽण्डज । पलानां त्रिशतं शुद्धं तस्माद्रोगाद्विमुच्यते ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तचत्वारिंशदधिकचतुःशततमः ॥ ४४७ ॥

श्रीसूर्य उवाच ।

पत्यौ पुत्रे विद्यमाने जाराद्गर्भो धृतः पुरा । सा चात्र पादजा दुष्टा न च गर्भं दधाति वै ॥ १ ॥
काश्यां वासान्महाभाग श्रद्धया रुद्रपूजनात् । कन्याविवाहात्सततं दरिद्रद्विजपालनात् ॥ २ ॥
धारयिष्यति सा गर्भं प्रायश्चित्ताद्यथोदितात् । प्रायश्चित्ते कृते रिष्टं चत्वारिंशन्मितेऽब्दके ॥ ३ ॥
प्रायश्चित्ते कृतेऽब्दानां षडशीतिं च जीवनम् ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टचत्वारिंशदधिकचतुःशततमः ॥ ४४८ ॥

श्रीसूर्य उवाच ।

आखेटकं विना यस्तु हस्तिनं घातयेत्पुरा । सोऽत्र जन्मनि जायेत सर्वकार्येष्वसिद्धिकृत् ॥ १ ॥
तस्मिन्नेव तथा काले तस्य रिष्टं प्रकीर्तितम् । विंशन्मितेऽब्दे पक्षीन्द्र कालशस्त्रान्मृतिर्भवेत् ॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनपंचाशदधिकचतुःशततमः ॥ ४४९ ॥

श्रीसूर्य उवाच ।

यः कश्चिद्ब्राह्मणीं सूत बलोत्कर्षेण मन्दधीः । रमयेत्प्राग्भवे सोऽत्र मदोन्मादी प्रजायते ॥ १ ॥
पापादसाध्याद्रोगाद्वै प्रमुक्तिर्नैव जायते । म्रियते रिष्टयोगेन सोन्मादी चात्र जन्मनि ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाशदधिकचतुःशततमः ॥ ४५० ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि या नारी हरेर्लोभान्महत्रपु । साऽत्र जन्मनि पक्षीन्द्र श्लेष्मरुक्संयुता भवेत् ॥ १ ॥
शतत्रयपलं दद्यात्रपु तत्पापशुद्धये । कृते तस्मिन्नुपाये तु श्लेष्मरोगस्य नाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकपंचाशदधिकचतुःशततमः ॥ ४५१ ॥

श्रीसूर्य उवाच ।

विप्रवंशे समुत्पन्नः शक्तिमान्धर्मपारगः । धनधान्यसमायुक्तो दयालुश्चार्जनान्वितः ॥ १ ॥
सुव्रतः शक्तिमान्वीरः किंचिद्व्याधिसमन्वितः । इन्द्रियाणां बलं हत्वा मोहो वै जायते भृशम् ॥२॥
उदरार्तिरसृग्वातः किंचिद्देहे प्रवर्तते । तस्य प्रिया शुभाचारा पतिभक्तिपरायणा ॥ ३ ॥
सत्यवाक् सत्यसंकल्पा व्रताढ्या धनसंयुता । बहुपुत्रप्रसूताऽपि किंचित्पुत्रा प्रजायते ॥ ४ ॥
अथवा मृतपुत्रा च पुत्रीषु जीवितास्वपि । केन कर्मविपाकेन सत्यं वद दिवस्पते ॥ ५ ॥
पूर्वजन्मनि विप्रस्तु संजातः पञ्चमादिह । तस्य गेहे प्रवृत्तं तु कन्यायाः प्रौढ्यमण्डज ॥ ६ ॥
भूरिद्रविणलोभेन वृद्धविप्राय दापिता । तद्वृत्तदाहृतं वित्तं सर्वस्वं तद्वशादपि ॥ ७ ॥
यावत्कन्याऽभवत्प्रौढा वरार्थं गुणशालिनी । पतिभक्तिपरा नित्यं यावत्कन्यासुतार्थिनी ॥ ८ ॥
किंचित्काले गते तस्याः पतिर्मृत्युवशंगतः । सा बाला विधवा जाता पत्यपत्यार्थदुःखिनी ॥९॥

---

१ धारेत्यारभ्य जीवनेतिपर्यन्तः पाठः खपु० नास्ति । २ अयं ग्रन्थः खपु० नास्ति । ३ कृते त्वुपाये तस्मिँस्तु इति स्यात् ।

व्रततीर्थरता नित्यं सत्यधर्मपरायणा । बहुवर्षैस्तया वत्स नियमैः शोषितं वपुः ॥ १०
पितुर्गृहे धनं भूरि त्वर्पितं स्नेहकारणात् । किंचित्कालवशात्प्राप्ता मृतिं सा ब्राह्मणी खग ॥ ११
तां पुत्रीं हृदये कृत्वा सोऽगमज्जन्मजन्मनि । कन्या बहुविधास्तस्य निराधारा मताः किल ॥ १२
तेन कर्मप्रभावेन पूर्वकन्या बहुप्रजा । सा तु भर्तृभवं गर्भं दधौ मृत्युं प्रतीक्षती ॥ १३
पुनर्जन्म पुनर्मृत्युस्तत्कर्मनिष्कृतिं विना । कन्याविक्रयकर्ता च रौरवे नरके मृतः ॥ १४
यातना बहुधा भुक्त्वा वर्षाणां च सहस्रकम् । पश्चान्मानुषमापन्नो व्रतदानप्रभावतः ॥ १५
इदं जन्म चतुर्थं तु पुत्रीवानत्र जायते । मृतः पुत्रो मृतो गर्भस्तेन गर्भभवादिह ॥ १६
भार्या तस्यापि विप्रस्य पूर्वजन्मनि मानद । भर्तृविद्वेषिणी नित्यं चिरापत्यानुगामिनी ॥ १७
तेन कर्मविपाकेन कन्या भूरि मृतः सुतः ॥ १८ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं देव येन पापोपशाम्यति । निष्कृतिं वद विश्वात्मन् पृथक्केन प्रकाशय ॥ १९

श्रीसूर्य उवाच ।

पुत्रिका यस्य जीवन्ति पुत्राणां नाशनं भवेत् । कर्मभेदेन येनेह शृणु त्वं कश्यपात्मज ॥ २०
स्वकन्यां वरयोग्यां सा चिन्तयन्तीमनागसम् । दशाब्दिकां च मानेन यथाभावं यथामति ॥ २१
कन्यां रूपवतीं शान्तां समस्तगुणशालिनीम् । अलंकृतां यथाशक्ति वराय गुणशालिने ॥ २२
ब्रह्मणे विधिना सूत दद्याच्च बहुदक्षिणाम् । महापापौघशमनं कन्यादानमतन्द्रिता ॥ २३
कन्याविवाहसमये महाशान्तिर्विधिं चरेत् । एवं कृतविधिः सूत कन्यां दत्त्वा विधानतः ॥ २४
शान्तिकर्माणि सर्वत्र विस्तीर्य ऋत्विजादयः । भूमिद्रविणवासांसि कन्यावासांसि दापयेत् ॥ २५
गृहदानं ततोः दद्याद्यथोपस्करसंयुतम् । वर्षेवर्षे तु संपूर्णे अन्नवस्त्रैश्च पोषयेत् ॥ २६
एवं कृतविधिः सूत बहुपुत्रा यशस्विनी । पापं पुत्रविनाशाख्यं कन्यापत्योदयश्च यत् ॥ २७
तस्य पापस्य नाशार्थं कन्यादानादयः स्मृताः । नाशयेच्चैव तत्पापं द्विजानां विधिपूजनात् ॥ २८
यजनाच्च विधानेन ब्राह्मणैः स्वस्तिवाचनात् । विनायकाम्बिकामूर्तीं हेमनिष्कप्रमाणतः ॥ २९
आचार्याय ददेत्सूत नानाकर्मोघशान्तये । ऐहिकं लक्षणं तस्य शरीरे चोपजायते ॥ ३०
जिह्वाहृदयदन्तोष्ठे रोगा वातादिदोषजाः । नृपचौराग्निहानिश्च वित्तानि च यतस्ततः ॥ ३१
तप्यमानेन मनसा दूयते भृशमाधिना । सर्पिष्यात्मानमालोक्य प्रायश्चित्तं यथाविधि ॥ ३२

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विपंचाशदधिकचतुःशततमः ॥ ४५२ ॥

श्रीसूर्य उवाच ।

या तोम्रहारिणी नारी लोभात्पूर्वभवे सुत । औदुम्बरेण रोगेण पीड्यते बहुपीडया ॥
पापं विचार्य यत्नेन ताम्रं दद्याच्च शक्तितः । तस्य दानान्महाभाग पापं नश्यति तत्क्षणात् ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय त्रिपंचाशदधिकचतुःशततमः ॥ ४५३ ॥

श्रीसूर्य उवाच ।

गर्भवत्याऽनया भुक्ता पूर्वजन्मनि मानद । गर्भासन्ना ह्यजा वध्वा विधिना गर्भधारणात् ॥
तेन कर्मविपाकेन बाहुजा साऽत्र जन्मनि । पूर्वजन्मन्यसौ विप्रा न च गर्भं दधात्यलम् ॥
प्रायश्चित्तमिदं तस्य चात्र सर्वाघमोचनम् । कृत्वाऽजां गर्भसंयुक्तां राजतीं षट्पलात्मिकां

धानस्तथा कार्यः पञ्चमाषैर्हिरण्मयः । पूजयित्वा ततो दद्याद्विजाय विधिनाण्डज ॥ ४ ॥
एवं कुर्याद्विधानेन सर्वपापापनोदनम् । तस्याः पुत्रविवृद्धिः स्यादिह जन्मनि वै ध्रुवम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःपंचाशदधिकचतुःशततमः ॥ ४९४ ॥

श्रीसूर्य उवाच ।

यो हरेत्परसिद्धान्नं प्राक् क्षुत्पीडाग्रपीडितः । सोऽत्र जन्मनि पक्षीन्द्र शूलरुक्पीडितोऽधुना ॥ १ ॥
अन्नदानेन विप्रेभ्यो रसदानाद्विशेषतः । मुच्यते शूलजाद्रोगान्नात्र कार्या विचारणा ॥ २ ॥
सुवर्णशूलदानाद्वा विप्रायात्र कुटुम्बिने । शूलदोषोपशमनमिह जन्मनि वै ध्रुवम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचपंचाशदधिकचतुःशततमः ॥ ४९५ ॥

श्रीसूर्य उवाच ।

मूर्धाभिषिक्तः प्राक् सूत बभूव पुरुषोत्तमः । स्वज्ञातिषु महाभाग दृढधर्मक्रियापरः ॥ १ ॥
विराटदेशे निवसन् राजकार्ये रतः सदा । कृतवानग्निदाहं च शत्रूणां भयदायकम् ॥ २ ॥
बालवत्सा मृतास्तत्र पुरे तस्मिन्खगोत्तम । पापमाचरितं तेन नृपाज्ञाकारिणा दृढम् ॥ ३ ॥
ततो यमपुरं प्राप्तो जातोऽत्र यमुनातटे । चारणो धर्मनिरतो बहुद्रव्यसमन्वितः ॥ ४ ॥
नानासुखैश्वर्ययुतो गजाश्वरथवाहनैः । बन्धुभृत्याधिकाराढ्यो वस्त्रभूषणभूषितः ॥ ५ ॥
सर्वं विष्णुप्रसादाच्च सुखं पापफलं शृणु । धूर्तो मिथ्यापवादी च बहुलोभसमन्वितः ॥ ६ ॥
जातसंततिदुःखार्तो बालवत्सवधादिह । नेत्ररोगान्वितो नित्यं शृणु चिह्नं पतत्रिण ॥ ७ ॥
चत्वारिंशन्मिते वर्षे सर्वसंततिनाशनम् । गृहप्राप्तान्महाभाग वृष्टिरिष्टसमुद्भवात् ॥ ८ ॥
पूर्वपापफलस्यात्र भोगादेव क्षयः स्मृतः ॥ ९ ॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन् बालवत्सावधनाशनीम् । यां कृत्वा विधिवज्जन्तुः पूर्वपापात्प्रमुच्यते ॥ १० ॥

श्रीसूर्य उवाच ।

प्रायश्चित्तं शृणुष्वात्र तद्वर्षानन्तरं सुत । तस्मिन्वर्षे महाभाग प्रायश्चित्तं न विद्यते ॥ ११ ॥
दृढकर्मार्जितात्पापात्र चोक्तं पापशोधनम् । श्रवणाद्धरिवंशस्य वैशाखे विधिनाण्डज ॥ १२ ॥
माघे वा कार्तिके वापि दशावृत्तिविधानतः । ततस्तु भोजयेद्विप्रान् होमयेच्च स्वशक्तितः ॥ १३ ॥
कोटिलक्षायुतं सूत रुद्राध्यायं जपेत्तथा । धेनूनां दशकं दद्यात्सवत्साभरणान्वितम् ॥ १४ ॥
दद्याच्च कपिलामेकां स्वर्णशृङ्गीं पयस्विनीम् । प्रायश्चित्तमिदं पुत्र चेत्कुर्याद्विधिपूर्वकम् ॥ १५ ॥
तस्य पुत्रविवृद्धिः स्याद्विवाहादपरात्सुत । मृत्युः पञ्चाशदब्दे तु खग चाकृतनिष्कृतेः ॥ १६ ॥
प्रायश्चित्ते कृते त्वत्र नवत्यब्दमितं तथा । द्विरुक्तमायुः कथितं तीर्थं पुण्याश्रयेऽण्डज ॥ १७ ॥
जीवे कर्कटगे तत्र चन्द्रे मकरराशिगे । त्रयोदश्यां दिवा भूमौ ऋक्षे मृगशिराभिधे ॥ १८ ॥
निर्णयः कथितस्तस्य विष्णुपूजनजात्फलात् । भविष्यति गतिस्तस्य पुनर्विष्णुप्रपूजनात् ॥ १९ ॥
तथा तृतीये जन्मापि मरणाद्योगृहे सुत । सर्वपापविशुद्धः स्यात्पुनर्मोक्षमवाप्नुयात् ॥ २० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्पंचाशदधिकचतुःशततमः ॥ ४९६ ॥

---

१ भुक्त्वा भोगान् तदुक्तवान् । विष्णुपूजनजात्पुण्यात् प्राप्तोऽत्र इति, ख० पु० अधिकः पाठः ।

व्रततीर्थरता नित्यं सत्यधर्मपरायणा । बहुवर्षैस्तया वत्स नियमैः शोषितं वपुः ॥ १०
पितुर्गृहे धनं भूरि त्वर्पितं स्नेहकारणात् । किंचित्कालवशात्प्राप्ता मृतिं सा ब्राह्मणी खग ॥ ११
तां पुत्रीं हृदये कृत्वा सोऽगमज्जन्मजन्मनि । कन्या बहुविधास्तस्य निराधारा मताः किल ॥ १२
तेन कर्मप्रभावेन पूर्वकन्या बहुप्रजा । सा तु भर्तृभवं गर्भं दधौ मृत्युं प्रतीक्षती ॥ १३
पुनर्जन्म पुनर्मृत्युस्तत्कर्मनिष्कृतिं विना । कन्याविक्रयकर्ता च रौरवे नरके मृतः ॥ १४
यातना बहुधा भुक्त्वा वर्षाणां च सहस्रकम् । पश्चान्मानुषमापन्नो व्रतदानप्रभावतः ॥ १५
इदं जन्म चतुर्थं तु पुत्रीवानत्र जायते । मृतः पुत्रो मृतो गर्भस्तेन गर्भभवादिह ॥ १६
भार्या तस्यापि विप्रस्य पूर्वजन्मनि मानद । भर्तृविद्वेषिणी नित्यं चिरापत्यानुगामिनी ॥ १७
तेन कर्मविपाकेन कन्या भूरि मृतः सुतः ॥ १८ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं देव येन पापोपशाम्यति । निष्कृतिं वद विश्वात्मन् पृथक्केन प्रकाशय ॥ १९

श्रीसूर्य उवाच ।

पुत्रिका यस्य जीवन्ति पुत्राणां नाशनं भवेत् । कर्मभेदेन येनेह शृणु त्वं कश्यपात्मज ॥ २०
स्वकन्यां वरयोग्यां सा चिन्तयन्तीमनागसम् । दशाब्दिकां च मानेन यथाभावं यथामति ॥ २१
कन्यां रूपवतीं शान्तां समस्तगुणशालिनीम् । अलंकृतां यथाशक्ति वराय गुणशालिने ॥ २२
ब्रह्मणे विधिना सूत दद्याच्च बहुदक्षिणाम् । महापापौघशमनं कन्यादानमतन्द्रिता ॥ २३
कन्याविवाहसमये महाशान्तिर्विधिं चरेत् । एवं कृतविधिः सूत कन्यां दत्त्वा विधानतः ॥ २४
शान्तिकर्माणि सर्वत्र विस्तीर्य ऋत्विजादयः । भूमिद्रविणवासांसि कन्यावासांसि दापयेत् ॥ २५
गृहदानं ततोः दद्याद्यथोपस्करसंयुतम् । वर्षेवर्षे तु संपूर्णे अन्नवस्त्रैश्च पोषयेत् ॥ २६
एवं कृतविधिः सूत बहुपुत्रा यशस्विनी । पापं पुत्रविनाशाख्यं कन्यापत्योदयश्च यत् ॥ २७
तस्य पापस्य नाशार्थं कन्यादानादयः स्मृताः । नाशयेच्चैव तत्पापं द्विजानां विधिपूजनात् ॥ २८
यजनाच्च विधानेन ब्राह्मणैः स्वस्तिवाचनात् । विनायकास्त्विकामूर्तीं हेमनिष्कप्रमाणतः ॥ २९
आचार्याय ददेत्सूत नानाकर्मावशान्तये । ऐहिकं लक्षणं तस्य शरीरे चोपजायते ॥ ३०
जिह्वाहृदयदन्तोष्ठे रोगा वातादिदोषजाः । नृपचौराग्निहानिश्च वित्तानि च यतस्ततः ॥ ३१
तप्यमानेन मनसा दूयते भृशमाधिना । सर्पिष्यात्मानमालोक्य प्रायश्चित्तं यथाविधि ॥ ३२

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विपंचाशदधिकचतुःशततमः ॥ ४५२ ॥

श्रीसूर्य उवाच ।

या तीव्रहारिणी नारी लोभात्पूर्वभवे सुत । औदुम्बरेण रोगेण पीड्यते बहुपीडया ॥ १
पापं विचार्य यत्नेन ताम्रं दद्याच्च शक्तितः । तस्य दानान्महाभाग पापं नश्यति तत्क्षणात् ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय त्रिपंचाशदधिकचतुःशततमः ॥ ४५३ ॥

श्रीसूर्य उवाच ।

गर्भवत्याऽनया भुक्ता पूर्वजन्मनि मानद । गर्भासन्ना ह्यजा वध्वा विधिना गर्भधारणात् ॥ १
तेन कर्मविपाकेन बाहुजा साऽत्र जन्मनि । पूर्वजन्मन्यसौ विप्रा न च गर्भं दधात्यलम् ॥ २
प्रायश्चित्तमिदं तस्य चात्र सर्वाघमोचनम् । कृत्वाऽजां गर्भसंयुक्तां राजतीं षट्पलात्मिकाम्

धानरस्तथा कार्यः पञ्चमाषैर्हिरण्मयः । पूजयित्वा ततो दद्याद्विजाय विधिनाण्डज ॥ ४ ॥
इदं कुर्याद्विधानेन सर्वपापापनोदनम् । तस्याः पुत्रविवृद्धिः स्यादिह जन्मनि वै ध्रुवम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःपञ्चाशदधिकचतुःशततमः ॥ ४९४ ॥

श्रीसूर्य उवाच ।

यो हरेत्परसिद्धान्नं प्राक् क्षुत्पीडाप्रपीडितः । सोऽत्र जन्मनि पक्षीन्द्र शूलरुक्पीडितोऽधुना ॥ १ ॥
अन्नदानेन विप्रेभ्यो रसदानाद्विशेषतः । मुच्यते शूलजाद्रोगान्नात्र कार्या विचारणा ॥ २ ॥
सुवर्णशूलदानाद्वा विप्रायात्र कुटुम्बिने । शूलदोषोपशमनमिह जन्मनि वै ध्रुवम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचपंचाशदधिकचतुःशततमः ॥ ४९५ ॥

श्रीसूर्य उवाच ।

सूर्याभिषिक्तः प्राक् सूत बभूव पुरुषोत्तमः । स्वज्ञातिषु महाभाग दृढधर्मक्रियापरः ॥ १ ॥
विराटदेशे निवसन् राजकार्ये रतः सदा । कृतवानग्निदाहं च शत्रूणां भयदायकम् ॥ २ ॥
बालवत्सा मृतास्तत्र पुरे तस्मिन्खगोत्तम । पापमाचरितं तेन नृपाज्ञाकारिणा दृढम् ॥ ३ ॥
ततो यमपुरं प्राप्तो जातोऽत्र यमुनातटे । चारणो धर्मनिरतो बहुद्रव्यसमन्वितः ॥ ४ ॥
नानासुखैश्वर्ययुतो गजाश्वरथवाहनैः । बन्धुभृत्याधिकाराढ्यो वस्त्रभूषणभूषितः ॥ ५ ॥
सर्वं विष्णुप्रसादाच्च सुखं पापफलं शृणु । धूर्तो मिथ्यापवादी च बहुलोभसमन्वितः ॥ ६ ॥
जातसंततिदुःखार्तो बालवत्सवधादिह । नेत्ररोगान्वितो नित्यं शृणु चिह्नं पतत्रिण ॥ ७ ॥
चत्वारिंशन्मिते वर्षे सर्वसंततिनाशनम् । गृहप्राप्तान्महाभाग वृष्टिरिष्टसमुद्भवात् ॥ ८ ॥
पूर्वपापफलस्यात्र भोगादेव क्षयः स्मृतः ॥ ९ ॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन् बालवत्सावधनाशनीम्। यां कृत्वा विधिवज्जन्तुः पूर्वपापात्प्रमुच्यते॥ १० ॥

श्रीसूर्य उवाच ।

प्रायश्चित्तं शृणुष्वात्र तद्वर्षानन्तरं सुत । तस्मिन्वर्षे महाभाग प्रायश्चित्तं न विद्यते ॥ ११ ॥
दृढकर्मार्जितात्पापान्न चोक्तं पापशोधनम् । श्रवणाद्धरिवंशस्य वैशाखे विधिनाण्डज ॥ १२ ॥
माघे वा कार्तिके वापि दशावृत्तिविधानतः । ततस्तु भोजयेद्विप्रान् होमयेच्च स्वशक्तितः ॥ १३ ॥
कोटिलक्षायुतं सूत रुद्राध्यायं जपेत्तथा । धेनूनां दशकं दद्यात्सवत्साभरणान्वितम् ॥ १४ ॥
दद्याच्च कपिलामेकां स्वर्णशृङ्गीं पयस्विनीम् । प्रायश्चित्तमिदं पुत्र चेत्कुर्याद्विधिपूर्वकम् ॥ १५ ॥
तस्य पुत्रविवृद्धिः स्याद्विवाहादपरात्सुत । मृत्युः पञ्चाशदब्दे तु खग चाकृतनिष्कृतेः ॥ १६ ॥
प्रायश्चित्ते कृते त्वत्र नवत्यब्दमितं तथा । द्विरुक्तमायुः कथितं तीर्थं पुण्याश्रयेऽण्डज ॥ १७ ॥
जीवे कर्कटगे तत्र चन्द्रे मकरराशिगे । त्रयोदश्यां दिवा भूमौ ऋक्षे मृगशिराभिधे ॥ १८ ॥
निर्णयः कथितस्तस्य विष्णुपूजनजात्फलात् । भविष्यति गतिस्तस्य पुनर्विष्णुप्रपूजनात् ॥ १९ ॥
तथा तृतीये जन्मापि मरणाद्योगृहे सुत । सर्वपापविशुद्धः स्यात्पुनर्मोक्षमवाप्नुयात् ॥ २० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्पंचाशदधिकचतुःशततमः ॥ ४९६ ॥

---

१ भुक्त्वा भोगान् तदुक्तवान् । विष्णुपूजनजात्पुण्यात् प्राप्तोऽत्र इति, ख० पु० अधिकः पाठः ।

श्रीसूर्य उवाच ।

पिङ्गलाक्षो भवेद्‌त्र पूर्वं रीत्यपहारकः । देया तत्रापशुद्ध्यर्थं रीतिः शतपलात्मिका ॥ १
गायत्र्या होमयेत्पश्चात्तिलान्विप्रांश्च भोजयेत् । मुच्यतेऽत्र महाभाग तद्दोषात्पापजाद्ध्रुवम् ॥ २

इति श्रीबृहत्सूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तपञ्चाशदधिकचतुःशततमः ॥ ४५७ ॥

श्रीसूर्य उवाच ।

वैनतेय महाभाग खररोमा प्रजायते । पूर्वजन्मनि यो हन्यात्खरं पापविमोहितः ॥ १
प्रायश्चित्तं परं तस्य पापस्य शृणु तत्त्वतः । निष्कत्रयं हिरण्यं च दद्याद्दोषोपशान्तये ॥ २
ब्राह्मणाय दरिद्राय वेदवेदाङ्गपाठिने ॥ ३ ॥

इति श्रीबृहत्सूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टपञ्चाशदधिकचतुःशततमः ॥ ४५८ ॥

श्रीसूर्य उवाच ।

प्राग्भुक्तं गर्भपुष्ट्यर्थं कुक्कुटाण्डं खगेश्वर । अत्र जन्मनि सा जाता संकरा लोभसंयुता ॥ १
धनधान्यसमायुक्ता पूर्वपुण्यादिहाण्डज । न च गर्भं दधात्येषा प्राक्पापाद्‌ण्डभक्षणात् ॥ २
कृत्वाऽण्डं विधिना तद्धैरण्यं द्विपलात्मकम् । तदर्धार्धमितं वापि त्रिषु वित्तानुसारतः ॥ ३
दत्त्वा द्विजाय विधिना आचरेच्छाङ्करं व्रतम् । तेनेह कर्मणा मुक्तः प्राप्नस्तु यमशासनम् ॥ ४
भुक्त्वातिदारुणान्सूत नरकान्घोरदर्शनान् । तथा पुण्यफलं पुण्यात्प्राप्य पुण्यावशेषतः ॥ ५
स्वर्णकारकुले जातो धूर्तो लोभपरः सदा । नानाचौर्यक्रियायुक्तो लोकवञ्चनतत्परः ॥ ६
महाभिमाननिरतः प्रियो राजजनेष्वपि । सुखैश्वर्यधनैर्युक्तः कुटुम्बभरणे दृढः ॥ ७
नानास्त्रीसुखसंयुक्तस्तथा पुत्रविवर्जितः । वक्ष्यामि निष्कृतिं सूत सर्वपापनिकृन्तनीम् ॥ ८
प्रयागे त्वथवा काश्यां स्थाप्य लिङ्गं सुशोभनम् । पूजयेत्तु त्रिवर्षान्तं मन्त्रैस्तल्लिङ्गजैस्तथा ॥ ९
गन्धपुष्पोपचारैश्च नैवेद्यैर्बहुदीपकैः । संपूज्य विधिवद्देवं तदन्ते भोजयेद्द्विजान् ॥ १०
शिवभक्तांस्तथा शान्तान् दक्षिणाभिश्च पूजयेत् । नानाहिरण्यैर्विधिवत्तथैवाभरणैः शुभैः ॥ ११
अथवा शृणुयात्तत्रः यजुर्वेदं विधानतः । ब्रह्मचर्येण सततं प्रायश्चित्तमिदं परम् ॥ १२
य एवं कुरुते भक्त्या पूर्वपापप्रणाशनम् । संप्राप्य तत्र निर्याणं शिवलोकं स गच्छति ॥ १३
कर्तव्यं ब्राह्मणद्वारा सर्वमेतद्धि काश्यप । नाधिकारोऽस्ति शूद्रस्य वेदस्य श्रवणे क्वचित् ॥ १४
तप्ता शलाका देया वै शूद्रकर्णेऽतिदारुणा । श्रुतं पारायणं येन पापेनाक्रान्तचेतसा ॥ १५
आयुरब्दशतं तस्य पक्षीन्द्र कृतनिष्कृतेः । प्रायश्चित्ते कृते रिष्टं जायते षष्टिवत्सरे ॥ १६
एतज्जन्मफलं प्रोक्तं सविधानं समासतः ॥ १७ ॥

इति श्रीबृहत्सूर्यारुणसंवादे कर्मविपाके ऽध्याय एकोनषष्ट्यधिकचतुःशततमः ॥ ४५९ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे हन्याद्गरमत्रैव जन्मनि । खररोमसमानानि रोमाणि प्रभवन्ति च ॥ १
ब्राह्मणाय तदा दद्यात्स्वर्णं निष्कत्रयं सुत । जायते सूक्ष्मरोमा सा विनतानन्दवर्धन ॥ २

इति श्रीबृहत्सूर्यारुणसंवादे कर्मविपाके अध्यायः षष्ट्यधिकचतुःशततमः ॥ ४६० ॥

श्रीसूर्य उवाच ।

या वै पुरा हरेद्रीतिं नारी सा च पतत्रिण । पिङ्गाक्षी जायते चात्र प्रायश्चित्तं परं शृणु ॥ १ ॥
रीतिं दद्याच्छतपलां तथा ब्राह्मणभोजनम् । गायत्र्या जुहुयाद्धुत्तया तिलान् रोगविनाशनम् २॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकषष्ट्यधिकचतुःशततमः ॥ ४९१ ॥

श्रीसूर्य उवाच ।

प्राग्भवे वनिता या च परसिद्धान्नहारिणी । सात्र जन्मनि शूलेन रोगेणैव च बाध्यते ॥ १ ॥
सिद्धान्नदानं विप्रेभ्यो दीनेभ्योऽथ पतत्रिण । भिक्षुभ्यश्च तथा दानाद्रसदानाच्च शक्तितः ॥२॥
न जायते शूलपीडा तस्याश्च कृतनिष्कृतेः । प्रायश्चित्तेऽकृतेऽत्रैव म्रियते शूलपीडया ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विषष्ट्यधिकचतुःशततमः ॥ ४९२ ॥

श्रीसूर्य उवाच ।

उष्ट्रघाती भवेत्पूर्वं जन्मन्यथ पतत्रिण । सोऽत्र जन्मनि जायेत नरश्च विकृतस्वरः ॥ १ ॥
वक्ष्यामि तस्य पापस्य नाशनं चात्र जन्मनि । कर्पूरं त्रिपलं दद्याद्विप्रेभ्यः शक्तितोऽण्डज॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिषष्ट्यधिकचतुःशततमः ॥ ४९३ ॥

श्रीसूर्य उवाच ।

वन्ध्येयं या महाभाग गङ्गायां हि पतत्रिण । पूजयेल्लक्षं रुद्राणां तदर्धं वा तदर्धकम् ॥ १ ॥
शक्त्याथ भोजयेद्विप्रान् होमयेच्च स्वशक्तितः । अनेन विधिना या च प्रायश्चित्तं समाचरेत् ॥२॥
जायते संततिस्तस्या इह जन्मनि वै ध्रुवम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःषष्ट्यधिकचतुःशततमः ॥ ४९४ ॥

श्रीसूर्य उवाच ।

कांस्यहारी तु पुरुषः प्राग्भवे विनतासुत । शीर्षरोगेण सततं पीडितो जायतेऽत्र हि ॥ १ ॥
दानाच्छतपलादत्र सीसकादण्डजोत्तम । विप्राय वेदविदुषे शीर्षरोगो विनश्यति ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचषष्ट्यधिकचतुःशततमः ॥ ४९५ ॥

श्रीसूर्य उवाच ।

बभूव बाहुजः कश्चिद्देशे कीराभिधे सुत । धर्मकर्मालपको भक्तः पितृपुत्रधनान्वितः ॥ १ ॥
दत्तानि तेन दानानि ब्राह्मणेभ्यो हि शक्तितः । पर्वस्वपि च पात्रेभ्यो गोभूम्यश्वादिकानि च॥२॥
पापमाचरितं तेन भाविनोऽर्थस्य वै बलात् । स्ववंशजस्य कस्यापि गृहं शत्रोर्मनोहरम् ॥ ३ ॥
निर्दग्धं वैरिभावेन रात्रौ वै भार्यया सह । तस्मिन् दाहे महाभाग निर्दग्धं वृषभद्वयम् ॥ ४ ॥
गृहस्थाः स्वल्पजीवाश्च घातिताः क्रूरकर्मणा । ततो बहुतिथे काले गतः स यमशासनम् ॥ ५ ॥
सस्त्रीकः स्वफलं भुक्त्वा पापादुष्टं शुभं तथा । पुण्यात्पाश्चनदे देशे स जातो बाहुजोऽधरः ॥ ६ ॥
मध्यस्वरूपो मतिमान् कुलेष्टः पुरुषो दृढः । रक्तो नोचो नातिनीचो बहुकन्यः पृथुर्विभुः ॥ ७ ॥
यौवने तु सुखैश्वर्यधनैः स्थानैर्युतायुतैः । मितदो भोगवानाढ्यः कृती मानी जनप्रियः ॥ ८ ॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । उग्रश्चिन्तातुरो धूर्तो दुःखभोगी तथाऽण्डज ॥ ९ ॥

---

१ अयं श्लोकः खपु० नास्ति ।

सा ज्येष्ठा प्रष्टुरेव स्त्री मृतपुत्रात्र जन्मनि । लक्ष्मैतदण्डजश्रेष्ठ जन्माङ्के वृषभे शनिः ॥ १०
लक्षणैरेभिराङ्कस्य प्रायश्चित्तं वदाम्यहम् । कारयित्वा शिवं साङ्गं पलैर्वेदमितैः शुभैः ॥ ११
हिरण्मयं महाभाग पत्रे लेख्यं शिवान्वितम् । तदर्धार्धमितं वापि त्रिषु वित्तानुसारतः ॥ १२
उपचारैः षोडशभिः पूजयित्वा विधानतः । संस्थाप्य पशुपं पश्चाद्गोरथे सुमनोहरे ॥ १३
सर्वोपस्करसंयुक्ते क्षौमाम्बरविभूषिते । दद्याद्वेदविधिज्ञाय मन्त्रमेतमुदीरयेत् ॥ १४

मंत्रः ।

"मोहात्पूर्वं महापापमग्निदाहाद्यदर्जितम् । तन्नाशाय ददेऽहं तु शिवं गोरथसंस्थितम्" ॥ १५
गोधिकाद्यास्तथा जीवाः पत्रे लेख्यास्तु राजते । जीवपत्रमिदं दद्याद्ये चान्ये घातिताः पुरा ॥ १६
पञ्चमासमितो वह्निर्देयो हेममयः शुभः । गायत्र्यष्टसहस्रं तु रौद्रं जप्त्वा सहस्रकम् ॥ १७
अष्टाक्षरं द्विसाहस्रं होमयेद्भोजयेद्द्विजान् । य एवं कुरुते सूत प्रायश्चित्तं विधानतः ॥ १८
न तस्य पुत्रमरणं तदग्रे जायते क्वचित् । जायन्ते सुलभाः पुत्राश्चाधिव्याधिविवर्जिताः ॥ १९
नैवं करोति यो मोहादत्र पुत्रविवर्जितः । चत्वारिंशन्मिते कूने वर्षे रिष्टं प्रकीर्तितम् ॥ २०
पञ्चाशन्मितिके रिष्टं दैवाच्चाकृतनिष्कृतेः । प्रायश्चित्ते कृते ह्यायुश्चतुःसप्तमिताब्दकम् ॥ २१

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्पष्टयधिकचतुःशततमः ॥ ४६६ ॥

श्रीसूर्य उवाच ।

कांस्यहारी च पुरुषः प्राग्भवे विनतासुत । शीर्षरोगेण सततं पीडितो जायतेऽत्र हि ॥ १ ॥
दानाच्छतपलादत्र सीसकाद्दण्डजोत्तम । विप्राय वेदविदुषे दरिद्राय कुटुम्बिने ॥ २ ॥
तस्य पापस्य शमनं मया प्रोक्तं खगाधिप । तस्मिन्व्ययसि तद्रिष्टं भविष्यति न संशयः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तषष्टयधिकचतुःशततमः ॥ ४६७ ॥

श्रीसूर्य उवाच ।

याकाचिद्वनिता सूत प्राग्भवे कांस्यहारिणी । सात्र जन्मनि पक्षीन्द्र शीर्षरोगप्रपीडिता ॥ १ ॥
दद्याच्छतपलं सीसं ब्राह्मणाय कुटुम्बिने । तत्काले शीर्षजाद्रोगान्मुच्यते नात्र संशयः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टषष्टयधिकचतुःशततमः ॥ ४६८ ॥

श्रीसूर्य उवाच ।

या काचिद्वनिता सूत प्राग्भवे कांस्यहारिणी । सात्र जन्मनि पक्षीन्द्र जायते विकृतस्वरा ॥ १ ॥
सरस्वत्याश्च प्रतिमां सौवर्णीं राजतीं तथा । दद्याद्वेदविधिज्ञाय तदा स्यात्सुस्वराण्डज ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकोनसप्तत्यधिकचतुःशततमः ॥ ४६९ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि यः कश्चिन्मोहात्परघृतं हरेत् । नेत्ररोगयुतः सोऽपि जायतेऽत्रैव जन्मनि ॥ १ ॥
घृतधेनुप्रदानाच्च विधिना वेदपारगे । मुच्यते नेत्ररोगाच्च जन्मन्यत्र पतत्रिण ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्यधिकचतुःशततमः ॥ ४७० ॥

श्रीसूर्य उवाच ।

गायत्र्याश्च जपेल्लक्षं नात्र कार्या विचारणा । न तस्य विन्मयं प्रोक्तमत्र जन्मनि चाण्डज॥ १॥
स्वशरीरविवृद्ध्यर्थं येन भुक्तो मृगः पुरा ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकसप्तत्यधिकचतुःशततमः ॥ ४७१ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे मोहाद्गुडं हरति कस्यचित् । गुल्मोदरेण रोगेण पीड्यते सात्र जन्मनि ॥ १ ॥
गङ्गायां हि महाभाग गुडधेनुप्रदानतः । तत्र स्नानान्महापुण्यात्तस्माद्रोगाद्विमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विसप्तत्यधिकचतुःशततमः ॥ ४७२ ॥

श्रीसूर्य उवाच ।

कश्चिद्वैश्योऽभवत्पूर्वं देशे नेपालसंज्ञके । बहुमित्रसुतैराढ्यो हीनद्रव्येण[1] संयुतः ॥ १ ॥
आराधनं तु कृतवान् स देव्याः पूर्वजन्मनि । स्वस्त्रियं च सुरूपां च परित्यज्य शुभाननाम्॥२॥
अन्यस्त्रियमुपगतो व्यभिचारपरो हृदः । स तेन कर्मणा युक्तो गतो धर्मपुरं प्रति ॥ ३ ॥
पापंपुण्यफलं भुक्त्वा स जातोऽत्र महीधरे । गौरो भव्यो महाज्ञानी महाविभवसंयुतः ॥ ४ ॥
देशेदेशेऽलिविख्यातो घृणी शूरो महायशाः । स्वस्त्रीत्यागान्महाभाग जायते स्त्रीविवर्जितः ॥५॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन् स्त्रीप्राप्तेः सौख्यकारिणीम् ॥ ६ ॥

श्रीसूर्य उवाच ।

पार्वतीप्रतिमां कृत्वा हैमीं सर्वार्थकारिणीम् । पलपञ्चमितां लेख्यां गन्धैर्माल्यैरलंकृताम् ॥ ७॥
दद्याद्वेदविधिज्ञाय सुकुलीनाय चार्थिने । प्रजापतिं तथा दद्याद्राजतं त्रिपलात्मकम् ॥ ८ ॥
ब्रह्मदैवतमन्त्रेण गृह्णीयात्स द्विजोत्तमः । पश्चादष्टाक्षरं मन्त्रं सहस्रं पापशोधनम् ॥ ९ ॥
जपेदष्टसहस्रं तु सूर्यमन्त्रं महाबलम् । होमयेत्तद्दशांशेन तद्दशांशेन तर्पयेत् ॥ १० ॥
य एवं कुरुते सूत सर्वपापविशोधनम् । प्रायश्चित्तं परं पुत्र तस्मात्पापात्प्रमुच्यते ॥ ११ ॥
नैवं करोति यो मोहाज्जडधीर्दैवघातितः । न लभेत्स्त्रीसुखं सोऽत्र रिष्टं पञ्चेदकेऽब्दके ॥ १२ ॥
प्रायश्चित्ते कृतेऽब्दानां जीवनं पञ्चसप्ततिम् ॥ १३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायस्त्रिसप्तत्यधिकचतुःशततमः ॥ ४७३ ॥

श्रीसूर्य उवाच ।

मृगं हन्याद्विनाऽऽखेटं प्राग्भवे योऽडजाधिप । पण्डः स्यादत्र जनुषि तत्काले मृगघातकः ॥ १ ॥
पापनाशकरीं तस्य निष्कृतिं वच्म्यहं सुत । दद्यादश्वं नवं तत्र स्वर्णनिष्कयुतं शुभम् ॥ २ ॥
सहासनमलंकारैर्भूषयित्वा विधानतः । विधिज्ञाय महाबाहो नानाशास्त्रविधानतः ॥ ३ ॥
न स पश्यति खञ्जत्वं दानस्यास्य प्रभावतः ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःसप्तत्यधिकचतुःशततमः ॥ ४७४ ॥

---

१ देहदिव्येन संयुतः—ख० पु० ।

श्रीसूर्य उवाच ।

या नारी प्राग्भवे सूत परतैलापहारिणी । सात्र जन्मनि पक्षीन्द्र कण्डूरोगप्रपीडिता ॥ १ ॥
सा मुच्यते महाभाग दानात्तैलघटद्वयात् । सुवर्णाढ्यात्तथा शक्त्या तैलदानाद्विशेषतः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचसप्तत्यधिकचतुःशततमः ॥ ४७५ ॥

श्रीसूर्य उवाच ।

राजाऽमात्यः स वै काश्चिच्चारणः पूर्वजन्मनि । भव्यमूर्तिर्दृढो धीरः शिवपूजनतत्परः ॥ १ ॥
राजपत्न्यां महावाहो दधाराऽसावधर्मतः । गर्भं च काममुग्धो यो भाविनोऽर्थस्य वै बलात् ॥ २ ॥
पापात्पापफलं भुक्त्वा यमलोके पतत्रिण । शिवपूजनजात्पुण्यात्सोऽत्र जातो हि पादजः ॥ ३ ॥
देशे जाङ्गलके षण्ढो सर्वधर्मबहिष्कृतः । शिवपूजारतो यस्मात्प्रागत्र धनभोगभाक् ॥ ४ ॥
स्त्रीपुत्रसुखहीनोऽत्र प्रायश्चित्तं न विद्यते ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्सप्तत्यधिकचतुःशततमः ॥ ४७६ ॥

श्रीसूर्य उवाच ।

पूर्वं जन्तुषि या नारी गर्भघातकरी ह्यभूत् । गर्भपातेन दुःखार्ता साऽत्र जन्मनि जायते ॥ १ ॥
तत्पापनाशनं सूत शृणु वक्ष्यामि तत्त्वतः । दद्याद्विप्राय तुरगं युवानं भूषणान्वितम् ॥ २ ॥
स्वर्णनिष्कयुतं चात्र पूर्वपापात्प्रमुच्यते । न पश्यति च गर्भोत्थां पीडामत्रैव जन्मनि ॥ ३ ॥
दानप्रभावात्पक्षीन्द्र खञ्जत्वं नाप्नुयादिह ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तसप्तत्यधिकचतुःशततमः ॥ ४७७ ॥

श्रीसूर्य उवाच ।

क्षात्रे कुले समुत्पन्नो दानदाक्षिण्यतत्परः । मोहादिपीडितो नित्यं कृशाङ्गः पाण्डुरद्युतिः ॥ १ ॥
ऊर्ध्ववातादिना पीडा वाल्ये स्याद्ग्रहणीगदः । तस्य भार्या सदाचारा सुस्नेहा भर्तृभक्तितः ॥ २ ॥
रक्तस्रावादिना पीडा जायते वायुसम्भवा । स एव तस्या गर्भस्य घातं कुर्याच्च वृद्धितः ॥ ३ ॥
द्वित्रैश्च पञ्चभिर्मासैश्चतुर्भिः सप्तभिस्तथा । केन कर्मविपाकेन गर्भो न स्थिरतां व्रजेत् ॥ ४ ॥

श्रीसूर्य उवाच ।

वैनतेय महावाहो शृणु चास्य विचेष्टितम् । व्यभिचारभयाद्वापि तया गर्भश्च पातितः ॥ ५ ॥
अतिकष्टाद्वैनतेय गर्भपातकृतागसः । अपरं च कृतं कर्म व्यभिचारोऽपतत्ततः ॥ ६ ॥
नानाद्रव्यापहर्त्री च कुलटा वाक्यलंघनात् । भर्तुस्तु चौरिणी वृत्तिर्दुष्टसंगतिकोऽर्जनात् ॥ ७ ॥
तेन दुष्टेन यद्द्रव्यं हृतं तस्करबुद्धिना । भुक्तं ताभ्यां वैनतेय ब्रह्मस्वं तत्र जन्मनि ॥ ८ ॥
कालेन तद्धनं भुक्त्वा पीडितो दारुणैर्ग्रहैः । यातना बहुधाः प्राप्ताः पश्चान्मानुषतां गतः ॥ ९ ॥
किंचिद्धर्मप्रभावेण क्षात्रेयं जन्मना भुवि । इदं जन्म चतुर्थं वै गर्भपातोऽभिजायते ॥ १० ॥
उभाभ्यां च कृतं कर्म भुज्यते जन्मजन्मनि ॥ ११ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं देव येन पापक्षयो भवेत् ॥ १२ ॥

---

१ उदरस्थस्य गर्भस्य इति स्यात् ।

श्रीसूर्य उवाच।

पूर्वजन्मनि या नारी नानागर्भान्निहंति हि। तस्या निष्कृतितः शुद्धिः श्रूयतां कश्यपात्मज॥१३॥
नारी नियमसंवीता ध्रुवं सा व्रतकाङ्क्षिणी। सौम्यायनं समासाद्य सितपक्षे शुभेऽहनि ॥ १४ ॥
तस्य पापस्य शान्त्यर्थं नानाव्रतमुपाचरेत्। पयःस्रवन्तीं शान्तां वा सुरभीं शुभलक्षणाम् ॥१५॥
गृहमानीय विधिवत्पूजयेत्तां समाहिता। इष्टैस्तु यवसैः पानैर्भक्ष्यैः कण्डूयनैरपि ॥ १६ ॥
रुचिरैश्च सुमिष्टान्नैः सा तां परिचरेत्सदा। रात्रौ पुष्पावलीभिश्च दीपैः प्राक् चन्दनादिभिः॥१७॥
सुगीतमङ्गलध्वानैस्तदधःशायिनी भुवि। प्राणयात्रां प्रकुर्वीत ततस्तु पयसाऽहनि ॥ १८ ॥
तस्यास्तु पश्चगव्यानि यथान्यायं यथाश्रुति। एवं व्रतपरा नारी मासिमासि तु संयता ॥ १९ ॥
तस्या धेनोः सवत्साया इष्टं समभिकांक्षिणी। व्रतान्ते द्विजमाहूय समस्तगुणशालिनम् ॥ २० ॥
अभ्यर्च्य पूजयेद्भक्त्या वस्त्रस्रग्दामभूषणैः। सम्यगभ्यर्च्य तां धेनुं तनयं वै स्तनंधयम् ॥ २१ ॥
सुवर्णं शुद्धमाग्नेयं मापषोडशसंमितम्। कृत्वा च विधिना तस्मै तां दद्यादिति भाषिणी॥२२॥
प्रदद्याद्गां सवत्सां च पूर्वपापापनुत्तये ॥ २३ ॥

प्रार्थना।

"यन्मया कुलटाधर्मान्नानागर्भाश्च हिंसिताः। नानाभेदैः प्रयातास्ते मे गर्भा बहवो भुवि॥२४॥
तच्च कर्मार्जितं पापं गर्भपातादिदूषणम्। एनसस्तस्य नाशाय सवत्सां दापयेत्विमाम् ॥ २५ ॥
इह जन्मनि वन्ध्यत्वं नाशयेन्मम सत्वरम्। दानेनानेन सुरभे ह्यनघा किल सुव्रता ॥ २६ ॥
भवेयं त्वत्प्रसादेन गर्भो मे सुभगो भवेत्"। एवमस्त्विति तां धेनुं समादाय सदक्षिणाम् ॥२७॥
हिरण्यं रजतं ताम्रं विविधानि फलानि च। दापयेद्विजमुख्याय भूरिद्रव्यैश्च तोषयेत् ॥ २८॥
भोजयेच्च शतं विप्रान् नानान्नैः सक्तुपायसैः। एवं कृतविधिः सूत नारी सा दुःखनाशिनी॥२९॥
वन्ध्यत्वं मुच्यते सूत पुंत्रं प्राप्य यशस्विनम् ॥ ३० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अ० ७सप्तत्यधिकचतुःशततमः ॥ ४७८ ॥

श्रीसूर्य उवाच।

पूर्वजन्मनि यः कश्चित्तुरङ्गं घातयेन्नरः। वक्रकण्ठेन रोगेण पीडितोऽत्र प्रजायते ॥ १ ॥
स्वर्णाश्वदानाद्विधिवत्सर्वोपस्करसंयुतात्। वक्रकण्ठसमुद्भूतां पीडां नाप्नोति मानवः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्याय एकोनाशीत्यधिकचतुःशततमः ॥ ४७९ ॥

श्रीसूर्य उवाच।

शृगालघाती पुरुषः प्राग्जनुष्यत्र जन्मनि। पादहीनो भवेत्सूत भृशं चाकृतनिष्कृतिः ॥ १ ॥
दद्यादश्वं सुवर्णाढ्यं सर्वोपस्करसंयुतम्। ब्राह्मणाय प्रयत्नेन पूर्वपापापनुत्तये ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽशीत्यधिकचतुःशततमः ॥ ४८० ॥

श्रीसूर्य उवाच।

संकरः प्राग्भवे सूत बभूव धनसंयुतः। तीर्थवासी विरक्तश्च लोभधर्मक्रियान्वितः ॥ १ ॥
क्रूरं कर्म कृतं तेन दुष्टसङ्गेन चाण्डज। चौर्येण गां परां नीत्वा क्षुधितैर्भक्षिता पुरा ॥ २ ॥
मृतास्ते तेन पापेन नानायोनिमुपागताः। स तीर्थं मत्युवशतो गङ्गातीरेऽत्र पादजः ॥ ३ ॥

तीर्थमृत्युप्रसादाच्च धनपुत्रसमन्वितः । युवभावेऽण्डजश्रेष्ठ चक्षुर्हीनोऽत्र जायते ॥ ४ ॥
प्रायश्चित्तं प्रवक्ष्यामि सुवर्णदशसम्मितम् । लिखितां च विधानेन पूजयित्वा विधानतः ॥ ५ ॥
सा देया वेदविदुषे पूर्वपापविशुद्धये । गायत्रीं च जपेत्तत्र नियुतं वायुतद्वयम् ॥ ६ ॥
होमयेच्च यथाशक्त्या भोजयेच्च ततो द्विजान् । यः कुर्याद्विधिना चेत्थं सतद्दोषात्प्रमुच्यते ॥ ७ ॥
स दिव्यचक्षुषा युक्तो जायतेऽत्रैव जन्मनि ॥ ८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकाशीत्यधिकशतुःशततमः ॥ ४८१ ॥

श्रीसूर्य उवाच ।

या काचिद्भ्रातयेन्नारी शृगालं पूर्वजन्मनि । सा तत्र पुरुषं वापि भ्रातार्थमुपदेशयेत् ॥ १ ॥
अत्र जन्मनि वै चोर्ध्वस्थानात्पाताच्च वैकृता । पादभङ्गो भवेत्तस्मात्पापाच्चैव खगाधिप ॥ २ ॥
कथं वा कस्य पापस्य विन्मयं विधिना चरेत् । यस्माद्रोगात्प्रमुच्येत चोर्ध्वपातभवात्तथा ॥३॥
अश्वं निष्कसुवर्णाढ्यं विन्मयं पापशोधनम् ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्यशीत्यधिकचतुःशततमः ॥ ४८२ ॥

श्रीसूर्य उवाच ।

आसीत्क्षत्री महाभाग पाञ्चाले देशके शुभे । नानाधर्मसमायुक्ते ग्रामे यो विश्रुतो महान् ॥ १ ॥
दुष्कर्माचरितं तेन भाविनोऽर्थस्य वै बलात् । शूद्रायां धारितो गर्भः काममुग्धेन निश्चयः ॥२॥
कृतं यत्नं महत्तत्र नासीद्गर्भस्य पातनम् । तया हालाहलं पीतं लोकशङ्कातुरा भृता ॥ ३ ॥
गर्भपीडावशादुग्राद्बालकोऽपि मृतस्ततः । सहायपञ्चयुक्तेन कृतं प्राक्कर्म दारुणम् ॥ ४ ॥
कर्मणां संग्रहश्चायं गर्भनाशसद्भवः । ततोऽसौ मरणं प्राप्तो बाहुजः ससहायकः ॥ ५ ॥
सूर्यलोकं तदा गत्वा भुक्त्वा भोगांश्च शाश्वतान् । अशुभान्नरकान्भुक्त्वा स्वार्जितान्दृढकर्मजान्॥
सोपपद्ये महादानात्पूर्वजन्मनि मानद । स जातो यमुनातीरे बाहुजोऽप्यत्र जन्मनि ॥ ७ ॥
गौरः कृशाङ्गो लम्बश्च धनसौख्यसमन्वितः । पितृभ्रातृविहीनश्च लोभमोहरतः सदा ॥ ८ ॥
नैकस्त्रीसंयुतः कामी नानाविभवविस्तरः । आद्यन्तसुखयुक्तश्च बुद्धिमान्देशविश्रुतः ॥ ९ ॥
धर्मादिदं तथा पापाद्भूतः पापरतः शठः । सकन्यो हृदि रोगश्च मनोदुःखसमन्वितः ॥ १० ॥
शूद्रायां च वीर्यदानात्प्राग्गर्भस्य वधात्पुनः । ऐहिकं लक्षणं तस्य शरीरे चोपजायते ॥ ११ ॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन् सर्वपापापलोदनीम् । पुत्रवृद्धिकरीं धन्यां लोकानां हितकाम्यया१२॥

श्रीसूर्य उवाच ।

वक्ष्यामि निष्कृतिं तस्य शृणु सूत प्रयत्नतः । पूर्वपापविशुद्ध्यर्थं गर्भदोषसमुद्भवाम् ॥ १३ ॥
शूद्रायाः प्रतिमा कार्या पलैः पञ्चभिरैः शुभा । हिरण्मयी सगर्भा च पत्रे लेख्या विधानतः १४॥
तदर्धार्धेन वा कार्या त्रिषु वित्तानुमानतः । गन्धपुष्पैरलंकृत्य सा देया पापनाशनी ॥ १५ ॥
पञ्चमाषमितं विष्णुं सर्वपापप्रणाशनम् । प्रजापतिं तथा दद्यात्सौवर्णं पञ्चमाषकम् ॥ १६ ॥
राजतं च तथा दद्यात्सोमं सार्धपलात्मकम् । गायत्रीं दशसाहस्रं जपेच्च विधिपूर्वकम् ॥ १७ ॥
होमयेत्तण्डुलैः साज्यैः सर्षपैः सतिलैस्तथा । ब्राह्मणान्भोजयेत्पश्चात्पूर्वपापात्प्रमुच्यते ॥ १८ ॥

एवं कृतविधेः सूत सर्वपापविनाशनम्। तस्य पुत्रविवृद्धिः स्यादिह जन्मनि जायते ॥ १९ ॥
अकृते न यथाशक्त्या प्रायश्चित्ते यथोचिते ॥ २० ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्यशीत्यधिकचतुःशततमः ॥ ४८३ ॥

श्रीसूर्य उवाच।

शूद्रोऽभवन्महाभाग प्राग्जन्मनि लुकोविदः। ग्रामवासी सदा सौम्यः शतद्रुनिकटेऽण्डज ॥ १ ॥
शूद्रकन्या च तेनैव हृद्या षोडशवार्षिकी। भुक्तातिकाममुग्धेन बलात्कारेण दूषिता ॥ २ ॥
स चाथ सूर्यपुत्रस्य भुक्त्वा भैरवशासनम्। पूजनाच्छिवलिङ्गानां प्राग्भवेऽपि च संकरः ॥ ३ ॥
पण्ढस्तेन विपाकेन प्राप्तसर्वमनोरथः। राजप्रचारको धीमान्गजाश्वपत्तिपालकः ॥ ४ ॥
महाधनो महोत्साहो महाविभवविस्तरः। मृत्युश्चास्यात्र गङ्गायां पुण्याच्च शिवपूजनात् ॥ ५ ॥
भविष्यति महाभाग पापान्ते चात्र सद्गतिः ॥ ६ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरशीत्यधिकचतुःशततमः ॥ ४८४ ॥

श्रीसूर्य उवाच।

पादरोगयुतः सूत जायते सोऽत्र जन्मनि। यो मार्गहा पुरा लोके परलुण्ठनतत्परः ॥ १ ॥
सोऽश्वदानाद्विधानेन ब्राह्मणाय पतत्रिण। न पश्यति महापीडां पापजां पादसंभवाम् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाशीत्यधिकचतुःशततमः ॥ ४८५ ॥

श्रीसूर्य उवाच।

यो घातयेदजां ज्ञानात्प्राग्भवे विलतासुत। भक्षार्थं सोऽत्र जन्तुषि पुरुषोऽङ्गाधिको भवेत् ॥ १ ॥
न तस्य निष्कृतिर्दुष्टपापस्यात्र च काश्यप। प्रारब्धस्य क्षयो नास्ति विन्मये शतधा कृते ॥२॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः षडशीत्यधिकचतुःशततमः ॥ ४८६ ॥

श्रीसूर्य उवाच।

अभवत्प्राग्भवे विप्रो ग्रामवासी जनाश्रितः। चौराधिपो महोग्रश्च तत्संसर्गी खगाधिप ॥ १ ॥
दत्तानि तेन ग्रहणे दानानि विलतासुत। गोभूम्यश्वादिकान्येव ब्राह्मणेभ्योऽतिशक्तितः ॥ २ ॥
स भुक्त्वा नरकान्घोरान् पापात्पुण्याच्च शाश्वतान्। स्वर्गान्पर्वतभागेऽत्र स जातो बाहुजोऽधुना ॥
वामनो राजसन्मानी महोग्रो मन्त्रपारगः। पुत्रहीनोऽप्यसौ सूत परावित्तस्य लुण्ठनात् ॥ ४ ॥
भवन्त्यत्र च ये पुत्रा म्रियन्ते नात्र संशयः। प्रायश्चित्तं प्रवक्ष्यामि येन पापं प्रशाम्यति ॥ ५ ॥
कृत्वा वेदघटान्सूत सौवर्णान्घृतपूरितान्। तदभावे राजतांश्च विप्रेभ्यः प्रतिपादयेत् ॥ ६ ॥
हरिवंशं विधानेन शृणुयाद्भक्तितोऽण्डज। रौद्रं व्रतं चरेत्पश्चात्पूर्वपापविशुद्धये ॥ ७ ॥
नैतत्प्रकुर्याद्यः श्रुत्वा स नरः पुत्रवर्जितः। जायतेऽत्रैव पक्षीन्द्र कुर्यात्तत्पुत्रवर्धनम् ॥ ८ ॥
आयुश्चाष्टाधिकाऽशीतिः समानां कृतनिष्कृतेः ॥ ९ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्ताशीत्यधिकचतुःशततमः ॥ ४८७ ॥

अरुण उवाच।

क्षात्रवंशे समुत्पन्नो वातदेहो रुजाकरः। गुल्माद्या उदरे बाधाः शिरोऽर्तिश्च पुनस्तदा ॥ १ ॥
व्यापारो निष्फलस्तस्य किंचित्क्षेत्रादिना भवेत्। तस्य भार्याद्वयं वास्ति किंचिद्भक्तिपरायणम्२॥

अन्योन्यद्वेषिभावाच्च किंचित्प्रीतिकरापरा । मृतवत्सा कथं जाता सत्यं कथय भास्कर ॥ ३ ॥
गर्भस्तस्याः स्थिरीभूतो न प्रसूतिर्न पातनम् । केन पापप्रभावेण कथयस्व दिवाकर ॥ ४ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि शूद्रस्तु क्रयविक्रयकारकः । दानधर्मपरो नित्यं देवदेवपरायणः ॥ ५ ॥
अन्योन्यद्वेषिभावाच्च वर्तते च विधिस्ततः । कश्चिद्विप्रो धर्मपरो वेदशास्त्रार्थसाधकः ॥ ६ ॥
कदाचिद्दैवयोगाच्च भाविनोऽर्थस्य वै बलात् । तद्वित्तं ग्राहयामास शूद्रो म्लेच्छजनस्य च ॥७ ॥
लङ्घनाय मतिं चक्रे ब्राह्मणो भार्यया सह । भर्त्सनैस्तर्जनाद्यैस्तु तद्धनं च तदा हृतम् ॥ ८ ॥
कतिपयैरेव शूद्रेण चान्येभ्यो विनतासुत । म्लेच्छभयसमाकृष्टो ब्राह्मणः क्रोधसंयुतः ॥ ९ ॥
तदर्थमपि सम्भ्रान्त आत्मघातं चकार ह । गर्भयुक्ता च भार्या वै भर्तारं पृष्ठतोऽन्वगात् ॥१० ॥
हृतं तस्यापि तत्सव म्लेच्छराजेन तत्तदा । तावत्काले गते किंचिच्छूद्रो म्लेच्छेन घातितः ॥
प्राप्तस्ततो वै निरये वर्षायुतसहस्रशः । पाचितो नरके घोरे शूद्रो देहेन वै तदा ॥ १२ ॥
पश्चान्मानुषमापन्नो दानधर्मप्रभावतः । इदं जन्म तृतीयं तु शूद्रवंशसमुद्भवम् ॥ १३ ॥
तेन वै कर्मणा युक्तोप्यपत्यं नैव जायते ॥ १४ ॥

अरुण उवाच ।

प्रायश्चित्तं वद स्वामिन् येन पापक्षयो भवेत् । निष्कृतिं सकलां ब्रूहि नारीणां हितकाम्यया १५

श्रीसूर्य उवाच ।

तीर्थस्यावत्सरं सेवामेकचित्तेन दम्पती । श्रवणं हरिवंशस्य विप्रस्योद्वाहनं तथा ॥ १६ ॥
तावन्निष्कृतये भूयः क्रमेणानेन दम्पती । शुभेऽथ भूप्रदेशे तु गोमयाद्युपचर्चिते ॥ १७ ॥
कुर्याद्दष्टदलं पद्मं चित्रवर्णं सुशोभनम् । तन्मध्ये रुक्मिणीयुक्तं माधवं कलशेऽर्चयेत् ॥ १८ ॥
सौवर्णं राजतं पद्मं सायुधं सचतुर्भुजम् । उपचारैः शुभैर्गन्धैर्धूपैश्च कुसुमादिभिः ॥ १९ ॥
जनन्या सहितान्भूयः प्रद्युम्नाद्यांस्तथाऽर्चयेत् । चारुदेहं चारुबाहुं चारुगुप्तं यशस्विनम् ॥ २० ॥
श्रीवत्साङ्कं पीतवस्त्रं सुचारुं पूजयेत्क्रमात् । पूजनं विष्णुसूक्तेन तथा श्रीरसिकोविदैः ॥ २१ ॥
पुष्पैः सुगन्धैर्धूपैश्चाप्यर्चयेद्विष्णुमर्हणैः । तद्विप्रासोथ तद्विष्णोर्मन्त्रैरेतैश्च पूजयेत् ॥ २२ ॥
देवताऽग्निस्तथा विप्र एतं ते वाभिपङ्क्तयः । शतमष्टोत्तरं हुत्वा चरुणा पायसेन च ॥
होमान्ते विप्रभोजान्ते मन्त्रमेतमुदीरयेत् ॥ २३ ॥

मन्त्रः ।

"यन्मया पापभावेन कर्मान्धेन दुरात्मना । म्लेच्छराज्ये च व्यापारस्तथा वै दुष्कृतं कृतम्॥२४॥
ब्राह्मणानां वहु द्रव्यं नीत्वा भर्त्सनताडनैः । भुक्तं तस्मान्महत्प्राप्तं दुःखं नानाभवान्तरे ॥२५॥
स्थिरगर्भमृतापत्यं प्राप्तं तत्कर्म दुःसहम् । तत्तदेनोविनाशाय दानं संप्रददे त्विदम् " ॥ २६ ॥
स्वस्त्यस्त्विति च तत्रोक्ता कोऽदादिति विसर्जनम् । सर्पिष्यात्मानमालोक्य भोजयेदिष्टबान्धवान्
ऐहिकं लक्षणं तस्य शरीरे चोपजायते । दृग्दुःखं दीर्घनिःश्वासो लोचने साश्रुकर्शिते ॥ २८ ॥
काष्ठलोष्टकुशस्त्राद्यैर्घातः स्यादुपलेखनात् । गलाकुलत्वं स्पर्शोऽग्नेस्तादृशो व्रणसंभवः ॥ २९ ॥
स्त्रैणोङ्गे विकृतिर्व्याधिर्मुखे व्रणतिलादिकम् । पैत्राधिर्मातुलानीनां वैधव्यार्तिः स्वस्रादिषु ॥३०॥
स्वकुले प्रेतजा पीडा दुःखं वै पश्वपत्यजम् । कर्मानुसारो वै व्याधिश्चिह्नं तस्य सहायकम् ३१॥
स्वकुले केऽपि वर्त्तन्ते पतिताचारचारिणः । एवं तु लक्षणैर्व्याप्तं प्रायश्चित्तं ततो वदेत् ॥ ३२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाशीत्यधिकचतुःशततमः ॥ ४८८ ॥

श्रीसूर्य उवाच ।

पूर्वं आभीरजा काचिदभूद्भर्तृपरायणा । महद्भिर्गोधनैर्युक्ता गवां पालनतत्परा ॥ १ ॥
गावस्तृषार्ताः सततं प्रपायां प्रेरितास्तया । निदाघकाले संप्राप्ते बहिर्ग्रामाज्जलाशये ॥ २ ॥
अथान्यगावः सततं तस्मिन्नपि जलाशये । शनैः पानं प्रकुर्वन्त्यो जलं शीतलमुत्तमम् ॥ ३ ॥
ताडितास्ता भृशं गावो लगुडेन दृढेन वै । तत्रैका तृषिता वापि वारिता च भृशं तया ॥ ४ ॥
न च त्यक्तं जलं सूत गर्भभारान्विता यतः । तस्मिन्काले तदा सूत पतितो गर्भसंस्थितः ॥ ५ ॥
वत्सस्तत्ताडनाद्दुष्टान्मृतश्चापि च तत्क्षणात् । विचेष्टितमिदं यस्याः सैषा वेश्याङ्गनाऽधुना ॥ ६ ॥
नानाविभूतिसंयुक्ता नानापशुभिरन्विता । सुखभोगधनैश्वर्यभूतिभिश्चान्विता सुत ॥ ७ ॥
प्राग्गोसेवनजात्पुण्यात्सर्वं पुण्यफलं त्विदम् । एवं वर्षत्रयं यावन्मोचयिष्यति वै सुत ॥ ८ ॥
रिष्टमब्दत्रये सूत वालवत्सवधादिह ॥ ९ ॥

अरुण उवाच ।

प्रायश्चित्तं वद स्वामिन् येन पाप क्षयो भवेत् । उपकाराय लोकानां देव त्वं सर्वदर्शकः ॥ १० ॥

श्रीसूर्य उवाच ।

दद्याद्गां कपिलामेकां स्वर्णशृङ्गादिकान्विताम् । विप्राय वेदविदुषे तद्दोषशमनाय च ॥ ११ ॥
सुवर्णार्द्धमितां तद्वल्लेख्यां गां गर्भसंयुताम् । दद्याद्वेदविधिज्ञाय पूर्वपापात्प्रमुच्यते ॥ १२ ॥
भोजयेत्तु यथाशक्त्या विप्रान्वै होमयेत्तिलान् । मुच्यते गर्भजाद्दोषान्नात्र कार्या विचारणा॥१३॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकोननवत्यधिकचतुःशततमः ॥ ४८९ ॥

श्रीसूर्य उवाच ।

बभूव पादजः कश्चिद् गुर्जरे विनतासुत । धर्मकर्मसमायुक्तो देवतातिथिपूजकः ॥ १ ॥
पितृभक्तिरतो नित्यं दानानि विधिपूर्वकम् । दत्तानि तेन विप्रेभ्यो ब्राह्मणेभ्योऽपि शक्तितः॥२॥
दैवाच्छत्रुगृहं गत्वा कृतं कर्म रुषा किल । वैरिपुत्रः पुरा सूत पादभागेषु घातितः ॥ ३ ॥
कुन्तेनापि च तीक्ष्णेन दिवा वै शौर्यकर्मणा । स मृतस्तेन दुःखेन तन्माता ह्येकपुत्रिणी ॥ ४ ॥
पुत्रदुःखान्मृता सापि ददौ शापं हि दारुणम् । यथा पुत्रविहीनाऽहं गच्छामि यमशासनम् ॥५ ॥
तथैव पुत्रशोकार्तो जन्मजन्मनि यास्यति । तथा बहुतिथे काले गतोऽसौ यमशासनम् ॥ ६ ॥
धर्मात्स्वर्गफलं भुक्त्वा पापाच्च नरकं तथा । पूर्वपुण्यप्रभावेण स जातो मुखजोऽधुना ॥ ७ ॥
विपाशानिकटे देशे वृषे चंद्रयुते सुत । श्यामाङ्गो धूसरः क्षीणः प्रभुर्देशाटने रतः ॥ ८ ॥
बहुस्त्रीधनसंयुक्तो मित्रे प्रियवदान्वितः । मानभोगसुखाढ्यश्च मितदो लोभसंयुतः ॥ ९ ॥
धर्मात्सर्वं फलं सूत भृशं पापफलं शृणु । क्रूरचेष्टो महालोभी सदा मात्सर्यसंयुतः ॥ १० ॥
जातपुत्रविहीनोऽसाविह जन्मनि जायते । प्रायश्चित्तं प्रवक्ष्यामि सर्वपापविशोधनम् ॥ ११ ॥
लोकानामुपकाराय शृणु सूत प्रयत्नतः । पलैर्दशमितैः कुर्याद्रागतं वाहुजं सुत ॥ १२ ॥
तन्मातरं च सौवर्णपलैकेन मितां शुभाम् । पत्रे लेख्यां यथाकारां यथोपस्करसंयुताम् ॥ १३ ॥
पूजयित्वा तु गन्धाद्यैः षोडशोपचारकैः । सूर्यभक्ताय शान्ताय तां दद्याद्धि कुटुम्बिने ॥१४॥
पलपञ्चमितं रौक्मं कुर्याद्धरिहरात्मकम् । तथैव गणनाथं च लेख्यं पञ्चोपचारकैः ॥ १५ ॥
संपूज्य विधिवद्दद्यात्सर्वपापविशुद्धये । अष्टाक्षरं तथा मन्त्रं वैदिकं सूर्यदैवतम् ॥ १६ ॥
जपेदष्टसहस्रं तु यथा प्रणवपूर्वकम् । गायत्रीं पञ्चसाहस्रं जपेत्पापविशोधनीम् ॥ १७ ॥

कुर्याद्धोमं दशांशेन पश्याद्ब्राह्मणभोजनम् । एवं कुर्याद्विधानेन प्रायश्चित्तं यथाविधि ॥ १८
न प्राप्नोति तदा रिष्टं पङ्क्तिशाब्दं प्रकीर्तितम् । पञ्चभेदमिताब्दान्तमायुस्तस्य प्रकीर्तितम् ॥१९

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवत्यधिकचतुःशततमः ॥ ४९० ॥

श्रीसूर्य उवाच ।

अज्ञानादवधीद्यश्च पूर्वजन्मन्यजाप्लुतम् । भविष्यत्यत्र पुरुषो ह्यधिकाङ्गयुतस्तदा ॥ १
कस्तूरिकापलं दद्यात्स तत्पापविनाशनम् । अजमेकं च वस्त्राढ्यं मुच्यते महदेनसः ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकनवत्यधिकचतुःशततमः ॥ ४९१ ॥

श्रीसूर्य उवाच ।

लोहहारी च पुरुष इह जन्मनि जायते । वर्वराङ्गारुग्वरोगेण पीड्यते चात्र जन्मनि ॥ १
दद्यात्पलशतं लोहं विधिना पापशोधनम् । प्राजापत्यं चरेदेकं तत्पापनाशनं परम् ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विनवत्यधिकचतुःशततमः ॥ ४९२ ॥

श्रीसूर्य उवाच ।

सर्वैर्मनोरथैर्युक्ता काचिदासीच्छुभानना । प्राग्भवेऽण्डज तत्सर्वं चेष्टितं शृणु सांप्रतम् ॥ १ ॥
नकुलानां विलं कृत्वातितप्तं किल वालुकम् । पूरितं च त्वया सर्वं तद्धातार्थं पतत्त्रिण ॥ २ ॥
मृतः स तेन दाहेन नकुलः सकुलः खग । साऽपि मृत्युवशं प्राप्ता भुक्ता तु यमशासनम् ॥ ३ ॥
पूर्वं शतद्रुके देशे शश्वदत्र च पर्वते । पूर्वं राजकुले जाताऽत्रापि राजकुले सुत ॥ ४ ॥
प्राग्दानप्रभवात्पुण्यादथो पापफलं शृणु । सर्वे तद्वंशजाः सूत तदग्रे मरणं गताः ॥ ५ ॥
जीवनं चात्र तस्याश्च वर्षाण्यष्टोत्तरं शतम् । न मुच्यते महापापाद्दृढाज्जन्मत्रयेऽपि वा ॥ ६ ॥
कुरुक्षेत्रादिवासाच्च पापं नश्यति सांप्रतम् ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिनवत्यधिकचतुःशततमः ॥ ४९३ ॥

श्रीसूर्य उवाच ।

लोहं हरति यान्यस्य सूत बुद्धिविवर्जिता । अत्र जन्मनि सा सुत वर्वराङ्गान्विता भवेत् ॥ १ ॥
दद्याच्छतपलं लोहं ससुवर्णं द्विजातये । मुच्यते पापजाद्रोगाद्वर्वराङ्गाभिधात्सुत ॥ २ ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्णवत्यधिकचतुःशततमः ॥ ४९४ ॥

श्रीसूर्य उवाच ।

मोहात्प्राग्याऽवधीत्सूत नार्यजं विधिवर्जितम् । साङ्गाधिकात्र जनुषि भविष्यति वरानना ॥ १ ।
अज दद्याद्विधानेन कस्तूरीपलसंयुतम् । सवस्त्रं वेदविदुषे तद्दोषशमनं त्विह ॥ २ ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचनवत्यधिकचतुःशततमः ॥ ४९५ ॥

अरुण उवाच ।

क्षात्रे कुले समुत्पन्नो गुल्मवातोदरामयः । वित्तघ्नः कृपणश्चैव सहोदरसमन्वितः ॥ १
समुपेतो धनैर्धान्यैः किंचिद्व्यापारवान्भुवि । दायादाच्छत्रुवत्पीडा मिथः क्लेशश्च जायते ॥ २
नारीद्वयं च तस्यापि संजातं चात्र जन्मनि । बहुपुत्र्यः प्रसूताश्च न तु पुत्रः प्रजायते ॥ ३
कदाचिज्जातमात्रस्तु मृतः पुत्रोऽग्निमासकः । एका पुष्पवती भार्या संजाता तस्य भास्कर ॥ ४
केन कर्मविपाकेन सत्यं कथय मे विभो ॥ ५ ॥

श्रीसूर्य उवाच।

पूर्वजन्मनि क्षात्रस्तु किंचिद्भूमिपतिस्तथा। अर्थबुद्धिर्यौवनाढ्यो ग्रामाधीशः प्रतापवान् ॥ ६ ॥
ग्राममध्ये स्थितिं चक्रे ब्राह्मणो ज्ञानसत्तमः। पुत्र्यः पञ्च तथा सप्त ह्यपुत्रो वित्तसंयुतः ॥ ७ ॥
कालेन मृत्युमापन्नो धनलुब्धो निरामयः। तस्य भार्या महासाध्वी साहसं कृतवान्खग ॥ ८ ॥
क्रिया कर्मविधानार्थं तया दत्तं धनं खग। मृता पुनः क्षात्रियेण तस्य नीतं धनं सुत ॥ ९ ॥
निराधारा सुताहीनाः पित्रा मात्रा सुदुःखिताः। सर्वस्वहरणाद्वापि मृताः कन्या इतस्ततः ॥१०॥
मातृपक्षे गता काचित्काचिद्वै पैतृके खग। उद्वासस्तद्गृहस्यात्र सञ्जातः किल कर्मणा ॥ ११ ॥
यो वै क्षात्रगृहे पुत्रो ब्राह्मणः स तु जायते। योऽत्र न व्यो मृतः पुत्रो धनलुब्धः स एति वै॥१२॥
एवं पुत्र ऋणीभूते तत्काल ऋणमाप्यते। ब्रह्मस्वहरणादेवं पुत्रपुत्रीमृतिः सदा ॥ १३ ॥
पुरा कृतानि कर्माणि भुज्यन्ते चेह मानवैः। तेन कर्मविपाकेन कन्यापत्यं मृतं सुत ॥ १४ ॥
तस्य पापस्य नाशाय निष्कृतिः क्रियते शुभा। शुभे त्ववसरे प्राप्ते ह्ययने शुभवासरे ॥ १५ ॥
प्रारभेद्धरिभक्तश्च संवत्सरविधिं त्विह। प्रत्यहं परमेशानं विष्णुमव्यक्तमव्ययम् ॥ १६ ॥
पौरुषेणेह सूक्तेन अर्चयेन्मासमेव च। कुंकुमागरुकर्पूरैश्चन्दनैस्तुलसीदलैः ॥ १७ ॥
अर्चयेद्विविधैः पुष्पैरुपचारैः पृथक्पृथक्। भौमाप्यनाभसस्तेजोवायव्यैः पञ्चभिस्तथा ॥ १८ ॥
एवं व्रतपरा नारी भर्तृभक्तिपरायणा। अर्चयन्ती हरिं पूर्णं वर्षावधिमथाचरेत् ॥ १९ ॥
शुभे मासे शुभे पक्षे चैकादश्यामुपोषिता। शुभनक्षत्रयुक्तायां द्वादश्यां पुत्रकाम्यया ॥ २० ॥
पूर्ववद्धरिमभ्यर्च्य ऋचां षोडशभिः प्रभुम्। विधिवद्वह्निमास्थाय ह्यर्चयेद्वैष्णवं चरुम् ॥ २१ ॥
आज्यभागावसानेन कपिलाज्याहुतिर्हविः। पौरुषेण च सूक्तेन यावत्षोडसंख्यया ॥ २२ ॥
अश्वत्थसमिधस्तिस्रो जुहुयात्षोडशैव तु। पुनराज्यं ततो हुत्वा जुहुयाच्च चरोरपि ॥ २३ ॥
होमान्ते द्विजभोजान्ते दानमेतत्समाचरेत्। हिरण्यभूमिवासांसि धेनुं वत्ससमन्विताम् ॥ २४ ॥
विप्रस्योद्वाहनं कृत्वा कन्यां सालंकृतामपि। दक्षिणां प्रतिपाद्याथ च्छलकौटिल्यवर्जिताम् ॥२५॥
प्राश्नीयान्तं हविःशेषं सह पत्न्या हरिं स्मरेत्। इति कृत्वा विधिं नारी पुत्रं प्राप्नोति वष्णवम्॥२६॥
सुभगा च सुरूपा च भवेद्विगतकिल्बिषा। ऐहिकं लक्षणं चिह्नं पूर्वकर्मानुसारतः ॥ २७ ॥
गुल्मार्श उदरे बाधा गुदान्तव्रणार्तयः। वातरक्ताक्षिशिरसो नेत्रकर्मार्तितो व्रणः ॥ २८ ॥
स्तनोपगौरवं दद्रुर्गमने पादवैकृतम्। जनश्रुतिरभूत्तत्र ह्रुवते कारणं विना ॥ २९ ॥
हानिस्तु सर्ववस्तूनां द्रव्यनाशनजं भयम् ॥ ३० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षण्णवत्यधिकचतुःशततमः ॥ ४९६ ॥

श्रीसूर्य उवाच।

अथ शूद्रकुले पूर्वमासीत्पुण्या वरांगना। हृद्या दानरता जाता कुरुक्षेत्रे पतत्रिण ॥ १ ॥
सर्वैः सुखैः सदोपेता सर्वसंपत्तिसंयुता। तया कृतं महापापं भाविनोऽर्थस्य वै बलात् ॥ २ ॥
समीपे वासितस्यास्य ब्राह्मणस्य नवं गृहम्। निर्दग्धं चाग्निदाहेन वैरिभावे पतत्रिण ॥ ३ ॥
तत्र दग्धा महाभाग गौरपापा गृहान्तगा। कृत्वैतद्दुष्कृतं कर्म भुक्त्वा तु नरकान्सुत ॥ ४ ॥
दानधर्मकृतात्पुण्यात्सात्र जाता हि बाहुजा। माथुरे मण्डले पुण्ये वृषलग्रोपलक्षिते ॥ ५ ॥

---

१ क्षत्रिणं चिन्तयित्वैव प्राप्तं जन्म सुतस्य न इति स्यात्। २ गता कन्या इति स्यात्। ३ तोऽर्हणः— इति ख०. पु०।

सुखदुःखसमाक्रान्ता संततेर्जातनाशतः । दुःखैरनेकैर्युक्तात्र मध्यभावे खगाधिप ॥ ६
प्रायश्चित्तं परं चास्या गयायां पितृतर्पणम् । कुरुक्षेत्राधिवसनं प्राक्पापानां विनाशनम् ॥ ७
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः सप्तनवत्यधिकचतुःशततमः ॥ ४९७ ॥

श्रीसूर्य उवाच ।

चक्रपादरुजा युक्तश्चात्र जन्मनि जायते । पूर्वजन्मनि यो मोहाद्धत्तेच्छानं पतत्रिण ॥ १
निष्कत्रयं प्रदातव्यं सुवर्णं वेदपारगे । दानेनानेन विधिना पूर्वपापपलोदनम् ॥ २
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टनवत्यधिकचतुःशततमः ॥ ४९८ ॥

श्रीसूर्य उवाच ।

यः शूद्रं घातयेन्मोहात्पूर्वजन्मनि मानवः । दन्तपातनजाद्रोगात्पीडामाप्नोति निश्चयात् ॥ १
दद्याद्धेनुं सवत्सां च सर्वालंकारभूषिताम् । प्राजापत्यं चरेदेकं विधिना रोगनाशनम् ॥ २
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनपंचशततमः ॥ ४९९ ॥

श्रीसूर्य उवाच ।

या नारी मोहतो हन्याच्छानं हि गरुडाग्रज । पूर्वजन्मनि सा चात्र चक्रपादेन पीड्यते ॥ १
तथा तत्पापशुद्ध्यर्थं स्वर्णं निष्कत्रयं सुत । देयं विप्राय विधिना चक्रपादविनाशनम् ॥ २
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचशततमः ॥ ५०० ॥

श्रीसूर्य उवाच ।

शूद्रघातकरी पूर्वं या काचित्पापमोहिता । क्षत्रजन्मनि दुःखार्ता दन्तपातजादकात् ॥ १ ॥
विधिवद्धेनुदानाच्च ब्राह्मणाय कुटुम्बिने । प्राजापत्याद्व्रतादेकात्तस्मात्पापात्प्रमुच्यते ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकाधिकपंचशततमः ॥ ५०१ ॥

श्रीसूर्य उवाच ।

कश्चिदासीत्पुरा सूत चारणो ज्ञानदुर्बलः । शिवभक्तिपरो नित्यं देवतातिथिपूजकः ॥ १ ॥
देशे मालवके पुण्ये स्थले पूर्वभवेऽण्डज । तत्र दानानि दत्तानि ब्राह्मणस्य करग्रहे ॥ २ ॥
तेन कचिन्महाभाग पापमाचरितं त्विदम् । स्वजात्यां वै धृतो गर्भः काममुग्धेन निश्चितम् ॥३॥
यत्ने कृतेऽपि तत्रैव नासीद्गर्भस्य पातनम् । मृता सा तेन दुःखेन गर्भपातेन चाण्डज ॥ ४ ॥
एवं बहुतिथे काले गतः स यमशासनम् । भुक्त्वा पापफलं दुःखं पुण्याल्लोकान् शुभानिह ॥ ५ ॥
पूर्वपुण्यप्रभावेण स जातः पादजोऽधुना । गोदावर्याः समीपे तु देशे रम्ये जलाशये ॥ ६ ॥
स रक्तकृष्णो मतिमान् दीर्घो मध्यो पृथुः सुधीः आदिभागे धनी भोगी मध्यमेऽन्त्येऽतिसौख्यभाक्
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । चिन्तातिसहितश्चात्र दाने स्वल्पमतिः शठः ॥८॥
स्वजात्यां वीर्यदानाच्च जातपुत्रविनाशकः । लक्ष्मैतदण्डजश्रेष्ठ जन्माङ्गात्षष्ठभावगः ॥ ९ ॥
भौमः सुतेश्वरैः पापग्रहैर्युतनिरीक्षितः । लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥ १० ॥
पलद्वयमिता कार्या बाहुजा गर्भसंयुता । सर्वावयवसंयुक्ता सौवर्णी भूषणान्विता ॥ ११ ॥
तदर्धार्धमिता वापि त्रिषु वितानुसारतः । संपूज्य वेदविदुषे दद्याद्दोषापनुत्तये ॥ १२ ॥
मासैः सप्तमितैर्देयो भौमः स्वर्णमयः शुभः । गायत्रीमयुतं जप्त्वा त्र्यम्बकं तु सहस्रकम् ॥१३॥

होमयेत्तदशांशेन कपिलां गां प्रदापयेत् । य एवं कुरुते सूत प्रायश्चित्तावनाशनम् ॥ १४
तस्य पुत्रविवृद्धिश्च जन्मन्यत्रैव जायते । नैवं करोति यो मोहाल्लोभात्पापविशोधनम् ॥ १५ ॥
न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः । आयुरष्टाद्विवर्षाणि प्रायश्चित्ते कृतेऽधुना ॥ १६ ॥
प्रायश्चित्ते कृते रिष्टं पञ्चाशन्मितिकेऽब्दके ॥ १७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायो द्व्यधिकपंचशततमः ॥ ५०२ ॥

श्रीसूर्य उवाच ।

यश्च चक्षुं महाभाग हन्यान्मोहान्नराधिपः । चक्षुमण्डलरोगार्तः सोऽत्र जन्मनि जायते ॥ १ ॥
निष्कद्वयसुवर्णस्य कृत्वात्र नकुलं शुभम् । चक्षुरोगविनाशार्थं ब्राह्मणाय प्रदापयेत् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायस्त्र्यधिकपंचशततमः ॥ ५०३ ॥

श्रीसूर्य उवाच ।

काचिच्चारणजा नारी चक्षूव प्रियवादिनी । व्रतदानरता साध्वी पूर्वजन्मनि चाण्डज ॥ १ ॥
तया ग्रामात्ततो गत्वा निर्दग्धं गह्वरं वनम् । निर्दग्धा बहवस्तत्र जीवास्तस्याश्रयं गताः ॥ २ ॥
ततो बहुतिथे काले प्राप्य तज्जनितं व्रतम् । तत्र दानवशात्पूर्वादत्र सा पादजा स्मृता ॥ ३ ॥
जीवघातात्तथा पूर्वात्पापादत्रैव जन्मनि । जातसंततिहीना सा कुष्ठरोगेण पीडिता ॥ ४ ॥
प्रायश्चित्तं प्रवक्ष्यामि येन संपद्यते सुखम् । गृहवित्तषडंशेन देया जीवाः सुवर्णजाः ॥ ५ ॥
घटयित्वा विधानेन नानारूपा गृहोरगाः ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायश्चतुरधिकपंचशततमः ॥ ५०४ ॥

श्रीसूर्य उवाच ।

शशघाती महाभाग कुब्जकर्णी प्रजायते । निष्कृतिं तस्य पापस्य शृणुष्वात्र पतत्रिण ॥ १ ॥
शक्त्या सोपस्करां दद्याद्वेदवेदाङ्गपारगे । तस्माद्दोषात्प्रमुच्येत नात्र कार्या विचारणा ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः पंचाधिकपंचशततमः ॥ ५०५ ॥

श्रीसूर्य उवाच ।

कश्चिच्छूद्रोऽभवत्पूर्वं दानधर्मक्रियापरः । द्विजानां पूजको दक्षः सिन्धुमण्डलजोऽण्डज ॥ १ ॥
देवद्रव्यविहीनोऽभूत्तत्कृतं कर्म चाधमम् । स्वपत्नी स्थापिता पण्यशालायां हि पतत्रिण ॥२॥
पण्यस्त्रीकर्मतश्चासौ चकार चोपजीवनम् । ततो मृत्युवशं प्राप्तो भुक्त्वा तत्पापजं फलम् ॥ ३ ॥
प्राग्दानवशतश्चात्र जन्मन्यस्ति च पर्वते । शूद्राधमोऽथ वै षण्ढः पूर्वपापाच्छृणुष्व तत् ॥ ४ ॥
निष्कृतिस्तस्य पापस्य नोक्ता पापाद्दृढात्सुत ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडधिकपंचशततमः ॥ ५०६ ॥

श्रीसूर्य उवाच ।

या नारी नकुलं पूर्वं निहन्ति विनतासुत । सात्र जन्मनि रोगेण चक्षुमण्डलजेन च ॥ १ ॥
पापोद्भवेन सततं पीडिता भवति ध्रुवम् । तद्रोगनाशनं दद्याद्दृक्षुं निष्कद्वयस्य च ॥ २ ॥
ब्राह्मणान्भोजयेत्पश्चात्पूर्वपापापनोदनम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्ताधिकपंचशततमः ॥ ५०७ ॥

अरुण उवाच ।

कश्चित्क्षात्रकुले जातो वातरोगेण पीडितः । नानासंविभवा बाधा उदरार्तिः प्रजायते ॥ १
मेहार्त्तः सर्वदा सोऽयं नेत्रे तोदो विरश्मिता । कटिपृष्ठोरुवंशेषु बाल्ये स्याद्ग्रहणीगदः ॥ २
तस्य भार्या सदाचारा विज्ञेया व्रतचारिणी । सौभाग्यसुखसंपन्ना पितृमातृसुखोज्झिता ॥ ३
केन संततिहीना च कर्मणा लिप्यते कथम् ॥ ४ ॥

श्रीसूर्य उवाच ।

पूर्वं वर्णान्तरे जातस्तस्करो वस्त्रहारकः । निषादैः सह संभूय चौर्यकर्माणि तत्परः ॥ ५
दिनानामन्तरे प्राप्ते कश्चिद्विप्रः समागतः । गृहीतं तेन सर्वस्वं यत्किंचिच्चार्जनं कृतम् ॥ ६
तेनैव निहतो विप्रस्तस्करेण दुरात्मना । तस्करोऽसौ मृतश्चापि जातश्च वनपन्नगः ॥ ७
स पश्चान्नरके घोरे पतितोऽयुतसंख्यया । पश्चान्मानुषमापन्नः किंचित्पुण्यप्रभावतः ॥ ८
स्वर्णकारगृहे जातः पूर्वजन्मनि मानद । इदं जन्म चतुर्थं तु वन्ध्यत्वं चोपजायते ॥ ९
व्यभिचारवशात्सोऽपि तस्करः पूर्वजन्मनि । तेन कर्मविपाकेन स्त्रीपुंसोर्जातवानिह ॥ १०
पुत्रहानिर्भवेत्तस्य वन्ध्यत्वं जन्मजन्मनि ॥ ११ ॥

अरुण उवाच ।

शुभे त्ववसरे प्राप्ते शुभतीर्थादिसंगमे । विधिवद्विहितं पूर्वं कृतं स्मृत्याभिभाषितम् ॥ १२ ।
विप्रस्योद्वाहनं कृत्वा गृहदानं यथाविधि । धनधान्यादिकं दत्त्वा तोषयेद्विप्रयाजकान् ॥ १३ ।
विष्टिपाते व्यतीपाते संक्रान्तौ ग्रहणे तथा । पुण्याहे विधिना तिष्ठेदनपत्यावनाशनम् ॥ १४ ।
सुशुभे भूप्रदेशे तु समे कम्बलविस्तृते । विदधीत तिलद्रोणैस्त्रिभिः पर्वतमुत्तमम् ॥ १५ ।
परितो रत्नपात्रं तु द्रोणमानं सतण्डुलम् । विदध्यात्पर्वतावेव देवद्रुमविभूषितम् ॥ १६ ।
ततस्तौ दम्पती शुद्धौ स्नात्वाऽऽश्वाहतवाससी। दधानौ शुभवेषाढ्यौ चिन्तयानौ प्रजापतिम्॥१७.
सूर्योदये ततो यत्नात्कुर्यान्मूर्तिं प्रजापतेः । सुवर्णशुद्धवर्णस्य निष्कद्वयविनिर्मिताम् ॥ १८ ।
हेमयज्ञोपवीतां च साक्षमालाकमण्डलुम् । अदितेरपि केयूरहारग्रैवेयभूषिताम् ॥ १९ ।
तदर्धार्धविभागेन तनौ तस्याः शुभाकृतिम् । स शैवीमर्चयेन्मूर्तिं विष्णोर्वामनरूपिणः ॥ २० ।
तन्मूर्तित्रितयं सम्यक्कृतसंस्कारमर्चयेत् । कृत्वा प्रतिष्ठितप्राणं ज्ञानकर्माथ पुंस्त्रियोः ॥ २१ ।
बालक्रीडाधरं विष्णुं वामनं प्रतिचिन्तयेत् । मातरं द्रष्टुमिच्छन्तं हरिं तत्स्तनकाङ्क्षया ॥२२ ।
ततस्तदाश्रमतटात्सुमेरोऽस्तिलपर्वतात् । वामनमनुगच्छन्तीं मार्गैस्तत्पदभूषितैः ॥ २३ ।
अदितिं तमपश्यन्तीं विरहाकुलचेतसा । रुदतीमिति तद्द्रष्टुमाह्वयन्तीं परान्मुनीन् ॥ २४ ।
एवं ध्यात्वाथ तां मन्त्रैर्मन्त्रार्थादितलक्षणाम् । पुष्पस्रग्धूपगन्धाद्यैरर्चयेदतिविह्वलाम् ॥ २५ ।
तद्विप्रासोऽथ तद्विष्णोर्विष्णोः कर्माणि पश्यतः। ततस्तां वैष्णवीं मूर्तिमातुरुत्सङ्गगामिनीम्॥२६।
कृत्वा तस्याः प्रतिष्ठां तां लब्धपुत्रां विचिन्तयेत् । अपश्यन्तमिमं मन्त्रं मन्त्रार्थकृतलक्षणम्॥२७।
संयुक्तः सहितां देवीमर्चयेद्विविधैर्गुणैः । ततो ब्राह्मणमध्ये तु समाहूय गुणान्विताम् ॥ २८ ।
तस्मै तां प्रतिमां दद्यात्सपुत्रामदितेः सुताम् । यन्मया निहतो विप्रो धनं हृत्वा घने वने ॥२९।

---

१ तस्क्रियावस्तुहारक इति—खपु० । २ माह्वयन्तीं च तान्मुनीन् इति—ख० पु० ।

संस्कारासंगमे पापं प्राप्तं मे चोल्वणं महत्। तस्य पापस्य नाशाय दानमेतद्ददाम्यहम् ॥ ३० ॥
सौवर्णीं प्रतिमामेनामनघेयं भवेदिति। भोजयेच्च शतं विप्रान् सर्पिष्यात्मानमीक्षयेत् ॥ ३१ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायोष्टाधिकपंचशततमः ॥ ५०८ ॥

श्रीसूर्य उवाच।

उलूकघातेन पूर्वं जन्मन्यत्र च पुत्रक। पाण्डुरोगेण सततं पीड्यते वै: भवेद्भृशम् ॥ १ ॥
कस्तूरिकापलं चैकं दद्याद्विप्राय पर्वणि। उलूकघातजं पापं सर्वं नश्यति तत्क्षणात् ॥ २ ॥
तत्पापस्योपशमने पाण्डुरोगो विनश्यति ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायो नवाधिकपंचशततमः ॥ ५०९ ॥

श्रीसूर्य उवाच।

या नारी घातयेत्काचिदुलूकं पूर्वजन्मनि। पाण्डुरोगेण सततं पीड्यते चात्र जन्मनि ॥ १ ॥
दद्यादत्र विधिज्ञाय पलमेकं पतत्रिण। कस्तूरिकाया विप्रस्य पाण्डुरुङ्नाशनं परम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायो दशाधिकपंचशततमः ॥ ५१० ॥

श्रीसूर्य उवाच।

वैनतेय महाभाग शृणु प्राक्कर्मणः फलम्। कश्चिच्छ्रेष्ठो कलिङ्गेऽभूद्विजो धर्मक्रियापरः ॥ १ ॥
बहुस्त्रीबलसंयुक्तो गोधनैश्च समन्वितः। गङ्गायां कृतवाञ्श्राद्धं श्रद्धाविधिसमन्वितम् ॥ २ ॥
सततं कृतवान्पापं काममोहाच्चसंशयः। ज्येष्ठां त्यक्त्वा ऋतुप्राप्तां धर्मिष्ठां प्रियवादिनीम् ॥३॥
रतिं ददौ कनिष्ठायां याचितः स्त्रीविमोहितः। अजीवत्स चिरं कालं पश्चान्मृत्युमवाप्तवान् ॥ ४ ॥
शुभाशुभफलं भुक्त्वा पापान्नरकयातनाः। गयाश्राद्धप्रभावेण जातोऽत्रापि च वै द्विजः ॥ ५ ॥
देशे रम्यस्थले पुण्ये नदे लोहितसंज्ञके। मध्यरूपः प्रियायुक्तो धनबुद्धिसमन्वितः ॥ ६ ॥
शुभादिदं तथा पापात्ततो दुःखसमन्वितः। मुलक्ष्मैः शास्त्रमानैश्च प्रलेपैर्दुष्टभक्षणैः ॥ ७ ॥
संवाहनैस्तथा पानैरन्यैर्वा वस्तिकर्मभिः। गर्भस्य पातनोपायमकरोत्स विमोहितः ॥ ८ ॥
पुंस्कृतं नैव तत्कर्म स्त्रीकृतं नात्र संशयः। नारी जन्मान्तरे प्राप्ते न सा गर्भं विभर्ति हि ॥ ९ ॥
पूर्वं वैश्यकुले जाता सपत्नीसहिता खग। अनया चेर्ष्यया चैव संततेर्नाशनाय च ॥ १० ॥
औषधैश्छेदनाद्यैस्तु तस्यार्थे कल्पितं गदम्। सपत्न्यै प्रेरयामास विविधं चैव तं गदम् ॥ ११॥
तया वा त्वृतुभावाच्च शीघ्रं पीतं तदौषधम्। पुष्पं प्रणाशितं तस्यास्तस्मिञ्जन्मनि मानद ॥१२॥
ऋतावृतौ च संप्राप्ते जाता सा विविधा रजाः। जाता वै वेदना नित्यमसृग्वातोदरामयः ॥१३॥
पुष्पे नष्टे फलं नष्टं कदाचिद्गर्भपातनम्। एतत्कर्म कृतं चैव विविधं गर्भदोषकृत् ॥ १४ ॥
तथापि फलहन्तृणां द्वितीयं सुकृतं चरेत्। ऋजुभावाद्दुष्टबुद्ध्या कृतं वै पूर्वजन्मनि ॥ १५ ॥
तेन वै कर्मणा वत्स विविधं पुष्पबन्धनम्। गर्भाशयमविश्रित्य स्रवते शोणितं बहु ॥ १६ ॥
छिद्यन्ति इव चान्त्राणि सूचीभिरिव तुद्यते। वेदना या पुरा भगवन्स्त्रीणां गर्भनिपातने॥ १७ ॥
यावत्कालप्रदेशीयं तासां गर्भमपातयत्। तावानेव च तद्गर्भः पतेद्वा नाशसंभवः ॥ १८ ॥
एवं तु लक्षणैर्ज्ञात्वा कर्माणि स्त्री समाचरेत्। एकवासौ विधिं चैव दम्पती तीर्थसंगमे ॥ १९ ॥

---

१ आर्षत्वात्सन्धिदोष उपेक्षणीयः।

सुशुभे भूप्रदेशे तु पुराणोक्तविधानतः । एतन्नाशाय दुष्टस्य प्रायश्चित्तमिहैनसः ॥ २
प्रौष्ठपद्यां तृतीयायां शुक्लायां व्रतमाचरेत् । यत्नेन गार्भिकं संज्ञमुपोषणपरायणः ॥ २
पुष्पैर्नानाविधैः शुभ्रैरर्चयेद्गिरिजाप्रियम् । केतकैर्गर्भसंयुक्तैश्चम्पकैः कुमुदोत्पलैः ॥ २
सौवर्णीं राजतीं ताम्रीं मूर्तिं गौर्याः प्रकल्पयेत् । हारनूपुरमुकुटकुण्डलाभरणादिकम् ॥ २
नैवेद्यैः शुभ्रकासारमोदकापूपपायसैः । उपतिष्ठेत विधिवद्भवानीं प्रियवल्लभाम् ॥ २
पतिपुत्रवतीभिस्तु स्त्रीभिः सह शुचिस्मिताम् । रात्रौ जागरणं कुर्याद्गीतनृत्यादिपूर्वकम् ॥ २
फलैर्नानाविधैरर्घ्यं दद्यान्मंत्रपुरःसरम् । फलपुष्पाक्षतोपेतैरञ्जलिं मूर्ध्नि निक्षिपेत् ॥ २

मन्त्रः ।

"नमस्तेऽस्तु महादेवि नमस्ते गिरिशप्रिये । गृहाणार्घ्यमिमं देहि पुत्रान्मह्यं यशस्विनः" ॥ २
पतिपुत्रवती नारी गिरिजावत्प्रसूयते । एवं रात्रौ विधानेन पूजयेत्परमेश्वरीम् ॥ २८
ततः प्रभाते विमले कृतप्रातःक्रिया सती । देवीमुद्दिश्य विधिवद्भोजयेत्षोडश स्त्रियः ॥ २९
नानाविधैर्भक्ष्यभोज्यैर्ब्राह्मणानथ षोडश । प्रत्येकं वैणवं पात्रं सप्तधान्यसमन्वितम् ॥ ३०
सौभाग्याष्टकसंयुक्तं वस्त्रयुग्मेन संयुतम् । दातव्यं गिरिजाप्रीत्यै पुत्रसौभाग्यकाम्यया ॥ ३१
सगर्भां च वृषोपेतां सितां गां वस्त्रसंयुताम् । सहिरण्यां ततो दद्याद्द्विजाय गुणशालिने ॥ ३२

मन्त्रः ।

"अपातयं पुरा गर्भं दुष्टस्त्रीणामुपार्जितम् । पापौघं वन्ध्यताहेतुस्तस्मान्मुञ्चाथ चाम्बिके ३३
तव दानेन पुत्रा मे भवेयं सुभगा सती" । इमं मन्त्रं समुच्चार्य दत्त्वा विप्रं विसर्जयेत् ॥ ३४
एवं व्रतपरायास्तु गर्भपातो न जायते । मुच्यते पुत्रपौत्राद्या स्वपत्या सह मोदते ॥ ३५
न लभेद्गर्भपातं सा पतिपुत्रा सुखं च न । तृतीये वा चतुर्थे वा मासि गर्भस्य धारणम् ॥ ३६
रजस्तस्य पलाभ्यां वै कोशं गर्भाशयाकृतिम् । निष्कं च स्वर्णगर्भं च कृत्वा दत्त्वा द्विजन्मने ३
गर्भपातं प्रकुर्वत्यां मया प्राक्तनजन्मनि । यदयं वन्ध्यकृत्प्राप्तं तस्मान्मुच्ये पतिव्रता ॥ ३८
जन्मजात्यादिकं वत्स तव चेदिह कर्मणाम् । इदं कर्म चतुर्थं तु भूमिदेवकुलोद्भवे ॥ ३९
सपत्नीसहिता चैषा न सा गर्भस्य दोषकृत् । तस्येदमपि संचिन्त्य लक्षणानीह जन्मनि ॥ ४०
यस्याः प्राक्पतितो गर्भः सपत्न्याः पतिवर्जितः । दीनानाथाविरोधः स्यात्सविरोधा तथा सुतः ४
अनुमन्त्रिप्रयोक्ता सा पितृमातृसुखोज्झिता । बन्धुसंततिदुःखी स्यान्मर्यादाद्यनवस्थितिः ॥ ४२
शोकः स्यादुदरे बाधा तावत्प्लीहादिविभ्रमः । अन्तरास्यन्दमानो वा गर्भः सत्त्वोपलक्षितः ॥ ४३
पाणौ मुष्टितलाघाताज्जानुना सक्थिजानुनी । दोषजो वाग्मिजो वापि शस्त्रजोन्मादजोऽपि वा ४
ब्राह्मणान् भोजयेद्भक्त्या सर्पिष्यात्मानमीक्षयेत् ॥ ४५ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः एकादशाधिकपञ्चशततमः ॥ ५११ ॥

श्रीसूर्य उवाच ।

सीमावादरतः कश्चिद्ब्राह्मणः पूर्वजन्मनि । तेन तत्र द्विजः सूत घातितो भूमिलोभतः ॥ १ ॥
सहायपञ्चयुक्तेन कृतं कर्मातिदारुणम् । तत्पापजान्महाघोरान्नरकान्प्राप्य दारुणान् ॥ २ ॥
तथा तिर्यक्त्वं च सुत विभुज्याधर्मतः स्वयम् । कर्मक्षयेऽथ पुण्यात्प्राक् सोऽत्र जातो हि बाहुजः ॥ ३ ॥
क्षयरोगयुतः सूत कृशो दुःखातुरो भृशम् । लग्ने कुम्भाभिधे सूत भौमचन्द्रयुतेऽण्डज ॥ ४ ॥

रिष्टं षष्टिमिते वर्षे जायते कृतनिष्कृतेः। सहायाः पूर्वजा ये तु तेषां वक्ष्यामि लक्षणम् ॥ ५ ॥
तदग्रे ते मृताश्चात्र पुत्राः क्षयरुजान्विताः। रिष्टेन चायुषो भङ्गो दृढपापान्न निष्कृतिः ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वादशाधिकपंचशततमः ॥ ५१२ ॥

श्रीसूर्य उवाच।

राजपुत्रोऽभवत्कश्चिद्धर्मशास्त्रार्थकोविदः। गत्वा शत्रुपुरं सूत कदाचिन्मदसंयुतः ॥ १ ॥
ददाह तत्पुरं शत्रोस्तत्क्षणे लुण्ठितः पुनः। तत्रैको ब्राह्मणो दग्धो वृद्धो विद्याविशारदः ॥ २ ॥
पापमाचरितं तेन चाज्ञानाद्ब्रह्मघातजम्। अथो यमाज्ञया सर्वा भुक्त्वा नरकयातनाः ॥ ३ ॥
पुण्यशेषादथाऽत्रापि स जातः क्षत्रियाधरः। देशेऽयोध्याभिधे गौरो लघुर्दक्षो महोद्यमी ॥ ४ ॥
युवभावे महाभाग राजयक्ष्मप्रपीडितः। ब्रह्महा क्षयरोगी स्यादिति वेदविदो विदुः ॥ ५ ॥
निष्कृतिं तत्प्रवक्ष्यामि यां कृत्वा मुच्यतेऽधुना। कार्या सुघटिता देव मूर्तयस्तु यथोदिताः ॥ ६ ॥
ब्रह्मविष्णुमहेशानां सर्वरोगविनाशकाः। सुवर्णजास्तथा कार्याः कदलीपत्रसंयुताः ॥ ७ ॥
यथावित्तानुसारेण वित्तशाठ्यं विवर्जयेत्। देयास्ता विप्रमुख्येभ्यः क्षयरोगोपशान्तये ॥ ८ ॥
ब्राह्मणान्भोजयेच्छक्त्या होमयेच्च जपेत्तथा। गायत्रीं विधिना सूत पूर्वपापापनुत्तये ॥ ९ ॥
एवं कृते महाबाहो क्षयस्तस्यात्र शाम्यति। नैवं कुर्यात्तु यो मोहाद्रिष्टं विंशन्मितेऽब्दके ॥ १० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायस्त्रयोदशाधिकपंचशततमः ॥ ५१३ ॥

श्रीसूर्य उवाच।

या योषिदाचरेत्कामात्पूर्वजन्मनि निश्चयात्। ब्रह्महत्याप्रथात्रैव सा ज्ञेया क्षयरुग्युता ॥ १ ॥
न तस्याः पापशमनं मयोक्तं च पतत्रिण। महापापकृताद्रोगान्मृत्युरेव न संशयः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्दशाधिकपंचशततमः ॥ ५१४ ॥

श्रीसूर्य उवाच।

स्वसृघाती च पुरुषः पूर्वजन्मनि मानद। बधिरो जायते त्वत्र प्रायश्चित्तं च तच्छृणु ॥ १ ॥
चान्द्रायणं व्रतं कुर्यात्सुवर्णपलसंयुतम्। पुस्तकं विधिवद्दद्यात्तस्मात्पापात्प्रमुच्यते ॥ २ ॥
भोजयेच्च यथाशक्त्या होमयेच्च स्वशक्तितः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः पंचदशाधिकपंचशततमः ॥ ५१५ ॥

श्रीसूर्य उवाच।

या काचिदाचरेन्नारी पापं प्राग्ब्रह्मघातजम्। अज्ञानादत्र जनुषि क्षयरुक्पीडिता हि सा ॥ १ ॥
महापापकृताद् घोराद्यस्मात्सर्वस्वदानतः। क्षयरोगात्प्रमुच्येत नात्र कार्या विचारणा ॥ २ ॥
प्रयागे मकरस्थेऽर्के स्नानादत्रैव जन्मनि। काश्यां वासात्तथा सूत मुच्यते ब्रह्महत्यया ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः षोडशाधिकपंचशततमः ॥ ५१६ ॥

श्रीसूर्य उवाच।

मूकः प्रजायते जन्तुर्यः पूर्वं भ्रातृघातकः। बभूव कामतः सूत प्रायश्चित्तं न तत्समम् ॥ १ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः सप्तदशाधिकपंचशततमः ॥ ५१७ ॥

श्रीसूर्य उवाच ।

कलिङ्गदेशे प्राक् सूत काचिद्विजवरानना । पतिप्रिया धर्मशीला दानभोगरता सदा ॥ ७
सा नार्यघातयत्पूर्वे भवे मोहाच्चकुक्कुटम् । न सा चर्तुमवाप्नोति सात्र जन्मनि निश्चयात् ॥ ८
हेमनिष्कत्रयं दद्यात्सर्वस्वं वा प्रयत्नतः । ब्राह्मणाय महाभाग पापनाशकरं परम् ॥ ९

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽष्टादशाधिकपंचशततमः ॥ ५१८ ॥

श्रीसूर्य उवाच ।

बभूव बाहुजः कश्चिद्देशे पञ्चनदे शुभः । धनधान्यसमायुक्तः पापकर्मा महोद्यमी ॥ १
विप्रोत्सङ्गतः सोऽपि प्रयागे गरुडाग्रज । स्नातो मृगगते भानौ धूर्तः कर्मक्रियोज्झितः ॥ २
संप्राप्य स्वगृहं शीघ्रं कृतवान्कर्म दारुणम् । ग्रामे निवसितस्यान्यक्षत्रियस्य पतत्रिण ॥ ३
ददाह भवनं रम्यं वैरभावात्पुराऽनघ । तत्रैका वत्सरी दग्धा जीवाश्चापि विशेषतः ॥ ४
कालयोगेन संप्राप्तः स गत्वा यमशासनम् । भुक्त्वा पापफलं पापात्पुण्यात्पुण्यफलं तथा ॥ ५
पूर्वपुण्यप्रभावेण स जातः पादजोऽधुना । गङ्गायाः प्राक्परे देशे शतयोजनसंमिते ॥ ६
स मध्यरूपो बलवान् धर्मे स्वल्पमतिः शठः । बुद्ध्याधिकप्रचारी च पैत्तिकः स्वल्पवित्तभाक् ॥ ७
सकन्यश्च सपत्नीको बन्धुभृत्यसमन्वितः । पुण्यादिदं फलं पूर्वात्पापात्र शृणु द्विज ॥ ८ ।
गोपालवत्सकवधाज्जीवघाताद्पुत्रक्रः । सप्तवेदमिताब्दान्तं जातपुत्रविनाशकः ॥ ९ ॥
गोस्त्रीविप्रवधाः पापाः पुत्रनाशकरा यतः । गोराशिगः शनिः सोमात्पष्ठे जीवो मृगस्थितः ॥ १० ॥
लब्धमैतदण्डजश्रेष्ठ पृच्छकस्यात्र जन्मनि । पूर्वं या स्त्री सहायासन्मृतवत्साऽत्र सा सुत ॥ ११ ॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन् सर्वपापनिषूदनीम् । पुत्रवृद्धिकरां धन्यामत्र जन्मनि निश्चयात् ॥ १२ ॥

श्रीसूर्य उवाच ।

शृणु सूत प्रवक्ष्यामि निष्कृतिं पापशोधनीम् । पञ्चस्वर्णमिता कार्या सुरभी च हिरण्मयी ॥ १३ ॥
तदर्धमितिका वापि द्वयोर्वित्तानुसारतः । संपूज्य विधिवन्मंत्रैर्देया विप्राय धीमते ॥ १४ ।
मापैर्वेदमितैर्देयस्तथा पशुपतिः सुत । प्रापाश्च्यां च तथा वह्निर्जीवा मापचतुष्टकाः ॥ १५ ।
देयाश्च विधिना सूत पूर्वपापापनुत्तये । जपेत्पशुपतेर्मन्त्रं सहस्रं रिष्टनाशनम् ॥ १६ ।
होमयेदष्टशतकं रुद्रस्याग्रे प्रयत्नतः । शृणुयाद्धरिवंशं वा दशावृत्त्या विधानतः ॥ १७ ।
यः कुर्याद्विधिवत्सूत प्रायश्चित्तं त्रिधा मतम् । जीविष्यन्ति च तत्पुत्रा जन्मन्यत्र पतत्रिण ॥ १८
नैवं कुर्याच्च यः शक्त्या त्रिष्वेकं पापशोधनम् । न जीवन्ति सुतास्तस्मिञ् जीविते नात्र संशयः
नवसप्तमितायुः स्यात्प्रायश्चित्ते कृतेऽधुना । सप्तवेदमिते वर्षे रिष्टं चाकृतनिष्कृतेः ॥ २०

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनविंशत्यधिकपंचशततमः ॥ ५१९ ॥

श्रीसूर्य उवाच ।

काश्मीरमण्डले पूर्वं काचिद्विजवरानना । पतिप्रिया शीलयुक्ता दानभोगरता सदा ॥ १
वैरिभावात्तया स्मृत्वा गृहं दग्धं द्विजस्य च । वैरिणस्तु सुतो दग्धो गृहदाहे पतत्रिण ॥ २
साहाय्यात्स्वामिनः सर्वं प्राग्भवे समुपार्जितम् । तत्पापजान्महाघोरात्फलं प्राप्य वियोजितात् ॥ ३
सैव जाता विराटेऽत्र पतिशुश्रूषणात्सुत । क्षत्रिया धनधर्माढ्या पूर्वपुण्यात्तथा सती ॥ ४

क्षयरोगयुता बाल्ये बालघातादपुत्रिणी । गृहाग्निदाहपापाच्च प्रायश्चित्तं न तत्समम् ॥ ५ ॥
त्रयोविंशन्मिते वर्षे रिष्टं चैवात्र नश्यति । क्षयरोगयुता बाल्ये सहाया अपि तादृशाः ॥ ६ ॥
साहाय्यात्तत्पतिश्चात्र हीनो क्षयरुजान्वितः ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो विंशत्यधिकपञ्चशततमः ॥ ५२० ॥

श्रीसूर्य उवाच ।

सारिकां यो महाभाग निहन्यात्पापमोहितः । तस्य च स्खलिता वाणी भवत्यत्रैव जन्मनि ॥ १ ॥
दद्याद्धिरण्मयीं तत्र सारिकां शुभलक्षणाम् । तथात्र पुस्तकं दद्याच्छास्त्रस्य विधिनाण्डज ॥ २ ॥
पूर्वपापात्प्रमुच्येत नरोऽत्र गतकिल्बिषः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकविंशत्यधिकपंचशततमः ॥ ५२१ ॥

श्रीसूर्य उवाच ।

सारिकां योऽवधीन्नारी पूर्वं पापविमोहिता । सात्र जन्मनि जायेत वचनस्खलिताण्डज ॥ १ ॥
तया देया सुवर्णस्य सारिका ब्राह्मणाय च । पूर्वपापात्प्रमुच्येत तदानाद्विनतासुत ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वाविंशत्यधिकपञ्चशततमः ॥ ५२२ ॥

श्रीसूर्य उवाच ।

वकघाती च पुरुषः पूर्वजन्मनि मानद । लम्बकण्ठः प्रजायेत सोऽत्र जन्मनि निश्चयात् ॥ १ ॥
गां दद्याद्विधिवत्सूत सर्वाभरणभूषिताम् । मुच्यते कण्ठजाद्रोगान्नात्र कार्या विचारणा ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायस्त्रयोविंशत्यधिकपंचशततमः ॥ ५२३ ॥

श्रीसूर्य उवाच ।

या नारी पूर्वजनुषि घातयेद्गरुडाण्डज । वकं सा कण्ठरोगेण बाध्यते चात्र जन्मनि ॥ १ ॥
गां दद्याद्विधिना सूत श्वेतामत्र पयस्विनीम् । यथोपस्करसंयुक्तां तस्मात्पापात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायश्चतुर्विंशत्यधिकपंचशततमः ॥ ५२४ ॥

अरुण उवाच ।

कश्चिद्विप्रकुले जातो धर्मिष्ठो वित्तसंयुतः । उदरे वातजा[1] रोगा गुल्माद्याश्चोर्ध्वहृद्व्यथाः ॥ १ ॥
मोहाद्याः स्वल्पवीर्यश्च अक्षिपाण्डूदरामयः । जायते शीर्षजा पीडा बाल्ये स्याद्व्रहणीगदः ॥२॥
शरीरे जायते वह्निरुपघातव्रणाकुला । पौत्रीणां मातुलीनां तु वैधव्यं च स्वस्रादिषु ॥ ३ ॥
दायादाच्छ्रुवत्पीडा भूमिद्रव्यादिलिप्सया । ऐहिकानि च लक्ष्माणि तस्य गेहे प्रजायते ॥४॥
तस्य भार्या सदाचारा कदाचिद्रोषवादिनी । गौरवर्णा शुभावाणी संतोषप्रियकारिणी ॥ ५ ॥
मृतवत्सा कथं जाता स्थिरगर्भमवाप्नुयात् दशमासानतिक्रम्य गर्भे चोदरसौख्यभाक् ॥ ६ ॥
केन कर्मविपाकेन सत्यं कथय भास्कर ॥ ७ ॥

श्रीसूर्य उवाच ।

पुंस्कृतं नैव तत्कर्म स्त्रीकृतं नात्र संशयः । पूर्वजन्मनि सा क्षात्रा संजाता विनतासुत ॥ ८ ॥
अज्ञानात्तिमिरान्धानां स्त्रीणां कर्म दुरात्मनाम् । अजानती कुलस्त्रीणामाचारमनुकम्पया ॥ ९ ॥
सर्वभूतेषु चात्मानं स्थावरेषु चरेषु च । प्रमादाद्दीपिनं हत्वा सदा निष्ठुरमानसा ॥ १० ॥

---

१ वातरोगाढ्य इति—ख० पु० ।

तस्य गेहाश्रिता नित्यं मार्जारश्वानपूर्वकाः । पातालक्रीडनपरा गेहे संकुलिता भृशम् ॥ ११
तप्तेषु जलतैलेषु तप्तभस्मचयादिषु । विक्षिप्ता सा तदा चाग्नौ प्राक्षिपत्पापचेतसा ॥ १२
बालगर्भाशयान्बालानविस्पृष्टाखिलेन्द्रियान् । तत्यक्तान्नात्यजत्सापि माता बालानुकम्पया
मायावन्धनमातृणां बालगर्भाश्रितांस्तदा । अन्यत्तद्भर्मिणो दृष्ट्वा क्षिप्यते वह्निभस्मसात् ॥ १४
विनिघ्नन्ती प्रमादाद्यैर्भेदसंततिदुःखभाक् । संततिर्दुःखितायास्तु नानादुःखा च जायते ॥ १५
आनीयाग्निं समासाद्य तेषां वै नाशनाय च । तथाविधेषु जीवेषु मृतेष्वपि च तद्वशात् ॥ १६
म्रियन्ते शिशवस्तेऽपि तस्यास्तद्दोषचिह्नितः । पाताले ज्वलिता ताभिर्वह्नयो लघुप्राणिनः॥१७
गर्भयुक्ता मृता मातृक्षामयापि तथा च ते । मार्गं न लभते तत्र मृतास्ते दुःखजन्तवः ॥ १८
तेन कर्मविपाकेन स्थिरगर्भा मृतप्रजा । त्रिविधापत्यजा बाधा प्राप्यते जन्तुनोदरे ॥ १९
जन्तवः कर्मणा चैके स्वकृतैः कर्मबन्धनैः । उभयोः कर्मणोर्हेतून्वक्ष्यावश्यमयोजकान् ॥ २०
इदं जन्म तृतीयं तु ब्रह्मवंशसमुद्भवम् । स्थिरगर्भा मृतापत्या पुत्रहीना पतत्रिण ॥ २१

अरुण उवाच ।

प्रायश्चित्तं कथं नाथ येन गर्भः प्रजायते । मयोपरि कृपां कृत्वा सत्यं वद दिवस्पते ॥ २२

श्रीसूर्य उवाच ।

सुदिष्टे समनुप्राप्ते ग्रहेऽहनि शुभोदये । प्राग्दुदक्प्रवणे देशे गोमयाद्युपलिप्तके ॥ २३
तत्रोपर्याविकं स्तीर्त्वा नानाचित्रविचित्रितम् । द्रोणमानं तिलानां तु मध्ये रत्नैः प्रपूरयेत् ॥२४
निष्कमानं सुवर्णस्य शकलं मध्यतः क्षिपेत् । तस्य वै पूर्वदिग्भागे तण्डुलद्रोणपर्वतम् ॥ २५ ।
शुद्धतोयं भृशं ताम्रं पात्रं दशपलोन्मितम् । स्थापयेद्घृतजनं पद्मं तन्मध्ये पलनिर्मितम् ॥ २६ ।
पूजयेच्च सपत्नीकं कश्यपस्य प्रजापतेः । करेऽक्षमालां दक्षे च वामे चाथ कमण्डलुम् ॥ २७ ।
कृत्वा प्रतिष्ठितप्राणां मूर्तिं तु शुभलक्षणाम् । अर्चयेद्गन्धपुष्पाद्यैरुपचारैः पृथक्पृथक् ॥ २८ ।
सम्यक् श्रद्धावती नारी त्रिविधापत्यदुःखिनी । विप्रं च वेदविधिना पूजयेद्विविधैर्धनैः ॥ २९ ।
ततस्तं तु सपत्नीकं मुनीनां प्रवरं तथा । सिसृक्षणा जगत्स्रष्टा पत्नी च तपसो बलात् ॥ ३० ।
सा मया तिलसंख्या वै चार्थिभिस्तीव्रवेदनैः । लंघिता स्त्रीजनाचारमजानन्त्या दयात्मकम्॥३१।
नाशयेत्तस्य पापस्य देवप्राप्तं विगर्हितम् । सम्यक् श्रद्धावती नारी मृतसंततिदुःखिनी ॥ ३२ ।
सपत्नीकस्य सौवर्णीं निर्मितां सम्यगर्चिताम् । विप्राय वेदविदुषे प्रदद्याद्गुणशालिने ॥ ३३ ।
एवं समाप्य ता मूर्तीः समादाय पृथक्पृथक् । प्रदद्यादानविधिना श्रद्धया च सदक्षिणाः॥३४ ।
दानान्ते कीर्तयेन्मन्त्रं तिष्ठन्ती विहिताञ्जलिः ॥ ३५ ॥

मंत्रः ।

"यन्मया पूर्वजनुषि विजानंत्या हताश्च ये । प्राप्ताऽहमशुभां स्वामिञ्छिन्धि तत्कर्मकारणम्"३
दत्त्वा दानं च विप्राय सर्पिष्यात्मानमीक्षयेत् ॥ ३७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचविंशत्यधिकपंचशततमः ॥५२५॥

श्रीसूर्य उवाच ।

काकवाती महाभाग प्राग्भवे चात्र जन्मनि । कूर्चहीनो भवेन्मर्त्यः स च तत्पापलाञ्छितः॥ १
कृष्णधेनुप्रदानेन विधिना च खगाधिप । मुच्यते दुष्टपापाच्च कूर्चयुक्तोऽत्र जन्मनि ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षड्विंशत्यधिकपंचशततमः ॥ ५२६ ॥

श्रीसूर्य उवाच ।

या नारी घातयेत्काकं विनतानन्दवर्धन । सात्र जन्मनि पक्षीन्द्र कूर्चयुक्ता भवेदलम् ॥ १ ॥
कृष्णधेनुप्रदानेन यथोक्तया गरुडाग्रज । पूर्वपापविशुद्धिः स्यादत्र जन्मनि सुव्रत ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तविंशत्यधिकपंचशततमः ॥ ५२७ ॥

श्रीसूर्य उवाच ।

अभक्ष्यभक्षको यस्त्वभवत्प्राङ् मानवोऽण्डज । सोऽत्र जन्मनि पक्षीन्द्र जायते क्रिमिलोदरः॥ १॥
स भीष्मपञ्चकादत्र व्रतात्पुण्यसमर्जनात् । मुच्यते पूर्वरोगात्तु दुष्टात्सूत गदोदरात् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाविंशत्यधिकपंचशततमः ॥ ५२८ ॥

श्रीसूर्य उवाच ।

अभक्ष्यं भक्षयेन्नारी प्राग्भवे गरुडाग्रज । जायते जठरे तस्याः क्रिमिजोत्थरुजा सुत ॥ १ ॥
तत्पापनाशनं कार्यं भीष्मपञ्चव्रतं शुभम् । कार्तिके शुक्लपक्षे तु प्रान्त्याख्यं दिनपञ्चकम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकोनत्रिंशदधिकपंचशततमः ॥ ५२९ ॥

श्रीसूर्य उवाच ।

दुष्टस्पर्शेन यो मोहाद्भक्षयेद्विधिवर्जितः । सिद्धान्नानि पुरा सूत जायतेऽत्र कृशोदरः ॥ १ ॥
विष्णुव्रतान्महापुण्यात्सर्वपापप्रणोदनम् । तदा कृशोदरत्वं च रुजं नात्र प्रपश्यति ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिंशदधिकपंचशततमः ॥ ५३० ॥

श्रीसूर्य उवाच ।

भुक्तं यया पुरा सूत सिद्धान्नं द्विजभार्यया । दुष्टस्पर्शन सततं सात्र स्याच्च कृशोदरी ॥ १ ॥
सा वैष्णवव्रतात्पुण्यात्तस्मात्पापात्प्रमुच्यते । कृशोदरव्यथा नश्येत्तत्पापस्य प्रणाशनात् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकत्रिंशदधिकपंचशततमः ॥ ५३१ ॥

श्रीसूर्य उवाच ।

द्विजः पूर्वभवे कश्चिदासीद्धर्मान्वितः सदा । सभार्यो नर्मदातीरे धनसौख्यसमन्वितः ॥ १ ॥
कृतानि तेन दानानि नानापर्वसु शक्तितः । वेदयुक्तेषु विप्रेषु सत्पात्रेषु विधानतः ॥ २ ॥
अथो पापं भृशं चक्रे व्यभिचारसमुद्भवम् । ज्येष्ठां त्यक्तुंसंप्राप्तां धर्मशीलयुतां प्रियाम् ॥ ३ ॥
रतिं ददौ कनिष्ठायामनृतावपि मोहितः । ततो यमपुरं प्राप्तः ससहायो द्विजोत्तमः ॥ ४ ॥
भुक्त्वा पापफलं पापात्पुण्यात्स्वर्गफलं तथा । श्रद्धादानवशात्सोऽत्र गङ्गायाः पूर्वभागजः ॥ ५ ॥
सिंहस्थेऽर्के सुखे राहौ जीवे कर्केऽलिगे भृगौ । स रक्तगौरो मतिमान् बन्धुस्त्रीसुखसंयुतः॥ ६ ॥
लघुर्वृणी त्वमितदो द्विजवंशसमुद्भवः । सर्वमेतत्फलं दानात्स्त्रीत्यागान्मृतपुत्रकः ॥ ७ ॥
स्त्रीत्यागी भ्रूणहा लोके इति वेदविदो विदुः । योषासाहाय्यतः पूर्वं शृणुष्व विनतासुत ॥ ८ ॥
प्राग्भवे या कनिष्ठाभूत्सा ज्येष्ठात्र गतप्रजा । गर्भदोषयुता चेति लक्षणैर्लक्षयेत्खग ॥ ९ ॥
वक्ष्यामि निष्कृतिं तस्य सर्वपापविनाशनीम् । कुर्यात्पलैर्वेदमितैर्गणेशं विघ्ननाशनम् ॥ १० ॥
तदर्धार्धमितं देयं त्रिषु वित्तादिमं पठन् ॥ ११ ॥

मंत्रः ।

"त्याज्या वरानना शुद्धा पूर्वं पापं समर्जितम् । तत्पापस्य विनाशाय ददेऽहं गणनायकम् ॥१२
मासप्तमिता लक्ष्मीः शुभा लेख्या हिरण्मयी । ददेऽहं विप्रमुख्येऽत्र वेदशास्त्रविशारदे" ॥ १३
ब्राह्मणान्वरयेत्तत्र शक्त्या दद्याच्च दक्षिणाम् । एवं विधानं यः कुर्याज्जीविष्यन्ति च तत्सुताः॥१४
श्रुत्वैनं शक्तिमान्यस्तु न कुर्याच्छोधनं सदा । ते पुत्रान्नोपसर्पन्ति रिष्टं पश्चाशब्ददके ॥ १५ ।
प्रायश्चित्ते कृते त्वत्र जीवनं वर्षसप्ततिम् । अन्यजन्मादिकं ज्ञेयं विस्तरं नोदितं मया ॥ १६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायो द्वात्रिंशदधिकपंचशततमः ॥ ५३२ ॥

श्रीसूर्य उवाच ।

देशे पञ्चनदे जाता बाहुजा पूर्वजन्मनि । सात्र जन्मनि वै विप्रा जाता ग्राग्विप्रपूजनात् ॥ १ ।
ग्राग्यत्तया कृतं कर्म शृणुष्वाग्रे खगेश्वर । ब्राह्मणेन महद्द्रव्यं तद्गृहे स्थापितं च यत् ॥ २ ॥
न दत्तं तत्पुनस्तस्मै भुक्तं सर्वमशेषतः । मृतो द्विजस्तद्दुःखेन क्षुधितस्तु पतत्रिण ॥ ३ ॥
पापमाचरितं पूर्वं ब्रह्मघातसमं तथा । पञ्चत्ववशगा जाता भुक्त्वान्न यमशासनम् ॥ ४ ॥
पुत्रसंततिहीनात्र युवभावे क्षयान्विता । निष्कृतिं परमां तस्या वक्ष्येऽहं पापनाशनीम् ॥ ५ ।
सर्वस्वेन तदर्धेन कार्या स्वर्णमयी शुभा । कदलीपत्रसंयुक्ता देया विप्राय धीमते ॥ ६ ॥
दानेनानेन सुप्रीता ब्रह्मविष्णुमहेश्वराः । क्षयनाशकराः सर्वे भविष्यन्त्यत्र जन्मनि ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयस्त्रिंशदधिकपंचशततमः ॥ ५३३ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि भो सूत चोच्छिष्टं भक्षयेत्तु यः । रात्र्यन्धो जायते सोऽपि जन्मन्यत्र च मानवः ॥१॥
भोजयेद्ब्राह्मणान्भक्त्या गोमूत्रं प्राशयेत्तथा । मुच्यते तत्क्षणात्सूत नक्तान्धत्वं न संशयः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुस्त्रिंशदधिकपंचशततमः ॥ ५३४ ॥

श्रीसूर्य उवाच ।

या भक्षयेत्पुरा नारी चोच्छिष्टं सा शुभानना । नक्तान्धा जायते त्वत्र व्यथिता नेत्रपीडया ॥१॥
गोमूत्रप्राशनादत्र ब्राह्मणेभ्यश्च भोजनात् । नक्तान्ध्यरोगान्मुक्ताः स्यादत्र जन्मनि सुव्रत ॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचत्रिंशदधिकपंचशततमः ॥ ५३५ ॥

श्रीसूर्य उवाच ।

विडालोच्छिष्टभोजी प्राग्रात्र्यंधो जायतेऽधुना । स तत्पापविशुद्ध्यर्थं गोमूत्रं विधिवत्पिबेत् ॥१॥
भोजयेच्च तथा विप्रान् शक्त्या दद्याच्च दक्षिणाम् । रात्र्यन्धरोगात्सततं मुक्तो भवति मानवः॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्त्रिंशदधिकपंचशततमः ॥ ५३६ ॥

श्रीसूर्य उवाच ।

विडालोच्छिष्टभुग्नारी प्राग्भवे विनतासुत । रात्र्यन्धरोगयुक्ता सा चात्रजन्मनि जायते ॥ १ ॥
द्विजेभ्यो भोजनाच्चैव गोमूत्रप्राशनात्तथा । मुच्यते पूर्वपापाच्च विडालोच्छिष्टभोजनात् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्रिंशदधिकपंचशततमः ॥ ५३७ ॥

श्रीसूर्य उवाच।

चाण्डाल्यां गमने पूर्वभवे च गरुडाग्रज। जायतेऽजगरश्चात्र मूढो जन्मनिजन्मनि ॥ १ ॥
चान्द्रायणव्रतादत्र दशावृत्त्या कृतात्सुत। स मुच्यतेऽजगरत्वाच्छुद्धबुद्धिर्भवेदिह ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टत्रिंशदधिकपंचशततमः ॥ ५३८ ॥

श्रीसूर्य उवाच।

या काचिदधमा नारी प्राग्भवे विनतासुत। चाण्डालं प्राप्नुयात्सात्रऽजगरी जायते जडा ॥ १ ॥
प्राजापत्यव्रताद्यत्नात्कृतात्पश्चापवर्तनैः। मुच्यते पूर्वपापात्सा जन्मन्यत्र पतत्रिण ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनचत्वारिंशदधिकपंचशततमः ॥ ५३९ ॥

अरुण उवाच।

भूमिदेवकुलोत्पन्नो धर्मिष्ठो वत्सलः सुधीः। नित्यसत्यसदाचारो साधुसेवकसंयुतः ॥ १ ॥
तस्य देहे भवेच्चिह्नं पापजं चात्र जन्मनि। किलासोदद्रुः कण्डूश्च नेत्रतोदो विरश्मिता ॥ २ ॥
किंचिद्गदः प्रजायेत यौवने कारणं विना। तस्य भार्या सुतन्वङ्गी स्त्रीधर्मव्रतकारिणी ॥ ३ ॥
तस्योदरे वातबाधा मूर्ध्नि पीडा प्रजायते। मृतवत्सा कथं जाता पुत्रपुत्र्यो मृताः कथम् ॥ ४ ॥
केन कर्मविपाकेन सत्यं कथय भास्कर ॥ ५ ॥

श्रीसूर्य उवाच।

पूर्वं वैश्यसमुत्पन्ना प्रिया शूद्राप्रतारिता। बहुव्यापारनिरता बहुद्रव्यसमन्विता ॥ ६ ॥
शूद्रा याता च संबन्धं बहुकालगतागतैः। अन्योन्यं प्रीतिवशतः किंचित्कालो गतस्तदा ॥ ७ ॥
उभयोः कर्मणोर्हीनं धनकर्ता यतस्ततः। मान्यकर्मकृता योऽसौ तेन तत्रैव जन्मनि ॥ ८ ॥
ब्राह्मणस्य सुतः श्रेष्ठः स्वर्णालंकरणैर्युतः। धनलोभाद्धतस्तेन भाविनोऽर्थस्य वै बलात् ॥ ९ ॥
तस्यापि मातापितरौ पुत्रदुःखेन दुःखितौ। द्वित्रवर्षैस्तथा मासैर्वयोभिश्च समन्वितः ॥ १० ॥
धनलोभवशात्तेन दुष्टचित्तेन वै तदा। अचिराच्च मृतस्तत्र गतो वै यमशासनम् ॥ ११ ॥
गृहस्य जात उद्वासो ब्राह्मणस्य ततः खग। तेन कर्मविपाकेन नरके पातितो भृशम् ॥ १२ ॥
पश्चान्मानुषमापन्नो व्रतदानप्रभावतः। इदं जन्म चतुर्थं तु मृतापत्यं खगेश्वर ॥ १३ ॥
द्वित्रादिमासजातानां मृतिर्द्वित्रादिहायनैः। मृताः पुत्रा भवेयुस्ते जाताजातास्तथैव च ॥ १४ ॥
इदं जीवेदिदं जीवेदित्याशामपि चाब्रुवन्। जाताजाता विनश्यन्ति ते तस्याऽकृतनिष्कृतेः ॥ १५ ॥
एवं यदि चिरं स्थित्वा अचिरान्म्रियते परम्। सुगुणाश्च सुरूपाश्च लालनाच्चाटुकारिणः ॥ १६ ॥
नश्यत्सु जातजातेषु जन्मजन्मसु तेषु च। व्याध्यन्तरो भवेद्व्याधिर्ग्रस्तो व्यसनवानयम् ॥ १७ ॥
नास्ति सौख्यं लभेऽप्यस्य नानाशङ्कितचेतसः। भवेच्च तद्वत्तस्यापि परापत्यानि पश्यतः ॥ १८ ॥
लक्षणानि पुरोक्तानि तस्य स्वान्यपि कीर्तयेत्। सोदरे म्रियते बालः स वै ब्राह्मण उच्यते ॥ १९ ॥
मृतवत्सोद्भवं चिह्नं पूर्ववत्प्रतिपादयेत्। स्ववंशस्यापि विच्छेदो द्रव्यहानिर्यतस्ततः ॥ २० ॥
दौर्मनस्यं महानाधिः शोक एवोपजायते। अदृष्टगुणलावण्यमदृष्टाननकान्तयः ॥ २१ ॥
म्रियन्ते जातमात्रा वै पुत्रा अकृतचाटवः। एवं तु कर्मणि ज्ञाते प्रायश्चित्तमथाचरेत् ॥ २२ ॥

---

१ क्षणेऽप्यस्य इति स्यात्।

अरुण उवाच ।

का तस्य निष्कृतिः स्वामिन् इह कर्मनिषूदनी । कथ्यतां दिवसेशान नारीणां हितकाम्यया ॥

श्रीसूर्य उवाच ।

शृणु सूत प्रवक्ष्यामि मृतवत्साघनाशनीम् । निष्कृतिं विधिवत्तार्क्ष्य संततेः सौख्यहेतवे ॥ २४ ।
यजमानः सपत्नीको विधिवद्विधिमाचरेत् । पठद्भिः शान्तिसूक्तानि ब्राह्मणैः सहितोऽर्थवित् ।
सिद्धार्थाक्षतदूर्वाभिः कृतरक्षं प्रतिष्ठितम् । स्नापयेदौषधैर्मन्त्रैर्वारुणैर्विष्णुसूक्तिभिः ॥ २६ ।
सुदिष्टे सुशुभे देशे गोमयाद्युपलिप्तके । तत्रोपर्याविकं स्तीर्त्वा कृष्णाजिनमथापि वा ॥ २७ ।
द्रोणमानं तिलानां तु कृष्णवस्त्रेण संयुतम् । स्थापयेद्राजतं पद्मं तन्मध्ये पलनिर्मितम् ॥ २८ ।
सौवर्णीं प्रतिमां तत्र बालगोपालमूर्तिकाम् । कृत्वा प्रतिष्ठितप्राणां मूर्तित्वे शुभलक्षणे ॥ २९ ।
अर्चयेद्गन्धपुष्पाद्यैरुपचारैर्यथाविधि । सम्यक् श्रद्धावती नारी मृतसंततिदुःखिनी ॥ ३० ॥
आहूय विदुषो विप्रान् तथैव वेदवादिनः । अलोलुपाः सदाचाराः पूज्या अर्घ्यादिकैस्तथा ॥ ३१ ॥
भूमिद्रविणहेमाद्ये सच्छिप्सा सा च नश्यतु । नाशेयत्तस्य पापस्य मूर्तिंच शुभलक्षणम् ॥ ३२ ॥
अग्नेनयेति मन्त्रेण विसृज्यैतन्नुदीरयेत् । धेनुं दद्यात्सवत्सां च सहिरण्यां यथाविधि ॥ ३३ ॥
ब्राह्मणान्भोजयेत्सम्यक् शतं साग्रं यथाविधि । सर्पिष्यात्मानमालोक्य भोजयेदिष्टवान्धवान् ॥
इहैव लक्ष्म विज्ञेयं मातृबन्धुसुखोज्झितम् । स्वसुतासुतसौख्यानां संतोषो निजपुत्रवत् ॥ ३५ ॥
विरुध्यन्ते ह्यपत्यानि तादृशानि मिथः कियत् । विकारो विकृतौ लीयाद्गमने पादवैकृतम् ॥३६॥
पैतृजा मातुलान्यां तु कासगुल्मार्तिवग्व्यथा । मृतापत्यार्तिदस्तेषामनुमन्त्रादिभेदतः ॥ ३७ ॥
तथा तवात्र दुःखानि जायन्तेऽस्य मुहुर्मुहुः । पूर्वकर्मार्जितं पापं चिह्नं तस्य सहायवत् ॥ ३८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायश्चत्वारिंशदधिकपंचशततमः ॥ ५४० ॥

श्रीसूर्य उवाच ।

विप्राय यो विषं दद्याद्वातार्थं पूर्वजन्मनि । सोऽत्र जन्मनि पक्षीन्द्र च्छर्दिरोगेण बाध्यते ॥ १ ॥
निष्कृतिर्नास्ति तस्यात्र पापस्य दृढकर्मणः । छर्दिरोगेण सततं यौवने नाशमाप्नुयात् ॥ २ ॥
प्रायश्चित्तं न तस्यात्र दानैरपि सहस्रशः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकचत्वारिंशदधिकपंचशततमः ॥ ५४१ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे सूत विषं दद्याद्विजातये । छर्दिरोगेण सात्रैव निश्चितं नाशमाप्नुयात् ॥ १ ।
न पापशोधनं प्रोक्तं तस्यास्तु गरुडाग्रज । ब्राह्मणस्य वधे सूत प्रायश्चित्तं न विद्यते ॥ २ ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विचत्वारिंशदधिकपंचशततमः ॥ ५४२ ॥

श्रीसूर्य उवाच ।

परे च यो विषं दद्यात्पूर्वजन्मनि मानद । छर्दिरोगेण सोत्रैव बाध्यते पीडया तु सः ॥ १ ।
धेनूनां दशकं दद्यात्सर्वोपस्करसंयुतम् । मुच्यते छर्दिरोगाच्च जन्मन्यत्र पतत्रिण ॥ २ ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिचत्वारिंशदधिकपंचशततमः ॥ ५४३ ॥

श्रीसूर्य उवाच ।

मूकोऽत्र जायते जन्तुर्यः पूर्वं भ्रातृघातकः । बभूव कामतः सूत प्रायश्चित्तं न तत्समम् ॥ १ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुश्चत्वारिंशदधिकपंचशततमः ॥ ५४४ ॥

श्रीसूर्य उवाच ।

या काचिन्मागधी ह्यासीज्जाता ब्रह्महदे सुत । सा चात्र यवनी देशे शुभे पञ्चनदेऽण्डज ॥ १ ॥
पुत्राभिलाषिणी पूर्वं अभजद्यवनं पुरा । तस्मात्सा यवनी जाता पुत्रसंततिवर्जिता ॥ २ ॥
नानाधनयुता दानात्कुरुक्षेत्रे पुराऽनघ । शिवभक्तिपरा तस्मात्सुखैश्वर्यसमन्विता ॥ ३ ॥
अत्र जन्मनि सा लक्षरुद्रपूजनजाद्भृतात् । पुत्रपौत्रयुता नारी भवत्येव न संशयः ॥ ४ ॥
अथवा हरिवंशस्य शताबृत्त्या विधानतः । श्रवणात्पूर्वजातपापान्मुच्यते विनता सुत ॥ ५ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचचत्वारिंशदधिकपंचशततमः ॥ ५४५ ॥

श्रीसूर्य उवाच ।

देवालये वसन् कश्चिद्ब्राह्मणः पूर्वजन्मनि । विष्णुपूजारतो नित्यं द्रव्यलोभेन चाण्डज ॥ १ ॥
चौर्येण तु हृतं द्रव्यं यात्स्थितं देवताश्रये । तेन दण्डकृतं सूत कृतं कर्मातिदारुणम् ॥ २ ॥
स तेन कर्मणा युक्तो भुक्त्वा तत्पापजं फलम् । जातो गङ्गाश्रये क्षात्रः पर्वते पूजनाद्धरेः ॥ ३ ॥
बहुद्रव्यान्वितो भूपः सर्वसंपत्सुखान्वितः । बाल्ये हि पाण्डुरोगार्तो ह्यत्र जन्मनि मानवः ॥४ ॥
देषद्रव्यापहारीति पाण्डुरोगी प्रजायते । तत्पापनाशनं पुण्यमुपायं शृणु तत्त्वतः ॥ ५ ॥
कुर्याद्धिरण्मयीं पृथ्वीं ससमुद्रां पलात्मिकाम् । सवनां सागरोपेतां सप्तद्वीपां वसुंधराम् ॥ ६ ॥
गन्धपुष्पैरलंकृत्य दद्याद्विप्राय धीमते । पाण्डुरोगाद्विमुक्तिः स्यादत्र जन्मनि मानवः ॥ ७ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्चत्वारिंशदधिकपंचशततमः ॥ ५४६ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे प्रादाद्विषं कस्मिंश्च काश्यप । सात्र जन्मनि पक्षीन्द्र च्छर्दिरोगेण पीडयते१॥
धेनूनां दशकं दद्यादशक्तौ गरुडाग्रज । सवत्सां कपिलां दद्यात्सा तद्दोषात्प्रमुच्यते ॥ २ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तचत्वारिंशदधिकपंचशततमः ॥ ५४७ ॥

श्रीसूर्य उवाच ।

कश्चिद्विप्रा ह्यभूदङ्ग प्राग्भवे धर्मसंयुतः । असौ परस्य कान्याया उद्वाहमकरोत्सुधीः ॥ १ ॥
दानालपत्वान्महाभाग चकारालपविधानतः । चौर्यकर्मरतः सोऽपि कदाचिद्दैवयोगतः ॥ २ ॥
स चचार वने सूत मार्गलुण्ठनतत्परः । काचित्सुनयना तत्र प्राप्ता भाविबलाद्दृढात् ॥ ३ ॥
नानाभरणयुक्ता सा पूर्णगर्भसमन्विता । सा लुण्ठितात्र त्रसिता तेन पापधियाण्डज ॥ ४ ॥
सहायैः सा परित्यक्ता ताडनादाकुला बहु । तद्गर्भाद्वै च्युतौ पुत्रौ पापमाचरितं त्विदम् ॥ ५ ॥
ततो धर्मपुरं प्राप्तः पुण्यपापसमन्वितः । पुण्यात्पुण्यफलं भुक्त्वा पापात्पापं पतत्रिण ॥ ६ ॥
परकन्याविवाहेन स जातो बाहुजोऽधुना । गङ्गायाः पूर्वभागे तु दशयोजनसंमिते ॥ ७ ॥
गौरः स्वरूपः क्षीणाङ्गो बहुद्रव्यः पराक्रमी । पित्ताधिकोऽतिमतिमान् बहुपुत्रीभिरन्वितः ॥ ८ ॥
जातपुत्रैर्मृतैस्तप्तः पूर्वपापात्तथाण्डज । विन्मयं तत्प्रवक्ष्यामि येन पापात्प्रमुच्यते ॥ ९ ॥

पलार्धार्धमितेनैवं कार्या सुघटिता सुत । वाहुजा गर्भसंयुक्ता सौवर्णी भूषणान्विता ॥ १०
पूर्वपापविशोधाय सा देया ब्राह्मणाय वै । गन्धैः पुष्पैः समभ्यर्च्य मन्त्रैः प्रणवपूर्वकैः ॥ ११
वेधसं तत्र सौवर्णं सुवर्णैकमितं शुभम् । दद्याज्जपेच्च मन्त्रांश्च तल्लिङ्गान्विधिपूर्वकम् ॥ १२
होमयेच्च यवांस्तत्र सतण्डुलसर्षपान् । ब्राह्मणान्भोजयेत्पश्चात्तेभ्यो दद्याच्च दक्षिणाम् ॥ १३
शृणुयाद्धरिवंशं वा शतावृत्त्या विधानतः । गायत्र्यष्टशतं जप्त्वा तस्माद्दोषात्प्रमुच्यते ॥ १४
तस्मात्पुत्रसुखं लेभे चात्र जन्मनि वै ध्रुवम् । रिष्टं पञ्चाशदब्दे तु प्रायश्चित्ते कृते सुत ॥ १५
वेदसप्तमितायुः स्यात्प्रायश्चित्ते कृतेऽत्र च ॥ १६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टचत्वारिंशदधिकपंचशततमः ॥ ५४८ ॥

श्रीसूर्य उवाच ।

व्यभिचाररता पूर्वं याऽत्रापि व्यभिचारिणी । साऽऽगता नरकाद्घोरादसती पापजाण्डज ॥ १
न शुद्धचत्यशुभाचारा प्रायश्चित्तशतैरपि । वाराणस्यां गतिश्चास्या वासोऽत्र विनतासुत ॥ २
मुच्यते सर्वपापाच्च पूर्वजन्मकृताद्दृढात् । वाराणस्यां चतुर्दश्यां शिवपूजनजाद्भृतात् ॥ ३
वाहुजेह महाभाग पूर्वेऽप्यत्रापि वाहुजा । यः कृत्वा धूर्ततां पूर्वं वञ्चयेद्ब्राह्मणं सुत ॥ ४
सोऽत्राऽपस्माररोगेण पीड्यते वहुपीडया । तेनैव पापरोगेण म्रियतेऽत्र पतत्रिण ॥ ५
प्रायश्चित्तं मया नोक्तं पापे ब्राह्मणवञ्चने ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनपंचाशदधिकपंचशततमः ॥ ५४९ ॥

श्रीसूर्य उवाच ।

या भ्रातृघातिनी नारी प्राग्भवे विनतासुत । सात्र जन्मनि मूकत्वं भजत्येव न संशयः ॥ १
ज्ञानान्महापापकृताच्च चोक्ता निष्कृतिर्मया । ज्ञात्वा ब्रह्मवधं सूत प्रायश्चित्तं न तत्समम् ॥ २
सप्तजन्मनि मूकत्वं जायते महदेनसः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाशदधिकपंचशततमः ॥ ५५० ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यसौ विप्रश्चात्र जन्मनि वाहुजः । देवद्रव्यापहरणात्प्रागत्राऽक्षिप्रपीडनम् ॥ १
विंशद्वर्षे व्यतीते च नेत्रभङ्गः प्रजायते । तद्रक्षार्थमहं वच्मि दानं पापहरं परम् ॥ २
कृत्वा देवगृहं रम्यं प्रतिष्ठाप्य सुरार्चिपम् । गन्धपुष्पैः समभ्यर्च्य दीपा देयाः सुवर्णजाः ॥ ३
राजताश्च महाभाग नेत्ररोगं न पश्यति । भोजयेच्छक्तितो विप्रांस्तथैव वैष्णवान्सुत ॥ ४
कृत्वा तेन विधानेन रिष्टं नैव प्रपश्यति ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकपंचाशदधिकपंचशततमः ॥ ५५१ ॥

श्रीसूर्य उवाच ।

सर्वस्नेहहरः कश्चिद्भवत्पूर्वजन्मनि । सोऽत्र जन्मनि जायेत क्षयरोगप्रपीडितः ॥ १
प्रायश्चित्तं परं तस्य वित्ततुर्यांशभागतः । कालचक्राभिधं दानं दद्याद्दोषोपशान्तये ॥ २
ब्राह्मणान्भोजयेत्पश्चाद्धोमयेच्च स्वशक्तितः । कालचक्राख्यदानेन रोगा नश्यन्ति पापजाः ॥ ३

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विपंचाशदधिकपंचशततमः ॥ ५५२ ॥

श्रीसूर्य उवाच ।

ब्रह्मवादरता ह्यत्र या पूर्वेऽभूत्पतिव्रता । पतिपापप्रभावाद्वै गतिं प्राप्ता हि मानुषीम् ॥ १ ॥
त्यक्त्वा शरीरं सा देवी पार्वत्या सह मोदते । भुनक्ति भोगान्सकलान् पतिं प्राप्य तपस्विनी ॥ २ ॥
गच्छेत्सा परमं स्थानं यत्र देवो महेश्वरः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिपंचाशदधिकपंचशततमः ॥ ५५३ ॥

श्रीसूर्य उवाच ।

योऽज्ञानात्कृतवान्सूत प्राग्भवे भ्रातृघातनम् । सोऽत्र जन्मनि सूकत्वं भजते क्वापि मानवः ॥ १ ॥
चान्द्रायणत्रयं कुर्याद्विधिना पापशोधनम् । पुस्तकं च तथा दद्यात्सुवर्णपलसंयुतम् ॥ २ ॥
य एवं कुरुते सूत स तत्पापात्प्रमुच्यते । न जायेतात्र मूकत्वं कदाचिद्विनतासुत ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःपंचाशदधिकपंचशततमः ॥ ५५४ ॥

श्रीसूर्य उवाच ।

या धूर्तावश्चयेत्काचिल्लोकान्पूर्वभवेऽण्डज । साऽत्र जन्मनि रोगेणापस्मारेण प्रपीडिता ॥ १ ॥
प्रायश्चित्तं प्रवक्ष्यामि पापनाशकरं सुत । ब्रह्मकूर्चत्रयं कुर्याद्दद्याद्धेनुं पयस्विनीम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः पंचपंचाशदधिकपंचशततमः ॥ ५५५ ॥

अरुण उवाच ।

कश्चिद्वर्णोत्तमो जातो धर्मिष्ठो वित्तसंयुतः । उदरे वायुरल्पीयाञ्छिरोऽर्तिश्च प्रजायते ॥ १ ॥
शरीरे जायते चिह्नं किंचिद्वर्णसमन्वितम् । दृष्टुः कण्डूर्विशालाक्षो गमने पादवैकृतिः ॥ २ ॥
कर्मानुसारतो व्याधिश्चिह्नं तस्य सहायकम् । भार्या प्रीतिपरा नित्यं कदाचित्कलहप्रिया ॥ ३ ॥
रोषयुक्ता मिताहारा प्रदरार्तिः प्रजायते । मृतवत्सा कथं जाता कस्येदं कर्मणः फलम् ॥ ४ ॥

श्रीसूर्य उवाच ।

स्वस्त्रिया सहितो विप्रः कुलीनो बहुयाचकः । गत्वा चैव महारण्येऽवर्तत[1] गर्भसंयुता ॥ ५ ॥
बहवोऽपि समायाताः शत्रुभिः परिवेष्टिता[2] । तत्र भीता तदा स्त्रीणां त्रासयन्ती महावने ॥ ६ ॥
गर्भपातोऽभवत्तत्र तथैव च ततो मृतः । तेन कर्मविपाकेन म्रियन्ते तस्य बालकाः ॥ ७ ॥
केचिज्जीवन्ति षण्मासं केचिद्वर्षाधिकं भृशम् । बहुकाले भवेत्कश्चिन्मृतानां चिह्नमेव च ॥ ८ ॥

अरुण उवाच ।

देवदेव जगन्नाथ लोकानां हितकाम्यया । कथयस्व प्रसादेन कर्मणस्तस्य निष्कृतिम् ॥ ९ ॥

श्रीसूर्य उवाच ।

साधु पृष्टं महाबाहो परमेतच्च दुर्लभम् । तेनेदं मुनिभिः प्रोक्तं प्रायश्चित्तमघापहम् ॥ १० ॥
गोत्रयं वै सुवर्णानां सौवर्णं निष्कसंयुतम् । पुष्पितं फलितं वृक्षं वस्त्रयुग्मं गुरोरपि ॥ ११ ॥
कर्मप्रकाशकं विप्रं पूजयेद्विधिपूर्वकम् । एवं यः कुरुते वत्स निष्कृतिं कर्मणः फलम् ॥ १२ ॥
पुत्रपौत्रादिकैर्युक्तो धनधान्यसमन्वितः । न करोति च यो मोहाल्लोभाद्वा कर्मनिष्कृतिम् ॥ १३ ॥
स याति पापदोषेण भुवि जन्मनि जन्मनि । एवं यः कुरुते भक्त्या प्राप्यते पुत्रपौत्रकम् ॥ १४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः षट्पंचाशदधिकपंचशततमः ॥ ५५६ ॥

---

१ सोऽतिष्ठत् इति स्यात् । २ शत्रुभिर्वेष्टितस्य चेति भवेत् । ३ तत्र भीत्या तदा स्त्रीणां तत्त्रासाच्च इति पाठो भवेत् ।

श्रीसूर्य उवाच ।

पूर्वजन्मन्यभूत्काचिन्नारी भर्तृप्रियान्विता । दक्षा सर्वक्रियास्वेव बहुदानप्रदायिका ॥ १
पार्श्वस्थस्यान्यशूद्रस्य गृहान्नीतानि मानद । सर्वस्नेहानि चौर्येण सर्वशून्यात्पुराऽनघ ॥ २
भुक्तानि बहुभिः सूत मिलित्वा च सुतादिकैः । पूर्वजन्मकृतात्सर्वं कर्मणोऽत्र फलं भुवि ॥ ३
सा जाता बाहुजा नारी धनभोगसमन्विता । पुत्राऽन्विता विचित्रा च भर्तुश्शुश्रूषणे रता ॥ ४
क्षयरोगाकुला पक्षिन्नत्र स्नेहहरा यतः । निष्कृतिं तस्य पापस्य पुण्यां पापौघनाशनीम् ॥ ५
कथयामि प्रयत्नेन वित्ततुर्यांशभागतः । कृत्वा तु कदलीं रम्यां पत्रयुक्तां सुवर्णजाम् ॥ ६
दंद्याद्वेदविधिज्ञाय क्षयदोषोपशान्तये ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तपंचाशदधिकपंचशततमः ॥ ५५७ ॥

श्रीसूर्य उवाच ।

यो लोकान्वञ्चयेत्कश्चित्पुरा धूर्तस्य कर्मणा । सोऽत्र जन्मन्यपस्माररोगेण महताऽऽकुलः ॥ १
धेनुं दद्यान्महाभाग सवत्सां विधिसंयुताम् । ब्रह्मकूर्चत्रयं कुर्यात्स तत्पापात्प्रमुच्यते ॥ २
न भवेत्तस्य रोगस्य वेदना पापशोधनात् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टपंचाशदधिकपंचशततमः ॥ ५५८ ॥

श्रीसूर्य उवाच ।

अस्त्यत्र चन्द्रवदना गौराङ्गी पतिवल्लभा । धनधान्यसमायुक्ता स्वर्णकारी सुखान्विता ॥ १ ॥
दक्षा भर्तृहिता नित्यं पूर्वं सा द्विजवल्लभा । स्वर्णापहारजात्पापात्प्राप्ता सा स्वर्णकारिताम् ॥ २ ॥
पुत्रहीना महाभाग परद्रव्यापहारजात् । कुरुक्षेत्रे शशिग्रस्ते स्वर्णं दद्याच्च शक्तितः ॥ ३ ॥
तद्दत्त्वाशु लभेत्पुत्रानत्र जन्मनि वै सुत ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनषष्ट्यधिकपंचशततमः ॥ ५५९ ॥

श्रीसूर्य उवाच ।

अन्नहृत्प्राग्भवे यस्तु ज्ञानादत्र पतत्रिण । सोऽजीर्णेनैव रोगेण पीड्यते बहुपीडया ॥ १ ॥
अन्नदानाच्च विप्रेभ्यो रसदानाच्च शक्तितः । सावित्रीजपतो होमात्पूर्वपापात्प्रमुच्यते ॥ २ ॥
पापक्षये क्षयं यान्ति रोगाः पापसमुद्भवाः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षष्ट्यधिकपंचशततमः ॥ ५६० ॥

श्रीसूर्य उवाच ।

या काचिन्मोहनाच्चक्रे नारी भ्रातृवधं पुरा । सात्र जन्मनि मूकत्वं भजेत्कापि शुभानना ॥ १ ॥
प्रायश्चित्तं प्रवक्ष्यामि तस्य चान्द्रायणव्रतम् । वेदपुस्तकदानं च पलं स्वर्णमितं त्विह ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकषष्ट्यधिकपंचशततमः ॥ ५६१ ॥

श्रीसूर्य उवाच ।

बालघाती भवेद्यस्तु पूर्वजन्मनि मानवः । वैनतेयात्र जनुषि मृतपुत्रः प्रजायते ॥ १ ॥
श्रवणाद्धरिवंशस्य विधिवच्चात्र जन्मनि । ब्राह्मणोद्वाहनाच्चैव पूजनाच्छङ्करस्य च ॥ २ ॥
जीविष्यन्ति च तत्पुत्रा नात्र कार्या विचारणा ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विषष्ट्यधिकपंचशततमः ॥ ५६२ ॥

श्रीसूर्य उवाच ।

करी या भवेत्पूर्वं निषादी पुनरेव सा । शूद्राधमा पञ्चनदे जाताऽत्र विमलासुत ॥ १ ॥
पुत्रपौत्रधनैर्धान्यैर्गजैश्चोष्ट्रादिवाहनैः । मुक्ता सा यवनी सूत तीर्थराजस्य सेवनात् ॥ २ ॥
ऋतुसङ्गयुतात्पूर्वं पुनस्तद्धितवाञ्छनात् । यवनी पूर्वपापाच्च तत्र तस्योपसेवनात् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिषष्ट्यधिकपंचशततमः ॥ ५६३ ॥

श्रीसूर्य उवाच ।

कश्चित्प्रागभवद्विप्रः सर्वविद्याविशारदः । वेदाभ्यासरतः श्रीमान् प्राप्तसर्वमनोरथः ॥ १ ॥
तुलाधृतानि स्नेहानि विप्राणां स्नेहभागिनाम् । गृहीतान्यतिचौर्येण लोभयुक्तेन चेतसा ॥ २ ॥
यस्माद् ज्ञानकृतं चैव प्राग्भवे तत्फलं शृणु । सोऽत्र विप्रः प्रयागेऽस्ति द्विजो वेदविदांवरः ॥३॥
धनपुत्रसमायुक्तः क्षयरोगसमन्वितः । वेदाभ्यासात्तथा दानात्तीर्थराजाधिसेवनात् ॥ ४ ॥
नाशः स्यात्क्षयरोगस्य चात्र जन्मनि चाण्डज । दोषात्स्वल्पात्फलैर्युक्तो जीवेद्वर्षशतं ध्रुवम् ॥५॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःषष्ट्यधिकपंचशततमः ॥ ५६४ ॥

श्रीसूर्य उवाच ।

बभूव ब्राह्मणः कश्चिद्वङ्गदेशे वसन्सुधीः । धर्मशास्त्रक्रियायुक्तो धनपुत्रादिसंयुतः ॥ १ ॥
दत्तानि तेन विप्रेभ्यो दानान्यल्पानि शक्तितः । सत्पात्रेभ्यः परं सूत पर्वस्वपि विधानतः ॥ २ ॥
पापमाचरितं तेन कामलोभेन चाण्डज । ब्राह्मण्यां धारितो गर्भो भाविनोऽर्थस्य गौरवात् ॥३ ॥
स्त्रीसाहाय्यात्तथा तत्र कृतं तद्गर्भपातनम् । सा मृता तेन दुःखेन गर्भपातोद्भवेन च ॥ ४ ॥
एवं किंचिद्गते काले संप्राप्तो यमशासनम् । भुक्त्वा पापाच्च नरकान् पुण्यात्स्वर्गांश्च शाश्वतान् ॥
पूर्वपुण्यप्रभावेण स जातो ब्राह्मणाद्वधः । यमुनायां महाभाग गौरः पित्ताधिको घृणी ॥ ६ ॥
धनमित्रसुखैश्वर्यमतिस्त्रीभोगभाग्नरः । दक्षः कार्येऽथ चावङ्गो धर्मिष्ठो लाभसंयुतः ॥ ७ ॥
मानी यशस्वी पुरुषः कान्तिमान् प्रियभाषणः । पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् ॥८॥
धूर्तः शठः क्रोधपरो धनवृद्धिक्षयान्वितः । चिन्तातुरः पापशेषाद्त्राप्राप्तमनोरथः ॥ ९ ॥
ब्राह्मण्यां वीर्यदानात्प्राक्तथा गर्भस्य पातनात् । अत्र पञ्चाशदब्दान्तं जातपुत्रविनाशकः ॥१० ॥
चिह्नभङ्गाढ्ये सूनौ चन्द्रः शुक्रगृहान्वितः । पापाभ्यां पुत्रभावेऽपि समाक्रान्तोऽत्र जन्मनि ॥११॥
स्त्रीसाहाय्यात्तथा पूर्वं सात्र संततिदुःखिता । लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥ १२ ॥
कार्यात्र ब्राह्मणी लेख्या सुवर्णाष्टपलैर्मिता । तदर्धार्धमिता वापि त्रिषु वित्तानुसारतः ॥ १३ ॥
पत्रे गर्भान्विता भव्या वाहुभूषणसंयुता । गन्धपुष्पाक्षतैर्वस्त्रैः पूजनीया प्रयत्नतः ॥ १४ ॥
सा देयात्र विधिज्ञाय मन्त्रमुच्चारयन्निमम् ॥ १५ ॥

मंत्रः ।

" ब्रह्मणा निर्मिते देवि पापमाचरितं त्वयि ॥ १६ ॥
तत्पापशमनायैव त्वां ददेऽहं हिरण्मयीम् । ब्राह्मणाय महाभाग पापं गच्छतु तद्वशम् " ॥ १७ ॥
सोमं च राजतं दद्यात्तन्मितं पापशान्तये । लक्ष्मीनारायणं चापि हेमसौवर्णसंमितम् ॥ १८ ॥
गायत्र्यष्टसहस्रं तु त्र्यम्बकं तन्मितं जपेत् । मन्त्रमष्टाक्षरं तद्वज्जप्त्वा शुद्धिमवाप्नुयात् ॥ १९ ॥
होमयेत्तद्दशांशेन तिलाज्ययवतण्डुलैः । ब्राह्मणान्भोजयेत्पश्चात्पूजयेच्च विधानतः ॥ २० ॥

रुद्रलक्षं त्रिगुणितं दानाविभवविस्तरैः । पूजयेद्वा विधानेन तस्मात्पापात्प्रमुच्यते ॥ २८
य एवं विधिना सूत प्रायश्चित्तं समाचरेत् । तस्य संततिवृद्धिः स्यात्स्त्रीभ्यामत्रैव जन्मनि॥२९
ब्रह्मलोकमवाप्नोति पापस्यास्य प्रभावतः । प्रायश्चित्ते कृते रिष्टं वर्षे षष्टिमिते ध्रुवम् ॥ ३०
आयुर्नवतिवर्षान्तमत्र पापविशोधनात् । जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् ॥ ३१
अष्टाक्षरं त्रिसाहस्रं जप्त्वा शुद्धिं समाचरेत् । होमयेत्तद्दशांशेन शक्त्या विप्रांश्च भोजयेत् ॥३२
शृणुयाद्धरिवंशं वा दशावृत्त्या विधानतः । य एवं कुरुते सूत द्वयोः पापविशोधनम् ॥ ३३
तस्य पुत्रविवृद्धिः स्यात्स्त्रीभ्यामत्रैव जन्मनि । नाधयो व्याधयस्तस्य न चारिष्टभयं क्वचित्॥३४
नैवं करोति यो मोहाल्लोभात्पापविशोधनम् । न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः॥३५
पञ्चत्रिंशन्मिते वर्षे रिष्टं देहधनान्तिकम् । त्रिसप्ततिमितं चायुः प्रायश्चित्ते कृतेऽधुना ॥ ३६
गतिमप्युत्तमां याति त्वन्यथा ह्याततायिनाम् । जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम्॥३७
यदन्तरगतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ ३८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः पंचषष्ट्यधिकचतुःशततमः ॥ ९६५ ॥

श्रीसूर्य उवाच ।

यः प्राप्नोति हि धर्मात्मा सर्वपापविशोधनम् । सर्वस्वेन यजेद्देवान् पितॄंश्च श्रद्धयान्वितः ॥ १
गयाश्राद्धादिभिः कर्मैर्हव्यैर्दानैर्विधानतः । पूर्वपापविनिर्मुक्तो याति ब्रह्मसनातनम् ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः षट्षष्ट्यधिकपंचशततमः ॥ ९६६ ॥

अरुण उवाच ।

कथयस्व दिवानाथ लोकानां हितकाम्यया । पृच्छामि तेऽत्र देवेश छिन्धि मे सर्वसंशयान्॥१
जातुसमानां जघनि सदा संपत्समृद्धिमान् । पूर्वजन्मनि किं जन्म सुखसंपत्समन्वितः ॥ २
बन्धूनामपि सौख्यं च वैष्णवीमतिवर्तने । जातसंततिदुःखार्तः कस्येदं कर्मणः फलम् ॥ ३

श्रीसूर्य उवाच ।

ब्राह्मणी गर्भयुक्ता च प्रयाणे भर्तृसंयुता । सर्वाभरणभूषाढ्या नानारत्नसमन्विता ॥ ४
बहुभिर्मिलितैश्चौरैर्जग्धे सर्वभूषणम् । तत्र कोलाहलो जातो गर्भपातोऽभवत्तदा ॥ ५
तेन पापेन बालानां गर्भनाशः प्रजायते ॥ ६ ॥

अरुण उवाच ।

का तस्य निष्कृतिः स्वामिन् येन पापं प्रणश्यति । एतेषां विस्तरं भगवन् लोकानां हितकाम्यया॥७

श्रीसूर्य उवाच ।

एकवासो विधिश्चैव लक्षपूजा ततः परम् । सगर्भा गौः प्रदातव्या भोजनं शतसंमितम् ॥ ८
गर्भात्प्रभृत्यागतामम्भोऽभिषेकः समयादनु । पञ्चमे वाथ षष्ठे वा मासि जातः स्मृतश्च यः ॥ ९
तयोः कर्मविशेषांश्च कथयिष्यामि योषितोः । सप्तमेषु च मासेषु यत्कृतः प्रसवक्षियः ॥ १०
अथवा चाष्टमे मासि सूत सद्यो विपद्यते । स चापि मृतकल्पा स्यादामयैः सूतिकामयैः ॥११
शोकादामोदरे टोपं शूलं गौरवकम्पनैः । रक्तस्रावो विवर्णश्च जायते कर्मणेरितः ॥ १२

---

१ गर्भाश्रयगतश्चांभो इति—ख पु० ।

रजस्तस्य पलाभ्यां तु कोशगर्भाश्रयाकृति। कुसुम्भवेष्टितं तं वा रक्तवस्त्रेण वेष्टयेत् ॥ १३ ॥
मधुना पूरयेत्तत्र शलाकां रूप्यवर्तिनीम्। तन्मध्ये हेमशकलं क्षिपेदपि च यत्नतः ॥ १४ ॥
दद्याद्विप्राय विधिवद्यथाश्रुतिनिरूपितम् ॥ १५ ॥

प्रार्थना।

" यन्मया पूर्वतः स्वामिन् गर्भपातः कृतः पुरा। एतत्पापविशुद्ध्यर्थं गर्भकोशं ददाम्यहम्॥१६॥
मया मूढेन यद्धेतोर्निपिक्तं परयोषिति। ततोऽनपत्यं यत्प्राप्तं तस्मान्मां मोचय प्रभो " ॥ १७ ॥
एवं कृतविधेः सूत गर्भपाताऽघनाशनम्। ब्राह्मणान्भोजयेत्सम्यग्गां दद्याच्च सवत्सकाम् ॥ १८॥
सर्पिष्यात्मानमालोक्य भोजयेदिष्टवान्धवान् ॥ १९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः सप्तषष्ट्यधिकपंचशततमः ॥ ५६७ ॥

श्रीसूर्य उवाच।

या नारी घातयेत्काचित्पुरुषं प्राग्भवेऽण्डज। सात्र जन्मनि रोगेण शूलेनैव प्रपीड्यते ॥ १ ॥
सुवर्णदानाद्विधिवत्तथा रुद्रजपादिह। पूजनाच्छंकरस्यापि शूलरोगाद्विमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टषष्ट्यधिकपंचशततमः ॥ ५६८ ॥

श्रीसूर्य उवाच।

पूर्वजन्मनि यो ज्ञानान्नरो वै घातयेत्सुतम्। मित्रं च वायुरोगेण पीड्यते चात्र जन्मनि ॥ १ ॥
तत्र कुर्यान्महाबाहो मन्त्रैस्तद्वायुदैवतैः। पूजनं वायुदेवस्य गन्धपुष्पैश्च धूपकैः ॥ २ ॥
नैवेद्यैर्बहुभक्ष्यैश्च वायुर्नश्यति तत्क्षणात्। इह जन्मनि पक्षीन्द्र पूजा विज्ञानुसारतः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनसप्तत्यधिकपंचशततमः ॥ ५६९ ॥

श्रीसूर्य उवाच।

गोत्रघातकरी या च पुरा ज्ञानेन काश्यप। सात्र जन्मनि लूताढ्या भवत्येव भयोदितम् ॥ १ ॥
तीर्थस्नानव्रतादीनि निष्फलान्यत्र चाण्डज। ज्ञानपूर्वकृतात्पापाद्रोगादेव क्षयो भवेत् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्यधिकपंचशततमः ॥ ५७० ॥

श्रीसूर्य उवाच।

कश्चिच्छूद्रो महाभाग बभूव प्राग्भवे धनी। व्यापारनिरतो दक्षो क्रयविक्रयकर्मसु ॥ १ ॥
नीतं स्नेहं तेन तेन सर्वं मिलित्वा चार्धसीरिणाम्। कालेन तद्धृतं लोभात्स्नेहं गौल्याधिकं सुत॥२॥
भुक्त्वा पापफलं घोरं भ्रमरत्वमुपागतः। ततः पुण्याच्छुभान्भुक्त्वा पुनर्जातोऽत्र जन्मनि ॥ ३ ॥
शूद्रः पुण्यकलायुक्तो भूमिदानात्सुरार्चनात्। स्नेहहारी यतः पूर्वं राजयक्ष्मप्रपीडितः ॥ ४ ॥
सर्वस्नेहातिदानाद्वै स्ववित्तात्तुर्यभागतः। स्वर्णदानं तथा चात्र क्षयरोगाद्विमुच्यते ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकसप्तत्यधिकपंचशततमः ॥ ५७१ ॥

श्रीसूर्य उवाच।

विषं दत्त्वा पतिं सूत या प्राग्जाराश्रिताऽसती। पतिघ्नी सा महादुष्टा बाल्येऽत्र विधवा सुत ॥१॥
विष्णोराराधनादत्र गङ्गायामुपसेवनात्। गतिं शुभां सा प्राप्नोति व्रतकृच्छ्रोपसेवनात् ॥ २ ॥
धर्मादत्र महाभाग परत्र च शुभागतिः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विसप्तत्यधिकपंचशततमः ॥ ५७२ ॥

श्रीसूर्य उवाच ।

देवागारं दहेद्यस्तु प्राग्जन्मन्यथ पुत्रक । रक्तातिसाररोगेण बाध्यतेऽत्रैव जन्मनि ॥
तद्देवदानाद्विप्राय स्थापनाद्वा विधानतः । मुच्यते पापजाद्रोगादतिसाराद्विनिश्चितम् ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिसप्तत्यधिकपंचशततमः ॥ ५७३ ॥

श्रीसूर्य उवाच ।

मूर्धाभिषिक्तजः कश्चिन्मथुरायामभूत्सुधीः । राजसेवी महाशूर आखेटकरतः सदा ॥
मृगयार्थं गतो दैवाद् घातिता मृगसूकराः । तत्रैका हरिणी सूत घातिता गर्भसंयुता ॥
तद्गर्भजौ हतौ तत्र शुभौ द्वौ मृगशावकौ । सहायाभ्यां युतेनैव कृतं कर्म दुरात्मना ॥
ताभ्यां मिलित्वा तौ भुक्तावमायां चाण्डजाधिप । सोऽपि काले महाभाग प्राप्तः शत्रुवशं पुरा ।
स्वशौर्यकर्मणा सूत घातयित्वा रिपून् बहून् । घातितः सोऽपि बहुभिः प्रहारैरतिदारुणैः ॥
संग्रामभूमौ स मृतः प्राप्तः स्वर्गपुरं तदा । भुक्त्वा नानाविधान्भोगान्स जातो ब्राह्मणोऽधुना ।
देशे प्रयागनिकटे सर्वशास्त्रार्थकोविदः । जातः कर्कटके जीवे लग्नस्थे हि महातपाः ॥
धनैर्नानाविधैर्युक्तो गौराङ्गो रक्तलोचनः । शिवपूजनजात्पुण्यात्प्राक्कृतात्सकलैः सुखैः ॥
नानामनोरथैश्चापि पूर्णश्चात्रैव जन्मनि । राज्यप्रचार्यत्युग्रश्च पुण्यात्पापफलं शृणु ॥
धूर्तः शठः सर्वभक्षः स्वल्पपापरतः क्वचित् । सहायलक्षणमतः शृणु पुत्र यथा तथा ॥
याभ्यां मिलित्वा भुक्तौ द्वौ मृगशावौ खगाधिप । पृच्छकस्य च तौ पुत्रावुभौ ज्येष्ठकनिष्ठकौ ।
अपस्मारेण रोगेण मृतौ चात्रैव जन्मनि । एवं संततिदुःखार्तः स विप्रो विधिवर्जनात् ॥
मांसभुग्जनितात्पापात्प्रायश्चित्तं वदाम्यहम् । पूजयेच्छिवलक्षं तु तदर्धं वा तदर्धकम् ॥
हिरण्मयौ तथा देयौ द्वावत्र मृगशावकौ । पूजयेच्च तथा वायुं विधिना मृगदैवतम् ॥
तन्मन्त्रैर्धूपगन्धाद्यैर्नानाभक्षैर्विधानतः । प्रायश्चित्तं परं तस्य पापस्य क्षयकारकम् ॥
अथवा भोजयेद्विप्रान्सहस्रद्वयसंमितान् । पुत्रपौत्रविवृद्धिः स्यात्प्रायश्चित्ते कृतेऽधुना ॥
अकृतप्रायश्चित्तस्य न च पुत्रसुखं भवेत् । रिष्टेन मरणं चापि वर्षे वेदाब्धिकेऽण्डज ॥
प्रायश्चित्ते कृते तस्य जीवनं पञ्चसप्ततिम् । चैत्राष्टम्यां च निधनं शुक्लायां गरुडाग्रज ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःसप्तत्यधिकपंचशततमः ॥ ५७४ ॥

श्रीसूर्य उवाच ।

गर्भपातनपापाढ्या बभूव प्राग्भवेऽण्डज । साऽत्रेयं तेन पापेन गर्भपातनदुःखिनी ॥
विप्रकन्याविवाहादौ विधिवदत्र जन्मनि । मुच्यते तेन पापेन गर्भस्थैर्यं भवेदिह ॥
अथवा पार्वतीं दद्याद्धैमीं दशसुवर्णजाम् । युक्तां स्कन्दगणेशाभ्यां नानाभरणभूषिताम् ॥
तदर्धार्धमितां वापि पूजयित्वा विधानतः । मुच्यते पूर्वपापाच्च गर्भपातनजात्सुत ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचसप्तत्यधिकपंचशततमः ॥ ५७५ ॥

श्रीसूर्य उवाच ।

यो कोऽपि दाहयेन्नारीदेवागारं पतत्रिण । सातिसारेण महता पीडया पीड्यतेऽधुना ॥
शंकरप्रतिमादानान्मूर्तेर्विष्णोः प्रपादनात् । न जायते महापीडा रक्तातीसारसंभवा ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्सप्तत्यधिकपंचशततमः ॥ ५७६ ॥

श्रीसूर्य उवाच ।

ब्रह्महा प्राग्भवे सूत तिर्यक्त्वं प्राप्य निश्चयात् । नरकान्दारुणांश्चैव जायतेऽत्रैव जन्मनि ॥ १ ॥
कर्मक्षयेऽतिकष्टेन तस्मिन्वयसि पीडितः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तसप्तत्यधिकपंचशततमः ॥ ५७७ ॥

श्रीसूर्य उवाच ।

या काचिद्भ्रातयेन्नारी पतेर्मित्रं च प्राग्भवे । नियतं वायुरोगेण पीड्यते बहुपीडया ॥ १ ॥
पापं परीक्ष्य विप्रादेः सर्वस्वार्धार्धजेन च । वायुं हिरण्मयं कुर्यान्मृगं विहितलक्षणम् ॥ २ ॥
पूजयित्वा विधानेन गन्धैर्वस्त्रैर्विशेषतः । मन्त्रैश्च वायुजैः सूत दद्याद्विप्राय धीमते ॥ ३ ॥
वायुरोगोपशमनं दानेनानेन जायते ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टसप्तत्यधिकपंचशततमः ॥ ५७८ ॥

श्रीसूर्य उवाच ।

अज्ञानादथवा नारी गोत्रघातकरी पुरा । बभूव सततं चात्र लूतिरोगप्रपीडिता ॥ १ ॥
श्रवणादितिहासानां प्राजापत्यव्रतात्सुत । लूतिरोगं न पश्येत सोऽत्र जन्मनि चाण्डज ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनाशीत्यधिकपंचशततमः ॥ ५७९ ॥

अरुण उवाच ।

भूमिदेवकुलोत्पन्नः किंचिद्वित्तसमन्वितः । संयुतो वायुपित्ताभ्यां नेत्रतोदः शिरोऽर्तिमान् ॥ १ ॥
सतव्रतश्च सुधीर्धीमान् धार्मिष्ठो धर्मवत्सलः । व्रणो वाताग्निदशनश्चान्यव्याधिप्रपीडितः ॥ २ ॥
परोक्षमपवादं च ब्रुवते कारणं विना । तस्य प्रिया सदाचारा सती व्रतपरायणा ॥ ३ ॥
काकवन्ध्या कथं जाता कस्येदं कर्मणः फलम् ॥ ४ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि वैश्येन भार्या विप्रस्य सात्त्विकी । प्रतिवेश्मि[1] तदा तस्य ब्रह्मणो ज्ञानसत्तमः ॥ ५ ॥
अप्रसूता प्रिया तस्य चपला चारुलक्षणा । वैश्येन कथयित्वा तु लोभमोहादिविभ्रमैः ॥ ६ ॥
अज्ञानात्कामामिच्छन्ती उभयेऽपि बलीयसा । तावत्कालवशेनैव ब्राह्मणो जडतां[2] गतः ॥ ७ ॥
स वैश्यो दैवयोगाच्च भाविनोऽर्थस्य वै बलात् । स तां वै धर्षयामास बहुकालं खगेश्वर ॥ ८ ॥
व्यभिचारवशात्तत्र अन्यतस्तद्धनं हृतम् । गृहीतं तद्धनं तेन धूर्तेन लोभचेतसा ॥ ९ ॥
ब्राह्मणी निधनं प्राप्ता लोके गृह्णाति विश्रुतिम् । तेन दुःखेन विप्रोऽसौ ब्राह्मणीमत्यजत्पुरा १० ॥
निर्वेशं जायते तत्र ब्राह्मणस्य खगेश्वर । तेन कर्मविपाकेन तादृशं च भवेदिह ॥ ११ ॥
पश्चान्मानुषमापन्नो बहुशोकाकुलो भृशम् । इदं जन्म द्वितीयं तु ब्रह्मवंशसमुद्भवम् ॥ १२ ॥
प्राप्यते चानपत्यत्वमेकापत्यमथो यदि ॥ १३ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं स्वामिन् येन बन्ध्यत्वनाशनम् । एकापत्यभवं दुःखमनपत्यमथो यदि ॥ १४ ॥

---

१ उपभुक्ता इति भवेत् । २ जनतां इति–ख० पु० ।

श्रीसूर्य उवाच ।

मार्गशीर्षे शुभे मासि शुक्लपक्षादितः खग । प्रत्यक्षं सुखसौख्याप्तिर्व्रतं तु मुनिवासरम् ॥ १५
षोडशाब्दानि नारीणां कर्तव्यं विधिपूर्वकम् । गौरीव्रतमिदं दीर्घं सुखसौख्यफलप्रदम् ॥ १६
प्रातर्नियममास्थाय दन्तधावनपूर्वकम् । अद्याहं शिवयोः प्रीतिमाचरिष्ये शुभं व्रतम् ॥ १७
स्थानप्रवासनिरतं निशि जागरतत्परा । ततो मध्याह्नसमये स्नात्वा कुंकुमवाससी ॥ १८
परिधायार्चयेद्गौरीं पतिपुत्रवतीं स्त्रियम् । कुंकुमैः कज्जलैरेभिः करणैः पुष्पमालया ॥ १९
ताम्बूलैस्तु सकर्पूरैः सौभाग्याष्टकवस्तुना । ततश्चास्तमिते भानौ वर्तिः षोडशतन्तुभिः ॥ २०
विधाय तिलतैलेन दीपान्कुर्याच्छिवाग्रतः । गीतवादित्रनिर्घोषैः पुराणश्रवणादिभिः ॥ २१
नैवेद्यं विधिवत्कुर्यादपूपतिलतण्डुलैः । तथा षोडशसंख्यानि शूर्पाणि वैणवानि च ॥ २२
सप्तधान्यफलोपेतं सौभाग्याष्टकसंयुतम् । प्रत्येकं दीपान् विन्यस्य गौर्यग्रेऽपि प्रकल्पयेत् ॥२३
पतिपुत्रसुखायैव पूजयन्ती गिरेः सुताम् । भोजयेत्षोडश नार्यः शुभास्ताः पतिसंयुताः ॥ २४
एवं विधिं समास्थाय भोजयेद्दम्पतीञ्शुभान् । नानाभोज्यैस्तथापूपैः पक्षिभ्यो वलिमाहरेत् ॥२५
दीनान्धकृपणेभ्योऽन्नं सर्पिष्यात्मानमीक्षयेत् । एतद्गौरीव्रतं नाम मार्गशीर्षे समाचरेत ॥ २६ ॥
एवं कृतविधिः सूत प्राप्नोति पुत्रपौत्रकान् । नारी नियमसंपूर्णं व्रतं कुर्यात्प्रयत्नतः ॥ २७ ॥
सुतसौभाग्ययुक्ता सा पतिपुत्रसुखाप्तये । ऐहिकं लक्षणं तस्य नारीणां चात्र जायते ॥ २८ ॥
स्वसा मातृष्वसा वापि सपत्नी शोकसंयुता । उदरार्तिरसृक्स्रावः पार्श्वपादकरादिषु ॥ २९ ॥
मिथ्याभिशंसनं कापि वाक्यदोषधनश्रुतिः । स्वसातिनिन्दाहीना सा परेभ्यो मर्मतोदनम् ॥३०॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽशीत्यधिकपंचशततमः ॥ ५८० ॥

श्रीसूर्य उवाच ।

शकृन्मूत्रं सृजेद्यस्तु देवागारे नराधमः । गुदरोगमवाप्नोति सोऽत्र जन्मनि मानवः ॥ १
मासैकं पूजयेद्विष्णुं शिवं वा विधिनाण्डज । प्राजापत्यं चरेत्कृच्छ्रं दद्याद्गोमिथुनं सुत ॥ २
न पश्यति तदा पीडां गुदजामत्र जन्मनि ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकाशीत्यधिकपंचशततमः ॥ ५८१ ॥

श्रीसूर्य उवाच ।

घातयेद्यः पुरा नारीमज्ञानात्पूर्वजन्मनि । सोऽत्र जन्मनि जायेत कृशो वलविवर्जितः ॥ १ ।
शर्कराधेनुदानेन दशसंख्येन चाण्डज । विमुच्यते कृशत्वाच्च शतब्राह्मणभोजनात् ॥ २ ।
होमात्स्वस्त्ययनात्पुण्याद्गायत्रीजपतोऽत्र च । तीर्थस्नानादाज्यदानाद्बली भवति नान्यथा ॥ ३ ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकाशीत्यधिकपंचशततमः ॥ ५८२ ॥

श्रीसूर्य उवाच ।

बालानां घातिनी चेयमभवत्पूर्वजन्मनि । तेनाष्टाब्दमितादूर्ध्वादूर्वाग्बालो न जीवति ॥ १ ।
अत्र जन्मनि भो सूत तस्मात्सा मृतपुत्रका । इदं जीवेदिदं जीवेदिति चिन्तयती ध्रुवम् ॥ २ ।
न जीवन्ति च तत्पुत्राः पूर्वपापात्तथाण्डज । प्रायश्चित्तं शृणुष्वाथ येन जीवन्ति तत्सुताः ॥ ३
श्रवणाद्धरिवंशस्य दशावृत्त्या खगेश्वर । पञ्चत्र्येकमितावृत्त्याद्विजादिशिशुजाद्धवात् ॥ ४

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायत्र्यशीत्यधिकपंचशततमः ॥ ५८३ ॥

श्रीसूर्य उवाच ।

यः कश्चिद्घातयेत्पूर्वं ब्राह्मणं ज्ञानवर्जितः । कुष्ठरोगान्वितः सोऽपि जायतेऽत्रैव जन्मनि ॥ १ ॥
दद्यात्कालनरं सूत सर्वोपस्करसंयुतम् । सर्वस्वं वा महापापे दानमुक्तं मनीषिभिः ॥ २ ॥
सर्वस्वदानात्कुष्ठस्य पीडा नश्यति तत्क्षणात् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरशीत्यधिकपंचशततमः ॥ ५८४ ॥

श्रीसूर्य उवाच ।

देवद्रव्यं हरेत्सूत पूर्वजन्मनि यो नरः । सोऽत्र जन्मनि जायेत वायुपीडाभिरन्वितः ॥ १ ॥
प्रायश्चित्तं परं वायोर्नाशनं तस्य वच्म्यहम् । जपेन्मृत्युंजयं मन्त्रं सावित्रीं च विशेषतः ॥ २ ॥
होमयेत्तद्दशांशेन ब्राह्मणान्भोजयेत्तथा । वायुरोगोपशान्त्यर्थं शक्त्या दद्याच्च दक्षिणाम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाशीत्यधिकपंचशततमः ॥ ५८५ ॥

श्रीसूर्य उवाच ।

देवागारे तु या काचित्प्राग्भवे विनतासुत । सृजेन्मूत्रं पुरीषं च मोहादत्रैव जन्मनि ॥ १ ॥
गुदरोगान्विता सा तु नारी पापप्रणाशनम् । वक्ष्ये गोमिथुनं दद्यात्प्राजापत्यं चरेद्व्रतम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडशीत्यधिकपंचशततमः ॥ ५८६ ॥

श्रीसूर्य उवाच ।

बभूव सुखजः कश्चिद्विद्याधनसमन्वितः । नानाकलासु कुशलो विष्णुभक्तिपरायणः ॥ १ ॥
राहुग्रस्ते प्रयागे तु सर्वस्वमददात् पुरा । तत्र भाविबलात्सूत पापमाचरितं त्विदम् ॥ २ ॥
धर्षिता क्षत्रिया सूत कामलोभाच्छुभानना । प्रतारितः पतिस्तस्यास्तेन दैवहतेन तु ॥ ३ ॥
ततो मृत्युवशं प्राप्तः स गत्वा यमशासनम् । शुभाच्छुभफलं भुक्त्वा चाशुभं त्वतिदारुणम् ॥ ४ ॥
अन्यजन्मनि दानेन स जातः क्षत्रियादधः । देशे विपाशानिकटे सप्तयोजनसंमिते ॥ ५ ॥
सुरूपदेहः सद्बुद्धिः स्त्रीपुत्रधनसंयुतः । शूरो दाता प्रधानश्च देशेदेशेऽतिविश्रुतः ॥ ६ ॥
किंचित्पापरतो धूर्तो मनोदुःखाकुलो भृशम् । धर्षिता क्षत्रिया पूर्वं भर्तृसंताडनात्तथा ॥ ७ ॥
वार्द्धक्ये कण्डुरोगार्तो निश्चयादत्र जन्मनि । लक्ष्मैतदण्डजश्रेष्ठ सूर्यशुक्रौ चतुर्थकौ ॥ ८ ॥
वक्ष्यामि तस्य पापस्य निष्कृतिं पापशोधनीम् । लक्ष्मीनारायणं दद्यात्पलेनार्धपलेन वा ॥ ९ ॥
हिरण्मयं सुघटितं सर्वाभरणभूषितम् । पूजयित्वा तु गन्धैश्च पुष्पैर्नानाविधैस्तथा ॥ १० ॥
दीपैर्विचित्रैर्विधिना दद्याद्विप्राय धीमते । गणनायकं तथा दद्यात्सौवर्णं दशमाषकम् ॥ ११ ॥
एवं विधानं यः कुर्यात्पूर्वपापविशोधनम् । न तस्य दद्रुः कण्डूश्च तस्माद्रोगात्प्रमुच्यते ॥ १२ ॥
अकालमरणं तस्य प्रायश्चित्ते कृतेऽत्र च । प्रायश्चित्ते कृते तत्र जीवनं वर्षसप्ततिम् ॥ १३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्ताशीत्यधिकपंचशततमः ॥ ५८७ ॥

श्रीसूर्य उवाच ।

देवागारे तु या काचित्प्राग्भवे विनतासुत । सृजेन्मूत्रं पुरीषं च मोहादत्रैव जन्मनि ॥ १ ॥
गुदरोगान्विता सा तु नारी पापप्रणाशनम् । वक्ष्ये गोमिथुनं दद्यात्प्राजापत्यं व्रतं चरेत् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय अष्टाशीत्यधिकपंचशततमः ॥ ५८८ ॥

श्रीसूर्य उवाच ।

घातयेद्यः स्त्रियं साध्वीं कामात्पापविमोहितः । प्राग्भवे नियतं सोऽत्र कार्श्यं भजति जन्मतः ॥ १
तेनैव मृत्युमाप्नोति रोगेणैव पतत्रिणः । प्राप्ते रिष्टेऽथ नष्टायुर्जायते महदेनसः ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोननवत्यधिकपंचशततमः ॥ ५८९ ॥

श्रीसूर्य उवाच ।

कन्यकावधजात्पूर्वं तस्मात्कन्या प्रजा भवेत् । जन्यन्यत्र महाभाग पूर्वपापादिदं फलम् ॥ १
पूजनाल्लक्षरुद्राणां तदर्धानां तथा सुत । मुच्यते पूर्वपापाच्च घोरात्कन्यावधादिह ॥ २
अथवा विधिना सूत तडागोत्सर्गपुण्यतः । विप्राणां भोजनात्तस्मिंस्तडागे गोप्रदानतः ॥ ३
पूर्वपापात्प्रमुच्येत नात्र कार्या विचारणा ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवत्यधिकपंचशततमः ॥ ५९० ॥

श्रीसूर्य उवाच ।

या च पूर्वभवे नारी देवद्रव्यापहारिणी । सात्र जन्मनि पक्षीन्द्र भवेद्वायुप्रपीडिता ॥ १
देवालयं सुरुचिरं कृत्वा स्थाप्यात्र देवताः । वायुरोगोपशमनं निश्चितं जायतेऽण्डज ॥ २
भोजयेत्तत्र वै विप्रान् वायुप्रीत्यै पतत्रिण । दानं वित्तानुसारेण वित्तशाठ्यं न कारयेत् ॥ ३

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकनवत्यधिकपंचशततमः ॥ ५९१ ॥

श्रीसूर्य उवाच ।

कश्चित्क्षात्रकुले सूत पूर्वजन्मन्यभूद् ध्रुवम् । गिरिवासी महादुष्टश्चौर्यकर्मरतो दृढम् ॥ १
लुण्ठितो ब्राह्मणस्तत्र मार्गे संताडितो भृशम् । तत्ताडनान्महावाहो मृतः काले द्विजोत्तमः ॥ २
गते बहुतिथे काले स जातो ब्रह्महाऽधुना । गङ्गायमुनयोर्मध्ये क्रूरकर्मा महोद्यमी ॥ ३
प्राक् शिवाराधनात्पुण्याद्बाहुजः कुष्ठसंयुतः । वक्ष्यामि निष्कृतिं तस्य पूर्वपापौघनाशनीम् ॥ ४
सर्वस्वस्य समः कार्यो वृषभोऽत्र हिरण्मयः । क्षौमवस्त्रयुतो भव्यः शृङ्गाभ्यां संयुतो महान् ॥ ५
स देयो वेदविदुषे कुष्ठदोषोपशान्तये । दानेनानेन सततं प्रीतो भवति वै शिवः ॥ ६
तस्माच्छिवप्रसादाद्वै कुष्ठस्तस्य प्रशाम्यति ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायो द्विनवत्यधिकपंचशततमः ॥ ५९२ ॥

श्रीसूर्य उवाच ।

प्रागासीद्बाहुजा काचिद्भर्तृप्रियतमा सदा । दानधर्मरता साध्वी विप्राणां पूजने रता ॥ १
तथा दैवात्सा सुभगा द्रव्यलोभरता सदा । सपत्नीपुत्रे त्वद्दाद्विषं च तद्वशानुगम् ॥ २
मृतस्तद्विषयोगेन गृहीतं तद्धनं तया । तद्दुःखेन पतिस्तस्या मृतः पुत्रशुचान्वितः ॥ ३
पापमाचरितं चोग्रं स्वपुत्रवधसंज्ञकम् । प्राप्ता यमपुरे भुक्त्वा पूर्वपुण्यफलं शुभम् ॥ ४
तद्वत्पापफलात्सूत घोरान्नरकसंज्ञकान् । पूर्वपुण्यप्रभावेण सा जाता पर्वतेऽधुना ॥ ५
क्षात्रे कुले महापुण्ये राज्ञस्त्रास्ति पतत्रिण । सा रक्तगौरा धर्मज्ञा सदा पुण्यपरायणा ॥ ६
मध्यस्वरूपा सिद्धार्था सुशीला गौरवान्विता । नातिव्ययायुता मान्या सर्वकर्मसु कौशला ॥ ७
पुण्यादिदं तथा पापाल्लोभाढ्या न सपुत्रका । स्वल्पपापरता काले कुष्ठव्याधिसमन्विता ॥ ८
यौवने भर्तृसंयुक्ता वार्द्धक्ये सुखवर्जिता । सपत्नीपुत्रस्य वधात्पूर्वपापात्पतत्रिण ॥ ९

लक्षणैरेभिराढ्यायाः प्रायश्चित्तं वदाम्यहम् । विष्णुः कार्यः शतैर्भागैः सौवर्णो विश्वयोनिभृत्॥१०॥
तद्वन्महेश्वरः कार्यो गन्धैः पुष्पैरलंकृतः । देयो विप्रेषु पात्रेषु पूर्वपापापनुत्तये ॥ ११ ॥
जपेदष्टाक्षरं मन्त्रमयुतं होमयेत्ततः । गायत्रीं च जपेत्तद्वद्दानवो देयास्तथा सुत ॥ १२ ॥
भोजयेच्छक्तितो विप्रांस्तेभ्यो दद्याच्च दक्षिणाम् । एवं कुर्यात्प्रयत्नेन पूर्वपापविशोधनम् ॥१३॥
न तस्याः कुष्ठस्मरणं तदग्रे जायते ध्रुवम् । नैवं या कुरुते नारी प्रायश्चित्तं विधानतः ॥१४॥
पूर्वपापप्रभावेण तस्याः पुत्रविनाशनम् । विप्राणां पूजनाद्दानात्तस्याः संततिवर्धनम् ॥ १५ ॥
जीवनं कथितं तस्या वर्षाणामष्टसप्ततिम् । रिष्टं षष्टिमितादब्दाद् ध्रुवं वा कृतनिष्कृतेः ॥ १६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिनवत्यधिकपंचशततमः ॥ ५९३ ॥

अरुण उवाच ।

कश्चिद्विप्रकुलोत्पन्नो शोभनाऽन्वयवः सुत । सदाचारः सुशोभाढ्यो दयानियमतत्परः ॥ १ ॥
क्रयविक्रयकर्ता च किंचिद्व्यापारवान्भुवि । तस्य प्रिया शुभाचारा पतिभक्तिपरायणा ॥ २ ॥
मातृपक्षं समाश्रित्य पालिता भ्रातृमातुलैः । असृग्वातगदार्ता सा बाल्ये स्याद्ग्रहणीगदः ॥ ३ ॥
काष्ठलोष्टाश्मशस्त्राद्यैर्घातोऽस्याः करपादयोः । बहुपुत्रप्रसूता च अपुत्रा जायते भुवि ॥ ४ ॥
अथवा मृतपुत्रत्वं जायते केन मानद । जातमात्रा मृताः केचित्केचित्पौगण्डमाश्रिताः ॥ ५ ॥
केचिद्दृष्टानना वापि मृतः पुत्रोऽग्निमासकः । रक्तस्रावाद् भृशं पीडा मासेमासे कृतानघ ॥ ६ ॥
केन कर्मविपाकेन सत्यं वद दिवस्पते ॥ ७ ॥

श्रीसूर्य उवाच ।

पूर्वं क्षात्रे समुत्पन्नः किंचिद्भूमिपतिस्तथा । तावज्जन्मनि वैश्यस्तु परवित्तापहारकः ॥ ८ ॥
दूतिकाकर्मनिरतो नानालोकभिदन्वहम् । ग्रामाधीशोऽभवत्सोऽपि तेनाग्रे सर्वभावितम् ॥ ९ ॥
एकग्रामेऽवसद्विप्रः शान्तो दान्तः क्षमी सदा । पुत्र्यः पञ्च तथा सप्त चापुत्रो वित्तसंयुतः ॥ १० ॥
कालेनैव मृतो विप्रो हृतं तस्य धनं तदा । मिथ्याभिशंसनाद्वाक्यैः क्रोधयुक्तैश्च तर्जनैः ॥ ११ ॥
अपुत्रश्च मृतो विप्रः सर्वस्वं नीतवांस्तदा । निराधाराः सुता जाता द्विजभोजो न कारितः ॥ १२ ॥
क्रिया सर्वा कृता नैव सर्वं राज्ञा हृतं धनम् । एवं क्रमापरोधोऽसौ स क्षत्री सहदूतिकः ॥ १३ ॥
केचिन्मासाच्च पक्षाच्चाचिरान्मृत्युवशंगतः । म्लेच्छैर्विनिहतो मार्गे गतोऽसौ यमशासने ॥ १४ ॥
केचित्केचिद्विपच्यन्ते नरके भृशदारुणे । दानधर्मादिना केचिदिह जन्मनि मानद ॥ १५ ॥
विप्रवंशे समुत्पन्नो जायते चेह जन्मनि । इदं जन्म द्वितीयं तु विप्रत्वं जायते भुवि ॥ १६ ॥
पूर्वकर्मविपाकेन कन्यापत्यं प्रजायते । ब्रह्मस्वहरणाच्चैव मृतपुत्रः प्रजायते ॥ १७ ॥
नानापत्यानि नश्यन्ति नानाकर्मसमुद्भवात् । पापात्कृतानि कर्माणि भुज्यन्ते चेह जन्मनि॥१८॥

अरुण उवाच ।

प्रायश्चित्तं वद स्वामिन्येन पुत्रश्चिरं भवेत् । कन्यापत्यप्रशमनं बहुपुत्रः प्रजायते ॥ १९ ॥

श्रीसूर्य उवाच ।

सुशुभे भूमिदेशे तु गोमयाद्युपलिप्तके । अत्रोपर्याविकं स्तीर्यमथवा चाजिनं शुभम् ॥ २० ॥
छादयेच्छुक्लवस्त्रेण तण्डुलद्रोणपर्वतम् । तत्रोपरि न्यसेत्पात्रं ताम्रं दशकपालिनम् ॥ २१ ॥
स्थापयेत्काञ्चनीं मूर्तिं सौवर्णीं शुभलक्षणाम्। मुक्तायज्ञोपवीताढ्यां निष्कसौवर्णनिर्मिताम्॥२२॥

दधानं करयुग्मेन चाक्षमालां कमण्डलुम् । कश्यपाद्धामभागे च त्वदितिं विश्वमातरम् ॥ २३ ॥
सौवर्णां स्थापयेत्सूत सौवर्णद्वयनिर्मिताम् । आसनैश्च समास्थाय ततो द्रोणान् दिशो दश ॥२४॥
हारकेयूरमुकुटकुण्डलाभरणान्वितौ । एवं तौ दम्पती सम्यगर्चयेत्पर्वतोपरि ॥ २५ ॥
कृत्वा प्रतिष्ठितप्राणमर्चयेद्विविधैर्गुणैः । नानार्थं च फलं देयं नानापुष्पैश्च पूजयेत् ॥ २६ ॥
अभ्यर्च्य दंपती तौ तु मन्त्रमेतमुदीरयेत् ॥ २७ ॥

मन्त्रः ।

"यन्मया पूर्वजनुषि विप्राणां यद्धृतं धनम् । दूतिकाकर्मणा सूत वाक्यदोषादिकं कृतम् ॥२८॥
तत्सर्वं क्षम्यतां देव तव मूर्तिं ददाम्यहम्" ॥ २९ ॥
अदितिं च प्रणम्याथ कृताञ्जलिरिदं ब्रुवन् । अदिते विश्वमातस्त्वं शरण्या शरणार्थिनाम् ॥३० ॥
प्रजादुःखौघसंतप्तं हृदयं मे महेश्वरि । संप्रसन्नाथ दुःखान्तां प्रजां देहि यशस्विनि ॥ ३१ ॥
एवं कृत्वा विसर्ज्याथ ब्राह्मणान्भोजयेत्ततः । शालग्रामशिलां शुद्धां सोमकान्तमणिं तथा ॥३२॥
चन्द्रसूर्योपरागे तु ब्राह्मणाय समर्पयेत् । एवं कृतविधिः सोऽथ कृष्णां गां दापयेत्ततः ॥ ३३॥
सर्पिष्यात्मानमालोक्य भोजयेच्च समृद्धिभिः । ऐहिकं लक्षणं तस्य शरीरेऽप्युपजायते ॥ ३४ ॥
काष्ठलोष्टादिशस्त्राद्यैः करपादे व्रणो वदेत् ॥ ३५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्नवत्यधिकपंचशततमः ॥ ५९४ ॥

श्रीसूर्य उवाच ।

राजानं घातयेद्यस्तु पुरुषः प्राग्भवेऽण्डज । स राजयक्ष्मरोगेण युक्तं स्यादत्र जन्मनि ॥ १ ॥
तस्मिन्व्यसि पक्षीन्द्र सोऽपि प्राणैर्विमुच्यते । महापापोद्भवाद्रोगान्न चोक्तं विन्मयं मया ॥ २ ॥
अपि ज्ञानकृतात्पापाद्दृढरूपेण[1] काश्यप । नाशयत्यमरां सिद्धिं पूर्णायुरपि च ध्रुवम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचनवत्यधिकपंचशततमः ॥ ५९५ ॥

श्रीसूर्य उवाच ।

परगर्भं तु यः कश्चित्पातयेज्ज्ञानवर्जितः । जलोदरेण सततं रोगेणात्र प्रपीडितः ॥ १ ॥
जलधेनुप्रदानेन विधिना गरुडाग्रज । ताम्ररूप्यसुवर्णात्प्राग्दानात्पापविनाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षण्णवत्यधिकपंचशततमः ॥ ५९६ ॥

श्रीसूर्य उवाच ।

ब्राह्मणोऽभूत्कुरुक्षेत्रे कृपिकृद्वेदपारगः । स्वज्ञातीयस्य चान्यस्य वृत्तिलोपः कृतस्तदा ॥ १ ॥
तत्संबन्धेऽभवद्युद्धं द्वयोरेको मृतस्तदा । वृत्तिलोपी द्विजः काले गतो हि यमशासनम् ॥ २ ॥
भुक्त्वा तत्पापजं सर्वं शतद्वनिकटेऽधुना । सैव जातो द्विजश्चात्र युवभावे पतत्रिण ॥ ३ ॥
तत्पापनाशनं सर्वं प्रायश्चित्तं प्रवक्ष्यहम् । वेदाभ्यासान्महासूत सावित्रीजपतस्तथा ॥ ४ ॥
गङ्गायां वासतः पूर्वात्सर्वपापात्प्रमुच्यते । न कुष्ठवृद्धिरत्रास्ति तत्काले शमनं भवेत् ॥ ५ ॥
जीवेत्पष्टिमिताब्दान्तं रिष्टं चैव प्रशाम्यति । गतिस्तस्य महाभाग वेदाभ्यासाज्जपात्तथा ॥ ६ ॥
भविष्यति शुभा लोके परत्र च खगेश्वर ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तनवत्यधिकपंचशततमः ॥ ५९७ ॥

---

१ दनुरूपेण इति—ख पु० ।

श्रीसूर्य उवाच ।

कुलद्वयानन्दकरी पूर्वजन्मनि वैश्यजा । बभूव भर्तृसुहृदा तदाज्ञापालिनी सती ॥ १ ॥
अत्र जन्मनि सा विप्रा काश्यां जाता हि सुव्रत । व्रतदानपरात्रापि भर्तृतोषणसंयुता ॥ २ ॥
पञ्चपञ्चाशदब्दान्तं प्रविशेदत्र जन्मनि । स्वर्गकामा चिताग्नौ तु नात्र कार्या विचारणा ॥ ३ ॥
सा गमिष्यति वै स्वर्गं चात्र जन्मनि वै नरः । भविष्यति महाराजकुले राजातिधार्मिकः ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टनवत्यधिकपंचशततमः ॥ ५९८ ॥

श्रीसूर्य उवाच ।

पीड्यते वायुरोगेण दारुणेन पतत्रिण । पूर्वजन्मनि यश्चाद्यात्पूर्वं शूद्रां गृहाश्रिताम् ॥ १ ॥
प्रायश्चित्तं परं तस्य व्रतं चान्द्रायणं चरेत् । व्रतान्ते कपिलां दद्यात्सर्वपापापनुत्तये ॥ २ ॥
पापक्षये क्षयं याति रोगस्तत्पापजस्त्विह ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकोनषट्शततमः ॥ ५९९ ॥

श्रीसूर्य उवाच ।

स्वगर्भं पातयेत्पूर्वं नारी पापविमोहिता । जलोदरकृता पीडा जायते चात्र जन्मनि ॥ १ ॥
रजतस्वर्णताम्राणां दानाद्रोगविनाशनम् । जलधेनुप्रदानेन तथैव विनतासुत ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्शततमः ॥ ६०० ॥

श्रीसूर्य उवाच ।

अस्त्यत्र सुमुखी सूत सदा भर्तृपरायणा । दानधर्मपरा भव्या सुभगा पुत्रवर्जिता ॥ १ ॥
पूर्वमासीच्च सुखजा सगर्भा फललालसा । त्रोटितं च फलं पक्वं भक्षार्थं चौर्यकर्मणा ॥ २ ॥
तेन कर्मविपाकेन फलहीना इहाभवत् । भवन्ति खलु ये पुत्रा अर्वाक् वर्षाष्टतोऽण्डज ॥ ३ ॥
पञ्चत्वमाप्नुवन्त्यत्र यस्मादकृतनिष्कृतिः । निष्कृतिं तत्प्रवक्ष्यामि पूर्वपापविनाशनीम् ॥ ४ ॥
शनिवारेऽण्डजश्रेष्ठ निमन्त्र्याश्वत्थकं सुत । तत्तले ब्राह्मणान्सूर्यदिने षष्ठ्यां तु भोजनम् ॥५॥
नानाफलैस्तथा पक्वैः सपूपैः रससंयुतैः । फलानि विकिरेत्तत्र कृत्वाश्वत्थप्रदक्षिणाम् ॥ ६ ॥
पूजयेत्तु महाभाग जीवेत्तस्याश्च वै सुतः ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकाधिकषट्शततमः ॥ ६०१ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि या काचिद्घातयेद्ब्राह्मणं सुत । सात्र जन्मनि कुष्ठेन तस्मिन्वयसि पीडिता ॥ १ ॥
जायते म्रियते सा च गलत्कुष्ठेन चाण्डज । पापाद् ज्ञानकृतात्पूर्वान्न चोक्तं विन्मयं मया ॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्यधिकषट्शततमः ॥ ६०२ ॥

श्रीसूर्य उवाच ।

देशे हि यामुने ह्यासीत्पूर्वं वाहुजसंज्ञकः । गङ्गास्नानं कृतं पूर्वं वाहुजानां सहायतः ॥ १ ॥
शकटेन कुटुम्बं तु पाल्यते तेन जानता । एकस्मिन्दिने गत्वा ददाह वनमद्भुतम् ॥ २ ॥
वलादैवस्य संप्राप्ता जीवा दग्धा महाकुलाः । बन्धोः साहाय्यतस्तत्र कृतं कर्मातिदारुणम् ॥३॥
शुभाशुभफलं भुक्त्वा पापाच्च नरकांस्तथा । मध्ये तु जाह्नवीस्नानात्स जातः शूद्रजे कुले ॥ ४ ॥
विपाशानिकटे देशे योजने सप्तसंमिते । भव्यो महोद्यमी गौरः कृशाङ्गो लोचनेऽल्पदृक् ॥ ५ ॥

बहुलोभी महास्त्रीको देवतातिथिपूजकः । भ्रातृहीनः शठो धूर्तः पुत्रसंततिवर्जितः ॥ ६ ॥
पञ्चमे भवने राहुर्भौमयुक्तोऽल्पसंततिः । लक्षणैर्लक्षितश्चोक्तैरवेहि गरुडाग्रज ॥ ७ ॥
बन्धोः साहाय्यतः पापात्पूर्वजन्मसमुद्भवात् । तस्माद्भ्रातृपुत्रहीनो जायतेऽत्रैव जन्मनि ॥ ८ ॥

अरुण उवाच ।

विन्मयं कथ्यतां देव सुतसौख्यविवर्धनम् । सर्वपापप्रशमनं लोकानां हितकारणम् ॥ ९ ॥

श्रीसूर्य उवाच ।

विन्मयं तत्प्रवक्ष्यामि जन्तुदग्धविनाशनम् । वनदेवी तथा कार्या पलेनार्धपलेन वा ॥ १० ॥
हिरण्मयी शुभा लेख्या यत्रैतच्चतुरस्रके । वनजीवास्तथा लेख्याः सर्वे तद्रूपसंज्ञकाः ॥ ११ ॥
प्रजापतिस्तथा कार्यो मापत्रयविनिर्मितः । राजतं पलमेकं तु गणाध्यक्षं शिवात्मकम् ॥ १२ ॥
संपूज्य गन्धपुष्पाद्यैः सा देया कार्यसाधिनी । देया वेदविदिज्ञाय सर्वपापापनुत्तये ॥ १३ ॥
प्रजापतिस्तथा देयः सर्वकल्मषनाशनः । शृणुयाद्वारतं वापि नारायणमुखोदितम् ॥ १४ ॥
अष्टाक्षरं तथा मन्त्रं जपेच्च विधिपूर्वकम् । दशायुतं तदर्धं वा तदर्धं विनतासुत ॥ १५ ॥
होमयेत्तद्दशांशेन तद्दशांशेन भोजनम् । तथाग्नितं सूर्यमन्त्रं जपेत्प्रणवपूर्वकम् ॥ १६ ॥
विप्रेभ्यो दक्षिणां दद्यात्तस्मात्पापात्प्रमुच्यते । य एवं कुरुते सूत पूर्वपापप्रणाशनम् ॥ १७ ॥
तस्य पुत्रविवृद्धिः स्यादिह जन्मनि जायते । अकृते तु यथाशक्त्या रिष्टं षट्पञ्चकेऽब्दके ॥ १८ ॥
प्रायश्चित्ते कृते सूत जीवनं नवसप्ततिम् । जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् ॥ १९ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्यधिकषट्शततमः ॥ ६०३ ॥

श्रीसूर्य उवाच ।

परान्नं या हरेन्नारी पूर्वजन्मनि सुव्रत । सात्राजीर्णेन रोगेण दुःखिता जायते ध्रुवम् ॥ १ ॥
कुर्यान्नानाविधं चान्नं रससर्वसमन्वितम् । विप्रेभ्यो भोजनं दद्याच्छक्ता दद्याच्च दक्षिणाम् ॥ २ ॥
होमयेच्च तथान्नानि गायत्र्या त्र्यम्बकेन तत् । मुच्यतेऽजीर्णरोगाच्च पूर्वपापाच्च पुत्रक ॥ ३ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरधिकषट्शततमः ॥ ६०४ ॥

श्रीसूर्य उवाच ।

देवमूर्तिश्च यः कश्चिद्देवागारास्थितेः सुत । भङ्गं कुर्यान्नरो मोहात्स्थापिता च परेण या ॥ १ ॥
अप्रतिष्ठो भवेदत्र जन्मन्यथ खगाधिप । वर्षत्रयं तथाश्वत्थपूजनात्पापनाशनम् ॥ २ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः पंचाधिकषट्शततमः ॥ ६०५ ॥

श्रीसूर्य उवाच ।

यश्चाचेरद्राजवधं मोहात्पूर्वभवे नरः । स राजयक्ष्मी विज्ञेयो घोरपापसमुद्भवः ॥ १ ॥
प्रायश्चित्तं महाभाग शृणु चात्र प्रयत्नतः । गोभूहिरण्यमिष्टान्नातिलवस्त्रान्नदानतः ॥ २ ॥
घृतधेनुप्रदानेन क्षयरोगं न पश्यति । दानं यथानुमानेन सर्वस्वार्धार्धकेन च ॥ ३ ॥
देयं द्विजवरायैवं विचार्यात्र प्रयत्नतः । तत्क्षणं काश्यपेयात्र क्षयरोगः प्रणश्यति ॥ ४ ॥
रिष्टे नैव विनाशः स्यात्तस्य चाकृतनिष्कृतेः ॥ ५ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडधिकषट्शततमः ॥ ६०६ ॥

श्रीसूर्य उवाच ।

या नारी घातयेत्काचित्परगर्भं पतत्रिण । जलोदरेण रोगेण पीड्यते चात्र जन्मनि ॥ १ ॥
गङ्गास्नानाच्च सततं विधिनाऽर्के मृगे स्थिते । तथा तज्जलपानेन तस्मात्पापात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्ताधिकषट्शततमः ॥ ६०७ ॥

श्रीसूर्य उवाच ।

वाग्विरोधी भवेद्यश्च पूर्वजन्मनि वादिनाम् । सोऽत्र जन्मनि मूकत्वं भजत्येव न संशयः ॥ १ ॥
मोहादिदं चरेत्सूत देयं दानं द्विजातये । वेदानां पुस्तकं रम्यं पूजयित्वा विधानतः ॥ २ ॥
संछाद्य वस्त्रैनः शुद्धैः क्षौमजैर्गरुडाग्रज । तत्पापनाशनं सर्वं प्राग्जन्मोक्तं परंतप ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ध्यायोऽष्टाधिकषट्शततमः ॥ ६०८ ॥

श्रीसूर्य उवाच ।

अत्र जन्मन्यसौ वन्ध्या प्राग्भवेऽभूत्सुतान्विता । अयोध्यायां तु सुमुखी धनभर्तृसमन्विता ॥१॥
पूर्वपापप्रभावेण सपत्न्या गर्भनाशनात् । जातेयं पादजाऽत्रैव दुःखार्ता सुतवर्जिता ॥ २ ॥
प्रायश्चित्तं प्रवक्ष्यामि सर्वपापप्रणोदनम् । काश्यां गत्वात्र विधिना शिवमाराध्य यत्नतः ॥ ३ ॥
व्रतैर्दानैर्महापुण्यैर्नानाविभवविस्तरैः । शिवरात्रौ ततः पश्चाद्दीपमालादिनेऽण्डज ॥ ४ ॥
अर्धरात्रे महानद्यां मध्ये स्नानं तु कारयेत् । मन्त्रैर्वरुणसूक्तैश्च नौकायां वा पतत्रिण ॥ ५ ॥
या चैनं कुरुते सम्यक्तस्याः स्यात्संततिर्ध्रुवम् ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवाधिकषट्शततमः ॥ ६०९ ॥

श्रीसूर्य उवाच ।

परनिन्दां तु यः कश्चित्प्राग्भवे विनतासुत । कुर्याद्दुर्मतिमापन्नः खल्वाटो जायतेऽधुना ॥ १ ॥
दद्यात्स कपिलां धेनुं सर्वोपस्करसंयुताम् । ब्राह्मणाय दरिद्राय तस्माद्दोषात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो दशाधिकषट्शततमः ॥ ६१० ॥

श्रीसूर्य उवाच ।

या काचित्प्राग्भवे नारी कुर्याद्राजवधं सुत । सात्र जन्मनि तत्काले क्षयरोगप्रपीडिता ॥ १ ॥
यक्ष्मणा च क्षयं यान्ति धातवः सर्वदेहिनाम् । धातुक्षये क्षयं याति तच्छरीरमशाश्वतम् ॥ २ ॥
पूर्वं दृढं कृतं पापं तस्मान्नोक्तः पतत्रिण । पापनाशकरः कश्चिदुपायस्त्वत्र जन्मनि ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकादशाधिकषट्शततमः ॥ ६११ ॥

श्रीसूर्य उवाच ।

या वाग्विरोधिनी नारी भर्तुः पूर्वभवे सुत । मूकत्वं जायते तस्माच्चात्र जन्मनि निश्चयात् ॥ १ ॥
तत्पापनाशनं दानं दद्याद्वेदस्य पुस्तकम् । ब्रह्मणे वेदविदुषे पूर्वपापात्प्रमुच्यते ॥ २ ॥
पूजयेच्च तिलान् भक्त्या भोजयेद्ब्राह्मणांस्तथा ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याया द्वादशाधिकषट्शततमः ॥ ६१२ ॥

श्रीसूर्य उवाच ।

या काचिद्भजनं कुर्यान्नारी पूर्वभवेऽण्डज । प्रतिमाया देवगेहे स्थापितामपरेण च ॥ १ ॥

अप्रतिष्ठान्विता सात्र जायते वै पतत्रिण । वर्षत्रयं ब्रह्मवृक्षपूजनात्पापनाशनम् ॥ २
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोदशाधिकषट्शततमः ॥ ६१३ ॥

श्रीसूर्य उवाच ।

कश्चिद्विजो महाभाग ह्यासीद्वङ्गे हि धार्मिकः । गयायां द्वादशे वर्षे कृतं श्राद्धं विधानतः ॥ १
विधिना तत्र दत्तानि काम्यश्राद्धानि मानद । ततो भाविवलात्सूत ब्राह्मणेन तपस्विना ॥ २
स्थापितं तद्गृहे द्रव्यं लोभाद्दत्तं न तद्धनम् । सर्वैर्मिलित्वा तद् भुक्तं स्त्रीपुत्रभ्रातृभिः सह ॥ ३
ततो बहुतिथे काले गतो हि यमशासनम् । शुभात्स्वर्गफलं भुक्त्वा पापाच्च नरकं भृशम् ॥ ४
पूर्वपुण्यप्रभावेण स जातोऽत्रापि वै द्विजः । मथुरामण्डले देशे रम्ये पुण्यस्थले शुभे ॥ ५
विशालाक्षो धनी मानी सुरूपोऽमितदो घृणी[1] । बहुदेशेऽधिकाराढ्यः पुण्यात्सर्वफलं त्विदम्॥ ६
लोभी क्रूरो महाक्षुद्रः सदा चिन्तासमन्वितः । संतानसुखहीनस्तु सुरूपा स्त्री सुखोज्झिता ॥ ७
बन्धुहीनः पतिः साक्षात्सर्वं तत्पापतः फलम् । वक्ष्यामि निष्कृतिं तस्य पवित्रां पापशोधनीम्
कुबेरप्रतिमां रौक्मीं पञ्चस्वर्णमितां शुभाम् । तदर्धार्धमितां वापि त्रिषु वित्तानुसारतः ॥ ९
संपूज्य गन्धपुष्पाद्यैः सा देया ब्राह्मणाय च । लक्ष्मीनारायणं दद्यात्सौवर्णं वेदसंमितम् ॥ १०
शुभं लेख्यं पवित्रं च पुत्रसंततिवर्धनम् । य एवं कुरुते भक्त्या तस्य रिष्टं न लिप्यते ॥ ११
प्रायश्चित्ते कृते त्वत्र चायुः सप्ततिवत्सरम् ॥ १२ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्दशाधिकषट्शततमः ॥ ६१४ ॥

अरुण उवाच ।

भूमिदेवकुलोत्पन्नो वाताधिकशरीरवान् । क्षामाङ्गः क्षितिवर्णाभः स्वल्पवृत्तिश्च जीवति ॥ १
देवब्राह्मणभक्तश्च किंचिद्वादपरायणः । करे पादे कुशस्त्रेण दंष्ट्रिशृङ्गिविघातनः ॥ २
व्रणत्वं जायते दीर्घनेत्रतोदो विरश्मिता । परोक्षमपवादं च ब्रुवते लोकतोऽन्वहम् ॥ ३
प्रिया तस्य शुभाचारा पतिभक्तिपरायणा । अनृतं वदते किंचित्किंचित्क्लेशस्य कारिणी ॥ ४
अपत्यानि मृतानीह एको वा द्वौ त्रयोऽपि वा । वर्षत्रयमिता बाला म्रियन्ते मासलंमिताः ॥ ५
केन कर्मविपाकेन मृतापत्या तु साऽनघ । एकस्तुंदे स्थितो गर्भो न प्रसूतिर्न पातनम् ॥ ६
पृथगेवं कुमातॄणां मृतापत्या प्रजायते । गतो बहुतरः कालः कस्येदं कर्मणः फलम् ॥ ७

श्रीसूर्य उवाच ।

अतः पूर्वं वैनतेय तृतीयेऽत्रैव जन्मनि । क्षात्रे कुले समुत्पन्नः कश्चिद्भूमिपतिस्तथा ॥ ८
दानव्रतदयायुक्तः प्रियाप्रीतिः परस्परम् । तस्याप्यपरमातुस्तु पुत्रः परमसुन्दरः ॥ ९
एको वै पादचारस्तु तृतीयश्च स्तनंधयः । गर्भयुक्तश्चतुर्थस्तु पिता मृत्युवशं गतः ॥ १०
क्रियाकर्म कृतं पुत्रैर्वित्तेन सदृशं खग । मासैस्त्रिभिर्व्यतिक्रान्तैर्ज्येष्ठेनैव दुरात्मना ॥ ११
निहता भ्रातरः सर्वे भाविनोऽर्थस्य वै बलात् । मात्राहि दुःखेन हृदयं ताडितं भृशम् ॥ १२
अभिघाताच्छिलाभूता गर्भयुक्ता दिवं गता । अचिरात्तेन कालेन ज्येष्ठश्चौरेण घातितः ॥ १३
इदं जन्म द्वितीयं तु मृतापत्यं प्रजायते । पुरा कृतानि कर्माणि भुज्यंते चेह मानवैः ॥ १४

---

१ ऋणी इति—ख पु० ।

अरुण उवाच।

प्रायश्चित्तं वद स्वामिन् येन पापक्षयो भवेत्। गर्भस्थश्च मृतापत्यं लघूनि चाऽलघूनि यत्॥ १५॥
तस्य पापस्य शुद्ध्यर्थं निष्कृतिं वद मे प्रभो॥ १६॥

श्रीसूर्य उवाच।

सौम्यायने तु संप्राप्ते सानुकूले ग्रहेऽहनि। सपत्नीकः शुचिः स्नातः पञ्चगव्येन चोत्तमः॥ १७॥
उपोषणं दिवा रात्रौ प्रातश्चानुदिते रवौ। सुरभैर्वै सगर्भायां गोमयेनोपलेपयेत्॥ १८॥
सुशुभे भूप्रदेशे तु कुंकुमाद्युपचर्चिते। कुर्यादष्टदलं पद्मं चित्रवर्णं सुशोभनम्॥ १९॥
तन्मध्ये रुक्मिणीयुक्तं माधवं कलशेऽर्चयेत्। सौवर्णे राजते पद्मे सायुधं च चतुर्भुजम्॥ २०॥
उपचारैः शुभैर्गन्धैर्धूपैश्च कुसुमादिभिः। जनन्या सह संभूतान् प्रद्युम्नाद्यांस्तथार्चयेत्॥ २१॥
चारुदेशं सुवेषं च चारुगुप्तं यशोन्वितम्। इभबाहुं चारुबाहुं सुचारुं पूजयेत्क्रमात्॥ २२॥
पूजनं विष्णुसूक्तेन तथा श्रीरसकोविदैः। पुष्पस्रग्धूपगन्धाद्यैरर्चयेद्विविधैर्गुणैः॥ २३॥
तद्विप्रासोऽथ तद्विष्णोरतोदेवांश्च पूजयेत्। शतमष्टोत्तरं हुत्वा चरुणा पायसेन वै॥ २४॥
होमान्ते विप्रभोजान्ते मन्त्रमेतमुदीरयेत्॥ २५॥

मंत्रः।

"यन्मया पापकर्माधाः कृता वै पूर्वजन्मनि। सपत्न्यां[1] चैकजातीनां संपरेता च पुत्रिणी॥२६॥
स्ववंशहननाद्वापि भूमिद्रव्यादिलिप्सया। लघूनामलघूनां च हन्ता वै पूर्वजन्मनि॥ २७॥
ततोऽथ वै मया प्राप्तं दुःखं नानाविधं त्विदम्। तत्तदेनोविनाशाय दानं संप्रददे त्विदम्"॥२८॥
स्वस्त्यस्तु चेति तत्रोक्तः कोऽदादिति विसर्जनम्। सर्पिष्यात्मानमालोक्य भोजयेदिष्टबान्धवान्॥
ऐहिकं लक्ष्म विज्ञेयं पूर्वकर्माभिशंसनम्। काष्ठलोष्टकुशस्त्राद्यैर्घातः स्याद्बालक्रीडनात्॥ ३०॥
जलादग्न्यादिना बाधा व्रणो वा तस्य जायते। स्त्रियोऽङ्गे विकृतिर्व्याधिर्मुखेतिलव्रणादिकम्॥३१॥
पैत्रेयी मातुलानीनां नेत्रतोदो विरश्मिता। स्वसुर्मातृष्वसुर्वापि बाल्ये वैधव्यमेव च॥ ३२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचदशाधिकषट्शततमः॥ ६१५॥

श्रीसूर्य उवाच।

या नारी प्राग्भवे मोहात्परनिन्दां च कारयेत्। खल्वाटद्यूजा सा च जायतेऽत्रैव जन्मनि॥१॥
धेनुं दद्यान्महाभाग विधियुक्तां सकम्बलाम्। तस्माद्रोगाद्विमुच्येत नात्र कार्या विचारणा॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षोडशाधिकषट्शततमः॥ ६१६॥

श्रीसूर्य उवाच।

अभक्ष्यं भक्षयेद्यस्तु पूर्वजन्मनि मानवः। गण्डमालाख्यरोगेण संयुक्तो जायतेऽधुना॥ १॥
पुण्यदेशे महाभाग संक्रान्त्यादिषु पर्वसु। गृहीत्वा कम्बलं शुद्धं नवं तद्वेदपारगे॥ २॥
कुटुम्बिने दरिद्राय दद्याद्दोषनुत्तये। गण्डमालाहरं चैव दानं प्रोक्तं मया त्विह॥ ३॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तदशाधिकषट्शततमः॥ ६१७॥

श्रीसूर्य उवाच।

कुलघ्नीयं महादुष्टा पूर्वमासीत्पतत्रिण। अत्र पूर्वकृतात्पापान्मानुषी संकरा स्मृता॥ १॥

१ सपत्नीनां इति स्यात्।

धनपुत्रविहीना चा सात्र जन्मनि दृश्यते । निष्कृतिं तत्प्रवक्ष्यामि प्रयागे मरणं सुत ॥ २
बलात्पापं क्षयं याति पूर्वजन्मकृतं दृढम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोष्टादशाधिकषट्शततमः ॥ ६१८ ॥

श्रीसूर्य उवाच ।

पक्षपात च यः कुर्यात्सभायां ब्राह्मणस्य च । पक्षाघातेन रोगेण पीडा तत्रैव जायते ॥ १
दद्यान्निष्कत्रयं स्वर्णं ब्राह्मणाय कुटुंबिने । तस्माद्रोगाद्विमुच्येत पक्षघातात्पतत्रिण ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनविंशत्यधिकषट्शततमः ॥ ६१९ ॥

श्रीसूर्य उवाच ।

अभक्ष्यं भक्षयेत्पूर्वं या नारी द्विजवल्लभा । गण्डमालाख्यरोगेण संयुक्ता जायतेऽधुना ॥ १
पुण्यदेशे महाभाग संक्रान्त्यादिषु पर्वसु । पूर्वपापहरं पुण्यं दद्यादत्र च कंबलम् ॥ २
नवं शुद्धं कुलीनाय तस्मात्पापात्प्रमुच्यते । द्विजानामिच्छया दद्याद्भोजनं पापनाशनम् ॥ ३ ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोविंशत्यधिकषट्शततमः ॥ ६२० ॥

श्रीसूर्य उवाच ।

यः कश्चिद्ब्राह्मणं हन्याद्ब्राह्मणस्य खगाधिप । वङ्गदेशेऽवसत्पूर्वं चात्र जन्मनि गौडजः ॥ १ ॥
धीरः सर्वकलाभिज्ञो नानाशास्त्रविशारदः । धनधान्यरतश्चात्र बहुस्त्रीसुखभोगभाक् ॥ २ ॥
विद्यादानात्कृतात्पूर्वं शृणु पापफलं तथा । क्षयरोगाकुलः क्षीणः पुत्रसंततिवर्जितः ॥ ३ ॥
बालघातनजात्पापाद्ब्राह्मणस्य पतत्रिण । महाक्रोधपरो लोभी नानादुःखैस्तथाकुलः ॥ ४ ॥
वक्ष्यामि निष्कृतिं तस्य ब्रह्मघातविमोचनीम् । प्रयागे वा कुरुक्षेत्रे पुष्करे वा महास्थले ॥ ५ ॥
नैमिषारण्यके क्षेत्रे पूजयेद्विधिवच्छिवान् । गन्धपुष्पैस्तथा धूपैर्लक्षसंख्यान्विधानतः ॥ ६ ॥
ब्रह्मचर्यरतो नित्यं तदन्ते होमयेत्तथा । षडस्रे चतुरस्रे वा कुण्डे चाज्यतिलाञ्शुभान् ॥ ७ ॥
शक्त्या च भोजयेद्विप्राञ्शैवान्कृसरलड्डुकैः । नानाभक्ष्यफलैश्चैव वस्त्रैर्माल्यैस्तथार्चयेत् ॥ ८ ॥
विविधां दक्षिणां दद्याद्रुद्रप्रीतिकरां तथा । पश्चात्तेन विधानेन प्रायश्चित्तं समाचरेत् ॥ ९ ॥
स बालघातजात्पापान्मुच्यतेऽत्र ममाज्ञया । चतुर्दश्यामथाष्टम्यां नक्तं कुर्याद्विधानतः ॥ १० ॥
मम ध्यानपरः सूत नित्यं भूत्वा ममाग्रतः । पूजयेदर्घ्यपाद्याद्यैर्नैवेद्यैर्विविधैस्तथा ॥ ११ ॥
तस्य तत्सर्वपापेभ्यो विमोक्ष्यामि खगेश्वर । आयुस्तस्य शतं प्रोक्तं पञ्चहीनं च पुत्रक ॥ १२ ॥
प्रायश्चित्तेकृते ह्यायुः पञ्चम्यां चन्द्रवासरे । विन्मये त्वकृते सूत चत्वारिंशन्मिताब्दके ॥ १३ ॥
रिष्टं स्यात्क्षयरोगेण बालघातस्य निश्चितम् । ब्रह्मघातान्महापापात्पूर्वजन्मकृताद्दृढात् ॥ १४ ॥
न मुच्यते महादानैः सप्तजन्मकृतैरपि । बाध्यते क्षयरोगेण सप्तजन्मनि निश्चयात् ॥ १५ ॥
ब्रह्महा क्षयरोगी स्यादिति वेदविदो विदुः । न हीदृशं महापुण्यं क्षयरोगविनाशनम् ॥ १६ ॥
पुत्रवृद्धिकरं चात्र यथा प्रोक्तं शिवार्चनम् ॥ १७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकविंशत्यधिकषट्शततमः ॥ ६२१ ॥

श्रीसूर्य उवाच ।

विनापराधं या नारी परपक्षं च घातयेत् । पक्षाघातेन रोगेण पीडितात्रैव जायते ॥ १ ॥

: १ पुत्रहानेस्येति स्यात् ।

तया निष्कामितं स्वर्णं देयं पापविशुद्धये। मुच्यतेऽत्र महारोगात्पक्षघातान्न संशयः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वाविंशत्यधिकषट्शततमः ॥ ६२२ ॥

श्रीसूर्य उवाच।

यो द्विजः प्राग्भवे मोहात्सुरां तु विविधां पिबेत्। मूत्रकृच्छ्रेण रोगेण पीडितः सोऽत्र जायते ॥ १ ॥
गृहवित्तानुसारेण पलेन द्विपलेन वा। कुर्याद्धिरण्मयं पद्मं चाष्टपत्रसमन्वितम् ॥ २ ॥
आवाह्य तत्र ब्रह्माणं प्रभुं सर्वोपचारकैः। पूजयित्वा तु गन्धाद्यैर्दद्याद्विप्राय यत्नतः ॥ ३ ॥
दानेनानेन सततं मूत्रकृच्छ्रं न पश्यति ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायस्त्रयोविंशत्यधिकषट्शततमः ॥ ६२३ ॥

श्रीसूर्य उवाच।

वैकुण्ठादागतस्तत्र मथुरायां पतत्रिण। जातोऽयं पुण्डरीकाक्षः सर्वभूताभयप्रदः ॥ १ ॥
घोरे कलियुगे प्राप्ते पापाक्रान्ते महीतले। भारावतारणार्थाय क्षत्रियाणां क्षयाय च ॥ २ ॥
कृत्वा तु दुष्करं कर्म पुनर्यास्यति वै दिवि ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्विंशत्यधिकषट्शततमः ॥ ६२४ ॥

श्रीसूर्य उवाच।

स्वर्णापहारी सततं पुरुषः प्राग्भवेऽण्डज। कुनखी जायते चात्र महापापेन लाञ्छितः ॥ १ ॥
सुवर्णशतकं दद्यान्स तद्दोषविनाशनम्। चान्द्रायणत्रयं कुर्यात्तदा तद्दोषशान्तये ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचविंशत्यधिकषट्शततमः ॥ ६२५ ॥

श्रीसूर्य उवाच।

राजयक्ष्मान्विता सात्र तस्मिन् वयसि भामिनी। प्रायश्चित्तं परं तस्याः शृणुष्वाथ खगेश्वर ॥ १ ॥
यत्कृते विधिना सर्वं पूर्वजन्माघनाशनम्। स्वर्णगोभूमिमिष्टान्नघृतधेनुतिलानि च ॥ २ ॥
देयानि श्रद्धया सूत क्षयरोगापनुत्तये। रिष्टं त्रिंशन्मितेऽब्दे तु प्रायश्चित्ते कृतेऽधुना ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षड्विंशत्यधिकषट्शततमः ॥ ६२६ ॥

श्रीसूर्य उवाच।

अपराधमृते कश्चिद्वैश्यं हन्यात्पतत्रिण। प्राग्जन्मन्यथ युक्तः स्याद्रक्तार्बुदरुजा भृशम् ॥ १ ॥
भविष्यति न संदेहस्तस्य मृत्युः खगाधिप। अपि दानशतैर्वापि दत्तैरत्रैव जन्मनि ॥ २ ॥
विंशद्वर्षे महारिष्टं रक्ताधिक्यान्महाबलात् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तविंशत्यधिकषट्शततमः ॥ ६२७ ॥

श्रीसूर्य उवाच।

मेरोः समागतो योऽयं प्राप्तो माथुरमण्डले। सर्वभूतोपकाराय दुष्टनाशकराय च ॥ १ ॥
प्राप्ते कलियुगेऽत्रैव सर्वपापविवर्जितः। कृत्वा चाद्भुतकर्माणि पुनस्तत्रैव यास्यति ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाविंशत्यधिकषट्शततमः ॥ ६२८ ॥

श्रीसूर्य उवाच।

यो मोहाद्धातयेद्वैश्य चान्यजन्मनि मानवः। सोऽत्र जन्मनि विज्ञेयो रक्तार्बुदसमन्वितः ॥ १ ॥

प्राजापत्यचतुष्केण व्रतेन नियमेन च । सप्तधान्यप्रदानेन पूर्वजन्माघनाशनम् ॥ २
पापक्षये महाभाग क्षयः स्यात्पापकृद्भुजः ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनत्रिंशदधिकषट्शततमः ॥ ६२९ ॥

श्रीसूर्य उवाच ।

या काचिद्ब्राह्मणी पूर्वभवे मोहात्सुरां पिबेत् । सात्र जन्मनि मूत्रेण कृच्छ्रेणातिप्रपीडिता ॥ १
प्रायश्चित्तं परं तस्या घोरपापहरं सुत । सुवर्णपद्मं पक्षीन्द्र सपत्रं ब्रह्मदैवतम् ॥ २
ब्राह्मणाय विधिज्ञाय पूजिताय निवेदयेत् ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिंशदधिकषट्शततमः ॥ ६३० ॥

अरुण उवाच ।

कश्चिद्विप्रोत्तमो जातः किंचिद्वित्तसमन्वितः । कासश्वासादिना बाधा उदरार्तिः प्रजायते ॥ १
क्रयविक्रयकर्ता च कृषिवाणिज्यशासनः । प्रिया प्रीतिपरा नित्यं व्रतानामनुकांक्षिणी ॥ २
किंचित्क्रोधगता या तु अवाक्ये वाक्यकारिणी । उदरे वातजा रोगाः शिरोर्तिर्नेत्रतोदकृत् ॥ ३
अपत्यानि म्रियन्ते च एकोऽपि द्वौ त्रयोऽपि वा । रजोदोषात्प्रपीडयेत वेदना विविधा कृता॥ ४
केन कर्मविपाकेन सत्यं कथय भास्कर ॥ ५ ॥

श्रीसूर्य उवाच ।

भर्त्रा कर्म कृतं नैव स्त्रीकृतं नात्र संशयः । पूर्वजन्मनि शूद्री सा द्विजभक्तिपरायणा ॥ ६ ॥
व्रतानि विविधान्येव कृतानि भुवि मानद । स्वगृहे धान्यराशिं गौरभक्षन्नियतं पुरा ॥ ७ ॥
ब्राह्मण्या सा सवत्सा गौर्धान्यभक्षणतत्परा । गृहीतया लकुटया वै तया कुक्षौ प्रताडिता ॥ ८
सगर्भायास्तु सुरभेर्गर्भकुक्ष्युपघातनात् । मृतो वै गर्भमध्यस्थः प्रसवे दुःखिता भृशम् ॥ ९
शिशुदुःखेन सुरभी भृशमाक्रन्दती मृषा । तेन कर्मविपाकेन नरकं प्राप्य दारुणम् ॥ १०
पश्चान्मानुषमापन्ना व्रतदानप्रभावतः । इदं जन्म तृतीयं तु मृतापत्यं खगेश्वर ॥ ११
सप्तजन्मनि जायेत गोस्त्रीब्रह्मप्रघातकः । नानाप्राक्कर्मणां तेषां नानापत्यार्थदुःखकृत् ॥ १२

अरुण उवाच ।

प्रायश्चित्तं वद स्वामिन् येनापत्यं प्रजीवति । अनुग्राह्योऽस्म्यहं देव लोकानां हितकाम्यया १३

श्रीसूर्य उवाच ।

माघे मासि च संप्राप्ते सानुकूलग्रहेऽहनि । सपत्नीकः शुचिः स्नात औषधैः स्नानमन्त्रतः १४
उपोषणं दिवा रात्रौ त्रयोदश्यामनिर्जितः । पूर्णमास्यां दिनं प्राप्य प्रातश्चानुदिते रवौ ॥ १५
सुरभ्यास्तु सगर्भाया गोमयेनोपलेपयेत् । तत्रोपरि गवां स्थानं चोदङ्मुखः समाविशेत् ॥ १६
अर्हणाद्युपहारैश्च कुंकुमाद्यैस्तथार्चयेत् । कुर्यादष्टदलं पद्मं चित्रवर्णं सुशोभनम् ॥ १७
तत्रोपरि न्यसेद्देवं माधवं कलशेऽर्चयेत् । सौवर्णे राजते पद्मे सायुधं च चतुर्भुजम् ॥ १८
उपचारैः शुभैर्गन्धैर्धूपैश्च कुसुमादिभिः । विष्णुसूक्तेन सूक्तेन श्रियः सूक्तेन पूजनम् ॥ १९
पुष्पैश्च धूपगन्धाद्यैरर्चयेद्विविधैर्गुणैः । रुद्रैकादशनामभिश्च जपेद्रुद्रं विधानतः ॥ २०
पूज्यो लक्षमितैः पुष्पैरर्चयेद्गन्धवारिभिः । शतमष्टोत्तरं हुत्वा चरुणा पायसेन वा ॥ २१
रुद्रस्यायुतहोमश्च समध्वाज्यसमाहुतिः । एवं पृथग्विधानेन विष्णुरुद्रादिपूजनम् ॥ २२
होमान्ते विप्रभोजान्ते मन्त्रमेतमुदीरयेत् ॥ २३ ॥

मन्त्रः।

यन्मया कर्मवशतः पुराभवे दुरात्मना । धेनुः सगर्भोपहता लकुट्या कुक्षिताडनात् ॥ २४ ॥
तेन कर्मवशात्प्राप्तं मृतगर्भादिना भृशम् । मृतसंततिदुःखानि प्राप्यंते महदेनसः ॥ २५ ॥
तत्तदेनोविनाशार्थं दानं संप्रददे त्विदम् ।" स्वस्त्यस्त्विति च तत्रोक्ता कोदादिति विसर्जनम् २६
सर्पिष्यात्मानमालोक्य अन्यान्वै तोषयेद्द्विजान् । भूमिद्रविणवासांसि दानं दत्त्वा विधानतः२७॥
व्रतान्ते सुरभीं दद्याद्धेमद्रव्यादिशक्तितः । अहःशेषे ततः सर्वं भोजयेदिष्टबान्धवान् ॥ २८ ॥
ऐहिकं लक्षणं तस्य शरीरेऽप्युपजायते । काष्ठलोष्टादिशस्त्राद्यैर्घातः स्यादुपलेखनात् ॥ २९ ॥
शृङ्गिभ्यश्चोपघातश्च जायन्ते व्रणजातयः । जलाकुलत्वं स्पर्शोऽग्नौ तादृशी तत्र वेदना ॥ ३० ॥
स्त्रियोऽङ्गे विकृतिर्व्याधिर्मुखे तिलव्रणादिकम् । पैत्रीया मातुलानीनां विधवार्तिः स्वस्रादिषु ॥३१ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकत्रिंशदधिकषट्शततमः ॥ ६३१ ॥

श्रीसूर्य उवाच।

या काचिद्ब्राह्मणी पूर्वभवे मोहात्सुरां पिबेत् । प्रदरेणातिदुःखेन सात्र जन्मनि पीडिता ॥ १ ॥
प्रायश्चित्तं परं तस्याः प्रदरस्य प्रणाशनम् । दद्याद्ब्रुक्मयं पद्मं सपत्रं ब्रह्मदैवतम् ॥ २ ॥
ब्राह्मणाय सुशीलाय पूजिताय निवेदयेत् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायो द्वात्रिंशदधिकषट्शततमः ॥ ६३२ ॥

श्रीसूर्य उवाच।

पूर्वजन्मनि यो विप्रस्त्रिविधां वै सुरां पिबेत् । मूत्रावरोधरोगेण सोऽत्र मृत्युवशं व्रजेत् ॥ १ ॥
चिह्नेन श्यावदन्तेन लक्षितः पादजः सदा । सप्तजन्मसु रोगेण मूत्रकृच्छ्रेण नश्यति ॥ २ ॥
दृढात्प्राक्पापजात्सूत प्रायश्चित्तं न विद्यते । पापक्षयेऽवशेषे च कृच्छ्रं सांतपनं चरेत् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयस्त्रिंशदधिकषट्शततमः ॥ ६३३ ॥

श्रीसूर्य उवाच।

अकामतश्च या नारी वैश्यघातनतत्परा । बभूव प्राक् च पक्षीन्द्र सात्र जन्मनि निश्चयात् ॥१॥
रक्तार्बुदसमाक्रान्ता दुष्टपापप्रयोजिता । महारिष्टेन सा याति यमलोकं पतत्रिण ॥ २ ॥
चत्वारिंशन्मिते वर्षे सत्यंसत्यं वदाम्यहम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायश्चतुस्त्रिंशदधिकषट्शततमः ॥ ६३४ ॥

श्रीसूर्य उवाच।

काचित्पूर्वभवे पुण्या मुखजात्र च बाहुजा । देशे सारस्वते प्राप्ता सर्वधर्मान्विता सती ॥ १ ॥
क्षयरोगयुता चात्र युवभावे पतत्रिण । प्राक्पापदुस्तरात्सूत कण्ठपाशादिसंभवात् ॥ २ ॥
निष्कृतिं कदलीं दद्यात्सुवर्णत्रयसंयुताम् । भोजयेद्ब्राह्मणान्पश्चाच्छिवपूजनतत्परान् ॥ ३ ॥
या त्वेवं कुरुते भक्त्या कदलीदानमुत्तमम् । नश्येत्क्षयरुजा तस्या अपि प्राणप्रणाशना ॥ ४ ॥
आयुर्वर्षाणि षष्ट्युक्तं पञ्चसप्ततिसंख्यया ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचत्रिंशदधिकषट्शततमः ॥ ६३५ ॥

श्रीसूर्य उवाच ।

यो नरोऽतिबलोत्कर्षात्परस्त्रीं कामयेत्पुरा । अधुना यौवने प्राप्ते स उन्मादी प्रजायते ॥ १
दद्यात्प्रजाप्तिं देवं सौवर्णं शक्तितोऽण्डज । मृगं स्वर्णमयं तद्वत्पूजयित्वा विधानतः ॥ २
भोजयेद्ब्राह्मणाञ्शक्त्या होमयेच्च जपेत्तथा । गायत्रीं विधिना सूत सोन्मादान्मुच्यतेऽधुना ॥ ३

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः षट्त्रिंशदधिकषट्शततमः ॥ ६३६ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे सूत परस्वर्णापहारिणी । साऽत्र जन्मनि रोगेण कुनखित्वेन बाध्यते ॥ १
दद्यात्सुवर्णशतकं विप्राय विनतात्मज । सुवर्णस्तेयपापेन मुच्यतेऽत्रैव जन्मनि ॥ २
चान्द्रायणत्रयं चैव कुर्यान्मासे तु कार्तिके ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः सप्तत्रिंशदधिकषट्शततमः ॥ ६३७ ॥

श्रीसूर्य उवाच ।

वैश्यस्त्री याऽभवत्पूर्वं भवे नारी पतिव्रता । रक्तार्बुदेन रोगेण बाध्यते चात्र जन्मनि ॥ १
व्रतं चरेन्महाभाग प्राजापत्यचतुष्टयम् । सप्तधान्येन दानेन रक्तार्बुदविनाशनम् ॥ २

श्रीसूर्य उवाच ।

रौप्यहारी च पुरुषश्चित्रकुष्ठी प्रजायते । स तत्पापविशुद्ध्यर्थं ब्राह्मणाय प्रदापयेत् ॥ १
स्वर्णं पलत्रयं शुद्धं कुरुक्षेत्रे पतत्रिण । प्राजापत्यत्रयं सूत चरेत्पापप्रणाशनम् ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टत्रिंशदधिकषट्शततमः ॥ ६३८ ॥

श्रीसूर्य उवाच ।

कश्चिन्म्लेच्छकुलोत्पन्नो बहुद्रव्यान्वितः सुधीः । स्वधर्मनिरतश्चापि दयालुः सत्यसंयुतः ॥ १
त्यागी शूरो महोत्साही देशे केरलके सुत । स्वामिधर्मपरो नित्यं सपत्नीकः सपुत्रकः ॥ २
प्रजाः पालयतस्तस्य शूरस्यापि महात्मनः । दुष्टाः प्रजाः क्रोधयुक्ता बभूवुर्विमुखास्तदा ॥ ३
तस्मिन्काले ह्यभूद्युद्धं घोरं तस्मिन्पुरे सुत । संग्रामभूमौ स मृतो यवनश्च सपुत्रकः ॥ ४
तस्य पत्नी महाभाग साध्वी पतिपरायणा । तस्मिन्मृते मृता सा तु भर्तृप्राणावलम्बिनी ॥ ५
घातयित्वा तु शस्त्रेण स्वशरीरं पतत्रिण । मृते पत्यौ न जीवामीत्युक्त्वा मृतवती तथा ॥ ६
तत्क्षणादन्तकालेऽपि दिवि प्राप्ता सभर्तृका । भुक्त्वा तत्र महाभोगानपूर्वान्स्वामिधर्मतः ॥ ७
नानाप्रजापीडनजात्पापात्पूर्वसमुद्भवात् । तीक्ष्णात्पुण्यात्तथा सूत म्लेच्छदेशे समुद्भवः ॥ ८
सिन्धोः पश्चिमभागे तु शतयोजनसंमिते । गौरः सुरूपो दीर्घश्च बहुविद्याविशारदः ॥ ९
नानाभोगसुखैर्युक्तो गजयूथैः समावृतः । पत्त्यश्वरथसंकीर्णस्तथा भैरवशासनः ॥ १०
महोग्रः पुत्रपौत्राढ्यः स म्लेच्छः पृथिवीपतिः । स्त्रीसाहाय्यान्महाभाग तथा पुत्रसहायतः ॥ ११
सुखैश्वर्ययुता सापि यवनी तद्वशादिह । सपुत्रः प्राक्सहायाच्च सोऽप्यत्रैव महाभुजः ॥ १२
एवं जन्मफलं प्रोक्तं ससहायं पतत्रिण । स्वामिधर्मकृतात्पुण्यात्तदर्थमरणात्तथा ॥ १३
भविष्यति गतिस्तेषां पूर्वपुण्यात्पतत्रिण । पञ्चाशीतिमितायुः स्यान्न च रिष्टेन तन्मृतिः ॥ १४
रिष्टं पञ्चाशदब्दे तु स्वदेहान्तसमं सुत । शस्त्रप्रहारैर्विविधैः प्राप्ते त्वत्र रणाङ्गणे ॥ १५
प्रजापीडनजात्पापात्तद्वर्षे नात्र संशयः । दद्यात्कालनरं तत्र ब्राह्मणाय कुटुम्बिने ॥ १६

देयं हिरण्मयं तत्र तद्वच्छतपलात्मकम्। कुरुक्षेत्रादितीर्थेषु संक्रान्त्यादिषु पर्वसु ॥ १७ ॥
सर्वोपस्करसंयुक्तं देयमेतच्च पुत्रक। महारिष्टहरं प्रोक्तं प्रायश्चित्तं परं खग ॥ १८ ॥
नातः परतरं प्रोक्तं दानात्कालनरादिह ॥ १९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनचत्वारिंशदधिकषट्शततमः ॥ ६३९ ॥

श्रीसूर्य उवाच।

या काचिद्यौवने नारी रमते स्वेच्छया परे। बलात्कारेण पुरुष सात्रोन्मादेन पीडिता ॥ १ ॥
यत्पापनाशनं सर्वमुपायं शृणु यत्नतः। कृत्वा सुवर्णजं वायुं मृगं हैमं च वाहनम् ॥ २ ॥
सर्वोपस्करसंयुक्तं दद्याद्विप्राय धीमते। न प्राप्नोति तदोन्मत्तभावं दानप्रभावतः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चत्वारिंशदधिकषट्शततमः ॥ ६४० ॥

श्रीसूर्य उवाच।

त्रपुहारी च यः पूर्वजन्मन्यत्रैव जन्मनि। म्लेच्छरोगेण सततं बाध्यते विनतासुत ॥ १ ॥
दद्यात्तत्पापनाशाय त्रपु विप्राय धीमते। पलानां त्रिंशतं शुद्धं तस्माद्रोगाद्विमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकचत्वारिंशदधिकषट्शततमः ॥ ६४१ ॥

श्रीसूर्य उवाच।

विद्यमाने भर्त्तरि तु जाराद्गर्भपरायणा। सा चात्र पादजा दुष्टा न च गर्भं दधाति वै ॥ १ ॥
काश्यां वासान्महाभाग श्रद्धया रुद्रपूजनात्। कन्याविवाहात्सततं दरिद्रद्विजपालनात् ॥ २ ॥
धारयिष्यति सा गर्भ प्रायश्चित्ताद्यथोचितात्। प्रायश्चित्ते कृते रिष्टं पञ्चाशन्मितकेऽब्दके ॥ ३ ॥
प्रायश्चित्ते कृते सूत षडशीत्यब्दांश्च जीवनम् ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विचत्वारिंशदधिकषट्शततमः ॥ ६४२ ॥

श्रीसूर्य उवाच।

आखेटकं विना यस्तु हस्तिनं घातयेत्पुरा। सोऽत्र जन्मनि जायेत सर्वकार्येष्वसिद्धिकृत् ॥ १ ॥
तस्मिन्नेव तदा काले तस्य रिष्टं प्रकीर्तितम्। विंशन्मितेऽब्दे पक्षीन्द्र कालशस्त्रान्मृतिर्भवेत ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिचत्वारिंशदधिकषट्शततमः ॥ ६४३ ॥

श्रीसूर्य उवाच।

यः कश्चिद्ब्राह्मणीं सूत बलोत्कर्षेण मन्यति। रमयेत्प्राग्भवे सोऽत्र महोन्मादी प्रजायते ॥ १ ॥
पापादसाध्यजादत्र रोगान्मुक्तिर्न जायते। म्रियते रिष्टयोगेन सोन्मादी चात्र जन्मनि ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुश्चत्वारिंशदधिकषट्शततमः ॥ ६४४ ॥

श्रीसूर्य उवाच।

पूर्वजन्मनि या नारी मोहाल्लोभाद्धरेत्रपु। सात्र जन्मनि पक्षीन्द्र श्लेष्मरुक्संयुता भवेत् ॥ १ ॥
शतत्रयपलं दद्यात्रपु तत्पापशुद्धये। तस्मिन्पापक्षये सूत श्लेष्मरोगस्य नाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचचत्वारिंशदधिकषट्शततमः ॥ ६४५ ॥

श्रीसूर्य उवाच ।

विप्रवंशे समुत्पन्नः शक्तिमान्वेदपारगः । धनधान्यसमायुक्तश्चेर्ष्यालुश्चार्जनान्वितः ॥ १
सुव्रतः शक्तिमान् धीरः किंचिद्व्याधिसमन्वितः । इन्द्रियाणां वलं हत्वा मोहानां जायते भृशम्॥२
उदरार्तिरसृग्वातः किंचिद्देहे प्रजायते । तस्य प्रिया शुभाचारा पतिभक्तिपरायणा ॥ ३
सत्यवाक् सत्यजा लोके व्रतानामनुकांक्षिणी । वहुपुत्रप्रसूता च किंचित्पुत्रः प्रजायते ॥ ४
अथवा मृतपुत्रा च पुत्रीषु जीवितास्वपि । केन कर्मविपाकेन सत्यं वद दिवस्पते ॥ ५
पूर्वजन्मनि विप्रस्तु संजातः पञ्चमे त्विह । प्रावर्तत तस्य गेहे कन्यायाः प्रौढ्यमण्डज ॥ ६
भूमिद्रविणलोभेन वृद्धविप्राय दापिता । तद्वत्तदाहृतं वित्तं सर्वस्वं तद्वशादपि ॥ ७
यावत्कन्याभवत्प्रौढा वरार्थं गुणशालिनी । पतिभक्तिपरा नित्यं यावत्कन्या सुतार्थिनी ॥ ८
किंचित्काले ह्यतीते वै तद्विप्रोऽसौ मृतश्च वै । सा वाला विधवा जाता पत्यपत्यार्थदुःखिता ॥९
व्रततीर्थरता नित्यं सत्यानामनुकांक्षिणी । वहुवर्षास्तया वत्स नियमैः शोषितं वपुः ॥ १०
पितुर्गृहे: धनं भूरि त्वर्पितं पुत्रिका भृशम् । कचित्कालवशं प्राप्ता मृता सा ब्राह्मणी खग॥११
सा पुत्रा ह्युदरे भूत्वा सागमज्जन्मजन्मनि । कन्या वहुविधा तस्य निराधारा मृता च वै॥१२
तेन कर्म प्रभावेण पूर्वकन्या वहुप्रजा । तस्य भर्तुर्भया याता मृतमिच्छति जन्मनि ॥ १३
पुनर्जन्म पुनर्मृत्युस्तत्कर्मनिष्कृतिं विना । कन्याविक्रयकर्ता च रौरवे नरके मतः ॥ १४
यातना वहुधा प्राप्ता वर्षाणां च सहस्रकम् । पश्चान्मानुष्यमापन्नो व्रतदानप्रभावतः ॥ १५
इदं जन्म चतुर्थं तु वहुपुत्री प्रजायते । मृतपुत्रो मृतो गर्भस्तेन गर्भभवादिह ॥ १६
भार्या तस्यापि विप्रस्य पूर्वजन्मनि मानद । भर्तृविद्वेषिणी नित्यं चिरापत्यानुगामिनी ॥ १७
तेन कर्मविपाकेन भूरिकन्यो मृतात्मजः ॥ १८

अरुण उवाच ।

प्रायश्चित्तं कथं देव येन पापं प्रशाम्यति । निष्कृतिं वद विश्वात्मन् पृथक्कं मे प्रकाशय ॥ १९

श्रीसूर्य उवाच ।

पुत्रिका यस्य जीवन्ति पुत्राणां नाशनं भवेत् । कर्मभेदेन येनेह शृणु त्वं कश्यपात्मज ॥ २०
स्वकन्या वरयोग्या सा चिन्तयन्त्यामनागमम्।दशाब्दानि च मासेन यथाभावं यथामति ॥२१॥
कन्यां रूपवतीं शान्तां समस्तगुणशालिनीम् । अलंकृतां ययाशक्ति वराय गुणशालिने ॥ २२
ब्रह्मणे विधिना सूत दद्याच्च वहुदक्षिणाम् । महापापौघशमनं कन्यादानमतन्द्रितः ॥ २३
कन्याविवाहसमये महाशान्तिविधिं चरेत् । एवं कृतविधिः सूत कन्यां दत्त्वा विधानतः ॥ २४
शान्तिकर्माणि सर्वत्र विस्तरेद्दत्विजादयः । भूमिद्रविणवासांसि कन्यावासांसि दापयेत् ॥ २५
गृहदानं ततो दद्याद्यथोपस्करसंयुतम् । वर्षेवर्षे तु संपूर्णं अन्नवस्त्रैश्च पोषयेत् ॥ २६
एवं कृते विधौ सूत वहुपुत्रा यशस्विनी । पापं पुत्रविनाशाख्यं कन्यापत्यादयश्च ये ॥ २७
तेषां पापप्रणाशार्थं कन्यादानादिभिस्ततः । नाशयेत्तद्धि पापं तु द्विजानां विधिपूजनात् ॥ २८
यजन्यज्ञं विधानेन ब्राह्मणान्स्वस्ति वाचयेत् । विनायकाम्बिकामूर्तिं हेमनिष्कप्रमाणतः ॥२९
आचार्याय ददेत्तासां नानाकर्मोपशान्तये । ऐहिकं लक्षणं तस्य शरीरे चोपजायते ॥ ३०
जिह्वारदनदन्तोष्ठव्रणवातादिदोषकृत् । नृपचौराग्निभिर्हानिर्वित्तानां च यतस्ततः ॥ ३१
तप्यमानेन मनसा दूयते भृशमाधिजे । सर्पिष्यात्मानमालोक्य प्रायश्चित्तन्तथा विधिः ॥ ३२

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्चत्वारिंशदधिकषट्शततमः ॥ ६४६ ॥

श्रीसूर्य उवाच ।

या ताम्रहारिणी नारी लोभात्पूर्वभवे सुत । औदुम्बरेण रोगेण पीड्यते बहुपीडया ॥ १ ॥
पापं विचार्य यत्नेन ताम्रं दद्याच्च शक्तितः । तस्माद्दानान्महाभाग पापं नश्यति तत्क्षणात् ॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तचत्वारिंशदधिकषट्शततमः ॥ ६४७ ॥

श्रीसूर्य उवाच ।

गर्भवत्या तया भुक्तः पूर्वजन्मनि मानवः । गर्भासन्नामजां जग्ध्वा विधिना गर्भधारणात् ॥ १ ॥
तेन कर्मविपाकेन बहुशोऽत्र प्रकीर्तिता । पूर्वजन्मन्यसौ विप्रा न च गर्भं दधात्यलम् ॥ २ ॥
प्रायश्चित्तमिदं तस्य चात्र सर्वाघनोदनम् । कृत्वा गर्भेण संयुक्तां राजतीं षट्पलात्मिकाम् ॥३॥
वैश्वानरस्तथा कार्यः पञ्चमापैर्हिरण्मयः । पूजयित्वा ततो दद्याद्विजाय विधिनाण्डज ॥ ४ ॥
एवं कुर्याद्विधानेन सर्वपापावनोदनम् । तस्याः पुत्रविवृद्धिः स्यादिह जन्मनि वै ध्रुवम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टचत्वारिंशदधिकषट्शततमः ॥ ६४८ ॥

श्रीसूर्य उवाच ।

मृगयां प्राप्य पक्षीन्द्र गजराजवधे पुरा । जायते गजचर्मा वै स नरोऽत्रैव जन्मनि ॥ १ ॥
गणेशप्रतिमां दद्यात्सौवर्णीं द्विपलात्मिकाम् । गन्धपुष्पैश्च संपूज्य तस्माद्रोगाद्विमुच्यते ॥ २ ॥
कारयेद्गणनाथस्य लक्षजाप्यं विधानतः । होमयेच्चाद्दशांशेन मुच्यते पूर्वकिल्बिषात् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय. एकोनपंचाशदधिकषट्शततमः ॥ ६४९ ॥

श्रीसूर्य उवाच ।

यो हरेत्परसिद्धान्नं क्षुत्पीडाप्राक्प्रपीडितः । सोऽत्र जन्मनि पक्षीन्द्र शूलरुक्पीडितोऽधुना ॥ १ ॥
अन्नदानेन विप्राणां रसदानाद्विशेषतः । मुच्यते शूलजाद्रोगान्नात्र कार्या विचारणा ॥ २ ॥
सुवर्णशूलदानाद्वा विप्रायात्र कुटुम्बिने । शूलदोषोपशमनमिह जन्मनि वै ध्रुवम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाशदधिकषट्शततमः ॥ ६५० ॥

श्रीसूर्य उवाच ।

मूर्धाभिषिक्तः प्राक् सूत बभूव पुरुषोत्तमः । स्वज्ञातिषु महाभाग दृढकर्मक्रियापरः ॥ १ ॥
विराटदेशे निवसन् राजकार्यरतः सदा । गृहं दग्धं तत्र शत्रोरनेन भयदायकम् ॥ २ ॥
बालवत्सा मृतास्तत्र पुरे तस्मिन्खगोत्तम । पापमाचरितं तेन नृपाज्ञाकारिणा दृढम् ॥ ३ ॥
ततो यमपुरं प्राप्तो भुक्त्वा भोगांस्तदुक्तवत् । विष्णुपूजनजात्पुण्यात्प्राप्तोऽत्र यमुनातटे ॥ ४ ॥
चारणो धर्मनिरतो बहुद्रव्यसमन्वितः । नानासुखैश्वर्ययुतो गजाश्वरथवाहनैः ॥ ५ ॥
बन्धुभृत्याधिकाढ्यो वस्त्रभूषणभूषितः । सर्वं विष्णुप्रसादाच्च सुखं पापफलं शृणु ॥ ६ ॥
धूर्तो मिथ्यापवादी च बहुलोभसमन्वितः । जातसंततिदुःखार्तो बालवत्सवधादिह ॥ ७ ॥
नेत्ररोगान्वितो नित्यं शृणु चिह्नं पतत्रिण । चत्वारिंशन्मिते वर्षे सर्वसंततिनाशनम् ॥ ८ ॥
गृहपापान्महाभाग गवि[1]रिष्टसमुद्भवात् । पूर्वपापफलस्यास्य भोगादेव क्षयः स्मृतः ॥ ९ ॥

---

१ विष्टि इति—क० पु० ।

अरुण उवाच ।

निष्कृतिं वदमे स्वामिन्बालवत्साघनाशनीम् । यां कृत्वा विधिवज्जन्तुः पूर्वपापात्प्रमुच्यते॥ १

श्रीसूर्य उवाच ।

प्रायश्चित्तं शृणुष्वाथ तद्वर्षानन्तरं सुत । तस्मिन्वर्षे महाभाग प्रायश्चित्तं न विद्यते ॥ ११
दृढकर्मार्जितात्पापान्न चोक्तं पापशोधनम् । श्रवणाद्धरिवंशस्य वैशाखे विधिनाण्डज ॥ १२
माघे वा कार्तिके वापि दशावृत्त्या विधानतः । ततस्तु भोजयेद्विप्रान्होमयेच्च स्वशक्तितः ॥ १३
कोटिलक्षायुतं सूत रुद्राध्यायं जपेत्तथा । धेनूनां दशकं दद्यात्सवत्साभरणान्वितम् ॥ १४
दद्याच्च कपिलामेकां स्वर्णशृङ्गीं पयस्विनीम् । प्रायश्चित्तमिदं पुत्र चेत्कुर्याद्विधिपूर्वकम् ॥ १५
तस्य पुत्रविवृद्धिः स्याद्विवाहादपरात्सुत । मृत्युः पञ्चाशदब्दे तु खग चाकृतनिष्कृतेः ॥ १६
प्रायश्चित्ते कृते त्वत्र नवत्यब्दमितं तथा । द्वियुक्तमायुः कथितं तीर्थं पुण्याश्रयेऽण्डज ॥ १७
जीवे कर्कटगे तत्र चन्द्रे मकरराशिगे । त्रयोदश्यां दिवा भूमौ ऋक्षे मृगशिराभिधे ॥ १८
निर्याणं कथितं तस्य विष्णुपूजनजात्फलात् । भविष्यति गतिस्तस्य पुनर्विष्णुप्रपूजनात् ॥ १९
तथा तृतीयजन्मापि मरणं गोगृहात्सुत । सर्वपापविशुद्धः स्यात्पुनर्मोक्षमवाप्नुयात् ॥ २०

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकपंचाशदधिकषट्शततमः ॥ ६५१ ॥

श्रीसूर्य उवाच ।

पिङ्गलाक्षो भवेदत्र पूर्वं रीत्यपहारकः । देयं रीतेः पलानां च शतं तत्पापनिष्कृतौ ॥ १ ॥
गायत्र्या होमयेत्पश्चात्तिलान्विप्रांश्च भोजयेत् । मुच्यतेऽत्र महाभाग तद्रोगात्पापजाद् ध्रुवम् ॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विपंचाशदधिकषट्शततमः ॥ ६५२ ॥

श्रीसूर्य उवाच ।

वैनतेय महाभाग खररोमात्र जायते । पूर्वजन्मनि यो हन्यात्खरं पापविमोहितः ॥ १ ॥
प्रायश्चित्तं परं तस्य पापस्य शृणु तत्त्वतः । निष्कत्रयहिरण्यं च दद्याद्दोषोपशान्तये ॥ २ ॥
ब्राह्मणाय दरिद्राय वेदवेदाङ्गपारगे ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिपंचाशदधिकषट्शततमः ॥ ६५३ ॥

श्रीसूर्य उवाच ।

प्राग्भुक्तं गर्भपुष्टचर्यं कुक्कुटाण्डं खगेश्वर । अत्र जन्मनि सा जाता संकरा लोभसंयुता ॥ १ ॥
धनधान्यसमायुक्ता पूर्वपुण्यादिहाण्डज । न च गर्भं दधात्येषा प्राक्पापादण्डभक्षणात् ॥ २ ॥
कृत्वाण्डं विधिना तद्धैरण्यं द्विपलात्मकम् । तदर्धार्धमितं वापि त्रिषु वित्तानुसारतः ॥ ३ ॥
दत्त्वा द्विजाय विधिना ह्याचरेच्छांकरं व्रतम् । फाल्गुनादौ चतुर्दश्यां कृष्णायां मासिमासि तु ४
पूजयेच्छंकरं रात्रौ तथा जागरणेन वा । भवन्ति सुलभाः पुत्राः सततं कृतनिष्कृतेः ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःपंचाशदधिकषट्शततमः ॥ ६५४ ॥

श्रीसूर्य उवाच ।

शृणु सूत महाभाग कर्म यत्कृतवान्पुरा । जीवोऽयं तत्फलं चात्र प्रवक्ष्यामि समासतः ॥ १ ॥
अभवत्प्राग्भवे विप्रो धर्मशास्त्रार्थकोविदः । राज्यप्रचारी बलवाञ्शूरो मन्त्री महायशाः ॥ २ ॥

१ पुण्या इति—ख पु० ।

संधिविग्रहसंयुक्तो दाता भोक्ता प्रियंवदः । गत्वा त्वरिपुरं तेन घातिताः शत्रवः पुरा ॥ ३ ॥
विश्वासाद्राजकार्येषु कृतं कर्मातिदुष्करम् । लुंठितं तत्पुरं तेन लोभोपहतचेतसा ॥ ४ ॥
पीडिता बहवो लोका द्रव्यलोभाकुलीकृताः । स तेन कर्मणा युक्तः प्राप्तस्तु यमशासनम् ॥ ५ ॥
भुक्तातिदारुणान्सूत नरकान्घोरदर्शनान् । तथा पुण्यफलं पुण्यात्प्राप्य पुण्यावशेषतः ॥ ६ ॥
स्वर्णकारकुले जातो धूर्तो लोभपरः सदा । नानाचौर्यक्रियायुक्तो लोकवञ्चनतत्परः ॥ ७ ॥
महाभिमाननिरतः प्रियो राजजनेष्वपि । सुखैश्वर्यधनैर्युक्तः कुटुम्बभरणे दृढः ॥ ८ ॥
नानास्त्रीसुखसंयुक्तस्तथा पुत्रविवर्जितः । वक्ष्यामि निष्कृतिं सूत सर्वपापनिकृन्तनीम् ॥ ९ ॥
प्रयागे त्वथवा काश्यां स्थाप्य लिङ्गं सुशोभनम् । पूजयेत्तु त्रिवर्षान्तं मन्त्रैस्तल्लिङ्गजैस्तथा ॥ १० ॥
गन्धपुष्पोपचारैश्च नैवेद्यैर्बहुदीपकैः । संपूज्य विधिवद्देवं तदन्ते भोजयेद् द्विजान् ॥ ११ ॥
शिवभक्तांस्तथा शान्तान्दक्षिणाभिश्च पूजयेत् । नानाहिरण्यैर्विधिवत्तथा चाभरणैः शुभैः ॥ १२ ॥
अथवा शृणुयात्तत्र यजुर्वेदं विधानतः । ब्रह्मचर्येण सततं प्रायश्चित्तमिदं परम् ॥ १३ ॥
य एवं कुरुते भक्त्या पूर्वपापौघनाशनम् । संप्राप्य तत्र निर्याणं शिवलोकं हि गच्छति ॥ १४ ॥
कर्तव्यं ब्राह्मणद्वारा सर्वमेतद्धि काश्यप । नाधिकारोऽत्र शूद्रस्य वदस्य श्रवणे क्वचित् ॥ १५ ॥
तप्ता शलाका देया वै शूद्रकर्णेऽतिदारुणा । श्रुतं पारायणं येन पापेनाक्रान्तचेतसा ॥ १६ ॥
आयुरब्दाः शतं तस्य कृतनिष्कृतिकस्य च । प्रायश्चित्तेऽकृते रिष्टं जायते षष्टिवत्सरे ॥ १७ ॥
एतज्जन्मफलं प्रोक्तं सविधानं विधानतः ॥ १८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः पंचपंचाशदधिकषट्शततमः ॥ ६९५ ॥

श्रीसूर्य उवाच ।

या पुरा हरयेद्वीतिं नारी सा च पतत्रिण । पिङ्गाक्षी जायते चात्र प्रायश्चित्तं परं शृणु ॥ १ ॥
रीतिं दद्यात्पलशतं तथा ब्राह्मणभोजनम् । गायत्र्या जुहुयाच्छक्त्या तिलान् रोगविनाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः षट्पंचाशदधिकषट्शततमः ॥ ६९६ ॥

श्रीसूर्य उवाच ।

प्राग्भवे वनिता या च परसिद्धान्नहारिणी । सात्र जन्मनि शूलेन रोगेणैव च बाध्यते ॥ १ ॥
सिद्धान्नदानं विप्रेभ्यो दीनेभ्योऽथ पतत्रिण । भिक्षुभ्यश्च तथा दानाद्रसदानाच्च शक्तितः ॥ २ ॥
न जायते शूलपीडा तस्याश्च कृतनिष्कृतेः । प्रायश्चित्तेऽकृतेऽत्रैव म्रियते शूलपीडया ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः सप्तपंचाशदधिकषट्शततमः ॥ ६९७ ॥

श्रीसूर्य उवाच ।

उष्ट्रघाती भवेत्पूर्वजन्मन्यथ पतत्रिण । सोऽत्र जन्मनि जायेत नरश्च विकृतस्वरः ॥ १ ॥
वक्ष्यामि तस्य पापस्य नाशनं चात्र जन्मनि । कर्पूरं त्रिपलं दद्याद्विप्रेभ्यः शक्तितोऽण्डज ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टपंचाशदधिकषट्शततमः ॥ ६९८ ॥

श्रीसूर्य उवाच ।

वन्ध्येयं या महाभाग पृच्छति स्वं प्रयोजनम् । गर्भपापरता पूर्वे जनुष्यत्र फलं त्विदम् ॥ १ ॥
मखजा प्राग्भवे त्वत्र तत्पापाद्यवनी हि सा । निष्कृतिं तत्प्रवक्ष्यामि गङ्गायां हि पतत्त्रिण ॥ २ ॥

पूजयेल्लक्षरुद्राणां त्रिगुणार्धतदर्धकम् । शक्त्याथ भोजयेद्विप्रान् होमयेच्च स्वशक्तितः ॥ ३
अनेन विधिना या च प्रायश्चित्तं समाचरेत् । जायते संततिस्तस्या इह जन्मनि वै ध्रुवम् ॥ ४
इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनषष्ट्यधिकषट्शततमः ॥ ६५९ ॥

श्रीसूर्य उवाच ।

कांस्यहारी च पुरुषः प्राग्भवे विनतासुत । शीर्षरोगेण सततं पीडितो जायतेऽधुना ॥ १
दानात्पलशतादत्र सीसकाद्दण्डजोत्तम । विप्राय वेदविदुषे शीर्षरोगं न पश्यति ॥ २
इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षष्ट्यधिकषट्शततमः ॥ ६६० ॥

श्रीसूर्य उवाच ।

बभूव बाहुजः कश्चिद्देशे कीराभिधे सुत । धर्मकर्मात्मको भक्तः पितृपुत्रधनान्वितः ॥ १
दत्तानि तेन दानानि ब्राह्मणेभ्यो हि शक्तितः । पर्वस्वपि च पात्रेभ्यो गोभूम्यश्वादिकानि च ॥ २
पापमाचरितं तेन भाविनोऽर्थस्य वै बलात् । स्ववंशस्य कस्यापि गृहं शत्रोर्मनोहरम् ॥ ३
निर्दग्धं वैरिभावेन साहाय्येन स्त्रियाः सुत । तस्मिन्दाहे महाभाग निर्दग्धं वृषभद्वयम् ॥ ४
गृहस्थाः स्वल्पजीवाश्च घातिताः क्रूरकर्मणा । ततो बहुतिथे काले गतः स यमशासनम् ॥ ५
सस्त्रीकः स्वफलं भुक्त्वा पापाद्दृष्टं शुभं तथा । पुण्यात्पञ्चनदे देशे स जातो बाहुजाधमः ॥ ६
मध्यस्वरूपो मतिमान्कुलेष्टः पुरुषो दृढः । रक्तो नोच्चो नातिनीचो बहुकन्यः पृथुर्विभुः ॥ ७
यौवने सुसुखैश्वर्यधनस्थानैर्युतः पुनः । मितदो भोगभाग्याढ्यः कृती मानी जनप्रियः ॥ ८
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । चिन्तातुरो धूर्त उग्रो दुःखार्तो मानवर्जितः ॥ ९
गोघातादग्निदाहाच्च जातपुत्रविनाशकः । सहायलक्षणं सर्वं कथयामि खगेश्वर ॥ १०
या स्त्री पूर्वं सहायासीद्दाहकर्मणि चाण्डज । सा ज्येष्ठा प्रष्टुरेवात्र मृतपुत्राऽत्र जन्मनि ॥ ११
लक्ष्मैतद्दण्डजश्रेष्ठ जन्माङ्गाद्दृषेभ[1] शनिः । लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥ १२
कारयित्वा शिवं साङ्गं पलैर्वेदमितैः शुभम् । हिरण्मयं महाभाग पत्रे लेख्यं शिवान्वितम् ॥ १३
तदर्धार्धमितं चापि त्रिषु वित्तानुसारतः । पूजयित्वा तु गन्धाद्यैः षोडशोपचारकैः ॥ १४
संस्थाप्य पशुपं पश्चाद्रोरथे सुमनोहरे । सर्वोपस्करसंयुक्ते वितानाम्बरभूषिते ॥ १५
दद्याद्वेदविधिज्ञाय मन्त्रमेतमुदीरयेत् ॥ १६ ॥

मंत्रः ।

" मोहात्पूर्वं मया पापमग्निदाहाद्यदर्जितम् । तन्नाशाय ददेऽहं तु शिवं गोरथसंस्थितम् " ॥ १७ ॥
गोधिकाद्यास्तथा जीवाः पत्रे लेख्यास्तु राजते । शिवपत्रमितं दद्याद्ये चान्ये घातिताः पुरा ॥ १८ ॥
पञ्चमापमितो वह्निर्देयो हेममयः शुभः । गायत्र्यष्टसहस्रं तु रौद्रं जप्त्वा सहस्रकम् ॥ १९ ॥
अष्टाक्षरं द्विसाहस्रं होमयेद्भोजयेद्द्विजान् । य एवं कुरुते सूत प्रायश्चित्तं विधानतः ॥ २० ॥
न तस्य पुत्रमरणं तदग्रे जायते क्वचित् । जायन्ते सुलभाः पुत्राश्चाधिव्याधिविवर्जिताः ॥ २१ ॥
नैवं करोति यो मोहाच्चात्र पुत्रविवर्जितः । चत्वारिंशन्मिते कूने वर्षे रिष्टं प्रकीर्तितम् ॥ २२ ॥
पञ्चाशन्मितकेऽब्दे वा रिष्टं चाकृतनिष्कृतेः । प्रायश्चित्ते कृते ह्यायुश्चतुःसप्तमिताब्दकम् ॥ २३ ॥
इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकषष्ट्यधिकषट्शततमः ॥ ६६१ ॥

---

१ दष्टमे इति—क० पु० ।

श्रीसूर्य उवाच।

कांस्यहारी च पुरुषः प्राग्भवे विनतासुत। शीर्षरोगेण सततं पीडितो जायतेऽधुना ॥ १ ॥
दानात्पलशतादत्र सीसकाद्दण्डजोत्तम। विप्राय वेदविदुषे शीर्षरोगं न पश्यति ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विषष्ट्यधिकषट्शततमः ॥ ६९२ ॥

श्रीसूर्य उवाच।

वन्ध्यायाश्च महाभाग प्रायश्चित्तं शृणुष्व तत्। शूलोद्भिन्नतनुं चौरं मृतं प्राप्य रवेर्दिने ॥ १ ॥
तत्तले तु तदा कुर्याद्वन्ध्यास्नानं शतौषधैः। पत्रैर्वृक्षोद्भवैः सूत तथा मृद्भिश्च सप्तकैः ॥ २ ॥
स मन्त्रैश्च तथा पूज्यः प्रथमं विनतासुत। विधिनानेन या कुर्याद्वन्ध्या पुत्रं लभेद् ध्रुवम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिषष्ट्यधिकषट्शततमः ॥ ६९३ ॥

श्रीसूर्य उवाच।

सतीं स्वभार्यां परमां साध्वीं संत्यज्य दुर्मतिः। प्रमादात्प्राग्भवे गच्छेदन्यस्त्रीं काममोहितः॥ १॥
सोऽत्र जन्मनि भो सूत ग्रहणीरोगसंयुतः। जायते म्रियतेऽवश्यं ब्राह्मण्यां गमनादिह ॥ २ ॥
न तस्य पापशमनं मया प्रोक्तं खगाधिप। तस्मिन्वयसि तद्दृष्टं भविष्यति न संशयः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःषष्ट्यधिकषट्शततमः ॥ ६९४ ॥

श्रीसूर्य उवाच।

या काचिद्वनिता सूत प्राग्भवे कांस्यहारिणी। सात्र जन्मनि पक्षीन्द्र शीर्षरोगप्रपीडिता ॥ १ ॥
दद्यात्पलशतं सीसं ब्राह्मणाय कुटुम्बिने। तत्काले शीर्षजाद्रोगान्मुच्यते नात्र संशयः॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः पञ्चषष्ट्यधिकषट्शततमः ॥ ६९५ ॥

श्रीसूर्य उवाच।

या नारी ह्यवधीत्पूर्वं मोहादुष्टं खगाधिप। सात्र जन्मनि पक्षीन्द्र जायते विकृतस्वरा ॥ १ ॥
सरस्वत्याश्च प्रतिमां सौवर्णीं राजतीं तथा। दद्याद्वेदविधिज्ञाय तदा स्यात्सुस्वराण्डज ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः षट्षष्ट्यधिकषट्शततमः ॥ ६९६ ॥

श्रीसूर्य उवाच।

पूर्वजन्मनि यः कश्चिन्मोहात्परधृतं हरेत्। नेत्ररोगयुतः सोऽपि जायतेऽत्रैव जन्मनि ॥ १ ॥
घृतधेनुप्रदानाच्च विधिना वेदपारगे। मुच्यते नेत्ररोगाच्च जन्मन्यत्र पतत्रिण ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तषष्ट्यधिकषट्शततमः ॥ ६९७ ॥

श्रीसूर्य उवाच।

स्वकं पतिं परित्यज्य या गच्छेत्पूर्वजन्मनि। परपुंसि महाभाग ग्रहणीरुग्युताऽत्र सा ॥ १ ॥
प्रायश्चित्तं परं तस्या व्रतं चान्द्रायणं चरेत्। वैशाखे माघमासे वा तस्मात्पापात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टषष्ट्यधिकषट्शततमः ॥ ६९८ ॥

---

१ ततस्तांस्तु संपूज्य विधिना इति—क पु०।

श्रीसूर्य उवाच ।

पूर्वजन्मनि यः कश्चिन्मोहात्परधृतं हरेत् । नेत्ररोगयुतः सोऽपि जायतेऽत्रैव जन्मनि ॥ १
धृतधेनुप्रदानाच्च विधिना वेदपारगे । मुच्यते नेत्ररोगाच्च जन्मन्यत्रपतत्रिण ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनसप्तत्यधिकषट्शततमः ॥ ६६९ ॥

अरुण उवाच ।

विप्रवर्णकुलोत्पन्नो वातरक्ताक्षदर्शनः । उदरे वातजा रोगाः किंचिच्छस्त्रोपघातकाः ॥ १
किंचित्क्रोधश्च लोभश्च किंचिद्वित्तसमन्वितः । तस्य प्रिया सदाचारा पतिभक्तिपरायणा ॥ २
एकापत्या भवेत्सा च जायते मृतपुत्रका । आदिपुत्रो मृतस्तस्य अपत्यं नैव जायते ॥ ३ ।
केन कर्मविपाकेन सत्यं कथय भास्कर ॥ ४ ॥

श्रीसूर्य उवाच ।

पूर्वे भवे महाबाहो विप्रवंशसमुद्भवः । व्यापारकृषिवाणिज्यं ब्रह्मवित्तेन यत्कृतम् ॥ ५ ॥
व्यवहारादिना कृत्वा ब्रह्मवित्तेन वर्धितः । कालेनैव मृतो विप्रो धनं शूद्रेण वञ्चितम् ॥ ६ ॥
नार्पितं ब्रह्मपुत्राय ब्रह्मस्वं च गृहे स्थितम् । ब्रह्मस्वं भक्षितं तेन बहुकालं खगेश्वर ॥ ७ ॥
पश्चान्मृत्युवशं प्राप्तो नरके रौरवे गतः । ब्रह्मस्वभक्षणाच्चैव वर्षाणां च सहस्रकम् ॥ ८ ॥
पतितो नरके घोरे पच्यते चेह कर्मणा । पश्चान्मानुषमापन्नो व्रतदानप्रभावतः ॥ ९ ॥
इदं जन्म तृतीयं तु ब्रह्मवंशसमुद्भवम् । तत्क्षेपहरणाद्वापि मृतपुत्रः प्रजायते ॥ १० ॥
ब्राह्मणस्य विशेषेण धनं विषनिभं स्मृतम् । ऋणं प्रसह्य वै प्रोक्तमपि कल्पशतादिकम् ॥ ११ ॥
तस्माद्विप्रऋणं प्रोक्तं प्रसह्य त्वभिजायते ॥ १२ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं देव येन पुत्रः प्रजायते । नारीणां च नराणां च निष्कृतिं सौख्यहेतवे ॥ १३ ॥

श्रीसूर्य उवाच ।

महापापहरो देवः सर्वकामप्रदः प्रभुः । पूजनीयो महारुद्रः संततिश्रेय इच्छता ॥ १४ ॥
यजुर्वेदमयं देवं यजुर्भिः शतरुद्रजैः । यजनैरभ्यर्च्य मुच्येत पापादाकल्पसंभवात् ॥ १५ ॥
रुद्रैकादशनीभिश्च रुद्रैकादशकेन वा । जप्त्वैनं तोषयेद्देवं रुद्रमेकादशात्मकम् ॥ १६ ॥
तद्दशांशेन होतव्यं द्रव्यं श्रद्धासमन्वितः । विधिवज्जुहुयाद्वह्नौ तिलैश्च मधुरप्लुतैः ॥ १७ ॥
हरितालपलाशीर्हि सर्पिषोऽत्र वहेद्धुते[1] । प्रतिरुद्रं प्रदातव्यं गोयुगं रसनान्वितम् ॥ १८ ॥
केयूरकुण्डलाकल्पमन्त्रपुस्तकमण्डज । प्रतिरुद्रं शतं विप्रान् भोजयेत्सुसमाहितः ॥ १९ ॥
निष्कं दद्यात्सुवर्णस्य दद्याद्वा मुख्यदक्षिणाम् । एवं रुद्रविधिं कृत्वा त्रिविधं पापशान्तिकृत्॥२०॥
इतिहासपुरणोक्तिः सूक्तानि विविधानि च । शृणुयाद्विधिवत्ताक्ष्यं सभार्यः प्रीतितोऽन्वहम्॥२१॥
देवर्षिपितृमर्त्यानामृषीणां च महीक्षिताम् । देवदानवगन्धर्वपिशाचोरगरक्षसाम् ॥ २२ ॥
सर्वासां जीवजातीनामुत्पत्तिं शृणुयादपि । ऋषीणामृषिपत्नीनां वंशान्पूर्वानुदीरितान् ॥ २३ ॥
एवं स त्रिविधात्पापान्मुच्यतेऽपत्यदुःखदात् । गुरून्देवान्द्विजान्सम्यक् श्रद्धया समुपाचरेत् २४॥
एवं कृतविधेः सूत हरिवंशश्रुतार्थिनः । वाचकोपरि संतुष्टो भूमिद्रविणवस्त्रकैः ॥ २५ ॥

---

१ समिधोऽत्र वह्निर्हुता इति-क पु० ।

मुद्रां कर्णीकृत्य वरां गां दत्त्वा च पयस्विनीम् । भूमिद्रविणदानाद्यैस्तोषयेद् ब्राह्मणानतु ॥२६॥
निष्कृतौ क्रियमाणायां सर्पिष्यात्मानमीक्षयेत् । ऐहिकं लक्षणं तस्य शरीरे चोपजायते ॥ २७॥
जन्मक्रमेण जायन्ते दुःखान्यकृतनिष्कृतेः । दुष्टरुक् चानपत्यः स प्रमेहार्तोऽप्यकिंचनः ॥२८॥
कुनखी दद्रुणः पाण्डुरोगी चैव क्रमाद्भवेत् । जलमग्निश्च चौरश्च राज्ञश्चिन्ता व्ययादिका ॥२९॥
लकुटग्रावशस्त्राद्यैर्जायन्ते व्रणजातयः[1] ॥ ३० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः सप्तत्यधिकषट्शततमः ॥ ६७० ॥

श्रीसूर्य उवाच ।

अथ सूर्यदिने सूत प्राप्य भूमिं श्मशानजाम् । मृतप्रेतं समालोक्य रात्रौ गच्छेदतन्द्रितः ॥ १ ॥
पूजयित्वा चितां तस्य बलिमष्टविधां सृजेत् । स्नानं कृत्वा मृदालम्भैः पत्रैर्वृक्षोद्भवैस्तथा ॥ २ ॥
शतच्छिद्रघटात्प्राप्य नानातीर्थोद्भवैर्जलैः । दीपमालादिने वापि प्रयोगं विधिनाचरेत् ॥ ३ ॥
हरिवंशं ततः पश्चाच्छृणुयाद्विधिपूर्वकम् । दत्त्वा द्विजेभ्यो विधिना नानाभक्ष्यफलानि च ॥ ४ ॥
स्वेच्छया भोजनं तेभ्यो दद्याद्दोषापनुत्तये । अनेनैव प्रयोगेण वन्ध्या याति सपुत्रताम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकसप्तत्यधिकषट्शततमः ॥ ६७१ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यसौ वन्ध्या चात्र जन्मनि वाहुजः । देवद्रव्यापहरणात्प्रागत्राक्षिप्रपीडनात् ॥ १ ॥
विंशद्वर्षे व्यतीते च नेत्रभङ्गः प्रजायते । तद्रक्षार्थमहं वक्ष्ये दानं पापहरं परम् ॥ २ ॥
कृत्वा देवगृहं रम्यं प्रतिष्ठाप्य सुराधिपम् । गन्धैः पुष्पैः समभ्यर्च्य दीपा देयाः सुवर्णजाः ॥३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विसप्तत्यधिकषट्शततमः ॥ ६७२ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यसौ शूद्रश्चक्रे मुष्कनिकुट्टनम् । वृषभस्य महाभाग स्वार्थसाधनतत्परः ॥ १ ॥
तेन कर्मार्जितेनात्र षण्ढश्चैवात्र शूद्रजः । गवां पालनजात्पुण्यात्प्रागत्र सुखसंयुतः ॥ २ ॥
गोपीडनान्महापापात्तस्य नैवात्र विन्मयम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायस्त्रिसप्तत्यधिकषट्शततमः ॥ ६७३ ॥

श्रीसूर्य उवाच ।

या काचिद्योषिद्वै पूर्वं मोहात्परघृतं हरेत् । सात्र जन्मनि रोगेण नेत्रोत्थेन प्रपीड्यते ॥ १ ॥
कुरुक्षेत्रादितीर्थेषु घृतधेनुप्रदानतः । मुच्यते सा महारोगान्नेत्रजान्नात्र संशयः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःसप्तत्यधिकषट्शततमः ॥ ६७४ ॥

श्रीसूर्य उवाच ।

महिषीमवधीत्पूर्वभवे यश्च नराधमः । सोऽत्र जन्मनि पक्षीन्द्र कृष्णगुल्मयुतो भवेत् ॥ १ ॥
स्वर्णशृङ्गीं रौप्यखुरां घण्टाभरणभूषिताम् । सूक्ष्मकम्बलयुक्तां च दद्याद्वेदविदे सुत ॥ २ ॥
कृष्णगुल्मोद्भवां पीडां नरश्चात्र न पश्यति ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचसप्तत्यधिकषट्शततमः ॥ ६७५ ॥

---

१ ब्रह्मजार्तय इति–क पु० ।

श्रीसूर्य उवाच ।

प्राग्भवे याऽभवत्काचित्स्वर्णकारी पतत्रिण । स्वधर्मनिरता सा च दानधर्मपरायणा ॥ १
तद्गृहे धान्यराशिं तु चरन्ती गौः स्वभावतः । ताडिता कुक्षिभागे तु लकुटेन भृशं सुत ॥ २
तत्ताडनान्महादुःखं प्राप्तं गर्भातिभारतः । मृता च तेन दुःखेन गर्भजातसमन्विता ॥ ३
तेन कर्मसमायुक्ता संप्राप्योचितशासनम् । पुनः शूद्रीसमा जाता गौरवर्णा शुभानना ॥ ४
धनभृत्याश्वभोगाद्यैर्नानाविभवसंयुता । पुत्रसंततिहीना सा प्राग्गोघाताद्यसंभवात् ॥ ५
प्रायश्चित्तं प्रवक्ष्यामि सर्वपापक्षयंकरम् । कुर्याद्वापीमरण्ये तु देशे लोकाकुले तथा ॥ ६
मार्गे हि धर्मतो यत्नात्प्रतिष्ठां कारयेत्ततः । संस्थाप्य च शिवं तत्र विधिना विनतासुत ॥ ७
होमयेच्च ततस्तत्र तिलानाज्ययुतानिह । भोजयेद्ब्राह्मणान्भक्त्या शिवपूजनतत्परान् ॥ ८
दद्यात्तथैव कपिलां सर्वपापप्रणाशिनीम् । प्रायश्चित्तमिदं सूत पूर्वजन्माघनाशनम् ॥ ९
नैवं या कुरुते श्रुत्वा तस्याः संततिजं भयम् ॥ १० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः षट्सप्तत्यधिकषट्शततमः ॥ ६७६ ॥

श्रीसूर्य उवाच ।

यः कश्चित्प्राग्भवे सूत दुग्धं हरति मानवः । तत्काले पापमेवात्र बहुमूत्री प्रजायते ॥ १
दुग्धधेनुप्रदानाच्च वेदवेदाङ्गपारगे । विधिना काश्यपेयात्र न पश्येद्बहुमूत्रताम् ॥ २ ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तसप्तत्यधिकषट्शततमः ॥ ६७७ ॥

श्रीसूर्य उवाच ।

दुग्धं हरति या नारी कस्यचित्पापमोहिता । पूर्वजन्मनि साऽत्रैव बहुमूत्ररुजाऽऽकुला ॥ १
दुग्धधेनुप्रदानाच्च विधिना त्वत्र जन्मनि । बहुमूत्रान्महारोगान्मुच्यते गरुडाग्रज ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टसप्तत्यधिकषट्शततमः ॥ ६७८ ॥

श्रीसूर्य उवाच ।

यो मोहाद्घातयेत्सूत महिषीं नवयौवनाम् । प्राग्भवे नियतं सोऽपि कृष्णगुल्मेन बाध्यते ॥ १
स नानारत्नदानेन विधिना गरुडाग्रज । नाशयेत्कृष्णगुल्मोत्थां पीडामत्रैव जन्मनि ॥ २
अथवा महिषीदानाद्विप्राय विधिनाण्डज । महिषीपापजाद्रोगात्सुखी भवति मानवः ॥ ३

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकोनाशीत्यधिकषट्शततमः ॥ ६७९ ॥

श्रीसूर्य उवाच ।

यः कुर्यात्पापलोभेन पूर्वं मुष्कनिकृन्तनम् । ब्रह्मघातान्महापापात्षण्ढः स्याद्बहुजन्मनि ॥ १
ब्रह्मपुत्रस्य षण्ढः स्यादत्र जन्मनि निश्चयात् । ज्ञानाज्ञानकृतं वापि निष्कृतिर्नात्र विद्यते ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽशीत्यधिकषट्शततमः ॥ ६८० ॥

श्रीसूर्य उवाच ।

बभूव फलहृत्काचित्प्रमादाद्विनतासुत । फलानां बहुपक्वानां तथाम्लानां निपातनात् ॥ १
पूर्वजन्मनि पुण्यापि बहुदानरता सती । अत्र सा क्षत्रिया जाता प्रागाप क्षात्र्याण्डज ॥ २
अत्र पुत्रविहीना सा फलहृत्पापजाद्दृढात् । फलानां बहुदानाच्च चातुर्मास्येऽत्र नित्यशः ॥ ३
भोजनं तु तदा पश्चात्कारयेत्स्वेच्छया द्विजान् । प्रायश्चित्तं परं तस्मात्फलहृत्पापनाशनम् ॥ ४

अमायां नालिकेराणि देयानि खलु शक्तितः । तत्कृते सुतवृद्धिः स्याज्जीवनं वर्षसप्ततिम् ॥ ५ ॥
दधिहारी पुमान् पूर्वं जन्मन्यत्र खगेश्वर । जायते मेदसा युक्तस्तद्दुःखेन प्रपीडितः ॥ ६ ॥
कार्तिक्यामथ वैशाख्यां दधिधेनुप्रदानतः । तस्माद्रोगात्प्रमुच्येत तत्काले गरुडाग्रज ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकाशीत्यधिकषट्शततमः ॥ ६८१ ॥

श्रीसूर्य उवाच ।

महिषीं घातयेन्नारी प्राग्भवे विनतासुत । अत्र जन्मनि पक्षीन्द्र कृष्णगुल्मेन पीडयते ॥ १ ॥
दद्यात्साभरणां सूत महिषीं यमदैवताम् । युग्मकम्बलसंछन्नां विधिना नवयौवनाम् ॥ २ ॥
स मुच्यते महापापान्महिषीवधजात्सुत । तस्मिन्नपगते तत्र कृष्णगुल्मं न पश्यति ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायो व्यशीत्यधिकषट्शततमः ॥ ६८२ ॥

श्रीसूर्य उवाच ।

वेधेत्प्राग्वृषभानां च नासाग्रं गरुडाग्रज । नासाच्छेदोऽत्र तस्यास्ति युवभावे विनिश्चयात् ॥ १ ॥
नास्ति तद्विन्मयं क्वापि दत्तदानैरिहैव ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्यशीत्यधिकषट्शततमः ॥ ६८३ ॥

श्रीसूर्य उवाच ।

कश्चिदासीन्महाभाग चारणोऽतिप्रियंवदः । कवित्वशक्तिनिरतो बहुचातुर्यसंयुतः ॥ १ ॥
प्रेरितो दैवयोगेन गतो राजाश्रयं प्रति । तत्सेवानिरतो नित्यं चिरकालमुपस्थितः ॥ २ ॥
अथ तत्र महावादे कवीनां हि खगेश्वर । महाघोरमभूद्युद्धं राजद्वारे भयप्रदम् ॥ ३ ॥
स चारणो महाक्रोधात्कृतवान्परघातनम् । परघातकृते सूत स्वशरीरमथात्यजत् ॥ ४ ॥
तेन कर्मविपाकेन महाचौर्येण चाण्डज । भुक्त्वा स्वर्गफलं पुण्यादात्मघातात्परिच्युतः ॥ ५ ॥
महाभूमिभुजां वंशे म्लेच्छानां चाजनि स्वयम् । सिन्धोः पश्चिमभागेऽत्र शतयोजनसंमिते ॥६॥
देशे कर्कटगे जीवे लग्नस्थे चन्द्रसंयुते । गौराङ्गः पृथुलो धूर्तः सर्वविद्याविशारदः ॥ ७ ॥
सुखैश्वर्यसमाक्रान्तो धनवाहनभोगभाक् । शूरः सुवेषोऽतिक्रूरो बहुपालनतत्परः ॥ ८ ॥
पापाल्लोभरतः क्रोधी नानाभैरवशासनः । रिष्टं षष्टिमिते वर्षे पञ्चहीने पतत्रिण ॥ ९ ॥
सर्ववित्तपदंशेन महारिष्टहरं परम् । पञ्चाशीत्यब्दकं चायुर्दत्ते कालनरेऽण्डज ॥ १० ॥
प्रायश्चित्ते कृते त्वत्र रिष्टं स्यात्प्रोक्तवत्सरे । कालरूपेण शस्त्रेण तत्क्षणे मरणं स्मृतम् ॥ ११ ॥
महाघोराहवे सूत चात्मघातादिदं फलम् । चिह्नं तस्य प्रवक्ष्यामि ह्यात्मघातसमुद्भवम् ॥ १२ ॥
हृदिस्थं लशुनं पुत्र षडंगुलमितं शुभम् ॥ १३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरशीत्यधिकषट्शततमः ॥ ६८४ ॥

श्रीसूर्य उवाच ।

तरक्षौ निहते पूर्वभवे च गरुडाग्रज । अत्र जन्मनि नेत्रेषु कातरत्वं प्रजायते ॥ १ ॥
नवनीतमहादानाद्विधिना ब्राह्मणाय च । न पश्येन्नेत्रजं रोगं कातरत्वं हि काश्यप ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अ० पञ्चाशीत्यधिकषट्शततमः ॥ ६८५ ॥

श्रीसूर्य उवाच ।

प्राग्भवे सुमुखी काचिद्गता देवालयेऽण्डज । दीपा धातुमयास्तत्र चान्यदत्ता हृतास्तया ॥ १
सा शद्रात्र महाभाग धनपुत्रसमन्विता । चन्द्रग्रहे महापापात्प्राक्कृताच्च पतत्रिण ॥ २
तेन कर्मविपाकेन चक्षुःपीडाति दारुणा । त्रिदोषैर्भूषिता चात्र युवभावे खगेश्वर ॥ ३
प्रायश्चित्तं प्रवक्ष्यामि दीपहृत्पापशोधनम् । दीपा देया घृतेनात्र पूरयित्वा सुवर्णजाः ॥ ४
सुवर्णार्धमिता भव्याः संपूज्याथ महेश्वरम् । गन्धपुष्पैस्तथा धूपैर्भक्ष्यैर्भोज्यैः प्रयत्नतः ॥ ५
देया द्विजेभ्यो बहुशस्तस्मात्पापात्प्रमुच्यते ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः षडशीत्यधिकषट्शततमः ॥ ६८६ ॥

श्रीसूर्य उवाच ।

तरक्षुं घातयेत्पूर्वं या नारी गरुडाग्रज । कातराक्षी प्रजायेत चक्षूरोगेण चांडज ॥ १
धेनुं रत्नमयीं दद्यात्ससुवर्णां विधानतः । न पश्यत्यक्षिरोगं सा तद्दत्तेन महाद्भुतम् ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्ताशीत्यधिकषट्शततमः ॥ ६८७ ॥

श्रीसूर्य उवाच ।

प्राग्जन्मन्यप्यभूत्कश्चिन्नरो राजक्रियान्वितः । दण्डाधिकारवाञ्शूद्रो दृढो ब्राह्मणपूजकः ॥ १
नानादानरतस्तत्र लोभाढ्योऽपि विशेषतः । व्यभिचाररतस्यैष ब्राह्मणस्य पतत्रिणः ॥ २
लोभाच्चकारासौ तत्र ह्यण्डभेदं च तत्क्षणात् । स तेन कर्मणा युक्तो भुक्त्वातियमशासनम् ॥ ३
देशे पञ्चनदे ह्यत्र जातः शूद्रोऽति चाधमः । स चास्त्यत्र विवर्णस्तु षण्ढः पापमतिः सुखी ॥ ४
सकलैश्वर्यसंपन्नो नानाधनसमन्वितः । नानावाहनभोगाढ्यो दानात्सर्वमिदं सुत ॥ ५
सप्तजन्मन्यसौ षण्ढो भविष्यति खगेश्वर ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाशीत्यधिकषट्शततमः ॥ ६८८ ॥

अरुण उवाच ।

क्षात्रे कुले समुत्पन्नः शौर्यौदार्ययशोधनः । राजमान्यविरोधी च नानासौख्यरतः सदा ॥ १
किंचिद्वातादिना पीडा जायते चोदरे भृशम् । वातरक्ताच्च शिरसि जायते पक्षसंख्यया ॥ २
तस्य भार्या शुभाचारा सुरूपा गुणशालिनी । प्रियभक्तिरता नित्यं दानदाक्षिण्यवर्तिनी ॥ ३
एकपुत्रप्रसूता चाप्यन्यपुत्रमुपागता । पश्चात्पुष्पं गतं शान्तिमपत्यं नैव जायते ॥ ४
केन कर्मविपाकेन पापं शाम्येद्धि तत्स्त्रियः । विधानं वा हितार्थाय सत्यं ब्रूहि दिवाकर ॥ ५

श्रीसूर्य उवाच ।

पूर्वं वर्णोत्तरे[1] जातो धातुकांस्यादिकारकः । ब्राह्मणो मित्रं संजातो बहुद्रव्यसमाकुलः ॥ ६
क्रयविक्रयकर्ता च विप्रद्रव्येण वर्धितः । कालेन महता वत्स स विप्रो निधनं गतः ॥ ७
संचितं तद्धनं सर्वं न तु किंचित्प्रदापितम् । ब्रह्मस्वं भक्षितं तेन वंशवृद्धिविनाशनम् ॥ ८
तेन कर्मविपाकेन नानासंततिनाशनम् । यश्चैतस्य मृतः पुत्रः स जातो ब्राह्मणस्तथा ॥ ९
इदं जन्म चतुर्थं तु ब्रह्मवंशसमुद्भवम् । भार्या दुःखकरा ह्येवं पुत्रहीना पतत्रिण ॥ १०

---

१ जन्मान्तरे इति—क० पु० ।

अरुण उवाच ।

प्रायश्चित्तं कथं देव येन पापक्षयो भवेत् । निष्कृतिं ब्रूहि देवेश संततेः सौख्यहेतवे ॥ ११ ॥

श्रीसूर्य उवाच ।

ब्रह्मस्वं विषनीकाशं, पुत्रपौत्रादिनाशनम् । विषेणैकोऽपि म्रियते ब्रह्मस्वात्सुतसंततिः ॥ १२ ॥
तस्य पापस्य नाशाय कारयेन्निष्कृतिं शुभाम् । सुशुभे भूप्रदेशे तु गोमयेनोपलेपयेत् ॥ १३ ॥
कुर्यादष्टदलं पद्मं राजतं शुक्लतण्डुले । तन्मध्ये स्थापयेत्कुम्भमव्रणं शुभलक्षणम् ॥ १४ ॥
सुशीतसलिलैः पूर्णं ससर्वौषधिपल्लवम् । नानाफलाक्षतोपेतं पूर्णपात्रोपशोभितम् ॥ १५ ॥
तस्योपरि न्यसेत्पात्रं वैणवं वर्तुलाकृति । सप्तधान्यसमोपेतं वस्त्रयुक् चन्दनान्वितम् ॥ १६ ॥
तन्मध्ये स्थापयेन्मूर्तिं निष्कद्वयविनिर्मिताम् । सुवर्णस्य विशुद्धां च दापयेद्वेदवादिने ॥ १७ ॥
प्रतिष्ठां पूजनं कृत्वा ततो गां वै सवत्सकाम् । अष्टोत्तरशतं विप्रान् द्रोणाः सप्तैव निर्मिताः॥ १८॥
जातीपुष्पैः समुद्भूता लक्षपूजा शिवोपरि । संकष्टान्मोचयेद्धेनुं दम्पती परिधापयेत् ॥ १९ ॥
एवं कृतविधेः सूत निश्चला संततिर्भवेत् ॥ २० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अ० एकोननवत्यधिकषट्शततमः ॥ ६८९ ॥

श्रीसूर्य उवाच ।

या काचिद्वनिता मोहात्प्राग्भवे माक्षिकं हरेत् । सात्र जन्मनि पक्षीन्द्र दुर्गन्धाढ्या प्रजायते ॥१॥
मधुधेनुप्रदानात्तु व्यतीपातादिपर्वसु । दुर्गन्धरोगात्सततं मुच्यतेऽत्र पतत्रिण ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवत्यधिकषट्शततमः ॥ ६९० ॥

श्रीसूर्य उवाच ।

षण्ढोऽस्ति[1] राजसम्मानी अत्र जन्मनि चाण्डज । महादुष्टक्रियायुक्तो वधबन्धनतत्परः ॥ १ ॥
प्राक्कृतात्तु महादानात्सुखैश्वर्यधनान्वितः । महामानी महाधूर्तः जडोगम्यातिसेवनात् ॥ २ ॥
नात्र जन्मनि पक्षीन्द्र प्रायश्चित्तं मयोदितम् । अगम्यागमनं पापं पायश्चित्तं न तत्समम् ॥ ३ ॥
पुत्रस्त्रीसुखहीनश्च सर्वधर्मविवर्जितः ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकनवत्यधिकषट्शततमः ॥ ६९१ ॥

श्रीसूर्य उवाच ।

ब्रह्मघ्नी सा मया प्रोक्ता या पूर्वं घातयेद्विजम् । सर्वं विचेष्टितं यस्माच्छृणुष्वात्र पतत्रिण ॥ १ ॥
अनया द्रव्यलोभेन सपत्न्या घातितः सुतः । प्राग्भवे विषदानेन कुमारो दोषवर्जितः ॥ २ ॥
तस्मादियं महादुष्टा बाल्ये कुष्ठान्विता सुत । विवासिता यतः सर्वैः पितृगेहे स्थिताण्डज ॥ ३ ॥
महापापवती पापाज्जातात्र यवनी खग । भविष्यति महारिष्टमग्निदाहेन चाण्डज ॥ ४ ॥
चतुर्विंशान्मिते वर्षे मरणं कीर्तितं ध्रुवम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विनवत्यधिकषट्शततमः ॥ ६९२ ॥

श्रीसूर्य उवाच ।

वराहं यो नरो हन्यात्प्राग्भवे विनतासुत । जायते दन्तुरः सोऽपि काले तत्पापचिह्नितम् ॥ १ ॥

---

१ षण्ड इति—ख०पु० ।

घृतकुम्भं यथा दद्याच्छक्त्या विप्राय धीमते । सुवर्णसहितं तेन तस्मात्पापात्प्रमुच्यते ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिनवत्यधिकषट्शततमः ॥ ६९३ ॥

श्रीसूर्य उवाच ।

यो हरेत्प्राग्भवे सूत गुडं मोहान्नराधमः । गुल्मोदरेण रोगेण पीड्यते सोऽत्र जन्मनि ॥ १
गुडधेनुप्रदानाच्च विधिना ब्राह्मणाय च । गुल्मोदरसमुद्भूता पीडा नश्यति तत्क्षणात् ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्नवत्यधिकषट्शततमः ॥ ६९४ ॥

श्रीसूर्य उवाच ।

अथो काचित्सती नारी धर्मिष्ठा प्रियवादिनी । स्वामिना प्रेरिता पूर्वं शत्रोर्दग्धं तया गृहम् ॥ १
तदाहाच्च महाभाग दग्धं सर्वपुरं तदा । ब्राह्मणस्य तु या कन्या तस्मिन्काले ऽपि सा मृता ॥ २
भुक्त्वा शुभं फलं पुण्यात्पापात्पापसमुद्भवम् । सा शूद्री यमुनातीरे जाताऽत्र पतिसेवया ॥ ३
कुष्ठरोगयुता बाल्ये निष्कृतिं पापनाशनीम् । वक्ष्यामि वृषभं दद्यात्सर्वोपस्करसंयुतम् ॥ ४
कुष्ठरोगात्प्रमुच्येत नात्र कार्या विचारणा ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः पंचनवत्यधिकषट्शततमः ॥ ६९५ ॥

श्रीसूर्य उवाच ।

प्रागासीद्ब्राह्मणः कश्चित्कृषिकर्मरतः सदा । पूजकश्चातिथीनां च भिक्षुकाणां च यत्नतः ॥ १
तद्गृहे वृषभो मत्तस्तीक्ष्णशृङ्गो भयानकः । तेन तद्वृषभस्यापि प्राग्भवे विनतासुत ॥ २
छित्त्वा नासाग्रमुष्कौ तु कृतं कर्मातिदारुणम् । तत्र जन्मनि तद् भुक्त्वा फलं पापसमुद्भवम् ॥ ३
जातोऽत्र यवनः सिन्धुमण्डले पर्वताश्रिते । षण्ढस्तु तेन पापेन स चास्त्यत्र पतत्रिण ॥ ४
धर्मात्पूर्वं कृतात्सोऽपि सुखैश्वर्यधनान्वितः । दृढपापार्जनात्सूत प्रायश्चित्तं न विद्यते ॥ ५
पूजनादतिथीनां च भविष्यति च तद्गतिः । तीर्थाश्रयेऽत्र जन्तूपि मृत्युस्तस्य प्रकीर्तितः ॥ ६
आयुः षष्टिमिताब्दान्तं रिष्टं पञ्चाशदब्दके ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षण्णवत्यधिकषट्शततमः ॥ ६९६ ॥

श्रीसूर्य उवाच ।

घातयेद्या पुरा नारी वराहं गरुडाग्रज । दन्तुरा सा भवेदत्र तत्काले घातसंभवे ॥ १
ताम्रकुम्भं सुवर्णाढ्यं घृतपूर्णं सदक्षिणम् । तद्दोषशमनायैव दद्याच्छक्त्या विधानतः ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तनवत्यधिकषट्शततमः ॥ ६९७ ॥

श्रीसूर्य उवाच ।

तैलहारी तु यः कश्चिद्भवेल्लोभात्पुराभवे । कण्डूया रोगेण सततं पीड्यते चात्र जन्मनि ॥ १
शक्त्या तैलप्रदानाच्च ब्राह्मणस्य पतत्रिण । कण्डूरोगोपशमनं दानात्तैलघटद्वयात् ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टनवत्यधिकषट्शततमः ॥ ६९८ ॥

श्रीसूर्य उवाच ।

काचिच्छुभानना पूर्वभवे चारणवल्लभा । भर्तृत्यक्ता विचित्ता सा महारोगवती ह्यभूत् ॥ १
तया महौषधैर्दिव्यैर्भर्तुः पुंस्त्वं हि नाशितम् । तेन पापप्रभावेण जातोऽत्रायं नपुंसकः ॥ २

धूर्तः पापरतो दुष्टः सर्वधर्मविवर्जितः । वर्णबाह्योऽतिदुःखार्तो न शुभां लभते गतिम् ॥ ३ ॥
बहुजन्मन्यसौ पापान्मुक्तो भवति चाण्डज ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवनवत्यधिकषट्शततमः ॥ ६९९ ॥

श्रीसूर्य उवाच ।

स्वभक्षार्थं महाभाग यो हन्याद्वायुवाहनम् । अत्र जन्मनि खञ्जः स्याद्वायुपीडातिदुःखितः ॥ १ ॥
सुवर्णमृगदानेन पूर्वपीडां न पश्यति ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तशततमः ॥ ७०० ॥

श्रीसूर्य उवाच ।

स्वकं पतिं परित्यज्य या गच्छेत्पूर्वजन्मनि । परपुंसि महाभाग ग्रहणीरुग्युतात्र सा ॥ १ ॥
प्रायश्चित्तं परं तस्या व्रतं चान्द्रायणं त्विह । वैशाखे माघमासे वा तस्मात्पापात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकाधिकसप्तशततमः ॥ ७०१ ॥

अरुण उवाच ।

विप्रवर्णकुलोत्पन्नो दातरक्ताक्षिदर्शनः । उदरे वातजान् रोगान् किंचिच्छस्त्रोपघातकान् ॥ १ ॥
किंचित्क्रोधश्च लोभश्च किंचिद्वित्तसमन्वितः । तस्य प्रिया सदाचारा पतिभक्तिपरायणा ॥ २ ॥
एकापत्यं भवेत्तस्य जायते मृतपुत्रकः । आदिपुत्रो मृतस्तस्य ह्यपत्यं नैव जायते ॥
केन कर्मविपाकेन सत्यं कथय भास्कर ॥ ३ ॥

श्रीसूर्य उवाच ।

पूर्वजन्म महाबाहो शूद्रवंशसमुद्भवम् ॥ ४ ॥
व्यापारकृषिवाणिज्यं ब्रह्मवित्तेन यत्कृतम् । व्यवहारादिना कृत्वा ब्रह्मवित्तेन वर्धितः ॥ ५ ॥
कालेनैव मृतो विप्रो धनं शूद्रेण वञ्चितम् । नार्पितं ब्रह्मपुत्राय ब्रह्मस्वं च गृहे स्थितम् ॥ ६ ॥
ब्रह्मस्वं भक्षितं तेन बहुकालं खगेश्वर । पश्चान्मृत्युवशं प्राप्तो नरके रौरवे गतः ॥ ७ ॥
ब्रह्मस्वभक्षणाच्चैव वर्षाणां च सहस्रकम् । पातितो नरके घोरे पच्यते चेह कर्मणा[1] ॥ ८ ॥
पश्चान्मानुषमापन्नो व्रतदानप्रभावतः । इदं जन्म तृतीयं तु ब्रह्मवंशसमुद्भवम् ॥ ९ ॥
निक्षेपहरणाद्वापि मृतपुत्रः प्रजायते । ब्राह्मणस्य विशेषेण ब्रह्मस्वं विषमेव यत् ॥ १० ॥

अरुण उवाच ।

प्रायश्चित्तं कथं देव येन पुत्रः प्रजायते । नारीणां च नराणां च निष्कृतिं सौख्यहेतवे ॥ ११ ॥

श्रीसूर्य उवाच ।

महापापहरो देवः सर्वकामकरः प्रभुः । पूजनीयो महारुद्रः संततिश्रेय इच्छता ॥ १२ ॥
यजुर्वेदमयं देवं यजुर्भिः शतरुद्रजैः । यजनैरर्च्य मुच्येत पापादाकल्पसंभवात् ॥ १३ ॥
रुद्रैकादशनीभिश्च रुद्रैकादशकेन वा । जपेन तोषयेद्देवं रुद्रमेकादशात्मकम् ॥ १४ ॥
तद्दशांशेन होतव्यं द्रव्यं श्रद्धासमन्वितम् । विधिवज्जुहुयाद्वह्निं तिलैस्त्रिमधुरप्लुतैः ॥ १५ ॥
हरितालीपलाशाभ्यां समिधोऽत्र हविर्हुताः । प्रतिरुद्रं प्रदातव्यं गोयुगं रसनान्वितम् ॥ १६ ॥

---

१ सदृशम्, इति । "ऋणं विप्रस्य वाऽसह्यमपि कल्पशतावधि । तस्माद्विप्रऋणं घोरमसह्यमभिजायते" इति–क० पु० ।

केयूरकुण्डलाकल्पमन्त्रपुस्तकमण्डलम् । प्रतिरुद्रं शतं विप्रान् भोजयेत्सुसमाहितः ॥ १७ ॥
निष्कं दद्यात्सुवर्णस्य दद्याद्वा मुख्यदक्षिणाम् । एवं रुद्रविधिं कृत्वा त्रिविधापत्यशान्तिकृत् ॥ १८ ॥
इतिहासपुराणोक्तसूक्तानि विविधानि च । शृणुयाद्विधिवत्ताक्ष्यं सभार्यः प्रीतितोऽन्वहम् ॥ १९ ॥
देवर्षिपितृमर्त्यानामृषीणां च महीक्षिताम् । देवदानवगन्धर्वपिशाचोरगरक्षसाम् ॥ २० ॥
सर्वासामपि जातीनामुत्पत्तिं शृणुयादपि । ऋषीणामृषिपत्नीनां वंशान्सर्वानुदीरितान् ॥ २१ ॥
हरेर्वंशस्य श्रवणात्पूर्वपापात्प्रमुच्यते । तस्य संततिवृद्धिः स्यादत्र जन्मनि वै सुत ॥ २२ ॥
कृष्णगुल्मोद्भवां पीडां नरश्चात्र न पश्यति ॥ २३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्याधिकसप्तशततमः ॥ ७०२ ॥

श्रीसूर्य उवाच ।

प्राग्भवे याऽभवत्काचित्स्वर्णकारी पतत्त्रिण । स्वधर्मनिरता सा च दानधर्मपरायणा ॥ १ ॥
तद्गृहे धान्यराशिं तु चरन्ती गौः स्वभावतः । ताडिता कुक्षिभागे तु लकुटेन भृशं सुत ॥ २ ॥
तत्ताडनान्महादुःखं प्राप्ता गर्भातिभारतः । मृता च तेन दुःखेन गर्भजातसमन्विता ॥ ३ ॥
तेन कर्मसमायुक्ता संप्राप्योचितशासनम् । पुनः शूद्रीसमा जाता गौरवर्णा शुभानना ॥ ४ ॥
धनभृत्याश्वभोगाद्यैर्नानाविभवसंयुता । पुत्रसंततिहीना सा प्राग्गोघाताघसंभवात् ॥ ५ ॥
प्रायश्चित्तं प्रवक्ष्यामि सर्वपापक्षयंकरम् । कुर्याद्वापीमरण्ये तु देशे लोकाकुले तथा ॥ ६ ॥
मार्गे हि धर्मतो यत्नात्प्रतिष्ठां कारयेत्ततः । संस्थाप्य च शिवं तत्र विधिना विनतासुत ॥ ७ ॥
होमेयेच्च ततस्तत्र तिलानाज्ययुतानिह । भोजयेद्ब्राह्मणाञ्शक्त्या शिवपूजनतत्परान् ॥ ८ ॥
दद्यात्तथैकां कपिलां सर्वपापप्रणाशनीम् । प्रायश्चित्तमिदं सूत पूर्वजन्माघनाशनम् ॥ ९ ॥
नैवं वा कुरुते श्रुत्वा तस्याः संततिजं भयम् ॥ १० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्याधिकसप्तशततमः ॥ ७०३ ॥

श्रीसूर्य उवाच ।

यः कश्चित्प्राग्भवे सूत दुग्धं हरति मानवः । तत्काले स तु पापेन वहुमूत्री प्रजायते ॥ १ ॥
दुग्धधेनुप्रदानाच्च विधिना त्वत्र जन्मनि । वहुमूत्रान्महारोगान्मुच्यते गरुडाग्रज ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरधिकसप्तशततमः ॥ ७०४ ॥

श्रीसूर्य उवाच ।

दुग्धं हरति या नारी कस्यचित्पापमोहिता । पूर्वजन्मनि साऽत्रैव वहुमूत्ररुजाऽऽकुला ॥ १ ॥
दुग्धधेनुप्रदानाच्च वेदवेदाङ्गपारगे । विधिना काश्यपेयात्र न पश्येद्वहुमूत्रताम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाधिकसप्तशततमः ॥ ७०५ ॥

श्रीसूर्य उवाच ।

यो मोहाद्घातयेत्सूत महिषीं नवयौवनाम् । प्राग्भवे नियतं सोऽपि कृष्णगुल्मेन वाध्यते ॥ १ ॥
स नानाधेनुदानेन विधिना गरुडाग्रज । नाशयेत्कृष्णगुल्मोत्थां पीडामत्रैव जन्मनि ॥ २ ॥
अथवा महिषीदानाद्विप्राय विधिनाण्डज । महिषीपापजाद्रोगात्सुखी भवति मानवः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडधिकसप्तशततमः ॥ ७०६ ॥

श्रीसूर्य उवाच ।

यः कुर्यात्पापलोभेन पूर्वं मुष्कनिकृन्तनम् । ब्रह्मपुत्रस्य षण्ढः स्यादत्र जन्मनि निश्चयात् ॥ १ ॥
ज्ञानाज्ञानकृतं वापि निष्कृतिर्नात्र विद्यते । ब्रह्मघातान्महापापात्षण्ढः स्याद्बहुजन्मनि ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्ताधिकसप्तशततमः ॥ ७०७ ॥

श्रीसूर्य उवाच ।

बभूव फलहृत्काचित्प्रमादाद्विनतासुत । सर्वजन्मनि पुण्यापि बहुदानरता सती ॥ १ ॥
अत्र सा क्षत्रिया जाता प्रागपि क्षत्रियाण्डज । अत्र पुत्रविहीना सा फलहृत्पापजाद्दृढात् ॥ २ ॥
फलानां बहुदानाच्च चातुर्मास्ये च नित्यशः । भोजनं तु तदा पश्चात्कारयेत्स्वेच्छया द्विजान् ३॥
प्रायश्चित्तं परं तस्मात्फलहृत्पापनाशनम् । अमायां नालिकेराणि देयानि खलु शक्तितः ॥ ४ ॥
तत्कृते सुतवृद्धिः स्याज्जीवनं वर्षसप्ततिम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायोऽष्टाधिकसप्तशततमः ॥ ७०८ ॥

श्रीसूर्य उवाच ।

दधिहारी पुमान्पूर्वं जन्मन्यत्र खगेश्वर । जायते मेदसा युक्तस्तद्दुःखेन प्रपीडितः ॥ १ ॥
कार्तिक्यामथ वैशाख्यां दधिधेनुप्रदानतः । तस्माद्रोगाद्विमुच्येत तत्काले गरुडाग्रज ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवाधिकसप्तशततमः ॥ ७०९ ॥

श्रीसूर्य उवाच ।

महिषीं घातयेन्नारी प्राग्भवे विनतासुत । अत्र जन्मनि पक्षीन्द्र कृष्णगुल्मेन पीड्यते ॥ १ ॥
दद्यात्स्राभरणां सूत महिषीं यमदैवताम् । युगकम्बलसंच्छन्नां विधिना नवयौवनाम् ॥ २ ॥
सा मुच्यते महापापान्महिषीवधजात्सुत । तस्मिंश्च पच्यते तत्र गुल्मरोगं न पश्यति ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो दशाधिकसप्तशततमः ॥ ७१० ॥

श्रीसूर्य उवाच ।

वेधेत्प्राग्वृषभानां च नासाग्रं गरुडाग्रज । नासाछेदोऽत्र तस्यास्ति युवभावे विनिश्चयात् ॥ १ ॥
नास्ति तद्विन्मयं क्वापि दत्तैर्दानशतैरपि ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकादशाधिकसप्तशततमः ॥ ७११ ॥

श्रीसूर्य उवाच ।

कश्चिदासीन्महाभाग चारणोऽति यंवदः । कवित्वशक्तिनिरतो बहुचारणसंयुतः ॥ १ ॥
प्रेरितो दैवयोगेन गतो राजाश्रयं प्रति । तत्सेवानिरतो नित्यं चिरकालमुपस्थितः ॥ २ ॥
अथ तत्र महावादे कवीनां हि खगेश्वर । महाघोरमभूद्युद्धं राजद्वारे भयप्रदम् ॥ ३ ॥
स चारणो महाक्रोधात्कृतवानात्मघातनम् । परघाते कृते सूत स्वशरीरमथात्यजत् ॥ ४ ॥
तेन कर्मविपाकेन महाचौर्येण चाण्डज । भुक्त्वा स्वर्गफलं पुण्यादात्मघातात्परिच्युतः ॥ ५ ॥
महाभूमिभुजां वंशे म्लेच्छानां चाजनि स्वयम् । सिन्धोः पश्चिमभागेऽत्र शतयोजनसंमिते ॥ ६ ॥
देशे कर्कटगे जीवे लग्नस्थे चन्द्रसंयुते । गौराङ्गः पृथुलो धूर्तः सर्वविद्याविशारदः ॥ ७ ॥
सर्वैश्वर्यसमाक्रान्तो धनवाहनसंयुतः । शूरः सुवेषोऽतिक्रूरो बहुपालनतत्परः ॥ ८ ॥

पापाल्लोभरतः क्रोधी नानाभैरवशासनः । रिष्टं षष्टिमिते वर्षे पञ्चहीने पतत्रिण ॥ ९ ।
सर्ववित्तषडंशेन महारिष्टहरं परम् । पञ्चाशीतिमितायुः स्याद्दत्ते कालनरेऽडज ॥ १० ।
प्रायश्चित्ते कृते तत्र रिष्टं स्यात्प्रोक्तवासरे । कालरूपेण शस्त्रेण तत्क्षणे मरणं स्मृतम् ॥ ११ ।
महाघोराहवे सूत चात्मघातादिदं फलम् । चिह्नं तस्य प्रवक्ष्यामि ह्यात्मघातसमुद्भवम् ॥ १२ ।
हृदिस्थं लशुनं पुत्र षडंगुलमितं शुभम् ॥ १३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वादशाधिकसप्तशततमः ॥ ७१२ ॥

श्रीसूर्य उवाच ।

दधिहर्त्री भवेन्नारी प्राग्भवे याऽत्र जन्मनि । मेदसा पीड्यते सा तु विलतानन्दवर्द्धन ॥ १ ।
दधिधेनुप्रदानाच्च ब्राह्मणाय कुटुम्बिने । मुच्यतेऽत्र महारोगान्नात्र कार्या विचारणा ॥ २ ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोदशाधिकसप्तशततमः ॥ ७१३ ॥

श्रीसूर्य उवाच ।

तरक्षौ निहते पूर्वभवे च गरुडाग्रज । अत्र जन्मनि नेत्रेषु कातरत्वं प्रजायते ॥ १ ।
रत्नधेनुमहादानाद्विधिना ब्राह्मणाय च । न पश्यत्यक्षिरोगं च कातरोत्थं हि काश्यप ॥ २ ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्दशाधिकसप्तशततमः ॥ ७१४ ॥

श्रीसूर्य उवाच ।

प्राग्भवे सुमुखी काचिद्गता देवालयेऽण्डज । दीपा धातुमयास्तत्र चान्यदत्ता हृतास्तया ॥ १ ।
सा शूद्रा च महाभाग धनपुत्रसमन्विता । चन्द्रग्रहे महादानात्प्राक्कृतात्तु पतत्रिण ॥ २ ।
तेन कर्मफलेनात्र चक्षुःपीडाऽतिदारुणा । त्रिदोषैर्दुःखिता चात्र युवभावे खगेश्वर ॥ ३ ।
प्रायश्चित्तं प्रवक्ष्यामि दीपहृत्पापशोधनम् । दीपा देया घृतेनात्र पूरयित्वा सुवर्णजाः ॥ ४ ।
सुवर्णार्द्धमिता भव्याः संपूज्याथ महेश्वरम् । गन्धपुष्पैस्तथा दीपैर्भक्ष्यैर्भोज्यैः प्रयत्नतः ॥ ५ ।
दद्याद्विजेभ्यो बहुशस्तस्मात्पापात्प्रमुच्यते ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचदशाधिकसप्तशततमः ॥ ७१५ ॥

श्रीसूर्य उवाच ।

दुष्टगन्धियुतः सूत जायते सोत्र जन्मनि । मधुहारी च यः पूर्वं प्रायश्चित्तं परं शृणु ॥ १ ।
मधुधेनुप्रदानाद्वै ब्राह्मणाय पतत्रिण । दुष्टगन्धिकृतादोषान्मुच्यते नात्र संशयः ॥ २ ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षोडशाधिकसप्तशततमः ॥ ७१६ ॥

श्रीसूर्य उवाच ।

तरक्षुं घातयेत्पूर्वं या नारी गरुडाग्रज । कातराक्षी प्रजायेत चक्षूरोगेण पक्षिराट् ॥ १
धेनुं रत्नमयीं दद्यात्ससुवर्णां विधानतः । न पश्यत्यक्षिरोगं सा तद्दत्तेन महाद्भुतम् ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तदशाधिकसप्तशततमः ॥ ७१७ ॥

श्रीसूर्य उवाच ।

प्राग्जन्मन्यप्यभूत्कश्चिन्नरो राजकृपान्वितः । दण्डाधिकारवाञ्शूद्रो दृढो ब्राह्मणपूजकः ॥ १
नानादानरतस्तत्र लोभाढ्योऽपि विशेषतः । व्यभिचाररतस्यायो ब्राह्मणस्य पतत्रिण ॥ २

लोभाच्चकारासौ तत्र ह्यण्डच्छेदं च तत्क्षणात्। स तेन कर्मणा युक्तो भुक्त्वातियमशासनम्॥३॥
देशे पंचनदे ह्यत्र जातः शूद्रोऽतिचाधमः। स चाप्यत्र विवर्णस्तु स्वेच्छापापमतिः सुखी ॥४॥
सकलैश्वर्यसम्पन्नो नानाधनसमन्वितः। नानावाहनभोगाढ्यो दानात्सर्वमिदं सुत ॥ ५ ॥
सप्तजन्मन्यसौ पंढो भविष्यति खगेश्वर ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टादशाधिकसप्तशततमः ॥ ७१८ ॥

अरुण उवाच।

क्षात्रे कुले समुत्पन्नः शौर्योदार्ययशो धनी। राजमान्यविरोधी च नानासौख्यरतः सदा ॥ १ ॥
किंचिद्घातादिना पीडा जायते चोदरे भृशम्। वातरक्ताच्च शिरसि जायते वक्षसि ह्यथ ॥ २ ॥
तस्य भार्या शुभाचारा सुरूपा गुणशालिनी। प्रियभक्तिरता नित्यं दानदाक्षिण्यवर्तने ॥ ३ ॥
एकपुत्रप्रसूता चाप्यन्यपुत्रमुपागता। पश्चात्पुष्पं गतं शान्तिमपत्यं नैव जायते ॥ ४ ॥
केन कर्म्मविपाकेन पापं शाम्यति तत्क्रिया:। विधानावहितार्थाय सत्यं ब्रूहि दिवाकर ॥ ५ ॥

श्रीसूर्य उवाच।

पूर्वं वर्णान्तरे जातो धातुकांस्यादिकारकः। ब्राह्मणस्य च मित्रं तु बहुद्रव्यसमाकुलः ॥ ६ ॥
क्रयविक्रयकर्ता च विप्रद्रव्येण वर्धितः। कालेन महता वत्स स विप्रो निधनं गतः ॥ ७ ॥
संचितं तद्धनं सर्वं न तु किंचित्प्रदापितम्। ब्रह्मस्वं भक्षितं तेन वंशवृद्धिविनाशनम् ॥ ८ ॥
तेन कर्मविपाकेन नानासंततिनाशनम्। यो वै तस्य मृतः पुत्रः स जातो ब्राह्मणस्य च ॥ ९ ॥
इदं जन्म चतुर्थं तु ब्रह्मवंशसमुद्भवम्। भार्या दुःखवती ह्येवं पुत्रहीना पतत्रिण ॥ १० ॥

अरुण उवाच।

प्रायश्चित्तं कथं देव येन पापक्षयो भवेत्। निष्कृतिं ब्रूहि देवेश संततेः सौख्यहेतवे ॥ ११ ॥

श्रीसूर्य उवाच।

ब्रह्मस्वं विषसंकाशं पुत्रपौत्रादिनाशनम्। म्रियतेऽत्र विषेणैको ब्रह्मस्वात्सकुलं खग ॥ १२ ॥
तस्य संतत्यनाशाय कारयेन्निष्कृतिं शुभाम्। सुशुभे भूप्रदेशे तु गोमयेनोपलेपयेत् ॥ १३ ॥
कुर्यादष्टदलं पद्मं राजतं शुक्लतण्डुलैः। तन्मध्ये स्थापयेत्कुम्भमव्रणं शुभलक्षणम् ॥ १४ ॥
सुशीतसलिलैः पूर्णं सरत्नौषधिपल्लवम्। नानाफलाक्षतोपेतं पूर्णपात्रोपशोभितम् ॥ १५ ॥
तस्योपरि न्यसेत्पात्रं वैणवं वर्तुलाकृति। सप्तधान्यफलोपेतं वस्त्रयुक् चंदनान्वितम् ॥ १६ ॥
तन्मध्ये स्थापयेन्मूर्तिं निष्कद्वयविनिर्मिताम्। सुवर्णस्य विशुद्धां च दापयेद्वेदवादिने ॥ १७ ॥
प्रतिष्ठां पूजनं कृत्वा ततो गां वै सवत्सकाम्। शतमष्टोत्तरं विप्रान् द्रोणाः सप्तैव निर्मिताः॥१८॥
जातीपुष्पसमुद्भूतां लक्षपूजां शिवोपरि। संकष्टान्मोचयेद्धेनुं दम्पती परिधापयेत् ॥ १९ ॥
एवं कृतविधेः सूत निश्चला संततिर्भवेत् ॥ २० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनविंशत्यधिकसप्तशततमः ॥ ७१९ ॥

श्रीसूर्य उवाच।

या काचिद्वनिता मोहात्प्राग्भवे माक्षिकं हरेत्। साऽत्र जन्मनि पक्षीन्द्र दुर्गन्धाढ्या प्रजायते॥१॥
मधुधेनुप्रदानाच्च व्यतीपातादिपर्वसु। दुर्गंधिरोगात्सततं मुच्यतेऽत्र पतत्रिण ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो विंशत्यधिकसप्तशततमः ॥ ७२० ॥

श्रीसूर्य उवाच ।

षंढोऽस्ति राजसन्मानी चात्र जन्मनि चांडज । महादुष्टक्रियायुक्तो वृषबंधनतत्परः ॥ १ ॥
प्राक्कृतात्तु महादानात्सुखैश्वर्यधनान्वितः । महामानी महाधूर्तः पंढो राजातिसेवनात् ॥ २ ॥
नात्र जन्मनि भो सूत प्रायश्चित्तं मयोदितम् । अगम्यागमने पापं प्रायश्चित्तविवर्जितम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकविंशत्यधिकसप्तशततमः ॥ ७२१ ॥

श्रीसूर्य उवाच ।

ब्रह्मघ्नी सा मया प्रोक्ता या पूर्वं घातयेद्विजम् । सर्वं विचेष्टितं यस्माच्छृणुष्वात्र पतत्रिण ॥ १ ॥
अनया द्रव्यलोभेन सपत्न्या घातितः सुतः । प्राग्भवे विषदानेन कुमारो दोषवर्जितः ॥ २ ॥
तस्मादियं महादुष्टा बाल्ये कुष्ठान्विता सुत । अविवाह्या यतः सर्वैः पितृगेहे स्थितांऽडज ॥ ३ ॥
महादोषवती पापा तस्या नोक्ताऽत्र निष्कृतिः । चतुर्विंशन्मिते वर्षे मरणं कीर्तितं ध्रुवम् ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वाविंशत्यधिकसप्तशततमः ॥ ७२२ ॥

श्रीसूर्य उवाच ।

वराहं यो नरो हन्यात्प्राग्भवे विनतासुत । जायते दंतुरः सोऽपि काले तत्कालचिह्नितः ॥ १ ॥
घृतकुम्भं यथा दद्याच्छक्त्या विप्राय धीमते । सुवर्णसहितं तेन तस्मात्पापात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोविंशत्यधिकसप्तशततमः ॥ ७२३ ॥

श्रीसूर्य उवाच ।

यो हरेत्प्राग्भवे सूत गुडं मोहान्नराधमः । गुल्मोदरेण रोगेण सोऽत्र जन्मनि पीड्यते ॥ १ ॥
गुडधेनुप्रदानाच्च विधिना ब्राह्मणाय च । गुल्मोदरसमुद्भूता पीडा नश्यति तत्क्षणात् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्विंशत्यधिकसप्तशततमः ॥ ७२४ ॥

श्रीसूर्य उवाच ।

अथो काचित् सती नारी धर्मिष्ठा प्रियवादिनी । स्वामिना प्रेरिता पूर्वं शत्रोर्गेहं ददाह सा ॥१॥
तद्दाहाच्च महाभाग दग्धं सर्वं पुरं तदा । ब्राह्मण्येका सबाला च निर्दग्धा दोषवर्जिता ॥ २ ॥
ततो ब्रह्मवधस्तत्र किंचित्कालेऽपि सा मृता । भुक्त्वा फलानि सर्वाणि पुण्यपापोद्भवानि च ॥ ३ ॥
सा शूद्री यमुनातीरे जाताऽत्र पतिसेवया । कुष्ठरोगयुता बाल्ये निष्कृतिं पापशोधनीम् ॥ ४ ॥
वक्ष्यामि वृषभं दद्यात्सर्वोपस्करसंयुतम् । कुष्ठरोगात्प्रमुच्येत नात्र कार्या विचारणा ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचविंशत्यधिकसप्तशततमः ॥ ७२५ ॥

श्रीसूर्य उवाच ।

प्रागासीद्ब्राह्मणः कश्चित्कृषिकर्मरतस्तथा । पूजकश्चातिथीनां च भिक्षुकाणां च यत्नतः ॥ १ ॥
तद्गृहे वृषभो मत्तस्तीक्ष्णशृङ्गो भयानकः । तेन तद्वृषभस्याऽपि प्राग्भवे विनतासुत ॥ २ ॥
छित्त्वा नासाग्रमुष्कौ तु कृतं कर्मातिदारुणम् । तत्र जन्मनि भुक्त्वा तु फलं पापसमुद्भवम् ॥३॥
जातोऽत्र यवनः सिन्धुमण्डले पर्वताश्रिते । षंढस्तु तेन पापेन स चास्त्यत्र पतत्रिण ॥ ४ ॥
धर्मात्पूर्वकृतात्सोऽपि सुखैश्वर्यधनान्वितः । पापाद्दृढार्जनात्सूत प्रायश्चित्तं न विद्यते ॥ ५ ॥

पूजनादतिथीनां च भविष्यति च तद्गतिः। तीर्थाश्रयेऽथ जन्तुपि मृत्युस्तस्य प्रकीर्तितः ॥ ६ ॥
आयुः षष्टिमिताब्दान्तं रिष्टं पञ्चाशदब्दके ॥ ७ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षड्विंशत्यधिकसप्तशततमः ॥ ७२६ ॥

श्रीसूर्य उवाच।

घातयेद्या पुरा नारी वराहं गरुडाग्रज। दन्तुरा सा भवेदत्र तत्काले घातसंभवे ॥ १ ॥
ताम्रकुंभं सुवर्णाढ्यं घृतपूर्णं सदक्षिणम्। तद्दोषशमनायैव दद्याच्छक्त्या विधानतः ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तविंशत्यधिकसप्तशततमः ॥ ७२७ ॥

श्रीसूर्य उवाच।

तैलहारी तु यः कश्चित्सूत लोभात्पुराभवे। कंडूरोगेण सततं पीड्यते चात्र जन्मनि ॥ १ ॥
शक्त्या तैलप्रदानाच्च ब्राह्मणाय पतत्रिण। कंडूरोगप्रशमनं दानं तैलघटद्वयम् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाविंशत्यधिकसप्तशततमः ॥ ७२८ ॥

श्रीसूर्य उवाच।

काचिच्छुभानना पूर्वेऽभवच्चारणवल्लभा। पतित्यक्ताऽधिविण्णा सा महारोषवती ह्यभूत् ॥ १ ॥
तया महौषधैर्दिव्यैः पत्युः पुंस्त्वं विनाशितम्। तेन पापप्रभावेण जातोऽत्रायं नपुंसकः ॥ २ ॥
धूर्तः पापरतो नित्यं सर्वधर्मविवर्जितः। वर्णबाह्योऽतिदुःखार्तो न शुभां लभते गतिम् ॥ ३ ॥
बहुजन्मन्यसौ पापान्मुक्तो भवति चांडज ॥ ४ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनत्रिंशत्यधिकसप्तशततमः ॥ ७२९ ॥

श्रीसूर्य उवाच।

स्वभक्षार्थं महाभाग यो हन्याद्वायुवाहनम्। अत्र जन्मनि खञ्जोऽपि नात्र कार्या विचारणा ॥ १ ॥
न तस्य विन्मयं प्रोक्तमत्र जन्मनि चांडज। स्वशरीरविवृद्ध्यर्थं येन भुक्तो मृगः पुरा ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिंशत्यधिकसप्तशततमः ॥ ७३० ॥

श्रीसूर्य उवाच।

या नारी प्राग्भवे मोहाद्गुडं हरति कस्यचित्। गुल्मोदरेण रोगेण पीड्यते साऽत्र जन्मनि ॥ १ ॥
गंगायां हि महाभाग गुडधेनुप्रदानतः। तत्र स्नानान्महापुण्यात्तस्माद्रोगात्प्रमुच्यते ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकत्रिंशत्यधिकसप्तशततमः ॥ ७३१ ॥

श्रीसूर्य उवाच।

कश्चिद्वैश्योऽभवत्पूर्वं भवे नेपालविश्रुते। बहुमित्रसुखैराढ्यो हठी व्यसनसंयुतः ॥ १ ॥
आराधनं तु कृतवान्देव्या यः पूर्वजन्मनि। स्वस्त्रियं च सुरूपां च परित्यज्य शुभाननाम् ॥ २ ॥
अन्यस्त्रियामभिगमाद्व्यभिचारपरो दृढः। स तेन कर्मणा युक्तो गतो धर्मपुरं प्रति ॥ ३ ॥
तत्र पापं फलं भुक्त्वा शुभाज्जातो महीतले। गौरो भव्यो महाज्ञानी महाविभवसंयुतः ॥ ४ ॥
देशेदेशेऽतिविख्यातो घृणी लघुर्महायशाः। स्वस्त्रीत्यागान्महत्पापाज्जायते स्त्रीविवर्जितः ॥ ५ ॥

अरुण उवाच।

निष्कृतिं वद मे स्वामिन् स्त्रीप्राप्तिसौख्यकारिणीम्। पार्वतीप्रतिमां कृत्वा हैमीं वै कार्यकारिणीम् ६

पलपंचमितां लेख्यां गंधैर्माल्यैरलंकृताम् । दद्याद्वेदविधिज्ञाय सुकुलीनाय चार्थिने ॥ ७ ॥
प्रजापतिं तथा दद्याद्राजतं त्रिपलात्मकम् । ब्रह्मदैवतमंत्रेण गृह्णाति स महाद्विजः ॥ ८ ॥
पश्चादष्टाक्षरं मंत्रं सहस्रं पापशोधनम् । जपेदष्टसहस्रं तु सूर्यमंत्रं महाबलम् ॥ ९ ॥
होमयेत्तद्दशांशेन तद्दशांशेन तर्पयेत् । य एवं कुरुते सूत सर्वपापविनाशनम् ॥ १० ॥
प्रायश्चित्तं परं तत्र तस्मात्पापात्प्रमुच्यते । नैवं करोति यो मोहाज्जडधीर्दैवघातितः ॥ ११ ॥
न लभेत्स्त्रीसुखं तत्र रिष्टं षड्वेदकेऽब्दके । प्रायश्चित्ते कृते सूत जीवनं वर्षसप्ततिम् ॥ १२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वात्रिंशदधिकसप्तशततमः ॥ ७३२ ॥

श्रीसूर्य उवाच ।

नृपं विना प्राग्यो हन्यान्मृगं हि विनतासुत । खञ्जः स्यादत्र जन्तुषि तत्काले मृगघातजे ॥ १ ॥
पापनाशकरीं तस्य निष्कृतिं वच्म्यहं सुत । दद्याद्गवं नवं तत्र स्वर्णं निष्कयुतं शुभम् ॥ २ ॥
सहासनमलंकारं पूजयित्वा विधानतः । विधिज्ञाय महावाहो नानाशास्त्रविधानतः ॥ ३ ॥
न स पश्यति खंजत्वं दानस्याऽस्य प्रभावतः ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयस्त्रिंशदधिकसप्तशततमः ॥ ७३३ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे सूत परतैलापहारिणी । साऽत्र जन्मनि पक्षीन्द्र कंडुरोगप्रपीडिता ॥ १ ॥
सा मुच्यते महाभाग दानात्तैलघटद्वयात् । सुवर्णाढ्या तथा शक्त्या तैलदानाद्विशेषतः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुस्त्रिंशदधिकसप्तशततमः ॥ ७३४ ॥

श्रीसूर्य उवाच ।

राजप्रचारी यः कश्चिच्चारणः पूर्वजन्मनि । भव्यमूर्तिर्दृढो धीरो शिवपूजनतत्परः ॥ १ ॥
राजपत्न्यां महाबाहो दधारासावधर्मतः । गर्भं च कामलोभेन भाविनोऽर्थस्य वै बलात् ॥ २ ॥
पापात्पापफलं भुक्त्वा यमलोके पतत्रिण । शिवपूजनजात्पुण्यात्सोऽत्र जातो हि पादजः ॥ ३ ॥
देशे जांगलके पण्ढः सर्वधर्मबहिष्कृतः । शिवपूजनतो यस्मात्प्रागत्र धनभोगभाक् ॥ ४ ॥
स्त्रीपुत्रसुखहीनोऽत्र प्रायश्चित्तं न विद्यते ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचत्रिंशदधिकसप्तशततमः ॥ ७३५ ॥

श्रीसूर्य उवाच ।

गर्भाढ्या याऽवधीत्पूर्वं मृगं हि विनतासुत । स्वगर्भपालने दक्षा जन्मन्यत्र गतघृणा ॥ १ ॥
तद्घातकाले खंजा सा भविष्यति शुभानना । गर्भपातनदुःखार्ता तथैव महदेनसः ॥ २ ॥
तत्पापनाशनं सूत शृणु वक्ष्यामि तत्त्वतः । दद्याद्विप्राय तुरगं युवानं भूषणान्वितम् ॥ ३ ॥
स्वर्णनिष्कयुतं चात्र पूर्वपापात्प्रमुच्यते । न पश्यति च गर्भोत्थां पीडामत्रैव जन्मनि ॥ ४ ॥
दानप्रभावात्पक्षीन्द्र खंजत्वं नाप्नुयादिह ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः षट्त्रिंशदधिकसप्तशततमः ॥ ७३६ ॥

अरुण उवाच ।

क्षात्रे कुले समुत्पन्नो दानदाक्षिण्यतत्परः । मोहादिपीडितो नित्यं कृशांगः पाण्डुरद्युतिः ॥ १ ॥
ऊर्ध्वं वातादिना पीडा बाल्ये स्याद्ग्रहणीगदः । तस्य भार्या सदाचारा सुस्नेहा भर्तृसंयुता ॥ २ ॥

रत्नस्रावादिना पीडा जायते चोदराऽनिलः। उदराक्तस्या गर्भस्य पातं कुर्याच्च दृष्टितः ॥ ३ ॥
द्वित्रिभिः पंचभिर्मासैः चतुर्भिः सप्तभिस्तथा। केन कर्मविपाकेन गर्भो न स्थिरतां व्रजेत् ॥ ४ ॥

श्रीसूर्य उवाच।

वैनतेय महाबाहो शृणु तस्या विचेष्टितम्। व्यभिचारभयाद्वापि तया गर्भश्च पातितः ॥ ५ ॥
अतिकष्टाद्वैनतेय गर्भपातकृतागसः। अपरं च कृतं कर्म व्यभिचारं यतस्ततः ॥ ६ ॥
नानाद्रव्यापहर्त्री च कुलटा वाक्यलंघनात्। भर्तुस्तुच्चौरिणी वृत्तिर्दुष्टसंगस्यचार्जनात् ॥ ७ ॥
तेन दुष्टेन यद्द्रव्यं हृतं तस्करबुद्धिना। भुक्तं ताभ्यां वैनतेय ब्रह्मस्वं तत्र जन्मनि ॥ ८ ॥
कालेन तद्धनं भुक्त्वा पीडितो दारुणैर्ग्रहैः। यातना बहुधा प्राप्या पश्चान्मानुषमाप्नुयात् ॥ ९ ॥
किंचित्पुण्यप्रभावेण क्षात्रोऽयं जन्मतो भुवि। इदं जन्म चतुर्थं तु गर्भपातो विजायते ॥ १० ॥
उभाभ्यां हि कृतं कर्म भुज्यते जन्मजन्मनि ॥ ११ ॥

अरुण उवाच।

प्रायश्चित्तं कथं देव येन पापक्षयो भवेत्। निष्कृतिं ब्रूहि देवेश येन गर्भः स्थिरो भवेत् ॥ १२ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्रिंशदधिकसप्तशतमः ॥ ७३७ ॥

श्रीसूर्य उवाच।

पूर्वं जन्मनि या नारी नानागर्भाञ्छिवाँसति ॥ १ ॥
तस्या निष्कृतये शुद्धिः श्रूयतां कश्यपात्मज। नारी नियमसंवीता ध्रुवं सा व्रतकांक्षिणी ॥२ ॥
सौम्यायने समापूर्यमाणे पक्षे शुभेऽहनि। तस्य पापस्य शान्त्यर्थं नानाव्रतमुपाचरेत् ॥ ३ ॥
पयःस्रवंतीं श्रान्तां वा सुरभीं शुभलक्षणाम्। गृहमानीय विधिवत्पूजयेत्तां समाहितः ॥ ४ ॥
दृष्टैस्तु यवसैः पानैर्भक्ष्यैः कंडूयनैरपि। रुचिरैश्च सुगोष्ठानैः स तां परिचरेत्सदा ॥ ५ ॥
रात्रौ पुष्पावलीभिश्च दीपस्रक्चन्दनादिभिः। सुगीतमङ्गलध्वानैस्तदधःशायिनी भुवि ॥ ६ ॥
प्राणायामं प्रकुर्वीत तस्यास्तु पयसा भुवि। तस्यास्तु पंचगव्यानि यथान्यायं यथाश्रुति ॥ ७ ॥
एवं व्रतपरा नारी मासिमासि तु संयुता। तस्या धेनोः सवत्साया दृष्टं समभिकांक्षिणी ॥ ८ ॥
व्रतान्ते द्विजमाकार्य समस्तगुणशालिनम्। अभ्यर्च्य पूजयेद्वस्त्रया वस्त्रस्रग्दामभूषणैः ॥ ९ ॥
सम्यगभ्यर्च्य तां धेनुं तनयं तत्स्तनंधयम्। कृत्वा च विधिवत्तस्यै तां ददादितिभाषिणी ॥१०॥
सुवर्णशुद्धमाग्नेयं मापषोडशसंयुतम्। दापयेद्गां सवत्सां च पूर्वपापापनुत्तये ॥ ११ ॥
यन्मया कुलटेच्छातो नानागर्भा विहिंसिताः। नानाभेदैः पातिता मे गर्भा वै बहवो भुवि ॥१२॥
तस्य कर्मार्जितं पापं गर्भपातादिदूषणम्। एनसस्तस्य नाशाय सवत्सादानतोऽत्र च ॥ १३ ॥
इह जन्मनि वन्ध्यत्वं नाशयेदस्य तस्य तु। दानेनानेन सुरभेरनघा सातिसुव्रत ॥ १४ ॥
भवेयं त्वत्प्रसादेन गर्भं मे सुभगान्विते। एवमस्त्विति तां धेनुं समादाय सदक्षिणाम् ॥ १५ ॥
हिरण्यं रजतं ताम्रं वस्त्रं मुक्ताफलानि च। दापयेद् द्विजमुख्याय भूरिद्रव्यैश्च तोषयेत् ॥ १६ ॥
भोजयेच्च शतं विप्रान्नानान्नैः सक्तुपायसैः। एवं कृतविधेः सूत नारी वा दुःखनाशनी ॥ १७ ॥
वंध्यत्वं मुच्यते सूत: पुत्रप्राप्तिर्यशस्विनी ॥ १८ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टत्रिंशदधिकसप्तशतमः ॥ ७३८ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि यः कश्चित्तुरगं घातयेन्नरः । वक्रकण्ठेन रोगेण पीडितोऽत्र प्रजायते ॥ १
स्वर्णाश्वदानाद्विधिवत्सर्वोपस्करसंयुतात् । वक्रकण्ठसमुद्भूतां पीडां नाप्नोति मानवः ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनचत्वारिंशदधिकसप्तशततमः ॥ ७३९ ॥

श्रीसूर्य उवाच ।

शृगालघाती पुरुषः प्राग्जनुष्यत्र जन्मनि । पादहीनो भवेत्सूत भृशं चाकृतनिष्कृतिः ॥ १
दद्यादश्वं सुवर्णाढ्यं सर्वोपस्करसंयुतम् । ब्राह्मणाय प्रयत्नेन पूर्वपापापनुत्तये ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चत्वारिंशदधिकसप्तशतमः ॥ ७४० ॥

श्रीसूर्य उवाच ।

संकरः प्राग्भवे सूत बभूव धनसंयुतः । तीर्थवासी विरक्तश्च लोभी धर्मक्रियान्वितः ॥ १
क्रूरकर्म कृतं तेन दुष्टसंगेन चांडज । चौर्येण गां परां नीत्वा क्षुधितैर्भक्षिता पुरा ॥ २
ज्ञातास्ते तेन पापेन नानायोनिमुपागताः । सतीर्थमृत्युवशतो गङ्गातीरेऽत्र पादजः ॥ ३
तीर्थमृत्युप्रसादाच्च धनपुत्रसमन्वितः । युवभावेंऽडजश्रेष्ठ चक्षुर्हीनोऽत्र जायते ॥ ४
प्रायश्चित्तं प्रवक्ष्यामि सुवर्णदशसम्मितम् । लिखिता गौर्विधानेन पूजयित्वा विधानतः ॥ ५
सा देया वेदविदुषे पूर्वपापविशुद्धये । गायत्रीं च जपेत्तत्र नियतं चायुतद्वयम् ॥ ६
होमयेच्च यथाभक्त्या भोजयेच्च ततो द्विजान् । यः कुर्याद्विधिना चेदं स तद्दोषात्प्रमुच्यते ॥ ७
स दिव्यचक्षुषा युक्तो जायतेऽत्रैव जन्मनि ॥ ८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकचत्वारिंशदधिकसप्तशततमः ॥ ७४१ ॥

श्रीसूर्य उवाच ।

या काचिद्घातयेन्नारी शृगालं पूर्वजन्मनि । सा तत्र पुरुषं याति घातार्थमुपदेशयेत् ॥ १
अत्र जन्मनि वै चोर्ध्वात्स्थानाच्च बहुवैकृतात् । पादभंगो भवेत्तस्मात्पापाच्चैव खगाधिप ॥ २
करोति तस्य पापस्य विन्मयं विधिनात्र चेत् । तस्मात्पापात्प्रमुच्येत तच्चोर्ध्वात्पतनं तथा ॥ ३
अश्वं निष्कसुवर्णाढ्यं विन्मयं पापशोधनम् ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विचत्वारिंशदधिकसप्तशततमः ॥ ७४२ ॥

श्रीसूर्य उवाच ।

या नारी घातयेदश्वं प्राग्भवे सात्र जन्मनि । महापर्वसु गंगादिपुण्यतीर्थेषु दापयेत् ॥ १
सर्वोपस्करसंयुक्तं स्वर्णाढ्यं विधिसंयुतम् । सा मुच्यते वक्रकंठपीडनाद्विनतासुत ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिचत्वारिंशदधिकसप्तशततमः ॥ ७४३ ॥

श्रीसूर्य उवाच ।

आसीत्क्षत्री महाभाग पांचाले देशके शुभे । नानाधर्मसमायुक्तो ग्रामपो विश्रुतो महान् ॥ १
दुष्कर्माचरितं तेन भाविनोऽर्थस्य वै बलात् । शूद्रायां च धृतो गर्भः कामलोभेन निश्चयात् ॥ २
कृतं यत्नं महत्तत्र नासीद्गर्भस्य पातनम् । तया हालाहलं पीतं लोकशंका तु सा मृता ॥ ३
गर्भपीडा महत्युग्रा बालकोऽपि मृतस्ततः । महाप्रपंचसंयुक्तः कृतं प्राग्दारुणं महत् ॥ ४

कर्मणां संग्रहे चेदं गर्भनाशसमुद्भवम् । ततो मरणसंप्राप्तो बाहुजोऽथ सहायधृक् ॥ ५ ॥
सूर्यलोकं ततो गत्वा भुक्त्वा भोगांश्च शाश्वतान् । अशुभान्नरकान्भुक्त्वा स्वकृताद्दृढकर्मजात् ॥६॥
सोपपद्यवे महादानात्पूर्वजन्मनि मानद । स जातो यमुनातीरे बाहुजोऽप्यत्र जन्मनि ॥ ७ ॥
गौरः कृशांगो लंबश्च धनसौख्यसमन्वितः । पितृभ्रातृविहीनश्च लोभमोहरतः सदा ॥ ८ ॥
नैकस्त्रीसंयुतः कामी नानाविभवसंयुतः । आधंतसुखयुक्तश्च मतो दुःखसमन्वितः ॥ ९ ॥
शूद्रायां वीर्यदानात्प्राक् तद्भयाच्चात्र पुत्रक । ऐहिकं लक्षणं तस्य शरीरेऽप्युपजायते ॥ १० ॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन्सर्वपापप्रणाशनीम् । पुत्रवृद्धिकरीं धन्यां लोकानां हितकाम्यया॥११॥

श्रीसूर्य उवाच ।

वक्ष्यामि निष्कृतिं तस्य शृणु सूत प्रयत्नतः । पूर्वपापविशुद्ध्यर्थं गर्भधारणकारिणी ॥ १२ ॥
शूद्रायाः प्रतिमा कार्या पलैः पंचमितैः शुभा । हिरण्मयी सगर्भा च पत्रे लेख्यासमन्विता॥१३॥
तदर्धार्धेन वा कार्या त्रिषु वित्तानुमानतः । गंधपुष्पैरलंकृत्य सा देया पापनाशनी ॥ १४ ॥
सापपंचमितो विष्णुः सर्वपापप्रणाशनः । प्रजापतिं तथा दद्यात्सौवर्णं पंचमाषकम् ॥ १५ ॥
राजतं च तथा दद्यात्सोमं सार्धपलात्मकम् । गायत्रीं दशसाहस्रं जपेच्च विधिपूर्वकम् ॥ १६ ॥
होमयेत्तंडुलैः साज्यैः सर्षपैः सलिलैस्तथा । ब्राह्मणान्भोजयेत्पश्चात्सर्वपापात्प्रमुच्यते ॥ १७ ॥
एवं कृतविधेः सूत सर्वपापविनाशनम् । तस्य पुत्रविवृद्धिः स्यादिह जन्मनि चाण्डज ॥ १८ ॥
अकृते तु यथाशक्त्या प्रायश्चित्तं यथोदितम् । रिष्टं षष्टिमिते वर्षे दारुणं शत्रुवैकृतम् ॥ १९ ॥
प्रायश्चित्ते कृते सूत जीवनं वर्षसप्ततिम् । जन्मादिमरणान्तं च स्वल्पमेवात्र सूचितम् ॥ २० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुश्चत्वारिंशदधिकसप्तशततमः ॥ ७४४ ॥

श्रीसूर्य उवाच ।

शूद्रोऽभवन्महाभाग प्रागूजन्मन्यतिकोविदः । ग्रामवासी सदा सौम्यः शतद्रुनिकटेऽण्डज ॥ १ ॥
शूद्रकन्या च तेनैव हृद्या षोडशवार्षिकी । भुक्ता सा कामलोभेन बलात्कारेण दूषिता ॥ २ ॥
स चाथ मम पुत्रस्य भुक्त्वा भैरवशासनम् । पूजनाच्छिवलिङ्गानां प्रागत्रापि च संकरः ॥ ३ ॥
षंढस्तेन विपाकेन प्राप्तसर्वमनोरथः । राज्यप्रचारको धीमान् गजाश्वपरिपालकः ॥ ४ ॥
महाधनो महोत्साहो नानाविभवविस्तरः । भृत्युश्चास्यात्र गंगायां पुण्याच्च शिवपूजनात् ॥ ५ ॥
भविष्यति महाभाग पापान्ते चास्य सद्गतिः ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके अध्यायः पञ्चचत्वारिंशदधिकसप्तशततमः ॥ ७४५ ॥

श्रीसूर्य उवाच ।

पादरोगयुतः सूत जायते सोऽत्र जन्मनि । यो मार्गहा पुरा लोके परलुंठनतत्परः ॥ १ ॥
सोश्वदानाद्विधानेन ब्राह्मणाय पतत्रिण । न पश्यति महापीडां पापजां पादसंभवाम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्चत्वारिंशदधिकसप्तशततमः ॥ ७४६ ॥

श्रीसूर्य उवाच ।

अभवत्प्राग्भवे विप्रो ग्रामवासी वनाश्रितः । चौराधिपो महोग्रश्च तत्संसर्गात्खगाधिप ॥ १ ॥

---

१ प्रयत्नत इति–क० पु० ।

दत्तानि तेन ग्रहणे दानानि विनतात्मज । गोभूम्यश्वादिकान्येव ब्राह्मणेभ्योऽतिभक्तितः ॥ २ ।
स भुक्त्वा नरकान्घोरान् पापात्पुण्याच्च शाश्वतान् । स्वर्गान्पर्वतभागे तु स जातो बाहुजोऽधुना॥ ३
वामनो राजसम्मानी महोग्रो मंत्रपारगः । पुत्रहीनोऽप्यसौ सूत परवित्तस्य लुंठनात् ॥ ४
भवंत्यत्र च ये पुत्रा म्रियंते नाऽत्र संशयः । प्रायश्चित्तं प्रवक्ष्यामि येन पापं प्रशाम्यति ॥ ५
कृत्वा वेदघटान्सूत सौवर्णान्घृतपूरितान् । तदभावे राजतांश्च विप्रेभ्यः प्रतिपादयेत् ॥ ६
हरिवंशं विधानेन शृणुयाद्भक्तितोंऽज । रौद्रं व्रतं चरेत्पश्चात्पूर्वपापविशुद्धये ॥ ७
नैतत्प्रकुर्याद्यः श्रुत्वा स नरः पुत्रवर्जितः । जायतेऽत्रैव पक्षींद्र कुर्याच्चेत्पुत्रवर्धनम् ॥ ८
आयुरष्टौ तथाशीतिर्वर्षाणां कृतनिष्कृतेः ॥ ९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तचत्वारिंशदधिकसप्तशततमः ॥ ७४७ ॥

अरुण उवाच ।

क्षात्रवंशे समुत्पन्नो वातो देहे रुजाकरः । गुल्माद्या ह्युदरे बाधाः शिरोर्तिर्जायते सदा ॥ १
व्यापारो निष्फलस्तस्य किंचित्सेवादिना भवेत् । तस्य भार्याद्वयं चास्ति किंचिद्भक्तिपरायणम्॥ २
अन्योन्यद्वेषिभावाच्च किंचित्प्रीतिकरा परा । मृतवत्सा कथं जाता सत्यं कथय भास्कर ॥ ३
एको गर्भः स्थिरीभूतो न प्रसूतिर्न पातनम् । केन पापप्रभावेण कथयस्व दिवाकर ॥ ४ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि शूद्रस्तु क्रयविक्रयकारकः । दानधर्मपरो नित्यं देवदेवपरायणः ॥ ५ ॥
अन्योन्यं द्वेषिभावाच्च वर्तते विविधस्ततः । कश्चिद्विप्रो धर्मपरो वेदवेदार्थपारगः ॥ ६ ॥
कदाचिद्दैवयोगाच्च भाविनोऽर्थस्य वै बलात् । तद्वित्तं ग्राहयायास शूद्रो म्लेच्छजनस्य च ॥ ७ ॥
लंघनाय मतिं चक्रे ब्राह्मणो भार्यया सह । भर्त्सनैस्तर्जनाद्यैस्तु तद्धनं च तदा दिनैः ॥ ८
कतिपयैरेव शूद्रेण चान्येभ्यो विनतासुत । म्लेच्छाद्धनं स वै दृष्ट्वा ब्राह्मणः क्रोधसंकुलः ॥ ९
तदर्थमपि प्राप्तश्च सात्मघातं चकार ह । गर्भयुक्ता च भार्या वै भर्तारं पृष्ठतोऽन्वगात् ॥ १०
हृतं तस्यापि तत्सर्वं म्लेच्छराजेन तत्तदा । तावत्कालेन ते केचिच्छूद्रा म्लेच्छेन घातिताः ११
ततो वै निरये वत्स वर्षायुतसहस्रशः । पच्यते नरके घोरे शूद्रो देहेन वै तदा ॥ १२
पश्चान्मानुषतां प्राप्तो दानधर्मप्रभावतः । ब्रह्मस्वहरणेनैव अपत्यं नैव जायते ॥ १३

अरुण उवाच ।

प्रायश्चित्तं वद स्वामिन्येन पापक्षयो भवेत् । निष्कृतिं सकलां ब्रूहि नारीणां हितकाम्यया ॥ १४

श्रीसूर्य उवाच ।

तीर्थं संवत्सरं सेव्यं ह्येकचित्तेन दंपती । श्रवणं हरिवंशस्य विप्रस्योद्वाहनं ततः ॥ १५
तावन्निकृतयो भूयः क्रमेणानेन वै तदा । सुशुभे भूप्रदेशे तु गोमयाद्युपचर्चिते ॥ १६
कुर्यादष्टदलं पद्मं चित्रवर्णं सुशोभनम् । तन्मध्ये रुक्मिणीयुक्तं माधवं कलशेर्चयेत् ॥ १७
सौवर्णे राजते पद्मे सायुधं तु चतुर्भुजम् । उपचारैः शुभैर्गन्धैर्धूपैश्च कुसुमादिभिः ॥ १८
जननीसहितान्भूयः प्रद्युम्नाद्यांस्तथार्चयेत् । चारुदेहं चारुबाहुं चारुगुप्तं यशस्विनम् ॥ १९
श्रीवत्सांकं पीतवासं सुबाहुं पूजयेत्क्रमात् । पूजनं विष्णुसूक्तेन तथा श्रीरसकोविदैः॥ २०
पुष्पैः सुगन्धधूपाद्यैरर्चयेद्विष्णुमर्हणैः । तद्विप्रासोऽथ तद्विष्णोर्ददे एताश्च पूजयेत् ॥ २१
दद्वाग्निश्चाचरेद्विप्रस्तथा द्वेषादिभावतः । शतमष्टोत्तरं हुत्वा चरुणा पायसेन च ॥ २२

होमान्ते विप्रभोजान्ते मंत्रमेतमुदीरयेत् । यन्मया पापभावेन कर्मान्धेन दुरात्मना ॥ २३ ॥
म्लेच्छराज्ये च व्यापारे बहु वै दुष्कृतं कृतम् । ब्राह्मणानां बहु द्रव्यं नीत्वा भक्षणतर्जनैः॥२४॥
द्रव्यापहरणात्प्राप्तं दुःखं नानाभवान्तरे । स्थिरगर्भो मृतापत्यं प्राप्तं च कर्म दुःसहम् ॥ २५ ॥
तत्तदेनोविनाशाय दानं संप्रदे त्विदम् । ऐहिकं लक्षणं तस्य शरीरे चोपजायते ॥ २६ ॥
हृद्दुःखं दीर्घनिश्वासो लोचने साश्रुकर्षिते । काष्ठलोष्टादिशस्त्राद्यैर्घातः स्यादुपलेखनम् ॥ २७ ॥
जलाकुलत्वं स्पर्शेग्निस्तादृशा व्रणसंभवाः । स्त्रियोंगे विकृतव्याधिर्मुखे व्रणतिलादिकम् ॥२८॥
पैतृजा मातुलानीनां विधवार्तिः स्वस्रादिषु । स्वकुले प्रेतजा पीडा दुःखं वै पश्वपत्यजम् ॥ २९ ॥
कर्मानुसारतो व्याधिश्चिह्नं तस्य सहायवत् । स्वकुले केऽपि वर्तन्ते पतिताश्चारचारिणः ॥ ३० ॥
. एवं तु लक्षणैर्व्याप्तं प्रायश्चित्तं ततो वदेत् ॥ ३१ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽष्यायोऽष्टचत्वारिंशदधिकसप्तशततमः ॥ ७४८ ॥

श्रीसूर्य उवाच ।

पूर्वे ह्याभीरजा काचिदभूद्धर्तृपरायणा । महद्भिर्गोधनैर्युक्ता गवां पालनतत्परा ॥ १ ॥
गावस्तृषार्ताः सततं त्रपायां प्रेरितास्तया । दिनाद्यकाले संप्राप्ते बहिर्ग्रामाज्जलाशये ॥ २ ॥
अथान्यगावः सततं तस्मिन्नपि जलाशये । शनैः पानं प्रकुर्वन्त्यो जलं शीतलमुत्तमम् ॥ ३ ॥
ताडितास्ता भृशं गावो लकुटेन दृढेन तु । तत्रैका तृषिता युक्ता ताडितापि भृशं तया ॥ ४ ॥
न च त्यक्तं जलं सूत गर्भभारान्विता यतः । तस्मिन्काले तदा सूत पतितं गर्भसंस्थितम्॥ ५ ॥
वत्सस्तत्ताडनाद्दुःखान्मृतश्चापि च तत्क्षणात् । विचेष्टितमिदं यस्याः सैव वेद्याङ्गनाधुना ॥ ६ ॥
नानाविधैर्भूतिसंयुक्ता नानापशुभिरन्विता । सुखभोगधनैर्धान्यैर्वाञ्छितार्थान्विता सुत ॥ ७ ॥
प्राग्गोसेवनजात्पुण्यात्सर्वपुण्यफलं त्विदम् । अथात्र गर्भपूर्णान्ते युवभावे खगाधिप ॥ ८ ॥
तं शोचयति सा गर्भं तद्दुःखेनाकुला भृशम् । एवं वर्षत्रयं यावन्मोचयिष्यति वै सुत ॥ ९ ॥
रिष्टं चाब्दत्रये सूत वालवत्सवधादिह ॥ १० ॥

अरुण उवाच ।

प्रायश्चित्तं वद स्वामिन् येन पापक्षयो भवेत् । उपकाराय लोकानां यतस्त्वं सर्वदर्शकः ॥ ११ ॥

श्रीसूर्य उवाच ।

दद्याद्गां कपिलामेकां स्वर्णशृङ्गादिकान्विताम् । विप्राय वेदविदुषे तद्दोषशमनाय च ॥ १२ ॥
सुवर्णार्द्धमितां तद्वल्लेख्यां गां गर्भसंयुताम् । दद्याद्वेदविधिज्ञाय पूर्वपापापशुत्तये ॥ १३ ॥
भोजयेत्तु यथाशक्त्या विप्रान्वै होमयेत्तिलान् । मुच्यते गर्भजाद्दोषान्नात्र कार्या विचारणा ॥१४॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनपंचाशदधिकसप्तशततमः ॥ ७४९ ॥

श्रीसूर्य उवाच ।

बभूव पार्थिवः कश्चिद् गुर्जरे विनतासुत । धर्मकर्मसमायुक्तो देवताऽतिथिपूजकः ॥ १ ॥
पितृभक्तिरतो नित्यं दानानि विधिपूर्वकम् । दत्तानि च विशिष्टेभ्यो ब्राह्मणेभ्योऽतिशक्तितः॥२॥
देवाच्छत्रुगृहं गत्वा कृतं कर्म तु वै तदा । वैरिपुत्रः पुरा सूत पादभागे च घातितः ॥ ३ ॥
कुन्तेनापि च तीक्ष्णेन दिवा वै शौर्यकर्मणा । स मृतस्तेन दुःखेन तन्माताऽभूदपुत्रिणी ॥ ४ ॥
पुत्रदुःखान्मृता साऽपि दत्त्वा शापं हि दारुणम् । यथा पुत्रविहीनाऽहं गच्छामि च यथा लयम् ॥५॥

तथैव पुत्रशोकार्तो जन्मजन्मनि यास्यति । ततो बहुतिथे काले गतोऽसौ यमशासनम् ॥ ६
धर्मात्स्वर्गफलं भुक्त्वा पापाच्च नरकं तथा । पूर्वपुण्यप्रभावेण स जातो मुखजोऽधुना ॥ ७
विपाशानिकटे देशे वृषलग्ने निशाकरे । श्यामाभो धूसरः क्षीणः प्रभुर्देशाटने रतः ॥ ८
बहुस्त्रीधनसंयुक्तो मित्रप्रियवदान्वितः । मानभोगसुखैश्वर्यो मितदो लोभसंयुतः ॥ ९
धर्मात्सर्वं फलं सूत भृशं पापफलं शृणु । क्रूरचेष्टो महालोभी सदा मात्सर्यसंयुतः ॥ १०
जातपुत्रविहीनोऽसाविहजन्मनि जायते । प्रायश्चित्तं प्रवक्ष्यामि सर्वपापविनाशनम् ॥ ११
लोकानामुपकाराय शृणु सूत प्रयत्नतः । पलैर्दशमितैः कुर्याद्राजतं वाहुजं सुत ॥ १२
तन्मातरं च सौवर्णीं पलैकेन मितां शुभाम् । पत्रे लेख्यां यथाकारां यथोपस्करसंयुताम् ॥ १३
पूजयित्वा तु गन्धाद्यैः षोडशोरूपचारकैः । सूर्यभक्ताय शान्ताय तां दद्याद्धि कुटुम्बिने ॥ १४
पलपंचमितं रौक्मं कुर्याद्धरिहरात्मकम् । तथैव गणनाथं च लेख्यं पंचोपचारकैः ॥ १५
संपूज्य विधिना दद्यात्सर्वपापविशुद्धये । अष्टाक्षरं तथा मंत्रं वैदिकं सूर्यदैवतम् ॥ १६
जपेदष्टसहस्रं तु यथा प्रणवपूर्वकम् । गायत्रीपंचसाहस्रं दुष्टपापविमोचनम् ॥ १७
कुर्याद्धोमं दशांशेन पश्चाद्ब्राह्मणभोजनम् । एवं कुर्याद्विधानेन प्रायश्चित्तं यथाविधि ॥ १८
न प्राप्नोति तदा रिष्टं पञ्चिशाब्दे प्रकीर्तितम् । पंचवेदमिताब्दान्तमायुस्तस्य प्रकीर्तितम् ॥ १९

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाशदधिकसप्तशततमः ॥ ७५० ॥

श्रीसूर्य उवाच ।

अज्ञानादवधीद्यश्च पूर्वजन्मन्यजासुतम् । भविष्यत्यद्य पुरुषो ह्यधिकांगः कदाचन ॥ १
कस्तूरिकापलं दद्यात्स तत्पापविनाशनम् । अजमेकं च वस्त्राढ्यं मुच्यते महदेनसः ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकपंचाशदधिकसप्तशततमः ॥ ७५१ ॥

श्रीसूर्य उवाच ।

लोहहारी च पुरुष इह जन्मनि जायते । वर्बरांगारुयरोगेण पीड्यते चात्र जन्मनि ॥ १
दद्यात्पलशतं लोहं विधिना पापशोधनम् । प्राजापत्यं चरेदेकं ततो वाताशनं परम् ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विपंचाशदधिकसप्तशततमः ॥ ७५२ ॥

श्रीसूर्य उवाच ।

सर्वैर्मनोरथैर्युक्ता काचिदासीच्छुभानना । प्राग्भवेऽज तत्सर्वं चेष्टितं शृणु साम्प्रतम् ॥ १
नकुलानां विले तप्तां कृत्वा वै वालुकांऽडज । पूरिता च तया पूर्वं तद्धातार्थं पतत्रिण ॥ २
मृतः स तेन दाहेन नकुलः सकुलः खग । सापि मृत्युवशं प्राप्य भुक्त्वाऽतियमशासनम् ॥ ३
पूर्वं शतद्रजे देशे ह्यभूदत्र च पर्वते । पूर्वे राजकुले जाताऽत्रापि राजकुलेषु च ॥ ४
प्राग्दानव्रतजात्पुण्यादथो पापफलं शृणु । सर्वे तद्वंशजाः सूत तदग्रे मरणं गताः ॥ ५
जीवनं चात्र तस्याश्च वर्षाण्यष्टोत्तरं शतम् । न मुच्यते महापापाद्दृढाज्जन्मत्रयेऽपि वा ॥ ६
कुरुक्षेत्रादिवासाच्च पापं नश्यति सांप्रतम् ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिपंचाशदधिकसप्तशततमः ॥ ७५३ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे सूत पतयेदजनंदनम् । सगर्भा गर्भपुष्ट्यर्थं जायते गोधिका तु सा ॥ १ ॥
भोगादेव क्षयः प्रोक्तः समारब्धस्य कर्मणः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःपंचाशदधिकसप्तशततमः ॥ ७९४ ॥

श्रीसूर्य उवाच ।

लोहं हरति यान्यस्य नारी बुद्धिविवर्जिता । अत्र जन्मनि सा नारी वर्वराङ्गाधिका भवेत् ॥ १ ॥
दद्यात्पलशतं लोहं ससुवर्णं द्विजातये । मुच्यते पापजाद्दोषाद्धर्वरांगाधिकात्सुत ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचपंचाशदधिकसप्तशततमः ॥ ७९५ ॥

श्रीसूर्य उवाच ।

मोहात्प्राग्याऽब्रवीत्सूत नार्यजं विधिवर्जितम् । सांगाधिकाऽत्र जनुषि भविष्यति वरानना ॥ १ ॥
अजं दद्याद्विधानेन कस्तूरीपलसंयुतम् । सवस्त्रं वेदविदुषे तद्दोषशमनं त्विह ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्पंचाशदधिकसप्तशततमः ॥ ७९६ ॥

अरुण उवाच ।

क्षात्रे कुले समुत्पन्नो गुल्मवातोदरामयः । वित्तपः कृपणश्चैव सहोदरसमन्वितः ॥ १ ॥
धनधान्यसमोपेतः किंचिद्व्यापारवान्भुवि । दायादाच्छत्रुवत्पीडां मिथः क्लेशश्च जायते ॥ २ ॥
कदाचिज्जातमात्रश्च मृतः पुत्रोऽग्निमासकः । एका पुष्पवती भार्या संजाता तस्य भास्कर ॥
केन कर्मविपाकेन सत्यं कथय तत्खलु ॥ ३ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि क्षात्रस्तु किंचिद्भूमिपतिस्तथा ॥ ४ ॥
अर्थलुब्धोऽभवत्सूत ग्रामाधीशः प्रतापवान् । ग्राममध्ये स्थितिं चक्रे ब्राह्मणो ज्ञानसत्तमः ॥ ५ ॥
पुत्र्यः पंचाऽभवत्तस्य ह्यपुत्रो वित्तसंयुतः । कालेन मृत्युमापन्ना धनलुब्धैर्निराश्रयः ॥ ६ ॥
तस्य भार्या महासाध्वी साहसं कृतवान् खग । क्रियाकर्म विना तस्य तेन तत्तद्धृतं खग ॥ ७ ॥
क्षत्रिणा चिंतयित्वा तु ह्यपुत्रस्य द्विजन्मनः । निराधाराः सुतास्तस्य पितृमातृसुखोज्झिताः ॥८॥
सर्वस्वहरणाच्चापि गताः कन्या इतस्ततः । काचिन्मातुर्गता पक्षे काचित्पैत्र्यमनागमा ॥ ९ ॥
उद्वासस्तद्गृहस्याशु संजातस्तत्र कर्मणा । यो वै क्षात्रगृहे पुत्रः स वै ब्राह्मण उच्यते ॥ १० ॥
योऽसौ तस्य मृतः पुत्रो धनलुब्धेन चागतः । एवं पुत्रऋणं नेतुं तत्काले वै प्रजायते ॥ ११ ॥
एवं ब्रह्मस्वकात्प्राप्तात्पुत्रपौत्रमृतिस्तथा । पुराकृतानि कर्माणि भुज्यंते चेह मानवैः ॥ १२ ॥
तेन कर्मविपाकेन कन्यापत्यं मृतः सुतः । तस्य पापस्य नाशाय निष्कृतिः क्रियते शुभा ॥१३॥

अरुण उवाच ।

का तस्य निष्कृतिः स्वामिन् येन पापक्षयो भवत् । संततिं लभते सौख्यं लोकानां हितकाम्यया १४

श्रीसूर्य उवाच ।

शुभे तु वत्सरे प्राप्ते ह्ययने शुभवासरे । प्रारभेद्धरिभक्तश्च संवत्सरविधिं सुत ॥ १५ ॥
प्रत्यहं परमेशानं विष्णुमव्यक्तमव्ययम् । पौरुषेणेह सूक्तेन चार्चयेन्मासमेव च ॥ १६ ॥

कुंकुमागुरुकर्पूरैश्चंदनैस्तुलसीदलैः । अर्चयेद्विविधैः पुष्पैरुणचारैः पृथक्पृथक् ॥ १७
भौमाप्यनभसस्तेजोवायव्यैः पंचभिस्तथा । एवं व्रतपरा नारी भर्तृभक्तिपरायणा ॥ १८
अर्चयंती हरिं पूर्णं वर्षावधि समाचरेत् । शुभे मासे शुभे पक्षे चैकादश्यामुपोषितः ॥ १९
शुभनक्षत्रयुक्तायां द्वादश्यां पुत्रकाम्यया । पूर्ववद्धरिमभ्यर्च्य ऋग्भिः षोडशभिस्तथा ॥ २०
विधिवद्वह्निमास्थाय अर्चयेद्वैष्णवं चरुम् । आज्यभागावसानेन कपिलाज्याहुतिस्ततः ॥ २१
पौरुषेण तु सूक्तेन यावत्षोडशसंख्यया । अश्वत्थसमिधस्तिस्रो जुहुयात्षोडशैव तु ॥ २२
पुनराज्यं ततो हुत्वा जुहुयाच्चरुमप्यथ । होमान्ते विप्रभोजान्ते दानमेतत्समाचरेत् ॥ २३
हिरण्यभूमिवासांसि धेनुं वत्ससमन्विताम् । विप्रस्योद्वाहनं कृत्वा कन्यां सालंकृतामपि ॥ २४
दक्षिणां प्रतिपाद्यास्मै छलकौटिल्यवर्जिता । प्राश्नीयात्तं ततः शेषं सह पत्या हरिं स्मरेत् ॥ २५
इति कृत्वा विधिं नारी पुत्रं प्राप्नोति वैष्णवम् । सुभगा च सुरूपा च भवेद्विगतकल्मषा ॥ २६
ऐहिकं लक्षणं नित्यं पूर्वकर्मानुसारतः । गुल्मं तथोदरे बाधा गुदांते बहुशोऽर्तयः ॥ २७
वातरक्तैरक्षिलोदो तथा कर्णांतितो व्रणः । स्तनौ सुगौरवौ दद्रुर्मता वै पादवैकृतिः ॥ २८
जनश्रुतिरभूत्तत्र श्रुयते कारणं विना । हानिस्तु सर्ववस्तूनां द्रव्यनाशनजं भयम् ॥ २९

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तपंचाशदधिकसप्तशततमः ॥ ७५७ ॥

श्रीसूर्य उवाच ।

अत्र शूद्रकुले पूर्वमासीत्पुण्या वराङ्गना । तदा दानरता जाता कुरुक्षेत्रे पतत्रिण ॥ १ ॥
सर्वैः सुखैः समोपेता सर्वसंपत्तिसंयुता । तया कृतं महापापं भाविनोऽर्थस्य वै बलात् ॥ २ ॥
समीपे वासितस्तस्या ब्राह्मणस्य नवं गृहम् । निर्दग्धं चाग्निदाहेन वैरिभावे पतत्रिण ॥ ३ ॥
तत्र दग्धा महाभाग गौरपापा गृहं गता । कृत्वैतदद्भुतं कर्म भुक्त्वा तु नरकान्भुत ॥ ४ ॥
दानधर्मकृतात्पुण्यात्साऽत्र जाता हि बाहुजा । माथुरे मण्डले पुण्ये वृषलक्षोपलक्षिते ॥ ५ ॥
सुखदुःखसमाक्रान्ता जातसंततिनाशकृत् । दुःखैरनेकैर्युक्ताऽत्र मध्यभावे खगाधिप ॥ ६ ॥
प्रायश्चित्तं परं चास्या गङ्गायां पितृतर्पणम् । कुरुक्षेत्रादिवसनं प्राक्पापानां विनाशनम् ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टपंचाशदधिकसप्तशततमः ॥ ७५८ ॥

श्रीसूर्य उवाच ।

चक्रपादरुजा युक्ता चात्र जन्मनि जायते । पूर्वजन्मनि मोहात्सा वधेच्छ्वानं पतत्रिण ॥ १ ॥
निष्कत्रयं प्रदातव्यं सुवर्णं वेदपारगे । दानेनानेन विधिना सर्वपापापमुक्तये ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनषष्ट्यधिकसप्तशततमः ॥ ७५९ ॥

श्रीसूर्य उवाच ।

यः शूद्रं घातयेन्मोहात्पूर्वजन्मनि मानवः । दंतपातनजाद्रोगात्पीडामाप्नोति निश्चितम् ॥ १ ॥
दद्याद्धेनुं सवत्सां च सर्वालंकारभूषिताम् । प्राजापत्यं चरेद्देवं विधिना रोगनाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षष्ट्यधिकसप्तशततमः ॥ ७६० ॥

श्रीसूर्य उवाच ।

या नारी मोहतो हन्याच्छ्वानं हि गरुडाग्रज । पूर्वजन्मनि सा चात्र चक्रपादेन पीड्यते ॥ १ ॥

तया तत्पापशुद्ध्यर्थं स्वर्णनिष्कत्रयं सुत । देयं विप्राय विधिना चक्रपाद्प्रणाशनम् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकपष्ट्यधिकसप्तशततमः ॥ ७९१ ॥

श्रीसूर्य उवाच ।

शूद्रघातकरी पूर्वं या काचित्पापमोहिता । दन्तपातनजाद्रोगात् साऽत्र जन्मनि दुःखिता ॥ १॥
विधिवद्धेनुदानाच्च ब्राह्मणाय कुटुम्बिने । प्राजापत्याद्व्रतादेकात्तस्मात्पापात्प्रमुच्यते ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विषष्ट्यधिकसप्तशततमः ॥ ७९२ ॥

श्रीसूर्य उवाच ।

कश्चिदासीत्पुरा सूत चारणो ज्ञानदुर्बलः । शिवभक्तियुतो नित्यं देवतातिथिपूजकः ॥ १ ॥
देशे मालवके पुण्ये स्थले पूर्वभवेऽण्डज । तत्र दानानि दत्तानि ब्राह्मणस्य कुगृहे ॥ २ ॥
एकदा च महाभाग पापमाचरितं त्विदम् । स्वजात्यां वै धृतो गर्भः कामलोभेन निश्चयात् ॥३॥
यत्ने कृतेऽपि तत्रैव नासीद्गर्भस्य पातनम् । मृता सा तेन दुःखेन गर्भपातेन चाण्डज ॥ ४ ॥
गते बहुतिथे काले यातः स यमशासनम् । भुक्त्वा पापफलं दुःखं पुण्याल्लोकाञ्छुभानिह ॥ ५ ॥
पूर्वपुण्यप्रभावेण स जातो पादजोऽधुना । गोदावर्य्याः समीपे तु देशे रम्ये जनाश्रये ॥ ६ ॥
स रक्तकृष्णो मतिमान् दीर्घो मध्यः पृथुः सुधीः । आदिभागे धनी भोगी मध्यमे त्वतिसौख्यभाक् ७
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । अतिचिन्तायुतश्चात्र दाने स्वल्पमतिः शठः ॥ ८ ॥
स्वजात्यां वीर्यदानाच्च जातपुत्रविनाशकः । लक्ष्मैतद्ण्डजश्रेष्ठ जन्माङ्गात्पष्ठभावगः ॥ ९ ॥
भौमः सुतेश्वरः पापग्रहैर्युक्तनिरीक्षितः । लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥ १० ॥
पलद्वयमिता कार्या वाहुजा गर्भसंयुता । सर्वावयवसंयुक्ता सौवर्णी भूषणान्विता ॥ ११ ॥
तदर्धार्धमिता वापि त्रिषु वित्तानुसारतः । संपूज्य ब्रह्मविदुषे दद्याद्दोषापनुत्तये ॥ १२ ॥
माषैः सप्तमितैर्देयो भौमः स्वर्णमयः शुभः । गायत्रीमयुतं जप्त्वा त्र्यम्बकं तु सहस्रशः ॥ १३॥
होमयेत्तद्दशांशेन कपिला गाः प्रदापयेत् । य एवं कुरुते सूत प्रायश्चित्तमघापहम् ॥ १४ ॥
तस्य पुत्रविवृद्धिः स्याज्जन्मन्यत्रैव जायते । नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् ॥१५॥
न जीवंति सुतास्तस्य म्रियन्ते नात्र संशयः । अष्टाद्य आयुरब्दाः प्रायश्चित्ते कृतेऽधुना ॥१६ ॥
प्रायश्चित्तेऽकृते रिष्टं पंचाशन्मितिकेऽब्दके ॥ १७ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिषष्ट्यधिकसप्तशततमः ॥ ७९३ ॥

श्रीसूर्य उवाच ।

यश्च बंधुं महाभाग हन्यान्मोहान्नराधमः । वभ्रुनामकरोगार्त्तः सोऽत्र जन्मनि जायते ॥ १ ॥
निष्कद्वयं हिरण्यस्य कृत्वाऽत्र नकुलं शुभम् । वभ्रुमण्डलनाशार्थं ब्राह्मणाय प्रदापयेत् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःषष्ट्यधिकसप्तशततमः ॥ ७९४ ॥

श्रीसूर्य उवाच ।

काचिच्चारणजा नारी बभूव प्रियवादिनी । व्रतदानरता साध्वी पूर्वजन्मनि चाण्डज ॥ १ ॥
तया ग्रामान्तरे गत्वा निर्दग्धं गहनं वनम् । निर्दग्धा बहवस्तत्र जीवास्तस्याश्रयं गताः ॥ २ ॥

---

१ बभ्रुम् इति—क० पु० ।

ततो वहुतिथे काले प्राप्य संयमिनीपुरीम् । तत्र दानवशात्पूर्वादत्र सा पादजा स्मृता ॥ ३ ॥
जीवघातात्तथा पूर्वात्पापादत्रैव जन्मनि । जातसंततिहीना सा कुष्ठरोगेण पीडिता ॥ ४ ॥
प्रायश्चितं प्रवक्ष्यामि येन सम्पद्यते सुखम् । गृहवित्तषडंशेन देया जीवाः सुवर्णजाः ॥ ५ ॥
घटाग्निना विधानेन नानारूपा गृहोरगाः । शक्त्याथ भोज्या विप्रेन्द्रा तस्मात्पापात्प्रमुच्यते॥६॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चषष्ट्यधिकसप्तशततमः ॥ ७६५ ॥

श्रीसूर्य उवाच ।

कश्चिच्छूद्रोऽभवत्पूर्वं दानधर्मक्रियापरः । द्विजानां पूजने दक्षः सिंधुमंडलजोण्डज ॥ १ ॥
देवद्रव्यविहीनोऽभूत्तत्कृतं कर्म चाधमम् । स्वपत्नी स्थापिता पण्यशालायां हि पतत्रिण ॥ २ ॥
पण्यस्त्रीकर्मतश्चादौ चकार स्वोपजीवनम् । ततो मृत्युवशं प्राप्तो भुक्त्वा तत्पापजं फलम् ॥ ३ ॥
प्राग्दानवशतश्चात्र जन्मन्यस्ति च पर्वते । शूद्राधमोऽथ वै पंढः पूर्वं पापं शृणुष्व तत् ॥ ४ ॥
निष्कृतिस्तस्य पापस्य नोक्ता पापाद्दृढात्सुत ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः षट्षष्ट्यधिकसप्तशततमः ॥ ७६६ ॥

श्रीसूर्य उवाच ।

या नारी नकुलं पूर्वं घातयेद्विनतासुत । सात्र जन्मनि रोगेण वभ्रुमंडलजेन च ॥ १ ॥
पापोद्भवेन सततं पीडा वै भवति ध्रुवम् । तद्रोगनाशने दद्याद् वभ्रुं निष्कद्वयस्य च ॥ २ ॥
ब्राह्मणान्भोजयेत्पश्चात्पूर्वपापापनोदनम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तषष्ट्यधिकसप्तशततमः ॥ ७६७ ॥

अरुण उवाच ।

कश्चित्क्षात्रकुले जातो नानारक्ताऽनिलोद्भवाः । नानासंधिभवा वाधा उदरार्तिः प्रजायते ॥ १ ॥
मोहे वै कुरुते नित्यं नेत्रतोदो विरश्मिता । कटिपृष्ठोरुवंशस्थं वाल्ये स्याद् ग्रहणीगदः ॥ २ ॥
तस्य भार्या सदाचारा विज्ञेया व्रतकारिणी । सौभाग्यसुखसंपन्ना पितृमातृसुखोज्झिता ॥ ३ ॥
केन संपत्तिहीना च कथं कर्मणि लिप्यते ॥ ४ ॥

श्रीसूर्य उवाच ।

पूर्वं वर्णोत्तरे जातस्तस्करो वस्त्रहारकः । निषादैः सह संभूय चौरकर्मणि तत्परः ॥ ५ ॥
वनानामन्तरे प्राप्ते कश्चिद्विप्रः समागतः । गृहीतं तस्य सर्वस्वं यत्किंचिच्चार्जनात्कृतम् ॥ ६ ॥
तेन वै निहतो विप्रस्तस्करेण दुरात्मना । तस्करोऽसौ मृतश्चापि जातश्च वनपन्नगः ॥ ७ ॥
सततं नरके घोरे पतितोऽयुतसंख्यया । पश्चान्मानुषमापन्नः किंचित्पुण्यप्रभावतः ॥ ८ ॥
स्वर्णकारगृहे जातः पूर्वजन्मनि मानद । इदं जन्म चतुर्थं च वन्ध्यत्वं चोपजायते ॥ ९ ॥
व्यभिचारवशाज्जातस्तस्करः पूर्वजन्मनि । तेन कर्मविपाकेन स्त्रीपुंसोर्जायते त्विह ॥ १० ॥
पुत्रहन्ता भवत्यस्य वंध्यत्वं जन्मजन्मनि । शुभे तु वत्सरे प्राप्ते शुभतीर्थादिसङ्गमे ॥ ११ ॥
विधिवद्विहितं पूर्वं सूत चात्र प्रभाषितम् । विप्रस्योद्वाहनं कृत्वा गृहदानं यथाविधि ॥ १२ ॥
धनधान्यादिकं दत्त्वा तोषयेद्विजयाजकान् । विष्टिपाते व्यतीपाते संक्रान्तौ ग्रहणार्जिते ॥ १३ ॥

---

१ संधिषु वा वाधा इति स्यात् । २ सर्पस्थानकरे इति—क० पु० ।

पुण्याहे विधिना तिष्ठेदनपत्याघनाशनम् । सुशुभे भूप्रदेशे तु समे कंवलविस्तृते ॥ १४ ॥
विदधीत तिलद्रोणैस्त्रिभिः पर्वतमुत्तमम् । परितोरत्निमानं तु द्रोणमानं सुतण्डुलैः ॥ १५ ॥
विदध्यात्पर्वतानेवं देवद्रुमविभूषितान् । ततस्तौ दंपती शुद्धौ स्नातावहतवाससौ ॥ १६ ॥
दधानौ शुभरूपाढ्यौ चिंतयानौ प्रजापतिम् । तस्योदितेऽर्चने त्वल्पां कुर्यान्मूर्तिं प्रजापतेः ॥ १७ ॥
शुद्धवर्णसुवर्णस्य निष्कद्वयविनिर्मिताम् । हेमयज्ञोपवीतां च साक्षमालां कमण्डलुम् ॥ १८ ॥
अदितेरपि केयूरहारग्रैवेयभूषिताम् । तदर्धार्धविभागेन स्तनौ तस्याः शुभाकृती ॥ १९ ॥
स वै समर्चयेन्मूर्तिं विष्णोर्वामनरूपिणीम् । तन्मूर्तित्रितयं सम्यक् कृतसंस्कारमर्चयेत् ॥ २० ॥
कृत्वा प्रतिष्ठितप्राणं ज्ञानकर्माथ पुंस्त्रियोः । बाललीलाधरं विष्णोर्वामनं परिचिंतयेत् ॥ २१ ॥
मातरं द्रष्टुमिच्छन्तं हरिं तत्स्तनकांक्षया । ततस्तदाश्रमात्सूत स्वालयात्पर्वतात्खग ॥ २२ ॥
प्रत्यंतगिरिं गच्छंतं मार्गैः स्वपदभूषितैः । अदितिस्तमपश्यंती विरहाकुलचेतसा ॥ २३ ॥
रुदंतमिति तं दृष्ट्वा चाकरोत्तत्परां मतिम् । एवं ध्यात्वाऽथ तां मन्त्रैर्मंत्रार्थादितलक्षणाम् ॥ २४ ॥
पुष्पस्रग्गन्धधूपाद्यैरर्चयेदतिविह्वलाम् । तद्विप्रासोऽथ तद्विष्णोर्विष्णोः कर्माणि पश्यत ॥ २५ ॥
ततस्तां वैष्णवीं मूर्तिं मातुरुत्संगगामिनीम् । कृत्वा तस्याः प्रतिष्ठां तां लब्धपुत्रां विचिंतयेत् ॥
अपःपूयमिमं मन्त्रं मंत्रार्थगुणलक्षणम् । संयोगसहितां देवीमर्चयेद्विविधैर्गुणैः ॥ २७ ॥
ततो ब्राह्मणमध्ये तु समाहूय गुणान्वितम् । तस्मै तां प्रतिमां दद्याद्विज पूर्वाऽघनाशनीम् ॥ २८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टषष्ट्यधिकसप्तशततमः ॥ ७६८ ॥

श्रीसूर्य उवाच ।

ब्रह्महा क्षयरोगी स्यादिति वेदविदो विदुः । अथवा धर्मशास्त्राणि ज्ञात्वा दुःखं ददाति यः ॥ १ ॥
राजयक्ष्मा भवेत्तस्य रोगपीडाऽतिदारुणा । अथवा गर्भघातेन तथा क्षेत्रस्य धारणात् ॥ २ ॥
क्षयेणात्र क्षयं यान्ति धातवः सर्वदेहिनाम् । प्रायश्चित्तं परं तस्य शृणु यत्नेन चांडज ॥ ३ ॥
कारयेत्कदलीं दिव्यां पर्णैं रम्यैः समन्विताम् । फलभारेण संयुक्तां सुवर्णस्य पलेन तु ॥ ४ ॥
यथाविभवतः कुर्याद् ब्रह्मसूत्रेण भूषिताम् । ब्राह्मणान्भोजयेच्चापि भक्ष्यैर्नानाविधैः शुभैः ॥ ५ ॥
होमं च कारयेत्तत्र पूर्ववद्ब्राह्मणेन च । तस्मै तां कदलीं दद्याद्वस्त्रालंकारपूर्विकाम् ॥ ६ ॥
पूजिताय दरिद्राय वृत्तिस्थायात्र वेदिने । धर्मज्ञायातिदक्षाय मंत्रेणानेन तां क्षये ॥ ७ ॥

मंत्रः ।

"हिरण्यगर्भ पुरुष परात्पर जगन्मय । रम्भादानेन देवेश क्षयं क्षपय मे प्रभो" ॥ ८ ॥
पुण्याहवाचनं कार्यं ब्राह्मणैर्वेदपारगैः । शिष्टैरिष्टैर्बंधुभिश्च सह भोजनमाचरेत् ॥ ९ ॥
[पूजामंत्रश्च त्र्यंबकम् । जपहोमौ यथाशक्ति ।]
राजहा राजयक्ष्मी स्यादेषा तस्यास्ति निष्कृतिः । गोभूहिरण्यमिष्टान्नजलवस्त्रप्रदानतः ॥ १० ॥
दातव्यानि समस्तानि वस्तूनि चाप्यकल्मषः ॥ ११ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनसप्तत्यधिकसप्तशततमः ॥ ७६९ ॥

श्रीसूर्य उवाच ।

शूली स्यादन्नहर्ता च जन्मन्यत्र पतत्रिण । हिंसको वा मनुष्याणां शूलरुक्पीडितोऽधुना ॥ १ ॥
पलेनाथ तदर्धेन तदर्धेनाथवा सुत । सौवर्णं राजतं वापि शूलं कर्य्यात्प्रयत्नतः ॥ २ ॥

ताम्रेण वाऽथसा वापि वादरेणाथवा पुनः । रक्तवस्त्रेण संवेष्टच तिलानामुपरि न्यसेत् ॥ ३ ॥
तिलानां परिमाणं तु द्रोणं चापि तदर्धकम् । तदर्धं च यथाशक्त्या पूजयेद्ब्राह्मणं शुचिः ॥ ४ ॥
ततो हुतवते शूलं पूजयित्वाऽथ शक्तितः । दद्यात्सदक्षिणं तत्र प्राङ्मुखाय ह्यदङ्मुखः ॥ ५ ॥

प्रार्थना ।

"त्वं शूल ब्रह्मणा सृष्टं त्रिपुराणां विनाशनम् । दैत्यानां दानवानां च शंकरस्यायुधं तथा ॥ ६ ॥
तथोदरे स्थितं पार्श्वे चाथ पृष्ठेन संगतम् । शूलं विनाशय त्वं मे महादेवेन राधितम्" ॥ ७ ॥
ततः स्नात्वाऽथ भुंजीत ब्राह्मणैः सह बंधुभिः । नमः शिवायेति केचित्प्रणवादि पठंति च॥ ८ ॥
['त्र्यंम्बकं यजामहे' इति ।] अरुचिशूले.
श्रद्धाहीनो हि धनवान्दानेष्वरतिदानतः । शिरोरोगी नेत्ररोगी शूली चारुचिमान् भवेत् ॥९ ॥
[अत्र गोहनने यज्ञसाधनत्वादिगुणविशिष्टगोहननप्रायश्चित्तस्य गुरुत्वात्, विश्वस्तविघ्न दानात् ह्रीहावान् जायते नरः] वाक्शब्दछलिनो जठरशूलः ।
श्रुत्यध्ययनसम्पन्नं याचितारमकिंचनम् । ब्राह्मणं दातुमाहूय दानार्थं न ददाति यः ॥ १० ॥
स भवेज्जठरे शूली तथाध्मानी च कर्हिचित् । पूर्वजन्मनि नास्तिक्यात्संध्यादिरहितो द्विजः॥११॥
हस्तशूली स भवति निष्कद्वादशकं दिशेत् । मैथुनं शृणुयात्पुत्र कर्णशूली भवेत्तु सः ॥ १२ ॥
अथवा बधिरः किंचित् पक्षिन् सं ह्यशब्दवान् । निष्कविंशतिकं दद्याद्ब्राह्मणाय कुटुम्बिने॥१३॥
विष्णुप्राकाशिका मंत्राः क्षयरोगोपशान्तये । अपामार्जनपाठेन मंत्रितं सलिलं पिबेत् ॥ १४ ॥

भोजनं ब्राह्मणेभ्यः ।

नग्नां परस्त्रियं दृष्ट्वा सूर्यं चास्तमयोदितम् । नेत्रशूली भवेत्सोऽपि नेक्षितुं क्षमते दृशा ॥ १५ ॥
वर्चो मे देहि मंत्रेण होमः स्यादथवाऽयुतम् । वयः सुपर्णा इति च नेत्रे सिञ्चेच्च वारिणा ॥१६॥
[परस्त्रियं दृष्ट्वेति कामतः । तथा सूर्यमंत्रः।'वर्चोदा असि वर्चो मे देहि' शान्तिदशाक्षरो मंत्र होमकाले स्वाहान्तः । सर्वेषु शूलेषु भ्रमरान् परीतायेत जायते बहुधा ततः ।]
अक्षीभ्यां त इति जपेन्नेत्रशूलं प्रशाम्यति । मोक्षदानं प्रकुर्वीत तथा मंत्रं जपेद्बुधः ॥ १७ ॥
अनुक्तेषु च रोगेषु रोगाग्निज्वलितेक्षणम् । भुजङ्गभीषणां शक्तिं शूलं पाशांकुशौ दधत् ॥ १८ ॥
चक्रखड्गगदावज्र शराक्षरधनूंषि च । साग्रं न्यस्तं च तर्जन्या तर्जयन्पारिपार्श्वगान् ॥ १९ ॥
दंष्ट्रादष्टाधरपुटं भ्रमत्पाणिमुदीक्षणम् । तत्तदभिमुखं धावन् प्रहर्तुः पार्श्वयोः समम् ॥ २० ॥
विशीर्णकेशरोमाणां प्रतिरूपं प्रकल्पयेत् । शतं तस्यार्धमर्धं वा हेम्नः काश्यप तेन तु ॥ २१ ॥
तदेव प्रतिमानं वै कुर्याच्छांतिष्वपि स्वतः । येये रोगाः सदा सन्ति देहस्थाः सततं तु मे ॥ २२ ॥
गृहाण प्रतिरूपं तु सह रोगैर्द्विजोत्तम । मंत्रेणानेन तं दद्यात्पूर्ववरीत्या कदाचन ॥ २३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्यधिकसप्तशततमः ॥ ७७० ॥

श्रीसूर्य उवाच ।

ये पुनः क्रूरकर्माणः पापाः पिशुनचेतसः । ते भवेयुः सदा शीतज्वरवंतस्तदेनसा ॥ १ ॥
मंगलेषु च कार्येषु सततं कोपवान्नरः । उत्प्रज्वराभिभूतः स्यात्पापस्यास्यापनुत्तये ॥ २ ॥
जातवेदसमंत्रेण ब्राह्मणान्भोजयेत्ततः । सुरामांसोपहाराद्यैर्बलिः सर्वत्र शस्यते ॥ ३ ॥
सहस्रकलशस्नानं शतभोजनमेव च ॥ ४ ॥

[रोगगुरुलघुभावे जपे गुरुलघुभावः । इति सर्वत्र द्रष्टव्यम् । सुरादिभिर्बलिप्रकारभेदेन । उष्णज्वरे महेशस्य प्रकुर्यादभिषेचनं रुद्रेण शतरुद्रेण । अमुकामुकवाक्यैरित्यर्थः । अत्र मृत्युं जयस्याप्युपलक्षणम् ।]

देवस्वहरणाच्चैव जायते विविधज्वरः । ज्वरो महाज्वरश्चैव रौद्रो वैष्णव एव च ॥ ५ ॥
ज्वरे रुद्रजपं कुर्यान्महारुद्रं महाज्वरे । महारुद्रं जपेद्रौद्रे वैष्णवे तद्धयं जपेत् ॥ ६ ॥

[अथवा तच्छब्देन बुद्धिमद्भिर्वैष्णवानि विष्णुहृदयं स्तोत्राणि परामृश्यन्ते ।]

अगारदाही ज्वरवाञ्जायते तत्र निष्कृतिः । नवं कुम्भं समानीय मृन्मयं चाव्रणं दृढम् ॥ ७ ॥
लोहितं काष्ण्यरहितं स्थापयेत्तण्डुलोपरि । पारिमाणं तण्डुलानां द्रोणपंचकमिष्यते ॥ ८ ॥
विशुद्धास्तण्डुला ग्राह्याः श्वेतवस्त्रेण वेष्टयेत् । मधुनाऽभ्यथवाऽऽज्येन खंडेनाथ गुडेन वा ॥ ९ ॥
तैलेनाप्यम्भसा वा तान् पूरयेच्छक्तितो नरः । श्वेतपुष्पैरर्चयेत्तान्गंधपुष्पैस्तथाऽर्चयेत् ॥ १० ॥
तस्मै हुतवते वृत्तः श्रुतशीलाय सत्कृते । मन्त्रेणानेन विधिवत्पूजयित्वा ज्वरी नरः ॥ ११ ॥

प्रार्थना ।

महेश देवदेवेश वासुदेव परात्पर । कुम्भेनानेन दत्तेन ज्वरः क्षिप्रं प्रशाम्यतु ॥ १२ ॥
एकान्तरं सन्निपातं तार्तीयिकचतुर्थकौ । पाक्षिकं मासिकं वाऽपि सांवत्सरिकमेव च ॥ १३ ॥
नाशयेतां च संक्षिप्रं वासुदेवमहेश्वरौ ॥ १४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकसप्तत्यधिकसप्तशततमः ॥ ७७१ ॥

श्रीसूर्य उवाच ।

कृतघ्नो जायते मर्त्यः कफवाञ्छ्वासकासवान् । उष्णज्वरी च नित्यं हि पितृरोगसमन्वितः ॥ १ ॥
चान्द्रायणत्रयं कुर्यात् पंचाशद्विप्रभोजनम् । अग्निदत्तेन सूक्तेन जपं कुर्याद्विजोत्तमः ॥ २ ॥
पूजयेद्भोजयेद्दद्यात्तन्मना नान्यमानसः । जपाकरणे गोदानं तद्विष्णोः परमं पदम् ॥ ३ ॥

[इति तत्र देयानि मधुसर्पिर्हिरण्यवासांसि ।]

मंत्रः ।

"अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् । अस्य यज्ञस्य सुक्रतुम्" ॥

कुरुक्षेत्रादिदेशेषु कालेषु ग्रहणादिषु । महादानानि गृह्णीयाद्विधान्यथवा स्वयम् ॥ ४ ॥
अपात्रभूतो दातृभ्यो निषिद्धेभ्यश्च मानवः । स पामाश्वासकासैश्च कुक्षिकंठाक्षिभिस्तथा ॥ ५ ॥
कण्डूत्या पीडने चैव तद्रोगस्य प्रशान्तये । महिषीं यमदैवत्यां दद्याद्वित्तानुसारतः ॥ ६ ॥

['स्वयमपात्रभूतः' इति कर्मानष्ठानादिरहित इत्यर्थः । निषिद्धेभ्यो दातृभ्यः ।]

मन्त्रः ।

'कालमृत्युस्वरूपां तां महिषीं रक्तभूषणाम् । सालङ्कारां प्रदास्यामि मम शान्तिं प्रयच्छतु" ॥७॥
पिशुनो नरकस्यान्ते जायते श्वासकासवान् । घृतं तेन प्रदातव्यं सहस्रपलसंख्यया ॥ ८ ॥
उडां तडाः जपः कार्यो होमश्चर्वाज्ययोरपि ॥ ९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विसप्तत्यधिकसप्तशततमः ॥ ७७२ ॥

श्रीसूर्य उवाच ।

राजमार्गे नदीतीरे छायया जुषिते नरः । मूत्रं पुरीषं कुरुते पात्रे मंचे जलेऽपि वा ॥ १ ॥
स यथा व्याधिमाप्नोति शिरोऽर्तिं गरुडाग्रज । सोऽपि कृच्छ्रत्रयं कुर्याद्गायत्र्या अयुतं जपम् ॥२॥

तिलहोमसहस्रं च जपेन्मृत्युंजयं तथा । विश्वकर्ता भवेत्क्रूरः सोऽपि भवति मानवः ॥ ३ ॥
तस्य कर्मविपाकेन व्याधिनाशनमुत्तमम् । क्षौमवस्त्रं समानीय बहुमूल्यं च यद्भवेत् ॥ ४ ॥
मुक्ताफलानि वध्नीयाद् वसुप्रान्ते समन्ततः । कुंकुमेनाङ्कितं सम्यक् कर्पूरागुरुधूपितम् ॥ ५ ॥
तंडुलोपरि संस्थाप्य तंडुलैश्च समन्ततः । आचार्यायं न्यस्य तद्वस्त्रं दद्यात्तां च सदक्षिणाम् ॥६ ॥
ऋषीणां प्रवरोऽगस्त्यो लोपामुद्रापतिः प्रभुः । क्षौमवस्त्रप्रदानेन तुष्टो व्याधिं व्यपोहतु ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायस्त्रिसप्तत्यधिकसप्तशततमः ॥ ७७३ ॥

श्रीसूर्य उवाच ।

देवद्विजद्रव्यहारी पांडुरोगी भवेन्नरः । कृच्छ्रातिकृच्छ्रे कुर्याच्च चान्द्रायणमतन्द्रितः ॥ १ ॥
कुर्यात्कूष्माण्डहोमं च स्वर्णचन्द्रे च वाससी । ब्राह्मणेभ्यो यथाशक्ति पांडुरोगस्य शान्तये ॥२॥
[चन्द्रः रजतमित्यर्थः ।]
अग्निष्टोमादिकं कर्म प्रकल्प्य न समापयेत् । स पांडुरोगी भवति शिरोवेदनवांस्तथा ॥ ३ ॥
अन्त्यजागमने मर्त्यः पांडुरोगी प्रजायते ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायश्चतुःसप्तत्यधिकसप्तशततमः ॥ ७७४ ॥

श्रीसूर्य उवाच ।

वृद्धान्यंत्राणि जायन्ते निस्सहंतुस्ततः परम् । ज्वरशीर्षोऽष्टको दाह अत्र स्याऽत्र निवृत्तये ॥ १ ॥
कृच्छ्रातिकृच्छ्रे वै कुर्याच्छतब्राह्मणभोजनम् । उद्यंति च जपः पश्चादयुतत्रयसंख्यया ॥ २ ॥
अन्ते सूक्तेनार्चयित्वा जुहुयाच्छतमष्ट च । अथवा महिषीं दद्यात्प्रतिरूपेण कांचनीम् ॥ ३ ॥
यज्ञविघ्नकरो मर्त्यो जायते चांत्रवृद्धिमान् । कुर्यात्स्वर्णमयीं मूर्तिं शुभां नारायणस्य तु ॥ ४ ॥
व्यावहारिकनिष्काभ्यामेकेनापि तदर्द्धतः । नारायणं चतुर्बाहुं गदापद्मादिधारकम् ॥ ५ ॥
दक्षिणे तु गदां पद्मं नीलजीमूतसन्निभम् । वामे श्रीवत्सकं हस्ते पुष्टिपद्मे करे त्विति ॥ ६ ॥
प्रक्षाल्य पञ्चगव्येन स्थापयेत्कुंकुमोपरि । श्वेतवस्त्रेण संवेष्ट्य गन्धमाल्यैस्समर्चयेत् ॥ ७ ॥
उपचारैः षोडशभिराचार्यो वैष्णवः शुचिः । सर्वशास्त्रार्थतत्त्वज्ञो ब्रह्मविद्यासुनिष्ठितः ॥ ८ ॥
होमं चकारयेत्तत्र ह्याग्नेय्यां दिशि शाश्वतः । समिदाज्यतिलैश्चैव जुहुयान्मूलमंत्रतः ॥ ९ ॥
रोगी तथार्चयेद्देवं नारायणमनामयम् । मूलमंत्रेण विधिवन्नैवेद्यं च सुसंस्कृतम् ॥ १० ॥
नमोऽनन्ताय सोंकारो मूलमंत्रः प्रकीर्तितः । ततस्तां प्रतिमां दद्यात् प्राङ्मुखाय ह्युदङ्मुखः ॥ ११ ॥

प्रार्थना ।

नारायण जगन्नाथ शंखचक्रगदाधर । पूर्वजन्मनि यज्ञादौ विघ्नं यद्वै कृतं मम ॥ १२ ॥
अन्त्रवृद्धिमहारोगं दानेनानेन तोषितः । चक्रहस्तगदापाणे शमयाशु जगत्पते ॥ १३ ॥
विप्राणां भोजनं दद्यात्स्नात्वा भुंजीत बंधुभिः । एवं कृत्वा समाप्नोति नीरोगत्वं नरो भुवि ॥१४॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचसप्तत्यधिकसप्तशततमः ॥ ७७५ ॥

श्रीसूर्य उवाच ।

जात्युत्तमस्त्रीगमनाज्जायते हृदयव्रणी । तत्पातकविशुद्ध्यर्थं प्राजापत्यचतुष्टयम् ॥ १ ॥

अत्र च ।

कामुकासत्कुक्कुटं च खरादींश्च य ईक्षते । स नासिकाव्रणी च स्यादार्द्रनेत्रश्च जायते ॥ २ ॥
[तत्र स्वर्णहरिणीदानं धेनुदानं वा ।]

स्वजातिजायागमने जायते हृदयव्रणी । तत्पातकविशुद्ध्यर्थं प्राजापत्यद्वयं चरेत् ॥ ३ ॥
[स्वजातिजायागमनमित्यस्यार्थः ब्राह्मणस्य ब्राह्मणः, एवं क्षत्रियादेरपि क्षत्रियादिसवर्णपुरुषस्तद्भार्येत्यर्थः ।]
जलाग्निबंधनंप्राप्य निमित्तेन मृते तु यः । भवेदुरसि दुष्टं हि व्रणं तस्यापि निष्कृतिः ॥ ४ ॥
स दद्याद्गोद्वयं तस्य पंचाशद्विप्रभोजनम् । दक्षिणां च यथाशक्तिं मुक्तो भवति रोगतः ॥ ५ ॥
अग्न्यधिकरणाविहितमार्गेण जलाद्रिमरणे ।
पितृष्वस्राभिगमने वामाङ्गेन व्रणी भवेत् । तेन प्रतिः कृतिः कार्य्या सम्यग्दासीप्रदानतः ॥ ६ ॥
[शक्त्यनुसारेणाऽलंकृत्य दद्यादित्यर्थः ।]
अदण्ड्यांस्तर्जयेद्यो वै स च गुल्मव्रणी भवेत् । तत्पातकविशुद्ध्यर्थं प्राजापत्यं समाचरेत् ॥ ७ ॥
मृते भर्तरि या नारी ब्रह्मचर्याभिघातिनी । सा भवेद्व्रणदोषेण संभोक्तुं क्षमते न च ॥ ८ ॥
संभोगानन्तरं तीव्रवेदना पुरुषस्य च । दद्यान्नीलवृषांस्त्रीन्वै मधुसर्पिस्तिलानपि ॥ ९ ॥
[च शब्दात्स्त्रीपुंसयोरुभयोरपीति तीव्रवेदना भवति ।]
लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः । श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते ॥ १० ॥
यो गृहीत्वा द्विजो मोहान्नियुक्तो धर्मनिश्चये । भगन्दरो भवेत्तस्य ह्यधर्मं वदते मुखम् ॥ ११ ॥
आर्य्यभार्य्याभिगमने भगन्दरयुतो भवेत् ॥ १२ ॥
अत्र प्रतिक्रियामाह ।
माणिक्यं पद्मरागं च वज्रं वैदूर्य्यमेव च । गोमेदं च मरकतं पुष्परागं च मौक्तिकम् ॥ १३ ॥
हरितं नव चैतानि स्वर्णपात्रोपरि न्यसेत् । अथवा राजते ताम्रे गवाज्येन प्रपूरयेत् ॥ १४ ॥
स्वलिंगैश्चैव मंत्रैश्च होमः कार्यस्तु पूर्ववत् । ततो ब्राह्मणमाहूय वेदशास्त्रार्थकोविदम् ॥ १५ ॥
आदित्यादिग्रहाः सर्वे नवरत्नप्रदानतः । विनाशयन्तु मे हृष्टाः क्षिप्रमेव भगन्दरम् ॥ १६ ॥
अनेन कर्मणा नूनं यथावद्विहितेन तु । ततो नीरुज्यमाप्नोति ह्यसन्दिग्धं भगन्दरम् ॥ १७ ॥
[हरितं हरितरत्नम् । यस्मिन् सुवर्णादिपात्रे च रत्नानि स्थापितानि तत्पात्रं गव्येन चान्येन पूरयित्वा इति ग्रहणम् ।]
स्वगोत्रस्त्रीप्रसंगेन जायते च भगन्दरी । तेनापि निष्कृतिः कार्या मेषीदानेन यत्नतः ॥ १८ ॥
[तत्र रजतमयो मेषः स्वर्णखुरादिभिः ।]

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः षट्सप्तत्यधिकसप्तशततमः ॥ ७७६ ॥

श्रीसूर्य उवाच ।

अतिमानादतिक्रोधादतिस्नेहभयादपि । यो धर्मनिश्चयज्ञानमन्यथा कुरुते नरः ॥ १ ॥
स पूयशोणितव्रणी कुर्यात्तच्छान्तयेऽथ तु । तप्तकृच्छ्रं प्रकुर्याच्च तिलप्रस्थप्रदो भवेत् ॥ २ ॥
होमश्चरुघृताभ्यां च तिलैरष्टोत्तरं शतम् । सहस्रं वा व्याहृतिभिः कुर्याद्ब्राह्मणभोजनम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तसप्तत्यधिकसप्तशततमः ॥ ७७७ ॥

श्रीसूर्य उवाच ।

परेषां मर्मभेदेन मुष्टिपातेन चैव हि । असत्यवादनाच्चैव प्लीहालीहयुतो भवेत् ॥ १ ॥

नाडीव्रणश्च जायेत तद्रोगस्यापनुत्तये । चान्द्रायणं चातिकृच्छ्रं चातिचांद्रायणं चरेत् ॥ २ ।
कूष्मांडहोमः कर्तव्यः सोमरुद्रजपस्तथा ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टसप्तत्यधिकसप्तशततमः ॥ ७७८ ॥

श्रीसूर्य उवाच ।

गलगंडी गलद्रव्यहर्ता भवति मानवः । दानेन तत्प्रतीकारं वक्ष्यामि शृणु तत्त्वतः ॥ १ ।
अध्यापयति शिष्यांस्तु यः प्रतार्य गुरुस्तथा । शिष्यो गुरुं वचयित्वा योऽधीते तस्य तस्य च॥२ ।
जायते गण्डमालाख्यो रोगस्तदुपशान्तये ।
तथा च ।
अभक्ष्यं भक्षयेद्यो वा गंडमाली भवेन्नरः ॥ ३ ॥
माणिक्यं पद्मरागं च वज्रं मौक्तिकमेव च । वैदूर्यं पुष्परागं च वज्रं मरकतं तथा ॥ ४ ।
एभिर्मालां प्रकुर्वीत सूत्रमध्यत्र राजतम् । अलाभे मौक्तिकां मालां तस्मै दानं प्रकल्पयेत् ॥५॥
ताम्रपात्रे विनिक्षिप्य तिलानामुपरि न्यसेत् । तिलानां परिमाणं हि द्रोणपंचकमिष्यते ॥ ६ ॥
यद्वा तदर्धमेव स्यात्स्वशक्त्या वापि कारयेत् । महाशान्तिं तथा कुर्याद्ब्राह्मणैर्वेदपारगैः ॥ ७ ॥
आचार्यस्तु शुचिर्दक्षः सर्वशास्त्रार्थकोविदः । श्रुतवृत्तश्च संपन्नः सर्वप्राणिहिते रतः ॥ ८ ॥
एवंविधं पूजयित्वा वस्त्रमाल्यानुलेपनैः । होमं च कारयेत्तत्र समिदाज्यचरूत्कटम् ॥ ९ ॥
[असत्त्वेन तथा मंत्रः । सोमं राजानमित्यपि मंत्रः]
मालेयं सर्वदैवत्या ब्रह्मविष्णुशिवादिभिः । इन्द्रादिलोकपालैश्च तथा सर्वामरैरपि ॥ १० ।
इयं मे कंठमाला या धारिता प्रीतिपूर्वकम् । ब्राह्मणाय प्रदानेन गलगंडं व्यपोहति ॥ ११ ॥
गृहशान्तिः कृता यैस्तु तेभ्यो दद्याच्च दक्षिणाम् ॥ १२ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकोनाशीत्यधिकसप्तशततमः ॥ ७७९ ॥

श्रीसूर्य उवाच ।

चाण्डालादिवचः शृण्वन् यो भुंजानस्तथैव च । भुंक्ते च पाटलतनुं मित्रद्रोही च जायते ॥१॥
यवान्विप्राय वै दद्यात्तिलान्वेदविदे तथा । यमसूक्तेन विप्रेन्द्र सर्पिषा मधुसूदनम् ॥ २ ।
सहस्रं जुहुयात्तत्र मम प्रीत्यर्थमेव च । चाण्डालादिवचः शृण्वन्भुक्तिकाले तु कामतः ॥ ३ ।
[अत्र वृद्धगौतमस्तु स्वर्णमजदानं प्रदर्शयति ।]
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽशीत्यधिकसप्तशततमः ॥ ७८० ॥

श्रीसूर्य उवाच ।

खरकाकादिमांसानां भक्षकः स्फोटवान्भवेत्।पार्श्वयोस्तन्निवृत्त्यर्थं कृच्छ्रचान्द्रायणं तथा ॥ १ ।
चांडालकृतवापीषु तडागे कूपकादिषु । स्नात्वा पीत्वा च सर्वाङ्गदाहवान्हस्तपादयोः ॥ २ ।
स्फोटयुक्तश्च स भवेत् कृच्छ्रं सांतपनं चरेत् । गां हिरण्यं च वासश्च दद्याच्छक्त्यनुसारतः ॥३॥
अवमन्य तु भर्तारं जारमालिङ्गते तु या । सार्द्धं क्रीडति या नारी तमेवानुस्मरत्यपि ॥ ४ ।
तस्यास्तु स्तनयोः स्फोटा जायन्ते जननान्तरे । भगे च रक्तं स्रवति तद्रोगस्य प्रशान्तये॥ ५ ।
दद्याद्गां पंचलवणं हरिद्रां धान्यमेव च । उमामहेश्वरं चैव पूजयेच्च धने सति ॥ ६ ।
निष्कद्वादशकं दद्याज्जपेत्तु साग्निसूक्तकम् ॥ ७ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकाशीत्यधिकसप्तशततमः ॥ ७८१ ॥

श्रीसूर्य उवाच ।

अनिर्दशाया गोः पीत्वा पयो वै स्फोटवान्भवेत् । उपवासत्रयं कुर्याद्गोजयेद्विंशतिं द्विजान् ॥ १॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायो द्व्यशीत्यधिकसप्तशततमः ॥ ७८२ ॥

श्रीसूर्य उवाच ।

देवतानां ब्राह्मणानां धनाऽपहरणात्तथा । स्वामीद्रोहाद्भ्रातरोगी भवेदस्यापि निष्कृतिः ॥ १ ॥
कृच्छ्रातिकृच्छ्रे कुर्वीत चान्द्रायणमथाचरेत् ॥ २ ॥

अथ हिरण्यदानं कर्मविपाकेऽत्र ।

गुरोः प्रत्यर्थितां याति वातरोगी भवेन्नरः । नानामंत्रैश्च कुर्वीत जपं होमं च शान्तये ॥ ३ ॥
होमयित्वा परान्नं तु भुङ्क्ते वस्तु विगर्हितम् । सोन्मादवातयुक्तः स्यात्कृच्छ्रं चान्द्रायणं स वै॥४॥
कुर्यात्सारस्वतं मंत्रं जपेद्ब्राह्मणतर्पणम् । अनिच्छतीं मक्षतां य उपभुंक्ते परस्त्रियम् ॥ ५ ॥
बलादाक्रम्य स नरः सर्वसंधिषु वेदनाम् । प्राप्नोति चैव वंधे तु वातयुक्तो भवेन्नरः ॥ ६ ॥
ज्वरी तदपनुत्त्यर्थं महिषीदानमाचरेत् । कृच्छ्रातिकृच्छ्रे कुर्वीत चान्द्रायणमथापरम् ॥ ७ ॥
उद्यन्नद्य जपश्चैव शक्त्या ब्राह्मणभोजनम् । नामत्रयं जपेन्नित्यं रोगशान्त्यर्थमात्मनः ॥ ८ ॥
सहस्रनामकं वापि स्तोत्रं सम्यग्विधानतः । अच्युताऽनन्त गोविन्द एतन्नामत्रयं द्विजः ॥ ९ ॥
अच्युतं त्रितयावृत्त्या जपेद्रोगस्य शांतये । पुरुषसूक्तं जपेद्विद्वांस्ततो रोगात्प्रमुच्यते ॥ १० ॥

अत्र महिषीदानम् ।

सभायां पक्षपाती यः पक्षघाती प्रजायते । स्याच्चतुर्भाषकैर्हैमीं मूर्तिं दद्यात्प्रयत्नतः ॥ ११ ॥
योऽकृत्वा ब्राह्मणो भुंक्ते स्नानहोमजपादिकम् । स हिक्कारोगसंयुक्तस्तत्पापस्यापनुत्तये ॥ १२ ॥
चान्द्रायणत्रयं कुर्यात्त्रीन्कृच्छ्रांश्च समाचरेत् । तामग्निवर्णामिति च जपेत्सूक्तं समाहितः ॥१३॥

[अत्र स्वर्णमृगदानम् ।]

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायस्त्र्यशीत्यधिकसप्तशततमः ॥ ७८३ ॥

श्रीसूर्य उवाच ।

सवर्णागमने वातरक्तवाञ्जायते नरः ॥ १ ॥

[तत्र लक्ष्मीनारायणं स्वर्णरूपम् । यदा वातपित्तहरणार्थमिदं दानम् ।]

लशुनं गृंजनं लालफलं वाऽश्नोति यो द्विजः । स वातपित्तरोगी च भवेच्चान्द्रायणं चरेत् ॥ २ ॥

[औषधीव्यतिरेकेण लशुनादिभक्षणे चान्द्रायणं कामतश्चैद्विगुणम् ।]

तत्तद्रक्तप्रवालानां हारी स्याद्रक्तवातवान् । चान्द्रायणं द्विजः कुर्यात्तद्रोगस्य प्रशान्तये ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरशीत्यधिकसप्तशततमः ॥ ७८४ ॥

श्रीसूर्य उवाच ।

वैद्यशास्त्रं विना यस्तु कृत्वौषधमथान्यथा । प्रयोजयेदन्यथा हि रक्तपित्तयुतो भवेत् ॥ १ ॥
कृच्छचान्द्रायणे कार्यं ब्राह्मणेभ्यश्च भोजनम् । मद्यपो रक्तपित्ती स्यात्स दद्यात्सर्पिषाढकम् ॥२ ॥
मधुयुक्तं घटं दद्यात्सहिरण्यं विशुद्धये ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाशीत्यदधिकसप्तशततमः ॥ ७८५ ॥

श्रीसूर्य उवाच ।

त्रपुहारी च पुरुषो जायते श्लेष्मलः सदा । उपोष्य दिवसं सोऽपि दद्याच्छतपलं त्रपु ॥ १
नित्यानुष्ठानविमुखः कफरोगी भवेन्नरः । पराभवं समाप्नोति इत्याह भगवान्यमः ॥ २
तच्छांतये मासमेकं दधि वै भक्षयेन्नरः । सहस्रनामकं पाठ्यं होमश्चाष्टोत्तरायुतम् ॥ ३

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडशीत्यधिकसप्तशततमः ॥ ७८६ ॥

श्रीसूर्य उवाच ।

धूर्तोऽपस्माररोगी स्यात्स तद्दोषस्य शान्तये । ब्रह्मकूर्चत्रयं कृत्वा धेनुं दद्यात्सदक्षिणाम् ॥ १
[ब्रह्मकूर्चलक्षणं कृच्छ्रप्रकरणे दर्शितम् ।]
गुरौ यो रिपुवद्दृष्ट्या प्रतिकूलः समाचरेत् । सोऽपस्मारी भवेत्तत्र कुर्याच्चांद्रायणं स च ॥ २
[विनायकप्रतिमादानम् ।]

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः सप्ताशीत्यधिकसप्तशततमः ॥ ७८७ ॥

श्रीसूर्य उवाच ।

नागहारी च पुरुषो जायते शीर्षरोगवान् । सीसं शतपलं दद्यादुषोष्य शनिवासरे ॥ १
गुरूपरोधी शिरसि रोगवाञ्जायते नरः । कृच्छ्रातिकृच्छ्रे कुर्वीत चान्द्रायणमथापि वा ॥ २
औषधानि प्रदद्याच्च तिलपात्रं तथैव च ।

अत्र च ।

प्रायोपवेशनादीनां व्रतानां त्यागकारणात् ॥ ३ ॥
शिरोरोगयुतो भूयात्तन्निष्कृतिरथोच्यते । गोहत्यायाः व्रतं कुर्यात्पंचाशद्विप्रभोजनम् ॥ ४

कूष्मांडसंभवः ।

ब्रह्मचारी यदाश्नीयाद्भिन्नपात्रे विशेषतः । पक्वांशेन शिरोरोगी भवतीत्याह नारदः ॥ ५
[अक्षीभ्यां त इति च सूक्तमष्टोत्तरं जपेच्चरुघृताभ्यां यो जुहुयाच्च तथैव हि भिन्नपात्रं भिः कांस्यपात्रभोजनमित्यर्थः ।]
औषधस्यापिहरणात्पूर्ववत्तु प्रजायते । तेन सूर्यः प्रदातव्यो निष्कैकस्य यथाविधि ॥ ६
[अत्र चोपवीतदानं शंसंत्याचार्याः ।]

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाशीत्यधिकसप्तशततमः ॥ ७८८ ॥

श्रीसूर्य उवाच ।

धर्मं क्रमादुपक्रम्य मध्ये त्यजति यो नरः । अविद्यमानं दोषं वा परेषां यः प्रकाशयेत् ॥ १
स भवत्यूतिचक्रस्तु कुर्य्याच्चान्द्रायणं नरः । धूपस्रक्चन्दनादीनि दधीनि च स्वशक्तितः ॥ २
दद्याद्विप्राय पंचाशद्ब्राह्मणान्भोजयेत्तथा ।

अनु च ।

परवाचां विघ्नकर्ता मुखरोगी प्रजायते ॥ ३ ॥
मर्मोद्घाटेव चाऽन्येषां मुखरोगी प्रजायते । श्वमार्जारादिभिः स्पृष्टं भुक्ता दुर्गन्धवान्भवेत् ॥४
पीत्वा त्रिरात्रं मूगोत्रं भोजयेद्ब्राह्मणत्रयम् ।

अनु च ।

कूटसाक्षी भवेद्वक्रोगी शोणितपित्तवान् । कृच्छ्रातिकृच्छ्रे कुर्वीत चांद्रायणमथापरम् ॥ ५ ॥
कुर्य्यात्कूष्मांडहोमं च गायत्रीमयुतं जपेत् । दद्याद्धिरण्यं व्रीहिं च मुखरोगस्य शान्तये ॥ ६ ॥
वाग्विरोधं च कुरुते मुखरोगी भवेन्नरः । तस्य दाने च विहितं गजरूपं च सांगतः ॥ ७ ॥
[स्वर्णगजदानमित्यर्थः ।]

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोननवत्यधिकसप्तशततमः ॥ ७८९ ॥

श्रीसूर्य उवाच ।

पक्वान्नहरणे चैव जिह्वारोगः प्रजायते । गायत्रीं प्रजपेल्लक्षं दशांशं जुहुयात्तिलैः ॥ १ ॥

अनु च ।

परेषां दुःखकरणात्सर्वदाऽनृतभाषणात् । जिह्वारोगस्तथाऽन्येषां पक्षपाताच्च संसदि ॥ २ ॥
जिह्वारोगो भवेदास्ये व्रणी चैवाभिजायते । पातकद्वितयं चैव होमः कूष्मांडसंज्ञकः ॥ ३ ॥
समायश्चित्रसूक्तस्य जपहोमस्तथैव च । व्रीह्यादीनां तथा दानमौषधस्य च संस्मृतम् ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायो नवत्यधिकसप्तशततमः ॥ ७९० ॥

श्रीसूर्य उवाच ।

विद्याऽप्रदश्छर्दिरोगी गां च दद्यात्पयस्विनीम् ॥ १ ॥
[चकारादेकः कृच्छ्रः सौरमंत्रजपश्च समुच्चीयते ।]

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकनवत्यधिकसप्तशततमः ॥ ७९१ ॥

श्रीसूर्य उवाच ।

आमान्नहरणे चैवं दन्तपीडा प्रजायते । स दद्यादश्विनौ हेमनिष्कद्वयविनिर्मितौ ॥ १ ॥
सूकरे निहते चैवं दन्तुरो जायते नरः । स दद्यात्तद्विशुद्ध्यर्थं घृतकुम्भं सदक्षिणम् ॥ २ ॥
सुरापाः श्यामदंतश्च प्राजापत्याष्टकं चरेत् । शर्करायास्तुलाः सप्त दद्यात्पापविशुद्धये ॥ ३ ॥
जपित्वा तु महारौद्रं दशांशं जुहुयात्तिलात् । ततोऽभिषेकः कर्तव्यो मंत्रैर्वारुणदैवतैः ॥ ४ ॥
[आत्मसमां शर्करायास्तुलां दद्यादित्यर्थः ।]

मन्त्रः ।

"त्वं तुले सर्वभूतानां प्रमाणं परिकीर्तितम् । मां तोलयसि संसारादुद्धरस्व नमोऽस्तु ते" ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विनवत्यधिकसप्तशततमः ॥ ७९२ ॥

श्रीसूर्य उवाच ।

परेषां तर्ककरणान्निष्ठुरोक्तिः प्रजायते । खरोक्तिर्हास्यकरणाद्दद्यान्मौक्तिककांचने ॥ १ ॥
[खरोक्तिर्निष्ठुरा नीरसोक्तिः । गर्दभस्वरवद्वा स्वस्य परोद्वेगजनकस्य वा ।]
मूको भ्रातृवधाच्चैव तस्येयं निष्कृतिः स्मृता । तेन कार्यं विशुद्ध्यर्थं व्रतं चान्द्रायणत्रयम् ॥ २ ॥
व्रतान्ते पुस्तकं दद्यात् सुवर्णपलसंयुतम् । ब्राह्मणाय यजुर्वेदविदे वस्त्रेण संयुतम् ॥ ३ ॥
इमं मंत्रं समुच्चार्य ब्राह्मणं च विसर्जयेत् ॥ ४ ॥

मंत्रः ।

" सरस्वति जगन्मातः शब्दब्रह्माधिदेवते । दुष्कर्मकारिणं पापं रक्ष मां परमेश्वरि " ॥ ५
खरोपघाती वाचां च हर्ता मूकः प्रजायते ॥ ६ ॥

[वाचां हर्ता गुर्वनुज्ञामंतरेण वेदादिग्राही पुस्तकहर्ता च ।]

कुर्य्यात्स्वर्णमयं पद्मं पलार्द्धेन तदर्द्धतः । यथाविभवतः सम्यग् वित्तशाठ्यं न कारयेत् ॥ ७
रक्तवस्त्रेण संवेष्ट्य ताम्रपात्रे तिलोपरि । ताम्रपात्रपरीमाणं पलानामष्टकं विदुः ॥ ८
आढकद्वितयोन्मानं तिलराशौ प्रयत्नतः । उपचारैः षोडशभिराचार्य्यः सर्वशास्त्रवित् ॥ ९
रक्तचन्दनपुष्पाद्यैर्मंत्रेणाऽनेन पूजयेत् । ब्रह्माणे तु नमस्तुभ्यं विष्णोरमितनाभिजः ॥ १०
अतिप्रीतिकरो भानोस्तथारुद्रस्य चैव हि । पूजां मम गृहाण त्वं सर्वक्लेशहरो भव ॥ ११
आग्नेय्यां दिशि वै होमः कर्तव्यो मंत्रपूर्वकः । समिदाज्यतिलैश्चैव समिधाष्टाऽक्षरेण तु ॥ १२

[चित्रमित्यनयर्चया तस्मै हुतवते पद्मं दद्यात्स्मृत्वा चतुर्मुखम् ।]

यस्माद्वाचां विशेषेण वैरूप्यं मम देहजम् । स्वरोपघातजं तीव्रदुःखं रोगाकरस्तथा ॥ १३
तत्सर्वं नाशयत्वत्र ब्रह्मविष्णुशिवाग्नयः । त्रिदशादयश्च ये देवा हविष्मंतस्तथा भुवि ॥ १४
एवं दत्त्वा तु तत्पद्ममाचार्यायातिभक्तितः । पृष्ठतस्त्वनुव्रज्यं च स्वरभेदाद्विमुच्यते ॥ १५

[आज्यहोमे चित्रं देवानामिति मन्त्रः ।]

वेदं वा धर्मशास्त्रं वा विक्रीणीयाद्विजोत्तमः । अधीतस्य न जानाति जिह्वायां शबलं भवेत् ॥१६
अपरिस्फुटवक्ता च जिह्वायां व्रणवानपि । कृच्छ्रातिकृच्छ्रौ कुर्वीत चान्द्रायणमथापरम् ॥ १७
सूक्तं तमग्निवर्णाख्यं जपेच्चैवायुतत्रयम् । दद्याद्धिरण्यं विप्रेभ्यो भोजनं च स्वशक्तितः ॥ १८

[वेदं वा धर्मशास्त्रं वा विक्रीणीयादिति भृतकाध्यापक इत्यर्थः ।]

वाग्विरोधं गुरोः कृत्वा भवेद्ब्रह्मस्वहृन्नरः ॥ १९ ॥

[तत्र स्वर्णसरस्वतीदानम् ।]

उष्ट्रे विनिहते चैव जायते विकृतस्वरः । स तत्पापविशुद्ध्यर्थं कृच्छ्रमेकं व्रतं ततः ॥ २०
कर्पूरस्य पलं दद्यात्क्षीरद्रव्याणि शक्तितः ॥ २१ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिनवत्यधिकसप्तशततमः ॥ ७९३ ॥

श्रीसूर्य उवाच ।

लवणस्यापहर्ता च शीर्णवर्णाङ्घ्रिपाणिकः । वर्वरस्वरतांश्चैव जायते तस्य निष्कृतिः ॥ १
उद्यन्नद्यऋचं सम्यग् जपेदष्टोत्तरायुतम् । जुहुयाच्चरुद्रव्याभ्यां रक्तवासास्तथैव हि ॥ २
दद्यादेवं द्विजे गां वा कुर्य्यात्पूजां स्वशक्तितः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायश्चतुर्नवत्यधिकसप्तशततमः ॥ ७९४ ॥

श्रीसूर्य उवाच ।

कुक्कुटे निहते चैव वक्रनासः प्रजायते । तेन निष्कः प्रदातव्यो ब्राह्मणाय हिरण्मयः ॥ १
परदृष्टिविधानेन भिषग्मिथ्याचरेण च । कामात्परस्त्रियं दृष्ट्वा नेत्ररोगी भवेन्नरः ॥ २
चान्द्रायणं पराकं च पंचाशद्विप्रभोजनम् । वचोदा इति मंत्रं तु जपेदाज्यं सकांचनम् ॥ ३
दद्याद्विप्राय विधिवन्नेत्ररोगः प्रशाम्यति ॥ ४ ॥

[एतच्च भोजनं मुद्गप्राधान्यात् मुद्गान्नं ब्राह्मणेभ्यो दद्यात् नेत्ररोगापनुत्तय इति ।]

दम्पतिभ्यां प्रवृत्तं तु मैथुनं यो निरीक्षयेत् । स नेत्रपूययुक्तः स्यादक्षीभ्यामिति मंत्रतः ॥ ५ ॥
जपहोमौ च कुर्वीत शक्त्या ब्राह्मणभोजनम् । सहस्रकलशस्नानमेवं कुर्याद्द्विजोत्तमः ॥ ६ ॥
[अतिप्रचुरतरं दूषिकं पूयमित्यभिधीयते ।]
घृतचौरस्तु पुरुषो जायते नेत्ररोगवान् । उपोष्य संप्रदद्याद्वै घृतधेनुं विधानतः ॥ ७ ॥
[अंधत्वं नाम प्रतिबद्धदृष्टित्वं नोत्पाटितनेत्रत्वं राज्यंधत्वं वा ।]
पितृहा चेतनाहीनो मातृहांऽधश्च जायते । नरकान्ते प्रकुर्वीत प्रायश्चित्तं यथाविधि ॥ ८ ॥
[चेतनाहीनो निश्चेष्टो निर्बुद्धिश्च तस्यापि वक्ष्यमाणप्रायश्चित्तमेव रोगनिष्कृतिहेतुः नरकांतेऽधः प्रजायते इत्यन्वयः ।]
प्राजापत्यानि कुर्वीत त्रिंशच्छास्त्रविधानतः । व्रतान्ते कारयेन्नावं सुवर्णपलसंख्यया ॥ ९ ॥
स्तंभं रौप्यमयं चैव ताम्रपात्रं तु पूर्ववत् । नौका द्विजाय दातव्या सर्वोपस्करसंयुता ॥ १० ॥
[नौकेत्युपलक्षणं स्तम्भोऽपि विष्णुप्रतिभाषितो दातव्यः । सर्वोपस्करसंयुतेति–उपस्करो नौकादण्डः सोऽपि सौवर्ण एव च ।]
वासुदेव जगद्वन्द्य सर्वभूताशयस्थितः । पापार्णवनिमग्नं मां तारयाश्रिततारकः ॥ ११ ॥
इत्युदीर्य प्रणम्याथ ब्राह्मणांतं विसर्जयेत् ॥ १२ ॥
[इति चेतनाहीनत्वहरेऽपि ।]
शाकहारी च पुरुषो जायते नीललोचनः । ब्राह्मणाय प्रदातव्यं महानीलमणिद्वयम् ॥ १३ ॥

कपिलाक्षत्वेऽपि ।

रीतिहृत्कपिलाक्षः स्यादुपोष्य दिवसद्वयम् । रीतिं पलशतं दद्यादलंकृत्य द्विजातये ॥ १४ ॥
[रीतिर्नाम ताम्रप्रकृतिको धातुविशेषः । पित्तलमिति यावत् ।]
उच्छिष्टः सन् य आदित्यं पश्येदुद्यंतमम्बरे । मध्यंगतं तथाऽस्तं च यांतमुच्छिष्ट एव सन्॥१५॥
नक्षत्राण्यथवा चंद्रं स भवेन्मन्ददृष्टियुक् । घृतेन चारुणा नेत्ररश्मिहीनो हुताशने ॥ १६ ॥
जुहुयादयुतं सम्यगिति शास्त्रस्य निश्चयः । रक्तवासांसि वै दद्यादन्नं तद्व्याधिशान्तये ॥ १७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचनवत्यधिकसप्तशततमः ॥ ७९५ ॥

श्रीसूर्य उवाच ।

देवद्विजगृहे तीर्थे पुण्यस्याधिष्ठितं परम् । चतुर्भुजं तु द्विभुजं समं कुर्याद्विचक्षणः ॥ १ ॥
लक्षणैश्चैव पूर्वोक्तैः सर्वाङ्गसंस्कृतो भवेत् । वस्त्रैर्माल्यैस्तथा गन्धैर्मूलमंत्रेण पूजयेत् ॥ २ ॥
ततो ब्राह्मणमाहूय दरिद्रं धर्मकोविदम् । श्रुतवृत्तौ च संपन्नं तथा चैवात्मवेदिनम् ॥ ३ ॥
वस्त्रांगुलीयकैस्तस्य पूजां भक्त्या प्रकल्पयेत् । होमं च कारयेत्तत्र समिदाज्यतिलैरपि ॥ ४ ॥
मंत्रश्च रुद्रगायत्री सर्वत्रेति विनिश्चयः ॥ ५ ॥
रुद्रगायत्री लिङ्गपुराणेऽभिहिता यथा–
"सर्वेश्वराय विद्महे शूलहस्ताय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥"
यद्वा त्र्यंबकेनैव समिद्धे जुहुयात्सुधीः । कद्रुद्रायेति मंत्रेण जुहुयादाज्यमावृतः ॥ ६ ॥
[मूलमंत्रः पंचाक्षरो वा रुद्रगायत्री वा ।]
कैलासवासी भगवानुमया सहितः परः । त्रिनेत्रश्च हरो दद्रुरोगमाशु व्यपोहतु ॥ ७ ॥

ततश्च ब्राह्मणं सम्यक् प्रणिपत्य क्षमापयेत् । ब्राह्मणान्भोजयेद्वापि स्वयं भुञ्जीत वाग्यतः ॥८
एवं दत्त्वा महादानं दद्रुरोगात्प्रमुच्यते । गोघ्नहा लूतकी चैव प्राजापत्यं समाचरेत् ॥ ९
व्रतान्ते मेदिनीं दद्याच्छृणुयाच्चैव भारतम् ॥ १० ॥

[भूमेरभावे मेदिनीप्रतिनिधित्वेन गां पयस्विनीं दद्यात् । भारतश्रवणं शास्त्रोक्तप्रकारेण इति
लोहहारी च पुरुषो भवेद्वै वर्वरांगकः । लोहं शतपलं दद्यादुपोष्य शनिवासरे ॥ ११
कारुकाणां वधे कृष्णो रूक्षांगश्च प्रजायते । तेन तत्पापशुद्ध्यर्थं दद्याद्वै वृषभं सितम् ॥१२
[कारुकाः शिल्पिनः ।]
तैलचौरेऽपि भवति नरे कंडूयनं सदा । उपोष्य सोऽपि विप्राय दद्यात्तैलघटद्वयम् ॥ १३
वस्त्रहारी च शीर्णांगः संप्रदद्यात्सुशोभनम् । हेम निष्कत्रयमितं वस्त्रयुग्मं च दापयेत् ॥ १४
स्वाम्यंगनाभिगमनं कृत्वा चान्द्रायणत्रयम् । व्रतान्ते पुस्तकं दद्यात्सुवर्णपलसंयुतम् ॥ १५
शय्यां दद्यात्स विप्राय सोपधानां सतूलिकाम् ॥ १६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षण्णवत्यधिकसप्तशततमः ॥ ७९६ ॥

श्रीसूर्य उवाच ।

अश्वे विनिहते चैव वक्रकंठः प्रजायते । प्राजापत्यानि चत्वारि सप्तधान्यानि चोत्सृजेत् ॥ १
शतं पलानि मानेन दद्याच्चैव द्विजातये । चक्रधावी दीर्घगलो दद्याद्गां धवलां शुभाम् ॥ २
अभक्ष्यभक्षदोषात्तु कंठरोगः प्रजायते । कृच्छ्रत्रयं प्रकुर्वीत दद्याद्धेनुं सदक्षिणाम् ॥ ३
दद्याद्वै कंठरोगी तु कंबलं कंबलोद्भवम् । ऊर्णाच्छादनं लोकानां शीतवातभयापहम् ॥ ४
सर्वदुःखहरं यस्मादतः शान्तिं प्रयच्छ मे ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तनवत्यधिकसप्तशततमः ॥ ७९७ ॥

श्रीसूर्य उवाच ।

पारावते च निहते हीनपाणिः प्रजायते । पारावतं स सौवर्णं प्रदद्यान्निष्कमात्रकम् ॥ १
कन्दमूलस्य हरणाद्धतपाणिः प्रजायते । देवतायतनं कुर्याद्दद्यानं तस्य शान्तये ॥ २
चान्द्रायणं प्रकुर्वीत ब्रह्मकूर्चं विधानतः । क्षीरहारी च पुरुषः खिन्नपाणिः प्रजायते ॥ ३
प्रदद्याच्चैव विप्राय काश्मीरं च पलत्रयम् । अयोनौ चैव गमनाद्भुजस्तम्भः प्रजायते ॥ ४
सहस्रकलशस्नानैः शंभुं पूज्य यथाविधि । कुनखी नरकस्यान्ते जायते विप्रहेमहृत् ॥ ५
स सुवर्णपलं दद्यात् कृत्वा चान्द्रायणत्रयम् । उदक्यावीक्षितं भुंक्ते जायते कृमिलोदरः ॥ ६
गोमूत्रयावकाहारः सप्तरात्रेण शुद्ध्यति । अभक्ष्यभक्षणे चैव जायन्ते कृमयो हृदि ॥ ७
यथावत्तु विशुद्ध्यर्थमुपोष्य भीष्मपंचकम् ॥ ८ ॥

[यथावत् व्रताङ्गभूतब्रह्मचर्यदक्षिणादानादियुक्तमित्यर्थः ।]
गजे विनिहते चैव कृमिकुक्षिस्तु जायते । मृते भर्तरि या नारी नीलवस्त्रं प्रधापयेत् ॥ ९
सा मृता नरकं याति कृमिकुक्षिस्ततः परम् ॥ १० ॥

[पापभोगानन्तरं मनुष्यशरीरमासाद्येत्यर्थः ।]
स नीलवृषभान् यावद्दद्याच्चान्द्रायणव्रतम् ।कुर्य्यात्त्रिंशद्द्विजा भोज्या ददद्याच्छक्त्या तदौषधम् ॥ ११
[नीलवृषभलक्षणं भगव्रणहरम् ।]

भुक्त्वा वा प्राश्य संस्पृष्टं जायते ना कृशोदरः। त्रिरात्रं वैष्णवं कुर्यात्पातकाद्वै प्रमुच्यते ॥१२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽष्टानवत्यधिकसप्तशततमः ॥ ७९८ ॥

श्रीसूर्य उवाच।

इक्षुविकारहारी च भवेदुदरगुल्मवान्। गुडधेनुः प्रदातव्या तस्य दोषस्य शान्तये ॥ १ ॥
गुरुप्रत्यर्थितां जातो गुल्मवाञ्जायते नरः। आरभेत्तन्निवृत्त्यर्थं मासमेकं यथाव्रतम् ॥ २ ॥
[वातगुल्मवानित्यर्थः।]
मुंचेत्येतेन सूक्तेन आत्येवं चरुसर्पिषा। जुहुयादयुतं सम्यग् वात आयातभेषजम् ॥ ३ ॥
एतत्सूक्तं जपेद्द्यादन्नदानं च शक्तितः ॥ ४ ॥
[अतिआवसिति सूक्तं तत्र विनायकदानम्।]

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवनवत्यधिकसप्तशततमः ॥ ७९९ ॥

श्रीसूर्य उवाच।

गर्भपातनकारी यः यकृत्प्लीहजलोदरः। तेषां प्रशमनार्थाय प्रायश्चित्तमिदं स्मृतम् ॥ १ ॥
एतेषु दद्याद्विप्राय जलधेनुं विधानतः। सुवर्णरूप्यताम्राणां पलत्रयसमन्विताम् ॥ २ ॥
भृतकाध्यापको यस्तु कन्यादूषणतत्परः। प्लीहावान्स भवेद्विप्रो जपेच्छ्रीसूक्तमत्र हि ॥ ३ ॥
अयुतत्रयसंख्याकं प्लीहोदरविमुक्तये। यो ब्रह्मविष्णुरुद्राणां विभेदं गरुडाग्रज ॥ ४ ॥
साधयेदुदरव्याधियुक्तो भवति मानवः। कुर्य्यात्कृच्छ्रातिकृच्छ्रं च चान्द्रायणमथापरम् ॥ ५ ॥
सहस्रकलशस्नानमीश्वरस्य तु कारयेत्। जपेदयुतसंख्याकमुद्यन्नद्यमृचं तथा ॥ ६ ॥
राज्ञा कर्मातियुक्तेन नियुक्तो धर्मनिश्चये। पुरोहितश्चाधिकारात्सचिवश्चान्यथाचरेत् ॥ ७ ॥
जलोदरत्वमाप्नोति तस्य वक्ष्यामि निष्कृतिम्। पयसा वर्तयेन्मासत्रितयं व्रतमुत्तमम् ॥ ८ ॥
सहस्रकलशस्नानमीश्वरस्य तु कारयेत्। उदरव्याधियुक्तस्तु भवेद्वुर्वंगनागमे ॥ ९ ॥
कुर्य्यात्तु मकरं सम्यग् राजतं ताम्रमेव च ॥ १० ॥
[कृत्वा मकरं ब्राह्मणाय देय इत्यर्थः।]

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टशततमः ॥ ८०० ॥

श्रीसूर्य उवाच।

मंदोदराग्निर्भवति निर्द्रव्येण वै यजेत्। प्राजापत्यत्रयं कृत्वा भोजयेत्सततं द्विजान् ॥ १ ॥
[श्रद्दत्तिर्द्रव्यकदर्य्य इति वा पाठः।]
गोमांसखादको मंदजठराग्निः प्रजायते। प्राजापत्यं चरेत्कृच्छ्रमतिकृच्छ्रं तथैव च ॥ २ ॥
अग्निमंत्रं जपेन्नित्यं श्रीसूक्तं च विचक्षणः। अकारणं गरं दत्त्वा प्रमारयति यो नरः ॥ ३ ॥
स मन्दाग्निर्भवेदेव मृतकस्वल्पकांतिकः। अग्नेर्मान्द्यं भवेत्तस्य प्रश्नेवाऽग्निविनाशकः ॥ ४ ॥
[तत्रेदं मकरदानं स्वर्णस्य तंडुलदानं च।]

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकाधिकाष्टशततमः ॥ ८०१ ॥

श्रीसूर्य उवाच।

अन्नहर्ता त्वजीर्णार्तो भवेदस्य तु निष्कृतिः। उपवासत्रयं कृत्वा प्राजापत्यमथापि वा ॥ १ ॥

जुहुयाच्चरुसर्पिर्भ्यामग्निनश्मीत्यृचाऽनया । परान्नविघ्नकरणाद्जीर्णमपि जायते ॥
लक्षहोमं प्रकुर्वीत प्रायश्चित्तं यथाविधि ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्यधिकाष्टशततमः ॥ ८०२ ॥

श्रीसूर्य उवाच ।

गुरुणा नानुजातो यो वेदाध्ययनमाचरेत् । स जडः प्रज्ञया हीनः संसारे जायते नरः ॥
[आचरेत्कुर्य्यादित्यर्थः ।]
वक्ष्यामि तत्प्रतीकारं शुद्धकांस्यमयीं दृढाम् । शोभनां कारयेद्घंटां शुभरेखाविभूषिताम् ॥
पलैस्तु कुर्य्याद्द्विंशत्या त्रिंशता वा तदर्द्धतः । सुवर्णाढ्यामतिश्लक्ष्णां पंचगव्येन स्नापयेत् ॥
श्वेतवस्त्रेण संवीतां तंडुलोपरि विन्यसेत् । पितृहा चेतनाहीनो मातृहांधश्च जायते ॥
[ब्राह्मणाय देया तद्दानमंत्रस्तु ब्रह्मजज्ञानमिति ।]
नरकान्ते प्रकुर्वीत प्रायश्चित्तं यथाविधि ॥ ९ ॥
[अस्य प्रायश्चित्तं नेत्ररोगप्रकरणेऽधत्वहरे प्रपंचितम् ।]

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्यधिकाष्टशततमः ॥ ८०३ ॥

श्रीसूर्य उवाच ।

गुरुजायाभिगमनान्मूत्रकृच्छ्रं प्रजायते । तेनापि निष्कृतिः कार्या शास्त्रदृष्टेन कर्मणा ॥
[अनेन विधिना निष्कृतिरुच्यते, तत्रैका प्राजापत्यादिव्रतरूपा । अपरा प्रतिमादानजपब्राह्मणभोजनरूपा ।]
थापयेत्कुंभमेकं तु पश्चिमायां शुभं दिशि । नीलवस्त्रसमाच्छन्नं नीलमाल्यादिभूषितम् ॥
तस्योपरि न्यसेद्देवं लोहपात्रे प्रचेतसम् । सुवर्णनिष्कषट्केन निर्मितं यादसां पतिम्
जपेत्पुरुषसूक्तेन वरुणं विश्वरूपिणम् ॥ ३ ॥
[वरुणमूर्तिश्च पाशवरदकरा मकरवाहना च भवति ।]

मन्त्रः ।

"यादसामधिपो देवो विश्वेषामपि पावनः । संसाराब्धौ कर्णधारो वरुणः पावनोऽस्तु मे" ॥
इमं मंत्रं समुच्चार्य आचार्याय यथाविधि । दद्यादेवमलंकृत्य मूत्रकृच्छ्रप्रशान्तये ॥
पशुयोनौ च गमनान्मूत्रकृच्छ्रं प्रजायते । तिलपात्रत्रयं चैव स दद्यादात्मशुद्धये ॥

तत्र तिलपात्रदाने महाविष्णुः ।

ताम्रपात्रे तिलान्कृत्वा पलषोडशकल्पिते । सहिरण्यान्स्वशक्त्या वा विप्राय प्रतिपादयेत् ॥

तत्र विष्णुप्रतिमाया यथोक्तदानम् ।

चक्रं सुदर्शनं यस्य चिह्नानि विविधानि च । प्रमेहं हरतु क्षिप्रं विष्णुर्गरुडवाहनः ॥
तपस्विनीप्रसंगेन प्रमेहो जायते गदः । दानं रुद्रजपं कुर्य्याद् दद्याद्भक्त्या च कांचनम् ॥
[प्रसंगेन गमनेनेत्यर्थः ।]

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरधिकाष्टशततमः ॥ ८०४ ॥

श्रीसूर्य उवाच ।

मातृगामी भवेच्चेह लिंगं तस्य विनश्यति । चांडालीगमनेः चैव हीनकुष्ठी प्रजायते ॥ १ ॥
तस्य प्रतिक्रियां कर्तुं कुम्भमुत्तरतो न्यसेत् । कृष्णवस्त्रसमाच्छन्नं कृष्णमाल्यानुलेपनम् ॥ २ ॥
[उत्तरतः शुद्धलिप्तप्रदेशस्योत्तरभागे उदकादिपूरितं कलशं स्थापयेत् । कलशस्थापनविधिनेत्यर्थः ।]
तस्योपरि न्यसेत्कांस्यपात्रं तत्र धनेश्वरम् । सुवर्णनिष्कषट्केन निर्मितं नरवाहनम् ॥ ३ ॥
यजेत्पुरुषसूक्तेन धनदं विश्वरूपिणम् ॥ ४ ॥
[यजेत्पूजयेदित्यर्थः ।]

मंत्रः ।

"निधीनामधिपो देवः शंकरस्य प्रियः सखा । स वै धनपतिः श्रीमान् मम पापं व्यपोहतु" ॥ ५ ॥
इमं मंत्रं समुच्चार्य आचार्याय यथाविधि । दद्यादेवं हीनकुष्ठी लिङ्गनाशी च शुद्ध्यति ॥ ६ ॥
दुष्टवादी च षण्ढः स्यात्स दद्याच्च द्विजातये । रौप्यं पलत्रयं दुग्धघटत्रयसमन्वितम् ॥ ७ ॥
नृपो भूत्वेह हस्तादिमपराधं विनैव यः । छेदयेद् भुजस्तम्भो वा भवेद्दग्ध इवाऽग्निना ॥ ८ ॥
शिलापृष्ठसदृक्षश्च सव्रणश्चापि जायते । रुधिरं प्रस्रवेत्पश्चात्तस्येयं निष्कृतिः परा ॥ ९ ॥
शतरुद्रं जपेत्सम्यगष्टोत्तरसहस्रकम् । व्रतं चान्द्रायणं चैव कुर्य्याद्दद्याच्च गां ततः ॥ १० ॥
जायते वृषणे तस्य व्याधिः परमदारुणः । जपित्वा दशसाहस्रं मुच्यते रुद्रसंहिताम् ॥ ११ ॥
यानि चान्द्रायणादीनि व्रतान्युक्तानि तानि वै ॥ १२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाधिकाष्टशततमः ॥ ८०५ ॥

श्रीसूर्य उवाच ।

सुरालये जले वापि शकृन्मूत्रं करोति यः । गुदरोगो भवेत्तस्य पापरूपः स दारुणः ॥ १ ॥
मासं सुरार्चनेनैव गोदानद्वितयेन च । प्राजापत्येन चैकेन शाम्येद्गुदरुजाण्डज ॥ २ ॥
[यद्यपि सुरार्चनमिति सामान्येनाऽभिहितं तथापि सूर्यप्रधान्येन विष्णुरुद्रौ पूज्यौ । 'आरोग्यं भास्करादिच्छेत् ' इति श्रुतिः ।]

प्रस्रवगुदाद्ये ।

विण्मूत्रोत्सर्जनं कृत्वा योऽकृत्वा शौचकर्म तु । भुंक्ते जन्मान्तरे मर्त्यो भवेत्स प्रसवाह्वयी ॥ ३ ॥
भवेच्च दारुणा पीडा तत्र कृच्छ्रातिकृच्छ्रकम् । चान्द्रायणं च कर्तव्यं तत्तथा क्षीरसर्पिषा ॥ ४ ॥
अक्षीभ्यामिति सूक्तेन सहस्रं जुहुयाच्छुचिः । उद्यन्नद्यऋचं चैव जपेत्पूर्वोक्तसंख्यया ॥ ५ ॥
(गृहीत्वाऽथ वेतनं योऽध्यापयेत तदर्थवचनम् ।)अध्यापयेच्च जुहुयाज्जपेद्वार्शोयुतो भवेत् ॥ ६ ॥
निवृत्तौ च प्रकुर्वीत कृच्छ्रं चैवातिकृच्छ्रकम् । चान्द्रायणं चैव तथा जपेद्यत्सूक्तपौरुषम् ॥ ७ ॥
उद्यन्नद्यऋचं चैव श्रीविष्णुहृदयं तथा । तामग्निवर्णामिति च जपेत्सूक्तं समाहितः ॥ ८ ॥
हिरण्यं रजतं दद्याच्छ्रोत्रियाय कुटुम्बिने ॥ ९ ॥
तत्र च धेनुदानं प्रशंसंति केचिच्च गोपालदानम् ।
बर्हापीडकसंयुक्तं वेणुवादनतत्परम् । गोपीजनैः परिवृतं जातीपुष्पावतंसकम् ॥ १० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडधिकाष्टशततमः ॥ ८०६ ॥

श्रीसूर्य उवाच ।

स्मार्ताग्निं शमयेद्यस्तु सोतीसारयुतो भवेत् । अग्निरश्मीत्यृचं जप्त्वा दशांशं जुहुयात्तिलान् ॥ १
सर्पिषा तु प्लुतं दद्याद्विरण्यं ब्रह्मदैवतम् । दुर्मनाश्चैव जायेत तस्येयं निष्कृतिः परा ॥ २

[दम्पत्योरनुकूले शुभे दिने स्वस्तिवाचनं कृत्वा स्वशक्त्यनुसारेण दानं विधाय पुत्रकामनया हरिवंशश्रवणमहं करिष्ये इति संकल्पयेत् ।]

दंपत्योः श्रवणकर्तृत्वे करिष्यावहे इति प्रयोगो वा । अन्यतरत्कर्तव्ये करिष्ये इत्यं संकल्प्य श्रुत्यध्ययनसंपन्नं ब्राह्मणं विभवानुसारेण वस्त्रमुद्रिकाकुण्डलादिभिः संपूजितं श्रवणं वृणीतमेभिश्चन्दनताम्बूलादिभिर्हरिवंशश्रवणे त्वामहं वृण इति प्रयोगः ।

ततश्च प्रतिदिनमव्यसनप्रतिबन्धे स्नातावलंकृतौ दम्पती तदेकचित्ततया शृणुयाताम् नालिकेरपूजादिकुर्यात् । शमवान् प्रतिदिनमाचार्यं पुस्तकं च पूजयेत् ।

अन्ते च स्वलंकृतां गां पयस्विनीं सवत्सां स्वर्णशृङ्गीं रौप्यखुरां ताम्रपृष्ठां कांस्यदोहनां सवस्त्रां सदक्षिणां च दद्यात् ।

कल्पः—स्वर्णरत्नादीनि महादानानि दद्यात् । यथाशक्ति वा गोदानमत्र ।

गोदानविधौ विनायकशान्तिस्तु । प्रकृतमनुसरामः । ब्राह्मणोद्वाहनमेकं प्रायश्चित्तम्, अपि हरिवंशश्रवणम्, परिशेषान्महारुद्रोऽपि तृतीयं प्रायश्चित्तम् । अत एव वचनस्थितश्चशब्दो वा शब्दार्थः । एतानि त्रीण्यपि शक्त्याद्यपेक्षया व्यस्तानि समस्तानि वा योज्यानि ।

महारुद्रलक्षणं दशांशहोमप्रकारो वा रुद्रानुवाकानामृष्यादि च सर्वं परिभाषायां रुद्रविधाने समुपवर्णितम् ।

[एकादशपशून् पशुरत्र गौः रुद्राय गामितिश्रुतौ ।]

कृच्छ्रचान्द्रायणं कुर्याद्धोमः कूष्माण्डसंज्ञकः । कर्तव्यो होमविधिश्च स्वर्णदानं तथाऽपरम्॥३॥
कन्यादानं च पञ्चम्यां श्राद्धं कुर्वीत यत्नतः । सहस्रनामजापी च भवेदेवं विशुद्ध्यति ॥ ४ ॥

[एतान्यष्टकादिश्राद्धरहितानि पञ्चापि पृथक् निर्मितानि अतो यावद्व्याधिप्रकोपस्तावत् सहस्रनामस्तोत्रं जपेत् ।]

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्ताधिकाष्टशततमः ॥ ८०७ ॥

श्रीसूर्य उवाच ।

चतुर्विधा तु या वन्ध्या भवेद्वत्संवियोजनात् । वक्ष्ये तस्य प्रतीकारं तत्स्वरूपं निबोध वै ॥ १ ॥
मृतवत्सा भवेत्काचित् काचिदेकप्रसूतिका । कन्याप्रसूतिरूपा च काकवन्ध्या चतुर्थिका ॥ २ ॥

[काकवन्ध्याऽप्रसूतेत्यर्थः ।]

सर्वास्ता घोरपापेन जायन्ते पूर्वजन्मनि । मृतवत्सा द्रव्यहरणादेकसुतस्य घातनात् ॥ ३ ॥

तत्र स्वर्णधेनुदानम् ।

कन्याप्रजा ऋणसम्बन्धात् काकवन्ध्या विरोधतः । हिरण्येन यथाशक्त्या सवत्सां कारयेद्दृढाम्॥४॥
धेनुं रूप्यखुरां रत्नं तस्याः पुच्छे नियोजयेत् । घंटां गले निबध्नीत सवत्सां प्राङ्मुखः शुचिः॥५॥
चन्दनाऽगुरुकर्पूरगन्धमाल्यैः सुशोभनैः । उपचारैः षोडशभिर्नैवेद्यं पायसं भवेत् ॥ ६ ॥
मोदकं च तथापूपं गुडं लवणमेव च । जीरकं च तदापूर्य शूर्पे वेणुमये दृढे ॥ ७ ॥

[मोदकादिपरिपूर्णपात्राणि षडष्टौ दश वा दद्यात् ।]

धेनुरेवं प्रदातव्या ब्राह्मणस्त्रीषु चैव हि । ब्राह्मणं सर्वशास्त्रज्ञं कुशलं धर्मवेदिनम् ॥ ८ ॥
विद्याविनयसंपन्नं शान्तं चैव जितेन्द्रियम् । अलोलुपं सर्वजनप्रियं कल्मषवर्जितम् ॥ ९ ॥
आहूय भक्त्या संपूज्य वस्त्राद्यैर्गन्धपुष्पकैः । तेनैव कारयेत्पूजां मन्त्रतो धेनुवत्सयोः ॥ १० ॥

पूजायां होमे च मंत्रः ।

होमं च कारयेत्तत्र समिदाज्यचरूत्कटम् । सोमो धेनुमिति मंत्रं समुच्चार्य ततः पुनः ॥ ११ ॥
[अथ हिरण्यं यथाशक्त्या दद्यात् ।]

अत्र वह्निमूर्तिदानम् ।

अतिसारी स भवति यस्त्वेताग्निविनाशकः । स्त्रीहन्ता चातिसारी स्यादश्वत्थान् रोपयेद्दश ॥
दद्याच्च शर्कराधेनुं यजेच्च सततं द्विजान् ॥ १२ ॥

रक्तातिसारे ।

दावाग्निदायकश्चैव रक्तातीसारवान् भवेत् । तेनोदपानं कर्तव्यं रोपणीयास्तथा वटाः ॥ १३ ॥
[उदपानं कूपादिभिः ।]

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायोऽष्टाधिकाष्टशततमः ॥ ८०८ ॥

श्रीसूर्य उवाच ।

अनन्यगतिकां भार्यामदुष्टां कारणं विना । परित्यजति यः सोऽथ ग्रहणीरोगवान्भवेत् ॥ १ ॥
धेनुं पयस्विनीं दद्याद्वस्त्राभरणभूषिताम् । हेमशृंगीं रौप्यखुरां वासोभिः परिवेष्टिताम् ॥ २ ॥
नवधान्यैः समायुक्तामेकैकं द्रोणपंचकम् । सहिरण्यं तु तद्दद्याद्ब्राह्मणाय कुटुम्बिने ॥ ३ ॥
अलोलुपाय शान्ताय धर्मज्ञाय विशेषतः । होमं च पूर्ववत्कुर्य्यात्समिदाज्यचरूत्कटम् ॥ ४ ॥
तस्मै हुतवते दद्यात्पूजितायांगुलीयकैः । गां कृष्णां विश्वरूपाय मन्त्रेणानेन रोगवान् ॥ ५ ॥

मन्त्रः ।

"देवकीपुत्र चाणूरकंसारिष्टविनाशक । नाशाय ग्रहणीरोगं गोपीजनमहोत्सव ॥ ६ ॥
कृतेनानेन दानेन ग्रहणीशांतिमृच्छति" । तस्मादेवं तु कर्तव्यं ग्रहणीरोगिणा सदा ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवाधिकाष्टशततमः ॥ ८०९ ॥

श्रीसूर्य उवाच ।

हरिणे निहते खञ्जः शृगाले त्वर्द्धपादकः । अश्वस्तेन प्रदातव्यः सौवर्णो निष्कसंमितः ॥ १ ॥
जायते वक्रपादस्तु निहते शुनि मानवः । निष्कत्रयमितं दद्यात्सौवर्णं तद्विशुद्धये ॥ २ ॥
अजाविघातेन चैव अधिकांगः प्रजायते । अजा तेन प्रदातव्या विधिना स्वर्णसंमिता ॥ ३ ॥
[अत्रापि खञ्जत्वहरोक्तप्रकारेण शिवपूजां कृत्वा ब्राह्मणाय दद्यात् ।]
मार्गहा पादरोगी स्यादश्वदानं समाचरेत् । पतितेन तु संपर्के वल्मीकव्याधिमान्भवेत् ॥ ४ ॥
गोमूत्रयावकाहारो मासार्द्धेन विशुद्ध्यति । सहिरण्यं प्रदद्याच्च तस्य पापस्य शुद्धये ॥ ५ ॥
जायते यदि तत्रापि कृमिर्ब्रह्मविदां वर । तत्र मूर्तिः स्वर्णमयी देया लक्षणसंयुता ॥ ६ ॥
स्वगोत्रजाभिगमनाच्छलीपदी जायते नरः । योन्यामसृक्च स्रवति तत्र चान्द्रायणं चरेत् ॥ ७ ॥
[स्वगोत्रस्येत्यत्र लिंगमविवक्षितम् । योनिशब्देन च मैथुनसाधनमिंद्रियं लक्ष्यते । तत्र स्त्री पुंसोरुभयोरपि कार्यं समम्]

मासं पयोव्रतं चैव तस्माद्रोगात्प्रमुच्यते । पापस्य तन्निवृत्त्यर्थमुपवासत्रयं भवेत् ॥ ८ ॥
भोजयेच्च द्विजान्दानं पंचाशन्निष्कसंख्यया ॥ ९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो दशाधिकाष्टशततमः ॥ ८१० ॥

श्रीसूर्य उवाच ।

पुरुषो भाषते व्यर्थं स त्वग्दोषयुतो भवेत् । चान्द्रायणत्रयं कुर्यात् प्रदद्यादौषधानि च ॥ १ ॥
[वैद्यकोक्तानि चक्रमर्दानीत्यर्थः । ब्राह्मणभोजनं च ।]
गुरुतल्पगदोषाच्च गुरुमैथुनदोषतः । दुश्चर्मा स्यादसौ कुर्य्याद्गुरुतल्यादिदोषतः ॥ २ ॥
[प्रायश्चित्तं कुर्यादित्यन्वयः । षाड्गार्षिकमित्यर्थः ।]
अनुलुम्पति योऽन्येषां विषयान् पूर्वजन्मनि । सोऽन्यजन्मनि पामावान् भवेत्स्रवति शोणितम् ॥ ३ ॥
[अत्रापि व्याधेर्गुरुत्वं लघुत्वं च द्रष्टव्यम् । अनुलुम्पनं विनाशनमपहारो वा । विषयाः स्रक्-चन्दनानुलेपादयः । इति पामात्वदूषणम् ।]
ब्राह्मणं घातयेद्यो हि दद्रुरोगी भवेन्नरः । तत्पापशमनं वक्ष्ये सुवर्णेन तदर्धतः ॥ ४ ॥
धेनुं हेममयीं कुर्य्याद्रौप्येणाप्यथवा पुनः । औमं माहेश्वरं रूपं दृष्टभावेन च स्थितम् ॥ ५ ॥
प्रदीपं भञ्जयित्वा तु तिमिरव्याधिमान्भवेत् । रूपप्रकाशकैर्मन्त्रैरभिमन्त्र्य जलं ततः ॥ ६ ॥
गात्राणि प्रोक्षयेत्तस्मान्मुक्तो भवति किल्विषात् । सहस्रकलशस्नानमीश्वरस्यापि कारयेत् ॥ ७ ॥

तत्र यथोक्तगरुडदानं च कामलत्वे ।

कामली नक्तचौरः स्यात्तस्य वक्ष्यामि निष्कृतिम् कुर्य्याच्च पक्षिराजानं विष्णोर्वाहनमुत्तमम् ८
सुवर्णेन यथाशक्त्या पक्षयोर्मौक्तिकद्वयम् । नासिकायां तथा वज्रमुत्तरीयं च राजतम् ॥ ९ ॥
एवं कृत्वा गरुत्मन्तं घृतद्रोणोपरि न्यसेत् । श्वेतवस्त्रेण संवेष्ट्य श्वेतमाल्यैः समर्चयेत् ॥ १० ॥
[ब्राह्मणाय प्रदातव्यम् । होमादि ब्राह्मणभोजनं च ।]
तरक्षौ निहते चैव जायते केकरेक्षणः । दद्याद्रत्नमयीं धेनुं स तत्पापप्रशान्तये ॥ ११ ॥
मार्जारे निहते चैव जायते केकरेक्षणः । तेन वैदूर्यरत्नानि दातव्यानि स्वशक्तितः ॥ १२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकादशाधिकाष्टशततमः ॥ ८११ ॥

श्रीसूर्य उवाच ।

मातृपितृगुरूणां च देवब्राह्मणयोस्तथा । शृणोति निन्दां बुद्ध्या यः कर्णाभ्यां तस्य शोणितम् १
पूयं च प्रस्रवत्यस्य शान्तिः कृच्छ्रचतुष्टयम् । हिरण्यरक्तवस्त्राणां दानाद्ब्राह्मणभोजनात् ॥ २ ॥
होमाच्च सौख्यं भवति सौरमन्त्रेण शक्तितः । सर्वागमविहीनश्च प्रेतश्राद्धे सदादनात् ॥ ३ ॥
[शक्तित इति सर्वत्र सम्बध्यते ।]
स भवेत्कृमिकर्णस्तु तत्पापस्यापनुत्तये । दद्यान्नीलवृषान् पञ्च यथोक्तविधिना ततः ॥ ४ ॥
[नीलवृषभलक्षणं भगव्रणहरेऽभिहितम् ।]
वृषदाने शुभोऽनड्वान् सशुक्लाम्बरकाञ्चनः । स्वसृघाती च पुरुषो बधिरो जायते नरः ॥ ५ ॥
तेन कार्य्या विशुद्धिश्चान्यथा तु दद्रुमण्डलः । कृत्वा लोहमयीं धेनुं पलषष्टिप्रमाणतः ॥ ६ ॥

---

१ देशत इति—ख० पु० । २ ब्राह्मणस्य च यो द्रोही—ख० पु० । ३ सर्वाचार इति—ख० पु० ।

कार्य्या स्वर्णेन संयुक्ता सप्तधान्यसमन्विता । दद्याद्विप्राय विदुषे पापं मे क्षीयतामिति ॥ ७ ॥
विश्वस्तभार्यागमने गजचर्म्मा प्रजायते । तत्पापस्य विनाशाय प्रायश्चित्तं विधीयते ॥ ८ ॥
[विश्वस्तभार्यागमने गुरुतल्पगप्रायश्चित्तादिदोषवशात् पाङ्क्तार्पिकम् प्रायश्चित्तशब्देन निष्कृतिरभिधीयते सा च कृच्छ्रादिरूपा दानरूपा च । तत्र साङ्गगोदानम् । इति गजचर्महरम् ।]
मयूरघातेन चैव जायते कृष्णमण्डलः । निष्कत्रयमितो देयस्तेन स्वर्णमयः शिखी ॥ ९ ॥
हंसघाती भवेद्यस्तु तस्य स्याच्छ्वेतमण्डलः । रौप्यं पलत्रयमितं हंसं दद्याद्विशुद्ध्यति ॥ १० ॥
अमेध्यस्य प्रदाता च विसर्प्पव्याधिमान्भवेत् । मासं पयोव्रतं कुर्य्याद् दद्यादन्ते पयस्विनीम् ११
[तत्र सर्पमूर्तिदानम् ।]
सौगन्धिकस्य हरणाद्दुर्गन्धाङ्गः प्रजायते । लक्षमेकं तु पद्मानां जुहुयाज्जातवेदसम् ॥ १२ ॥
[सौगन्धिकं तु कह्लारं सुगन्धिद्रव्यं वा । जातवेदसमंत्रेण जुहुयात् ।].

वस्तुगन्धहरे ।

मधुचौरस्तु पुरुषो जायते वस्तुगन्धवान् । स दद्यान्मधु धेनुं च उपोष्य च द्विजातये ॥ १३ ॥

इति श्रीवृद्धसूर्य्यारुणसंवादे कर्मविपाकेऽध्यायो द्वादशाधिकाष्टशततमः ॥ ८१२ ॥

श्रीसूर्य उवाच ।

ब्रह्महा नरकस्यान्ते पांडुकुष्ठी[1] प्रजायते । प्रायश्चित्तं प्रकुर्वीत तत्पातकविशुद्धये ॥ १ ॥
[प्रायश्चित्तं षाड्वार्षिकं कर्तव्यं पापस्योपभोगेन कृत्वा पश्चात् कृते प्रायश्चित्ते ।]
चत्वारः कलशाः स्थाप्याः पञ्चपल्लवसंयुताः । यश्चरत्नसमायुक्ताः श्वेतवस्त्रेण वेष्टिताः ॥ २ ॥
अश्वस्थानादिमृद्युक्तास्तीर्थोदकेन पूरिताः । कषायपञ्चकोपेता नानाविधफलान्विताः ॥ ३ ॥
सर्वौषधिसमायुक्ताः स्थाप्याः प्रतिदिशं ततः । रौप्यमष्टदलं पद्मं मध्यकुम्भोपरि न्यसेत् ॥ ४ ॥
[पञ्च पल्लवाः–आम्राश्वत्थवटप्लक्षोदुम्बराणाम् । मृदश्च–गजाश्वरथ्यावल्मीकनदीसंगमहृदगोकुलेभ्यो ग्राह्याः । कषायाः–अश्वत्थादीनां त्वचः ।]
तन्मध्ये कलशोपरि अष्टदलं रौप्यपद्मं निधाय तत्र वासुदेवं स्थापयेदित्याह ।
तस्योपरि न्यसेद्देवं पुण्डरीकं चतुर्भुजम् । पलार्द्धार्द्धप्रमाणेन सुवर्णेन विनिर्मितम् ॥ ५ ॥
यजेत्पुरुषसूक्तेन त्रिकालं प्रतिवासरम् । यजमानः शुभैर्गन्धैः पुष्पैर्धूपैर्यथाविधि ॥ ६ ॥
पूर्वादिकुम्भेषु ततो ब्राह्मणा ब्रह्मवादिनः । स्थापयेयुः स्वकान्वेदानृग्वेदप्रभृतीञ्छनैः ॥ ७ ॥
दशांशेन ततो होमो गृहशान्तिपुरस्सरम् । तत्र कुंडे विधातव्यो घृताक्तैस्तु तिलैर्यवैः ॥ ८ ॥
द्वादशाहमिदं कर्म समाप्य द्विजपुङ्गवः । भद्रासने यजमानस्याभिषेकं हि समाचरेत् ॥ ९ ॥
[द्वादशदिनसाध्यमेतत्कर्म । तत्र प्रतिदिनं प्रातर्मध्यदिनसायंकाले ह्याचार्येण पूजितम् । एवं यजमानः पूजयेद्देवम् । वेदचतुष्टयाभावे यथा समशाखाध्यायिभिश्चतुर्भिर्ब्राह्मणैश्चत्वारि वेदपारायणानि कारयेत् पारायणं वा । होमद्रव्यं च घृताक्तास्तिलयवाः । प्रतिदिनं होमः पूजा च । अन्त्ये दक्षिणादीनि दद्यात् । द्विजपुंगव इति आचार्यः ।]
अभिषेकानन्तरं हि गोभूहेमतिलादिकम् । ब्राह्मणेभ्यस्तथादेयमाचार्याय निवेदयेत् ॥ १० ॥

एतत्प्रतिमादानमन्त्रमाह ।

"आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः। प्रीताः सर्वे व्यपोहन्तु मम पापं सुदारुणम्" ॥ ११ ॥

---

१ कंडुकुष्ठी इति–ख० पु० ।

इत्युदीर्य मुहुर्भक्त्या तमाचार्यं क्षमापयेत् । एवं विधानैर्विविधैः श्वेतकुष्ठी विशुध्यति ॥ १२
कुष्ठी गोवधकारी स्यान्नरकान्तेऽस्य निष्कृतिः ॥ १३ ॥
[तत्रापि सविधिः ।]

अनु च ।

यो नरो हन्ति वै जन्तून्कुष्ठरोगी भवेत्तु सः । सान्तपनं प्रकुर्वीत भगवानाह शङ्करः ॥ १४
[क्षुद्रजन्तूनामिदं प्रायश्चित्तम् । अत्र केचन—उमामहेश्वरेण साकं साङ्गवृषभदानं शंसन्ति ।

हीनकुष्ठे शातातपः ।

मातृगामी भवेद्यस्तु तस्य लिङ्गं विनश्यति । बालायां गमने चैव हीनकुष्ठः प्रजायते ॥ १५
[अत्र प्रतिक्रिया लिङ्गहानिहरे पूर्वमेव प्रसंगात्प्रदर्शिता इति ।]
दीक्षितस्त्रीप्रसङ्गेन जायते रक्तकुष्ठवान् । तत्पातकविशुद्ध्यर्थं प्राजापत्यचतुष्टयम् ॥ १६ ।
[कुर्वीत इति शेषः । एतच्च प्रायश्चित्तं रोगस्याल्पत्वे प्रायश्चित्तस्य लघुत्वात् । रोगाधिक्ये त्रैमासिकमुपपातकप्रायश्चित्तं द्वैगुण्येन कार्यम् ।]

रक्तपीते कुष्ठे ।

स्वसुतागमने चैव रक्तकुष्ठं प्रजायते । भगिनीगमने चैव पीतकुष्ठं प्रजायते ॥ १७ ॥
तस्य प्रतिक्रियां कर्तुं पूर्वतः कलशं न्यसेत् ॥ १८ ॥

गुल्मादिकुष्ठे ।

भ्रातृजायाभिगमने गुल्मकुष्ठं प्रजायते । स्ववधूगमने चैव कृच्छ्रकुष्ठं प्रजायते ॥ १९ ॥
[स्ववधूः स्वपुत्रभार्या इति भावः]
तेन कार्यं विशुद्ध्यर्थं प्रागुक्तस्यार्धमेव च । दशांशहोमः सर्वत्र घृताक्तैः क्रियते तिलैः ॥ २० ।
[प्राक् षाड्गवार्षिकं प्रस्तुतं तदर्धं त्रैवार्षिकम् ।]

कट्यादिकुष्ठे ।

पितृव्यपत्नीगमनात् कटिकुष्ठं प्रजायते । निष्कृतिस्तेन कर्तव्या कन्यादानेन यत्नतः ॥ २१

नेत्रकुण्ठे ।

मातुलान्यभिगमनान्नेत्रकुष्ठं प्रजायते । कृष्णाजिनप्रदानेन प्रायश्चित्तं समाचरेत् ॥ २२
यदगम्यासु सम्बद्धं प्रायश्चित्तमुदीरितम् । तदेव मुनिभिः प्रोक्तं नियतं तत्सुतास्वपि ॥ २३
[सप्तवर्णं सव्रीहि कृष्णाजिनदानम् ।]
ताम्बूलहरणे चैव श्वेतोष्ठत्वं प्रजायते । दक्षिणासहितं दद्यात् स वैदूर्यमणिद्वयम् ॥ २४
रूपहा नरकस्यान्ते जायते चित्रकुष्ठवान् । प्राजापत्यत्रयं कुर्याद्देयं रौप्यपलत्रयम् ॥ २५
उदुम्बरी ताम्रचौरो नरकान्ते प्रजापते । प्राजापत्यत्रयं कुर्यात्ताम्रं पलशतं दिशेत् ॥ २६

कुष्ठरूपम् ।

कुष्ठः सर्वाङ्गगामी च शूलयज्ञोपवीतधृक् । धावन् व्रणहरः शुद्धस्त्रिनेत्रः किंकिणीयुतः ॥ २७
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोदशाधिकाष्टशततमः ॥ ८१३ ॥

---

१ शातिनः इति—ख० पु० ।

श्रीसूर्य उवाच।

क्षुत्पिपासातुरा नारी भर्तारमवमत्य या। मिष्टान्नं स्वयमश्नाति न सा पुष्पवती भवेत् ॥ १ ॥
मिथुनानि च पंचाशद्भोजयेत्तन्निवृत्तये। दद्यात्सौभाग्यवस्तूनि तेभ्यः शक्त्यनुसारतः ॥ २ ॥
इक्षवस्तवराजश्च हरिद्रा चैव धान्यकम्। विकारवच्च गोक्षीरं कुसुम्भं लवणं तथा ॥ ३ ॥
[एतत्सौभाग्याष्टकैस्तवराजः सौभाग्यं सुवर्णद्रावकं द्रव्यमुच्यते। कर्पूरो वा शर्करा वा। विकारवत् शिखरिणी।]

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्दशाधिकाष्टशततमः ॥ ८१४ ॥

श्रीसूर्य उवाच।

विधवागमनेनापि नित्यं नारदवद्यतिः। रक्तार्बुदी भवेत्कुर्यात्प्रायश्चित्तं प्रशान्तये ॥ १ ॥
कृच्छ्रातिकृच्छ्रे कुर्वीत चान्द्रायणमथापि वा। एवमेवापि विधवा प्रकुर्याद्रोगशान्तये ॥ २ ॥
रक्तार्बुदी वैश्यहन्ता जायते धर्ममाचरेत्। प्राजापत्यानि चत्वारि सप्तधान्यानि चोत्सृजेत् ॥ ३ ॥
पित्रा वा गुरुणा वापि यो नरः शास्त्रनिर्णये। स्पर्द्धतेऽसौ प्रजायेत उदरव्याधिमान्भवेत् ॥ ४ ॥
चान्द्रायणं प्रकुर्वीत कृच्छ्रं चैवातिकृच्छ्रकम्। तद्विष्णोरिति च जपेदयुतत्रयसंख्यया ॥ ५ ॥
सर्पिर्मधुसमायुक्तमण्डकान्नेन भोजयेत्। विप्रांस्तत्पादसलिलैर्मार्जयेदुदरे तथा ॥ ६ ॥
असृग्दरी स भवति यस्तु हिंस्याद्वृथा पशून्। असृग्दरी द्वारयति तपोवृक्षानपि क्षतान् ॥ ७ ॥
[तत्र गोदानं सारम्। तत्र रुद्रमूर्तिदानं च।]
अन्नचौरो भवेद्यस्तु सोऽकस्माज्जायते कृशः। वक्ष्ये तस्य प्रतीकारं दानहोमाभिषेचनम् ॥ ८ ॥
पलेन वा तदर्द्धेन तदर्द्धेनाथ वा पुनः। सुवर्णेन प्रतिकृतिं कुर्याद्रुद्रस्य भक्तितः ॥ ९ ॥
तन्मूर्तिर्ब्राह्मणायैव देया शक्त्या विधानतः। न करोति महायज्ञानस्थिरोगी प्रजायते ॥ १० ॥
कृच्छ्रं चान्द्रायणं कुर्याच्छक्त्या विप्रांश्च भोजयेत्।ईप्सितान्नं प्रदद्याच्च हिरण्यं च स्वशक्तितः ११
[दक्षिणां हिरण्यं दद्यात्।]

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचदशाधिकाष्टशततमः ॥ ८१५ ॥

श्रीसूर्य उवाच।

दधिचौरस्तु पुरुषो युक्तो भवति कल्मषात्। दधिधेनुः प्रदातव्या तेन विप्राय शुद्धये ॥ १ ॥
दंतपातनकैर्युक्तः शूद्रहन्ता भवेन्नरः। प्राजापत्यं चरेदेकं दद्याद्धेनुं सदक्षिणाम् ॥ २ ॥
श्रुतिस्मृतिनिषिद्धानि यानि दानानि सन्ति वै। अजाश्वमहिषीदानं प्रतिग्रहणकारणात् ॥ ३ ॥
निषिद्धयोषिद्गमनाद्द्विजाग्र्यस्य वधादपि। देवस्य च परीक्षायां दस्युव्याघ्रादिनिर्मितेः ॥ ४ ॥
निषिद्धधनशास्त्राणि मरणाद्गुरुनिष्कृतेः। तडागादेश्च भङ्गाच्च वाह्यशास्त्रोपजीवनात् ॥ ५ ॥
ब्राह्मणस्वापहरणात्सर्वाङ्गेषु प्रजायते। वेदना दारुणा तद्वत्तस्याश्च शममृच्छयेत् ॥ ६ ॥
कृच्छ्रातिकृच्छ्रे कुर्वीत चान्द्रायणमथापि वा। गोभूहिरण्यवासांसि दद्यात्कुर्याज्जपं तथा ॥ ७ ॥
तद्विष्णोरिति मंत्रेण कुर्य्यादत्रायुतत्रयम्। पानीयं पायसं मुद्गाः शर्करा मधुसंयुता ॥ ८ ॥
इदमावश्यकं देयं सर्वरोगादिशान्तये। प्रतिमाभङ्गकारी तु ह्यप्रतिष्ठः प्रजायते ॥ ९ ॥
संवत्सरत्रयं सिञ्चेदश्वत्थं शनिवासरे। उद्वाहयेत्तमश्वत्थं शमीसाम्यविधानतः ॥ १० ॥

[शमी चेत्तया सह शमी पार्श्वे न भवति तदा वृषोत्सर्ग इव साग्रा ये कुशास्तैरेव समानीम् विधानतो विवाहः ।]

कुव्जो मूपकहा दद्यात् सप्तधान्यं सकाचनम् । अनिवेद्य सुरादिभ्यो भुञ्जानो जायतेऽधनः॥११॥
स भोजयेत्सहस्रं तु शतं वा हि द्विजोत्तमान् ॥ १२ ॥

[सुरादिभ्यो हरिहरादिभ्यो वैश्वदेवकर्मदेवताभ्यश्चादिशब्दादतिथिपुत्रादिभ्यः । श्रवणं द्वितीया निष्कृतिः । ह्युत्युत्तरवाक्यस्यापि तेन विशुद्धयति इत्ययं विशेषः । तथा च हरिवंशश्रवणं द्वितीया निष्कृतिः ।]

बभूव बाहुजः कश्चिद्देशे पंचनदे पुरा । धनधान्यसमायुक्तः पापकर्मा महोद्यमी ॥ १३ ॥
विप्रप्रसङ्गतः प्राप्तः प्रयागं गरुडाग्रज । स्नातो मृगगे भानौ धूतौ धर्मक्रियोज्झितः ॥ १४ ॥
संप्राप्य स्वगृहं शीघ्रं कृतवान् कर्म दारुणम् ।ग्रामे निवसतोऽन्यस्य क्षत्रियस्य पतत्रिण ॥ १५ ॥
ददाह भवनं रम्यं वैरिभावात्पुराऽनघ । तत्रैका वत्सरी दग्धा जीवाश्चापि विशेषतः ॥ १६ ॥
कालयोगेन संप्राप्तः स गत्वा यमशासनम् । भुक्त्वा पापफलं पापात्पुण्यात्पुण्यफलं तथा ॥१७॥
पूर्वपुण्यप्रभावेण स जातः पादजोऽधुना । गंगायाः प्राक्परे देशे शतयोजनसंमिते ॥ १८ ॥
स मध्यरूपो बलवान् धर्मे स्वल्पमतिः शठः । बुद्ध्याधिकः प्रचारी च पैत्तिकः स्वल्पवित्तभाक्॥१९॥
सकन्यकः सपत्नीको बन्धुभृत्यसुखान्वितः । पुण्यादिदं फलं पूर्वात्पापादत्र शृणु त्वथ ॥ २० ॥
गोबालवत्सकवधाज्जीववधातादपुत्रकः । सप्तवेदमिताब्दान्तं जातपुत्रविनाशवान् ॥ २१ ॥
गोस्त्रीविप्रवधाः पापाः पुत्रनाशकरा यतः । गोराशिगे शनौ सोमात्षष्ठे जीवे मृगास्थिते ॥ २२ ॥
लक्ष्मैतदंडजश्रेष्ठ पृच्छकस्यात्र जन्मनि । पूर्वे या स्त्री सहायासीन्मृतवत्साऽत्र सा सुत ॥२३॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन् सर्वपापनिषूदनीम् । पुत्रवृद्धिकरीं धन्यामन्यजन्मनि निश्चयात् ॥२४॥

श्रीसूर्य उवाच ।

शृणु सूत प्रवक्ष्यामि निष्कृतिं पापशोधनीम् । पञ्चस्वर्णमिता कार्या सुरभी च हिरण्मयी॥२५॥
तदर्द्धमितिका वापि द्वयोर्वित्तानुसारतः । संपूज्य विधिवन्मन्त्रैर्देया विप्राय धीमते ॥ २६ ।
माषैर्वाह्निमितैर्देयस्तथा पशुपतिः सुत । माषाभ्यां च तथा वह्निर्जीवा माषचतुष्कजाः ॥ २७ ।
देयाश्च विधिना सूत पूर्वपापापनुत्तये । जपेत्पशुपतेर्मन्त्रं सहस्रारिष्टनाशकम् ॥ २८ ।
होमयेदष्टशतकं रुद्रस्याग्रे प्रयत्नतः । शृणुयाद्धरिवंशं वा दशावृत्त्या विधानतः ॥ २९ ।
यः कुर्य्याद्विधिवत्सूत प्रायश्चित्तं त्रिधा मतम् । जीविष्यन्ति च तत्पुत्रा जन्मन्यत्र ममाज्ञया३०।
नैवं कुर्य्याच्च यः शक्त्या त्रिष्वेकं पापशोधनम् । न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः ३१
नवसप्तमितायुः स्यात्प्रायश्चित्ते कृतेऽधुना । सप्तवेदमिते वर्षे रिष्टं चाकृतनिष्कृतेः ॥ ३२ ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षोडशाधिकाष्टशततमः ॥ ८१६ ॥

श्रीसूर्य उवाच ।

वणिक् पूर्वभवे कश्चिद्दासीद्धर्मपरायणः । द्विभार्यः सिद्धपीठस्थो धनधान्यसमन्वितः ॥ १
दत्तानि तेन दानानि पर्वस्वपि च शक्तितः । ब्राह्मणेषु दरिद्रेषु गृहस्थेषु विशेषतः ॥ २

अथापि कृतवान्पापं कामलोभेन नित्यशः । ज्येष्ठां त्यक्त्वा ऋतुप्राप्तां सुशीलां प्रियवादिनीम्॥३॥
रतिं ददौ कनिष्ठायामनृतौ विधिमोहितः । ततो मृत्युवशं प्राप्तः ससहायो वणिक्सुतः ॥ ४ ॥
भुक्त्वा पापफलं पापात् पुण्यात्पुण्यफलं तथा । विधेर्बलवशात्सोऽत्र शतद्रोः पूर्वभागजः ॥ ५ ॥
कुम्भस्थे भूसुते कीटे जीवे सिंहगते विधौ । स रक्तगौरो मतिमान् पितृमातृसुखान्वितः ॥ ६ ॥
भ्रातृमित्रधनैर्युक्तः सौम्यः पितृवचोनुगः । घृणी ह्रस्वोऽथ मितदो वर्णोत्तमसमुद्भवः ॥ ७ ॥
दानादिदं फलं सर्वं स्त्रीत्यागान्मृतपुत्रकः । स्त्रीत्यागी भ्रूणहा यस्मादिति वेदविदो विदुः ॥ ८ ॥
स्त्रीसाहाय्ययुतः पूर्वं शृणुष्वाथ खगेश्वर । प्राग्भवे या कनिष्ठाऽभूत् सा ज्येष्ठाऽत्र मृतप्रजा ॥९॥
गर्भदोषरता चेति लक्षणैर्लक्षितासुत । वक्ष्यामि निष्कृतिं तस्य पूर्वपापापनोदनीम् ॥ १० ॥
कुर्य्यात्पलै रसमितैर्ब्रह्माणं कमलोद्भवम् । विश्वमूर्तिं त्रिलोकेशं सौवर्णं निखिलं शुभम् ॥ ११॥
तदर्द्धार्द्धमितं देयं त्रिपु वित्तादिमं पठन् ॥ १२ ॥
" त्यक्त्वा वराननां शुद्धां यत्पूर्वं पापमर्जितम् । तेनाहमत्र ब्रह्माणं प्रायश्चित्तं ददे द्विज" ॥१३॥
गौरी तु राजती देया द्विपलार्कश्च तन्मितः । मापपंचमिता विष्णोः सौवर्णी ब्राह्मणाय वै ॥१४॥
हिरण्मयी तथा लक्ष्मीर्देया मापाष्टका शुभा । ब्राह्मणान् वरयेत्तत्र गृहयज्ञं समाचरेत् ॥ १५ ॥
भोजयेच्च यथाशक्त्या ब्राह्मणान्गरुडाग्रज । एवं विधानं यः कुर्याज्जीविष्यन्ति च तत्सुताः॥१६॥
ज्येष्ठायां च कनिष्ठायां नात्र कार्या विचारणा । श्रुत्वैनं शक्तिमान्यस्तु न कुर्य्यात्पापशोधनम्१७
न जीवन्ति सुतास्तस्य रिष्टं वेदत्रिकेब्दके । प्रायश्चित्ते कृते तत्र पुत्रपौत्रविवर्द्धनम् ॥ १८ ॥
भविष्यति तथा ह्यायुः सप्तसप्तमिताः समाः । जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम्॥१९॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तदशाधिकाष्टशततमः ॥ ८१७ ॥

श्रीसूर्य उवाच ।

खशदेशे ह्यभूत्कश्चिच्छूद्रो धर्मक्रियारतः । विवाहं कृतवान् पूर्वं कन्यायाः कृतजन्मनि ॥ १ ॥
दाने स्वल्पमतिस्तस्माच्चकारालपविधानतः । चौर्य्यकर्मरतः सोऽपि कदाचिद्दैवयोगतः ॥ २ ॥
चचार पर्वते सूत मार्गलुण्ठनतत्परः । अथो भाविवलात्तत्रः प्राप्ता काचिद्वरानना ॥ ३ ॥
पूर्णगर्भसमायुक्ता नानाभरणभूषिता । सा लुण्ठिता भयत्रस्ता तेन क्रूरधियाऽण्डज ॥ ४ ॥
सहायैस्तु परित्यक्ता ताडनान्महदाकुला । तस्या गर्भच्युतौ तत्र कन्यापुत्रौ बभूवतुः ॥ ५ ॥
असहायेन तेनैव पापमाचरितं पुरा । ततो यमपुरं प्राप्तो धर्माधर्मसमन्वितः ॥ ६ ॥
पापात्पापफलं भुक्त्वा पुण्यात्पुण्यफलं तथा । कन्यादानप्रभावेण स जातोऽत्र वणिक्सुतः॥७॥
कुरुक्षेत्राद्याम्यभागे त्रिंशद्योजनसंमिते । स रक्तकृष्णः क्षीणाङ्गः स्वल्पवित्तसमन्वितः ॥ ८ ॥
वातपित्तसमद्वन्द्वो बहुपुत्रीभिरन्वितः । स्वयं स्त्रीसंयुतो लोभी पितृभक्तिसमन्वितः ॥ ९ ॥
जातपुत्रविहीनश्च पापात्पुण्यात्तथा फलम् । चिह्नमङ्गादिदं सूत चन्द्रो मिथुनराशिगः ॥ १० ॥
न पश्यति सुतं कन्यां लाभे शुक्रः प्रपश्यति । तस्माद्बहुत्वं कन्याया न च पुत्रसुखं क्वचित्११॥
निष्कृतिं तत्प्रवक्ष्यामि पूर्वपापविशोधनीम् । शूद्रायाः प्रतिमा कार्या पलार्धार्द्धमितेन तु ॥१२॥
लेख्यौ गर्भच्युतौ बालौ सौवर्णाभूषणान्वितौ । सा देया तु विधिज्ञाय पूर्वपापविशुद्धये ॥ १३ ॥
दयः पंचमितैर्माषैस्तथा वेदनिधिः सुत । जपेच्च वेधसो मन्त्रं वैष्णवं त्र्यम्बकं तथा ॥ १४ ॥

---

१ पूर्वभागे इति—ख० पु० । २ 'कन्या'इति—ख० पु० ।

पूर्वपापविशुद्ध्यर्थं सहस्रं प्रतिदैवतम् । होमयेच्च तिलांस्तत्र सघृतास्थण्डिले शुभे ॥ १५
स्वगृह्योक्तविधानेन स्थापयित्वा हुताशनम् । ब्राह्मणान्भोजयेच्छक्त्या तेभ्यो दद्याच्च दक्षिणाम्
ततो रुद्रव्रतं कुर्य्यात्सर्वपापविशोधनम् । चतुर्दश्यां निराहारो रुद्रपूजनतत्परः ॥ १७
य एवं कुरुते सूत प्रायश्चित्तं प्रयत्नतः । तस्य पुत्रविवृद्धिः स्यादत्र जन्मनि वै ध्रुवम् ॥ १८
नैवं विधानं यः कुर्य्यान्न च पुत्रसुखं लभेत् । प्रायश्चित्तेऽकृते रिष्टं चत्वारिंशन्मितेऽब्दके॥१९
ह्यायुरब्दाश्चतुरशीतिः प्रायश्चित्ते कृतऽण्डज ॥ २० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोष्टादशाधिकाष्टशततमः ॥ ८१८ ॥

श्रीसूर्य उवाच ।

आसीत्पूर्वभवे कश्चिद्वंगदेशे द्विजो धनी । विद्याभ्यासयुतो नित्यं धर्मशास्त्रक्रियान्वितः ॥ १
दत्तानि तेन चाल्पानि दानान्यपि विधानतः । पर्वस्वपि च तेनैवाध्यापिता ब्राह्मणास्तथा ॥२
पापमाचरितं तेन भाविनोऽर्थस्य गौरवात् । कालयोगेन संप्राप्य ब्राह्मणेन कुटुम्बिना ॥ ३
स्थापितं तद्गृहे द्रव्यं घटे ताम्रमये स्थितम् । पुनर्दत्तं न तत्तस्मै लोभोपहतचेतसा ॥ ४
सर्वैर्मिलित्वा तद्भुक्तं स्त्रीपुत्रभ्रातृभिः सह । ततो यमपुरं प्राप्तः ससहायो द्विजोत्तमः ॥ ५
भुक्त्वा पापफलं न्यायात्पुण्यात्पुण्यफलं तथा । विद्यादानादिपुण्येन जातोऽसौ ब्राह्मणोऽधुना ॥६॥
देशं पञ्चनदं प्राप्य गौरः पित्ताधिको घृणी । वाचा मधुरया युक्तो राजसश्चतुरः सुधीः ॥ ७ ॥
दर्शनीयो नातिह्रस्वो नात्युच्चः क्रोधवर्जितः । सुखस्त्रीमानसंयुक्तः सदा सोऽतिधनैर्युतः ॥ ८ ॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । धूर्तः शठोऽल्पदो दम्भी स्वल्पधर्मक्रियान्वितः॥९
इष्टैर्मनोरथैर्हीनः पुत्रसन्ततिदुःखितः । ब्रह्मस्वभक्षणात्पूर्वं फलमत्र विनिश्चितम् ॥ १०
लक्ष्मैतदण्डजश्रेष्ठ पृच्छकस्यात्र जन्मनि । जन्मलग्नांत्सुते राशौ घटः पापसमन्वितः ॥ ११
सहायलक्षणं सर्वं वक्ष्याम्यथ खगेश्वर । पुत्राभावो भ्रातृहीनः स्त्रीसुतालपसमन्वितः ॥ १२
लक्षणैरेभिराढ्यस्य पृच्छकस्यात्र जन्मनि । प्रायश्चितं प्रवक्ष्यामि सर्वपापविशोधनम् ॥ १३
लक्ष्मीनारायणौ कार्य्यौ सुवर्णार्द्धमितौ शुभौ । तदधौ वाऽथ सौवर्णौ द्वयोर्वित्तानुसारतः॥ १४
स्थापयित्वा घटे ताम्रे सघृते वस्त्रवेष्टिते । संपूज्य गन्धपुष्पाद्यैर्ब्राह्मणाय प्रदापयेत् ॥ १५
चतुर्विंशसहस्राणि गायत्रीं च जपेत्ततः । होमयेच्च यथाशक्त्या कुण्डे वा स्थण्डिले शुभे ॥ १६
घृतमिश्रांस्तिलांस्तत्र शक्त्या विप्रांश्च भोजयेत् । मम जन्मदिने पश्चादाचरेद्व्रतमुत्तमम् ॥१७
य एवं कुरुते सूत प्रायश्चित्तं प्रयत्नतः । तस्य पुत्रविवृद्धिः स्यात्स्त्रीभ्यामत्रैव जन्मनि ॥ १८
नैवं विधानं यः कुर्य्याद्विप्रद्रव्यावनाशनम् । न च पुत्रसुखं लब्ध्वा न तस्य परमा गतिः ॥ १९
प्रायश्चित्तेऽकृतेऽरिष्टं पंचाशन्मितकेऽब्दके । प्रायश्चित्ते कृते ह्यायुः सप्तसप्तमिताब्दकम् ॥ २०
जन्मादिमरणांतं हि स्वल्पसेवात्र सूचितम् ॥ २१ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनविंशत्यधिकाष्टशततमः ॥ ८१९ ॥

श्रीसूर्य उवाच ।

वङ्गदेशे ह्यभूत्कश्चिद् वाहुजो धर्मसंयुतः । ग्रामाधिपश्चोग्रदण्डो गुरुभक्तिपरो दृढः ॥ १
स गत्वा तु कुरुक्षेत्रे सर्वस्वं विधिनाऽददात् । प्राप्ते सूर्य्यग्रहे सूत विप्राय च कुटुम्बिने ॥ २
पापमाचरितं तेन भाविनोऽर्थस्य गौरवात् । यौवने धर्षिता विप्रपत्नी चातिशुभानना ॥ ३

कामलोभेन सततं पतिस्तस्याः प्रपीडितः। एवं निवसतस्तत्र गतस्तु यमशासनम् ॥ ४ ॥
पापात्पापफलं भुक्त्वा पुण्यात्पुण्यफलं तथा। पूर्वपुण्यप्रभावेण स जातो वाहुजोऽधुना ॥ ५ ॥
ऐरावत्यास्तु निकटे त्रिंशद्योजनसंमिते। गौरः सुरूपो मतिमान् यशस्वी प्रियदर्शनः ॥ ६ ॥
पुत्रदारधनैर्युक्तो वहुमित्रः प्रतापवान्। राजसेवीतिविख्यातः सुखैश्वर्ययुतो नृपः ॥ ७ ॥
देशेदेशेऽधिकाराढ्य आद्यन्तसुखभागिह। दाता भोक्ता प्रधानश्च वहुपालनतत्परः ॥ ८ ॥
धर्मादिदं तथा पापात्क्रोधी दण्डरतो व्यपी। पूर्वस्त्रीसुखहीनस्तु मनोदुःखसमन्वितः ॥ ९ ॥
धर्षणाद्विजयोषायास्तत्पत्युस्तत्र ताडनात्। यौवने नेत्ररोगाढ्यश्चात्र जन्मनि निश्चयात् ॥ १० ॥
चिह्नमङ्गादिदं चन्द्रो भौमयुक्तस्तृतीयगः। वक्ष्यामि निष्कृतिं तस्य सर्वपापविशोधनीम् ॥ ११ ॥
हेम्नः पलैर्दशमितैः शिवः कार्यो विधानतः। सपत्नीको वृषस्थश्च सर्वाभरणभूषितः ॥ १२ ॥
तदर्द्धार्द्धमितो वापि त्रिषु वित्तानुसारतः। होमयेच्च तदग्रे तु त्र्यम्बकं तु सहस्रकम् ॥ १३ ॥
तिलाज्यमधुयुक्तेन कुण्डे वा स्थण्डिलेषु च। स च देयो विधिज्ञाय दद्रुरोगापनुत्तये ॥ १४ ॥
तन्मितं च तथा दद्याद्राजतं च गणेश्वरम्। संपूज्य विधिवन्मन्त्रैर्गन्धपुष्पोपचारकैः ॥ १५ ॥
य एवं कुरुते सूत विधिना पापशोधनम्। न तस्य दद्रुजा पीडा भविष्यति कदाचन ॥ १६ ॥
स्त्रीरिष्टं च तथा न स्यात्प्रायश्चित्ते कृतेऽधुना। प्रायश्चित्तेऽकृते त्वत्र दद्रुरोगो विवर्धते ॥ १७ ॥
नागसप्तमितायुः स्याद्रिष्टं चाकृतनिष्कृतेः। प्रणवाद्यस्तथा मन्त्ररुद्रयम्बकाय नमस्तथा ॥ १८ ॥

मंत्रः—"ॐ त्र्यम्बकाय नमः" इति।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोविंश्त्यधिकाष्टशततमः ॥ ८२० ॥

श्रीसूर्य उवाच।

वभूव वाहुजः कश्चिद् यामुने गरुडाग्रज। प्राग्भवे च द्विजश्रेष्ठो ग्रामाध्यक्षो धनाल्पकः ॥ १ ॥
विप्रोत्सङ्गतश्चाऽयं प्रयागे स्नानमाचरत्। एकदा तु वने गत्वा ददाह सघनं वनम् ॥ २ ॥
तत्र दग्धा महाजीवा वनाग्निज्वालया भृशम्। तेन कर्मविपाकेन पुत्रसौख्यविवर्जितः ॥ ३ ॥

अरुण उवाच।

निष्कृतिं वद मे स्वामिन् पुत्रदुःखविपूदनीम्। रिष्टात् प्राग् दिवसाध्यक्ष लोकानां हितकाम्यया[1] ॥ ४ ॥

श्रीसूर्य उवाच।

निष्कृतिं तस्य वक्ष्यामि जीवघातविमोचनीम्। यां कृत्वा विधिवत्सूत वंशवृद्धिः प्रजायते ॥ ५ ॥
षट्पले राजते पत्रे वेदाङ्कुलमिताब्दके। वनजीवास्तथा लेख्याः सुगन्धैः पञ्चभिर्युताः ॥ ६ ॥
सर्पवृश्चिकगोधाढ्याः पक्षिणां च तथालयाः। देया विप्राय विधिना पूजयित्वा कुटुम्बिने ॥ ७ ॥
तदर्धमितकैर्वापि द्व्योर्वित्तानुसारतः। वनदेवी तथा कार्या स्ववेदमितमापकैः ॥ ८ ॥
माषद्वयहिरण्येन तथा कुर्याद्धुताशनम्। संपूज्य दद्याद्विप्राय इमं मन्त्रमुदीरयेत् ॥ ९ ॥

मन्त्रः।

वनांतरगताः पूर्वं ये जीवा दाहिता मया। वनदेव्यादिदानात्तु गच्छन्तु मम पातकाः ॥ १० ॥
इत्युच्चार्य नरः सर्वं ब्राह्मणाय प्रदापयेत्। शृणुयाद्धरिवंशं वा त्रिरावर्त्य विधानतः ॥ ११ ॥
जपेत्सहस्रद्वितयं देव्या मंत्रं यथोक्तवत्। मम जन्मदिने पश्चादाचरेद्विधिना व्रतम् ॥ १२ ॥

मंत्रः—"ॐ ह्रीं वनान्तरगतायै नमः" इति।

---

१ दर्श इति—खपु०।

एवं यः कुरुते सूत त्रिषु पापविशोधनम् । तस्य पुत्रविवृद्धिस्तु जायतेऽत्रैव जन्मनि ॥ १
नैवं कुर्य्याच्च यो मोहात्तस्य पुत्रस्य नाशनम् । द्विपंचाशन्मितेऽरिष्टमायुः पञ्चाद्विवत्सरम् ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकविंशत्यधिकाष्टशततमः ॥ ८२१ ॥

श्रीसूर्य उवाच ।

कश्चिद्विप्रोऽभवत्पूर्वे सर्वधर्मपरायणः । गौडदेशेऽतितेजस्वी चोग्रदण्डः प्रतापवान् ॥ १
सप्तविंशन्मिते वर्षे गयाश्राद्धं चकार सः । काम्यश्राद्धानि तत्रैव दत्तान्यल्पविधानतः ॥ २
स मन्त्रवित्तथा शूरो राज्ञः शत्रोः पुरं गतः । स्वामिधर्मरतो दैवात्कृतवान् गोग्रहं पुरा ॥ ३
तत्रैका सुरभी सूत ह्यासन्नप्रसवा हृता । तेनाज्ञप्तेन तेनापि ताडिता गर्भदुःखिता ॥ ४
शल्यंगतेन दुःखेन मृता सा कालनोदिता । गर्भस्योऽपि मृतो वत्सो भाविनोर्थस्य गौरवात् ॥ ५
प्रतापलोभयुक्तेन तेन पापमुपार्जितम् । सहायैकसमायुक्तः स गत्वा यमशासनम् ॥ ६
पापात्पापफलं भुक्त्वा पुण्यात्पुण्यफलं तथा । पूर्वपुण्यप्रभावेण स जातः कुरुजाङ्गले ॥ ७
द्विजो मध्यमरूपाढ्यः पितृभक्तः कुलाग्रणीः । सुखैश्वर्य्ययुतो दाता महाधनसमन्वितः ॥ ८
देशेदेशेऽधिकाराढ्यः स्त्रीभोगी भ्रातृसंयुतः । मध्येन्त्येऽतिधनैर्युक्तो मतिमाँल्लोकविश्रुतः ॥ ९
प्राक्श्राद्धप्रमिते वर्षे जातपुत्रसमन्वितः । गयाश्राद्धादिदं सर्वं पापात्पापफलं शृणु ॥ १०
क्रूरचेष्टो महोग्रस्तु दुर्धर्षः क्रोधसंयुतः । नैककन्यो महालोभी धर्मेऽपूर्णोऽस्ति चाण्डज ॥ ११
गोवालवत्सकवधात्प्राग्जातशिशुनाशकः । यस्मात्प्रतापलोभेन गोभ्यो दत्तं भयं पुरा ॥ १२
तस्मात्प्रतापकालीने मध्ये वापि फलं त्विह्म । श्राद्धस्याल्पविधानात्प्राग्धने हानिः प्रजायते॥१३
चिह्नमेतच्छशी लग्ने शुभपापान्वितोऽस्तगः । योऽभूच्छ्राद्धे सहायः प्राक् पृच्छकस्य सुतस्त्विह १४
लक्षितो लक्षणैरेभिरवेहि गरुडाग्रज । वक्ष्यामि निष्कृतिं तस्य पूर्वपापविशोधनीम् ॥ १५
पलैरर्कमितैर्देया धेनुरत्र हिरण्मयी । पत्रे लेख्या सवत्सा च तदर्धार्धमिताऽथवा ॥ १६
सा देया तु विधिज्ञाय गन्धपुष्पैरलंकृता । तथा पशुतिर्देयः सुवर्णैकमितः प्रभुः ॥ १७
नारायणगणेशार्का देयास्तद्वन्मिताः तथा । गायत्र्यष्टसहस्रं तु त्र्यंबकं दिक्सहस्रकम् ॥ १८
अष्टाक्षरं जपेत्तद्वत्पूर्वपापविशोधनम् । होमयेच्च दशांशेन शक्त्या विप्रांश्च भोजयेत् ॥ १९
ततः शिवं सदा ध्यायेत्सर्वकामार्थसिद्धिदम् । य एवं कुरुते सूत पूर्वपापविशोधनम् ॥ २०
न तस्य दुरितं व्याधिर्न च सर्पभयं भवेत् । पुत्रपौत्रधनादीनां वृद्धिरत्रैव न क्षयः ॥ २१
नैवं विधानं यः कुर्य्याल्लोभान्मोहात्प्रयत्नतः । न च पुत्रधनादीनां वृद्धिरत्र प्रजायते ॥ २२
प्रायश्चित्तेऽकृते पुत्र रिष्टं षष्टिमिताब्दके । प्रायश्चित्ते कृतेऽशीतिसमायुर्जीवनं त्विह ॥ २३

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वाविंशत्यधिकाष्टशततमः ॥ ८२२ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यसौ वैश्यो बभूव कुरुजाङ्गले । बहुभृत्यसुखैर्युक्तः क्रोधी द्रव्यसमन्वितः ॥ १
विवाहं कृतवान् पूर्वं कन्याया ब्राह्मणस्य ह । हठी धर्मक्रियाहीनः सहायद्वयसंयुतः ॥ २
ऋतुप्राप्तां स दीनां च परित्यज्य शुभाननाम् । प्राददात्प्राक्निष्ठायां रतिं कामातुरोऽत्यलम् ॥३
स तेन कर्मणा युक्तो भुक्त्वा पापफलं त्विह । सहायद्वययुक्तश्च जातो वन्दीजनोऽधुना ॥ ४

१ दुर्व्यसनान्वितः ' इति—ख० पु० ।

शतद्रुके समीपस्थे गौरः श्रद्धान्वितः सुखी। सहायाढ्योल्पवित्तश्च त्यागी देवद्विजार्चकः ॥ ५ ॥
वाचा मधुरया युक्तः पुत्रोत्पत्तिविवर्जितः। प्राग्जन्मनि ऋतुस्नातां नागमद्भ्रूणहा ततः ॥ ६ ॥
स्त्रीत्यागी भ्रूणहा लोके पुत्रसंततिदुःखितः। सहायाभ्यां युतः पूर्वं पुंस्त्रीभ्यां लक्षणे शृणु ॥७ ॥
पुमानेकः सहायोऽभूत् सोऽत्र पुत्रविवर्जितः। सहजः पृच्छकस्यापि मृतो भ्राताऽधुनाण्डज ॥८॥
या स्त्री पूर्वं सहायासीत् कनिष्ठा साऽप्यपुत्रिणी। अत्र जन्मनि भार्या सा गर्भं नैव दधात्यसौ ९
लक्षणैरङ्कितं सर्वैरवेहि गरुडाग्रज। प्रायश्चित्तं प्रवक्ष्यामि येन पापक्षयो भवेत् ॥ १० ॥
लक्ष्मीनारायणं दद्याच्चतुष्पष्टिपलात्मकम्। तदर्धार्धपलैर्वापि द्विजाय विधिपूर्वकम् ॥ ११ ॥
पूजयित्वा तु गन्धाढ्यैः पुत्रपौत्रविवर्द्धनम्। कलशे स्थापयेत्ताम्रे नानाऋग्भिः प्रपूजिते ॥१२॥
तदग्रे होमयेद्धीमांस्तिलानष्टाक्षरेण तु। ब्राह्मणान्भोजयेत्पश्चाच्छक्त्या दद्याच्च दक्षिणाम् ॥ १३ ॥
एवं यः कुरुते सूत मुच्यते भ्रूणहत्यया। पुत्रपौत्रविवृद्धिः स्यादिह जन्मनि चाण्डज ॥ १४ ॥
नैवं कुर्य्यात्प्रयत्नेन प्रायश्चित्तं खगेश्वर। नास्य जीवति सन्तानं भविष्यति न संशयः ॥ १५ ॥
पंचाशदष्टवर्षेषु रिष्टं चाकृतनिष्कृतेः। प्रायश्चित्ते कृतेऽशीतिमितायुः कीर्तितं मया ॥ १६ ॥
ज्येष्ठे कृष्णचतुर्दश्यां निर्याणं कथितं ध्रुवम् ॥ १७ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोविंशत्यधिकाष्टशततमः ॥ ८२३ ॥

श्रीसूर्य उवाच।

प्रागासीत्क्षत्रियः कश्चिज्जाङ्गले च प्रतापवान्। धर्मशास्त्रक्रियायुक्तो ग्रामाध्यक्षो धनान्वितः ॥१॥
दत्तानि तेन दानानि प्राप्ते सोमग्रहे सुत। पर्वस्वापि च विप्रेभ्यः श्रद्धापूतेन चेतसा ॥ २ ॥
पापमाचरितं तेन भाविनोऽर्थस्य वै बलात्। ब्राह्मण्यां धारितो गर्भः कामलोभेन निश्चयात्॥३॥
यत्ने कृतेऽपि तत्रैव नासीद्गर्भस्य पातनम्। ततो लोकमयात्सूत विषं भुक्त्वा तु सा मृता ॥ ४ ॥
अर्भकोऽपि मृतस्तस्या गर्भे चोत्पातपीडनात्। सहायैकयुतेनैव कृतं प्राक्तन दारुणम् ॥ ५ ॥
ततो मृत्युवशं प्राप्तः ससहायो हि बाहुजः। गत्वा चान्द्रमसं लोकं भुक्त्वा भोगांश्च शाश्वतान्६॥
पापात्पापफलं भुक्त्वा नरकांश्चातिदारुणान्। महापापकृतादोषाद्गतिर्वै क्षत्रियादधः ॥ ७ ॥
शतद्रोः पूर्वभागे तु दशयोजनसंमिते। देशे जातः पूर्वपुण्यात् सः शूद्रश्चात्र जन्मनि ॥ ८ ॥
सुकर्माऽमितदः साधुः रक्तश्यामश्च मध्यमः। धनी सुखी पितृभक्तो नैकस्त्रीभोगसंयुतः ॥ ९ ॥
आद्यन्तसुखयुक्तश्च मतिमाँल्लोकविश्रुतः। पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् ॥ १० ॥
धूर्तः सकन्योऽतिशठश्चिन्तादुःखसमन्वितः। ब्राह्मण्यां वीर्यदानात्प्राक् तद्वधान्मृतपुत्रकः ॥११॥
लक्ष्मैतदत्र लग्नाच्च सोमः पापान्वितो रिपौ। गोस्त्रीविप्रवधाः पापाः पुत्रनाशकरा यतः ॥ १२ ॥
स्त्रीसाहाय्यकृतात्पापात्पूर्वं गर्भसमुद्भवात्। अत्र जन्मनि या नारी ज्येष्ठा संततिवर्जिता ॥ १३ ॥
लक्षितो लक्षणैश्चोक्तैः पृच्छकश्चात्र जन्मनि। वक्ष्यामि निष्कृतिं तस्य पूर्वपापविशोधनीम् ॥१४॥
ब्राह्मण्याः प्रतिमा कार्या पलैर्वेदमितैः शुभा। हिरण्मयी सगर्भा च पत्रे लेख्या प्रयत्नतः ॥१५ ॥
तदर्धार्धमिता वापि त्रिषु वित्तानुसारतः। संपूज्य गन्धपुष्पाद्यैः सा देया मंत्रपूर्विका ॥ १६ ॥
सुवर्णैकमितं दद्याच्छिवं पापप्रणाशनम्। राजतं च तथा दद्यात् सोमं चार्द्धपलात्मकम् ॥ १७ ॥
गायत्र्यष्टसहस्रं तु होमयेत्तद्दशांशतः। ब्राह्मणान्भोजयेत्पश्चात् पूर्वपापात्प्रमुच्यते ॥ १८ ॥
य एवं कुरुते सूत पूर्वपापविशोधनम्। तस्य पुत्रविवृद्धिः स्यात् स्त्रीभ्यामत्रैव जन्मनि ॥ १९ ॥

नैवं करोति यो मोहात् प्रायश्चित्तं त्रिधा मतम् । न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः ॥
प्रायश्चित्ते कृते ह्यायुः षडशीतिमिताब्दकम् । प्रायश्चित्तेऽकृते रिष्टं वर्षे षष्टिमिते ध्रुवम् ॥ २१

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्विंशत्यधिकाष्टशततमः ॥ ८२४ ॥

श्रीसूर्य उवाच ।

बभूव बाहुजः कश्चिद्ग्रामाध्यक्षो विराटजः । दत्तानि तेन दानानि गोभूम्यश्वादिकानि च ॥ १
ब्राह्मणेषु गृहस्थेषु सत्पात्रेषु विशेषतः । अथान्यग्रामपस्यापि क्षत्रियस्य महात्मनः ॥ २
एकपुत्रस्य पुत्रो वै भुजमूले पुराऽनघ । घातितस्तेन खड्गेन निशायां चौरकर्म्मणा ॥ ३
स मृतस्तेन दुःखेन भाविनोर्थस्य गौरवात् । तन्माता पुत्रदुःखेन मृता दुःखप्रपीडिता ॥ ४
वैरभावरतेनैव कृतं कर्मातिदारुणम् । एवं बहुतिथे काले गतोऽसौ यमशासनम् ॥ ५
भुक्त्वा पापाच्च नरकं पुण्यात्स्वर्गफलं तथा । पूर्वपुण्यप्रभावेण स जातो बाहुजोऽधुना ॥ ६
शतद्रुनिकटे देशे मेषऽर्के शनिसंयुते । कीटराशिगते जीवे सुते चापगते विधौ ॥ ७
गौरो धूर्तः प्रभुर्मध्यः क्वचित्पापरतः सुधीः । धनभोगसुखैर्युक्तो मितदो लोभसंयुतः ॥ ८
पितृमातृसुखैर्हीनो भृत्यस्त्रीबन्धुसंयुतः । पात्रे दानादिदं सर्वं फलं पापफलं शृणु ॥ ९
पूर्वे बालवधात्पापादिह जन्मनि चाण्डज । द्विवेदमितवर्षान्तं जातपुत्रविनाशकः ॥ १०
तथा प्राग् बाहुजवधाद्भ्रामबाहुविवर्जितः । लक्षणैर्लक्षयेदेतैः पृच्छकं चात्र जन्मनि ॥ ११
निष्कृतिं तस्य वक्ष्यामि पूर्वपापविशोधनीम् । पुत्रवृद्धिकरीं धन्यां सर्वारिष्टविनाशनीम् ॥ १२
पलपंचमितं कुर्य्याद्बाहुजं च हिरण्मयम् । तन्मातरं च सौवर्णीं सुवर्णैकमितां शुभाम् ॥ १३
लक्ष्मीनारायणं तद्वद्राजतं त्रिपलात्मकम् । तन्मितां राजतीं गौरीं दद्यान्मन्त्रैः प्रपूजिताम् ॥ १४
गायत्र्यष्टसहस्रं तु जपेदष्टाक्षरं तथा । शृणुयाद्धरिवंशं वा शतावर्त्यविधानतः ॥ १५
लक्षरुद्रं त्रिगुणितं कुर्य्याद्वा विधिपूर्वकम् । यो न कुर्याद्विधानैकं त्रिष्वप्येतेषु निश्चितम् ॥ १६
न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः । वेदवेदमिते वर्षे रिष्टं चैव प्रकीर्तितम् ॥ १७
यः कुर्याद्विधिवत्सूत प्रायश्चित्तं प्रयत्नतः । तस्य पुत्रविवृद्धिः स्यादत्र जन्मनि निश्चयात् ॥ १८
एकाशीतिसमायुः स्याच्चैत्रादौ मृगभे मृतिः । जन्मादिमरणान्तं हि सर्वं ते कथितं मया ॥ १९

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः पंचविंशत्यधिकाष्टशततमः ॥ ८२५ ॥

श्रीसूर्य उवाच ।

कीरदेशे समुत्पन्नः कश्चित्क्षात्रे कुले सुधीः । विप्रोत्सङ्गगतस्तत्र प्रयागे मकरे वसन् ॥ १
कृतवान्विधिवत्स्नानं दानं स्वल्पं च शक्तितः । दैवयोगाद्गृहं प्राप्य कृतवान्कर्म दारुणम् ॥ २
कामलोभेन सततं शूद्रायां गर्भश्च धारितः । स्त्रीसाहाय्ययुतेनेदं पापमाचरितं तथा ॥ ३
विविधैरौषधैस्तस्या गर्भपातः कृतः पुरा । एवं सर्वैर्मिलित्वा तु पातनं बहुधा कृतम् ॥ ४
ततो बहुतिथे काले गतास्ते यमशासनम् । भुक्त्वा पापफलं पापात्पुण्यात्पुण्यफलं तथा ॥ ५
तीर्थराजप्रभावेण स जातो ब्राह्मणोऽधुना । सेऽर्के शनौ सिंहगते सूर्ये कन्यागते कुजे ॥ ६
मृगे ह्यैरावतीतीरे नात्युच्चो न लघुः सुधीः । श्लिष्टवाक् स्वल्पधर्माढ्यः पितृमातृविवर्जितः ॥ ७
सहोदरधनैर्हीनो जातपुत्रविनाशकः । परदाराभिगमनाद्गर्भपातनदोषजात् ॥ ८
पापात्पूर्वकृतात्सूत लक्षणैर्लक्षयेदिह । स्त्रीसाहाय्यात्तथा सूत प्राक् पापं समुपार्जितम् ॥ ९

तनैकाऽत्र हि पत्नी च तयोः पुत्रशुचान्विता । तथैका बहुपापत्वाद्भ्रातुः पत्यग्रजस्य च ॥१०॥
पुत्रभर्तृविहीनाऽत्र पूर्वपापात्प्रदृश्यते । वक्ष्यामि निष्कृतिं सूत पूर्वपापविशोधनीम् ॥ ११ ॥
सार्द्धवेदमितैः स्वर्णैः पद्मं कुर्य्याद्धिरण्मयम् । सनालमष्टपत्राढ्यं शुभं तद्ब्रह्मदैवतम् ॥ १२ ॥
पूरयेत्पारदेनैव तस्य नालं प्रयत्नतः । दद्याद्वेदविदे सूत विधिमन्त्रं पठन्सुधीः ॥ १३ ॥
"ब्रह्मयोनिरिदं पद्मं माध्यं स्थानं च शाश्वतम् । गर्भधारणपापोत्थदोषनाशकरं परम् ॥ १४ ॥
ददेऽहं विप्रमुख्याय पूर्वपापविशुद्धये ।" इत्युच्चार्य नरो दद्यादस्माद्दोषात्प्रमुच्यते ॥ १५ ॥
राजतं च ततो दद्याद् ब्रह्माणं तन्मितं सुत । रुद्राणामथवा लक्षं पूजयेद्विधिनाण्डज ॥ १६ ॥
गायत्रीं च यथाशक्त्या जपेच्चैवाघमर्षणम् । नैवं विधानं यः कुर्य्याल्लोभान्मोहाद्विशेषतः ॥१७॥
न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः । श्रुत्वैवं विधिवत्कुर्य्याद्विधानैकं समाहितः ॥ १८ ॥
न तस्य पुत्रमरणं भविष्यति ममाज्ञया । धनपुत्रान्वितो मध्ये ह्यायुरष्टाद्विवर्षकम् ॥ १९ ॥
रिष्टं पिष्टमितेऽब्दे तु तस्य चाकृतनिष्कृतेः ॥ २० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चविंशत्यधिकाष्टशततमः ॥ ८२६ ॥

श्रीसूर्य उवाच ।

आसीद्राजकुलोत्पन्नः पूर्वजन्मनि यामुने । धनधान्यसमायुक्तो रुद्रभक्तिपरोण्डज ॥ १ ॥
दत्तानि तत्र दानानि पर्वस्वपि च शक्तितः । अथो भाविबलात्सूत ब्राह्मणेन तपस्विना ॥ २ ॥
तद्गृहे स्थापितं द्रव्यं पुनर्दत्तं न तेन च । सहायैकयुतेनैव ब्रह्मस्वं भक्षितं पुरा ॥ ३ ॥
स च कालवशं प्राप्य भुक्त्वा पापफलं महत् । पुण्यात्पुण्यफलं तत्र स शूद्रो जाङ्गलेऽधुना ॥ ४ ॥
देशे रामहदाद्याम्ये तत्त्वयोजनसंमिते । कृष्णस्तनौ सुते यस्मात् क्रूराः पश्यन्ति पापतः ॥ ५ ॥
ह्रस्वो मध्यो धनाढ्यस्तु श्रेष्ठो मतिसुखान्वितः । स्त्रीभृत्यभ्रातृसंयुक्तो मध्यान्ते सुखभागिह॥६॥
ब्रह्मस्वहरणात्पूर्वं चात्र सन्ततिवर्जितः । दाने स्वल्पमतिर्धूर्तः पापात्सर्वमिदं सुत ॥ ७ ॥
अथो भ्रातृसाहाय्यात्तु ब्राह्मणस्वं हृतं पुरा । तेन तत्सहजो ज्येष्ठः पुत्रहीनोऽत्र जन्मनि ॥ ८ ॥
लक्षितो लक्षणैरेभिः पृच्छको विनतासुत । निष्कृतिं च प्रवक्ष्यामि पूर्वपापविशोधनीम् ॥ ९ ॥
लक्ष्मीश्च राजती कार्या पलैर्दशमितैः शुभा । सर्वावयवसम्पन्ना पीतवस्त्रविभूषिता ॥ १० ॥
ब्राह्मणाय च सा देया मन्त्रेणानेन धीमता । "लक्ष्मि त्वं सर्वभूतानां कामदा मोक्षदायिनी ॥११॥
पूर्वजन्मार्जितात्पापान्मां रक्ष शरणागतम्" । इत्युच्चार्य नरो दद्याद्विप्रद्रव्याघनाशनम् ॥ १२ ॥
तथा पञ्चपलैः सोमो राजतश्चोक्तरूपवत् । पलद्वयमितौ तद्वद्धनाधिपदिनेश्वरौ ॥ १३ ॥
पूजयित्वा तु गन्धाद्यैर्दद्यात्सर्वान्दिवौकसः । जपेत्पञ्चसहस्रं तु गायत्र्या होमयेत्तथा ॥ १४ ॥
ब्राह्मणान्भोजयेच्छक्त्या शिवभक्तान्विधानतः । अनेन विधिना यस्तु प्रायश्चित्तं समाचरेत्॥१५॥
तस्याऽत्र पुत्रयुगलं कन्यैका च भविष्यति । न करोति च यो मोहाद्विधिवत्पापशोधनम् ॥ १६ ॥
तस्य पञ्चमिताब्दान्तं न च पुत्रसुखं त्विह । आयुश्चात्र तदब्दान्तं प्रायश्चित्तेऽकृते धुना ॥१७॥
प्रायश्चित्ते कृते त्वायुरधिका सप्ततिः समाः ॥ १८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तविंशत्यधिकाष्टशततमः ॥ ८२७ ॥

श्रीसूर्य उवाच ।

अभूद्वैश्यकुलोत्पन्नो धनधान्यसमन्वितः । सरस्वत्याश्च निकटे विष्णुधर्मसमन्वितः ॥ १ ॥

दत्तानि तेन दानानि ब्राह्मणेषु च शक्तितः । पर्वस्वपि च तेनैव श्रद्धाहीनेन चेतसा ॥ २
दैवादजा द्विजस्याथ प्राप्ता वै गर्भसंयुता । वैरिभावाद्धातयित्वा भुक्ता तेन विजानता ॥ ३
तत्सुताश्च तथा सूत पापमाचरितं त्विदम् । धर्माधर्मफलं भुक्त्वा गत्वा तत्र यमालयम् ॥ ४
पूर्वपुण्यवशात्सूत स जातः पादजोऽधुना । सरस्वत्या याम्यभागे विंशद्योजनसंमिते ॥ ५
स रक्तकृष्णः क्षीणाङ्गो विष्णुभक्तिसमन्वितः । चिंताधिकः स्वल्पधनः स्त्रीभ्रातृसुखसंयुतः॥ ६
पुण्यादिदं तथा पापाज्जातपुत्रविनाशकृत् । स्त्रीसाहाय्ययुतो यस्मात्सा स्त्री त्वत्र प्रपीडिता ॥ ७
तस्य चिह्नमिदं ज्ञेयं मेषः पञ्चमभावगः । पापयुक्तस्तथा दृष्टो राहुरेकादशे स्थितः
लक्षणैर्लक्षितः प्रोक्तैरवेहि गरुडाग्रज ॥ ८ ॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन् सर्वारिष्टनिषूदनीम् । इह पुत्रकरीं धन्यां लोकानां हितकाम्यया ॥ ९

श्रीसूर्य उवाच ।

निष्कृतिं तत् प्रवक्ष्यामि येन पापक्षयो भवेत् ॥ १० ॥
पलैर्द्वादशभिः कार्या मेषी गर्भसमन्विता । राजती च तदर्द्धा वा द्वयोर्वित्तानुसारतः ॥ ११
मन्त्रमेतं समुच्चार्य देया विप्राय धीमते । मया पूर्वभवे भुक्ता मेषी गर्भसमन्विता ॥ १२
ब्राह्मणस्य ददाम्यस्मान्मेषीं रौप्यमयीं शुभाम् । दैवो वैश्वानरो यस्मात् पशुघातात् प्रमुच्यतु॥ १३
तस्माद्वैश्वानरो देवो देयश्चार्द्धप्रमाणतः । जपेद्धौताशनं मन्त्रं सहस्रं पाशुपं तथा ॥ १४
होमः कार्यो दशांशेन स्थापयित्वा हुताशनम् । तण्डुलाज्ययवान्हुत्वा तिलान्संमिश्र्य यत्नतः १५
ब्राह्मणान्भोजयेच्छक्त्या तेभ्यो दद्याच्च दक्षिणाम् । य एवं कुरुते सूत पूर्वपापविशोधनम्॥ १६
तस्य वंशविवृद्धिः स्यादायुरब्दास्त्रिसप्ततिः । प्रायश्चित्तेऽकृते रिष्टं खवेदभितकेऽब्दके ॥ १७
यदन्तरगतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ १८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाविंशत्यधिकाष्टशततमः ॥ ८२८ ॥

श्रीसूर्य उवाच ।

वैनतेय महाभाग शृणु चास्य विचेष्टितम् । कश्चिद्द्विजोऽभवत्पूर्वं वङ्गदेशेऽपि ग्रामपः ॥ १
धर्मशास्त्रक्रियाहीनः पित्रोः सुखसमन्वितः । दत्तानि तेन दानानि ब्राह्मणेषु च शक्तितः ॥ २
सत्पात्रेषु गृहस्थेषु श्रद्धापूतेन चेतसा । मृगयायै गतो विप्रः कदाचिद्दैवयोगतः ॥ ३
घोरं कर्म कृतं तेन प्रारम्भे यौवनस्य च । लुण्ठितो ब्राह्मणस्तत्र प्रहारैर्धर्षितो भृशम् ॥ ४
हतोऽप्यायुर्बलेनैव न स मृत्युवशं गतः । ब्रह्मस्वमिति तज्ज्ञात्वा न भुक्तं केनचिद् गृहे ॥ ५
तेनैव भक्षितं सूत येन विप्रः प्रपीडितः । स गत्वा यमलोकं तु भुक्त्वा तु यमशासनम् ॥ ६
पात्रदानवशात्सूत स जातः क्षत्रियोऽधुना । देशे वैषाशिके लग्ने चापसंस्थेऽस्तगे खौ ॥ ७
मेषगे राहुयुक्तेऽथ सौम्यर्क्षे विधुसंयुते । स गौरो दर्शनीयाङ्गः सत्त्ववान्स्वल्पवित्तभाक् ॥ ८
धर्मे चाल्पमतिर्भ्रातृपितृमातृसमन्वितः । दानादिदं फलं सूत तथा पापफलं शृणु ॥ ९
यत्रयत्र कृता घाता प्राग्भवे ब्राह्मणस्य च । इह जन्मनि तत्रास्ति बाल्ये कुष्ठगदान्वितः ॥ १०
अथो स्त्रीपुत्रहीनोऽत्र जायते गरुडाग्रज । यौवनेऽपि च वार्द्धक्ये तस्येदं कर्मणः फलम् ॥ ११
एभिश्च लक्षणैः सूत लक्षणीयोऽत्र पृच्छकः । निष्कृतिं परमां सूत वक्ष्यामि शृणु तत्त्वतः १२
गायत्रीं विधिना जप्त्वा कांटिं शुद्धिमवाप्नुयात् । प्रयागे निवसन्धीरः काश्यां वा कुरुजाङ्गले १३

अथवाऽष्टसहस्राणि जप्त्वा कुर्य्यादिमं विधिम् । हिरण्मयौ सोमविप्रौ कार्य्यौ सुस्पष्टकावुभौ ॥ १४ ॥
पत्रेऽथ वा च तौ लेख्यौ सर्वलक्षणसंयुतौ । देयौ विप्राय विधिवत्पूजयित्वा प्रयत्नतः ॥ १५ ॥
प्रायश्चित्ते कृते सूत कुष्ठहानिः प्रजायते । स्त्रीपुत्रसुखमत्रैव भवत्येव न संशयः ॥ १६ ॥
प्रायश्चित्तं न कुर्य्याच्चेद्भवेद्रोगविवर्धनम् । न पुत्रसुखमाप्नोति स्वयं जीवन्कदाचन ॥ १७ ॥
रिष्टं द्वात्रिंशदब्दे तु जीवनं वर्षसप्ततिम् । आनन्त्यात्खलु जीवानां विस्तरं नोदितं मया ॥ १८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनत्रिंशदधिकाष्टशततमः ॥ ८२९ ॥

श्रीसूर्य उवाच ।

पृच्छको विधिना सूत दानधर्मरतो भवेत् । वैश्यः पूर्वभवे सूत व्यापारकुशलः सदा ॥ १ ॥
दानयज्ञरतो नित्यं ब्राह्मणातिथिपूजकः । तद्गृहे धान्यराशिं तु भक्षयन्ती क्षुधार्दिता ॥ २ ॥
आसन्नप्रसवा सूत सुरभी कालरोहिता । भृशं तेन हता कुक्षौ लोभोपहतचेतसा ॥ ३ ॥
बालवत्सो मृतस्त्वत्र गर्भस्थश्चालिताडनात् । तद्दुःखेन मृता सा तु धेनुराक्रन्दती पुरा ॥ ४ ॥
एवं हि निवसंस्तत्र मृतोऽसौ यमशासनम् । प्राप्य स्वर्गे बहून्भोगान्भुक्त्वा पापफलं तथा ॥ ५ ॥
शतद्रुनिकटे देशे जातोऽयं ब्राह्मणोऽधुना । धनुर्लग्नगते सौरौ गुरौ मीनेऽप्यलौ स्थितौ ॥ ६ ॥
कुलाग्रणीः कार्यकरो गुणी पित्तकफान्वितः । मध्यरूपयुतः श्रीमान् द्विभार्यो वित्तसंयुतः ॥ ७ ॥
चन्द्रः पापयुतस्तत्र कन्यायां समवस्थितः । गोबालवत्सकवधात् पापात्पूर्वादपुत्रकः ॥ ८ ॥
स्त्रीसाहाय्ययुतो यस्मात् पूर्वजन्मन्यभूदसौ । तेन कर्मविपाकेन स्त्री ज्येष्ठा पुत्रवर्जिता ॥ ९ ॥
प्रायश्चित्ते कृते पुत्रः कनिष्ठायां भविष्यति ॥ १० ॥

अरुण उवाच ।

प्रायश्चित्तं वद स्वामिन्येन पापक्षयो भवेत् । कथ्यतां दिवसेशान लोकानां हितकाम्यया ॥ ११ ॥

श्रीसूर्य उवाच ।

प्रायश्चितं प्रवक्ष्यामि शृणुष्वाथ खगेश्वर । सुवर्णदशका सूत धेनुः कार्या सगर्भिका ॥ १२ ॥
सर्वालंकारयुक्ता च पत्रे लेख्या यथोक्तवत् । तदर्धार्धप्रमाणा वा त्रिषु वित्तानुसारतः ॥ १३ ॥
संपूज्य नाममन्त्रैस्तु सा देया ब्राह्मणाय गौः । "यन्मया पूर्वजन्मन्यपि पापं गोघाततः कृतम् ॥ १४ ॥
तदत्र पापनाशाय ददेऽहं गां हिरण्मयीम्" । मन्त्रमेनं समुच्चार्य्य दद्याद्विप्राय धीमते ॥ १५ ॥
गायत्र्यष्टसहस्रं तु होमयेत्तदनन्तरम् । आसन्नप्रसवामेकां दद्याद्गां भोजयेद् द्विजान् ॥ १६ ॥
अनेन विधिना यस्तु प्रायश्चित्तं समाचरेत् । तस्य सन्ततिवृद्धिः स्यादत्र जन्मनि वै सुत ॥ १७ ॥
न करोति यदा श्रुत्वा प्रायश्चित्तं त्रिधा मतम् । इह जन्मन्यपुत्रः स्यान्मृते नरकमाप्नुयात् ॥ १८ ॥
एकहीनेऽथ पञ्चाशदब्देमृत्युर्ज्वरेण वै । प्रायश्चित्ते कृते ह्यायुः षष्टिरेकयुता समाः ॥ १९ ॥
कन्यागते रवौ चन्द्रे मीनस्थे मरणं ध्रुवम् ॥ २० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिंशदधिकाष्टशततमः ॥ ८३० ॥

अरुण उवाच ।

भूमिदेवकुलोत्पन्नः पूर्वजन्मन्यथात्र च । पृच्छको जगतां नाथ तस्य कर्म प्रकाशय ॥ १ ॥

---

१ रंक इति—ख० पु० ।

श्रीसूर्य उवाच ।

आसीत्पूर्वभवे विप्रो गिरिवासी जितेन्द्रियः । विद्याभ्यासरतो नित्यं सत्यधर्मपरायणः ॥ ७
दत्तानि तत्र दानानि ब्राह्मणेभ्यो हि शक्तितः । पर्वस्वपि च तेनैवाध्यापिता ब्राह्मणाः खग ॥ ८
अथ भाविवलात्सूत ब्राह्मणेन तपस्विना । स्थापितं तद्गृहे स्वर्णं लोभयुक्तेन तेन च ॥ ४
ततो बहुतिथे काले कालधर्ममुपेयिवान् । स्वर्णापहारी सततं गतो हि यमशासनम् ॥ ५
पापात्पापफलं भुक्त्वा पुण्यात्पुण्यफलं तथा । पूर्वपुण्यप्रभावेण जातोऽयं ब्राह्मणोऽधुना ॥ ६
सौराष्ट्रे च तुलालग्ने कृशो नातिलघुः सुधीः । धर्मकर्मक्रियायुक्तो लोभी दुःखसमन्वितः ॥ ७
गौरवर्णः शनिर्यस्माल्लग्नगः सुतगः शशी । बहुकन्योऽल्पपुत्रश्च तस्माज्जीवोऽधुनाऽण्डज ॥ ८
यौवनें स्त्रीसुखं त्वत्र द्विपञ्चाशन्मिताब्दके । भृशं पुत्रसुखं प्राप्तं पूर्वं ब्राह्मणपूजनात् ॥ ९
कर्कटस्थौ सूर्य्यजीवौ तस्माद्राजोपसेवकः । सुवर्णहरणाद्दोषात्पूर्वजन्मनि मानद ॥ १०
कुनखी ह्यत्र विज्ञेयो लक्षणैस्त्वैहिकैरसौ । अथो भ्रातृसाहाय्यात्तु ब्राह्मणस्वं हृतं पुरा ॥ ११
तेन तत्सहजो ज्येष्ठः पुत्रहीनोऽत्र जन्मनि । पृच्छकस्य तथा वर्षे षट्पञ्चाशन्मिते ध्रुवम् ॥ १२
पुत्ररिष्टं विजानीयात् स्वदेहे वापि जायते ॥ १३ ॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन् पुत्ररिष्टविनाशनीम् । त्वत्तोऽहं श्रोतुमिच्छामि सर्वलोकोपकारकम् ॥ १४

श्रीसूर्य उवाच ।

पलत्रयसुवर्णाढ्यां गां दद्याद्ब्राह्मणाय वै । तदर्धार्धमितां वापि श्रेष्ठमध्यकनिष्ठिकाम् ॥ १५
त्रिषु वित्तानुसारेण तत्पूजादिककल्पना । सुवर्णहरणात्पापाद्दोदानान्मुच्यतेऽधुना ॥ १६
षट्पञ्चाशन्मिते वर्षे रिष्टं चाकृतनिष्कृतेः । प्रायश्चित्ते कृते सूत पूर्णायुर्जायते नरः ॥ १७
सप्तसप्ततिवर्षाणि सपुत्रो जीवति ध्रुवम् । कार्तिके कृष्णपञ्चम्यां शशिन्यार्द्रागतेऽण्डज ॥ १८
वृषलग्ने च निधनं पृच्छकस्य भविष्यति ॥ १९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकत्रिंशदधिकाष्टशततमः ॥ ८३१ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यभूत्काश्चिद् वैश्यो धर्मपरायणः । मथुरायां महाभाग भिषग्वृत्तिविशारदः ॥ १
भंजिताश्च महारोगा गवां तेन महात्मना । दत्तानि तत्र दानानि पर्वस्वपि च शक्तितः ॥ २
पापमाचरितं तेन कामलुब्धेन चेतसा । स्वज्ञातिवनितायां वै व्यभिचारं चकार सः ॥ ३
तस्यास्तत्राऽभवद्गर्भः पातनं हि चकार सः । महौषधैः स्वेदनाद्यैः परीवादादथाऽण्डज ॥ ४
सा मृता तेन दुःखेन गर्भपातेन निश्चितम् । पत्नीसाहाय्यात्सततं सर्वमेतदुपार्जितम् ॥ ५
ततो यमपुरं प्राप्तः ससहायोण्डजोत्तम । भुक्त्वा पापफलं पापात्पुण्यात्पुण्यफलं तथा ॥ ६
गवां दुःखापहारेण पुण्येनात्र वणिक्सुतः । जातो रामह्रदाद्याम्ये षष्टियोजनसंमिते ॥ ७
नात्युच्चः श्यामलो भव्यः स्वल्पवित्तसमन्वितः । चिह्नमङ्गात्पञ्चमेऽजे शुभदृष्टिविवर्जिते ॥ ८
चन्द्रे मिथुनराशिस्थे भौमदृष्टे च पुत्रक । साहाय्यलक्षणं सर्वं शृणुष्वाथ खगेश्वर ॥ ९
या स्त्री पूर्वं सहायासीद् गर्भपातनकर्म्मणि । पृच्छकस्य तु सा नारी गर्भदुःखाऽऽकुलाऽत्र च ॥ १०

---

१ 'तन्न्यूनाधिकमध्यमा' इति ख० पु० । २ 'पित्त' इति—ख० पु० ।

वक्ष्यामि निष्कृतिं तस्य सर्वपापप्रणाशनीम्। माषैस्त्रिंशन्मितैरत्र कार्या वैश्या हिरण्मयी ॥११॥
अपि गर्भयुता लेख्या सुगन्धैश्चर्चिता सुत। तदर्धमितिका वाऽपि द्वयोर्वित्तानुसारतः ॥ १२ ॥
सा देया च विधिज्ञाय मन्त्रमेनमुदीरयेत्। गर्भपातनजादोषात् पूर्वपापविशुद्धये ॥ १३ ॥
इत्युच्चार्य्य नरो दद्यात् सर्वपापविशोधनम्। सार्द्धं सहस्रद्वितयं गायत्रीं त्र्यम्बकं तथा ॥ १४ ॥
जपेद्धुत्वा दशांशेन पूर्वपापप्रणाशनम्। ब्राह्मणान्भोजयेच्छक्त्या दद्याच्चैव तु दक्षिणाम् ॥१५॥
एवं विधानं यः कुर्य्याद्विधिना पापशोधनम्। उत्पत्तिर्जायते तस्य सन्ततेर्नात्र संशयः ॥१६॥
न कुर्य्याद्विधिवत्तत्र लोभान्मोहाद्विशेषतः। इह जन्मन्यपुत्रत्वं जायते चान्यजन्मनि ॥ १७ ॥
पञ्चसप्तसमायुः स्यात्प्रायश्चित्ते कृते सति। चत्वारिंशन्मितेऽरिष्टं तस्य चाकृतनिष्कृतेः ॥१८॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वात्रिंशदधिकाष्टशततमः ॥ ८३२ ॥

श्रीसूर्य उवाच।

राजपुत्रोऽभवत्पूर्वं क्रूरकर्म्मा प्रतापवान्। धनधान्यसमृद्धोऽपि वङ्गदेशे वसन्सदा ॥ १ ॥
वाचकेभ्यः प्रदत्तानि गोभूम्यश्वादिकानि च। अथो भाविवलात्सूत लोभोपहतचेतसा ॥ २ ॥
सीम्नि वादे हृतं द्रव्यं ब्राह्मणानामधर्म्मतः। द्विजेन वै सहायेन कृतं तत्कर्म दारुणम् ॥ ३ ॥
भूमिवादे मृतस्तत्र सङ्ग्रामे कालनोदितः। भुक्त्वा भोगाञ्शुभान् स्वर्गे पापात्पापफलं तथा॥४॥
पूर्वपुण्यप्रभावेण स जातः पर्वतोऽधुना। भूमिपालकुलेऽत्युग्रे सिंहलग्ने गुरावजे ॥ ५ ॥
सूर्य्ये मेषगते चन्द्र चापस्थे पापसंयुते। गौरः शूरो महोग्रस्तु बहुकन्यः कृती शुभः ॥ ६ ॥
ददाति शक्तितो धीमान्नात्युच्चो बन्धुसंयुतः। बहुव्ययपरो नित्यं पैत्तिकः प्रियवाग्घृणी ॥ ७ ॥
बहुभार्यो यशस्वी च भृत्यवाहनसंयुतः। अष्टाविंशन्मिते वर्षे स्वल्पपुत्रः सुखान्वितः ॥ ८ ॥
अन्तरायोद्भवैः पुत्रैरतिदुःखप्रपीडितः। ब्रह्मस्वहरणात्पूर्वं धनहीनोऽत्र दृश्यते ॥ ९ ॥
सहायो यो द्विजः पूर्वं भवेऽभूद्विनतासुत। तुलायां सोऽनुजो जातश्चात्र जन्मन्यपुत्रकः ॥ १० ॥
शृणु सूत प्रवक्ष्यामि निष्कृतिं पापकर्मणः। यां कृत्वा विधिवज्जन्तुरिह पापात्प्रमुच्यते ॥११॥
पुण्येऽह्नि विप्रकथिते धेनूनां पञ्चकं सुत। दद्याच्च वृषभं गौरं पृष्ठे वस्त्रयुगान्वितम् ॥ १२ ॥
सुवर्णशृङ्गसहितं तथा क्षितियुतं शुभम्। मन्त्रेणानेन विधिवत्प्रष्टा श्रद्धासमन्वितः ॥ १३ ॥
भूमिभागयुतं गौरं वृषभं रुद्रदैवतम्। ददेऽहं सीम्नि द्रव्योत्थपापनाशाय वै द्विज ॥ १४ ॥
अथो स्वर्णद्वयाढ्यं तु शुभं दद्यात्तुरङ्गमम्। कर्मप्रकाशकायैव मन्त्रमेतमुदीरयेत् ॥ १५ ॥
"सोपस्करं काञ्चनाढ्यमश्वं तुभ्यमहं ददे। ब्रह्मस्वहरणात्पापान्मोक्षं कुरु ममानघ" ॥ १६ ॥
एवमुच्चार्य दद्याच्च पूजिताय द्विजातये। मुच्यते पूर्वपापाच्च ब्रह्मस्वहरणाद्ध्रुवम् ॥ १७ ॥
शृणुयाद्धरिवंशं च त्रिरावर्त्य विधानतः। होमयेदृशसाहस्रं ब्राह्मणान्पञ्च भोजयेत् ॥ १८ ॥
य एवं कुरुते सूत विधिना पापशोधनम्। तस्य संततिवृद्धिः स्यादिहैव फलमश्नुते ॥ १९ ॥
नैवं कुर्य्याच्च विधिवत् तस्यारिष्टादिजं भयम् ॥ २० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयस्त्रिंशदधिकाष्टशततमः ॥ ८३३ ॥

श्रीसूर्य उवाच।

पृच्छकोऽयमयोध्यायामभूच्छूद्रश्च धार्म्मिकः। धनधान्यसमृद्धस्तु यशस्वी पितृवल्लभः ॥ १ ॥
गयायां द्वादशे वर्षे गतो मातृसाहाय्यतः। सानुजश्च सपत्नीकः सहायत्रयसंयुतः ॥ २ ॥

गत्वा च विधिवच्छ्राद्धं कृतवान्गरुडाग्रज । तस्य पुण्यप्रभावेण पितरश्च दिवं गताः ॥ ८
अथ गत्वा गृहे वर्षे चत्वारिंशन्मिते ध्रुवम् । कृतवान्दारुणं कर्म्म यौवने काममोहितः ॥ ९
स्वजातिजं धर्मशीलं शूद्रं हत्वा महौषधैः । पत्नीत्वे स्थापिता तत्र भार्या कामविमोहिता ॥ १०
सर्वस्वं तस्य यत्किंचिद् गृहीतं विविधैश्छलैः । तस्य पुत्राश्च ये जातास्ते हतास्तस्य भार्यया ॥ ११
सपत्नीभावदुःखेन कृतं कर्म्मातिदारुणम् । पृच्छकस्य तु या माता तयाप्यनुकृतं विदम् ॥ १२
स्त्रीयुतोऽसौ मृतस्तत्र गतस्तु यमशासनम् पापात्पापफलं भुक्त्वा पुण्यात्पुण्यफलं तथा ॥ १३
गयाश्राद्धप्रभावात्तु स जातः पृथिवीपतिः । शतयोजनविस्तीर्णे देशे पर्वतमाश्रिते ॥ १४
पितृभक्तिविशेषात्तु चैहिकं लक्षणं त्विदम् । पितृभे जननं चास्य गुरुचन्द्रौ तु सिंहगौ ॥ १५
वृषराशिगतो भानुर्भौमाज्ञेया नभश्चराः । जन्मनो द्वादशे वर्षे राज्यप्राप्तिर्न संशयः ॥ १६
जातोऽत्र रक्तकृष्णोऽसौ देवब्राह्मणपूजकः । पितृभक्तिरतो विद्वान् गीतनृत्यप्रियः कविः॥ १७
देशेदेशेतिविख्यातो दाता भोक्ता बलान्वितः । सहोदरविहीनस्तु बहुपुत्रो बहुप्रजः ॥ १८
बहुभार्यो यशस्वी च क्षयवृद्धिधनान्वितः । पादजस्य वधात्पूर्वं पापादत्र च पृच्छकः ॥ १९
पादोदरव्यथायुक्तो यौवने जायते ध्रुवम् । त्रिसहायैर्युतः पूर्वं शृणुष्वाथ खगेश्वर ॥ १०
या धर्मपत्नी पूर्वाऽऽसीत्सा ज्येष्ठाऽत्र मृतप्रजा । बालघातं कर्म्म यस्मात्पूर्वेऽत्र विनतासुत॥ १
योऽनुजः पूर्वजनुषि गयायां च सहायकः । स जातः कर्कटे जीवे पृच्छकस्य सुतोऽधुना ॥ २
वसुभे मिथुनेस्थेऽर्के सोऽपि राजा भविष्यति । योऽभवत्पूर्वजनुषि भ्राताऽत्र जननी तु सा ॥ ३
प्राक् श्राद्धकर्मतोऽपापा जाता राज्ञी यशस्विनी । पापस्यानुमतात्पूर्वं ह्यत्र भर्तृविहीनता ॥ ४
पूर्वजन्मनि यं शूद्रं हत्वाऽऽनीता शुभानना । शूद्रस्य चाथ सर्वस्वं तस्य कर्म्मफलं शृणु॥ ५
अत्र जन्मनि सा नारी मृता त्रिंशन्मिताब्दके । कुचत्वारिंशके वर्षे शूद्रघातः कृतः पुरा ॥ ६
जन्मतस्तन्मिते वर्षे प्रष्टुर्मृत्युर्भविष्यति । देशोत्पातो भृशं तत्र हाहाकारो विलुण्ठनम् ॥ ७
अथवा सर्वज्येष्ठस्य सुतस्य मरणं भवेत् ॥ २३ ॥

अरुण उवाच ।

का तस्य निष्कृतिः स्वामिन्नथो रिष्टनिषूदनी । कथ्यतां दिवसेशान लोकानां हितकाम्यया ॥ २

श्रीसूर्य उवाच ।

शृणु सूत प्रवक्ष्यामि निष्कृतिं तस्य कर्म्मणः । यां कृत्वा विधिवज्जन्तुरिह रिष्टात्प्रमुच्यते॥ २
श्रुत्वैनं पुस्तकं पुत्र प्रष्टा श्रद्धासमन्वितः । पूर्वं पापघटं दत्त्वा पश्चात्कर्म समाचरेत् ॥ २
प्रष्टा गृहे शुचिस्थाने स्नात्वा तु विमले जले । देवान्पितॄन्समभ्यर्च्य सुमनाः सुसमाहितः ॥ २
भक्त्या संपूज्येष्टदेवं ततः काम्यं समाचरेत् । शूद्रस्य प्रतिमा कार्य्या पलैः सप्तमितैः[1] शुभा॥ २
हिरण्मयी यथोक्ता हि तदर्धार्धेन वा पुनः । कालस्य शोभना मूर्तिः कार्य्या लोहमयी शुभा॥ २
द्विजाय विधिना देया मन्त्रेणानेन धीमता । काममोहात्कृतं पूर्वं यन्मया शूद्रघातनम् ॥ २
तस्मात्तन्निष्कृतिं विप्र ददेऽहं तुभ्यमत्र च । "काल त्वं सर्वभूतानां भयदश्च क्षयंकरः ॥ २
मां रक्ष पूजितोऽसि त्वं रिष्टात्पापसमुद्भवात् ।"अथाष्ट मूर्तयः सूत दिक्पालानां हिरण्मयाः॥ २
अष्टस्वर्णमिता देया विप्रेभ्यो दोषनाशकाः । अथ रुक्ममयीं मूर्तिं विष्णोर्दद्यात्पलत्रिकाम्॥ २
विप्राय वेदविदुषे दत्त्वा विप्रांश्च भोजयेत् । शिवस्य पूजनं कुर्यात् पूर्वपापविशुद्धये ॥ ३

---

१ 'शतमितैः' इति—ख० पु० ।

पुत्रपौत्रधनैर्युक्त इह जन्मनि जायते। श्रुत्वैनं पुस्तकं सूत नेमां कुर्य्याच्च निष्कृतिम् ॥ ३५ ॥
इह पुत्रविहीनः स्यादेकवेदमितेऽब्दके। द्विसप्ततिमिते वर्षे मृत्युश्च कृतनिष्कृतेः ॥ ३६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायश्चतुस्त्रिंशादधिकाष्टशततमः ॥ ८३४ ॥

श्रीसूर्य उवाच।

आसीत्पूर्वभवे कश्चिद्विराटे ब्राह्मणोऽण्डज। विद्याभ्यासविहीनश्च कृषिकर्म्मरतः सदा ॥ १ ॥
स्वल्पवित्तयुतस्त्यागी बन्धुमान्यो मिताशनः। स्ववर्णधर्म्मरहितोऽतिथीनां पूजने रतः ॥ २ ॥
अथो तस्य गृहे कश्चिद्वेप्रः स्थापितवान्धनम्। तस्मै द्विजाय लोभाद्वै पुनर्दत्तं न तद्धनम् ॥ ३ ॥
दम्पतिभ्यां मिलित्वा तु ब्रह्मस्वं भक्षितं पुरा। गत्वा धर्म्मपुरं दैवाच्छुभं वा यदि वाऽशुभम्॥४॥
फलं भुक्त्वाऽथुना जातः शतद्वुनिकटे खग। रवौ केतुयुते चन्द्रे मेषराशिगतेऽण्डज ॥ ५ ॥
मध्यमो रक्तगौरश्च पूर्वापरसहोदरैः। रहितो बाहुजस्त्यागी सुखी बन्धुरतः सदा ॥ ६ ॥
धूर्तो व्ययान्वितो वाग्मी वातपित्तविवर्जितः। स्त्रीसाहाय्ययुतो यस्मात् पूर्वजन्मनि मानद ॥७॥
कृतवान्दारुणं कर्म्म तस्य वक्ष्यामि लक्षणम्। तस्य भार्या सदाचारा सुस्नेहा भर्तृभक्तितः ॥८॥
रक्तस्रावादिना पीडा जायते चोदरेऽनिलः। तस्याश्चोदरजं गर्भं पातयेच्चैव पृष्ठतः ॥ ९ ॥
द्वित्रैस्तु पञ्चभिर्मासैश्चतुर्भिः सप्तभिस्तदा। केन कर्म्मविपाकेन गर्भो न स्थिरतां व्रजेत् ॥ १० ॥

श्रीसूर्य उवाच।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम्। व्यभिचारभयाद्वापि तया गर्भश्च पातितः ॥ ११ ॥
अतिकष्टाद्वैनतेय गर्भपातकृतागसा। अपरं च कृतं कर्म व्यभिचारो यतस्ततः ॥ १२ ॥
नानाद्रव्यप्रहर्त्री च कुलटा वाक्यलङ्घनात्। भर्तुस्तु चौरिणीवृत्तिरिष्टसंगतिवर्जनात् ॥ १३ ॥
तेन दुष्टेन यद् द्रव्यं हृतं तस्करबुद्धिना। भुक्तं ताभ्यां वैनतेय ब्रह्मस्वं तत्र जन्मनि ॥ १४ ॥
कालेन तद्धनं भुक्त्वा पीडितो दारुणैर्ग्रहैः। यातना बहुधा प्राप्ता पश्चान्मानुषतां गतः॥ १५ ॥
किंचित्पुण्यप्रभावेण क्षात्रोऽयं जन्मतो भुवि। इंदुस्तृतीयो हि लग्नाद् गर्भपातोऽप्यतो भवेत्॥१६॥
उभाभ्यां हि कृतं कर्म्म भुज्यते जन्मजन्मनि ॥ १७ ॥

अरुण उवाच।

प्रायश्चित्तं कथं देव येन पापक्षयो भवेत्। निष्कृतिं ब्रूहि विश्वेश येन गर्भः स्थिरो भवेत् ॥१८॥

श्रीसूर्य उवाच।

सुशुभं भूप्रदेशं तु गोमयेनोपलेपयेत्। कुर्य्यादष्टदलं पद्मं राजतं शुक्लतण्डुलैः ॥ १९ ॥
तन्मध्ये स्थापयेत्तस्योपरि कुम्भं सुलक्षणम्। सुशीतसलिलैः पूर्णं सरत्नौषधिपल्लवैः ॥ २० ॥
तस्योपरि न्यसेत्पात्रं वैणवं वर्तुलाकृति। तन्मध्ये स्थापयेन्मूर्तिं निष्कद्वयविनिर्मिताम् ॥ २१ ॥
सुवर्णस्य विशुद्धां च दापयेद्वेदवादिने। प्रतिष्ठां पूजनं कृत्वा ततो गां वै सवत्सकाम् ॥ २२ ॥
संकष्टान्मोचयेद्धेनुं स्त्रीयुतो भक्तिभावितः। एवं कृतविधेः सूत निश्चला संततिर्भवेत् ॥ २३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचत्रिंशदधिकाष्टशततमः ॥ ८३५ ॥

---

१ ऽति तामसः' इति—ख० पु०। २'कन्यागते' इति ख० पु०। ३ अत्र किंचित्त्रुटितमिव प्रतिभाति।

श्रीसूर्य उवाच ।

कश्चिदासीत्पुरा भोजे ब्राह्मणो ज्ञानदुर्बलः । स्वल्पाध्ययनयुक्तश्च सुबुद्धिरतिथिप्रियः ॥ १
दानधर्म्मरतः शक्त्या ब्राह्मणानां च पूजकः । परग्रामे स्थितस्तस्य शत्रुः सीमापहारकः ॥ २
स तेन रात्रौ सततं गत्वा चौर्येण घातितः । प्रहारैरतिविद्धस्तु गतः स यमशासनम् ॥ ३
संततिस्तस्य दुःखार्ताऽभक्ष्यपानहराकुला । सहायाढ्येन विप्रेण कृतं कर्मातिदारुणम् ॥ ४
ततो बहुतिथे काले सोऽपि प्राप्तो यमालयम् । भुक्त्वा च नरकान्घोरान् ब्रह्महत्यासमुद्भवान् ॥ ५
पुण्यात्स्वर्गफलं चापि ब्राह्मणातिथिपूजनात् । दानाच्च प्रभवे सूत स जातो ब्राह्मणादधः ॥ ६
बाहुजः क्षात्रधर्म्माच्च गतिं प्राप्तोऽत्र जन्मनि । कुरुक्षेत्रात्परे भागे त्रिंशद्योजनसम्मिते ॥ ७
स रक्तगौरो मतिमान् विधिज्ञो धनभोगभुक् । पितृभ्रातृसुखैश्वर्यस्त्रीमित्रज्ञातिसंयुतः ॥ ८
नातिह्रस्वो नातिदीर्घो बाहनाढ्यः प्रभुः कृशः । आद्यन्नसुखभोगी च प्राग्दानाद्विजपूजनात् ॥ ९
लोभमोहरतः पापात्स क्वचित्पापयुग्भवेत् । यौवने ब्रह्मघातात्प्रागत्र जन्मनि चाण्डज ॥ १०
क्षयरोगान्वितो यूनि तथा पुत्रविवर्जितः । सहायलक्षणं चात्र वक्ष्यामि गरुडाग्रज ॥ ११
यश्च प्राग्वै सहायोऽभूत्तत्परो ब्रह्मघातने । सोऽग्रजः प्रभुरत्रासीद्यौवने हि क्षयं गतः ॥ १२
लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् । पलैरेकादशमितैः कृत्वा विप्रं हिरण्मयम् ॥ १३
सर्वावयवसंयुक्तं सुलेख्यं वस्त्रसंयुतम् । तद्वद्वै कदलीं कृत्वा शुभां लेख्यां सपल्लवाम् ॥ १४
दद्यादत्र विधिज्ञाय तदर्द्धं वा नियोजयेत् । सोमं दद्यात्पलैस्तत्त्वे राजतं शुभलक्षणम् ॥ १५
दिक्पालांश्च ततो दद्याद्राजताञ्शक्रपूर्वकान् । पलैः षोडशभिस्तद्वद्गन्धमाल्यैः प्रपूजितान् ॥ १६
सुवर्णत्रिमितं सूर्यं दद्याद्दोषापनुत्तये । चत्वारिंशत्सहस्राणि गायत्रीं च जपेत्ततः ॥ १७
भोजयेच्च द्विजाञ्शक्त्या क्षयरोगाद्विमुच्यते । अथवा कोटिमेकां तु सावित्रीजपमाचरेत् ॥ १८
होमयेच्चाष्टसाहस्रं क्षयरोगोपशान्तये । य एवं कुरुते सूत प्रायश्चित्तं त्रिधा मतम् ॥ १९
न तस्य क्षयरोगोऽस्ति जन्मन्यत्र च वै ध्रुवम् । प्राक्कृतात्सर्वपापाच्च ब्रह्मघातात्प्रमुच्यते ॥ २०
नाधयो व्याधयस्तस्य भविष्यन्ति तदुद्भवाः । नैवं करोति यो लोभाद्विभवे सति तत्क्षणात् ॥ २१
क्षयरोगेण तन्मृत्युर्युवभावेऽत्र जन्मनि । प्रायश्चित्ते कृते ह्यायुश्चतुःसप्ततिवत्सरम् ॥ २२
रिष्टं तत्त्वमिते तस्य तथा चाकृतनिष्कृतेः ॥ २३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्त्रिंशदधिकाष्टशततमः ॥ ८३६ ॥

श्रीसूर्य उवाच ।

ब्राह्मणस्य कुले कश्चित्पूर्वं कीरसमुद्भवः । धर्मशास्त्रक्रियायुक्तस्तेजस्वी कुलविश्रुतः ॥ १
दत्तानि तेन दानानि प्राप्ते सोमग्रहे सुत । पर्वस्वपि च विप्रेभ्यो दम्भयुक्तेन चेतसा ॥ २
पापमाचरितं तेन कामतप्तेन निश्चितम् । बाहुजायां धृतो गर्भो भाविनोऽर्थस्य गौरवात् ॥ ३
स्वज्ञातीयायां पक्षिवर कृतं तत्पातनं तथा । ततः किंचिद्गते काले स प्राप्तोऽन्तकशासनम् ॥ ४
भुक्त्वा पापाच्च नरकान्पुण्यात्स्वर्गफलं तथा । पूर्वधर्म्मप्रभावेण स जातः पादजोऽधुना ॥ ५
मीनराशिगते सौरौ देशे पञ्चनदाभिधे । गौरः कलानिधिः श्रेष्ठः स्त्रीमित्रसुखसंयुतः ॥ ६
ऐश्वर्य्याढ्यो वाग्विनोदी धनभोगसमन्वितः । सभायां चतुरो धीरो मानवाहनकीर्तिभाक् ॥ ७
षड्विंशतिवर्षे तु मन्त्री मन्त्रवरस्तथा । सप्तत्रिंशद्गते चाब्दे जातपुत्रविनाशकः ॥ ८
बाहुजायां वीर्यदानात्तद्वधान्मृतपुत्रकः । लक्ष्मैतदत्र लग्नाच्च सौरिः पापान्वितः सुत ॥ ९

स्त्रीगोविप्रवधाः पापाः सुतशान्तिकरा यतः । वक्ष्यामि निष्कृतिं तस्य पूर्वपापविशोधनीम् ॥ १० ॥
बाहुजाप्रतिमा कार्या पलैर्दशमितैः शुभा । हिरण्मयी सुरूपा च पत्रे लेख्याऽतिसुन्दरी ॥ ११ ॥
तदर्द्धार्द्धमिता वापि त्रिषु वित्तानुसारतः । संपूज्य गन्धपुष्पाद्यैः सा देया मन्त्रपूर्विका ॥ १२ ॥
सुवर्णैकविभुं दद्यात्सर्वपापप्रणाशनम् । रौक्मं शुभं तथा दद्यादिन्द्रं सार्धपलात्मकम् ॥ १३ ॥
गायत्र्यष्टसहस्रं तु होमयेत्तद्दशांशतः । ब्राह्मणान्भोजयेच्छक्त्या सर्वपापात्प्रमुच्यते ॥ १४ ॥
य एवं कुरुते सूत पूर्वपापप्रणाशनम् । तस्य पुत्रविवृद्धिः स्यात्स्त्रीभ्यामत्रैव जन्मनि ॥ १५ ॥
नैवं करोति यो मोहात्प्रायश्चित्तं यथामतम् । न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः ॥ १६ ॥
प्रायश्चित्ते कृते त्वायुः पञ्चाशीतिमिताब्दकम् । प्रायश्चित्तेऽकृतेऽनिष्टं वेदव्यासमिते ध्रुवम् ॥ १७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्रिंशदधिकाष्टशततमः ॥ ८३७ ॥

श्रीसूर्य उवाच ।

पूर्वेऽसौ वैश्यजः सूत गयायां चावसत्सुत । श्रुतिशास्त्रक्रियाहीनः पुत्रपौत्रैश्च संयुतः ॥ १ ॥
विप्रोत्सङ्गगतस्तत्र काशीस्नानं चकार सः । दुःखेन पाल्यते तेन कुटुम्बं तुरगेण वै ॥ २ ॥
एकदा तु वनं गत्वा ददाह वनमल्पकम् । तस्मिन्दाहे तु निर्दग्धा जन्तवस्तु खगाधिप ॥ ३ ॥
दुष्कृतं च कृतं कर्म कुटुम्बभरणाय च । स्त्रीपुत्रमित्रसंयुक्तो गतो यमपुरं प्रति ॥ ४ ॥
भुक्त्वा शुभाशुभं तत्र जातोऽयं बाहुजोऽधुना । विपाशैरावतीमध्ये भ्रातृयुक्तोऽल्पवित्तभाक् ॥ ५ ॥
धनुःस्थे तु गुरावृक्षे रेवत्यां मृगभे शनौ । श्यामगौरस्तथा मध्ये दुःखदुःखोदयान्वितः ॥ ६ ॥
सकन्यो बहुभार्यश्च पुत्रहीनोऽत्र दृश्यते । आपञ्चपञ्चवर्षात्तु जातपुत्रविनाशकः ॥ ७ ॥
जीवदाहात्कृतात्पापात्स्वल्पपुत्रोऽत्र वै खग । स्त्रीसहायसुतो यस्मात्पतित्वं च भविष्यति ॥ ८ ॥
सत्त्वघातात्पुरा चात्र कण्ठादूर्द्ध्वं रुजान्वितः । प्रायश्चित्ते कृते सूत तयोः पुत्रसुखं त्विह ॥ ९ ॥
प्रवक्ष्यामि खगाध्यक्ष शृणु पापविशोधनम् । राजताश्चटकाः कार्य्याः पत्रे लेख्या वनान्तिके १०
पलत्रिंशन्मिते यत्नाद्वेदाङ्गुलिमिताधिके । तदर्धार्धमिते वापि न न्यूनाधिककल्पना ॥ ११ ॥
तत्र वृश्चिकसर्पौ तु कार्य्यौ यत्नाद्वनान्तरे । वनदेवी तथा कार्या माषवैर्हिरण्मयी ॥ १२ ॥
वृक्षा लेख्या वने तस्मिल्लतौषधिसमन्विताः । सर्वं संपूज्य विधिवद्गन्धपुष्पाक्षतादिभिः ॥ १३ ॥
ब्राह्मणाय प्रदातव्यं पूर्ववन्मन्त्रमुच्चरेत् । "वनान्तरगताः सर्वे ये जीवा दाहिताः पुरा ॥ १४ ॥
वनदेव्यादिदानात्तु गच्छन्तु मम पातकाः ।" य एवं कुरुते सूत पुत्रसौख्यविवर्द्धनम् ॥ १५ ॥
भविष्यति न संदेहो दानस्यास्य प्रभावतः। नैवं करोति यो मोहान्नाशं प्राप्नोति तत्सुतः ॥ १६ ॥
येथाऽस्य भ्रातरो याता नाशं पुत्रस्तथैव च । रिष्टं पञ्चाशदब्दे तु प्रायश्चित्तेऽकृतेऽधुना ॥ १७ ॥
प्रायश्चित्ते कृते त्वायुरष्टषष्टिसमाः सुत । फाल्गुने पुष्यनक्षत्रे निर्याणं कथितं मया ॥ १८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टत्रिंशदधिकाष्टशततमः ॥ ८३८ ॥

श्रीसूर्य उवाच ।

शृणु सूत प्रवक्ष्यामि पूर्वकर्म्मविचेष्टितम् । प्रागासीद्ब्राह्मणो विद्वान्स्वदेशे धर्म्मवित्सुधीः ॥ १ ॥
विद्याभ्यासयुतो नित्यं धर्मकर्म्मरतः सदा । दत्तानि तेन दानानि स्वर्धुन्यां श्रद्धयान्वितम् ॥ २ ॥
अथो पापं कृतं तेन कामलुब्धेन निश्चयात् । ब्राह्मण्यां धारितो गर्भो भाविनोऽर्थस्य वै बलात् ३

१ तथास्य भ्रातरो माता' इति—ख० पु० ।

यत्ने कृतेऽपि तत्रैव नाशीद्गर्भस्य पातनम् । ततो लोकभयात्सूत विषं भुक्त्वा मृता तु सा ॥
देव्या गृहे च वसती देवीपूजनतत्परा । तेन चान्यैर्हृतं तस्या देवस्वं तदुपार्जितम् ॥
स्त्रीभ्यां युक्तेन विप्रेण प्राक्कृतं कर्म दारुणम् । द्रव्यलोभभयात्सूत कामलोभात्तथैव च ॥
ततो मृत्युवशं प्राप्तो ब्राह्मणो वेदपारगः । भुक्त्वा पापाच्च नरकं पुण्यात्स्वर्गफलं तथा ॥
भाद्राष्टम्यां मेषलग्ने मृगस्थे च शनैश्चरे । इंदौ वृषे पर्वते हि स जातः क्षत्रियोऽधुना ॥
दीर्घो मध्यमरूपाढ्यो देवब्राह्मणपूजकः । धर्मशास्त्रक्रियायुक्तो महोद्यमरतः सदा ॥
तीर्थप्रियो यशस्वी च बन्धुमान्यः सुखी नरः । सुशीलो वाग्विलासी च धनबुद्धिक्षयान्वितः॥
स्त्रीभ्यां साहाय्ययुक्तेन पापमाचरितं पुरा । तस्मात्ते वनिते द्वे तु पुत्रहीने च पुत्रक ॥
तयोश्चैका मृता पूर्वं पुत्रदुःखप्रपीडिता । या त्वन्या सापि पुत्राद्यैरतिदुःखाकुलाऽण्डज ॥
ब्राह्मण्यां प्राग्धृतो गर्भस्त्यक्त्वा सुकमलेक्षणाम् । तस्मादत्र स्त्रियामन्यः स्थिरगर्भो न जायते॥
ब्रह्मस्त्रीगोवधाः पापाः पुत्रदुःखकरा यतः । यैर्मिलित्वा धनं भुक्तं देवस्वं तदुपार्जितम् ॥
नीचकर्मरतः पूर्वं जन्मन्यत्र द्विजादयः । ते भ्रष्टराज्याः प्राज्ञाः पुत्रहीना मृता ध्रुवम् ॥
पृच्छकेन तु यद्भुक्तं देवस्वं हि यथा यथा । नात्र जन्मनि लोभाद्वै तद्भुक्तं बहुदुःखदम्॥
एवं सर्वसहायानां लक्षणैः सहितोऽण्डज । स्वकीयैश्चापि विज्ञेयः पृच्छको नात्र संशयः ॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन्सर्वपापप्रणाशनीम् । अत्र पुण्यकरीं पुण्यां सर्वदुःखविनाशनीम् ॥

श्रीसूर्य उवाच ।

राजतं कमलं कुर्य्यात् पलाष्टकमितं शुभम् । ब्राह्मणं स्थापयेत्तत्र रौक्मं पद्मं पलैर्मितम् ॥
पलद्वयमितां कुर्य्याद्राजतीं ब्राह्मणीं शुभाम् । सपुत्रीं विधिवद्देया सर्वविद्याऽन्विताय च ॥
द्विजाय विधिना पुत्र मन्त्रमेतमुदीरयेम् । "कारणं सृष्टिरुत्पत्तेर्ब्रह्मणो ब्राह्मणीं शुभाम् ॥
पूर्वपापविशुद्ध्यर्थं गर्भधारणनाशजम् । ददेऽहं तु महाभाग तुभ्यं मां च शिवं कुरु" ॥
इत्युच्चार्य नरो दद्यात्पूर्वपापापनुत्तये । होमयेच्च तिलांस्तत्र गायत्र्या शक्तितोऽण्डज ॥
शृणुयाद्धरिवंशं तु दशावर्त्यं विधानतः ॥ २४ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनचत्वारिंशदधिकाष्टशततमः ॥ ८३९ ॥

श्रीसूर्य उवाच ।

क्षात्रे कुले समुद्भूतश्चोग्रदण्डः प्रतापवान् । ग्रामाध्यक्षो महाभाग यमुनायां महाबलः ॥
दत्तानि तेन दानानि ब्राह्मणेष्वतिशक्तितः । कुरुक्षेत्रादितीर्थेषु ग्रहणेषु विशेषतः ॥
पापमाचरितं तेन स्वकुले दुष्टचेतसा । ग्रामान्तरस्थितस्यान्यक्षत्रियस्य विजानता ॥
वैरिभावेन वै रात्रौ घातितश्चोग्रकर्मणा । तत्पुत्रो ह्येकपुत्रस्य भाविनोऽर्थस्य गौरवात् ॥
स तप्तस्तेन दुःखेन मृतः पूर्वमपुत्रकः । युवभावे साहाय्येन कृतं प्राक्कर्म दारुणम् ॥
स तेन कर्मणा युक्तो गतो धर्मपुरं प्रति । भुक्त्वा पापफलं पापात्पुण्यात्पुण्यफलं तथा ॥
पूर्वपुण्यप्रभावेण स जातो धनिनां कुले । देशाद्रामहदाद्याम्ये दशयोजनसंमिते ॥
स वणिक्स्वर्णवर्णाढ्यः पितृभ्रातृसमन्वितः । नानासुखैश्वर्ययुतो गुणी रत्नसमन्वितः ॥

साध्वी दानदयायुक्ता भार्या शीलवती सुत। पुण्यादुक्तमिदं लक्ष्म पापात्पापफलं शृणु ॥ ९ ॥
लोभी पापरतः किञ्चिन्मातृहीनः क्रियालसः। पित्ताधिकः शठो धूर्तो मनोदुःखसमन्वितः ॥१०॥
प्राग्बालघातात्सततं जातसन्ततिनाशकः। जन्मन्यत्र च तच्चिह्नं चन्द्रात्सौरौ सुतस्थिते ॥ ११ ॥
कन्यास्थेऽङ्गात्सुते राहौ चन्द्रे केतुयुतेण्डज। बालघातः कृतो यस्मात्प्राग्भवे यौवनेऽत्र च॥१२॥
अष्टाविंशन्मिताब्दान्तमभूत्पुत्रविनाशनम्। लक्षणैर्लक्षयेदत्र पृच्छकं गरुडाग्रज ॥ १३ ॥
वक्ष्यामि निष्कृतिं तस्य सर्वपापविशोधनीम्। सुवर्णाब्धिमिता कार्या प्रतिमा शैशवी शुभा॥१४॥
लक्ष्या तत्र मृगन्धेन पत्रे स्वर्णमयेण्डज। सर्वाभरणसंयुक्ता मन्त्रैः पूज्या विशेषतः ॥ १५ ॥
सा देया तु विधिज्ञाय मन्त्रेणानेन धीमता। "यत्कृतं पूर्वजनुषि स्वज्ञातिशिशुनाशनम् ॥ १६ ॥
तद्घातपापनाशाय ददेऽहं स्वर्णजं शिशुम्।" इत्युच्चार्य नरो दद्याद्बालघातात्प्रमुच्यते ॥ १७ ॥
ततः पञ्चदशैर्मासैर्दद्यात्पशुपतिं द्विज। मासैः पञ्चमितैः सूर्य दद्याद्धैमं द्विजातये ॥ १८ ॥
गायत्र्यष्टसहस्रं तु त्र्यम्बकं त्रिसहस्रकम्। जपेच्च होमयेद्विप्र सर्वं बहुफलप्रदम् ॥ १९ ॥
दानं च भोजयेच्छक्त्या विप्रान्दद्याच्च दक्षिणाम्। लक्षरुद्रं त्रिगुणितं पूजयेद्वा विधानतः ॥२०॥
य एवं कुरुते सूत विधिना पापशोधनम्। अत्र पुत्रविवृद्धिः स्याज्जीविष्यन्ति च तत्सुताः ॥२१॥
नैवं कुर्यात्तयोरेकं लोभान्मोहाद्विशेषतः। न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः ॥ २२ ॥
रिष्टं षड्विंशदब्देऽत्र तस्य चाकृतनिष्कृतेः। प्रायश्चित्ते कृते ह्यायुः षट्सप्तप्रमितं ध्रुवम् ॥२३॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चत्वारिंशदधिकाष्टशततमः ॥ ८४० ॥

श्रीसूर्य उवाच।

प्रागासीद्विङ्गदेशेऽतौ द्विजो राजपुरोहितः। विद्याऽभ्यासयुतो नित्यं धर्मकर्मरतस्तथा ॥ १ ॥
दत्तानि तेन दानानि प्राप्ते सोमग्रहे सुत। पर्वस्वपि च विप्रेभ्यः श्रद्धापूतेन चेतसा ॥ २ ॥
अथो पापं कृतं तत्र कामलुब्धेन निश्चयात्। ब्राह्मण्यां धारितो गर्भो भाविनोऽर्थस्य गौरवात् ३
यत्ने कृतेऽपि तत्रैव नासीद्गर्भस्य पातनम्। ततो लोकभयात्सूत विषं भुक्त्वा तु सा मृता ॥४॥
गर्भस्थोऽपि मृतस्तस्या बालको विनतासुत। स्त्रीभ्यां युक्तेन विप्रेण प्राक्कृतं कर्म दारुणम्॥५॥
ततो मृत्युवशं प्राप्तो ब्राह्मणो वेदपारगः। सहायाभ्यां युतस्तत्र सोमलोकं पुरा ययौ ॥ ६ ॥
सोमग्रहे महादानाद्भुक्त्वा भोगांश्च शाश्वतान्। ततो यमपुरं प्राप्तो भुक्त्वा पापफलं तथा ॥ ७ ॥
महापापकृतादोषाद्गतैर्वै ब्राह्मणादधः। क्षात्रे कुले महादुष्टे पर्वताश्रयमाश्रिते ॥ ८ ॥
चन्द्रे पापगते लग्ने तुलाख्ये कर्कटे गुरौ। भानौ मकरराशिस्थे स जातोऽप्यत्र जन्मनि ॥ ९ ॥
गौरः सूक्ष्मः कृशो भोक्ता चपलो लोभसंयुतः। विद्याभ्यासरतो नित्यं सत्यधर्मपरायणः ॥ १० ॥
सुवैश्वर्ययुतः क्वापि क्वचित्पापयुतः क्षमी। शौर्याढ्योऽतियशस्वी च धर्मबुद्धिरतस्तदा ॥ ११ ॥
स्त्रीगर्भपातजाद्दोषान्मृतपुत्रोऽत्र जन्मनि। ब्राह्मण्यां वीर्यदानाच्च सुखं दुःखमयाण्डज ॥ १२ ॥
एतैर्लक्षणसंयुक्तः पृच्छकश्चाण्डजोत्तम। सहायाभ्यां युतो यस्मादासीत्स्त्रीभ्यां परे भवे ॥ १३ ॥
तेन पुत्रविहीने ते वनिते द्वे मृते सुत। बालयौवनसंप्राप्ते पुत्रदुःखप्रपीडिते ॥ १४ ॥
गोस्त्रीब्रह्मवधाः पापाः पुत्रनाशकरा यतः ॥ १५ ॥

अरुण उवाच।

पापेभ्यो मुच्यते जन्तुः प्रायश्चित्ती यतोऽनघ। तद्ब्रूहि त्वं महाभाग प्रायश्चित्तं प्रयत्नतः ॥ १६ ॥

श्रीसूर्य उवाच ।

प्रायश्चित्तं प्रवक्ष्यामि पूर्वपापप्रणाशनम् । राजतं कमलं कुर्यात्पलत्रिकमितं शुभम् ॥ १७
ब्रह्माणं स्थापयेत्तत्र रौक्मं स्वर्णाष्टकं विभुम् । अश्वोपरि न्यसेत्सूर्यं राजतं पलपञ्चकम् ॥ १८
पलद्वयमितां कुर्याद्ब्राह्मणीं राजतीं शुभाम् । सपुत्रा विधिवद्देया कर्मप्रकाशकाय वै ॥ १९
द्विजाय विधिनापूज्य मन्त्रमेतमुदीरयेत् । "सूर्यं सहाश्वं ब्रह्माणं ब्राह्मणीं च सुतान्विताम् ॥२०
पूर्वपापविशुद्ध्यर्थं गर्भधारणनाशजम् । ददेऽहं तु महाभाग तुभ्यं मां च शिवं कुरु" ॥ २१
इत्युच्चार्य ततो दद्याद्धेनूनां पञ्चकं सुत । होमयेच्च तिलांस्तत्र गायत्र्या शक्तितोऽण्डज ॥ २२
वालवत्सयुतां दद्याद्धेनुं च कपिलां शुभाम् । शृणुयाद्धरिवंशं वा शतावर्त्यं विधानतः ॥ २३
लक्षरुद्रं त्रिगुणितं पूजयेद्वा प्रयत्नतः । नैवं करोति यः सूत प्रायश्चित्तं त्रिधा मतम् ॥ २४
इह जन्मन्यपुत्रः स्यादष्टपञ्चमितेब्दके । करोति विधिना यस्तु पुत्राढ्यो जायतेऽधुना ॥ २५
षष्टेरेकयुताब्दानां तस्य चायुः खगेश्वर । स्त्रीभ्यामत्र सुशीलाभ्यां सुखवृद्धिर्भविष्यति ॥२६
नाधयो व्याधयस्तस्य प्रायश्चित्ते कृते सति । फाल्गुने कृष्णपञ्चम्यां स्वात्यृक्षे मिथुनोदये॥२७
निर्याणं कथितं तस्य विस्तारं च विचारयेत् ॥ २८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकचत्वारिंशदधिकाष्टशततमः ॥ ८४१ ॥

श्रीसूर्य उवाच ।

आसीत्पूर्वभवे कश्चिद्विराटे क्षत्रियोऽण्डज । विद्याऽभ्यासविहीनश्च कृषिकर्मरतः सदा ॥ १
स्वल्पवित्तयुतस्त्यागी भ्रातृमान्योऽतितामसः । स्वाचारधर्मरहितोऽतिथिपूजनतत्परः ॥ २
वित्तैर्हीनाधिकैर्युक्तो रक्तः श्यामोऽतिदुर्मतिः । अथो तस्य गृहे कश्चिद्द्विजः स्थापितवान्धनम् ॥३
तस्मै द्विजाय लोभाद्वै पुनर्दत्तं न तद्वसु । दम्पतिभ्यां मिलित्वा तु ब्रह्मस्वं भक्षितं पुरा ॥ ४
गत्वा धर्मपुरं दैवाच्छुभं वा यदि वाऽशुभम् । फलं भुक्त्वाऽधुना जातः पुष्करे पञ्चयोजने ॥ ५
कर्कटस्थे गुरौ लग्ने वृश्चिके चन्द्रसंस्थिते । मध्यमो रक्तगौरश्च पूर्वापरसहोदरैः ॥ ६
रहितो बहुजस्त्यागी सुखी दम्भरतस्तथा । धूर्तो विद्यान्वितो वाग्मी बाल्ये पित्रोर्विवर्जितः॥७
स्त्रीसाहाय्ययुतो यस्मात्पूर्वजन्मनि मानद । कृतवांश्चोग्रपापं तु तस्य वक्ष्यामि लक्षणम् ॥ ८
अत्र जन्मनि सा भार्या मृता सा बहुपुत्रिका । ततो द्विनार्यौ प्रागाभ्यां सुताभ्यां विनतासुत॥९
हीने ज्येष्ठकनिष्ठाभ्यामत्र चाकृतनिष्कृतेः । वदामि विन्मयं तस्य पूर्वदुष्कृतनाशनीम् ॥ १०
पलपञ्चतदर्द्धं वा द्वयोर्वित्तानुसारतः । सुरभीं दद्यात्सुवर्णेन घण्टाभरणभूषिताम् ॥ ११
सवत्सां विप्रमुख्याय पूजिताय प्रयत्नतः । ततः प्रभृति रोगाणां क्षय एव भविष्यति ॥ १२
धनधान्यसपुत्रश्च जायतेऽत्रैव जन्मनि । य एवं कुरुते सूत प्रायश्चित्तं द्विधा मतम् ॥ १३
पूर्वोक्तफलमेवं तु सर्वथैव भविष्यति । न करोति यदा श्रुत्वा प्रायश्चित्तं विधानतः ॥ १४
पञ्चवेदमिते वर्षेऽरिष्टं चात्र महाद्भुतम् । प्रायश्चित्ते कृते त्वायुः पञ्चाशीतिमिताः समाः॥ १५
बहुलत्वात्तु जीवानां विस्तरो नोदितो मया ॥ १६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विचत्वारिंशदधिकाष्टशततमः ॥ ८४२ ॥

श्रीसूर्य उवाच ।

कश्चिद्राजकुलोत्पन्नो देशेऽङ्गे पूर्वजन्मनि । बभूव नीतिधर्मज्ञो विवेकी बलसंयुतः ॥ १

---

१. निज इति—ख० पु० ।

दत्तं तेन तु सर्वस्वं ब्राह्मणेभ्यो विजानता । अथ भाविवलादन्यब्राह्मणेन तपस्विना ॥ २ ॥
तद्गृहे स्थापितं वित्तं पुनर्दत्तं न तेन च । द्विसहायैर्मिलित्वा तु ब्रह्मस्वं भक्षितं पुरा ॥ ३ ॥
ततो बहुतिथे काले गतास्ते यमशासनम् । भुक्त्वा पापफलं पापात्पुण्यात्पुण्यफलं तथा ॥ ४ ॥
पितृभक्तिप्रभावेन स जातो ब्राह्मणोऽधुना । देशे पञ्चनदे लग्ने तुलाख्ये रविसंयुते ॥ ५ ॥
शनौ पञ्चमगे तुर्ये चन्द्रे लाभगते गुरौ । स रक्तगौरो मतिमान् लोभी धूर्तः शठो घृणी ॥ ६ ॥
पूर्वपुत्रैर्विहीनश्च प्राप्तसन्ततिसंयुतः । ब्रह्मस्वभक्षणात्पूर्वं पापादत्र च पृच्छक ॥ ७ ॥
चन्द्राग्निमितवर्षान्तं जातपुत्रविनाशकः । एभिश्च लक्षणैर्लक्ष्यो जायते गरुडाग्रज ॥ ८ ॥
सहायाभ्यां मिलित्वा तु सर्वस्वभक्षणं कृतम् । तेन तावत्र सहजौ प्राक्तु यो पृच्छकस्य च॥९॥
पुत्रहीनो मृतो ज्येष्ठः कनिष्ठोऽपि भविष्यति । वक्ष्यामि निष्कृतिं तस्य पूर्वपापविशोधनीम् १०॥
लक्ष्मीनारायणः कार्यः सुवर्णाष्टमितः शुभः । तथा पलद्वयमितौ राजतौ शुक्रभास्करौ ॥ ११ ॥
गायत्र्यष्टसहस्रं तु जप्त्वाऽत्र पापनाशनम् । भविष्यति न सन्देहः पुत्रवृद्धिर्भविष्यति ॥ १२ ॥
न करोति यथाशक्त्या प्रायश्चित्तमिदं सुत । सप्तवेदमिते वर्षे पुत्ररिष्टं न संशयः ॥ १३ ॥
प्रायश्चित्ते कृते सूत न भयं विद्यते क्वचित् । द्विसप्ततिमिताब्दान्तं जीवनं कथितं ध्रुवम् ॥ १४ ॥
शुक्लाष्टम्यां नभोमासे लग्ने वृश्चिकसंज्ञके । निर्याणं जननं तस्य स्वल्पमेवाऽत्र सूचितम् ॥ १५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिचत्वारिंशदधिकाष्टशततमः ॥ ८४३ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यसौ शूद्रो वभूव धनिनां कुले । धर्मकर्मक्रियायुक्तो ब्राह्मणानां च पूजकः ॥ १ ॥
अथो भाविवलात्तत्र ह्यग्निदाहः कृतः पुरा । तस्मिन्दाहे च निर्दग्धो नानापक्षिसमूहकः ॥ २ ॥
गरुडाद्यस्तथा गोधानागाद्या जीवराशयः । सहायाभ्यां मिलित्वा तु कृतवान्कर्म दारुणम् ॥ ३ ॥
पापात्पापफलं भुक्त्वा पुण्यात्पुण्यफलं तथा । पूर्वपुण्यप्रभावात्तु स जातो बाहुजोऽधुना ॥ ४ ॥
सरस्वत्याः परे भागे विंशद्योजनसंमिते । प्रायश्चित्ते कृते सूत तयोः पुत्रसुखं त्विह ॥ ५ ॥
प्रवक्ष्यामि महाभाग प्रायश्चित्तं शृणुष्व मे । रौक्मजाश्चटकाः कार्याः पत्रे लेख्या वनान्तरे॥६॥
पलत्रिंशन्मिते पत्रे त्वष्टांगुलमिताधिके । तदर्द्धार्द्धमिते पत्रे दिक्पतीनत्र कल्पयेत् ॥ ७ ॥
तत्र वृश्चिकसर्पौ च कार्यौ यत्नाच्च गह्वरे । वनदेवी तथा कार्या मापत्रयहिरण्मयी ॥ ८ ॥
वृक्षा लेख्या वने तस्मिन्वनौषधिलतादयः । संपूज्य सर्वं विधिवद्गन्धपुष्पाक्षतादिभिः ॥ ९ ॥
ब्राह्मणाय प्रदातव्यं पूर्ववन्मन्त्रमुच्चरन् ॥ १० ॥

मन्त्रः ।

"वनान्तरगताः सर्वे ये जीवा दाहिताः पुरा । वनदेव्यादिदानात्तु गच्छन्तु मम पातकाः"॥११॥
य एवं कुरुते सूत पुत्रपौत्रविवर्द्धनम् । भविष्यति न सन्देहो दानस्याऽस्य प्रभावतः ॥ १२ ॥
नाशयेत्त्रिविधं पापं कायवाक्चित्तसंभवम् । तिलपात्रं त्रिधा प्रोक्तं कनिष्ठोत्तममध्यमम् ॥ १३ ॥
स्वर्णमेकं जघन्ये तु द्विगुणं मध्यमे क्षिपेत् । त्रिगुणं चोत्तमं तद्वत्सुवर्णं परिकीर्त्तितम् ॥ १४ ॥
मत्सरी गुरुणा यश्च विधवामपि गच्छति । स भवेन्मूत्रकृच्छ्री तु गुरुतल्पार्द्धमाचरेत् ॥ १५ ॥
[गुरुतल्पार्द्धप्रायश्चित्तं षाड्वार्षिकमित्यर्थः । पञ्चदानं च देयम् ।]

---

१ 'पृच्छक शृणु' इति प्रतिभाति । २ 'तत्र कल्पयेत्' इति भवेत् ।

मातुः सपत्नीगमने जायते चाश्मरीगदः । स तु पापविशुद्ध्यर्थं प्रायश्चित्तं समाचरेत् ॥ १६
[प्रायश्चित्तमत्र त्रैमासिकम् ।]
दद्याद्विप्राय विदुषे मधुधेनुं यथोदिताम् । तिलद्रोणशतञ्चैव हिरण्येन समन्वितम् ॥ १७
दुग्धचोरस्तु पुरुषो जायते बहुमूत्रवान् । स दद्याद्दुग्धधेनुं च ब्राह्मणाय यथाविधि ॥ १८
सोदरीगमने रोगो जायते बहुमूत्रता । पराकद्वितयं चत्वारिंशद्ब्राह्मणभोजनम् ॥ १९
सहस्रमात्मसूक्तस्य पौरुषस्य स्वशक्तितः ॥ २० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुश्चत्वारिंशदधिकाष्टशततमः ॥ ८४४ ॥

श्रीसूर्य उवाच ।

चान्द्रायणत्रयं कुर्यादादि मध्यं तथा परम् । तिर्यग्गामी स शूलेन प्रमेहेण युतो भवेत् ॥ १
कुर्यात्सांतपनादीनि प्रायश्चित्तं यथाविधि । सर्वव्यवायी मनुजः कन्यागामी तथैव च ॥ २
वातप्रमेहयुक्तः स्यात्कुर्याच्चान्द्रायणत्रयम् । मधुमेही मातृगामी सततं जायते नरः ॥ ३
पितृभार्याभिगामी च जलमेही तथाऽधमः । यो गच्छेद्भगिनीं नित्यभिक्षुमेहीति निश्चयः ॥ ४
[पितृभार्या सपत्नीजननीत्यर्थः ।]
प्रायश्चित्तं क्रमादत्र षड्वर्षाण्यथ पञ्च च । अब्दानित्याचरेत्सम्यक्ततो रोगात्प्रमुच्यते ॥ ५
ब्राह्मणस्वर्णहारी च प्रमेही जायते नरः । धेनुं स्वर्णमयीं कुर्यात्पूर्वेण विधिना ततः ॥ ६
प्राङ्मुखायोपविष्टाय प्रदद्यात्तामुदङ्मुखः । मन्त्रेणानेन विधिवत्पुच्छं हस्ते निधाय च ॥ ७

ध्यानमन्त्रमाह ।

"धेनुर्यागिरसां सत्रे प्रविष्टा सुरभेश्च या । दुहिता या तथा भानोरग्नेश्च वरुणस्य च ॥ ८
याश्च गावः प्रवर्तन्ते वनेषूपवनेषु च । प्रीणंतु ता महादानात्पुत्रपौत्रप्रदाः सुखम् ॥ ९
प्रयच्छन्तु दिवारात्रमनिष्टस्य च शान्तये ।" एवं दत्त्वा च तद्दानं प्रणिपत्यं विसर्जयेत् ॥ १०

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः पंचचत्वारिंशदधिकाष्टशततमः ॥ ८४५ ॥

अत्र कर्मणि स्त्रीपुंसयोर्मिलितयोः प्रत्येकं वा यथानिमित्तमधिकारः ।

अथ गर्भस्रावयज्ञोपवीतदानम् ।

श्रीसूर्य उवाच ।

स्रवद्गर्भा भवेत्सा तु बालकं हन्ति या विषैः । यज्ञोपवीतं कुर्वीत काञ्चनं तु स्वशक्तितः ॥ १
अत्यन्तवर्णयुक्तेन राजतं चोत्तरीयकम् । पलार्धेन तदर्धेन तदर्धेनाथ वा पुनः ॥ २
ग्रन्थिप्रदेशे देयं तु मौक्तिकं वज्रमेव च । प्रक्षाल्य पञ्चगव्येन गायत्र्या ताम्रभाजने ॥ ३
द्रोणप्रमाणं तस्मिंस्तु निक्षिपेद्दधि मध्यतः । आज्यस्योपरि संस्थाप्यमुपवीतं सुपूजितम् ॥ ४
[दधि ताम्रभाजनोपरि आज्यं तत्प्रमाणं यथालाभोपपन्नं वा आज्यमुपवीतं स्थाप्य महोत्तरीयम् ।]
गन्धपुष्पाक्षतैर्धूपैर्नैवेद्यैरपि भक्तितः । ततो ब्राह्मणमाहूय होमं तत्र प्रकल्पयेत् ॥ ५
तिलैराज्येन मधुना मिश्रैरष्टोत्तरं शतम् । तस्मै हुतवते देयं वस्त्राद्यैः पूजिताय तु ॥ ६
मंत्रेणानेन विधिवत्प्राङ्मुखायोपवीतकम् ॥ ७ ॥

मंत्रमाह ।

"उपवीतं परमिदं ब्रह्मणा विधृतं पुरा । भवनौकाऽस्य दानेन धर्मसन्धारणं स्वयम् ॥ ८ ॥
[अयमर्थः—संसारे द्विजकर्मनिष्पादकत्वेन यतस्तारयत्युपवीतम् ।]
वरान्नं ब्राह्मणेभ्यस्तु तस्मिन्काले प्रदापयेत् । अनुव्रज्य तथा कार्यं प्रणिपत्य क्षमापयेत् ॥ ९ ॥
गर्भस्रावकराद्दोषादेवं कृत्वा विमुच्यते ॥ १० ॥

अस्मिन्कर्मणि स्त्रियोधिकारः ।

मासोपवासिनी नारी यतेः प्रस्रावयेद्यदि । यदि संपर्कदोषेण जायते साऽन्यजन्मनि ॥ ११ ॥
स्रवद्रक्ता सदा योनौ तन्निष्कृतिरिहोच्यते । मासोपवासं कुर्वीत तथा मासं पयोव्रतम् ॥ १२ ॥
क्षीरं मुष्णाति या नारी पूर्वजन्मनि सुव्रत । जन्मान्तरे च तस्या वै क्षीरं न क्षरते स्तने ॥ १३ ॥
क्षीरान्नं भोजयेद्विप्रान्साज्यं समधु मण्डकम् । अनुक्षिपेच्च तेनैव तूच्छिष्टान्नेन रक्षितः ॥ १४ ॥
विप्रपादोदकैश्चापि क्षालयेत्कुचमण्डलम् । सुरामांसघृतक्षौद्रैर्ह्यपूपैर्गन्धपुष्पकैः ॥ १५ ॥
भूतेभ्यश्च बलिं दद्याद्भूतानत्र च संशृणु । मधुश्च नवनीतश्च पिण्डमाल्यो ह्यवित्तकः ॥ १६ ॥
भूतभव्यः स्वशक्तिश्च भूतानां पञ्चकं त्विदम् ॥ १७ ॥
[स्वशक्तिरिति मध्वादीनां विशेषणम् । अत्र सुरादीनि बलिद्रव्याण्युक्तानि तेषु ब्राह्मणादिभिरनिषिद्धान्येव ग्राह्याणि ।]
ज्येष्ठश्चातर्यनूढे तु यो न चोद्वहति स्वयम् । स भवेन्मृतपत्नीक उष्णज्वरसमन्वितः ॥ १८ ॥
प्राजापत्यत्रयं कुर्यादव्दानां त्रयमेव च । तामग्निरिति वाज्येन चरुणाष्टोत्तरायुतम् ॥ १९ ॥
जुहुयाद्धोजयेद्विप्रानेवं पापात्प्रमुच्यत । मित्रभार्याभिगामी च मृतभार्यः प्रजायते ॥ २० ॥
तस्य पापस्य शुद्ध्यर्थं द्विजमेकं विवाहयेत् । धर्मपत्न्यां सुव्रतायां मुखे मैथुनकारिणः ॥ २१ ॥
पत्न्यां विरक्तिर्भवति सुवर्णकलशेन सः । उमामहेश्वरं देवं रुद्रैकादशिनीजपैः ॥ २२ ॥
स्नापयेच्छ्रद्धया युक्तो ह्यविच्छिन्नांबुधारया ॥ २३ ॥
[त्र्यम्बकं यजेति मन्त्रः । अथ यथाशक्ति सुवर्णेनोमामहेश्वरप्रतिमां रजतवृषभारूढां कारयित्वा ब्राह्मणाय दद्यात् ।]

अथ दारिद्र्यहरधनदमूर्तिदानम् ।

दरिद्रो जायते मर्त्यो दानविघ्नं करोति यः । ऐश्वर्यं बाधते येन कारणं तच्छृणु प्रभो ॥ २४ ॥
पलार्द्धेन तदर्द्धेन चतुर्थांशेन वा पुनः । धनदस्य प्रतिकृतिं कुर्य्याद्धातुमयीं शुभाम् ॥ २५ ॥
द्विभुजां वाहनोपेतां नयनानन्दकारिणीम् । शंखपद्मनिधिभ्यां च युक्तां वै स्कन्धयोर्द्वयोः॥२६॥
श्वेतवस्त्रेण संवेष्ट्य तण्डुलोपरि विन्यसेत् । तण्डुलानां परीमाणं भवेद्द्रोणमितं खग ॥ २७ ॥
ऋणं दत्त्वाधिकां वृद्धिं गृह्णीयाद्यः स्वपो भयम्। उत्पादयति चान्येषां पाषाणेनाऽप्रदानतः॥२८॥
[अधिकवृद्धिग्रहणं नाम शास्त्रवृत्तिवृद्धिग्रहणं विहायोत्पादयतीति निमित्तमन्तरेण भयोत्पादनम् ।]
तलप्रहारकृच्चैव जातोऽपि धनिनां कुले । धनेन रहितः प्रायो देशान्तरगतो भवेत् ॥ २९ ॥
महाक्लेशी बहूद्वेगी उदावर्ती भवेन्नरः । कृच्छ्रातिकृच्छ्रे कुर्वीत चान्द्रायणमथापरम् ॥ ३० ॥

---

१ गर्भमिति भवेत् । २ द्रोणचतुष्टयमिति—ख० पु० ।

कुर्यादिष्टचरुभ्यां च होमं व्याहृतिभिस्तथा । यत्किंचिदमितं सूक्तमयुतं वारुणं जपेत् ॥ ३३
अन्यायवृत्तिनृपतिसेवनाद्विप्रदर्शनात् । महादानसमादानाद् गुरुभार्यावमर्दनात् ॥ ३४
दंष्ट्रिभ्यश्चैव मरणादपमृत्योश्च निन्द्यया । वेदबाह्यस्य शास्त्रस्य पठनात्कर्मसेवनात् ॥ ३५
विप्रो वन्यनशस्त्राद्यैर्मरणादथ सौनिकः । उदासीनः सभामध्ये कृत्वा स्त्रीगमनं तथा ॥ ३६
श्रुताध्ययनसंपन्नश्रोत्रियब्राह्मणस्य तु । उदासीनः सभामध्ये कृत्वा भङ्गं तु दारुणम् ॥ ३७
परीक्षासमये प्राप्ते भृतकाध्यापकस्तथा । देवब्राह्मणराज्ञां तु स्वर्णापहरणात्तथा ॥ ३८
अरण्ये निर्जने देशे जायते ब्रह्मराक्षसः ॥ ३७ ॥

[ब्रह्मराक्षसत्वं पिशाचत्वस्याप्युपलक्षणम् ।]

तत्र निष्कृतिर्बृहन्मनुवोक्ता पुत्रादिभिः कार्या ।
गयाश्राद्धं तु कृत्वापि जपहोमादिभिस्तथा । देवतातीर्थसेवाभिः कन्यादानेन चैव हि ॥ ३८
ब्रह्मरक्षस्त्वपैशाच्यान्मुच्यते मनुरब्रवीत् ॥ ३९ ॥

[जपेद्वेदपारायणं पावमानसूक्तजपश्च तथा सहस्रनामादिजपश्च वाऽयुतहोमादि, तत्र गो हिरण्यदानं साङ्गम् ।]

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः षट्चत्वारिंशदधिकाष्टशततमः ॥ ८४६ ॥

श्रीसूर्य उवाच ।

परमौक्तिकहारी यः प्राग्भवे विनतात्मज । तस्य पुत्रसुखं नास्ति विना तत्पापशोधनम् ॥ १
तत्पापशोधनं मुख्यमत्र पार्थिवपूजनम् । ततो गोदशकं दद्यात्सर्वद्रव्यसमन्वितम् ॥ २
नानासुखैश्वर्ययुतो गजाश्वरथवाहनैः । बन्धुभृत्याधिकाराढ्यो वस्त्रभूषणभूषितः ॥ ३
सर्वं विष्णुप्रसादाच्च सुखं पापफलं शृणु । धूर्तो मिथ्याभिवादी च बहुलोभसमन्वितः ॥ ४
जातसन्ततिदुःखार्त्तो बालवत्सवधादिह । नेत्ररोगान्वितो नित्यं शृणु चिह्नं पतत्रिण ॥ ५
चत्वारिंशन्मिते वर्षे सर्वसन्ततिनाशनम् । गृहपातान्महाभाग वृष्टिरिष्टसमुद्भवात् ॥ ६
पूर्वपापफलस्यात्र भोगादेव क्षयः स्मृतः ॥ ७ ॥

अरुण उवाच ।

निष्कृतिं वद म स्वामिन्बालवत्सावनाशनीम् ॥ ८ ॥

श्रीसूर्य उवाच ।

तस्मिन्वर्षे महाभाग प्रायश्चित्तं न विद्यते । दृढकर्मार्जितात्पापान्न चोक्तं पापशोधनम् ॥ ९
श्रवणाद्धरिवंशस्य वैशाखे विधिनाण्डज । माघे वा कार्तिके वापि दशावर्त्यं विधानतः ॥ १०
ततस्तु भोजयेद्विप्रान्होमयेच्च स्वशक्तितः । कोटिलक्षायुतं सूत रुद्राध्यायं जपेत्तथा ॥ ११
धेनूनां दशकं दद्यात्सवत्साभरणान्विताम् । दद्याच्च कपिलामेकां स्वर्णशृङ्गीं पयस्विनीम् ॥ १२
प्रायश्चित्तमिदं सूत स कुर्य्याद्विधिपूर्वकम् । तस्य पुत्रविवृद्धिः स्याद् विवाहादपरात्सुत ॥ १३
मृत्युः पञ्चाशदब्दे तु खग चाकृतनिष्कृतेः । प्रायश्चित्ते कृते त्वत्र नवत्यब्दमितं तथा ॥ १४
द्वियुक्तमायुः कथितं तीर्थे पुण्याश्रयेऽण्डज । जीवे कर्कटके सूत मकरे चन्द्रराशिगे ॥ १५
त्रयोदश्यां दिवा भूमौ ऋक्ष मृगशिराभिधे । निर्य्याणं कथितं तस्य विष्णुपूजनजात्फलात् ॥ १६

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तचत्वारिंशदधिकाष्टशततमः ॥ ८४७ ॥

श्रीसूर्य उवाच ।

पिङ्गलाक्षो भवेदत्र पूर्वं रीत्यपहारकः । तेन तत्पापशुद्ध्यर्थं देयं रीतिपलं शतम् ॥ १ ॥
गायत्र्या होमयेत्पश्चात्तिलान्विप्रांश्च भोजयेत् । मुच्यतेऽत्र महाभाग तद्रोगात्पापजाद्ध्रुवम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टचत्वारिंशदधिकाष्टशततमः ॥ ८४८ ॥

श्रीसूर्य उवाच ।

वैनतेय महाभाग खररोमा प्रजायते । पूर्वजन्मनि यो हन्यात्खरं पापविमोहितः ॥ १ ॥
प्रायश्चित्तं परं तस्य पापस्य शृणु तत्त्वतः । निष्कत्रयं हिरण्यं च दद्याद्दोषोपशान्तये ॥ २ ॥
ब्राह्मणाय दरिद्राय वेदवेदाङ्गपारिणे ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनपंचाशदधिकाष्टशततमः ॥ ८४९ ॥

श्रीसूर्य उवाच ।

प्राग्भुक्तं गर्भपुष्ट्यर्थं कुक्कुटाण्डं खगेश्वर । अत्र जन्मनि सा जाता संकरा लोभसंयुता ॥ १ ॥
धनधान्यसमायुक्ता पूर्वपुण्यादिहाण्डज । न च गर्भं दधात्येषा प्राक्षापादण्डभक्षणात् ॥ २ ॥
कृत्वाण्डं विधिना तद्वद्धैरण्यं द्विपलात्मकम् । तदर्धार्धमितं वापि त्रिषु वित्तानुसारतः ॥ ३ ॥
दत्त्वा द्विजाय विधिना आचरेच्छांकरं व्रतम् ॥ ४ ॥
फाल्गुनादौ चतुर्दश्यां कृष्णायां मासिमासि तु । पूजयेच्छंकरं रात्रौ तथा जागरणेन च ॥ ५ ॥
भवन्ति सुलभाः पुत्राः सततं कृतनिष्कृतेः ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाशदधिकाष्टशततमः ॥ ८५० ॥

श्रीसूर्य उवाच ।

शृणु सूत महाभाग कर्म यत्कृतवान्पुरा । जीवोऽयं तत्फलं चात्र प्रवक्ष्यामि समासतः ॥ १ ॥
अभवत्प्राग्भवे विप्रो धर्मशास्त्रार्थकोविदः । राजप्रचारी बलवाञ्छूरो मंत्री महायशाः ॥ २ ॥
सन्धिविग्रहसंयुक्तो दाता भोक्ता प्रियंवदः । गत्वा त्वरिपुरं तेन घातिताः शत्रवः पुरा ॥ ३ ॥
विश्वासाद्राजकार्येषु कृतं कर्मातिदारुणम् । लुण्ठितं तत्पुरं तेन लोभोपहतचेतसा ॥ ४ ॥
पीडिता बहवो लोका द्रव्यलोभाकुलीकृताः । स तेन कर्मणा युक्तः प्राप्तस्तु यमशासनम् ॥ ५ ॥
भुक्त्वाऽतिदारुणान्सूत नरकान्घोरदर्शनान् । तथापुण्यफलात् सूत प्राप्तपुण्यावशेषतः ॥ ६ ॥
स्वर्णकारकुले जातो धूर्तो लोभपरः सदा । नानाचौर्यक्रियायुक्तो लोकवंचनतत्परः ॥ ७ ॥
महाभिमाननिरतः प्रियो राजजनेष्वपि । सुखैश्वर्यधनैर्युक्तः कुटुम्बभरणे दृढः ॥ ८ ॥
नानास्त्रीसुखसंयुक्तस्तथा पुत्रविवर्जितः । वक्ष्यामि निष्कृतिं सूत सर्वपापनिकृन्तनीम् ॥ ९ ॥
प्रयागे त्वथवा काश्यां स्थाप्य लिङ्गं सुशोभनम् । पूजयेत्तु त्रिवर्षान्तं मंत्रैस्तल्लिङ्गकैस्तथा ॥ १० ॥
गन्धपुष्पोपचारैश्च नैवेद्यैर्बहुदीपकैः । संपूज्य विधिवद्देवं तदन्ते भोजयेद् द्विजान् ॥ ११ ॥
शिवभक्तांस्तथा शान्तान् पूजयेद्रत्नदक्षिणैः । नानाहिरण्यैर्विधिवत्तथा चाऽभरणैः शुभैः ॥ १२ ॥
अथवा शृणुयात्तत्र यजुर्वेदं विधानतः । ब्रह्मचर्येण सततं प्रायश्चित्तमिदं परम् ॥ १३ ॥
य एवं कुरुते भक्त्या पूर्वपापौघनाशनम् । संप्राप्य तत्र निर्याणं शिवलोकं हि गच्छति ॥ १४ ॥
कर्तव्यं ब्राह्मणद्वारा सर्वमेतद्धि काश्यप । नाधिकारोऽत्र शूद्रस्य वेदस्य श्रवणे क्वचित् ॥ १५ ॥
तप्ता शलाका देया वै शूद्रकर्णेतिदारुणा । श्रुतं पारायणं येन पापेनाक्रान्तचेतसा ॥ १६ ॥

आयुरव्दाः शतं तस्य कृतनिष्कृतिचेतसः । प्रायश्चित्तेऽकृते रिष्टं जायते षष्टिवत्सरे ॥
एतज्जन्मफलं प्रोक्तं सविधानं समासतः ॥ १८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकपंचाशदधिकाष्टशततमः ॥ ८९१ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे हन्याद् वरमत्रैव जन्मनि । खररोमसमानानि रोमाणि प्रभवन्ति च ॥
ब्राह्मणाय तदा दद्यात्स्वर्णनिष्कत्रयं सुत । जायते सूक्ष्मरोमा सा विनतानन्दवर्द्धन ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विपंचाशदधिकाष्टशततमः ॥ ८९२ ॥

श्रीसूर्य उवाच ।

या पुराऽपहरेद्रीतिं नारी सा च पतत्रिण । पिङ्गाक्षी जायते चात्र प्रायश्चित्तं परं शृणु ॥
रीतिं दद्याच्छतपलां तथा ब्राह्मणभोजनम् । गायत्र्या जुहुयाच्छत्त्या तिलान् रोगविनाशन

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिपंचाशदधिकाष्टशततमः ॥ ८९३ ॥

श्रीसूर्य उवाच ।

प्राग्भवे वनिता या च परसिद्धान्नहारिणी । साऽत्र जन्मनि रोगेण शूलेनैव च बाध्यते ॥
सिद्धान्नदानं विप्रेभ्यो दीनेभ्योऽपि पतत्रिण । भिक्षुभ्यश्च तथा दानाद्रसदानाच्च शक्तितः ॥
न जायते शूलपीडा तस्याश्च कृतनिष्कृतेः । प्रायश्चित्तेऽकृतेऽत्रैव म्रियते शूलपीडया ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःपंचाशदधिकाष्टशततमः ॥ ८९४ ॥

श्रीसूर्य उवाच ।

उद्घाती भवेत्पूर्वं जन्मन्यथ पतत्रिण । सोऽत्र जन्मनि जायेत नरश्च विकृतस्वरः ॥
वक्ष्यामि तस्य पापस्य नाशनं चात्र जन्मनि । कर्पूरं त्रिपलं दद्याद्विप्रेभ्यः शक्तितोऽण्डज ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचपंचाशदधिकाष्टशततमः ॥ ८९५ ॥

श्रीसूर्य उवाच ।

वंध्येयं या महाभाग पृच्छति स्वं प्रयोजनम् । गर्भपातरता पूर्वं जनुष्यत्र फलं त्विदम् ॥
मुखजा प्राग्भवे स्वत्र तत्पापाद्यवनी हि सा । निष्कृतिं तत्प्रवक्ष्यामि गङ्गायां हि पतत्रिण ॥
पूजयेल्लक्षरुद्राणां त्रिगुणार्द्धं तदर्द्धकम् । शक्त्याथ भोजयेद्विप्रान्बांधवांश्च स्वशक्तितः ॥
अनेन विधिना या च प्रायश्चित्तं समाचरेत् । जायते सन्ततिस्तस्या इह जन्मनि वै ध्रुवम् ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्पंचाशदधिकाष्टशततमः ॥ ७९६ ॥

श्रीसूर्य उवाच ।

कांस्यहारी च पुरुषः प्राग्भवे विनतासुत । शीर्षरोगेण सततं पीडितो जायतेऽधुना ॥
दानात्पलशतादत्र सीसकादण्डजोत्तम । विप्राय वेदविदुषे शीर्षरोगं न पश्यति ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तपंचाशदधिकाष्टशततमः ॥ ८९७ ॥

---

१ 'जन्मन्यत्र' इति—ख० पु० ।

श्रीसूर्य उवाच।

बभूव बाहुजः कश्चिद्देशे कीराभिधे सुत। धर्मकर्मालयको भक्तः पितृपुत्रधनान्वितः॥ १॥
दत्तानि तेन दानानि ब्राह्मणेभ्यो हि शक्तितः। पर्वस्वपि च पात्रेभ्यो गोभूम्यश्वादिकानि च॥२॥
पापमाचरितं तेन भाविनोऽर्थस्य वैभवात्। स्ववंशजस्य कस्याऽपि गृहं शत्रोर्मनोहरम्॥ ३॥
निर्दग्धं वैरिभावेन रात्रौ भार्यासहाय्यतः। तस्मिन्दाहे महाबाहो निर्दग्धं वृषभद्वयम्॥ ४॥
गृहस्थाः स्वल्पजीवाश्च घातिताः क्रूरकर्मणा। ततो बहुतिथे काले गतः स यमशासनम्॥ ५॥
सस्त्रीकः स्वफलं भुक्त्वा पापाद्दुष्टं शुभं तथा। पुण्यात्पंचनदे देशे स जातो बाहुजाधरः॥ ६॥
मध्यस्वरूपो मतिमान्कुलेष्टः पुरुषो दृढः। रक्तो नोचो नातिनीचो बहुकन्यः पृथुर्विभुः॥ ७॥
यौवनेन्ते सुखैश्वर्यधनधान्यैश्च संयुतः। मितदो लोभभाग्याढ्यः कृतिर्मानी जनप्रियः॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित्॥ ८॥
चिन्तातुरोग्रो धूर्तश्च दुःखार्तो मानवर्जितः। गोघातादग्निदाहाच्च जातपुत्रविनाशकः॥ ९॥
सहायलक्षणं सर्वं कथयामि खगेश्वर। या स्त्री पूर्वं सहायासीद्दाहकर्म्मणि चाण्डज॥ १०॥
सा ज्येष्ठा प्रष्टुरेवात्र मृतपुत्राऽत्र जन्मनि। लक्ष्मैतद्दण्डजश्रेष्ठ जन्माङ्गाद् वृषभे शनिः॥ ११॥
लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम्। कारयित्वा शिवं साङ्गं पलैर्वेदमितैः शुभैः॥ १२॥
हिरण्मये महाभाग पत्रे लेख्यं शिवान्वितम्। तदर्धार्धमितं वापि त्रिषु वित्तानुमानतः॥ १३॥
पूजयित्वा तु गन्धाद्यैः षोडशोपचारकैः। संस्थाप्य पशुपं पश्चाद्गोरथे सुमनोहरे॥ १४॥
सर्वोपस्करसंयुक्ते वितानाम्बरभूषिते। दद्याद्विधिविधिज्ञाय मंत्रमेतमुदीरयन्॥ १५॥
मोहात्पूर्वे महापापमग्निदाहाद्यदर्जितम्। तन्नाशाय ददेऽहं तु शिवं गोरथसंस्थितम्॥ १६॥
गोधिकाद्यास्तथा जीवाः पत्रे लेख्यास्तु राजते। शिवपत्रमितं दद्याद्ये चाऽन्ये घातिताः पुरा १७
पञ्चमाषमितो वह्निर्देयो हेममयः शुभः। गायत्र्यष्टसहस्रं तु रौद्रं जप्त्वा सहस्रकम्॥ १८॥
अष्टाक्षरं द्विसाहस्रं होमयेद्घोजयेद् द्विजान्। य एवं कुरुते सूत प्रायश्चित्तं विधानतः॥ १९॥
न तस्य पुत्रमरणं तदग्रे जायते क्वचित्। जायन्ते सुलभाः पुत्राश्चाधिव्याधिविवर्जिताः॥ २०॥
नैवं करोति यो मोहाच्चात्र पुत्रविवर्जितः। चत्वारिंशन्मिते कूने वर्षे रिष्टं प्रकीर्तितम्॥ २१॥
पञ्चाशन्मितकेऽब्दे वाऽरिष्टं चाकृतनिष्कृतेः। प्रायश्चित्ते कृते ह्यायुश्चतुःसप्तमिताब्दकम्॥२२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽष्टायोऽष्टपंचाशदधिकाष्टशततमः॥ ८९८॥

श्रीसूर्य उवाच।

कांस्यहारी तु पुरुषः प्राग्भवे विनतात्मज। शीर्षरोगेण सततं पीडितो जायतेऽधुना॥ १॥
दानाच्छतपलादत्र सीसकादण्डजोत्तम। विप्राय वेदविदुषे शीर्षरोगं न पश्यति॥ २॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनषष्ट्यधिकाष्टशततमः॥ ८९९॥

श्रीसूर्य उवाच।

वन्ध्यायाश्च महाभाग प्रायश्चित्तं शृणुष्व तत्। शूलोद्विग्नतनुं चौरं मृतं प्राप्य खेर्दिने॥ १॥
तत्तले तु तदा कुर्याद्वन्ध्या स्नानं शतौषधैः। पत्रैर्वृक्षोद्भवैः सूत तथा मृद्भिश्च सप्तकैः॥ २॥
तीर्थोदकैः समंत्रैश्च संपूज्य प्रथमं सुत। विधिनाऽनेन या कुर्यावन्ध्या पुत्रं लभेद् ध्रुवम्॥ ३॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षष्ट्यधिकाष्टशततमः॥ ९००॥

श्रीसूर्य उवाच ।

सतीं स्वभार्यां परमां साध्वीं संत्यज्य दुर्मतिः । प्रमादात्प्राग्भवे गच्छेदन्यां स्त्रीं काममोहित
सोऽत्र जन्मनि भो सूत ग्रहणीरोगसंयुतः । जायते म्रियतेऽवश्यं ब्राह्मण्यां गमनादिह ॥ २
न तस्य पापशमनं मया प्रोक्तं खगाधिप । तस्मिन्वयसि तद्दृष्टं भविष्यति न संशयः ॥ ३

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकषष्ट्यधिकाष्टशततमः ॥ ८६१ ॥

श्रीसूर्य उवाच ।

या काचिद्वनिता सूत प्राग्भवे कांस्यहारिणी । साऽत्र जन्मनि पक्षीन्द्र शीर्षरोगप्रपीडिता ॥ १
दद्याच्छतपलं सीसं ब्राह्मणाय कुटुंबिने । तत्काले शीर्षजाद्रोगान्मुच्यते नात्र संशयः ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विषष्ट्यधिकाष्टशततमः ॥ ८६२ ॥

श्रीसूर्य उवाच ।

यो नारी ह्यवधीत्पूर्वं मोहादुष्ट्रं खगाधिप । साऽत्र जन्मनि पक्षीन्द्र जायते विकृतस्वरा ॥ १
सरस्वत्याश्च प्रतिमां सौवर्णीं राजतीं तथा । दद्याद्वेदविधिज्ञाय तदा स्यात्सुस्वराण्डज ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिषष्ट्यधिकाष्टशततमः ॥ ८६३ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि यः कश्चिन्मोहात्परधृतं हरेत् । नेत्ररोगयुतः सोऽपि जायतेऽत्रैव जन्मनि ॥ १
घृतधेनुप्रदानाच्च विधिना वेदपारगे । मुच्यते नेत्ररोगाच्च जन्मन्यत्र पतत्रिण ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःषष्ट्यधिकाष्टशततमः ॥ ८६४ ॥

श्रीसूर्य उवाच ।

स्वकं पतिं परित्यज्य या गच्छेत्पूर्वजन्मनि । परपुंसि महाभाग ग्रहणीरुग्युताऽत्र सा ॥ १
प्रायश्चित्तं परं तस्या व्रतं चान्द्रायणं त्विह । वैशाखे माघमासे वा तस्मात्पापात्प्रमुच्यते ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चषष्ट्यधिकाष्टशततमः ॥ ८६५ ॥

अरुण उवाच ।

विप्रवर्णकुलोत्पन्नो वातरक्ताक्षदर्शनः । उदरे वातजा रोगाः किंचिच्छस्त्रोपघातकाः ॥ १
किंचित्क्रोधश्च लोभश्च किंचिद्वित्तसमन्वितः । तस्य प्रिया सदाचारा पतिभक्तिपरायणा ॥ २
एकापत्यं भवेत्तस्य जायते मृतपुत्रकः । आदिपुत्रो मृतस्तस्य अपत्यं नैव जायते ॥ ३
केन कर्मविपाकेन सत्यं कथय भास्कर ॥ ४ ॥

श्रीसूर्य उवाच ।

पूर्वोद्भवे महावाहो शूद्रवंशसमुद्भवः । व्यापारकृषिवाणिज्यं ब्रह्मवित्तेन यत्कृतम् ॥ ५
व्यवहारादिना कृत्वा ब्रह्मवित्तेन वर्द्धितः । कालेनैव मृतो विप्रो धनं शूद्रेण वंचितम् ॥ ६
नार्पितं ब्रह्मपुत्राय ब्रह्मस्वं च गृहे स्थितम् । ब्रह्मस्वं भक्षितं तेन बहुकालं खगेश्वर ॥ ७
पश्चान्मृत्युवशं प्राप्तो नरके रौरवे गतः । ब्रह्मस्वभक्षणाच्चैव वर्षाणां च सहस्रकम् ॥ ८
पतितो नरके घोरे पच्यते चेह कर्मणा । पश्चान्मानुष्यमापन्नो व्रतदानप्रभावतः ॥ ९

१ कपुस्तकेऽयमध्याय उत्तराध्यायात्परमस्ति ।

इदं जन्म तृतीय तु ब्रह्मवंशसमुद्भवम् । निक्षेपहरणाद्वापि मृतपुत्रः प्रजायते ॥ १० ॥
ब्राह्मणस्य विशेषेण ब्रह्मस्वं विषतादृशम् । ऋणं प्रसह्य वै प्रोक्तमपि कल्पशतादिकम् ॥ ११ ॥
तस्माद्विप्रऋणं प्रोक्तमसह्यं त्वभिजायते ॥ १२ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं देव येन पुत्रैः प्रजायते । नारीणां च नराणां च निष्कृतिः सौख्यहेतवे ॥ १३ ॥

श्रीसूर्य उवाच ।

महापापहरो देवः सर्वकामहरः प्रभुः । पूजनीयो महारुद्रः संततिश्रेय इच्छता ॥ १४ ॥
यजुर्वेदमयं देवं यज्ञुर्भिः शतरुद्रजैः । यजनैरथ मुच्येत पापादाकल्पसम्भवात् ॥ १५ ॥
रुद्रैकादशिनीभिस्तं रुद्रैकादशकेन वा । जपेन तोषयेद्देवं रुद्रमेकादशात्मकम् ॥ १६ ॥
तदशांशेन होतव्यं द्रव्यं श्रद्धासमन्वितम् । केयूरकुण्डलाकल्पमंत्रपुस्तकमण्डलुः ॥ १७ ॥
प्रतिरुद्रं शतं विप्रान् भोजयेत्सुसमाहितः । निष्कं दद्यात्सुवर्णस्य दद्याद्वा मुख्यदक्षिणाम्॥१८॥
एवं रुद्रविधिं कृत्वा त्रिविधं पापशान्तिकृत् । इतिहासपुराणोक्तसूक्तानि विविधानि च ॥ १९॥
शृणुयाद्विधिवत्तार्क्ष्य सभार्यः प्रीतितोन्वहम् । देवर्षिपितृमर्त्यानामृषीणां च महीक्षिताम् ॥ २०॥
दैत्यदानवगन्धर्वपिशाचोरगरक्षसाम् । सर्वासां सर्वजातीनामुत्पत्तिं शृणुयादपि ॥ २१ ॥
ऋषीणामृषिपत्नीनां वंशान्सर्वानुदीरितान् । एवं स त्रिविधात्पापान्मुच्यतेऽपत्यदुःखदात्॥२२॥
गुरून्देवान्द्विजान्सम्यक् श्रद्धया समुपाचरेत् । एवं कृतविधेः सूत हरिवंशश्रुतार्थिनः ॥ २३ ॥
वाचकोपरि संतुष्टो भूमिद्रविणवासकैः । मुद्राकर्णीकृतवरं गां दत्त्वा च पयस्विनीम् ॥ २४ ॥
भूमिद्रविणवासाद्यैस्तोषयेदन्यब्राह्मणान् । निष्कृतौ क्रियमाणायां सर्पिष्यात्मानमीक्षयेत् ॥२५॥
ऐहिकं लक्षणं तस्य शरीरे चोपजायते । जन्मक्रमेण जायन्ते दुःखान्यकृतनिष्कृतेः ॥ २६ ॥
कुष्ठरुक् चानपत्यस्य प्रमेहार्तोऽप्यकिंचनः । कुनखी दद्रुलः पाण्डुरोगी जन्मक्रमाद्भवेत् ॥ २७॥
जलाग्निभ्यां च चौरैश्च राज्ञा वित्तविनाशवान् । लकुटग्रावशस्त्राद्यैर्जायन्ते व्रणजार्तयः ॥ २८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः षट्षष्ट्यधिकाष्टशततमः ॥ ८६६ ॥

श्रीसूर्य उवाच ।

अथ सूर्यदिने सूत प्राप्य भूमिं श्मशानजाम् । मृतमेतं समालोक्य रात्रौ गच्छेदतंद्रितः ॥ १ ॥
पूजयित्वा चितां तस्य वलिमष्टविधं सृजेत् । स्नानं कृत्वा मृदालंभैः पत्रैर्वृक्षोद्भवैस्तथा ॥ २ ॥
शतच्छिद्रघटे प्राप्य नानातीर्थोद्भवैर्जलैः । दीपमालादिने वापि प्रयोगं विधिनाऽऽचरेत् ॥ ३ ॥
हरिवंशं ततः पश्चाच्छृणुयाद्विधिपूर्वकम् । दत्त्वा विजेभ्यो विधिना नानाभक्ष्यफलानि च ॥ ४ ॥
स्वेच्छया भोजनं तेभ्यो दद्याद्दोषापनुत्तये । योगेनानेन नार्यत्र वन्ध्या याति सपुत्रताम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तषष्ट्यधिकाष्टशततमः ॥ ८६७ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यसौ क्षत्रा चात्र जन्मनि वाहुजः । देवद्रव्यापहरणात्प्रागत्राक्षिप्रपीडनात् ॥ १ ॥
विंशद्वर्षे व्यतीते च नेत्रभङ्गः प्रजायते । तद्रक्षार्थमहं वक्ष्ये दानं पापहरं परम् ॥ २ ॥

---

१ पूर्वजातीनामिति—ख० पुस्तके । २ मुद्राकर्णेऽङ्कित ' इति—ख० पुस्तके समुपलभ्यते ।

कृत्वा देवगृहं रम्यं प्रतिष्ठाप्य सुराधिपम् । गन्धैः पुष्पैः समभ्यर्च्य दीपा देपाः सुवर्णजाः ॥ ३
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टषष्ट्यधिकाष्टशततमः ॥ ८६८ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यसौ शूद्रश्चक्रे मुष्कनिकुट्टनम् । वृषभस्य महाभाग स्वार्थसाधनतत्परः ॥ १
तेन कर्मार्जितेनात्र षण्ढश्चैवापवर्णजः । गवां पालनजात्पुण्यात्प्रागत्र सुखसंयुतः ॥ २
गोपीडनान्महापापात्तस्य नैवात्र विन्मयम् ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनसप्तत्यधिकाष्टशततमः ॥ ८६९ ॥

श्रीसूर्य उवाच ।

या काचिद्योषितां पूर्वं मोहात्परघृतं हरेत् । साऽत्र जन्मनि रोगेण नेत्रोत्थेन प्रपीड्यते ॥ १
कुरुक्षेत्रादितीर्थेषु घृतधेनुप्रदानतः । मुच्यते सा महारोगान्नेत्रजान्नाऽत्र संशयः ॥ २
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्यधिकाष्टशततमः ॥ ८७० ॥

श्रीसूर्य उवाच ।

महिषीमवधीत्पूर्वभवे पूर्वं नराधमः । सोऽत्र जन्मनि पक्षीन्द्र कृष्णगुल्मयुतो भवेत् ॥ १
स्वर्णशृङ्गीं रौप्यखुरां घण्टाभरणभूषिताम् । सूक्ष्मकम्बलसंयुक्तां दद्याद्वेदविदे सुत ॥ २
कृष्णगुल्मोद्भवां पीडां नरश्चात्र न पश्यति ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकसप्तत्यधिकाष्टशततमः ॥ ८७१ ॥

श्रीसूर्य उवाच ।

प्राग्भवे याऽभवत्काचित् स्वर्णकारी पतत्रिण । स्वधर्मनिरता सा च दानधर्मपरायणा ॥ १
तद्गृहे धान्यराशिं तु चरन्ती गौः स्वभावतः । ताडिता कुक्षिभागे तु लकुटेन भृशं सुत ॥ २
तत्ताडनान्महादुःखं प्राप्ता गर्भातिभारतः । मृता च तेन दुःखेन गर्भजातसमन्विता ॥ ३
तत्कर्मणा समायुक्ता संप्राप्योचितशासनम् । पुनः शूद्रीसमा जाता गौरवर्णा शुभानना ॥ ४
धनभृत्याश्वभोगाद्यै(दि)र्नानाविभवसंयुता । पुत्रसंततिहीना सा प्राग्गोघाताद्यसम्भवात् ॥ ५
प्रायश्चित्तं प्रवक्ष्यामि सर्वपापक्षयंकरम् । कुर्याद्वापीमरण्ये तु देशे लोकाकुले तथा ॥ ६
मार्गे हि धर्मतो यत्नात्प्रतिष्ठां कारयेत्ततः । संस्थाप्य च शिवं तत्र विधिना विनतासुत ॥ ७
होमयेच्च ततस्तत्र तिलान्नाज्ययुतानिह । भोजयेद्ब्राह्मणान्भक्त्या शिवपूजनतत्परान् ॥ ८
दद्यात्तथैकां कपिलां सर्वपापप्रणाशनीम् । प्रायश्चित्तमिदं सूत पूर्वजन्माघनाशनम् ॥ ९
नैवं या कुरुते श्रुत्वा तस्याः संततिजं भयम् ॥ १० ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विसप्तत्यधिकाष्टशततमः ॥ ८७२ ॥

श्रीसूर्य उवाच ।

यः कश्चित्प्राग्भवे सूत दुग्धं हरति मानवः । तत्काले पापमेवात्र बहुमूत्री प्रजायते ॥ १
दुग्धधेनुप्रदानाच्च विधिना त्वत्र जन्मनि । बहुमूत्रान्महारोगान्मुच्यते गरुडाग्रज ॥ २
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायस्त्रिसप्तत्यधिकाष्टशततमः ॥ ८७३ ॥

---

१ आपं चैव हलन्तानामित्युक्त्या दिशोतेवादिदं भवेत् ।

श्रीसूर्य उवाच ।

दुग्धं हरति या नारी कस्यचित्पापमोहिता । पूर्वजन्मनि सात्रैव बहुमूत्ररुजाऽऽकुला ॥ १ ॥
दुग्धधेनुप्रदानाच्च वेदवेदाङ्गपारगे । विधिना काश्यपेयाऽत्र न पश्येद्बहुमूत्रताम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःसप्तत्यधिकाष्टशततमः ॥ ८७४ ॥

श्रीसूर्य उवाच ।

यो मोहाद्धातयेत्सूत महिषीं नवयौवनाम् । प्राग्भवे नियतं सोऽपि कुष्ठगुल्मेन[1] बाध्यते[2] ॥ १ ॥
स नानारत्नदानेन विधिना गरुडाग्रज । नाशयेत्कुष्ठगुल्मोत्थां पीडामत्रैव जन्मनि ॥ २ ॥
अथवा महिषीदानाद्विप्राय विधिनाण्डज । महिषीपापजाद्रोगात्सुखी भवति मानवः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचसप्तत्यधिकाष्टशततमः ॥ ८७५ ॥

श्रीसूर्य उवाच ।

यः कुर्यात्पापलोभेन पूर्वं मुष्कनिकृन्तनम् । ब्रह्मपुत्रस्य षण्ढः स्यादत्र जन्मनि निश्चयात् ॥ १ ॥
ज्ञानाज्ञानकृतं वापि निष्कृतिर्नात्र विद्यते । ब्रह्मघातान्महापापात्षण्ढः स्याद्बहुजन्मनि ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः षट्सप्तत्यधिकाष्टशततमः ॥ ८७६ ॥

श्रीसूर्य उवाच ।

वभूव फलहृत्काचित्प्रमादाद्विनतासुत । पूर्वजन्मनि पुण्यापि बहुदानरता सती ॥ १ ॥
अत्र सा क्षत्रिया जाता प्रागपि क्षत्रियाण्डज । अत्र पुत्रविहीना सा फलहृत्पापजाद्दृढात्[3] ॥ २ ॥
फलानां बहुदानाच्च चातुर्मास्येऽत्र नित्यशः । भोजनं तु तदा पश्चात्कारयेत्स्वेच्छया द्विजान् ॥ ३ ॥
प्रायश्चित्तं परं तस्मात् फलहृत्पापनाशनम् । अमायां नारिकेलानि देयानि खलु शक्तितः ॥ ४ ॥
तत्कृते सुतवृद्धिः स्याज्जीवनं वर्षसप्ततिम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तसप्तत्यधिकाष्टशततमः ॥ ८७७ ॥

श्रीसूर्य उवाच ।

दधिहारी पुमान्पूर्वं जन्मन्यग्रे खगेश्वर । जायते मेदसा युक्तस्तद्दुःखेन प्रपीडितः ॥ १ ॥
कार्तिक्यामथ वैशाख्यां दधिधेनुप्रदानतः । तस्माद्रोगाद्विमुच्येत तत्काले गरुडाग्रज ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टसप्तत्यधिकाष्टशततमः ॥ ८७८ ॥

श्रीसूर्य उवाच ।

महिषीघातने नारी प्राग्भवे विनतासुत । अत्र जन्मनि पक्षीन्द्र कृष्णगुल्मेन[4] पीड्यते ॥ १ ॥
दद्यात्सावरणां सूत महिषीं यमदैवताम् । युगकंबलसंछन्नां विधिना नवयौवनाम् ॥ २ ॥
सा मुच्यते महापापान्महिषीवधजात्सुत । तस्मिन्नुपगते तत्र कृष्णगुल्मं न पश्यति ॥ ३ ॥

इते श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनाशीत्यधिकाष्टशततमः ॥ ८७९ ॥

---

१ कृष्णेति–ख० पु० । २ कृष्णेति–ख० पु० । ३ पापसम्भवादिति भवेत् । पापसम्भवादिति तु युक्तं प्रतिभाति ।

श्रीसूर्य उवाच ।

वेधे प्राग्वृषभानां च नासाग्रं गरुडाग्रज । नासाछेदोत्र तस्यास्ति युवभावे विनिश्चयात् ॥ १
नास्ति तद्विन्मयं क्वापि दत्तैर्दानशतैरपि ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽशीत्यधिकाष्टशततमः ॥ ८८० ॥

श्रीसूर्य उवाच ।

कश्चिदासीन्महाभाग चारणोतिप्रियंवदः । कवित्वशक्तिनिरतो बहुचारणसंयुतः ॥ १
प्रेरितो दैवयोगेन गतो राजाश्रयं प्रति । तत्सेवानिरतो नित्यं चिरकालमुपस्थितः ॥ २
अथ तत्र महावादे कवीनां हि खगेश्वर । महाघोरमभूद्युद्धं राजद्वारे भयप्रदम् ॥ ३
स चारणो महाक्रोधात्कृतवान्नात्मघातनम् । परघाते कृते सूत स्वशरीरमथाऽत्यजत् ॥ ४
तेन कर्मविपाकेन महाचौर्येण चाण्डज । भुक्त्वा स्वर्गफलं पुण्यादात्मघातात्परिच्युतः ॥ ५
वैनतेय महाबाहो शृणु तस्य विचेष्टितम् । बभूव लाटदेशेऽसौ पादजो धर्मकर्मवित् ॥ ६
राजमान्योऽतिकुशलो विष्णुभक्तिपरायणः । सत्पात्रेषु ददौ दानमन्नवस्त्रधनादिकम् ॥ ७
परोपकारनिरतो जनो धर्मोपदेशकः । पुत्रवान्धनवाञ्शूरो यशस्वी ज्ञानवाञ्शुचिः ॥ ८
शुभमप्यशुभं चैव यौवने कृतवान्सुत । शुभाख्यं कर्म तत्प्रोक्तमशुभं शृणु तत्त्वतः ॥ ९
धनिनो राजमान्यस्य वैश्यस्य प्रतिवेशिनः । पत्न्या दास्या च श्यालेन संयुक्तः स्त्रीसाहाय्यतः[1] ॥ १०
विषप्रयोगात्तं वैश्यं हत्वा तद्द्रव्यमाहृतम् । (मकराख्यं च निक्षेपं पञ्चकुम्भमयं तथा ॥ ११
तन्मध्ये कुम्भमेकं तु संकल्पयितव्यं ततः ।) पापं घोरं समाश्रित्य मृतः कतिपयैर्दिनैः ॥ १२
पुण्यात्पुण्यफलं भुक्त्वा पापाच्च नरकं तथा । पूर्वपुण्यावशेषेण हिमवत्पादमाश्रिते ॥ १३
मायापुरीमहाक्षेत्रे गङ्गापश्चिमभागतः । धर्मकर्मसमायुक्तो जातोऽयं ब्राह्मणोऽधुना ॥ १४
इदं तु पञ्चमं जन्म ब्रह्मवंशसमाश्रितम् । तिर्यग्योनिषु भूभागे भुक्त्वा जन्मचतुष्टयम् ॥ १५
संकल्पितस्य हरणात्स्वर्भानुर्जन्मलग्नगः । मकराख्यस्य भूभागान्निधेश्च हरणादपि ॥ १६
लग्नतः पञ्चमे चैव मकरे भूमिनन्दनः । हरणात्पञ्चकुम्भस्य पञ्चग्रहसमाकुलः ॥ १७
आयस्थाने विशेषेण ह्यूने केतुर्व्यवस्थितः । वातामयो गुप्तपित्तः कदाचित्कफरोगवान् ॥ १८
महदारम्भकश्चादौ परिणामे विरक्तिभाक् । संसारदुःखभूयिष्ठां निवृत्तिं चिन्तयेत्सदा ॥ १९
राजमान्यो वदान्यश्च पितुः सुखविवर्जितः । धर्मे बुद्धिं सदा कुर्यान्मन्दस्तद्धानिकृन्मुहुः ॥२०
प्राग्भवे ये सहायास्तत्पापकर्मणि वै खग । तेऽत्र पत्नीसुता भूत्वा दुःखं दत्त्वा मृतिं गताः॥२१
प्राक्पत्नी या तु संजाता सैवेदानीं तथा भवेत् । निक्षेपद्रव्यहरणात्पापाद्दुःखी च सर्वदा ॥ २२
दासीप्रसङ्गजात्पापान्निर्धातुः सुखवर्जितः । स्त्रीप्रसङ्गेनातिसौख्याच्चिन्ताक्रान्तो भवेत्सदा ॥२३
लक्ष्योत्र लक्षणैरेभिः प्रायश्चित्तं वदाम्यहम् । पलैर्दशमितैः कार्यो वैश्यो दुर्वर्णधातुतः ॥ २४
पत्रे लेख्यः शुभाकारः स्त्रीयुगेवसुदीरयेत् । "दुर्वर्णवणिजं त्वेनं सभाय सोमदैवतम् ॥ २५
ददेऽहं विप्रमुख्याय पूर्वपापविशुद्धये" । घृतपूर्णान्पञ्चकुम्भान्पलरूप्यमुखान्पृथक् ॥ २६
पञ्चभ्यो ब्राह्मणेभ्यो वै दद्यात्पापविशुद्धये । धेनुं सालंकृतां दद्यादाचार्य्याय प्रयत्नतः ॥ २७
विप्रेभ्यो दक्षिणां दद्याद् भक्त्या विप्रांश्च भोजयेत् । य एवं कुरुते सूत शक्त्या पापविशोधनम्
स पुत्रसुखमाप्नोति स्त्रिया चात्रैव जन्मनि । नाधयो व्याधयस्तस्य न वीर्यक्षयमाप्नुयात् ॥२९

---

१ इदमधिकमिव प्रतिभाति ।

न करोति यदा लोभात्प्रोक्तं वै पापशोधनम् । न जीवन्ति सुतास्तस्मिञ्जीविते नाऽत्र संशयः ३०
शून्यं पञ्चमिते वर्षे रिष्टं चाऽकृतनिष्कृतेः । प्रायश्चित्ते कृते तस्य सप्तानां वर्षसप्ततिम् ॥ ३१ ॥
जीवनं कथितं त्वत्र न त्वारिष्टभयं भवेत् । न भवेत्पुत्रमरणं निर्य्याणत्वे च सद्गतिः ॥ ३२ ॥
जन्मादिमरणांतं हि स्वल्पमेवात्र सूचितम् । यदन्तरगतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ ३३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकाशीत्यधिकाष्टशततमः ॥ ८८१ ॥

श्रीसूर्य उवाच ।

कश्चिदासीन्महाभाग चारणोतिप्रियंवदः । कवित्वशक्तिनिरतो बहुचारणसंयुतः ॥ १ ॥
प्रेरितो दैवयोगेन गतो राजाश्रयं प्रति । तत्सेवानिरतो नित्यं चिरकालमुपस्थितः ॥ २ ॥
भुक्त्वा स्वर्गफलं पुण्यादात्मघातात्परिच्युतः । महाभूमिभुजां वंशे म्लेच्छानां चाजनि स्वयम् ॥ ३ ॥
सिन्धोः पश्चिमभागे तु शतयोजनसंमिते । देशे कर्कटगे जीवे लग्नस्थे चन्द्रसंयुते ॥ ४ ॥
गौराङ्गः पृथुलो धूर्तः सर्वविद्याविशारदः । सुखैश्वर्यसमाक्रान्तो धनवाहनभोगभाक् ॥ ५ ॥
शूरः सुवेशोऽतिक्रूरो बहुपालनतत्परः । पापाल्लोभरतः क्रोधी नानाभैरवशासनः ॥ ६ ॥
रिष्टं षष्टिमिते वर्षे पञ्चहीने पतत्रिण । महाकालनराद्दानात्सुवर्णस्य पतत्रिण ॥ ७ ॥
सर्ववित्तषडंशेन महारिष्टहरं परम् । पञ्चाशीतिमितायुः स्याद्दत्ते कालनरेऽण्डज ॥ ८ ॥
प्रायश्चित्ते कृते ह्यत्र रिष्टं स्यात्प्रोक्तवत्सरे । कालरूपेण शस्त्रेण तत्क्षणं मरणं स्मृतम् ॥ ९ ॥
महाघोराहवे सूत चात्मघातादिदं फलम् । चिह्नं तस्य प्रवक्ष्यामि ह्यात्मघातसमुद्भवम् ॥ १० ॥
हृदिस्थं लशुनं पुत्र पडंगुलमितं शुभम् । दग्धश्च हरणान्नारी प्राग्भवे त्वत्र जन्मनि ॥ ११ ॥
मेदसा पीड्यते सा तु विनतानन्दवर्द्धन । दधिधेनुप्रदानाच्च ब्राह्मणाय कुटुंबने ॥ १२ ॥
मुच्यतेऽत्र महारोगान्नात्र कार्या विचारणा ॥ १३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायो द्व्यशीत्यधिकाष्टशततमः ॥ ८८२ ॥

श्रीसूर्य उवाच ।

तरक्षौ निहते पूर्वभवे च गरुडाग्रज । अत्र जन्मनि नेत्रेषु कात्वरत्वं प्रजायते ॥ १ ॥
रत्नधेनुमहादानाद्विधिना ब्राह्मणाय च । न पश्यत्यक्षिजं रोगं कातरोत्थं हि काश्यप ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्यशीत्यधिकाष्टशततमः ॥ ८८३ ॥

श्रीसूर्य उवाच ।

प्राग्भवे सुसुखी काचिद्गता देवालयेऽण्डज । दीपा धातुमयास्तत्र चान्यदत्ता हृतास्तया ॥ १ ॥
सा शूद्राऽत्र महाभाग धनपुत्रसमन्विता । चन्द्रग्रहे महादानात्प्राक्कृतात्तु पतत्रिण ॥ २ ॥
तेन कर्मविपाकेन चक्षुःपीडाऽतिदारुणा । त्रिदोषैर्दूषिता चात्र युवभावे खगेश्वर ॥ ३ ॥
प्रायश्चित्तं प्रवक्ष्यामि दीपहृत्पापशोधनम् । दीपा देया घृतेनाऽत्र पूरयित्वा सुवर्णजाः ॥ ४ ॥
सुवर्णाद्रिमितं भव्यं संपूज्याथ महेश्वरम् । गन्धपुष्पैस्तथा दीपैर्भक्ष्यैर्भोज्यैः प्रयत्नतः ॥ ५ ॥
दद्याद्विजेभ्यो बहुशस्तस्मात्पापात्प्रमुच्यते ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरशीत्यधिकाष्टशततमः ॥ ८८४ ॥

श्रीसूर्य उवाच ।

दुष्टगन्धयुतः सूत जायते सोऽत्र जन्मनि । मधुहारी च यः पूर्वं प्रायश्चित्तं परं शृणु ॥ १ ॥

---

१ तथेति—ख० पु० । २ 'फलेनैव' इति—ख० पु० ।

मधुधेनुप्रदानाद्वै ब्राह्मणाय पतत्रिण । दुष्टगन्धिकृताद्दोषान्मुच्यते नाऽत्र संशयः ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाशीत्यधिकाष्टशततमः ॥ ८८५ ॥

श्रीसूर्य उवाच ।

तरक्षुं वातयेत्पूर्वं या नारी गरुडाग्रज । कातराक्षी प्रजायेत चक्षूरोगात्पतत्रिण ॥ १
धेनुं रत्नमयीं दद्यात्सप्तुवर्णां विधानतः । न पश्यत्यक्षिरोगं सा तद्दत्तेन महाद्भुतम् ॥ २

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः षडशीत्यधिकाष्टशततमः ॥ ८८६ ॥

श्रीसूर्य उवाच ।

प्राग्जन्मन्यप्यभूत्कश्चिन्नरो राजकृपान्वितः । दण्डाधिकारवाञ्शूद्रो दृढो ब्राह्मणपूजकः ॥ १
नानादानरतस्तत्र लोभाद्वापि विशेषतः । व्यभिचाररतस्यैकब्राह्मणस्य पतत्रिण ॥ २
लोभाच्चकारासौ तत्र ह्यण्डच्छेदं च तत्क्षणात् । स तेन कर्मणा युक्तो भुक्त्वाऽतियमशासनम् ३
देशे पञ्चनदे ह्यत्र जातः शूद्रोऽति चाधमः । स चास्त्यत्र विवर्णस्तु षण्ढः पापमतिः सुखी ॥४
सकलैश्वर्यसंपन्नो नानाधनसमन्वितः । नानावाहनभोगाढ्यो दानात्सर्वमिदं सुत ॥ ५ ।
सप्तजन्मन्यसौ षंढो भविष्यति खगेश्वर ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्ताशीत्यधिकाष्टशततमः ॥ ८८७ ॥

अरुण उवाच ।

क्षात्रे कुले समुत्पन्नः शौर्यौदार्ययशोधनी । राजमानविरोधी च नानासौख्यरतः सदा ॥ १
किंचिद्वातादिना पीडा जायते चोदरे भृशम् । वातरक्तादि शिरसि जायते पक्षसंख्यया ॥ २
तस्य भार्या शुभाचारा सुरूपा गुणशालिनी । प्रियभक्तिरता नित्यं दानदाक्षिण्यवर्तिनी ॥ ३
एकपुत्रप्रसूता चाप्यन्यपुत्रमुपागता । पश्चात्पुष्पं गतं शान्तिमपत्यं नैव जायते ॥ ४
केन कर्मविपाकेन पापं नश्यति तत्स्त्रियः । विधानं च हितार्थाय सत्यं ब्रूहि दिवाकर ॥ ५

श्रीसूर्य उवाच ।

पूर्वं वर्णोत्तरे जातो धातुकांस्यादिकारकः । ब्राह्मणो मित्रसंजातो बहुद्रव्यसमाकुलः ॥ ६
क्रयविक्रयकर्त्ता च विप्रद्रव्येण वर्द्धितः । काले न महता वत्स स विप्रो निधनं गतः ॥ ७
संचितं तद्धनं सर्वं न तु किंचित्प्रदापितम् । ब्रह्मस्वं भक्षितं तेन वंशवृद्धिविनाशनम् ॥ ८
तेन कर्मविपाकेन नानासन्ततिनाशनम् । यो वै तस्य मृतः पुत्रः स जातो ब्राह्मणस्य च ॥ ९
इदं जन्म चतुर्थं तु ब्रह्मवंशसमुद्भवम् । भार्या दुःखकरी ह्येवं पुत्रहीना पतत्रिण ॥ १०

अरुण उवाच ।

प्रायश्चित्तं कथं देव येन पापक्षयो भवेत् । निष्कृतिं ब्रूहि देवेश सन्ततेः सौख्यहेतवे ॥ ११

श्रीसूर्य उवाच ।

ब्रह्मस्वं विषसंतुल्यं पुत्रपौत्रविनाशनम् । विषेणैकोऽपि म्रियते ब्रह्मस्वात्सुतसंततिः ॥ १२
तस्य सन्ततिनाशाय कारयेन्निष्कृतिं पराम् । सुशुभे भूप्रदेशे तु गोमयेनोपलेपयेत् ॥ १३
कुर्यादष्टदलं पद्मं राजतं शुक्लतण्डुलैः । तन्मध्ये स्थापयेत्कुम्भमव्रणं शुभलक्षणम् ॥ १४
सशीतसलिलैः पूर्णं ससर्वौषधिपल्लवम् । नानाफलाक्षतोपेतं पूर्णपात्रोपशोभितम् ॥ १५

तस्योपरि न्यसेत्पात्रं वैणवं वर्तुलाकृति । सप्तधान्यफलोपेतं वस्त्रस्रक्चन्दनान्वितम् ॥ १६ ॥
तन्मध्ये स्थापयेन्मूर्त्तिं निष्कद्वयविनिर्मिताम् । सुवर्णस्य विशुद्धां च दापयेद्वेदवादिने ॥ १७ ॥
प्रतिष्ठां पूजनं कृत्वा ततो गां वै सवत्सकाम् । शतमष्टोत्तरं पक्षिन् द्रोणाः सप्तैव निर्मिताः॥ १८॥
जातीपुष्पसमुद्भूता लक्षपूजा शिवोपरि । संकष्टान्मोचयेद्धेनुं वस्त्रेण परिधापयेत् ॥ १९ ॥
एवं कृतविधेः सूत निश्चला सन्ततिर्भवेत् ॥ २० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाशीत्यधिकाष्टशततमः ॥ ८८८ ॥

श्रीसूर्य उवाच ।

या काचिद्वनिता मोहात्प्राग्भवे माक्षिकं हरेत् । साऽत्र जन्मनि पक्षीन्द्र दुर्गन्धाढ्या प्रजायते॥ १॥
मधुधेनुप्रदानात्तु व्यतीपातादिपर्वसु । दुर्गन्धरोगात्सततं मुच्यतेऽत्र पतत्रिण ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोननवत्यधिकाष्टशततमः ॥ ८८९ ॥

श्रीसूर्य उवाच ।

पण्ढोऽस्ति राजसन्मानी अत्र जन्मनि चाण्डज । महादुष्टक्रियायुक्तो धनवन्धनतत्परः ॥ १ ॥
प्राकृतात्तु महादानात्सुखैश्वर्यसमन्वितः । महामानी महाशूरः पण्ढोऽगम्यातिसेवनात् ॥ २ ॥
नाऽत्र जन्मनि भो सूत प्रायश्चित्तं मयोदितम् । अगम्यागमनं पापं प्रायश्चित्तविवर्जितम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायो नवत्यधिकाष्टशततमः ॥ ८९० ॥

श्रीसूर्य उवाच ।

ब्रह्मघ्नी सा मया प्रोक्ता या पूर्वं घातयेद्विजम् । सर्वं विचेष्टितं यस्माच्छृणुष्वात्र पतत्रिण ॥ १ ॥
अनया द्रव्यलोभेन सपत्न्या घातितः सुतः । प्राग्भवे विषदानेन कुमारो दोषवर्जितः ॥ २ ॥
तस्मादियं महादुष्टा बाल्ये कुष्ठान्विता सुत । अविवाह्या यतः सर्वा पितृगेहे स्थिताण्डज ॥ ३ ॥
चतुर्विंशमिते वर्षे मरणं कीर्तितं ध्रुवम् ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकनवत्यधिकाष्टशततमः ॥ ८९१ ॥

श्रीसूर्य उवाच ।

वराहं यो नरो हन्यात्प्राग्भवे विनतासुत । जायते दन्तुरः सोऽपि काले तत्पापचिह्नितम् ॥ १ ॥
घृतकुम्भं यथा दद्याच्छक्त्या विप्राय धीमते । सुवर्णसहितं तेन तस्मात्पापात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विनवत्यधिकाष्टशततमः ॥ ८९२ ॥

श्रीसूर्य उवाच ।

यो हरेत्प्राग्भवे सूत गुडं मोहान्नराधिपः । गुल्मोदरेण रोगेण सोऽत्र जन्मनि पीड्यते ॥ १ ॥
गुडधेनुप्रदानाच्च विधिना ब्राह्मणाय च । गुल्मोदरसमुद्भूता पीडा नश्यति तत्क्षणात् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिनवत्यधिकाष्टशततमः ॥ ८९३ ॥

श्रीसूर्य उवाच ।

अथ काचित्सती नारी धर्मिष्ठा प्रियवादिनी । स्वामिना प्रेरिता पूर्वं शत्रोर्दग्धं तया गृहम् ॥ १ ॥
तद्दाहाच्च महाभाग दग्धं सर्वं पुरं तदा । ब्राह्मण्येका सबाला च निर्दग्धा दोषवर्जिता ॥ २ ॥
ततो ब्रह्मवधस्तत्र किंचित्कालेन सा मृता । भुक्त्वा तत्र फलं पूर्वपुण्यपापसमुद्भवम् ॥ ३ ॥

सा शूद्री यमुनातीरे जाताऽत्र पतिसेवया । कुष्ठरोगयुता बाल्ये निष्कृतिं पापनाशनीम् ॥ ४
वक्ष्यामि वृषभं दद्यात्सर्वोपस्करसंयुतम् । कुष्ठरोगात्प्रमुच्येत नाऽत्र कार्या विचारणा ॥ ५
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्नवत्यधिकाष्टशततमः ॥ ८९४ ॥

श्रीसूर्य उवाच ।

आगासीद्ब्राह्मणः कश्चित्कृषिकर्मरतस्तदा । पूजकश्चातिमानी च भिक्षुकाणां च यत्नतः ॥ १
तद्गृहे वृषभो मत्तस्तीक्ष्णशृङ्गो भयानकः । तेन तद्वृषभस्याऽपि प्राग्भवे विनतासुत ॥ २
छित्त्वा नासाग्रमुष्कौ तु कृतं कर्मातिदारुणम् । तत्र तज्जनितं भुक्त्वा फलं पापसमुद्भवम् ॥ ३
जातोऽत्र यवनः सिन्धुमण्डले पर्वताश्रिते । षण्ढस्तु तेन पापेन स चास्त्यत्र पतत्रिण ॥ ४
धर्मात्पूर्वकृतात्सोऽपि सुखैश्वर्यधनान्वितः । दृढपापार्जनात्सूत प्रायश्चित्तं न विद्यते ॥ ५
पूजनादतिथीनां च भविष्यति च तद्गतिः । तीर्थाश्रयेऽत्र जन्तूपि स्तृत्युस्तस्य प्रकीर्त्तितः ॥ ६
आयुः षष्टिमिताब्दान्तं रिष्टं पञ्चाशदब्दके ॥ ७ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः पंचनवत्यधिकाष्टशततमः ॥ ८९५ ॥

श्रीसूर्य उवाच ।

घातयेद्या पुरा नारी वराहं गरुडाग्रज । दन्तुरा सा भवेदत्र तत्काले घातसम्भवे ॥ १ ।
ताम्रकुम्भं सुवर्णाढ्यं घृतपूर्णं सदक्षिणम् । तद्दोषशमनायैव दद्याच्छक्त्या विधानतः ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षण्णवत्यधिकाष्टशततमः ॥ ८९६ ॥

श्रीसूर्य उवाच ।

तैलहारी तु यः कश्चिद्भवेल्लोभात्पुराभवे । कंडूया रोगेण सततं पीड्यते चात्र जन्मनि ॥ १ ॥
शक्त्या तैलप्रदानाच्च ब्राह्मणेषु पतत्रिण । कंडूरोगोपशमनं दानात्तैलघटद्वयात् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तनवत्यधिकाष्टशततमः ॥ ८९७ ॥

श्रीसूर्य उवाच ।

काचिच्छुभानना पूर्वभवे चारणवल्लभा । भर्तृत्यक्ताधिविन्ना सा महारोषवती ह्यभूत् ॥ १ ॥
तया महौषधैर्दिव्यैः पत्युः पुंस्त्वं विनाशितम् । तेन पापप्रभावेण जातोऽत्रायं नपुंसकः ॥ २ ॥
धूर्त्तः पापरतो दुष्टः सर्वधर्मविवर्जितः । वर्णबाह्योऽतिदुःखार्तो न शुभां लभते गतिम् ॥ ३ ॥
बहुजन्मन्यसौ पापान्मुक्तो भवति चाण्डज ॥ ४ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टनवत्यधिकाष्टशततमः ॥ ८९८ ॥

श्रीसूर्य उवाच ।

स्वभक्षार्थं महाभाग यो हन्याद्वायुवाहनम् । अत्र जन्मनि खंजोऽपि नात्र कार्या विचारणा ॥१॥
न तस्य विन्मयं प्रोक्तमत्र जन्मनि चाण्डज । स्वशरीरविवृद्ध्यर्थं येन भुक्तो मृगः पुरा ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवनवत्यधिकाष्टशततमः ॥ ८९९ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे मोहाद् गुडं हरति कस्य चित् । गुल्मोदरेण रोगेण पीड्यते चाऽत्र जन्मनि १
गङ्गायां हि महाभाग गुडधेनुप्रदानतः । तत्र स्नानान्महापुण्यात्तस्माद्रोगात्प्रमुच्यते ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवशततमः ॥ ९०० ॥

श्रीसूर्य उवाच ।

कश्चिद्वैश्योऽभवत्पूर्वभवे लेपालविश्रुते । बहुमित्रसुखैराढ्यो हठी व्यसनसंयुतः ॥ १ ॥
स तेन कर्मणा युक्तो गतो धर्मपुरं यतः । शुभं न्यायफलं भुक्त्वा वै जातोऽत्र महीधरे ॥ २ ॥
गौरो भव्यो महाज्ञानी महाविभवसंयुतः । देशेदेशेऽतिविख्यातो घृणी लघुमहायशाः ॥ ३ ॥
स्वस्त्रीत्यागान्महापापाज्जायते स्त्रीविवर्जितः ॥ ४ ॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन्स्त्रीप्राप्तेः सौख्यकारिणीम् ॥ ५ ॥

श्रीसूर्य उवाच ।

पार्वतीप्रतिमां कृत्वा हैमिकां कार्यकारिणीम् । पलपञ्चमितां लेख्यां गन्धमाल्यैरलङ्कृताम् ॥ ६ ॥
दद्याद्वेदविधिज्ञाय स कुलीनाय चार्थिने । प्रजापतिं तथा दद्याद्राजतं त्रिपलात्मकम् ॥ ७ ॥
ब्रह्मदैवतमंत्रेण गृह्णाति स महाद्विजः । पश्चादष्टाक्षरं मंत्रं सहस्रं पापशोधनम् ॥ ८ ॥
जपेदष्टसहस्रं तु सूर्यमंत्रं महाबलम् । होमयेतद्दशांशेन तद्दशांशेन तर्पयेत् ॥ ९ ॥
य एवं कुरुते सूत पूर्वपापविनाशनम् । प्रायश्चित्तं परं त्वत्र तस्मात्पापात्प्रमुच्यते ॥ १० ॥
नैवं करोति यो मोहाज्जडधीर्दैवघातितः । न तस्य स्त्रीसुखं त्वत्र रिष्टं षड्वेदकेऽब्दके ॥ ११ ॥
प्रायश्चित्ते कृते सूत जीवनं वर्षसप्ततिम् ॥ १२ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकाधिकनवशततमः ॥ ९०१ ॥

श्रीसूर्य उवाच ।

नृपं विना प्राग्यो हन्यान्मृगं हि विनतासुत । दद्यादश्वं नवं तत्र स्वर्णनिष्कयुतं शुभम् ॥ १ ॥
सहासनमलङ्कारं पूजयित्वा विधानतः । विधिज्ञाय महावाहो नानाशास्त्रविधानतः ॥ २ ॥
न स पश्यति खंजत्वं दानस्यास्य प्रभावतः ॥ ३ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्यधिकनवशततमः ॥ ९०२ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे सूत परतैलापहारिणी । साऽत्र जन्मनि पक्षीन्द्र कंडूरोगप्रपीडिता ॥ १ ॥
सा मुच्यते महाभाग दानात्तैलघटद्वयात् । सुवर्णाढ्या तथा शक्त्या तैलदानाद्विशेषतः ॥ २ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्यधिकनवशततमः ॥ ९०३ ॥

श्रीसूर्य उवाच ।

राजप्रचारी वै कश्चिच्चारणः पूर्वजन्मनि । भव्यमूर्त्तिर्दृढो धीरः शिवपूजनतत्परः ॥ १ ॥
राजपत्न्यां महाबाहो दधानोऽसावधर्मकम् । गर्भं चकार कामेन भाविनोर्थस्य वै बलात् ॥ २ ॥
पापात्पापफलं भुक्त्वा यमलोके पतत्त्रिण । शिवपूजनजात्पुण्यात्प्रागत्र धनभोगभाक् ॥ ३ ॥
स्त्रीपुत्रसुखहीनोऽत्र प्रायश्चित्तं न विद्यते ॥ ४ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरधिकनवशततमः ॥ ९०४ ॥

श्रीसूर्य उवाच ।

गर्भाढ्या याऽवधीत्पूर्वं मृगं हि विनतात्मज । स्वगर्भपालने दक्षा जन्मन्यत्र गतिं शृणु ॥ १ ॥
तद्घातकाले खंजा सा भविष्यति शुभानना । गर्भपातनदुःखार्ता तथैव महदेनसः ॥ २ ॥

तत्पापनाशनं सूत शृणु वक्ष्यामि तत्त्वतः । दद्याद्विप्राय तुरगं युवानं भूषणान्वितम् ॥ ३
स्वर्णनिष्कयुतं चाऽत्र पूर्वपापात्प्रमुच्यते । न पश्यति च गर्भोत्थां पीडामत्रैव जन्मनि ॥ ४
दानप्रभावात्पक्षीन्द्र खंजत्वं नाप्नुयादिह ॥ ५ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाधिकनवशततमः ॥ ९०५ ॥

अरुण उवाच ।

क्षात्रे कुले समुत्पन्नो दानदाक्षिण्यतत्परः । मेहादिपीडितो नित्यं कृशाङ्गः पाण्डुरद्युतिः ॥ ६
उर्ध्वं वातादिना पीडा बाल्ये स्याद्ग्रहणीगदः । तस्य भार्या सदाचारा सुस्नेहा भर्तृभक्तिताः ॥ ७
रक्तस्रावादिना पीडा जायते चोदरानिलः । उदरात्तस्या गर्भस्य पातं कुर्याच्च पृष्ठतः ॥ ८
द्वित्रैश्च पञ्चभिर्मासैश्चतुर्भिः सप्तभिस्तथा । केन कर्मविपाकेन गर्भो न स्थिरतां व्रजेत् ॥ ९

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम् । व्यभिचारभयाद्वापि तया गर्भश्च पातितः ॥ १०
अतिकष्टैर्दिनतेय गर्भपातकृतागसः । अपरं च कृतं कर्म व्यभिचारो यतस्ततः ॥ ११
नानाद्रव्यापहर्त्री च कुलटा वाक्यलंघनात् । भर्तुस्तद्वोरिणी वृत्तिर्दुष्टसङ्गतिचार्जनात् (?) ॥ १२
तेन दुष्टेन यद् द्रव्यं हृतं तस्करबुद्धिना । भुक्तं ताभ्यां वैनतेय ब्रह्मस्वं तत्र जन्मनि ॥ १३
कालेन तद्धनं भुक्त्वा पीडितो दारुणैर्ग्रहैः । यातना बहुधा प्राप्ता पश्चान्मानुष्यमाप्नुयात् ॥ १४
किंचित्पुण्यप्रभावेण क्षात्रेऽयं जन्मतो भुवि । इदं जन्म चतुर्थं तु गर्भपातो हि जायते ॥ १५
उभाभ्यां हि कृतं कर्म भुज्यते जन्मजन्मनि ॥ १६ ॥

अरुण उवाच ।

प्रायश्चित्तं कृतं देव येन पापक्षयो भवेत् । निष्कृतिं ब्रूहि देवेश येन गर्भः स्थिरो भवेत् ॥ १७

श्रीसूर्य उवाच ।

पूर्वजन्मनि या नारी नानागर्भं जिघांसति । निष्कृत्या च तया शुद्धिः श्रूयतां कश्यपात्मज ॥ १८
नारी नियमसंवीता ध्रुवं सा व्रतकांक्षिणी । सौम्यायने समापूर्यमाणपक्षे शुभेऽहनि ॥ १९
तस्य पापस्य शांत्यर्थं नानाव्रतमुपाचरेत् । पयः स्रवन्तीं शान्ताङ्गसुरभीं शुभलक्षणाम् ॥ २०
गृहमानीय विधिवत् पूजयेत्तां समाहिता । इष्टैस्तु यवसैः पानैर्भक्ष्यैः कण्डूयनैरपि ॥ २१
रुचिरैश्च सुमिष्टान्नैः स तां परिचरेत्सदा । रात्रौ पुष्पावलीभिश्च दीपस्रक्चन्दनादिभिः ॥ २२
सुगीतमङ्गलध्वानैस्तदधःशायिनी भुवि । प्राणयात्रां प्रकुर्वीत तस्यास्तु पयसा हविः ॥ २३
तस्यास्तु पञ्चगव्यानि यथान्यायं यथाश्रुति । एवं व्रतपरा नारी मासिमासि तु संतता ॥ २४
तस्या धेनोः सवत्साया इष्टं समभिकांक्षिणी । व्रतान्ते तु द्विजाचार्यं समस्तगुणशालिनम् ॥ २५
अभ्यर्च्य पूजयेद्भक्त्या वस्त्रस्रग्दामभूषणैः । सुवर्णशृङ्गमाग्नेयं मायपाडशसंयुतम् ॥ २६
कृत्वा च विधिना तस्मै तां दद्याभितिभाषिणी । सुवर्णशुद्धमाग्नेयं मायपाडशसंयुतम् ॥ २७
दापये गां सवत्सां च पूर्वपापापनुत्तये । यन्मया कुलटाकांक्षानानागर्भा जिघांसिताः ॥ २८
नानाभेदैः प्रपातं मे गर्भा वै बहवो भुवि । तस्य कर्मार्जितं पापं गर्भपातादि दूषणम् ॥ २९
एतत्समस्तनाशाय सवत्सां दानतस्त्विमाम् । इह जन्मनि वन्ध्यत्वं नाशयेत्तस्यतस्य तु ॥ ३०

---

१ ' वाक्यसेवनात् ' इति—ख० पु० । चान्यलंघनादिति तु युक्तम् ।

दानेनानेन सुरभेरनघा सातिसुव्रता । भवेयं त्वत्प्रसादेन गर्भो मे स्थिरतामियात् ॥ २६ ॥
एवमस्त्विति तां धेनुं समादाय सदक्षिणाम् । हिरण्यं रजतं ताम्रं फलानि च प्रदापयेत् ॥ २७ ॥
द्विजमुख्याय दत्त्वाऽथ भूरिद्रव्येण तोषयेत् । भोजयेच्च शतं विप्रान्नानान्नैः सक्तुपायसैः ॥२८॥
एवं कृतविधेः सूत नारी वा दुःखनाशिनी । वन्ध्यत्वान्मुच्यते सूत पुत्रप्राप्तियशस्विनी ॥ २९॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडधिकनवशततमः ॥ ९०६ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि यः कश्चित्तुरगं घातयेन्नरः । वक्रकण्ठेन रोगेण पीडितोऽत्र प्रजायते ॥ १ ॥
स्वर्णाश्वदानाद्विधिवत्सर्वोपस्करसंयुतात् । वक्रकंठेन संभूतां पीडां नाप्नोति मानवः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्ताधिकनवशततमः ॥ ९०७ ॥

श्रीसूर्य उवाच ।

शृगालघाती पुरुषः प्राग्जनुष्यत्र जन्मनि । पादहीनो भवेत्सूत भृशं चाकृतनिष्कृतिः ॥ १ ॥
दद्यादश्वं सुवर्णाढ्यं सर्वोपस्करसंयुतम् । ब्राह्मणाय प्रयत्नेन पूर्वपापापनुत्तये ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायोऽष्टाधिकनवशततमः ॥ ९०८ ॥

श्रीसूर्य उवाच ।

संकरः प्राग्भवे सूत बभूव धनसंयुतः । तीर्थवासी विरक्तश्च लोभी धर्मक्रियान्वितः ॥ १ ॥
क्रूरं कर्म कृतं तेन दुष्टसङ्गेन चाण्डज । चौर्येण गां परां नीत्वा क्षुधितैर्भक्षिता पुरा ॥ २ ॥
मृतास्ते तेन पापेन नानायोनिमुपागताः । स तीर्थमृत्युवशतो गङ्गातीरेऽत्र पादजः ॥ ३ ॥
तीर्थमृत्युप्रसादाच्च धनपुत्रसमन्वितः । युवभावेऽण्डजश्रेष्ठ चक्षुर्हीनोऽत्र जायते ॥ ४ ॥
प्रायश्चित्तं प्रवक्ष्यामि सुवर्णदशसंयुताम् । लिखित्वा गां विधानेन पूजयित्वा विधानतः ॥ ५ ॥
सा देया वेदविदुषे पूर्वपापविशुद्धये । गायत्रीं च जपेत्तत्र नियतं चायुतद्वयम् ॥ ६ ॥
होमयेच्च यथाशक्त्या भोजयेच्च ततो द्विजान् । यः कुर्याद्विधिना चेदं स तदोपात्तमुच्यते ॥ ७ ॥
स दिव्यचक्षुषा युक्तो जायतेऽत्रैव जन्मनि ॥ ८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवाधिकनवशततमः ॥ ९०९ ॥

श्रीसूर्य उवाच ।

या काचिद्घातयेन्नारी शृगालं पूर्वजन्मनि । सा तत्र पुरुषं वापि घातार्थमुपदेशयेत् ॥ १ ॥
अत्र जन्मनि वै चोर्ध्वात्स्थानाच्च बहुवैकृतः । पादभंगो भवेत्तस्मात्पापाच्चैव खगाधिप ॥ २ ॥
करोति तस्य पापस्य विन्मयं विधिनात्र चेत् । तस्मात्पापात्प्रमुच्येत न चोर्ध्वात्पतनं तथा ॥३॥
अश्वं निष्कसुवर्णाढ्यं विन्मयं पापशोधनम् ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो दशाधिकनवशततमः ॥ ९१० ॥

श्रीसूर्य उवाच ।

या नारी घातयेदश्वं प्राग्भवे सोऽत्र जन्मनि । महापर्वसु गन्धादि पुण्यतीर्थेषु दापयेत् ॥ १ ॥
सर्वोपस्करसंयुक्तं सुवर्णाढ्यं सुसंयता । सा मुच्यते वक्रकंठपीडनाद्विनतासुत ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकादशाधिकनवशततमः ॥ ९११ ॥

श्रीसूर्य उवाच ।

आसीत्क्षत्री महाभाग पाञ्चाले देशके शुभे । नानाधनसमायुक्तो ग्रामपो विश्रुतो महान् ॥ १ ॥
दुष्कृतं चरितं तेन भाविनोर्थस्य वै बलात् । शूद्रायां च धृतो गर्भः कामलोभेन निश्चयात् ॥२॥
कृतो यत्नो महांस्तत्र नासीद्गर्भस्य पातनम् । सा तु हालाहलं पीत्वा लोकानां शंकया मृता॥३॥
महत्यां पीडया चैव बालकोऽपि मृतस्ततः । सहायानां पंचकेन कृतं प्राक्कर्म दारुणम् ॥ ४ ॥
कर्मणां संग्रहं चेदं गर्भनाशसमुद्भवम् । ततो मरणसंप्राप्तो बाहुजोऽथ सहायधृक् ॥ ५ ॥
सूर्यलोकं तदा गत्वा भुक्त्वा भोगांश्च शाश्वतान् । अशुभान्नकान्भुक्त्वा स्वकृताद् दृढकर्मजात्॥६॥
सोपप्लवे महादानात्पूर्वजन्मनि मानद । स जातो यमुनातीरे बाहुजोप्यत्र जन्मनि ॥ ७ ॥
गौरः कृशाङ्गो लम्बश्च धनसौख्यसमन्वितः । पितृमातृविहीनश्च मितदो लोभमोहितः ॥ ८ ॥
नैकस्त्रीसंयुतः कामी नानाविभवसंयुतः । आद्यंतसुखयुक्तश्च बुद्धिमान्देशविश्रुतः ॥ ९ ॥
धर्मादिदं तथा पापाद्दूरतः पापरतः शठः । सकन्यो हृदि रोगश्च मनोदुःखसमन्वितः ॥ १० ॥
शूद्रायां वीर्यदानात्प्राक् तद्गर्भाज्जातपुत्रकः । ऐहिकं लक्षणं तस्य शरीरे चोपजायते ॥ ११ ॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन् सर्वपापापनोदनीम् । तत्र धर्मकरीं धन्यां लोकानां हितकाम्यया ॥१२॥

श्रीसूर्य उवाच ।

वक्ष्यामि निष्कृतिं तस्य शृणु सूत प्रयत्नतः । पूर्वपापविशुद्ध्यर्थं गर्भधारणनाशनीम् ॥ १३ ॥
शूद्रायाः प्रतिमा कार्या पलैः पञ्चमितः शुभा । हिरण्मयी सगर्भा च पत्रे लेख्या विधानतः१४॥
तदर्द्धार्धेन वा कार्या त्रिषु वित्तानुसारतः । गन्धपुष्पैरलंकृत्य सा देया पापनाशनी ॥ १५ ॥
पंचमाषमितो विष्णुः सर्वपापप्रणाशनः । प्रजापतिं तथा दद्यात्सौवर्णं पञ्चमाषकम् ॥ १६ ॥
राजतं च तथा दद्यात्सूर्यं सार्धपलात्मकम् । गायत्रीं दशसाहस्रं जपेच्च विधिपूर्वकम् ॥ १७ ॥
होमयेत्तण्डुलैः साज्यैः सर्षपैः सतिलैस्तथा । ब्राह्मणान्भोजयेत्पश्चात्पूर्वपापात्प्रमुच्यते ॥ १८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वादशाधिकनवशततमः ॥ ९१२ ॥

श्रीसूर्य उवाच ।

पिङ्गलाक्षो भवेदत्र पूर्वे रीत्यपहारकः । रीतेः पलानां च शतं देयं तत्पापशुद्धये ॥ १ ॥
गायत्र्या होमयेत्पश्चात्तिलान्विप्रांश्च भोजयेत् । मुच्यतेऽत्र महाभाग तद्रोगात्पापजाद्ध्रुवम् ॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोदशाधिकनवशततमः ॥ ९१३ ॥

श्रीसूर्य उवाच ।

वैनतेय महाभाग खररोमा प्रजायते । पूर्वजन्मनि यो हन्यात्खरं पापविमोहितः ॥ १ ॥
प्रायश्चित्तं परं तस्य पापस्य शृणु तत्त्वतः । निष्कत्रयं हिरण्यं च दद्याद्दोषोपशान्तये ॥ २ ॥
ब्राह्मणाय दरिद्राय वेदवेदाङ्गपारिणे ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्दशाधिकनवशततमः ॥ ९१४ ॥

श्रीसूर्य उवाच ।

प्रमुक्तं गर्भपुष्ट्यर्थं कुक्कुटाण्डं खगेश्वर । अत्र जन्मनि सा जाता संकरा लोभसंयुता ॥ १ ॥
धनधान्यसमायुक्ता पूर्वपुण्यादिहाण्डज । न च गर्भं दधात्येषा प्राक्पापादण्डभक्षणात् ॥ २ ॥

कृत्वाऽण्डं विधिना तद्वद्धैरण्यं द्विपलात्मकम् । तदर्धार्धमितं वापि त्रिषु वित्तानुमानतः ॥ ३ ॥
दत्त्वा द्विजाय विधिना ह्याचरेच्छांकरं व्रतम् । फाल्गुन्यादितुर्दश्यां कृष्णायां मासिमासि तु ॥४ ॥
पूजयेच्छंकरं रात्रौ तथा जागरणेन च । भवन्ति सुलभाः पुत्राः सततं कृतनिष्कृतेः ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचदशाधिकनवशततमः ॥ ९१५ ॥

श्रीसूर्य उवाच ।

शृणु सूत महाभाग कर्म यत्कृतवान्पुरा । जीवोऽयं तत्फलं चाऽत्र प्रवक्ष्यामि समासतः ॥ १ ॥
अभवत्प्राग्भवे विप्रो धर्मशास्त्रार्थकोविदः । राजप्रचारी बलवाञ्शूरो मंत्री महायशाः ॥ २ ॥
सन्धिविग्रहसंयुक्तो दाता भोक्ता प्रियंवदः । गत्वा त्वरिपुरं तेन घातिताः शत्रवः पुरा ॥ ३ ॥
विश्वासाद्राजकार्येषु कृतं कर्मातिदुष्कृतम् । लुंठितं तत्पुरं तेन लोभोपहतचेतसा ॥ ४ ॥
पीडिता बहवो लोका द्रव्यलोभाकुलीकृताः । स तेन कर्मणा युक्तः प्राप्तस्तु यमशासनम् ॥५॥
भुक्त्वाऽतिदारुणान्सूत नरकान्घोरदर्शनान् । तथा पुण्यफलं पुण्यात्प्राप्य पुण्यावशेषतः ॥ ६ ॥
स्वर्णकारकुले जातो धूर्तो लोभपरः सदा । नानाचौर्यक्रियायुक्तो लोकवंचनतत्परः ॥ ७ ॥
महाभिमाननिरतः प्रियो राजजनेष्वपि । सुखैश्वर्यधनैर्युक्तः कुटुम्बभरणे दृढः ॥ ८ ॥
नानास्त्रीसुखसंयुक्तस्तथा पुत्रविवर्जितः । वक्ष्यामि निष्कृतिं सूत सर्वपापनिकृन्तनीम् ॥ ९ ॥
प्रयागे त्वथवा काश्यां स्थाप्य लिङ्गं शुशोभनम् । पूजयेत्तु त्रिवर्षान्तं मंत्रैस्तल्लिङ्गजैरतथा॥१०॥
गन्धपुष्पोपचारैश्च नैवेद्यैर्बहुदीपकैः । संपूज्य विधिवद्देवं तदन्ते भोजयेद्द्विजान् ॥ ११ ॥
शिवभक्तांस्तथा शान्तान्दक्षिणाभिश्च पूजयेत् । नानाहिरण्यैर्विधिवत्तथैवाचरणैः शुभैः ॥ १२ ॥
अथवा शृणुयात्तत्र यजुर्वेदं विधानतः । ब्रह्मचर्येण सततं प्रायश्चित्तमिदं परम् ॥ १३ ॥
य एवं कुरुते भक्त्या पूर्वपापौघनाशनम् । सत्यं प्राप्य तु निर्याणं शिवलोकं हि गच्छति ॥१४ ॥
कर्तव्यं ब्राह्मणद्वारा सर्वमेतद्धि काश्यप । नाधिकारोऽत्र शूद्रस्य वेदस्य श्रवणे क्वचित् ॥ १५ ॥
तप्ता शलाका देया वै शूद्रकर्णेऽतिदारुणा । श्रुतं पारायणं येन पापेनाक्रान्तचेतसा ॥ १६ ॥
आयुरब्दशतं तस्य कृतनिष्कृतिचेतसः । प्रायश्चित्ते कृते रिष्टं जायते षष्टिवत्सरे ॥ १७ ॥
एतज्जन्मफलं प्रोक्तं सविधानं समासतः ॥ १८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षोडशाधिकनवशततमः ॥ ९१६ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे हन्यात् खरमत्रैव जन्मनि । खररोमसमान्यस्या रोमाणि प्रभवन्ति च ॥ १ ॥
ब्राह्मणाय तदा दद्यात्स्वर्णनिष्कत्रयं सुत । जायते सूक्ष्मरोमा सा विनतानन्दवर्धन ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तदशाधिकनवशततमः ॥ ९१७ ॥

श्रीसूर्य उवाच ।

या पुरा वै हरेद्रीतिं नारी सा च पतत्रिण । पिङ्गाक्षी जायते साऽत्र प्रायश्चित्तं परं शृणु ॥ १ ॥
रीतिं दद्यात्पलशतं तथा ब्राह्मणभोजनम् । गायत्र्या जुहुयाच्छक्त्या तिलान् रोगविनाशनम्॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टादशाधिकनवशततमः ॥ ९१८ ॥

श्रीसूर्य उवाच ।

प्राग्भवे वनिता या च परसिद्धान्नहारिणी । साऽत्र जन्मनि शूलेन रोगेणैव च बाध्यते ॥ १ ॥
सिद्धान्नदानं विप्रेभ्यो दीनेभ्योऽथ पतत्रिण । भिक्षुभ्यश्च तथा दानाद्रसदानाच्च शक्तितः ॥ २ ॥
न जायते शूलपीडा तस्याश्च कृतनिष्कृतेः । प्रायश्चित्ते कृतेऽत्रैव म्रियते शूलपीडया ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनविंशत्यधिकनवशततमः ॥ ९१९ ॥

श्रीसूर्य उवाच ।

उष्ट्रघाती भवेत्पूर्वं जन्मन्यथ पतत्रिण । सोऽत्र जन्मनि जायेत नरश्च विकृतस्वरः ॥ १ ॥
वक्ष्यामि तस्य पापस्य नाशनं चात्र जन्मनि । कर्पूरं त्रिपलं दद्याद्विप्रेभ्यः शक्तितोऽण्डज ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो विंशत्यधिकनवशततमः ॥ ९२० ॥

श्रीसूर्य उवाच ।

वन्ध्येयं या महाभाग पृच्छति स्वं प्रयोजनम् । गर्भपातरता पूर्वं जन्तुष्यत्र फलं त्विदम् ॥ १ ॥
मुखजा प्राग्भवे त्वत्र तत्पापाद्यवनी हि सा निष्कृतिं तत्प्रवक्ष्यामि गङ्गायां हि पतत्रिण ॥ २ ॥
पूजयेल्लक्षं रुद्राणां त्रिगुणार्धं तदर्धकम् । शक्त्याथ भोजयेद्विप्रान् होमयेच्च स्वशक्तितः ॥ ३ ॥
अनेन विधिना यस्तु प्रायश्चित्तं समाचरेत् । जायते संततिस्तस्या इह जन्मनि वै ध्रुवम् ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकविंशत्यधिकनवशततमः ॥ ९२१ ॥

श्रीसूर्य उवाच ।

कांस्यहारी तु पुरुषः प्राग्भवे विनतासुत । शीर्षरोगेण सततं पीडितो जायतेऽधुना ॥ १ ॥
दानाच्छतपलादत्र सीसकस्याण्डजोत्तम । विप्राय वेदविदुषे शीर्षरोगं न पश्यति ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वाविंशत्यधिकनवशततमः ॥ ९२२ ॥

श्रीसूर्य उवाच ।

बभूव बाहुजः कश्चिद्देशे कीराभिधे सुत । धर्मकर्मकरो भक्तः पितृपुत्रधनान्वितः ॥ १ ॥
दत्तानि तेन दानानि ब्राह्मणेभ्यो हि शक्तितः पर्वस्वपि च पात्रेभ्यो गोभूम्यश्वादिकानि च ॥ २ ॥
पापमाचरितं तेन भाविनोर्थस्य वै बलात् । स्ववंशजस्य कस्यापि गृहं शत्रोर्मनोहरम् ॥ ३ ॥
निर्दग्धं वैरिभावेन रात्रौ भार्यासहाय्यतः । तस्मिन्दाहे महावाहो निर्दग्धं वृषभद्वयम् ॥ ४ ॥
गृहस्थाः स्वल्पजीवाश्च घातिताः क्रूरकर्मणा । ततो बहुतिथे काले गतः स यमशासनम् ॥ ५ ॥
सस्त्रीकः स्वफलं भुक्त्वा पापाद्दुष्टं शुभं तथा । शुभात्पुण्यात्समुद्भूते स जातो बाहुजाधरः ॥ ६ ॥
मध्यस्वरूपो मतिमान् कुलेष्टः पुरुषो दृढः । रक्तो नोचो नातिनीचो बहुकन्यः पृथुर्विभुः ॥ ७ ॥
यौवनेऽन्त्ये सुखैश्वर्यधनैः स्थानैर्युतोऽसुतः । मितदो भोगभाग्याढ्यः कृती मानी जनप्रियः ॥ ८ ॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । चिन्तातुरो यो धूर्तश्च दुःखार्तो मानवर्जितः ॥ ९ ॥
गोघाताद्वह्निदाहाच्च जातपुत्रविनाशकः । सहायलक्षणं सर्वं कथयामि खगेश्वर ॥ १० ॥
या स्त्री पूर्वे सहायासीद्दाहकर्मणि चाण्डज । सा ज्येष्ठा प्रष्टुरेवाऽत्र मृतपुत्रास्ति जन्मनि ॥ ११ ॥
लक्ष्मैतदण्डजश्रेष्ठ जन्माङ्गाद्वृषभे शनिः । लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥ १२ ॥
कारयित्वा शिवं साङ्गं पलैर्वेदमितैः शुभे । हिरण्मये महाभाग पत्रे लेख्यं शिवान्वितम् ॥ १३ ॥

तदर्धार्धमितं वापि त्रिषु वित्तानुमानतः । पूजयित्वा तु गन्धाद्यैः षोडशोरूपचारकैः ॥ १४ ॥
संस्थाप्य पशुपं पश्चाद्गोरथे सुमनोहरे । सर्वोपस्करसंयुक्तं वितानाम्बरभूषितम् ॥ १५ ॥
दद्याद्वेदविधिज्ञाय मन्त्रमेतमुदीरयेत् । मोहात्पूर्वं महाभाग अग्निदाहाद्यदर्जितम् ॥ १६ ॥
तन्नाशाय ददेऽहं तु शिवं गोरथसंस्थितम् । गोधिकाद्यास्तथा जीवाः पत्रे लेख्यास्तु राजते॥ १७॥
शिवपत्रमिदं दद्याद्ये त्वन्ये घातिताः पुरा । पञ्चमापमितो वह्निर्देयो हेममयः शुभः ॥ १८ ॥
गायत्र्यष्टसहस्रं तु रौद्रं जप्त्वा सहस्रकम् । अष्टाक्षरं द्विसाहस्रं होमयेद्धोजयेद्द्विजान् ॥ १९ ॥
य एवं कुरुते सूत प्रायश्चित्तं विधानतः । नः तस्य पुत्रमरणं तदग्रे जायते क्वचित् ॥ २० ॥
पञ्चाशन्मितकेऽब्दे वा रिष्टं चाकृतनिष्कृतेः । प्रायश्चित्ते कृते ह्यायुः चतुर्युतशाताब्दकम् ॥ २१ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोविंशत्यधिकनवशततमः ॥ ९२३ ॥

श्रीसूर्य उवाच ।

कांस्यहारी च पुरुषः प्राग्भवे विनतासुत । शीर्षरोगेण सततं पीडितो जायतेऽधुना ॥ १ ॥
दानाच्छतपलादत्र सीसकाद्दण्डजोत्तम । विप्राय वेदविदुषे शीर्षरोगं न पश्यति ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्विंशत्यधिकनवशततमः ॥ ९२४ ॥

श्रीसूर्य उवाच ।

वन्ध्यायाश्च महाभाग प्रायश्चितं शृणुष्व तत् । शूलोद्भिन्नतनुं चौरं मृतं प्राप्य रवेर्दिने ॥ १ ॥
तत्तले तु तदा कुर्याद्वन्ध्या स्नानं शतौषधैः । पत्रैर्वृक्षोद्भवैः सूत तथा मृद्भिश्च सप्तभिः ॥ २ ॥
सप्तभिः सलिलैर्वापि संपूज्य प्रथमं सुत । विधिनाऽनेन या कुर्याद्वंध्या पुत्रं लभेद् ध्रुवम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचविंशत्यधिकनवशततमः ॥ ९२५ ॥

श्रीसूर्य उवाच ।

सतीं स्वभार्यां परमां साध्वीं संत्यज्य दुर्मतिः । प्रमादात्प्राग्भवे गच्छेदन्यस्त्रीकामलोभतः ॥ १॥
सोऽत्र जन्मनि भो सूत ग्रहणीरोगसंयुतः । जायते म्रियतेऽवश्यं ब्राह्मण्यां गमनादिह ॥ २ ॥
न तस्य पापशमनं मया प्रोक्तं खगाधिप । तस्मिन्वयसि तद्दृष्टं भविष्यति न संशयः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षड्विंशत्यधिकनवशततमः ॥ ९२६ ॥

श्रीसूर्य उवाच ।

वा काचिद्वनिता सूत प्राग्भवे कांस्यहारिणी । साऽत्र जन्मनि पक्षीन्द्र शीर्षरोगप्रपीडिता ॥१॥
दद्याच्छतपलं सीसं ब्राह्मणाय कुटुम्बिने । तत्काले शीर्षजाद्रोगान्मुच्यते नाऽत्र संशयः ॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तविंशत्यधिकनवशततमः ॥ ९२७ ॥

या नारी ह्यवधीत्पूर्वं मोहादुष्ट्रं खगाधिप । साऽत्र जन्मनि पक्षीन्द्र जायते विकृतस्वरा ॥ १ ॥
सरस्वत्याश्च प्रतिमां सौवर्णीं राजतीं तथा । दद्याद्वेदविधिज्ञाय तदा स्यात्सुस्वरण्डज ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाविंशत्यधिकनवशततमः ॥ ९२८ ॥

---

१ 'साममन्त्रैश्च तं पूज्य प्रथमं विनतासुत' इति—ख० पुस्तके पाठः ।

श्रीसूर्य उवाच ।

पूर्वजन्मनि यः कश्चिन्मोहात्परघृतं हरेत् । नेत्ररोगयुतः सोऽपि जायतेऽत्रैव जन्मनि ॥ १ ॥
घृतधेनुप्रदानाच्च विधिना वेदपारगे । मुच्यते नेत्ररोगाच्च जन्मन्यत्र पतत्रिण ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनत्रिंशदधिकनवशततमः ॥ ९२९ ॥

श्रीसूर्य उवाच ।

स्वैकं पतिं परित्यज्य या गच्छेत्पूर्वजन्मनि । परपुंसि महाभाग ग्रहणीरुग्युताऽत्र सा ॥ १ ॥
प्रायश्चित्तं परं तस्या व्रतं चान्द्रायणं त्विह । वैशाखे मासवमासे वा तस्मात्पापात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिंशदधिकनवशततमः ॥ ९३० ॥

अरुण उवाच ।

विप्रवर्णकुलोत्पन्नो वातरक्ताक्षदर्शनः । उदरे वातजा रोगाः किंचिच्छस्त्रोपघातकात् ॥ १ ॥
किंचित्क्रोधश्च लोभश्च किंचिद्वित्तसमन्वितः । आदिपुत्रो मृतस्तस्य अपत्यं नैव जायते ॥ २ ॥
केन कर्मविपाकेन सत्यं कथय भास्कर ॥ ३ ॥

श्रीसूर्य उवाच ।

पूर्वजन्म महाबाहो शूद्रवंशसमुद्भवम् । व्यापारकृषिवाणिज्यं ब्रह्मवित्तेन यत्कृतम् ॥ ४ ॥
व्यवहारादिना कृत्वा ब्रह्मवित्तेन वर्द्धितम् । कालेनैव मृतो विप्रो धनं शूद्रेण वञ्चितम् ॥ ५ ॥
नार्पितं ब्रह्मपुत्राय ब्रह्मस्वं च गृहे स्थितम् । ब्रह्मस्वं भक्षितं तेन बहुकालं खगेश्वर ॥ ६ ॥
पश्चान्मृत्युवशं प्राप्तो नरके रौरवे गतः । इदं जन्म तृतीयं तु ब्रह्मवंशसमुद्भवम् ॥ ७ ॥
निक्षेपहरणाद्वापि मृतपुत्रः प्रजायते । ब्राह्मणस्य विशेषेण ब्रह्मस्वं च विषोपमम् ॥ ८ ॥
ऋणं प्रसह्य वै प्रोक्तमपि कालशतादिकम् । तस्माद्विप्रऋणं प्रोक्तप्रसह्यं त्वभिजायते ॥ ९ ॥
ब्रह्मस्वभक्षणाच्चैव वर्षाणां च सहस्रकम् । पतितो नरके घोरे पच्यते चेह कर्मणा ॥ १० ॥
पश्चान्मानुष्यमापन्नो व्रतदानप्रभावतः ॥ ११ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं देव येन पुत्रः प्रजायते । नारीणां च नराणां च निष्कृतिं सौख्यहेतवे ॥ १२ ॥

श्रीसूर्य उवाच ।

महापापहरो देवः सर्वकामहरः प्रभुः । पूजनीयो महारुद्रः सन्ततिश्रेय इच्छता ॥ १३ ॥
यजुर्वेदमयं देवं यजुर्भिः शतरुद्रजैः । यजनैरथ मुच्येत पापादाकल्पसंभवात् ॥ १४ ॥
रुद्रैकादशिनीभिस्तु रुद्रैकादशकेन वा । जप्तेन तोषयेद्देवं रुद्रमेकादशात्मकम् ॥ १५ ॥
तदशांशेन होतव्यं द्रव्यं श्रद्धासमन्वितम् । विधिवज्जुहुयाद्वह्नौ तिलैस्त्रिमधुरप्लुतैः ॥ १६ ॥
हरितालीपलाशोत्थाः समिधोऽत्र हवे हुताः । प्रतिरुद्रं प्रदातव्यं गोयुगं रसनान्वितम् ॥ १७ ॥
केयूरकुण्डलाकल्पमन्त्रपुस्तकमंडलुः । प्रति रुद्रं शतं विप्रान्भोजयेत्सुसमाहितः ॥ १८ ॥
निष्कं दद्यात्सुवर्णस्य दद्याद्वा मुख्यदक्षिणाम् । एवं रुद्रविधिं कृत्वा त्रिविधं पापशान्तिकृत् १९॥
इतिहासपुराणोक्तिसूक्तानि विविधानि च । शृणुयाद्विधिवत्तार्क्ष्य सभार्यः प्रयतोऽन्वहम् ॥ २०॥
देवर्षिपितृमर्त्यानामृषीणां च महात्मनाम् । देवदानवगन्धर्वपिशाचोरगरक्षसाम् ॥ २१ ॥
सर्वासां जीवजातीनामुत्पत्तिं शृणुयादपि । ऋषीणामृषिपत्नीनां वंशान्सर्वानुदीरितान् ॥ २२ ॥
एवं स त्रिविधात्पापान्मुच्यतेऽपत्यदुःखदात् । गुरून्देवान्द्विजान्सम्यक् श्रद्धया समुपाचरेत् २३॥

एवं कृतविधेः सूत हरिवंशश्रुतार्थिनः । वाचकोपरिसंतुष्टो भूमिद्रविणवस्त्रकैः ॥ २४ ॥
मुद्राकर्णीकृतवते गां च दत्त्वा पयस्विनीम् । भूमिद्रविणदानाद्यैस्तोषयेदन्यब्राह्मणान् ॥ २५ ॥
निष्कृतौ क्रियमाणायां सर्पिष्यात्मानमीक्षयेत् । ऐहिकं लक्षणं तस्य शरीरे चोपजायते ॥ २६ ॥
जन्मक्रमेण जायन्ते दुःखान्यकृतनिष्कृतेः । कुष्ठरुक् चानपत्यस्य प्रमेहार्तोऽप्यकिंचनः ॥२७॥
कुनखी दद्रुणः पाण्डुरोगी जन्मक्रमाद्भवेत् । जलाग्निभ्यां च चौरैश्च राज्ञा वित्तविनाशवान्॥२८॥
लकुटाद्यावशस्त्राद्यैर्जायन्ते व्रणजार्तयः ॥ २९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकत्रिंशदधिकनवशततमः ॥ ९३१ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यसौ शूद्रश्चक्रे मुष्कनिकुट्टनम् । वृषभस्य महाभाग स्वार्थसाधनतत्परः ॥ १ ॥
तेन कर्मार्जितेनाऽत्र षण्ढश्चैवापवर्णजः । गवां पालनजात्पुण्यात्प्रागत्र सुखसंयुतः ॥ २ ॥
गोपीडनान्महापापात्तस्य नैवाऽत्र विन्मयम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वात्रिंशदधिकनवशततमः ॥ ९३२ ॥

श्रीसूर्य उवाच ।

या काचिद्योषिता पूर्वं मोहात्परघृतं पिबेत् । साऽत्र जन्मनि रोगेण नेत्रोत्थेन प्रपीड्यते ॥ १ ॥
कुरुक्षेत्रादितीर्थेषु घृतधेनुप्रदानतः । मुच्यते सा महारोगान्नेत्रजान्नाऽत्र संशयः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयस्त्रिंशदधिकनवशततमः ॥ ९३३ ॥

श्रीसूर्य उवाच ।

महिषीमवधीत्पूर्वं भवे यो वै नराधमः । सोऽत्र जन्मनि पक्षीन्द्र कृष्णगुल्मयुतो भवेत् ॥ १ ॥
स्वर्णशृङ्गीं रौप्यखुरीं घण्टाऽऽभरणभूषिताम् । सूक्ष्मकम्बलयुक्तां च दद्याद्वेदविदे सुत ॥ २ ॥
कृष्णगुल्मोद्भवां पीडां नरश्चात्र न पश्यति ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायश्चतुस्त्रिंशदधिकनवशततमः ॥ ९३४ ॥

श्रीसूर्य उवाच ।

प्राग्भवे याऽभवत्काचित्स्वर्णदेहा पतत्रिण । स्वधर्मनिरता सा च दानधर्मपरायणा ॥ १ ॥
तद्गृहे धान्यराशिं तु चरन्ती गौः स्वभावतः । ताडिता कुक्षिभागे तु लकुटेन भृशं सुत ॥ २ ॥
तत्ताडनान्महादुःखं प्राप्ता गर्भान्तिभारतः । मृता च तेन दुःखेन गर्भजातसमन्विता ॥ ३ ॥
पुत्रसन्ततिहीना सा प्राग्गोघाताच्च किल्बिषात् । प्रायश्चित्तं प्रवक्ष्यामि सर्वपापक्षयंकरम् ॥ ४ ॥
कुर्याद्वापीमरण्ये तु देशे लोकाकुले तथा । मार्गे हि धर्मतोयार्थं प्रतिष्ठां कारयेत्ततः ॥ ५ ॥
संस्थाप्य च शिवं तत्र विधिना विनतासुत । होमयेच्च ततस्तत्र तिलानाज्ययुतानिह ॥ ६ ॥
भोजयेद्ब्राह्मणान्भक्त्या शिवपूजनतत्परान् । दद्यात्तथैकां कपिलां सर्वपापप्रणाशनीम् ॥ ७ ॥
प्रायश्चित्तमिदं सूत पूर्वजन्माघनाशनम् । नैवं या कुरुते श्रुत्वा तस्याः सन्ततिजं भयम् ॥ ८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचत्रिंशदधिकनवशततमः ॥ ९३५ ॥

श्रीसूर्य उवाच ।

यः कश्चित्प्राग्भवे सूत दुग्धं हरति मानवः । तत्काल एव पापेन बहुमूत्री प्रजायते ॥ १ ॥

दुग्धधेनुप्रदानाच्च, विधिनात्वत्र जन्मनि । बहुमूत्रान्महारोगान्मुच्यते गरुडाग्रज ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्त्रिंशदधिकनवशततमः ॥ ९३६ ॥

श्रीसूर्य उवाच ।

दुग्धं हरति या नारी कस्यचित्पापमोहिता । पूर्वजन्मनि साऽत्रैव बहुमूत्ररुजाकुला ॥ १ ॥
दुग्धधेनुप्रदानाच्च वेदवेदाङ्गपारगे । विधिना काश्यपेयाऽत्र न पश्येद्बहुमूत्रताम् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्रिंशदधिकनवशततमः ॥ ९३७ ॥

श्रीसूर्य उवाच ।

यो मोहाद्घातयेत्सूत महिषीं नवयौवनाम् । प्राग्भवे नियतं सोऽपि कृष्णगुल्मेन बाध्यते ॥ १ ॥
स नानारत्नदानेन विधिना गरुडाग्रज । नाशयेत्कृष्णगुल्मोत्थां पीडामत्रैव जन्मनि ॥ २ ॥
अथवा महिषीदानाद्विप्राय विधिनाण्डज । महिषीवधजोद्रोगात्सुखी भवति मानवः ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोष्टत्रिंशदधिकनवशततमः ॥ ९३८ ॥

श्रीसूर्य उवाच ।

यः कुर्य्यात्पापलोभेन पूर्वं सुष्कनिकुट्टनम् । ब्रह्मपुत्रस्य षण्ढः स्यादत्र जन्मनि निश्चयात् ॥१॥
ज्ञानाऽज्ञानकृतं वापि निष्कृतिर्नाऽत्र विद्यते । ब्रह्मघातान्महापापात्षण्ढः स्याद्बहुजन्मनि ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनचत्वारिंशदधिकनवशततमः ॥ ९३९ ॥

श्रीसूर्य उवाच ।

बभूव फलहृत्काचित्प्रमादाद्विनतासुत । पूर्वजन्मनि पुण्याऽपि बहुदानरता सती ॥ १ ॥
अत्र सा क्षत्रिया जाता प्रागपि क्षत्रियाण्डज । अत्र पुत्रविहीना सा फलहृत्किल्विषाद्दृढात् ॥२॥
प्रायश्चित्तं परं तस्मात्फलहृत्पापनाशनम् । अमायां नालिकेराणि देयानि खलु शक्तितः ॥ ३ ॥
तत्कृते सुतवृद्धिः स्याज्जीवनं वर्षसप्ततिम् ॥ ४ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चत्वारिंशदधिकनवशततमः ॥ ९४० ॥

श्रीसूर्य उवाच ।

दधिहारी पुमान्पूर्वे जन्मन्यत्र खगेश्वर । जायते मेदसा युक्तस्तद्दुःखेन प्रपीडितः ॥ १ ॥
कार्तिक्यामथ वैशाख्यां दधिधेनुप्रदानतः । तस्माद्रोगात्प्रमुच्येत तत्काले गरुडाग्रज ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकचत्वारिंशदधिकनवशततमः ॥ ९४१ ॥

श्रीसूर्य उवाच ।

महिषीघातेन नारी प्राग्भवे विनतासुत । अत्र जन्मनि पक्षीन्द्र कृष्णगुल्मेन पीड्यते ॥ १ ॥
दद्यात्साभरणां सूत महिषीं यमदैवताम् । युगकम्बलसंछन्नां विधिना नवयौवनाम् ॥ २ ॥
सा मुच्यते महारोगान्महिषीवधजात्सुत । तस्मिन्नपहते तत्र कृष्णगुल्मं न पश्यति ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विचत्वारिंशदधिकनवशततमः ॥ ९४२ ॥

श्रीसूर्य उवाच ।

विध्येत्प्राग्वृषभानां च नासाग्रं गरुडाग्रज । नासाछेदोऽत्र तस्यास्ति युवभावे विनिश्चयात् ॥ १॥
नास्ति तद्विन्मयं क्वापि दत्तैर्दानशतैरपि ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिचत्वारिंशदधिकनवशततमः ॥ ९४३ ॥

श्रीसूर्य उवाच ।

कश्चिदासीन्महाभाग चारणोऽतिप्रियंवदः । कवित्वशक्तिनिरतो बहुचारणसंयुतः ॥ १ ॥
प्रेरितो दैवयोगेन गतो राजाश्रयं प्रति । तत्सेवानिरतो नित्यं चिरकालमुपस्थितः ॥ २ ॥
अथ तत्र महावादे कवीनां हि खगेश्वर । महाघोरमभूद्युद्धं राजद्वारे भयप्रदम् ॥ ३ ॥
स चारणो महाक्रोधात्कृतवानात्मघातनम् । परं प्रतिकृते सूत स्वशरीरमथाऽत्यजत् ॥ ४ ॥
तेन कर्मविपाकेन महाचौर्येण चाण्डज । भुक्त्वा स्वर्गफलं पुण्यादात्मघातात्परिच्युतः ॥ ५ ॥
महाभूमिभुजां वंशे म्लेच्छानां चाजनि स्वयम् । सिन्धोः पश्चिमभागेऽत्र शतयोजनसंमिते ॥६ ॥
देशे कर्कटगे जीवे लग्नस्थे चन्द्रसंयुते । गौराङ्गः पृथुलो धूर्तः सर्वविद्याविशारदः ॥ ७ ॥
सुवैश्वर्यसमाक्रान्तो धनवाहनभोगभाक् । शूरः सुवेशोऽतिक्रूरो बहुपालनतत्परः ॥ ८ ॥
पापाल्लोभरतः क्रोधी नानाभैरवशासनः । रिष्टं षष्टिमिते वर्षे पंचहीने पतत्रिण ॥ ९ ॥
महाकालनराद्दानात् सुवर्णस्य पतत्रिण । सर्ववित्तषडंशेन महारिष्टहरं परम् ॥ १० ॥
पंचाशीतिसमायुः स्याद्दत्ते कालनरेऽण्डज । प्रायश्चित्ते ह्यरिष्टं स्यादकृते प्रोक्तवत्सरे ॥ ११ ॥
कालरूपेण शस्त्रेण तत्कृते मरणं स्मृतम् । महाघोराहवे सूत चात्मघातादिदं फलम् ॥ १२ ॥
चिह्नं तस्य प्रवक्ष्यामि ह्यात्मघातसमुद्भवम् । हृदिस्थं लशुनं चिह्नं षडङ्गुलमिदं शुभम् ॥१३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुश्चत्वारिंशदधिकशततमः ॥ ९४४ ॥

श्रीसूर्य उवाच ।

दधिहर्त्री तु या नारी प्राग्भवे त्वत्र जन्मनि । मेदसा पीड्यते सा तु विनतानन्दवर्धन ॥ १ ॥
दधिधेनुप्रदानाच्च ब्राह्मणाय कुटुम्बिने । मुच्यतेऽत्र महारोगान्नात्र कार्या विचारणा ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः पंचचत्वारिंशदधिकनवशततमः ॥ ९४५ ॥

श्रीसूर्य उवाच ।

तरक्षौ निहते पूर्वभवे च गरुडाग्रज । अत्र जन्मनि नेत्रेषु कातरत्वं प्रजायते ॥ १ ॥
रत्नधेनुमहादानाद्विधिना ब्राह्मणाय च । न पश्यत्यक्षिजं रोगं कातरोत्थं हि काश्यप ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्चत्वारिंशदधिकशततमः ॥ ९४६ ॥

श्रीसूर्य उवाच ।

प्राग्भवे सुमुखी काचिद्गता देवालयेऽण्डज । दीपा धातुमयास्तत्र चान्यदत्ता हृतास्त्वया ॥ १ ॥
सा शूद्राऽत्र महाभाग धनपुत्रसमन्विता । चन्द्रग्रहे महादानात् प्रहृतास्तु पतत्रिण ॥ २ ॥
तेन कर्मफलेनैव चक्षुःपीडाऽतिदारुणा । त्रिदोषैर्दूषिता चाऽत्र युवभावे खगेश्वर ॥ ३ ॥
प्रायश्चित्तं प्रवक्ष्यामि दीपहृत्पापशोधनम् । दीपा देया घृतेनात्र पूरयित्वा सुवर्णजाः ॥ ४ ॥

द्विसुवर्णमिता भव्याः संपूज्याऽथ महेश्वरम् । गन्धपुष्पैस्तथा दीपैर्भक्ष्यैर्भोज्यैः प्रयत्नतः ॥ ५ ॥
दद्याद्विजेभ्यो बहुशस्तस्मात्पापात्प्रमुच्यते ॥ ६ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तचत्वारिंशदधिकनवशततमः ॥ ९४७ ॥

श्रीसूर्य उवाच ।

दुष्टगन्धयुतः सूत जायते सोऽत्र जन्मनि । मधुहारी च यः पूर्वं प्रायश्चित्तं परं शृणु ॥ १ ॥
मधुधेनुप्रदानाद्वै ब्राह्मणानां च तर्पणात् । दुष्टगन्धयुताद्दोषान्मुच्यते नात्र संशयः ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टचत्वारिंशदधिकनवशततमः ॥ ९४८ ॥

श्रीसूर्य उवाच ।

तक्षुं घातयेत्पूर्वं या नारी गरुडाग्रज । कातराक्षी प्रजायेत चक्षूरोगवती सुत ॥ १ ॥
धेनुं रत्नमयीं दद्यात्सुवर्णां विधानतः । न पश्यत्यक्षिरोगं सा तद्धेनं महाद्भुतम् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनपंचाशदधिकनवशततमः ॥ ९४९ ॥

श्रीसूर्य उवाच ।

प्राग्जन्मन्यप्यभूत्कश्चिन्नरो राजकृपान्वितः । दण्डाधिकारवाञ्शूद्रो दृढो ब्राह्मणपूजकः ॥ १ ॥
नानादानरतस्तत्र लोभाद्वापि विशेषतः । व्यभिचाररतस्यैव ब्राह्मणस्य पतत्रिण ॥ २ ॥
लोभाच्चकाराऽसौ तत्र ह्यण्डच्छेदं च तत्क्षणात् । स तेन कर्मणा युक्तो भुक्त्वाऽतियमशासनम् ३
देशे पंचनदे ह्यत्र जातः शूद्रोऽतिचाधमः । स चास्त्वत्र विवर्णस्तु षण्ढः पापमतिः सुखी ॥ ४ ॥
सकलैश्वर्यसंपन्नो नानाधनसमन्वितः । नानावाहनभोगाढ्यो दानात्सर्वमिदं सुत ॥ ५ ॥
सप्तजन्मन्यसौ षण्ढो भविष्यति खगेश्वर ॥ ६ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाशदधिकनवशततमः ॥ ९५० ॥

अरुण उवाच ।

क्षात्रे कुले समुत्पन्नः शौर्यौदार्ययशोधनी । राजमान्योऽविरोधी च नानासौख्यरतः सदा ॥ १ ॥
किंचिद्वातादिना पीडा जायते चोदरे भृशम् । वातरक्तादि शिरसि जायते पक्षसंख्यया ॥ २ ॥
तस्य भार्या शुभाचारा सुरूपा गुणशालिनी । प्रियभक्तिरता नित्यं दानधर्मप्रवर्तिनी ॥ ३ ॥
एकपुत्रप्रसूता चाप्यन्यपुत्रमुपागता । पश्चात्पुष्पं गतं शान्तिमपत्यं नैव जायते ॥ ४ ॥
तेन कर्मविपाकेन पापं शाम्यति तत्क्षयः । विधानावहितार्थाय सत्यं ब्रूहि दिवाकर ॥ ५ ॥

श्रीसूर्य उवाच ।

पूर्वे वर्णोत्तरे जातो धातुकांस्यादिकारकः । ब्राह्मणो मित्रसंजातो बहुद्रव्यसमाकुलः ॥ ६ ॥
क्रयविक्रयकर्ता च विप्रद्रव्येण वर्द्धितः । कालेन महता वत्स स विप्रो निधनं गतः ॥ ७ ॥
संचितं तद्धनं सर्वं न तु किंचित्प्रदापितम् । ब्रह्मस्वं भक्षितं तेन वंशवृद्धिविनाशनम् ॥ ८ ॥
तेन कर्मविपाकेन नानासन्ततिनाशनम् । यो वै तस्य मृतः पुत्रः स जातो ब्राह्मणोऽत्र च ॥९॥
इदं जन्म चतुर्थं तु ब्रह्मवंशसमुद्भवः । भार्या दुःखकरी ह्येवं पुत्रहीना पतत्रिण ॥ १० ॥

अरुण उवाच ।

प्रायश्चित्तं कथं देव येन पापक्षयो भवेत् । निष्कृतिं ब्रूहि देवेश सन्ततेः सौख्यहेतवे ॥ ११ ॥

श्रीसूर्य उवाच।

ब्रह्मस्वं विषसंकाशं पुत्रपौत्रादिनाशनम्। विषेणैको हि म्रियते ब्रह्मस्वात्सुतसंततिः॥ १२॥
तस्य सन्ततनाशाय कारयेन्निष्कृतिं शुभाम्। सुशुभे भूप्रदेशे तु गोमयेनोपलेपयेत्॥ १३॥
कुर्य्यादष्टदलं पद्मं राजतं शुक्लतण्डुलैः। तन्मध्ये स्थापयेत्कुम्भमव्रणं शुभलक्षणम्॥ १४॥
सुशीतलजलैः पूर्णं ससर्वौषधिपल्लवम्। नानाफलाक्षतोपेतं पूर्णपात्रोपरि स्थितम्॥ १५॥
तस्योपरि न्यसेत्पात्रं वैणवं वर्तुलाकृतिं। सप्तधान्यफलोपेतं वस्त्रस्रक्चन्दनान्वितम्॥ १६॥
तन्मध्ये स्थापयेन्मूर्त्तिं निष्कद्वयविनिर्मिताम्। सुवर्णस्य विशुद्धां च दापयेद्देववादिने॥ १७॥
प्रतिष्ठां पूजनं कृत्वा ततो गां वै सवत्सकाम्। शतमष्टोत्तरं विप्रान्द्रोणाः सप्तैव निर्मिताः॥ १८॥
जातीपुष्पसमुद्भूतां लक्षपूजां शिवोपरि। संकष्टान्मोचयेद्धेनुर्दंपती परिदापयेत्॥ १९॥
एवंकृतविधेः सूत निश्चला सन्ततिर्भवेत्॥ २०॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकपंचाशदधिकनवशततमः॥ ९५१॥

श्रीसूर्य उवाच।

या काचिद्वनिता मोहात्प्राग्भवे माक्षिकं हरेत्। साऽत्र जन्मनि पक्षीन्द्र दुर्गन्धाढ्या प्रजायते१॥
मधुधेनुप्रदानात्तु व्यतीपातादिपर्वसु। दुर्गन्धरोगात्सततं मुच्यतेऽत्र पतत्रिण॥ २॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विपंचाशदधिकनवशततमः॥ ९५२॥

श्रीसूर्य उवाच।

षण्ढोऽस्ति राजसन्मानी अत्र जन्मनि चाण्डज। महादुष्टक्रियायुक्तो वधबन्धनतत्परः॥ १॥
प्राक्कृतात्तु महादानात् सुखैश्वर्यधनान्वितः। महामानी महाधूर्तः षण्ढोऽगम्यातिसेवनात्॥२॥
नाऽत्र जन्मनि भो सूत प्रायश्चित्तं मयोदितम्। अगम्यागमनं पापं प्रायश्चित्तविवर्जितम्॥ ३॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिपंचाशदधिकनवशततमः॥ ९५३॥

श्रीसूर्य उवाच।

ब्रह्मघ्नी सा मया प्रोक्ता या पूर्वं घातयेद्द्विजम्। सर्वं विचेष्टितं तस्याः शृणुष्वाद्य पतत्रिण॥ १॥
अनया द्रव्यलोभेन सपत्न्या घातितः सुतः। प्राग्भवे विषदानेन कुमारो दोषवर्जितः॥ २॥
तस्मादिदं महादुष्टा बाल्ये कुष्ठान्विता सुत। तद्रोगसंयुता सैव पितृगेहे स्थिताण्डज॥ ३॥
महादोषवती पापाज्जाताऽत्र यवनी तु सा। भविष्यति महारिष्टमग्निदाहेन चाण्डज॥ ४॥
चतुर्विंशन्मिते वर्षे मरणं कीर्तितं ध्रुवम्॥ ५॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःपंचाशदधिकनवशततमः॥ ९५४॥

श्रीसूर्य उवाच।

वराहं यो नरो हन्यात्प्राग्भवे विनतासुत। जायते दन्तुरः सोऽपि काले तत्पापचिह्नितः॥ १॥
घृतकुम्भं यथाशक्त्या दद्याद्विप्राय धीमते। सुवर्णसहितं तेन तस्मात्पापात्प्रमुच्यते॥ २॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचपंचाशदधिकनवशततमः॥ ९५५॥

श्रीसूर्य उवाच।

यो हरेत्प्राग्भवे सूत गुडं मोहान्नराधमः। गुल्मोदरेण रोगेण सोऽत्र जन्मनि पीड्यते॥ १॥

गुडधेनुप्रदानाच्च विधिना ब्राह्मणाय च । गुल्मोद्भवसमुद्भूता पीडा नश्यति तत्क्षणात् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्पंचाशदधिकनवशततमः ॥ ९९६ ॥

श्रीसूर्य उवाच ।

अथ काचित्सती नारी धर्मिष्ठा प्रियवादिनी । स्वामिना प्रेरिता पूर्वं शत्रोर्दग्धं तया गृहम् ॥ १ ॥
तदाहाच्च महाभाग दग्धं सर्वं पुरं तदा । ब्राह्मण्येका सवाला च निर्दग्धा दोषवर्जिता ॥ २ ॥
ततो ब्रह्मवधस्तत्र किंचित्कालेऽपि सा मृता । भुक्त्वा तथा फलं सर्वं पुण्यपापसमुद्भवम् ॥ ३ ॥
सा शूद्री यमुनातीरे जाताऽत्र पतिसेवया । कुष्ठरोगयुता बाल्ये निष्कृतिं पापनाशनीम् ॥ ४ ॥
वक्ष्यामि वृषभं दद्यात्सर्वोपस्करसंयुतम् । कुष्ठरोगात्प्रमुच्येत नाऽत्र कार्या विचारणा ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तपंचाशदधिकनवशततमः ॥ ९९७ ॥

श्रीसूर्य उवाच ।

तद्गृहे वृषभो मत्तस्तीक्ष्णशृंगो भयानकः । तेन तद्भक्षणाऽपि प्राग्भवे विनतासुत ॥ १ ॥
छित्त्वा नासाग्रमुष्कौ तु कृतं कर्माऽतिदारुणम् । तत्र तज्जनितं भुक्त्वा फलं पापसमुद्भवम् ॥ २ ॥
जातोऽत्र यवनः सिन्धुमण्डले पर्वताश्रिते । षण्ढस्तु तेन पापेन सचास्त्यत्र पतत्रिण ॥ ३ ॥
धर्मात्पूर्वकृतात्सोऽपि सुखैश्वर्यधनान्वितः । दृढपापार्जनात्सूत प्रायश्चित्तं न विद्यते ॥ ४ ॥
पूजनादतिथीनां च भविष्यति च तद्गतिः । तीर्थाश्रयेऽत्र जन्तुषि मृत्युस्तस्य प्रकीर्तितः ॥ ५ ॥
आयुः षष्टिमिताब्दं तु रिष्टं पंचाशदब्दके ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टपंचाशदधिकनवशततमः ॥ ९९८ ॥

श्रीसूर्य उवाच ।

घातयेद्या पुरा नारी वराहं गरुडाग्रज । दन्तुरा सा भवेदत्र तत्काले घातसंभवे ॥ १ ॥
ताम्रकुंभं सुवर्णाढ्यं घृतपूर्णं सदक्षिणम् । तद्दोषशमनायैवं दद्याच्छक्त्या विधानतः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकोनषष्ट्यधिकनवशततमः ॥ ९९९ ॥

श्रीसूर्य उवाच ।

तैलहारी तु यः कश्चिद्भवेल्लोभात्पुराभवे । कंडूरोगेण सततं पीड्यते चाऽत्र जन्मनि ॥ १ ॥
शक्त्या तैलप्रदानाच्च ब्राह्मणाय पतत्रिण । कण्डूरोगप्रशमनं दानात्तैलघटद्वयात् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षष्ट्यधिकनवशततमः ॥ १००० ॥

श्रीसूर्य उवाच ।

काचिच्छुभानना पूर्वभवे चारणवल्लभा । भर्तृत्यक्ताऽधिविन्ना सा महारोषवती ह्यभूत् ॥ १ ॥
तया महौषधैर्दिव्यैः पुंस्त्वं दूरीकृतं पतेः । तेन पापप्रभावेण जातोऽत्रायं नपुंसकः ॥ २ ॥
धूर्तः पापरतो दुष्टः सर्वधर्मविवर्जितः । वर्णबाह्योऽतिदुःखार्तो न शुभां लभते गतिम् ॥ ३ ॥
बहुजन्मन्यसौ पापान्मुक्तो भवति चाण्डज ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकषष्ट्यधिकनवशततमः ॥ १००१ ॥

श्रीसूर्य उवाच ।

सुभक्ष्यार्थं महाभाग यो हन्याद्वायुवाहनम् । अत्र जन्मनि खंजोऽसौ नात्र कार्या विचारणा ॥

न तस्य विन्मयं प्रोक्तमत्र जन्मनि चाण्डज । स्वशरीरविवृद्ध्यर्थं येन भुक्तो मृगः पुरा ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विषष्ट्यधिकनवशततमः ॥ ९९२ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे मोहाद् गुडं हरति कस्यचित् । गुल्मोदरेण रोगेण पीड्यते साऽत्र जन्मनि १॥
गङ्गायां हि महाभाग गुडधेनुप्रदानतः । तत्र स्नानान्महापुण्यात्तस्याद्रोगाद्विमुच्यते ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिषष्ट्यधिकनवशततमः ॥ ९९३ ॥

श्रीसूर्य उवाच ।

कश्चिद्वैश्योऽभवत्पूर्वभवे नेपालविश्रुते । बहुमित्रसुखैराढ्यो हठी व्यसनसंयुतः ॥ १ ॥
आराधनं तु कृतवान् देव्या वै पूर्वजन्मनि । स्वस्त्रियं च सुरूपां च परित्यज्य शुभाननाम् ॥ २॥
अन्यस्त्रियां समभवद्व्यभिचारपरो दृढः । स तेन कर्मणा युक्तो गतो धर्मपुरं प्रति ॥ ३ ॥
शुभं पापफलं भुक्त्वा स जातोऽत्र महीधरे । गौरो भव्यो महाज्ञानी महाविभवसंयुतः ॥ ४ ॥
देशेदेशेऽतिविख्यातो घृणी लघुमहायशाः । स्वस्त्रीत्यागान्महापापाज्जायते स्त्रीविवर्जितः ॥ ५ ॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन् स्त्रीप्राप्तेः सौख्यकारिणीम् ॥ ६ ॥

श्रीसूर्य उवाच ।

पार्वतीप्रतिमां कृत्वा हैमिकां कार्यकारिणीम् । पलपंचसितां लेख्यां गन्धैर्माल्यैरलंकृताम् ॥७॥
दद्याद्वेदविधिज्ञाय सुकुलीनाय चार्थिने । प्रजापतिं तदा दद्याद्राजतं त्रिपलात्मकम् ॥ ८ ॥
ब्रह्मदैवतमंत्रेण गृह्णाति स महाद्विजः । पश्चादष्टाक्षरं मंत्रं सहस्रं पापशोधनम् ॥ ९ ॥
जपेदष्टसहस्रं तु सूर्यमंत्रं महाबलम् । होमयेत्तद्दशांशेन तद्दशांशेन तर्पयेत् ॥ १० ॥
य एवं कुरुते सूत सर्वपापविनाशनम् । प्रायश्चित्तं परं त्वत्र तस्मात्पापात्प्रमुच्यते ॥ ११ ॥
नैवं करोति यो मोहाज्जडधीर्दैववर्जितः । न लभेत्स्त्रीसुखं चोग्रं रिष्टं षड्वेदकेन्दके ॥ १२ ॥
प्रायश्चित्ते कृते सूत जीवनं वर्षसप्ततिम् ॥ १३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःषष्ट्यधिकनवशततमः ॥ ९९४ ॥

श्रीसूर्य उवाच ।

नृपं विना यो प्राग्हन्यान्मृगं हि विजनावृते । खंजः स्यादत्र जन्तुषि तत्काले मृगघातजे ॥ १ ॥
पापनाशकरीं तस्य निष्कृतिं वच्म्यहं सुत । दद्यादश्वं लवं तत्र स्वर्णनिष्कयुतं शुभम् ॥ २ ॥
सिंहासनैरलंकारैः पूजयित्वा विधानतः । विधिज्ञाय महाबाहो नानाशास्त्रविधानतः ॥ ३ ॥
न स पश्यति खंजत्वं दानस्याऽस्य प्रभावतः ॥ ४ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचषष्ट्यधिकनवशततमः ॥ ९९५ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे सूत परतैलापहारिणी । साऽत्र जन्मनि पक्षीन्द्र कण्डूरोगप्रपीडिता ॥ १ ॥
सा मुच्यते महाभाग दानात्तैलघटद्वयात् । सुवर्णाढ्यात्तथा शक्त्या तैलदानाद्विशेषतः ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्षष्ट्यधिकनवशततमः ॥ ९९६ ॥

श्रीसूर्य उवाच ।

राजप्रचारी वै कश्चिच्चारणः पूर्वजन्मनि । भव्यमूर्तिर्दृढो धीरः शिवपूजनतत्परः ॥ १ ॥
राजपत्न्यां महाबाहो दधाराल्पवधर्मतः । गर्भं च कामलोभेन भाविनोर्थस्य वै बलात् ॥ २ ॥
पापात्पापफलं भुक्त्वा यमलोके पतत्रिण । शिवपूजनजात्पुण्यात्सोऽत्र जातो हि पादजः ॥ ३ ॥
देशे जाङ्गलके षण्ढः सर्ववर्मबहिष्कृतः । शिवपूजा रतो यस्मात्प्रागत्रःधनभोगभाक् ॥ ४ ॥
स्त्रीपुत्रसुखहीनोऽयं प्रायश्चित्तं न विद्यते ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तषष्ट्यधिकनवशततमः ॥ ९६७ ॥

श्रीसूर्य उवाच ।

गर्भार्थं याऽवधीत्पूर्वं मृगं हि गरुडाग्रज । स्वगर्भपालने दक्षा जन्मन्यत्र गतिं शृणु ॥ १ ॥
तद्घातकाले खंजा सा भविष्यति शुभानना । गर्भपातनदुःखार्त्ता तथैव च तदेनसः ॥ २ ॥
तत्पापनाशनं सूत शृणु वक्ष्यामि तत्त्वतः । दद्याद्विप्राय तुरगं युवानं भूषणान्वितम् ॥ ३ ॥
स्वर्णनिष्कयुतं चात्र पूर्वपापात्प्रमुच्यते । न सा पश्यति गर्भोत्थां पीडामत्रैव जन्मनि ॥ ४ ॥
दानप्रभावात्पक्षीन्द्र खंजत्वं नाप्नुयादिह ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टषष्ट्यधिकनवशततमः ॥ ९६८ ॥

अरुण उवाच ।

क्षात्रे कुले समुत्पन्नो दानदाक्षिण्यतत्परः । श्वेहादिपीडितो नित्यं कृशाङ्गः पाण्डुरद्युतिः ॥ १ ॥
ऊर्ध्ववातादिना पीडा बाल्ये स्याद्ग्रहणीगदः । तस्य भार्या सदाचारा सुस्नेहा भर्तृभक्तिनः ॥ २ ॥
रक्तस्रावादिना पीडा जायते चोदरानिलः । उदरात्तस्यां गर्भस्य पातं कुर्याच्च पृष्ठतः ॥ ३ ॥
द्वित्रैस्तु पंचभिर्मासैश्चतुर्भिः सप्तभिस्तथा । केन कर्मविपाकेन गर्भो न स्थिरतां व्रजेत् ॥ ४ ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु चास्य विचेष्टितम् । व्यभिचारभयाद्वापि तया गर्भश्च पातितः ॥ ५ ॥
अतिकष्टैर्दिनतेय गर्भपातकृतागसः । अपरं च कृतं कर्म व्यभिचारो यतस्ततः ॥ ६ ॥
नानाद्रव्यापहर्त्ता च कुलटा वाक्यलंघनात् । भर्तुस्तल्पैरिणी वृत्तिर्दुष्टसंगतिका च सा ॥ ७ ॥
तेन दुष्टेन यद्द्रव्यं हृतं तस्करबुद्धिना । भुक्तं ताभ्यां वैनतेय ब्रह्मस्वं तत्र जन्मनि ॥ ८ ॥
कालेन तद्धनं भुक्त्वा पीडितो दारुणैर्ग्रहैः । यातना बहुधा प्राप्ता पश्चान्मानुष्यमाप्तवान् ॥ ९ ॥
किंचित्पुण्यप्रभावेन क्षात्रोऽयं जन्मना भुवि । इदं जन्म चतुर्थं तु गर्भपातोऽभिजायते ॥ १० ॥
उभाभ्यां च कृतं कर्म भुज्यते जन्मजन्मनि ॥ ११ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं देव येन पापक्षयो भवेत् । निष्कृतिं ब्रूहि विश्वेश येन गर्भः स्थिरो भवेत् ॥१२॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि या नारी नानागर्भं जिघांसति । निष्कृत्या तस्य शुद्धिस्तु श्रूयतां कश्यपात्मज॥१३॥
नारी नियमसंयुक्ता ध्रुवं सा व्रतकांक्षिणी । सौम्यायने समापूर्यमाणपक्षे शुभे हिता ॥ १४ ॥
पुष्पैस्तु यत्नैः पानैर्भक्ष्यैः कण्डूयनैरपि । रुचिरैश्चगोस्थानैः सतः परिचरेत्सदा ॥ १५ ॥
रात्रौ पुष्पावलीभिश्च दीपस्रक्चन्दनादिभिः । स्वगीतमङ्गलध्वानैस्तदधःशायिनी भुवि ॥ १६ ॥

प्राणयत्नं प्रकुर्वीत तस्यास्तु पयसा हविः । तस्यास्तु पंचगव्यानि यथाचारं यथाश्रुति ॥ १७ ॥
एवं व्रतपरा नारी मासिमासि तु संयता । तस्या धेनोः सवत्साया इष्टं समभिकांक्षिणी ॥ १८ ॥
व्रतान्ते द्विजमासाद्य समस्तगुणशालिनम् । अभ्यर्च्य पूजयेद्भक्त्या वस्त्रस्रग्दामभूषणैः ॥ १९ ॥
सम्यगभ्यर्च्य तां धेनुं तनयं तं स्तनंधयम् । कृत्वा च विधिना तस्मै तां दद्यादभिभाषिणी२०॥
सुवर्णं शुद्धमाग्नेयं मापषोडशसंयुतम् । दापयेद्तां सवत्सां च पूर्वपापापनुत्तये ॥ २१ ॥
"यन्मया कुलटाकांक्षानानागर्भा जिघांसिताः । नानौषधः पातितास्ते गर्भा वै बहवो भुवि ॥२२॥
तस्य कर्मार्जितं पापं गर्भपातादिदूषणम् । एनसस्तस्य नाशाय सवत्सादानतस्त्वियाम् ॥ २३ ॥
इह जन्मनि वन्ध्यत्वं नाशयेदस्य तेन तु । दाने नानेन सुरभेरनघाऽत्र हि सुव्रत ॥ २४ ॥
भवेयं त्वत्प्रसादेन गर्भो मे सुभगान्वितः ।" एवमस्त्विति तां धेनुं समादाय सदक्षिणाम् ॥२५॥
हिरण्यं रजतं ताम्रं तथा नानाफलानि च । दापयेद्विजमुख्याय भूरिद्रव्येण तोषयेत् ॥ २६ ॥
भोजयेच्च शतं विप्रान् नानान्नैः सक्तुपायसैः । एवंकृतविधेः सूत नारी वा दुःखनाशिनी ॥ २७ ॥
वन्ध्यत्वान्मुच्यते सूत पुत्रप्राप्तियशस्विनी ॥ २८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनसप्तत्यधिकनवशततमः ॥ ९६९ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि यः कश्चित्तुरगं घातयेन्नरः । वक्रकण्ठेन रोगेण पीडितोऽत्र प्रजायते ॥ १ ॥
स्वर्णाश्वदानाद्विधिवत्सर्वोपस्करसंयुतात् । वक्रकण्ठसमुद्भूतां पीडां नाप्नोति मानवः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्यधिकनवशततमः ॥ ९७० ॥

श्रीसूर्य उवाच ।

मृगालघाती पुरुषः प्राग्जनुष्यत्र जन्मनि । पादहीनो भवेत्सूत भृशं चाकृतनिष्कृतिः ॥ १ ॥
दद्यादश्वं सुवर्णाढ्यं सर्वोपस्करसंयुतम् । ब्राह्मणाय प्रयत्नेन पूर्वपापापनुत्तये ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकसप्तत्यधिकनवशततमः ॥ ९७१ ॥

श्रीसूर्य उवाच ।

सङ्करः प्राग्भवे सूत बभूव धनसंयुतः । तीर्थवासी विरक्तश्च लोभी कर्मक्रियान्वितः ॥ १ ॥
क्रूरकर्म कृतं तेन दुष्टसङ्गतितोऽण्डज । चौर्येण गां परां नीत्वा क्षुधितैर्भक्षिता पुरा ॥ २ ॥
मृतास्ते तेन पापेन नानायोनिमुपागताः । स तीर्थमृत्युवशतो गङ्गातीरेऽत्र पादजः ॥ ३ ॥
तीर्थमृत्युप्रसादाच्च धनपुत्रसमन्वितः । युवभावेऽण्डजश्रेष्ठ चक्षुर्हीनोऽत्र जायते ॥ ४ ॥
प्रायश्चित्तं प्रवक्ष्यामि सुवर्णदशसंमिता । लिखिता गौर्विधानेन पूजयित्वा विधानतः ॥ ५ ॥
देया वै वेदविदुषे पूर्वपापविशुद्धये । गायत्रीं च जपेत्तत्र नियुतं चायुतद्वयम् ॥ ६ ॥
होमयेच्च यथाशक्त्या भोजयेच्च तथा द्विजान् । यः कुर्याद्विधिना चेदं स तद्दोषात्प्रमुच्यते ॥ ७ ॥
स दिव्यचक्षुषा युक्तो जायतेऽत्रैव जन्मनि ॥ ८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विसप्तत्यधिकनवशततमः ॥ ९७२ ॥

श्रीसूर्य उवाच ।

या काचिद्घातयेन्नारी शृगालं पूर्वजन्मनि । सा तत्र पुरुषं वापि घातार्थमुपदेशयेत् ॥ १ ॥
अत्र जन्मनि चैवोर्ध्वपाताच्च बहुवैकृतः । पादभंगो भवेत्तस्मात्पापाच्चैव खगाधिप ॥ २ ॥

करोति तस्य पापस्य विन्मयं विधिनात्र चेत्। तस्मात्पापात्प्रमुच्येत न चोर्ध्वात्पतनं तथा ॥३॥
अश्वं निष्कसुवर्णाढ्यं विन्मयं पापशोधनम् ॥ ४ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिसप्तत्यधिकनवशततमः ॥ ९७३ ॥

श्रीसूर्य उवाच ।

या नारी घातयेद्भ्रूणं प्राग्भवे साऽत्र जन्मनि । महापर्वसु गन्धादि पुण्यतीर्थे तु दापयेत् ॥ १ ॥
पूर्वोपस्कारसंयुक्तं स्वर्णाढ्यं विधिसंयुतम् । सा मुच्यते वक्रकण्ठपीडनाद्विनतासुत ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःसप्तत्यधिकनवशततमः ॥ ९७४ ॥

श्रीसूर्य उवाच ।

आसीत्क्षात्री महाभाग पांचाले देशके शुभे । धर्मकर्मसमायुक्तो ग्रामपो विश्रुतो महान् ॥ १ ॥
दुष्कर्माचरितं तेन भाविनोर्थस्य वै बलात् । शूद्रयां वै धारितो गर्भः कामलोभेन निश्चयात् २॥
कृतो यत्नो महांस्तत्र नासीद्गर्भस्य पातनम् । तया हालाहलं पीतं मृता सा लोकशंकया ॥ ३ ॥
महत्या पीडया सूत बालकोऽपि मृतस्ततः । सहायपंचयुक्तेन कृतं प्राक्कर्म दारुणम् ॥ ४ ॥
कर्मणां संग्रहश्चायं गर्भनाशसमुद्भवः । ततः स मरणं प्राप्तो वाहुजो गरुडाग्रज ॥ ५ ॥
सूर्यलोकं तदा गत्वा भुक्त्वा भोगांश्च शाश्वतान् । अशुभान्नरकं भुक्त्वा स्वकृतादुग्रकर्मणः ॥६॥
स पर्वणि महादानात्पूर्वजन्मनि मानद । जातोऽत्र यमुनातीरे वाहुजोऽप्यत्र जन्मनि ॥ ७ ॥
गौरः कृशाङ्गो लम्बश्च धनसौख्यसमन्वितः । पितृभ्रातृविहीनश्च लोभमोहरतः सदा ॥ ८ ॥
अनेकस्त्रीसंयुतश्च नानाविभवसंयुतः । आढ्यन्तसुखयुक्तश्च बुद्धिमान्देशविश्रुतः ॥ ९ ॥
धर्मादिदं तथा पापाद्धूर्तः पापरतः शठः । सकन्यो हृदि रोगश्च मनोदुःखसमन्वितः ॥ १० ॥
शूद्रायां वीर्यदानात्प्राक् तद्धान्मृतपुत्रकः । ऐहिकं लक्षणं तस्य शरीरे चोपजायते ॥ ११ ॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन्सर्वपापापनोदनीम् । पुत्रवृद्धिकरां धन्यां लोकानां हितकाम्यया॥१२॥

श्रीसूर्य उवाच ।

निष्कृतिं तस्य वक्ष्यामि शृणु सूत प्रयत्नतः । पूर्वपापविशुद्ध्यर्थं गर्भधारणनाशनीम् ॥ १३ ॥
शूद्रायाः प्रतिमा कार्या पलैः पंचमितैः शुभा । हिरण्मयी सगर्भा च पत्रे लेख्या विधानतः१४॥
तत्तदार्धेन वा कार्या त्रिषु वित्ताऽनुसारतः । गन्धपुष्पैरलंकृत्य सा देया पापनाशनी ॥ १५ ॥
पंचमाषमितो विष्णुः सर्वपापप्रणाशनः । अजापतिं तथा दद्यात्सौवर्णं पंचमाषकम् ॥ १६ ॥
राजतं च तथा दद्यात्सोमं सार्धपलात्मकम् । गायत्रीदशसाहस्रं जपेच्च विधिपूर्वकम् ॥ १७ ॥
होमयेत्तण्डुलैः साज्यैः सर्षपैः सलिलैस्तथा । ब्राह्मणान्भोजयेत्पश्चात्पूर्वपापापनुत्तये ॥ १८ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचसप्तत्यधिकनवशततमः ॥ ९७५ ॥

श्रीसूर्य उवाच ।

यः कामतश्चरेत्पूर्वं ब्रह्महत्यां नराधमः । क्षयरोगान्वितः सोऽपि जायते चाऽत्र जन्मनि ॥ १ ॥
घोराद्ब्रह्मवधात्पापाद्दृढाद्दुष्कर्मणः सुत । प्रायश्चित्तं मया नोक्तं पापान्मुक्तिस्त्रिजन्मनि ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्सप्तत्यधिकनवशततमः ॥ ९७६ ॥

श्रीसूर्य उवाच ।

ब्राह्मणं घातयेद्यस्तु पूर्वजन्मनि मानवः । मोहादकामतः सोऽपि क्षयरोगसमन्वितः ॥ १ ॥
क्षयेणाऽत्र क्षयं यान्ति धातवः सर्वदेहिनाम् । धातुक्षयेऽतिकष्टेन नष्टायुर्जायते पुमान् ॥ २ ॥
सर्वस्वदानादत्रैव क्षयरोगः प्रशाम्यति । कुरुक्षेत्रादितीर्थेषु सत्पात्रेषु विधानतः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तसप्तत्यधिकनवशततमः ॥ ९७७ ॥

अरुण उवाच ।

भगवन्देवदेवेश श्रुतमेतन्महाद्भुतम् । सहानुगामिन्योर्नार्योर्गतिं मे ब्रूहि भास्कर ॥ १ ॥

श्रीसूर्य उवाच ।

मृतं समीक्ष्य भर्तारं या विशेद्धि हुताशनम् । तत्सार्धं सा महापुण्या ज्ञेयाऽत्र सहगामिनी ॥ २ ॥
श्रुत्वा मृतपतिं याऽत्र विदेशस्थं पतिव्रता । तद्वस्त्रेण विशेदग्निं सा ज्ञेया चानुगामिनी ॥ ३ ॥
पातिव्रत्याद्धि धर्मात्तु भवेन्मोक्षगतिस्तयोः । तथैकाऽभून्महासाध्वी जाता ब्रह्महदेऽण्डज ॥ ४ ॥
ब्राह्मणी तपसा युक्ता सदा भर्तृपरायणा । दानशीलरता पुण्या पुण्यकर्मान्विता सती ॥ ५ ॥
दृष्ट्वा मृतपतिं सा तु दिव्याभरणभूषिता । प्राप्ताऽग्निं विधिना सूत कृत्वा पूजां हरेर्भृशम् ॥ ६ ॥
सा गता यमराजस्य स्कन्धे दत्त्वा पदांबुजम् । वैकुण्ठं चाण्डजश्रेष्ठ यद्गत्वा न निवर्तते ॥ ७ ॥
तल्लातलघातेन मूर्च्छितोऽभूद्यमाधिपः । तत्काले तत्र संपृष्टो नारदेन महात्मना ॥ ८ ॥
धर्मराज वदैतन्मे त्वत्तः परतरश्च कः । दण्डप्रदो महाभाग येन त्वं चालितोऽधुना ॥ ९ ॥

यम उवाच ।

पतिव्रताया धर्मस्तु सर्वदा सेवितोऽनया । तस्मात्पुण्याद्दिवश्रेष्ठ यातेयं वै शुभानना ॥ १० ॥
सती तत्पादभारेण पीडितोऽहं भृशं द्विज । मोक्षं गता महासाध्वी गृहीत्वा तु स्वकं पतिम् ॥ ११ ॥
महापापसमाक्रान्तं नरकस्थं द्विजोत्तम । साऽऽगमिष्यति चैवाऽत्र पत्युः पापविशेषतः ॥ १२ ॥
ब्राह्मणी योगयुक्ता च भविष्यति कलौ युगे । काश्यां मृत्युस्तयोर्यस्माच्छिवत्वमुपगच्छतः ॥ १३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टसप्तत्यधिकनवशततमः ॥ ९७८ ॥

श्रीसूर्य उवाच ।

सीमावादरतः कश्चिद्ब्राह्मणः पूर्वजन्मनि । तेन तत्र द्विजः सूत घातितो भूमिलोभतः ॥ १ ॥
सहायपंचयुक्तेन कृतं कर्मातिदारुणम् । तत्पापजान्महाघोरान्नरकान्प्राप्य दारुणान् ॥ २ ॥
तत्राऽपि तिर्यक्कं सूत विभुज्याऽधर्मतः स्वयम् । कर्मक्षयेऽथ पुण्यात्प्राक् सोऽत्र जातो हि वाहुजः ३
क्षयरोगयुतः सोऽपि कृशो दुःखातुरो भृशम् । लग्ने कुम्भाभिधे सूत भौमश्चन्द्रयुतोऽण्डज ॥ ४ ॥
रिष्टं षष्टिमिते वर्षे जायते कृतनिष्कृतेः । सहायाः पूर्वजा ये तु तेषां वक्ष्यामि लक्षणम् ॥ ५ ॥
तदग्रे ते मृताश्चात्र पुत्राः क्षयरुजान्विताः । रिष्टेन वायुगो भङ्गो दृढपापान्न निष्कृतिः ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः एकोनाशीत्यधिकनवशततमः ॥ ९७९ ॥

श्रीसूर्य उवाच ।

राजपुत्रोऽभवत्कश्चिद्धर्मशास्त्रार्थकोविदः । गत्वा स त्वरितं सूत कदाचिन्मदसंयुतः ॥ १ ॥
ददाह च पुरं शत्रोस्तत्क्षणे लुण्ठितं पुनः । तत्रैको ब्राह्मणो दग्धो वृद्धो विद्याविशारदः ॥ २ ॥
पापमाचरितं तेन चाज्ञानाद्ब्रह्मघातजम् । अथो यमाज्ञया सर्वा भुक्ता नरकयातनाः ॥ ३ ॥

पुण्यशेषादथाऽत्रापि स जातः क्षत्रियाधरः । देशेऽयोध्याभिधे गौरो लघुर्दक्षो महोद्यमी ॥ ४ ॥
युवभावे महाभाग राजयक्ष्मप्रपीडितः । ब्रह्महा क्षयरोगी स्यादिति वेदविदो विदुः ॥ ५ ॥
निष्कृतिं तां प्रवक्ष्यामि यां कृत्वा मुच्यतेऽधुना । कार्यास्तत्र त्रिदेवानां मूर्त्तयस्तु यथोदिताः ॥६॥
ब्रह्मविष्णुमहेशानां सर्वरोगविनाशकाः । सुवर्णजास्तथा कार्या कदली पत्रसंयुता ॥ ७ ॥
यथा वित्तानुसारेण वित्तशाठ्यं विवर्जयेत् । दद्यात्तां विप्रमुख्येभ्यः क्षयरोगोपशान्तये ॥ ८ ॥
ब्राह्मणान्भोजयेच्छक्त्या होमयेच्च जपेत्तथा । गायत्रीं विधिना सूत पूर्वपापापनुत्तये ॥ ९ ॥
एवं कृते महाबाहो क्षयस्तस्य प्रशाम्यति । नैवं कुर्यात्तु यो मोहाद्दिष्टं विंशतिकेऽब्दके ॥ १० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽशीत्यधिकनवशततमः ॥ ९८० ॥

श्रीसूर्य उवाच ।

कलिङ्गदेशे प्राक् सूत काचिद्विजवरानना । पतिप्रिया धर्मशीला दानभोगरता सदा ॥ १ ॥
सा नार्यघातयत्पूर्वभवे मोहाच्च कुक्कुटम् । नासां वक्रत्वमाप्नोति साऽत्र जन्मनि निश्चयात् ॥२ ॥
हेमनिष्कत्रयं दद्यात्पूर्वं चैव प्रयत्नतः । ब्राह्मणाय महाभाग पापनाशकरं परम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकाशीत्यधिकनवशततमः ॥ ९८१ ॥

श्रीसूर्य उवाच ।

या योषिदाचरेत्कामात्पूर्वजन्मनि निश्चयात् । ब्रह्महत्यामथात्रैव सा ज्ञेया क्षयरुग्युता ॥ १ ॥
न तस्याः पापशमनं मयोक्तं च पतत्रिण । महापापकृताद्रोगान्मृत्युरेव न संशयः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्यशीत्यधिकनवशततमः ॥ ९८२ ॥

श्रीसूर्य उवाच ।

स्वसृघाती च पुरुषः पूर्वजन्मनि मानद । बधिरो जायते त्वत्र प्रायश्चित्तं च तच्छृणु ॥ १ ॥
चांद्रायणव्रतं कुर्यात् सुवर्णपलसंयुतम् । पुस्तकं विधिवद्दद्यात्तस्मात्पापात्प्रमुच्यते ॥ २ ॥
भोजयेच्च यथाशक्त्या होमयेच्च स्वशक्तितः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायस्त्र्यशीत्यधिकनवशततमः ॥ ९८३ ॥

श्रीसूर्य उवाच ।

यां काचिदाचरेन्नारी पापं प्राग्ब्रह्मघातजम् । अज्ञानादत्र जनुषि क्षयरुक्पीडिता हि सा ॥ १ ॥
महापापकृताद्घोराद्यस्मात्सर्वस्वदानतः । क्षयरोगात्प्रमुच्येत नाऽत्र कार्या विचारणा ॥ २ ॥
प्रयागे मकरस्थेऽर्के स्नानादत्रैव जन्मनि । काश्यां वासात्तथा सूत मुच्यते ब्रह्महत्यया ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरशीत्यधिकनवशततमः ॥ ९८४ ॥

श्रीसूर्य उवाच ।

बभूव बाहुजः कश्चिद्देशे पंचनदेऽण्डज । धनधान्यसमायुक्तः पापकर्मा महाधमः ॥ १ ॥
विप्रसङ्गतः सोऽपि प्रयागे गरुडाग्रज । स्नातो वै मृगगे भानौ धूर्तकर्मा क्रियोज्झितः ॥ २ ॥
स प्राप्य स्वगृहं शीघ्रं कृतवान् कर्म दारुणम् । ग्रामे निवासितोऽन्यस्य क्षत्रियस्य पतत्रिण ॥३॥
ददाह भवनं रम्यं वैरिभावात्पुरानघ । तत्रैका वत्सरी दग्धा जीवाश्चापि विशेषतः ॥ ४ ॥
कालयोगेन संप्राप्तः स सूत यमशासनम् । भुक्त्वा पापफलं पापात्पुण्यात्पुण्यफलं तथा ॥ ५ ॥

पूर्वपुण्यप्रभावेन स जातो पादजोऽधुना। गङ्गायाः प्राक् परे देशे शतयोजनसंमिते ॥ ६ ॥
स मध्यरूपो बलवान् धर्मे स्वल्पमतिः शठः। बुद्ध्याधिकप्रचारी च पैत्तिकः स्वल्पवित्तभाक् ७॥
सकन्यश्च सपत्नीको बन्धुभृत्यसमन्वितः। पुण्यादिदं फलं प्राप्य पापादत्र शृणुष्व वै ॥ ८ ॥
गोबालवत्सकत्रधाज्जीवघातादपुत्रकः। सप्तवेदमिताब्दान्तं जातपुत्रविनाशवान् ॥ ९ ॥
गोस्त्रीविप्रवधाः पापाः पुत्रनाशकरा यतः। गोराशिगे शनौ सोमात्पष्ठे जीवे मृगस्थिते ॥ १० ॥
लक्ष्मैतदण्डजश्रेष्ठ पृच्छकस्याऽत्र जन्मनि। पूर्वं या स्त्री सहायासीन्मृतवत्साऽत्र सा सुत ॥११॥

अरुण उवाच।

निष्कृतिं वद मे स्वामिन्सर्वपापनिषूदनीम्। पुत्रवृद्धिकरीं धन्यामत्र जन्मनि निश्चयात् ॥ १२ ॥

श्रीसूर्य उवाच।

शृणु सूत प्रवक्ष्यामि निष्कृतिं पापशोधिनीम्। पञ्चस्वर्णमिता कार्या सुरभी च हिरण्मयी॥१३॥
तदर्द्धमितिका वापि द्विजे वित्तानुसारतः। संपूज्य विधिवन्मंत्रैर्देया विप्राय धीमते ॥ १४ ॥
माषैर्वह्निमितैर्देयस्तथा पशुपतिः सुत। माषाभ्यां च तथा वह्निर्जीवा मापचतुष्कजाः ॥ १५ ॥
देयाश्च विधिना सूत पूर्वपापापनुत्तये। जपेत्पशुपतेर्मंत्रं सहस्रं रिष्टनाशनम् ॥ १६ ॥
होमयेदष्टशतकं रुद्रस्यापि प्रयत्नतः। शृणुयाद्धरिवंशं वा दशावृत्त्या विधानतः ॥ १७ ॥
यः कुर्याद्विधिवत्सूत प्रायश्चित्तं विधानतः। जीविष्यन्ति च तत्पुत्रा जन्मन्यत्र ममाज्ञया ॥१८॥
नैवं कुर्याच्च यः शक्त्या त्रिष्वेकं पापशोधनम्। न जीवन्ति सुतास्तस्मिञ्जीविते नाऽत्र संशयः १९॥
नवसप्तसमायुः स्यात् प्रायश्चित्ते कृतेऽधुना। सप्तवर्षमिते वर्षे रिष्टं चाऽकृतनिष्कृतेः ॥ २० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाशीत्यधिकनवशततमः ॥ ९८५ ॥

श्रीसूर्य उवाच।

काश्मीरमण्डले पूर्वं काचिद्विजवराननना। पतिप्रिया शीलयुक्ता दानभोगरता सदा ॥ १ ॥
वैरिभावात्तया स्मृत्वा गृहं दग्धं द्विजस्य च। वैरिणस्तु सुतो दग्धो गृहदाहे पतत्त्रिण ॥ २ ॥
साहाय्यात्स्वामिनः सूत प्राग्भवे समुपार्जितम्। तत्पापजं महाघोरं फलं प्राप्य विशेषतः ॥ ३ ॥
सैव जाता विराटेऽत्र पतिशुश्रूषणात्सुत। क्षत्रिया धनवर्माढ्या पूर्वपुण्यात्तथा सती ॥ ४ ॥
क्षयरोगयुता बाल्ये बालघातादपुत्रिणी। महाग्निदाहपापाच्च प्रायश्चित्तं न तत्समम् ॥ ५ ॥
त्रयोविंशन्मिते वर्षे रिष्टेनैवाऽत्र नंक्ष्यति। साहाय्यात्तत्पतिश्चात्र पुत्रहीनः क्षयान्वितः ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडशीत्यधिकनवशततमः ॥ ९८६ ॥

श्रीसूर्य उवाच।

सारिकां यो महाभाग हन्यात्पापविमोहितः। तस्य च स्खलिता वाणी भवत्यत्रैव जन्मनि ॥१॥
दद्याद्धिरण्मयीं तत्र सारिकां शुभलक्षणाम्। तथा च पुस्तकं दद्याच्छास्त्रस्य विधिनाऽण्डज ॥ २॥
पूर्वपापात्प्रमुच्येत नरोऽत्र गतकिल्बिषः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः सप्ताशीत्यधिकनवशततमः ॥ ९८७ ॥

श्रीसूर्य उवाच।

सारिकां याऽवधीन्नारी पूर्व पापविमोहिता। साऽत्र जन्मनि जायेत वचनस्खलिताऽण्डज ॥ १ ॥
तया देया सुवर्णस्य सारिका ब्राह्मणाय च। पूर्वपापाद्विमुच्येत तद्दानाद्विगतव्यथा ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाशीत्यधिकनवशततमः ॥ ९८८ ॥

श्रीसूर्य उवाच ।

वकघाती च पुरुषः पूर्वजन्मनि मानद । लंबकण्ठः प्रजायेत सोऽत्र जन्मनि निश्चयात् ॥ १ ॥
गां दद्याद्विधिवच्छ्वेतां सर्वाऽऽभरणभूषिताम् । मुच्यते कण्ठजाद्रोगान्नाऽत्र कार्या विचारणा ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोननवत्यधिकनववशततमः ॥ ९८९ ॥

श्रीसूर्य उवाच ।

या नारी पूर्वजन्मापि घातयेद्गरुडाग्रज । वकं स कण्ठरोगेण बाध्यते चाऽत्र जन्मनि ॥ १ ॥
गां दद्याद्विधिना सूत श्वेतामत्र पयस्विनीम् । यथोपस्करसंयुक्तां तस्मात्पापात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवत्यधिकनववशततमः ॥ ९९० ॥

अरुण उवाच ।

कश्चिद्विप्रकुले जातो धर्मिष्ठो वित्तसंयुतः । उदरे वातजा रोगा गुल्मोर्शश्चापि हृद्व्यथा ॥ १ ॥
मेहाद्याः स्वल्पवीर्यांश्च ह्यक्षिपांडूदरामयाः । जायंते शीर्षजा पीडा बाल्येऽस्य ग्रहिणीगदः ॥ २ ॥
शरीरे जायते वह्निरुपघातव्रणाकुलः । पुत्राणां भ्रातुलानीनां विधवार्त्तिः स्वस्रादिषु ॥ ३ ॥
दायादाच्छ्रुवत्पीडा भूमेर्द्रव्यस्य लिप्सया । ऐहिकानि च लक्ष्माणि तस्य देहेऽत्र संति वै ॥ ४ ॥
तस्य भार्या सदाचारा कदाचिद्रोषवादिनी । गौरवर्णा शुभा वाण्याऽसन्तोषप्रियकारिणी ॥ ५ ॥
मृतवत्सा कथं जाता स्थिरगर्भमवाप्नुयात् । दशमासानतिक्रम्य गर्भे चोदरसौख्यभाक् ॥ ६ ॥
केन कर्मविपाकेन सत्वं कथय भास्कर ॥ ७ ॥

श्रीसूर्य उवाच ।

पुंस्कृतं नैव तत्कर्म स्त्रीकृतं नाऽत्र संशयः । पूर्वजन्मनि सा क्षात्रा संजाता विनतासुत ॥ ८ ॥
अज्ञानतिमिरान्ध्येन स्त्रीणां कर्म दुरात्मकम् । अज्ञानानां कुलस्त्रीणामाचारश्च न शोभनः ॥ ९ ॥
सर्वभूतेषु सा क्रूरा स्थावरेषु चरेषु च । प्रमादाद्दीपिनं हत्वा सदा निष्ठुरमानसा ॥ १० ॥
तस्या गेहे श्रिता नित्यं मार्जारश्वादिजंतवः । पातालक्रीडनपरा गेहे संकुलिता भृशम् ॥ ११ ॥
तेषु वै वालुकाग्र्यंवुतप्तभस्मचयादयः । निक्षिप्ताश्च तया चाग्निः प्रक्षिप्तः पापचेतसा ॥ १२ ॥
मायावन्धनमातॄणां बालगर्भाश्रितास्तदा । अन्ये तद्धर्मिणो ये च क्षिप्त्वा वै वह्निभस्मकम् ॥ १३ ॥
जंतून्प्रमादान्निघ्नन्ति ते च संततिदुःखिनः । संततेर्दुःखितायास्तु नानादुःखानि संति च ॥ १४ ॥
अनयाग्निं समाक्षिप्य तेषां वै नाशनं कृतम् । तथाविधेषु जीवेषु मृतेष्वपि च तद्वशात् ॥ १५ ॥
म्रियन्ते शिशवस्तेऽपि तस्यास्तत्पापदोषतः । पातालेऽपि च दग्धास्ते बहवो लघुजंतवः ॥ १६ ॥
गर्भयुक्ता मृतास्तत्र क्षामा अपि तथाऽवयः । मार्गं लभन्ते नो तत्र मृतास्ते लघुजन्तवः ॥ १७ ॥
तेन कर्मविपाकेन स्थिरगर्भा मृतप्रजा । त्रिविधाऽपत्यजा बाधा प्राप्यते जनुरन्तरे ॥ १८ ॥
जन्तवो गर्भगाश्चैतत्स्वकृतं कर्मबन्धनम् । उभयोः कर्मणोर्हेतुरवश्यं च प्रयोजनात् ॥ १९ ॥
इदं जन्म तृतीयं तु ब्रह्मवंशसमुद्भवम् । स्थिरगर्भा मृतापत्या पुत्रहीना पतत्रिण ॥ २० ॥

अरुण उवाच ।

प्रायश्चित्तं कथं नाथ येन गर्भः प्रजायते । ममोपरि कृपां कृत्वा सत्यं वद दिवस्पते ॥ २१ ॥

श्रीसूर्य उवाच ।

सुदिष्टे समनुप्राप्ते सौम्यग्रहशुभोदये । प्रागुदक्प्रवणे देशे गोमयाद्युपलिप्तके ॥ २२ ॥

तत्रोपर्यावकं स्तीर्त्वा नानाचित्रविचित्रकम्। द्रोणमानं तिलानां तु मध्ये गर्भं प्रपूरयेत् ॥२३॥
निष्कमानसुवर्णस्य शलाकां मध्यतः क्षिपेत्। तस्य पूर्वे च दिग्भागे तण्डुलद्रोणपूरिते ॥ २४ ॥
शुद्धतोयंभृतं ताम्रपात्रं दशपलोन्मितम्। स्थापयेद्राजतं पद्मं तन्मध्ये पलनिर्मितम् ॥ २५ ॥
पूजयेच्च सपत्नीकं कश्यपं च प्रजापतिम्। दधानं दक्षहस्तेक्षं वामे चाथ कमण्डलुम् ॥ २६ ॥
कृत्वा प्रतिष्ठितप्राणां मूर्त्तिं च शुभलक्षणाम्। अर्चयेद्गन्धपुष्पाद्यैरुपचारैः पृथक्पृथक् ॥ २७ ॥
सम्यक्छ्रद्धावती नारी त्रिविधापत्यदुःखिनी। विप्रायः वेदविदुषे पूजयित्वा यथाविधि ॥ २८ ॥
दद्याच्चैव सपत्नीकान्ब्राह्मणांश्चैव भोजयेत्। सिसृक्षुणा जगत्स्रष्टा ये सृष्टाः क्षुद्रजंतवः ॥२९॥
ते मया तिलसंख्याश्च दग्धा वै तीव्रवेदनम्। लंघिताः स्त्रीजनाचारा अजानंत्या दयात्मक ॥३०॥
नाशयेस्तस्य पापस्य देवप्राप्तं विगर्हितम्। विप्राय वेदविदुषे प्रदद्यां गुणशालिने ॥ ३१ ॥
एवमाश्राव्य[1] तां मूर्त्तिं समादाय पृथक्पृथक्। प्रदद्याद्दानविधिना श्रद्धया च सदक्षिणाम् ॥३२॥
दानान्ते कीर्त्तयेन्मत्रं तिष्ठन्ती विहिताञ्जलिः ॥ ३३ ॥

मन्त्रः।

"यन्मया पूर्वजनुषि दयारहितचित्तया। प्राप्तं चात्राशुभं स्वामिंश्छिन्धि तत्कर्मकारणम् ॥ ३४ ॥
दत्त्वा दानं च विप्राय सर्पिष्यात्मानमीक्षयेत् ॥ ३५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायं एकनवत्यधिकनवशततमः ॥ ९९१ ॥

श्रीसूर्य उवाच।

अभक्ष्यं भक्षयेद्यस्तु भवे प्राङ् मानवोऽण्डज। सोऽत्र जन्मनि पक्षीन्द्र जायते क्रिमिलोदरः ॥१॥
स भीष्मपञ्चकादत्र व्रतात्पुण्यसमर्जनात्। मुच्यते पूर्वरोगात्तु दुष्टाद्वै क्रिमिलोदरात् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विनवत्यधिकनवशततमः ॥ ८९२ ॥

श्रीसूर्य उवाच।

याऽभक्ष्यं भक्षयेन्नारी प्राग्भवे गरुडाग्रज। जायते जठरे तस्याः कृमिजोत्था रुजा सुत ॥ १ ॥
तत्पापनाशनं कार्यं भीष्मपञ्चव्रतं शुभम्। कार्त्तिके शुक्लपक्षे च प्रान्तस्थं दिनपञ्चकम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिनवत्यधिकनवशततमः ॥ ९९३ ॥

श्रीसूर्य उवाच।

दुष्टस्पर्शेन सततं साऽत्र जाता कृशोदरी। सा वैष्णवव्रतात्पुण्यात्तस्मात्पापात्प्रमुच्यते ॥ १ ॥
कृशोदरव्यथा नश्येत्तत्पापस्य विनाशनात् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायश्चतुर्नवत्यधिकनवशततमः ॥ ९९४ ॥

श्रीसूर्य उवाच।

द्विजः पूर्वभवे कश्चिदासीद्धर्मान्वितः सदा। सभार्यो नर्मदातीरे दत्तं दानं हि तेन वै ॥ १ ॥
वेदवेदाङ्गयुक्तेषु सत्पात्रेषु विधानतः। अथ पापं भृशं चक्रे व्यभिचारसमुद्भवम् ॥ २ ॥
ज्येष्ठां त्यक्त्वा त्वृतुप्राप्तां धर्मशीलयुतां प्रियाम्। रतिं ददौ कनिष्ठायामनृतावपि मोहितः ॥३ ॥
ततो यमपुरं प्राप्तः ससहायो द्विजोत्तमः। भुक्त्वा पापफलं पापात्पुण्यात्स्वर्गफलं तथा ॥ ४ ॥

१ आश्राव्य—आदौ संकल्प्य—इत्यर्थः।

श्रद्धादानबलात्सोऽत्र गङ्गायाः पूर्वभागतः । सिंहस्थेर्के सुखे राहौ जीवे कर्केलिगे भृगौ ॥ ५ ॥
स रक्तगौरो मतिमान् बन्धुस्त्रीसुखसंयुतः । लघुर्वृणी त्वमितदो द्विजवंशसमुद्भवः ॥ ६ ॥
सर्वमेतत्फलं दानात् स्त्रीत्यागान्मृतपुत्रकः । स्त्रीत्यागी भ्रूणहा लोके इति पौराणिका विदुः॥७॥
वक्ष्यामि निष्कृतिं तस्य पूर्वपापविनाशनीम् । स्वर्णपंचपलैः कृत्वा गणेशं विघ्ननाशनम् ॥ ८ ॥
तदर्द्धप्रमितो वाऽपि देयो मंत्रमिमं पठन् ॥ ९ ॥

मन्त्रः ।

" त्यक्त्वा वराननां शुद्धां पूर्वं पापं समर्जितम् ॥
तदुग्रपापनाशाय ददेऽहं गणनायकम् " । माषसप्तामेता लक्ष्मीः शुभा लेख्या हिरण्मयी॥१०॥
ददेऽहं विप्रमुख्याय वेदशास्त्रार्थपारिणे । ब्राह्मणान्वरयेत्तत्र शक्त्या दद्याच्च दक्षिणाम् ॥ ११ ॥
एवं विधानं यः कुर्याज्जीविष्यन्ति च तत्सुताः । श्रुत्वैवं शक्तिमान्यस्तु न कुर्याच्छोधनं सुत ॥
स पुत्रान्नैव चाप्नोति रिष्टं पञ्चाशदब्दके । प्रायश्चित्ते कृते त्वत्र जीवनं वर्षसप्ततिम् ॥ १३ ॥
अन्यज्जन्मादिकं ज्ञेयं विस्तरं नोदितं मया ॥ १४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः पंचनवत्यधिकनवशततमः ॥ ९९५ ॥

श्रीसूर्य उवाच ।

देशे पञ्चनदे जाता बाहुजा पूर्वजन्मनि । साऽत्र जन्मनि वै विप्रा जाता पार्थिवपूजनात् ॥ १ ॥
प्राग्यत्तया कृतं कर्म शृणुष्वात्र खगेश्वर । ब्राह्मणेन महद्द्रव्यं तद्गृहे स्थापितं च यत् ॥ २ ॥
न दत्तं च पुनस्तस्मै भुक्तं सर्वमशेषतः । मृतो द्विजस्तद्दुःखेन क्षुधितस्तु पतत्रिण ॥ ३ ॥
पापमाचरितं पूर्वं ब्रह्मघातसमं तया । पञ्चत्ववशगा प्राप्ता भुक्त्वा तु यमशासनम् ॥ ४ ॥
पुत्रसन्ततिहीनाऽत्र युवभावेःक्षयान्विता । निष्कृतिं परमां तस्या वक्ष्येऽहं पापनाशनीम् ॥ ५ ॥
सर्वस्वेन तदर्धेन कार्या स्वर्णमयी शुभा । कदली पत्रसंयुक्ता देया विप्राय धीमते ॥ ६ ॥
दानेनाऽनेन सुप्रीता ब्रह्मविष्णुमहेश्वराः । क्षयनाशकराः सर्वे भविष्यंत्यत्र जन्मनि ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षण्णवत्यधिकनवशततमः ॥ ९९६ ॥

श्रीसूर्य उवाच ।

योऽन्यजन्मनि भो सूत चोच्छिष्टं भक्षयेन्नरः । रात्र्यन्धो जायते सोऽपि जन्मन्यत्र च मानवः१
भोजयेद्ब्राह्मणान्भक्त्या गोमूत्रं प्राशयेत्तथा । मुच्यते तत्क्षणात्सूत नक्तान्धत्वान् न संशयः॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तनवत्यधिकनवशततमः ॥ ९९७ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि भो सूत याऽभक्ष्यं भक्षयेत्किल । रसलोभेन वै नारी चोच्छिष्टं सा शुभानना॥ १ ॥
नक्ताऽन्धा जायते त्वत्र व्यथिता नेत्रपीडया । गोमूत्रप्राशनादत्र ब्राह्मणेभ्यश्च भोजनात् ॥ २ ॥
नक्तान्ध्यरोगान्मुक्ता स्यादत्र जन्मनि सुव्रत ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टनवत्यधिकनवशततमः ॥ ९९८ ॥

श्रीसूर्य उवाच ।

बिडालोच्छिष्टभोजी तु रात्र्यन्धो जायतेऽधुना । स तत्पापविशुद्ध्यर्थं गोमूत्रं विधिवत्पिबेत्॥१॥
भोजयेच्च तथा विप्रान्शक्त्या दद्याच्च दक्षिणाम् । रात्र्यन्ध्यरोगात्सततं मुक्तो भवति मानवः ॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवनवत्यधिकनवशततमः ॥ ९९९ ॥

श्रीसूर्य उवाच ।

विडालोच्छिष्टभुग्नारी प्राग्भवे विनतासुत । राज्यन्ध्यरोगयुक्ता सा चाऽत्र जन्मनि जायते ॥ १ ॥
द्विजेभ्यो भोजनाच्चैव गोमूत्रप्राशनात्तथा । मुच्यते पूर्वपापात्तु विडालोच्छिष्टभोजनात् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सहस्रशततमः ॥ १००० ॥

श्रीसूर्य उवाच ।

चाण्डाल्यां गमने पूर्वभवे च गरुडाग्रज । जायतेऽजगरश्चात्र मूढो जन्मनिजन्मनि ॥ १ ॥
चान्द्रायणव्रतादत्र दशावृत्त्या कृतात्सुत । स मुच्यतेऽजगरत्वाच्छुद्धबुद्धिर्भवेदिह ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकाधिकसहस्रतमः ॥ १००१ ॥

श्रीसूर्य उवाच ।

या काचिदधमा नारी प्राग्भवे विनतासुत । चाण्डालं प्राप्नुयात्सा वाऽजगरी जायतेण्डज ॥ १ ॥
प्राजापत्यव्रतादत्र कृतात्पंचापवर्त्तनैः । मुच्यते पूर्वपापात्सा जन्मन्यत्र पतात्रिण ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्यधिकसहस्रतमः ॥ १००२ ॥

श्रीसूय उवाच ।

परान्नविघ्नकारी यश्चाऽभवत्पूर्वजन्मनि । सोऽजीर्णेनाऽतिरोगेण जन्मन्यत्र प्रपीड्यते ॥ १ ॥
विधिना लक्षहोमेन कृतेन गरुडाग्रज । मुच्यतेऽजीर्णजाद्रोगादत्र जन्मनि वै ध्रुवम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्यधिकसहस्रतमः ॥ १००३ ॥

श्रीसूर्य उवाच ।

विघ्नं प्रकुरुते सूत या नारी पूर्वजन्मनि । पारान्नेषु यदा मोहाच्छृणु तत्र पतत्रिण ॥ १ ॥
अजीर्णनैव रोगेण बाध्यते पीडया भृशम् । लक्षहोमेन सततं सा पापान्मुच्यतेऽधुना ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरधिकसहस्रतमः ॥ १००४ ॥

अरुण उवाच ।

भूमिदेवकुलोत्पन्नो धर्मिष्ठो धर्मवत्सलः । सत्यनिष्ठः सदाचारः साधुसेवनसंयुतः ॥ १ ॥
तस्य देहे भवेच्चिह्नं पापजं चाऽत्र जन्मनि । किलासदद्रुकंडूश्च नेत्रतोदो विरश्मिता ॥ २ ॥
किंचिद्गदः प्रजायेत तद् ब्रूते कारणं विना । तस्य भार्या सुतन्वङ्गी स्त्रीधर्मव्रतकारिणी ॥ ३ ॥
वातवाधोदरे तस्या स्तथा मूर्ध्नि च जायते । मृतवत्सा कथं जाता पुत्राः पुत्र्यो मृताः कथम् ॥ ४ ॥
केन कर्मविपाकेन सत्यं कथय भास्कर ॥ ५ ॥

श्रीसूर्य उवाच ।

पूर्वं वैश्यसमुत्पन्ना नारी शूद्रा प्रतारिता । बहुव्यापारनिरता बहुद्रव्यसमन्विता ॥ ६ ॥
परस्परस्य सम्बन्धे बहुकालो गतागतः । अन्योन्यप्रीतिवशतः किंचित्कालवशं गतः ॥ ७ ॥
उभयोः कर्मणोर्हंतुर्धनहर्त्ता त्वितस्ततः । मान्यकर्मकृता योऽसौ तेन तत्रैव जन्मनि ॥ ८ ॥
ब्राह्मणस्य सुतः श्रेष्ठः स्वर्णाऽलंकरणैर्युतः । धनलोभाद्धतस्तेन भाविनोर्थस्य वै बलात् ॥ ९ ॥
तस्यापि मातापितरौ पुत्रदुःखेन दुःखितौ । द्वित्रैर्वषस्तथा मासैर्वयसा च समन्वितः ॥ १० ॥
धनलोभवशेनैव दुष्टचित्तेन दुर्मनाः । अचिराच्च मृतौ तत्र गतौ तौ यमशासनम् ॥ ११ ॥

तद्गेहस्योद्वसो जातो ब्राह्मणस्य ततः खग । तेन कर्मविपाकेन नरके पातितौ भृशम् ॥ १२ ॥
पश्चान्मानुषमापन्नो व्रतदानप्रभावतः । इदं जन्म चतुर्थं तु मृतापत्यं खगेश्वर ॥ १३ ॥
द्वित्रादिमासजातानां मृतिर्द्वित्रादिहायनात् । मृताः पुत्रा भवंत्येव जाताजातास्तथैव च ॥ १४ ॥
इदं जीवेदिदं जीवेदित्याशामपि च भुवन् । जाताजाता विनश्यंति तस्याथाकृतनिष्कृतेः ॥ १५ ॥
अचिराच्च भविष्यन्ति कुमाराश्चिरजीविनः । सुरोपमाः सुरूपाश्च लालनाच्चाटुकारिणः ॥ १६ ॥
नश्यत्सु जातजातेषु जन्मजन्मसुतेषु च । व्याधयन्तरे भवेद्व्याधिर्ग्रस्तो व्यसनवानयम् ॥ १७ ॥
नास्ति सौख्यस्य लेशोपि नानाशंकितचेतसः । भवेच्च तद्धनस्यापि परापत्यानि पश्यतः ॥ १८ ॥
लक्षणानि पुरोक्तानि तस्य नामापि कीर्त्तयेत् । स्वोदरे म्रियते बालः स वै ब्राह्मण उच्यते॥ १९॥
मृतवत्सोद्भवं तस्य चिह्नं तत्प्रतिपादयेत् । स्ववंशस्यापि विच्छेदो द्रव्यहानिर्यतस्ततः ॥ २० ॥
दौर्मनस्यं महाव्याधिः शोकश्चैवोपजायते । अदृष्टगुणलावण्या अदृष्टाननकान्तयः ॥ २१ ॥
म्रियन्ते जातमात्रा वै पुत्रा अकृतचाटवः । एवं तु कर्मणि ज्ञाते प्रायश्चित्तमथाचरेत् ॥ २२ ॥

अरुण उवाच ।

का तस्य निष्कृतिः स्वामिन्निह कर्मनिपूदनी । कथ्यतां दिवसेशान नारीणां हितकाम्यया॥२३॥

श्रीसूर्य उवाच ।

शृणु सूत प्रवक्ष्यामि मृतवत्साघनाशनीम् । निष्कृतिं विधिवत्ताक्ष्य सन्ततेः सौख्यहेतवे ॥२४॥
यजमानः सपत्नीको विधिवद्विधिमाचरेत् । पठद्भिः शान्तिसूक्तानि ब्राह्मणैः सहितोऽर्थवित्॥२५॥
सिद्धार्थाक्षतदूर्वाभिः कृतरक्षं प्रतिष्ठितम् । स्थापयेदौपधैर्मंत्रैर्वारुणैर्वैष्णसूक्तिभिः ॥ २६ ॥
सुदिष्टे सुशुभे देशे गोमयाद्युपलिप्तके । तत्रोपर्याविकं स्तीर्त्वा कृष्णाजिनमथापि वा ॥ २७ ॥
द्रोणमानं तिलानां तु कृष्णवस्त्रेण संयुतम् । स्थापयेद्राजतं पद्मं तन्मध्ये पलनिर्मितम् ॥२८॥
सौवर्णीं प्रतिमां तत्र बालगोपालमूर्तिताम् । कृत्वा प्रतिष्ठितप्राणां काश्यपे शुभलक्षणाम् ॥२९॥
अर्चयेद्गन्धपुष्पाद्यैरुपचारैर्यथाविधि । सम्यक् श्रद्धावती नारी मृतसन्ततिदुःखिनी ॥ ३० ॥
आहूय विदुषो विप्रान् तथा च वेदवादिनः । अलोलुपाः सदाचाराः पूज्या अर्घ्यादिकैस्तथा॥३१॥

मन्त्रः ।

"यन्मयाद्य पुरा द्रोहमापाद्य परसूनुषु । भूमिद्रविणहेमाद्ये तल्लिप्सा तस्य नश्यतु " ॥ ३२ ॥
नाशयेत्तद्धि पापं मे मूर्त्तिस्ते शुभलक्षणा । तदस्तु महदप्राप्तं मृतसन्तन्तिरात्मनः ॥ ३३ ॥
तस्मान्मुच्ये महाभागार्पितगोदानतोषितः । इति तत्र परिक्रम्य त्रिस्तेनोक्त्वेव तिष्ठति ॥ ३४ ॥
अग्ने नयेतिमंत्रेण विसृज्यैतदुदीरयेत् । धेनुं दद्यात्सवत्सां च सहिरण्यां यथाविधि ॥ ३५ ॥
सर्पिष्यात्मानमालोक्य भोजयेदिष्टबन्धुभिः । इहैव लक्ष्म विज्ञेयं भ्रातृबन्धुसुखोज्झितम् ॥३६॥
स्वसुतासुतसौख्यानि न सन्त्यनिजपुत्रता । विरुध्यन्तेऽप्यपत्यानि तादृशानि मिथः कियत्॥३७॥
विकारो विकृतौ लीयाद्गमने पादवैकृतम् । पितृजा मातुलानीनां सगुल्मार्त्तिस्त्वचो व्यथा ॥३८॥
मृतापत्यार्त्तिरप्येषा मनुमंत्रादिभेदतः । तथातथाऽत्र दुःखानि जायन्तेऽस्य मुहुर्मुहुः ॥ ३९ ॥
पूर्वकर्मार्जितं पापं चिह्नं तस्य सहायकम् ॥ ४० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाधिकसहस्रतमः ॥ १००५ ॥

श्रीसूर्य उवाच ।

विप्राय यो विषं दद्याद्धातार्थं पूर्वजन्मनि । सोऽत्र जन्मनि पक्षीन्द्र च्छर्दिरोगेण बाध्यते ॥ १ ॥
निष्कृतिर्नास्ति तस्याऽत्र पापस्य दृढकर्मणः । छर्दिरोगेण सततं यौवने नाशमाप्नुयात् ॥ २ ॥
प्रायश्चित्तं न तस्याऽत्र दानैरपि सहस्रशः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडधिकसहस्रतमः ॥ १००६ ॥

श्रीसूय उवाच ।

या नारी प्राग्भवे सूत विषं दद्याद्विजातये । छर्दिरोगेण साऽत्रैव निश्चितं नाशमाप्नुयात् ॥ १ ॥
न पापशोधनं प्रोक्तं तस्यास्तु गरुडाग्रज । ब्राह्मणस्य वधे सूत प्रायश्चित्तं न विद्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्ताधिकसहस्रतमः ॥ १००७ ॥

श्रीसूर्य उवाच ।

परस्य यो विषं दद्यात्पूर्वजन्मनि मानद । छर्दिरोगेण चात्रैव बाध्यते पीडया भृशम् ॥ १ ॥
धेनूनां दशकं दद्यात्सर्वोपस्करसंयुतम् । मुच्यते छर्दिरोगाच्च जन्मन्यत्र पतत्रिण ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाधिकसहस्रतमः ॥ १००८ ॥

श्रीसूर्य उवाच ।

मूकोऽत्र जायते जंतुर्यः पूर्वं भ्रातृघातकः । बभूव कामतः सूत प्रायश्चित्तं न तत्समम् ॥ १ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायो नवाधिकसहस्रतमः ॥ १००९ ॥

श्रीसूर्य उवाच ।

या काचिन्मागधी ह्यासीज्जाता ब्रह्महदे सुत । सा चाऽत्र यवनी देशे शुभे पञ्चनदेऽण्डज ॥ १ ॥
पुत्राभिलाषिणी पूर्वमभजद्यवनं यतः । तस्मात्सा यवनी जाता पुत्रसन्ततिवर्जिता ॥ २ ॥
नानाधनयुता दानात्कुरुक्षेत्रे पुराऽनघ । शिवभक्तिपरा तस्मात्सुखैश्वर्यसमन्विता ॥ ३ ॥
अत्र जन्मनि सा लक्षरुद्रपूजनजाच्छुभात् । पुत्रपौत्रयुता नारी भवत्येव न संशयः ॥ ४ ॥
अथवा हरिवंशस्य शतावृत्या विधानतः । श्रवणात्पूर्वजात्पापान्मुच्यते विनतासुत ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो दशाधिकसहस्रतमः ॥ १०१० ॥

श्रीसूर्य उवाच ।

देवालये वसन्कश्चिद्ब्राह्मणः पूर्वजन्मनि । विष्णुपूजारतो नित्यं द्रव्यलोभेन चाण्डज ॥ १ ॥
चौर्येणापि हृतं द्रव्यं यत्स्थितं देवताश्रये । तेन दुष्टेन यत्सूत कृतं कर्मातिदारुणम् ॥ २ ॥
स तेन कर्मणा युक्तो भुक्त्वा तत्पापजं फलम् । जातो गङ्गाश्रये क्षत्री पर्वते पूजनाद्धरेः ॥ ३ ॥
बहुद्रव्यान्वितो भूपः सर्वसंपत्सुखान्वितः । बाल्ये हि पाण्डुरोगार्त्तश्चाऽत्र जन्मनि मानवः ॥४॥
देवद्रव्यापहारी तु पाण्डुरोगी प्रजायते । तत्पापनाशनं पुण्यमुपायं शृणु तत्त्वतः ॥ ५ ॥
कुर्याद्धिरण्मयीं पृथ्वीं ससुवर्णां पलात्मिकाम् । सवनां सागरोपेतां सप्तद्वीपां वसुन्धराम् ॥ ६ ॥
गन्धपुष्पैरलंकृत्य दद्याद्विप्राय धीमते । पाण्डुरोगाद्विमुक्तः स्यादत्र जन्मनि मानवः ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकादशाधिकसहस्रतमः ॥ १०११ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे प्रादाद्विषं कस्यापि काश्यप । साऽत्र जन्मनि रोगेण च्छर्दिसंज्ञेन पीड्यते ॥ १ ॥
धेनूनां दशकं दद्यादशक्तौ गरुडाग्रज । सवत्सां कपिलां दद्यात्तस्माद्दोषात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वादशाधिकसहस्रतमः ॥ १०१२ ॥

श्रीसूर्य उवाच ।

कश्चिद्विप्रो ह्यभूदङ्ग प्राग्भवे धर्मसंयुतः । परस्य कन्यकायाश्च विवाहमकरोत्सुधीः ॥ १ ॥
दानाल्पत्वान्महाभाग चकाराल्पविधानतः । चौर्यकर्मरतः सोऽपि कदाचिद्दैवयोगतः ॥ २ ॥
स चचार वने सूत मार्गलुण्ठनतत्परः । काचित्सुनयना तत्र ज्ञाप्ता भाविबलाद्दृढात् ॥ ३ ॥
नानाभरणयुक्ता सा पूर्णगर्भसमन्विता । सा लुण्ठिताऽत्र त्रसिता तेन पापधियाण्डज ॥ ४ ॥
सहायैः सा परित्यक्ता ताडिता ह्याकुलाऽभवत् । तद्गर्भाद्वै च्युतौ पुत्रौ पापमाचरितं त्विदम् ॥५॥
ततो धर्मपुरं प्राप्तः पुण्यपापसमन्वितः । पुण्यात्पुण्यफलं भुक्त्वा पापात्पापं पतत्रिण ॥ ६ ॥
परकन्याविवाहेन स जातो वाहुजोऽधुना । गङ्गायाः पूर्वभागे तु दशयोजनसम्मिते ॥ ७ ॥
गौरः स्वरूपः क्षीणाङ्गो वहुद्रव्यपराक्रमः । पित्ताधिक्योतिमतिमान् वहुपुत्रीभिरन्वितः ॥ ८ ॥
जातपुत्रैर्मृतैस्तत्र पूर्वपापात्तथाण्डज । विन्मयं तत्र वक्ष्यामि येन पापात्प्रमुच्यते ॥ ९ ॥
पलार्धेन तदर्धेन कार्या वा वटिका सुत । वाहुजा गर्भसंयुक्ता सौवर्णीं भूषणान्विता ॥ १० ॥
पूर्वपापविनाशाय सा देया ब्राह्मणाय च । गन्धपुष्पैः समभ्यर्च्य मंत्रैः प्रणवपूर्वकैः ॥ ११ ॥
वेधसं तत्र सौवर्णं सुवर्णैकमितं शुभम् । दद्याज्जपेच्च मंत्रांश्च तल्लिङ्गान्विधिपूर्वकम् ॥ १२ ॥
होमयेच्च यवांस्तत्र सतण्डुलसर्षपान् । ब्राह्मणान्भोजयेत्पश्चात्तेभ्यो दद्याच्च दक्षिणाम् ॥ १३ ॥
शृणुयाद्धरिवंशं वा शतावृत्त्या विधानतः । गायत्र्यष्टशतं जप्त्वा तस्माद्दोषात्प्रमुच्यते ॥ १४ ॥
तस्मात्पुत्रसुखं लेभे चात्र जन्मनि वै ध्रुवम् । रिष्टं पञ्चाशदब्दे तु प्रायश्चित्ते कृते शुभे ॥ १५ ॥
वेदसप्तसमायुः स्यात्प्रायश्चित्ते कृतेऽत्र च ॥ १६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोदशाधिकसहस्रतमः ॥ १०१३ ॥

श्रीसूर्य उवाच ।

व्यभिचाररता पूर्वं याऽत्राऽपि व्यभिचारिणी । साऽऽगता नरकाद्घोरादसती पापजाऽण्डज ॥ १ ॥
न शुध्यत्यशुभाचारा प्रायश्चित्तैः शतैरपि । वाराणसीं गता चास्यां वासाच्च विनतासुत ॥ २ ॥
मुच्यते सर्वपापाच्च पूर्वजन्मकृताद्दृढात् । वाराणस्यां चतुर्दश्यां शिवपूजनजाद्व्रतात् ॥ ३ ॥
वाहुजेयं महाभाग पूर्वंप्यत्राऽपि वाहुजा । वन्ध्या च पापतो दुःखाकुला च दयितोज्झिता ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्दशाधिकसहस्रतमः ॥ १०१४ ॥

श्रीसूर्य उवाच ।

भ्रातृघातकरी नारी प्राग्भवे विनतासुत । साऽत्र जन्मनि मूकत्वं भजत्येव न संशयः ॥ १ ॥
ज्ञानान्महापापकृताच्च चोक्ता निष्कृतिर्मया । ज्ञात्वा ब्रह्मवधे सूत प्रायश्चित्तं क तत्समम् ॥२॥
सप्तजन्मनि मूकत्वं जायते च तदेनसः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचादशाधिकसहस्रतमः ॥ १०१५ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यसौ विप्रश्चाऽत्र जन्मनि वाहुजः । देवद्रव्याऽपहरणात्प्रागत्राऽक्षिप्रपीडनम् ॥ १ ॥
विंशद्वर्षे व्यतीते च नेत्रभंगः प्रजायते । तद्रक्षार्थमहं वक्ष्ये दानं पापहरं परम् ॥ २ ॥
कृत्वा देवगृहं रम्य प्रतिष्ठाप्य सुराधिपम् । गन्धपुष्पैः समभ्यर्च्य दीपा देयाः सुवर्णजाः ॥ ३ ॥
राजताश्च महाभाग नेत्ररोगं न पश्यति । भोजयेच्छक्तितो विप्रान् वैष्णवाञ्श्रद्धया युतः॥ ४ ॥
कृत्वा तेन विधानेन रिष्टं नैव प्रपश्यति ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः षोडशाधिकसहस्रतमः ॥ १०१६ ॥

श्रीसूर्य उवाच ।

सर्वस्नेहहरः कश्चिद्यो भवेत्पूर्वजन्मनि । सोऽत्र जन्मनि जायेत क्षयरोगप्रपीडितः ॥ १ ॥
प्रायश्चित्तं परं तस्य वित्ततुयाशदानतः । कालचक्राभिधं दानं दद्याद्दोषोपशान्तये ॥ २ ॥
ब्राह्मणान्भोजयेत्पश्चाद्धोमयेच्च स्वशक्तितः । कालचक्राख्यदानेन रोगा नश्यन्ति पापजाः ॥ ३॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तदशाधिकसहस्रतमः ॥ १०१७ ॥

श्रीसूर्य उवाच ।

ब्रह्मवादरता ह्यत्र या पूर्वेऽभूत्पतिव्रता । पतिपापप्रभावाद्वै गतिं प्राप्य हि मानुषीम् ॥ १ ॥
त्यक्त्वा शरीरं सा देवी पार्वत्या सह मोदते । भुक्त्वा भोगान्समस्तान्वै पतिं प्राप्य तपस्विनी॥२॥
गच्छेत्सा परमं स्थानं यत्र देवो महेश्वरः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टादशाधिकसहस्रतमः ॥ १०१८ ॥

श्रीसूर्य उवाच ।

यो ज्ञानात्कृतवान्सूत प्राग्भवे भ्रातृघातनम् । सोऽत्र जन्मनि मूकत्वं भजते तेन कर्मणा ॥ १ ॥
तेन भीता तदा नारी त्रस्यन्ती च महावने । गर्भपातोऽभवत्तस्याः पर्वते च ततो मृतः ॥ २ ॥
तेन कर्मविपाकेन म्रियंते तस्य वालकाः । केचिज्जीवन्ति मासान्तं केचिद्वर्षाधिकं भृशम् ॥ ३ ॥
वहुकालं तु वै कश्चिच्चिह्नं तस्य च जायते ॥ ४ ॥

अरुण उवाच ।

देवदेव जगन्नाथ लोकानां हितकाम्यया । कथयस्व प्रसादेन कर्मणस्तस्य निष्कृतिम् ॥ ५ ॥

श्रीसूर्य उवाच ।

साधु पृष्टं महावाहो प्रश्न एष सुदुर्लभः । तेनेदं मुनिभिः प्रोक्तं प्रायश्चित्तमघापहम् ॥ ६ ॥
गोत्रयं वै सुवर्णाढ्यं सौवर्णनिष्कसंयुतम् । पुष्पितं फलितं वृक्षं वस्त्रयुग्मं गुरोरपि ॥ ७ ॥
कर्मपाकाशिकं विप्रं पूजयेद्विधिपूर्वकम् । एवं यः कुरुते वत्स निष्कृतिः कर्मणः फलम् ॥ ८ ॥
पुत्रपौत्रादिकैर्युक्तो धनधान्यसमन्वितः । न करोति च यो मोहाल्लोभाद्वा कर्मनिष्कृतिम् ॥ ९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकोनविंशत्यधिकसहस्रतमः ॥ १०१९ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यभूत्कश्चिन्नारी भर्तृप्रियान्विता । दक्षा सर्वक्रियास्वेव वहुदानप्रदायिका ॥ १ ॥
पार्श्वस्थस्यान्यशूद्रस्य गृहान्नीतानि मानद । सर्वस्नेहानि चौर्येण सर्वशून्याद्गृहात्पुरा ॥ २ ॥

भुक्तानि बहुभिः सूत मिलित्वा च सुतादिकैः । पूर्वजन्मकृतात्पूर्वकर्मणोऽत्रैव जन्मनि ॥ ३ ॥
सा जाता बाहुजा नारी धनभोगसमन्विता । पुत्रान्विता विचित्रा च भर्तुशुश्रूषणे रता ॥ ४ ॥
यौवने क्षयरोगाऽऽढ्या यतः स्नेहहरा पुरा । निष्कृतिं तस्य पापस्य पुण्यां पापौघनाशनीम् ॥ ५ ॥
कथयामि प्रयत्नेन वित्ततुर्यांशमानतः । कृत्वा तु कदलीं रम्यां पत्रयुक्तां सुवर्णजाम् ॥ ६ ॥
दद्याद्वेदविधिज्ञाय क्षयदोषोपशान्तये ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो विंशत्यधिकसहस्रतमः ॥ १०२० ॥

श्रीसूर्य उवाच ।

यो लोकान्वञ्चयेत्सूत पुरा धूर्तस्य कर्मणा । सोऽत्र जन्मन्यपस्माररोगेण महताऽऽकुलः ॥ १ ॥
धेनुं दद्यान्महाभाग सवत्सां विधिसंयुताम् । ब्रह्मकूर्चत्रयं कुर्यात् स तत्पापात्प्रमुच्यते ॥ २ ॥
न भवेत्तस्य रोगस्य वेदना पापशोधनात् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकविंशत्यधिकसहस्रतमः ॥ १०२१ ॥

श्रीसूर्य उवाच ।

अस्त्यत्र चन्द्रवदना गौराङ्गी पतिवल्लभा । धनधान्यसमायुक्ता स्वर्णकारी सुखान्विता ॥ १ ॥
दक्षा भर्तृहिते नित्यं पूर्वं सा द्विजवल्लभा । स्वर्णापहारजात्पापात् सा जाता स्वर्णकारतः ॥ २ ॥
पुत्रहीना महाभाग परद्रव्यापहारणात् । कुरुक्षेत्रे शशिग्रस्ते स्वर्णं दद्याच्च शक्तितः ॥ ३ ॥
तद्दत्त्वाऽशु लभेत्पुत्रानत्र जन्मनि वै सुत ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वाविंशत्यधिकसहस्रतमः ॥ १०२२ ॥

श्रीसूर्य उवाच ।

बालघाती भवेत्सूत पूर्वजन्मनि मानवः । वैनतेयाऽत्र जनुषि मृतपुत्रः प्रजायते ॥ १ ॥
श्रवणाद्धरिवंशस्य विधिवच्चात्र जन्मनि । ब्राह्मणोद्वाहनाच्चैव पूजनाच्छंकरस्य च ॥ २ ॥
जीविष्यन्ति च तत्पुत्रा नात्र कार्या विचारणा ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोविंशत्यधिकसहस्रतमः ॥ १०२३ ॥

श्रीसूर्य उवाच ।

सूकरे याऽभवत्पूर्वं निषादी पुनरेव सा । शूद्राधमा पञ्चनदे जाताऽत्र विनतासुत ॥ १ ॥
पुत्रपौत्रधनैर्धान्यैर्गजैश्चोष्ट्रादिवाहनैः । युक्ता सा यवनी सूत तीर्थराजस्य सेवनात् ॥ २ ॥
भर्तृसंगयुतात्पूर्वं पुण्यतत्तीर्थवासनात् । युवतिर्बहुरूपा च तत्र तस्योपसेवनात् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्विंशत्यधिकसहस्रतमः ॥ १०२४ ॥

श्रीसूर्य उवाच ।

कश्चित्प्रागभवद्विप्रः सर्वविद्याविशारदः । वेदाभ्यासरतः श्रीमान् प्राप्तसर्वमनोरथः ॥ १ ॥
तुलाधृतानि स्नेहानि विप्राणां स्नेहभागिनाम् । गृहीतान्यतिचौर्येण लोभयुक्तेन चेतसा ॥ २ ॥
यस्माज्ज्ञानकृतं चैव प्राग्भवे तत्फलं शृणु । सोऽत्र विप्रः प्रयागेऽस्ति द्विजो वेदविदां वरः ॥ ३ ॥
धनपुत्रसमायुक्तः क्षयरोगसमन्वितः । वेदाभ्यासात्तथा दानात्तीर्थराजाधिवासनात् ॥ ४ ॥
नाशः स्यात्क्षयरोगस्य चाऽत्र जन्मनि चाण्डज । दोषात्स्वल्पात्फलैर्युक्तो जीवेद्वर्षशतं ध्रुवम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचविंशत्यधिकसहस्रतमः ॥ १०२५ ॥

श्रीसूर्य उवाच।

बभूव ब्राह्मणः कश्चिद्वंगदेशे वसन्सुधीः। धर्मशास्त्रक्रियायुक्तो धनपुत्रादिसंयुतः ॥ १ ॥
दत्तानि तेन विप्रेभ्यो दानान्यन्यानि शक्तितः। सत्पात्रेभ्यः परं सूत पर्वस्वपि विधानतः ॥ २ ॥
पापमाचरितं तेन पूर्वजन्मनि चाण्डज। ब्राह्मण्यां धारितो गर्भो भाविनोर्थस्य गौरवात् ॥ ३ ॥
स्त्रीसाहाय्यात्तथा सूत कृतं तद्गर्भपातनम्। सा मृता तेन दुःखेन गर्भपातोद्भवेन च ॥ ४ ॥
एवं किंचिद्गते काले संप्राप्ते यमशासनम्। भुक्त्वा पापाच्च नरकं पुण्यात्स्वर्गांश्च शाश्वतान् ॥ ५ ॥
पूर्वपुण्यप्रभावेन स जातो ब्राह्मणाद्यधः। यमुनायां महाभाग गौरः पित्ताधिको वृणी ॥ ६ ॥
धनमित्रसुखैश्वर्यनानास्त्रीभोगभाग्नरः। दक्षः कार्येषु चार्वंगो धर्मिष्ठो लाभसंयुतः ॥ ७ ॥
मानी यशस्वी पुरुषः कान्तिमान् प्रियभाषणः। चिन्तातुरः पापशेषाद्ब्राह्मप्राप्तमनोरथः ॥ ८ ॥
ब्राह्मण्यां वीर्यदानात्प्राक् कृताद्गर्भपातनात्। अत्र पञ्चाशद्वर्षान्तं जातपुत्रविनाशकः ॥ ९ ॥
चिह्नमङ्गात्सुते सूत चन्द्रः शुक्रग्रहान्वितः। पापाभ्यां पुत्रभावेपि समाक्रान्तोऽत्र जन्मनि ॥१० ॥
स्त्रीसाहाय्यात्तथा पूर्वं साऽत्र सन्ततिदुःखिता। लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥११॥
कार्याऽत्र ब्राह्मणी लेख्या सुवर्णाढ्या पलैर्मिता। तदर्धार्धमिता वापि त्रिपु वित्तानुसारतः ॥१२॥
पत्रे गर्भान्विता भव्या बहुभूषणसंयुता। गन्धपुष्पाक्षतैर्वस्त्रैः पूजनीया प्रयत्नतः ॥ १३ ॥
सा देयाऽत्र विधिज्ञाय मंत्रमुच्चारयन्निमम् ॥ १४ ॥

मंत्रः।

"ब्राह्मणि निर्मिते देवि पापमाचरितं परम्। तत्पापशमनायैव त्वां ददेऽहं हिरण्मयीम्" ॥१५॥
ब्राह्मणाय महाभाग पापं गच्छतु तद्भृशम्। सोमं च राजतं दद्यात्तन्मितं पापशान्तये ॥ १६ ॥
लक्ष्मीनारायणं वापि हैमं सौवर्णसंमितम्। गायत्र्यष्टसहस्रं तु त्र्यंबकं तन्मितं जपेत् ॥ १७ ॥
मंत्रमष्टाक्षरं तद्वज्जप्त्वा शुद्धिमवाप्नुयात्। होमयेत्तद्दशांशेन तिलाज्यवतण्डुलैः ॥ १८ ॥
ब्राह्मणान्भोजयेत्पश्चात् पूजयेच्च विधानतः। लक्षरुद्रं त्रिगुणितं नानाविभवविस्तरैः ॥ १९ ॥
पूजयेद्वा विधानेन तस्मात्पापात्प्रमुच्यते। य एवं विधिना तत्र प्रायश्चित्तं समाचरेत् ॥ २० ॥
तस्य सन्ततिवृद्धिः स्यात् स्त्रीभ्यामत्रैव जन्मनि। ब्रह्मलोकमवाप्नोति पूर्वपापविशोधनात् ॥२१॥
प्रायश्चित्तं द्वयोरेकं न कुर्याल्लोभमोहितः। भवन्ति तत्सुतास्तस्मिञ्जीविते नाऽत्र संशयः ॥ २२॥
न च सद्गतिमाप्नोति पापस्यास्य प्रभावतः। प्रायश्चित्ते कृते रिष्टं वर्षं षष्टिमिते ध्रुवम् ॥ २३ ॥
आयुर्नवतिवर्षान्तमत्र पापविशोधनात्। जन्मादिमरणान्तं हि स्वल्पमेवाऽत्र सूचितम् ॥ २४ ॥
षष्टाक्षरं त्रिसाहस्रं जप्त्वा शुद्धिं समाचरेत्। होमयेत्तद्दशांशेन तथा विप्रांश्च भोजयेत् ॥ २५ ॥
शृणुयाद्धरिवंशं वा दशावृत्त्या विधानतः। य एवं कुरुते सूत पूर्वपापविशोधनम् ॥ २६ ॥
तस्य पुत्रविवृद्धिः स्यात् स्त्रीभ्यामत्रैव जन्मनि। नाधयो व्याधयस्तस्य न चारिष्टभयं क्वचित्२७
नैवं करोति यो मोहाल्लोभात्पापविशोधनम्। न जीवन्ति सुतास्तस्मिञ्जीविते नाऽत्र संशयः२८॥
पञ्चविंशन्मते वर्षे रिष्टं देहस्य नाशकम्। त्रिसप्ततिमिं तायुः स्यात्प्रायश्चित्ते कृतेऽधुना ॥ २९ ॥
गतिमप्युत्तमां याति त्वन्यथा ह्याततायिनाम्। जन्मादिमरणान्तं हि स्वल्पमेवाऽत्र सूचितम्३०
यदन्तरगतं सूत तन्मच्छास्त्राद्विचिन्तयेत् ॥ ३१ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षड्विंशत्यधिकसहस्रतमः ॥ १०२९ ॥

अरुण उवाच ।

कथयस्व दिवानाथ लोकानां हितकाम्यया । पृच्छामि तेऽत्र देवेश च्छिन्धि मे सर्वसंशयान् ॥ १ ॥
जात्युत्तमानां जनुषि सदा संपत्समृद्धिमान् । बन्धूनामतिसौख्यं च वैष्णवानातिवर्त्तते ॥ २ ॥
जातसन्ततिदुःखार्त्तः कस्येदं कर्मणः फलम् ॥ ३ ॥

श्रीसूर्य उवाच ।

ब्राह्मणी गर्भयुक्ता च प्रयाणे भर्तृसंयुता सर्वाभरणभूषाढ्या नानारत्नसमन्विता ॥ ४ ॥
बहुभिर्मिलितैश्चौरैर्गृहीतं भूषणं तदा । तत्र कोलाहलो जातो गर्भपातोऽभवत्तदा ॥ ५ ॥
तेन पापेन बालानां गर्भनाशः प्रजायते ॥ ६ ॥

अरुण उवाच ।

का तस्य निष्कृतिः स्वामिन् येन पाप प्रणश्यति । एतेषां विस्तरं ब्रूहि लोकानां हितकाम्यया७

श्रीसूर्य उवाच ।

एकवासा विधिं चैव लक्षपूजा ततः परम् । सगर्भा गौः प्रदातव्या भोजनं मितिसंमितम् ॥ ८ ॥
सगर्भायाश्च गोः पक्षिन्नभिषेकः प्रपादनु । पञ्चमे वाऽथ षष्ठे वा मासि जातो मृतश्च यः ॥ ९ ॥
तयोः कर्मविशेषाच्च कथयिष्यामि योषितोः । सा चापि मृतकल्पा स्यादामजैः सूतकामयैः १०॥
शोकदामोदरे टोपो भूतगौरविकंपनैः । रक्तस्रावो विवर्णस्य जायते कर्मणेरितः ॥ ११ ॥
रजतस्य पलाभ्यां तु कोशं गर्भाशयाकृति । कुसुंभवेष्टितं येन रक्तस्रवेण वेष्टयेत् ॥ १२ ॥
मधुना पूरयेत्तत्र शलाका रूप्यवर्त्तिना । तन्मध्ये हेमशकलं क्षिपेत्तदपि यत्नतः ॥ १३ ॥
दद्याद्विप्राय विधिवद्यथाश्रुति निरूपितम् ॥ १४ ॥

मंत्रः ।

" यन्मया पूर्वतः स्वामिन् गर्भपातः कृतस्तु यः । एतद्दानं विशुद्ध्यर्थं गर्भकोशं ददाम्यहम् १५॥
महामूढेन यद्धेतोर्निषिक्तं परयोषिति । ततोऽनपत्यं यत्प्राप्तं तस्मान्मां मोचय प्रभो" ॥ १६ ॥
एवं कृतविधेः सूत गर्भपाताघनाशनम् । ब्राह्मणान्भोजयेत्सम्यग्गां दद्याच्च सवत्सकाम् ॥१७ ॥
सर्पिष्यात्मानमालोक्य भोजयेदिष्टबान्धवान् ॥ १८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तविंशत्यधिकसहस्रतमः ॥ १०२७ ॥

श्रीसूर्य उवाच ।

या नारी घातयेत्काचित् पुरुष प्राग्भवेऽण्डज । साऽत्र जन्मनि रोगेण शूलेनैव प्रपीडयते ॥१॥
सुवर्णदानाद्विधिवत्तथा रुद्रजपादिह । पूजनाच्छङ्करस्यापि शूलरोगात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाविंशत्यधिकसहस्रतमः ॥ १०२८ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि या ज्ञानान्नरं वै घातयेत्सुत । मित्रं च वायुरोगेण पीडयते चाऽत्र जन्मनि ॥ १ ॥
तत्र कुर्यान्महाभाग मंत्रैस्तद्वायुदैवतैः । पूजनं वायुदेवस्य गन्धपुष्पैश्च धूपकैः ॥ २ ॥
नैवेद्यैर्बहुभक्ष्यैश्च वायुर्नश्यति तत्क्षणात् । इह जन्मनि पक्षीन्द्र पूजा वित्तानुसारतः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनत्रिंशदधिकसहस्रतमः ॥ १०२९ ॥

श्रीसूर्य उवाच ।

साऽत्र जन्मनि लूताढ्या भवत्येव मयोदितम् । तीर्थस्नानव्रतादीनि फलान्यत्र हि चाण्डज ॥ १॥
ज्ञानपूर्वकृतात्पापाद्भोगादेव क्षयो भवेत् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिंशदधिकसहस्रतमः ॥ १०३० ॥

श्रीसूर्य उवाच ।

कश्चिच्छूद्रो महाभाग बभूव प्राग्भवे धनी । व्यापारनिरतो दक्षः क्रयविक्रयकर्मसु ॥ १ ॥
नीतं सर्वं रसं तेन मिलित्वा चार्द्धसीरिणाम् । कालेन तद्धृतं लोभात्स्नेहं मौल्याधिकं सुत ॥२॥
भुक्त्वा पापफलं घोरं भ्रमरत्वमुपागतः । ततः पुण्याच्छुभं भुक्त्वा पुण्याज्जातोऽत्र पर्वते ॥ ३ ॥
शूद्रः पुण्यकलायुक्तो भूमिदानात्सुरार्चनात् । स्नेहहारी यतः पूर्वं राजयक्ष्मप्रपीडितः ॥ ४ ॥
सर्वस्नेहादिदानाद्वै स्ववित्तात्तुर्यभागतः । स्वणदानात्तथा चात्र क्षयरोगात्प्रमुच्यते ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकत्रिंशदधिकसहस्रतमः ॥ १०३१ ॥

श्रीसूर्य उवाच ।

विषं दत्त्वा पतिं सूत प्राग्या जाराश्रिताऽसती । पतिघ्नी सा महादुष्टा बाल्येऽत्र विधवा सुत ॥१॥
विष्णोराराधनादत्र गङ्गाया उपसेवनात् । गतिं शुभां सा प्राप्नोति व्रतकृष्णोपसेवनात् ॥ २ ॥
धर्मादत्र महाभाग परत्र च शुभा गतिः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वात्रिंशदधिकसहस्रतमः ॥ १०३२ ॥

श्रीसूर्य उवाच ।

देवागारं दहेद्यस्तु प्राग्जन्मन्यथ पुत्रक । रक्तार्त्तिस्मररोगेण बाध्यतेऽत्रैव जन्मनि ॥ १ ॥
तद्देवदानाद्विप्राय स्थापनाद्वा विधानतः । मुच्यते पापजाद्रोगादतिसाराद्विनिश्चितम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयस्त्रिंशदधिकसहस्रतमः ॥ १०३३ ॥

श्रीसूर्य उवाच ।

पूर्द्धावसिक्तो यः कश्चिन्मथुरायामभूत्सुधीः । राजसेवी महाशूर आखेटकरतः सदा ॥ १ ॥
मृगयायां गतो दैवाद्धातिता मृगसूकराः । तत्रैका हरिणी सूत घातिता गर्भसंयुता ॥ २ ॥
गर्भाच्युतौ हतौ तत्र शुभौ द्वौ मृगशावकौ । सहायाभ्यां युतेनैव कृतं कर्म दुरात्मना ॥ ३ ॥
ताभ्यां मिलित्वा तौ भुक्तावमायां चाण्डजाधिप । सोऽपि काले महाभाग प्राप्तः शत्रुवशं पुरा॥४॥
स शौर्यकर्मणा सूत घातयित्वा रिपून्बहून् । घातितः सोऽपि बहुभिः प्रहारैरतिदारुणैः ॥ ५ ॥
संग्रामभूमौ स मृतः प्राप्तः स्वर्गपुरं तदा । भुक्त्वा नानाविधान् भोगान् स जातो ब्राह्मणोऽधुना६
देशे प्रयागनिकटे सर्वशास्त्रार्थकोविदः । जातः कर्कटगे जीवे लग्नस्थे हि महातपाः ॥ ७ ॥
धनैर्नानाविधैर्युक्तो गौराङ्गो रक्तलोचनः । शिवपूजनजात्पुण्यात् प्राक्कृतात्सकुलः सुखी ॥ ८ ॥
नानामनोरथैश्चापि पूर्णश्चात्रैव जन्मनि । राजप्रचार्यत्युग्रश्च पुण्यात्पापात्फलं शृणु ॥ ९ ॥
धूर्त्तः शठः सर्वभक्षः स्वल्पपापरतः क्वचित् । सहायलक्षणं मत्तः शृणु पुत्र यथा तथा ॥ १० ॥
याभ्यां मिलित्वा भुक्तौ द्वौ मृगशावौ खगाधिप । जातौ तस्य च तौ पुत्रौ शुभौ ज्येष्ठकनिष्ठकौ११
अपस्मारेण रोगेण मृता चात्रैव जन्मनि । एवं सन्ततिदुःखार्त्तः स विप्रो विधिवर्जनात् ॥ १२ ॥
मांसभुग्जनितात्पापात्प्रायश्चित्तं वदाम्यहम् । पूजयेच्छिवलक्षं तु तदर्द्धं वा तदर्द्धकम् ॥ १३ ॥

हिरण्मयौ तदा देयौ द्वावत्र मृगशावकौ । पूजयेत्तु तथा वायुं विधिना मृगदैवतम् ॥ १४ ॥
तन्मंत्रैर्धूपगन्धाद्यैर्नानाभक्ष्यैर्विधानतः । प्रायश्चित्तं परं तस्य पापस्य क्षयकारकम् ॥ १५ ॥
अथवा भोजयेद्विप्रान् सहस्रद्वयसंमितान् । पुत्रपौत्रविवृद्धिः स्यात्प्रायश्चित्ते कृतेऽधुना ॥ १६ ॥
प्रायश्चित्तेऽकृते त्वत्र न च पुत्रसुखं खगे । रिष्टेन मरणं चास्य वर्षे वेदाब्दकेऽण्डज ॥ १७ ॥
प्रायश्चित्ते कृते तस्य जीवनं वर्षसप्ततिम् । चैत्राष्टम्यां च निधनं शुक्लायां गरुडाग्रज ॥ १८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुस्त्रिंशदधिकसहस्रतमः ॥ १०३४ ॥

श्रीसूर्य उवाच ।

गर्भपातनपापाद्या बभूव प्राग्भवेऽण्डज । साऽत्रेयं तेन पापेन गर्भपातनदुःखिनी ॥ १ ॥
विप्रकन्याविवाहाद्वै विधिवच्चात्र जन्मनि । मुच्येत तेन पापेन गर्भस्थैर्यं भवेदिह ॥ २ ॥
अथवा पार्वतीं दद्याद्देवीं दशसुवर्णजाम् । युक्तां गणेशस्कंदाभ्यां नानाभरणभूषिताम् ॥ ३ ॥
तदर्धार्धमितां वापि पूजयित्वा विधानतः । मुच्यते पूर्वपापाच्च गर्भपातनजात् सुत ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचत्रिंशदधिकसहस्रतमः ॥ १०३५ ॥

श्रीसूर्य उवाच ।

या काचिद्घातयेन्नारी देवागारं पतत्रिण । सातिसारेण महता पीडया पीड्यतेऽधुना ॥ १ ॥
शङ्करप्रतिमादानान्मूर्त्तेर्विष्णोः प्रदानतः । न जायते महापीडा रक्तातीसारसंभवा ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्त्रिंशदधिकसहस्रतमः ॥ १०३६ ॥

श्रीसूर्य उवाच ।

ब्राह्मणः प्राग्भवे सूत तिर्यक्त्वं प्राप्य निश्चयात् । नरकान्दारुणांश्चैव पापात्तत्रैव जन्मनि ॥ १ ॥
कर्मक्षयेतिकुष्ठेन त्वस्मिन्वयसि पीडयते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्रिंशदधिकसहस्रतमः ॥ १०३७ ॥

श्रीसूर्य उवाच ।

या काचिद्घातयेन्नारी पत्युर्मित्रं च प्राग्भवे । नियतं वायुरोगेण पीडयते बहुपीडया ॥ १ ॥
पापं समीक्ष्य विप्रादेः सर्वस्वार्द्धार्धगेन च । वायुं हिरण्मयं कुर्यान्मृगं विहितलक्षणम् ॥ २ ॥
पूजयित्वा विधानेन गन्धैर्वस्त्रैर्विशेषतः । मंत्रैश्च वायुजैः सूत दद्याद्विप्राय धीमते ॥ ३ ॥
वायुरोगोपशमनं दानेनानेन जायते ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टत्रिंशदधिकसहस्रतमः ॥ १०३८ ॥

श्रीसूर्य उवाच ।

अज्ञानादथ या नारी गोत्रघातकरी पुरा । बभूव संततं चात्र लूतारोगप्रपीडिता ॥ १ ॥
श्रवणादितिहासानां प्राजापत्यव्रतात्सुत । लूतारोगं न पश्येत सात्र जन्मनि चाण्डज ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकोनचत्वारिंशदधिकसहस्रतमः ॥ १०३९ ॥

अरुण उवाच ।

भूमिदेवकुलोत्पन्नः किञ्चिद्वित्तसमन्वितः । संयुतो वायुपित्ताभ्यां नेत्रतोदशिरोर्तिमान् ॥ १ ॥
सद्वृत्तो ह्यसखी धीमान् धर्मिष्ठो धर्मवत्सलः । व्रणो रेखा शराद्वापि बाल्ये स्याद्ग्रहणीगदः ॥ २ ॥

कटिपृष्ठे व्यथा तस्य सहते नाग्निदर्शनम्। परोक्षमपवादं च स ब्रूते कारणं विना ॥ ३ ॥
तस्य प्रिया शुभाचारा सती व्रतपरायणा। काकवन्ध्या कथं जाता कस्येदं कर्मणः फलम् ॥ ४ ॥

श्रीसूर्य उवाच।

पूर्वजन्मनि वैश्या तु भार्या विप्रस्य सात्त्विकी। प्रतिवेशी तदा तस्य ब्राह्मणो ज्ञानसत्तमः ॥ ५ ॥
अजानन्वैश्यजां तस्या विवाहं स चकार ह। पतिपुत्रसुखावाप्त्यै पूजयन्ती गिरेः सुताम् ॥ ६ ॥
भोजयित्वा षोडशात्र ब्राह्मणीः पतिसंयुताः। एवं विधिं समास्थाय भोजयेद्दंपतीञ्शुभान् ॥ ७ ॥
नानाभोज्यैस्तथा पुष्पैः पक्षिभ्यो बलिमाहरेत्। दीनान्धकृपणेभ्योन्नं सर्पिष्यात्मानमीक्षयेत् ॥ ८ ॥
एतद्गौरीव्रतं नाम मार्गशीर्षे समाचरत्। एवं कृतविधेः सूत प्राप्ता सा पुत्रपौत्रकान् ॥ ९ ॥
कालधर्ममिता चात्र काकवन्ध्याऽभवत्पुनः। नारी नियमसंपूर्णा व्रतं कुर्यात्प्रयत्नतः ॥ १० ॥
सुतसौभाग्यभोगाय पतिपुत्रसुखाप्तये। ऐहिकं लक्षणं पापनारीणां चात्र जायते ॥ ११ ॥
स्वस्रा मातृष्वस्रा वापि सपत्न्या जायतेऽथ शुक्। उदरार्त्तिरसृक्स्रावः पार्श्वपादकरादिषु ॥ १२ ॥
मिथ्याभिशंसनं क्वापि वाक्यदोषधनच्युतिः। सा याति निन्दां हीनत्वं परेभ्यो मर्मतोदनम् ॥ १३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चत्वारिंशदधिकसहस्रतमः ॥ १०४० ॥

श्रीसूर्य उवाच।

घातयेद्यः पुरा नारीमज्ञानात्पूर्वजन्मनि। सोऽत्र जन्मनि जायेत कृशो बलविवर्जितः ॥ १ ॥
शर्कराधेनुदानेन दशसंख्येन चाण्डज। विमुच्यते कृशत्वाच्च शतब्राह्मणभोजनात् ॥ २ ॥
होमात्स्वस्त्ययनाज्जापाद्गायत्रीजपतोऽत्र च। तीर्थस्नानादाज्यदानाद्बली भवति नान्यथा ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकचत्वारिंशदधिकसहस्रतमः ॥ १०४१ ॥

श्रीसूर्य उवाच।

पूर्वजन्मन्यभूत्कश्चिद्बाहुजः सुकुलोद्भवः। धनधान्यसमृद्धोपि स्त्रीपुत्रसुखसंयुतः ॥ १ ॥
दत्तानि तेन दानानि ब्राह्मणेभ्यो हि शक्तितः। पर्वस्वपि च सततं गोभूम्यश्वादिकानि च ॥ २ ॥
अथो भाविबलात्सूत ब्राह्मणेन तपस्विना। तद्गृहे स्थापितं द्रव्यं घटे ताम्रमये स्थितम् ॥ ३ ॥
पुनर्दत्तं न तत्तस्मै लोभोपहतचेतसा। स्त्रीपुत्राभ्यां मिलित्वा तु तद्धनं भक्षितं पुरा ॥ ४ ॥
एवं किञ्चिद्गते काले प्राप्य धर्मपुरं प्रति। भुक्त्वा तत्पापजं कर्म शुभं तत्पूर्वदानतः ॥ ५ ॥
क्षेत्रमृत्युप्रभावाच्च गतिर्जाता द्विजस्य तु। स तथेरावतीचन्द्रभागान्ते त्वग्रजन्मनि ॥ ६ ॥
गौरो बुद्ध्यधिकः सौम्यः प्रधानपुरुषान्वितः। वाचा मधुरया युक्तो यशस्वी धर्मसंयुतः ॥ ७ ॥
भृत्यस्त्रीविविधैश्वर्यसुखभोगसमन्वितः। सर्वोपकारकुशला धीरो मित्रसभाकुलः ॥ ८ ॥
सर्वं पुण्यप्रभावेण शृणु पापफलान्यतः। मात्सर्यलोभमोहाढ्यः क्वचित्पापरतस्तथा ॥ ९ ॥
धूर्त्तः शठो महोद्विग्नः स्वाचारकुशलः क्षमी। नातिवित्तयुतः स्थैर्यः सकन्यो विभ्रमाकुलः ॥ १० ॥
ब्रह्मस्वभक्षणात्पापात्प्रागत्र ह्यनपत्यकः। चिह्नं लग्नं घटाध्यक्षः शनेः पुत्रेऽत्र जन्मनि ॥ ११ ॥
सहायलक्षणं सर्वं वक्ष्याम्यथ खगेश्वर। स्त्रीपुत्राभ्यां पुरा यस्माद्भक्षितं तद्धनं बहु ॥ १२ ॥
पुत्रनाशो महद्दुःखं पुत्रे यून्यत्र जन्मनि। लक्षणैरेभिराढ्यस्य शृणु पापविशोधनम् ॥ १३ ॥
पलैः शतमितैः कुर्यात्कुंभं ताम्रस्य यत्नतः। सुवर्णाष्टयुतं साज्यं त्वर्धं वा रत्नसंयुतम् ॥ १४ ॥
श्रेष्ठं वित्तषडंशेन त्रिषु वित्तानुसारतः। सूर्यभक्ताय वै दद्यान्मंत्रेणानेन धीयुतः ॥ १५ ॥
"यद्भुक्तं ब्राह्मणद्रव्यमज्ञानात्पूर्वजन्मनि। तद्ददामि घटं स्वर्णं विप्रद्रव्याघनाशनम्" ॥ १६ ॥

इत्युच्चार्य नरो दद्यात्सर्वपापात्प्रमुच्यते । लक्ष्मीनारायणं तद्वत्सौवर्णं त्रिपलात्मकम् ॥ १७ ॥
जपेत् त्रिंशत्सहस्राणि गायत्रीं यत्नतः शुभाम्।भोजयेच्च द्विजान् शक्त्या गां दद्यात्कपिलां तथा१८
सूर्यव्रतं तदा कुर्यात्पुत्रपौत्रविवर्द्धनम् । य एवं कुरुते पूर्णं प्रायश्चित्तं प्रयत्नतः ॥ १९ ॥
तस्य पुत्रविवृद्धिः स्यादत्र जन्मनि न क्षयः । वयस्यन्ते महाभाग धनैश्वर्यसुखान्वितः ॥ २० ॥
प्रायश्चित्तेऽकृते सूत न भविष्यन्ति तत्सुताः ।:षट्पष्टयैकोनषष्टिवर्षं रिष्टं चाकृतनिष्कृतेः ॥ २१ ॥
अष्टसप्ततिवर्षांतमायुरत्रैव जन्मनि । तीर्थमृत्युप्रभावाच्च मुक्तिर्जन्मत्रयेण्डज ॥ २२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽद्विचत्वारिंशदधिकसहस्रतमः ॥ १०४२ ॥

श्रीसूर्य उवाच ।

वातूल लक्षणाढ्यस्य प्रायश्चित्तं वदाम्यहम् । पलैर्दशमितैः कार्या ब्राह्मणी च हिरण्मयी ॥ १ ॥
पत्रे लेख्या शुभाकारा तदर्द्धमितिकाथवा । पूजयित्वा तु गन्धाद्यैरिमं मंत्रमुदीरयेत् ॥ २ ॥

मंत्रः ।

"अज्ञानाद्यदि वा ज्ञानात्पूर्वे वा घातिता मया ।ददाम्यहं द्विजां रौक्मीं हर पापं मम त्वरा"॥३॥
सा च देया विधिज्ञाय पूर्वपापापनुत्तये । तथा वेदमितैः स्वर्णैर्देयस्तत्र प्रजापतिः ॥ ४ ॥
शिवस्तु तन्मितः कार्यो मंत्रैश्चापि विशेषतः । तदोपशमनायैव देयस्तत्र द्विजातये ॥ ५ ॥
देवौ तु तन्मितौ कार्यौ सूर्यविष्णू हिरण्मयौ । वेदस्वर्णमिताः कार्या वातज्वरकफाभिधाः ॥ ६ ॥
स्वस्वाकारसमायुक्ता मंत्रैरावर्त्तनादिकैः । हेरंबो वेदमाषश्च देयस्तद्दोषशान्तये ॥ ७ ॥
गायत्र्यष्टसहस्रं तु त्र्यम्बकं तन्मितं तथा । अष्टाक्षरं त्रिसाहस्रं कमलोत्थाष्टकं तथा ॥ ८ ॥
होमयेत्तद्दशांशेन मध्वाज्यतिलसर्षपः । होमान्ते दक्षिणां दद्यात्सर्वकामफलप्रदाम् ॥ ९ ॥
हिरण्मयीं तु पक्षीन्द्र यथावित्तानुसारतः । ब्राह्मणान् भोजयेत्पश्चाद्विविधान्नैः सुपूजितान् ॥१०॥
शिवभक्तांस्तथा शान्तान्स्वयं भुञ्जीत वाग्यतः । य एवं कुरुते शक्त्या पूर्वपापविमोचनम् ॥ ११ ॥
न तस्य दुरितं किंचिज्जन्मन्यत्र प्रजायते । नाधयो व्याधयस्तस्य न च शत्रुभयं भवेत् ॥ १२ ॥
रोगानत्र न पश्येत्तु कृते प्राक्पापशोधने । बहुपुत्रसुखं लेभे स्त्रीरिष्टं नैव पश्यति ॥ १३ ॥
अष्टसप्तमितं चायुः कृतनिष्कृतिकस्य च । चत्वारिंशन्मिते रिष्टं पुंसश्चाकृतनिष्कृतेः ॥ १४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिचत्वारिंशदधिकसहस्रतमः ॥ १०४३ ॥

श्रीसूर्य उवाच ।

कश्चिदासीन्महाभाग कलिङ्गे बाहुजः पुरा । आधिव्याधियुतः सोऽपि विप्रद्रव्यापहारकः ॥ १ ॥
प्रायश्चित्तं ह्यभूत्तस्य काशीवासात्तथाण्डज । शिवपूजनदानाच्च देवतानां च पूजनात् ॥ २ ॥
प्रायश्चित्तं परं तत्तु सर्वपापप्रणाशनम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुश्चत्वारिंशदधिकसहस्रतमः ॥ १०४४ ॥

श्रीसूर्य उवाच ।

काचिदासीन्महाभाग बाहुजा पतिवल्लभा । धनपुत्ररता साध्वी देशे सिंहलके पुरा ॥ १ ॥
साऽददत्तत्र दानानि नारी भर्तृसहायतः । पञ्चपर्वसु विप्रेभ्यो गोभूम्यश्वासनादिकम् ॥ २ ॥
सुवर्णं तिलपात्राणि नानापट्टाम्बराणि च । भक्ष्यभोज्यानि चान्नानि विविधानि फलानि च ३
तया कृतं च विधिना विभूतिद्वादशीव्रतम् । कार्त्तिके शुक्लपक्षादौ विष्णोः सांवत्सरं महत् ॥४॥

ईर्ष्यया यत्कृतं पूर्वं तत्कृतं च तया सुत । तयोक्तं कृतवान्सर्वं राजमंत्री च तत्पतिः ॥ ५ ॥
अथ सापत्नरोषाच्च घोरं पापमुपार्जितम् । अपापायास्तया तस्याः कृतं गर्भस्य नाशनम् ॥६॥
विविधैरौषधैरुग्रैः सर्वं पतिबलात् सुत । सा मृता तेन दुःखेन गर्भपातेन चाण्डज ॥ ७ ॥
स्वभर्तृसुखलोभार्थं यच्चावद्यमर्जितम् । परलोकं ततः प्राप्य भुक्त्वाऽशुभशुभं फलम् ॥ ८ ॥
विभूतिद्वादशीपुण्याज्जातौ राजकुले च तौ । सेयं स्वसभवा नारी तस्मै दत्ता च भूपतेः ॥ ९ ॥
गौरी मध्यस्वरूपाढ्या स्थूणा सत्पौत्रसंयुता । यशस्विनी कीर्तियुता बहुदानरता सती ॥१०॥
मुख्या नृपाङ्गना लोके सुखैश्वर्यसमाकुला । विख्याता धर्मतश्चात्र धनवाहनभागिनी ॥ ११ ॥
धर्मादिदं तथा पापाल्लोभाद्यानृतभाषिणी । क्रूरा पापरता क्वापि प्रजापीडनतत्परा ॥ १२ ॥
महानृपाश्रितभयैः क्लेशैर्दुःखैर्महाव्ययैः । प्रपीडिता यूनि रोगैर्वातपित्तादिसंभवैः ॥ १३ ॥
आद्यंते सुखयुक्तापि युवभावेऽतिदुःखिता । प्राक्कृताद्गर्भपाताच्च स्त्रीघाताच्चाप्यपुत्रका ॥ १४ ॥
एकोनत्रिंशदब्दात्तु यावद्वर्षाष्टकं सुत । भर्तुरिष्टं विजानीयात्तत्सहायादिदं फलम् ॥ १५ ॥
लक्षणैरेभिराढ्या च शृणु तत्पापशोधनम् । कारयेद्वायुजां सूत पलैर्दशमितां शुभाम् ॥ १६ ॥
तदर्धार्धमितां वापि त्रिषु वितानुसारतः । पत्रे हिरण्मये लेख्यां सर्वाभरणभूषिताम् ॥ १७ ॥
संपूज्य गन्धपुष्पाद्यैर्विधिज्ञाय निवेदयेत् । पलाष्टकमितं तद्वद्ब्रह्माणं कारयेद्बुधः ॥ १८ ॥
सौवर्णं च शुभाकारं पूर्वपापप्रणाशनम् । तं दद्याद्विदुषे स्त्रीवधान्मुच्यते ध्रुवम् ॥ १९ ॥
लक्ष्मीनारायणं वापि रुद्रं तद्वद्विधानतः । समुल्लिख्याथ सौवर्णे पत्रेष्टपलसंमिते ॥ २० ॥
स्त्रीपुत्रसहितं देवं दद्याद्विप्राय धीमते । चतुःपलैर्विघ्नराजं सौवर्णं कारयेच्छुभम् ॥ २१ ॥
तद्वद्रविं तथा वायुं समुल्लिख्य विधानतः । बालं च तन्मितं हैमं पूजयित्वा विधानतः ॥ २२ ॥
पूर्वपापविशुद्ध्यर्थं ब्राह्मणेभ्यो निवेदयेत् । अष्टादशसहस्रं तु मंत्रमष्टाक्षरं जपेत् ॥ २३ ॥
गायत्रीं तन्मितां सूत तथा मृत्युञ्जयं जपेत् । वायुब्रह्मगणेशार्कमंत्रान्पापहराञ्छुभान् ॥ २४ ॥
एकादशसहस्राणि चैकैकस्य जपेद्बुधः । होमयेदयुतं तद्वत्तथा विप्रांश्च भोजयेत् ॥ २५ ॥
य एवं कुरुते यत्नात्पूर्वपापविशोधनम् । न चारिष्टभयं तस्य नाधिव्याधिभयं क्वचित् ॥ २६ ॥
कुशप्रतिमितायुः स्यात्पूर्वपापविशोधनात् । त्रिपञ्चाशन्मिते वर्षे रिष्टं चाकृतनिष्कृतेः ॥ २७ ॥
त्रिषष्टिमितके वापि नात्र कार्या विचारणा । शरीरारोग्यमतुलं महदैश्वर्यमाप्नुयात् ॥ २८ ॥
स्वर्गलोके गतिस्तस्य प्रायश्चित्ते कृतेऽधुना । न करोति यदा लोभात्प्रायश्चित्तं प्रयत्नतः ॥२९॥
इह कष्टं भजेन्नित्यं न च सद्गतिमाप्नुयात् । कीटे जले शनौ याता निर्याणं मेषराशिके ॥ ३० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचचत्वारिंशदधिकसहस्रतमः ॥ १०४५ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यसौ शूद्रो व्यापारकुशलो महान् । धनवान्यसमायुक्तो ब्राह्मणातिथिपूजकः ॥ १ ॥
अथ पापं कृतं तेन नानादोषसमुद्भवैः । क्लेशैर्भयैर्मनोदुःखैः क्वचित् क्षीणकलेवरः ॥ २ ॥
स्वज्ञातीनां वीर्यदानाद्बुध्ये चिह्नं महाव्रणम् । लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥ ३ ॥
ब्रह्मणः कारयेल्लेख्यं पलैः पञ्चमितैर्विभुम् । हिरण्मयं यथाकारं सपत्नीकं प्रयत्नतः ॥ ४ ॥
तदर्धार्धमितं वापि त्रिषु वित्तानुसारतः । इमं मंत्रं समुच्चार्य दद्याद्विप्राय धीमते ॥ ५ ॥

मंत्रः ।

"पितामह महाप्राज्ञ सृष्टेरुत्पत्तिकारण । पूर्वपापविनाशाय ददामि त्वां हिरण्मयम् ॥ ६ ॥

रोगंविनाशय क्षिप्रं तज्जं गुह्योद्भवं महत्।'' संपूज्य गन्धपुष्पाद्यैर्विधिज्ञाय प्रदापयेत् ॥ ७ ॥
तथा पञ्चमितैर्मापैः स्त्रीं कुर्याद्गर्भसंयुताम् । लेख्या हिरण्मये पत्रे गन्धपुष्पैः सुपूजिता ॥ ८ ॥
ब्राह्मणाय च सा देया पूर्वपापापनुत्तये । तथा वेदमितैर्माषैः सौवर्णी प्रतिमा शुभा ॥ ९ ॥
वायोः कार्या शुभाऽलेख्या सा च देया कुटुम्बिने । पात्रं ताम्रमयं पुत्र घृतपूर्णं सदक्षिणम् १०॥
सर्वरत्नसमायुक्तं पट्टवस्त्रेण वेष्टितम् । प्रीत्यै सूर्यादिखेटानां दद्याद्दोषोपशान्तये ॥ ११ ॥
गायत्र्यष्टसहस्रं च जपेदष्टाक्षरं तथा । त्र्यंबकं तु सहस्रैकं ब्रह्मैतद्द्विगुणं तथा ॥ १२ ॥
होमयेत्तद्दशांशेन शक्त्या विप्रांश्च भोजयेत् । य एवं कुरुते सूत विधिना पापशोधनम् ॥ १३ ॥
प्राग्जन्मजान्महापापाद्व्यभिचारसमुद्भवात् । मुच्यते नात्र सन्देहो गोत्रजाच्चापि पातकात्॥१४॥
पुत्रसन्ततिवृद्धिः स्यात्प्रायश्चित्ते कृते त्विह । सप्तसप्ततिवर्षान्तं जीवनं कथितं त्विह ॥ १५ ॥
नैवं करोति यो मोहात्प्रायश्चित्तं प्रयत्नतः । तस्य रोगविवृद्धिः स्याद्वेदपंचाशदब्दके ॥ १६ ॥
स्वरिष्टं पुत्ररिष्टं वा नात्र कार्या विचारणा ॥ १७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्चत्वारिंशदधिकसहस्रतमः ॥ १०४६ ॥

अरुण उवाच ।

कन्याप्रजो ह्यप्रजश्च नानादुःखसमन्वितः । केन कर्मविपाकेन सत्यं वद दिवस्पते ॥ १ ॥

श्रीसूर्य उवाच ।

पूर्वं क्षात्रसमुत्पन्नः किंचिद्भूमिपतिस्तथा । अस्मिञ्जन्मनि वैश्यस्तु परवित्तापहारकः ॥ २ ॥
दूतिकाकर्मनिरतो नानालोभचयान्वितः । ग्रामाधीशोऽभवत्सोपि सर्वं तेन च चोरितम् ॥ ३ ॥
एको ग्रामेऽवसद्विप्रः क्षान्तो दान्तः क्षमी सदा । पुत्राः पञ्च मृतास्तस्य चापुत्रो वित्तसंयुतः॥४॥
कालेनैव मृतो विप्रो हृतं तेन धनं महत् । मिथ्याभिशंसनैर्वाक्यैः क्रोधात्ताडनतर्जनैः ॥ ५ ॥
अपुत्रश्च मृतो विप्रो सर्वस्वं नीतवान्वणिक् । निराधारा सुता जाता न कृतं द्विजभोजनम् ॥ ६ ॥
वृथा कर्म कृतं नैव सर्वं राज्ञा हृतं च तत् । एवं कृतापराधोऽसौ क्षत्रदूतीसहायवान् ॥ ७ ॥
मार्गेनैकेन पान्थानां वसु मुष्णन् द्विजाधमः । म्लेच्छैर्विनिहतो मार्गे गतोऽसौ यमशासनम्॥८॥
केचित्केचिद्विपच्यन्ते नरके भृशदारुणे । दानधर्मादिना कश्चिदिह जन्मनि मानद ॥ ९ ॥
विप्रवंशे समुत्पन्नो जायते चेह जन्मनि । इदं तु द्वितीयं जन्म विप्रियं जायते भुवि ॥ १० ॥
पूर्वकर्मविपाकेन कन्यापत्यं प्रजायते । ब्रह्मस्वहरणाच्चैव मृतपुत्रः प्रजायते ॥ ११ ॥
नानापत्यानि पच्यन्ते नानाकर्मसमुद्भवः । पुराकृतानि कर्माणि भुज्यन्ते जन्मजन्मनि ॥ १२ ॥

अरुण उवाच ।

प्रायश्चित्तं वद स्वामिन्येन पुत्रस्थिरो भवेत् । कन्यापत्यप्रशमनं बहुपुत्रः प्रजायते ॥ १३ ॥

श्रीसूर्य उवाच ।

स शुभे भूमिदेशे तु गोमयाद्युपलिप्तके । तत्रोपर्याविकं स्तीर्यमथवा चाजिनं शुभम् ॥ १४ ॥
छादयेच्छुभ्रवस्त्रेण तण्डुलद्रोणपर्वतम् । तत्रोपरि न्यसेत्पात्रं ताम्रं दशपलात्मकम् ॥ १५ ॥
स्थापयेत्काश्यपीं मूर्त्तिं सौवर्णीं शुभलक्षणाम् । मुक्तायज्ञोपवीताढ्यां निष्कसौवर्णनिर्मिताम् १६॥
दधानां करयुग्मेन चाक्षमालाकमण्डलू । कश्यपाद्वामभागे च त्वदितिं विश्वमातरम् ॥ १७ ॥
सौवर्णीं स्थापयेत्सूत सुवर्णद्वयनिर्मिताम् । आसने वै समास्थाय तत्र द्रोणादिशंदिशम् ॥ १८ ॥
हारकेयूरमुकुटं कुण्डलाभरणान्वितम् । एवं तौ दंपती सम्यगर्पयेत्पर्वतोपरि ॥ १९ ॥

कृत्वा प्रतिष्ठितप्राणां पूजयेद्विविधैर्गुणैः । नानार्घफलदानैश्च नानाकुसुमपूजनैः ॥ २० ॥
अभ्यर्च्य दंपती तौ तु मंत्रमेनमुदीरयेत् । "मया वै पूर्वजन्मापि विप्राणां यद्धृतं धनम् ॥ २१ ॥
दृतिकाकर्मनिरतो वाक्यदोषादि यत्कृतम् । क्षम्यतां देव तत्सर्वं तव मूर्त्तिं ददाम्यहम्" ॥ २२ ॥
अदितिं च प्रणम्याथ कृतांजलिरिदं ब्रुवन् । "अदिते विश्वमातस्त्वं शरण्ये शरणार्थिनम् ॥ २३ ॥
प्रजादुःखौघसंतप्तहृदयं मामिहेश्वरि । संप्रणाशाय दुःखस्य प्रजां देहि यशस्विनीम्" ॥ २४ ॥
एवं कृतविधिः सम्यग् ब्राह्मणान्भोजयेत्ततः । शालग्रामशिलां शुद्धां सोमकान्तमणिं तथा॥२५॥
चन्द्रसूर्योपरागे तु ब्राह्मणाय समर्पयेत् । एवं कृतविधिः सूत कृष्णां गां दापयेत्ततः ॥ २६ ॥
सर्पिष्यात्मानमालोक्य भोजयेच्च समृद्धिभिः । ऐहिकं लक्षणं तस्य शरीरेप्युपजायते ॥ २७ ॥
काष्ठलोष्टादिशस्त्राद्यैः कपालादौ व्रणो भवेत् ॥ २८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तचत्वारिंशदधिकसहस्रतमः ॥ १०४७ ॥

श्रीसूर्य उवाच ।

राजानं घातयेद्यस्तु पुरुषः प्राग्भवेण्डज । स राजयक्ष्मरोगेण युक्तः स्यादत्र जन्मनि ॥ १ ॥
अस्मिन्वयसि पक्षीन्द्र सोऽपि प्राणैर्वियुज्यते । महापापोद्भवाद्रोगान्न चोक्तं विन्मयं मया ॥ २ ॥
अपि ज्ञानकृतात्पापाद्दृढरूपेण काश्यप । नाशयत्यमरं सिद्धं पूर्णांशमपि च ध्रुवम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टचत्वारिंशदधिकसहस्रतमः ॥ १०४८ ॥

श्रीसूर्य उवाच ।

ब्राह्मणोऽभूत् कुरुक्षेत्रे कृषिकृद्वेदपारगः । स्वज्ञातीयस्य लोभेन वृत्तिलोपं चकार सः ॥ १ ॥
तत्संबन्धादभूद्युद्धं द्वयोरेको मृतस्तदा । वृत्तिलोभाद्द्विजः काले गतो हि यमशासनम् ॥ २ ॥
भुक्त्वा तत्पापजं सर्वं शतद्वुनिकटेऽधुना । सोपि जातो द्विजश्रेष्ठ वेदाभ्यासाच्च पुत्रक ॥ ३ ॥
कुष्ठक्षयान्वितश्चात्र युवभावे पतत्रिण । तत्पापनाशनं सर्वं प्रायश्चित्तं वदाम्यहम् ॥ ४ ॥
वेदाभ्यासान्महापुण्यात् सावित्रीजपतस्तथा । गङ्गायां वसतेः सर्वात्पूर्वपापात्प्रमुच्यते ॥ ५ ॥
न कुष्ठवृद्धिरत्रास्ति तत्कृतं शमनं भवेत् । जीवेत्षष्टिमिताब्दान्तं रिष्टं चैव प्रशाम्यति ॥ ६ ॥
गतिस्तस्य महाभाग वेदाभ्यासाद्यथा तथा । भविष्यति शुभा लोके परत्र च खगेश्वर ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनपंचाशदधिकसहस्रतमः ॥ १०४९ ॥

श्रीसूर्य उवाच ।

कुलद्वयानन्दकरी पूर्वजन्मनि वैश्यजा । बभूव भर्तृसुहृदां वाक्यपालनतत्परा ॥ १ ॥
अत्र जन्मनि सा विप्रा काश्यां जाता हि सुव्रत । व्रतदानपरा सापि भर्तृतोषणसंयुता ॥ २ ॥
पञ्चपञ्चाशदब्दान्ते प्रवेक्ष्यत्यत्र जन्मनि । स्वर्गकामा चिताग्नौ तु नात्र कार्या विचारणा ॥ ३ ॥
सा गमिष्यति वै स्वर्गं चान्यजन्मनि वै सती । भविष्यति महाराजकुले राजातिधार्मिकः ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाशदधिकसहस्रतमः ॥ १०५० ॥

श्रीसूर्य उवाच ।

पीड्यते वातरोगेण दारुणेन पतत्रिण । पूर्वजन्मनि योऽजस्रं भवेच्छूद्रगृहाश्रितः ॥ १ ॥

प्रायश्चित्तं परं तस्य व्रतं चान्द्रायणं चरेत् । व्रतान्ते कपिलां दद्यात् सर्वपापापनुत्तये ॥ २ ॥
सर्वं पापं क्षयं याति रोगस्तत्पापजोऽपि च ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनपंचाशदधिकसहस्रतमः ॥ १०९१ ॥

श्रीसूर्य उवाच ।

स्वगर्भं पातयेत्पूर्वं या नारी पापमोहिता । जलोदरकृता पीडा जायते त्वत्र जन्मनि ॥ १ ॥
रजतस्वर्णताम्राणां दानाद्रोगविनाशनम् । जलधेनुप्रदानेन तथैव विनतासुत ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विपंचाशदधिकसहस्रतमः ॥ १०९२ ॥

श्रीसूर्य उवाच ।

अस्त्यत्र सुमुखी सूत सदा भर्तृपरायणा । दानधर्मरता भव्या सुभगा पुत्रवर्जिता ॥ १ ॥
पूर्वमासीच्च सुभगा सगर्भा फललालसा । त्रोटित्यान्यफलं पक्वं भक्ष्यार्थं चौर्यकर्मणा ॥ २ ॥
तेन कर्मविपाकेन फलहीनात्र जन्मनि । भवन्ति खलु ये पुत्रा अर्वाक्पर्याष्टितोऽण्डज ॥ ३ ॥
पञ्चत्वमाप्नुवंत्यत्र यस्मादकृतनिष्कृतेः । निष्कृतिं तत्प्रवक्ष्यामि पूर्वपापप्रणाशिनीम् ॥ ४ ॥
रविवारेण्डजश्रेष्ठ निमंत्र्याश्वत्थकं सुत । तत्तले ब्राह्मणान् सूर्यदिने षष्ठ्यां तु भोजयेत् ॥ ५ ॥
नानाफलैस्तथा पक्वैर्मधुरै रससंयुतैः । फलानि विकिरेत्तत्र कृत्वाश्वत्थप्रदक्षिणाम् ॥ ६ ॥
पूजयेत्तं महाभाग जीवेत्तस्याश्च वै सुतः ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिपंचाशदधिकसहस्रतमः ॥ १०९३ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि या नारी घातयेद्ब्राह्मणं सुत । सात्र जन्मनि कुष्ठेन रोगेणैव प्रपीडिता ॥ १ ॥
जायते म्रियते सा च गलत्कुष्ठेन चाण्डज । पापाज्ज्ञानकृतात्पूर्वान्न चोक्तं विन्मयं मया ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःपंचाशदधिकसहस्रतमः ॥ १०९४ ॥

श्रीसूर्य उवाच ।

देशे हि यामुनेऽप्यासीत् पूर्वं वाहुजसंज्ञकः । गङ्गास्नानं कृतं पूर्वं वाहुजानां सहायतः ॥ १ ॥
शकटेन कुटुम्बस्य पालनं तेन जानता । एकस्मिन्वै दिने गत्वा ददाह परसद्द्रुमम् ॥ २ ॥
बलं दैवस्यसंप्राप्तो जीवा दाहान्महाकुलाः । वन्धोः सहायतस्तत्र कृतं कर्मातिदारुणम् ॥ ३ ॥
शुभाच्छुभफलं भुक्त्वा पापाच्च नरकांस्तथा । माघे तु जाह्नवीस्नानात्स जातः शूद्रसत्कुले ॥ ४॥
विपाशानिकटे देशे योजने सप्तसंमिते । भव्यो महोद्यमी गौरः कृशाङ्गो लोचनेऽल्पदृक् ॥ ५ ॥
बहुलोभी वहुस्त्रीको देवतातिथिपूजकः । मातृहीनः शठो धूर्त्तः पुत्रसन्ततिवर्जितः ॥ ६ ॥
पञ्चमे भवने राहुर्भौमयुक्तोल्पसन्ततिः । लक्षणैर्लक्षितश्चोक्तैरवेहि गरुडाग्रज ॥ ७ ॥
वन्धोः सहायतः पापात्पूर्वजन्मसमुद्भवात् । तस्माद्भ्राता पुत्रहीनो जायतेऽत्रैव जन्मनि ॥ ८ ॥

अरुण उवाच ।

विन्मयं कथ्यतां देव सुतसौख्यविवर्द्धनम् । सर्वपापप्रशमनं लोकानां हितकारणम् ॥ ९ ॥

श्रीसूर्य उवाच ।

विन्मयं तत्प्रवक्ष्यामि जन्तुदाहविनाशनम् । वनदेवी तथा कार्या पलेनार्धपलेन वा ॥ १० ॥
हिरण्मयी तदा लेख्या पत्रे च चतुरस्रके । वनजीवास्तथा लेख्याः सर्वे तद्रूपसंज्ञकाः ॥ ११ ॥

प्रजापतिस्तथा कार्यो मापत्रयविनिर्मितः। राजतं पलमेकं तु गणाध्यक्षं शिवात्मजम् ॥ १२ ॥
संपूज्य गन्धपुष्पाद्यैः साधयेत्कार्यसाधिनीम्। देया वेदविधिज्ञाय सर्वपापापनुत्तये ॥ १३ ॥
प्रतिरूपस्तथा देयः सर्वकल्मषनाशनः। शृणुयाद्भारतं वापि नारायणसुभाषितम् ॥ १४ ॥
अष्टाक्षरं तथा मंत्रं जपेच्च विधिपूर्वकम्। दशायुतं तदर्धं वा होमयेत्तद्दशांशतः ॥ १५ ॥
तावन्मितं सूर्यमंत्रं विधिवत्प्रजपेत्ततः। विप्रेभ्यो दक्षिणां दद्यात्तस्मात्पापात्प्रमुच्यते ॥ १६ ॥
य एवं कुरुते सूत पूर्वपापप्रणाशनम्। तस्यापूर्वविवृद्धिः स्यादिह जन्मनि वै ध्रुवम् ॥ १७ ॥
अकृते तु यथाशक्ति रिष्टं षट्पञ्चकेब्दके। प्रायश्चित्ते कृते सूत जीवनं वर्षसप्ततिम् ॥ १८ ॥
जन्मादिमरणांतं हि स्वल्पमेवात्र सूचितम् ॥ १९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचपंचाशदधिकसहस्रतमः ॥ १०९५ ॥

श्रीसूर्य उवाच।

परान्नं या हरेन्नारी पूर्वजन्मनि सुव्रत। सात्राजीर्णेन रोगेण दुःखिता जायते ध्रुवम् ॥ १ ॥
कुर्यान्नानाविधं चान्नं रसैः सर्वैः समन्वितम्। विप्रेभ्यो भोजनं दद्याच्छक्त्या दद्याच्च दक्षिणाम् २॥
होमयेच्च तथा चान्नान् गायत्र्या त्र्यम्बकेण तु। मुच्यते जीर्णरोगाच्च पूर्वपापाच्च पुत्रक ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्पंचाशदधिकसहस्रतमः ॥ १०९६ ॥

श्रीसूर्य उवाच

देवमूर्तिं च यः कश्चिद्देवागारे स्थितां सुत। भग्नां कुर्यान्नरो मोहात् परेण स्थापितां पुरा ॥ १ ॥
अप्रतिष्ठो भवेदत्र जन्मन्यथ खगाधिप। वर्षत्रयं तदाश्वत्थपूजनात्पापनाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तपंचाशदधिकसहस्रतमः ॥ १०९७ ॥

श्रीसूर्य उवाच।

यश्चाचरेद्ब्राङ्नृवधं मोहात्पूर्वभवे नरः। प्रायश्चित्तं महाभाग शृणु चात्र प्रयत्नतः ॥ १ ॥
गोभूहिरण्यमिष्टान्नतिलवस्त्रान्नदानतः। घृतधेनुप्रदानेन क्षयरोगः प्रणश्यति ॥ २ ॥
दानं यथानुमानेन सर्वस्वार्धार्द्धमेव च। देयं द्विजवधादौ तु विचार्यात्र प्रयत्नतः ॥ ३ ॥
तत्क्षणे काश्यपेयात्र क्षयरोगः प्रशाम्यति। रिष्टस्य च विनाशः स्यान्नास्य चाकृतनिष्कृतेः॥४॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टपंचाशदधिकसहस्रतमः ॥ १०९८ ॥

श्रीसूर्य उवाच।

या नारी घातयेत्काचित्परगर्भं पतत्रिण। जलोदरेण रोगेण पीड्यते चात्र जन्मनि ॥ १ ॥
गङ्गास्नानेन सततं विधिनार्के मृगस्थिते। तथा तज्जलपानेन तस्मात्पापात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकोनषष्ट्यधिकसहस्रतमः ॥ १०९९ ॥

श्रीसूर्य उवाच।

वाग्विरोधी भवेद्यश्च पूर्वजन्मनि वादिनः। सोऽत्र जन्मनि मूकत्वं भजत्येव न संशयः ॥ १ ॥
मोहादिदं चरेत्सूत देयं दानं द्विजातये। वेदानां पुस्तकं रम्यं पूजयित्वा विधानतः ॥ २ ॥
संघातबन्धने शुद्धैः क्षौमजैर्गरुडाग्रज। तत्पापनाशनं सर्वं प्राग्जं प्रोक्तं परन्तप ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षष्ट्यधिकसहस्रतमः ॥ १०९० ॥

श्रीसूर्य उवाच ।

अत्र जन्मन्यसौ वन्ध्या प्राग्भवेह्यभवत्सुत । यानयोधस्य सुमुखी धनभर्तृसमन्विता ॥ १ ॥
पूर्वपापप्रभावेन सपत्न्या गर्भनाशनात् । जातेयं पादजाऽत्रैव दुःखार्त्ता सुतवर्जिता ॥ २ ॥
प्रायश्चित्तं प्रवक्ष्यामि सर्वपापप्रणोदनम् । काश्यां गत्वा तु विधिना शिवमभ्यर्च्य शक्तितः ॥३॥
व्रतैर्दानैर्महापुण्यैर्नानाविभवविस्तरैः । शिवरात्रौ ततः पश्चाद्दीपमाला दिनेऽण्डज ॥ ४ ॥
अर्धरात्रे च माध्यां वा माघे स्नानं तु कारयेत् । मंत्रैर्वरुणसूक्तैश्च नौकायां च पतत्रिण ॥ ५ ॥
य एवं कुरुते सम्यक् तस्याः स्यात्सन्ततिर्ध्रुवम् ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकषष्ट्यधिकसहस्रतमः ॥ १०६१ ॥

श्रीसूर्य उवाच ।

परनिन्दां तु यः कश्चित्प्राग्भवे विनतासुत । कुर्याद्दुर्मतिमापन्नः खल्वाटो जायतेऽधुना ॥ १ ॥
दद्यात्स कपिलां धेनुं सर्वोपस्करसंयुताम् । ब्राह्मणाय दरिद्राय तस्माद्दोषात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विषष्ट्यधिकसहस्रतमः ॥ १०६२ ॥

श्रीसूर्य उवाच ।

या काचित्प्राग्भवे नारी कुर्याद्राजवधं सुत । सात्र जन्मनि तत्काले क्षयरोगेण पीडिता ॥ १ ॥
यक्ष्मणात्र क्षयं यान्ति धातवः सर्वदेहिनाम् । धातुक्षये क्षयं याति तच्छरीरमशाश्वतम् ॥ २ ॥
दृढकर्मकृतं पापं तस्माच्चोक्तं पतत्रिण । पापनाशकरं किंचिदुपायं त्वत्र जन्मनि ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिषष्ट्यधिकसहस्रतमः ॥ १०६३ ॥

श्रीसूर्य उवाच ।

या वाग्विरोधिनी नारी भर्तुः पूर्वभवे सुत । मूकत्वं जायते तस्याश्चात्र जन्मनि निश्चयात् ॥ १ ॥
तत्पापनाशनं दानं दद्याद्वेदस्य पुस्तकम् । ब्राह्मणे वेदविदुषे पूर्वपापात्प्रमुच्यते ॥ २ ॥
पूजयेच्च द्विजान् भक्त्या भोजयेद्ब्राह्मणांस्तथा ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःषष्ट्यधिकसहस्रतमः ॥ १०६४ ॥

श्रीसूर्य उवाच ।

या काचिद्भंजन कुर्यान्नारी पूर्वे भवेऽण्डज । देवागारे स्थापितायाः प्रतिमायाः परेण च ॥ १ ॥
अप्रतिष्ठान्विता सात्र जायते वै पतत्रिण । वर्षत्रयं ब्रह्मवृक्षं पूजयेत्पापनाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचषष्ट्यधिकसहस्रतमः ॥ १०६५ ॥

श्रीसूर्य उवाच ।

विधिना तत्र दत्तानि काम्यश्राद्धानि मानद । ततो भाविबलात्सूत ब्राह्मणेन तपस्विना ॥ १ ॥
स्थापितं तद्गृहे द्रव्यं लोभाद्दत्तं न तद्धनम् । सर्वैर्मिलित्वा तद्भुक्तं स्त्रीपुत्रभ्रातृभिः सह ॥ २ ॥
ततो बहुतिथे काले गतो हि यमशासनम् । शुभात्सर्वफलं भुक्तं पापाच्च नरकं भृशम् ॥ ३ ॥
पूर्वपुण्यप्रभावेण स जातोऽत्रापि वै द्विजः । मथुरामण्डले देशे रम्ये पुण्यस्थले शुभे ॥ ४ ॥
विशालाक्षो धनी मानी सुरूपोऽमितदो घृणी । बहुदेशाधिकाराढ्यः पुण्यात्सर्वं फलं त्विदम् ॥५॥
लोभी क्रूरो महाक्षुद्रः सदा चिन्तासमन्वितः । सन्तानसुखहीनस्तु सुरूपस्त्रीसुखोज्झितः ॥ ६ ॥

बन्धुहीनो व्ययी क्षीणः सर्वं तत्पापतः फलम् । वक्ष्यामि निष्कृतिं तस्य पवित्रां पापशोधिनीम् ७
कुबेरप्रतिमां रौक्मीं पञ्चस्वर्णमितां शुभाम् । लक्ष्मीनारायणं दद्यात्सुवर्णं स्वर्णनिर्मितम् ॥ ८ ॥
लेख्यं पत्रे पवित्रे च पुत्रसन्ततिवर्द्धनम् । य एवं कुरुते शक्त्या तस्यारिष्टं विनश्यति ॥ ९ ॥
प्रायश्चित्ते कृते त्वत्र चायुः सप्ततिवत्सरम् ॥ १० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्षष्ट्यधिकसहस्रतमः ॥ १०६६ ॥

अरुण उवाच ।

भूमिदेवकुलोत्पन्नो वाताधिकशरीरवान् । क्षामाङ्गः क्षीणवर्णोऽथ स्वल्पवृत्त्या च जीवनम् ॥ १ ॥
देवब्राह्मणभक्तश्च किंचिद्वादपरायणः । करे पादे कुशस्त्रेण दुष्टशृङ्गाभिघाततः ॥ २ ॥
व्रणो हि जायते दीर्घनेत्रतोदो ह्युरोव्यथा । परेषामपवादं च स ब्रूते लोकतोन्वहम् ॥ ३ ॥
प्रिया तस्य शुभाचारा पतिभक्तिपरायणा । अनृतं वै वदेत्किंचित्कार्कश्यस्य हि कारिणी ॥ ४ ॥
अपत्यानि म्रियन्ते न जातान्यपि हि कानिचित् । वर्षत्रयमिता बाला म्रियन्ते मासमीम्मताः ॥ ५ ॥
केन कर्मविपाकेन मृतापत्यत्वमेव च । उदरे हि स्थितो गर्भो न प्रसूतिर्न पातनम् ॥ ६ ॥
पृथगेवं कुभ्रातॄणां मृतापत्यं प्रजायते । गतो बहुतरः कालः कस्येदं कर्मणः फलम् ॥ ७ ॥

श्रीसूर्य उवाच ।

अतः पूर्वं वैनतेय तृतीयेऽत्रैव जन्मनि । क्षात्रे कुले समुत्पन्नः कश्चिद्भूमिपतिस्तथा ॥ ८ ॥
दानव्रतदयायुक्तः प्रजाप्रीतिः परन्तपः । तस्य चैकोऽविनीतस्तु पुत्रः परमसुन्दरः ॥ ९ ॥
द्वितीयः पादचारस्तु तृतीयश्च स्तनंधयः । गर्भयुक्तश्चतुर्थस्तु पिता मृत्युवशं गतः ॥ १० ॥
तस्यौर्ध्वदेहिकं कर्म पूर्वैर्वित्तसमं कृतम् । मासैस्त्रिभिर्व्यतिक्रान्तैर्ज्येष्ठेनैव दुरात्मना ॥ ११ ॥
निहता भ्रातरः सर्वे भाविनोर्थस्य वै बलात् । पुत्रशोकार्तया मात्रा हृदयं ताडितं भृशम् ॥ १२ ॥
अभिघातव्यथाक्रान्ता गर्भयुक्ता दिवं गता । अचिरात्तेन पापेन ज्येष्ठश्चौरेण घातितः ॥ १३ ॥
द्वितीयं जन्म चैतद्धि मृतापत्यत्वकारकम् । पुराकृतानि कर्माणि भुज्यन्ते चेह मानवैः ॥ १४ ॥

अरुण उवाच ।

प्रायश्चित्तं वद स्वामिन्येन पापक्षयो भवेत् । गर्भस्य घातनस्यापि बालव्यापादनस्य च ॥ १५ ॥

श्रीसूर्य उवाच ।

सौम्यायने तु संप्राप्ते सानुकूलग्रहे दिने । सपत्नीकः शुचिः स्नातः पञ्चगव्येन चोजसा ॥ १६ ॥
उपोषणं दिवा रात्रौ प्रातश्चानुदिते रवौ । सुरभेर्गोमयेनाथ धरणिं चोपलेपयेत् ॥ १७ ॥
सुशुभे भूप्रदेशे तु कुङ्कुमाद्युपचर्चिते । कुर्यादष्टदलं पद्मं चित्रवर्णं सुशोभनम् ॥ १८ ॥
तन्मध्ये रुक्मिणीयुक्तं माधवं कलशेऽर्चयेत् । सौवर्णे राजते पद्मे सायुधं सचतुर्भुजम् ॥ १९ ॥
उपचारैः शुभैर्गन्धैर्धूपैश्च कुसुमादिभिः । जनन्या सह संभूतः प्रद्युम्नाद्यांस्तथार्चयेत् ॥ २० ॥
चारुदेहं सुवक्त्रं च चारुगुप्तं यशोन्वितम् । इभबाहुं चारुबाहुं सुबाहुं पूजयेत् क्रमात् ॥ २१ ॥
पूजितं विष्णुसूक्तेन तथा श्रीरसकोविदैः । पुष्पचन्दनगन्धाद्यैरर्चयेद्विविधैर्गुणैः ॥ २२ ॥
तद्विप्रासोऽपि तद्विष्णोरतो देवाभिपूजयेत् । शतमष्टोत्तरं हुत्वा चरुणा पायसेन वै ॥ २३ ॥
होमान्ते विप्रभोजान्ते मंत्रमेनमुदीरयेत् । "यन्मया पापकर्माघं कृतं वै पूर्वजन्मनि ॥ २४ ॥
सपत्नीकं च जघास तथैव वरपुत्रिणीम् । स्वस्नेहभवनाद्वापि भूमिद्रव्यादिलिप्सया ॥ २५ ॥

लघूनामलघूनां च हतां वै पूर्वजन्मनि । ततोऽधत्वं मया प्राप्तं दुःखं नानाविधं त्विदम् ॥ २६ ॥
तदेनःसंविनाशाय दानं संप्रददे त्विदम् ।" स्वस्त्यस्तु चेति तत्रोक्ता कोदादिति विसर्जनम् ॥२७॥
सर्पिष्यात्मानमालोक्य भुञ्जीत सह बन्धुभिः । ऐहिकं लक्ष्म विज्ञेयं पूर्वकर्माभिशंशनम् ॥ २८॥
काष्ठलोष्टादिशस्त्राद्यैर्घातः स्याद्बालक्रीडनात् । जलादग्न्यादिघाताद्वा व्रणस्तस्य हि जायते॥२९॥
स्त्रीणामङ्गविकाराद्यं तिलव्रणरुगादिकम् । पैत्रीयमातुलान्यादिनेत्रतोदो रसाज्ञता ॥ ३० ॥
स्वसा मातृष्वसा वापि बाल्ये वैधव्यतामियात् ॥ ३१ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तषष्ट्यधिकसहस्रतमः ॥ १०६७ ॥

श्रीसूर्य उवाच ।

या प्राग्भवे महामोहात्परानिन्दां च कारयेत् । खल्वाटदग्रुजा सात्र जायतेऽत्रैव जन्मनि ॥ १ ॥
धेनुं दद्यान्महाभाग विधियुक्तां सकम्बलाम् । तस्माद्रोगाद्विमुच्येत नात्र कार्या विचारणा ॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टषष्ट्यधिकसहस्रतमः ॥ १०६८ ॥

श्रीसूर्य उवाच ।

अभक्ष्यं भक्षयेद्यस्तु पूर्वजन्मनि मानवः । गण्डमालाख्यरोगेण संयुक्तो जायते त्विह ॥ १ ॥
पुण्यदेशे महाभाग संक्रान्त्यादिषु पर्वसु । गृहीत्वा कम्बलं शुद्धं दद्यात्तद्वेदपारगे ॥ २ ॥
कुटुम्बिने दरिद्राय दद्याद्दोषापनुत्तये । गण्डमालाहरं चैतद्दानमुक्तं मया त्विह ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनसप्तत्यधिकसहस्रतमः ॥ १०६९ ॥

श्रीसूर्य उवाच ।

कुलघ्नी या महादुष्टा पूर्वमासीत् पतत्रिण । अत्र पूर्वकृतात्पुण्यान्मानुषी संकरा स्मृता ॥ १ ॥
धनपुत्रैर्विहीना सा चात्र जन्मनि दृश्यते । निष्कृतिं तत्प्रवक्ष्यामि प्रयागे मरणं सुत ॥ २ ॥
वासात्पापं क्षयं याति पूर्वजन्मकृतं दृढम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्यधिकसहस्रतमः ॥ १०७० ॥

श्रीसूर्य उवाच ।

पक्षाघातं च यः कुर्यात्सभायां ब्राह्मणस्य च । पक्षाघातेन रोगेण पीडितोऽत्रैव जायते ॥ १ ॥
भूरिभोगं विप्रतोषं दद्याद्दानं पतत्रिण ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकसप्तत्यधिकसहस्रतमः ॥ १०७१ ॥

श्रीसूर्य उवाच ।

अभक्ष्यं भक्षयेत्पूर्वं या नारी द्विजवल्लभा । गण्डमालाख्यरोगेण संयुक्ता जायते त्विह ॥ १ ॥
पुण्यदेशे महाभाग संक्रान्त्यादिषु पर्वसु । पूर्वपापहरं पुण्यं दद्यादत्र च कम्बलम् ॥ २ ॥
नवं शुद्धं कुलीनाय तस्मात्पापात्प्रमुच्यते । द्विजानामिच्छया दद्याद्भोजनं पापनाशनम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विसप्तत्यधिकसहस्रतमः ॥ १०७२ ॥

श्रीसूर्य उवाच ।

बालं जघान वै कश्चिद्ब्राह्मणस्य खगाधिप । वङ्गदेशे वसन्पूर्वं चात्र जन्मनि गौडजः ॥ १ ॥
धीरः सर्वकलाभिज्ञो नानाशास्त्रविशारदः । धनधान्ययुतश्चात्र बहुस्त्रीसुखभोगभाक् ॥ २ ॥

विद्यादानात् कृतात्पूर्वं शृणु पापफलं तथा। क्षयरोगाकुलः क्षीणः पुत्रसन्ततिवर्जितः ॥ ३ ॥
बालघातनजात्पापाद्ब्राह्मणस्य पतत्रिण। महालोभपरो मूढो नानादुःखैस्तथाकुलः ॥ ४ ॥
वक्ष्यामि निष्कृतिं तस्य ब्रह्मघातविमोचनीम्। प्रयागे वा कुरुक्षेत्रे पुष्करे वा महास्थले ॥ ५ ॥
नैमिषारण्यके क्षेत्रे पूजयेद्विधिवच्छिवान् गन्धपुष्पैस्तथा धूपैर्लक्षसंख्यान्विधानतः ॥ ६ ॥
ब्रह्मचर्यरतो नित्यं तदन्ते होमयेत्तथा। षडस्रे चतुरस्रे वा कुण्डे चाज्यतिलाञ्छुभान् ॥ ७ ॥
शक्त्या च भोजयेद्विप्रान् शैवान्कासारलड्डुकैः। नानाभक्ष्यफलैरेवं वस्त्रैर्माल्यैस्तथार्चयेत् ॥ ८ ॥
विविधां दक्षिणां दद्याद्रुद्रप्रीतिकरीं तथा। यश्चानेन विधानेन प्रायश्चित्तं समाचरेत् ॥ ९ ॥
स बालघातजात्पापान्मुच्यतेऽत्र ममाज्ञया। चतुर्दश्यामथाष्टम्यां नक्तं कुर्याद्विधानतः ॥ १० ॥
मम ध्यानपरः सूत नित्यं भूत्वा ममाग्रतः। पूजयेदर्घपाद्यैर्नैवेद्यैर्विविधैस्तथा ॥ ११ ॥
तं नरं सर्वपापेभ्यो विमोक्ष्यामि खगेश्वर। आयुस्तस्य शतं प्रोक्तं पञ्चहीनं च पुत्रक ॥ १२ ॥
प्रायश्चित्ते कृते यत्नात्पञ्चम्यां चंद्रवासरे। विन्मये त्वकृते सूत चत्वारिंशन्मिताब्दके ॥ १३ ॥
रिष्टं स्यात् क्षयरोगेण बालघाताच्च निश्चितम्। ब्रह्मघातान्महापापात्पूर्वजन्मकृताद्दृढात् ॥ १४ ॥
न मुच्यते महादानैः सप्तजन्मकृतैरपि। बाध्यते क्षयरोगेण सप्तजन्मसु निश्चयात् ॥ १५ ॥
ब्रह्महा क्षयरोगी स्यादिति वेदविदो विदुः। नहीदृशं महापुण्यं क्षयरोगविनाशनम् ॥ १६ ॥
पुत्रवृद्धिकरं चात्र यथा प्रोक्तं शिवार्चनम् ॥ १७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिसप्तत्यधिकसहस्रतमः ॥ १०७३ ॥

श्रीसूर्य उवाच।

यो द्विजं प्राग्भवे हन्यात्सुरां च त्रिविधां पिबेत्। मूत्रकृच्छ्रेण रोगेण पीडितः सोऽत्र जायते ॥ १ ॥
गृहवित्तानुसारेण पलेनार्द्धपलेन वा। कुर्याद्धिरण्मयं पद्मं चाष्टपत्रसमन्वितम् ॥ २ ॥
आवाह्य तत्र ब्रह्माणमुं सर्वोपचारकैः। पूजयित्वा तु गन्धाद्यैर्दद्याद्विप्राय यत्नतः ॥ ३ ॥
दानेनानेन सततं मूत्रकृच्छ्रं न पश्यति ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःसप्तत्यधिकसहस्रतमः ॥ १०७४ ॥

श्रीसूर्य उवाच।

वैकुण्ठादागतस्त्वत्र मथुरायां पतत्रिण। जातोऽयं पुण्डरीकाक्षः सर्वभूताभयप्रदः ॥ १ ॥
घोरे कलियुगे प्राप्ते पापाक्रान्ते महाबले। भारावतरणार्थाय क्षत्रियाणां क्षयाय च ॥ २ ॥
कृत्वा तु दुष्करं कर्म पुनर्यास्यति वै दिवि ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचसप्तत्यधिकसहस्रतमः ॥ १०७५ ॥

श्रीसूर्य उवाच।

स्वर्णापहारी सततं पुरुषः प्राग्भवेण्डज। कुनखी, जायते चात्र महापापेन लाञ्छितः ॥ १ ॥
सुवर्णशतकं दद्यात्स तद्दोषविनाशनम्। चान्द्रायणत्रयं कुर्यात्ततद्दोषोपशान्तये ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्सप्तत्यधिकसहस्रतमः ॥ १०७६ ॥

श्रीसूर्य उवाच।

राजघातकरी प्रोक्ता या पूर्वं घातयेन्नृपम्। राजयक्ष्मान्विता सात्र तस्मिन्वयसि भामिनी ॥ १ ॥
प्रायश्चित्तं परं तस्याः शृणुष्वात्र खगेश्वर। यस्मिन्कृते हि विधिना पूर्वपूर्वाघनाशनम् ॥ २ ॥

स्वर्णगोभूमिमिष्टान्नं घृतधेनुतिलानि च । देयानि श्रद्धया सूत क्षयरोगापनुत्तये ॥ ३ ॥
रिष्टं त्रिंशन्मिते वर्षे प्रायश्चित्तेऽकृतेऽधुना ॥ ४ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तसप्तत्यधिकसहस्रतमः ॥ १०७७ ॥

श्रीसूर्य उवाच ।

विनापराधं यः कश्चिद्वैश्यं हन्यात्पतत्रिण । प्राग्जन्मनि च युक्तः स्याद्रक्तार्बुदरुजा भृशम् ॥१॥
भविष्यति न सन्देहो तस्य मृत्युः खगाधिप । अपि दानशतैर्वापि दत्तैरत्रैव जन्मनि ॥ २ ॥
त्रिंशद्वर्षे महारिष्टं रक्ताधिक्यान्महाबलात् ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टसप्तत्यधिकसहस्रतमः ॥ १०७८ ॥

श्रीसूर्य उवाच ।

यो मोहाद्घातयेद्वैश्यमन्यजन्मनि मानद । सोऽत्र जन्मनि विज्ञेयो रक्तार्बुदसमन्वितः ॥ १ ॥
प्राजापत्यचतुष्केण व्रतेन नियमेन च । सप्तधान्यप्रदानेन पूर्वजन्माघनाशनम् ॥ २ ॥
पापक्षये महाभाग पापरोगक्षयो भवेत् ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनाशीत्यधिकसहस्रतमः ॥ १०७९ ॥

श्रीसूर्य उवाच ।

मेरोः समागता येयं प्राप्ता माथुरमण्डले । सर्वभूतोपकाराय दुष्टनाशकराय च ॥ १ ॥
प्राप्ते कलियुगेऽत्रैव सर्वपापविवर्जितम् । कृत्वा याद्भुतकर्माणि पुनस्तत्रैव यास्यति ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय अशीत्यधिकसहस्रतमः ॥ १०८० ॥

श्रीसूर्य उवाच ।

या काचिद्ब्राह्मणी पूर्वभवे मोहात्सुरां पिबेत् । सात्र जन्मनि मूत्रेण कृच्छ्रेणातिप्रपीडिता ॥ १ ॥
प्रायश्चित्तं परं तस्या घोरपापहरं सुत । कुर्याद्धिरण्मयं पद्मं विप्राढ्याय निवेदयेत् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकाशीत्यधिकसहस्रतमः ॥ १०८१ ॥

अरुण उवाच ।

कश्चिद्विप्रोत्तमो जातः किञ्चिद्वित्तसमन्वितः । कासश्वासादिना बाधा उदरार्त्तिश्च तस्य वै ॥ १ ॥
क्रयविक्रयकर्त्ता च कृषिवाणिज्यशासनः । प्रिया प्रीतिपरा तस्य व्रतानामनुकांक्षिणी ॥ २ ॥
कदाचित्क्रोधवशगा कुवाक्यानाश्च भाषिणी । उदरे वातजान् रोगान् शिरोर्त्तिं दधती कदा ॥३॥
अपत्यानि म्रियन्ते च एको द्वित्रास्तथैव च । तेन कर्मविपाकेन सत्यं कथय भास्कर ॥ ४ ॥

श्रीसूर्य उवाच ।

भर्तृकर्म कृतं नैव स्त्रीकृतं नात्र संशयः । पूर्वजन्मनि शूद्री सा द्विजभक्तिपरायणा ॥ ५ ॥
व्रतानि विविधान्येव सा चक्रे भुवि मानद । स्वगृहे धान्यराशौ सा भक्षणार्थं समागताम् ॥ ६ ॥
सवत्सां ब्राह्मणस्याथ गां धान्यानि हि खादतीम् । गृहीत्वा लकुटीं कुक्षौ भृशं ताडितवत्यसौ॥७॥
सगर्भासुरभीवत्सगर्भकुक्ष्युपघातनात् । मृतोसौ गर्भमध्यस्थो प्रसवे भृशदुःखिता ॥ ८ ॥
शीर्षदुःखेन सुरभी भृशमाक्रंदती मृता । तेन कर्मविपाकेन नरकं प्राप्य दारुणम् ॥ ९ ॥
पश्चान्मानुषमापन्ना व्रतदानप्रभावतः । इदं तृतीयं तज्जन्म मृतापत्यस्य कारकम् ॥ १० ॥

सप्तजन्मसु जायन्ते गोस्त्रीब्रह्मप्रघातकाः । नानाप्राक्कर्मणां तेषां नानापत्यार्थदुःखिता ॥ ११ ॥
सपत्नीकः शुचिः स्नातो ह्यौषधैः स्नानमंत्रतः । उपोषणं दिवारात्रं त्रयोदश्यां विवर्जयेत्॥ १२॥
पूर्णमासीदिनं प्राप्य प्रातश्चानुदिते रवौ । सुरभ्यास्तु सगर्भाया गोमयेनोपलेपयेत् ॥ १३ ॥
तत्रोपरि गवां स्थानं महाशोभासमन्वितम् । अर्हणाद्युपहारैश्च कुङ्कुमाद्यैश्च चर्चयेत् ॥ १४ ॥
कुर्यादष्टदलं पद्मं चित्रवर्णं सुशोभनम् । तत्रोपरि न्यसेद्देवं माधवं कलशेऽर्चयेत् ॥ १५ ॥
सौवर्णे राजते पद्मे सायुधं सचतुर्भुजम् । उपचारैः शुभैर्गन्धैर्धूपैर्दीपैः प्रसूनकैः ॥ १६ ॥
ब्रह्मसूक्तेन सूक्तेन श्रियः सूक्तेन पूजयेत् । सुशुभैर्धूपगंधाद्यैरर्चयेद्विविधैर्गुणैः ॥ १७ ॥
रुद्रैकादशिनीभिश्च जपेद्रुद्रविधानतः । पूजा लक्षमितैः पुष्पैर्वस्त्रपूतैश्च वारिभिः ॥ १८ ॥
शतमष्टोत्तरं हुत्वा चरुणा पायसेन च । रुद्रस्यायुतहोमश्च समध्वाज्यसमाहुतिः ॥ १९ ॥
एवं पृथग्विधानेन विष्णुरुद्रादिपूजनम् । होमान्ते विप्रभोजान्ते मंत्रमेनमुदीरयेत् ॥ २० ॥
"यन्मया कर्मवशतः पुरा जन्मनि पाप्मना । सगर्भायास्तु गोर्घोरं लकुटया ताडनं कृतम् ॥२१॥
तस्मात्कर्मवशात्प्राप्तं मृतगर्भादिनाशनम् । मृतसन्ततिरूपाणि प्राप्यन्ते च तदेनसः ॥ २२ ॥
तत्तदेनोविनाशाय शास्त्रदानी भवत्विदम् ।" स्वस्त्यस्तु चेति तत्रोक्त्वा कोऽदादिति विसर्जनम्२३
सर्पिष्यात्मानमालोक्य अन्यान्वै तोषयेद्द्विजान् । भूमिद्रविणवासांसि धनं दत्त्वा विधानतः २४॥
व्रतान्ते सुरभीं दद्याद्धेमद्रव्यादिं शक्तितः । अहःशेषं ततः सर्वं भोजयेदिष्टबन्धुभिः ॥ २५ ॥
ऐहिकं लक्षणं तस्य शरीरेऽप्युपजायते । काष्ठलोष्टादिशस्त्राद्यैर्घातः स्यादुपलेखनात् ॥ २६ ॥
शृङ्गिणां चोपघातश्च जायंते व्रणजार्त्तयः । जलाकुलत्वं स्पर्शेग्नेस्तादृशस्तत्र जायते ॥ २७ ॥
नार्यंगे विकृतिव्याधी आस्ये व्रणतिलादिकम् । पैत्र्येयीमातुलान्यादेर्वैधव्यार्त्तिर्भवेदपि ॥ २८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्यशीत्यधिकसहस्रतमः ॥ १०८२ ॥

श्रीसूर्य उवाच ।

या काचिद्ब्राह्मणी पूर्वं भवे मोहात्सुरां पिबेत् । प्रदरेणातिदुःखेन सात्र जन्मनि पीड्यते ॥ १ ॥
प्रायश्चित्तं परं तस्याः प्रदरं नाशयेन्महत् । दद्याद्गुरुमयं पद्मं सपत्रं ब्रह्मदैवतम् ॥ २ ॥
ब्राह्मणाय सुशीलाय पूजिताय निवेदयेत् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्यशीत्यधिकसहस्रतमः ॥ १०८३ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि यो विप्रस्त्रिविधां वै सुरां पिबेत् । मूत्रावरोधरोगेण मूत्रकृच्छ्रेण नश्यति ॥ १ ॥
दृढात् प्राक्पापजात् सूत प्रायश्चित्तं न विद्यते । पूर्वपापावशेषे च कृच्छ्रंसांतपनं चरेत् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरशीत्यधिकसहस्रतमः ॥ १०८४ ॥

श्रीसूर्य उवाच ।

अकामतश्च या नारी वैश्यघातनतत्परा । बभूव प्राक् च पक्षीन्द्र सात्र जन्मनि निश्चयात् ॥१॥
रक्तार्बुदसमाक्रान्ता दुष्टपापप्रयोजिता । महारिष्टेन सा याति यमलोकं पतत्रिण ॥ २ ॥
प्राक्पापादुष्करात्सूत कण्ठपार्श्वादिसम्भवात् । निष्कृत्यै कदलीं दद्यात्सुवर्णत्रयसंयुताम् ॥ ३ ॥
पूजयेद्ब्राह्मणान्पश्चाच्छिवपूजनतत्परान् । यात्वेवं कुरुते भक्त्या कदलीदानमुत्तमम् ॥ ४ ॥
नश्येच्च क्षयरुक्तस्या रोगशोकप्रणाशनम् । आयुर्वर्षाणि षष्टयुक्तं यत्र सप्ततिसंख्यकम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाशीत्यधिकसहस्रतमः ॥ १०८५ ॥

श्रीसूर्य उवाच ।

यो नरोऽतिबलोत्कर्षात्परस्त्रीं कामयेत्पुरा । जन्मन्यस्मिन् यौवने तु सोन्मादी जायते भृशम् ॥ १ ॥
दद्यात्प्रजापतिं देवं सौवर्णं शक्तितोऽण्डज । मृगं स्वर्णमयं तद्वत्पूजयित्वा विधानतः ॥ २ ॥
भोजयेद्ब्राह्मणान् भक्त्या होमयेच्च जपेत्तथा । गायत्रीं विधिना सूत मोहादाशु प्रमुच्यते ॥ ३ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडशीत्यधिकसहस्रतमः ॥ १०८६ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे सूत परस्वर्णापहारिणी । सात्र जन्मनि रोगेण खल्वाटेन युता भवेत् ॥ १ ॥
दद्यात्सुवर्णशतकं विप्राय विनतात्मज । सुवर्णस्तेयपापेन मुच्यतेऽत्रैव जन्मनि ॥ २ ॥
चान्द्रायणत्रयं चैव कुर्यान्मासे तु कार्त्तिके ॥ ३ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्ताशीत्यधिकसहस्रतमः ॥ १०८७ ॥

श्रीसूर्य उवाच ।

वैश्यहन्त्री च या नारी भवे पूर्वं पतिव्रता । रक्तार्बुदेन रोगेण बाध्यते चात्र जन्मनि ॥ १ ॥
व्रतं चरेन्महाभाग प्राजापत्यचतुष्टयम् । सप्तधान्येन दानेन रक्तार्बुदविनाशनम् ॥ २ ॥

इति श्रीबृद्धसूर्यारुणसंवादेकर्मविपाकेऽध्यायोऽष्टाशीत्यधिकसहस्रतमः ॥ १०८८ ॥

श्रीसूर्य उवाच ।

रौप्यहारी च पुरुषश्चित्रकुष्ठी प्रजायते । स तत्पापविशुद्ध्यर्थं ब्राह्मणाय प्रदापयेत् ॥ १ ॥
स्वर्णं पलत्रयं शुद्धं कुरुक्षेत्रे पतत्रिण । प्राजापत्यत्रयं कृत्वा प्रारंभे पापनाशनम् ॥ २ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोननवत्यधिकसहस्रतमः ॥ १०८९ ॥

श्रीसूर्य उवाच ।

कश्चिन्म्लेच्छकुलोत्पन्नो बहुद्रव्यसमन्वितः । सुधीः स्वधर्मनिरतो दयालुः सत्यसंयुतः ॥ १ ॥
त्यागी शूरो महोत्साही देशे केरलके सुत । स्वामी धर्मपरो नित्यं सपत्नीकः सपुत्रकः ॥ २ ॥
प्रजाः पालयतस्तस्य शूरस्यापि महात्मनः । दुष्टाः प्रजाः क्रोधयुक्ताः बभूवुर्विमुखास्तदा ॥ ३ ॥
तस्मिन्काले ह्यभूद्युद्धं घोरं तस्मिन्पुरे सुत । संग्रामभूमौ स मृतो यवनश्च सपुत्रकः ॥ ४ ॥
तस्य पत्नी महाभाग साध्वी पतिपरायणा । पतिव्रतामहासत्त्वा भर्तुः प्राणावलंबिनी ॥ ५ ॥
घातयित्वा तु शस्त्रेण स्वशरीरं मनस्विनी । मृते पत्यौ न जीवामीत्युक्त्वा मृतवती तदा ॥ ६ ॥
तद्गुणा ह्यन्तकालेऽपि दिवि प्राप्ता सभर्तृका । भुक्त्वा तत्र महाभोगानपूर्वान्स्वामिधर्मतः ॥ ७ ॥
नानाप्रजाघातनजात्पापात्पूर्वसमुद्भवात् । क्षीणात्पुण्यात्तथा सूत म्लेच्छदेशे बभूव सः ॥ ८ ॥
सिन्धोः पश्चिमभागेऽत्र शतयोजनसम्मिते । गौरः सुरूपो दीर्घश्च बहुविद्याविशारदः ॥ ९ ॥
नानाभोगसुखैर्युक्तो गजयूथैः समावृतः । पत्त्यश्वरथसंकीर्णस्तथा भैरवशासनः ॥ १० ॥
महोक्षपुत्रपौत्राढ्यश्चाद्यन्तसुखसंयुतः । देशेदेशेऽधिकाराढ्यः स म्लेच्छः पृथिवीपतिः ॥ ११ ॥
स्त्रीसहायान्महाभागः तथा पुत्रसहायतः । सुखैश्वर्ययुता सापि यवनी तद्वशाभवत् ॥ १२ ॥
सपुत्रः प्राक्सहायाच्च सोप्यत्रैव महाप्रभुः । एवं जन्मफलं प्रोक्तं ससहायं पतत्रिण ॥ १३ ॥
स्वामिधर्मकृतात्पुण्यात्तदर्थं मरणात्तथा । भविष्यति गतिस्तेषां पूर्वपुण्यात्पतत्रिण ॥ १४ ॥

पञ्चाशीतिमितायुः स्यान्नच रिष्टं भवेन्मृतिः । रिष्टं पञ्चाशदब्दे तु स्वदेहान्तसमं सुत ॥ १५ ॥
प्रजापीडनजात्पापात्तद्वर्षे नात्र संशयः । दद्यात्कालनरं तत्र ब्राह्मणाय कुटुम्बिने ॥ १६ ॥
तथा हिरण्मयं तद्वद्गजं शतपलात्मकम् । कुरुक्षेत्रादितीर्थेषु संक्रान्त्यादिषु पर्वसु ॥ १७ ॥
सर्वोपस्करसंयुक्तं द्वयमेतच्च पुत्रक । महारिष्टहरं प्रोक्तं दानात्कालनरात्क्वचित् ॥ १८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवत्यधिकसहस्रतमः ॥ १०९० ॥

श्रीसूर्य उवाच ।

या काचिद्यौवने नारी रमते स्वेच्छया परम् । बलात्कारेण पुरुषं सात्रोन्मादेन पीडिता ॥ १ ॥
तत्पापनाशनं सर्वमुपायं शृणु तत्त्वतः । कृत्वा सुवर्णजं वायुं मृगं हैमं च वाहनम् ॥ २ ॥
सर्वोपस्करसंयुक्तं दद्याद्विप्राय धीमते । न प्राप्नोति मदोन्मत्तभावं दानप्रभावतः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकनवत्यधिकसहस्रतमः ॥ १०९१ ॥

श्रीसूर्य उवाच ।

त्रपुहारी च यः पूर्वं जन्मन्यत्रच जन्मनि । श्लेष्मरोगेण सततं बाध्यते विनतासुत ॥ १ ॥
दद्यात्तत्पापनाशाय त्रपुं विप्राय धीमते । पलानां त्रिंशतं शुद्धं तस्माद्रोगात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विनवत्यधिकसहस्रतमः ॥ १०९२ ॥

श्रीसूर्य उवाच ।

विद्यमाने हि पत्यौ या जाराद्गर्भं दधार वै । सा चात्र पादजा दुष्टा नच गर्भं दधाति वै ॥ १ ॥
काश्यां वासान्महाभाग श्रद्धया रुद्रपूजनात् । कन्याविवाहात् सततं दरिद्रद्विजपालनात् ॥ २ ॥
धारयिष्यति सा गर्भं प्रायश्चित्ताद्यथोचितात् । प्रायश्चित्ते कृते रिष्टं चत्वारिंशन्मितेब्दके ॥ ३ ॥
प्रायश्चित्ते कृते सूत षडशीत्यब्दजीवनम् ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिनवत्यधिकसहस्रतमः ॥ १०९३ ॥

श्रीसूर्य उवाच ।

आखेटकं विना यस्तु हस्तिनं घातयेत्पुरा । सोऽत्र जन्मनि जायेत सर्वकार्येषु सिद्धिकृत् ॥ १ ॥
तस्मिन्नेव हि काले च तस्य रिष्टं प्रकीर्तितम् । विंशन्मितेब्दे पक्षीन्द्र कालशस्त्रान्मृतिर्भवेत् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्णवत्यधिकसहस्रतमः ॥ १०९४ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि या नारी मोहाल्लोभाद्धरेत्रपु । सात्र जन्मनि पक्षीन्द्र श्लेष्मरुक्संयुता भवेत् ॥ १ ॥
शतत्रयपलं दद्यात्रपु तत्पापशुद्धये । तस्मिन्पापे क्षये सूत श्लेष्मरोगस्य नाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचनवत्यधिकसहस्रतमः ॥ १०९५ ॥

श्रीसूर्य उवाच ।

विप्रवंशे समुत्पन्नः शक्तिमान् वेदपारगः । धनधान्यसमायुक्तश्चेर्ष्यालुश्चार्जवान्वितः ॥ १ ॥
सुव्रतः शक्तिमान्धीरः किंचिद्व्याधिसमन्वितः । इन्द्रियाणां बलं हत्वा मेहवान्स व्यजायत ॥ २ ॥
उदरार्त्तिरसृग्बाधा किंचिद्देहे ह्यपद्यत । तस्य प्रिया शुभाचारा पतिभक्तिपरायणा ॥ ३ ॥

सत्यवाक् सच्चरित्रा च व्रतानामनुकांक्षिणी । एकदाऽऽसूत सा पुत्रं दम्पती हर्षसंयुतौ ॥ ४ ॥
अथ सा मृतपुत्राभूत्कर्म्मणां परिपाकतः । तस्य गेहे च कन्यासीत्प्रौढा या न विवाहिता ॥५ ॥
भूरिद्रविणलोभेन वृद्धविप्राय सार्पिता । तद्गेहादाहृतं द्रव्यं सर्वस्वं स्ववशीकृतम् ॥ ६ ॥
यदा समुत्सुका प्रौढा वरार्थं गुणशालिनी । पतिभक्तिपरा नित्यं विषयेभ्यः सुखार्थिनी ॥ ७ ॥
पत्युः सा जरसा खिन्ना निर्विण्णाऽभूद्वरानना । व्रततीर्थरता नित्यं सत्यानामनुकांक्षिणी ॥ ८ ॥
बहुवर्षैस्तया वत्स नियमैः शोषितं वपुः । पित्रा धनं गृहे भूरि त्वर्पितं तत्कृते भृशम् ॥ ९ ॥
अथ कालवशं प्राप्ता दीना सा ब्राह्मणी खग । सा पुत्री ह्युदरे भूत्वा ह्यगमज्जन्मजन्मनि ॥१० ॥
कन्या बहुविधास्तस्य निराधारा मृताश्च वै । तेन कर्मप्रभावेण पूर्वकन्या बहुप्रजा ॥ ११ ॥
कन्याविक्रयकर्त्ता च रौरवं नरकं गतः । यातना बहुधा भुक्त्वा वर्षाणां च सहस्रकम् ॥ १२ ॥
पश्चान्मानुष्यमापन्नो व्रतदानप्रभावतः । इदं चतुर्थकं जन्म मृतपुत्रः प्रजायते ॥ १३ ॥
मृतपुत्रो मृतो गर्भः पूर्वकर्मप्रभावतः । भार्या तस्यापि विप्रस्य पूर्वजन्मनि मानद ॥ १४ ॥
भर्तृविद्वेषिणी नित्यं तथापत्यानुरागिणी । तेन कर्मविपाकेन कन्या भूरि मृताः सुत ॥ १५ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं देव पापं शाम्यति येन वै । निष्कृतिं वद विश्वात्मन् पृथक्त्वं मे प्रकाशय॥१६॥

श्रीसूर्य उवाच ।

पुत्रिका यस्य जीवन्ति पुत्राणां नाशनं भवेत् । कर्मभेदेन येनेह शृणु त्वं कश्यपात्मज ॥ १७ ॥
स्वकन्यां वयोग्यां सा चिरापत्यमनागतम् । दशाब्दिकां स्वामानाय यथाभावं यथामति ॥१८॥
कन्यां रूपवतीं शान्तां समस्तगुणशालिनीम् । ब्राह्मेण विधिना सूत दद्याच्च बहुदक्षिणाम् ॥१९॥
महापापौघशमनं कन्यादानमतंद्रितः । कन्याविवाहसमये महाशान्तिविधिं चरेत् ॥ २० ॥
एवं कृतविधिः सूत कन्यां दत्त्वा विधानतः । शान्तिकर्मणि सर्वत्र विस्तरेद्दत्विगादिकम् ॥ २१॥
भूमिद्रविणवासांसि नानाभोज्यानि दापयेत् । गृहदानं ततो दद्याद्यथोपस्करसंयुतम् ॥ २२ ॥
वर्षेवर्षेऽपि संपूर्णे ह्यन्नवस्त्रादि दापयेत् । एवं कृतविधिः सूत बहुपुत्रो यशो लभेत् ॥ २३ ॥
पापं पुत्रविनाशाख्यं कन्यापत्यादिकं च यत् । तत्तत्पापप्रणाशार्थं कन्यादानादिशक्तितः ॥२४॥
कुर्यादसंशयं तस्य सुखं शान्तिः प्रजायते । यजन् यज्ञविधानेन ब्राह्मणान् स्वस्ति वाचयेत् ॥२५॥
विनायकाम्बिकामूर्त्तिं हेमनिष्कप्रमाणतः । आचार्याय ददेत्ताश्च नानाकर्माभिशान्तये ॥ २६ ॥
ऐहिकं लक्षणं तस्य शरीरे चोपजायते । जिह्वावदनदन्तौष्ठव्रणो वातादिदोषकृत् ॥ २७ ॥
नृपचोराग्निहानिश्च वित्तानि च यतस्ततः । तस्य ह्यानन्दमनसो दुःखं नश्यति चाधिजम् ॥२८॥
सर्पिष्यात्मानमालोक्य भुञ्जीत सह बन्धुभिः ॥ २९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षण्णवत्यधिकसहस्रतमः ॥ १०९६ ॥

श्रीसूर्य उवाच ।

या ताम्रहारिणी नारी लोभात्पूर्वभवे सुत । औदुम्बरेण रोगेण पीड्यते बहुपीडया ॥ १ ॥
पापं विचार्य यत्नेन ताम्रं दद्याच्च शक्तितः । तस्माद्दानान्महाभाग पापं नश्यति तत्क्षणात् ॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तनवत्यधिकसहस्रतमः ॥ १०९७॥

श्रीसूर्य उवाच।

गर्भवत्यानया भुक्ता पूर्वजन्मनि मानद। गर्भासन्ना ह्यजा वद्धाविधिना गर्भधारिणी ॥ १ ॥
तेन कर्मविपाकेन बाहुजा सात्र कीर्तिता। पूर्वजन्मविपाकेन न च गर्भं दधात्यलम् ॥ २ ॥
प्रायश्चित्तमिदं तस्य चात्र सर्वाघमोचनम्। कृत्वाजां गर्भसंयुक्तां राजतीं पट्पलात्मिकाम् ॥३॥
वैश्वानरस्तथा कार्यः पञ्चमाषैर्हिरण्मयः। पूजयित्वा ततो दद्याद्विजाय विधिनाण्डज ॥ ४ ॥
यैवं कुर्याद्विधानेन सर्वपापापनोदनम्। तस्याः पुत्रविवृद्धिः स्यादिह जन्मनि वै ध्रुवम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽष्टानवत्यधिकसहस्रतमः ॥ १०९८ ॥

श्रीसूर्य उवाच।

मृगयां प्राप्य पक्षीन्द्र गजराजवधे पुरा। जायते गजचर्मा वै स नरोऽत्रैव जन्मनि ॥ १ ॥
गणेशप्रतिमां दद्यात्सौवर्णीं द्विपलात्मिकाम्। गन्धपुष्पैश्च संपूज्य तस्माद्रोगाद्विमुच्यते ॥ २ ॥
कारयेद्गणनाथस्य लक्षजाप्यं विधानतः। होमयेत्तद्दशांशेन मुच्यते पूर्वकिल्बिषात् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवनवत्यधिकसहस्रतमः ॥ १०९९ ॥

श्रीसूर्य उवाच।

यो हरेत्परसिद्धान्नं क्षुत्पीडाभिःप्रपीडितः। सोऽत्र जन्मनि पक्षीन्द्र शूलरुक्पीडितोध्रुवम् ॥ १ ॥
अन्नदानेन विप्राणां रसदानाद्विशेषतः। मुच्यते शूलजाद्रोगान्नात्र कार्या विचारणा ॥ २ ॥
सुवर्णशूलदानं वा विप्रायात्र कुटुम्बिने। शूलदोषोपशमनमिह जन्मनि वै ध्रुवम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः शताधिकसहस्रतमः ॥ ११०० ॥

श्रीसूर्य उवाच।

मूर्धाभिषिक्तः प्राक् सूत बभूव पुरुषोत्तमः। स्वज्ञातिषु महाभागः दृढकर्मक्रियापरः ॥ १ ॥
वैराटदेशे निवसन् राजकार्ये रतः सदा। कृतवान् गोग्रहं तत्र शत्रूणां भयदायकः ॥ २ ॥
बालवत्सामृता भूरि पुरे तस्मिन्खगोत्तम। पापमाचरितं तेन नृपाज्ञाकारिणा दृढम् ॥ ३ ॥
ततो यमपुरं प्राप्तो भुक्त्वा भोगांस्तदुक्तवत्। विष्णुपूजनजात्पुण्यात्प्रागत्र यमुनातटे ॥ ४ ॥
चारणो धर्मनिरतो बहुपापं जहौ खलु। एवं कृतविधेः सूत सर्वपापविनाशनम् ॥ ५ ॥
तस्य पुत्रविवृद्धिः स्यादिह जन्मनि वै ध्रुवम्। अकृते तु यथाशक्ति प्रायश्चित्ते यथोदिते ॥ ६ ॥
रिष्टं षष्टिमिते वर्षैःदारुणं जायते किल। प्रायश्चित्ते कृते सूत जीवनं वर्षसप्ततिम् ॥ ७ ॥
जन्मादिमरणांतं हि स्वल्पमेवात्र सूचितम् ॥ ८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोत्तरशताधिकसहस्रतमः ॥ ११०१ ॥

श्रीसूर्य उवाच।

शूद्रोऽभवन्महाभाग प्राग्जन्मन्यतिकोविदः। ग्रामवासः सदा सौम्यः शनद्रुनिकटेऽण्डज ॥ १ ॥
शूद्रकन्या च तेनैव हृद्या षोडशवार्षिकी। भुक्तातिकामलोभेन बलात्कारेण दुःखिता ॥ २ ॥
सोऽनार्यो धर्मपुत्रस्य भुक्त्वा भैरवशासनम्। पूजनाच्छिवलिङ्गानां प्रागत्रापि च सङ्करः ॥ ३ ॥
षण्ढस्तेन विपाकेन प्राप्तसर्वमनोरथः। महोत्साही महामानी महाविभवविस्तरः ॥ ४ ॥
मृत्युश्चास्यात्र गङ्गायां पुण्यायां शिवपूजनात्। भविष्यति महाभाग पापान्ते चास्य सद्गतिः ॥५॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्युत्तरशताधिकसहस्रतमः ॥ ११०२ ॥

श्रीसूर्य उवाच ।

पादरोगयुतः सूत जायते सोऽत्र जन्मनि । यो मार्गहा पुरा लोके परलुण्ठनतत्परः ॥ १ ॥
सोश्वदानाद्विधानेन ब्राह्मणाय पतत्रिण । न पश्यति महापीडां पादजां पापसंभवाम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्युत्तरशताधिकसहस्रतमः ॥ ११०३ ॥

श्रीसूर्य उवाच ।

अभवत्प्राग्भवे विप्रो ग्रामवासी वनाश्रितः । चोराधिपो महोग्रश्च तत्संसर्गी खगाधिप ॥ १ ॥
दत्तानि तेन ग्रहणे दानानि विनतासुत ॥ गोभूम्यश्वादिकान्येव ब्राह्मणेभ्योतिशक्तितः ॥ २ ॥
स भुक्त्वा नरकान् घोरान् पापात्पुण्याच्च शाश्वतान् । स्वर्गात्पर्वतभागे तु स जातो बाहुजोऽधुना ३
वामनो राजसन्मानी महोग्रो मंत्रपारगः । पुत्रहीनोप्यसौ सूत परवित्तस्य लुण्ठनात् ॥ ४ ॥
भवंत्यत्र च ये पुत्रा म्रियन्ते नात्र संशयः । प्रायश्चित्तं प्रवक्ष्यामि येन पापं प्रशाम्यति ॥ ५ ॥
कृत्वा वेदघटान्सूत सौवर्णान्घृतपूरितान् । तदभावे राजतांश्च विप्रेभ्यः प्रतिपादयेत् ॥ ६ ॥
हरिवंशं विधानेन शृणुयाद्भक्तितोण्डज । रौद्रं व्रतं चरेत्पश्चात्पूर्वपापविशुद्धये ॥ ७ ॥
नैतत्प्रकुर्याद्यः श्रुत्वा स नरः पुत्रवर्जितः । जायतेऽत्रैव पक्षीन्द्र कुर्याद्यः पुत्रवर्द्धनम् ॥ ८ ॥
आयुरष्टौ तथाशीतिसम्मितं कृतनिष्कृतेः ॥ ९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरुत्तरैकशताधिकसहस्रतमः ॥ ११०४ ॥

अरुण उवाच ।

क्षात्रवंशे समुत्पन्नोःवातदेहो रुजाकरः । गुल्माद्या ह्युदरे बाधा शिरोर्तिस्तस्य सन्ततम् ॥ १ ॥
व्यापारो निष्फलस्तस्य किञ्चित्सेवादिनाऽभवत् । तस्य भार्याद्वयं गेहे किञ्चिद्भक्तिपरायणम्॥२॥
अन्योन्यद्वेषभावाच्च किंचित्प्रीतिकरा परा । मृतवत्सा कथं जाता सत्यं कथय भास्कर ॥ ३ ॥
एकोदरं स्थिरीभूतं न प्रसूतिर्न पातनम् । केन पापप्रभावेण कथयस्व दिवाकर ॥ ४ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि शूद्रस्तु क्रयविक्रयकारकः । दानधर्मपरो नित्यं देवदेवपरायणः ॥ ५ ॥
अन्योन्यद्वेषभावाच्च वर्त्तते ब्राह्मणेन वै । कश्चिद्विप्रो धर्मपरो वेदशास्त्रार्थसाधकः ॥ ६ ॥
कदाचिद्दैवयोगेन भाविनोऽर्थस्य वै बलात् । तद्वित्तं ग्राहयामास शूद्रो म्लेच्छजनैः कुधीः ॥ ७ ॥
लङ्घनाय मतिं चक्रे ब्राह्मणो भार्यया सह । भर्त्सनैस्तर्जनाद्यैस्तु तद्धनं नाप्तवान्यदा ॥ ८ ॥
दिनैः कतिपयैरेव शूद्रश्चाण्डालसख्यतः । ब्राह्मणं भर्त्सयामास ब्राह्मणः क्रोधसंकुलः ॥ ९ ॥
प्रतिकर्तुमशक्तश्च ह्यात्मघातं चकार ह । गर्भयुक्ता च तद्भार्या भर्त्तारं पृष्ठतोऽन्वगात् ॥ १० ॥
हृतं तस्यावशिष्टं स्वं म्लेच्छराजेन तत्तदा । गते कतिपये काले शूद्रो म्लेच्छेन घातितः ॥ ११॥
ततो वै निरये वत्स वर्षायुतसहस्रकम् । पपात नरके घोरे शूद्रः स्वाशुभकर्मणा ॥ १२ ॥
पश्चान्मानुष्यमापन्नो दानधर्मप्रभावतः । तृतीयं जन्म चैतद्धि तस्य विप्रापकारिणः ॥ १३ ॥
तेन वै कर्मणा तस्य ह्यपत्यं नैव जायते ॥ १४ ॥

अरुण उवाच ।

प्रायश्चित्तं वद स्वामिन्येन पापक्षयो भवेत् । निष्कृतं सकलां ब्रूहि नारीणां हितकाम्यया ॥१५॥

श्रीसूर्य उवाच।

तीर्थे संवत्सरं सेवा ह्येकचित्तेन दंपती। श्रवणं हरिवंशस्य विप्रस्योद्वाहनं तथा ॥ १६ ॥
तावन्निष्कृतयो भूयः क्रमेणानेन यास्तदा। सुशुभे भूप्रदेशे तु गोमयाद्युपचर्चिते ॥ १७ ॥
कुर्यादष्टदलं पद्मं चित्रवर्णं सुशोभनम्। तन्मध्ये रुक्मिणीयुक्तं माधवं कलशेर्चयेत् ॥ १८ ॥
सौवर्णं राजतं पद्मं सायुधं सचतुर्भुजम्। उपचारैः शुभैर्गन्धैर्धूपैश्च कुसुमादिभिः ॥ १९ ॥
जनन्या सहितं भूयः प्रद्युम्नं हि समर्चयेत्। चारुदेहं चारुबाहुं चारुगुप्तं यशस्विनम् ॥ २० ॥
श्रीवत्साङ्कं पीतवस्त्रं सुचारुं पूजयेत् क्रमात्। पूजनं ब्रह्मसूक्तेन तथा श्रीरसकोविदैः ॥ २१ ॥
पुष्पैः सुगन्धधूपैश्च ह्यर्चयेद्विष्णुमर्हणैः। तद्विप्रासोऽथ तद्विष्णोः क्रमं संपश्य नित्यशः ॥ २२ ॥

मन्त्रः।

"इदेरेतो देशाग्नि तथैव विप्रोरेतोदेवाग्नि। ततो विप्रो एतो देवाभिषक् चेतो" ॥ २३ ॥
शतमष्टोत्तरं हुत्वा चरुणा पायसेन च। होमान्ते विप्रभोजान्ते मंत्रमेनमुदीरयेत् ॥ २४ ॥
यन्मया पापभावेन कर्मान्येन दुरात्मना। म्लेच्छराज्ये च व्यापारे मत्या वै दुःष्कृतं कृतम्॥२५॥
ब्राह्मणानां शुचि द्रव्यं नीतं भक्षणतर्जनैः। द्रव्यापहरणात्प्राप्तं सुखं नाना भवान्तरे॥ २६ ॥

मन्त्रः।

"स्थिरगर्भा मृतापत्या हत्वा कर्म सुदुःसहम्। तत्तदेनोविनाशाय दानं संप्रददे त्विदम्"॥२७ ॥
स्वस्त्यस्त्विति च तत्रोक्त्वा कोदादिति विसर्जनम्। सर्पिष्यात्मानमालोक्य भोजयेद्विप्रबन्धुभिः२८
ऐहिकं लक्षणं तस्य शरीरे चोपजायते। हृद्दुःखं दीर्घनिश्वासो लोचने शस्त्रकर्शिते ॥ २९ ॥
काष्ठलोष्टादिशस्त्राद्यैर्घातः स्यादुपलेखनात्। जलाकुलत्वं स्पर्शोग्रेस्तादृशो व्रणसंभवः ॥ ३० ॥
भार्याङ्गे विकृतव्याधिर्वक्त्रे व्रणतिलादिकम्। पितृष्वसृमातुलानीस्वस्रादेर्विधवाव्यथा ॥ ३१ ॥
स्वकुले प्रेतजा पीडा दुःखं वै पश्वपत्यजम्। कर्मानुसारजो व्याधिश्चित्रं तस्य सहायवत् ॥३२ ॥
स्वकुलेऽपि प्रवर्त्तन्ते पतिता धर्मचारिणः। एवं तु लक्षणैर्व्याप्तं प्रायश्चित्तं तदा भवेत् ॥ ३३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचोत्तरशताधिकसहस्रतमः॥ ११०५ ॥

श्रीसूर्य उवाच।

पूर्वे ह्याभीरजा काचिद्भूद्भर्तृपरायणा। महद्भिर्गोधनैर्युक्ता गवां पालनतत्परा ॥ १ ॥
गावस्तृषार्त्ताः सततं प्रपायां प्रेरितास्तया। निदाघकाले संप्राप्ते वह्निर्ज्वालाकुलाश्रये ॥ २ ॥
अथान्यगावः सततं तस्मिन्नपि जलाशये। शनैः पानं प्रकुर्वन्त्यो जलं शीतलमुत्तमम् ॥ ३ ॥
ताडितास्तास्तया गावो दृढेन लकुटेन च। तत्रैका तृपिता धेनुस्संतप्ता च भृशं तथा ॥ ४ ॥
न च त्यक्तं जलं सूत गर्भभारान्विता यतः। तदा तत्ताडनात्सूत पतितो गर्भसंस्थितः ॥ ५ ॥
वत्सो मर्मव्यथायुक्तो मृतश्चापि च तत्क्षणात्। विचेष्टितमिदं यस्याः सैषा वैश्याङ्गनाऽधुना ॥६॥
नानाविभूषणैर्युक्ता नानापशुभिरन्विता। सुखभोगधनैर्धान्यैर्वाञ्छितार्थान्विता सुत ॥ ७ ॥
प्राग्गोसेवनजात्पुण्यात्सर्वं पुण्यफलं त्विदम्। यच्चात्र पूर्णगर्भत्वे युग्मभावे खगाधिप ॥ ८ ॥
न मोचयति सा गर्भं तद्दुःखेनाकुला भृशम्। एवं वर्षत्रयं दुःखं भुक्त्वा मोक्ष्यति चाण्डज॥ ९ ॥
रिष्टमब्दत्रये सूत बालवत्सवधादिह ॥ १० ॥

---

१ अयं मंत्रो विचारणीयः।

अरुण उवाच ।

प्रायश्चित्तं वद स्वामिन्येन पापक्षयो भवेत् । उपकाराय लोकानां यतस्त्वं सर्वदर्शनः ॥ ११ ॥

श्रीसूर्य उवाच ।

दद्याङ्गां कपिलामेकां स्वर्णशृङ्गादिकान्विताम् । विप्राय वेदविदुषे तद्दोषशमनाय च ॥ १२ ॥
द्विसुवर्णमितां तद्वल्लेख्यां गां गर्भसंयुताम् । दद्याद्वेदविधिज्ञाय पूर्वपापात्प्रमुच्यते ॥ १३ ॥
भोजयेत्तु यथाशक्ति विप्रान्वै होमयेत्तिलान् । मुच्यते गर्भजाद्दोषान्नात्र कार्या विचारणा ॥ १४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडुत्तरशताधिकसहस्रतमः ॥ ११०६ ॥

श्रीसूर्य उवाच ।

बभूव पार्श्वजः कश्चिद्दुर्जरे विनतासुत । धर्मकर्मसमायुक्तो देवतातिथिपूजकः ॥ १ ॥
पितृभक्तिपरो नित्यं दानादिविधिपूर्वकम् । स हि चक्रे विशिष्टेभ्यो ब्राह्मणेभ्यः स्वशक्तितः ॥ २ ॥
दैवाच्छ्वशुरगृहं गत्वा कृतं कर्म सुदारुणम् । वैरिपुत्रः पुरा सूत पादाघातेन घातितः ॥ ३ ॥
कुर्वता च सुतीक्ष्णेन दिवा वै चौर्यकर्मणा । स मृतस्तेन दुःखेन तन्माता ह्येकपुत्रिणी ॥ ४ ॥
पुत्रदुःखान्मृता सापि ददौ शापं हि दारुणम् । यथा पुत्रविहीनाऽहं गच्छामि च यमालयम् ॥ ५ ॥
तथैव पुत्रशोकार्तो जन्मजन्मनि यास्यति । ततो बहुतिथे काले गतोऽसौ यमशासनम् ॥ ६ ॥
धर्मात्स्वर्गफलं भुक्त्वा पापाच्च नरकांस्तथा । पूर्वपुण्यप्रभावेण स जातो मुखजोऽधुना ॥ ७ ॥
विपाशानिकटे देशे वृषलग्ने स्थिते विधौ । श्यामांगो धूसरः क्षीणः प्रभुर्देशाटने रतः ॥ ८ ॥
बहुस्त्रीधनसंयुक्तो मित्रप्रियगणान्वितः । मानभोगसुखैश्वर्यैः सुखी वै लोभसंयुतः ॥ ९ ॥
धर्मात्सर्वफलं सूत भृशं पापफलं शृणु । क्रूरचेष्टो महालोभी सदा मात्सर्यसंयुतः ॥ १० ॥
जातः पुत्रविहीनोऽसाविहजन्मनि भूतले । प्रायश्चित्तं प्रवक्ष्यामि सर्वपापविशोधनम् ॥ ११ ॥
लोकानामुपकाराय शृणु सूत प्रयत्नतः । पलैर्दशमितैः कुर्याद्राजतं वाहुजं सुत ॥ १२ ॥
तन्मात्रा संयुतं चैव शुभलक्षणलक्षितम् । पूजयित्वा तु गन्धाद्यैः षोडशोरूपचारकैः ॥ १३ ॥
सूर्यभक्ताय शान्ताय तं दद्याद्वै कुटुंबिने । पलपञ्चमितं रौक्मं कुर्याद्धरिहरात्मकम् ॥ १४ ॥
तथैव गाणनाथं च लेख्यं पञ्चोपचारकैः । संपूज्य विधिवद्दद्यात्सर्वपापविशुद्धये ॥ १५ ॥
अष्टाक्षरं तथा मंत्रं वैदिकं सूर्यदैवतम् । जपेदष्टसहस्रं तु शुभं प्रणवपूर्वकम् ॥ १६ ॥
गायत्रीपञ्चसाहस्रं दुष्टपापविमोचनम् । कुर्याद्धोमं दशांशेन पश्याद्ब्राह्मणभोजनम् ॥ १७ ॥
एवं कुर्याद्विधानेन प्रायश्चित्तं यथाविधि । न प्राप्नोति तदा रिष्टं षड्वींशाब्दे प्रकीर्तितम् ॥ १८ ॥
पञ्चवेदमिताब्दान्तमायुस्तस्य भविष्यति ॥ १९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तोत्तरशताधिकसहस्रतमः ॥ ११०७ ॥

श्रीसूर्य उवाच ।

अज्ञानादवधीद्यश्च पूर्वजन्मन्यजां सुत । भविष्यत्यत्र पुरुषो ह्यधिकांगः कदाचन ॥ १ ॥
कस्तूरिकापलं दद्यात्स तत्पापविनाशनम् । अजमेकं सुवर्णाढ्यं मुच्यते च तदेनसः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टोत्तरशताधिकसहस्रतमः ॥ ११०८ ॥

श्रीसूर्य उवाच ।

लोहहारी च पुरुष इह जन्मनि पीड्यते । घर्घराख्येन रोगेण महादुःखप्रदेन हि ॥ १ ॥

दद्यात्पलशतं लौहं विधिना पापशोधनम् । प्राजापत्यं चरेदेकं ततो वा पापनाशनम् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवोत्तरशताधिकसहस्रतमः ॥ ११०९ ॥

श्रीसूर्य उवाच ।

सर्वैर्मनोरथैर्युक्ता काचिदासीच्छुभानना । प्राग्भवेण्डज तत्सर्वं चेष्टितं शृणु सांप्रतम् ॥ १ ॥
नकुलानां विले गत्वा चालितं तप्तवालुकम् । पूरितं च तथा सर्वं तद्धातार्थं पतत्रिण ॥ २ ॥
मृतः स तेन दाहेन नकुलः सकुलः खग । सापि मृत्युवशं प्राप्ता भुक्तातियमशासनम् ॥ ३ ॥
पूर्वं शातद्रुके देशे ह्यभूदत्र च पर्वते । पूर्वं राजकुले जाताऽत्रापि राजकुले सुत ॥ ४ ॥
प्राग्दानव्रतजात्पुण्याच्छृणु पापफलानि वै । सर्वं तद्वंशजाः सूत तदग्रे मरणं गताः ॥ ५ ॥
जीवनं चात्र तस्याश्च सर्वमष्टोत्तरं शतम् । न मुच्यते महापापाद्दृढाज्जन्मत्रयेऽपि वा ॥ ६ ॥
कुरुक्षेत्रादिवासाच्च पापं नश्यति सांप्रतम् ॥ ७ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो दशोत्तरशताधिकसहस्रतमः ॥ १११० ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे पुत्र घातयेत्पक्षिनन्दनम् । सगर्भां गर्भपुष्ट्यर्थं जायते गोधिका सुत ॥ १ ॥
भोगादेव क्षयः प्रोक्तः समारब्धस्य कर्मणः ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकादशोत्तरशताधिकसहस्रतमः ॥ ११११ ॥

श्रीसूर्य उवाच ।

लौहं हरति यान्यस्य नारी बुद्धिविवर्जिता । अत्र जन्मनि सा नारी घर्घराख्ययुता भवेत् ॥ १ ॥
दद्यात्पलशतं लोहं ससुवर्णं द्विजातये । मुच्यते पापजाद्रोगाद्घर्घराभिधकात्सुत ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वादशोत्तरशताधिकसहस्रतमः ॥ १११२ ॥

श्रीसूर्य उवाच ।

मोहात्प्राग्यावधीत्सूत तीर्थजं विधिवर्जितत् । सा गोधिकात्र जनुषे भविष्यति वरानना ॥ १ ॥
अजं दद्याद्विधानेन कस्तूरीपलसंयुतम् । सवस्त्रं वेदविदुषे तद्दोषशमनं त्विह ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोदशोत्तरशताधिकसहस्रमः ॥ १११३ ॥

अरुण उवाच ।

क्षात्रे कुले समुत्पन्नो गुल्मवातोदरामयीः । वित्रपः कृपणश्चैव सहोदरसमन्वितः ॥ १ ॥
धनधान्यसुखोपेतः किञ्चिद्व्यापारवान् सुधीः । दायादाच्छन्नपीडश्च मिथः क्लेशश्च तस्य वै ॥२॥
तस्य नारीद्वयं चासीत्सज्ञातं चारुजन्मनि । बहुपुत्र्यः प्रसूताश्च न तु पुत्रो बभूव ह ॥ ३ ॥
कदाचिज्जायमानस्तु मृतः पुत्रोऽग्निभासकः । एकाऽपुष्पवती भार्या संजाता तस्य भास्कर ॥ ४ ॥
केन कर्मविपाकेन सत्यं कथय मे प्रभो ॥ ५ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि क्षत्रस्तु किञ्चिद्भूमिपतिस्तथा । अर्थलुब्धः प्रजातोयं ग्रामाधीशः प्रतापवान् ॥ ६ ॥
ग्रामे तस्य स्थितिं चक्रे ब्राह्मणः कोऽपि सत्तमः । पुत्र्यः पञ्च तथा सप्त ह्यपुत्रो वित्तसंयुतः ॥७॥
कालेन मृत्युमापन्नो धनलुब्धो निरामयः । तस्य भार्या महासाध्वी साहसं कृतवत्यथ ॥ ८ ॥
और्ध्वदेहिककर्मादि तया सम्यगनुष्ठितम् । क्षत्रियश्चिन्तयित्वाथ ह्यपुत्रस्य च जन्मिनः ॥ ९ ॥

क्षत्रियो धर्मतः स्वामीत्येवं तेन हृतं धनम् । निराधाराः सुता जाताः पित्रभावेन दुःखिताः ॥
सर्वस्वहरणाद्वापि गताः कन्या इतस्ततः ॥ १० ॥
काचिन्मातुर्गता पक्षे काचित्पित्र्ये तथा गता । उदयस्तद्गृहे विप्र संजातस्तस्य कर्मणः ॥ ११ ॥
यो वै क्षत्रकुले पुत्रः स वै ब्राह्मण एव हि । एवं ब्रह्मस्वकं प्राप्तं युक्तं पुत्र मिथस्तदा ॥ १२ ॥
पुराकृतानि कर्माणि भुज्यन्ते चेह मानवैः । तेन कर्मविपाकेन कन्यापत्यं मृतः सुतः ॥ १३ ॥
तस्य पापस्य नाशाय निष्कृतिः क्रियते शुभा ॥ १४ ॥

अरुण उवाच ।

का तस्य निष्कृतिः स्वामिन्येन पापक्षयो भवेत् । लभेत सन्ततिं सौख्यं लोकानुग्रहकृद्वद १५॥

श्रीसूर्य उवाच ।

शुभे त्ववसरे प्राप्ते हायने शुभवासरे । प्रारभेद्धरिभक्तश्च संवत्सरविधानवित् ॥ १६ ॥
प्रत्यहं परमेशानं विष्णुमव्यक्तमव्ययम् । पौरुषेणेह सूक्तेन अर्चयेन्मासमात्रकम् ॥ १७ ॥
कुंकुमागरुकर्पूरैश्चन्दनैस्तुलसीदलैः । अर्चयेद्विविधैः पुष्पैरुपचारैः पृथक्पृथक् ॥ १८ ॥
भौमाप्यमारुतशिखिव्योमकैः पञ्चभिस्तथा । एवं व्रतपरा नारी भर्तृभक्तिपरायणा ॥ १९ ॥
अर्चयन्ती हरिं पूर्णं वर्षावधि समाचरेत् । शुभे मासे शुभे पक्षे चैकादश्यामुपोषिता ॥ २० ॥
शुभनक्षत्रयुक्तायां द्वादश्यां पुत्रकाम्यया । पूर्ववद्धरिमभ्यर्च्य ऋग्भिः षोडशभिः प्रभुम् ॥ २१॥
विधिवद्वह्निमाधाय ह्यर्चयेद्वैष्णवं वरम् । आज्यभागावसाने तु कपिलाज्याहुतिर्हविः ॥ २२ ॥
पौरुषेण तु सूक्तेन यावत्षोडशसंख्यया । अश्वत्थसमिधस्तिस्रो जुहुयात्षोडशैव तु ॥ २३ ॥
पुनराज्यं ततो हुत्वा जुहुयाच्च चरुं तथा । होमान्ते द्विजभोजान्ते दानप्रेतत्समाचरेत् ॥ २४ ॥
हिरण्यभूमिवासांसि धेनुं वत्ससमन्विताम् । विप्रस्योद्वाहनं कृत्वा कन्यां सालंकृतामपि ॥ २५ ॥
दक्षिणां प्रतिपद्याथ च्छलकौटिल्यवर्जिताम् । प्राश्नीयात्तं हविः शेषं सह पत्न्या हरिं स्मरेत्॥२६॥
इति कृत्वा विधिं नारी पुत्रं प्राप्नोति वैष्णवम् । सुभगा च सुरूपा च भवेद्विगतकिल्बिषा॥२७॥
ऐहिकं लक्षणं चिन्त्यं पूर्वकर्मानुसारतः । गुल्मार्शसान्तु वाधा च गुदान्तर्व्रणजार्तयः ॥ २८ ॥
वातरक्तोऽक्षिशिरसोर्नेत्रकर्णान्वितो व्रणः । स्तनोपगौरवं दद्रुरन्ते वै पादवैकृतिः ॥ २९ ॥
जनश्रुतिं मानवा हि ब्रूयुर्वै कारणं विना । हानिस्तु सर्ववस्तूनां द्रव्यनाशनजं भयम् ॥ ३० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्दशाधिकसहस्रतमः ॥ १११४ ॥

श्रीसूर्य उवाच ।

अथ शूद्रकुले पूर्वमासीत्पुण्या वराङ्गना । तदा दानरता जाता कंकुक्षेत्रे पतत्रिण ॥ १ ॥
सर्वैः सुखैः सदोपेता सर्वसंपत्तिसंयुता । तया कृतं महत्पापं भाविनोर्थस्य वै वलात् ॥ २ ॥
समीपे वसतश्चास्यां ब्राह्मणस्य नवं गृहम् । निर्दग्धं चाग्निहोत्रं वै वैरिभावे पतत्रिण ॥ ३ ॥
तत्र दग्धा महाभाग गौरपापा गृहं गता । कृत्वैतदद्भुतं कर्म भुक्त्वा तु नरकान्मुत ॥ ४ ॥
दानधर्मकृतात्पुण्यात्सात्र जाता हि वाहुजा । माथुरे मण्डले पुण्ये वृपलग्रोपलक्षिते ॥ ५ ॥
सुखदुःखसमाक्रान्ता जातसन्ततिनाशकृत् । दुःखैरनेकैर्युक्तात्र मध्यभागे खगाधिप ॥ ६ ॥
प्रायश्चित्तं परं चास्या गङ्गायां पितृतर्पणम् । कुरुक्षेत्रादिवासाच्च प्राक्पापानां विनाशनम् ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचदशोत्तरशताधिकसहस्रतमः ॥ १११५ ॥

श्रीसूर्य उवाच ।

चक्रपादरुजायुक्तश्चात्र जन्मनि जायते । पूर्वजन्मनि यो मोहाच्छ्वानंवध्यात्पतत्त्रिण ॥ १ ॥
निष्कत्रयं प्रदातव्यं सुवर्णं वेदपारगे । दानेनानेन विधिना पूर्वपापापनोदनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षोडशोत्तरशताधिकसहस्रतमः ॥ १११६ ॥

श्रीसूर्य उवाच ।

यः शूद्रं घातयेन्मोहात्पूर्वजन्मनि मानवः । दन्तपातनजाद्रोगात्पीडामाप्नोति निश्चयात् ॥ १ ॥
दद्याद्धेनुं सवत्सां च सर्वालङ्कारभूषिताम् । प्राजापत्यं चरेदेकं विधिना रोगनाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तदशोत्तरशताधिकसहस्रतमः ॥ १११७ ॥

श्रीसूर्य उवाच ।

या नारी मोहतो हन्याच्छ्वानं हि गरुडाग्रज । पूर्वजन्मनि सा चात्र वक्रपादेन पीड्यते ॥ १ ॥
तया तत्पापशुद्ध्यर्थं स्वर्णं निष्कत्रयं सुत । देयं विप्रायविधिना चक्रपादप्रणाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टादशोत्तरशताधिकसहस्रतमः ॥ १११८ ॥

श्रीसूर्य उवाच ।

शूद्रघातकरी पूर्वं या काचित्पापमोहिता । सात्र जन्मनि दुःखार्ता दन्तपाताख्यया रुजा ॥ १ ॥
विधिवद्धेनुदानाच्च ब्राह्मणाय कुटुम्बिने । प्राजापत्यव्रतादेकात्तस्मात्पापात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनविंशोत्तरशताधिकसहस्रतमः ॥ १११९ ॥

श्रीसूर्य उवाच ।

कश्चिदासीत्पुरा सूत वाहुजो ज्ञानदुर्बलः । शिवभक्तिपरो नित्यं देवतातिथिपूजकः ॥ १ ॥
देशे मालवके पुण्ये स्थले पूर्वभवेऽण्डज । तत्र दानानि दत्तानि ब्राह्मणस्य करग्रहे ॥ २ ॥
स कदाचिन्महाभाग पापाचाररतो ह्यभूत् । स्वज्ञात्या वै धृतो गर्भः कामलोभेन तेन वै ॥ ३ ॥
यत्ने कृतेऽपि तस्यास्तु नाभूद्गर्भस्य पातनम् । मृता सा तेन दुःखेन गर्भपातेन चाण्डज ॥ ४ ॥
एवं बहुतिथे काले गतः स यमशासनम् । भुक्त्वा पापजदुःखानि पुण्यालोकान्शुभानिह ॥ ५ ॥
पूर्वपुण्यप्रभावेण स जातः पादजोऽधुना । गोदावर्याः समीपे तु देशे रम्ये कलाश्रये ॥ ६ ॥
स रक्तकृष्णो मतिमान्नातिदीर्घः पृथुः सुधीः । आदिभागे धनी रोगी मध्यमे त्वतिसौख्यभाक् ७
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । अतिचिन्तायुतश्चात्र दाने स्वल्पमतिः शठः ॥८॥
स्वज्ञात्यां वीर्यदानाच्च जातपुत्रविनाशकः । लक्ष्मैतदण्डजश्रेष्ठ जन्माङ्गात्पष्ठभावगः ॥ ९ ॥
भौमः सुतेश्वरः पापग्रहैर्युतनिरीक्षितः । लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥ १० ॥
पलद्वयमिता कार्या वाहुजा गर्भसंयुता । सर्ववयसंयुक्ता सौवर्णी भूषणान्विता ॥ ११ ॥
तदर्धार्धमिता वापि निजवित्तानुसारतः । संपूज्य वेदविदुषे दद्याद्दोषापनुत्तये ॥ १२ ॥
माषैः सप्तभिर्तैर्दैयो भौमः स्वर्णमयः शुभः । गायत्रीमयुतं जप्त्वा त्र्यम्बकं तु सहस्रकम् ॥१३॥
होमयेत्तद्दशांशेन कपिलैकां प्रदापयेत् । य एवं कुरुते सूत प्रायश्चित्तं हि पापहृत् ॥ १४ ॥
तस्य पुत्रविंवृद्धिस्तु जन्मन्यत्रैव जायते । नैवं करोति यो मोहाल्लोभात्पापविशोधनम् ॥ १५ ॥

न जीवंते सुतास्तस्मिञ्जीविते नात्र संशयः । आयुरष्टाद्विवर्षाणि प्रायश्चित्ते कृतेऽधुना ॥ १६ ॥
प्रायश्चित्ते कृते रिष्टं पञ्चाशन्मितकेन्दके ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो विंशत्युत्तरशताधिकसहस्रतमः ॥ ११२० ॥

श्रीसूर्य उवाच ।

यश्च वभ्रुं महाभाग हन्यान्मोहान्नराधमः । वभ्रुमण्डलरोगार्त्तः सोऽत्र जन्मनि जायते ॥ १ ॥
निष्कद्वयहिरण्यस्य कृत्वात्र नकुलं शुभम् । वभ्रुमण्डलनाशार्थं ब्राह्मणाय प्रदापयेत् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकविंशत्युत्तरशताधिकसहस्रतमः ॥ ११२१ ॥

श्रीसूर्य उवाच ।

काचिच्चारणजा नारी बभूव प्रियवादिनी । व्रतदानरता साध्वी पूर्वजन्मनि चाण्डज ॥ १ ॥
तया ग्रामान्तरे गत्वा निर्दग्धं गह्वरं वनम् । निर्दग्धा बहवस्तत्र जीवास्तस्याश्रयं गताः ॥ २ ॥
ततो बहुतिथे काले प्राप्य तज्जनितं फलम् । तत्तद्दानवशात्पूर्वादत्र सा पादजाभवत् ॥ ३ ॥
जीवघातात्तथा पूर्वात्पापाच्चत्रैव जन्मनि । जाता सन्ततिहीना सा कुष्ठरोगेण पीडिता ॥ ४ ॥
प्रायश्चित्तं प्रवक्ष्यामि येन संपद्यते सुखम् । गृहं वित्तखडंशेन देया जीवाः सुवर्णजाः ॥ ५ ॥
घटयित्वा विधानेन नानारूपा गृहोरगाः । शक्त्या प्रपूज्य विप्रेन्द्रांस्तस्मात्पापात्प्रमुच्यते ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वाविंशत्युत्तरशताधिकसहस्रतमः ॥ ११२२ ॥

अरुण उवाच ।

तुर्यामवस्थां संप्राप्य पुत्रशोकाकुलो नरः । जायते केन पापेन कथ्यतां दिवसेश्वर ॥ १ ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम् । बभूव यामुने देशे क्षत्रियो धनवान् सुखी ॥ २ ॥
राजमंत्री महाप्राज्ञो धर्मशास्त्रार्थकोविदः । बुद्धिमान्नीतिमान्वाग्मी शूरो धीरो महायशाः ॥ ३ ॥
सन्धिविग्रहसंयुक्तो दाता भोक्ता प्रियंवदः । बहुग्रामाधिपो दक्षो भृत्यवाहनसंयुतः ॥ ४ ॥
दत्तानि तेन दानानि संवत्सरमितं खग । स्वाश्रमं पुनरागत्य धर्मवेत्तापि बाहुजः ॥ ५ ॥
कृतवान्दारुणं कर्म भाविनोऽर्थस्य वै बलात् । स्वस्वामिवधसंज्ञं तु पापमुग्रं खगेश्वर ॥ ६ ॥
तस्य स्वामी महाराजः कनिष्ठाया वशं गतः । ज्येष्ठां सुतद्वययुतां त्यक्तवान् विनतात्मज ॥ ७ ॥
राज्याधिकारिणमपि कनिष्ठावशगो नृपः । कनिष्ठायाः सुतायाभूद्राज्यदाने समुत्सुकः ॥ ८ ॥
ततो मंत्रिवरो राज्ञो ज्येष्ठपुत्रयुगेन वै । मिलित्वा कैश्चिदन्यैश्च तयोर्मातृसहोदरैः ॥ ९ ॥
विषादिकप्रपञ्चेन जघान च महीपतिम् । तज्ज्येष्ठाय ददौ राज्यं राजपुत्राय वै खग ॥ १० ॥
ततो बहुतिथे काले कनिष्ठस्य सहायतः । बवाय तस्य राज्ञोऽपि समुद्युक्तः स बाहुजः ॥ ११ ॥
तज्ज्ञात्वा नृपतिर्वीरं कृतवान्शासनं तदा । शस्त्रेण चात्मघातं हि कृतवान्कश्यपात्मज ॥ १२ ॥
यमलोकं समासाद्य भुक्त्वा पापफलं ततः । पुण्यात्स्वर्गफलं भुक्त्वा पूर्वपुण्यावशेषतः ॥ १३ ॥
हिमालये पुण्यदेशे भागीरथ्यास्तटे शुभे । जातो द्विजवरो धीमानुच्चः स्थूलो महायशाः ॥ १४ ॥
स तु मध्यमरूपाढ्यो रक्तगौरो विचक्षणः । स्वधर्मनिरतो दक्षो देवद्विजपरायणः ॥ १५ ॥
राजमान्यः प्रतापी च भृत्यवाहनसंयुतः । बहुग्रामाधिपः सर्वशास्त्रविच्छिवभक्तिमान् ॥ १६ ॥
परोपकारनिरतः सन्धिविग्रहसंयुतः । सर्वविद्यासुवेत्ता च नीतिविच्चापि चाण्डज ॥ १७ ॥

देशेदेशेतिविख्यातो भोक्ता सर्वजनप्रियः । स्मेरवक्त्रः सुभाषी च सत्पौत्रेण समन्वितः ॥ १८ ॥
वेदान्तविद्योगवेत्ता सर्वदा कौतुकप्रियः । पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् ॥ १९ ॥
बाल्ये पित्रोः सुखैर्हीनः कैशोरे युवभावके । सहोदरसुखैर्हीनो जायासुखविवर्जितः ॥ २० ॥
वार्धके पुत्रहीनश्च मनोदुःखसमन्वितः । गतागतधनैर्युक्तः सर्वसंगविवर्जितः ॥ २१ ॥
प्राग्भवे राजघाते च सहायौ यौ नृपात्मजौ । जातौ तावत्र जन्तुपि पितरौ निधनं गतौ ॥ २२ ॥
यामवस्थां तु संप्राप्तावभूतान्तौ सहायकौ । तामवस्थामिह प्राप्य पुत्रौ निर्वंशतां गतौ ॥ २३ ॥
वातरोगान्वितो गेहे सर्वदा कलहाकुलः । श्रद्धावानपि सर्वत्र स्वीयश्रद्धाविवर्जितः ॥ २४ ॥
प्राग्राजघातजात्पापात्सन्तानसुखवर्जितः । जन्मलग्नात्सुतस्थाने क्रूरग्रहसमन्विते ॥ २५ ॥
सप्तमे भवने क्रूरदृष्टिर्मृगगते विधौ । लग्ने श्वेतादृशे चैव जातोऽयं ब्राह्मणोऽधुना ॥ २६ ॥
श्लेष्मलः सर्वदा वातपीडायुक्तस्त्रिकांघ्रिषु । कदाचित्कर्णपीडायुक् कदाचिन्नेत्ररोगयुक् ॥ २७॥
कदाचिज्ज्वरवांश्चैव तथाऽप्राप्तमनोरथः । राजलोकप्रियोऽपीह राजभीतिषु शङ्कितः ॥ २८ ॥
विचिकित्सापरो जायासंगमेष्वप्रसन्नधीः । दयावानपि लोकेषु कायत्रिगुणसंयुतः ॥ २९ ॥
हृत्पूर्वे वामभागेऽपि लशुनं दृश्यते जनैः । प्रागात्मघातजं चिह्नं स्फुटं हि विनतात्मज ॥ ३० ॥
यो राजा निहतोऽनेन प्राग्भवे कश्यपात्मज । तद्भार्यात्वत्र जन्तुपि पुत्र्यो जाताः सुदुःखदाः॥३१॥
लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् । पलत्रयेण कर्तव्यो बाहुजस्तु हिरण्मयः ॥ ३२ ॥
गन्धपुष्पैः समभ्यर्च्य देयो विधिविदे सुत । तद्वत्कुर्यान्महाभाग लक्ष्मीनारायणं शुभम् ॥ ३३॥
दद्याद्वेदविदे सूत दरिद्राय कुटुम्बिने । स्वात्मघातजपापाच्च मुच्यते नात्र संशयः ॥ ३४ ॥
गायत्रीं दशसाहस्रं त्र्यम्बकं द्विविधं तथा । अष्टोत्तरं महामंत्रं जपेद्विंसहस्रकम् ॥ ३५ ॥
होमयेत्तद्दशांशेन शक्त्या विप्रांश्च भोजयेत् । पार्थिवानां शिवानां च नियुतैकप्रमाणतः ॥ ३६ ॥
पूजयेद्विधिना सूत पूर्वपापापनुत्तये । य एवं कुरुते सूत पूर्वजन्मार्जनाशनम् ॥ ३७ ॥
न तस्य दुष्कृतं किंचिन्नाधयो व्याधयो न च । अशीतिमितवर्षे तु रिष्टं तस्य न जायते ॥ ३८ ॥
गजनागमिताब्दांतं जीवनं तस्य निश्चितम् । पुत्रप्राप्तिर्भवेत्तस्य सर्वजीवदयावतः ॥ ३९ ॥
वार्धकेऽपि महाभाग जीवत्पुत्रो हि जायते । सद्गतिं समवाप्नोति यद्गत्वा न निवर्तते ॥ ४० ॥
नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् । सप्तजन्मसु दुःखी स्यान्नात्र कार्या विचारणा॥४१॥
जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् । यद्यदन्तर्गतं सूत जन्मभात्तद्विलोकयेत् ॥ ४२ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोविंशत्युत्तरशताधिकसहस्रतमः ॥ ११२३ ॥

श्रीसूर्य उवाच ।

बभूव बाहुजः कश्चिद्देशे पञ्चनदे पुरा । धनधान्यसमायुक्तः पापकर्मा महोद्यमी ॥ १ ॥
विप्रोत्सङ्गगतः सोऽपि प्रयागे गरुडाग्रज ! । स स्नातो मृगगे भानौ धूर्तो धर्मक्रियोज्झितः ॥ २ ॥
स प्राप्य स्वगृहं शीघ्रं कृतवान्कर्म दारुणम् । ग्रामे निवसतोऽन्यस्य क्षत्रियस्य विशेषतः ॥ ३ ॥
ददाह भवनं रम्यं वैरिभावात्पुरानव । तत्रैका वत्सरी दग्धा जीवाश्चापि विशेषतः ॥ ४ ॥
कालयोगेन संप्राप्तः स गत्वा यमशासनम् । पापपुण्यफलान्येवं भुक्त्वा ह्यधमकर्मकृत् ॥ ५ ॥
पूर्वपुण्यप्रभावेण स जातः पादजोऽधुना । गङ्गायाः प्राक् परे देशे शतयोजनसंमिते ॥ ६ ॥
स मध्यरूपो बलवान्धर्मे स्वल्पमतिः शठः । बुद्ध्या चिरप्रचारी च पैतृकस्वल्पवित्तभाक् ॥ ७ ॥
सकन्यश्च सपत्नीको बन्धुभृत्यसमन्वितः । पुण्यादिदं फलं पूर्वपापादथ फलं शृणु ॥ ८ ॥

गोबालवत्सकवधाज्जीववधात्पुत्रकः । सप्तवेदमिताब्दान्तं जातपुत्रविनाशकः ॥ ९ ॥
गोस्त्रीविप्रवधादीनि पापान्यर्भकहानि हि । गोराशिगे शनौ सोमात्षष्ठे जीवे मृगस्थिते ॥ १० ॥
लक्ष्मैतदण्डजश्रेष्ठ पृच्छकस्यात्र जन्मनि । पूर्वे या स्त्री सहायासीन्मृतवत्सा च सा सुत ॥ ११ ॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन्सर्वपापनिषूदिनीम् । पुत्रवृद्धिकरीं धन्यामत्र जन्मनि निश्चयात् ॥ १२ ॥

श्रीसूर्य उवाच ।

शृणु सूत प्रवक्ष्यामि निष्कृतिं पापशोधिनीम् । पञ्चस्वर्णमिता कार्या सुरभी च हिरण्मयी ॥ १३ ॥
तदर्द्धार्द्धा च शक्त्या वै विधिज्ञाय प्रदापयेत् । मंत्रमेतं समुच्चार्य पूर्वपापात्प्रमुच्यते ॥ १४ ॥

मंत्रः ।

"स्वज्ञातिजेतिचपले यन्मया पापमर्जितम् । यद्गर्भघातनं घोरं ज्ञानाज्ञानाच्च यत्कृतम् ॥ १५ ॥
त्वन्नाशनं च सुरभे तस्मात्त्वां तु हिरण्मयीम् । ददेऽहमत्र विप्राय तत्पापान्मां प्रमुंचतु" ॥ १६ ॥
सुवर्णैकमितं कुर्याद्ब्रह्माणं च हिरण्मयम् । स्त्रीपतिं पूज्य गन्धाद्यैर्दद्यात्पापापनुत्तये ॥ १७ ॥
तदर्धमितकं केतुं सौवर्णं च प्रदापयेत् । गायत्र्यष्टसहस्राणि सहस्रं त्र्यम्बकाभिधम् ॥ १८ ॥
अष्टाक्षरं त्रिसाहस्रं जपेन्मंत्रान्प्रयत्नतः । होमयेत्तद्दशांशेन शक्त्या दद्याच्च दक्षिणाम् ॥ १९ ॥
विप्रांश्च भोजयेत्पश्चात्स्वयं भुञ्जीत वाग्यतः । होमांते कपिलां दद्यात्पूर्वपापात्प्रमुच्यते ॥ २० ॥
य एवं कुरुते सूत पूर्वपापविशोधनम् । स मुच्यते गर्भपाताद्व्यभिचारान्न संशयः ॥ २१ ॥
अनेन विधिना सूत यः कुर्यात्पापशोधनम् । तस्य पुत्रविवृद्धिः स्याज्जन्मन्यत्र न संशयः ॥ २२ ॥
नैवं विधानं यः कुर्याल्लोभान्मोहाद्विशेषतः । पञ्चवेदाब्दपर्यन्तं न च पुत्रसुखं लभेत् ॥ २३ ॥
पञ्चवेदमिते वर्षे रिष्टं चाकृतनिष्कृतेः । प्रायश्चिते कृते त्वायुश्चतुःसप्ततिवर्षकम् ॥ २४ ॥
नाधयो व्याधयस्तस्य नान्यरिष्टभयं भवेत् । जन्मत्रयमपुत्रः स्यात्प्रायश्चित्तेऽकृते धुना ॥ २५ ॥
पुत्रपौत्रविवृद्धिः स्यात्प्रायश्चित्ते कृते सति । जननं युग्मगे जीवे निधनं कर्कटे स्थिते ॥ २६ ॥
जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् । अन्यदन्तर्गतं सूत जन्मशास्त्राद्विलोकयेत् ॥ २७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्विंशत्युत्तरशताधिकसहस्रतमः ॥ ११२४ ॥

श्रीसूर्य उवाच ।

या काचिद्ब्राह्मणी पूर्वं भवे मोहात्सुरां पिबेत् । प्रदरेणैव रोगेण जन्मन्यत्र प्रपीडिता ॥ १ ॥
काशीवासान्महाभाग तद्देशमरणात्तथा । प्रदरात्सा विमुच्येत पार्थिवानां प्रपूजनात् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचविंशत्युत्तरशताधिकसहस्रतमः ॥ ११२५ ॥

श्रीसूर्य उवाच ।

प्रागासीन्मुखजः कश्चिद्वेदशास्त्रसमन्वितः । देशे गुर्जरके सूत राजपूज्यो दृढव्रतः ॥ १ ॥
स्त्रीपुत्रधनसंपन्नः शिवभक्तिपरायणः । कृतवान्सोऽपि दानानि ब्राह्मणेभ्योऽल्पशक्तितः ॥ २ ॥
गोशय्याभूमिभक्ष्याणि विविधान्नानि पर्वसु । अध्यापितास्तथा विप्रास्तेन सर्वं विजानता ॥ ३ ॥
तिलधेनोस्तथा लोभात्कृतो ह्युग्रप्रतिग्रहः । न कृतं शोचनं मोहात्पापमुग्रमुपार्जितम् ॥ ४ ॥
स युक्तः पुण्यपापाभ्यां प्राप्तो धर्मपुरं प्रति । भुक्त्वा शुभाशुभाँल्लोकान्विद्यादानप्रभावतः ॥ ५ ॥
शतद्रुकासरस्वत्योर्मध्ये जातो द्विजोऽधुना । स रक्तगौरो मतिमान्विद्याभ्यासरतः क्षमी ॥ ६ ॥

स्त्रीपुत्रधनसंयुक्तः पितृभ्रातृसुखान्वितः। नातिदीर्घोऽतिलोभाढ्यो बहुमित्रः प्रियंवदः ॥ ७ ॥
लाभालाभे समश्चात्र भृत्यवाहनभोगभाक्। कासरोगयुतश्चात्र तिलधेनोः पुराग्रहात् ॥ ८ ॥
चिह्नमत्र जनुर्लग्नाच्चन्द्रः पापान्वितो रिपौ। गुरुः सप्तमभावस्थः प्रष्टुस्त्रैव जन्मनि ॥ ९ ॥
लक्षणैरेभिराढ्यस्य वक्ष्येऽहं पापशोधनम्। धेनुं हिरण्मयीं कृत्वा पलपञ्चमितां शुभाम् ॥ १० ॥
द्रोणपञ्चमितैर्युक्तां गन्धपुष्पाद्यलंकृताम्। दद्याद्विप्राय विदुषे कासरोगप्रशान्तये ॥ ११ ॥
ब्रह्मविष्णुशिवार्कानामेकैकपलसंयुताम्। कृत्वा सुरूपां प्रतिमां पत्रे लेख्यां प्रयत्नतः ॥ १२ ॥
पूर्वपापविशुद्ध्यर्थं विधिज्ञाय निवेदयेत्। चतुर्विंशतिसहस्राणि गायत्रीं च जपेद्बुधः ॥ १३ ॥
होमयेच्च तिलैस्तद्वच्छक्त्या विप्रांश्च भोजयेत्। अनेन विधिना यस्तु प्रायश्चित्तं समाचरेत् ॥ १४॥
कासश्वासान्महारोगान्मुच्यते नात्र संशयः। नाधयो व्याधयस्तस्य प्रायश्चित्ते कृते त्विह ॥१५॥
पञ्चपञ्चाशदब्दान्तमायुरत्र प्रकीर्त्तितम्। प्रायश्चित्ते कृते सूत सप्तविंशमितेऽब्दके ॥ १६ ॥
रिष्टं च दारुणं प्रोक्तं तस्य चाकृतनिष्कृतेः ॥ १७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चविंशत्युत्तरशताधिकसहस्रतमः ॥ ११२६ ॥

श्रीसूर्य उवाच।

कुरुदेशे द्विजः कश्चिन्मृगं घातितवान्पुरा। तस्मान्मृगवधादत्र पाददुःखप्रपीडितः ॥ १ ॥
चिह्नमत्र मृगोऽङ्गेस्ति रिष्टेशः पादभे स्थितः ॥ २ ॥

अरुण उवाच।

श्रुतमत्राद्भुतं देव पापपुण्यफलं त्विदम्। प्रमुच्यते पूर्वपापाद्यथा तद्वद शोधनम् ॥ ३ ॥

श्रीसूर्य उवाच।

शृणु सूत प्रवक्ष्यामि प्रायश्चित्तं परं त्विह। एकादशसहस्रं तु पार्थिवानां तु पूजयेत् ॥ ४ ॥
गन्धपुष्पोपचारैश्च नैवेद्यैर्विविधैस्तथा। शतमेकादशमितं स्तोत्रं हैरण्यगर्भजम् ॥ ५ ॥
पठेद्भक्त्या च मत्प्रोक्तं पूर्वपापप्रणाशनम्। ततः पलैर्वेदमितैर्दद्या हैरण्मयी शुभा ॥ ६ ॥
सगर्भा ब्राह्मणी सूत तदर्द्धार्द्धमथापि वा। लक्ष्मीनारायणं दद्यात्सौवर्णं स्वर्णसंभवम् ॥ ७ ॥
संपूज्य विधिना मंत्रैः पुत्रपौत्रविवर्द्धनम्। हिरण्मयं मृगं कृत्वा पञ्चरत्नसमन्वितम् ॥ ८ ॥
पलैर्वेदमितैः सूत गन्धपुष्पैः प्रपूजयेत्। मंत्रमेतं समुच्चार्य विधिज्ञाय प्रदापयेत् ॥ ९ ॥

मन्त्रः।

"ज्ञानाज्ञानयुतं पापमर्जितं मृगघातनात्। तत्पापनाशनायैव ददेऽहं स्वर्णजं मृगम्" ॥ १० ॥
राजतं च तथा दद्यात्पवनं पादरोगनुत्। य एवं कुरुते सूत पूर्वपापविशोधनम् ॥ ११ ॥
तस्य सन्ततिवृद्धिः स्याज्जन्मन्यत्र पतत्रिण। पादरोगोपशमनं जायते पापशोधनात् ॥ १२ ॥
नैवं कुर्य्याच्च यो मोहात्प्रायश्चित्तं प्रयत्नतः। न भवन्ति सुतास्तस्मिन् जीविते नात्र संशयः १३॥
न च रोगोपशमनं जायतेऽत्र भवेण्डज। पञ्चत्रिंशन्मिते वर्षे रिष्टं चाकृतनिष्कृतेः ॥ १४ ॥
प्रायश्चित्ते कृते त्वायुर्वर्षाणां पञ्चसप्ततिम् ॥ १५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तविंशत्युत्तरशताधिकसहस्रतमः ॥ ११२७ ॥

श्रीसूर्य उवाच।

कैलासात्पतितः कश्चिद्रुद्रभक्तिपराङ्मुखः। शापान्नंदिगणाद्दुष्टो भविष्यति महीतले ॥ १ ॥
प्रसादितस्तदा तेन स्तुतिभिर्नन्दिकेश्वरः। अपि स्वल्पतरे काले शापमुक्तिं ददौ प्रभुः ॥ २ ॥

तस्य शापान्महाभाग जन्मन्यत्र जनिः स्वयम् । महाभूमिभुजां वंशे म्लेच्छानां गरुडाग्रज ॥ ३ ॥
पुष्करात्प्राक्परे देशे शुक्ले स्वोच्चे सुभावगे । मालव्ययोगे विख्याते सचन्द्रे बहुभिर्युते ॥ ४ ॥
गौरो यशस्वी मतिमान्नानारत्नचयैर्युतः । गजयूथैः समाक्रान्तो बहुभूपालसेवनः ॥ ५ ॥
नानावाहनसंयुक्तो बहुभोगसुतैस्तथा । सकलैश्वर्यवित्ताढ्यः स्वेच्छाद्रव्यान्वितस्तथा ॥ ६ ॥
दानानि शक्तितो दत्ते धर्मात्मा लोकविश्रुतः । रुद्रभक्त्यन्तरायाच्च न तु पूर्णमथोरथः ॥ ७ ॥
बहुभृत्यैः समायुक्तो यावज्जीवसुखान्वितः । पञ्चवेदमिते वर्षे रिष्टं शश्वच्च बन्धनात् ॥ ८ ॥
दृढकर्मकृतात्पापाद्रुद्रपूजनभङ्गजात् । प्रायश्चित्तं महाभाग नात्र जन्मनि विद्यते ॥ ९ ॥
चिह्नभङ्गात्तथा सूतेर्भौमो नीचोष्टमस्थितः । सूर्यसंगगताच्छुक्रात्संगान्मालव्यसंज्ञकात् ॥ १० ॥
नायुर्दायमवाप्नोति रिष्टान्तं जीवनं स्मृतम् ॥ ११ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टविंशत्युत्तरशताधिकसहस्रतमः ॥ ११२८ ॥

अरुण उवाच ।

भगवन्देवदेवेश श्रुतमेतन्महाद्भुतम् । सहानुगामिन्या नार्या गतिं मे ब्रूहि भास्कर ॥ १ ॥

श्रीसूर्य उवाच ।

मृतं प्रतीक्ष्य भर्तारं या विशेच्च हुताशनम् । तेन सार्द्धं महापुण्या ज्ञेयात्र सहगामिनी ॥ २ ॥
श्रुत्वा मृतं पतिं यात्र विदेशस्थं पतिव्रता । तद्क्षेण विशेदग्नौ सा ज्ञेया चानुगामिनी ॥ ३ ॥
धर्मात्पातिव्रतात्पूर्वे भवेत्मोक्षगतिर्द्वयोः । अथैका सा महासाध्वी जाता ब्रह्महदेण्डज ॥ ४ ॥
ब्राह्मणी तपसा युक्ता सदा भक्तिपरायणा । दानशीलरता पुण्या पुण्यकर्मान्विता सती ॥ ५ ॥
दृष्ट्वा मृतपतिं सा तु दिव्याभरणभूषिता । प्राप्ताग्नौ विधिना सूत कृत्वा पूजां हरेर्भृशम् ॥ ६ ॥
सा गता यमराजस्य स्कन्धे दत्त्वा पदाम्बुजम् । वैकुण्ठे चाण्डजश्रेष्ठ यद्गत्वा न निवर्त्तते ॥ ७ ॥
तल्लत्तातलघातेन मूर्च्छितोऽभूद्यमाधिपः । तत्कालेऽपृच्छि धीरेण नारदेन महात्मना ॥ ८ ॥
धर्मराज वदैतन्मे त्वत्तः परतरश्च कः । दण्डप्रदो महाभाग येन त्वं चालितोऽधुना ॥ ९ ॥
तमुवाच मुनिश्रेष्ठं या गताद्य शुभानना । सती तत्पादभारेण पीडितोऽहं भृशं द्विज ॥ १० ॥
मोक्षं गता महासाध्वी गृहीत्वा तु स्वकं पतिम् । महापापसमाक्रान्तं नरकस्थं द्विजोत्तम ॥ ११ ॥
सा गमिष्यति चेत्तत्र पत्युः पापावशेषतः । ब्राह्मणी योगयुक्ता च भविष्यति कलौ युगे ॥ १२ ॥
काश्यां मृत्युस्तयोर्यस्माच्छिवत्वमुपगच्छतः ॥ १३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनत्रिंशदुत्तरशताधिकसहस्रतमः ॥ ११२९ ॥

श्रीसूर्य उवाच ।

यः कामतश्चरेत्पूर्वे ब्रह्महत्यां नराधमः । क्षयरोगान्वितः सोऽपि जायते चात्र जन्मनि ॥ १ ॥
सुघोराद्ब्रह्महत्याख्यपापान्नास्त्यपरं त्वघम् । प्रायश्चित्तं मया नोक्तं पापान्मुक्तिस्त्रिजन्मनि ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिंशदुत्तरशताधिकसहस्रतमः ॥ ११३० ॥

अरुण उवाच ।

कश्चिद्विप्रो महासाधुश्चारुवर्णः प्रतापवान् । आचारकुलधर्मज्ञो देवाग्निगुरुवत्सलः ॥ १ ॥
संयुतो वायुपित्ताभ्यां किंचिद्वित्तसमन्वितः । तस्य भार्या सदाचारा किंचिच्च क्लेशकारिणी ॥ २ ॥
पतिभक्ता पतिप्राणा व्रतानामनुकांक्षिणी । पुत्रहीना कथं जाता कस्येदं कर्मणः फलम् ॥ ३ ॥

श्रीसूर्य उवाच ।

नारीणां जारगर्भाणामसतीनां कुलच्छिदाम् । यद्वाऽचिरप्रसूतानां शीघ्रं गर्भः समुद्भवेत् ॥ ४ ॥
औषधैः स्वेदनैरुग्रप्रलेपैर्दुष्टभक्षणैः । संवाहनैस्तथा घातैरन्यैर्वा वस्तिकर्मभिः ॥ ५ ॥
गर्भस्य पातनोपायं करोत्यपि च कीर्तितम् । पुंस्कृतं नैव तत्कर्म स्त्रीकृतं नात्र संशयः ॥ ६ ॥
नारी जन्मान्तरे प्राप्ते न सा गर्भं बिभर्ति हि । पूर्वं वैश्यकुले जाता सपत्नीसहिता खग ॥ ७ ॥
अनया ईर्ष्यया चैव सन्ततेर्नाशनाय च । औषधैश्छेदनाद्यैस्तु तस्यार्थे कल्पितो गदः ॥ ८ ॥
सपत्न्यै प्रेरयामास विधिना चैव तद्गदम् । तया वै ऋतुभावाच्च परिपीतं तदौषधम् ॥ ९ ॥
पुष्पं प्रणाशितं तस्यास्तस्मिञ्जन्मनि मानद । ऋतावृतौ च संप्राप्ते जाता सा विविधातुरा ॥ १० ॥
वेदना ह्यभवन्नित्यमसृग्वातोदरामयाः । पुष्पे नष्टे फलं नष्टं कदाचिद्गर्भपातनम् ॥ ११ ॥
तया चैतत्कर्म कृतं त्रिविधं गर्भदोषकृत् । अन्यस्या अपि गर्भस्तु निभृतं नाशितस्तया ॥ १२ ॥
ऋत्वभावो दुष्टबुद्ध्या कृतो वै पूर्वजन्मनि । तेनैव कर्मणा वत्स विविधं पुष्पबन्धनम् ॥ १३ ॥
गर्भाशयमधिश्रित्य स्रवति शोणितं बहु । छिद्यन्त इव गात्राणि सूचीभिरिव नित्यशः ॥ १४ ॥
वेदना याः पुरा जाताः स्त्रीणां गर्भनिपातने । यावत्तथेह चान्या हि सर्वा जाता हि दुःसहाः ॥ १५ ॥
तद्दोषपरिहारार्थं प्रायश्चित्तं समाचरेत् । सपत्नीगर्भघातस्य निष्कृतिं प्राक्समाचरेत् ॥ १६ ॥
रजतस्य पलाभ्यां वै कोशं गर्भाशयाकृतिम् । निष्केण स्वर्णगर्भं च कृत्वा दद्याद्विजन्मने ॥ १७ ॥

मन्त्रः ।

"गर्भपातं प्रकुर्वन्त्या मया प्राक्तनजन्मनि । यदद्य वन्ध्यकृत्प्राप्तं तस्मान्मोच्येह जन्मनि" ॥ १८ ॥
यस्मात्प्राक्पातितो गर्भः सपत्न्याः पतिवर्जिता । दीनानाथविरोधश्च तेनेयमसुता त्विह ॥ १९ ॥
अनुमन्त्री प्रयोक्त्री च पितृमातृसुखोज्झिता । बन्धुसन्ततिदुःखाढ्या मर्यादाद्यनवस्थितिः ॥ २० ॥
शोकः स्यादुदरे बाधा तद्वत्स्त्रीहादिविक्रिया । अन्तरा स्यन्दमानोपि गर्भः सन्नोपलभ्यते ॥ २१ ॥
अथान्यागर्भपातस्य सञ्चितस्येह निष्कृतिः । विस्तरात्तां प्रकुर्वीत येन सर्वाघसंक्षयः ॥ २२ ॥
तावदेव पतेद्गर्भो नान्यथात्वस्य संभवः । सुशुभे भूप्रदेशे तु पुराणोक्तविधानतः ॥ २३ ॥
संप्रणाशाय दुष्टस्य प्रायश्चित्तमिहैनसः । प्रौष्ठपद्यां तृतीयायां शुक्लायां व्रतमाचरेत् ॥ २४ ॥
यत्नेन गर्भिकाख्यं हि उपोषणपरायणा । पुष्पैर्नानाविधैः शुभ्रैरर्चयेद्गिरिजां सतीम् ॥ २५ ॥
केतकैर्गर्भसंयुक्तैश्चंपकैः कुमुदोत्पलैः । सौवर्णीं राजतीं ताम्रीं मूर्तिं गौर्याः प्रकल्पयेत् ॥ २६ ॥
हारनूपुरकोटीरकुण्डलाभरणादिकैः । नैवेद्यैः शुभ्रकासारमोदकापूपपायसैः ॥ २८ ॥
उपतिष्ठेत विधिवद्भवानीप्रियवल्लभम् । पतिपुत्रवतीभिस्तु स्त्रीभिः सह शुचिस्मिता ॥ २९ ॥
रात्रौ जागरणं कुर्याद्गीतनृत्यादिपूर्वकम् । फलैर्नानाविधैरर्घं दद्यान्मंत्रपुरःसरम् ॥ ३० ॥
फलपुष्पाक्षतोपेतमंजनं मूर्ध्निनिक्षिपेत् । नमस्तेस्तु महादेवि नमस्ते गिरिशप्रिये ॥ ३१ ॥
गृहाणार्घमिमं देहि पुत्रान्मह्यं यशस्विनः । पतिपुत्रवती नारी गिरिजावत्प्रसूयते ॥ ३२ ॥
एवं रात्रौ विधानेन पूजयेत्परमेश्वरीम् । ततः प्रभाते विमले कृतप्रातःक्रिया सती ॥ ३३ ॥
देवमुद्दिश्य विधिवद्भोजयेत्षोडश स्त्रियः । नानाविधैर्भक्ष्यभोज्यैर्ब्राह्मणानथ षोडश ॥ ३४ ॥
प्रत्येकं वैणवं पात्रं सप्तधान्यसमन्वितम् । सौभाग्याष्टकसंयुक्तं वस्त्रयुग्मेन संयुतम् ॥ ३५ ॥
दातव्यं गिरिजाप्रीत्यै पुत्रसौभाग्यकाम्यया । सगर्भां च वृषोपेतां सिताङ्गां वस्त्रसंयुताम् ॥ ३६ ॥
सहिरण्यां ततो दद्याद्विप्राय गुणशालिने ॥ ३७ ॥

मन्त्रः

"अपातयं पुरा गर्भं दुष्टस्त्रीणां वशं गता ॥
यदत्र वन्ध्यताहेतुस्तस्मान्मोचय माम्बिके । तव दानेन पुत्रा मे भवेयुः सुभगाः सति"॥ ३८ ॥
इमं मंत्रं समुच्चार्य दत्त्वा विप्रं विसर्जयेत् । एवं व्रतपरा नारी गर्भपातं न पश्यति ॥ ३९ ॥
लभते पुत्रपौत्राद्यान्स्वयं तैः सह मोदते । सपत्नीगर्भघातस्य प्रायश्चित्तेप्ययं विधिः ॥ ४० ॥
शुभार्थिन्या प्रकर्तव्यो नात्र कार्या विचारणा ॥ ४१ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकत्रिंशदुत्तरशताधिकसहस्रतमः ॥ ११३१ ॥

श्रीसूर्य उवाच ।

सीमावादरतः कश्चिद्ब्राह्मणः पूर्वजन्मनि । तेन तत्र द्विजः सूत घातितो भूमिलोभतः ॥ १ ॥
सहायपञ्चयुक्तेन कृतं कर्मातिदारुणम् । तत्पापकर्मणो घोरान्नरकान्प्राप्य दारुणान् ॥ २ ॥
तिर्यक्त्वं च तथा सूत विभुज्याधर्मतः स्वयम् । कर्मक्षयेऽथ पुण्यात्प्राक्सोऽत्र जातो हि बाहुजः३
क्षयरोगयुतः सूत कृशो दुःखातुरो भृशम् । लग्ने कुम्भाभिधे सूत भौमचन्द्रयुतेऽण्डज ॥ ४ ॥
रिष्टं षष्ठमिते वर्षे जायतेऽकृतनिष्कृतेः । सहायाः पूर्वजा ये तु तेषां वक्ष्यामि लक्षणम् ॥ ५ ॥
तदा ते तु मृताश्चात्र पुत्राः क्षयरुजान्विताः । रिष्टेन चायुषो भङ्गो दृढपापान्न निष्कृतिः ॥ ६॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वात्रिंशदुत्तरशताधिकसहस्रतमः ॥ ११३२ ॥

श्रीसूर्य उवाच ।

राजपुत्रोऽभवत्कश्चिद्धर्मशास्त्रार्थकोविदः । गत्वा शत्रुपुरं सूत कदाचिन्मदसंयुतः ॥ १ ॥
ददाह तत्पुरं शत्रोस्तत्क्षणं लुण्ठितं पुनः । तत्रैको ब्राह्मणो दग्धो वृद्धो विद्याविशारदः ॥ २ ॥
पापमाचरितं तेन चाज्ञानाद्ब्रह्मघातजम् । अथो यमाज्ञया भुक्ता नाना नरकयातनाः ॥ ३ ॥
पुण्यशेषादथोऽत्रापि स जातः क्षत्रियाधरः । देशेऽयोध्याभिधे गौरो लघुर्दक्षो महोद्यमी ॥ ४ ॥
युवभावे महाभाग राजयक्ष्मप्रपीडितः । ब्रह्महा क्षयरोगी स्यादिति वेदविदो विदुः ॥ ५ ॥
निष्कृतिं तस्य वक्ष्यामि यां कृत्वा मुच्यतेऽधुना । कार्यास्तत्र त्रिवेदानां मूर्तयस्तु यथोदिताः॥६॥
ब्रह्मविष्णुमहेशानां सर्वरोगविनाशिकाः । सुवर्णजास्तथा कार्याः कदलीपत्रसंयुताः ॥ ७ ॥
यथा वित्तानुसारेण वित्तशाठ्यं विवर्जयेत् । देयास्ता विप्रमुख्येभ्यः क्षयरोगोपशान्तये ॥ ८ ॥
ब्राह्मणान्भोजयेच्छक्त्या होमयेच्च जपेत्तथा । गायत्रीं विधिना सूत पूर्वपापापनुत्तये ॥ ९ ॥
एवं कृते महाभाग क्षयस्तस्यात्र शाम्यति । नैवं कुर्यात्तु यो मोहाद्रिष्टं विंशन्मितेऽब्दके ॥१०॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयस्त्रिंशदुत्तरशताधिकसहस्रतमः ॥ ११३३ ॥

श्रीसूर्य उवाच ।

या काचिदाचरेत्कामात्पूर्वजन्मनि निश्चयात् । ब्रह्महत्यामथात्रैव सा ज्ञेया क्षयरुग्युता ॥ १ ॥
न तस्याः पापशमनं मयोक्तं च पतत्रिण । महापापकृताद्रोगान्मृत्युरेव न संशयः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुस्त्रिंशदुत्तरशताधिकसहस्रतमः ॥ ११३४ ॥

श्रीसूर्य उवाच ।

स्वसृघाती च पुरुषः पूर्वजन्मनि मानद । बधिरो जायते त्वत्र प्रायश्चित्तं च तच्छृणु ॥ १ ॥

चान्द्रायणव्रतं कुर्यात्सुवर्णपलसंयुतम् । पुस्तकं विधिवद्दद्यात्तस्मात्पुण्यात्प्रमुच्यत ॥ २ ॥
भोजयेच्च यथाशक्ति होमयेच्च स्वशक्तितः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचत्रिंशदुत्तरशताधिकसहस्रतमः ॥ ११३९ ॥

श्रीसूर्य उवाच ।

या काचिदाचरेन्नारी पापकृद्ब्रह्मघातनम् । अज्ञानादन्यजनुषि क्षयरुक्पीडिता हि सा ॥ १ ॥
महापापात्कृताद्घोरात्सा हि सर्वस्वदानतः । क्षयरोगात्प्रमुच्येत नात्र कार्या विचारणा ॥ २ ॥
प्रयागे मकरस्थेऽर्के स्नानात्त्वत्रैव जन्मनि । काश्या वासात्तथा सूत मुच्यते ब्रह्महत्यया ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्त्रिंशदुत्तरशताधिकसहस्रतमः ॥ ११३६ ॥

श्रीसूर्य उवाच ।

मूकः प्रजायते जन्तुर्यः पूर्वं भ्रातृघातकः । बभूव कामतः सूत प्रायश्चित्तं न तस्य हि ॥ १ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्रिंशदुत्तरशताधिकसहस्रतमः ॥ ११३७ ॥

श्रीसूर्य उवाच ।

कलिङ्गदेशे प्राक्सूत काचिद्विजधवा[1]ऽनना । पतिप्रिया धर्मशीला दानभोगरता सदा ॥ १ ॥
सा नार्यघातयत्पूर्वभवे मोहाच्च कुक्कुटम् । वक्रनासत्वमाप्नोति साऽत्र जन्मनि निश्चयात् ॥ २ ॥
हेमनिष्कत्रयं दद्यात्पवित्राय प्रयत्नतः । ब्राह्मणाय महाभाग पापनाशकरं परम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टत्रिंशदुत्तरशताधिकसहस्रतमः ॥ ११३८ ॥

श्रीसूर्य उवाच ।

बभूव बाहुजः कश्चिद्देशे पञ्चनदेऽण्डज । धनधान्यसमायुक्तः पापकर्मा महोद्यमी ॥ १ ॥
विप्रोत्सङ्गतश्चापि प्रयागे गरुडाग्रज । स स्नातो मृगगे भानौ धूर्तकर्मा क्रियोज्झितः ॥ २ ॥
स प्राप्य स्वगृहं शीघ्रं कृतवान् कर्म दारुणम् । ग्रामे निवसतोऽन्यस्य मिश्रकस्य पतत्रिण ॥ ३ ॥
ददाह भवनं रम्यं वैरभावात्पुरानघ । तत्रैका वत्सरी दग्धा जीवाश्चापि विशेषतः ॥ ४ ॥
कालयोगेन स प्राप्तः करालं यमशासनम् । फलानि पापपुण्यानां बुभुजे दुष्टधीश्च सः ॥ ५ ॥
पूर्वपुण्यप्रभावेण स जातः पादजोऽधुना । गङ्गायाः प्राक्परे देशे शतयोजनसम्मिते ॥ ६ ॥
स मध्यरूपो बलवान्धर्मे स्वल्पमतिः शठः । बुद्ध्याधिकप्रचारी च पैतृकस्वल्पवित्तभाक् ॥ ७ ॥
सकन्यश्च सपत्नीको बन्धुभृत्यसमन्वितः । पुण्यादिदं फलं पूर्वपापादथ फलं शृणु ॥ ८ ॥
गोबालदासघाताच्च जीवघातादपुत्रकः । सप्तवेदमिताब्दान्तं जातपुत्रविनाशकः ॥ ९ ॥
गोस्त्रीविप्रवधादीनि नाशयन्तीह बालकान् । गोराशिगे शनौ सोमात्षष्ठे जीवे मृगस्थिते ॥ १० ॥
लक्ष्मैतदण्डजश्रेष्ठ पृच्छकस्यात्र जन्मनि । पूर्वं या स्त्री सहायासीन्मृतवत्सा च सा पुनः ॥ ११ ॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन्सर्वपापनिषूदनीम् । पुत्रवृद्धिकरीं धन्यामत्र जन्मनि निश्चयात् ॥ १२ ॥

श्रीसूर्य उवाच ।

शृणु सूत प्रवक्ष्यामि निष्कृतिं पापशोधनीम् । पञ्चस्वर्णमिता कार्या सुरभी च हिरण्मयी ॥ १३ ॥
तदर्द्धमितका वापि द्वयोर्वित्तानुसारतः । संपूज्य विधिवन्मंत्रैर्देया विप्राय धीमते ॥ १४ ॥

---

१ द्विजधवश्चन्द्रः ।

मासैर्वह्निमितैर्देयस्तथा पशुपतिः सुत । मासाभ्यां च तथा वह्निर्जीवा मापचतुष्कजाः ॥ १५
देयाश्च विधिना सूत पूर्वपापापनुत्तये । जपेत्पशुपतेर्मंत्रं सहस्रं रिष्टनाशनम् ॥ १६
होमयेदष्टशतकं रुद्रस्याग्रे प्रयत्नतः । शृणुयाद्धरिवंशं वा दशावृत्त्या विधानतः ॥ १७
यः कुर्याद्विधिवत्सूत प्रायश्चित्तं त्रिधा मतम् । जीविष्यन्ति च तत्पुत्रा जन्मन्यत्र ममाज्ञया॥१८
नैवं कुर्याच्च यः शक्त्या त्रिष्वेकं पापशोधनम् । न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः॥१९
नवसप्तमितायुः स्यात्प्रायश्चित्ते कृतेऽधुना । सप्तवेदमिते वर्षे रिष्टं चाकृतनिष्कृतेः ॥ २० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनत्वारिंशदुत्तरशताधिकसहस्रतमः ॥ ११३९ ॥

श्रीसूर्य उवाच ।

काश्मीरमण्डले पूर्वे काचिद्विजधवानना । पतिप्रिया शीलयुता दानभोगरता सदा ॥ १ ॥
वैरभावात्तया साधोर्गृहं दग्धं द्विजस्य च । वैरिणश्च सुतो दग्धो गृहदाहे पतत्रिण ॥ २ ॥
साहाय्यात्स्वामिनः सर्वं प्राग्भवे समुपार्जितम् । तत्पापजान्महाघोरात्पुण्यात्प्राप्य शुभाशुभम्॥३॥
सैव जाता विराटेऽत्र पतिशुश्रूषणात्सुता । क्षत्रियस्य च धर्माढ्या पूर्वपुण्यात्तथा सती ॥ ४ ॥
क्षयरोगयुता बाल्ये बालघातादपुत्रिणी । महाग्निदाहपापाच्च प्रायश्चित्तं न तत्समम् ॥ ५ ॥
त्रयोविंशन्मिते वर्षे रिष्टेनैवात्र नश्यति । सहायस्तत्पतिश्चात्र पुत्रहीनः क्षयान्वितः ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चत्वारिंशदुत्तरशताधिकसहस्रतमः ॥ ११४० ॥

श्रीसूर्य उवाच ।

सारिकां यो महाभाग निहन्यात्पापमोहितः । तस्य च स्खलिता वाणी भवत्यत्रैव जन्मनि ॥ १ ॥
दद्याद्धिरण्मयीं तत्र सारिकां शुभलक्षणाम् । तथात्र पुस्तकं दद्याच्छास्त्रस्य विधिनाण्डज ॥ २ ॥
पूर्वपापात्प्रमुच्येत नरोऽत्र गतकल्मषः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकचत्वारिंशदुत्तरशताधिकसहस्रतमः ॥ ११४१ ॥

श्रीसूर्य उवाच ।

सारिकां यावधीन्नारी पूर्वपापविमोहिता । सात्र जन्मनि जायेत वचनस्खलिताण्डज ॥ १ ॥
तया देया सुवर्णस्य सारिका ब्राह्मणाय च । पूर्वपापाद्विमुच्येत सात्र वै विनतासुत ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विचत्वारिंशदुत्तरशताधिकसहस्रतमः ॥ ११४२ ॥

श्रीसूर्य उवाच ।

बकघाती च पुरुषः पूर्वजन्मनि मानद । लंबकण्ठः प्रजायेत सोऽत्र जन्मनि निश्चयात् ॥ १ ॥
गां दद्याद्विधिवच्छ्वेतां सर्वाभरणभूषिताम् । मुच्यते कण्ठजाद्रोगान्नात्र कार्या विचारणा ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादेकर्मविपाकेऽध्यायस्त्रिचत्वारिंशदुत्तरशताधिकसहस्रतमः ॥ ११४३ ॥

श्रीसूर्य उवाच ।

या नारी पूर्वजनुषि घातयेद्गरुडाग्रज । बकं सा कण्ठरोगेण बाध्यते चात्र जन्मनि ॥ १ ॥
गां दद्याद्विधिवत्सूत श्वेतामत्र पयस्विनीम् । यथोपस्करसंयुक्तां तस्मात्पापात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुश्चत्वारिंशदुत्तरशताधिकसहस्रतमः ॥ ११४४ ॥

श्रीसूर्य उवाच ।

कश्चिद्द्विजकुले जातो धार्म्मिको वित्तसंयुतः । उदरे वातजारोगा गुल्माद्याश्चोर्ध्वहृद्व्यथाः ॥ १ ॥
मोहाद्याः स्वल्पवीर्यत्वं पाण्डुरोगोदरामयः । जायते शीर्षजा पीडा बाल्ये स्याद्ग्रहणीगदः ॥२॥
शरीरे जायते वह्नेरुपघातो व्रणावलिः । पौत्राणां मातुलानां च स्वस्रादेर्विधवाव्यथा ॥ ३ ॥
दायादाच्छत्रुवर्त्पीडा भूमिद्रव्याभिलिप्सया । ऐहिकानि च लक्ष्माणि तस्य देहे त्विमानि हि ॥४॥
तस्य भार्या सदाचारा कदाचित्क्रोधवादिनी । गौरवर्णा शुभा वाणी सन्तोषप्रियकारिणी ॥ ५ ॥
मृतवत्सा कथं जाता स्थिरगर्भमवाप्नुयात् । दश मासा अतीता हि गर्भे चोदरसौख्यभाक् ॥६॥
केन कर्मविपाकेन सत्यं कथय भास्कर ॥ ७ ॥

श्रीसूर्य उवाच ।

पुंस्कृतं नैव तत्कर्म स्त्रीकृतं नात्र संशयः । पूर्वजन्मनि सा क्षात्रा संजाता विनतासुत ॥ ८ ॥
अज्ञानतिमिरान्धत्वात्स्त्रीणां कर्म दुरात्मनाम् । अजानती कुलस्त्रीणामाचारमनुकंपकम् ॥ ९ ॥
सर्वभूतेषु चात्मानं स्थावरेषु चरेषु च । प्रमादाद्वीपिनं सा वै जघान क्रूरसाहसा ॥ १० ॥
तस्या गेहाश्रिता नित्यं मार्जारशुनपूर्वकाः । पलालक्रीडनपरा गेहे संकुलिता भृशम् ॥ ११ ॥
तप्तासु वालुकाग्न्यंबुतप्तभस्मचयादिषु । आविक्षिप्तास्तया चाग्नौ पापाकुलितचेतसा ॥ १२ ॥
बालगर्भाशयान्बालानविस्पष्टाखिलेंद्रियान् । तांस्त्यक्त्वा निर्जने तेषां मातृभिर्बालघातिनी १३
मायावन्धनमात्रत्वाद्बालगर्भाश्रितास्तदा । तैस्ताः क्षिप्त्वा समिद्धेऽग्नौ भस्मसादकरोत्क्षणात् १४॥
विनिवेद्यन्ति प्रमादाद्येर्बालादीन्यापचेतसः । संतत्यभावस्तेषां वै नानादुःखौघ एव च ॥ १५ ॥
आनाय्याग्निं जनैस्ते वै प्रक्षिप्यन्ते गतायुषः । तथाविधेषु जीवेषु मृतेष्वपि च तद्वशात् ॥ १६ ॥
मृताश्च शिशवस्तेऽपि तदात्मदोषाचिह्निताः । अनले ज्वालिता ये वै बहवो लघुबालकाः ॥ १७ ॥
गर्भयुक्ता मृता ये वै मातृयुक्तास्तथैव च । लभन्ते सद्गतिं नैव मृतास्ते दग्धजंतवः ॥ १८ ॥
तेन कर्मविपाकेनास्थिरगर्भा मृतप्रजा । त्रिविधापत्यजा बाधा प्राप्यते जनुरन्तरे ॥ १९ ॥
जन्तवो गर्भगा ये के स्वकृतात्कर्मबन्धनात् । उभयोः कर्मणां हेतूँल्लभन्ते नात्र संशयः ॥ २०॥
तृतीयं जन्म चैतद्धि ब्रह्मवंशसमुद्भवम् । स्थिरगर्भा न यस्माद्धि पुत्रहीना पतत्रिण ॥ २१ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं नाथ येन गर्भः प्रजायते । ममोपरि कृपां कृत्वा सत्यं वद दिवस्पते ॥ २२ ॥

श्रीसूर्य उवाच ।

सुदिष्टे समनुप्राप्ते ग्रहेऽहनि शुभोदये । प्रागुदक्प्रवणे देशे गोमयाद्युपलिप्तके ॥ २३ ॥
तत्रोपजीविकं तीर्थं नानाचित्रविचित्रकम् । द्रोणमानतिलानां तु मध्ये गर्भं प्रपूरयेत् ॥ २४ ॥
निष्कमानसुवर्णस्य शकलं मध्यतः क्षिपेत् । तस्य पूर्वे च दिग्भागे तण्डुलद्रोणपर्वतम् ॥ २५ ॥
शुद्धतोयभृतं ताम्रपात्रं दशपलोन्मितम् । स्थापयेद्राजतं पद्मं तन्मध्ये पलनिर्मितम् ॥ २६ ॥
पूजयेच्च सपत्नीकं कश्यपं हि प्रजापतिम् । करे साक्षकरे दक्षे वामे चाथ कमंडलुम् ॥ २७ ॥
कृत्वा प्रतिष्ठितप्राणां मूर्तिं तां शुभलक्षणाम् । अर्चयेद्गन्धपुष्पाद्यैरुपचारैः पृथक्पृथक् ॥ २८ ॥
सम्यक् श्रद्धावती नारी त्रिविधापत्यदुःखिनी । विप्रं हि वेदविद्वांसं पूजयेद्विविधैर्धनैः ॥ २९ ॥
ततस्तं तु सपत्नीकं मुनीनां प्रवरं शुचिम् । सदक्षिणं विधायाथ गोवासोभिः प्रपूजयेत् ॥ ३० ॥

"मया जन्मान्तरे यच्च कृतं कर्मातिदारुणम् । लंघिताखीजनाचारा अजानंत्या दयादिकम् ॥३१॥
तत्पापं नाशयस्वाद्य दैवप्राप्तं विगर्हितम् । सम्यक् श्रद्धावती नारी मृतसन्ततिदुःखिनी ॥ ३२ ॥
सपत्नीकस्य सौवर्णीनिर्मितां मूर्तिमर्चिताम् । विप्राय वेदविदुषे प्रदद्याद्गुणशालिने ॥ ३३ ॥
दानान्ते कीर्तयेन्मंत्रं तिष्ठन्ती विहितांजलिः । यन्मया पूर्वजनुषि दयारहितचित्तया ॥ ३४ ॥
कृतं संप्राप्तमशुभं स्वामिंस्तच्छिन्धि साम्प्रतम् । दत्त्वा दानं च विप्राय सर्पिष्यात्मानमीक्षयेत् ३५
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचचत्वारिंशदुत्तरशताधिकसहस्रतमः ॥ ११४५ ॥

श्रीसूर्य उवाच ।

काकघाती महाभाग प्राग्भवे चात्र जन्मनि । कूर्चैर्हीनो भवेन्मर्त्यः स च तत्पापलाञ्छितः॥१॥
कृष्णधेनुप्रदानेन विधिनात्र खगाधिप । मुच्यते दुष्टपापाच्च कूर्चयुक्तश्चात्र जन्मनि ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्चत्वारिंशदुत्तरशताधिकसहस्रतमः ॥ ११४६ ॥

श्रीसूर्य उवाच ।

या पूर्वं घातयेत्काकं विनतानन्दवर्धन । सात्र जन्मनि पक्षीन्द्र कूर्चयुक्ता भवेदलम् ॥ १ ॥
कृष्णधेनुप्रदानेन यथोक्तं गरुडाग्रज । पूर्वपापविशुद्धिः स्यादत्र जन्मनि सुव्रत ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायःसप्तचत्वारिंशदुत्तरशताधिकसहस्रतमः ॥ ११४७ ॥

श्रीसूर्य उवाच ।

अभक्ष्यभक्षको यस्तु भवेत्प्राङ्मानवोण्डज । सोऽत्र जन्मनि पक्षीन्द्र जायते क्रिमिलोदरः॥ १ ॥
स भीष्मपञ्चकादत्र व्रतात्पुण्यसमर्जनात् । मुच्यते पूर्वरोगात्तु दुष्टात्सूत न संशयः ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टचत्वारिंशदुत्तरशताधिकसहस्रतमः ॥ ११४८ ॥

श्रीसूर्य उवाच ।

याऽभक्ष्यं भक्षयेन्नारी प्राग्भवे गरुडाग्रज । जायते जठरे तस्याः क्रिमिजोत्था हि रुक्सुत ॥१ ॥
तत्पापनाशनं कार्यं भीष्मपञ्चव्रतं शुभम् । कार्त्तिके शुक्लपक्षे च प्रान्तस्थदिनपञ्चके ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनपंचाशदुत्तरशताधिकसहस्रतमः ॥११४९ ॥

श्रीसूर्य उवाच ।

दुष्टस्पर्शेन यो मोहाद्भक्षयेद्विधिवर्जितम् । सिद्धान्नं नाग पुरा सूत जायतेऽत्र कृशोदरः ॥ १ ॥
विष्णुव्रतान्महापुण्यात्सर्वपापप्रणाशनम् । तथा कृशोदरत्वं च क्षिप्रं नश्यति काश्यपे ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाशदुत्तरशताधिकसहस्रतमः ॥ ११५० ॥

श्रीसूर्य उवाच ।

भुक्तं यया पुरा सूत सिद्धान्नं द्विजभार्यया । दुष्टस्पर्शेन सततं साऽत्र स्याच्च कृशोदरी ॥ १ ॥
सा वैष्णवव्रतात्तु स्वात्तस्मात्पापात्प्रमुच्यते । कृशोदरत्वथा तस्यास्तत्पापस्य प्रणाशनात् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायएकपंचाशदुत्तरशताधिकसहस्रतमः ॥ ११५१ ॥

श्रीसूर्य उवाच ।

द्विजः पूर्वभवे कश्चिदासीद्धर्मान्वितः सदा । सभार्यो नर्मदातीरे धनसौख्यसमन्वितः ॥ १ ॥
कृतानि तेन दानानि नानापर्वसु शक्तितः । वेदयुक्तेषु विप्रेषु सत्पात्रेषु विधानतः ॥ २ ॥
अथोपापं भृशं चक्रे व्यभिचारसमुद्भवम् । ज्येष्ठां त्यक्त्वा ऋतुप्राप्तां धर्मशीलयुतां प्रियाम् ॥ ३॥
रातिं ददौ कनिष्ठाया अनृतौ च विशेषतः । ततो यमपुरं प्राप्तः ससहायो द्विजोत्तमः ॥ ४ ॥
भुक्त्वा पापफलं पापात्पुण्यात्स्वर्गफलं तथा । श्रद्धादानवशात्सोऽत्र गङ्गायाः पूर्वभागतः ॥ ५ ॥
सिंहस्थेऽर्के मुखे राहौ जीवे कर्केऽलिगे भृगौ । सरक्तगौरो मतिमान्बन्धुस्त्रीसुखसंयुतः ॥ ६ ॥
लघुर्वृणी त्वमितदो द्विजवंशसमुद्भवः । सर्वमेतत्फलं दानात्स्त्रीत्यागान्मृतपुत्रकः ॥ ७ ॥
स्त्रीत्यागी भ्रूणहा लोक इति पौराणिका विदुः । योषासहायतः पूर्वं शृणुष्व विनतासुत ॥ ८ ॥
प्राग्भवे या कनिष्ठाभूत्सा ज्येष्ठात्र गतप्रजा । गर्भदोषयुता चोक्ते लक्षणैर्लक्षयेत्खग ॥ ९ ॥
वक्ष्यामि निष्कृतिं तस्याः पूर्वपापप्रणाशिनीम् । कुर्यात्पलैर्वेदमितैर्गणेशं विघ्ननाशनम् ॥ १० ॥
तदर्धार्धमितं देयं त्रिषु वित्तादिमं पठन् ॥ ११ ॥

मंत्रः ।

त्यक्त्वा वराननां शुद्धां पूर्वं पापं समर्जितम् ॥
तदुग्रपापनाशाय ददेऽहं गणनायकम् । माषसप्तमितां लक्ष्मीं शुभाऽऽलेख्यां हिरण्मयीम् ॥१२॥
ददेऽहं विप्रमुख्याय वेदशास्त्रविदे मुदा । ब्राह्मणान्वरयेत्तत्र शक्त्या दद्याच्च दक्षिणाम् ॥ १३ ॥
एवं विधानं यः कुर्याज्जीविष्यन्ति च तत्सुताः । श्रुत्वैनं शक्तिमान्यस्तु न कुर्याच्छोधनं तदा १४
सपुमान्नाप्नुयात्पुत्रान् रिष्टं पञ्चाशदब्दके । प्रायश्चित्ते कृते त्वत्र जीवनं वर्षसप्ततिम् ॥ १५ ॥
अन्यज्जन्मादितो ज्ञेयं विस्तरो नोदितो मया ॥ १६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोद्विपंचाशदुत्तरशताधिकसहस्रतमः ॥ ११५२ ॥

श्रीसूर्य उवाच ।

देशे रामहदे जाता पादजा पूर्वजन्मनि । साऽत्र जन्मनि वै विप्रा जाता प्राग्वेप्रपूजनात् ॥ १ ॥
प्राग्यत्तया कृतं कर्म शृणुष्वात्र खगेश्वर । ब्राह्मणेन महद्द्रव्यं तद्गृहे स्थापितं च यत् ॥ २ ॥
तत्र दत्तं पुनस्तस्मै भुक्तं सर्वमशेषतः । मृतो द्विजस्तदुःखेन क्षुधितस्तु पतत्रिण! ॥ ३ ॥
पापमाचरितं तेन ब्रह्मघातसमं तया । पञ्चत्ववशमापन्ना भुक्त्वातियमशासनम् ॥ ४ ॥
पुत्रसन्ततिहीनात्र युवभावे क्षयान्विता । निष्कृतिं परमां तस्या वक्ष्येऽहं पापनाशिनीम्॥ ५ ॥
सर्वस्वेन तथार्द्धेन कार्या स्वर्णमयी शुभा । कदलीपत्रसंयुक्ता देया विप्राय धीमते ॥ ६ ॥
दानेनानेन सुप्रीता ब्रह्मविष्णुमहेश्वराः । क्षयनाशकराः सर्वे भविष्यंत्यत्र जन्मनि ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिपंचाशदुत्तरशताधिकसहस्रतमः ॥ ११५३ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि भोः सूत चोच्छिष्टं भुक्तवांस्तु यः । राज्यबन्धो जायते सूत जन्मन्यत्र स मानवः ॥१॥
भोजयेद्ब्राह्मणाञ्शक्त्या गोमूत्रं प्राशयेत्तथा । मुच्यते तत्क्षणात्सूत नक्तान्ध्यत्वान्न संशयः ॥२॥

इते श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुः पंचाशदुत्तरशताधिकसहस्रतमः ॥ ११५४ ॥

श्रीसूर्य उवाच ।

या भक्षयेत्पुरा नारी चोच्छिष्टं सा शुभानना । नक्तान्धा जायते त्वत्र व्यथिता नेत्रपीडया॥१॥
गोमूत्रप्राशनादत्र ब्राह्मणानां च भोजनात् । नक्तान्धरोगान्मुक्तिः स्यादत्र जन्मनि सुव्रत ॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायःपंचपंचाशदुत्तरशताधिकसहस्रतमः ॥ ११५५ ॥

श्रीसूर्य उवाच ।

बिडालोच्छिष्टभोजी यो रात्र्यन्धो जायते त्विह । तत्पापस्य विशुद्ध्यर्थं गोमूत्रं विधिवत्पिबेत् ॥१॥
भोजयेच्च तथा विप्रान्शक्त्या दद्याच्च दक्षिणाम् । रात्र्यन्धरोगात्सततं मुक्तो भवति मानवः॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्पंचशदुत्तरशताधिकसहस्रतमः ॥ ११५६ ॥

श्रीसूर्य उवाच ।

बिडालोच्छिष्टभुग्नारी प्राग्भवे विनतात्मज । रात्र्यन्धरोगयुक्ता सा ह्यत्र जन्मनि जायते ॥ १ ॥
द्विजानां भोजनाच्चैव गोमूत्रप्राशनात्तथा । मुच्यते पूर्वपापात्तु बिडालोच्छिष्टभोजनात् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तपंचाशदुत्तरशताधिकसहस्रतमः ॥ ११५७ ॥

श्रीसूर्य उवाच ।

चाण्डाल्यां गमने पूर्वभवे च गरुडाग्रज । जायतेऽजगरश्चात्र मूढो जन्मनिजन्मनि ॥ १ ॥
चान्द्रायणव्रतादत्र दशावृत्त्या कृतात्सुत । स मुच्यतेऽजगरत्वाच्छुद्धबुद्धिर्भवेदिह ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टपंचाशदुत्तरशताधिकसहस्रतमः ॥ ११५८॥

श्रीसूर्य उवाच ।

या काचिदधमा नारी प्राग्भवे विनतासुत । चाण्डालं प्राप्नुयात् सात्र ऽजगरा जायतेऽण्डज ॥१॥
प्राजापत्यव्रताद्यत्नात्कृतात्पश्चापवर्तनैः । मुच्यते पूर्वपापात्सा जन्मन्यत्र पतत्रिण ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनषष्ट्युत्तरशताधिकसहस्रतमः ॥ ११५९ ॥

श्रीसूर्य उवाच ।

परान्नविघ्नकारी च यो भवेत्पूर्वजन्मनि । सोऽजीर्णेनातिरोगेण जन्मन्यत्र प्रपीड्यते ॥ १ ॥
विधिना लक्षहोमे तु कृते वै गरुडाग्रज । मुच्यतेऽजीर्णजाद्रोगादत्र जन्मनि वै ध्रुवम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः षष्ट्युत्तरशताधिकसहस्रतमः॥ ११६० ॥

श्रीसूर्य उवाच ।

विघ्नं प्रकुरुते सूत या नारी पूर्वजन्मनि । परान्नेषु यदा मोहाच्छृणु तत्र पतत्रिण ॥ १ ॥
अजीर्णेनैव रोगेण बाध्यते पीडिता भृशम् । लक्षहोमेन सततं तत्पापान्मुच्यतेऽधुना ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विषष्ट्युत्तरशताधिकसहस्रतमः ॥ ११६१ ॥

अरुण उवाच ।

भूमिदेवकुलोत्पन्नो धर्मिष्ठो धर्मवत्सलः । सत्यं नित्यसदाचारः साधुसेवासुसंयतः॥ १ ॥
तस्य देहे भवेच्चित्रं पापजं चात्र जन्मनि । किलासौ दद्रुकण्डूश्च नेत्रतोदं विषूचिकाम् ॥ २ ॥
किंचिज्ज्वरं प्रपद्येत पूर्वकर्मविपाकतः । तस्य भार्या सुतन्वङ्गी स्त्रीधर्मव्रतकारिणी ॥ ३ ॥

वातव्यथा तदुदरे मूर्ध्नि पीडा च जायते। मृतवत्सा कथं जाता मृतपुत्री तथा पुनः ॥ ४ ॥
केन कर्मविपाकेन सत्यं कथय भास्कर ॥ ५ ॥

श्रीसूर्य उवाच।

पूर्वं वैश्या समुत्पन्ना प्रिया शूद्रावतारिता। बहुव्यापारनिरता बहुद्रव्यसमन्विता ॥ ६ ॥
शूद्राज्जाता च संबन्धं बहुकालं रता भृशम्। अन्योन्यं प्रीतिवशतः किंचित्कालंवशं गता ॥७ ॥
उभयोः कर्मणोर्हेतोर्धनहर्त्री यतस्ततः। तत्पत्या कर्मकृद्योसौ तेन तत्रैव जन्मनि ॥ ८ ॥
ब्राह्मणस्य सुतः श्रेष्ठः स्वर्णालंकरणैर्युतः। धनलोभाद्धतस्तेन भाविनोऽर्थस्य वै बलात् ॥ ९ ॥
तस्यापि मातापितरौ पुत्रदुःखेन दुःखितौ। द्वित्रिवर्षैस्तथा मासैः पञ्चत्वं जग्मतुः किल ॥ १० ॥
धनलोभवशात्तौ वै दुष्टचित्तेन दुर्मदौ। अचिराच्च मृतौ तत्र गतौ वै यमसादनम् ॥ ११ ॥
तद्देहदण्डः संजातो ब्राह्मणस्य ततः खग। तेन कर्मविपाकेन नरके पाचितो भृशम् ॥ १२ ॥
पश्चान्मानुषतां यातौ व्रतदानप्रभावतः। पूर्वकर्मविपाकेन मृतपुत्रौ बभूवतुः ॥ १३ ॥
द्वित्र्यादिमासजा बाला मृता द्वित्र्यादिहायनाः। तस्याभवन्मृताः पुत्रा जाताजातास्तथैव च १४
अयंजीवेदयं जीवेदित्याशागतचेतसोः। जाताजाता विनश्यन्ति तस्याश्चाकृतनिष्कृतेः ॥ १५ ॥
नैकोऽपि जीवति प्रायोऽचिरादेव विनश्यति। सगुणाश्च सुशीलाश्च लालनाच्चाटुकारिणः ॥
पूर्वकर्म विपाकेन सर्वे मरणमागताः ॥ १६ ॥
नश्यत्सु जातमात्रेषु जानञ्जानं सुतेषु च। व्याध्यन्तरे भवेद्व्याधिग्रस्तो व्यसनभागयम् ॥ १७ ॥
नापि सौख्यं भवेत्तस्य नानाशंकितचेतसः। अभवच्चेतसो दाहः परापत्यानि पश्यतः॥ १८॥
लक्षणानि पुरोक्तानि तस्येमान्यपि कीर्तये। स्वोदरे म्रियते बालः स वै ब्राह्मण उच्यते ॥१९॥
मृतवत्सोद्भवं चिह्नं पूर्ववत् प्रतिपादयेत्। स्ववंशस्यापि विच्छेदो द्रव्यहानिर्यतस्ततः ॥ २० ॥
दौर्मनस्यं महानाधिः शोक एवोपजायते। अदृष्टगणमाहात्म्याद्भुज्यन्ते दुःखराशयः ॥ २१ ॥
म्रियते जातमात्रो वै पुत्रोऽकृतविनिष्कृतेः एवं तु कर्मणि ज्ञाते प्रायश्चित्तमथाचरेत् ॥ २२ ॥

अरुण उवाच।

का तस्य निष्कृतिः स्वामिन्निह कर्मनिषूदनी। कथ्यतां दिवसेशान नारीणां हितकाम्यया२३॥

श्रीसूर्य उवाच।

शृणु सूत प्रवक्ष्यामि मृतवत्साघनाशिनीम्। निष्कृतिं विधिवत्ताक्ष्यं सन्ततेःसौख्यहेतवे ॥२४॥
यजमानः सपत्नीको विधिवद्विधिमाचरेत्। मूर्त्तिं बालस्य निर्माय सौवर्णीमथराजतीम् ॥
पठद्भिः शान्तियुक्तानि ब्राह्मणैः सहितोऽर्थवित् ॥ २५ ॥
सिद्धार्थाक्षतदूर्वाभिः कृतरक्षां प्रतिष्ठिताम्। स्नापयेदौषधैर्मन्त्रैर्वारुणैर्वैष्णुसूक्तिभिः ॥ २६ ॥
सुदिष्टे सुशुभे देशे गोमयाद्युपलिप्तके। तत्रोपधापयेत्तीर्थं कृष्णाजिनमथापि वा ॥ २७ ॥
द्रोणमानतिलैर्युक्तं कृष्णवस्त्रेण संयुतम्। स्थापयेद्राजतं पद्मं तन्मध्ये पलनिर्मितम् ॥ २८ ॥
सौवर्णीं प्रतिमां तत्र बालगोपालमूर्त्तिजाम्। कृत्वा प्रतिष्ठितप्राणां मूर्तिं तां शुभलक्षणाम्॥ २९ ॥
अर्चयेद्गन्धपुष्पाद्यैरुपचारैर्यथाविधि। सम्यक् श्रद्धावती नारी मृतसन्ततिदुःखिनी ॥ ३० ॥
आहूय कुलजान्विप्रान् विदुषो वेदवादिनः। अलोलुपाः सदाचाराःपूज्या अर्घ्यादिकैस्तथा॥३१॥
उपार्जितः पुरा द्रोहो मया वै परसूनुषु। भूमिद्रविणहेमादिलिप्सया तद्विनश्यतु ॥ ३२ ॥
गां सौवर्णीं ददाना तु विप्रायेदं ब्रुवीत सा। मया जन्मांतरेऽदृष्टवशादाचरितं तु यत् ॥ ३३ ॥

तस्मान्मुच्येय वै पापाच्छीघ्रं गोदानतोऽधुना । इति तां त्रिष्परिक्रम्य परिचर्य्यां विधाय च॥३४॥
अग्ने नयेति मंत्रेण विसृजेत्तदुदीरयेत् । धेनुं दद्यात्सवत्सां च सहिरण्यां यथाविधि ॥ ३५ ॥
सर्पिष्यात्मानमालोक्य भोजयेदिष्टबन्धुकान् । इहैव लभते साध्वी सौख्यं पुत्रसमुद्भवम् ॥ ३६ ॥
व्याधयः प्रशमं यान्ति सद्यो वै कृतनिष्कृतेः ॥ ३७ ॥
विकारो विविधस्तस्य संपद्येताथ संक्षयम् । पित्तजो वातजो वान्या कासगुल्मार्तित्वग्व्यथा ॥३८॥
मृतापत्यार्तिजापीडोदरव्याधिरसंशयः । न निष्कृतिः कृता येन नरेण विभवे सति॥३९॥
तथा तथात्र दुःखानि जायन्तेऽस्य मुहुर्मुहुः पूर्वकर्माजितं पापं चिह्नं तस्य सहायवत् ॥ ४० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षष्ट्युत्तरशताधिकसहस्रतमः ॥ ११६२ ॥

श्रीसूर्य उवाच ।

परस्मै यो विषं दद्यात्पूर्वजन्मनि मानद । छर्दिरोगेण सोऽत्रैव बाध्यते पीडयाऽनिशम् ॥ १ ॥
धेनूनां दशकं दद्यात्सर्वोपस्करसंयुतम् । मुच्यते छर्दिरोगाच्च जन्मन्यत्र पतत्रिण ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिषष्ट्युत्तरशताधिकसहस्रतमः ॥ ११६३ ॥

श्रीसूर्य उवाच ।

मूकोऽत्र जायते जंतुर्यः पूर्वं भ्रातृघातकः । बभूव कामतः सूत प्रायश्चित्तं न तत्समम् ॥ १ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः चतुःषष्ट्युत्तरशताधिकसहस्रतमः ॥ ११६४ ॥

श्रीसूर्य उवाच ।

या काचिन्मागधी ह्यासीज्जाता ब्रह्महदे सुत । सा चात्र यवनी देशे शुभे पञ्चनदेऽण्डज ॥ १ ॥
पुत्राभिलाषिणी पूर्वं ह्यभजद्यवनं पुरा । तस्मात्सा यवनी जाता पुत्रसन्ततिवर्जिता ॥ २ ॥
नानाधनयुता दानात्कुरुक्षेत्रे पुरानघ । शिवभक्तिपरा तस्मात्सुखैश्वर्यसमन्विता ॥ ३ ॥
अत्र जन्मनि सा लक्ष्म्या रुद्रपूजनजाद्व्रतात् । पुत्रपौत्रयुता नारी भविष्यति न संशयः ॥ ४ ॥
अथवा हरिवंशस्य शतावृत्त्या विधानतः । श्रवणात्पूर्वजात्पापान्मोक्ष्यते विनतासुत ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चषष्ट्युत्तरशताधिकसहस्रतमः ॥ ११६५ ॥

श्रीसूर्य उवाच ।

देवालयेवसत्काश्चिद्ब्राह्मणः पूर्वजन्मनि । विष्णुपूजारतो नित्यं द्रव्यलोभेन चाण्डज ॥ १ ॥
चोरेण निहृतं द्रव्यं यत्स्थितं देवताश्रये । तेनेदं दुष्कृतं सूत कृतं कर्मातिदारुणम् ॥ २ ॥
स तेन कर्मणा युक्तो भुक्त्वा वै तत्फलानि हि । जातो गङ्गाश्रये क्षत्रः पर्वतेः पूजनाद्धरेः॥ ३ ॥
बहुद्रव्यान्वितो जातः सर्वसंपत्सुखान्वितः । बाल्ये हि पाण्डुरोगार्त्तश्चात्र जन्मनि मानवः॥४॥
देवद्रव्यापहारीति पाण्डुरोगी बभूव ह । तत्पापनाशनं पुण्यमुपायं शृणु तत्त्वतः ॥ ५ ॥
कुर्याद्धिरण्मयीं पृथ्वीं ससमुद्रां पलात्मिकाम् । सवनां सागरोपेतां सप्तद्वीपां वसुन्धराम् ॥ ६ ॥
गन्धपुष्पैरलंकृत्य दद्याद्विप्राय धीमते । पाण्डुरोगाद्विमुक्तः स्यादत्र जन्मनि मानवः ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्षष्ट्युत्तरशताधिकसहस्रतमः ॥ ११६६ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे प्रादाद्विषं कस्यापि काश्यपे । सात्र जन्मनि रोगेण च्छर्दिसंज्ञेन पीड्यते ॥१॥

धेनूनां दशकं दद्यादशक्तौ गरुडाग्रज । सवत्सां कपिलां दद्यात्सा तद्दोषात्प्रमुच्यते ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तषष्ट्युत्तरशताधिकसहस्रतमः ॥ ११६७ ॥

श्रीसूर्य उवाच ।

कश्चिद्विप्रो ह्यभूदंगे प्राग्भवे धर्मसंयुतः । परस्य कन्यायाश्चासावुद्वाहमकरोत्सुधीः ॥ १ ॥
द्रव्याल्पत्वान्महाभाग चकाराल्पविधानतः । चौर्यकर्मरतः सोऽपि कदाचिद्दैवयोगतः ॥ २ ॥
चचार विपिने सूत मार्गलुण्ठनतत्परः । काचित्सुनयना तत्र प्राप्ता भाविवलाद्दृढात् ॥ ३ ॥
नानाभरणयुक्ता सा पूर्णगर्भसमन्विता । सा लुण्ठिताऽत्र त्रसिता तेन पापधियाण्डज ॥ ४ ॥
सहायैः सा परित्यक्ता ताडनादाकुलाभवत् । तद्गर्भाद्वौ च्युतौ पुत्रौ पापमाचरितं त्विदम् ॥५॥
ततो धर्मपुरं प्राप्तः पुण्यपापसमन्वितः । पुण्यात्पुण्यफलं भुक्त्वा पापात्पाप फलं तथा ॥ ६ ॥
परकन्याविवाहेन स जातो वाहुजोऽधुना । गङ्गायाः पूर्वभागे तु दशयोजनसंमिते ॥ ७ ॥
गौरः सुरूपः क्षीणांगो बहुद्रव्यपराक्रमः । पित्ताधिकोऽतिमतिमान्वहुपुत्रीभिरन्वितः ॥ ८ ॥
जन्मनैव मृतः पुत्रा पूर्वपापात्तथाण्डज । विन्मयं तस्य वक्ष्यामि येन पापात्प्रमुच्यते ॥ ९ ॥
पलार्द्धार्धमितेनैव कार्या सुघटिताण्डज । वाहुजा गर्भसंयुक्ता सौवर्णी भूषणान्विता ॥ १० ॥
पूर्वपापविनाशाय सा देया ब्राह्मणाय वै । गन्धैः पुष्पैः समभ्यर्च्य मंत्रैः प्रणवपूर्वकैः ॥ ११ ॥
वैधन्यं तत्र सौवर्णं सुवर्णैकमितं शुभम् । दद्याज्जपेच्च मंत्रांश्च तल्लिङ्गान्विधिपूर्वकम् ॥ १२ ॥
होमयेच्च यवांस्तत्र सतण्डुलससर्षपान् । ब्राह्मणान्भोजयेत्पश्चात्तेभ्यो दद्याच्च दक्षिणाम् ॥ १३ ॥
शृणुयाद्धरिवंशं वा शतावृत्तिविधानतः । गायत्र्यष्टशतं जप्त्वा तस्माद्दोषात्प्रमुच्यते ॥ १४ ॥
लभते तनयं चारुं चात्र जन्मनि वै ध्रुवम् । रिष्टं पञ्चाशत्तमेब्दे प्रायश्चित्ते कृते सुत ॥ १५ ॥
वेदसप्ततिरायुः स्यात्प्रायश्चित्ते कृतेऽत्र च ॥ १६ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टषष्ट्युत्तरशताधिकसहस्रतमः ॥ ११६८ ॥

श्रीसूर्य उवाच ।

व्यभिचाररता पूर्वं चात्रापि व्यभिचारिणी । सा घोरान्नरकान्याति पत्यनादरतोऽण्डज ॥ १ ॥
न शुद्ध्यत्यशुभाचारा प्रायश्चित्तैः शुभैरपि । वाराणस्यां चतुर्दश्यां शिवपूजोपवासतः ॥ २ ॥
तथा तत्रैव वसतेर्गंगाम्भःसेवनादपि । मुच्यते सर्वपापाच्च पूर्वजन्मकृताद्दृढात् ॥ ३ ॥
वाहुजेयं महाभाग पूर्वजन्मनि चेह वै । वन्ध्या प्राग्जायते दुःखाकुला च दयितोज्झिता ॥ ४ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनसप्तत्युत्तरशताधिकसहस्रतमः ॥ ११६९ ॥

श्रीसूर्य उवाच ।

यः कृत्वा धूर्त्ततां पूर्वं वंचयेद्ब्राह्मणं सुत । सोऽत्रापस्माररोगेण पीड्यते बहुपीडया ॥ १ ॥
तेनैव पापरोगेण म्रियतेऽत्र पतत्रिण । प्रायश्चित्तं मया नोक्तं पापे ब्राह्मणवंचने ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्युत्तरशताधिकसहस्रतमः ॥ ११७० ॥

श्रीसूर्य उवाच ।

या भ्रातृघातिनी नारी प्राग्भवे विनतासुत । सात्र जन्मनि मूकत्वं भजत्येव न संशयः ॥ १ ॥

ज्ञानान्महापापकृतान्न चोक्ता निष्कृतिर्मया । ज्ञात्वा ब्रह्मवधे सूत प्रायश्चित्तं न चास्ति हि ॥२॥
सप्तजन्मनि मूकत्वं जायते च तदेनसः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकसप्तत्युत्तरशताधिकसहस्रतमः ॥ ११७१ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यसौ विप्रश्चात्र जन्मनि वाहुजः । देवद्रव्यापहरणात्प्रागत्राक्षिप्रपीडनम् ॥ १ ॥
विंशतिवर्षे व्यतीते नेत्रभङ्गो भविष्यति । तद्रक्षणोपायमहं वक्ष्ये दानं तु पापहृत् ॥ २ ॥
कृत्वा देवगृहं रम्यं प्रतिष्ठाप्य सुराधिपम् । गन्धपुष्पैः समभ्यर्च्य दीपा देयाः सुवर्णजाः ॥ ३ ॥
राजताश्च महाभाग नेत्ररोगं न पश्यति । भोजयेच्छक्तितो विप्रान्वैष्णवाञ्छ्रद्धया सुत ॥ ४ ॥
कृत्वानेन विधानेन रिष्टं नैव प्रपश्यति ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विसप्तत्युत्तरशताधिकसहस्रतमः ॥ ११७२ ॥

श्रीसूर्य उवाच ।

सर्वस्नेहकरः कश्चिद्भवत्पूर्वजन्मनि । सोऽत्र जन्मनि जायेत ज्वररोगेण पीडितः ॥ १ ॥
प्रायश्चित्तं परं तस्य वित्ततुर्यांशभागतः । कालचक्राभिधं दानं दद्याद्दोषोपशान्तये ॥ २ ॥
ब्राह्मणान्भोजयेत्पश्चाद्धोमयेच्च स्वशक्तितः । कालचक्राख्यदानेन रोगा नश्यन्ति पापजाः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिहसप्तत्युत्तरशताधिकसहस्रतमः ॥ ११७३ ॥

श्रीसूर्य उवाच ।

ब्रह्मवादरता ह्यत्र या पूर्वेऽभूत्पतिव्रता । पतिपापप्रभावाद्वै गतिं प्राप्ता हि मानुषीम् ॥ १ ॥
त्यक्त्वा शरीरं सा देवी पार्वत्या सह मोदते । भुनक्ति भोगान्सकलान् पतिं प्राप्य तपस्विनी ॥२॥
गच्छेच्च परमं स्थानं यत्र देवो महेश्वरः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःसप्तत्युत्तरशताधिकसहस्रतमः ॥ ११७४ ॥

श्रीसूर्य उवाच ।

योऽज्ञानात्कृतवान्सूत प्राग्भवे भ्रातृघातनम् । सोऽत्र जन्मनि मूकत्वं प्राप्नोति कापि मानवः ॥१॥
चान्द्रायणत्रयं कुर्याद्विधिवत्पापशोधनम् । पुस्तकं च तथा दद्यात्सुवर्णपलसंयुतम् ॥ २ ॥
एवं यः कुरुते सूत स तत्पापात्प्रमुच्यते । न जायतेऽस्य मूकत्वं कदाचिद्विनतासुत ॥ ३ ॥
या तथा वंचयेत्काचिल्लोकान्पूर्वभवेण्डज । सात्र जन्मनि रोगेणापस्मारेण प्रपीडिता ॥ ४ ॥
प्रायश्चित्तं प्रवक्ष्यामि पापनाशकरं सुत । ब्रह्मकूर्चत्रयं कुर्याद्दद्याद्धेनुं पयस्विनीम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचसप्तत्युत्तरशताधिकसहस्रतमः ॥ ११७५ ॥

अरुण उवाच ।

कश्चिद्वर्णोत्तमो जातो धर्मिष्ठो वित्तसंयुतः । उदरे वायुरल्पीयाञ्छिरोत्तिश्च प्रजायते ॥ १ ॥
शरीरे जायते चिह्नं किंचिद्वर्णसमन्वितम् । दद्रुकण्डूकिलासाद्या गमने पादवैकृतिः ॥ २ ॥
कर्मानुसारतो व्याधिश्चिह्नं तस्य सहायिनी । भार्या प्रीतिपरा नित्यं कदाचित्कालयोगतः ॥ ३ ॥
रोपयुक्तापि पितात्तु प्रदरार्त्तिः प्रजायते । मृतवत्सा कथं जाता कस्येदं कर्मणः फलम् ॥ ४ ॥

श्रीसूर्य उवाच ।

स्वस्त्रिया सहितो विप्रः कुलीनो बहुवाचकः । गताश्चैव महारण्ये भार्या तस्य हि गर्भिणी ॥ ५ ॥

वहुभिश्च समायातः शत्रुभिः परिवेष्टिता । तत्र भीता तु तत्पत्नी तत्रासाच्च महावने ॥ ६ ॥
गर्भपातोऽभवत्तस्या अपत्यं हि मृतं तदा । तेन कर्मविपाकेन म्रियन्ते तस्य वालकाः ॥ ७ ॥
कश्चिज्जीवति षण्मासं कश्चिद्वर्षाधिकं भृशम् । ततोऽधिकं तथा कश्चिन्न हि जीवति कश्चन ॥ ८ ॥

अरुण उवाच ।

देवदेव जगन्नाथ लोकानां हितकाम्यया । कथयस्व प्रसादेन कर्मणस्तस्य निष्कृतिम् ॥ ९ ॥

श्रीसूर्य उवाच ।

साधु पृष्टं महावाहो प्रश्नश्चायं सुदुर्लभः । तेनेदं मुनिभिः प्रोक्तं प्रायश्चित्तं हि पापहृत् ॥ १० ॥
गोत्रयं वै सवर्णं हि स्वर्णनिष्केण संयुतम् । पुष्पितं फलितं वृक्षं वस्त्रयुग्मं गुरोरपि ॥ ११ ॥
कर्मप्रकाशकं विप्रं पूजयेद्विधिपूर्वकम् । एवं यः कुरुते वत्स निष्कृतिं कर्मणः शुभाम् ॥ १२ ॥
पुत्रपौत्रादिकैर्युक्तो धनधान्यसमन्वितः । न करोति च यो मोहाल्लोभाद्वा कर्मनिष्कृतिम् ॥ १३ ॥
वाध्यते पापदोषेण भुवि जन्मनि जन्मनि । एवं यः कुरुते भक्त्या लभते पुत्रपौत्रकम् ॥ १४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्सप्तत्युत्तरशताधिकसहस्रतमः ॥ ११७६ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यभूत्काचिन्नारी भर्तृप्रियान्विता । दक्षा सर्वक्रियास्वेव वहुदानप्रदायिनी ॥ १ ॥
पार्श्वस्थस्यान्यशूद्रस्य गृहान्नीता हि मानद । सर्वस्नेहास्तु चौर्येण सर्वशून्यगृहे पुरा ॥ २ ॥
भुक्तानि वहुभिः सूत मिलित्वा च सुतादिकैः । पूर्वजन्मकृतात्सर्वकर्मणोऽत्रैव जन्मनि ॥ ३ ॥
सा जाता वाहुजा नारी धनभोगसमन्विता । पुत्रान्विता विचित्रा च भर्तृशुश्रूशणे रता ॥ ४ ॥
क्षयरोगाकुला यूनिभावे स्नेहहरी यतः । निष्कृतिं तस्य पापस्य पुण्यां पापौघनाशिनीम् ॥ ५ ॥
कथयामि प्रयत्नेन वित्ततुर्यांशभागतः । कृत्वा तु कदलीं रम्यां पुत्रयुक्तां सुवर्णजाम् ॥ ६ ॥
दद्याद्वेदविधिज्ञाय क्षयदोषोपशान्तये ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तसप्तत्युत्तरशताधिकसहस्रतमः ॥ ११७७ ॥

श्रीसूर्य उवाच ।

यो लोकान्वंचयेत्कश्चित्पुरा धूर्तेन कर्मणा । सोऽत्र जन्मन्यपस्माररोगेण महताकुलः ॥ १ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टसप्तत्युत्तरशताधिकसहस्रतमः ॥ ११७८ ॥

श्रीसूर्य उवाच ।

ब्राह्मणी गर्भयुक्ता च प्रयाणे भर्तृसंयुता । सर्वाभरणभूषाढ्या नानारत्नसमन्विता ॥ १ ॥
वहुभिर्मिलितैश्चैव गृहीतं सर्वभूषणम् । तत्र कोलाहलो जातो गर्भपातो ऽभवत्तदा ॥ २ ॥
तेन पापेन वालानां गर्भनाशः प्रजायते ॥ ३ ॥

अरुण उवाच ।

का तस्य निष्कृतिः स्वामिन्येन पापं प्रणश्यति । एतेषां विस्तरं ब्रूहि लोकानां हितकाम्यया ॥ ४ ॥

श्रीसूर्य उवाच ।

एकवासो विधिश्चैव लक्षपूजा ततः परम् । सगर्भायै प्रदातव्यं भोजनं संमितं खग ॥ ५ ॥
गर्भाश्रयगतो नासौ निषेकसमयादनु । पञ्चमे वाथ षष्ठे वा मासि पातः स्मृतश्च यः ॥ ६ ॥
तयोः कर्मविशेषांश्च कथयिष्यामि सत्तम । सप्तमादिषु मासेषु नश्यति प्रसवस्त्रियाः ॥ ७ ॥

अथवा चाष्टमे मासे सूत सद्यो विपद्यते । सा चापि मृतकल्पा स्यादामयैः सूतकामयैः ॥ ८ ॥
शोकादामोदराऽऽटोपशूलाङ्गैरवकंपनैः । रक्तस्रावो विवर्णत्वं जायते पवनेरितम् ॥ ९ ॥
रजतस्य पलाभ्यां तु कोशं गर्भाश्रयाकृतिम् । कुसुंभवेष्टितं चैव रक्तवस्त्रेण वेष्टयेत् ॥ १० ॥
मधुना पूरयेत्तत्र शलाकां रूप्यवर्तिना । तन्मध्ये हेमशकलं क्षिपेत्तदपि यत्नतः ॥ ११ ॥
दद्याद्विप्राय विधिवद्यथाश्रुति निरूपितम् ।

मंत्रः ।

यन्मया पूर्वतः स्वामिन् गर्भपातः कृतः स्वयम् । एतद्दानविशुद्ध्यर्थं गर्भकोशं ददाम्यहम्॥१२॥
पुरुषश्चेत्पापकर्ता मन्त्रमेतमुदीरयेत् ॥ १३ ॥

मंत्रः ।

मया मूढेन यद्रेतो निषिक्तं परयोषिति । ततोऽनपत्यं यत्प्राप्तं तस्मान्मां मोचय प्रभो ॥ १४ ॥
एवंकृतविधेः सूत गर्भपाताघनाशनम् । ब्राह्मणान्भोजयेत्पश्चाद्भुंजीत सह बन्धुभिः ॥ १५ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनाशीत्युत्तरशताधिकसहस्रतमः ॥ ११७९ ॥

श्रीसूर्य उवाच ।

या नारी घातयेत्काचित्पुरुषं प्राग्भवेण्डज । सात्र जन्मनि रोगेण शूलेनैव प्रपीड्यते ॥ १ ॥
सुवर्णदानाद्विधिवत्तथा रुद्रजपादिह । पूजनाच्छंकरस्यापि शूलरोगाद्विमुच्यते ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽशीत्युत्तरशताधिकसहस्रतमः ॥ ११८० ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि यो ऽज्ञानान्नरो वै घातयेत्सुत । मित्रं च वायुरोगेण पीड्यते चात्र जन्मनि ॥ १ ॥
तत्र कुर्यान्महाबाहो मंत्रैस्तैर्वायुदैवतैः । पूजनं वायुदेवस्य गन्धपुष्पैश्च धूपकैः ॥ २ ॥
नैवेद्यैर्बहुभक्ष्यैश्च वायुर्नश्यति तत्क्षणात् । इह जन्मनि पक्षीन्द्र पूजा वित्तानुसारतः ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकाशीत्युत्तरशताधिकसहस्रतमः ॥ ११८१ ॥

श्रीसूर्य उवाच ।

गोत्रघातकरी या च पुराज्ञानेन काश्यप । साऽत्र जन्मनि लूताढ्या भवत्येव न संशयः ॥ १ ॥
तीर्थस्नानव्रतादीनि निष्फलान्यत्र चाण्डज । ज्ञानपूर्वकृतात्पापाद्रोगादेव क्षयो भवेत् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्यशीत्यधिकशताधिकसहस्रतमः ॥ ११८२ ॥

श्रीसूर्य उवाच ।

व्यापारनिरतो दक्षः क्रयविक्रयकर्मसु । नीता सर्वरसास्तेन मिलित्वा चार्द्रसीरिणा ॥ १ ॥
कालेन तद्धृतं लोभात्स्नेहाद्यं भूरिसारवत् । भुक्त्वा पापफलान्याशु भ्रमरत्वमुपागतः ॥ २ ॥
ततः पुण्यफलं भुक्त्वा जातोऽत्रैव हि पर्वते । शूद्रः पुण्यकलायुक्तो भूमिदानात्सुरार्चनात् ॥ ३ ॥
स्नेहहारी यतः पूर्वं राजयक्ष्मप्रपीडितः । सर्वस्नेहादिदानैस्तु स्ववित्तात्तुर्यभागतः ॥ ४ ॥
स्वर्णदानात्तथाचात्र क्षयरोगाद्विमुच्यते ॥ ५ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्यशीत्युत्तरशताधिकसहस्रतमः ॥ ११८३ ॥

श्रीसूर्य उवाच ।

विषं दत्त्वा पतिं सूत या प्राग्जाराश्रिताऽसती । पतिघ्नी सा महादुष्टा जातात्र विधवा सुत ॥ १ ॥
विष्णोराराधनादत्र गंगाया ह्युपसेवनात् । गतिं शुभां सा प्राप्नोति व्रतकृच्छ्रोपवासतः ॥ २ ॥
धर्मादत्र महाभाग परत्र च शुभा गतिः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरशीत्युत्तरशताधिकसहस्रततमः ॥ ११८४ ॥

श्रीसूर्य उवाच ।

देवागारं दहेद्यस्तु प्राग्जन्मन्यथ पुत्रक । रक्तातिसाररोगेण बाध्यतेऽत्रैव जन्मनि ॥ १ ॥
तद्देवदानाद्विप्राय स्थापनाद्वा विधानतः । मुच्यते पापजाद्रोगादतिसाराच्च निश्चितम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाशीत्युत्तरशताधिकसहस्रतमः ॥ ११८५ ॥

श्रीसूर्य उवाच ।

मूर्धाभिषिक्तो यः कश्चिन्मथुरायामभूत्सुत । राजसेवी महाशूर आखेटकरतः सदा ॥ १ ॥
मृगयायां गतो दैवाद्घातिता मृगसूकराः । तत्रैका हरिणी सूत घातिता गर्भसंयुता ॥ २ ॥
गर्भगौ निहतौ तत्र शुभौ द्वौ मृगशावकौ । सहायाभ्यां सुतेनैव कृतं कर्म दुरात्मना ॥ ३ ॥
ताभ्यां मिलित्वा तौ भुक्तावमायां चाण्डजाधिप । सोपि काले महाभाग प्राप्तः शत्रुवशं पुरा ॥४॥
स शौर्यकर्मणा सूत जघान च रिपून्बहून् । घातितः सोऽपि बहुभिः प्रहारैरतिदारुणैः ॥ ५ ॥
संग्रामभूमौ स मृतः प्राप्तः स्वर्गपुरं तदा । भुक्त्वा नानाविधान्भोगान्स जातो ब्राह्मणोऽधुना॥६॥
देशे प्रयागनिकटे सर्वशास्त्रार्थकोविदः । जातः कर्कटके जीवे लग्नस्थे हि महातपाः ॥ ७ ॥
धनैर्नानाविधैर्युक्तो गौराङ्गो रक्तलोचनः । शिवपूजनजात्पुण्यात्प्राक्कृतात्सकलैः सुखैः ॥ ८ ॥
नानामनोरथैश्चापि पूर्णश्चात्रैव जन्मनि । राजप्रचारी तेजस्वी पुण्यात्पापफलं शृणु ॥ ९ ॥
धूर्तः शठः सर्वभक्ष्यः सर्वपापरतः क्वचित् । सहायलक्षणं मत्तः शृणु पुत्र यथा तथा ॥ १० ॥
याभ्यां मिलित्वा भुक्तौ तु मृगशावौ खगाधिप । पृच्छकस्य च तौ पुत्रावुभौ ज्येष्ठकनिष्ठकौ११॥
ह्यपस्मारेण रोगेण मृतौ चात्रैव जन्मनि । एवं सन्ततिदुःखार्तः स विप्रो विधिवर्जनात् ॥ १२ ॥
मांसभक्षणजात्पापात्प्रायश्चित्तं वदाम्यहम् । पूजयेच्छिवलक्षन्तु तदर्धं वा तदर्धकम् ॥ १३ ॥
अथवा भोजयेद्विप्रान्सहस्रद्वयसम्मितान् । पुत्रपौत्रविवृद्धिः स्यात्प्रायश्चित्ते कृतेऽधुना ॥ १४ ॥
प्रायश्चित्तेऽकृते सूत न च पुत्रसुखं लभेत् । रिष्टेन मरणं चापि वर्षे वेदादिकेण्डज ॥ १५ ॥
प्रायश्चित्ते कृते तस्य जीवनं वर्षसप्ततिम् । चैत्राऽष्टम्यां च निधनं शुक्लायां गरुडाग्रज ॥ १६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडशीत्युत्तरशताधिकसहस्रतमः ॥ ११८६ ॥

श्रीसूर्य उवाच ।

गर्भपातनपापाढ्या बभूव प्राग्भवेण्डज । साऽत्रैव तेन पापेन गर्भस्थैर्यं न विन्दति ॥ १ ॥
विप्रकन्याविवाहाद्वै विधिवच्चात्र जन्मनि । मुच्येत तेन पापेन गर्भस्थैर्यं भवेदिह ॥ २ ॥
अथवा पार्वतीं दद्याद्देवीं दशसुवर्णजाम् । युक्तां गणेशस्कन्दाभ्यां नानाभरणभूषिताम् ॥ ३ ॥
तदर्धार्धमितां वापि पूजयित्वा विधानतः । मुच्येत पूर्वपापाच्च गर्भपातनजात्सुत ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्ताशीत्युत्तरशताधिकसहस्रतमः ॥ ११८७ ॥

श्रीसूर्य उवाच ।

या काचिद्दाहयेन्नारी देवागारं पतत्रिण । साऽतिसारेण महता पीड्यते ऽत्रैव जन्मनि ॥ १ ॥
शङ्करप्रतिमादानान्मूर्तैर्विष्णोः प्रदानतः । न जायते महापीडा घोरातीसारसम्भवा ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽष्यायोष्टाशीत्युत्तरशताधिकसहस्रतमः ॥ ११८८ ॥

श्रीसूर्य उवाच ।

ब्रह्महा प्राग्भवे सूत तिर्यक्त्वं प्राप्य निश्चयात् । नरकान्दारुणांश्चैव जायतेऽत्रैव जन्मनि ॥ १ ॥
कर्मक्षयेतिकुष्ठेन त्वास्मिन्वयसि पीड्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोननवत्युत्तरशताधिकसहस्रतमः ॥ ११८९ ॥

श्रीसूर्य उवाच ।

या काचिद्घातयेन्नारी पत्युर्भित्रं च प्राग्भवे । नियतं वायुरोगेण पीड्यते बहुपीडया ॥ १ ॥
पापं प्रतीक्ष्य विप्रादेः सर्वस्वार्द्धार्धजेन च । वायुं हिरण्मयं कुर्यान्मृगं विहितलक्षणम् ॥ २ ॥
पूजयित्वा विधानेन गन्धैर्वस्त्रैर्विशेषतः । मंत्रैश्च वायुजैः सूत दद्याद्विप्राय धीमते ॥ ३ ॥
वायुरोगोपशमनं दानेनानेन जायते ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवत्युत्तरशताधिकसहस्रतमः ॥ ११९० ॥

श्रीसूर्य उवाच ।

अज्ञानादार्यजा[1] नारी गोत्रघातकरी पुरा । जायते सततं चात्र लूतारोगप्रपीडिता ॥ १ ॥
श्रवणादितिहासानां प्राजापत्यव्रतात्सुत । लूतारोगं न पश्येत साऽत्र जन्मनि चाण्डज ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकनवत्युत्तरशताधिकसहस्रतमः ॥ ११९१ ॥

अरुण उवाच ।

भूमिदेवकुलोत्पन्नः किंचिद्वित्तसमन्वितः । संयुतो वायुपित्ताभ्यां नेत्रतोदशिरोर्त्तिमान् ॥ १ ॥
सद्वृत्तश्च सुखी धीमान्धर्मिष्ठः सत्यवाक्शुचिः । व्रणो रेखा शरात्तस्य बाल्ये स्याद्ग्रहणीगदः॥२॥
कटिपृष्ठाभिघाताढ्यो वाय्वग्निग्रहजाद्भयात् । परोक्षमतिवादांश्च स ब्रूते कारणं विना ॥ ३ ॥
तस्य प्रिया शुभाचारा सती व्रतपरायणा । काकवन्ध्या कथं जाता कस्येदं कर्मणः फलम्॥४॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि वैश्यस्तु भार्यां विप्रस्य सात्त्विकीम् । प्रतिवेश्मस्थितां तस्याः कामतो बुभुजे कुधीः ५
अप्रसूतिः प्रिया सा हि चपला चारुलक्षणा । विप्रस्य सन्ततेर्लोभात्तथा यौवनविभ्रमात् ॥ ६॥
अज्ञानाच्च सतीवृत्तेरुभयोर्वा बलीयसा । प्राक्कर्मणा कुभार्यस्तु ब्राह्मणो निन्द्यतां गतः ॥ ७ ॥
स वैश्यो दैवयोगाच्च भाविनोऽर्थस्य वै बलात् । भृशं तां धर्षयामास बहुकालं खगेश्वर ! ॥ ८॥
व्यभिचारवशात्तत्र ह्यन्योन्यं सुखलिप्सया । गृहीतं तद्धनं तस्य धूर्तया लुब्धचेतसा ॥ ९ ॥
ब्राह्मणी सा धनाढ्याभूल्लोके वै प्राप विश्रुतिम् । तेन दुःखेन वै विप्रो ब्राह्मणीमत्यजत्तदा॥१०॥
निर्वंशः स हि संजातो ब्राह्मणस्तु खगेश्वर । तेन कर्मविपाकेन तादृशो वै तदाभवत् ॥ ११॥

---

१ वैश्यजा ।

पश्चान्मानुष्यमापन्नो बहुशोकाकुलो भृशम् । द्वितीयं जन्म चैतद्धि ब्रह्मवंशसमुद्भवम् ॥ १२ ॥
अत्रापि चानपत्यत्वमेकापत्यत्वमेव वा ॥ १३ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं स्वामिन्येन वंध्यत्वनाशनम् । एकापत्यभवं दुःखं न स्याद्वास्यानपत्यता ॥ १४ ॥

श्रीसूर्य उवाच ।

मार्गशीर्षे शुभे मासे शुक्लपक्षादितः खग । प्रत्यब्दं सुखसौख्याप्तिव्रतं तु प्रतिवासरम् ॥ १५ ॥
षोडशानां तु नारीणां पूजनं विधिपूर्वकम् । गौरीव्रतमिदं सूत सुतसौख्यफलप्रदम् ॥ १६ ॥
प्रातर्नियममास्थाय दन्तधावनपूर्वकम् । अद्याऽहं शिवयोः प्रीतिमाचरिष्ये शुभव्रतात् ॥ १७ ॥
स्नानोपवासनिरता निशि जागरतत्परा । ततो मध्याह्नसमये स्नात्वा कुंकुमवाससी ॥ १८ ॥
परिधायार्चयेद्गौरीं पतिपुत्रवतीं स्त्रियम् । कुंकुमैः कज्जलैश्चालंकरणैः पुष्पमालया ॥ १९ ॥
ताम्बूलैरपि कर्पूरैः सौभाग्याष्टकवस्तुना । ततश्चास्तमिते भानौ वर्तिं षोडशतन्तुभिः ॥ २० ॥
विधाय तिलतैलेन दीपं कुर्याच्छिवाग्रतः । गीतवादित्रनिर्घोषैः पुराणश्रवणादिभिः ॥ २१ ॥
नैवेद्यं विधिवत्कुर्यादपूपान्नादितण्डुलैः । तथा षोडशसंख्यानि वेणुशूर्पाणि कारयेत् ॥ २२ ॥
सप्तधान्यफलोपेतं सौभाग्याष्टकसंयुतम् । प्रत्येकदीपं विन्यस्य गौर्यग्रे वै प्रकल्पयेत् ॥ २३ ॥
पतिपुत्रसुखायैव पूजयन्ती गिरेः सुताम् । भोजयेत्षोडशैवाथ शुभास्ताः पतिसंयुताः ॥ २४ ॥
एवं विधिं समास्थाय पूजयेदंपतीञ्शुभान् । नानाभोज्यैस्तथा पुष्पैः पक्षिभ्यो वलिमाहरेत्॥२५॥
दीनान्धकृपणेभ्योऽन्नं सर्पिष्यात्मानमीक्षयेत् । एतद्गौरीव्रतं नाम मार्गशीर्षे समाचरेत् ॥ २६ ॥
एवंकृतविधेः सूत प्राप्यते पुत्रपौत्रकम् । नारी नियमसंपूर्णा व्रतं कुर्यात्प्रयत्नतः ॥ २७ ॥
सुखसौभाग्ययुक्ता सा पतिपुत्रसुखाप्तये । ऐहिकं लक्षणं तस्या नार्या श्वैतत्प्रजायते ॥ २८ ॥
उदरार्त्तिरसृक्स्रावः पार्श्वपादकरादिषु । मिथ्याभिशंसनं कापि वाक्यदोषाद्धनच्युतिः ॥ २९ ॥
स्वातिनिन्दा च हीनत्वं परेभ्यो मर्मतोदनम् ॥ ३० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विनवत्युत्तरशताधिकसहस्रतमः ॥ ११९२ ॥

श्रीसूर्य उवाच ।

शकृन्मूत्रं सृजेद्यस्तु देवागारे नराधमः । गुदरोगमवाप्नोति सोऽत्र जन्मनि मानवः ॥ १ ॥
मासैकं पूजयेद्विष्णुं शिवं वा विधिनाण्डज । प्राजापत्यं चरेत्कृच्छ्रं दद्याद्गोमिथुनं सुत ॥ २ ॥
न पश्यति तदा पीडां गुदजामत्र जन्मनि ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिनवत्युत्तरशताधिकसहस्रतमः ॥ ११९३ ॥

श्रीसूर्य उवाच ।

घातयेद्यः पुमान्नारीमज्ञानात्पूर्वजन्मनि । सोऽत्र जन्मनि जायेत कृशो वलविवर्जितः ॥ १ ॥
शर्कराधेनुदानेन दशसंख्येन चाण्डज । विमुच्यते कृशत्वाच्च शतब्राह्मणभोजनात् ॥ २ ॥
होमात्स्वस्त्ययनात्पाठाद्गायत्रीजपतोऽत्र च । तीर्थस्नानादाज्यदानाद्बली भवति नान्यथा ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्णवत्युत्तरशताधिकसहस्रतमः ॥ ११९४ ॥

श्रीसूर्य उवाच ।

बालानां घातिनी चेयमभवत्पूर्वजन्मनि । तेनाष्टाब्दमिताद्वर्षादर्वाग्बालो न जीवति ॥ १ ॥

अत्र जन्मनि भोः सूत तस्मात्सा मृतपुत्रका । इदं जीवेदिदं जीवेच्चिन्तयंतीति वै ध्रुवम् ॥ २ ॥
न जीवन्ति च तत्पुत्राः पूर्वपापात्तदांडज । प्रायश्चित्तं शृणु त्वं वै येन जीवन्ति तत्सुताः ॥३॥
श्रवणाद्धरिवंशस्य दशावृत्त्या खगेश्वर । पञ्चत्र्येकमितावृत्त्या शुध्येद्वै शिशुजाद्धधात् ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचनवत्युत्तरशताधिकसहस्रतमः ॥ ११९५ ॥

श्रीसूर्य उवाच ।

यः कश्चिद्धातयेत्पूर्वं ब्राह्मणं ज्ञानवर्जितः । कुष्ठरोगान्वितः सोऽपि जायतेऽत्रैव जन्मनि ॥ १ ॥
दद्यात्कालनरं सूत सर्वोपस्करसंयुतम् । सर्वस्वं वा महापापे दानमुक्तं मनीषिभिः ॥ २ ॥
सर्वस्वदानात्कुष्ठस्य पीडा नश्यति तत्क्षणात् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षण्णवत्युत्तरशताधिकसहस्रतमः ॥ ११९६ ॥

श्रीसूर्य उवाच ।

देवद्रव्यं हरेत्सूत पूर्वजन्मनि यो नरः । सोऽत्र जन्मनि जायेत वायुपीडाभिरन्वितः ॥ १ ॥
प्रायश्चित्तं परं वायोर्नाशनं तस्य वच्म्यहम् । जपेन्मृत्युंजयं मंत्रं सावित्रीं च विशेषतः ॥ २ ॥
होमयेत्तद्दशांशेन ब्राह्मणान्भोजयेत्तथा । वायुरोगोपशान्त्यर्थं शक्त्या दद्याच्च दक्षिणाम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तनवत्युत्तरशताधिकसहस्रतमः ॥ ११९७ ॥

श्रीसूर्य उवाच ।

देवागारे तु या काचित्प्राग्भवे विनतासुत । सृजेन्मूत्रं पुरीषं च मोहादत्रैव जन्मनि ॥ १ ॥
गुदरोगान्विता सा तु नारी पापप्रणाशनम् । वक्ष्ये गोमिथुनं दद्यात्प्राजापत्यं चरेद्व्रतम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टनवत्युत्तरशताधिकसहस्रतमः ॥ ११९८ ॥

श्रीसूर्य उवाच ।

बभूव मुखजः कश्चिद्विद्याधनसमन्वितः । नानाकलासु कुशलो विष्णुभक्तिपरायणः ॥ १ ॥
राहुग्रस्ते प्रयागे तु सर्वस्वमददत्पुरा । तत्र भाविबलात्सूत पापमाचरितं त्विदम् ॥ २ ॥
धर्षिता क्षत्रिया यूनि कामलोभाच्छुभानना । प्रतारितः पतिस्तस्यास्तेन दैवहतेन तु ॥ ३ ॥
ततो मृत्युवशं प्राप्तः स गत्वा यमशासनम् । शुभाच्छुभफलं भुक्त्वा चाशुभादतिदारुणम् ॥४॥
अन्यजन्मनि दानेन स जातः क्षत्रियादथ । देशे विपाशानिकटे सप्तयोजनसम्मिते ॥ ५ ॥
सुरूपदेहः सद्बुद्धिः स्त्रीपुत्रधनसंयुतः । शूरो दाता प्रधानश्च देशेदेशेति विश्रुतः ॥ ६ ॥
किञ्चित्पापरतो धूर्तो मनोदुःखाकुलो भृशम् । धर्षणात्क्षत्रियायास्तु भर्तृसंताडनात्तथा ॥ ७ ॥
वार्द्धके कण्डुरोगार्तो निश्चयादत्र जन्मनि । लक्ष्मैतदण्डजश्रेष्ठ सूर्यशुक्रौ चतुर्थगौ ॥ ८ ॥
वक्ष्यामि तस्य पापस्य निष्कृतिं पापशोधिनीम् । लक्ष्मीनारायणं दद्यात्पलेनार्द्धपलेन वा ॥९॥
हिरण्मयं सुघटितं सर्वाभरणभूषितम् । पूजयित्वा तु गन्धाद्यैः पुष्पैर्नानाविधैस्तथा ॥ १० ॥
दीपैर्विचित्रैर्विधिना दद्याद्विप्राय धीमते । गणनाथं तथा दद्यात्सौवर्णं दशमाषकम् ॥ ११ ॥
एवं विधानं यः कुर्यात्पूर्वपापविशोधनम् । न तस्य द्रुकण्डूश्च तस्माद्दोषात्प्रमुच्यते ॥ १२ ॥
अकालमरणं तस्य प्रायश्चित्तेऽकृतेऽत्र च । प्रायश्चित्ते कृते त्वत्र जीवनं वर्षसप्ततिम् ॥ १३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनद्विशताधिकसहस्रतमः ॥ ११९९ ॥

श्रीसूर्य उवाच।

देवागारे तु या काचित्प्राग्भवे विनतासुत। सृजेन्मूत्रं पुरीषं च मोहादत्रव जन्मनि ॥ १ ॥
गुदरोगान्विता सा तु नारी पापप्रणाशनम्। वक्ष्ये गोमिथुनं दद्यात्प्राजापत्यं व्रतं चरेत् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विशताधिकसहस्रतमः ॥ १२०० ॥

श्रीसूर्य उवाच।

घातयेद्यः स्त्रियं साध्वीं कामात्पापविमोहितः। प्राग्भवे नियतं सोऽत्र कार्श्यं भजति जन्मतः १
तेनैव मृत्युमाप्नोति रोगेण च पतत्रिण। प्राप्तारिष्टेऽथ नष्टायुर्जायते च तदेनसा ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोत्तरद्विशताधिकसहस्रतमः ॥ १२०१ ॥

श्रीसूर्य उवाच।

कन्यका घातिता पूर्वं तस्मात्कन्याप्रजा भवेत्। जन्मन्यत्र महाभाग पूर्वपापादिदं फलम् ॥ १ ॥
पूजनाल्लक्षरुद्राणां वा तदर्धार्धपूजनात्। मुच्यते पूर्वपापाच्च घोरात्कन्यावधादिह ॥ २ ॥
अथवा विधिना सूत तडागोत्सर्गपुण्यतः। विप्राणां भोजनात्तस्मिंस्तडागे गोप्रदानतः ॥ ३ ॥
पूर्वपापाद्विमुच्येत नात्र कार्या विचारणा ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्युत्तरद्विशताधिकसहस्रतमः ॥ १२०२ ॥

श्रीसूर्य उवाच।

या च पूर्वभवे नारी देवद्रव्यापहारिणी। साऽत्र जन्मनि पक्षीन्द्र भवेद्वायुप्रपीडिता ॥ १ ॥
देवालयं सुरुचिरं कृत्वा संस्थाप्य देवताम्। वायुरोगोपशमनं निश्चितं जायतेऽण्डज ॥ २ ॥
भोजयेत्तत्र वै विप्रान्वायुप्रीत्या पतत्रिण। दानं वित्तानुसारेण वित्तशाठ्यं न कारयेत् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्युत्तरद्विशताधिकसहस्रतमः ॥ १२०३ ॥

श्रीसूर्य उवाच

कश्चित्क्षात्रकुले सूत पूर्वजन्मन्यभूद्भुवम्। गिरिवासी महादुष्टश्चौर्यकर्मरतो दृढः ॥ १ ॥
लुण्ठितो ब्राह्मणस्तत्र मार्गे सन्ताडितो भृशम्। तत्ताडनान्महावाहो मृतः काले द्विजोत्तमः ॥२॥
गते बहुतिथे काले स जातो ब्रह्महाधुना। गङ्गायमुनयोर्मध्ये क्रूरकर्मा महोद्यमी ॥ ३ ॥
प्राक् शिवाराधनात्पुण्याद्बाहुजः कुष्ठसंयुतः। वक्ष्यामि निष्कृतिं तस्य सर्वपापौघनाशिनीम् ॥४ ॥
वित्तानुसारतः कार्यो वृषभोऽत्र हिरण्मयः। क्षौद्रवस्त्रयुतो भव्यः शृङ्गाभ्यां संयुतो महान् ॥ ५ ॥
स देयो वेदविदुषे कुष्ठदोषोपशान्तये। दानेनानेन सततं प्रीतो भवति वै शिवः ॥ ६ ॥
तस्माच्छिवप्रसादाद्वै कुष्ठस्तस्य प्रणश्यति ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरुत्तरद्विशताधिकसहस्रतमः ॥ १२०४ ॥

श्रीसूर्य उवाच।

प्रागासीद्बाहुजा काचिद्भर्तुः प्रियरता सदा। दानधर्मरता साध्वी विप्राणां पूजने रता ॥ १ ॥
मृतस्य विषयोगेन गृहीतं हि धनं तया। तद्दुःखेन पतिस्तस्या मृतपुत्रः शुभान्वितः ॥ २ ॥
पापमाचरितं चोग्रं सुपुत्रवधसंज्ञकम्। प्राप्ता यमपुरं भुक्त्वा पूर्वपुण्यफलानि वै ॥ ३ ॥
तद्वत्पापफलात्सूत घोरान्नरकसंज्ञकात्। पूर्वपुण्यप्रभावेण सा जाता पर्वतेऽधुना ॥ ४ ॥

क्षात्रे कुले महापुण्ये राज्येऽत्रास्ति पतत्रिण । सा रक्तगौरा धर्मज्ञा सदा पुण्यपरायणा ॥ ५ ॥
मध्यस्वरूपा सिद्धार्था सुशीला गौरवान्विता । नातिव्ययरता पुण्या स्वकुलेष्वप्रियंवदा ॥ ६ ॥
पतिप्रियरता चोग्रा सुखैश्वर्यधनान्विता । पुण्यादिदं तथा पापाल्लोभाढ्या स्वल्पपुत्रका ॥ ७ ॥
स्वल्पपापरता काले बाल्ये व्याधिसमन्विता । यौवने भर्तृसंयुक्ता वार्धके पुत्रवर्जिता ॥ ८ ॥
सपत्नीपुत्रवधजात्पूर्वपापात्पतत्रिण । लक्षणैरेभिराढ्यायाः प्रायश्चित्तं वदाम्यहम् ॥ ९ ॥
विष्णुः कार्यः शतैर्मांषैः सौवर्णैर्विश्वयोनिभृत् । तद्वन्महेश्वरं कुर्याद्गन्धैः पुष्पैरलंकृतम् ॥ १० ॥
देयो विप्रेषु पात्रेषु पूर्वपापापनुत्तये । जपेदष्टाक्षरं मंत्रमयुतं होमयेत्ततः ॥ ११ ॥
गायत्रीं च जपेत्तद्वद्दद्याद्गावस्तथा सुत । भोजयेच्छक्तितो विप्रांस्तेभ्यो दद्याच्च दक्षिणाम् ॥१२॥
एवं या कुरुते नारी प्रायश्चित्तं विधानतः । न पुत्रवधमाप्नोति सौख्यं तस्या विवर्धते ॥ १३ ॥
विप्राणां पूजनाद्दानात्तस्याः सन्ततिवर्द्धनम् । जीवनं कथितं तस्या वर्षाणामष्टसप्ततिम् ॥ १४ ॥
रिष्टं षष्टिमिते वर्षे ध्रुवं चाकृतनिष्कृतेः ॥ १५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चोत्तरद्विशताधिकसहस्रतमः ॥ १२०५ ॥

अरुण उवाच ।

कश्चिद्विप्रकुलोत्पन्नो पित्रादिवचनानुगः । सदाचारः सुशोभाढ्यो दयानियमतत्परः ॥ १ ॥
क्रयविक्रयकर्ता च किंचिद्व्यापारवान्भुवि । तस्य प्रिया शुभाचारा पतिभक्तिपरायणा ॥ २ ॥
मातृपक्षमनादृत्य प्रीतिर्वै भ्रातृमातुलैः । ह्यसृग्जातगदार्त्तत्वं बाल्ये स्याद्ग्रहणीगदः ॥ ३ ॥
काष्ठलोष्टाश्मशस्त्राद्यैर्घातस्तु करपादयोः । बहुपुत्रप्रसूतिश्च ह्यपुत्रा जायते भुवि ॥ ४ ॥
मृतपुत्रत्वमेतद्वै जायते केन मानद । जातमात्रा मृताः केचित्केचित्पौगण्डमाश्रिताः ॥ ५ ॥
केचिद्दृष्टा न वा चापि मृतःपुत्रोऽग्निमासकः । रक्तस्रावाद्भृशं पीडा मासेमासे प्रजायते ॥ ६ ॥
केन कर्मविपाकेन सत्यं वदः दिवस्पते ॥ ७ ॥

श्रीसूर्य उवाच ।

पूर्वं क्षात्रे समुत्पन्नः किंचिद्भूमिपतिस्तथा । परे जन्मनि वैश्यस्तु परवित्तापहारकः ॥ ८ ॥
दूतिकाकर्मनिरतो नानालोकाभिमेलकः । ग्रामाधीशोऽभवत्सोपि ततःस्वातन्त्र्यमीयिवान् ॥ ९ ॥
एको ग्रामेऽवसद्विप्रः शान्तो दान्तः क्षमी सदा । पुत्र्यः पञ्च तथा सप्त चापुत्रो वित्तसंयुतः ॥१०॥
कालेनैव मृतो विप्रो हृतं तेन धनं महत् । मिथ्याभिशंसनैर्वाक्यैः क्रोधभर्त्सनतर्जनैः ॥ ११ ॥
अपुत्रमृतविप्रस्य सर्वस्वं नीतवांस्तदा । निराधारा सुता जाता न कृतं द्विजभोजनम् ॥ १२ ॥
क्रियाकर्म कृतं नैव सर्वं राज्ञाहृतं च तत् । एवं कृतापराधोऽसौ क्षत्रियो दूतिकायुतः ॥ १३ ॥
किञ्चित्कालान्तरे चैव चौर्यार्थं गतवान्यदा । म्लेच्छैर्विनिहतो मार्गे गतोऽसौ यमशासनम्॥१४॥
अपश्यत्पच्यमानांस्तु नरके भृशदारुणे । दानधर्मादिना पूर्वादिह जन्मनि मानद ॥ १५ ॥
विप्रवंशे समुत्पन्नो जातो वै चेह जन्मनि । जन्म चेदं द्वितीयं वै विप्रत्वस्य हि कारकम् ॥ १६ ॥
पूर्वकर्मविपाकेन कन्याऽपत्यं प्रजायते । ब्रह्मस्वहरणाच्चैव मृतपुत्रः प्रजायते ॥ १७ ॥
नानापत्यानि पच्यन्ते नानाकर्मार्जितानि वै । पुराकृतानि कर्माणि भुज्यन्ते जन्मजन्मनि ॥१८॥

अरुण उवाच ।

प्रायश्चित्तं वद स्वामिन्नीवेद्येन सुतश्चिरम् । कन्याऽपत्यप्रशमनं बहुपुत्रकरं तथा ॥ १९ ॥

श्रीसूर्य उवाच।

सुशुभे भूमिदेशे तु गोमयाद्युपलिप्तके । आसनं त्वाविकं स्तीर्यमथवा त्वजिनं शुभम् ॥ २० ॥
छादयेच्छुक्लवस्त्रेण तण्डुलद्रोणपर्वतम् । तत्रोपरि न्यसेत्पात्रं वैणवं सकपालकम् ॥ २१ ॥
स्थापयेत्काञ्चयीं मूर्त्तिं सौवर्णीं शुभलक्षणाम् । मुक्तायज्ञोपवीताढ्यां निष्कसौवर्णनिर्मिताम् २२॥
दधानां करयुग्मेन चाक्षमालां कमण्डलुम् । कञ्चपाद्वामभागे वै त्वदितिं विश्वमातरम् ॥ २३ ॥
सौवर्णीं स्थापयेत्सूत सुवर्णद्वयनिर्मिताम् । आसनेऽत्र समास्थाय ततो द्रोणाद्दिशंदिशम् ॥ २४ ॥
हारकेयूरमुकुटकुण्डलाभरणान्वितम् । एवं तौ दंपती सम्यगर्चेतां पर्वतोपरि ॥ २५ ॥
कृत्वा प्रतिष्ठितप्राणां भक्त्यादिविविधैर्गुणैः । नानार्घफलदानाच्च नानापुष्पसमर्पणात् ॥
पूजान्ते प्रार्थयित्वा तु मंत्रमेनमुदीरयेत् ॥ २६ ॥

मंत्रः।

" यन्मया पूर्वजनुषि विप्राणां वै हृतं धनम् ।
दूतिकाकर्मनिरतो वाक्यदोषादि यत्कृतम् । तत्सर्वं क्षम्यतां देव तव मूर्तिं ददाम्यहम्"॥ २७ ॥
अदितिं च प्रणम्याथ कृतांजलिरिदं ब्रुवन् ॥ २८ ॥

मंत्रः।

" अदिते विश्वमातस्त्वं शरण्या शरणार्थिनाम् । प्रजादुःखौघसंतप्तहृदयस्य ममेश्वरि ॥
संप्रणशय दुःखं हि प्रजां देहि यशस्विनीम् " ॥ २९ ॥
एवं कृत्वा विसृज्याथ ब्राह्मणान्भोजयेत्ततः । शालग्रामशिलां शुद्धां सोमकान्तमणिं तथा ॥३०॥
चन्द्रसूर्योपरागे तु ब्राह्मणाय समर्पयेत् । एवंकृतविधिः सूत कृष्णां गां प्रददेत्ततः ॥ ३१ ॥
सर्पिष्यात्मानमालोक्य भोजयेच्च समृद्धिभिः । ऐहिकं लक्षणं तस्य शरीरेऽप्युपजायते ॥
लोष्टकाष्ठादिशस्त्राद्यैः करपादव्रणं वदेत् ॥ ३३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडुत्तरद्विशताधिकसहस्रतमः ॥ १२०६ ॥

श्रीसूर्य उवाच।

राजानं घातयेद्यस्तु पुरुषः प्राग्भवेऽण्डज । स राजयक्ष्मरोगेण युक्तः स्यादत्र जन्मनि ॥ १ ॥
अस्मिन्वयसि पक्षीन्द्र सोपि प्राणैर्वियुज्यते । महापापोद्भवादोगान्न चोक्ता निष्कृतिर्मया ॥ २ ॥
अपि ज्ञानकृतात्पापाद्दृढरूपेण काश्यपे ! । नाशयेत्परमं सिद्धं पूर्णायुष्कमपि ध्रुवम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तोत्तरद्विशताधिकसहस्रतमः ॥ १२०७ ॥

श्रीसूर्य उवाच।

परगर्भं तु यः कश्चिद्घातयेज्ज्ञानवर्जितः । जलोदरेण सततं रोगेणात्र प्रपीड्यते ॥ १ ॥
जलधेनुप्रदानेन विधिना गरुडाग्रज । ताम्ररूप्यसुवर्णानां दानात्पापप्रणाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टोत्तरद्विशताधिकसहस्रतमः ॥ १२०८ ॥

श्रीसूर्य उवाच।

ब्राह्मणोऽभूत्कुरुक्षेत्रे कृषिकृद्वेपारगः । स्वज्ञातीयस्य चान्यस्य वृत्तिलोपमकारयत् ॥ १ ॥
तत्सम्बन्धेऽभवद्युद्धं द्वयोरेको मृतस्तदा । वृत्तिलोपी द्विजः काले गतो हि यमशासनम् ॥ २ ॥
भुक्त्वा तत्पापजं सर्वं श्रुतद्रुनिकटेऽधुना । स हि जातो द्विजश्चात्र वेदाभ्यासाच्च पुत्रक ॥ ३ ॥
कुष्ठक्षयान्वितश्चात्र युवभावे पतत्रिण । तत्पापनाशनं सर्वं प्रायश्चित्तं प्रवक्ष्यहम् ॥ ४ ॥

वेदाभ्यासान्महासुत सावित्रीजपतस्तथा । गङ्गायां वासतः सर्वात्पूर्वपापाच्च्युतोऽभवत् ॥ ५ ॥
न कुष्ठवृद्धिरत्रास्ति तत्कृते शमनं नहि । जीवेत्षष्टिमिताब्दान्तं रिष्टं चैव प्रणश्यति ॥ ६ ॥
गतिस्तस्य महाभाग वेदाभ्यासाज्जपात्तथा । भविष्यति शुभा लोके परत्र च खगेश्वर ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवोत्तरद्विशताधिकसहस्रतमः ॥ १२०९ ॥

श्रीसूर्य उवाच ।

कुलद्वयानन्दकरी पूर्वजन्मनि वैश्यजा । बभूव भर्तृसुहृदामाज्ञापालनतत्परा ॥ १ ॥
अत्र जन्मनि सा विप्रा काश्यां जाता हि सुव्रता । व्रतदानपरा चापि भर्तृतोषणलालसा ॥ २ ॥
पञ्चपञ्चाशदब्दान्ते प्रवेक्ष्यत्यत्र जन्मनि । स्वर्गकामा चिताग्नौ तु नात्र कार्या विचारणा ॥ ३ ॥
सा गमिष्यति वै स्वर्गं चात्र जन्मनि वै नरः । भविष्यति महाराजकुले राजातिधार्मिकः ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो दशोत्तरद्विशताधिकसहस्रतमः ॥ १२१० ॥

श्रीसूर्य उवाच ।

पीड्यते वातरोगेण दारुणेन पतत्रिण । पूर्वजन्मनि यश्चाद्यादन्नं शूद्रगृहाश्रितः ॥ १ ॥
प्रायश्चित्तं परं तस्य व्रतं चान्द्रायणं स्मृतम् । व्रतान्ते कपिलां दद्यात्सर्वपापापनुत्तये ॥ २ ॥
पापक्षये क्षयं याति रोगस्तत्पापजस्त्विह ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकादशोत्तरद्विशताधिकसहस्रतमः ॥ १२११ ॥

श्रीसूर्य उवाच ।

स्वगर्भं पातयेत्पूर्वं या नारी पापमोहिता । जलोदरकृता पीडा जायते चात्र जन्मनि ॥ १ ॥
रजतस्वर्णताम्राणां दानाद्रोगविनाशनम् । जलधेनुप्रदानेन तथैव विनतासुत ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वादशोत्तरद्विशताधिकसहस्रतमः ॥ १२१२ ॥

श्रीसूर्य उवाच ।

अस्त्यत्र सुमुखी सूत सदा भर्तृपरायणा । दानधर्मरता भव्या सुभगा पुत्रवर्जिता ॥ १ ॥
पूर्वमासीच्च मुखजा सगर्भा फलालसा । त्रोटितं वै तया चान्यफलं भोक्तुं विनाज्ञया ॥ २ ॥
तेन कर्मविपाकेन फलहीनात्र जन्मनि । भवन्ति खलु ये पुत्रा अर्वागष्टाब्दतोऽण्डज ॥ ३ ॥
पञ्चत्वमाप्नुवंत्यत्र यस्मादकृतनिष्कृतेः । निष्कृतिं तां प्रवक्ष्यामि पूर्वपापविशोधिनीम् ॥ ४ ॥
शनिवारेऽण्डजश्रेष्ठ निर्मन्त्र्याश्वत्थकं सुत । तत्तले ब्राह्मणान्सूर्यदिने षष्ठ्यां तु भोजयेत् ॥ ५ ॥
नानाफलैस्तथा पक्वैः सापूपैरससंयुतैः । फलानि विकिरेत्तत्र कृत्वाश्वत्थप्रदक्षिणाम् ॥ ६ ॥
पूजयेत्तं महाभाग जीवेत्तस्याश्च वै सुतः ॥ ७ ॥

इत श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोदशोत्तरद्विशताधिकसहस्रतमः ॥ १२१३ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि या काचिद्घातयेद्ब्राह्मणं सुतम् । सात्र जन्मनि कुष्ठेन पापरोगेण पीड्यते ॥ १ ॥
ततो वै म्रियते सा च गलत्कुष्ठेन चाण्डज । पापाज्ज्ञानकृतात्पूर्वान्नचोक्ता निष्कृतिर्मया ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्दशोत्तरद्विशताधिकसहस्रतमः ॥ १२१४ ॥

श्रीसूर्य उवाच ।

देशे हि यामुने ह्यासीत्पूर्वं बाहुजसंज्ञकः । गङ्गास्नानं कृतं पूर्वं बाहुजानां सहायतः ॥ १ ॥

शकटेन कुटुम्बस्य पालनं ह्यकरोत्सदा। एकस्मिन्दे दिने गत्वा ददाह वनमद्भुतम् ॥ २ ॥
वशं दैवस्य संप्राप्तो जीवा दग्धा महाबलाः। वन्योः साहाय्यतस्तत्र कृतं कर्मातिदारुणम् ॥३॥
शुभाच्छुभफलं भुक्त्वा पापाच्च नरकांस्तथा। माघे तु जाह्नवीस्नानात्स जातः शूद्रजे कुले ॥ ४ ॥
विपाशानिकटे देशे योजने सप्तसम्मिते। भव्यो महोद्यमी गौरः कृशाङ्गो लोचनेऽल्पदृक् ॥ ५ ॥
बहुलोभी बहुस्त्रीको देवतातिथिपूजकः। भ्रातृहीनः शठो धूर्तः पुत्रसन्ततिवर्जितः ॥ ६ ॥
पञ्चमे भवने राहुर्भौमयुक्तोऽल्पसन्ततिः। लक्षणैर्लक्षितश्चोक्तैर्वेहि गरुडाग्रज ॥ ७ ॥
वन्योः साहाय्यतस्तत्र कृतं कर्मातिदारुणम्। पुत्रावरोधकं कर्म बलवच्चैतदेव हि ॥ ८ ॥

अरुण उवाच।

प्रायश्चित्तं वद प्रभो सुतसौख्यविवर्द्धनम्। सर्वपापप्रशमनं लोकानां हितकारणम् ॥ ९ ॥

श्रीसूर्य उवाच।

प्रायश्चित्तं प्रवक्ष्यामि जन्तुदाहविनाशनम्। वनदेवी तेन कार्या पलेनार्द्धपलेन वा ॥ १० ॥
हिरण्मयी शुभाऽऽलेख्या पत्रे वै चतुरस्रके। वनजीवास्तथा लेख्याः सर्वे तद्रूपसंज्ञकाः ॥ ११ ॥
प्रजापतिस्तथा कार्यो मापत्रयविनिर्मितः। राजतं पलमानं तु गणाध्यक्षं शिवात्मकम् ॥ १२ ॥
संपूज्य पुष्पगन्धाद्यैः सा देवी कार्यसाधिनी। सा वै देया विधिज्ञाय सर्वपापापशुत्तये ॥ १३ ॥
प्रजापतिस्तथा देयः सर्वकल्मषनाशनः। शृणुयाद्भारतं वापि पारायणविधानतः ॥ १४ ॥
अष्टाक्षरं तथा मंत्रं जपेच्च विधिपूर्वकम्। दशायुतं तदर्द्धं वा जपेच्च विधिपूर्वकम् ॥ १५ ॥
होमयेत्तद्दशांशेन तद्दशांशेन भोजयेत्। तावज्जपेत्सूर्यमंत्रं विधिवत्प्रणवादिकम् ॥ १६ ॥
विप्रेभ्यो दक्षिणां दद्यात्तस्मात्पापात्प्रमुच्यते। य एवं कुरुते सूत पूर्वपापप्रणाशनम् ॥ १७ ॥
तस्य पुत्रविवृद्धिः स्यादिह जन्मनि निश्चितम्। अकृते तु यथाशक्ति रिष्टं षट्पञ्चकेन्दके ॥१८॥
प्रायश्चित्ते कृते सूत जीवनं नवसप्ततिम्। जन्मादिमरणान्तं हि स्वल्पभेवात्र सूचितम् ॥ १९ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचदशोत्तरद्विशताधिकसहस्रतमः ॥ १२१५ ॥

श्रीसूर्य उवाच।

परान्नं या हरेन्नारी पूर्वजन्मनि सुव्रत। साऽत्राजीर्णेन रोगेण दुःखिता जायते ध्रुवम् ॥ १ ॥
कुर्यान्नानाविधं चान्नं रसैः सर्वैः समन्वितम्। विप्रेभ्यो भोजनं दद्याच्छक्त्या दद्याच्च दक्षिणाम्॥२॥
होमयेच्च तथा चान्नान्गायत्र्या त्र्यंबकेण तु। मुच्यतेऽजीर्णरोगाच्च पूर्वपापाच्च पुत्रक ॥ ३ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षोडशोत्तरद्विशताधिकसहस्रतमः ॥ १२१६ ॥

श्रीसूर्य उवाच।

देवमूर्त्तिं च यः कश्चिद्देवागारस्थितां कुधीः। भग्नां कुर्यान्नरो मोहात्परेण स्थापितां पुरा ॥ १ ॥
अप्रतिष्ठो भवेदत्र जन्मन्यथ खगाधिप। वर्षत्रयं तथाश्वत्थपूजनात्पापनाशनम् ॥ २ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तदशोत्तरद्विशताधिकसहस्रतमः ॥ १२१७ ॥

श्रीसूर्य उवाच।

यश्चावरेद्राजयक्ष्मं मोहात्पूर्वभवे नरः। स राजयक्ष्मी विज्ञेयो घोरपापयुतो नरः ॥ १ ॥
प्रायश्चित्तं महाभाग शृणु चात्र प्रयत्नतः। गोभूहिरण्यमिष्टान्नतिलवस्त्रप्रदानतः ॥ २ ॥
व्रतधेनुप्रदानेन क्षयरोगं न पश्यति। दानं यथानुमानेन सर्वस्वार्द्धार्धमेव च ॥ ३ ॥

देयं द्विजवधादौ तु विचार्यात्र प्रयत्नतः । तत्क्षणं काश्यपेयात्र क्षयरोगः प्रशाम्यति ॥ ४ ॥
रिष्टेनैव विनाशः स्यात्तस्य चाकृतनिष्कृतेः ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टादशोत्तरद्विशताधिकसहस्रतमः ॥ १२१८ ॥

श्रीसूर्य उवाच ।

या नरी वातयेत्काचित्परगर्भं पतत्रिण । जलोदरेण रोगेण पीड्यते चात्र जन्मनि ॥ १ ॥
गङ्गाजलेन सततं विधिनार्के मृगे स्थिते । तथा तज्जलपानेन तस्मात्पापात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनविंशत्युत्तरद्विशताधिकसहस्रतमः ॥ १२१९ ॥

श्रीसूर्य उवाच ।

वाग्विरोधी भवेद्यश्च पूर्वजन्मनि वादिनः । सोऽत्र जन्मनि मूकत्वं व्रजत्येव न संशयः ॥ १ ॥
मोहादिदं चरेत्सूत दद्यादानं द्विजातये । वेदानां पुस्तकं रम्यं पूजयित्वा विधानतः ॥ २ ॥
संछाद्य वस्त्रनैः शुद्धैः क्षौमजैर्गरुडाग्रज । एतत्तत्प्राक्तनाघस्य नाशनं समुदाहृतम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो विंशत्युत्तरद्विशताधिकसहस्रतमः ॥ १२२० ॥

श्रीसूर्य उवाच ।

अत्र जन्मन्यसौ वन्ध्या प्राग्भवेऽभूत्सुतान्विता । अयोध्यासंभवा सुभूर्धनभर्तृसमन्विता ॥ १ ॥
पूर्वपापप्रभावेण सपत्न्या गर्भनाशनात् । जातेयं पादजात्रैव दुःखार्ता सुतवर्जिता ॥ २ ॥
प्रायश्चित्तं प्रवक्ष्यामि सर्वपापप्रणाशनम् । काश्यां गत्वा सुविधिना शिवमाराध्य यत्नतः ॥ ३ ॥
व्रतैर्दानैर्महापुण्यैर्नानाविभवविस्तरैः । शिवरात्रौ ततः पश्चाद्दीपमालादिनेण्डज ॥ ४ ॥
अर्धरात्रे महानद्या मध्ये स्नानं तु कारयेत् । मंत्रैर्वरुणसूक्तैश्च नौकायां वा पतत्रिण ॥
यो चैवं कुरुते सम्यक्तस्याः स्यात्सन्ततिर्ध्रुवम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकविंशत्युत्तरद्विशताधिकसहस्रतमः ॥ १२२१ ॥

श्रीसूर्य उवाच ।

परनिन्दां तु यः कश्चित्प्राग्भवे विनतासुत । कुर्याद्दुर्मतिमापन्नः खल्वाटी जायतेऽधुना ॥ १ ॥
दद्यात्स कपिलां धेनुं सर्वोपस्करसंयुताम् । ब्राह्मणाय दरिद्राय तस्माद्दोषात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वाविंशत्युत्तरद्विशताधिकसहस्रतमः ॥ १२२२ ॥

श्रीसूर्य उवाच ।

या काचित्प्राग्भवे नारी कुर्याद्राजवधं सुत । सात्र जन्मनि तत्काले क्षयरोगनिपीडिता ॥ १ ॥
यक्ष्मणा वै क्षयं यान्ति धातवः सर्वदेहिनाम् । धातुक्षये क्षयं याति तच्छरीरमसांप्रतम् ॥ २ ॥
दृढकर्मकृतात्पापात्तस्मान्नोक्तं पतत्रिण । पापनाशकरं किञ्चित्कर्म चात्रैव जन्मनि ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोविंशत्युत्तरद्विशताधिकसहस्रतमः ॥ १२२३ ॥

श्रीसूर्य उवाच ।

या वाग्विरोधिनी नारी भर्तुः पूर्वभवे सुत । मूकत्वं जायते तस्याश्चात्र जन्मनि निश्चयात् ॥ १ ॥
तत्पापनाशनं दानं दद्याद्वेदस्य पुस्तकम् । विप्राय वेदविदुषे पूर्वपापात्प्रमुच्यते ॥ २ ॥
होमयेच्च तिलान्भक्ष्या भोजयेद्ब्राह्मणांस्तथा ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्विंशत्युत्तरद्विशताधिकसहस्रतमः ॥ १२२४ ॥

श्रीसूर्य उवाच ।

या काचिद्व्रंजनं कुर्यान्नारी पूर्वभवेण्डज । प्रतिमायां देवगृहे स्थापितायां परेण च ॥ १ ॥
अप्रतिष्ठान्विता सात्र जायते वै खगाधिप । वर्षत्रयं ब्रह्मवृक्षपूजनात्पापनाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचविंशत्युत्तरद्विशताधिकसहस्रतमः ॥ १२२५ ॥

श्रीसूर्य उवाच ।

कश्चिद्द्विजो महाभाग ह्यासीद्वङ्गे हि धार्मिकः । गयायां द्वादशे वर्षे कृतवाञ्छ्राद्धमुत्तमम् ॥ १ ॥
विधिना तेन दत्तानि काम्यश्राद्धानि तत्र वै । ततो भाविबलात्सूत ब्राह्मणेन तपस्विना ॥ २ ॥
स्थापितं तद्गृहे द्रव्यं लोभाद्दत्तं न तद्धनम् । सर्वैर्मिलित्वा तद्भुक्तं स्त्रीपुत्रभ्रातृभिः सह ॥ ३ ॥
ततो बहुतिथे काले गतो हि यमशासनम् । शुभात्स्वर्गफलं भुक्तं पापाच्च नरकं भृशम् ॥ ४ ॥
पूर्वपुण्यप्रभावेण स जातोऽत्रापि वै द्विजः । मथुरामण्डले देशे रम्ये पुण्यस्थले शुभे ॥ ५ ॥
विशालाक्षो धनी मानी सुरूपो मितदो घृणी । बहुदेशाधिकाराढ्यः पुण्यात्सर्वं फलं त्विदम् ॥ ६ ॥
लोभी क्रूरो महाक्षुद्रः सदा चिन्तासमन्वितः । सन्तानसुखहीनस्तु सुरूपास्त्रीसुखोज्झितः ॥ ७ ॥
बन्धुहीनो व्ययी क्षीणः सर्वं तत्पापतः फलम् । वक्ष्यामि निष्कृतिं तस्य पवित्रां पापशोधिनीम्
कुबेरप्रतिमां रौक्मीं पञ्चस्वर्णमितां शुभाम् । तदर्धार्धमितां वापि निजवित्तानुसारतः ॥ ९ ॥
संपूज्य गन्धपुष्पाद्यैः सा देया ब्राह्मणाय च । लक्ष्मीनारायणं दद्याच्छुभं स्वर्णेन निर्मितम् ॥ १० ॥
शुभं लेख्यं पवित्रं च पुत्रसन्ततिवर्द्धनम् । य एवं कुरुते भक्त्या तस्य रिष्टं न जायते ॥ ११ ॥
प्रायश्चित्ते कृते त्वत्र चायुः सप्ततिवत्सरम् ॥ १२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षड्विंशत्युत्तरद्विशताधिकसहस्रतमः ॥ १२२६ ॥

श्रीसूर्य उवाच ।

कश्चिद्द्विजो महाभाग ह्यासीद्वंगे हि धार्मिकः । गयायां द्वादशे वर्षे कृतं श्राद्धं विधानतः ॥ १ ॥
विधानात्तेन दत्तानि काम्यश्राद्धानि मानद । ततो भाविबलात्सूत ब्राह्मणेन तपस्विना ॥ २ ॥
स्थापितं तद्गृहे द्रव्यं लोभाद्दत्तं न तद्धनम् । सर्वैर्मिलित्वा तद्भुक्तं स्त्रीपुत्रभ्रातृभिः सह ॥ ३ ॥
ततो बहुतिथे काले गतो हि यमशासनम् । शुभात्स्वर्गफलं भुक्तं पापाच्च नरकं भृशम् ॥ ४ ॥
पूर्वपुण्यप्रभावेण स जातोऽत्रापि वै द्विजः । मथुरामण्डले देशे रम्ये पुण्यस्थले शुभे ॥ ५ ॥
विशालाक्षो धनी मानी सुरूपोऽमितदो घृणी । बहुदेशेऽधिकाराढ्यः पुण्यात्सर्वं फलं त्विदम् ॥ ६ ॥
लोभी क्रूरो महाक्षुद्रः सदा चिन्तासमन्वितः । सन्तानसुखहीनस्तु सुरूपस्त्रीसुखोज्झितः ॥ ७ ॥
बन्धुहीनो व्ययी क्षीणः सर्वं तत्पापतः फलम् । वक्ष्यामि निष्कृतिं तस्य पवित्रां पापशोधिनीम् ॥ ८ ॥
कुबेरप्रतिमां रौक्मीं पञ्चस्वर्णमितां शुभाम् । तदर्धार्धमितां वापि निजवित्तानुसारतः ॥ ९ ॥
संपूज्य गन्धपुष्पाद्यैस्तां दद्याद्ब्राह्मणाय वै । लक्ष्मीनारायणं दद्यात्सुवर्णसंमितं शुभम् ॥ १० ॥
लेख्यं पवित्रं परमं पुत्रसन्ततिवर्द्धनम् । य एवं कुरुते भक्त्या तस्य रिष्टं न जायते ॥ ११ ॥
प्रायश्चित्ते कृते त्वत्र चायुः सप्ततिवत्सरम् ॥ १२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तविंशत्युत्तरद्विशताधिकसहस्रतमः ॥ १२२७ ॥

अरुण उवाच ।

भूमिदेवकुलोत्पन्नो वाताधिकशरीरवान् । क्षामाङ्गः क्षीणवर्णश्च स्वल्पवृत्तिर्विजोविकः ॥ १ ॥

देवब्राह्मणभक्तश्च किंचिद्वेदपरायणः । करे पादे कुशस्त्रेण दंष्ट्राशृङ्गविधानतः ॥ २ ॥
व्रणो हि जायते दीर्घो नेत्रतोदो विरोहिता । परोक्षमपवादं च ब्रूते लोकस्य सोऽन्वहम् ॥ ३ ॥
प्रिया तस्य शुभाचारा पतिभक्तिपरायणा । अनृतं भाषते किञ्चित्किञ्चित्क्लेशस्य कारिणी ॥ ४ ॥
अपत्यानि मृतानीह तस्याः कानिचिदेव हि । वर्षत्रयमिता बाला म्रियन्ते मासमिताः ॥ ५ ॥
केन कर्मविपाकेन मृतापत्यं प्रजायते । उदरे हि स्थितो गर्भो न प्रसूतिर्न पातनम् ॥ ६ ॥
पृथगेवं तु भ्रातॄणां मृतापत्यत्वमेव च । गतो बहुतरः कालः कस्येदं कर्मणः फलम् ॥ ७ ॥

श्रीसूर्य उवाच ।

अतः पूर्वे वैनतेय तृतीयेऽत्रैव जन्मनि । क्षात्रे कुले समुत्पन्नः कश्चिद्भूमिपतिस्तथा ॥ ८ ॥
दानव्रतदयायुक्तः प्रियाप्रीतिः परस्परम् । तस्य चापरमातुस्तु पिता मृत्युवशं गतः ॥ ९ ॥
तदौर्ध्वदेहिकं पुत्रैर्वित्तेन सदृशं कृतम् । मासत्रये ह्यतिक्रान्ते ज्येष्ठेनैव दुरात्मना ॥ १० ॥
निहता भ्रातरः सर्वे भाविनोऽर्थस्य वै बलात् । पुत्रशोकार्तया मात्रा हृदयं ताडितं भृशम् ॥ ११ ॥
अभिघाताच्छिलाभूताद्धर्मयुक्ता दिवं गता । अचिरेणैव कालेन ज्येष्ठश्चौरेण घातितः ॥ १२ ॥
द्वितीयं जन्म चैतद्धि मृतापत्यं प्रजायते । पुरा कृतानि कर्माणि भुज्यन्ते चेह मानवैः ॥ १३ ॥

अरुण उवाच ।

प्रायश्चित्तं वद स्वामिन्येन पापक्षयो भवेत् । लघूनामलघूनां च गर्भस्थानां हि तत्त्वतः ॥ १४ ॥

श्रीसूर्य उवाच ।

सौम्येऽयने तु संप्राप्ते ह्यनुकूलग्रहे दिने । सपत्नीकः शुचिः स्नातः पञ्चगव्येन चांजसा ॥ १५ ॥
उपोषणदिने रात्रौ प्रातश्चानुदिते रवौ । सुरभेर्वै सगर्भाया गोमयेनोपलेपयेत् ॥ १६ ॥
सुशुभे भूप्रदेशे तु कुंकुमाद्युपचर्चिते । कुर्यादष्टदलं पद्मं चित्रवर्णं सुशोभनम् ॥ १७ ॥
तन्मध्ये रुक्मिणीयुक्तं माधवं कलशेऽर्चयेत् । सौवर्णे राजते पद्मे सायुधं सचतुर्भुजम् ॥ १८ ॥
उपचारैः शुभैर्गन्धैर्धूपैश्च कुसुमादिभिः । जनन्यासहितान्देवान्प्रद्युम्नाद्यांस्तथाऽर्चयेत् ॥ १९ ॥
चारुदेहं सुवेशं च चारुगुप्तं यशोन्वितम् । इभवाहं चारुबाहुं सुचारुं पूजयेत्क्रमात् ॥ २० ॥
पूजनं विष्णुसूक्तेन तथा श्रीरसकोविदैः । पुष्पस्रग्धूपगन्धाद्यैरर्चयेद्विविधैर्गुणैः ॥ २१ ॥
तद्विप्रांस्तोऽथ तद्विष्णोरतो देवाभिपूजयेत् । शतमष्टोत्तरं हुत्वा चरुणा पायसेन वै ॥ २२ ॥
होमान्ते विप्रभोजान्ते मन्त्रमेतमुदीरयेत् । " यन्मया पापकेनाघं कृतं वै पूर्वजन्मनि ॥ २३ ॥
स्वपत्न्या वै वधो मोहात्पुत्राणां तु तथैव च । स्वकन्याहननाद्वापि भूमिद्रव्यादिलिप्सया ॥ २४ ॥
लघूनामलघूनां च हननात्पूर्वजन्मनि । यच्चाघं वै मया प्राप्तं दुःखं नानाविधं त्विदम् ॥ २५ ॥
तत्तदेनोविनाशाय दानं संप्रददे त्विदम् । " स्वस्त्यस्तु चेति तत्रोक्त्वा कोऽदादिति विसर्जनम् ॥
सर्पिष्यात्मानमालोक्य भुंजीत द्विजबन्धुभिः । ऐहिकं लक्ष्म विज्ञेयं पूर्वकर्माभिशंसकम् ॥ २७ ॥
काष्ठलोष्टादिशस्त्राद्यैर्घातः स्याद्बालक्रीडनात् । जलादग्न्यादिना बाधा ब्राह्मणाश्मादिना तथा ॥
नार्यङ्गे विकृतिर्व्याधी मुखे तिलव्रणादिकम् । पैत्र्यीयमातुलान्यादिनेत्रतोदादिकं तथा ॥ २९ ॥
स्वसुर्मातृष्वसुर्वापि बालवैधव्यलादिकम् ॥ ३० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाविंशत्युत्तरद्विशताधिकसहस्रतमः ॥ १२२८ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे मोहात्परनिन्दां समाचरेत् । षट् युता सा हि जायतेऽत्रैव जन्मनि ॥ १ ॥
धेनुं दद्यान्महाभाग विधियुक्तां सकम्बलाम् । तस्माद्रोगाद्विमुच्येत नात्र कार्या विचारणा॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनत्रिंशदुत्तरद्विशताधिकसहस्रतमः ॥ १२२९ ॥

श्रीसूर्य उवाच ।

अभक्ष्यं भक्षयेद्यस्तु पूर्वजन्मनि मानवः । गण्डमालारुग्परोगेण संयुक्तो जायतेऽत्र वै ॥ १ ॥
पुण्यदेशे महाभाग संक्रान्त्यादिषु पर्वसु । गृहीत्वा कम्बलं शुद्धं नवं वेदविदे च तत् ॥ २ ॥
कुटुम्बिने दरिद्राय दद्याद्दोषापनुत्तये । गण्डमालाहरं चैतद्दानमुक्तं मया त्विह ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिंशदुत्तरद्विशताधिकसहस्रतमः ॥ १२३० ॥

श्रीसूर्य उवाच ।

कुलघ्नीयं महादुष्टा पूर्वमासीत्खगाधिप । अत्र पूर्वकृतात्पुण्यान्मानुषी संकरा स्मृता ॥ १ ॥
धनपुत्रविहीना सा चात्र जन्मनि दृश्यते । निष्कृतिं तु प्रवक्ष्यामि प्रयागे मरणात्पुनः ॥ २ ॥
वासात्पापं क्षयं याति पूर्वजन्मकृतं दृढम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकत्रिंशदुत्तरद्विशताधिकसहस्रतमः ॥ १२३१ ॥

श्रीसूर्य उवाच ।

पक्षघातं तु यः कुर्यात्सभार्यां ब्राह्मणस्य च । पक्षाघातेन रोगेण पीडितोऽत्रैव जायते ॥ १ ॥
दद्यान्निष्कत्रयं स्वर्णं ब्राह्मणाय कुटुम्बिने । तस्माद्रोगाद्विमुच्येत पक्षाघातात्पतत्रिण ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वात्रिंशदुत्तरद्विशताधिकसहस्रतमः ॥ १२३२ ॥

श्रीसूर्य उवाच ।

अभक्ष्यं भक्षयेत्पूर्वं या नारी द्विजवल्लभा । गण्डमालारुग्परोगेण संयुक्ता जायतेऽधुना ॥ १ ॥
पुण्यदेशे महाभाग संक्रांत्यादिषु पर्वसु । पूर्वपापहरं पुण्यं दद्यादत्र च कम्बलम् ॥ २ ॥
नवं शुद्धं कुलीनाय तस्मात्पापात्प्रमुच्यते । द्विजानामिच्छया दद्याद्भोजनं पापनाशनम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयस्त्रिंशदुत्तरद्विशताधिकसहस्रतमः ॥ १२३३ ॥

श्रीसूर्य उवाच ।

अवधीद्बालकं कश्चिद्ब्राह्मणस्य खगाधिप । वङ्गदेशे वसन्पूर्वे चात्र जन्मनि गौडजः ॥ १ ॥
धीरः सर्वकलाभिज्ञो नानाशास्त्रविशारदः । धनधान्यरतश्चात्र बहुस्त्रीसुखभोगभाक् ॥ २ ॥
विद्यादानात्कृतात्पूर्वं शृणु पापफलं तथा । क्षयरोगाकुलः क्षीणः पुत्रसन्ततिवर्जितः ॥ ३ ॥
विप्रबालकघातोत्थात्पातकाद्धे खगाधिप । महाक्रोधपरो लोभी नानादुःखैस्तथाकुलः ॥ ४ ॥
वक्ष्यामि निष्कृतिं तस्य बालघातविमोचनीम् । प्रयागे वा कुरुक्षेत्रे पुष्करे वा महास्थले ॥ ५ ॥
नैमिषारण्यके क्षेत्रे पूजयेद्विधिवच्छिवान् । गन्धपुष्पैस्तथा धूपैर्लक्षसंख्याविधानतः ॥ ६ ॥
ब्रह्मचर्यरतो नित्यं तदन्ते होमयेत्तथा । षडस्रे चतुरस्रे वा कुण्डेचाज्यतिलाञ्शुभान् ॥ ७ ॥
शक्त्या च भोजयेद्विप्राञ्छैवान्कासारलड्डुकैः । नानाभक्ष्यफलैश्चैव वस्त्रैर्माल्यैस्तथार्चयेत् ॥८ ॥
विविधां दक्षिणां दद्याद्रुद्रप्रीतिकरीं तथा । यश्चानेन विधानेन प्रायश्चित्तं समाचरेत् ॥ ९ ॥

स बालघातजात्पापान्मुच्यतेऽत्र ममाज्ञया । चतुर्दश्यामथाऽष्टम्यां नक्तं कुर्याद्विधानतः ॥ १० ॥
मम ध्यानपरः सूत नित्यं भूत्वा ममाग्रतः । पूजयेदर्घपाद्याद्यैर्नैवेद्यैर्विविधैस्तथा ॥ ११ ॥
तमहं सर्वपापेभ्यो विमोक्ष्यामि खगेश्वर । आयुस्तस्य शतं प्रोक्तं पञ्चवर्षाधिकं खग ॥ १२ ॥
प्रायश्चित्ते कृते यस्मात्पञ्चम्यां चन्द्रवासरे । प्रायश्चित्तेऽकृते सूत चत्वारिंशन्मिताब्दके ॥ १३ ॥
रिष्टं स्यात् क्षयरोगेण सप्तजन्मनि निश्चयात् । ब्रह्महा क्षयरोगी स्यादिति वेदविदो विदुः ॥१४॥
नहीदृशं महापुण्यं क्षयरोगविनाशनम् । पुत्रवृद्धिकरं चात्र यथा प्रोक्तं शिवार्चनम् ॥ १५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुस्त्रिंशदुत्तरद्विशताधिकसहस्रतमः ॥ १२३४ ॥

श्रीसूर्य उवाच ।

विनापराधं या नारी परपक्षं च घातयेत् । पक्षाघातेन रोगेण पीडिताऽत्रैव जायते ॥ १ ॥
तया निष्कृमितं स्वर्णं देयं पापविशुद्धये । मुच्येताऽत्र महारोगात्पक्षाघातान्न संशयः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचत्रिंशदुत्तरद्विशताधिकसहस्रतमः ॥ १२३५ ॥

श्रीसूर्य उवाच ।

कुण्ठादागतस्तत्र मथुरायां खगाधिप । जातोऽयं पुण्डरीकाक्षः सर्वभूताभयप्रदः ॥ १ ॥
घोरे कलियुगे प्राप्ते पापाक्रान्ते महाबले । भारावतारणार्थाय क्षत्रियाणां क्षयाय च ॥ २ ॥
कृत्वा तु दुष्करं कर्म पुनर्यास्यति वै दिवि ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्त्रिंशदुत्तरद्विशताधिकसहस्रतमः ॥ १२३६ ॥

श्रीसूर्य उवाच ।

स्वर्णापहारी सततं पुरुषः प्राग्भवेऽण्डज । कुनखी जायते चात्र महापापेन लाञ्छितः ॥ १ ॥
दद्यात्सुवर्णं सततं स तद्दोषविनाशनम् । चांद्रायणत्रयं कुर्यात्तदा तद्दोषशान्तये ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्रिंशदुत्तरद्विशताधिकसहस्रतमः ॥ १२३७ ॥

श्रीसूर्य उवाच ।

राजघातकरी प्रोक्ता या पूर्वं घातयेन्नृपम् । राजयक्ष्मान्विता सात्र तस्मिन्नयसि भामिनी ॥ १ ॥
प्रायश्चित्तं परं तस्याः शृणुष्वात्र खगेश्वर । यस्मिन्कृते हि विधिना पूर्वजन्माघनाशनम् ॥ २ ॥
स्वर्णगोभूमिमिष्टान्नवृषधेनुतिलानि च । देयानि श्रद्धया सूत क्षयरोगोपनुत्तये ॥ ३ ॥
रिष्टं त्रिंशन्मितेऽब्दे तु प्रायश्चित्तेऽकृते त्विह ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टत्रिंशदुत्तरद्विशताधिकसहस्रतमः ॥ १२३८ ॥

श्रीसूर्य उवाच ।

विनापराधं यः कश्चिद्वैश्यं हन्यात्खगाधिप । प्राग्जन्मन्यथ युक्तः स्याद्रक्तार्बुदरुजा भृशम् ॥१॥
भविष्यति न सन्देहस्तस्य मृत्युः खगाधिप । अपि दानशतैर्वापि दत्तैरत्रैव जन्मनि ॥ २ ॥
त्रिंशे वर्षे महारिष्टं रक्ताधिक्यान्महाबलात् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनचत्वारिंशदुत्तरद्विशताधिकसहस्रतमः ॥ १२३९ ॥

श्रीसूर्य उवाच ।

यो मोहाद्घातयेद्वैश्यमन्यजन्मनि मानवः । सोऽत्र जन्मनि विज्ञेयो रक्तार्बुदसमन्वितः ॥ १ ॥

प्राजापत्यचतुष्केण व्रतेन नियमेन च । सप्तधान्यप्रदानेन पूर्वजन्मार्जनाशनम् ॥ २ ॥
पापक्षये महाभाग क्षयः पापरुजोऽपि हि ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चत्वारिंशदुत्तरद्विशताधिकसहस्रतमः ॥ १२४० ॥

श्रीसूर्य उवाच ।

मेरोः समागता येयं शक्तिर्माथुरमण्डले । सर्वभूतोपकाराय दुष्टनाशकराय च ॥ १ ॥
प्राप्ते कलियुगेऽत्रैव सर्वपापविवर्जितम् । कृत्वा चाद्भुतकर्माणि पुनस्तत्रैव यास्यति ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकचत्वारिंशदुत्तरद्विशताधिकसहस्रतमः ॥ १२४१ ॥

श्रीसूर्य उवाच ।

या काचिद्ब्राह्मणी पूर्वभवे मोहात्सुरां पिबेत् । सात्र जन्मनि मूत्रस्य कृच्छ्रेणाति प्रपीड्यते॥ १॥
प्रायश्चित्तं परं तस्या घोरपापहरं सुत । सुवर्णपद्मदानं च सपत्रं ब्रह्मदैवतम् ॥ २ ॥
ब्राह्मणाय विधिज्ञाय पूजिताय निवेदयेत् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विचत्वारिंशदुत्तरद्विशताधिकसहस्रतमः ॥ १२४२ ॥

अरुण उवाच ।

कश्चिद्विप्रोत्तमो जातः किंचिद्वित्तसमन्वितः । कासश्वासादिना बाधा ह्युदरार्तिश्च तस्य वै ॥ १ ॥
क्रयविक्रयकर्तासौ कृषिवाणिज्यतत्परः । प्रिया प्रीतिपरा तस्य व्रतानामनुकांक्षिणी ॥ २ ॥
किंचित्क्रोधयुता सा वै कुवाक्यानाश्च भाषिणी । उदरे वातजा रोगा शिरोर्तिर्नेत्रतोदनम् ॥३ ॥
नैकोपि दिवसस्तस्या यस्मिन्सा मुदिता भवेत् । रजोदोषात्प्रपीड्येत वेदनाभिस्तथातुरा ॥
केन कर्मविपाकेन सत्यं कथय भास्कर ॥ ४ ॥

श्रीसूर्य उवाच ।

भर्तुः कृतं कर्म नैतत्स्त्रीकृतं नात्र संशयः । पूर्वजन्मनि सा शूद्री द्विजभक्तिपरायणा ॥ ५ ॥
व्रतानि विविधान्येव चक्रे वै सुखकांक्षिणी । तद्गृहे धान्यराशेस्तु भक्षणाय समागताम् ॥ ६ ॥
ब्राह्मणस्य शुभां गां वै धान्यराशिं समश्नतीम् । गृहीत्वा लकुटीं सा वै भृशं कुक्षावताडयत्॥७॥
सगर्भा सुरभिर्वत्स गर्भः कुक्ष्युपघातनात् । मृतः सा सुरभिर्वत्स प्रसवे दुःखिता भृशम् ॥ ८ ॥
शिशुदुःखेन सुरभिर्भृशमाक्रंदती मृता । तेन कर्मविपाकेन नरकं प्राप्य दारुणम् ॥ ९ ॥
पश्चान्मानुष्यमापन्ना व्रतदानप्रभावतः । तृतीयं जन्म चैताद्धि मृतापत्यत्वकारकम् ॥ १० ॥
सप्तजन्मनि चैवं हि गोस्त्रीब्रह्मवधाद्ध्रुवम् । नानाप्राक्कर्मणान्तेषां नानापत्यार्थदुःखता ॥ ११ ॥

अरुण उवाच ।

प्रायश्चित्तं वद स्वामिन्येनापत्यं हि जीवति । अनुग्राह्योऽस्म्यहं देव लोकानां हितकाम्यया ॥१२॥

श्रीसूर्य उवाच ।

मासे नभसि संप्राप्ते ह्यनुकूलेऽहेऽहनि । सपत्नीकः शुचिः स्नात औषधैः स्नानमंत्रतः ॥ १३ ॥
उपोषणं दिवारात्रौ त्रयोदश्यामतन्द्रितः । पूर्णमास्यां दिनं प्राप्य प्रातर्भानूदिते सति ॥ १४ ॥
सुरभ्यास्तु सगर्भाया गोमयेनोपलेपयेत् । तत्रोपरि गवां स्थानं चोदङ्मुखसमाश्रितम् ॥ १५ ॥
अर्हणाद्युपचारैश्च कुंकुमाद्यैः समर्चयेत् । कुर्यादष्टदलं पद्मं चित्रवर्णं सुशोभनम् ॥ १६ ॥
तत्रोपरि न्यसेद्देवं माधवं कलशेऽर्चयेत् । सौवर्णे राजते पद्मे सायुधं सचतुर्भुजम् ॥ १७ ॥

उपचारैः शुभैर्गन्धैर्धूपैश्च कुसुमादिभिः । विष्णुसूक्तेन सूक्तेन श्रियः सूक्तेन पूजनम् ॥ १८ ॥
पुष्पैश्च गन्धधूपाद्यैरर्चयेद्विविधैर्गुणैः । रुद्रैकादशनीभिश्च जपेद्रुद्रविधानतः ॥ १९ ॥
तथा लक्षमितैः पुष्पैरर्चयेद्गन्धवारिभिः । शतमष्टोत्तरं हुत्वा चरुणा पायसेन वा ॥ २० ॥
रुद्रस्यायुतहोमश्च समिदाज्यादिभिश्चरेत् । एवं पृथग्विधानेन विष्णुरुद्रादिपूजनम् ॥ २१ ॥
होमान्ते विप्रभोजान्ते मन्त्रमेतमुदीरयेत् ॥ २२ ॥

मन्त्रः ।

"यन्मया कर्मवशतः पुराजन्मनि दुर्धिया । गोः कृतो गर्भघातो हि लकुट्या कुक्षिघातनम्॥२३॥
तेन वै कर्मणा प्राप्तं मृतगर्भादिकं भृशम् । मृतसन्तन्तिदुःखानि प्राप्यन्ते च तदेनसः ॥ २४ ॥
तत्तदेनोपशान्त्यर्थं दानं संप्रददाम्यहम्' ॥ २५ ॥
स्वस्त्यस्तु तेति स प्रोक्तो दोदादिति विसर्जयेत् । सर्पिष्यात्मानमालोक्य शक्त्या वै तोषयेद्द्विजान्२६
भूमिद्रविणवासांसि दानं दत्त्वा विधानतः । व्रतान्ते सुरभिं दद्याद्धेम द्रव्यादि शक्तितः ॥ २७ ॥
अहःशेषं ततः सर्वं भोजयेदिष्टबन्धुभिः । ऐहिकं लक्षणं तस्य शरीरेऽप्युपजायते ॥ २८ ॥
काष्ठलोष्टादिशस्त्राद्यैर्घातः स्यादुपलेखनात् । शृंगिणां चोपघातानि जायन्ते व्रणजार्त्तयः ॥ २९॥
जलाकुलत्वं स्पर्शेऽग्नेस्तादृक्तत्र प्रजायते । नार्थगे विकृतिव्याधी मुखे तिलव्रणादिकम् ॥ ३० ॥
पितृजामातुलान्यादेर्विधवार्त्तिश्च जायते ॥ ३१ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिचत्वारिंशदुत्तरद्विशताधिकसहस्रतमः ॥ १२४३ ॥

श्रीसूर्य उवाच ।

या काचिद्ब्राह्मणी पूर्वभवे मोहात्सुरां पिबेत् । प्रदरेणातिदुःखेन सात्र जन्मनि पीड्यते ॥ १ ॥
प्रायश्चित्तं परं तस्याः प्रदरं नाशयेन्महत् । दद्याद्रत्नमयं पद्मं सपत्रं ब्रह्मदैवतम् ॥ २ ॥
ब्राह्मणाय सुशीलाय पूजिताय यथाविधि ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुश्चत्वारिंशदुत्तरद्विशताधिकसहस्रतमः ॥ १२४४ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि यो विप्रस्त्रिविधां वै सुरां पिबेत् । मूत्रावरोधरोगेण सोऽत्र मृत्युवशं व्रजेत् ॥ १ ॥
चिह्नेन श्यावदन्तेन लक्षितः पापजः सदा । सप्तजन्मनि रोगेण मूत्रकृच्छ्रेण नश्यति ॥ २ ॥
दृढात्प्राक्पापजात्सूत्र प्रायश्चित्तं न विद्यते । पापक्षयार्थं विधिवत्कृच्छ्रसान्तपनं चरेत् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचचत्वारिंशदुत्तरद्विशताधिकसहस्रतमः ॥ १२४५ ॥

श्रीसूर्य उवाच ।

अकामतश्च या नारी वैश्यघातनतत्परा । पूर्वजन्मनि पक्षीन्द्र सात्र जन्मनि निश्चयात् ॥ १ ॥
रक्तार्बुदसमाक्रान्ता दुष्टपापप्रयोजिता । महारिष्टेन सा याति यमलोकं खगाधिप ॥ २ ॥
चत्वारिंशन्मिते वर्षे रिष्टं चाकृतनिष्कृतेः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्चत्वारिंशदुत्तरद्विशताधिकसहस्रतमः ॥ १२४६ ॥

श्रीसूर्य उवाच ।

काचित्पूर्वभवे पुण्या सुखजात्र च वाहुजा । देशे सारस्वते प्राप्ता सर्वकर्मान्विता सती ॥ १ ॥

क्षयरोगयुता चात्र युवभावे खगाधिप। प्राक्पापाद्दुस्तरात्सूत कंटपादादिसम्भवात् ॥ २ ॥
निष्कृतिं कदलीं दद्यात्सुवर्णत्रयसंयुताम्। भोजयेद्ब्राह्मणान्पश्चाच्छिवपूजनतत्परान् ॥ ३ ॥
या त्वेवं कुरुते भक्त्या कदलीदानमुत्तमम्। नश्येच्च क्षयरुक्तस्याः सुखमाप्नोति वै ध्रुवम् ॥ ४ ॥
आयुर्वर्षाणि षष्टिं स्यात्तथा सप्ततिसंख्यकम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तचत्वारिंशत्युत्तरद्विशताधिकसहस्रतमः ॥ १२४७ ॥

श्रीसूर्य उवाच।

यो नरोऽतिबलोत्कर्षात्परस्त्रीं कामयेत्पुरा। इह वै यौवने प्राप्ते सोन्मादी जायते भृशम् ॥ १ ॥
दद्यात्प्रजापतिं देवं सौवर्णं शक्तितोऽजः। मृगं स्वर्णमयं तद्वत्पूजयित्वा विधानतः ॥ २ ॥
भोजयेद्ब्राह्मणान्भक्त्या होमयेच्च जपेत्तथा। गायत्रीं विधिना सूत सोन्मादान्मुच्यते त्विह ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टचत्वारिंशदुत्तरद्विशताधिकसहस्रतमः ॥ १२४८ ॥

श्रीसूर्य उवाच।

या नारी प्राग्भवे सूत परस्वर्णापहारिणी। साऽत्र जन्मनि रोगेण कुनखाख्येन बाध्यते ॥ १ ॥
दद्यात्सुवर्णशतकं विप्राय विनतात्मज। सुवर्णस्तेयपापेन मुच्यतेऽत्रैव जन्मनि ॥ २ ॥
चान्द्रायणत्रयं चैव कुर्यान्मासे तु कार्तिके ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनपंचाशदुत्तरद्विशताधिकसहस्रतमः ॥ १२४९ ॥

श्रीसूर्य उवाच।

वैश्यहा यो भवेत्पूर्वं भवे ना चात्र निःप्रजाः। रक्तार्बुदेन रोगेण बाध्यते चात्र जन्मनि ॥ १ ॥
व्रतं चरेन्महाभाग प्राजापत्यचतुष्टयम्। सप्तधान्यस्य दानेन रक्तार्बुदविनाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाशदुत्तरद्विशताधिकसहस्रतमः ॥ १२५० ॥

श्रीसूर्य उवाच।

कश्चिन्म्लेच्छकुलोत्पन्नो बहुद्रव्यान्वितः सुधीः। स्वधर्मनिरतश्चापि दयालुः सत्यसंयुतः ॥ १ ॥
त्यागी शूरो महोत्साही देशे केरलके सुत। स्वाधिधर्मपरो नित्यं सपत्नीकः सपुत्रकः ॥ २ ॥
प्रजाः पालयतस्तस्य शूरस्याऽपि महात्मनः। दुष्टाः प्रजाः क्रोधयुक्ताः बभूवुर्विमुखास्तदा ॥ ३ ॥
तस्मिन्काले त्वभूद्युद्धं घोरं तस्मिन्पुरे तदा। संग्रामभूमौ स मृतो यवनश्च सपुत्रकः ॥ ४ ॥
तस्य पत्नी महाभागा साध्वी पतिपरायणा। तस्मिन्मृते मृता सा तु भर्तुः प्राणावलंबिनी ॥ ५ ॥
घातयित्वा तु शस्त्रेण स्वशरीरं पतिव्रता। मृते पत्यौ न जीवामीत्युक्त्वा मृतवती तदा ॥ ६ ॥
तद्गुणौ सातकालेऽपि दिवि प्राप्ता सभर्तृका। भुक्त्वा तत्र महाभोगान्स्वामिप्राग्धर्मसम्भवान् ॥ ७ ॥
नानाप्रजाघातजानि पापान्यथ बुभोज सा। क्षीणात्पुण्यात्तथा जज्ञे म्लेच्छदेशे तु तत्पतिः ॥ ८ ॥
सिन्धोः पश्चिमभागे तु शतयोजनसम्मिते। गौरः सुरूपो दीर्घश्च बहुविद्याविशारदः ॥ ९ ॥
नानाभोगसुखैर्युक्तो गजयूथैः समावृतः। पत्यश्वरथसंकीर्णस्तथा भैरवशासनः ॥ १० ॥
महोग्रः पुत्रपौत्राढ्यश्चात्यंतसुखसंयुतः। देशेदेशेऽधिकारी च स म्लेच्छः पृथिवीपतिः ॥ ११ ॥
स्त्रीसाहाय्यान्महाभाग तथा पुत्रसमन्वितः। सुखैश्वर्ययुता साऽपि यवनी तद्वशा त्विह ॥ १२ ॥
सपुत्रः प्राक्साहाय्याच्च सोप्यत्रैव महाप्रभुः। एवं जन्मफलं प्रोक्तं ससाहाय्यात्खगाधिप ॥ १३ ॥
स्वामिधर्मकृतात्पुण्यात्तदर्थमरणादपि। भविष्यति गतिस्तेषां पूर्वपुण्यात्खगेश्वर ॥ १४ ॥

पञ्चाशीतिसमायुस्यान्नच रिष्टेन तन्मृतिः । रिष्टं पञ्चाशत्तमेब्दे स्वदेहान्तसमं सुत ॥ १५ ॥
शस्त्रप्रहारैर्विधैः प्राप्स्यत्यत्र रणाङ्गणे । प्रजापीडनजात्पापात्तद्वर्षे नात्र संशयः ॥ १६ ॥
दद्यात्कालनरं तत्र ब्राह्मणाय कुटुम्बिने । देयो हिरण्मयस्तद्वद्गजः शतपलात्मकः ॥ १७ ॥
कुरुक्षेत्रादितीर्थेषु संक्रान्त्यादिषु पर्वसु । सर्वोपस्करसंयुक्तः देयश्चायं तु पुत्रक ॥ १८ ॥
महारिष्टहरं प्रोक्तं प्रायश्चित्तमिदं महत् । नातः परतरं प्रोक्तं दानात्कालनरात्क्वचित् ॥ १९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकपंचाशदुत्तरद्विशताधिकसहस्रतमः ॥ १२९१ ॥

श्रीसूर्य उवाच ।

या काचिद्यौवने नारी रमयेत्स्वेच्छया परम् । बलात्कारेण पुरुषं सात्रोन्मादेन पीड्यते ॥ १ ॥
तत्पापनाशनं श्रेष्ठमुपायं शृणु यत्नतः । कृत्वा सुवर्णजं वायुं शृगं हैमं च वाहनम् ॥ २ ॥
सर्वोपस्करसंयुक्तं दद्याद्विप्राय धीमते । न प्राप्नोति तदोन्मत्तभावं दानप्रभावतः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विपंचाशदुत्तरद्विशताधिकसहस्रतमः ॥ १२९२ ॥

श्रीसूर्य उवाच ।

त्रपुहारी च यः पूर्वे जन्मन्यत्रैव जन्मनि । श्लेष्मरोगेण सततं बाध्यते विनतासुत ॥ १ ॥
दद्यात्तत्पापनाशाय त्रपु विप्राय धीमते । पलानां त्रिंशतं शुद्धं तस्माद्रोगाद्विमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिपंचाशदुत्तरद्विशताधिकसहस्रतमः ॥ १२९३ ॥

श्रीसूर्य उवाच ।

पत्यौ जीवति या जाराद्गर्भं धृतवती पुरा । सा चात्र पादजा दुष्टा न च गर्भं दधाति वै ॥ १ ॥
काश्या वासान्महाभाग श्रद्धया रुद्रपूजनात् । कन्याविवाहात्सततं दरिद्रद्विजपालनात् ॥ २ ॥
धारयिष्यति सा गर्भं प्रायश्चित्ताद्यथोदितात् । प्रायश्चित्ते कृते रिष्टं चत्वारिंशन्मितेब्दके ॥ ३ ॥
प्रायश्चित्ते कृते सूत षडशीत्यब्दजीवनम् ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःपंचाशदुत्तरद्विशताधिकसहस्रतमः ॥ १२९४ ॥

श्रीसूर्य उवाच ।

आखेटकं विना यस्तु हस्तिनं प्राग्जघान वै । सोऽत्र जन्मनि जायेत सर्वकर्मस्वसिद्धिकृत् ॥ १ ॥
तस्मिन्नेव तदा काले तस्य रिष्टं प्रकीर्तितम् । तस्य विंशतिमे वर्षे खग शस्त्रान्मृतिर्भवेत् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायःपञ्चपञ्चाशदुत्तरद्विशताधिकसहस्रमः ॥ १२९५ ॥

श्रीसूर्य उवाच ।

यः कश्चिद्ब्राह्मणीं सूत बलोत्कर्षेण मन्दधीः । रमयेत्प्राग्भवे सोऽत्र महोन्मादी प्रजायते ॥ १ ॥
पापादसाध्यरोगाद्यै तस्य मुक्तिर्न जायते । म्रियते रिष्टयोगेन सोन्माद्यत्र च जन्मनि ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्पञ्चाशदुत्तरद्विशताधिकसहस्रतमः ॥ १२९६ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि या नारी मोहाल्लोभाद्धरेत्रपु । सात्र जन्मनि पक्षीन्द्र श्लेष्मरुक्संयुता भवेत् ॥ १ ॥
शतत्रयपलं दद्यात्रपु तत्पापशुद्धये । तत्पापस्य क्षये सूत श्लेष्मरोगस्य नाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तपञ्चाशदुत्तरद्विशताधिकसहस्रतमः ॥ १२९७ ॥

श्रीसूर्य उवाच ।

विप्रवंशे समुत्पन्नः शक्तिमान्वेदपारगः । धनधान्यसुखोपेतश्चेर्ष्यालुश्च जनान्वितः ॥ १ ॥
सुव्रतः शक्तिमान्वीरः किञ्चिद्व्याधिसमन्वितः । इन्द्रियाणां बलं हत्वा मेही वै जायते भृशम् ॥ २ ॥
उदरार्तिरसृग्घातः किञ्चिद्देहे प्रवर्तते । तस्य प्रिया शुभाचारा पतिभक्तिपरायणा ॥ ३ ॥
सत्यवाक्सत्यपा लोके व्रतानामनुकांक्षिणी । बहुपुत्रान्हि सुषुवे कथञ्चित्कोऽपि जीवति ॥ ४ ॥
अथवा मृतपुत्रा च पुत्र्यो जीवन्ति वा सुत ॥ ५ ॥

अरुण उवाच ।

केन कर्मविपाकेन सत्यं वद दिवस्पते ॥ ६ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि विप्रस्तु प्रतीच्यां समजायत । तस्य गेहे स्थिता कन्या प्रौढा साभूत्क्रियाहिनैः ॥ ७ ॥
भूरिद्रविणलोभेन वृद्धविप्राय सार्पिता । धनं विप्रस्य तत्पित्रा हृतं कन्याबलेन वै ॥ ८ ॥
यावत्कन्या भवेत्प्रौढा पतिसङ्गमकांक्षिणी । पतिभक्तिपरा नित्यं यावत्कन्या सुतार्थिनी ॥ ९ ॥
किञ्चिद्वर्षे व्यतिक्रान्ते वृद्धविप्रो मृतश्च वै । सा बाला विधवा जाता पत्यपत्यार्थदुःखिनी ॥ १० ॥
व्रततीर्थरता नित्यं सत्यानामनुकांक्षिणी । बहुवर्षैस्तया वत्स नियमैः शोषितं वपुः ॥ ११ ॥
पित्रा धनं गृहे भूरि त्वर्पितं कन्यकाकृते । अथ कालवशात्प्राप्ता मृतिं वै ब्राह्मणी खग ॥ १२ ॥
सा पुत्री ह्युदरे भूत्वा ह्यगमज्जन्मजन्मनि । कन्या बहुविधास्तस्या निराधारा मृताश्च वै ॥ १३ ॥
तेन कर्मप्रभावेण बहुकन्याजनिः किल । तद्भार्यायाश्च गर्भे वै जायते मृतिमिच्छति ॥ १४ ॥
पुनर्जन्म पुनर्मृत्युर्जायते निष्कृतिं विना । कन्याविक्रयकर्ता च रौरवे नरके गतः ॥ १५ ॥
यातना बहुधा भुक्ता वर्षाणाञ्च सहस्रकम् । पश्चान्मानुष्यमापन्नो व्रतदानप्रभावतः ॥ १६ ॥
इदं जन्म चतुर्थं वै पुत्रीजन्म हि यत्र वै । मृतपुत्रो मृतो गर्भस्तेन वै कर्मणा च सः ॥ १७ ॥
भार्या तस्याऽपि विप्रस्य पूर्वजन्मनि मानद । भर्तृविद्वेषिणी जाता न ह्यपत्याऽनुरागिणी ॥ १८ ॥
तेन कर्मविपाकेन भूरि कन्या मृताः सुत ॥ १९ ॥

अरुण उवाच ।

प्रायश्चित्तं कथन्देव येन पापं प्रणश्यति । निष्कृतिं वद मे स्वामिन्पृथक्त्वं मे प्रकाशय ॥ २० ॥

श्रीसूर्य उवाच ।

पुत्रिका यस्य जीवन्ति पुत्राणां नाशनं भवेत् । कर्मणा येन पापेन शृणु त्वं कश्यपात्मज ॥ २१ ॥
स्वकन्यां वरयोग्यां वै चिंतयित्वा शुभे दिने । प्रयतेत विवाहार्थं यथाशक्ति यथामति ॥ २२ ॥
कन्यां रूपवतां शान्तां समस्तगुणशालिनीम् । अलंकृतां यथाशक्ति वराय गुणशालिने ॥ २३ ॥
ब्राह्मेण विधिना सूत दद्याच्च बहुदक्षिणाम् । महापापौघशमनं कन्यादानमतन्द्रितः ॥ २४ ॥
कन्याविवाहसमये महाशान्तिविधिं चरेत् । एवं कृतविधौ सूत कन्यां दत्त्वा विधानतः ॥ २५ ॥
शांतिकर्मणि सर्वत्र वृणुयादृत्विगादिकान् । भूमिद्रविणवासांसि कन्यावासांसि वै ददेत् ॥ २६ ॥
गृहदानं ततो दद्याद्यथोपस्करसंयुतम् । वर्षेवर्षे तु सम्पूर्णे ह्यन्नवस्त्रादिकं ददेत् ॥ २७ ॥
एवंकृतविधौ सूत बहुपुत्रा यशस्विनः । पापं पुत्रविनाशाख्यं कन्यापत्यादिकं च यत् ॥ २८ ॥
तस्य सर्वस्य नाशार्थं कन्यादानं स्मृतं खग । नाशयेत्तेन पापं च द्विजानां विधिनार्चनात् ॥ २९ ॥
यजन्यज्ञविधानेन ब्राह्मणान्स्वस्ति वाचयेत् । विनायकांबिकामूर्ती हेमनिष्कप्रमाणतः ॥ ३० ॥

आचार्याय ददेत्ते च नानादोषप्रशान्तये । ऐहिकं लक्षणं तस्य शरीरे चोपजायते ॥ ३१ ॥
जिह्वारदनदन्तोष्ठत्रगो वातादितो भवेत् । नृपचौराग्निहानिश्च वित्तादेश्च यतस्ततः ॥ ३२ ॥
तस्य मानेन मनसा दूयते भृशमाधिना । सर्पिष्यात्मानमालोक्य प्रायश्चित्तं समाचरेत् ॥ ३३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टपञ्चाशदुत्तरद्विशताधिकसहस्रतमः ॥ १२५८ ॥

श्रीसूर्य उवाच ।

या ताम्रहारिणी नारी लोभात्पूर्वभवे सुत । औदुम्बरेण रोगेण पीड्यते बहुपीडया ॥ १ ॥
पापं विचार्य यत्नेन ताम्रं दद्याच्च शक्तितः । तस्माद्दानान्महाभाग पापं नश्यति तत्क्षणात् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनषष्ट्युत्तरद्विशताधिकसहस्रतमः ॥ १२५९ ॥

श्रीसूर्य उवाच ।

कश्चित्क्षात्रकुले जातः प्रागसौ चारणस्त्विह । गौरः कलानिधिर्धीरो धनपुत्रसमन्वितः ॥ १ ॥
द्विजाङ्गताडनात्पूर्वं दद्रूरोगनिपीडितः । उमामाहेश्वराद्दानात्सौवर्णाच्छक्तितोऽभज ॥ २ ॥
पूर्वपापविशुद्धिः स्यात्तिलाज्यमधुहोमतः । गायत्र्या दशसाहस्रजपाद्ब्राह्मणभोजनात् ॥ ३ ॥
तदन्ते कपिलादानात्सूर्यभक्तिप्रसादतः । नाशमायाति स क्षिप्रं दद्रुरोगोऽतिदारुणः ॥ ४ ॥
न चासौ रोगजं दुःखमाप्नोतीह ममाज्ञया । रिष्टमाप्नोति षष्ट्यब्दे प्रायश्चित्तविवर्जनात् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षष्ट्युत्तरद्विशताधिकसहस्रतमः ॥ १२६० ॥

श्रीसूर्य उवाच ।

कश्चिद्द्विजवरो ह्यासीद्देशे मगधके पुरा । धनधान्यसमायुक्तश्चोग्रकर्मा महोद्यमी ॥ १ ॥
तीर्थयात्राप्रसंगात्स गयायामगमत्खग । स चकार गयाश्राद्धं प्रयागे स्नानमाचरत् ॥ २ ॥
स प्राप्य स्वगृहं शीघ्रं कृतवान्कर्म दारुणम् । ग्रामे निवसतश्चान्यक्षत्रियस्य खगाधिप ॥ ३ ॥
ददाह भवनं रम्यं शत्रुभावात्स दुष्टधीः । तत्र जीर्णा भूरि दग्धास्तथा वत्सतरी शुभा ॥ ४ ॥
कालयोगेन स प्राप्तः यमसादनमद्भुतम् । पापाच्च नरकान्भुक्त्वा महात्रासकरान्खग ॥ ५ ॥
पूर्वपुण्यप्रभावेण स जातः क्षत्रियोऽधुना । गंगायाः प्रान्तरे देशे नानापुण्यप्रदे शुभे ॥ ६ ॥
स शूरो बलवान्धूर्तः धर्मे स्वल्पमतिः शठः । वृद्धत्वाऽधिकः प्रचारी च पैतृकस्वल्पवित्तभाक् ॥ ७ ॥
सकन्यश्च सपत्नीको बंधुभृत्यसुखान्वितः । धर्मादिदं तथा पापात्फलमत्र शृणुष्व हि ॥ ८ ॥
गोबालवत्सकवधाज्जीवघातादपुत्रकः । पञ्चपञ्चभिताब्दान्तं जातपुत्रविनाशकः ॥ ९ ॥
बालगोघातजान्याशु पापानि सुतहानि हि । गोराशिगे शनौ सोमात्षष्ठे जीवे मृगस्थिते ॥१०॥
चिन्त्यं लग्नादिदं सूत पृच्छकस्यात्र जन्मनि । पूर्वं या स्त्री सहायासीन्मृतवत्साऽत्र सा सुत॥११॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन्सर्वपापविशोधिनीम् । सुतवृद्धिकरीं धन्यामिह जन्मनि निश्चयात् ॥१२॥

श्रीसूर्य उवाच ।

शृणु सूत प्रवक्ष्यामि निष्कृतिं पापशोधिनीम् । सुतस्वर्णमिता कार्या सुरभी च हिरण्मयी ॥१३॥
तदर्धमितिका वाऽपि निजवित्ताऽनुसारतः । संपूज्य विधिवन्मंत्रैर्देया विप्राय धीमते ॥ १४ ॥
माषैः पञ्चभितैर्देयस्तथा पशुपतिः सुत । मापाभ्यां च तथा वह्निर्जीवा माषचतुष्कजाः ॥ १५ ॥
देयाश्च विधिना सूत पूर्वपापाऽपनुत्तये । जपेत्पशुपतेर्मंत्रं सहस्रं रिष्टनाशनम् ॥ १६ ॥

होमयेत्तद्दशांशेन रुद्रस्याग्रे प्रयत्नतः । शृणुयाद्वा हरेर्वंशं दशावृत्त्या विधानतः ॥ १७ ॥
यः कुर्याद्विधिवत्सूत प्रायश्चित्तं त्रिधा मतम् । जीविष्यन्ति च तत्पुत्रा जन्मन्यत्र खगाधिप ॥ १८ ॥
सप्तपञ्चमिताब्दान्तं प्रायश्चित्तेन जीवति । पञ्चपञ्चमिताब्दान्ते रिष्टं चाकृतनिष्कृतेः ॥ १९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकषष्ट्युत्तरद्विशताधिकसहस्रतमः ॥ १२६१ ॥

श्रीसूर्य उवाच ।

आसीत्क्षत्रकुले कश्चिन्नीतिशास्त्रविशारदः । नासके राजमंत्री च स्वामिधर्मरतः सुधीः ॥ १ ॥
शिवभक्तिपरो धीरः स्त्रीपुत्रधनसंयुतः । दत्तानि तेन दानानि ब्राह्मणेभ्यः स्वशक्तितः ॥ २ ॥
भूशय्यावाहनादीनि विविधान्नानि पर्वसु । सुवर्णतिलपात्राणि वस्त्राणि विविधानि च ॥ ३ ॥
नृपाज्ञया गतः सोऽथ नृपः शत्रुपुरं प्रति । गावो नीता महाभाग तेन शत्रुपुरात्ततः ॥ ४ ॥
तत्रैका सुरभी सूत ह्यासन्नप्रसवा हृता । तेनाऽज्ञतेन तेनाऽपि ताडिता सा भृशाकुला ॥ ५ ॥
गर्भपातोऽभवत्तस्या भृशं तद्यष्टिताडनात् । मृता सा तेन दुःखेन गर्भपातेन चाण्डज ॥ ६ ॥
तेन स्वामिरतेनाऽपि कृतं तत्कर्म दारुणम् । महापापं कृतं तेन भाविनोऽर्थस्य गौरवात् ॥ ७ ॥
साहाय्यतश्च कस्यापि कृतं कर्म शुभाऽशुभम् । अथ किंचिद्गते काले प्राप्य धर्मपुरं प्रति ॥ ८ ॥
पापाद्दुष्टफलं भुक्त्वा शुभाच्छुभफलं तथा । पुण्यपापाविशेषाच्च स्वामिधर्मरतेस्तया ॥ ९ ॥
नानादानाद्वणिक्चात्र सन्निहत्यापुरेऽजनि । पञ्चयोजनविस्तीर्णे स च मध्यस्वरूपधृक् ॥ १० ॥
रक्तः श्यामोऽथ मतिमान्नात्युच्चः समदेहधृक् । राजप्रचारी विबुधोऽभितदः स्त्रीसुखान्वितः ॥ ११ ॥
पितृमातृसुखैर्हीनो नानास्थानाऽधिकारवान् । पित्तश्लेष्माधिको मानी यशस्वी बहुमित्रयुक् ॥ १२ ॥
सभायां चतुरो धीरो बहुमान्यः प्रियंवदः । धनधान्यसुखैश्वर्यबहुस्त्रीभोगभागिह ॥ १३ ॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । हठी धूर्तोऽलसो द्वेषी स्वल्पसन्ततिसंयुतः ॥ १४ ॥
क्लेशैर्भयैर्मनोदुःखैर्युज्यते च क्वचित्क्वचित् । गोबालवत्सकवधात्प्राक्पापाद्त्र चाण्डज ॥ १५ ॥
अष्टपञ्चाशद्वर्षांतं जातपुत्रविनाशकः । गोबालब्राह्मणवधात्स्त्रीपुत्राणां विनाशकः ॥ १६ ॥
गोबालस्त्रीद्विजवधात्पापाद्वंशविनाशनम् । सहायलक्षणं सर्वं वक्ष्याम्यत्र खगेश्वर ॥ १७ ॥
गोग्रहे ये सहायाः प्राक् तेऽत्र प्रभुः सुता मृताः । चिह्नभंगे त्विदं सूत प्रभुरत्रैव जन्मनि ॥ १८ ॥
गवां दण्डाभिघाताद्वै ह्यंत्यराशिस्तनौ गतः । लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥ १९ ॥
त्रिपलैर्निर्मितां चैव धेनुं कुर्याद्धिरण्मयीम् । पत्रे लेख्यां यथा कारां सगर्भाभरणान्विताम् ॥ २० ॥
तदर्धार्धमितां वापि निजवित्ताऽनुसारतः । संपूज्य गन्धपुष्पाद्यैर्मन्त्रैश्चाऽपि विशेषतः ॥ २१ ॥
ताश्च दद्याद्विधिज्ञाय मन्त्रमेतदुदीरयन् ॥ २२ ॥

मन्त्रः ।

"मया ज्ञानात्तथाऽज्ञानात्पीडिता सुरभी पुरा ।
तद्दोषशमनायैव ददेऽहं त्वां हिरण्मयीम् । देवि त्वं मम पापानि तत्क्षणाद्भस्मसात्कुरु" ॥ २३ ॥
इत्युच्चार्य नरो दद्यात्पूर्वपापाद्विमुच्यते । सुवर्णैकमितं तद्वद्दद्यात्पशुपतिं विभुम् ॥ २४ ॥
स्त्रीपुत्रधनधान्यादेः सुखं वै भवति ध्रुवम् । नैवं विधानं यः कुर्यान्न च पुत्रसुखं भवेत् ॥ २५ ॥
प्रायश्चित्तेऽकृते रिष्टं चत्वारिंशन्मितेऽब्दके । प्रायश्चित्ते कृते ह्यायुः चतुःसप्तति वै समाः ॥ २६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विषष्ट्युत्तरद्विशताधिकसहस्रतमः ॥ १२६२ ॥

श्रीसूर्य उवाच ।

आसीत्पूर्वभवे कश्चिदम्बष्ठो द्रव्यसंयुतः । विद्याभ्यासरतो नित्यं धर्मकर्मसमन्वितः ॥ १ ॥
दत्तानि तेन चान्यानि दानान्यपि विजानता । पापमाचरितं तेन गौरवादेव तस्य च ॥ २ ॥
कालयोगेन संप्राप्य ब्राह्मणेन कुटुंबिना । स्थापितं तद्गृहे द्रव्यं घटे लोहमये स्थितम् ॥ ३ ॥
पुनर्दत्तं न तत्तस्मै लोभोपहतचेतसा । कुटुंबैर्मिलित्वा तद्भुक्तं ह्यपरैश्चतदीयकैः ॥ ४ ॥
कालयोगेन संप्राप्तो ह्यम्बष्ठो यमसादनम् । भुक्त्वा पापफलं पापात्पुण्यात्पुण्यफलं तथा ॥ ५ ॥
पूर्वदानप्रभावेण स जातः पादजोऽधुना । देशे प्रभासके रम्ये गौरः पित्ताधिको घृणी ॥ ६ ॥
वाचा मधुरया युक्तो राजकर्मरतः सुधीः । दर्शनीयो नातिह्रस्वः नात्युच्चः क्रोधवर्जितः ॥ ७ ॥
सुखी स्त्रीमानसंयुक्तः सदा सोऽतिधनैर्युतः । पुण्यादिदं तथा पापाल्लोभवान्परतः क्वचित् ॥ ८ ॥
धूर्तः शठोऽल्पदो दंभी स्वल्पधर्मा कृपान्वितः । द्रव्यैर्मनोहरैर्हीनः पुत्रसंतातिदुःखदः ॥ ९ ॥
ब्रह्मस्वभक्षणात्पूर्वं फलमत्राऽस्ति निश्चितम् । लक्ष्मैतदंडजश्रेष्ठ पृच्छकस्याऽत्र जन्मनि ॥ १० ॥
जन्मलग्नात्सुते राशौ घटे पापसमन्विते । सहायलक्षणं सर्वं वक्ष्याम्यथ खगेश्वर ॥ ११ ॥
पुत्राऽभावो भ्रातृहीनो ह्यल्पस्त्रीसुखसंयुतः । लक्षणैरेभिराढ्यस्य पृच्छकस्याऽत्र जन्मनि ॥ १२ ॥
प्रायश्चित्तं प्रवक्ष्यामि सर्वपापविशोधनम् । लक्ष्मीनारायणः कार्यः सुवर्णद्वयनिर्मितः ॥ १३ ॥
तदर्धेन तदर्धेन निजवित्तानुसारतः । स्थापयित्वा घटे लौहे सवृते वस्त्रवेष्टितम् ॥ १४ ॥
संपूज्य गन्धपुष्पाद्यैर्ब्राह्मणाय प्रदापयेत् । चतुर्विंशसहस्राणि गायत्रीं च जपेत्ततः ॥ १५ ॥
होमयेच्च यथाशक्ति कुण्डे वा स्थण्डिले शुभे । घृतमिश्रांस्तिलाञ्शक्त्या तत्र विप्रांश्च भोजयेत् १६
मम जन्मदिने पश्चादाचरेद्व्रतमुत्तमम् । य एवं कुरुते सूत प्रायश्चित्तं प्रयत्नतः ॥ १७ ॥
तस्य पुत्रविवृद्धिः स्यात्सस्त्रीकस्यात्र जन्मनि । नैवं विधानं यः कुर्याद्विप्रद्रव्यादिलाशने ॥ १८ ॥
नस्यात्पुत्रसुखं तस्य नापि स्यात्परमा गतिः । प्रायश्चित्तेऽकृते रिष्टं पञ्चाशन्मितकेऽब्दके ॥ १९ ॥
प्रायश्चित्ते कृते ह्यायुः सप्तसप्तमिताब्दके । जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् ॥ २० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिषष्ट्युत्तरद्विशताधिकसहस्रतमः ॥ १२६३ ॥

श्रीसूर्य उवाच ।

वंगदेशे ह्यभूत् कश्चिच्छूद्रः स्थविरतायुतः । ग्रामाऽधिपश्चोग्रदण्डो विष्णुभक्तिपरो दृढः ॥ १ ॥
स गत्वा च कुरुक्षेत्रे सर्वस्वं विधिनाऽह्यदात् । प्राप्ते सूर्यग्रहे सूत विप्राय च कुटुंबिने ॥ २ ॥
पापमाचरितं तेन भाविनोर्थस्य गौरवात् । कौमारे धर्षिता विप्रपत्नी चाऽतिशुभानना ॥ ३ ॥
कामलुब्धेन धृष्टेन पतिस्तस्याः प्रपीडितः । दिनैः कतिपयैरेव गतस्तु यमशासनम् ॥ ४ ॥
पापात्पापफलं भुक्त्वा पुण्यात्पुण्यफलं तथा । पूर्वपुण्यप्रभावेण स जातो ब्राह्मणोऽधुना ॥ ५ ॥
क्षयरोगसमायुक्तो विंशे वर्षे खगाधिप । प्रायश्चित्ताद्यकरणाद्दुःखादेहांतरं गतः ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःषट्युत्तरद्विशताधिकसहस्रतमः ॥ १२६४ ॥

श्रीसूर्य उवाच ।

वैनतेय महाभाग शृणु चास्य विचेष्टितम् । बभूव बाहुजः कश्चित्पीठे जालंधरे पुरा ॥ १ ॥
नृपतिश्चैकदेशस्य धर्मशास्त्रक्रियान्वितः । बहुस्त्रीपुत्रसंयुक्तो धनधान्यसमृद्धिमान् ॥ २ ॥
दत्तानि तेन दानानि ब्राह्मणेभ्यो विधानतः । भूशय्याश्वहिरण्यादिगृहान्नानि च पर्वसु ॥ ३ ॥

गयाश्राद्धं कृतं चाऽपि यथाविभवविस्तरात्। अथाऽऽगत्य स्वके देशे भाविनोर्थस्य गौरवात् ॥४॥
कदाचिन्मृगयां प्राप तत्र तीर्थादुपागताः। स्वशत्रुपुरजाः प्राप्ता लुण्ठितास्तेन ते तदा ॥ ५ ॥
तत्रैको ब्राह्मणश्चापि सपत्नीको हि लुण्ठितः। तत्पत्न्या गर्भपातोऽभूत्ताडनात्सा विचेष्टिता ॥६॥
मृता वै तेन दुःखेन गर्भपातेन तत्क्षणात्। एवं बहुसहायाढ्यः पृच्छकोऽतीव दुष्टधीः ॥ ७ ॥
पापमाचरितं तेन दुष्कर्मप्रेरणादिना। स च तत्कर्मणा युक्तः काले धर्मपुरं गतः ॥ ८ ॥
भुक्त्वा पापफलं पापात्पुण्यात्पुण्यफलं तथा। गयाश्राद्धप्रभावेण स जातो बाहुजोधुना ॥ ९ ॥
ऐरावत्याः परे भागे पञ्चयोजनसम्मिते। देशे स गौरो मतिमान्सुरूपः प्रियवाग्वृणी ॥ १० ॥
दाता भोक्ता यशस्वी च बहुमान्यो जनप्रियः। पौत्तिको नाऽतिदीर्घश्च पुष्टांगो बहुमित्रभाक् ११
धनधान्यसुखैश्वर्यबहुस्त्रीभोगभागिह। देशेदेशेऽतिविख्यातः शूरो राजजनप्रियः ॥ १२ ॥
मध्यमे चैव वयसि धनवाहनभोगभाक्। पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् ॥ १३ ॥
शठो धूर्तोऽभिमानाढ्यो वृथा व्यापारकृत्तथा। क्लेशैर्भयैर्मनोदुःखैः कदाचिद्वै प्रपीड्यते ॥ १४॥
सकन्यापुत्ररहितः ब्राह्मण्या गर्भपातनात्। तद्बधाच्च महाभाग न हि जीवन्ति तत्सुताः ॥ १५ ॥
यैर्मिलित्वा सहायैः प्राक्कृतं कर्माऽतिदारुणम्। प्रष्टुरत्रैव ते पुत्रा मृता दुःखप्रदाः सदा ॥ १६ ॥
चिह्नमत्र जनुर्लग्नान्नीचराशिगतो गुरुः। चन्द्रश्चापेश्वरेणाढ्यः स्त्रीपुत्रसुखनाशनः ॥ १७ ॥
लक्षणैरेभिराढ्यस्य प्रष्टुरत्रैव जन्मनि। प्रायश्चित्तं प्रवक्ष्यामि येन पापात्प्रमुच्यते ॥ १८ ॥
उमामहेश्वरौ कार्यौ सपुत्रौ च हिरण्मयौ। पलैः पञ्चमितैः पत्रे चतुष्कोणे प्रयत्नतः ॥ १९ ॥
तदर्धार्धमितैर्वाऽपि निजवित्ताऽनुसारतः। गन्धपुष्पादिकैः पूज्यः षोडशोपचारकैः ॥ २० ॥
देयास्ते च विधिज्ञाय मंत्रमेतमुदीरयेत् ॥ २१ ॥

मन्त्रः।

" ददेऽहं त्वां महादेव सपत्नीकं सपुत्रकम्। प्राक्पापाद्गर्भघाताच्च मुंच मां जगदीश्वर ॥ २२ ॥
त्वं पापनाशक स्वामिन्मम पुत्रप्रदो भव " ॥ २३ ॥

इत्युच्चार्य नरो दद्यात्पूर्वपापात्प्रमुच्यते। तद्वत्पलैकप्रमितां ब्राह्मणीं गर्भसंयुताम् ॥ २४ ॥
स्वर्णं च तन्मितं दद्याद्धेनुं विप्रवराय च। लक्ष्मीनारायणं चाऽपि तदर्धं च तदुन्मितम् ॥ २५ ॥
हैमं रविं प्रदद्याच्च पूर्वपापाऽपनुत्तये। पूर्वं जपेच्च गायत्रीं देवीं दशसहस्रकम् ॥ २६ ॥
त्रिंशत्सहस्रं विधिवत्त्रैवर्णं त्र्यंबकं जपेत्। तथा दशसहस्राणि जपेदष्टाक्षरं सुत ॥ २७ ॥
होमयेत्तद्दशांशेन शक्त्या विप्रांश्च भोजयेत्। जापकेभ्यः प्रदद्याच्च सौवर्णीं पापनाशिनीम् ॥२८॥
आज्यावलोकनं कुर्यादभिषेकं तु कारयेत्। य एवं कुरुते सूत प्रायश्चित्तं प्रयत्नतः ॥ २९ ॥
तस्य पुत्रविवृद्धिः स्यादिह जन्मनि न क्षयः। षडशीतिमिताब्दांतं जीवेत्पापविशोधनात् ॥ ३० ॥
बहुपुत्रसुखैश्वर्यं भुक्त्वाऽन्ते स्वर्गमाप्नुयात्। नैवं करोति यो मोहाल्लोभात्पापविशोधनम् ॥ ३१ ॥
न जीवन्ति सुतास्तस्मिर्ज्जीविते नात्र संशयः। अष्टषष्टिमिते वर्षे रिष्टं चाकृतनिष्कृतेः ॥ ३२ ॥
जन्मत्रयमपुत्रः स्याद्ब्राह्मण्या गर्भनाशनात्। शनौ मेषगते जातो मृगस्थे निधनं भवेत् ॥ ३३ ॥
जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम्। यद्यदन्तर्गतं सूत! तन्मच्छास्त्राद्विलोकयेत् ॥३४॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचषष्ट्युत्तरद्विशताधिकसहस्रतमः॥ १२६९ ॥

श्रीसूर्य उवाच ।

राजमंत्री द्विजः कश्चित्प्राग्भवे पृच्छकस्त्वसौ । कलिंगदेशे मतिमान्स्वामिधर्मरतोऽभवत् ॥ १ ॥
उग्रदंडो महातेजा बहुविद्याविशारदः । शिवभक्तिपरः शूरः स्त्रीपुत्रधनसंयुतः ॥ २ ॥
अददद्धहुदानानि ब्राह्मणेभ्यः स्वशक्तितः । ततः षड्विंशके वर्षे गयाश्राद्धं चकार सः ॥ ३ ॥
काम्यश्राद्धानि विधिवद्दत्तवान्गरुडाग्रज । पुनरागत्य त्वरितं कृतवान्कर्म दारुणम् ॥ ४ ॥
वैरभावाच्च सततं तेन वै विनतासुत । ध्वस्ता निजपुराद्विप्रास्तथा प्राक्तद्धनं हृतम् ॥ ५ ॥
सर्वं समर्पितं राज्ञेऽनीत्या किंचित्स्वकं कृतम् । राजसाहाय्यतः सर्वं पापमुग्रमुपार्जितम् ॥ ६ ॥
ततः किंचिद्गते काले प्राप्तो धर्मपुरं प्रति । भुक्त्वा पापफलं पापात्पुण्यात्स्वर्गफलं तथा ॥ ७ ॥
पुण्यपापाऽविशेषाच्च गयाश्राद्धप्रभावतः । प्राक्तनक्षात्रसंस्काराज्जातः क्षात्रकुलेऽधुना ॥ ८ ॥
देशे वैपाशिके रम्ये रक्तगौरः सुरूपधृक् । बहुस्त्रीपुत्रमित्राढ्यो बहुभृत्यसमन्वितः ॥ ९ ॥
देशाध्यक्षोऽतितेजस्वी शूरो राज्याऽधिकारवान् । दाता भोक्ता कलाऽभिज्ञः स्वधर्मपरिपालकः १०
आदिमध्यावसानेषु सुखैश्वर्यसमन्वितः । वाचा मधुरया युक्तो नानावाहनभोगभाक् ॥ ११ ॥
गयाश्राद्धादिदं सर्वं पापात्पापफलं शृणु । धूर्तः शठोऽतिलोभाढ्यः क्वचित्पापरतस्तथा ॥ १२ ॥
क्लेशैर्भयैर्यूनि भावे मनोदुःखसमन्वितः । धर्मकर्मणि सालस्यो बहुधर्मविचारवान् ॥ १३ ॥
विप्राणां प्राक्कृतात्पापान्नात्र पूर्णमनोरथः । जन्मलग्नादिदं चिह्नमत्र जन्मनि चाण्डज ॥ १४ ॥
गुरुत्वात्पूर्वपापाच्च वैरिभावगतो गुरुः । लक्षणैरेभिराढ्यस्य प्रष्टुरत्रैव जन्मनि ॥ १५ ॥
तत्पापशोधनं वक्ष्ये येन सौख्यं प्रजायते । लक्ष्मीः कार्या प्रयत्नेन सुवर्णाष्टकनिर्मिता ॥ १६ ॥
तदर्धार्धमिता वाऽपि निजवित्ताऽनुसारतः । पत्रे लेख्या चतुष्कोणे सर्वाऽवयवसंयुता ॥ १७ ॥
संपूज्य पुष्पगंधाद्यैः षोडशोरूपचारकैः । सा च देया विधिज्ञाय ब्रह्मस्वाघविनाशिनी ॥ १८ ॥
सोमं च तन्मितं दद्यात्तदर्धं च धनाऽधिपम् । लक्षमेकं तु गायत्रीं जप्त्वा शुद्धिं समाचरेत्॥१९॥
विभवे द्विगुणं कुर्याद्येन स्यात्पापशोधनम् । होमयेत्तद्दशांशेन शक्त्या विप्रांश्च भोजयेत् ॥ २०॥
य एवं कुरुते सूत विधिना पापशोधनम् । तस्य लक्ष्मीकृतं दुःखं न कदाचित्प्रजायते ॥ २१ ॥
अकृतेऽत्र यथाशक्ति प्रायश्चित्ते खगाऽधिप । नेत्रपञ्चाशदब्दात्तु यावद्वर्षचतुष्टयम् ॥ २२ ॥
स्त्रीद्रव्ययोर्महारिष्टं तस्य देहेऽपि पीडनम् । पञ्चसप्तमिताब्दायुः प्रायश्चित्ते कृते त्विह ॥ २३ ॥
नच स्त्रीधनरिष्टं स्यान्न मनस्तापजं भयम् । नाधयो व्याधयस्तस्य न च दुःखं क्वचित्सुत॥२४॥
पुत्रपौत्रधनैश्वर्यं सुखमत्र भविष्यति । देवलोके गतिस्तस्य गयाश्राद्धप्रभावतः ॥ २५ ॥
जन्मादिनिधनांतं हि स्वल्पमेवात्र सूचितम् । यद्यदन्तर्गतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ २६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्षष्ट्युत्तरद्विशताधिकसहस्रतमः ॥ १२६६ ॥

श्रीसूर्य उवाच ।

कश्चिदासीन्महाभाग कौंकणे वाहुजः पुरा । धनधान्यसुखैर्युक्तो विष्णुभक्तिपरो दृढः ॥ १ ॥
दत्तानि तेन दानानि ब्राह्मणेभ्यः स्वशक्तितः । पापमाचरितं तेन लोभोपहतचेतसा ॥ २ ॥
धृतः स्वज्ञातिजायां वै गर्भस्तेनायतेर्वलात् । ततो लोकभयात्सूत कृतं तद्गर्भपातनम् ॥ ३ ॥
स्त्रीसाहाय्ययुतेनैव कृतं प्राक्कर्म दारुणम् । स गत्वा धर्मनगरं बुभोज सुखदुःखकम् ॥ ४ ॥
पूर्वपुण्यप्रभावेण स जातोऽत्राऽपि वाहुजः । सरस्वत्याः परे देशे पंचयोजनसम्मिते ॥ ५ ॥
गौरः सुरूपो मतिमान्व्यापारनिरतो घृणी । क्वचित्पापरतो लोभी चिंताशाठ्यरतस्तथा ॥ ६ ॥

या स्त्री पूर्वं सहायासीदत्र पुत्रविवर्जिता । लक्षणैरभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥ ७ ॥
सुवर्णदशकात्सूत ब्राह्मणी च हिरण्मयी । संपूज्य गंधपुष्पाद्यैर्देया द्विजवराय च ॥ ८ ॥
पूर्वपापाद्विनिर्मुक्तो पुत्रसौख्यं लभेदिह । काशीवासान्महाभाग तद्देशे भ्रमणात्तथा ॥ ९ ॥
लभेत पुत्रात्स सुखं पार्थिवानां प्रपूजनात् ॥ १० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तषष्ट्युत्तरद्विशताधिकसहस्रतमः ॥ १२६७ ॥

श्रीसूर्य उवाच ।

वैनतेय महाभाग शृणु चास्य विचेष्टितम् । करहाटाऽभिधे देशे कश्चिदासीद्द्विजोत्तमः ॥ १ ॥
प्राग्भवे नृपतिर्विज्ञो वेदशास्त्रविशारदः । धर्मशास्त्रक्रियायुक्तः शिवभक्तोऽतिनीतिधृक् ॥ २ ॥
बहुस्त्रीधनपुत्राढ्यो विप्रपूजनतत्परः । दत्तानि तेन दानानि ब्राह्मणेभ्यो विजानता ॥ ३ ॥
बहुपर्वसु भूम्यश्वकन्यावस्त्रगृहाण्यपि । सूर्यचन्द्रोपरागे च गजाश्वरथकांचनम् ॥ ४ ॥
बहुरत्नानि भाण्डानि महादानानि चांडज । अथो भाविबलात्सूत पापमाचरितं पुरा ॥ ५ ॥
सीमांतरे स्थितं तस्य विप्रस्याप्यधिकारिणः । स्त्रिया विरोधात्सततं कृतं कर्मातिदारुणम् ॥ ६ ॥
स्वस्त्रीभ्रातृसहायाच्च रात्रौ गत्वा तु तत्पुरम् । निर्दग्धं तत्पुरं चाऽपि मिलित्वा बहुभिर्जनैः ॥ ७॥
तस्मिन् दग्धे मातृयुक्ताः स्त्रियो बाला द्विजस्य हि । निर्दग्धा बालवत्साढ्या गौरेका जन्तवस्तथा८
सर्वस्वं लुंठितं तस्याऽपराधरहितस्य च । गृहीत्वा विप्रसर्वस्वं ज्येष्ठपत्न्या निवेदितम् ॥ ९ ॥
महादानरता साऽपि बहुपुत्रा पतिप्रिया । तयाऽपि तत्स्त्रीसंवादात्क्रोधाद्विजकुलं हृतम् ॥ १० ॥
भुक्तं च तद्धनं लोभात्पापमुग्रमुपार्जितम् । धर्मज्ञेन नृपेणाऽपि न कृतं पापशोधनम् ॥ ११ ॥
अथ किंचिद्गते काले स प्राप्तो यमशासनम् । भुक्त्वा पापफलंपापात्पुण्यात्स्वर्गफलं तथा ॥१२॥
बहुपुण्यान्महादानात्स जातोऽत्राऽपि भूपतिः । गंगायाः प्रान्तरे देशे तत्त्वयोजनसम्मिते ॥ १३ ॥
स रक्तगौरो मतिमान्नात्युच्चो न लघुर्घृणी । वाचा मधुरया युक्तस्तेजस्वी लोकविश्रुतः ॥ १४ ॥
बहुज्ञो दर्शनीयाक्षो दाता भोक्ता कुलाग्रणीः । उपकारपरो विद्वान्बली सर्वजनाश्रयः ॥ १५ ॥
क्षात्रधर्मरतो मानी दण्डदाक्षिण्यतत्परः । सभायां चतुरो धीरो मंत्रविद्बूढचेष्टितः ॥ १६ ॥
बहुस्त्रीभोगसंयुक्तो धनधान्यसुतान्वितः । पित्तश्लेष्माधिकः शूरो बहुभूपजनैर्वृतः ॥ १७ ॥
गजाश्वबाहनैराढ्यो बहुरत्नैरलंकृतः । आदिमध्यावसानेषु सुखैश्वर्यसमाकुलः ॥ १८ ॥
शिवार्चनान्महादानात्प्राक्कृतात्तु फलं त्विह । सर्वमेतत्तथा पापात्सर्वं पापफलं शृणु ॥ १९ ॥
धूर्तः शठोऽतिदंभाढ्यो बहुचेष्टो भयान्वितः । लोभी पापरतः क्वापि पित्रोः सुखविवर्जितः॥२० ॥
प्राग्भवे जीवघाताच्च कफपित्तरुगन्वितः । बालवत्सवधात्पूर्वं पूर्वपुत्रशुचान्वितः ॥ २१ ॥
सहायलक्षणं सर्वं वक्ष्याम्यत्र खगेश्वर । या स्त्री पूर्वं सहायासील्लोभाद्ब्रह्मस्वभक्षणे ॥ २२ ॥
सा कनिष्ठा च संप्रष्टुरत्र पुत्रशुचान्विता । यौ भ्रातरौ सहायौ प्राग्भवेतां दाहकर्मणि ॥ २३ ॥
तस्या जातौ तु तावत्र पुत्रौ निर्वासितौगतौ । गोस्त्रीबालवधात्पापात्प्रागत्र सुतनाशनम् ॥२४ ॥
महापापस्य लक्ष्मेदं राहुर्गुरुगृहं गतः । लक्षणैरभिराढ्यस्य प्रष्टुरत्रैव जन्मनि ॥ २५ ॥
प्रायश्चित्तं प्रवक्ष्यामि येन पापात्प्रमुच्यते । पलैः षोडशभिः तैः कार्या सुरभी वत्ससंयुता ॥ २६ ॥
पत्रे हिरण्मये लेख्या सर्वांगाभरणान्विता । तदर्धार्धमिता वाऽपि निजवित्तानुसारतः ॥ २७ ॥
संपूज्य गन्धपुष्पाद्यैरुपचारैर्विशेषतः । सा च देया विधिज्ञाय मंत्रमेतमुदीरयेत् ॥ २८ ॥

मन्त्रः ।

"अज्ञानाच्चं मया दग्धा यत्पापं घोरमर्जितम् । अतोऽहं देवि हैमीं त्वां ददेऽहं मच्छुभं कुरु"२९॥
इत्युच्चार्य नरो दद्यात्प्राग्गोघातात्प्रमुच्यते । तथा पशुपतिः कार्यः पलैः षोडशभिर्युतः॥ ३० ॥
पत्रे हिरण्मये लेख्यः सपत्नीकः सपुत्रकः । शिवमन्त्रेण संपूज्य षोडशोरूपचारकैः ॥ ३१ ॥
स च देयो विधिज्ञाय पूर्वपापप्रशान्तये । तथात्र ब्राह्मणी कार्या पलैः षोडशभिर्मिता ॥ ३२ ॥
तदर्धमितिका वापि निजवित्ताऽनुसारतः । सा च देया विधिज्ञाय स्त्रीवधान्मुच्यते त्विह ॥ ३३ ॥
तद्दैवतं तथा सोमं हैम्नमष्टपलात्मकम् । लक्ष्मीनारायणं हैम्नं तद्वदुग्रविनाशनम् ॥ ३४ ॥
प्रजापतिर्गणेशश्च दग्धजीवा हुताशनः । विप्रवालास्त्रयः कार्यास्त्रिपलैर्निर्मिताः खग ॥ ३५ ॥
हिरण्मयेषु पत्रेषु मन्त्रैर्लेख्या यथोक्तवत् । विप्रेभ्यो विधिवद्देयाः सर्वपापप्रणाशकाः ॥ ३६ ॥
पञ्चविंशतिसहस्राणि गायत्रीं विधिना जपेत् । सहस्रदशकं त्वत्र मंत्रमष्टाक्षरं तथा ॥ ३७ ॥
एकादशसहस्रं तु त्र्यंबकं द्विविधं जपेत् । ब्रह्माग्निसौरविघ्नेशसौरिमंत्रांस्तथा जपेत् ॥ ३८ ॥
चत्वारिंशत्सहस्राणि चैकस्याष्टसहस्रकम् । होमयेत्तद्दशांशेन शक्त्या विप्रांश्च भोजयेत् ॥ ३९ ॥
य एवं कुरुते सूत विधिना पापशोधनम् । तस्य पुत्रविवृद्धिः स्याज्जन्मन्यत्र खगेश्वर ॥ ४० ॥
नाधयो व्याधयस्तस्य न च शत्रुभयं भवेत् । महदैश्वर्यमाप्नोति विविधांश्च मनोरथान् ॥ ४१ ॥
सर्वपापविशुद्धात्मा स्वर्गं मोक्षमवाप्नुयात् । आयुः सप्ततिवर्षाणि प्रायश्चित्ते कृते त्विह ॥ ४२ ॥
प्रायश्चित्तेऽकृते रिष्टमूनत्रिंशन्मितेऽब्दके । त्रिचत्वारिंशदब्दे वा ध्रुवं पञ्चाशदब्दके ॥ ४३ ॥
चतुर्विधं महारिष्टं भवत्येव न संशयः । या च पृच्छति धर्मज्ञा तत्प्रिया कर्मपीडिता ॥ ४४ ॥
प्रायश्चित्तार्धतः पादाच्छुद्ध्यत्यत्र न संशयः । सेहाधिव्याधिरहिता राज्यं पुत्रसुखं लभेत्४५॥
शनौ कन्यागते जातो मेषस्थे निधनं भवेत् । जन्मादिनिधनान्तं हि स्वल्पमेवात्र सूचितम् ४६
यद्यदन्तर्गतं सूत तज्जन्माङ्गाद्विचिन्तयेत् ॥ ४७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टषष्ट्युत्तरद्विशताधिकसहस्रतमः॥ १२६८ ॥

श्रीसूर्य उवाच ।

मृगयां प्राप्य पक्षीन्द्र प्रष्टा गजवधः कृतः । प्राग्भवे गजचर्माऽसावत्र जाता द्विजोत्तमः ॥ १
गणेशप्रतिमां दद्यात्सौवर्णीं द्विपलात्मिकाम् । गंधपुष्पैश्च संपूज्य तस्माद्रोगाद्विमुच्यते ॥ २ ॥
कारयेद्गणनाथस्य लक्षजाप्यं विधानतः । होमयेत्तद्दशांशेन शक्त्या विप्रांश्च भोजयेत् ॥ ३ ॥
विप्रेभ्यो दक्षिणान्दद्यात्सुवर्णमयुतं खग । सर्वपापविशुद्धस्तु मुच्यते सर्वकिल्बिषात् ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनसप्तत्युत्तरद्विशताधिकसहस्रतमः ॥ १२६९ ॥

श्रीसूर्य उवाच ।

यो हरेत्परसिद्धान्नं क्षुत्पीडाभिः प्रपीडितः । सोऽत्र जन्मनि पक्षीन्द्र शूलरुक्पीडितो भवेत् ॥१ ॥
दशद्रोणप्रमाणं तु चान्नं हेमयुतं तथा । दद्याद्विप्रवरायैव तस्माद्रोगात्प्रमुच्यते ॥ २ ॥
सुवर्णशूलदानाद्वा शक्त्या विप्राय श्रद्धया । शूलरोगोपशमनमिह जन्मनि वै ध्रुवम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्युत्तरद्विशताधिकसहस्रतमः ॥ १२७० ॥

श्रीसूर्य उवाच ।

यः प्राङ्मूर्द्धाभिषिक्तो हि बभूव पुरुषोत्तमः । रत्नजातिषु महाभागो दृढो धर्मक्रियापरः ॥ १ ॥

वराटदेशे निवसन् राजकार्ये रतः सदा । कृतवान्गोग्रहं तत्र शत्रूणां भयदायकः ॥ २ ॥
वालवत्सा तत्र पुरे मृता धेनुः खगोत्तम । पापमाचरितं तेन नृपाज्ञाकारिणा दृढम् ॥ ३ ॥
ततो यमपुरं प्राप्तो भुक्त्वा च सदसत्फलम् । विष्णुपूजनजात्पुण्याज्जातोत्र यमुनातटे ॥ ४ ॥
चारणो धर्मनिरतो वहुद्रव्यसमन्वितः । गजादिवाहनैराढ्यो वस्त्रभूषणभूषितः ॥ ५ ॥
सर्वं विष्णुप्रसादाच्च सुखं पापफलं शृणु । धूर्तो मिथ्यापवादी च वहुलोभसमन्वितः ॥ ६ ॥
जातिसंततिदुःखार्तो वालवत्सवधादिह । नेत्ररोगान्वितो नित्यं शृणु चिह्नं खगाधिप ॥ ७ ॥
चत्वारिंशन्मिते वर्षे सर्वसन्ततिनाशनम् । गृहपापान्महाभाग ध्रुवंरिष्टसमुद्भवात् ॥ ८ ॥
पूर्वपापफलस्यात्र भोगादेव क्षयः स्मृतः ॥ ९ ॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन्वालवत्साघनाशिनीम् । यां कृत्वा विधिवज्जन्तुः पूर्वपापात्प्रमुच्यते॥१०॥

श्रीसूर्य उवाच ।

प्रायश्चित्तं शृणुष्वात्र तद्वर्षानन्तरं सुत । तस्मिन्वर्षे महाभाग प्रायश्चित्तं न विद्यते ॥ ११ ॥
दृढकर्मार्जितात्पापान्न चोक्तं पापशोधनम् । श्रवणाद्धरिवंशस्य वैशाखे विधिनांडज ॥ १२ ॥
माघे वा कार्तिके वाऽपि दशावृत्त्या विधानतः । ततस्तु भोजयेद्विप्रान्होमयेच्च स्वशक्तितः ॥१३ ॥
कोटिलक्षायुतं पुत्र यः कुर्याद्विधिपूर्वकम् । तस्य पुत्रविवृद्धिः स्याद्विवाहादपरात्सुत ॥ १४ ॥
मृत्युः पञ्चाशदब्दे तु खग चाकृतनिष्कृतेः । प्रायश्चित्ते कृते त्वत्र नवत्यब्दमितं तथा ॥१५॥
द्वियुक्तमायुः कथितं तीर्थे पुण्याश्रयेऽण्डज । जीवे कर्कटगे तत्र चन्द्रे मकरराशिगे ॥ १६ ॥
त्रयोदश्यां दिवा भूमौ ऋक्षे मृगशिरोभिधे । निर्याणं कथितं तस्य विष्णुपूजनजात्फलात् ॥१७॥
भविष्यति गतिस्तस्य पुनर्विष्णुप्रपूजनात् । तथा तृतीये जनुषि मरणं गोग्रहात्सुत ॥ १८ ॥
सर्वपापविशुद्धः स्यात्पुनर्मोक्षमवाप्नुयात् ॥ १९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकसप्तत्युत्तरद्विशताधिकसहस्रतमः ॥ १२७१ ॥

श्रीसूर्य उवाच ।

पिङ्गलाक्षो भवेदत्र पूर्वे रीत्यपहारकः । तेन तत्पापशुद्ध्यर्थं दद्याद्रीतिपलं शतम् ॥ १ ॥
गायत्र्या होमयेत्पश्चात्तिलान्विप्राँश्च भोजयेत् । मुच्यतेऽत्र महाभाग तद्रोगात्पापजाद्ध्रुवम्॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विसप्तत्युत्तरद्विशताधिकसहस्रतमः ॥ १२७२ ॥

श्रीसूर्य उवाच ।

वैनतेय महाभाग खररोमा प्रजायते । पूर्वजन्मनि यो हन्यात्खरं पापविमोहितः ॥ १ ॥
प्रायश्चित्तं परं तस्य पापस्य शृणु तत्त्वतः । निष्कत्रयं हिरण्यस्य दद्याद्दोषोपशान्तये ॥ २ ॥
ब्राह्मणाय दरिद्राय वेदवेदाङ्गवेदिने ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिसप्तत्युत्तरद्विशताधिकसहस्रतमः ॥ १२७३ ॥

श्रीसूर्य उवाच ।

प्राग्भुक्तं गर्भपुष्ट्यर्थं कुक्कुटांडं खगेश्वर । अत्र जन्मनि सा जाता संकरा लोभसंयुता ॥ १ ॥
धनधान्यसमायुक्ता पूर्वपुण्यादिहांडज । न च गर्भं दधात्येषा प्राक्पापादंडभक्षणात् ॥ २ ॥
कृत्वांडं विधिना तद्वद्धैरण्यं द्विपलात्मकम् । तदर्धमितकं वापि निजवित्तानुमानतः ॥ ३ ॥

दत्त्वा विप्राय विधिना ह्याचरेच्छांकरं व्रतम् । फाल्गुनादौ चतुर्दश्यां कृष्णायां मासिमासि तु ४
पूजयेच्छंकरं रात्रौ तथा जागरणेन च । भवन्ति सुलभाः पुत्राः सततं कृतनिष्कृतेः ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःसप्तत्युत्तरद्विशताधिकसहस्रतमः ॥ १२७४ ॥

श्रीसूर्य उवाच ।

शृणु सूत महाभाग कर्म यत्कृतवान्पुरा । जीवोयं तत्फलं चात्र प्रवक्ष्यामि समासतः ॥ १ ॥
अभवत्प्राग्भवे विप्रो धर्मशास्त्रार्थकोविदः । राजप्रचारी बलवाञ्शूरो मंत्री महायशाः ॥ २ ॥
सन्धिविग्रहसंयुक्तो दाता भोक्ता प्रियंवदः । गत्वा ह्यरिपुरं तेन घातिताः शत्रवः पुरा ॥ ३ ॥
विश्वासाद्राजकार्येषु कृतं कर्मातिदुष्कृतम् । लुंठितं तत्पुरं तेन लोभोपहतचेतसा ॥ ४ ॥
पीडिता बहवो लोका द्रव्यलोभाकुलीकृताः । तेन वै कर्मणा पुत्र प्राप्तं तु यमशासनम् ॥ ५ ॥
भुक्त्वातिदारुणान्सूत नरकान्घोरदर्शनान् । पुण्यात्पुण्यफलं सूत प्राप्य पुण्यावशेषतः ॥ ६ ॥
स्वर्णकारकुले जातो धूर्तो लोभपरः सदा । नानाचौर्यक्रियायुक्तो लोकवंचनतत्परः ॥ ७ ॥
महाभिमाननिरतः प्रियो राजजनेष्वपि । सुखैश्वर्यधनैर्युक्तः कुटुंबभरणे दृढः ॥ ८ ॥
नानास्त्रीसुखसंयुक्तस्तथा पुत्रविवर्जितः । वक्ष्यामि निष्कृतिं सूत सर्वपापनिकृतनीम् ॥ ९ ॥
प्रयागे त्वथवा काश्यां स्थाप्य लिङ्गं सुशोभनम् । पूजयेत्तु त्रिवर्षान्तं मन्त्रैस्तल्लिंगजैस्तथा॥१०॥
गंधपुष्पोपचारैश्च नैवेद्यैर्बहुदीपकैः । संपूज्य विधिवद्देवं तदन्ते भोजयेद्द्विजान् ॥ ११ ॥
शिवभक्तांस्तथा शान्तान्पूजयेद्वस्त्रद्रव्यतः । नानाहिरण्यैर्विधिवत्तथा चाभरणैः शुभैः ॥ १२ ॥
अथवा शृणुयात्तत्र यजुर्वेदं विधानतः । ब्रह्मचर्येण सततं प्रायश्चित्तमिदं परम् ॥ १३ ॥
य एवं कुरुते भक्त्या पूर्वपापौघनाशनम् । संप्राप्य तत्र निर्य्याणं शिवलोकं हि गच्छति ॥१४॥
कर्तव्यं ब्राह्मणद्वारा सर्वमेतद्धि काश्यपे । नाधिकारोऽत्र शूद्रस्य वेदस्य श्रवणे क्वचित् ॥ १५ ॥
तप्ता शलाका देया वै शूद्रकर्णेतिदारुणा । श्रुतं पारायणं येन पापेनाक्रान्तचेतसा ॥ १६ ॥
आयुर्वर्षशतं तस्य कृतनिष्कृतिकस्य वै । प्रायश्चित्तेऽकृते रिष्टं जायते षष्टिवत्सरे ॥ १७ ॥
एतज्जन्मफलं प्रोक्तं सविधानं समासतः ॥ १८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचसप्तत्युत्तरद्विशताधिकसहस्रतमः ॥ १२७५ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे हन्यात्खरमत्रैव जन्मनि । खररोमसमानि स्युस्तस्य रोमाणि सन्ततम् ॥ १ ॥
ब्राह्मणाय ततो दद्यात्स्वर्णनिष्कत्रयं सुत । जायते सूक्ष्मरोमा सा विनतानंदवर्धन ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्सप्तत्युत्तरद्विशताधिकसहस्रतमः ॥ १२७६ ॥

श्रीसूर्य उवाच ।

या पुरा हरते रीतिं नारी सा च खगाधिप । पिंगाक्षी जायते तस्याः प्रायश्चित्तं परं शृणु ॥ १ ॥
रीतिं दद्यात्पलशतं तथा ब्राह्मणभोजनम् । गायत्रीं प्रजपेच्छक्त्या जुहुयाद्वै तिलांस्तथा ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तसप्तत्युत्तरद्विशताधिकसहस्रतमः ॥ १२७७ ॥

श्रीसूर्य उवाच ।

प्राग्भवे चैव या नारी परसिद्धान्नभक्षिणी । सात्र जन्मनि शूलेन रोगेणैव च बाध्यते ॥ १ ॥

सिद्धान्नस्य च विप्रेभ्यो दीनेभ्योऽथ खगाधिप। भिक्षुभ्यश्च तथा दानाद्रसदानाच्च शक्तितः॥२॥
न जायते शूलपीडा तस्याश्च कृतनिष्कृतेः ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टसप्तत्युत्तरद्विशताधिकसहस्रतमः ॥ १२७८ ॥

श्रीसूर्य उवाच।

राष्ट्रघाती भवेत्पूर्वं जन्मन्यथ खगाधिप। सोऽत्र जन्मनि जायेत नरश्च विकृतस्वरः ॥ १ ॥
वक्ष्यामि तस्य पापस्य नाशनं चात्र जन्मनि। कर्पूरं त्रिपलं दद्याद्विप्रेभ्यः शक्तितोंडज ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनाशीत्युत्तरद्विशताधिकसहस्रतमः ॥ १२७९ ॥

श्रीसूर्य उवाच।

वधीयं या महाभाग पृच्छति स्वं प्रयोजनम्। गर्भपातरता सा तु जनुष्यत्र फलं त्विदम् ॥ १॥
मुखजा प्राग्भवे त्वत्र तत्पापौघवती हि सा। निष्कृतिं तत्र वक्ष्यामि गंगायां हि खगाधिप ॥२॥
पूजयेल्लक्षरुद्राणां त्रिगुणं वा तदर्द्धकम्। शक्त्या च भोजयेद्विप्रान् होमयेच्च स्वशक्तितः ॥ ३ ॥
अनेन विधिना या च प्रायश्चित्तं समाचरेत्। जायते संततिस्तस्या इह जन्मनि वै ध्रुवम् ॥ ४ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽशीत्युत्तरद्विशताधिकसहस्रतमः ॥ १२८० ॥

श्रीसूर्य उवाच।

कांस्यहारी तु पुरुषः प्राग्भवे विनतासुत। शीर्षरोगेण सततं पीडितो जायते त्विह ॥ १ ॥
दानात्पलशतादत्र सीसकादंडजोत्तम। विप्राय वेदविदुषे शीर्षरोगं न पश्यति ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकाशीत्युत्तरद्विशताधिकसहस्रतमः॥ १२८१ ॥

श्रीसूर्य उवाच।

बभूव बाहुजः कश्चिद्देशे केराभिधे सुत। धर्मकर्मात्मको भक्तः पितृपुत्रधनान्वितः ॥ १ ॥
दत्तानि तेन दानानि ब्राह्मणेभ्यो हि शक्तितः। सर्वस्वमपि पात्रेभ्यो गोभूम्यश्वादिकं च यत्॥२॥
पापमाचरितं तेन भाविनोर्थस्य वै बलात्। स्ववंशजस्य कस्यापि गृहं शत्रोर्मनोहरम् ॥ ३ ॥
निर्दग्धं वैरिभावेन रात्रौ भार्यासहायतः। तस्मिन्दाहे महाबाहो निर्दग्धं वृषभद्वयम् ॥ ४ ॥
गृहस्थाः स्वल्पजीवाश्च घातिताः क्रूरकर्मणा। ततो बहुतिथे काले गतः स यमशासनम् ॥ ५ ॥
सस्त्रीकः स्वफलं भुक्त्वा तत्र ताभ्यामशेषतः। पुण्यात्पञ्चनदे देशे स जातो बाहुजाधरः ॥ ६ ॥
मध्यस्वरूपो मतिमान्कुलेष्टः पुरुषो दृढः। रक्तो नोच्चो नातिनीचो बहुकन्यः पृथुर्विभुः ॥ ७ ॥
यौवनेल्पसुखैश्वर्यधनैः स्थानैर्युतायुतः। मितदो भोगभाग्याढ्यः कृती मानी जनप्रियः ॥ ८ ॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित्। चिंतारोगोतिधूर्तश्च दुःखार्तो मानवर्जितः ॥ ९॥
गोघातादग्निदाहाच्च जातपुत्रविनाशकः। सहायलक्षणं सर्वं कथयामि खगेश्वर ॥ १० ॥
या स्त्री पूर्वे सहायासीद्दाहकर्मणि चांडज। सा ज्येष्ठा प्रष्टुरेवात्र मृतपुत्रा हि जन्मनि ॥ ११ ॥
लक्ष्मैतदंडजश्रेष्ठ जन्मांगाद्वृषभे शनिः। लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥ १२ ॥
कारयित्वा शिवं साम्बं पलैर्वेदमितैः शुभैः। हिरण्मयं महाभाग पत्रे लेख्यं सुसुन्दरम् ॥ १३ ॥
तदर्धमितकं वापि निजवित्तानुसारतः। पूजयित्वा तु गंधाद्यैः षोडशोपचारकैः ॥ १४ ॥
संस्थाप्य पशुपं पश्चाद्गोरथे सुमनोहरे। सर्वोपस्करसंयुक्ते वितानांवरभूषिते ॥ १५ ॥
दद्याद्वेदविधिज्ञाय मंत्रमेतमुदीरयेत् ॥ १६ ॥

मन्त्रः ।

" मोहात्पूर्वं महापापमग्निदाद्यदर्जितम् । तन्नाशाय ददेऽहं तु शिवं गारथसांस्थितम् " ॥ १७॥
गोधिकाद्यास्तथा जीवाः पत्रे लेख्यास्तु राजते । शिवपत्रमिदं दद्याद्ये चान्ये घातिताः पुरा॥१८॥
पञ्चमाषमितो वह्निर्देयो हेममयः शुभः । गायत्र्यष्टसहस्रं तु रौद्रं जप्त्वा सहस्रकम् ॥ १९ ॥
अष्टाक्षरं द्विसाहस्रं होमयेद्घोजयेद्विजान् । य एवं कुरुते सूत प्रायश्चित्तं विधानतः ॥ २० ॥
न तस्य पुत्रमरणं तदग्रे जायते क्वचित् । जायन्ते सुलभाः पुत्रा आधिव्याधिविवर्जिताः ॥ २१ ॥
नैवं करोति मोहाद्वा ह्यत्र पुत्रविवर्जितः । चत्वारिंशन्मितैकोने वर्षे रिष्टं प्रकीर्तितम् ॥ २१ ॥
पञ्चाशन्मितकेऽब्दे वा रिष्टं चाकृतनिष्कृतेः । प्रायश्चित्ते कृते ह्यायुश्चतुःसप्तमिताब्दके ॥२३॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्यशीत्युत्तरद्विशताधिकसहस्रतमः ॥ १२८२ ॥

श्रीसूर्य उवाच ।

कांस्यहारी तु पुरुषः प्राग्भवे विनतासुत । शीर्षरोगेण सततं पीडितो जायते त्विह ॥ १ ॥
दानात्पलशतादत्र सीसकादंडजोत्तम । विप्राय वेदविदुषे शीर्षरोगं न पश्यति ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्यशीत्युत्तरद्विशताधिकसहस्रतमः ॥ १२८३ ॥

श्रीसूर्य उवाच ।

वंध्यायाश्च महाभाग प्रायश्चित्तं शृणुष्व तत् । शूलोद्भिन्नतनुं चारं घृतं प्राप्य रवेर्दिने ॥ १ ॥
तत्तले तु तदा कुर्याद्वंध्यास्नानं शतौषधैः । पत्रैर्वृक्षोद्भवैः सूत मृत्स्नाभिः सप्तभिस्तथा ॥ २ ॥
तीर्थोदकैः समंत्रैश्च तं पूज्य प्रथमं सुत । विधिनानेन या कुर्याद्वन्ध्या पुत्रं लभेद्ध्रुवम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरशीत्युत्तरद्विशताधिकसहस्रतमः ॥ १२८४ ॥

श्रीसूर्य उवाच ।

शुद्धां स्वभार्यां परमां साध्वीं संत्यज्य दुर्मतिः । प्रमादात्प्राग्भवे गच्छेदन्यस्त्रीं काममोहितः ॥१॥
सोऽत्र जन्मनि भोः सूत ! ग्रहणीरोगसंयुतः । जायते म्रियतेऽवश्यं ब्राह्मण्यां गमनात्किल ॥ २॥
न तस्य पापशमनं मया प्रोक्तं खगाधिप । तस्मिन्वयसि तन्मृत्युर्भविष्यति न संशयः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाशीत्युत्तरद्विशताधिकसहस्रतमः ॥ १२८५ ॥

श्रीसूर्य उवाच ।

या काचिद्वनिता सूत ! प्राग्भवे कांस्यहारिणी । सात्र जन्मनि पक्षीन्द्र शीर्षरोगप्रपीडिता ॥१॥
दद्यात्पलशतं सीसं ब्राह्मणाय कुटुम्बिने । तत्काले शीर्षजाद्रोगान्मुच्यते नात्र संशयः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडशीत्युत्तरद्विशताधिकसहस्रतमः ॥ १२८६ ॥

श्रीसूर्य उवाच ।

या नारी त्ववधीत्पूर्वं मोहाद्गुं खगाधिप । सात्र जन्मनि पक्षीन्द्र ! जायते विकृतस्वरा ॥ १ ॥
सरस्वत्याश्च प्रतिमां सौवर्णीं राजतीं तथा । दद्याद्वेदविधिज्ञाय तदा स्यान्मुखराण्डज ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्ताशीत्युत्तरद्विशताधिकसहस्रतमः ॥ १२८७ ॥

श्रीसूर्य उवाच।

पूर्वजन्मनि यः कश्चिन्मोहात्परवृतं हरेत्। नेत्ररोगयुक्तः सोऽपि जायतेऽत्रैव जन्मनि ॥ १ ॥
घृतधेनुप्रदानाच्च विधिवद्वेदपारगे। मुच्यते नेत्ररोगाच्च जन्मन्यत्र खगाधिप ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाशीत्युत्तरद्विशताधिकसहस्रतमः ॥ १२८८ ॥

श्रीसूर्य उवाच।

स्वकं पतिं परित्यज्य या गच्छेत्पूर्वजन्मनि। परपुंसि महाभाग! ग्रहणीरुग्युताऽत्र सा ॥ १ ॥
प्रायश्चित्तं परं तस्या व्रतं चान्द्रायणं त्विह। वैशाखे माघमासे वा तस्मात्पापात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोननवत्युत्तरद्विशताधिकसहस्रतमः ॥ १२८९ ॥

अरुण उवाच।

विप्रवर्णकुलोत्पन्नो वातरक्ताक्षदर्शनः। उदरे वातजान्रोगान्किंचिच्छस्त्रोपघातकान् ॥ १ ॥
किंश्चित्क्रोधश्च लोभश्च किंचिद्वित्तसमन्वितः। तस्य प्रिया शुभाचारा पतिभक्तिपरायणा ॥ २ ॥
एकापत्यं भवेत्तस्य जायते मृतपुत्रकः। आदिः पुत्रो मृतस्तस्य ह्यपत्यं नैव जायते ॥ ३ ॥
केन कर्मविपाकेन सत्यं कथय भास्कर! ॥ ४ ॥

श्रीसूर्य उवाच।

पूर्वजन्मन्ययं सूत शूद्रवंशसमुद्भवः। व्यापारकृषिवाणिज्यं ब्रह्मवित्तेन यत्कृतम् ॥ ५ ॥
व्यवहारादिना भूयो ब्रह्मवित्तेन वर्धितम्। कालेनैवं मृतो विप्रो धनं शूद्रेण वंचितम् ॥ ६ ॥
नार्पितं ब्रह्मपुत्राय ब्रह्मस्वं च गृहे स्थितम्। ब्रह्मस्वं भक्षितं तेन बहुकालं खगेश्वर ॥ ७ ॥
पश्चान्मृत्युवशं प्राप्तो नरके रौरवे गतः। ब्रह्मस्वभक्षणाच्चैव वर्षाणाश्च सहस्रकम् ॥ ८ ॥
पतितो नरके घोरे पक्तस्तेन स्वकर्मणा। पश्चान्मानुष्यमापन्नः पीडितश्चेह कर्मणा ॥ ९ ॥
पूर्वजन्मार्जितैः पुण्यैर्व्रतदानादिभिः खग। तृतीयं जन्म चैतद्धि ब्रह्मवंशसमुद्भवम् ॥ १० ॥
निक्षेपहरणाद्वापि मृतपुत्रः प्रजायते। ब्राह्मणाय विषं दत्त्वा ब्रह्मस्वं यद्भोज वै ॥ ११ ॥
ऋणं प्रसह्य वै प्रोक्तमेतस्योपरि तन्महत्। तस्माद्विप्रधनं प्रोक्तमसह्यं त्वभिजायते ॥ १२ ॥

अरुण उवाच।

प्रायश्चित्तं कथं देव येन पुत्रः प्रजायते। नारीणाञ्च नराणां च निष्कृतिं वद तां प्रभो ॥ १३ ॥

श्रीसूर्य उवाच।

महापापहरो देवः सर्वकामप्रदः प्रभुः। पूजनीयो महारुद्रः संततिश्रेय इच्छता ॥ १४ ॥
यजुर्वेदमयं देवं यजुर्भिः शतरुद्रजैः। यजमानः प्रमुच्येत पापादाकल्पसंभवात् ॥ १५ ॥
रुद्रैकादशनीभिश्च रुद्रैकादशकेन वा। जप्त्वैवं तोषयेद्देवं रुद्रमेकादशात्मकम् ॥ १६ ॥
तद्दशांशेन होतव्यं द्रव्यं श्रद्धासमन्वितम्। विधिवज्जुहुयाद्वह्नौ तिलैस्त्रिमधुराप्लुतैः ॥ १७ ॥
हरितालीपलाशोत्थाः मिधोऽत्र हवेर्हुताः। प्रतिरुद्रं प्रदातव्यं गोयुगं रशनान्वितम् ॥ १८ ॥
केयूरकुंडलाकल्पमंत्रपुस्तकमंडलु। प्रतिरुद्रं शतं विप्रान्भोजयेत्सुसमाहितः ॥ १९ ॥
निष्कं दद्यात्सुवर्णस्य दद्याद्वा मुख्यदक्षिणाम्। एवं रुद्रविधिं कृत्वा त्रिविधं नाशयेदघम्॥२०॥
इतिहासपुराणोक्तसूक्तानि विविधानि च। शृणुयाद्विधिवत्तार्क्ष्य सभार्यः प्रीतितोन्वहम् ॥ २१ ॥

देवर्षिपितृमर्त्यानामृषीणां च महीक्षिताम् । देवदानवगंधर्वपिशाचोरगरक्षसाम् ॥ २२ ॥
सर्वेषां जीवजातीनामुत्पत्तिं शृणुयादपि । ऋषीणामृषिपत्नीनां वंशान्सर्वानुदीरितान् ॥ २३ ॥
एवं स त्रिविधात्पापान्मुच्यतेऽपत्यदुःखदात् । गुरून्देवान्द्विजान्सम्यक्श्रद्धया समुपाचरेत् ॥२४॥
एवं कृत्वा ततः सूत हरिवंशं निशम्य वै । वाचकोपरि संतुष्टो भूमिद्रविणवासकैः ॥ २५ ॥
मुद्रिकाकर्णभूषादिं गां दत्त्वा च पयस्विनीम् । भूमिद्रविणदानाद्यैस्तोषयेदन्यब्राह्मणान् ॥ २६॥
निष्कृतिं कुर्वतः पूज्यान्सर्पिष्यात्मानमीक्षयेत् । ऐहिकं लक्षणं तस्य शरीरे चोपजायते ॥ २७ ॥
जन्मक्रमेण जायन्ते दुःखान्यकृतनिष्कृतेः । कुष्ठरुक्चानपत्यत्वं प्रमेहार्तिर्धनक्षतिः ॥ २८ ॥
कुनखित्वं दद्रुलत्वं पांडुरोगित्वमेव च । जन्मलग्नाच्च चोरत्वं राज्ञो वित्तव्ययादिकम् ॥ २९ ॥
लकुटग्रावशस्त्राद्यैर्जायंते व्रणजातयः ॥ ३० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवत्युत्तरद्विशताधिकसहस्रतमः ॥ १२९० ॥

श्रीसूर्य उवाच ।

अथ सूय दिने सूत प्राप्य भूमिं श्मशानजाम् । मृतप्रेतं समालोक्य रात्रौ गच्छेदतन्द्रितः ॥१ ॥
पूजयित्वा चितां तस्य वलिमष्टविधं सृजेत् । स्नानं कृत्वा मृदालम्भैः पत्रैर्वृक्षोद्भवैस्तथा ॥ २ ॥
शतच्छिद्रं घटं प्राप्य नानातीर्थोद्भवैर्जलैः । दीपमालादिने वापि प्रयोगं विधिना चरेत् ॥ ३ ॥
हरिवंशं ततः पश्चाच्छृणुयाद्विधिपूर्वकम् । दत्त्वा द्विजेभ्यो विधिना नानाभक्ष्यफलानि च ॥ ४ ॥
स्वेच्छया भोजनं तेभ्यो दद्याद्दोषापनुत्तये । एतत्प्रयोगान्नार्यत्र वंध्या याति सपुत्रताम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकनवत्युत्तरद्विशताधिकसहस्रतमः ॥ १२९१ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यसौ वैश्यो चात्र जन्मनि वाहुजः । देवद्रव्यापहरणात्प्रागत्राक्षिप्रपीडनम् ॥ १ ॥
कृत्वा देवगृहं रम्यं प्रतिष्ठाप्य सुराधिपम् । गंधैः पुष्पैः समभ्यर्च्य दीपान्दद्यात्सुवर्णजान् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विनवत्युत्तरद्विशताधिकसहस्रतमः ॥ १२९२ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यसौ शूद्रश्चक्रे मुष्कनिकृंतनम् । वृषभस्य महाभाग स्वार्थसाधनतत्परः ॥ १ ॥
कर्मणा तेन संजातः पंढश्चैवापवर्णजः । गवां पालनजात्पुण्यात्प्रागत्र सुखसंयुतः ॥ २ ॥
गोपीडनान्महापापात्तस्य नैवात्र निष्कृतिः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिनवत्युत्तरद्विशताधिकसहस्रतमः ॥ १२९३ ॥

श्रीसूर्य उवाच ।

या काचिल्ललना पूर्वं मोहात्परवृतं हरेत् । सात्र जन्मनि रोगेण नेत्रोत्थेन प्रपीडयते ॥ १ ॥
कुरुक्षेत्रादितीर्थेषु धृतधेनुप्रदानतः । मुच्यते सा महारोगान्नेत्रजान्नात्र संशयः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्नवत्युत्तरद्विशताधिकसहस्रतमः ॥ १२९४ ॥

श्रीसूर्य उवाच ।

महिषीमवधीत्पूर्वभवे चायं नराधिपः । सोऽत्र जन्मनि पक्षींद्र लघुगुल्मयुतो भवेत् ॥ १ ॥

स्वर्णशृंगीं रौप्यखुरीं घंटाभरणभूषिताम्। सूक्ष्मकम्बलयुक्तां च दद्याद्वेदविदे सुत ॥ २ ॥
कृष्णगुल्मोद्भवां पीडां नरश्चात्र न पश्यति ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचनवत्युत्तरद्विशताधिकसहस्रतमः ॥ १२९५ ॥

श्रीसूर्य उवाच।

प्राग्भवे याऽभवत्काचित्स्वर्णकारी खगाधिप। स्वधर्मनिरता सा च दानधर्मपरायणा ॥ १ ॥
तद्गृहे धान्यराशिं तु चरन्ती गौः स्वभावतः। ताडिता कुक्षिभागे तु लगुडेन तया भृशम् ॥२ ॥
ताडनात्सा महादुःखं प्राप्ता गर्भातिचारतः। मृता च तेन दुःखेन गर्भपातसमन्विता ॥ ३ ॥
तेन कर्मविपाकेन संप्राप्योचितशासनम्। पुनः शूद्री हि संजाता गौरवर्णा शुभानना ॥ ४ ॥
धनभृत्याश्वभोगाद्यैर्नानाविभवसंयुता। पुत्रसंततिहीना सा प्राणघाताघसञ्चयात् ॥ ५ ॥
प्रायश्चित्तं प्रवक्ष्यामि सर्वपापविनाशनम्। वापीं सा स्वेच्छया कुर्याद्देशे लोकाकुले तथा ॥ ६ ॥
मार्गे हि धर्मतो यत्नात्प्रतिष्ठां कारयेत्ततः। संस्थाप्य च शिवं तत्र विधिना विनतासुत ॥ ७ ॥
होमयेच्च ततस्तत्र तिलानाज्ययुतानिह। भोजयेद्ब्राह्मणान्भक्त्या शिवपूजनतत्परान् ॥ ८ ॥
दद्यात्तथैकां कपिलां सर्वपापप्रणाशिनीम्। प्रायश्चित्तमिदं सूत पूर्वजन्माघनाशनम् ॥ ९ ॥
नैवं या कुरुते श्रुत्वा तस्याः संततिजं भयम् ॥ १० ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षण्णवत्युत्तरद्विशताधिकसहस्रतमः ॥ १२९६ ॥

श्रीसूर्य उवाच।

यःकश्चित्प्राग्भवे सूत दुग्धं हरति मानवः। तत्काले सोऽन्यजनुषि बहुमूत्री प्रजायते ॥ १ ॥
दुग्धधेनुप्रदानाच्च विधिना त्वत्र जन्मनि। बहुमूत्रान्महारोगान्मुच्यते नात्र संशयः ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तनवत्युत्तरद्विशताधिकसहस्रतमः ॥ १२९७॥

श्रीसूर्य उवाच।

दुग्धं हरति या नारी कस्यचित्पापमोहिता। पूर्वजन्मनि चात्रैव बहुमूत्ररुजाऽऽकुला ॥ १ ॥
दुग्धधेनुप्रदानाच्च वेदवेदांगपारगे। विधिना काश्यपे सात्र न पश्येद्बहुमूत्रकम् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टनवत्युत्तरद्विशताधिकसहस्रतमः ॥ १२९८ ॥

श्रीसूर्य उवाच।

यो मोहाद्घातयेत्सूत महिषीं नवयौवनाम्। प्राग्भवे नियतं सोत्र कृष्णगुल्मात्प्रबाध्यते ॥ १ ॥
स नानारत्नदानेन विधिना गरुडाग्रज। नाशयेत्कृष्णगुल्मोत्थां पीडामत्रैव जन्मनि ॥ २ ॥
अथ वा माहिषीदानाद्विप्राय विधिनांडज। महिषी पापजाद्रोगात्सुखी भवति मानवः ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनद्विशताधिकसहस्रतमः ॥ १२९९ ॥

श्रीसूर्य उवाच।

यः कुर्यात्पापलोभेन पूर्वं मुष्कानिकुट्टनम्। ब्रह्मपुत्रस्य षंढः स्यादत्र जन्मनि निश्चयात् ॥ १ ॥
ज्ञानाज्ञानकृतं वापि निष्कृतिर्नात्र विद्यते। ब्रह्मघातान्महापापात्षंढः स्याद्बहुजन्मसु ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिशताधिकसहस्रतमः ॥ १३०० ॥

श्रीसूर्य उवाच ।

बभूव फलहृत्काचित्प्रमादाद्विनतासुत । पूर्वजन्मनि पुण्यापि बहुदानरता सती ॥ १ ॥
अत्र सा क्षत्रिया जाता प्रागपि क्षत्रियांडज। अत्र पुत्रविहीना सा फलचौर्य्याद्धि पातकात् ॥२॥
फलानां बहुदानाच्च चातुर्मास्येऽत्र नित्यशः । भोजनं तु तदा पश्चात्कारयेत्स्वेच्छया द्विजान् ३
प्रायश्चित्तं परं तस्य फलचौर्यस्य तत्स्मृतम् । अमायां नारिकेलानि देयानि खलु शक्तितः ॥४॥
एवं कृतेऽपत्यवृद्धिर्जीवनं सप्तसप्ततिम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोत्तरत्रिशताधिकसहस्रतमः ॥ १३०१ ॥

श्रीसूर्य उवाच ।

दधिहारी पुमान्पूर्वं जन्मन्यत्र खगेश्वर । जायते मेदसा युक्तस्तदुःखेन प्रपीडितः ॥ १ ॥
कार्तिक्यां माघवैशाख्योर्दधिधेनुप्रदानतः । तस्माद्रोगाद्विमुच्येत तत्काले गरुडाग्रज ! ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्युत्तरत्रिशताधिकसहस्रतमः ॥ १३०२ ॥

श्रीसूर्य उवाच ।

महिषी घातनान्नारी प्राग्भवे विनतासुत । अत्र जन्मनि पक्षीन्द्र ! कृष्णगुल्मेन पीडयते ॥ १ ॥
दद्यात् साभरणां सूत ! महिषीं यमदैवताम् । कंबलद्वयसंछन्नां विधिना नवयौवनाम् ॥ २ ॥
सा मुच्यते महापापान्महिषीवधजात्सुत । प्रायश्चित्ते कृते त्वस्मिन्कृष्णगुल्मं न पश्यति ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्युत्तरत्रिशताधिकसहस्रतमः ॥ १३०३ ॥

श्रीसूर्य उवाच ।

विध्यात्प्राग्यो वृषानां च नासाग्रं गरुडाग्रज । नासाछेदोत्र तस्य स्याद्यूनि भावे हि निश्चयात्॥१॥
प्रायश्चित्तं न तस्यास्ति दत्तैर्दानशतैरपि ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरुत्तरत्रिशताधिकसहस्रतमः ॥ १३०४ ॥

श्रीसूर्य उवाच ।

कश्चिदासीन्महाभाग चारणोतिप्रियंवदः । कवित्वशक्तिसम्पन्नो बहुचारणसंयुतः ॥ १ ॥
प्रेरितो दैवयोगेन गतो राजाश्रयं प्रति । तत्सेवानिरतो नित्यं चिरकालमुपस्थितः ॥ २ ॥
अथ तत्र महावादे कवीनां हि खगेश्वर । महाघोरमभूद्युद्धं राजद्वारे भयप्रदम् ॥ ३ ॥
स चारणो महाक्रोधात्कृतवानात्मघातनम् । परघातकृते सूत ! स्वशरीरमथात्यजत् ॥ ४ ॥
तेन कर्मविपाकेन महाचौर्येण चांडज । भुक्त्वा स्वर्गफलं पुण्यादात्मघातात्परिच्युतः ॥ ५ ॥
अथ भूमिभुजां वंशे म्लेच्छानां चाजनि स्वयम् । सिंधोः पश्चिमभागेऽत्र शतयोजनसम्मिते॥६॥
देशे कर्कटगे जीवे लग्नस्थे चन्द्रसंयुते । गौराङ्गः पृथुलो धूर्तः सर्वविद्याविशारदः ॥ ७ ॥
सुखैश्वर्यसमाक्रान्तो धनवाहनभोगभाक् । शूरः सुवेषोऽतिक्रूरो बहुपालनतत्परः ॥ ८ ॥
पापाल्लोभरतः क्रोधी नानाभैरवशासनः । रिष्टं षष्टिमिते वर्षे पंचहीने खगाधिप ॥ ९ ॥
सुवर्णस्य महाकालनरस्य हि खगधिप । सर्ववित्तषंडशेन दानाद्रिष्टक्षयो भवेत् ॥ १० ॥
पञ्चाशीतिमितायुः स्यादन्ते कालनरंडज । प्रायश्चित्तेऽकृते त्वत्र रिष्टं स्यात्प्रोक्तवत्सरे ॥ ११ ॥

कालरूपेण शस्त्रेण तत्क्षणे मरणं स्मृतम् । महाघोराहवे सूत ! चात्मघातादिदं फलम् ॥ १२ ॥
चिह्नं तस्य प्रवक्ष्यामि ह्यात्मघातसमुद्भवम् । हींदिस्थं लशुनं पुत्र षडंगुलमितं शुभम् ॥ १३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चोत्तरत्रिशताधिकसहस्रतमः ॥ १३०५ ॥

श्रीसूर्य उवाच ।

दधिप्रहरणान्नारी प्राग्भवे त्वत्र जन्मनि । मेदसा पीड्यते सा तु विनतानन्दवर्धन ॥ १ ॥
दधिधेनुप्रदानाच्च ब्राह्मणाय कुटुम्बिने । मुच्यतेत्र महारोगान्नात्र कार्या विचारणा ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडुत्तरत्रिशताधिकसहस्रतमः ॥ १३०६ ॥

श्रीसूर्य उवाच ।

तक्षौ निहते पूर्वं भवे च गरुडाग्रज । अत्र जन्मनि नेत्रेषु कातरत्वं प्रजायते ॥ १ ॥
रत्नधेनुमहादानाद्विधिना ब्राह्मणाय च । न पश्यत्यक्षिजं घोरं कातरोत्थं हि काश्यप ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तोत्तरत्रिशताधिकसहस्रतमः ॥ १३०७ ॥

श्रीसूर्य उवाच ।

प्राग्भवे सुमुखी काचिद्गता देवालयंडज । दीपा धातुमयास्तत्र चान्यदत्ता हृतास्तया ॥ १ ॥
दीपा दत्ता यया सा हि धनपुत्रसमन्विता । चण्डीगृहे महादानात्प्राकृतात्तु खगाधिप ॥ २ ॥
हरणादपरस्यास्तु चक्षुःपीडातिदारुणा । त्रिदोषैर्दूषिता चात्र युवभावे खगेश्वर ॥ ३ ॥
प्रायश्चित्तं प्रवक्ष्यामि दीपहृत्पापशोधनम् । दीपा देया घृतेनात्र पूरयित्वा सुवर्णजाः ॥ ४ ॥
सुवर्णाद्विमितं भव्यं संपूज्याथ महेश्वरम् । गन्धपुष्पैस्तथा दीपैर्भक्ष्यैर्भोज्यैः प्रयत्नतः ॥ ५ ॥
दद्याद्विजेभ्यो बहुशस्तस्मात्पापात्प्रमुच्यते ॥ ६ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टोत्तरत्रिशताधिकसहस्रतमः ॥ १३०८ ॥

श्रीसूर्य उवाच ।

दुष्टगंधयुतः सूत जायते सोऽत्र जन्मनि । मधुहारी च यः पूर्वं प्रायश्चित्तं परं शृणु ॥ १
मधुधेनुप्रदानाद्वै ब्राह्मणाय विपश्चिते । दुष्टगंधकृतादोषान्मुच्यते नात्र संशयः ॥ २
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवोत्तरत्रिशताधिकसहस्रतमः ॥ १३०९ ॥

श्रीसूर्य उवाच ।

तक्षुं घातयेत्पूर्वं या नारी गरुडाग्रज । कच्चराक्षी प्रजायेत चक्षुरोगात्खगाधिप ॥ १ ॥
धेनुं रत्नमयीं दद्यात्ससुवर्णां विधानतः । न पश्यत्यक्षिरोगं सा तद्दानेन महाद्भुतम् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो दशोत्तरत्रिशताधिकसहस्रतमः ॥ १३१० ॥

श्रीसूर्य उवाच ।

प्राग्जन्मन्यप्यभूत्कश्चिन्नरो राजकृपान्वितः । दंडाधिकारवाञ्शूद्रो दृढो ब्राह्मणपूजितः ॥ १ ॥
नानादानरतस्तत्र लोभाढ्योऽपि विशेषतः । व्यभिचाररतस्यैकब्राह्मणस्य खगाधिप ॥ २ ॥
लोभाच्चकारासौ तत्र ह्यंडच्छेदं च तत्क्षणात् । स तेन कर्मणा युक्तो भुक्तातियमशासनम् ॥ ३ ॥
देशे पञ्चनदे ह्यत्र जातः शूद्रोऽतिचाधमः । सचास्त्यत्र विवर्णस्तु षंढः पापमतिः सुखी ॥ ४ ॥

सकलैश्वर्यसंपन्नो नानाधनसमन्वितः । नानावाहनभोगाढ्यो दानात्सर्वमिदं सुत ॥ ५ ॥
सप्तजन्मस्वसौ षंढो भविष्यति खगेश्वर ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकादशोत्तरत्रिशताधिकसहस्रतमः ॥ १३११ ॥

अरुण उवाच ।

क्षात्रे कुले समुत्पन्नः शौर्यौदार्ययशा धनी । राजमान्यो विरोधी च नानासौख्यरतः सदा ॥ १ ॥
किंचिद्वातादिना पीडा जायते तस्य चोदरे । सर्वदा वातरक्तादि जायते पक्षसंख्यया ॥ २ ॥
तस्य भार्या शुभाचारा सुरूपा गुणशालिनी । प्रियभक्तिरता नित्यं दानदाक्षिण्यशालिनी ॥ ३ ॥
एकपुत्रं प्रसूयाथ चान्यपुत्रमजीजनत् । पश्चात्पुष्पं गतं शांतिमपत्यं नैव जायते ॥ ४ ॥
केन कर्मविपाकेन पापं शाम्यति तत्स्त्रियाः । विधानावहितार्थाय सत्यं ब्रूहि दिवाकर ॥ ५ ॥

श्रीसूर्य उवाच ।

पूर्वं वर्णोत्तरे जातो धातुकांस्यादिकारकः । स हि ब्राह्मणसख्येन बहुद्रव्यसमाकुलः ॥ ६ ॥
क्रयविक्रयकर्ता च विप्रद्रव्येण वर्धितः । कालेन महता वत्स स विप्रो निधनं गतः ॥ ७ ॥
सञ्चितं तद्धनं सर्वं न तु विप्राय चार्पितम् । ब्रह्मस्वं भक्षितं तेन वंशवृद्धिविनाशनम् ॥ ८ ॥
तेन कर्मविपाकेन नानासंततिनाशनम् । यो वै तस्य मृतः पुत्रः स जातो ब्राह्मणस्य च ॥ ९ ॥
इदं चतुर्थं वै जन्म ब्रह्मवंशसमुद्भवम् । भार्या दुःखयुता ह्येवं पुत्रहीना खगाधिप ॥ १० ॥

अरुण उवाच ।

प्रायश्चित्तं कथं देव येन पापक्षयो भवेत् । निष्कृतिं ब्रूहि देवेश संततेः सौख्यहेतवे ॥ ११ ॥

श्रीसूर्य उवाच ।

ब्रह्मस्वं विषतुल्यं वै पुत्रपौत्रादिनाशनम् । विषेणैको हि म्रियते ब्रह्मस्वात्सकलं कुलम् ॥ १२ ॥
तस्याः संततिवृद्ध्यै हि कारयेन्निष्कृतिं शुभाम् । सुशुभे भूप्रदेशे तु गोमयेनोपलेपयेत् ॥ १३ ॥
कुर्यादष्टदलं पद्मं राजतं शुक्लतंडुलैः । तन्मध्ये स्थापयेत्कुम्भमव्रणं शुभलक्षणम् ॥ १४ ॥
सुशीतसलिलैः पूर्णं सरत्नौषधिपल्लवम् । नानाफलाक्षतोपेतं पूर्णपात्रोपशोभितम् ॥ १५ ॥
तस्योपरि न्यसेत्पात्रं वैणवं वर्तुलाकृति । सप्तधान्यफलोपेतं वस्त्रस्रक्चन्दनान्वितम् ॥ १६ ॥
तन्मध्ये स्थापयेन्मूर्तिं निष्कद्वयविनिर्मिताम् । सुवर्णस्य विशुद्धां च दापयेद्वेदवादिने ॥ १७ ॥
प्रतिष्ठां पूजनं कृत्वा ततो गां वै सवत्सकाम् । शतमष्टोत्तरं विद्वान्द्रोणान्सप्तैव निर्मितान् ॥ १८ ॥
जातीपुष्पसमुद्भूतां लक्षपूजां शिवोपरि । संकष्टान्मोचयेद्धेनुं दंपती परिधापयेत् ॥ १९ ॥
एवं कृतविधेः सूत निश्चला संततिर्भवेत् ॥ २० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वादशोत्तरत्रिशताधिकसहस्रतमः ॥ १३१२ ॥

श्रीसूर्य उवाच ।

या काचिद्वनिता मोहात्प्राग्भवे माक्षिकं हरेत् । सात्र जन्मनि पक्षीन्द्र दुर्गंधाढ्या प्रजायते ॥ १ ॥
मधुधेनुप्रदानात्तु व्यतीपातादिपर्वसु । दुर्गंधिरोगात्सततं मुच्यतेऽत्र पतत्रिण ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोदशोत्तरत्रिशताधिकसहस्रतमः ॥ १३१३ ॥

श्रीसूर्य उवाच ।

ब्रह्मघ्नी सा समाख्याता या पूर्वं घातयेद्द्विजम् । सर्वं विचेष्टितं तस्याः शृणुष्वात्र खगाधिप ॥ १ ॥

अनया द्रव्यलोभेन सपत्न्या घातितः सुतः। प्राग्भवे विपदानेन कुमारो दोषवर्जितः ॥ २ ॥
तस्मादियं महापापा जातात्र यवनी खग। भविष्यति महारिष्टमग्निदाहेन चांडज ॥ ३ ॥
तस्या वर्षं चतुर्विंशे मरणं कीर्तितं ध्रुवम् ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्दशोत्तरत्रिशताधिकसहस्रतमः ॥ १३१४ ॥

श्रीसूर्य उवाच।

षंढः स्त्रीराजसन्मानी ह्यत्र जन्मनि चांडज। महादुष्टक्रियायुक्तो वधबंधनतत्परः ॥ १ ॥
प्राक्कृतात्तु महादानात्सुखैश्वर्यधनान्वितः। महामानी महाधूर्तः षंढोऽगम्यानिषेवणात् ॥ २ ॥
नात्र जन्मनि भोः सूत प्रायश्चित्तं मयोदितम्। अगम्यागमनं पापं प्रायश्चित्तविवर्जितम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचदशोत्तरत्रिशताधिकसहस्रतमः ॥ १३१५ ॥

श्रीसूर्य उवाच।

वराहं यो नरो हन्यात्प्राग्भवे विनतासुत। जायते दंतुरः सोऽपि काले तत्पापचिह्नितः ॥ १ ॥
घृतकुम्भं यथाशक्ति दद्याद्विप्राय धीमते। सुवर्णसहितं तेन तस्मात्पापात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षोडशोत्तरत्रिशताधिकसहस्रतमः ॥ १३१६ ॥

श्रीसूर्य उवाच।

यो हरेत्प्राग्भवे सूत गुडं मोहान्नराधमः। गुल्मोदरेण रोगेण सोऽत्र जन्मनि पीड्यते ॥ १ ॥
गुडधेनुप्रदानात्तु विधिना ब्राह्मणाय च। गुल्मोदरसमुद्भूता पीडा नश्यति तत्क्षणात् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तदशोत्तरत्रिशताधिकसहस्रतमः ॥ १३१७ ॥

श्रीसूर्य उवाच।

अथो काचित्सती नारी धर्मिष्ठा प्रियवादिनी। स्वामिना प्रेरिता पूर्वं शत्रोर्दग्धं तया गृहम् ॥१॥
तदाहाच्च महाभाग दग्धं सर्वं पुरं तदा। ब्राह्मण्येका सबाला च निर्दग्धा दोषवर्जिता ॥ २ ॥
ततो ब्रह्मवधात्तत्र किंचित्कालेऽपि सा मृता। भुक्त्वा पापफलं सर्वं पुण्यपापसमुद्भवम् ॥ ३ ॥
सा शूद्री यमुनातीरे जाता वै पतिसेवया। कुष्ठरोगयुता बाल्ये निष्कृतिं पापनाशिनीम् ॥ ४ ॥
वक्ष्यामि वृषभं दद्यात्सर्वोपस्करसंयुतम्। कुष्ठरोगात्प्रमुच्येत नात्र कार्या विचारणा ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टादशोत्तरत्रिशताधिकसहस्रतमः ॥ १३१८ ॥

श्रीसूर्य उवाच।

प्रागासीद्ब्राह्मणः कश्चित्कृषिकर्मरतस्तदा। पूजकश्चातिथीनां च भिक्षुकाणां च यत्नतः ॥ १ ॥
तद्गृहे वृषभो मत्तस्तीक्ष्णशृंगो भयानकः। तेन तद्वृषभस्यापि प्राग्भवे विनतासुत ॥ २ ॥
छित्त्वा नासाग्रमुष्कौ तु कृतं कर्मातिदारुणम्। तत्र तज्जनितं भुक्त्वा फलं पापसमुद्भवम् ॥ ३ ॥
जातोऽत्र यवनः सिंधुमण्डले पर्वताश्रिते। षण्ढस्तु तेन पापेन स चास्त्यत्र खगाधिप ॥ ४ ॥
धर्मात्पूर्वकृतात्सोऽपि सुखैश्वर्यधनान्वितः। पापाद्दृढात्तथा तस्य प्रायश्चित्तं न विद्यते ॥ ५ ॥
पूजनादतिथीनां च भविष्यति च तद्गतिः। तीर्थाश्रयेऽत्र जन्तूपि मृत्युस्तस्य प्रकीर्तितः ॥ ६ ॥
आयुः षष्टिमिताब्दान्तं रिष्टं पञ्चाशदब्दके ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनविंशत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३१९ ॥

श्रीसूर्य उवाच ।

घातयेद्या पुरा नारी वाहनं गरुडाग्रज । दंतुरा सा भवेदत्र तत्काले घातकारणात् ॥ १ ॥
ताम्रकुम्भं सुवर्णाढ्यं घृतपूर्णं सदक्षिणम् । तद्दोषशमनायैव दद्याच्छक्त्या विधानतः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो विंशत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३२० ॥

श्रीसूर्य उवाच ।

तैलहारी तु यः कश्चिद्भवे लोभात्पुरा भवेत् । कण्डूरोगेण सततं पीड्यते चात्र जन्मनि ॥ १ ॥
शक्त्या तैलप्रदानाच्च ब्राह्मणाय खगाधिप । कण्डूरोगस्य शमनं दानात्तैलघटद्वयात् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकविंशत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३२१ ॥

श्रीसूर्य उवाच ।

काचिच्छुभानना पूर्वभवे चारणवल्लभा । भर्तृत्यक्ताधिविन्ना सा महारोषवती ह्यभूत् ॥ १ ॥
तया महौषधैर्दिव्यैः पुंस्त्वं पत्युर्विनाशितम् । तेन पापप्रभावेण जातोऽत्रायं नपुंसकः ॥ २ ॥
धूर्तः पापरतो दुष्टः सर्वधर्मविवर्जितः । वर्णबाह्योतिदुःखार्तो न शुभं लभते गतिम् ॥ ३ ॥
बहुजन्मस्वसौ पापान्मुक्तः स्याद्विनतात्मज ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वाविंशत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३२२ ॥

श्रीसूर्य उवाच ।

स्वभक्ष्यार्थं महाभाग यो हन्याद्वायुवाहनम् । अत्र जन्मनि खंजः स्यान्नात्र कार्या विचारणा ॥ १ ॥
न तस्य विन्मयं प्रोक्तमत्र जन्मनि चांडज । स्वशरीरविवृद्ध्यर्थं येन भुक्तो मृगः पुरा ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोविंशत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३२३ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे मोहाद्गुडं हरति कस्यचित् । गुल्मोदरेण रोगेण पीड्यते सात्र जन्मनि ॥ १ ॥
गंगायां हि महाभाग गुडधेनुप्रदानतः । तत्र स्नानान्महापुण्यात्तस्माद्रोगाद्विमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्विंशत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३२४ ॥

श्रीसूर्य उवाच ।

कश्चिद्वैश्योऽभवत्पूर्वभवे नेपालदेशके । बहुमित्रसुखैराढ्यो हठी व्यसनसंयुतः ॥ १ ॥
आराधनं तु कृतवान्देव्या वै पूर्वजन्मनि । स्वस्त्रियं च सुरूपां च परित्यज्य शुभाननाम् ॥ २ ॥
अन्यस्त्रियं सोऽप्यगमद्वध्यभिचारपरो दृढः । स तेन कर्मणा युक्तो गतो धर्मपुरं प्रति ॥ ३ ॥
शुभं पापफलं भुक्त्वा स जातोऽत्र महीपतिः । गौरो भव्यो महाज्ञानी महाविभवसंयुतः ॥ ४ ॥
देशेदेशेऽतिविख्यातो घृणी स्वल्पो महायशाः । स्वस्त्रीत्यागान्महापापात्स जातः स्त्रीविवर्जितः ॥ ५ ॥
निष्कृतिं वद मे स्वामिन्स्त्रीप्राप्तेः सौख्यकारिणीम् । पार्वतीप्रतिमां कृत्वा हैमिकीं कार्यकारिणीम्
पलपञ्चमितां लेख्यां गंधैर्माल्यैरलंकृताम् । दद्याद्वेदविधिज्ञाय कुलीनाय तथार्थिने ॥ ७ ॥
प्रजापतिं ततो दद्याद्राजतं त्रिपलात्मकम् । ब्रह्मदैवतमंत्रेण गृह्णीयात्स महाद्विजः ॥ ८ ॥
पश्चादष्टाक्षरं मंत्रं सहस्रं पापशोधनम् । जपेदष्टसहस्रं तु सूर्यमंत्रं महाबलम् ॥ ९ ॥
होमयेत्तद्दशांशेन तद्दशांशेन तर्पयेत् । य एवं कुरुते सूत सर्वपापविनाशनम् ॥ १० ॥

प्रायश्चित्तं परं त्वत्र तस्मान्पापात्प्रमुच्यते । नैवं करोति यो मोहाज्जडधीर्दैवघातितः ॥ ११ ॥
लभते स्त्रीसुखं नात्र रिष्टं षड्वेदकेन्दके । प्रायश्चित्ते कृते सूत जीवनं पञ्चसप्ततिम् ॥ १२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चविंशत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३२५ ॥

श्रीसूर्य उवाच ।

नृपं विना प्राग्यो हन्यान्मृगं हि विनतात्मज । खञ्जः स्यादत्र जनुषि तत्काले मृगघातनात् ॥ १॥
पापनाशकरीं तस्य निष्कृतिं वच्म्यहं सुत । दद्यादश्वं नवं तत्र स्वर्णनिष्कयुतं शुभम् ॥ २ ॥
सहासनं सालंकारं पूजयित्वा विधानतः । विधिज्ञाय महाबाहो नानाशास्त्रविधानतः ॥ ३ ॥
न पश्यति स खंजत्वं दानस्यास्य प्रभावतः ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षड्विंशत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३२६ ॥

श्रीसूर्य उवाच ।

यां नारीं प्राग्भवे सूत परतैलापहारिणी । सात्र जन्मनि पक्षींद्र कण्डूरोगप्रपीडिता ॥ १ ॥
सा मुच्यते वै दानेन घटयोस्तैलपूर्णयोः । यथाशक्ति सुवर्णाढ्यात्तैलदानाद्विशेषतः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तविंशत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३२७ ॥

श्रीसूर्य उवाच ।

राजप्रचारी वै कश्चिच्चारणः पूर्वजन्मनि । भव्यमूर्तिर्दृढो धीरः शिवपूजनतत्परः ॥ १ ॥
राजपत्न्या महाबाहो रतिं चक्रे स मूढधीः । गर्भं दधार राज्ञो वै भाविनोर्थस्य वै बलात् ॥ २ ॥
तत्पापस्य फलं भुक्त्वा यमलोके खगाधिप । शिवपूजनजात्पुण्यात्सोत्र जातो हि पादजः ॥ ३ ॥
षण्ढो हि जाङ्गले देशे सर्वधर्मबहिष्कृतः । शिवपूजारतो यस्मात्प्रागत्र धनभोगभाक् ॥ ४ ॥
स्त्रीपुत्रसुखहीनोऽत्र प्रायश्चित्तं न विद्यते ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाविंशत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३२८ ॥

श्रीसूर्य उवाच ।

गर्भाढ्या याऽवधीत्पूर्वं मृगं हि विनतांडज । स्वगर्भपालने दक्षा जन्मन्यत्र गतिं शृणु ॥ १ ॥
तद्घातकाले खंजा सा भविष्यति शुभानना । गर्भपातेन दुःखार्ताऽवश्यमेव तदेनसा ॥ २ ॥
तत्पापनाशनं सूत शृणु वक्ष्यामि तत्त्वतः । दद्याद्विप्राय तुरगं युवानं भूषणान्वितम् ॥ ३ ॥
स्वर्णनिष्कयुतं चात्र पूर्वपापात्प्रमुच्यते । न पश्यति च गर्भोत्थां पीडामत्र च जन्मनि ॥ ४ ॥
दानप्रभावात्पक्षीन्द्र खंजत्वं नाप्नुयादिह ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनत्रिंशदुत्तरत्रिशताधिकसहस्रतमः ॥ १३२९ ॥

अरुण उवाच ।

क्षात्रे कुले समुत्पन्नो दानदाक्षिण्यतत्परः । मेहादिपीडितो नित्यं कृशाङ्गः पाण्डुद्युतिः ॥ १ ॥
ऊर्ध्ववातादिना पीडा बाल्ये स्याद्ग्रहणीगदः । तस्य भार्या गताचारा भर्तृभक्तियुता सदा ॥ २ ॥
रक्तस्रावादिना पीडा जायते चोदरानिलः । गर्भोऽपि तस्या उदरे पातं कुर्याच्च दृष्टितः ॥ ३ ॥
द्वित्रैश्च पञ्चभिर्मासैश्चतुर्भिः सप्तभिस्तथा । केन कर्मविपाकेन गर्भो न स्थिरतां व्रजेत् ॥ ४ ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु चास्या विचेष्टितम् । व्यभिचारभयाद्वापि तया गर्भश्च पातितः ॥ ५ ॥

अतिकष्टाद्वैनतेय गर्भपातकृतागसः । अपरं च कृतं कर्म व्यभिचारादिकं बहु ॥ ६ ॥
नानाद्रव्यापहरणं कुलटाकर्मतः कृतम् । भर्ता चास्या दुष्टबुद्धिर्दुष्टसङ्गतिदोषतः ॥ ७ ॥
तेन दुष्टेन यद्द्रव्यं हृतं तस्करबुद्धिना । भुक्तं ताभ्यां वैनतेय ब्रह्मस्वं तत्र जन्मनि ॥ ८ ॥
कालेन तद्धनं भुक्त्वा पीडितो दारुणैर्ग्रहैः । यातना बहुधा प्राप्ताः पश्चान्मानुषतां गतः ॥ ९ ॥
किंचित्पुण्यप्रभावेण क्षात्रोऽयं जन्मतो भुवि । जन्म चेदं चतुर्थं वै गर्भपातोऽत्र जायते ॥१० ॥
उभाभ्यां च कृतं कर्म भुज्यते जन्मजन्मनि ॥ ११ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं देव येन पापक्षयो भवेत् । निष्कृतिं ब्रूहि विश्वेश यया गर्भः स्थिरो भवेत्॥१२॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि या नारी नानागर्भाजिघांसिनी । तस्याः शुद्धिं तु निष्कृत्या शृणु त्वं कश्यपात्मज १३
नारी नियमसंयुक्ता ध्रुवं स्याद्व्रतकांक्षिणी । सौम्यायने समापूर्यमाणपक्षे शुभेऽहनि ॥ १४ ॥
तस्य पापस्य शान्त्यर्थं नानाव्रतमुपाचरेत् । पयः स्रवन्तीं शान्तां च सुरभीं शुभलक्षणाम् ॥१५॥
गृहमानीय विधिवत्पूजयेत्सुसमाहितः । इष्टैस्तु यवसैः पानैर्भक्ष्यैः कण्डूयनैरपि ॥ १६ ॥
रुचिरैश्च सुगोस्थानैः सतीं परिचरेत्सदा । रात्रौ पुष्पावलीभिश्च दीपस्रक्चंदनादिभिः ॥ १७ ॥
सुगीतमङ्गलध्यानैस्तदधःशायिनी भुवि । प्राणयात्रां प्रकुर्वीत तस्यास्तु पयसाऽहनि ॥ १८ ॥
तस्यास्तु पञ्चगव्यानि यथान्यायमथाश्नती । एवंव्रतपरा नारी मासमासीत संयता ॥ १९ ॥
तस्या धेनोः सवत्साया इष्टं समभिकांक्षिणी । व्रतान्ते द्विजमाकार्य समस्तगुणशालिनम् ॥ २० ॥
अभ्यर्च्य पूजयेद्भक्त्या वस्त्रस्रग्दामभूषणैः । सम्यगभ्यर्च्य तां धेनुं तनयां तत्स्तनन्धयाम् ॥२१॥
भक्त्या च विधिवत्तस्मै तां दद्यादितिभाषिणी ॥ २२ ॥

मंत्रः ।

"सुवर्णं शुद्धमाग्नेयं माषषोडशसंमितम् । ददानि गां सवत्सां च पूर्वपापापनुत्तये ॥ २३ ॥
यन्मया कुलटावृत्त्या नानागर्भा विनाशिताः । नानाभेदैः प्रयाता मे गर्भा वै बहवो भुवि ॥ २४॥
कर्मणा तेन जनितं गर्भपातादिदूषणम् । एनसस्तस्य नाशाय दानमेतत्करोम्यहम् ॥ २५ ॥
इह जन्मनि वंध्यात्वं नाशमेतु ममानघे । दानेनानेन सुरभे सुप्रीता भव सुव्रते ॥ २६ ॥
"भवेच्च त्वत्प्रसादेन गर्भो मे सुभगासि भोः" ॥ २७ ॥
एवमरित्वति तां धेनुं समादाय सदक्षिणाम् । हिरण्यं रजतं ताम्रं फलानि विविधानि च ॥ २८॥
दापयेद्द्विजमुख्येभ्यो प्रार्थनाभिश्च तोषयेत् । भोजयेच्च शतं विप्रान्नानान्नैः सक्तुपायसैः ॥ २९ ॥
एवं कृतविधेः सूत नार्या दुःखं विनश्यति । वंध्यात्वं मुच्यते सूत पुत्रप्राप्तिर्यशस्विनी ॥ ३० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिंशदुत्तरत्रिशताधिकसहस्रतमः ॥ १३३० ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि यः कश्चित्तुरंगं घातयेन्नरः । वक्रकंठेन रोगेण पीडितोऽत्र प्रजायते ॥ १ ॥
स्वर्णाश्वदानाद्विधिवत्सर्वोपस्करसंयुतात् । वक्रकंठसमुद्भूतां पीडां नाप्नोति मानवः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकत्रिंशदुत्तरत्रिशताधिकसहस्रतमः ॥ १३३१ ॥

श्रीसूर्य उवाच।

शृगालघाती पुरुषः प्राग्जनुष्यत्र जन्मनि। पादहीनो भवेत्सूत भृशं चाकृतनिष्कृतिः॥ १॥
दद्यादश्वं सुवर्णाढ्यं सर्वोपस्करसंयुतम्। ब्राह्मणाय प्रयत्नेन पूर्वपापापनुत्तये॥ २॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वात्रिंशदुत्तरत्रिशताधिकसहस्रतमः॥ १३३२॥

श्रीसूर्य उवाच।

संकरः प्राग्भवे सूत बभूव धनसंयुतः। तीर्थवासी विरक्तश्च लोभाद्धर्मक्रियान्वितः॥ १॥
क्रूरं कर्म कृतं तेन दुष्टसंगेन चांडज। चौर्येण गां परां नीत्वा क्षुधितोऽभक्षयत्पुरा॥ २॥
मृतः स तेन पापेन नानायोनिमुपागतः। स तीर्थमृत्युवशतो गंगातीरेऽत्र पादजः॥ ३॥
तस्यैव हि प्रभावाच्च धनपुत्रसमन्वितः। युवमावेण्डजश्रेष्ठ चक्षुर्हीनो भविष्यति॥ ४॥
प्रायश्चित्तं प्रवक्ष्यामि सुवर्णदशकैर्मिताम्। लिखित्वा गां विधानेन पूजयित्वा विधानतः॥ ५॥
सा देया वेदविदुषे पूर्वपापविशुद्धये। गायत्रीं च जपेत्तत्र नियुतं चायुतद्वयम्॥ ६॥
होमयेच्च यथाशक्ति भोजयेच्च ततो द्विजान्। यः कुर्याद्विधिना सूत स तदोपात्प्रमुच्यते॥ ७॥
स दिव्यचक्षुषा युक्तो जायतेऽत्रैव जन्मनि॥ ८॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयस्त्रिंशदुत्तरत्रिशताधिकसहस्रतमः॥ १३३३॥

श्रीसूर्य उवाच।

या काचिद्घातयेन्नारी शृगालं पूर्वजन्मनि। आहोस्वित्पुरुषस्यापि घातार्थमुपदेशयेत्॥ १॥
अत्र जन्मनि वै चोर्ध्वात्स्थानाच्च पतनात्किल। पादभंगो भवेत्तस्मात्पापाच्चैव खगाधिप॥ २॥
करोति तस्य पापस्य प्रायश्चित्तं यथाविधि। या सा पापात्प्रमुच्येत नचोर्ध्वात्पतनं ध्रुवम्॥ ३॥
अश्वं निष्कसुवर्णाढ्यं दद्यात्पापविशोधनम्॥ ४॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुस्त्रिंशदुत्तरत्रिशताधिकसहस्रतमः॥ १३३४॥

श्रीसूर्य उवाच।

या नारी घातयेदश्वं प्राग्भवे साऽत्र जन्मनि। महापर्वसु गंगादौ पुण्यतीर्थेषु दापयेत्॥ १॥
सर्वोपस्करसंयुक्तं स्वर्णाढ्यं विधिसंयुतम्। सा मुच्यते वक्रकंठपीडाया विनतात्मज॥ २॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचत्रिंशदुत्तरत्रिशताधिकसहस्रतमः॥ १३३५॥

श्रीसूर्य उवाच।

आसीत्क्षात्रो महाभाग पाञ्चाले देशके शुभे। नानाधर्मसमायुक्तो ग्रामे वै विश्रुतो महान्॥ १॥
दुष्कृतं चरितं तेन भाविनोर्थस्य वै बलात्। शूद्रायां च विधृतो गर्भो कामलोभेन निश्चयात्॥२॥
कृतो यत्नो महांस्तत्र नारीगर्भस्य पातने। तया हालाहलं पीतं मृता सा लोकशंकया॥ ३॥
महत्या गर्भपीडाया बालकोऽपि मृतस्तदा। सहायैः पञ्चभिर्युक्ता कृतवत्येतमद्भुतम्॥ ४॥
कर्मणां संग्रहं दुष्टा गर्भपातसमुद्भवम्। ततः संप्राप्तमरणो बाहुजोऽथ सहाययुक्॥ ५॥
सूर्यलोकं तदा गत्वा भुक्त्वा भोगांश्च शाश्वतान्। अशुभान्नरकान्भुक्त्वा स्वकृतान्दृढकर्मजान्॥ ६॥
सोपप्लवे महादानात्पूर्वजन्मनि मानद। स जातो यमुनातीरे बाहुजोप्यत्र जन्मनि॥ ७॥
गौरः कृशाङ्गो लम्बश्च धनसौख्यसमन्वितः। पितृभ्रातृविहीनश्च लोभमोहरतः सदा॥ ८॥
नैकस्त्रीसंयुतः कामी नानाविभवसंयुतः। आयुषा सुखयुक्तश्च बुद्धिमान्देशविश्रुतः॥ ९॥

धर्मादिदं तथा पापाद्भूर्तः पापरतः शठः । सकन्यो हृदि रोगी च मनोदुःखसमन्वितः ॥ १० ॥
शूद्रायां वीर्यदानात्प्राक् तद्वन्ध्याजातपुत्रकः । ऐहिकं लक्षणं तस्य शरीरे चोपजायते ॥ ११ ॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन्सर्वपापापनोदिनीम् । पुत्रवृद्धिकरीं धन्यां लोकानां हितकाम्यया ॥१२॥

श्रीसूर्य उवाच ।

वक्ष्यामि निष्कृतिं तस्य शृणु सूत प्रयत्नतः । पूर्वपापविशुद्ध्यर्थं गर्भधारणनाशिनीम् ॥ १३ ॥
शूद्रायाः प्रतिमा कार्या पलैः पञ्चमितैः शुभा । हिरण्मयी सगर्भा च पत्रे लेख्या विधानतः॥१४॥
तदर्धेनाथ वा कार्या निजवित्तानुमानतः । गन्धपुष्पैरलंकृत्य सा देया पापनाशिनी ॥ १५ ॥
माषपञ्चमितो विष्णुः सर्वपापप्रणाशनः । प्रजापतिं तथा दद्यात्सौवर्णं पञ्चमाषकम् ॥ १६ ॥
राजानं च तथा दद्यात्सोमं सार्द्धपलात्मकम् । गायत्रीदशसाहस्रं जपेच्च विधिपूर्वकम् ॥ १७ ॥
होमयेत्तंडुलैः साज्यैः सर्षपैः सतिलैस्तथा । ब्राह्मणान्भोजयेत्पश्चात्पूर्वपापात्प्रमुच्यते ॥ १८ ॥
एवं कृतविधेः सूत सर्वपापविनाशनम् । पुत्रपौत्रविवृद्धिः स्यादिह जन्मनि निश्चयात् ॥ १९ ॥
अकृतं तु यथाशक्ति प्रायश्चित्तं यथोदितम् । रिष्टं षष्टिमिते वर्षे दारुणं शत्रुवैकृतम् ॥ २० ॥
प्रायश्चित्ते कृते सूत जीवनं पञ्चसप्ततिम् । जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् ॥ २१ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्त्रिंशदुत्तरत्रिशताधिकसहस्रतमः ॥ १३३६ ॥

श्रीसूर्य उवाच ।

शूद्रोऽभवन्महाभाग प्राग्जन्मन्यत्र कोविदः । ग्रामवासी सदा सौम्यः शतद्रुनिकटेण्डज ॥ १ ॥
शूद्रकन्या च तेनैव हृद्या षोडशवार्षिकी । भुक्तातिकामलोभेन बलात्कारेण दूषिता ॥ २ ॥
स चाथ धर्मपुत्रस्य भुक्त्वा भैरवशासनम् । पूजनाच्छिवलिंगानां प्रागत्रापि च संकरः ॥ ३ ॥
षंढस्तेन विपाकेन प्राप्तसर्वमनोरथः । राजप्रचारको धीमान्गजाश्वप्रतिपालकः ॥ ४ ॥
महाधनो महोत्साहो महाविभवविस्तरः । मृत्युश्चास्यात्र गंगायां पुण्याच्च शिवपूजनात् ॥ ५ ॥
भविष्यति महाभाग पापान्ते चात्र सद्गतिः ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्रिंशदुत्तरत्रिशताधिकसहस्रतमः ॥ १३३७ ॥

श्रीसूर्य उवाच ।

पादरोगयुतः सूत जायते सोऽत्र जन्मनि । यो मार्गहा पुरा लोके परलुंठनतत्परः ॥ १ ॥
सोऽश्वदानविधानेन ब्राह्मणाय खगाधिप । न पश्यति महापीडां पतत्रिन् पादसंभवाम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टत्रिंशदुत्तरत्रिशताधिकसहस्रतमः ॥ १३३८ ॥

श्रीसूर्य उवाच ।

यो घातयेदजं जानन्प्राग्भवे विनतासुत । भक्ष्यार्थं सोऽत्र जनुषि पुरुषांगाधिको भवेत् ॥ १ ॥
न तस्य निष्कृतिर्दुष्टपापस्यात्र च काश्यपे । प्रारब्धस्य क्षयो नाऽत्र प्रायश्चित्तात्सहस्रशः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनचत्वारिंशदुत्तरत्रिशताधिकसहस्रतमः ॥ १३३९ ॥

श्रीसूर्य उवाच ।

भगवन्प्राग्भवे विप्रो ग्रामवासी वनाश्रितः । चोराधिपो महोग्रश्च तत्संसर्गी खगाधिप ॥ १ ॥
दत्तानि तेन ग्रहणे दानानि विनतासुत । गोभूम्यश्वादिकानीह ब्राह्मणेभ्योऽतिशक्तितः ॥ २ ॥

स भुक्त्वा नरकान्घोरान्पापात्पुण्याच्च शाश्वतात् । स्वर्गान्पर्वतभागेषु संजातो बाहुजोऽधुना ॥ ३ ॥
वामनो राजसम्मानी महोग्रो मंत्रपारगः । पुत्रहीनो ह्यसौ सूत परवित्तस्य लुंठनात् ॥ ४ ॥
भवन्त्यत्र च ये पुत्रा म्रियन्ते नात्र संशयः । प्रायश्चित्तं प्रवक्ष्यामि येन पापं प्रशाम्यति ॥ ५ ॥
कृत्वा वेदघटान्सूत सौवर्णान्घृतपूरितान् । तद्भावे राजतांश्च विप्रेभ्यः प्रतिपादयेत् ॥ ६ ॥
हरिवंशं विधानेन शृणुयाद्भक्तितोंडज । रौद्रव्रतं चरन्पश्चात्पूर्वपापविशुद्धये ॥ ७ ॥
नैतत्प्रकुर्याद्यो भक्त्या स नरः पुत्रवर्जितः । जायतेऽत्रैव पक्षीन्द्र कुर्यात्पुत्रविवर्द्धनम् ॥ ८ ॥
आयुरष्टौ तथाशीतिवर्षाणि कृतनिष्कृतेः ॥ ९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चत्वारिंशदुत्तरत्रिशताधिकसहस्रतमः ॥ १३४० ॥

अरुण उवाच ।

क्षात्रवंशे समुत्पन्नो वातदेहरुजाकरः । गुल्माद्या ह्युदरे व्याधिः शिरोर्तिर्जायते तदा ॥ १ ॥
व्यापारो निष्फलस्तस्य किंचित्सेवादिना भवेत् । तस्य भार्याद्वयं चास्ति किंचिद्भक्तिपरायणम् ॥
अन्योन्यद्वेष्यभावाच्च किंचिद्भक्तिकरी परा । मृतवत्सा कथं जाता सत्यं कथय भास्कर ॥ ३ ॥
गर्भस्तस्याः स्थिरीभूतो न प्रसूतिर्न पातनम् । केन पापप्रभावेण कथयस्व दिवाकर ॥ ४ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि शूद्रस्तु क्रयविक्रयकारकः । दानधर्मपरो नित्यं देवदेवपरायणः ॥ ५ ॥
अन्योन्यद्वेषभावाच्च वर्तते च विधिस्ततः । कश्चिद्विप्रो धर्मपरो वेदशास्त्रार्थसाधकः ॥ ६ ॥
कदाचिद्दैवयोगाच्च भाविनोर्थस्य वै बलात् । तद्वित्तं ग्राहयामास शूद्रो म्लेच्छजनस्य च ॥ ७ ॥
बंधनाय मतिं चक्रे ब्राह्मणं भार्यया सह । भर्त्सनैस्तर्जनाद्यैस्तु तद्धनं च तदा दिनैः ॥ ८ ॥
कतिपयैश्च शूद्रेण चान्येभ्यो विनतासुत । म्लेच्छभीत्या स वै साधुर्ब्राह्मणः क्षोभसंकुलः ॥ ९ ॥
तदर्थमपि प्राप्तश्च ह्यात्मघातं चकार ह । गर्भयुक्ता च भार्या वै भर्तारं पृष्ठतोऽन्वगात् ॥ १० ॥
हृतं तस्यापि तत्सर्वं म्लेच्छराजेन तत्तदा । तावत्काले गते कश्चिच्छूद्रो म्लेच्छेन घातितः ॥ ११ ॥
ततो वै निरये वत्स वर्षायुतसहस्रकम् । पच्यते नरके घोरे शूद्रो देहेन वै तदा ॥ १२ ॥
पश्चान्मानुष्यमापन्नो दानधर्मप्रभावतः । जन्म चेदं तृतीयं वै शूद्रवंशसमुद्भवम् ॥ १३ ॥
तेनैव कर्मणा तस्य ह्यपत्यं नैव जायते ॥ १४ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं स्वामिन्येन पापक्षयो भवेत् । निष्कृतिं सकलां ब्रूहि नारीणां हितकाम्यया ॥ १५ ॥

श्रीसूर्य उवाच ।

तीर्थे संवत्सरं सेवा ह्येकचित्तेन दम्पती ॥ १६ ॥
श्रवणं हरिवंशस्य विप्रस्योद्वाहनं तथा । तावन्निष्कृतयो भूयः क्रमेणानेन यास्तदा ॥ १७ ॥
सुशुभे भूप्रदेशे तु गोमयाद्युपचर्चिते । कुर्यादष्टदलं पद्मं चित्रवर्णं सुशोभनम् ॥ १८ ॥
तन्मध्ये रुक्मिणीयुक्तं माधवं कलशेर्चयेत् । सौवर्णं राजतं पद्मं सायुधं सचतुर्भुजम् ॥ १९ ॥
उपचारैः शुभैर्गंधैर्धूपैश्च कुसुमादिभिः । जनन्या सहितान्भूयः प्रद्युम्नाद्यांस्तथार्चयेत् ॥ २० ॥
चारुदेहं चारुबाहुं चारुगुप्तं सुशोभनम् । श्रीवत्सांकं पीतवासं सुचारूं पूजयेत्क्रमात् ॥ २१ ॥
पूजनं विष्णुसूक्तेन तथा श्रीरसकोविदैः । पुष्पैः सुगंधिधूपैश्च ह्यर्चयेद्विष्णुमव्ययम् ॥ २२ ॥
तद्विप्रासोऽथ तद्विष्णोर्विष्णोः क्रमत इत्यसौ । इत्यादिमन्त्रैर्जुहुयाच्छतमष्टोत्तरं हविः ॥ २३ ॥
होमान्ते विप्रपूजान्ते मंत्रमेतमुदीरयेत् ॥ २४ ॥

मंत्रः ।

"यन्मया पापभावेन कृतं कर्म दुरात्मना । म्लेच्छराज्ये च व्यापारे मया वै दुष्कृतं कृतम् २५॥
ब्राह्मणानां हृतं द्रव्यं भीत्या ताडनतर्जनैः । द्रव्यापहरणात्प्राप्तं दुःखं नानाभवान्तरे ॥ २६ ॥
स्थिरगर्भमृतापत्यवालघातादि दुःसहम् । तत्तदेनोविनाशाय दानं संप्रददे त्वहम् " ॥ २७ ॥
स्वस्त्यस्त्विति च तत्रोक्ता कोदादिति विसर्जनम् । सर्पिष्यात्मानमालोक्य भोजयेद्दिष्टबंधुभिः २८
ऐहिकं लक्षणं तस्य शरीरे चोपजायते । हृद्दुःखं दीर्घनिःश्वासो लोचने साश्रुकर्शिते ॥ २९ ॥
काष्ठलोष्टादि शस्त्राद्यैर्घातः स्यादुपलेखनात् । जलाकुलत्वं स्पर्शोग्नेस्तादृशो व्रणसंभवः ॥ ३० ॥
नार्यङ्गे विकृतव्याधी मुखे तिलव्रणादिकम् । पितृजामातुलान्यादेर्विधवार्तिः प्रजायते ॥ ३१ ॥
स्वकुले प्रेतजा पीडा दुःखं वैकल्यजं तथा । कर्मानुसारजो व्याधिश्चित्रं तस्य सहायवत् ॥३२॥
स्वकुले केऽपि वर्तन्ते पतिताचारचारिणः । एवं तु लक्षणैर्व्याप्तैः प्रायश्चित्तं ततो वदेत् ॥ ३३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकचत्वारिंशदुत्तरत्रिशताधिकसहस्रतमः ॥ १३४१ ॥

श्रीसूर्य उवाच ।

पूर्वं ह्याभीरजा काचिदभूद्भर्तृपरायणा । महद्धिर्गोधनैर्युक्ता गवां पालनतत्परा ॥ १ ॥
गावस्तृषार्ताः सततं प्रपायां प्रेरितास्तया । निदाघकाले संप्राप्ते बहिर्ग्रामाज्जलाश्रये ॥ २ ॥
नैः पानं प्रकुर्वद्भिर्यो जलं शीतलमुत्तमम् । ताडितास्ता भृशं गावो लकुटेन दृढेन वै ॥ ३ ॥
तत्रैका तृषिता गौस्तु ताडिताऽपि भृशं तया । न च त्यक्तं जलं सूत गर्भाधानान्विता यतः॥४॥
तस्मिन्काले च तस्यास्तु पतितो गर्भसंस्थितः । वत्सस्तत्ताडनात्सूत मृतश्चापि हि तत्क्षणात्५॥
विचेष्टितामिदं यस्याः सैषा वेश्याङ्गनाऽधुना । नानाविभूतिसंयुक्ता नानापशुभिरन्विता ॥ ६ ॥
सुखभोगधनैर्वान्यैर्वाञ्छितार्थान्विता सुत । प्राग्गोसेवनजात्पुण्यात्सर्वं पुण्यफलं त्विदम् ॥ ७ ॥
अथात्र गर्भपूर्णत्वे युवभावे खगाधिप । न मोचयति सा गर्भं तद्दुःखेनाकुला भृशम् ॥ ८ ॥
एवं वर्षत्रयादन्ते मोचयिष्यति वै सुत । रिष्टमब्दत्रये सूत वालवत्सवधादिह ॥ ९ ॥

अरुण उवाच ।

प्रायश्चित्तं वद स्वामिन्येन पापक्षयो भवेत् । उपकाराय लोकानां यतस्त्वं सर्वदृश्यभाक् ॥ १० ॥

श्रीसूर्य उवाच ।

दद्याद्गां कपिलामेकां स्वर्णशृंगादिकान्विताम् । विप्राय वेदविदुषे तद्दोषशमनाय च ॥ ११ ॥
द्विसुवर्णमितां तद्वल्लक्ष्यां गां गर्भसंयुताम् । दद्याद्वेदविधिज्ञाय पूर्वपापात्प्रमुच्यते ॥ १२ ॥
भोजयेत्तु यथाशक्ति विप्रान्वै होमयेत्तिलान् । मुच्यते गर्भजाद्दोषान्नात्र कार्या विचारणा ॥ १३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विचत्वारिंशदुत्तरत्रिशताधिकसहस्रतमः ॥ १३४२ ॥

श्रीसूर्य उवाच ।

बभूव पार्श्ववः कश्चिद्गुर्जरे विनतासुत । धर्मकर्मसमायुक्तो देवतातिथिपूजकः ॥ १ ॥
पितृभक्तिरतो नित्यं दानानि विधिपूर्वकम् । दत्तानि तेन शिष्टेभ्यो ब्राह्मणेभ्योऽतिशक्तितः ॥२ ॥
दैवाच्छत्रुगृहं गत्वा कृतं कर्म रुषा तु वै । वैरिपुत्रैः पुरा सूत पादभागेषु घातितः ॥ ३ ॥
कुन्तायुधेन तीक्ष्णेन दिवा वै शौर्यकर्मणा । स मृतस्तेन दुःखेन तन्माता ह्येकपुत्रिणी ॥ ४ ॥
पुत्रदुःखान्मृता सापि ददौ शापं हि दारुणम् । यथा पुत्रविहीनाहं गच्छामि च यमालयम् ॥ ५॥

तथैव पुत्रशोकार्तो जन्मजन्मनि यास्यति । ततो बहुतिथे काले गतोऽसौ यमशासनम् ॥ ६ ॥
धर्मात्स्वर्गफलं भुक्त्वा पापाच्च नरकं तथा । पूर्वपुण्यप्रभावेण स जातो मुखजोऽधुना ॥ ७ ॥
विपाशानिकटे देशे वृषलग्नेऽब्जसंयुते । श्यामाङ्गो धूसरः क्षीणः प्रभुर्देशाटने रतः ॥ ८ ॥
बहुस्त्रीधनसंयुक्तो मित्रप्रियसमन्वितः । मानभोगसुखैश्वर्यो मितदो लोभसंयुतः ॥ ९ ॥
धर्मादिदं फलं सूत भृशं पापफलं शृणु । क्रूरचेष्टो महालोभी सदा मात्सर्यसंयुतः ॥ १० ॥
जातपुत्रविहीनोऽसौ चिह्नं जन्मनि जायते । प्रायश्चित्तं प्रवक्ष्यामि सर्वपापविशोधनम् ॥ ११ ॥
लोकानामुपकाराय शृणु सूत प्रयत्नतः । पलैर्दशमितैः कुर्याद्राजतं बाहुजं सुत ॥ १२ ॥
तन्मातरं च सौवर्णीं पलैकेन मितां शुभाम् । पत्रे लेख्यां यथाकारां यथोपस्करसंयुताम् ॥ १३ ॥
पूजयित्वा तु गन्धाद्यैर्नैवेद्यैः सूपचारकैः । सूर्यभक्ताय शांताय तां दद्याद्धि कुटुम्बिने ॥ १४ ॥
पलपञ्चमितं रौक्मं कुर्याद्धरिहरात्मकम् । तथैव गणनाथं च लेख्यं पञ्चोपचारकैः ॥ १५ ॥
संपूज्य विधिवद्दद्यात्सर्वपापविशुद्धये । अष्टाक्षरं तथा मन्त्रं वैदिकं सूर्यदैवतम् ॥ १६ ॥
जपेदष्टसहस्रं तु तथा प्रणवपूर्वकम् । गायत्रीपञ्चसाहस्रं दुष्टपापविमोचनम् ॥ १७ ॥
कुर्याद्धोमं दशांशेन पश्चाद्ब्राह्मणभोजनम् । एवं कुर्याद्विधानेन प्रायश्चित्तं यथाविधि ॥ १८ ॥
न प्राप्नोति तदा रिष्टं पट्त्रिंशाब्दे प्रकीर्तितम् । पञ्चवेदमिताब्दांतमायुस्तस्य प्रकीर्तितम् ॥ १९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिचत्वारिंशदुत्तरत्रिशताधिकसहस्रतमः ॥ १३४३ ॥

श्रीसूर्य उवाच ।

अज्ञानादवधीद्यश्च पूर्वजन्मन्यजासुतम् । भविष्यत्यत्र पुरुषो ह्यधिकाङ्गो ह्यकिंचनः ॥ १ ॥
कस्तूरिकापलं दद्यात्स तत्पापविनाशनम् । अजमेकं च वस्त्राद्यैर्मुच्यते च तदेनसः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुश्चत्वारिंशदुत्तरत्रिशताधिकसहस्रतमः ॥ १३४४ ॥

श्रीसूर्य उवाच ।

लोहहारी च पुरुष इह जन्मनि काश्यपे । वर्बरांगाख्यरोगेण पीड्यते नास्ति संशयः ॥ १ ॥
दद्यात्पलशतं लोहं विधिना पापशोधनम् । प्राजापत्यं चरेदेकं ततो वानशनं परम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायःपञ्चचत्वारिंशदुत्तरत्रिशताधिकसहस्रमः ॥ १३४५ ॥

श्रीसूर्य उवाच ।

सर्वैमनोरथैर्युक्ता काचिदासीच्छुभानना । प्राग्भवेंऽज तत्सर्वं चेष्टितं शृणु सांप्रतम् ॥ १ ॥
नकुलानां बिले कृत्वा चातितप्तां हि वालुकाम् । पूरितं च तथा सर्वं तद्धातार्थं खगाधिप ॥ २ ॥
मृतः स तेन दाहेन नकुलः सकुलः खग । सापि मृत्युवशं प्राप्ता भुक्त्वा तु यमशासनम् ॥ ३ ॥
पूर्वं शातद्रुजे देशे ह्यभूदत्र च पर्वते । पूर्वं राजकुले जाताऽत्रापि राजकुले सुत ॥ ४ ॥
प्राग्दानव्रतजात्पुण्यादथो पापफलं शृणु । सर्वे तद्वंशजाः सूत तदग्रे मरणं गताः ॥ ५ ॥
जीवनं चात्र तस्याश्च वर्षमष्टोत्तरं शतम् । न मुच्यते महापापाद्दृढाज्जन्मत्रयेऽपि वा ॥ ६ ॥
कुरुक्षेत्रादिवासाच्च पापं नश्यति धर्मतः ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्चत्वारिंशदुत्तरत्रिशताधिकसहस्रतमः ॥ १३४६ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे पुत्र घातयेदजनन्दनम् । सगर्भा गर्भपुष्ट्यर्थं जायते गोधिका तु सा ॥ १ ॥
भोगादेव क्षयः प्रोक्तः समारब्धस्य कर्मणः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तचत्वारिंशदुत्तरत्रिशताधिकसहस्रतमः ॥ १३४७ ॥

श्रीसूर्य उवाच ।

लोहं हरति यान्यत्र नारी बुद्धिविवर्जिता । अग्रजन्मनि सा नारी वर्बरांगान्विता भवेत् ॥ १ ॥
दद्यात् पलशतं लोहं समुद्दिश्य द्विजातये । मुच्यते पापजाद्रोगाद्बर्बरांगाभिधात् सुत ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽष्टचत्वारिंशदुत्तरत्रिशताधिकसहस्रतमः ॥ १३४८ ॥

श्रीसूर्य उवाच ।

मोहात्प्राग्याऽवधीत्सूत नार्यजं विधिवर्जिता । सा गोधिकाग्रजनुषि भविष्यति तदेनसः ॥ १ ॥
अजं दद्याद्विधानेन कस्तूरीपलसंयुतम् । सवस्त्रं वेदविदुषे तदोपशमनं त्विह ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनपंचाशदुत्तरत्रिशताधिकसहस्रतमः ॥ १३४९ ॥

अरुण उवाच ।

क्षात्रे कुले समुत्पन्नो गुल्मवातोदरामयः । वित्तथा कृपणश्चैव सहोदरसमन्वितः ॥ १ ॥
धनधान्ययुतश्चैव किञ्चिद्व्यापारवान्भुवि । दायादाच्छत्रुवत्पीडा मिथः क्लेशश्च जायते ॥ २ ॥
तस्य भार्याद्वयं चापि संजातं चात्र जन्मनि । बहुपुत्र्य प्रसूताश्च न तु पुत्रः प्रजायते ॥ ३ ॥
कदाचिज्जातमात्रस्तु मृतः पुत्रोऽग्निमासकः । एका पुष्पवती भार्या संजाता तस्य भास्कर ॥ ४ ॥
केन कर्मविपाकेन सत्यं कथय तत्प्रभो ॥ ५ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि क्षात्रस्तु किंचिद्भूमिपतिस्तथा ॥ ६ ॥
अर्थलुब्धः स संजातो ग्रामाधीशः प्रतापवान् । ग्राममध्ये स्थितिं चक्रे ब्राह्मणो ज्ञानिसत्तमः॥७॥
पुत्र्यः पंच तथा सप्त ह्यपुत्रो वित्तसंयुतः । कालेन मृत्युमापन्नो धनलुब्धो निराश्रयः ॥ ८ ॥
तस्य भार्या महासाध्वी साहसं कृतवत्यथ । क्रियाकर्मादिकं तस्य चक्रे वै शक्तितः खग ॥ ९ ॥
क्षात्रेण हि हृत्तं सर्वमपुत्रस्य धनं बहु । निराधाराः सुता जाताः पित्रभावात्तु दुःखिताः ॥ १० ॥
सर्वस्वहरणाद्वापि गताः कन्या इतस्ततः । काचिन्मातुर्गता पक्षे काचिन्मात्रा सह स्थिताः॥११॥
प्रादुर्भावः क्षत्रगृहे संजातस्तस्य कर्मणः । यो वै क्षात्रगृहे पुत्रः सोऽजनि ब्राह्मणः स्वयम् ॥१२॥
योऽसौ तस्य मृतः पुत्रो धनलोभेन चागतः । एवं पुत्र ऋणी भूतस्तत्काले चर्णहृत्स्वयम्॥१३॥
एवं ब्रह्मस्वकं प्राप्तं पुत्रास्तस्य मृताः सदा । पुराकृतानि कर्माणि भुज्यन्ते चेह मानवैः ॥ १४ ॥
तेन कर्मविपाकेन कन्यापत्यं मृताः सुताः । तस्य पापस्य नाशाय निष्कृतिः क्रियते शुभा॥१५॥

अरुण उवाच ।

का तस्य निष्कृतिः स्वामिन्येन पापक्षयो भवेत्। सतातिं लभते सौख्यं लोकानां हितकाम्यया१६

श्रीसूर्य उवाच ।

शुभे त्ववसरे प्राप्ते ह्ययने शुभवासरे । प्रारभेद्वरिभक्तश्च संवत्सरविधिः स्मृतः ॥ १७ ॥
प्रत्यहं परमेशानं विष्णुमव्यक्तमव्ययम् । पौरुषेणेह सूक्तेन ह्यर्चयेन्मासमात्रकम् ॥ १८ ॥

कुंकुमागरुकर्पूरैश्चन्दनैस्तुलसीदलैः । अर्चयेद्विविधैः पुष्पैरुपचारैः पृथक्पृथक् ॥ १९ ॥
भौमाप्यनाभसस्तेजोवायव्यैः पञ्चभिस्तथा । एवं व्रतपरा नारी भर्तृभक्तिपरायणा ॥ २० ॥
अर्चयन्ती हरिं पूर्णं वर्षावधि तथा चरेत् । शुभे मासे सिते पक्षे चैकादश्यामुपोषिता ॥ २१ ॥
शुभनक्षत्रयुक्तायां द्वादश्यां पुत्रकाम्यया । पूर्ववद्धरिमभ्यर्च्य ऋग्भिः षोडशभिः शुभम् ॥ २२ ॥
विधिवद्वह्निमास्थाय ह्यर्चयेद्धैकृतं चरुम् । आज्यभागावसानेच कपिलाज्याहुतिर्हविः ॥ २३ ॥
पौरुषेण तु सूक्तेन यावत्षोडशसंख्यया । अश्वत्थसमिधस्तिस्रो जुहुयात्षोडशैव तु ॥ २४ ॥
पुनराज्यं ततो हुत्वा जुहुयाच्च चरुं तथा । होमान्ते द्विजभोज्यान्ते दानमेतत्समाचरेत् ॥ २५ ॥
हिरण्यभूमिवासांसि धेनुं वत्ससमन्विताम् । विप्रस्योद्वाहनं कृत्वा कन्यां चालंकृतामपि ॥ २६ ॥
दक्षिणां प्रददेच्चैवच्छलकौटिल्यवर्जिताम् । प्राश्नीयात्तु हविःशेषं सह पत्न्या हरिं स्मरन् ॥ २७ ॥
इति कृत्वा विधिं नारी पुत्रं प्राप्नोति वैष्णवम् । सुभगा च सुरूपा च भवेद्विगतकिल्बिषा ॥ २८ ॥
ऐहिकं लक्षणं चिन्त्यं पूर्वकर्मानुसारतः । गुल्मार्शसां तथा बाधा गुदे तप्तव्रणार्त्तयः ॥ २९ ॥
वातरक्तादि शिरसि नेत्रकर्णादिषु व्रणः । स्तनीयगौरवं दृष्टुस्तथा वै पादवैकृतिः ॥ ३० ॥
जनश्रुतिरभूत्तत्र दुष्कृतौ कारणं विना । हानिस्तु सर्ववस्तूनां द्रव्यनाशनजं भयम् ॥ ३१ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चाशदुत्तरत्रिशताधिकसहस्रतमः ॥ १३९० ॥

श्रीसूर्य उवाच ।

अथ शूद्रकुले पूर्वमासीत्पुण्या वरांगना । तदा दानरता जाता कुरुक्षेत्रे खगाधिप ॥ १ ॥
सर्वैः सुखैः सदोपेता सर्वसंपत्तिसंयुता । तया कृतं महापापं भाविनोर्थस्य वै बलात् ॥ २ ॥
समीपंवासिना चास्या ब्राह्मणेन च तद्गृहम् । निर्दग्धं चाग्निदाहेन वैरिभावात्खगाधिप ॥ ३ ॥
तत्र दग्धा महाभाग गौरपापा गृहंगता । कृत्वैवमद्भुतं कर्म भुक्त्वा तु नरकान्मुत ॥ ४ ॥
दानधर्मकृतात्पुण्यात्सात्र जाता हि वाहुजा । माथुरे मण्डले पुण्ये वृषलग्नोपलक्षिते ॥ ५ ॥
सुखदुःखसमाक्रान्ता जातसन्ततिनाशकृत् । दुःखैरनेकैर्युक्तात्र मध्यभागे खगाधिप ॥ ६ ॥
प्रायश्चित्तं परं चास्या गयायां पितृतर्पणम् । कुरुक्षेत्राधिवासश्च पापनाशनमुत्तमम् ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकपंचाशदुत्तरत्रिशताधिकसहस्रतमः ॥ १३९१ ॥

श्रीसूर्य उवाच ।

चक्रपादरुजा युक्तश्चात्र जन्मनि जायते । पूर्वजन्मनि यो मोहाद्वधेच्छ्वानं खगाधिप ॥ १ ॥
निष्कत्रयं प्रदातव्यं सुवर्णं वेदवेदिने । दानेनानेन विधिना पूर्वपापापनोदनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विपंचाशदुत्तरत्रिशताधिकसहस्रतमः ॥ १३९२ ॥

श्रीसूर्य उवाच ।

यः शूद्रं घातयेन्मोहात्पूर्वजन्मनि मानवः । दंतपातनजाद्रोगात्पीडामाप्नोति निश्चयात् ॥ १ ॥
दद्याद्धेनुं सवत्सां च सर्वालंकारभूषिताम् । प्राजापत्यं चरेदेकं विधिना रोगनाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिपंचाशदुत्तरत्रिशताधिकसहस्रतमः ॥ १३९३ ॥

श्रीसूर्य उवाच ।

या नारी मोहतो हन्याच्छ्वानं हि गरुडाग्रज । पूर्वजन्मनि सा चात्र चक्रपादेन पीड्यते ॥ १ ॥

तया तत्पापशुद्ध्यर्थं स्वर्णं निष्कत्रयं सुत । देयं विप्राय विधिना चक्रपादप्रणाशनम् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःपंचाशदुत्तरत्रिशताधिकसहस्रतमः ॥ १३९४ ॥

श्रीसूर्य उवाच ।

शूद्रघातकरी पूर्वे या काचित्पापमोहिता । साऽत्र जन्मनि दुःखार्ता दंतपातरुजांडज ॥ १ ॥
विधिवद्धेनुदानाच्च ब्राह्मणाय कुटुंबिने । प्राजापत्यव्रतादेकात्तस्मात्पापात्प्रमुच्यते ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायःपंचपंचाशदुत्तरत्रिशताधिकसहस्रतमः ॥ १३९५ ॥

श्रीसूर्य उवाच ।

कश्चिदासीत्पुरा सूत चारणो ज्ञानदुर्बलः । शिवभक्तिपरो नित्यं देवतातिथिपूजकः ॥ १ ॥
देशे मालवके पुण्ये स्थले पूर्वभवेंडज । तेन दानानि दत्तानि विप्रेभ्यो भास्करग्रहे ॥ २ ॥
कदाचित्तु महाभाग पापमाचरितं त्विदम् । स्वज्ञात्यां वै धृतो गर्भः कामलोभेन निश्चयात् ॥३॥
यत्ने कृतेऽपि तत्रैव नाभूद्गर्भस्य पातनम् । मृता सा तेन दुःखेन गर्भपातेन चांडज ॥ ४ ॥
एवं वहुतिथे काले गतः स यमशासनम् । भुक्त्वा पापफलं दुःखं पुण्याल्लोकाञ्छुभानिह ॥ ५ ॥
पूर्वपुण्यप्रभावेण स जातः पादजस्त्विह । गोदावर्याः समीपे तु देशे रम्ये जलाश्रये ॥ ६ ॥
रक्तः कृष्णोतिमतिमान्दीर्घो भव्यः पृथुः सुधीः ।आदिभागे धनी भोगी मध्यमेंत्येऽतिसौख्यभाक्७
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । अतिचिंतायुतश्चात्र दाने स्वल्पमतिः शठः ॥ ८ ॥
स्वजात्यां वीर्यदानाच्च जातपुत्रविनाशकः । लक्ष्मैतदंडजश्रेष्ठ जन्माङ्गात्पष्ठभावगः ॥ ९ ॥
भौमः सुतेश्वरः पापग्रहैर्युतनिरीक्षितः । लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥ १० ॥
पलद्वयमिता कार्या बाहुजा गर्भसंयुता । सर्वावयवसंयुक्ता सौवर्णी भूषणान्विता ॥ ११ ॥
तदर्धमितिका वापि निजवित्तानुसारतः । संपूज्य वेदविदुषे दद्याद्दोषापनुत्तये ॥ १२ ॥
मासैः सप्तमितैर्देयो भौमः स्वर्णमयः शुभः । गायत्रीमयुतं जप्त्वा त्र्यंबकं तु सहस्रकम् ॥ १३ ॥
होमयेत्तद्दशांशेन कपिलां गां प्रदापयेत् । य एवं कुरुते सूत प्रायश्चित्तं हि मानवः ॥ १४ ॥
तस्य पुत्रविवृद्धिः स्याज्जन्मन्यत्रैव काश्यपे । नैवं करोति यो मोहाल्लोभात्पापविशोधनम् ॥१५॥
न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः । आयुरष्टाद्विवर्षाणि प्रायश्चित्ते कृते त्विह ॥ १६ ॥
प्रायश्चित्तेऽकृते रिष्टं पंचाशन्मितकेब्दके ॥ १७ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्पंचाशदुत्तरत्रिशताधिकसहस्रतमः ॥ १३९६ ॥

श्रीसूर्य उवाच ।

यश्च वभ्रुं महाभाग हन्यान्मोहान्नराधमः । वभ्रुमण्डलरोगार्तः सोऽत्र जन्मनि जायते ॥ १ ॥
निष्कद्वयहिरण्यस्य कृत्वात्र नकुलं शुभम् । वभ्रुमण्डलनाशार्थं ब्राह्मणाय प्रदापयेत् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तपञ्चाशदुत्तरत्रिशताधिकसहस्रतमः ॥ १३९७ ॥

श्रीसूर्य उवाच ।

काचिच्चारणजा नारी वभूव प्रियवादिनी । व्रतदानरता साध्वी पूर्वजन्मनि चांडज ॥ १ ॥
तया ग्रामान्तरे गत्वा निर्दग्धं गह्वरं वनम् । निर्दग्धा वहवस्तत्र जीवास्तस्याश्रयं गताः ॥ २ ॥
ततो वहुतिथे काले प्राप्य जन्मनि तं व्रतम् । तत्र दानवशात्पूर्वादत्र सा पादजा स्मृता ॥ ३ ॥
जीवघातात्तथा पूर्वात्पापादत्रैव जन्मनि । जातसंततिहीना वै कुष्ठरोगेण पीडिता ॥ ४ ॥

प्रायश्चित्तं प्रवक्ष्यामि येन संपद्यते सुखम् । गृहवित्तपडंशेन देया जीवाः सुवर्णजाः ॥ ५ ॥
घटयित्वा विधानेन नानारूपान्गृहोरगान् । भोजयित्वा द्विजाञ्छक्त्या तस्मात्पापात्प्रमुच्यते॥६॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोष्टपञ्चाशदुत्तरत्रिशताधिकसहस्रतमः ॥ १३५८ ॥

श्रीसूर्य उवाच ।

शशघाती महाभाग! कुब्जवर्णः प्रजायते । निष्कृतिं तस्य पापस्य शृणु चात्र खगाधिप ॥ १ ॥
शक्त्या सोपस्करान्दद्याद्वेदवेदांगपारगे । तस्माद्दोषात्प्रमुच्येत नात्र कार्या विचारणा ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनषष्ट्युत्तरत्रिशताधिकसहस्रतमः ॥ १३५९ ॥

श्रीसूर्य उवाच ।

काश्चिच्छूद्रोऽभवत्पूर्वं दानधर्मदयापरः । द्विजानां पूजको दक्षः सिन्धुमण्डलजोण्डज ॥ १ ॥
देवद्रव्यविहीनोऽभूत्तत्कृतं कर्म चाधमम् । स्वपत्नी स्थापिता पण्यशालायां हि खगाधिप ॥ २॥
पण्यस्त्रीकर्मतश्चासौ चकार स्वोपजीवनम् । ततो मृत्युवशं प्राप्तो भुक्त्वा तत्पापजं फलम् ॥ ३ ॥
प्राग्दानवशतः सोऽथ जन्मन्यत्र च पर्वते । शूद्राधमोऽथ वै षण्ढः पूर्वपापादतः शृणु ॥ ४ ॥
निष्कृतिस्तस्य पापस्य नोक्ता पापाद्दृढात्सुत ॥ ५ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः षष्ट्युत्तरत्रिशताधिकसहस्रतमः ॥ १३६० ॥

श्रीसूर्य उवाच ।

या नारी नकुलं पूर्वं घातयेद्विनतासुत । सात्र जन्मनि रोगेण वभ्रुमंडलजेन च ॥ १ ॥
पापोद्भवेन सततं पीडिता भवति ध्रुवम् । तद्रोगनाशनं दद्याद्बभ्रुं निष्कद्वयेन च ॥ २ ॥
ब्राह्मणान्भोजयेत्पश्चात्पूर्वपापापनोदनम् ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकषष्ट्युत्तरत्रिशताधिकसहस्रतमः ॥ १३६१ ॥

अरुण उवाच ।

काश्चित्क्षात्रकुले जातो नानावृत्त्या तु लाभवान् । नानासंधिषु पीडा स्यादुदरार्तिः प्रजायते ॥ १ ॥
मेहो वै कुरुते नित्यं नेत्रस्वेदं विरश्मिताम् । कटिपृष्ठोरुवंशार्तिं बाल्ये स्याद्ग्रहणी गदः ॥ २ ॥
तस्य भार्या सदाचारा विज्ञेया व्रतचारिणी । सौभाग्यसुखसम्पन्ना पितृमातृसुखोज्झिता ॥ ३ ॥
केन संततिहीना च कर्मणा कथय प्रभो ॥ ४ ॥

श्रीसूर्य उवाच ।

पूर्वं वर्णाधमो जातस्तस्करो वस्त्रहारकः । निषादैः सह संभूय चौर्यकर्मकरोऽभवत् ॥ ५ ॥
वनानामंतरे प्राप्ते काश्चिद्विप्रः समागतः । गृहीत्वा तस्य सर्वस्वं यत्किंचिच्चार्जनात्स्थितम् ॥ ६ ॥
तेन वै निहतो विप्रो तस्करेण दुरात्मना । तस्करोऽसौ मृतश्चापि जातो वै वनपन्नगः ॥ ७ ॥
स पश्चान्नरके घोरे पतितोब्दायुतं खग । पश्चान्मानुष्यमापन्नः किंचित्पुण्यप्रभावतः ॥ ८ ॥
स्वर्णकारगृहे जातः पूर्वजन्मनि मानद । चतुर्थं जन्म चैतद्धि वैधव्यं यत्र चाजनि ॥ ९ ॥
व्यभिचारवशाज्जातस्तस्करः पूर्वजन्मनि । केन कर्मविपाकेन स्वयपत्यं जायते त्विह ॥ १० ॥
पुत्रहीना कथं चेयं वंध्यात्वं जन्मजन्मनि ॥ ११ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं देव येन पापक्षयो भवेत । संततेः सुखमाप्नोति वंध्या तद्वै वद प्रभो ॥ १२ ॥

श्रीसूर्य उवाच ।

शुभे त्ववसरे प्राप्ते शुभतीर्थादिसंगमे । विधिवद्विहितापूर्वं कृतं स्मृत्युपभाषितम् ॥ १३ ॥
विप्रस्योद्वाहनं कृत्वा गृहदानं यथाविधि । धनधान्यादिकं दत्त्वा तोषयेद्विप्रयाजकान् ॥ १४ ॥
विष्टिपाते व्यतीपाते संक्रान्तौ ग्रहणाहनि । पुण्याहे विधिमातिष्ठेदनपत्याघनाशनम् ॥ १५ ॥
सुशुभे भूप्रदेशे तु समे कम्बलविस्तृते । विदधीत तिलद्रोणैस्त्रिभिः पर्वतमुत्तमम् ॥ १६ ॥
परितोऽरत्निमात्रं तु द्रोणमानं सुतण्डुलैः । विदध्यात्पर्वतं रम्यं तृणद्रुमविभूषितम् ॥ १७ ॥
तत्र तौ दम्पती शुद्धौ स्नातावहतवाससौ । दधानौ शुभवेषाढ्यौ चिन्तयानौ प्रजापतिम् ॥१८ ॥
तस्यादितेश्च तत्पत्न्याः कुर्यान्मूर्तिं प्रजापतेः । शुद्धवर्णसुवर्णस्य निष्कद्वयमितस्य वै ॥ १९ ॥
हेमयज्ञोपवीतं च ह्यक्षमाला कमण्डलुः । अदितेरपिकेयूरहारग्रैवेयभूषिताम् ॥ २० ॥
तदर्धमितिकां चापि प्रकुर्वीत शुभाकृतिम् । स शैवीमर्चयेन्मूर्तिं विष्णोर्वामनरूपिणः ॥ २१ ॥
तन्मूर्तित्रितयं सम्यक्कृतसंस्कारमर्चयेत् । कृत्वा प्रतिष्ठितप्राणं जातकर्माथ पुंस्त्रियोः ॥ २२ ॥
बाललीलाधरं विष्णुं वामनं सुविचिंतयेत् । मातरं द्रष्टुमिच्छन्तं हरिं तत्स्तनकांक्षया ॥ २३ ॥
ततस्तस्या दामतटादाप्लुत्य तिलपर्वतात् । प्रत्यंतगिरिमायातं मार्गैः स्वपदभूषितैः ॥ २४ ॥
अथ तं समपश्यन्तीं विरहाकुलचेतसाम् । रुदन्तीमिति तं द्रष्टुमाहूय तत्परान्मुनीन् ॥ २५ ॥
एवं ध्यात्वाथ तां मन्त्रैर्मन्त्रार्थोदितलक्षणाम् । पुष्पस्रग्धूपगन्धाद्यैरर्चयेदतिविह्वलाम् ॥ २६ ॥
तद्विप्रासोऽथ तद्विष्णोर्विष्णोः कर्मणि पश्यत । ततस्तां वैष्णवीं मूर्तिं मातुरुत्संगगामिनीम् ॥२७॥
कृत्वा तस्याः प्रतिष्ठान्तं लब्धपुत्रान्विचिन्तयेत् । अपश्यन्तमिमं मन्त्रैर्मत्रार्थगुणलक्षणम् ॥२८॥
सुपुत्रसहितां देवीमर्चयेद्विविधैर्गुणैः । ततो ब्राह्मणमध्यात्तु समाहूय गुणान्वितम् ॥ २९ ॥
तस्मै तां प्रतिमां दद्यात्सपुत्रा मदितेः सुताम् ॥ ३० ॥

मंत्रः ।

" यन्मया निहतो विप्रो ह्रत्वा तु तद्वसु वै वने । तस्करैस्सह यत्पापं प्राप्तमेवोल्वणं महत् ॥३१॥
तस्य पापस्य नाशाय दानमेतद्ददाम्यहम् । सौवर्णीं प्रतिमामेनां भवेयमनघेति हि " ॥ ३२ ॥
भोजयेच्च शतं विप्रान्सर्पिष्यात्मानमीक्षयेत् ॥ ३३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विषष्ट्युत्तरत्रिशताधिकसहस्रतमः ॥ १३६२ ॥

श्रीसूर्य उवाच ।

उलूकघातने पूर्वं जन्मन्यत्र च पुत्रक । पांडुरोगेण सततं पीडितो वै भवेद्भृशम् ॥ १ ॥
कस्तूरिकापलं चैकं दद्याद्विप्राय पर्वणि । उलूकघातजं पापं सर्वं नश्यति तत्क्षणात् ॥ २ ॥
तस्मिन्पापोपशमने पांडुरोगो विनश्यति ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिषष्ट्युत्तरत्रिशताधिकसहस्रतमः ॥ १३६३ ॥

श्रीसूर्य उवाच ।

या नारी घातयेत्काचिदुलूकं पूर्वजन्मनि । पांडुरोगेण सततं पीड्यते चात्र जन्मनि ॥ १ ॥
दद्यात्तत्र विधिज्ञाय पलमेकं खगाधिप । कस्तूरिकाया विप्राय पांडुरुङ्नाशनं परम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःषष्ट्युत्तरत्रिशताधिकसहस्रतमः ॥ १३६४ ॥

श्रीसूर्य उवाच ।

वैनतेय महाभाग शृणु प्राक्कर्मणः फलम् । कश्चिदासीत्कलिंगे वै द्विजो धर्मक्रियापरः ॥ १ ॥
बहुस्त्रीबलसंयुक्तो गोधनैश्च समन्वितः । गयायां विधिना श्राद्धं श्रद्धावित्तसमन्वितम् ॥ २ ॥
स ततः कृतवान्पापं कामलोभेन निश्चयात् । ज्येष्ठां त्यक्त्वा ऋतुप्राप्तां धर्मिष्ठां प्रियवादिनीम् ॥ ३ ॥
रतिं ददौ कनिष्ठायां घातितस्त्रीविमोहितः । जीवेत्स हि चिरं–कालं पश्चान्मृत्युमवाप्नुयात् ॥ ४ ॥
शुभाच्छुभफलं भुक्त्वा पापाद्दारुणनारकान् । गयाश्राद्धप्रभावेण जातश्चात्रापि वै द्विजः ॥ ५ ॥
देशे रम्यस्थले पुण्ये तदा लोहितसंज्ञके । मध्यरूपः प्रियायुक्तो धनबुद्धिसमन्वितः ॥ ६ ॥
शुभादिदं तथा पापान्नरो दुःखसमन्वितः । शूलयुक्तोदरो भीरुर्जातपुत्रविवर्जितः ॥ ७ ॥
कनिष्ठा या प्रिया पूर्वमासीद्भर्तृविमोहिनी । सात्र जन्मनि जाता वै पुत्रहीना हि दृश्यते ॥ ८ ॥
भर्तृमध्या शुभाचारा हृदि रोगप्रपीडिता । लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥ ९ ॥
रुक्मपंचपलैः कुर्याद्ब्राह्मणं कमले स्थितम् । पत्रे लेख्यं शुभाकारं सर्वावयवसंयुतम् ॥ १० ॥
पूजयित्वा तु गंधाद्यैः षोडशोपचारकैः । दद्याद्वेदविधिज्ञाय पूजिताय प्रयत्नतः ॥ ११ ॥
तन्मितां राजतीं गौरीं लेख्यां च शुभलक्षणाम् । दद्याद्यत्नेन तां देवीं पूर्वपापप्रणाशिनीम् १२॥
गायत्रीपञ्चसाहस्रं जपेत्पश्चाद्विधानतः । होमान्ते भोजयेद्विप्रांस्तदा शुद्धिं समाचरेत् ॥ १३ ॥
तदा संततिवृद्धिः स्यात्कुष्ठरोगात्प्रमुच्यते । नैवं करोति यो लोभात्प्रायश्चित्तं प्रयत्नतः ॥ १४ ॥
पंचविंशतिमेऽब्दे तु रिष्टं वै दारुणं स्मृतम् । पंचाशीतिमिताब्दांतं जीवनं कृतनिष्कृतेः ॥ १५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचषष्ट्युत्तरत्रिशताधिकसहस्रतमः ॥ १३६५ ॥

श्रीसूर्य उवाच ।

उलूकघातने पूर्वे जन्मन्यत्र खगाधिप । पांडुरोगेण सततं पीडितो वै भवेद्भृशम् ॥ १ ॥
कस्तूरिकापलं चैवं दद्याद्विप्राय पर्वणि । उलूकघातजं पापं सर्वं नश्यति तत्क्षणात् ॥ २ ॥
तस्मित्पापोपशमने पांडुरोगो विनश्यति ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्षष्ट्युत्तरत्रिशताधिकसहस्रतमः ॥ १३६६ ॥

श्रीसूर्य उवाच ।

कुक्कुटस्य वधे सूत प्राग्भवेऽत्रैव जन्मनि । नासावक्रत्वमाप्नोति नरश्चाकृतनिष्कृतिः ॥ १ ॥
दद्यान्निष्कत्रयं स्वर्णं विधिज्ञाय प्रयत्नतः । तद्दोषशमनायैव जन्मन्यत्र खगाधिप ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तषष्ट्युत्तरत्रिशताधिकसहस्रतमः ॥ १३६७ ॥

श्रीसूर्य उवाच ।

या नारी घातयेत्कंचिच्चटकं पूर्वजन्मनि । पांडुरोगेण सततं पीडिता चात्र जन्मनि ॥ १ ॥
माषत्रयमितं दद्याच्चटकं हैमनं शुभम् । प्रायश्चित्ते कृते सूत पांडुरोगात्प्रमुच्यते ॥ २ ॥
प्रायश्चित्तं न कुर्याद्या नैरोग्यं नाप्नुयात्क्वचित् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टषष्ट्युत्तरत्रिशताधिकसहस्रतमः ॥ १३६८ ॥

श्रीसूर्य उवाच ।

मार्जारघाती पुरुषः प्राग्जन्मन्यत्र चांडज । पिंगेक्षणो भवेत्सूत तत्काले पूर्वघाततः ॥ १ ॥

अत्र वैदूर्यरत्नानि देयानि विविधानि च । पिंगाक्षिरोगस्तस्माच्च पुण्यान्न च विवर्धते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनसप्तत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३६९ ॥

अरुण उवाच ।

कश्चिद्वैश्यकुले जातो वातरक्तेन पीडितः । किलासौ दद्रुकंडूवादिं शरीरे धृतवान्पुरा ॥ १ ॥
तस्य भार्या सदाचारा किंचित्क्लेशस्य कारिणी । न सुखं मातृपित्रादेः पतिधर्मे सुखं महत् ॥२॥
नानायोनौ कथं जाता मृतवत्सा च सा कथम् । केन कर्मविपाकेन सत्यं वद दिवस्पते ॥ ३ ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्य विचेष्टिम् । पूर्वजन्मनि शूद्रस्तु दानधर्मपरायणः ॥ ४ ॥
क्रयविक्रयकर्ता च बहुद्रव्येण संयुतः । व्यापारं म्लेच्छराज्येऽपि चकार भुवि मानद ॥ ५ ॥
कदाचित्कालयोगेन म्लेच्छो देशांतरं गतः । गृहव्यापारकोषं च ह्यमात्ये वै समर्पितम् ॥ ६ ॥
व्यापारकुशलः शूद्रो ह्यमात्योऽभून्नृपस्य वै । व्यभिचारमतिश्चासीन्म्लेच्छस्त्रीरतितत्परः ॥ ७ ॥
एवं बहुतरं कालं म्लेच्छासङ्गं चकार सः । म्लेच्छस्त्रिया ह्यभूद्गर्भस्तेन शूद्रेण दारितः ॥ ८ ॥
एवं कर्म कृतं ज्ञातं प्रतिवेशिद्विजेन वै । अथ किंचिद्गते काल आगतो म्लेच्छराड्गृहे ॥ ९ ॥
विप्रः कथितवान्सर्वममात्येन च यत्कृतम् । प्रतिवेशमस्थितेनाहो म्लेच्छश्चुक्रोध वै भृशम् ॥१०॥
तस्य पापं प्रगल्भस्य ज्ञात्वा सर्वे जनास्तदा । म्लेच्छा निहन्युस्तं शूद्रं सर्वस्वं जहुरेव च ॥११॥
स वै वर्षसहस्रं तु नरके तीव्रवेदनः । पश्चान्मानुष्यमापन्नः किंचिद्दानप्रभावतः ॥ १२ ॥
चतुर्थं जन्म चैतद्धि वैश्यवर्णोऽस्ति साम्प्रतम् ॥ १३ ॥

अरुण उवाच ।

का तस्य निष्कृतिः स्वामिन्येन वै निश्चला प्रजा । तां ब्रूहि कर्मणां साक्षिँल्लोकानां सौख्यहेतवे १४

श्रीसूर्य उवाच ।

सौम्यायने शुभे मासे सिते पक्षे शुभे दिने । सानुकूलग्रहे पुण्ये प्रारभेतविधिं ततः ॥ १५ ॥
गोमयेनोपसंलिप्ते संस्तरे मृदुकम्बले । स्थापयेद्विविधं धान्यं साश्रमद्रुमभूमिकम् ॥ १६ ॥
तन्मध्ये स्थापयेत्तैलमयं द्रोणस्य पञ्चकम् । परितो विविधैर्धान्यैः प्रत्येकं द्रोणसम्मितैः ॥ १७॥
अर्चयेत्काननं रम्यं विविधद्रुमभूमिभिः । गोधूमशालिमुद्गीहिमुद्रमाषतिलादिभिः ॥ १८ ॥
चणकश्यामनीवारप्रियंगुप्रमुखैः शुभैः । मध्ये मेरुं प्रतिष्ठाप्य पञ्चद्रोणतिलार्चितम् ॥ १९ ॥
तस्योपरि न्यसेत्पात्रं ताम्रं दशपलात्मकम् । देवं तदुपरि स्थाप्य षञ्चस्वर्णविनिर्मितम् ॥ २० ॥
बालगोपालवेषं च बलोद्धवसमन्वितम् । मूर्तित्रयं समासाद्य प्रत्येकं पलनिर्मितम् ॥ २१ ॥
कृत्वा प्रतिष्ठितप्राणं पूजयेद्विविधैर्गुणैः । विष्णुसूक्तेन मन्त्रेण नैवेद्यार्घ्याचमादिभिः ॥ २२ ॥
ततो ब्राह्मणमाहूय विद्वांसं वेदवादिनम् । अलोलुपं सदाचारं सदा शांतं च सद्गुणम् ॥ २३ ॥
तस्मै तां प्रतिमां दद्याद्विधिवद्विहिताशिषम् ॥ २४ ॥

मन्त्रः ।

" यन्मया परदारासु कृतं गर्भविघातनम् । तत्पापेन मया प्राप्तं पुत्रसंततिनाशनम् ॥ २५ ॥
तत्तदेनोविनाशाय मूर्तित्रयं ददाम्यहम् । दानेनानेन भूदेव भवेयमनघः प्रभो " ॥ २६ ॥
एव कृतविधिः सूत यथोक्तफलमश्नुते । प्रतिमां प्रतिगृह्णामि स्वस्तितेऽस्त्विति कीर्तयेत् ॥२७॥
ममाघं चारत्यसंख्यातं जननीबालघातनम् । नानादुःखौघदं चापि तस्मान्मोच्यो हि सुव्रत ॥२८॥

कुलटावालनाशादिजनिताघविवर्जनम् । त्रिमूर्तिसमुदायेन भवेदिति द्विजान्नमेत् ॥ २९ ॥
अष्टोत्तरशतं हुत्वा मधुत्रयसमन्वितम् । होमान्ते विप्रभोज्यान्ते सर्पिष्यात्मानमीक्षयेत् ॥ ३० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३७० ॥

श्रीसूर्य उवाच ।

मार्जारघाती पुरुषः प्राग्जन्मन्यत्र चांडज । पिंगेक्षणो भवेन्नूनं काले वै पूर्वघातजे ॥ १ ॥
इह वैदूर्यरत्नानि देयानि विविधानि च । पिंगाक्षिरोगस्तस्माच्च पुण्यान्न च विवर्धते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकसप्तत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३७१ ॥

श्रीसूर्य उवाच

या स्त्री काचिन्महाभाग मार्जारीं घातयेत्पुरा । सात्र जन्मनि पिंगाक्षी भवत्येव न संशयः ॥ १॥
वैदूर्यसंज्ञकं दद्यादुक्तपापविशुद्धये । अकृते रत्नदाने तु पिंगाक्षित्वान्न मुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विसप्तत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३७२ ॥

श्रीसूर्य उवाच ।

योऽवधीत्पूर्वजनुषि शुकं पापविमोहितः । जायते स्वाहिता वाणी तस्य चात्रैव जन्मनि ॥ १ ॥
शास्त्राणां प्रतिमा देया तेन पापविमुक्तये । लिखित्वा पुस्तकान्यत्र सस्वर्णानि च काश्यपे ॥२॥
तत्पापान्मुच्यते जन्तुर्वाणी तस्य शुभा भवेत् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिसप्तत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३७३ ॥

श्रीसूर्य उवाच ।

बभूव सूकरे कश्चिद्बाहुजः पूर्वजन्मनि । दत्तानि तेन दानानि ब्राह्मणेभ्यो हि शक्तितः ॥ १ ॥
पूर्वस्वमपि सकलं राजस्वर्णादिकानि च । अथो भाविबलात्पुत्र ब्राह्मणेन तपस्विना ॥ २ ॥
तद्गृहे स्थापितं हेम घटे मृण्मयजे शुभम् । पुनर्दत्तं न तत्तस्मै लोभोपहतचेतसा ॥ ३ ॥
स्त्रीपुत्राभ्यां मिलित्वा तु भक्षितं तद्धनं पुरा । एवं किंचिद्गते काले प्राप्य धर्मपुरं प्रति ॥ ४ ॥
भुक्त्वा तत्पापजं कर्म शुभं तत्पूर्वदानतः । क्षेत्रमृत्युप्रभावाच्च स जातोऽत्रापि बाहुजः ॥ ५ ॥
गोदावर्याः समीपे तु पंचयोजनसम्मिते । खर्वटे च शुभाकारः प्रधानपुरुषान्वितः ॥ ६ ॥
वाचा मधुरया युक्तो यशस्वी धर्मसंयुतः । भृत्यस्त्रीवाहनैर्युक्तः सुखभोगदयान्वितः ॥ ७ ॥
सर्वोपचारकुशलो धीरो मित्रसमाकुलः । सर्वं पुण्यफलादेव शृणु पापफलात्फलम् ॥ ८ ॥
मात्सर्यलोभमोहाद्यः क्वचित्पापरतस्तथा । धूर्तः शठो महोद्विग्नः प्रचारकुशलः क्षमी ॥ ९ ॥
मातृवित्तयुतो धीरः सबन्धुर्विभ्रमान्वितः । द्विजस्वभक्षणात्पापात्प्रागत्र मृतपुत्रकः ॥ १० ॥
चिह्नं लग्ने घटाध्यक्षः शनिः पुत्रेऽत्र जन्मनि । सहायलक्षणं सर्वं वक्ष्याम्यथ खगेश्वर ॥ ११ ॥
स्त्रीपुत्राभ्यां पुरा यस्माद्भक्षितं तद्धनं सुत । पुत्रनाशो महादुःखं पित्रोर्यून्यत्र जन्मनि ॥ १२ ॥
लक्षणैरेभिराढ्यस्य शृणु पापविशोधनम् । पलैः शतमितैः कुर्यात्कुम्भं ताम्रस्य यत्नतः ॥१३॥
सुवर्णाढ्ययुतं साज्यं सक्षौमं रत्नसंयुतम् । अथो वित्तषडंशेन यद्वा वित्तानुसारतः ॥ १४ ॥
सूर्यभक्ताय वै दद्यान्मंत्रेणानेन भक्तितः ॥ १५ ॥

मंत्रः ।

" यद्भुक्तं ब्राह्मणद्रव्यमज्ञानात्पूर्वजन्मनि । तद्दामि घटं सर्वं विप्रद्रव्याघनाशनम् " ॥ १६ ॥
इत्युच्चार्य नरो दद्यात्सर्वपापात्प्रमुच्यते । लक्ष्मीनारायणं तद्वत्त्रिसुवर्णमितं शुभम् ॥ १७ ॥
जपेद्विंशतिसहस्राणि गायत्रीं यत्नतोण्डज । य एवं कुरुते सूत प्रायश्चित्तं प्रयत्नतः ॥ १८ ॥
सुखं पुत्रस्य लभते चात्र जन्मनि नान्यथा । प्रायश्चित्ते कृते पुत्र जीवनं नव सप्त च ॥ १९ ॥
वर्षाणि रिष्टमकृते पंचाशद्वत्सरे भृशम् ॥ २० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःसप्तत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३७४ ॥

श्रीसूर्य उवाच ।

शशकस्य वधान्नारी पूर्वजन्मनि काश्यपे । कुब्जकर्णः प्रजायेत निष्कृतिं तस्य वच्म्यहम् ॥ १॥
शय्यां दद्याद्धि विप्राय वेदवेदांगवेदिने । सर्वोपस्करयुक्तां च सा तद्दोषात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचसप्तत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३७५ ॥

श्रीसूर्य उवाच ।

यो मोहाद्धातयेत्सूत प्राग्भवे मूषकं नरः । प्राग्घातकाले सोऽत्रैव कुब्जकर्णः प्रजायते ॥ १ ॥
तस्मात्तेनेह जनुषि सप्तधान्यानि चाण्डज । देयानि विप्रमुख्येभ्यो तत्पापस्यापनुत्तये ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्सप्तत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३७६ ॥

श्रीसूर्य उवाच ।

या काचिद्धातयेत्पूर्वभवे मोहाच्च कुक्कुटम् । नासावक्रत्वमाप्नोति सात्र जन्मनि निश्चयात् ॥ १ ॥
हेमनिष्कत्रयं दद्यात्पर्वण्यसौ प्रयत्नतः । तद्दोषशमनायैव पापनाशकरं परम् ॥ २ ॥
प्रायश्चित्तमिदं रम्यं शूद्रयां चैव नियोजयेत् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तसप्तत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३७७ ॥

श्रीसूर्य उवाच ।

पारावतं च यो हन्यात्पूर्वजन्मनि मानवः । सोऽत्र जन्मनि पक्षीन्द्र पीतपाणिः प्रजायते ॥ १ ॥
निष्कत्रयहिरण्यस्य दानात्पारावतस्य तु । प्रमुच्यते पीतपाणिरोगादानप्रभावतः ॥ २ ॥
आयुषस्तस्य वृद्धिः स्यान्महादानाच्च पुत्रक । सर्वारिष्टं क्षयं याति जीवनं नवसप्ततिम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टसप्तत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३७८ ॥

अरुण उवाच ।

कश्चिद्वैश्यकुले जातः सुविचारी विवेकवान् । विष्णुभक्तिरतो नित्यं नियतं ब्राह्मणप्रियः ॥ १ ॥
तस्य देहे भवेत्किंचिद्वायुना पीडनं भृशम् । शिरोर्तिर्जायते काचित्किंचिन्मोहादिविभ्रमः ॥ २ ॥
तस्य भार्या शुभा नित्यं पतिभक्तिपरायणा । व्रतदानतपा नित्यं सत्यवाक्सत्यभाषिणी ॥ ३ ॥
वंध्यात्वं जायते तस्याः किंचित्कर्मप्रभावतः । तत्कर्म वद मे स्वामिन्प्रार्जितं पूर्वजन्मनि ॥ ४ ॥

श्रीसूर्य उवाच ।

वैनतय महाबाहो शृणु तस्य विचेष्टितम् । पूर्वं वर्णोत्तरे जातः स्वर्णकारकुले तथा ॥ ५ ॥
सर्वेषामेव लोकानां हृतं तेन च कांचनम् । ब्राह्मणीक्षत्रियावैश्याशूद्राणां दुष्टबुद्धिना ॥ ६ ॥

गर्भस्य पातनोपायो बहुकालमकारि वै । व्यभिचाररतो नित्यं स्वर्णकारः सहायवान् ॥ ७ ॥
एवं काले व्यतिक्रान्ते मृतो यमपुरं ययौ । नरकं बहुविधं प्राप्य वर्षायुतसहस्रकम् ॥ ८ ॥
किंचित्पुण्यप्रभावेण इह जन्मनि मानवः । इदं चतुर्थकं जन्म वैश्यवर्यस्य वीश्वर ॥ ९ ॥
अनात्मजत्वं लभते पूर्वकर्मवशाद्भुवि । गर्भपातो भवेत्तस्य पत्न्यां दुःखं च जायते ॥ १० ॥
परद्रव्यापहरणाद्दुःखोद्रिक्तः प्रजायते ॥ ११ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं स्वामिन्येन पापं प्रशाम्यति । अपत्यं जायते येन लोकानां हितकाम्यया ॥ १२ ॥

श्रीसूर्य उवाच ।

सौम्यायने शुभे प्राप्ते सानुकूलग्रहेऽहनि । पूर्यमाणे विधौ सौम्यग्रहदृष्टिशुभान्विते ॥ १३ ॥
सभर्तृका शुचिः स्नात्वा सौम्यालंकारभूषिता । उपोषणरता साध्वी स्वभर्तुर्वृत्तिमाचरेत् ॥ १४ ॥
माघमासस्य पूर्णायां या कुर्याद्वै प्रयत्नतः । उपोषिता दिवा रात्रौ विधौ चाभ्युदिते सति ॥ १५ ॥
सुरभ्यास्तु सगर्भाया गोमयेनोपलेपयेत् । सौवर्णस्य चतुर्भिश्च कारयेत्प्रतिमां शुभाम् ॥ १६ ॥
रुक्मिणीं राजते पद्मे सर्वालंकरणैः सुत । कृत्वा प्रतिष्ठितप्राणां विष्णुसूक्तेन केशवम् ॥ १७ ॥
श्रियः सूक्तैः श्रियं त्वर्चेन्नानापुष्पफलादिभिः । नैवेद्यैस्तोषयेद्विष्णुं नानान्नैर्घृतपायसैः ॥ १८ ॥
एतैः संपूज्य विधिवज्जुहुयात्तिलतंडुलैः । शतमष्टोत्तरं हुत्वा पूर्णान्ते शतमाचरेत् ॥ १९ ॥
सव्यपार्श्वे स्वभर्तुश्च पुनस्तामुपवेशयेत् । निष्कद्वयेन सौवर्णीं दक्षिणामयुतं ददेत् ॥ २० ॥
सुवृत्तं वैणवं पात्रं त्रयं वा पञ्च सप्त च । सप्तधान्यफलोपेतमष्टसौभाग्यवस्तुभिः ॥ २१ ॥
रक्तवस्त्रेण संछाद्य मालाकुसुमसंयुतम् । तत्रोपरि न्यसेद्दीपं घृतपूर्णं शिखाधरम् ॥ २२ ॥
कल्पयेद्विष्णुसूक्तेन प्रयच्छेद्विष्णुप्रीतये । भोजयेच्च शतं विप्रान्नानान्नैः सक्तुपायसैः ॥ २३ ॥
एवं कृतविधिः सूत व्रतान्ते दानमाचरेत् ॥ २४ ॥

मन्त्रः ।

" यन्मया पूर्वजनुषि दूनीकर्म कृतं बहु । कुलटात्वं गर्भघातो बालहत्यादिकं तथा ॥ २५ ॥
तस्मान्मोच्या महाभाग निष्पापां कुरु सुव्रत " ॥ २६ ॥
अनघेत्युच्चरन् विप्रः समादाय गृहं व्रजेत् । ततः समर्चयेद्देवं मंत्रमेनमुदीरयेत् ॥ २७ ॥
"यथाष्टपुत्रा त्वं देवि प्रद्युम्नादिसुतैर्भुवि । माधवस्य प्रसादेन चाष्टपुत्रा भवाम्यहम्" ॥ २८ ॥
वर्धमाने तथा गर्भे वंध्यात्वं विलयं व्रजेत् । एवं तु विधिवत्कृत्वा विसृज्य सकलं ततः ॥ २९ ॥
एवं व्रतपरा नारी गर्भांश्च सुलभान्व्रजेत् । ऐहिकं लक्षणं तस्याः शरीरे विनतासुत ॥ ३० ॥
उदरार्तिरसृक्स्रावः पार्श्वपादकरादिषु । पीडादाहादिवाधिर्यमल्पनेत्रं भवेदिति ॥ ३१ ॥
मिथ्याभिशंसनं क्वापि वाचि दोषो धनच्युतिः ॥ ३२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनाशीत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३७९ ॥

श्रीसूर्य उवाच ।

मूषकं यावधीन्नारी पूर्वजन्मनि निश्चयात् । सात्र जन्मनि पक्षीन्द्र कुब्जकत्वं प्रपद्यते ॥ १ ॥
प्राक्पापशोधनी चैषा निष्कृतिर्जन्मनीह वै । सप्तधान्यानि देयानि सस्वर्णानि द्विजातये ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽशीत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३८० ॥

श्रीसूर्य उवाच ।

मयूरघातने पूर्वभवे शृणु सुपुत्रक । वह्निमण्डलरोगेण पीड्यते चात्र जन्मनि ॥ १ ॥
स्वर्णनिष्कत्रयस्यात्र मयूरं विधिनांडज । दद्याद्विप्राय मुख्याय तस्मात्पापात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकाशीत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३८१ ॥

श्रीसूर्य उवाच ।

शुकं हि घातयेन्नारी पूर्वजन्मनि याण्डज । अत्र जन्मनि सा योषा वाण्या वै स्खलिता भवेत् ॥१॥
दद्याच्छुकं सुवर्णस्य यथावित्तानुसारतः । मुच्यते तेन दानेन तत्पापात्पूर्वमर्जितात् ॥ २ ॥
अथ वा शास्त्रदानेन ब्राह्मणाय खगाधिप ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्यशीत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३८२ ॥

श्रीसूर्य उवाच ।

या काचिद्वधीन्नारी मयूरं प्राग्भवेण्डज । सात्र जन्मनि तत्काले पीड्यते कृष्णमण्डलात् ॥१॥
दद्याद्धेममयं त्वत्र मयूरं शुभलक्षणम् । निष्कत्रयस्य विधिना सा तद्दोषात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्यशीत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३८३ ॥

श्रीसूर्य उवाच ।

हंसघाती भवेद्यस्तु मोहात्प्राग्गरुडाग्रज । श्वेतमण्डलरोगेण युक्तः स्यादत्र जन्मनि ॥ १ ॥
तत्पापमोचनं सूत जन्मन्यत्रैव जायते । राजतेनैव हंसेन दानेनात्र प्रयत्नतः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरशीत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३८४ ॥

श्रीसूर्य उवाच ।

या काचिद्घातयेन्नारी पापात्पारावतान्सुत । जन्मन्यत्र च सा रोगात्पीतपाणेर्व्यथाकुला ॥ १ ॥
प्रमुच्यते पीतपाणिरोगाद्दानप्रभावतः । शुद्ध्यत्यत्र महारोगाद्घातात्पारावताच्छुभात् ॥ २ ॥
यथाशक्ति हिरण्यस्य दानतो विनतासुत ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाशीत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३८५ ॥

श्रीसूर्य उवाच ।

हंसं या घातयेन्नारी स्वाज्ञानात्पूर्वजन्मनि । श्वेतमंडलया सा तु पीडया पीड्यते त्विह ॥ १ ॥
लिखित्वा राजते पत्रे हंसं पलमितं शुभे । दद्यादत्र दरिद्राय ब्राह्मणाय विधानतः ॥ २ ॥
श्वेतमंडलजां पीडां नाशयेत्तत्क्षणादिह ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडशीत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३८६ ॥

श्रीसूर्य उवाच ।

यः कश्चित्पितरं हन्यात्पूर्वजन्मनि सुव्रत । चेतनारहितश्चापि जायतेऽत्रैव जन्मनि ॥ १ ॥
प्राजापत्यत्रयं कुर्याद्दद्याद्धेममयं शुभम् । नौकां पलमितां सूत शुभैराच्छादनैर्वृताम् ॥ २ ॥
विप्राय वेदविदुषे पूर्वपापापनुत्तये ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्ताशीत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३८७ ॥

श्रीसूर्य उवाच।

वैनतेय महाभाग शृणु चास्य विचेष्टितम्। करहाटाभिधे देशे कश्चिदासीद्द्विजोत्तमः ॥ १ ॥
प्राग्भवे नृपतिर्विज्ञो वेदशास्त्रविशारदः। धर्मशास्त्रक्रियायुक्तः शिवभक्तोऽतिनीतिवित् ॥ २ ॥
बहुस्त्रीधनपुत्राढ्यो विप्रपूजनतत्परः। दत्तानि तेन दानानि ब्राह्मणेभ्यो विजानता ॥ ३ ॥
बहुपर्वसु भूम्यश्च कन्यावस्त्रगृहाणि च। सूर्यचन्द्रोपरागे च गजाश्वरथकांचनम् ॥ ४ ॥
बहुरत्नानि भांडानि महादानानि चांडज। अथो भाविबलाद्यूनि पापमाचरितं पुरा ॥ ५ ॥
सीमान्तरस्थितस्यापि विप्रस्याप्यधिकारिणः। स्त्रिया विरोधात्सततं कृतं कर्मातिदारुणम् ॥६॥
स्वस्त्रीभ्रातृसहायैश्च रात्रौ गत्वा तु तत्पुरम्। निर्दग्धं तत्पुरं चापि मिलित्वा बहुभिर्जनैः ॥ ७ ॥
तस्मिन्दाहे मातृयुक्तास्त्रयो बाला द्विजस्य च। निर्दग्धा बालवत्साढ्या गौरेका जंतवोऽपि च८॥
सर्वस्वं लुंठितं तस्यापराधरहितस्य च। गृहीत्वा विप्रसर्वस्वं ज्येष्ठपत्न्यै निवेदितम् ॥ ९ ॥
महादानरता सापि बहुपुत्रा पतिप्रिया। तयापि तत्स्त्रीसंवादात्क्रोधाद्द्विजकुलं हतम् ॥ १० ॥
भुक्तं च तद्धनं लोभात्पापमुग्रमुपार्जितम्। धर्मज्ञेन नृपेणापि न कृतं पापशोधनम् ॥ ११ ॥
अथ किंचिद्गते काले स प्राप्तो यमशासनम्। भुक्त्वा पापफलं पापात्पुण्यात्स्वर्गफलं तथा ॥१२॥
बहुपुण्यान्महापापात्स जातोऽत्रापि भूपतिः। गंगायाः प्रान्तरे देशे तत्त्वयोजनसम्मिते ॥ १३ ॥
स रक्तगौरो मतिमान्नात्युच्चो न लघुर्घृणी। वाचा मधुरया युक्तस्तेजस्वी लोकविश्रुतः ॥ १४ ॥
बहुज्ञो दर्शनीयाक्षो दाता भोक्ता कुलाग्रणीः। उपकारपरो विद्वान्वली सर्वजनाश्रयः ॥ १५ ॥
क्षात्रधर्मरतो मानी दंडदाक्षिण्यतत्परः। सभायां चतुरो धीरो मंत्रविद्बूढचेष्टितः ॥ १६ ॥
बहुस्त्रीभोगसंयुक्तो धनधान्यसुतान्वितः। पित्तश्लेष्माधिकः शूरो बहुभूपजनैर्वृतः ॥ १७ ॥
गजाश्ववाहनैराढ्यो बहुरत्नैरलंकृतः। आदिमध्यावसानेषु सुखैश्वर्यसमाकुलः ॥ १८ ॥
शिवार्चनान्महादानात्प्राक्कृतात्तु फलं त्विदम्। सर्वमेतत्तथा पापात्सर्वं पापफलं शृणु ॥ १९ ॥
धूर्तः शठोतिदंभाढ्यो बहुद्वेषी भयान्वितः। लोभी पापरतः क्वापि पित्रोः सुखविवर्जितः ॥२०॥
प्राग्दाहे जीवघाताच्च पित्तवातरुगन्वितः। बालवत्सवधात्पूर्वं पूर्वपुत्रशुचान्वितः ॥ २१ ॥
ब्रह्मस्वभक्षणात्पूर्वं कुक्षिरोगसमन्वितः। ब्रह्मस्वभक्षणे गोप्यकरणाद्भुक्तरोगवान् ॥ २२ ॥
भिषग्वरकृतैर्यत्नैर्बहुपापैर्महौषधैः। निःशेषं तस्य रोगस्य निवृत्तिर्न च जायते ॥ २३ ॥
स्वस्त्रीसहोदराः पूर्वं सहाया दाहकर्मणि। ते त्वत्र तु सुता मृत्युवशं प्राप्ताः खगोत्तम ॥ २४ ॥
गोस्त्रीबालवधात्पापात्प्रागत्र सुतनाशनम्। लक्ष्मेदमेनसो राहुभौमौ गुरुगृहं गतौ ॥ २५ ॥
सुतस्थौ पुत्रमरणं द्वौ त्विज्यौ बुधवेश्मगौ। तमोयुक्तो विधुश्चास्य तद्दशांतर्दशासु च ॥ २६ ॥
महद्दुःखं समाप्नोति प्राणभीतिर्मुहुर्मुहुः। लक्षणैरेभिराढ्यस्य प्रष्टुरत्रैव जन्मनि ॥ २७ ॥
प्रायश्चित्तं प्रवक्ष्यामि येन पापात्प्रमुच्यते। पलैर्दशमितैः कार्यं कालचक्रं हिरण्मयम् ॥ २८ ॥
मदध्यायोक्तविधिना संपूज्य परया मुदा। भक्त्या देयं विधिज्ञाय रोगभीत्यपनुत्तये ॥ २९ ॥
राहुकेतुविधूनां च सौरेरपि विशेषतः। मृत्युञ्जयस्य देवस्य प्रतिमाश्च हिरण्मयीः ॥ ३० ॥
षड्भिःषड्भिः पलैः कृत्वा प्रतिष्ठाप्य सुपूज्य च। प्रयच्छेद्द्विजवर्येभ्यो ज्वरमूर्तिं तथैव च॥३१॥
अग्निमूर्तिं प्रयच्छेत पलैर्वसुमितैः कृताम्। हिरण्मयीं तदाकारां ब्राह्मणाय कुटुम्बिने ॥ ३२ ॥
एवं कृत्वा खगश्रेष्ठ मृत्युञ्जयविधानकम्। कारयेज्जपहोमौ चाप्यपमृत्युविनाशनम् ॥ ३३ ॥
ब्राह्मणान्भोजयेत्पश्चाच्छुद्धान्वित्तानुसारतः। दक्षिणापि तथा देया भक्त्या च विनतात्मज ॥३४॥

य एवं कुरुते सूत विधिना पापशोधनम् । तस्य पुत्रविवृद्धिःस्याज्जन्मन्यत्र खगेश्वर ॥ ३५ ॥
नाधयो व्याधयस्तस्य न च शत्रुभयं भवेत् । न कुक्षिरोगो न मृतिर्न मन्दाग्निर्न भीस्तथा॥३६॥
महदैश्वर्यमाप्नोति विविधांश्च मनोरथान् । सर्वपापविशुद्धात्मा स्वर्गं मोक्षमवाप्नुयात् ॥ ३७ ॥
सप्तसप्ततिरायुः स्यात्प्रायश्चित्ते कृते त्विह । प्रायश्चित्तेऽकृते रिष्टमूनत्रिंशन्मितेब्दके ॥ ३८ ॥
पंचत्रिंशन्मितेब्दे वा ध्रुवं पंचाशद्ब्दके । चतुर्विधं महारिष्टं भवत्येव न संशयः ॥ ३९ ॥
शनौ कन्यागते जातो मेषस्थे निधनं भवेत् । जन्मादिनिधनान्तं हि स्वल्पमेवात्र सूचितम्४०॥
यद्यदंतर्गतं सूत तन्मच्छास्त्राद्विचिन्तयेत् ॥ ४१ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोष्टाशीत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३८८ ॥

श्रीसूर्य उवाच ।

कश्चिच्छूद्रोऽभवत्पूर्वं दानधर्मक्रियापरः । द्विजानां पूजको दक्षः सिंधुमंडलजोंडज ॥ १ ॥
देवद्रव्यविहीनोऽभूत्तत्कृतं कर्म चाधमम् । स्वपत्नी स्थापिता पण्यशालायां हि खगाधिप ॥२॥
पण्यस्त्रीकर्मतश्चासौ चकार स्वोपजीवनम् । ततो मृत्युवशं प्राप्तो भुक्त्वा तत्पापजं फलम् ॥ ३ ॥
प्राग्दानवशतश्चात्र जन्मन्यस्ति च पर्वते । शूद्राधमोऽथ वा षण्ढः पूर्वपापाच्छृणुष्व तत् ॥ ४ ॥
निष्कृतिस्तस्य पापस्य नोक्ता पापाद्दृढात्सुत ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोननवत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३८९ ॥

श्रीसूर्य उवाच ।

या नारी नकुलं पूर्वं घातयेद्विनतात्मज । सात्र जन्मनि रोगेण वह्निमंडलजेन च ॥ १ ॥
पापोद्भवेन सततं पीडिता भवति ध्रुवम् । तद्रोगनाशनं दद्याद्ध्रुवं निष्कत्रयात्मकम्॥ २ ॥
ब्राह्मणान्भोजयेत्पश्चात्पूर्वपापापनोदनम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३९० ॥

श्रीसूर्य उवाच ।

अज्ञानाद्घातयेन्नारी प्राग्भवे मातरं स्वकाम् । सात्र जन्मनि चक्षुभ्यां वर्जिता जायते भृशम् ॥१॥
प्राजापत्यत्रयं कुर्यात्सा तत्पापविशुद्धये । ब्राह्मणाय तथा नौकां हैम्नीं दद्यात्पलात्मिकाम् ॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकनवत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३९१ ॥

श्रीसूर्य उवाच ।

यो हरेत्सुखलोभेन पक्वान्नं परमं महत् । जिह्वापाकोद्भवा पीडा जायतेऽत्रैव निश्चयात् ॥ १ ॥
गायत्रीं प्रजपेल्लक्षं तद्दशांशेन होमयेत् । स्वगृह्योक्तविधानेन तिलैराज्यपरिप्लुतैः ॥ २ ॥
ब्राह्मणान्भोजयेत्पश्चाज्जिह्वापाकात्प्रमुच्यते ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विनवत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३९२ ॥

श्रीसूर्य उवाच ।

प्रागासीत्क्षत्रियः कश्चिद्ग्रामाध्यक्षो महाधनी । चिरेडचां निवसन्विप्रो शिवाराधनतत्परः ॥ १ ॥
दत्तानि तेन दानानि ब्राह्मणेभ्योऽतिशक्तितः । गोभूस्वर्णाश्वशस्त्राणि रत्नादीन्यपि पर्वसु ॥ २ ॥
पापमाचरितं तेन विनार्थस्य गौरवात् । ग्रामान्तरस्थितस्यान्यक्षत्रियस्य विजानता ॥ ३ ॥

वैरभावाच्च वै रात्रौ घातितश्चौर्यकर्मणा । तत्पुत्रो ह्येकपुत्रस्य बालभावे व्यवस्थितः ॥ ४ ॥
तत्पिता तेन दुःखेन मृत्युचक्रमुपागतः । युवभावे सहायाभ्यां युक्तेनोपार्जितं त्विदम् ॥ ५ ॥
स तेन कर्मणा युक्तः प्राप्य धर्मपुरं प्रति । भुक्त्वा पापफलं पापात्पुण्यात्पुण्यफलं तथा ॥ ६ ॥
शिवार्चनात्तथा दानात्तत्र जातो वणिक्सुतः । सौम्ययाम्याश्रिते देशे नार्मदे शतयोजने ॥ ७ ॥
लघुस्वरूपो मतिमान्स्वधर्माढ्यो धनाधिपः । वाचा मधुरया युक्तो रक्तगौरोऽतिपित्तभाक् ॥ ८
पितृबंधुसुखैश्वर्यस्त्रीभोगधनवाहनैः । संयुक्तो दानशीलश्च यशस्वी पितृवल्लभः ॥ ९ ॥
शैशवे युवभावे च चंद्रवत्सुखदुःखभाक् । मध्येऽत्यंतधनैर्युक्तः सुखैश्वर्यसमाकुलः ॥ १० ॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । यौवनेऽतिशठो धूर्तो मत्तो दुःखसमन्वितः ॥११॥
प्राग्बालघातात्सततं जातपुत्रो न कर्मणि । प्रागत्र सहजौ प्रष्टुर्ज्ञेयौ ज्येष्ठकनिष्ठकौ ॥ १२ ॥
पुत्रसंततिहीनौ द्वौ जन्मन्यत्र खगेश्वर । लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥ १३ ॥
रुद्रानेकादश नित्यं पूजयेदुपचारकैः । तल्लिंगमंत्रैर्विधिवद्यावदेकादशं दिनम् ॥ १४ ॥
अद्रि द्वादशके नित्यं पूजयेदुपचारकैः । रुद्रं पलैर्वेदमितैः सौवर्णं शुभलक्षणम् ॥ १५ ॥
तदर्धमितकं वापि निजवित्तानुसारतः । संपूज्य गंधपुष्पाद्यैर्विधिज्ञाय प्रदापयेत् ॥ १६ ॥
मापाष्टकमितां दद्याद्गौरीं स्कंदं द्विमापकम् । गणेशं तन्मितं हैम्नं बालघातोपशांतये ॥ १७ ॥
गायत्र्यष्टसहस्रं तु त्र्यंबकं तु सहस्रकम् । तावदष्टाक्षरं जप्त्वा होमयेद्बोजयेद्द्विजान् ॥ १८ ॥
शृणुत्राद्धरिवंशं च सप्तम्यां व्रतमाचरेत् । य एवं कुरुते सूत विधिना पापशोधनम् ॥ १९ ॥
तस्य पुत्रविवृद्धिः स्यादत्र जन्मनि वै ध्रुवम् । नैवं करोति यो मोहात्प्रायश्चित्तं प्रयत्नतः ॥२०॥
न तस्य पुत्रवृद्धिः स्याद्बालभावे शिशोर्मृतिः । पंचसप्ततिसंख्यायुः कृते प्राक्पापशोधने ॥२१ ॥
प्रायश्चित्ते कृते रिष्टमष्टत्रिंशन्मितेब्दके ॥ २२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिनवत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३९३ ॥

श्रीसूर्य उवाच ।

मातरं यो नरो हन्यात्प्राग्भवे कश्यपात्मज । जन्मान्धो जायते सोऽपि घोरान्मातृवधात्सुत ॥ १ ॥
न जायतेऽत्र पक्षीन्द्र पापान्मुक्तिर्दृढात्ततः । आ सप्तजन्मनो नूनं चक्षुर्हीनो भविष्यति ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्नवत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३९४ ॥

श्रीसूर्य उवाच ।

या काचिद्वनिता सूत प्राग्भवे ज्ञानवर्जिता । परमान्नं हरेर्लोभात्सान्नहीनात्र जन्मनि ॥ १ ॥
तया निष्कद्वयं स्वर्णं विधिना वेदपारगे । देयं तत्पापशुद्ध्यर्थमन्नाढ्या जायते ततः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचनवत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३९५ ॥

श्रीसूर्य उवाच ।

अज्ञानाद्घातयेन्नारी प्राग्भवे मातरं स्वकाम् । सात्र जन्मनि चक्षुर्भ्यां वर्जिता जायते भृशम् ॥१॥
प्राजापत्यत्रयं कुर्यात्सा तत्पापविशुद्धये । ब्राह्मणाय तथा नौकां हैम्नीं दद्याच्चलात्मिकाम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षण्णवत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३९६ ॥

श्रीसूर्य उवाच ।

काचिदासीन्महाभाग वाहुजा पतिवल्लभा । वहुव्रतरता साध्वी देशे पाञ्चालसंज्ञके ॥ १ ॥
साददत्तत्र दानानि नारी पतिसहायतः । सर्वस्वं च कुरुक्षेत्रे राहुग्रस्ते दिवाकरे ॥ २ ॥

अथो भाविवलात्सूत पापमाचरितं तया । धूर्तया भर्तुरुद्देशे कृतं कुलजनाशनम् ॥ ३ ॥
एवं गतसुतो रात्रौ तत्पतिश्चौर्यकर्मणा । ददाहारिपुरं रम्यं बहुलोकैर्निषेवितम् ॥ ४ ॥
तत्र दग्धो द्विजश्चैको कपिला च रिपोः सुतः । धर्मज्ञोऽपि प्रियाहेतोर्घोरपापं चकार सः ॥ ५ ॥
एवं बहुतिथे काले गतौ तौ यमशासनम् । भुक्त्वा पापाच्च नरकान्पापात्स्वर्गांश्च शाश्वतान् ॥ ६ ॥
पूर्वपुण्यप्रभावेण जातौ राजकुले च तौ । सेयमेव विपाशाख्ये देशे पर्वतमाश्रिते ॥ ७ ॥
लग्ने मृगाभिधे जाता महोग्रा प्रियवादिनी । दत्ता तस्मै च तत्पित्रा राजपुत्राय धीमते ॥ ८ ॥
प्राक्कर्मणां विभोगाय सदादीनामिह ध्रुवम् । गौरवर्णा सुपुत्राढ्या सदा दानरता सती ॥ ९ ॥
यशस्विनी कीर्तिमती सुखैश्वर्यसमाकुला । मुख्या नृपांगना लोके प्रसिद्धा कुलशीलतः ॥ १० ॥
बहुद्रव्ययुता नारी रत्नवाहनभागिनी । धर्मादिदं तथा पापाल्लोभाढ्यानृतभाषिणी ॥ ११ ॥
क्रूरा क्वचित्पापरता प्रजापीडनतत्परा । महानृपाश्रितभयैः क्लेशैर्दुःखैर्महाव्ययैः ॥ १२ ॥
प्रपीडिता च तारुण्ये सापस्मारादिजैर्भयैः । आद्यंते सुखयुक्तापि युवभावेऽतिदुःखिता ॥ १३ ॥
सप्तविंशात्तथा वर्षाद्रिष्टं वर्षाष्टकं महत् । पितृभर्तृभवं घोरं स्वदेहसुतजं तथा ॥ १४ ॥
एवं चतुर्विधात्पापाच्चिह्नमङ्गे महाव्रणः । लक्षणैरेभिराढ्यायाः प्रायश्चित्तं वदाम्यहम् ॥ १५ ॥
ब्राह्मणं कारयेल्लेख्यं पलैः पञ्चमितैर्विभुम् । हिरण्मयं यथाकारं सपत्नीकं प्रयत्नतः ॥ १६ ॥
तदर्धमितकं वापि निजवित्तानुसारतः । संपूज्य गंधपुष्पाद्यैर्विधिज्ञाय प्रदापयेत् ॥ १७ ॥
इमं सुमन्त्रमुच्चार्य भक्तिभावेन काश्यपे ॥ १८ ॥

मन्त्रः ।

" पितामह महाप्राज्ञ सृष्टेरुत्पत्तिकारण । पूर्वपापविनाशाय ददामि त्वां हिरण्मयम् ॥ १९ ॥
रोगं विनाशय क्षिप्रं तज्जं गुह्योद्भवं महत् " ॥ २० ॥

तथा पञ्चमितैर्माषैः कार्या स्त्री गर्भसंयुता । लेख्या हिरण्मये पत्रे गंधपुष्पैः प्रपूजिता ॥ २१ ॥
ब्राह्मणाय च सा देया पूर्वपापापनुत्तये । तथा वेदमितैर्माषैः सौवर्णी प्रतिमा शुभा ॥ २२ ॥
वायोः कार्या शुभा लेख्या सा च देया कुटुंबिने । पात्रं ताम्रमयं तद्वद्घृतपूर्णं सदक्षिणम् ॥ २३ ॥
सर्वरत्नसमायुक्तं पट्टवस्त्रेण वेष्टितम् । प्रीत्यै सूर्यादिखेटानां दद्यादोषोपशान्तये ॥ २४ ॥
गायत्र्यष्टसहस्रं तु जपेदष्टाक्षरं तथा । त्र्यंबकं च सहस्रैकं ब्राह्मं तद्विगुणं तथा ॥ २५ ॥
होमयेत्तद्दशांशेन शक्त्या विप्रांश्च भोजयेत् । य एवं कुरुते सूत विधिना पापशोधनम् ॥ २६ ॥
प्राक्कर्मजान्महापापाद्व्यभिचारसमुद्भवात् । मुच्यते नात्र संदेहो रोगाच्चापि तदुद्भवात् ॥ २७ ॥
पुत्रसंततिवृद्धिः स्यात्प्रायश्चित्ते कृते त्विह । सप्तसप्ततिवर्षान्ते जीवनं कथितं त्विह ॥ २८ ॥
नैवं करोति यो मोहात्प्रायश्चित्तं प्रयत्नतः । तस्य रोगविवृद्धिः स्यात्पट्पंचाशन्मितेऽब्दके ॥ २९ ॥
स्वरिष्टं पुत्ररिष्टं वा नात्र कार्या विचारणा ॥ ३० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तनवत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३९७ ॥

श्रीसूर्य उवाच ।

या दुष्टा प्राग्भवे गर्भं पातयेदिह यत्नतः । श्रवणं हरिवंशस्य कन्योद्वाहं शिवार्चनम् ॥ १ ॥
कृत्वा पुत्रसुखं पश्येज्जन्मन्यत्र खगाधिप ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टनवत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३९८ ॥

अरुण उवाच।

कश्चित्सूतो महासाधुश्चारुवर्णः प्रतापवान्। आचारकुलधर्मज्ञो देवाग्निद्विजवत्सलः ॥ १ ॥
संयुतो वायुपित्ताभ्यां किंचित्क्लेशस्य कारिणी। तद्भार्या हि पतिप्राणा व्रतानामनुकांक्षिणी ॥२॥
ऋतुहीना कथं जाता कस्येदं कर्मणः फलम् ॥ ३ ॥

श्रीसूर्य उवाच।

नारीणां जारगर्भाणामसतीनां कुलच्छिदाम्। यद्वाचिरप्रसूतानां शीघ्रं गर्भः समुद्भवेत् ॥ ४ ॥
औषधैश्छेदनैर्मानैः प्रलेपैर्दुष्टभक्षणैः। संवाहनैस्तथा पातैरन्यैर्वा वस्तिकर्मभिः ॥ ५ ॥
गर्भस्य पातनोपायान्करोत्यपि च कीर्तयेत्। पुंस्कृतं नैव तत्कर्म स्त्रीकृतं नात्र संशयः ॥ ६ ॥
नारी जन्मान्तरे प्राप्ते न सा गर्भं बिभर्ति हि। पूर्वं वैश्यकुले जाता सपत्नीसहिता खग ॥ ७ ॥
अनया ईर्ष्यया चैव संततेर्नाशनाय च। औषधैश्छेदनाद्यैस्तु तदर्थे कल्पितो गदः ॥ ८ ॥
सपत्न्यै प्रेरयामास विधिना चैव तद्गदम्। तया वै ऋतुभावाच्च परिपीतं महौषधम् ॥ ९ ॥
पुष्पं प्रणाशितं तस्यास्तस्मिञ्जन्मनि मानद। ऋतावृतौ च संप्राप्ते जाताश्च विविधा रुजः॥१०॥
वेदना ह्यभवन्नित्यमसृग्वातोदरामयाः। पुष्पे नष्टे फलं नष्टं कदाचिद्गर्भनाशनम् ॥ ११ ॥
तया चैतत्कर्म कृतं त्रिविधं गर्भदोषकृत्। तथापि फलहंतॄणां द्वितीयं सुकृतं चरेत् ॥ १२ ॥
ऋत्वभावो दुष्टबुद्ध्या कृतो वै पूर्वजन्मनि। तेन वै कर्मणा वत्स! विविधाः पुष्पबंधनाः ॥ १३ ॥
गर्भाश्रयमधिश्रित्य स्रवते शोणितं बहु। क्षीयन्त इव चांत्राणि सूचीभिरिव तोदनम् ॥ १४ ॥
वेदना याः पुराऽभूवँस्त्रीणां गर्भनिपातने। यावत्कालं प्रदेशीयं तासां गर्भमपातयत् ॥ १५ ॥
तावानेव च तद्गर्भनाशस्यास्ति हि संभवः। एवं तु लक्षणैर्ज्ञात्वा कर्माणि स्त्री समाचरेत् ॥१६॥
एकवासोविधिं चैव दंपती तीर्थसंगमे। सुशुभे भूप्रदेशे तु पुराणोक्तविधानतः ॥ १७ ॥
संप्रणशाया दुष्टस्य प्रायश्चित्तमिहैनसः। प्रौष्ठपद्यां तृतीयायां शुक्लायां व्रतमाचरेत् ॥ १८ ॥
यत्नेन गार्भिकं सौम्यमुपोषणपरायणा। पुष्पैर्नानाविधैः शुभ्रैरर्चयेद्गिरिजाप्रियाम् ॥ १९ ॥
केतकैर्गर्भसंयुक्तश्चंपकैः कुमुदोत्पलैः। सौवर्णीं राजतीं ताम्रीं मूर्तिं गौर्याः प्रकल्पयेत् ॥ २० ॥
हारनूपुरकोटीरकुंडलाभरणादिकम्। नैवेद्यैः शुभकासीरमोदकापूपपायसैः ॥ २१ ॥
उपतिष्ठेत विधिवद्भवानीं प्रियवल्लभाम्। पतिपुत्रवतीभिस्तु स्त्रीभिः सह शुचिस्मिता ॥ २२ ॥
रात्रौ जागरणं कुर्याद्गीतनृत्यादिपूर्वकम्। फलैर्नानाविधैरर्घ्यैर्दद्यान्मंत्रपुरस्सरम् ॥ २३ ॥
फलपुष्पाक्षतोपेतमंजनं मूर्ध्नि प्रक्षिपेत्। नमस्तेऽस्तु महादेवि नमस्ते गिरिशप्रिये ॥ २४ ॥
देवीमुद्दिश्य विधिवद्भोजयेत्षोडश स्त्रियः। नानाविधैर्भक्ष्यभोज्यैर्ब्राह्मणानथ षोडश ॥ २५ ॥
प्रत्येकं वैणवं पात्रं सप्तधान्यसमन्वितम्। सौभाग्याष्टकसंयुक्तं वस्त्रयुग्मेन संयुतम् ॥ २६ ॥
दातव्यं गिरिजाप्रीत्यै पुत्रसौभाग्यकाम्यया। सगर्भां च वृषोपेतां सितां गां वस्त्रसंयुताम् ॥२७॥
सहिरण्यां ततो दद्याद्विप्राय गुणशालिने ॥ २८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवनवत्युत्तरत्रिशताधिकसहस्रतमः ॥ १३९९ ॥

श्रीसूर्य उवाच।

शशघाती महाभाग कुब्जकर्णः प्रजायते। निष्कृतिं तस्य पापस्य शृणु चात्र खगाधिप ॥ १ ॥
गां हि सोपस्करां दद्याद्वेदवेदांगवेदिने। तस्माद्दोषात्प्रमुच्येत नात्र कार्या विचारणा ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःशताधिकसहस्रतमः ॥ १४०० ॥

श्रीसूर्य उवाच ।

कश्चिच्छूद्रोऽभवत्पूर्वं दानधर्मक्रियापरः । द्विजानां पूजको दक्षः सिन्धुमण्डलगोण्डज ॥ १ ॥
देवंद्रव्यविहीनोऽभूत्तत्कृतं कर्म चाधमम् । सपत्नी स्थापिता पण्यशालायां हि पतत्रिराट् ॥ २ ॥
पण्यस्त्रीकर्मतश्चासौ चकार स्वोपर्जावनम् । ततो मृत्युवशं प्राप्तो भुक्त्वा तत्पापजं फलम् ॥ ३ ॥
प्राग्दानवशतश्चेह जन्मन्यस्ति च पर्वते । शूद्राधमोऽथ वै षण्ढः पूर्वपापप्रभावतः ॥ ४ ॥
निष्कृतिस्तस्य पापस्य नोक्ता पापाद्दृढात्सुत ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोत्तरचतुःशताधिकसहस्रतमः ॥ १४०१ ॥

श्रीसूर्य उवाच ।

या नारी नकुलं पूर्वं घातयेद्विनतासुत । सेह जन्मनि रोगेण वध्नुमण्डलजेन च ॥ १ ॥
पापोद्भवेन सततं पीडिता भवति ध्रुवम् । तद्रोगनाशनं दद्याद्भृङ्गं निष्कद्वयस्य च ॥ २ ॥
ब्राह्मणान्भोजयेत्पश्चात्पूर्वपापापनोदनम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्युत्तरचतुःशताधिकसहस्रतमः ॥ १४०२ ॥

अरुण उवाच ।

कश्चित्क्षात्रकुले जातो नानावृत्तिः किलाभवत् । नानासंधिषु बाधा वै ह्युदरार्तिश्च तस्य हि ॥ १॥
मेहादिबाधया नित्यं नेत्ररोगो विराजिमता । कटिपृष्ठोरुवंशेर्तिर्वाल्ये च ग्रहणीगदः ॥ २ ॥
तस्य भार्या सदाचारा विज्ञेया प्रीतिकारिणी । सौभाग्यसुखसंपन्ना पितृमातृसुखोज्झिता ॥ ३ ॥
कथं संततिहीना च वदोपायं च सन्ततेः ॥ ४ ॥

श्रीसूर्य उवाच ।

पूर्वं वर्णोत्तरे जातस्तस्करो वस्त्रहारकः । निषादैः सह संभूय चौर्यकर्मणि तत्परः ॥ ५ ॥
वनानामन्तरे प्राप्ते कश्चिद्विप्रः समागतः । गृहीत्वा तस्य सर्वस्वं यत्किञ्चिच्चार्जनात्कृतम् ॥ ६ ॥
स तेन निहतो विप्रस्तस्करेण दुरात्मना । तस्मादसौ मृतश्चापि वभूव वनपन्नगः ॥ ७ ॥
स पश्चान्नरके घोरे पतितोऽयुतसंख्यया । तस्मान्मानुष्यमापन्नः किंचित्पुण्यप्रभावतः ॥ ८ ॥
स्वर्णकारगृहे जातः पूर्वजन्मनि मानद । इदं चतुर्थकं जन्म वंध्यात्वं यत्र संस्थितम् ॥ ९ ॥
व्यभिचारवशाज्जातस्तस्करः पूर्वजन्मनि । तेन कर्मविपाकेन स्त्रीपुंसोर्जायते त्विह ॥ १० ॥
पुत्रहीनो भवस्तद्वद्वंध्यात्वं जन्मजन्मनि ॥ ११ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं देव येन पापक्षयो भवेत् । संततेर्हि सुखं ब्रूहि वंध्यानां हितकाम्यया ॥ १२ ॥

श्रीसूर्य उवाच ।

शुभे त्ववसरे प्राप्ते शुभतीर्थादिसंगमे । विधिवद्विहितं पूर्वं कृतं स्मृत्वाभिभाषयेत् ॥ १३ ॥
विप्रस्योद्वाहनं कृत्वा गृहदानं यथाविधि । धनधान्यादिकं दत्त्वा तोषयेद्विप्रयाजकान् ॥ १४ ॥
विष्टिपाते व्यतीपाते संक्रान्तौ ग्रहणाहनि । पुण्याहे विधिमातिष्ठेदनपत्याघनाशनम् ॥ १५ ॥
सुशुभे भूप्रदेशे तु समे कम्बलसंस्तृते । विदधीत तिलद्रोणैस्त्रिभिः पर्वतमुत्तमम् ॥ १६ ॥
परितोऽरत्निमानं तु द्रोणमानं सुतंडुलैः । विदध्यात्पर्वतान्सूत देवद्रुमविभूषितान् ॥ १७ ॥
ततस्तौ दंपती शुद्धौ स्नातावहतवाससी । दधानौ शुभवेषाढ्यौ चिंतयन्तौ प्रजापतिम् ॥ १८ ॥

तस्यादितेश्च तत्पत्न्याः कुर्यान्मूर्तिं प्रजापतेः। शुद्धवर्णसुवर्णस्य निष्कद्वयविनिर्मिताम् ॥ १९ ॥
हेमयज्ञोपवीतां च साक्षमालाकमंडलुम्। अदितेरपि केयूरहारग्रैवेयभूषिताम् ॥ २० ॥
यथावित्तविभागेन तनुं तस्याः शुभाकृतिम्। स दिव्यामर्चयेन्मूर्तिं विष्णोर्वामनरूपिणः ॥ २१ ॥
तन्मूर्तित्रितयं सम्यक्कृतसंस्कारमर्चयेत्। कृत्वा प्रतिष्ठितप्राणं ज्ञातकर्मादि पुँस्त्रियोः ॥ २२ ॥
बाललीलाधरं विष्णुं वामनं परिचिंतयेत्। मातरं द्रष्टुमिच्छंतं हरिं तत्स्तनकांक्षया ॥ २३ ॥
ततस्तदाश्रमाच्चैव सुमेरोस्तिलपर्वतात्। प्रत्यंतगिरिमिच्छंतं मार्गैः स्वपदभूषितैः ॥ २४ ॥
अदितिं समपश्यंतीं विरहाकुलचेतसम्। रुदतीमिति तं द्रष्टुं तत्परीन्समीक्षतीम् ॥ २५ ॥
एवं ध्यात्वा तथा मंत्रैर्मंत्रार्थोदितलक्षणाम्। पुष्पैश्च धूपगंधाद्यैरर्चयेदति विह्वलाम् ॥ २६ ॥
तद्विप्रासोऽथ तद्विष्णोः विष्णोः कर्माणि पश्यत। ततस्तां वैष्णवीं मूर्तिं मातुरुत्संगगामिनीम् २७
कृत्वा तस्याः प्रतिष्ठान्तं लब्धपुत्रान्विचिन्तयेत्। अपश्यन्तीमितिप्रोक्तमंत्रार्थगुणलक्षणाम्॥२८॥
सपुत्रां खलु तां देवीमर्चयेद्विविधैर्गुणैः। ततो ब्राह्मणमध्यात्तु समाहूय गुणान्वितम् ॥ २९ ॥
तस्मै तां प्रतिमां दद्यात्सपुत्रामदितेः सुताम् ॥ ३० ॥

मंत्रः।

" यन्मया निहतो विप्रो धनं हृत्वाध्वगस्य हि। तस्करैस्सह संप्राप्तं पातकं चोल्वणं महत्॥३१॥
तस्य पापस्य नाशाय दानमेतद्ददाम्यहम् " ॥ ३२ ॥
सौवर्णीं प्रतिमामेनां भवेयमनघेति च। भोजयेच्च शतं विप्रान्सर्पिष्यात्मानमीक्षयेत् ॥ ३३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्युत्तरचतुःशताधिकसहस्रतमः ॥ १४०३ ॥

श्रीसूर्य उवाच।

उलूकघातनात्पूर्वं जन्मन्यत्र च पुत्रक। पांडुरोगेण सततं पीडितो वै भवेद्भृशम् ॥ १ ॥
कस्तूरिकापलं चैकं दद्याद्विप्राय पर्वणि। उलूकघातजं पापं सर्वं नश्यति तत्क्षणात् ॥ २ ॥
तस्मिन्पापे विनष्टे तु पांडुरोगो विनश्यति ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरुत्तरचतुःशताधिकसहस्रतमः ॥ १४०४ ॥

श्रीसूर्य उवाच।

या नारी घातयेत्काचिदुलूकं पूर्वजन्मनि। पांडुरोगेण सततं पीड्यते चात्र जन्मनि ॥ १ ॥
दद्यादिह विधिज्ञाय पलमेकं खगाधिप। कस्तूरिकाया विप्राय पांडुरुङ्नाशनं परम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चोत्तरचतुःशताधिकसहस्रतमः ॥ १४०५ ॥

श्रीसूर्य उवाच।

वैनतेय महाभाग शृणु प्राक्कर्मणः फलम्। पुरा कश्चित्कलिंगेऽभूद्विजो धर्मक्रियापरः ॥ १ ॥
बहुस्त्रीकुलसंयुक्तो गोधनैश्च समन्वितः। गयायां कृतवान्योऽथ श्राद्धं दानं विशेषतः ॥ २ ॥
तच्छ्राद्धदानबाहुल्याद्विजो जातो दशार्णके। प्राक्पापात्तु महाभाग व्यभिचारादपुत्रकः ॥ ३ ॥
प्रयागे मकरे स्नानाद्गायत्रीजपतो मृतिः। काश्यां जातो द्विजो वेदाभ्यासी धर्मपरायणः ॥४ ॥
स गृहस्थाद्वियुक्तश्च शिवार्चनरतः सदा। लब्ध्वा सर्वं सुखं चात्र शिवलोकमवाप्नुयात् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडुत्तरचतुःशताधिकसहस्रतमः ॥ १४०६ ॥

श्रीसूर्य उवाच ।

पृच्छकोसावभूत्पूर्वं राजपुत्रः प्रतापवान् । पुलिंददेश उत्पन्नो विष्णुभक्तिपरायणः ॥ १ ॥
स्त्रीपुत्रधनसंयुक्तो धर्मशास्त्रक्रियारतः । कृतवान्स गयाश्राद्धं यथाविभवविस्तरम् ॥ २ ॥
गोभूहिरण्यवस्त्राश्वरत्नान्नादि विधानतः । भक्ष्यशय्यासनादीनि प्राददत्पंचपर्वसु ॥ ३ ॥
सत्पात्रेषु महाभाग विविधानि गृहाण्यपि । ततो भाविवलात्सूत कृतवान्कर्म दारुणम् ॥ ४ ॥
ग्रामान्तरे संस्थितस्य शत्रोः सीमापहारिणः । निर्दग्धं हि गृहं तेन रात्रौ चौर्येण कर्मणा ॥ ५ ॥
तस्मिन्दग्धे महाभाग दग्धश्चास्य सुतः शिशुः । स्त्रियौ च गौः सवत्सा च निर्दग्धा गृहजंतवः ६ ॥
यौवने स्त्रीसाहाय्याच्च पापमाचरितं पुरा । अथो किंचिद्गते काले स गतो यमशासनम् ॥ ७ ॥
पापात्पापफलं भुक्त्वा पुण्यात्स्वर्गफलं तथा । गयाश्राद्धप्रभावेण स जातो ब्राह्मणोऽधुना ॥ ८ ॥
यमुनाप्रान्तरे देशे पंचयोजनसम्मिते । गौरस्वरूपो मतिमान्दंडदाक्षिण्यतत्परः ॥ ९ ॥
नातिदीर्घो नातिह्रस्वो वातपित्तात्मको घृणी । सभायां चतुरो धीरो बहुस्थानेऽधिकारवान् ॥ १० ॥
बहुस्त्रीको दृढो मानी पितृमातृसुखाल्पकः । चलः स्वधर्मनिरतो बहुभृत्यजनैर्वृतः ॥ ११ ॥
राजमान्यो महोत्साहोऽमितदो लोकविश्रुतः । धनवाहनभोगानां भोक्ता बहुजनप्रियः ॥ १२ ॥
आदिमध्यावसानेषु सुखैश्वर्यसमाकुलः । धर्मादिदं तथा पापाल्लोभी पापरतः क्वचित् ॥ १३ ॥
धूर्तः शठोऽतिदंभाढ्यो परस्वहरणे रतः । क्लेशैर्भयैर्मनोदुःखैर्व्ययैश्चापि प्रपीडितः ॥ १४ ॥
गोवालवत्सकवधादग्निदाहात्पुराकृतात् । कन्यादुःखान्वितस्त्वत्र जातपुत्रविनाशकः ॥ १५ ॥
स्त्रीसाहाय्यात्पुण्यपापान्मृतस्यैवं विचारयेत् । लक्षणैरेभिराढ्यस्य प्रभुरत्रैव जन्मनि ॥ १६ ॥
गोस्त्रीबालवधान्नूनं पुत्रनाशकरा यतः । प्रायश्चित्तं प्रवक्ष्यामि येन पापात्प्रमुच्यते ॥ १७ ॥
दशभिस्तु पलैः कार्या सुरभी वत्ससंयुता । हिरण्मयी यथाकारा पत्रे लेख्या विधानतः ॥ १८ ॥
तदर्धमितिका वापि निजवित्तानुसारतः । संपूज्य गन्धपुष्पाद्यैर्मन्त्रैश्चापि विशेषतः ॥ १९ ॥
सा च देया विधिज्ञाय पूर्वपापापनुत्तये । तथा सुवर्णैकमितः शिवः स्त्रीपुत्रसंयुतः ॥ २० ॥
संपूज्य विधिवद्द्यात्सर्वपापहरो हरः । तदर्धमितिको ह्यग्निर्देयः पापविनाशकृत् ॥ २१ ॥
दशमाषमिता जीवा ग्रामदाहेऽपि ये मृताः । देया हिरण्मये पत्रे लिखित्वा बालकादयः ॥ २२ ॥
गायत्र्यष्टसहस्रं तु त्र्यम्बकं तन्मितं जपेत् । अष्टाक्षरं त्रिसाहस्रं जपेत्पापविशोधनम् ॥ २३ ॥
होमयेत्तद्दशांशेन शक्त्या विप्रांश्च भोजयेत् । गामेकां विधिवद्द्यात्सर्वपापविनाशिनीम् ॥ २४ ॥
य एवं कुरुते सूत विधिना पापशोधनम् । तस्य पुत्रविवृद्धिः स्याज्जन्मन्यत्र न संशयः ॥ २५ ॥
नाधयो व्याधयस्तस्य न चारिष्टभयं भवेत् । पञ्चाशीत्यब्दपर्यन्तमायुः स्यात्पापशोधनात् ॥ २६ ॥
न करोति यदा लोभात्त्रिष्वेकं पापशोधनम् । न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः ॥ २७ ॥
वर्षे षष्टिमिते रिष्टं देहान्तो वा धनक्षतिः । प्रायश्चित्ते कृते सूत स्त्रीपुत्रसुखमाप्नुयात् ॥ २८ ॥
न पश्यति तदा रिष्टं देहजं धनजं तथा । कर्कस्थिते शनौ जातो देहान्तो वृषभस्थिते ॥ २९ ॥
जन्मादिनिधनान्तं हि स्वल्पमेवात्र सूचितम् । यद्यदंतर्गतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ ३० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तोत्तरचतुःशताधिकसहस्रतमः ॥ १४०७ ॥

श्रीसूर्य उवाच ।

या काचिद्ब्राह्मणी पूर्वभवे मोहात्सुरां पिबेत् । प्रदरेणैव रोगेण पीड्यतेऽत्रेह जन्मनि ॥ १ ॥

भास्करं चात्र सौवर्णं दद्यात्पलमितं सुत । संपूज्य गंधपुष्पाद्यैः प्रदरान्मुच्यते त्विह ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टोत्तरचतुःशताधिकसहस्रतमः ॥ १४०८ ॥

श्रीसूर्य उवाच ।

बभूव बाहुजः कश्चिदंगदेशसमुद्भवः । राजमंत्री महोग्रस्तु क्षात्रधर्मरतः सुधीः ॥ १ ॥
धर्मशास्त्रक्रियायुक्तः शिवभक्तिपरायणः । बहुवृत्तिधरो धीरो राजकार्येषु तत्परः ॥ २ ॥
सुखैश्वर्यसमाक्रांतो बहुस्त्रीपुत्रसंयुतः । स चकार महादानं शिवप्रियकरं परम् ॥ ३ ॥
वस्त्रभूषणभक्ष्याणि गोऽश्वशय्यासनानि च । अददत्प्राग्भवे सूत सर्वमेव स्वशक्तितः ॥ ४ ॥
स कदाचिद्गतो दैवादाज्ञप्तः प्रभुणा पुरा । यौवनेऽरिपुरं तेन प्राप्य गावः समाहृताः ॥ ५ ॥
तदाज्ञप्तजनैश्चात्र ताडिता व्याकुलीकृताः । तत्रैका सुरभी सूत ह्यासन्नप्रसवाऽभवत् ॥ ६ ॥
तद्गर्भपातो ह्यभवत्तद्दुःखेन च सा मृता । राजकार्येऽतिलोभाच्च पापमुग्रमुपार्जितम् ॥ ७ ॥
पापपुण्ययुतः प्रांतो जीवनान्ते यमालयम् । तत्र भुक्त्वा शुभाँल्लोकान्पुण्यात्पापात्तथेतरान् ॥ ८ ॥
शिवयागप्रभावेण स जातो ब्राह्मणोऽधुना । युग्मे लग्ने धनोरंशेऽनलभे मेषगे रवौ ॥ ९ ॥
प्राग्भागे चंद्रभागायां ऐरावत्यास्तथोत्तरे । गौरो मध्यमरूपाढ्यो नात्युच्चैर्न लघुर्घृणी ॥ १० ॥
यशस्वी प्रियवाक्शान्तः पैत्तिकोऽतिजनैर्वृतः । सभायां चतुरो धीरो विख्यातो राजसेवकः॥ ११॥
स्त्रीभ्रातृधनभोगाढ्यः पुत्रपौत्रसमन्वितः । देशेदेशेऽधिकाराढ्यो बहुवाहनभोगभाक् ॥ १२ ॥
यौवनांतेऽतिधनवान्सुखैश्वर्यसमाकुलः । शिवयागादिदं सर्वं पापात्पापफलं शृणु ॥ १३ ॥
क्वचित्पापरतो धूर्तो लोभमोहसमाश्रितः । शठः क्रोधरतो हीनः स्वाधिकाराच्चलाचलः ॥ १४ ॥
बाल्ये मातृसुखैर्हीनोऽमितदो बहुकन्यकः । क्लेशैर्भयैर्मनोदुःखैर्यूनंते तापितः क्वचित् ॥ १५ ॥
गोदुःखजात्पूर्वपापाद्यौवनेस्त्रीवधो भवेत् । प्रष्टरत्र कनिष्ठायां स्वल्पं पुत्रसुखं त्विह ॥ १६ ॥
चिह्नमङ्गादिदं सूत प्रष्टरत्रैव जन्मनि । गवां दंडाहतात्पापादंडराशिगतो गुरुः ॥ १७ ॥
लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् । सुवर्णैः पञ्चभिः कार्या सवत्सा सुरभी सुत ॥ १८ ॥
तदर्धमितिका वापि निजवित्ताऽनुसारतः । संपूज्य गंधपुष्पाद्यैर्मंत्रैश्चापि विशेषतः ॥ १९ ॥
सा च देया विधिज्ञाय मंत्रमेतमुदीरयेत् ॥ २० ॥

मन्त्रः ।

" मया पूर्वं त्वमज्ञानात्पीडिता सुरभि पुरा ॥ २१ ॥
तद्दोषशमनायैव ददेऽहं त्वां हिरण्मयीम् । देवि त्वं मम पापानि तत्क्षणाद्भस्मसात्कुरु" ॥२२ ॥
इत्युच्चार्य नरो दद्यात्पूर्वपापात्प्रमुच्यते । तस्मादर्धमितं हैमं दद्यात्पशुपतिं विभुम् ॥ २३ ॥
पुत्रपौत्रविवृद्ध्यर्थं पूर्वपापापनुत्तये । त्र्यंबकं लक्षमर्धं वा तदर्धं वा जपेद्बुधः ॥ २४ ॥
गायत्र्यष्टसहस्रं तु जपित्वा शुद्धिमाचरेत् । होमयेत्तद्दशांशेन शक्त्या विप्रांश्च भोजयेत् ॥ २५ ॥
य एवं कुरुते सूत विधिना पापशोधनम् । तस्य पुत्रविवृद्धिः स्याज्जन्मन्यत्र न संशयः ॥ २६ ॥
स्वाधिकारप्रवृद्धिः स्यात्सुखैश्वर्यविशेषतः । नाधयो व्याधयस्तस्य नच शत्रुभयं भवेत् ॥ २७ ॥
सप्तसप्ताब्दमायुः स्यात्प्रायश्चित्ते कृते त्विह । द्विपञ्चाशन्मिते वर्षे रिष्टं चाकृतनिष्कृतेः ॥ २८ ॥
कन्यागते शनौ जातो निधनं मेषगे तथा । शस्त्रैश्च शशिराशिस्थे रवौ मेषगते तथा ॥ २९ ॥
जन्मादिमरणांतं हि स्वल्पमेवात्र सूचितम् । यद्यदंतर्गतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ ३० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवोत्तरचतुःशताधिकसहस्रतमः ॥ १४०९ ॥

श्रीसूर्य उवाच ।

बभूव बाहुजः कश्चित्पूर्वजन्मनि यामुने । स्त्रीपुत्रभ्रातृसंयुक्तो धनधान्यसमन्वितः ॥ १ ॥
क्षात्रधर्मरतः शूरो विष्णुभक्तिपरायणः । स च प्रादात्कुरुक्षेत्रे सर्वस्वं विधिनांडज ॥ २ ॥
महापर्वसु विप्रेभ्यो दरिद्रेभ्योऽपि शक्तितः । ततो बहुतिथे काले स्वस्थानं प्राप्य बाहुजः ॥ ३ ॥
स चकार महापापं भाविनोर्थस्य गौरवात् । ऋतुप्राप्तां स्त्रियं ज्येष्ठां संत्यज्य प्रियवादिनीम् ॥ ४॥
रतिं ददौ कनिष्ठायामनृतौ कामलोभतः । अथ केनापि विप्रेण स्थापितं तद्गृहे धनम् ॥ ५ ॥
घटस्थं न पुनर्दत्तं तस्मै लोभाच्च तद्वसु । स्त्रीपुत्रभ्रातृभिः सर्वैर्भुक्तं तेनाप्यसद्धनम् ॥ ६ ॥
प्रायश्चित्तोद्यतः सोऽपि प्राप्तो मृत्युवशं तदा । स भुक्त्वा पापपुण्योत्थं फलं तत्र खगेश्वर ॥ ७ ॥
सर्वस्वदानात्प्रागत्र द्विजोऽसौ नृपपूजितः । चिह्नमत्र घटे लग्ने जातो ब्रह्मस्वभक्षणात् ॥ ८ ॥
गौरो मध्यमरूपाढ्यो मन्त्रविद्रक्तपित्तभाक् । धर्मज्ञो नीतिविद्विद्यास्त्रीपुत्रसुखसंयुतः ॥ ९ ॥
लघुर्दयालुर्विख्यातो बहूनां हितकारकः । क्लेशचिंतादिभीत्याढ्यः पापात्पापफलं त्विह ॥ १० ॥
स्त्रीत्यागाद्रूपणात्पापाज्जातपुत्रविनाशकः । सप्तपञ्चाशदब्दांतमपि ब्रह्मस्वभक्षणात् ॥ ११ ॥
या कनिष्ठा सहाया प्राक्सा ज्येष्ठात्र मृतात्मजा । बहवः प्राक्सहाया ये ते मृताः शिशवोऽत्रच१२
लक्षणैरेभिराढ्यस्य शृणु पापविशोधनम् । लक्ष्मीनारायणं कुर्यात्सौवर्णं द्विपलात्मकम् ॥ १३ ॥
समुल्लिख्य शुभे पत्रे तदर्धमितके तथा । तल्लिंगमंत्रैः संपूज्य षोडशोपचारकैः ॥ १४ ॥
दद्याद्विप्रवरायैव पूर्वपापापनुत्तये । शिवं च तन्मितं दद्यात्सपत्नीकं सुतान्वितम् ॥ १५ ॥
शतैः पलैस्तु ताम्रस्य घटं दद्यात्तदर्धकम् । वा स्वर्णस्य घटं शक्त्या गोघृतेन प्रपूरितम् ॥ १६ ॥
दद्याद्वेदविधिज्ञाय ब्रह्मस्वाघविनाशनम् । गायत्र्यष्टसहस्रं तु तद्वदष्टाक्षरं जपेत् ॥ १७ ॥
त्र्यंबकं द्विगुणं चापि सर्वपापविशोधनम् । होमयेच्च तिलाज्यशक्त्या ब्राह्मणान्भोजयेच्छुभान्॥१८॥
एकादशसहस्राणि पश्चात्कुर्याच्च पार्थिवान् । दद्यात्सुवर्णभौमं च ऋतुदोषोपशांतये ॥ १९ ॥
मम जन्मदिने सूत व्रतं कुर्यात्प्रयत्नतः । अनेन विधिना यस्तु कुर्यात्पापविशोधनम् ॥ २० ॥
स्त्रीत्यागात्पूर्वजात्पापात्तथा ब्रह्मस्वभक्षणात् । मुच्यते नच संदेहो नचारिष्टभयं भवेत् ॥ २१ ॥
अशीतिमितवर्षान्तं जीवनं कथितं त्विह । गंगायां निधनं प्रोक्तं तस्य स्वर्गगतिर्ध्रुवम् ॥ २२ ॥
स्त्रीपुत्रसुखवृद्धिः स्यान्न च शत्रुविवर्धनम् । नाधिव्याधिभयं तस्य प्रायश्चित्ते कृतेऽत्र च ॥ २३ ॥
त्रिषष्टिमितके वर्षे पंचसप्ततिके तथा । चतुर्विधं महारिष्टं तस्य चाकृतनिष्कृतेः ॥ २४ ॥
ध्वजे मेषगते जन्म निर्याणं वृश्चिके स्थिते ॥ २५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो दशोत्तरचतुःशताधिकसहस्रतमः ॥ १४१० ॥

श्रीसूर्य उवाच ।

वैनतेय महाभाग शृणु चास्य विचेष्टितम् । राजपुत्रोऽभवत्कश्चित्पृच्छकोऽसौ पुरानघ ॥ १ ॥
गंगासमाश्रिते देशे युग्मयोजनसम्मिते । ग्रामाध्यक्षो महातेजा धर्मशास्त्रक्रियायुतः ॥ २ ॥
शिवभक्तिपरो विद्वान्मंत्रविच्चारुचेष्टितः । पुत्रमित्रादिमानाढ्यो धनधान्यसमाकुलः ॥ ३ ॥
दत्तानि तेन दानानि प्रयागे मकरेऽपि च । अन्यपर्वसु विप्रेभ्यो वस्त्राश्वाभरणानि च ॥ ४ ॥
गोभूशय्यासनादीनि भक्ष्याणि विविधानि च । सत्पात्रेषु गृहस्थेषु श्रद्धापूतेन चेतसा ॥ ५ ॥
अथो भाविबलात्तेन कामलुब्धेन यौवने । ब्राह्मण्यां धारितो गर्भः पापमाचरितं त्विदम् ॥ ६ ॥
यत्ने कृतेऽपि बहुशो नासीद्गर्भस्य पातनम् । ततो लोकभयात्सूत विषं भुक्त्वा तु सा मृता ॥ ७ ॥

स्त्रीसहायेन तेनैव कृतं प्राक्कर्म दारुणम्। ततो वहुतिथे काले ससहायो हि वाहुजः ॥ ८ ॥
प्राप्य धर्मपुरं तत्र शुभाशुभविवेचनम्। पापात्पापफलं भुक्त्वा पुण्यात्स्वर्गांश्च शाश्वतान् ॥ ९ ॥
तीर्थराजप्रभावात्प्राग्दानाच्च विधिवत्तथा। सरस्वत्याः परे देशे जांगले नखयोजने ॥ १० ॥
कुले महति पक्षीन्द्र जातो वन्दीजनोऽधुना। गौरः सुरूपो मतिमान्सुशीलश्च दयापरः ॥ ११ ॥
चंचलो दर्शनीयाक्षो नात्युच्चो न लघुः क्षमी। वाचा मधुरया युक्तो राजसेव्यथ मंत्रवित् ॥ १२ ॥
उपकारपरो विद्वान्वली सर्वजनप्रियः। कुलाग्रणीर्यशस्वी च भृत्यवाहनभोगभाक् ॥ १३ ॥
धर्मादिदं तथा पापाल्लोभी पापरतः क्वचित्। धूर्तः शठोऽतिमितदो पितृसौख्यविवर्जितः ॥ १४ ॥
किंचिद्वुजास्ति जठरे पित्ताधिक्योऽतिवीर्यभाक्। ब्राह्मण्यां वीर्यपातात्प्राग्गर्भपाताच्च तद्धात् १५ ॥
अत्र जन्मन्यसौ प्रष्टा पुत्रसौख्यविवर्जितः। या स्त्री पूर्वं सहायासीत्पापकर्मणि चांडज ॥ १६ ॥
सा प्रष्टुरत्र वनिता पुत्रदुःखात्प्रपीडिता। गोस्त्रीविप्रवधं पापं पुत्रदुःखकरं यतः ॥ १७ ॥
प्रष्टुर्ललाटादिदं चिह्नं सूर्यः स्त्रीराशिगः किल। अत्युग्राद्वै पूर्वपापाद्राहुरुच्चगृहे गतः ॥ १८ ॥
लक्ष्योऽत्र लक्षणैरेभिः प्रायश्चित्तं वदाम्यहम्। पलैर्दशमितैः कार्या ब्राह्मणी च हिरण्मयी ॥ १९ ॥
पत्रे लेख्या शुभाकारा सगर्भावयवान्विता। वा तद्धर्धहिरण्येन यथावित्तानुसारतः ॥ २० ॥
संपूज्य गंधपुष्पाद्यैर्मन्त्रैश्चापि विशेषतः। सा च देया विधिज्ञाय मंत्रमेतमुदीरयेत् ॥ २१ ॥

मन्त्रः।

'सौवर्णीं ब्राह्मणीमेनां सगर्भां सोमदैवताम्। ददेऽहं विप्रमुख्याय पूर्वपापविशुद्धये" ॥ २२ ॥
ब्राह्मणं हेमजं दद्यात्पलैर्युग्ममितैः शुभम्। तदर्धमितकं वापि निजवित्तानुसारतः ॥ २३ ॥
सोमं दद्यात्पलैकं तु हैमं पापविशुद्धये। पलेनार्धपलेनापि कमलं हेमजं शुभम् ॥ २४ ॥
संपूज्य गन्धपुष्पाद्यैर्मन्त्रैश्चापि विशेषतः। ब्राह्मणाय प्रदद्याच्च सर्वपापविशुद्धये ॥ २५ ॥
गायत्र्यष्टसहस्रं तु त्र्यम्बकं तन्मितं जपेत्। अष्टाक्षरं तदर्धं तु जपेद्दोषनुत्तये ॥ २६ ॥
होमयेत्तद्दशांशेन तिलाज्ययवतण्डुलैः। विप्रेभ्यो दक्षिणां दद्याच्छक्त्या विप्रांश्च भोजयेत् ॥ २७ ॥
यथाविधि हरेर्वेशं शृणुयाद्वहुपुत्रदम्। य एवं कुरुते सूत शक्त्या पापविशोधनम् ॥ २८ ॥
लभतेऽसौ पुत्रसुखं स्त्रीभ्यामत्रैव जन्मनि। नाधयो व्याधयस्तस्य न वीर्यक्षयमाप्नुयात् ॥ २९ ॥
न करोति यदा लोभाद्त्रिष्वेकं पापशोधनम्। न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः ॥ ३० ॥
पञ्चवेदमिते वर्षे रिष्टं चाकृतनिष्कृतेः। प्रायश्चित्ते कृते तस्य वर्षाणां पञ्चसप्ततिम् ॥ ३१ ॥
जीवनं कथितं त्वत्र न चारिष्टभयं भवेत्। न भवेत्पुत्रमरणं निर्याणान्ते शुभा गतिः ॥ ३२ ॥
जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् ॥ ३३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकादशोत्तरचतुःशताधिकसहस्रतमः ॥ १४११ ॥

श्रीसूर्य उवाच।

वैनतेय महाभाग शृणु चास्य विचेष्टितम्। कश्चित्क्षात्रकुले जातश्चोग्रकर्मा प्रतापवान् ॥ १ ॥
अंगदेशे धनाढ्यस्तु ग्रामाध्यक्षोऽतिधार्मिकः। बन्धुस्त्रीसंयुतो विप्रवंशाराधनतत्परः ॥ २ ॥
पितृभक्तिपरो विद्वान्वली मात्सर्यसंयुतः। स चकार गयाश्राद्धं यौवने विधिनाण्डज ॥ ३ ॥
काम्यश्राद्धानि दत्तानि विविधानि फलाप्तये। पर्वस्वपि च गोधान्यवस्त्राश्वासनकाञ्चनम् ॥ ४ ॥
अथो पापं कृतं तेन भाविनोऽर्थस्य गौरवात्। वैरभाववशाद्रात्रौ स्वकुले क्रूरचेतसा ॥ ५ ॥
अन्यग्रामाधिपस्यापि क्षात्रियस्य विजानता। ह्येकपुत्रस्य वै पुत्रो घातितश्चोग्रकर्मणा ॥ ६ ॥

तत्पिता तेन दुःखेन मृतः पूर्वमपुत्रकः । तत्स्त्री तेनैव दुःखेन पुत्रकष्टेन वै मृता ॥ ७ ॥
स्त्रीभ्यां सहाययुक्तेन कृतं कर्मातिदारुणम् । ततो बहुतिथे काले ससहायो हि बाहुजः ॥ ८ ॥
धर्माधर्मयुतस्तत्र गतो यमपुरं प्रति । पापात्पापफलं भुक्त्वा पुण्यात्स्वर्गांश्च शाश्वतान् ॥ ९ ॥
गयाश्राद्धप्रभावेण चान्नदानेन मानद । ऐरावतीप्रदेशे तु स जातो ब्राह्मणोऽधुना ॥ १० ॥
रक्तश्यामः सुशीलश्च नात्युच्चो न लघुर्घृणी । नानाभोगसुखैश्वर्यधनाढ्यो दानमानयुक् ॥ ११॥
सभायां चतुरो धीरो विद्वान्धर्मार्थसाधकः । बन्धुस्त्रीमित्रसंयुक्तो भृत्यवाहनभोगभाक् ॥ १२ ॥
धर्मादिदं तथा पापाल्लोभी पापरतः क्वचित् । धूर्तः पित्ताधिकः शाठ्यमनोदुःखसमन्वितः ॥१३॥
पितृहीनोऽलसो भीरुश्चोदरे तु व्यथा क्वचित् । पूर्वं बालवधात्पापात्पुत्रसौख्यविवर्जितः ॥ १४ ॥
या स्त्री पूर्वं सहायाभूद्वधकर्मणि चाण्डज । सा ज्येष्ठा भ्रष्टरत्रासीन्मृता पुत्रविवर्जिता ॥ १५ ॥
बालयौवनसंप्राप्ता पुत्रदुःखाकुला गता । या द्वितीया सहाया प्राक्सा कनिष्ठात्र जन्मनि॥ १६ ॥
भ्रष्टुर्युवतिरत्रास्ति पुत्रशोकप्रपीडिता । स्त्रीबालद्विजघाताद्याः पुत्रनाशकराः स्मृताः ॥ १७ ॥
तस्य लग्नादिदं चिह्नं तनावर्को न संशयः । श्रुत्वैवं विधिवत्कुर्याद्विधानं हि समाहितः ॥ १८ ॥
न तस्य पुत्रमरणं भविष्यति ममाज्ञया । धनपुत्रान्वितो मध्ये ह्यायुरष्टाद्विवत्सरम् ॥ १९ ॥
रिष्टं षष्टिमितेब्दे तु तस्य चाकृतनिष्कृतेः ॥ २० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वादशोत्तरचतुःशताधिकसहस्रतमः ॥ १४१२ ॥

श्रीसूर्य उवाच ।

कीरदेशे समुत्पन्नः कश्चित्क्षात्रकुले सुधीः । विप्रोत्संगगतस्तत्र प्रयागे मकरे वसन् ॥ १ ॥
कृतवान्विधिवत्स्नानं दानं स्वल्पं च शक्तितः । दैवयोगाद्गृहं प्राप्य कृतवान्कर्म दारुणम् ॥ २ ॥
कामलोभेन सततं शूद्रचां गर्भं दधार वै । स्त्रीभ्यां सहाययुक्तेन पापमाचरितं तथा ॥ ३ ॥
विविधैरौषधैस्तस्या गर्भपातः कृतः पुरा । एवं सर्वैर्मिलित्वा तु पातकं बहुधा कृतम् ॥ ४ ॥
ततो बहुतिथे काले गतास्ते यमशासनम् । भुक्त्वा पापफलं पापात्पुण्यात्पुण्यफलं तथा ॥ ५ ॥
तीर्थराजप्रभावेण स जातो ब्राह्मणोऽधुना । सेज्ये शनौ सिंहगते सूर्ये कन्यागते कुजे ॥ ६ ॥
मृगे ह्यैरावतीतीरे नात्युच्चो न लघुः सुधीः । श्लिष्टवाक्स्वल्पधर्माढ्यः पितृमातृविवर्जितः॥ ७ ॥
सहोदरधनैर्हीनो जातपुत्रविनाशकः । परदाराभिगमनाद्गर्भपातनदोषजात् ॥ ८ ॥
पापात्पूर्वकृतात्सूत लक्षणैर्लक्षयेदिह । स्त्रीसाहाय्यात्तथा सूत प्राक्पापं समुपार्जितम् ॥ ९ ॥
तेनैकास्त्यत्र पत्नी च तस्य पुत्रशुचान्विता । तथान्या बहुपापत्वाद्भ्रातुः पत्न्यग्रजस्य च॥१०॥
पुत्रभर्तृसुखैर्हीना नानारोगसमन्विता । पूर्वं यो हि सहायोऽभूत्स हि भ्राताग्रजस्त्विह ॥ ११ ॥
पृच्छकस्य समस्तास्ते क्षयरोगप्रपीडिताः । चान्द्रायणव्रतं कुर्याद्बालरूपं हरिं यजेत् ॥ १२ ॥
सर्वस्वदानादत्रैव क्षयरोगः प्रशाम्यति । कुरुक्षेत्रादितीर्थेषु सत्पात्रेषु विधानतः ॥ १३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोदशोत्तरचतुःशताधिकसहस्रतमः ॥ १४१३ ॥

अरुण उवाच ।

कश्चिद्विप्रो महासाधुश्चातुर्वर्ण्ये प्रतापवान् । आचारकुलधर्मज्ञो देवाग्निद्विजवत्सलः ॥ १ ॥
संयुतो वायुपित्ताभ्यां किंचिद्वित्तसमन्वितः । तस्य भार्या सदाचारा किंचित्क्लेशस्य कारिणी ॥२॥
पतिभक्ता पतिप्राणा व्रतानामनुकांक्षिणी । पुत्रहीना कथं जाता कस्येदं कर्मणः फलम् ॥ ३ ॥

श्रीसूर्य उवाच।

नारीणां जारगर्भाणामसतीनां कुलच्छिदाम्। यद्वा चिरप्रसूतानां शीघ्रं गर्भः समुद्भवेत् ॥ ४ ॥
औषधैश्छेदनाद्यैस्तु प्रलेपैर्दुष्टभक्षणैः। संवाहनैस्तथा पातैरन्यैर्वा वलिकर्मभिः ॥ ५ ॥
गर्भस्य पातनोपायान्करोत्यपि च कीर्तयेत्। पुंस्कृतं नैव तत्कर्म स्त्रीकृतं नात्र संशयः ॥ ६ ॥
नारी जन्मान्तरे प्राप्ते न सा गर्भं विभर्ति हि। पूर्वं वैश्यकुले जाता सपत्नीसहिता खग ॥ ७ ॥
अनया ईर्ष्यया चैव संततेर्नाशनाय च। औषधैश्छेदनाद्यैस्तु तदर्थं कल्पितो गदः ॥ ८ ॥
सपत्न्यै प्रेरयामास विविधांश्चैव सा गदान्। तदा वै ऋतुभावाच्च तया पीतं तदौषधम् ॥ ९ ॥
पुष्पं प्रणाशितं तस्यास्तस्मिञ्जन्मनि मानद। ऋतावृतौ च संप्राप्ते जाता सा विविधातुरा ॥ १० ॥
वेदना ह्यभवन्नित्यमसृग्वातोदरामयाः। पुष्पे नष्टे फलं नष्टं कदाचिद्गर्भपातनम् ॥ ११ ॥
तया चैतत्कर्म कृतं गर्भदोषकरं महत्। तथापि फलहंतॄणां द्वितीयं सुकृतं चरेत् ॥ १२ ॥
स्त्रीभावाद्दुष्टबुद्ध्या च यत्कृतं पूर्वजन्मनि। तेन वै कर्मणा वत्स विविधाः पुष्पबंधनाः ॥ १३ ॥
गर्भाश्रयमधिश्रित्य स्रवति शोणितं बहु। छिद्यन्त इव चांगानि सूचीभिरिव वेदनाः ॥ १४ ॥
वेदना याः पुराऽभूवंस्त्रीणां गर्भनिपातने। यावत्कालं प्रदेशीयं तासां गर्भमपातयत् ॥ १५ ॥
तावानेव च तद्गर्भः पतेद्वा नास्य संभवः। एवं तु लक्षणैर्ज्ञात्वा कर्माणि स्त्री समाचरेत् ॥ १६ ॥
एकवासोविधिं चैव दंपती तीर्थसंगमे। सुसमे भूप्रदेशे तु पुराणोक्तविधानतः ॥ १७ ॥
संप्रणाशाय दुःखस्य प्रायश्चित्तमिहैनसः। प्रौष्ठपद्यां तृतीयायां शुक्लायां व्रतमाचरेत् ॥ १८ ॥
यत्नेन गार्भिकं नाम ह्युपोषणपरायणा। पुष्पैर्नानाविधैः शुभ्रैरर्चयेद्गिरिजाप्रियम् ॥ १९ ॥
केतकैर्गर्भसंयुक्तैश्चंपकैः कुमुदोत्पलैः। सौवर्णीं राजतीं ताम्रीं मूर्तिं गौर्याः प्रकल्पयेत् ॥ २० ॥
हारनूपुरमुकुटकुण्डलाभरणान्विताम्। नैवेद्यैः पुष्पकासारमोदकापूपपायसैः ॥ २१ ॥
उपातिष्ठेत विधिवद्भवानीं प्रियवल्लभाम्। पतिपुत्रवतीभिस्तु स्त्रीभिः सह शुचिस्मिता ॥ २२ ॥
रात्रौ जागरणं कुर्याद्गीतनृत्यादिपूर्वकम्। फलैर्नानाविधैरर्चेदार्यां मन्त्रपुरःसरम् ॥ २३ ॥
फलपुष्पाक्षतोपेतमञ्जनं मूर्ध्नि निःक्षिपेत् ॥ २४ ॥

मंत्रः।

"नमस्तेऽस्तु महादेवि नमस्ते गिरिशप्रिये। गृहाणार्घ्यमिमं देवि पुत्रान्मह्यं यशस्विनः" ॥ २५ ॥
पतिपुत्रवती नारी गिरिजावत्प्रसूयते। एवं रात्रौ विधानेन पूजयेत्परमेश्वरीम् ॥ २६ ॥
ततः प्रभाते विमले कृतप्रातःक्रिया सती। देवीमुद्दिश्य विधिवद्भोजयेत्षोडश स्त्रियः ॥ २७ ॥
नानाविधैर्भक्ष्यभोज्यैर्ब्राह्मणानथ षोडश। प्रत्येकं वैणवं पात्रं सप्तधान्यसमन्वितम् ॥ २८ ॥
सौभाग्याष्टकसंयुक्तं वस्त्रयुग्मेन संयुतम्। दातव्यं गिरिजाप्रीत्यै पुत्रसौभाग्यकाम्यया ॥ २९ ॥
सगर्भां च वृषोपेतां सितां गां वस्त्रसंयुताम्। सहिरण्यां ततो दद्याद्विप्राय गुणशालिने ॥ ३० ॥

मंत्रः।

"अपातयं पुरा गर्भं दुष्टस्त्रीणां वशं गता। यत्पापं वन्ध्यताहेतुस्तस्मान्मोचय चांबिके ॥ ३१ ॥
तव दानेन पुत्रो मे भवेच्च सुभगे सति" ॥ ३२ ॥
इमं मन्त्रं समुच्चार्य दत्त्वा विप्रं विसर्जयेत्। एवं व्रतपरा नारी गर्भपातं न पश्यति ॥ ३३ ॥
लभते पुत्रपौत्रादीन्प्रियेण सह मोदते। लभेत गर्भपातं नो पतिपुत्रसुखं भवेत् ॥ ३४ ॥
तृतीये वा चतुर्थे वा मासि गर्भं सुविन्दति। रजतस्य पलाभ्यां वै कोशं गर्भाश्रयाकृतिम् ॥ ३५ ॥

निष्केण स्वर्णगर्भं च कृत्वा दद्याद्विजन्मने । गर्भपातं प्रकुर्वत्या मया प्राक्तनजन्मनि ॥ ३६ ॥
यदघं वंध्यकृत्प्राप्तं तस्मान्मोच्येह सुव्रत । जन्मजात्यादिकं वत्स नवदेदिह कर्मणाम् ॥ ३७ ॥
इदं चतुर्थकं जन्म भूमिदेवकुलोद्भवम् । सपत्नीसादिता पूर्वं सा वै गर्भस्य दोषकृत् ॥ ३८ ॥
तस्येमानीह चिह्नानि लक्षणानीह जन्मनि । यस्याः प्राक्पातितो गर्भः सपत्न्याः पतिवर्जिता ३९
दीनानाथविरोधःस्यात्तद्विरोधतया सुत । अनुमंत्री प्रयोक्त्री सा पितृमातृसुखोज्झिता ॥ ४० ॥
बंधुसंततिदुःखं स्यान्मर्यादाद्यनवस्थितिः । शोकः स्यादुदरे बाधा तद्वत्प्लीहादिविभ्रमः ॥ ४१ ॥
अंतरा स्यंदमानो वा गर्भः सन्नोपलक्ष्यते । इत्यादिलक्षणैर्ज्ञात्वा पूर्वोक्तां निष्कृतिं चरेत् ॥४२॥
ब्राह्मणान्भोजयेच्छक्त्या सर्पिष्यात्मानमीक्षयेत् ॥ ४३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्दशोत्तरचतुःशताधिकसहस्रतमः ॥ १४१४ ॥

श्रीसूर्य उवाच ।

सीमावादरतः कश्चिद्ब्राह्मणः पूर्वजन्मनि । तेन तत्र द्विजः सूत घातितो भूमिलोभतः ॥ १ ॥
महापातकयुक्तेन कृतं कर्मातिदारुणम् । तत्पापजान्महाघोरान्नरकान्प्राप्य दारुणान् ॥ २ ॥
तथातिकालं तिर्यक्त्वं विभुज्याधर्मजं स्वयम् । कर्मक्षयेऽथ पुण्यात्प्राक्सोऽत्र जातो हि बाहुजः॥३॥
क्षयरोगयुतः सूत कृशो दुःखातुरो भृशम् । लग्ने कुम्भाभिधे सूत भौमचन्द्रयुतेऽण्डज ॥ ४ ॥
रिष्टं षष्टिमिते वर्षे जायतेऽकृतनिष्कृतेः । सहायाः पूर्वजा ये तु तेषां वक्ष्यामि लक्षणम् ॥ ५ ॥
तद्गे ते मृताश्चात्र पुत्राः क्षयरुजान्विताः । रिष्टेन वा मुखं भग्नं दृढपापान्न निष्कृतिः ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचदशोत्तरचतुःशताधिकसहस्रतमः ॥ १४१५ ॥

श्रीसूर्य उवाच ।

राजपुत्रोऽभवत्कश्चिद्धर्मशास्त्रार्थकोविदः । गत्वा शत्रुपुरं सूत कदाचिन्मदसंयुतः ॥ १ ॥
ददाह स पुरं शत्रोर्हृतवांस्तद्गतं वसु । तत्रैको ब्राह्मणो दग्धो वृद्धो विद्याविशारदः ॥ २ ॥
पापमाचरितं तेन चाज्ञानाद्ब्रह्मघातजम् । अथो यमक्षये सर्वा भुक्त्वा नरकयातनाः ॥ ३ ॥
पुण्यशेषादथोऽत्रापि स जातः क्षत्रियाधरः । देशेऽयोध्याभिधे गौरो लघुर्दक्षो महोद्यमी ॥ ४ ॥
युवभावे महाभाग राजयक्ष्मप्रपीडितः । ब्रह्महा क्षयरोगी स्यादिति वेदविदो विदुः ॥ ५ ॥
निष्कृतिं तां प्रवक्ष्यामि यां कृत्वा मुच्यते त्विह । कार्यास्तत्र त्रिवेदानां मूर्तयस्तु यथोदिताः॥६॥
ब्रह्मविष्णुमहेशानां सर्वरोगविनाशिकाः । सुवर्णजास्तथा कार्याः कदल्यः पत्रसंयुताः ॥ ७ ॥
यथावित्तानुसारेण वित्तशाठ्यं विवर्जयेत् । देयास्ता विप्रमुख्येभ्यःक्षयरोगोपशांतये ॥ ८ ॥
ब्राह्मणान्भोजयेच्छक्त्या होमयेच्च जपेत्तथा । गायत्रीं विधिना सूत पूर्वपापापनुत्तये ॥ ९ ॥
एवं कृत्वा महाबाहो भयं तस्यात्र शाम्यति । नैवं कुर्यान्नरो मोहाद्रिष्टं विंशतिमेऽब्दके ॥ १० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षोडशोत्तरचतुःशताधिकसहस्रतमः ॥ १४१६ ॥

श्रीसूर्य उवाच ।

या योषिदाचरेत्कामात्पूर्वजन्मनि निश्चयात् । ब्रह्महत्यामथात्रैव सा ज्ञेया क्षयरुग्युता ॥ १ ॥
न तस्याः पापशमनं मयोक्तं च खगाधिप । महापापकृताद्रोगान्मृत्युरेव न संशयः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तदशोत्तरचतुःशताधिकसहस्रतमः ॥ १४१७ ॥

श्रीसूर्य उवाच ।

स्वस्त्रीघाती च पुरुषः पूर्वजन्मनि मानद । वधिरो जायते त्वत्र प्रायश्चित्तं शृणुष्व तत् ॥ १ ॥
चान्द्रायणव्रतं कुर्यात्सुवर्णपलसंयुतम् । पुस्तकं विधिवद्दद्यात्तस्मात्पापात्प्रमुच्यते ॥ २ ॥
भोजयेच्च यथाशक्ति होमयेच्चापि भक्तितः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽष्यायोऽष्टादशोत्तरचतुःशताधिकसहस्रतमः ॥ १४१८ ॥

श्रीसूर्य उवाच ।

या काचिदाचरेन्नारी पापं प्राग्देहघातजम् । अज्ञानादत्र जनुषि क्षयरुक्पीडिता हि सा ॥ १ ॥
नानाकष्टवती सा हि निजसर्वस्वदानतः । क्षयरोगात्प्रमुच्येत नात्र कार्या विचारणा ॥ २ ॥
प्रयागे मकरस्थेऽर्के स्नानादत्रैव जन्मनि । काश्यां वासात्तथा सूत मुच्यते ब्रह्महत्यया ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनविंशत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४१९ ॥

श्रीसूर्य उवाच ।

मूकः प्रजायते जंतुर्यः पूर्वं भ्रातृघातकः । कामतो हि भवेत्सूत प्रायश्चित्तं न तत्समम् ॥ १ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो विंशत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४२० ॥

श्रीसूर्य उवाच ।

या नारी घातयेत्पूर्वभवे मोहाच्च कुक्कुटम् । नासावक्रत्वमाप्नोति सात्र जन्मनि निश्चयात् ॥ १ ॥
हेमनिष्कत्रयं दद्यात्सर्वत्रैव प्रयत्नतः । ब्राह्मणाय महाभाग पापनाशकरं परम् ॥ २ ॥

इति श्रीवृद्धसर्यारुणसंवादे कर्मविपाकेऽध्याय एकविंशत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४२१ ॥

श्रीसूर्य उवाच ।

बभूव बाहुजः कश्चिद्देशे पञ्चनदे पुरा । धनधान्यसमायुक्तः पापकर्मा महोद्यमी ॥ १ ॥
विप्रोत्संगगतः सोऽपि प्रयागे गरुडाग्रज । स स्नातो मकरे भानौ धूर्तः कर्मक्रियोज्झितः ॥ २ ॥
स प्राप्य स्वगृहं शीघ्रं कृतवान्कर्म दारुणम् । ग्रामे निवसतस्यान्यक्षात्रियस्य खगाधिप ॥ ३ ॥
ददाह भवनं रम्यं वैरभावात्पुरातनात् । एका वत्सतरी दग्धा जीवाश्चापि ह्यनेकशः ॥ ४ ॥
कालयोगेन संप्राप्तः स वै यमनिकेतनम् । भुक्त्वा पापफलं पापात्पुण्यात्पुण्यफलं तथा ॥ ५ ॥
पूर्वपुण्यप्रभावेण स जातः पादजस्त्विह । गंगायाः प्रान्तरे देशे पंचयोजनसम्मिते ॥ ६ ॥
मध्यस्वरूपो मतिमान्धर्मे स्वल्पमतिः शठः । वृद्ध्याधिकप्रचारी च पैत्रिकस्वल्पवित्तभाक् ॥ ७ ॥
सकन्यकः सपत्नीको बंधुभृत्यसमन्वितः । पुण्यादिदं फलं पूर्वात्पापाच्चैतत्फलं शृणु ॥ ८ ॥
गोबालवत्सकवधाज्जीवघातादपुत्रकः । सप्तवेदाब्दपर्यन्तं जातपुत्रविनाशकः ॥ ९ ॥
गोस्त्रीविप्रवधा लोके पुत्रनाशकरा यतः । गोराशिगे शनौ सोमात्षष्ठे जीवे मृगस्थिते ॥ १० ॥
लक्ष्मैतद्दण्डजश्रेष्ठ पृच्छकस्यात्र जन्मनि । पूर्वे या स्त्री सहायासीन्मृतवत्सात्र सा सुत ॥ ११ ॥
शृणु सूत प्रवक्ष्यामि निष्कृतिं पापशोधिनीम् । पञ्चस्वर्णमिता कार्या सुरभी च हिरण्मयी ॥ १२ ॥
तदर्धमितिका वापि निजवित्तानुसारतः । संपूज्य विधिवन्मन्त्रैर्देया विप्राय धीमते ॥ १३ ॥
माषैर्वह्निमितैर्देयस्तथा पशुपतिः सुत । माषाभ्यां च तथा वह्निर्जीवा माषचतुष्कजाः ॥ १४ ॥
देयाश्च विधिना सूत पूर्वपापापनुत्तये । जपेत्पशुपतेर्मन्त्रं सहस्रं रिष्टनाशनम् ॥ १५ ॥
होमयेत्तद्दशांशेन रुद्रस्याग्रे प्रयत्नतः । शृणुयाद्धरिवंशं च दशावृत्तिविधानतः ॥ १६ ॥

यः कुर्याद्विधिवत्सूत प्रायश्चित्तं त्रिधा मतम् । जीविष्यंति च तत्पुत्रा जन्मन्यत्र ममाज्ञया॥१७॥
नैवं कुर्याच्च यः शक्त्या त्रिष्वेकं पापशोधनम् । न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः ॥१८॥
नवसप्तातिवर्षान्तमायुरेवं कृते त्विह । सप्तवेदमिते वर्षे रिष्टं चाकृतनिष्कृतेः ॥ १९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वाविंशत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४२२ ॥

श्रीसूर्य उवाच ।

काश्मीरमण्डले पूर्वं काचिद्विज्ञवरांगना । पतिप्रिया शीलयुक्ता दानभोगरता सदा ॥ १ ॥
वरभावात्तया भव्यं गृहं दग्धं द्विजस्य च । वैरिणस्तु सुतो दग्धो गृहदाहे खगाधिप ॥ २ ॥
साहाय्यात्स्वामिनः सर्वं प्राग्भवे समुपार्जितम् । तत्पापजान्महाघोरान्मूलात्प्राप्य वियोनिजात्॥३॥
सैवं जात्यविरोधेन पतिशुश्रूषणात्सुत । क्षत्रिया धनधर्माढ्या पूर्वपुण्यात्तथा सती ॥ ४ ॥
क्षयरोगयुता बाल्ये बालघातादपुत्रिणी । गृहाग्निदाहपापस्य प्रायश्चित्तं न तत्समम् ॥ ५ ॥
त्रयोविंशे मिते वर्षे रिष्टेनैवात्र नंक्ष्यति । सहायस्तत्पतिश्चात्र पुत्रहीनः क्षयान्वितः ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोविंशत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४२३ ॥

श्रीसूर्य उवाच ।

सारिकां यो महाभाग निहन्यात्पापमोहितः । तस्य च स्खलिता वाणी भवत्यत्रैव जन्मनि ॥१॥
दद्याद्धिरण्मयीं तत्र सारिकां शुभलक्षणाम् । तथात्र पुस्तकं दद्याच्छास्त्रस्य विधिनांडज ॥ २ ॥
पूर्वपापात्प्रमुच्येत नरोऽत्र गत किल्विषः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्विंशत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४२४ ॥

श्रीसूर्य उवाच ।

सारिकां यादवधीन्नारी पूर्वं पापविमोहिता । सात्र जन्मनि जायेत वचनस्खलितांडज ॥ १ ॥
तया देया सुवर्णस्य सारिका ब्राह्मणाय च । पूर्वपापाद्विमुच्येत तद्दानाद्विनतासुत ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चविंशत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४२५ ॥

श्रीसूर्य उवाच ।

काकघाती च पुरुषः पूर्वजन्मनि मानद । लंबकंठः प्रजायेत सोऽत्र जन्मनि निश्चयात् ॥ १ ॥
गां दद्याद्विधिवच्चैकां सर्वाभरणभूषिताम् । मुच्यते कंठजाद्रोगान्नात्र कार्या विचारणा ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षड्विंशत्युत्तरचतुःशताधिकसहस्रतमः॥१४२६॥

श्रीसूर्य उवाच ।

या नारी पूर्वजन्मनि घातयेद्गरुडाग्रज । वक्रं सा कंठरोगेण बाध्यते चात्र जन्मनि ॥ १ ॥
गां दद्याद्विधिवत्सूत श्वेतामत्र पयस्विनीम् । यथोपस्करसंयुक्तां तस्मात्पापात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तविंशत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४२७ ॥

अरुण उवाच ।

कश्चिद्विप्रकुले जातो धर्मिष्ठो वित्तसंयुतः । उदरे वातजा रोगा गुल्माद्याश्चोर्ध्वहृद्व्यथा ॥ १ ॥
मोहाद्याः स्वल्पवीर्यत्वमक्षिपांडूदरामयाः । जायते शीर्षजा पीडा बाल्ये स्याद्ग्रहणीगदः ॥ २ ॥
शरीरे जायते वह्निर्मुखघातव्रणादिकम् । पात्राणां मातुलान्यादेर्विधवार्तिः स्नुषादिषु ॥ ३ ॥

दायादाच्छत्रुवत्पीडा भूमिद्रव्यविलिप्सया । ऐहिकानि च लक्ष्माणि जायन्ते तच्छरीरके ॥ ४॥
तस्य भार्या सदाचारा कदाचिद्रोषवादिनी । गौरवर्णा सुवाणी च संतोषप्रियकारिणी ॥ ५ ॥
मृतवत्सा कथं जाताऽस्थिरगर्भा च सा कथम् । दशमासानतिक्रम्य गर्भं चोदरसौख्यभाक् ॥६॥
केन कर्मविपाकेन सत्यं कथय भास्कर ॥ ७ ॥

श्रीसूर्य उवाच ।

पुंस्कृतं नैव तत्कर्म स्त्रीकृतं नात्र संशयः ॥ ८ ॥
पूर्वजन्मनि सा क्षत्री संजाता विनतासुत । अज्ञानतिमिरांध्येन स्त्रीणां कर्म दुरात्मनाम् ॥ ९ ॥
अजानती कुलस्त्रीणामाचारमनुकंपकम् । सर्वभूतेषु चात्मानं स्थावरेषु चरेषु च ॥ १० ॥
प्रमादाद्दीपिनं हन्ति सदा निष्ठुरमानसा । तस्य गेहाश्रिता नित्यं मार्जारशुनपूर्वकाः ॥ ११ ॥
पलालक्रीडनपरा गेहे संकुलिता भृशम् । सा तप्तवालुकाभ्यंतुतप्तभस्मचयादिषु ॥ १२ ॥
अविक्षिप्ता तदा साग्नौ प्राक्षिपद्दुष्टचेतसा । बालगर्भाशयान्बालान्सुविस्पष्टाखिलेन्द्रियान् ॥ १३ ॥
तन्मातृभिः सा तत्याज ज्वलने बालघातिनी । पापा बंधनमात्रं सा बालघातादिकं त्विह ॥१४॥
परत्र यातना घोरा न व्यजानाद्दुराशया । विनिघ्नंति प्रमादाद्ये प्राणिनस्ते नराधमाः ॥ १५ ॥
रौरवे चिररात्राय पच्यंते यातनादिभिः । आनाय्याग्नि महीपस्तु प्रक्षिपेत्तान्नराधमान् ॥ १६ ॥
तथाविधेषु जीवेषु मृतेष्वपि च तद्वशात् । म्रियन्ते शिशवस्तेषां पूर्वदोषानुसारतः ॥ १७ ॥
अनले ज्वलिता याभिर्बहवो लघुप्राणिनः । गर्भयुक्ता मृतास्ते वै मातृभिः सहिताः खग॥१८॥
न लभंतेय ते भार्यां मृता वै दुष्टजंतवः । तेन कर्मविपाकेन स्थिरगर्भा मृतप्रजाः ॥ १९ ॥
त्रिविधापत्यजा बाधा प्राप्यते जनुरंतरे । जन्तवो गर्भगा ये ते स्वकृतं कर्म भुञ्जते ॥ २० ॥
उभयोः कर्मणोर्हेतूनादायैव जनिर्भवेत् । इदं तृतीयं वै जन्म ब्रह्मवंशसमुद्भवम् ॥ २१ ॥
मृतापत्या पुत्रहीनाऽस्थिरगर्भा हि यत्र सा ॥ २२ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं नाथ येन गर्भः प्रजायते । ममोपरि कृपां कृत्वा सत्यं वद दिवस्पते ॥ २३ ॥

श्रीसूर्य उवाच ।

सुदिने समनुप्राप्ते ह्यनुकूलग्रहे खग । प्रागुदक्प्रवणे देशे गोमयाद्युपलिप्तके ॥ २४ ॥
आसनं चाविकं शुद्धमास्तीर्य सुविचित्रकम् । द्रोणमानं तिलानां तु मध्ये गर्भं प्रपूरयेत् ॥ २५ ॥
निष्कमानं सुवर्णस्य शकलं मध्यमं क्षिपेत् । तस्य पूर्वे च दिग्भागे तण्डुलद्रोणपर्वतम् ॥ २६ ॥
शुद्धतोयभृतं ताम्रं पात्रं दशपलात्मकम् । स्थापयेद्राजतं पद्मं तन्मध्ये फलनिर्मितम् ॥ २७ ॥
पूजयेच्च सपत्नीकं कश्यपं हि प्रजापतिम् । करेऽक्षमाला दक्षे हि वामे चाथ कमण्डलुम् ॥ २८ ॥
कृत्वा प्रतिष्ठितप्राणं मूर्तिं तां शुभलक्षणाम् । अर्चयेद्गन्धपुष्पाद्यैरुपचारैः पृथक्पृथक् ॥ २९ ॥
तत्र श्रद्धावती नारी त्रिविधापत्यदुःखिनी । विप्रं हि वेदविद्वांसं पूजयेद्विविधैर्धनैः ॥ ३० ॥
ततस्तं तु सपत्नीकं मुनीनां प्रवरं वदेत् ॥ ३१ ॥

मंत्रः ।

"सिसृक्षुणेह स्रष्टा वै पत्नी च तपसो बलात् । ता मया तिलसंख्याकैराधिभिस्तीव्रवेदनैः ॥ ३२ ॥
लंघिताः स्त्रीजनाचारा अजानंत्या दयादिकम् । नाशयेस्तस्य पापस्य देवप्राप्तं विगर्हितम्"॥३३॥
सम्यक्श्रद्धावती नारी मृतसन्ततिदुःखिनी । सपत्नीकं तु सौवर्णैर्निर्मितं सम्यगर्चितम् ॥ ३४ ॥

विप्राय वेदविदुषे प्रदद्याद्गुणशालिने । एवमाप्राप्य तां मूर्तिं समादाय पृथक्पृथक् ॥ ३५ ॥
प्रदद्याद्दानविधिना श्रद्धया च सदक्षिणाम् । दानान्ते कीर्तयेन्मंत्रं तिष्ठन्ती विहिताञ्जलिः ॥३६॥

मन्त्रः ।

"यन्मया पूर्वजन्मापि दयारहितचित्तया । प्राप्तं सुघोरमशुभं स्वामिंस्तच्छिन्धि पातकम् " ॥३७॥
दत्त्वा दानं च विप्राय सर्पिष्यात्मानमीक्षयेत् ॥ ३८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाविंशत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४२८ ॥

श्रीसूर्य उवाच ।

काकघाती महाभाग प्राग्भवे चात्र जन्मनि । कूर्चहीनो भवेन्मर्त्यः स च तत्पापलाञ्छितः ॥ १ ॥
कृष्णधेनुप्रदानेन विधिनात्र खगाधिप । मुच्यते दुष्टपापाच्च कूर्चयुक्चात्र जन्मनि ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनत्रिंशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४२९ ॥

श्रीसूर्य उवाच ।

या नारी घातयेत्काकं विनतानंदवर्धन । सात्र जन्मनि पक्षीन्द्र कूर्चयुक्ता भवत्यलम् ॥ १ ॥
कृष्णधेनुप्रदानाच्च यथोक्ताद्गरुडाग्रज । पूर्वपापविशुद्धिः स्यादत्र जन्मनि सुव्रत ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिंशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४३० ॥

श्रीसूर्य उवाच ।

अभक्ष्यभक्षको यस्तु भवेत्प्राङ्मानवोंडज । सोऽत्र जन्मनि पक्षीन्द्र जायते क्रिमिलोदरः ॥ १ ॥
स भीष्मपंचकादत्र व्रतात्पुण्यसमर्जनात् । मुच्यते पूर्वरोगात्तु दुष्टात्क्रिम्युदरात्खग ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकत्रिंशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४३१ ॥

श्रीसूर्य उवाच ।

याऽभक्ष्यं भक्षयेन्नारी प्राग्भवे गरुडाग्रज । जायते जठरे तस्याः क्रिमिजोत्था हि रुक्सुत ॥१॥
तत्पापशमनं कार्यं भीष्मपंचकजं व्रतम् । कार्तिके शुक्लपक्षे च प्रान्तस्थं दिनपंचकम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वात्रिंशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४३२ ॥

श्रीसूर्य उवाच ।

दुष्टस्पर्शेन यो मोहाद्भक्षयेद्विधिवर्जितः । सिद्धान्नानि पुरा सूत जायतेऽत्र कृशोदरः ॥ १ ॥
विष्णुव्रतान्महापुण्यात्सर्वपापप्रणोदनम् । तदा कृशोदराख्यां च रुजं नेह प्रपश्यति ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयस्त्रिंशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४३३ ॥

श्रीसूर्य उवाच ।

भुक्तं यया पुरा सूत सिद्धान्नं द्विजभार्यया । दुष्टस्पर्शेन सततं सेह स्याच्च कृशोदरी ॥ १ ॥
सा वैष्णवाद्व्रतात्पुण्यात्तस्मात्पापात्प्रमुच्यते । कृशोदरव्यथा नश्येत्तत्पापस्य प्रणाशनात् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुस्त्रिंशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४३४ ॥

श्रीसूर्य उवाच ।

द्विजः पूर्वभवे कश्चिदासीद्धर्मान्वितः सदा । सभार्यो नर्मदातीरे धनसौख्यसमन्वितः ॥ १ ॥

कृतानि तेन दानानि नानापर्वसु शक्तितः। वेदयुक्तेषु विप्रेषु सत्पात्रेषु विधानतः ॥ २ ॥
अथो पापं भृशं चक्रे व्यभिचारसमुद्भवम्। ज्येष्ठां त्यक्त्वा ऋतुप्राप्तां धर्मशीलयुतां प्रियाम्॥३॥
रतिं ददौ कनिष्ठाया अनृतावपि मोहितः। ततो यमपुरं प्राप्तः ससहायो द्विजोत्तमः ॥ ४ ॥
भुक्त्वा पापफलं पापात्पुण्यात्स्वर्गफलं तथा। श्रद्धादानवशात्सोऽत्र गंगायाः पूर्वभागजः ॥ ५ ॥
सिंहस्थेर्के सुखे राहौ जीवे कर्केऽलिगे भृगौ। स रक्तगौरो मतिमान्वन्धुस्त्रीसुखसंयुतः ॥ ६ ॥
लघुर्घृणी त्वमितदो द्विजवंशसमुद्भवः। सर्वमेतत्फलं दानास्त्रीत्यागान्मृतपुत्रकः ॥ ७ ॥
स्त्रीत्यागी भ्रूणहा लोक इति पौराणिका विदुः। यो वा सहायतः पूर्वं शृणुष्व विनतासुत ॥ ८॥
प्राग्भवे या कनिष्ठाभूत्सा ज्येष्ठात्र गतप्रजा। गर्भदोषयुता चेति लक्षणैर्लक्षयेत्खग ॥ ९ ॥
वक्ष्यामि निष्कृतिं तस्य पूर्वपापप्रणाशनीम्। कुर्यात्पलैर्वेदमितैर्गणेशं विघ्ननाशनम् ॥ १० ॥
तदर्धमितकं वापि निजवित्तादिमं पठन् ॥ ११ ॥

मन्त्रः।

"पूर्वं वराननां शुद्धां त्यक्त्वा यत्पापमर्जितम्। तदुग्रपापनाशाय ददेऽहं गणनायकम्" ॥ १२ ॥
माससप्तमितां लक्ष्मीं शुभालेख्यां हिरण्मयीम्। ददेऽहं विप्रमुख्याय वेदशास्त्रार्थवेदिने ॥ १३ ॥
ब्राह्मणान्भोजयेत्पश्चाच्छक्त्या दद्याच्च दक्षिणाम्। एवं विधानं यः कुर्याज्जीविष्यंति च तत्सुताः१४
श्रुत्वैतच्छक्तिमान्यस्तु न कुर्याच्छोधनं शुभम्। स पुत्राँल्लभते नैव रिष्टं पञ्चाशदब्दके ॥ १५ ॥
प्रायश्चित्ते कृते त्वत्र जीवनं वर्षसप्ततिम्। अन्यज्जन्मादिकाज्ज्ञेयं विस्तरो नोदितो मया ॥ १६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचत्रिंशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४३५ ॥

श्रीसूर्य उवाच।

देशे पंचनदे जाता वाहुंजा पूर्वजन्मनि। सेह जन्मनि वै विप्रा जाता वै विप्रपूजनात् ॥ १ ॥
प्राग्यत्तया कृतं कर्म शृणु तच्च खगेश्वर। ब्राह्मणेन महद्द्रव्यं तद्गृहे स्थापितं च यत् ॥ २ ॥
न तद्दत्तं पुनस्तस्मै भुक्तं सर्वं यथारुचि। मृतो द्विजस्तु दुःखेन क्षुधितश्च खगाधिप ॥ ३ ॥
पापमाचरितं पूर्वं ब्रह्मघातसमं तया। पंचत्ववशगा सापि भुक्त्वा तु यमशासनम् ॥ ४ ॥
पुत्रसंततिहीनेह युवभावे क्षयान्विता। निष्कृतिं परमां तस्या वक्ष्येहं पापनाशिनीम् ॥ ५ ॥
सर्वस्वेन तदर्धेन कार्या स्वर्णमयी शुभा। कदलीपत्रसंयुक्ता देया विप्राय धीमते ॥ ६ ॥
दानेनानेन सुप्रीता ब्रह्मविष्णुमहेश्वराः। क्षयनाशकराः सर्वे भविष्यन्त्यत्र जन्मनि ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्त्रिंशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४३६ ॥

श्रीसूर्य उवाच।

पूर्वजन्मनि भोः सूत चोच्छिष्टं भक्षयेत्तु यः। राज्यंधो जायते सोऽपि जन्मन्यत्र हि मानवः ॥ १ ॥
भोजयेद्ब्राह्मणाञ्छक्त्या गोमूत्रं प्राशयेत्तथा। मुच्यते तत्क्षणात्सूत नक्तान्धत्वान्न संशयः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्रिंशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४३७ ॥

श्रीसूर्य उवाच।

वेडालोच्छिष्टभोजी च राज्यंधो जायते त्विह। स तत्पापविशुद्ध्यर्थं गोमूत्रं विधिवत्पिबेत् ॥१॥
भोजयेच्च तथा विप्राञ्शक्त्या दद्याच्च दक्षिणाम्। राज्यंधरोगात्सततं मुक्तो भवति मानवः ॥ २॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टत्रिंशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४३८ ॥

श्रीसूर्य उवाच ।

विडालोच्छिष्टभुङ् नारी प्राग्भवे विनतासुत । राज्यंधरोगयुक्ता वै चेह जन्मनि जायते ॥ १ ॥
द्विजानां भोजनाच्चैव गोमूत्रप्राशनात्तथा । मुच्यते पूर्वपापात्तु विडालोच्छिष्टभोजनात् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनचत्वारिंशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४३९ ॥

श्रीसूर्य उवाच ।

चांडालीगमने पूर्वभवे च गरुडाग्रज । जायतेऽजगरश्चात्र मूढो जन्मनि जन्मनि ॥ १ ॥
चान्द्रायणव्रताच्चेह दशावृत्त्या कृतात्सुत । स मुच्यतेऽजगरत्वाच्छुद्धबुद्धिर्भवेदिह ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चत्वारिंशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४४० ॥

श्रीसूर्य उवाच ।

या काचिदधमा नारी प्राग्भवे विनासुत । चांडालं प्राप्नुयात्सा चाऽजगरा जायतेंडज ॥ १ ॥
प्राजापत्यव्रतात्पंचाशदावृत्त्या तु वर्तनैः । मुच्यते पूर्वपापात्सा जन्मन्यत्र खगाधिप ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकचत्वारिंशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४४१ ॥

अरुण उवाच ।

भूमिदेवकुलोत्पन्नो धर्मिष्ठो धर्मवत्सलः । सत्यनिष्ठः सदाचारो साधुसेवायुतः सुधीः ॥ १ ॥
तस्य देहे भवेच्चिह्नं पापजं चेह जन्मनि । किलासो दद्रुकंडूश्च नेत्रतोदो विरश्मिता ॥ २ ॥
किंचिद्गदः प्रजायेत कारणेन विना खग । तस्य भार्या सुतन्वंगी स्त्रीधर्मव्रतचारिणी ॥ ३ ॥
उदरे च व्यथा तस्या मूर्ध्नि पीडा प्रजायते । मृतवत्सा कथं जाता पुत्रपुत्र्यौ मृते कथम् ॥ ४ ॥
केन कर्मविपाकेन सत्यं कथय भास्कर ॥ ५ ॥

श्रीसूर्य उवाच ।

पूर्वं वैश्यसमुत्पन्ना प्रिया शूद्राय तारिता । बहुव्यापारनिरता बहुद्रव्यसमन्विता ॥ ६ ॥
शूद्राज्जातश्च सम्बन्धो बहुकालं गतागतम् । अन्योन्यं प्रीतिवशतो रेमे सा तद्वशंवदा ॥ ७ ॥
चकार सा नान्यकर्मचौर्यकर्मरताऽभवत् । ब्राह्मणस्य सुतः श्रेष्ठः स्वर्णालंकरणैर्युतः ॥ ८ ॥
धनलोभाद्धतस्ताभ्यां भाविनोर्थस्य वै बलात् । तस्यापि मातापितरौ पुत्रदुःखेन दुःखितौ ॥ ९ ॥
त्रिभिर्वर्षैस्तथा मासैर्युतस्य सुमुखस्य हि । धनलुब्धौ दुष्टचित्तौ घातकौ दम्पती च तौ ॥ १० ॥
अचिराच्च मृतौ तत्र गतौ वै यमशासनम् । पुत्रशून्यं गृहं जातं ब्राह्मणस्य ततः खग ॥ ११ ॥
तेन कर्मविपाकेन नरके पातितौ भृशम् । पश्चान्मानुष्यमापन्नः कृतदानप्रभावतः ॥ १२ ॥
इदं चतुर्थकं जन्म मृतापत्यं च यत्र वै । त्रिवर्षमासजातस्य बालस्य हननादसौ ॥ १३ ॥
मृतपुत्रो हि सञ्जातो जाताजातस्तथैव च । अयं जीवेदयं जीवेदित्याशाबद्धचेतसः ॥ १४ ॥
जातंजातं नश्यति च तस्य चाकृतनिष्कृतेः । कदाचिदेकस्तिष्ठेद्वै ह्यचिरान्म्रियते परः ॥ १५ ॥
सुगुणश्च सुरूपश्च लालनाच्चाटुकारिणः । नश्यत्सु जातजातेषु जन्मजन्माघकारणात् ॥ १६ ॥
व्याध्यन्तरैर्भवेदाधिग्रस्तो व्यसनवानयम् । न सौख्यं वै कदाप्यस्य नानाशंकितचेतसः ॥ १७ ॥
भवेच्च हतकस्यापि पश्यतोऽपि न पश्यतः । लक्षणानि पुरोक्तानि तस्येमानीह कीर्तयेत् ॥ १८ ॥
यस्तस्य म्रियते बालः स वै ब्राह्मण एव हि । मृतवत्सोद्भवं चिह्नं पूर्ववत्प्रतिपादयेत् ॥ १९ ॥

स्ववंशस्यापि विच्छेदो द्रव्यहानिर्यतस्ततः । दौर्मनस्यं महानाधिः शोकस्याघः प्रजायते ॥ २० ॥
अदृष्टगुणलावण्या अदृष्टाननकीर्तयः । म्रियन्ते जातमात्रा वै पुत्राश्च कृतचाटवः ॥ २१ ॥
एवं तु कर्मणि ज्ञाते प्रायश्चित्तमथाचरेत् ॥ २२ ॥

अरुण उवाच ।

का तस्य निष्कृतिः स्वामिन्दृढकर्मनिषूदिनी । कथ्यतां दिवसेशान नारीणां हितकाम्यया ॥ २३ ॥

श्रीसूर्य उवाच ।

शृणु सूत प्रवक्ष्यामि मृतवत्सौघनाशिनीम् । निष्कृतिं विधिवत्ताक्ष्यं संततेः सौख्यहेतवे ॥ २४ ॥
यजमानः सपत्नीको विधिवद्विधिमाचरेत् । पठद्भिः शान्तिसूक्तानि ब्राह्मणैः सहितोऽर्थवित् ॥ २५ ॥
सिद्धार्थाक्षतदूर्वाभिः कृतरक्षं प्रतिष्ठितम् । स्नापयेदौषधैर्मन्त्रैर्वारुणैर्वैष्णसूक्तिभिः ॥ २६ ॥
सुदिष्टे सुशुभे देशे गोमयाद्युपलिप्तके । तत्रोपर्याविकं स्तीर्त्वा कृष्णाजिनमथापि वा ॥ २७ ॥
द्रोणमानं तिलानां तु कृष्णवस्त्रेण संयुतम् । स्थापयेद्राजतं पद्मं तन्मध्ये पलनिर्मिताम् ॥ २८ ॥
सौवर्णीं प्रतिमां वत्स वालगोपालकस्य हि । कृत्वा प्रतिष्ठितप्राणां मूर्तिं तां शुभलक्षणाम् ॥ २९ ॥
अर्चयेद्गंधपुष्पाद्यैरुपचारैर्यथाविधि । सम्यक्छ्रद्धावती नारी मृतसंततिदुःखिनी ॥ ३० ॥
आहूय विदुषो विप्राञ्छ्रोत्रियान्वै वेदवादिनः । अलोलुपाः सदाचाराः पूज्या अर्घ्यादिभिस्तथा ३१ ॥

मन्त्रः ।

" यो निर्मितः पुरा द्रोहः पापं वै परसूनुषु । भूमिद्रविणहेमादेर्लिप्सा या वै मया कृता ॥ ३२ ॥
नाशयेत्तं महापापं मूर्तिस्ते शुभलक्षणा । दुःखं वै सुमहत्प्राप्तं मृतसंततिजं मया ॥ ३३ ॥
तस्मान्मुच्ये महाभागार्पितगोदानपुण्यतः " ॥ ३४ ॥

इति तं त्रिः परिक्रम्य त्रिस्तेनोक्ते च तिष्ठति । अग्ने नयेति मंत्रेण विसृज्यैनमुदीरयेत् ॥ ३५ ॥
धेनुं दद्यात्सवत्सां च सहिरण्यां यथाविधि । ब्राह्मणान्भोजयेत्सम्यक् शतं साग्रं यथाविधि ॥ ३६ ॥
सर्पिष्यात्मानमालोक्य भुंजीतेष्टैश्च बंधुभिः । इहैव लक्षणं ज्ञेयं मातृबंधुसुखाहतिः ॥ ३७ ॥
स्वसुतासुतसौख्यानां संतोषो निजपुत्रवत् । विरुध्यंते ह्यपत्यानि तादृशानि मिथः स्वयम् ॥ ३८ ॥
विकारः प्रकृतौ स्याद्वै गमने पादवैकृतम् । पितृजा मातृजा वापि कासगुल्मार्तिहृद्व्यथा ॥ ३९ ॥
मृतापत्यार्तितस्तेषामनुमंत्रादिभेदतः । तथा चैवात्र दुःखानि जायंतेऽस्य मुहुर्मुहुः ॥ ४० ॥
पूर्वकर्मार्जितं पापं चिह्नं तस्य सहायवत् ॥ ४१ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विचत्वारिंशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४४२ ॥

श्रीसूर्य उवाच ।

विप्राय यो विषं दद्याद्धातार्थं पूर्वजन्मनि । सोऽत्र जन्मनि पक्षीन्द्र च्छर्दिरोगेण बाध्यते ॥ १ ॥
निष्कृतिर्नास्ति तस्यात्र पापस्य दृढकर्मणः । छर्दिरोगेण सततं प्रतिनाशमवाप्नुयात् ॥ २ ॥
न पापशोधनं प्रोक्तं दानैरपि सहस्रशः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिचत्वारिंशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४४३ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे सूत विषं दद्याद्विजातये । छर्दिरोगेण सात्रैव निश्चितं नाशमाप्नुयात् ॥ १ ॥
प्रायश्चित्तं न तस्यात्र तस्यास्तु गरुडाग्रज । ब्राह्मणस्य वधारब्धे प्रायश्चित्तं न वै यतः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुश्चत्वारिंशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४४४ ॥

श्रीसूर्य उवाच ।

परस्य यो विषं दद्यात्पूर्वजन्मनि मानद । छर्दिरोगेण सोऽत्रैव बाध्यते पीडया सह ॥ १ ॥
धेनूनां दशकं दद्यात्सर्वोपस्करसंयुतम् । मुच्यते छर्दिरोगाच्च जन्मन्यत्र खगाधिप ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायःपञ्चचत्वारिंशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४४५ ॥

श्रीसूर्य उवाच ।

मूकोऽत्र जायते जंतुर्यः पूर्वं भ्रातृघातकः । बभूव कामतः सूत प्रायश्चित्तं न तत्समम् ॥ १ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्चत्वारिंशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४४६ ॥

श्रीसूर्य उवाच ।

या काचिन्मागधी ह्यासीज्जाता जलहदे सुत । सा चात्र यवनी देशे शुभे पञ्चनदेंडज ॥ १ ॥
पुत्राभिलाषिणी पूर्वं तत्याज यवनं पुरा । तस्मात्सा यवनी जाता पुत्रसंततिवर्जिता ॥ २ ॥
नानाधेनुयुताद्दानात्कुरुक्षेत्रे पुरानघ । शिवभक्तिपरा तस्मात्सुखैश्वर्यसमन्विता ॥ ३ ॥
इह जन्मनि सा लक्षरुद्रपूजाव्रतात्खग । पुत्रपौत्रयुता नारी भवत्येव न संशयः ॥ ४ ॥
अथवा हरिवंशस्य शतावृत्त्या विधानतः । श्रवणात्पूर्वजात्पापान्मुच्यते विनतासुत ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तचत्वारिंशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४४७ ॥

श्रीसूर्य उवाच ।

देवालयेऽवसत्कश्चिद्ब्राह्मणः पूर्वजन्मनि । विष्णुपूजापरो नित्यं द्रव्यलोभेन चाण्डज ॥ १ ॥
चौर्येण निहितं द्रव्यं यतिस्थतं देवतालये । तेनेदं च कृतं सूत कर्म चात्यन्तदारुणम् ॥ २ ॥
स तेन कर्मणा युक्तो भुक्त्वा तत्पापजं फलम् । जातो गंगाश्रये क्षत्री पर्वते पूजनाद्धरेः ॥ ३ ॥
बहुद्रव्यान्वितो भूयः सर्वसंपत्सुखान्वितः । बाल्ये हि पाण्डुरोगार्तश्चेह जन्मनि मानवः ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टचत्वारिंशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४४८ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे प्रादाद्विषं कस्यापि काश्यपे। सात्र जन्मनि रोगेण च्छर्दिसंज्ञेन पीडयते ॥ १ ॥
धेनूनां दशकं दद्यादशक्तौ गरुडाग्रज । सवत्सां कपिलां दद्यात्सा तदोषात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनपंचाशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४४९ ॥

श्रीसूर्य उवाच ।

कश्चिद्विप्रस्त्वभूदंगे प्राग्भवे धर्मसंयुतः । परस्य कन्यकायाश्च स उद्वाहमकारयत् ॥ १ ॥
दानाल्पत्वान्महाभाग चकाराल्पविधानतः । चौर्यकर्मरतः सोऽभूत्कदाचिद्दैवयोगतः ॥ २ ॥
स चचार वने सूत मार्गलुण्ठनतत्परः । काचित्सुनयना तत्र प्राप्ता भाविबलाद्दृढात् ॥ ३ ॥
नानाभरणयुक्ता सा पूर्णगर्भसमन्विता । पुण्यात्पुण्यफलं भुक्त्वा पापात्पापं खगाधिप ॥ ४ ॥
परकन्याविवाहेन स जातो बाहुजस्त्विह । गंगायाः पूर्वभागे तु दशयोजनसम्मिते ॥ ५ ॥
गौरः सुरूपः क्षीणांगो बहुद्रव्यपराक्रमः । पित्ताधिकोऽतिमतिमान्बहुपुत्रीभिरन्वितः ॥ ६ ॥
जातपुत्रा मृताः सप्त पूर्वपापादिहांडज । निष्कृतिं तां प्रवक्ष्यामि येन पापात्प्रमुच्यते ॥ ७ ॥
पलेन वा तदर्धेन कार्या सुघटिता सुत । बाहुजा गर्भसंयुक्ता सौवर्णी भूषणान्विता ॥ ८ ॥

पूर्वपापविनाशाय सा देया ब्राह्मणाय वै । गंधैः पुष्पैः समभ्यर्च्य मंत्रैः प्रणवपूर्वकैः ॥ ९ ॥
वेधसं तत्र सौवर्णं सुवर्णैकमितं शुभम् । दद्याज्जपेच्च मंत्रांश्च तल्लिंगान्विधिपूर्वकम् ॥ १० ॥
होमयेच्च यवांस्तत्र सतंडुलससर्षपान् । भोजयेद्ब्राह्मणान्पश्चात्तेभ्यो दद्याच्च दक्षिणाम् ॥ ११॥
शृणुयाद्धरिवंशं वा शतावृत्तिविधानतः । गायत्र्यष्टशतं जप्त्वा तस्माद्दोषात्प्रमुच्यते ॥ १२ ॥
सुखं पुत्रस्य लभते चेह जन्मनि वै ध्रुवम् । रिष्टं पञ्चाशदब्दे तु प्रायश्चित्तेऽकृते सुत ॥ १३ ॥
वेदसप्तत्यब्दमायुः प्रायश्चित्ते कृते भवेत् ॥ १४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चाशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४५० ॥

श्रीसूर्य उवाच ।

व्यभिचाररता पूर्वं यासीद्वै व्यभिचारिणी । सा गता नरकान्घोरानसती पापकृत्खग ॥ १ ॥
न शुद्ध्यत्यशुभाचारा प्रायश्चित्तैः शतैरपि । वाराणस्यां गतिश्चास्याः चतुर्दश्यां शिवव्रतात् ॥२॥
मोक्ष्यते सर्वपापाच्च पूर्वजन्मकृताद्दृढात् । बाहुजेऽयं महाभाग पूर्वेष्यत्रापि बाहुजा ॥ ३ ॥
वंध्या प्राक्पापतो दुःखादाकुला दयितोज्झिता ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकपंचाशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४५१ ॥

श्रीसूर्य उवाच ।

यः कृत्वा धूर्ततां पूर्वं वंचयेद्ब्राह्मणं सुत । सोऽत्रापस्माररोगेण पीड्यते बहुपीडया ॥ १ ॥
तेनैव पापरोगेण म्रियतेऽत्र खगाधिप । प्रायश्चित्तं मया नोक्तं पापे ब्राह्मणवंचने ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विपंचाशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४५२ ॥

श्रीसूर्य उवाच ।

या भ्रातृघातिनी नारी प्राग्भवे विनतासुत । सात्र जन्मनि मूकत्वं जन्मन्येव न संशयः ॥ १ ॥
ज्ञानान्महापापकृताच्च चोक्ता निष्कृतिर्मया । ज्ञात्वा ब्रह्मवधे सूत प्रायश्चित्तं न तत्समम् ॥ २ ॥
सप्तजन्मनि मूकत्वं जायते च तदेनसः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिपंचाशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४५३ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यसौ विप्रश्चेह जन्मनि बाहुजः । देवद्रव्यापहरणात्प्रागिहाक्षिप्रपीडनम् ॥ १ ॥
विंशतिवर्षावसाने नेत्रभंगः प्रजायते । तद्रक्षार्थमहं वक्ष्ये दानं पापहरं परम् ॥ २ ॥
कृत्वा देवगृहं रम्यं प्रतिष्ठाप्य सुराधिपम् । गंधपुष्पैः समभ्यर्च्य दीपा देयाः सुवर्णजाः ॥ ३ ॥
राजताश्च महाभाग नेत्ररोगं न पश्यति । भोजयेच्छक्तितो विप्रान्वैष्णवाञ्छ्रद्धया सुत ॥ ४ ॥
कृत्वानेन विधानेन रिष्टं नैव प्रपश्यति ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःपंचाशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४५४ ॥

श्रीसूर्य उवाच ।

सर्वस्नेहहरः कश्चिदभवत्पूर्वजन्मनि । सोऽत्र जन्मनि जायेत क्षयरोगप्रपीडितः ॥ १ ॥
प्रायश्चित्तं प्रकुर्वीत वित्ततुर्यांशतः स वै । कालचक्राभिधं दानं दद्याद्दोषोपशान्तये ॥ २ ॥
ब्राह्मणान्भोजयेत्पश्चाद्धोमयेच्च स्वशक्तितः । कालचक्राख्यदानेन रोगा नश्यन्ति पापजाः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायःपंचपंचाशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४५५ ॥

श्रीसूर्य उवाच ।

ब्रह्मदाररता ह्यत्र या पूर्वेऽभूत्पतिव्रता । पतिपापप्रभावाद्वै गतिं प्राप्ता हि मानुषीम् ॥ १ ॥
त्यक्त्वा शरीरं सा देवी मोदतेऽम्बिकया सह । भुनक्ति भोगान्सकलान्पतिं प्राप्य तपस्विनी ॥ २॥
गच्छेत्सा परमं स्थानं यत्र देवो महेश्वरः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्पञ्चाशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४५६ ॥

श्रीसूर्य उवाच ।

योऽज्ञानात्कृतवान्सूत प्राग्भवे भ्रातृघातनम् । सोऽत्र जन्मनि मूकत्वं व्रजति क्वापि मानवः ॥ १ ॥
चान्द्रायणत्रयं कुर्याद्विधिवत्पापशोधनम् । पुस्तकं च तथा दद्यात्सुवर्णपलसंयुतम् ॥ २ ॥
एवं यः कुरुते सूत स तत्पापात्प्रमुच्यते । न प्राप्नोत्यत्र मूकत्वं कदाचिद्विनतासुत ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तपञ्चाशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४५७ ॥

श्रीसूर्य उवाच ।

या धूर्ता वंचयेत्कंचिल्लोभात्पूर्वभवेऽडज । सेह जन्मनि रोगेणापस्मारेण प्रपीड्यते ॥ १ ॥
प्रायश्चित्तं प्रवक्ष्यामि पापनाशकरं सुत । ब्रह्मकूर्चत्रयं कुर्याद्दद्याद्धेनुं पयस्विनीम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टपञ्चाशदुत्तरचतुःशताधिकसहस्रतमः ॥ १४५८ ॥

अरुण उवाच ।

कश्चिद्वर्णोत्तमो जातो धर्मिष्ठो वित्तसंयुतः । उदरे वायुरल्पीयाञ्छिरोर्तिश्चैव जायते ॥ १ ॥
कपोले तिलकं तस्य मुखं व्रणसमन्वितम् । दद्रुकण्डूकिलासादि गमने पादवैकृतम् ॥ २ ॥
कर्मानुसारी वै व्याधिश्चिह्नं तस्य सहायकृत् । भार्या प्रीतिपरा नित्यं कदाचित्कलहप्रिया ॥ ३ ॥
रोषयुक्ता भवेद्वापि प्रदरार्तिः प्रजायते । मृतवत्सा कथं जाता कस्येदं कर्मणःफलम् ॥ ४ ॥

श्रीसूर्य उवाच ।

यः स्त्रिया सहितो विप्रः कुलीनो वहुवाचकः । गतश्चैव महारण्ये सा चासीद्गर्भसंयुता ॥ ५ ॥
वहवो हि समायाताः शत्रवः पर्यवेष्टयन् । स्त्रियं ते त्रासयामासुः परिगृह्य खला भृशम् ॥ ६ ॥
गर्भपातोऽभवत्तस्या मृतश्चैव शिशुः क्षणात् । तेन कर्मविपाकेन म्रियन्ते तस्य वालकाः ॥ ७ ॥
केचिज्जीवन्ति षण्मासं केचिद्वर्षावधि भृशम् । वहुकालं न वै काश्चिच्चिह्नमेतत्परीक्षयेत् ॥ ८ ॥

अरुण उवाच ।

देवदेव जगन्नाथ लोकानां हितकाम्यया । कथयस्व प्रसादेन कर्मणस्तस्य निष्कृतिम् ॥ ९ ॥

श्रीसूर्य उवाच ।

साधु पृष्टं महावाहो प्रश्नश्चायं सुदुर्लभः । तेनेदं मुनिभिः प्रोक्तं प्रायश्चित्तं हि पापहृत् ॥ १० ॥
गोत्रयं वै सवर्णं हि सौवर्णं निष्कसंमितम् । पुष्पितं फलितं वृक्षं वस्त्रयुग्मं गुरोरपि ॥ ११ ॥
कर्मप्रकाशकं विप्रं पूजयेद्विधिपूर्वकम् । एवं प्रकुरुते वत्स निष्कृतिं कर्मणां तु यः ॥ १२ ॥
पुत्रपौत्रादिकैर्युक्तो धनधान्यसमन्वितः । न करोति च यो मोहाल्लोभाद्वा पापनिष्कृतिम् ॥१३॥
स याति पापदोषेण भुवि जन्मनिजन्मनि । एवं यः कुरुते भक्त्या लभते पुत्रपौत्रकान् ॥ १४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनषष्ट्युत्तरचतुःशताधिकसहस्रतमः ॥ १४५९ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यभूत्काचिन्नारी भर्तृसुखान्विता । दक्षा सर्वक्रियास्वेव बहुदानप्रदायिका ॥ १ ॥
पार्श्वस्थान्यस्य शूद्रस्य गृहान्नीता हि मानद । तया रसास्तु चौर्येण सर्वशून्यगृहात्पुरा ॥ २ ॥
भुक्ता हि बहुभिः सूत मिलित्वा च सुतादिकैः । पूर्वजन्मकृतात्सूत कर्मणाऽत्रैव जन्मनि ॥ ३ ॥
सा जाता बाहुजा नारी धनभोगसमन्विता । पुत्रान्विता विचित्रा च भर्तृशुश्रूषणे रता ॥ ४ ॥
क्षयरोगाकुला यूनि भावे स्नेहहरी यतः । निष्कृतिं तस्य पापस्य महताश्वघनाशिनीम् ॥ ५ ॥
कथयामि प्रयत्नेन वित्ततुर्यांशमानतः । कृत्वा तु कदलीं रम्यां पत्रयुक्तां सुवर्णजाम् ॥ ६ ॥
दद्याद्वेदविधिज्ञाय क्षयरोगोपशान्तये ॥ ७ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्यायः षष्ट्युत्तरचतुःशताधिकसहस्रतमः ॥ १४६० ॥

श्रीसूर्य उवाच ।

यो लोकान्वंचयेत्काश्चित्पुरा धौर्त्येन कर्मणा । सोऽत्र जन्मन्यपस्मारारोगेण महताकुलः ॥ १ ॥
धेनुं दद्यान्महाभाग सवत्सां विधिसंयुताम् । ब्रह्मकूर्चत्रयं कुर्यात्स तत्पापात्प्रमुच्यते ॥ २ ॥
न भवेत्तस्य रोगस्य वेदना पापशोधनात् ॥ ३ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकषष्ट्युत्तरचतुःशताधिकसहस्रतमः ॥ १४६१ ॥

श्रीसूर्य उवाच ।

अस्त्यत्र चन्द्रवदना गौरांगी पतिवल्लभा । धनधान्यसमायुक्ता स्वर्णकारी सुखान्विता ॥ १ ॥
दक्षा भर्तृहिते नित्यं पूर्वं सा द्विजवल्लभा । स्वर्णापहारजात्पापात्प्राप्ता सा स्वर्णकारताम् ॥ २ ॥
पुत्रहीना महाभाग परद्रव्यापहारतः । कुरुक्षेत्रे चन्द्रग्रहे स्वर्णं दद्याच्च शक्तितः ॥ ३ ॥
तद्दत्त्वा सा लभेत्पुत्रानत्र जन्मनि वै सुत ॥ ४ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विषष्ट्युत्तरचतुःशताधिकसहस्रतमः ॥ १४६२ ॥

श्रीसूर्य उवाच ।

अन्नहृत्प्राग्भवे यस्तु ज्ञानादत्र खगाधिप । सोऽजीर्णेनैव रोगेण पीड्यते बहुपीडया ॥ १ ॥
अन्नदानाच्च विप्रेभ्यो रसदानाच्च शक्तितः । सावित्रीजपतो होमात्पूर्वपापात्प्रमुच्यते ॥ २ ॥
पापक्षये क्षयं यान्ति रोगाः पापसमुद्भवाः ॥ ३ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिषष्ट्युत्तरचतुःशताधिकसहस्रतमः ॥ १४६३ ॥

श्रीसूर्य उवाच ।

या काचिन्मोहतश्चक्रे नारी भ्रातृवधं पुरा । सात्र जन्मनि मूकत्वं व्रजेत्कापि शुभानना ॥ १ ॥
प्रायश्चित्तं प्रवक्ष्यामि तस्याश्चान्द्रायणं व्रतम् । वेदपुस्तकदानं च पलस्वर्णयुतं त्विह ॥ २ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःषष्ट्युत्तरचतुःशताधिकसहस्रतमः ॥ १४६४ ॥

श्रीसूर्य उवाच ।

बालघाती भवेद्यस्तु पूर्वजन्मनि मानवः । वैनतेयात्र जनुषि मृतपुत्रः प्रजायते ॥ १ ॥
श्रवणाद्धरिवंशस्य विधिवच्चात्र जन्मनि । ब्राह्मणोद्वाहनाच्चैव पूजनाच्छंकरस्य च ॥ २ ॥
जीविष्यन्ति च तत्पुत्रा नात्र कार्या विचारणा ॥ ३ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचषष्ट्युत्तरचतुःशताधिकसहस्रतमः ॥ १४६५ ॥

श्रीसूर्य उवाच ।

यः कश्चित्प्राग्भवे विप्रः सर्वविद्याविशारदः । वेदाभ्यासरतः श्रीमान्प्राप्तसर्वमनोरथः ॥ १ ॥
तुलाधृतं च स्नेहादि प्राणिनां चिरसंचितम् । गृहीतमतिचौर्येण लोभयुक्तेन चेतसा ॥ २ ॥
यस्माज्ज्ञानी ह्यभूद्विप्रः प्राग्भवे तत्फलं शृणु । स चेह च प्रयागेऽस्ति द्विजो वेदविदां वरः॥३ ॥
धनपुत्रसमायुक्तः क्षयरोगसमन्वितः । वेदाभ्यासात्तथा दानात्तीर्थराजाधिसेवनात् ॥ ४ ॥
नाशः स्यात्क्षयरोगस्य ह्यन्यजन्मनि चांडज । दोषात्स्वल्पफलैर्युक्तो जीवेद्वर्षशतं ध्रुवम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्पष्ट्युत्तरचतुःशताधिकसहस्रतमः ॥ १४६६ ॥

श्रीसूर्य उवाच ।

पुरा हि ब्राह्मणः कश्चिदंगदेशेऽवसत्सुधीः । धर्मशास्त्रक्रियायुक्तो धनपुत्रादिसंयुतः ॥ १ ॥
दत्तानि तेन विप्रेभ्यो दानान्यल्पानि शक्तितः । सत्पात्रेभ्यः परं सूत सर्वस्वस्य विधानतः ॥२॥
पापमाचरितं तेन कामलोभेन चांडज । ब्राह्मण्यां धारितो गर्भो भाविनोऽर्थस्य गौरवात् ॥ ३ ॥
स्त्रीसाहाय्यात्तथा तत्र कृतं तद्गर्भपातनम् । सा मृता तेन दुःखेन गर्भपातभवेन च ॥ ४ ॥
एवं किंचिद्गते काले स प्राप्तो यमशासनम् । भुक्त्वा पापाच्च नरकं पुण्यात्स्वर्गांश्च शाश्वतान् ॥५॥
पूर्वपुण्यप्रभावेण स जातो ब्राह्मणाधमः । यमुनायां महाभाग गौरः पित्ताधिको घृणी ॥ ६ ॥
धनमित्रसुखैश्वर्यमतिस्त्रीभोगभाग्नरः । दक्षः कार्येषु चार्वंगो धर्मिष्ठो लाभसंयुतः ॥ ७ ॥
मानी यशस्वी विनयी कांतिमान्प्रियभाषणः । पुण्यादिदं तथा पपाल्लोभी पापरतः क्वचित् ॥ ८॥
धूर्तः शठः क्रोधपरो धनवृद्धिक्षयान्वितः । चिंतातुरः पापशेषादत्राप्राप्तमनोरथः ॥ ९ ॥
ब्राह्मण्यां वीर्यदानात्प्राक्तथा तद्गर्भपातनात् । इह पंचाशदब्दान्तं जातपुत्रविनाशकः ॥ १० ॥
चित्रमंगाद्वचये सूर्यश्चन्द्रः शुक्रगृहाश्रितः । पापाभ्यां पुत्रभावेऽपि समाक्रान्तोऽत्र जन्मनि ॥ ११ ॥
स्त्रीसहायतया पूर्वं सात्र संततिदुःखिता । लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥ १२ ॥
कार्या वै ब्राह्मणी लेख्या सुवर्णाष्टपलैर्मिता । तदर्धमितिका वापि निजवित्तानुसारतः ॥ १३ ॥
पत्रे गर्भान्विता भव्या बहुभूषणसंयुता । गंधपुष्पाक्षतैर्वस्त्रैः पूजनीया प्रयत्नतः ॥ १४ ॥
सा देया वै विधिज्ञाय मंत्रमुच्चारयेदिमम् ॥ १५ ॥

मंत्रः ।

" ब्रह्मणा निर्मिते देवि पापमाचरितं त्वयि । तत्पापशमनायैव त्वां ददेऽहं हिरण्मयीम् ॥१६॥
ब्राह्मणाय महाभागे पापं गच्छतु तल्लयम् ॥ "

सोमं च राजतं दद्यात्तन्मितं पापशान्तये । लक्ष्मीनारायणं चापि हैमं सौवर्णसम्मितम् ॥ १७ ॥
गायत्र्यष्टसहस्रं तु त्र्यंबकं तन्मितं जपेत् । मंत्रमष्टाक्षरं जप्त्वा हुत्वा वै शुद्धिमाप्नुयात् ॥ १८ ॥
होमयेत्तद्दशांशेन तिलाज्ययवतंडुलैः । ब्राह्मणान्भोजयेत्पश्चात्पूजयेच्च विधानतः ॥ १९ ॥
लक्षरुद्रं त्रिगुणितं नानाविभवविस्तरैः । पूजयेद्वा विधानेन तस्मात्पापात्प्रमुच्यते ॥ २० ॥
य एवं विधिना सूत प्रायश्चित्तं समाचरेत् । तस्य संततिवृद्धिः स्यात्स्त्रीभ्यामत्रैव जन्मनि॥२१॥
ब्रह्मलोकमवाप्नोति पूर्वपापविशोधनात् । प्रायश्चित्तं द्वयोरेकं न कुर्याल्लोभमोहतः ॥ २२ ॥
न भवन्ति सुतास्तस्मिन्नीविते शुद्धिवञ्चनात् । न च सद्गतिमाप्नोति पापस्यास्य प्रभावतः ॥ २३ ॥
प्रायश्चित्ते कृते रिष्टं वर्षे षष्टिमिते ध्रुवम् । आयुर्भवति वर्षान्तमिह पापाविशोधनात् ॥ २४ ॥

जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम्। अष्टाक्षरं त्रिसाहस्रं जपित्वा शुद्धिमाचरेत्॥ २५॥
होमयेत्तद्दशांशेन शक्त्या विप्रांश्च भोजयेत्। शृणुयाद्धरिवंशं वा दशावृत्त्या विधानतः॥ २६॥
य एवं कुरुते सूत द्वयोः पापविशोधनम्। तस्य पुत्रविवृद्धिः स्यात्स्त्रीभ्यामत्रैव जन्मनि॥ २७॥
नाधयो व्याधयस्तस्य न चारिष्टभयं भवेत्। नैवं करोति यो मोहात्पूर्वपापविशोधनम्॥ २८॥
न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः। पंचत्रिंशन्मिते वर्षे रिष्टं देहधनान्तकम्॥ २९॥
त्रिसप्ततिमिताद्वायुः प्रायश्चित्ते कृते त्विह। गतिमप्युत्तमां याति त्वन्यथा त्वाततायिनाम्॥३०॥
जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम्। यद्यदन्तर्गतं सूत तन्मच्छात्राद्विचिन्तयेत्॥३१॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायःसप्तषष्ट्युत्तरचतुःशताधिकसहस्रतमः॥ १४६७॥

श्रीसूर्य उवाच।

यः प्रार्थयति धर्मात्मा सर्वपापविशोधनम्। सर्वस्वेन यजेद्देवान् पितॄंश्च श्रद्धयान्वितः॥ १॥
गयाश्राद्धादिभिः कव्यैर्दानैर्हव्यैर्विधानतः। सर्वपापविनिर्मुक्तो याति ब्रह्म सनातनम्॥ २॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टषष्ट्युत्तरचतुःशताधिकसहस्रतमः॥ १४६८॥

श्रीसूर्य उवाच।

कथयस्व दिवानाथ लोकानां हितकाम्यया। पृच्छामि त्वां तु देवेश छिंधि मे सर्वसंशयम्॥ १॥
यः प्राक्तने वै जनुषि सदा सम्पत्समृद्धिमान्। दानधर्मादिकृच्चेह सुखसंपत्समन्वितः॥ २॥
बन्धूनामतिसौख्यं च वैष्णवी तस्य वै मतिः। जातसंततिदुःखार्तः कस्येदं कर्मणः फलम्॥३॥

श्रीसूर्य उवाच।

ब्राह्मणी गर्भसंयुक्ता प्रयाणे भर्तृसंयुता। सर्वाभरणभूषाढ्या नानारत्नसमन्विता॥ ४॥
चन्द्रे निमीलिते चौरस्तस्या जग्राह भूषणम्। तत्र कोलाहलो जातो गर्भपातोऽभवत्तदा॥ ५॥
तेन पापेन बालानां गर्भनाशः प्रजायते॥ ६॥

अरुण उवाच।

का तस्य निष्कृतिः स्वामिन्यया पापं प्रणश्यति। ब्रूहि विस्तरतो देव लोकानां हितकाम्यया ७

श्रीसूर्य उवाच।

एकवासोविधिश्चैव लक्षपूजा ततः परा। सगर्भा गौः प्रदातव्या हविष्यं मितभोजनम्॥ ८॥
गर्भाशयगतो मासान्निषेकसमयादनु। पञ्चमे वाथ षष्ठे वा मासि जातो मृतश्च यः॥ ९॥
तयोः कर्मविशेषांश्च कथयिष्यामि योषिताम्। सप्तमेषु च मासेषु जन्मतः प्रसवाव्रयहम्॥ १०॥
अथवा चाष्टमे मासि सूतः सद्यो विपद्यते। स चापि मृतकल्पः स्यादामयैः सूतिकामयैः॥११॥
शोकादामोदराद्दोषाः शूलं गौरवकम्पने। रक्तस्रावो विवर्णत्वं जायते कर्मणेरितम्॥ १२॥
रजतस्य पलाभ्यां तु कोशं गर्भाश्रयाकृतिम्। कुसुम्भवेष्टितं तं तु रक्तवस्त्रेण वेष्टयेत्॥ १३॥
मधुना पूरयेत्तत्र शलाकां रूप्यनिर्मिताम्। तन्मध्ये हेमशकलं निक्षिपेदतियत्नतः॥ १४॥
दद्याद्विप्राय विधिवद्यथाश्रुति निरूपितम्॥ १५॥

मन्त्रः।

"यन्मया पूर्वजनुषि गर्भघातः कृतः प्रभो। तत्पातकविशुद्ध्यर्थं गर्भकोशं ददाम्यहम्॥ १६॥
मया मूढेन यद्रेतो निषिक्तं परयोषितिं। ततोऽनपत्यं यत्प्राप्तं तस्मान्मां मोचय प्रभो"॥ १७॥

एवं कृतविधेः सूत गर्भपातावनाशनम् । ब्राह्मणान्भोजयेत्पश्चाद्गां दद्याच्च सवत्सकाम् ॥ १८ ॥
सर्पिष्यात्मानमालोक्य भोजयेदिष्टबन्धुभिः ॥ १९ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनसप्तत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४६९ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे काचित्पुरुषं ताडयेत्खग । सेह जन्मनि रोगेण शूलेनैव प्रपीड्यते ॥ १ ॥
सुवर्णदानाद्विधिवत्तथा रुद्रजपादिह । पूजनाच्छंकरस्यापि शूलरोगाद्विमुच्यते ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४७० ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि योऽज्ञानान्नरो वै घातयेत्सुत । मित्रं च वायुरोगेण पीड्यते चेह जन्मनि ॥ १ ॥
तत्र कुर्यान्महाबाहो मन्त्रैर्वै वायुदैवतैः । पूजनं वायुदेवस्य गंधपुष्पैश्च धूपकैः ॥ २ ॥
नैवेद्यैर्बहुभक्ष्यैश्च वायुर्नश्यति तत्क्षणात् । इह जन्मनि पक्षीन्द्र पूजा वित्तानुसारतः ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकसप्तत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४७१ ॥

श्रीसूर्य उवाच ।

गोत्रघातकरी या च पुरा ज्ञानेन काश्यपे । सात्र जन्मनि लूताढ्या भवत्येव मयोदितम् ॥१॥
तीर्थस्नानं व्रतादीनि तत्फलान्यत्र चांडज । ज्ञानपूर्वकृतात्पापाद्रोगादेव क्षयो भवेत् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विसप्तत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४७२ ॥

श्रीसूर्य उवाच ।

कश्चिच्छूद्रो महाभाग बभूव प्राग्भवे धनी । व्यापारनिरतो दक्षः क्रयविक्रयकर्मसु ॥ १ ॥
नीताः पूर्वं रसास्तेन मिलित्वा चार्धसीरिणा । कालेन ते हृता लोभात्स्नेहा मूल्याधिकाः सुत॥२॥
भुक्त्वा पापफलान्घोरान्भ्रमरत्वमुपागतः । ततः पुण्याच्छुभान्भुक्त्वा पुण्यशेषाच्च पर्वते ॥ ३ ॥
शूद्रोऽव्ययकलायुक्तो भूमिदानात्सुरार्चनात् । स्नेहहारी यतः पूर्वं राजयक्ष्मप्रपीडितः ॥ ४ ॥
सर्वस्नेहातिदानाद्वै स्ववित्तात्तुर्यभागतः । स्वर्णदानात्तथाचात्र क्षयरोगाद्विमुच्यते ॥ ५ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिसप्तत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४७३ ॥

श्रीसूर्य उवाच ।

विषं दत्त्वा पतिं सूत प्राग्या जाराश्रिता सती । पतिघ्नी सा महादुष्टा बाल्ये ह विधवा सुत ॥ १ ॥
विष्णोराराधनादत्र गंगाया उपसेवनात् । धर्मादिह महाभाग परत्र च शुभा गतिः ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः चतुःसप्तत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४७४ ॥

श्रीसूर्य उवाच ।

देवागारं दहेद्यस्तु प्राग्जन्मन्यथ पुत्रक । रक्तातिसाररोगेण बाध्यते चेह जन्मनि ॥ १ ॥
तद्देवदानाद्विप्राय स्थापनाद्वा विधानतः । मुच्यते पापजाद्रोगादतीसाराद्विनिश्चितम् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चसप्तत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४७५ ॥

श्रीसूर्य उवाच ।

मूर्द्धाभिषिक्तो यः कश्चिन्मथुरायामभूत्सुधीः । राजसेवी महाशूर आखेटकरतः सदा ॥ १ ॥
मृगयायां गतो दैवाद्धातिता मृगशूकराः । तत्रैका हरिणी सूत घातिता गर्भसंयुता ॥ २ ॥
गर्भगौ निहतौ तत्र शुभौ द्वौ मृगशावकौ । सहायाभ्यां युतेनैव कृतं कर्म दुरात्मना ॥ ३ ॥
ताभ्यां मिलित्वा तौ भुक्तावमायां चांडजाधिप । सोऽपि काले महाभाग प्राप्तः शत्रुवशं पुरा॥४॥
स शौर्यकर्मणा सूत घातयित्वा रिपून्बहून् । घातितः सोऽपि बहुभिः प्रहारैरतिदारुणैः ॥ ५ ॥
संग्रामभूमौ स मृतः प्राप्तः स्वर्गपुरं तदा । भुक्त्वा नानाविधान्भोगान्स जातो ब्राह्मणस्त्विह ॥६॥
देशे प्रयागनिकटे सर्वशास्त्रार्थकोविदः । जातः कर्कटगे जीवे लग्नस्थे हि महातपाः ॥ ७ ॥
धनैर्नानाविधैर्युक्तो गाराङ्गो रक्तलोचनः । शिवपूजनजात्पुण्यात्प्राक्कृतात्सकलैः सुखैः ॥ ८ ॥
नानामनोरथैश्चापि पूर्णश्चैव जन्मनि । राज्यप्रचार्यत्युग्रश्च पुण्यात्पापात्फलं शृणु ॥ ९ ॥
धूर्तः शठः सर्वभक्ष्यः सर्वपापरतः क्वचित् । सहायलक्षणं चात्र शृणु पुत्र यथातथा ॥ १० ॥
याभ्यां मिलित्वा भुक्तौ द्वौ मृगशावौ खगाधिप । पृच्छकस्य च तौ पुत्रावुभौ ज्येष्ठकनिष्ठकौ११
अपस्मारेण रोगेण मृतौ चात्रैव जन्मनि । एवं संततिदुःखार्तः स विप्रो विधिवर्जनात् ॥ १२ ॥
मांसभक्षणजात्पापात्प्रायश्चित्तं वदाम्यहम् । पूजयेच्छिवलक्षं तु तदर्धं वा तदर्धकम् ॥ १३ ॥
हिरण्मयौ तथा देयौ द्वावत्र मृगशावकौ । पूजयेच्च तथा वायुं विधिना मृगदैवतम् ॥ १४ ॥
तन्मन्त्रैर्धूपगन्धाद्यैर्नानाभक्ष्यैर्विधानतः । प्रायश्चित्तं परं तस्य पापस्य क्षयकारकम् ॥ १५ ॥
अथवा भोजयेद्विप्रान्सहस्रद्वयसम्मितान् । पुत्रपौत्रविवृद्धिः स्यात्प्रायश्चित्ते कृते त्विह ॥ १६ ॥
प्रायश्चित्तेऽकृते सूत न च पुत्रसुखं लभेत् । रिष्टेन मरणं चापि वर्षे वेदाब्धिकेण्डज ॥ १७ ॥
प्रायश्चित्ते कृते तस्य जीवनं पञ्चसप्ततिम् । चैत्राष्टम्यां च निधनं शुक्लायां गरुडाग्रज ॥ १८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्सप्तत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४७६ ॥

श्रीसूर्य उवाच ।

गर्भपातनपापाढ्या बभूव प्राग्भवेण्डज । सा चेयं तेन पापेन गर्भपातनदुःखिनी ॥ १ ॥
विप्रकन्याविवाहाद्वै विधिवच्चेह जन्मनि । मुच्यते तेन पापेन गर्भस्थैर्यं भवेदिह ॥ २ ॥
अथवा पार्वतीं दद्याद्देवीं दशसुवर्णजाम् । युक्तां गणेशस्कन्दाभ्यां नानाभरणभूषिताम् ॥ ३ ॥
तदर्धमितिकां वापि पूजयित्वा विधानतः । मुच्यते पूर्वपापाच्च गर्भपातनजात्सुत ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तसप्तत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४७७ ॥

श्रीसूर्य उवाच ।

या काचिद्दाहयेन्नारी देवागारं खगाधिप । सातिसारेण महता पीडया पीड्यतेऽधुना ॥ १ ॥
शंकरप्रतिमादानान्मूर्तेस्तस्य प्रपूजनात् । न जायते महापीडा रक्तातीसारजा क्वचित् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टसप्तत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४७८ ॥

श्रीसूर्य उवाच ।

ब्रह्महा प्राग्भवे सूत तिर्यक्त्वं प्राप्य निश्चयात् । नरकान्दारुणांश्चैव प्राप्नोत्यत्रैव जन्मनि ॥ १ ॥
कर्मक्षयेऽतिकुष्ठेन तस्मिन्वयसि पीड्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनाशीत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४७९ ॥

श्रीसूर्य उवाच ।

या काचिद्धातयेन्नारी पत्युर्मित्रं च प्राग्भवे । नियतं वायुरोगेण पीड्यते बहुपीडया ॥ १ ॥
पापं प्रतीक्ष्य विप्रादेः सर्वस्वार्धार्धजेन च । वायुं हिरण्मयं कुर्यान्मृगं विहितलक्षणम् ॥ २ ॥
पूजयित्वा विधानेन गंधैर्वस्त्रैर्विशेषतः । मंत्रैश्च वायुजैः सूत दद्याद्विप्राय धीमते ॥ ३ ॥
वायुरोगोपशमनं दानेनानेन जायते ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽशीत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४८० ॥

श्रीसूर्य उवाच ।

अज्ञानादथ या नारी गोत्रघातकरी पुरा । बभूव सततं चेह लूतिरोगप्रपीडिता ॥ १ ॥
श्रवणादितिहासानां प्राजापत्यव्रतात्सुत । लूतिरोगं न पश्येत साऽत्र जन्मनि चांडज ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकाशीत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४८१ ॥

अरुण उवाच ।

भूमिदेवकुलोत्पन्नः किंचिद्वित्तसमन्वितः । संयुतो वायुपित्ताभ्यां नेत्रतोदशिरोर्तिमान् ॥ १ ॥
सद्वृत्तश्च सुधीर्धीमान्धर्मिष्ठो धर्मवत्सलः । कदाचिदुदरे बाधा व्रणो वातादिदोषतः ॥ २ ॥
परोक्षमपवादं च ब्रुवते: कारणं विना । तस्य प्रिया सदाचारा सती व्रतपरायणा ॥ ३ ॥
काकवन्ध्या कथं जाता कस्येदं कर्मणः फलम् ॥ ४ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि वैश्यस्तु भार्यां विप्रस्य सात्त्विकीम् ॥ ५ ॥
प्रतिवेशिज्ञानिनस्तु चकमे काममोहितः । अप्रसूता हि सा तस्य चपला चारुलक्षणा ॥ ६ ॥
वैश्येनाकारिता सा वैः लोभमोहादिविभ्रमैः । अज्ञानात्सङ्गमिच्छन्ती भाविनोऽर्थस्य वै बलात् ॥ ७ ॥
तावत्कालवशेनैव ब्राह्मणो जनतां गतः । स वैश्यो दैवयोगाच्च भाविनोऽर्थस्य गौरवात् ॥ ८ ॥
सुतनुं धर्षयामास बहुकालं खगेश्वर । व्यभिचारवशात्तस्य बाहुजस्य हृतं धनम् ॥ ९ ॥
गृहीतं तद्धनं सर्वं धूर्तया लुब्धचेतसा । ब्राह्मणी निधनं प्राप्ता लोके दुष्कीर्तिमाप हि ॥ १० ॥
तेन दुःखेन विप्रो वै ब्राह्मणीमत्यजत्पुरा । निर्वंशो गृहदुःखार्तो ब्राह्मणस्तु खगेश्वर ॥ ११ ॥
तेन कर्मविपाकेन तादृशं च भवेदिह । पश्चान्मानुष्यमापन्नो बहुशोकाकुलो भृशम् ॥ १२ ॥
इदं तु द्वितीयं जन्म ब्रह्मवंशसमुद्भवम् । प्राप्यते चानपत्यत्वमेकापत्यत्वमेव वा ॥ १३ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं स्वामिन् येन वंध्यात्वनाशनम् । एकापत्यभवं दुःखमनपत्यत्वमेव वा ॥ १४ ॥

श्रीसूर्य उवाच ।

मार्गशीर्षे शुभे मासे शुक्लपक्षादितः खग । प्रत्यक्षं सुखसौख्याप्तिव्रतं तु प्रतिवत्सरम् ॥ १५ ॥
षोडशाब्दानि नारीणां कर्तव्यं विधिपूर्वकम् । गौरीव्रतमिदं सूत सुतसौख्यफलप्रदम् ॥ १६ ॥
प्रातर्नियममास्थाय दंतधावनपूर्वकम् । अथाहं शिवयोः प्रीतिमाचरिष्ये सुतव्रतम् ॥ १७ ॥
ध्यानोपवासनिरता निशि जागरतत्परा । ततो मध्याह्नसमये स्नात्वा कुंकुमवाससी ॥ १८ ॥
परिधायार्चयेद्गौरीं पतिपुत्रवतीं स्त्रियम् । कुंकुमैः कज्जलैश्चालंकरणैः पुष्पमालया ॥ १९ ॥
ताम्बूलैस्तु सकर्पूरैः सौभाग्याष्टकवस्तुना । ततश्चास्तमिते भानौ वर्तिं षोडशतन्तुभिः ॥ २० ॥

विधाय तिलतैलेन दीपान्कुर्याच्छिवाग्रतः। गीतवादित्रनिर्घोषैः पुराणश्रवणादिभिः ॥ २१ ॥
नैवेद्यं विधिवत्कुर्यादपूपतिलतंडुलैः। तथा षोडशसंख्यानि शूर्पाण्यभिनवानि च ॥ २२ ॥
सप्तधान्यफलोपेतसौभाग्याष्टकयुक्ति हि। प्रत्येकं दीपकं न्यस्य गौर्यग्रे तु प्रकल्पयेत् ॥ २३ ॥
पतिपुत्रसुखायैव पूजयन्ती गिरेः सुताम्। भोजयेत्षोडश स्त्रीर्वै शुभास्ताः पतिसंयुताः ॥ २४ ॥
एवं विधिं समास्थाय भोजयेतां तु दंपती। नानाभोज्यैस्तथा पुष्पैः पक्षिभ्यो वलिमाहरेत्॥२५॥
दीनान्धकृपणेभ्योऽन्नं सर्पिष्यात्मानमीक्षयेत्। एतद्गौरीव्रतं नाम मार्गशीर्षे समाचरेत् ॥ २६ ॥
एवं कृतविधेः सूत प्राप्यते पुत्रपौत्रकम्। नारीनियमसंपूर्णा व्रतं कुर्यात्प्रयत्नतः ॥ २७ ॥
सुखसौभाग्ययुक्ता सा पतिपुत्रसुखाप्तये। ऐहिकं लक्षणं तस्या नार्या वै संप्रजायते ॥ २८ ॥
स्वसुर्मातृष्वसुर्वापि सपत्न्याः शोक एव वा। उदरार्तिरसृक्स्रावः पार्श्वपादकरादिषु ॥ २९ ॥
मिथ्याभिशंसनं क्वापि वाक्यदोषभवच्युतिः। स्वजातिनिन्दाहीनत्वं परेभ्यो मर्मतोदनम् ॥ ३० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्यशीत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४८२ ॥

श्रीसूर्य उवाच।

शकृन्मूत्रं सृजेद्यस्तु देवागारे नराधमः। गुदरोगमवाप्नोति सोऽत्र जन्मनि मानवः ॥ १ ॥
मासैकं पूजयेद्विष्णुं शिवं वा विधिनांडज। प्राजापत्यं चरेत्कृच्छ्रं दद्याद्गोमिथुनं सुत ॥ २ ॥
न पश्यति तदा पीडां गुदजामत्र जन्मनि ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्यशीत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४८३ ॥

श्रीसूर्य उवाच।

घातयेद्यः पुमान्नारीमज्ञानात्पूर्वजन्मनि। सोऽत्र जन्मनि जायेत कृशो वलविवर्जितः ॥ १ ॥
शर्कराधेनुदानेन दशसंख्येन चांडज। विमुच्यते कृशत्वाच्च शतब्राह्मणभोजनात् ॥ २ ॥
होमात्स्वस्त्ययनाज्जाप्याद्गायत्रीजपतोऽत्र च। तीर्थस्नानादाज्यदानाद्बली भवति नान्यथा ॥३॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरशीत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४८४ ॥

श्रीसूर्य उवाच।

बालानां घातिनी चैव या भवेत्पूर्वजन्मनि। तेनात्राब्दमितात्कालादर्वाग्बालो न जीवति ॥ १ ॥
इह जन्मनि भोः सूत तस्मात्सा मृतपुत्रका। अयं जीवेदयं जीवेच्चिन्तयन्ती च वै ध्रुवम् ॥ २ ॥
न जीवन्ति च तत्पुत्राः पूर्वपापात्तथांडज। प्रायश्चित्तं शृणुष्वाथ येन जीवन्ति तत्सुताः ॥ ३ ॥
श्रवणाद्धरिवंशस्य दशावृत्त्या खगेश्वर। पञ्चभ्येकमितावृत्त्या विशुद्धिः शिशुजाद्भवात् ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाशीत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४८५ ॥

श्रीसूर्य उवाच।

यः कश्चिद्घातयेत्पूर्वं ब्राह्मणं ज्ञानवर्जितः। कुष्ठरोगान्वितः सोऽपि जायते चेह जन्मनि ॥ १ ॥
दद्यात्कालनरं सूत सर्वोपस्करसंयुतम्। सर्वस्वं वा महापापे दानमुक्तं मनीषिभिः ॥ २ ॥
सर्वस्वदानात्कुष्ठस्य पीडा नश्यति तत्क्षणात् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडशीत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४८६ ॥

श्रीसूर्य उवाच ।

देवद्रव्यं हरेत्सूत पूर्वजन्मनि यो नरः । सोऽत्र जन्मनि जायेत वायुपीडाभिरन्वितः ॥ १ ॥
प्रायश्चित्तं परं वायोर्नाशनं तस्य वच्म्यहम् । जपेन्मृत्युंजयं मन्त्रं सावित्रीं च विशेषतः ॥ २ ॥
होमयेत्तद्दशांशेन ब्राह्मणान्भोजयेत्तथा । वायुरोगोपशान्त्यर्थं शक्त्या दद्याच्च दक्षिणाम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्ताशीत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४८७ ॥

श्रीसूर्य उवाच ।

देवागारे तु या काचित्प्राग्भवे विनता सुत । सृजेन्मूत्रं पुरीषं च मोहादत्रैव जन्मनि ॥ १ ॥
गुदरोगान्विता सा तु नारी पापप्रणाशनम् । वक्ष्ये गोमिथुनं दद्यात् प्राजापत्यं चरेद्व्रतम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोष्टाशीत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४८८ ॥

श्रीसूर्य उवाच ।

बभूव मुखजः कश्चिद्विद्याधनसमन्वितः । नानाकलासु कुशलो विष्णुभक्तिपरायणः ॥ १ ॥
राहुग्रस्ते प्रयागे च सर्वस्वमददत्पुरा । तत्र भाविबलात्सूत पापमाचरितं त्विदम् ॥ २ ॥
धर्षिता क्षत्रिया यूनि कामलोभाच्छुभानना । प्रताडितः पतिस्तस्यास्तेन दैवहतेन तु ॥ ३ ॥
ततो मृत्युवशं प्राप्तो गत्वा तु यमशासनम् । शुभाच्छुभफलं भुक्त्वा पापादत्यन्तदारुणम् ॥ ४ ॥
अन्यजन्मनि दानेन स जातः क्षत्रियाधरः । देशे विपाशानिकटे सप्तयोजनसम्मिते ॥ ५ ॥
सुरूपदेहः सद्बुद्धिः स्त्रीपुत्रधनसंयुतः । शूरो दाता प्रधानश्च देशेदेशेऽतिविश्रुतः ॥ ६ ॥
किञ्चित्पापरतो धूर्तो मनोदुःखाकुलो भृशम् । धर्षणात्क्षत्रियायास्तु भर्तृसंताडनात्तथा ॥ ७ ॥
वार्धके कंडुरोगार्तो निश्चयादिह जन्मनि । लक्ष्मैतदंडजश्रेष्ठ सूर्यशुक्रौ चतुर्थकौ ॥ ८ ॥
वक्ष्यामि तस्य पापस्य निष्कृतिं पापशोधिनीम् । लक्ष्मीनारायणं दद्यात्पलेनार्धपलेन वा ॥ ९ ॥
हिरण्मयं सुघटितं सर्वाभरणभूषितम् । पूजयित्वा तु गंधैश्च पुष्पैर्नानाविधैस्तथा ॥ १० ॥
दीपैर्विचित्रैर्विधिना दद्याद्विप्राय धीमते । गणनाथं तथा दद्यादशमाषसुवर्णजम् ॥ ११ ॥
एवं विधानं यः कुर्यात्पूर्वपापविशोधनम् । न तस्य दद्रुकंडूश्च तस्माद्दोषात्प्रमुच्यते ॥ १२ ॥
अकालमरणं तस्य प्रायश्चित्तेऽकृतेऽत्र च । प्रायश्चित्ते कृते त्वत्र सप्तत्र्यब्दं तु जीवनम् ॥ १३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोननवत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४८९ ॥

श्रीसूर्य उवाच ।

देवागारे जले वापि गोष्ठे वा विनतासुत । सृजेन्मूत्रं पुरीषं च मोहादत्रैव जन्मनि ॥ १ ॥
गुदरोगान्विता सा तु नारी पापप्रणाशनम् । वक्ष्ये गोमिथुनं दद्यात्प्राजापत्यव्रतं चरेत् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४९० ॥

श्रीसूर्य उवाच ।

घातयेद्यः स्त्रियं साध्वीं कामात्पापविमोहितः । प्राग्भवे नियतं सोऽत्र कार्श्यं भजति मानवः ॥ १॥
तेनैव मृत्युमाप्नोति रोगेण च खगाधिप । प्राप्ते रिष्टे च नष्टायुर्जायते च तदेनसः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकनवत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४९१ ॥

श्रीसूर्य उवाच ।

कन्यकावधजात्पूर्वपापात्कन्याप्रजा भवेत् । जन्मन्यत्र महाभाग पूर्वपापादिदं फलम् ॥ १ ॥
पूजनाल्लक्षरुद्राणां तदर्धार्धार्चनादिह । मुच्यते पूर्वपापाच्च घोरात्कन्यावधादिह ॥ २ ॥
अथवा विधिना सूत तडागोत्सर्गपुण्यतः । विप्राणां भोजनात्तस्मिंस्तडागे गोप्रदानतः ॥ ३ ॥
पूर्वपापात्प्रमुच्येत नात्र कार्या विचारणा ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विनवत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४९२ ॥

श्रीसूर्य उवाच ।

या च पूर्वभवे नारी देवद्रव्यापहारिणी । सेह जन्मनि पक्षीन्द्र भवेद्वायुप्रपीडिता ॥ १ ॥
देवालयं स्थिरं कृत्वा तत्र स्थाप्याश्च देवताः । वायुरोगोपशमनं निश्चितं जायतेऽडज ॥ २ ॥
भोजयेत्तत्र वै विप्रान्वायुप्रीत्या खगाधिप । दानं वित्तानुसारेण वित्तशाठ्यं न कारयेत् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिनवत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४९३ ॥

श्रीसूर्य उवाच ।

वैनतेय महाभाग शृणु चास्य विचेष्टितम् । राजपुत्रो भवेत्कश्चित्पृच्छकोऽसौ पुराभवे ॥ १ ॥
गंगासमाश्रिते देशे युग्मयोजनसम्मिते । ग्रामाध्यक्षो महातेजा धर्मशास्त्रक्रियायुतः ॥ २ ॥
शिवभक्तिपरो विद्वान्मन्त्रविच्चारुचेष्टितः । सुपुत्रमित्रमानाढ्यो धनधान्यसमाकुलः ॥ ३ ॥
दत्तानि तेन दानानि प्रयागे मकरेऽपि च । अन्यपर्वसु विप्रेभ्यो वस्त्राश्वाभरणानि च ॥ ४ ॥
गोभूशय्यासनादीनि भक्ष्याणि विविधानि च । सत्पात्रेषु गृहस्थेषु श्रद्धापूतेन चेतसा ॥ ५ ॥
अथो भाविवलात्तेन कामलुब्धेन यौवने । ब्राह्मण्यां धारितो गर्भः पापमाचरितं त्विदम् ॥ ६ ॥
यत्ने कृतेऽपि तत्रैव नासीद्गर्भस्य पातनम् । ततो लोकभयात्सूत विषं भुक्त्वा तु सा मृता ॥ ७ ॥
स्त्रीसाहाय्येन तेनैव कृतं प्राक्कर्म दारुणम् । ततो वहुतिथे काले ससहायो हि वाहुजः ॥ ८ ॥
प्राप्य धर्मपुरं तत्र शुभाशुभविवेचनम् । पापात्पापफलं भुक्त्वा पुण्यात्स्वर्गांश्च शाश्वतान् ॥ ९ ॥
तीर्थराजप्रभावात्प्राग्दानात्तु विधिवत्तथा । सरस्वत्याः परे देशे जाङ्गले नखयोजने ॥ १० ॥
कुले महति पक्षीन्द्र जातो वन्दिजनोऽधुना । गौरः सुरूपो मतिमान्सुशीलश्च दयापरः ॥ ११ ॥
चञ्चलो दर्शनीयाक्षो नात्युच्चो न लघुः क्षमी । वाचा मधुरया युक्तो राजसेव्यथ मन्त्रवित् १२
उपकारपरो विद्वान्वली सर्वजनप्रियः । सभायां चतुरो धीरो सुखैश्वर्यसमाकुलः ॥ १३ ॥
सुधर्मा दानशीलश्च धनस्त्रीमित्रसंयुतः । कुलाग्रणीर्यशस्वी च भृत्यवाहनभोगभाक् ॥ १४ ॥
धर्मादिदं तथा पापाल्लोभी पापरतः क्वचित् । धूर्तः शठोऽथ मितदो पितृसौख्यविवर्जितः ॥ १५॥
किंचिद्वुगस्ति जठरे पित्ताधिक्योऽल्पवीर्यभाक् । ब्राह्मण्यां वीर्यदानात्प्राग्गर्भपाताच्च तद्धात् १६
अत्र जन्मन्यसौ प्रष्टा पुत्रसौख्यविवर्जितः । या स्त्री पूर्वं सहायाभूत्पापकर्मणि चाण्डज ॥ १७ ॥
सा प्रष्टुरत्र वनिता पुत्रदुःखप्रपीडिता । गोस्त्रीपुत्रवधे पापं पुत्रदुःखकरं यतः ॥ १८ ॥
प्रष्टुर्लग्नादिदं चिह्नं सूर्यः स्त्रीराशिगः किल । महादुःखकृतात्पापाद्राहुरुच्चगृहे गतः ॥ १९ ॥
लक्ष्योऽत्र लक्षणैरेभिः प्रायश्चित्तं वदाम्यहम् । पलैर्दशभितैः कार्या ब्राह्मणी च हिरण्मयी ॥ २०॥
पत्रे लेख्या शुभाकारा सगर्भावयवान्विता । तदर्धेन हिरण्येन निजवित्तानुसारतः ॥ २१ ॥
संपूज्य गन्धपुष्पाद्यैर्मन्त्रैश्चापि विशेषतः । सा च देया विधिज्ञाय मन्त्रमेतमुदीरयेत् ॥ २२ ॥

मन्त्रः ।

"सौवर्णीं ब्राह्मणीमेतां सगर्भां सोमदेवताम् । ददेऽहं विप्रमुख्याय पूर्वपापविशुद्धये" ॥ २३ ॥
ब्राह्मणं हेमजं दद्यात्पलैर्युग्ममितैः शुभम् । तदर्धमितिकं वापि द्वयोर्वित्तानुमानतः ॥ २४ ॥
सोमं दद्यात्पलैकं तु हैमं पापविशुद्धये । पलेनार्धपलेनापि कमलं हेमजं शुभम् ॥ २५ ॥
पूजयेत्पारदेनैव दद्यात्पापविमुक्तये । सुवर्णद्वयमानेन विष्णुं रुद्रं च कारयेत् ॥ २६ ॥
वेदवेदमितैर्माषैर्गणेशार्कौ हिरण्मयौ । संपूज्य गन्धपुष्पाद्यैर्मन्त्रैश्चापि विधानतः ॥ २७ ॥
ब्राह्मणेभ्योऽपि ते देयाः सर्वपापविशुद्धये । गायत्र्यष्टसहस्रं तु त्र्यम्बकं तन्मितं तथा ॥ २८ ॥
अष्टाक्षरं तदर्धं तु जपेद्दोषापनुत्तये । होमयेत्तद्दशांशेन तिलाज्ययवतंडुलैः ॥ २९ ॥
विप्रेभ्यो दक्षिणां दद्याच्छक्त्या विप्रांश्च भोजयेत् । पश्चाद्वापि हरेर्वंशं शृणुयाद्भक्तपुत्रदम् ॥३०॥
य एवं कुरुते सूत शक्त्या पापविशोधनम् । सुखं पुत्रस्य लभते स्त्रीभ्यामत्रैव जन्मनि ॥ ३१ ॥
नाधयो व्याधयस्तस्य न वीर्यक्षयमाप्नुयात् । न करोति च यो मोहात्त्रिष्वेकं पापशोधनम्॥३२॥
न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः । पञ्चवेदमिते वर्षे रिष्टं चाकृतनिष्कृतेः ॥ ३३ ॥
प्रायश्चित्ते कृते त्वायुर्वर्षाणां पञ्चसप्ततिम् । जीवनं कथितं त्वत्र न चारिष्टं भयं भवेत् ॥ ३४ ॥
न भवेत्पुत्रमरणं निर्याणान्ते च सद्गतिः । जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् ॥ ३५ ॥
यद्यदन्तर्गतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ ३६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्नवत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४९४ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यसौ विप्रो नर्मदायां वसन् सुत । धर्मशास्त्रक्रियाहीनः पुत्रपौत्रसमन्वितः ॥ १ ॥
विप्रोत्संगगतस्तत्र गङ्गास्नानमकारयत् । कष्टेन पाल्यतेऽनेन कुटुम्बः शकटेन वै ॥ २ ॥
कदाचित्स वनं गत्वा ददाह वनमल्पकम् । तस्मिन्दाहे तु निर्दग्धा जीवास्तत्र खगाधिप ॥ ३॥
पापं कृतं स्वकार्यार्थं कुटुम्बरक्षणाय च । स्त्रीसहाययुतस्तत्र गतो धर्मपुरं प्रति ॥ ४ ॥
भुक्त्वा शुभाशुभं तत्र जातोऽयं पादजस्त्विह । नर्मदापश्चिमे देशे पर्वते मध्यरूपधृक् ॥ ५ ॥
वृश्चिकस्थे बुधे ऋक्षे रवौ वृषभगे तमे । रक्तगौरस्तथा बाल्ये भ्रातृहीनोऽल्पवित्तकः ॥ ६ ॥
स चादिकन्यापुत्रैस्तु रहितो दृश्यते सुत । कुचत्वारिंशदब्दान्तं न च पुत्रसुखं क्वचित् ॥ ७ ॥
जीवदाहात्कृतात्पापादल्पपुत्रोऽत्र वर्तते । स्त्रीसहाययुतो यस्मात्सापत्नत्वं भविष्यति ॥ ८ ॥
जीवघातात्पुरा चात्र पादाद्वूर्ध्वं रुगन्वितः । प्रायश्चित्ते कृते सूत तयोः पुत्रसुखं त्विह ॥ ९ ॥
प्रवक्ष्यामि महाभाग प्रायश्चित्तमथो शृणु । राजताश्चटकाः कार्याः पत्रे लेख्या हिरण्मये ॥१०॥
पलत्रिंशन्मिते यस्माद्वस्वंगुलविधानके । तदर्धमितके वापि निजवित्तानुसारतः ॥ ११ ॥
तत्र वृश्चिकसूर्यौ तु कार्यौ यत्नाद्वनान्तरे । वनदेवी तथा कार्या पञ्चमाषैर्हिरण्मयी ॥ १२ ॥
वृक्षा लेख्या वने तस्मिँल्लतौषधिसमन्विताः । य एवं कुरुते सूत पुत्रसौख्यविवर्द्धनम् ॥ १३ ॥
भविष्यति न सन्देहो दानस्यास्य प्रभावतः । रिष्टं पञ्चाशदब्दे तु प्रायश्चित्तेऽकृतेऽत्विह ॥ १४ ॥
प्रायश्चित्ते कृतेत्वायुरष्टषष्ट्यब्दसंमितम् ॥ १५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचनवत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४९५ ॥

श्रीसूर्य उवाच।

मथुरामण्डले सूत वसन्क्षत्री प्रतापवान्। धर्मिष्ठो दानशीलश्च देवतातिथिपूजकः ॥ १ ॥
पापमाचरितं तेन भाविनोर्थस्य वै वलात्। ब्राह्मण्यां धारितो गर्भः कामलोभेन निश्चयात् ॥२॥
यत्ने कृतेऽपि तत्रैव नाभूद्गर्भस्य पातनम्। ततो लोकभयात्सूत विषं भुक्त्वा तु सा मृता ॥ ३ ॥
अर्भकोऽपि मृतस्तस्या गर्भपातोत्थपीडनात्। सहायैकयुतेनैव नाभूद्गर्भस्य पातनम् ॥ ४ ॥
ततो मृत्युवशं प्राप्तः ससहायो हि बाहुजः। भुक्त्वा पापफलं त्पापात्पुण्यात्स्वर्गफलं तथा ॥ ५ ॥
महापापकृताद्दोषाद्गतिर्वै बाहुजादधः। यमुनायां लाभगे तु विंशद्योजनसम्मिते ॥ ६ ॥
देशे जातः पूर्वपुण्यात्स शूद्रश्चेह जन्मनि। सुकर्माऽमितदो दक्षो मतिमाँल्लोकविश्रुतः ॥ ७ ॥
ब्राह्मण्यां वीर्यदानात्प्राक्तद्वधाच्चाप्यपुत्रकः। निष्कृतिं तां प्रवक्ष्यामि पूर्वपापविशोधिनीम् ॥ ८ ॥
शूद्रायाः प्रतिमा कार्या पलार्द्धस्वर्णनिर्मिता। लेख्या गर्भाच्युतैर्बालैः सौवर्णैर्भूषिता शुभा ॥९॥
सा देया तु विधिज्ञाय पूर्वपापविशुद्धये। देयः पञ्चमितैर्माषैस्तथा वेदनिधिः सुत ॥ १० ॥
जपेच्च वेधसो मन्त्रं वैष्णवं त्र्यम्बकं सुत। पूर्वपापविशुद्ध्यर्थं सहस्रं प्रतिदैवतम् ॥ ११ ॥
होमयेच्च तिलांस्तत्र सघृतान् स्थंडिले शुभे। स्वगृह्योक्तविधानेन स्थापयित्वा हुताशनम् ॥१२॥
ब्राह्मणान्भोजयेच्छक्त्या तेभ्यो दद्याच्च दक्षिणाम्। ततः सूर्यव्रतं कुर्यात्सर्वपापविशोधनम्॥१३॥
सप्तम्यां च निराहारः सूर्यपूजनतत्परः। तस्य पुत्रविवृद्धिः स्यादत्र जन्मनि वै ध्रुवम् ॥ १४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पण्णवत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४९६ ॥

श्रीसूर्य उवाच।

पूर्वजन्मन्यसौ शूद्रो धर्मकर्मसमन्वितः। विप्रोत्संगगतस्तत्र गंगास्नानमथाकरोत् ॥ १ ॥
दुःखेन पाल्यते तेन कुटुम्बस्तुरगेण वै। एकदा तु वनं गत्वा ददाह वनमल्पकम् ॥ २ ॥
तस्मिन्दग्धे तु निर्दग्धा जीवाश्चापि विशेषतः। कृतमाचरणं दुष्टं कुटुम्बभरणाय च ॥ ३ ॥
भ्रातृभिस्त्रैश्च संयुक्तो गतो धर्मपुरं प्रति। भुक्त्वा शुभं तथा पापं जातोऽयं पादजाधरः ॥ ४ ॥
शतद्रुनिकटे देशे पुत्रपौत्रसमन्वितः। धनुस्थिते गुरौ ऋक्षे कन्या चन्द्रे वृषे रवौ ॥ ५ ॥
श्यामाङ्गो दिव्यशोभाढ्यः सुखदुःखाकुलो महान्। स्त्रीसहाययुतो यस्मात्पत्नीत्वं च भविष्यति६
सत्त्वघातात्पुरा चोग्रात्कटेरूर्ध्वं रुगन्वितः। प्रायश्चित्तं प्रवक्ष्यामि येन पापक्षयो भवेत् ॥ ७ ॥
पत्रं कृत्वा सुवर्णाढ्यं पलयुग्ममितं तथा। तस्मिन्हिरण्मये पत्रे चटकाद्याश्च लेख्यकाः ॥ ८ ॥
वनदेवी तथा कार्या नानासत्त्वसमन्विता। सा देया तु विधिज्ञाय पूर्वपापविमोचनात् ॥ ९ ॥
रौक्मं शुभ्रं तथा दद्यादिन्द्रं सार्धपलात्मकम्। गायत्र्यष्टसहस्रं तु होमयेत्तद्दशांशतः ॥ १० ॥
ब्राह्मणान्भोजयेच्छक्त्या सर्वपापात्प्रमुच्यते। य एवं कुरुते सूत पूर्वपापप्रणाशनम् ॥ ११ ॥
तस्य पुत्रविवृद्धिः स्यात्स्त्रीभ्यामत्रैव जन्मनि। नैवं करोति यो मोहात्प्रायश्चित्तं यथामतम् १२
न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः। प्रायश्चित्ते कृते त्वायुर्वेदाशीतिमिताब्दकम् १३ ॥
यद्यदन्तर्गतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ १४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तनवत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४९७ ॥

श्रीसूर्य उवाच।

कश्चिद्बन्दिजनः सूत सर्वविद्याविशारदः। वेदाभ्यासरतः श्रीमान्प्राप्तसर्वमनोरथः ॥ १ ॥
तुलाघृतादिस्नेहास्तु विप्राणां स्नेहभागिनाम्। गृहीता अतिलोभेन चौर्येणैव तु तत्कृते ॥ २ ॥

यस्माज्ज्ञानकृतं चैतत्प्राग्भवे तत्फलं शृणु । स क्षत्रियः प्रयागेऽस्ति द्विजो वेदविदांवरः ॥ ३ ॥
धनमित्रसमायुक्तः कुष्ठरोगसमन्वितः । वेदाभ्यासात्तथा दानात्तीर्थराजाधिवासतः ॥ ४ ॥
नाशः स्यात्कुष्ठरोगस्य चात्रजन्मनि चांडज । दोषात्स्वल्पात्फलैर्युक्तो जीवेद्वर्षशतं ध्रुवम् ॥ ५ ॥
यद्यदन्तर्गतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टनवत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४९८ ॥

श्रीसूर्य उवाच ।

कन्याघाती भवेद्यस्तु पूर्वजन्मनि मानवः । वैनतेयात्र जनुषि मृतपुत्रः प्रजायते ॥ १ ॥
श्रवणाद्धरिवंशस्य विधिवच्चात्र जन्मनि । हरिदानात्तथा चैव पूजनाच्छंकरस्य च ॥ २ ॥
भविष्यन्ति च तत्पुत्रा नात्र कार्या विचारणा ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवनवत्युत्तरचतुःशताधिकसहस्रतमः ॥ १४९९ ॥

श्रीसूर्य उवाच ।

सा मृगी याभवत्पूर्वं निषादी पुनरेव सा । वैश्याधमा पञ्चनदे जातात्र विनतासुत ॥ १ ॥
पुत्रपौत्रधनैर्धान्यैर्गजाश्वोष्ट्रादिवाहनैः । युक्ता सा यवनी सूत क्षेत्रराजस्य सेवनात् ॥ २ ॥
द्विजसंगयुतात्पूर्वं पूर्वं तद्धितवांछनात् । यवनी पूर्वपापाच्च तत्र तस्योपसेवनात् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चशताधिकसहस्रतमः ॥ १५०० ॥

श्रीसूर्य उवाच ।

गते वहुतिथे काले स जातो ब्राह्मणोऽधुना । गंगायमुनयोर्मध्ये क्रूरकर्मा महोद्यमी ॥ १ ॥
प्राक् शिवाराधनात्पुण्याद्बाहुजः कुष्ठसंयुतः । वक्ष्यामि निष्कृतिं तस्य पूर्वपापौघनाशिनीम् ॥२॥
सर्वसस्ययुतः कार्यो वृषभोऽत्र हिरण्मयः । क्षौमवस्त्रयुतो भव्यो मृगाभ्यां संयुतो महान् ॥ ३ ॥
स देयो वेदविदुषे कुष्ठदोषोपशान्तये । दानेनानेन सततं प्रीतो भवति वै शिवः ॥ ४ ॥
तस्माच्छिवप्रसादाद्वै कुष्ठस्तस्य प्रशाम्यति ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोत्तरपञ्चशताधिकसहस्रतमः ॥ १५०१ ॥

श्रीसूर्य उवाच ।

प्रागासीद्बाहुजा काचिद्भर्तुः प्रियरता सदा । दानधर्मरता साध्वी विप्राणां पूजने रता ॥ १ ॥
तदा दोषात्सा सुभगा द्रव्यलोभरताऽभवत् । सपत्नीपुत्रमददाद्विषं चैतद्वशानुगम् ॥ २ ॥
मृतस्तद्विषयोगेन गृहीतं तद्धनं तया । तद्दुःखेन पतिस्तस्य मृतः पुत्रशुचान्वितः ॥ ३ ॥
पापमाचरितं चोग्रं स्वपुत्रवधसंज्ञकम् । प्राप्ता यमपुरं भुक्त्वा पूर्वपुण्यफलानि वै ॥ ४ ॥
फलानि तद्वत्पापानां घोरान्नरकसंज्ञकान् । पूर्वपुण्यप्रभावेण सा जाता पर्वतेऽत्रिह ॥ ५ ॥
क्षात्रे कुले महापुण्ये राज्यशक्तिसमन्विते । सा रक्तगौरा धर्मज्ञा सदा पुण्यपरायणा ॥ ६ ॥
मध्या सुरूपा सिद्धार्था सुशीला गौरवान्विता । नातिव्ययायुता पापाल्लोभाढ्या स्वल्पपुत्रका ॥७॥
स्वल्पपापरते काले चाधिव्याधिसमन्विता । यौवने भर्तृसंयुक्ता वार्धके पुत्रवर्जिता ॥ ८ ॥
सपत्नीपुत्रवधजात्पूर्वपापात्खगाधिप । लक्षणैरेभिराढ्यायाः प्रायश्चित्तं वदाम्यहम् ॥ ९ ॥
विष्णुः कार्यः शतैर्मार्षैः सौवर्णैर्विश्वयोनिभृत् । देयो विप्राय पात्राय पूर्वपापापनुत्तये ॥ १० ॥
जपेदष्टाक्षरं मन्त्रमयुतं होमयेन्नरः । गायत्रीं च जपेत्तद्वद्यावद्भावस्तथा सुत ॥ ११ ॥

भोजयेच्छक्तितो विप्रांस्तेभ्यो दद्याच्च दक्षिणाम् । एवं कुर्यात्प्रयत्नेन पूर्वपापविशोधनम् ॥ १२ ॥
न तस्याः पुत्रमरणं तदग्रे जायते ध्रुवम् । एवं या कुरुते नारी प्रायश्चित्तं विधानतः ॥ १३ ॥
विप्राणां पूजनाद्दानात्तस्याः सन्ततिवर्धनम् । जीवनं कथितं तस्या वर्षाणां सप्तसप्ततिम् ॥ १४ ॥
रिष्टं षष्टिमिते चाब्दे ध्रुवं चाकृतनिष्कृतेः ॥ १५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्युत्तरपञ्चशताधिकसहस्रतमः ॥ १५०२ ॥

अरुण उवाच ।

कश्चिद्विप्रकुलोत्पन्नो देहीवन्द्यः कृशानुवत् । सदाचारः सुशोभाढ्यो दयानियमतत्परः ॥ १ ॥
क्रयविक्रयकर्ता च किंचिद्विद्यादिवान्भुवि । तस्य प्रिया शुभाचारा पतिभक्तिपरायणा ॥ २ ॥
मातृपक्षं न चायाति प्रीतिं वै भ्रातृमातुलैः । असृग्वातगदार्तानां बाल्ये स्याद्ग्रहणी गदः ॥ ३ ॥
काष्ठलोष्टाश्मशस्त्राद्यैर्घातः स्यात्करपादयोः । बहुपुत्राः प्रसूताश्च ह्यपुत्रा जायते भुवि ॥ ४ ॥
अथवा मृतपुत्रत्वं जायते केन मानद । जातमात्रा मृताः केचित्केचित्पौगण्डमाश्रिताः ॥ ५ ॥
केचिद्दृष्टानना वापि मृतः पुत्रोऽग्निमासकः । रक्तस्रावाद्भृशं पीडा मासेमासेऽभवत्किल ॥ ६ ॥
केन कर्मविपाकेन सत्यं वद दिवस्पते ॥ ७ ॥

श्रीसूर्य उवाच ।

पूर्वं क्षात्रः समुत्पन्नः किंचिद्भूमिपतिस्तथा । तावज्जन्मनि वैश्यस्तु परवित्तापहारकः ॥ ८ ॥
दूतिकाकर्मनिरतो लोकचिन्तानुरञ्जकः । ग्रामाधीशोऽभवत्सोऽपि स्वातन्त्र्यमगमत्परम् ॥ ९ ॥
एको ग्रामेऽवसद्विप्रः शान्तोदान्तः क्षमी सदा । पुत्र्यः पञ्च तथा सप्त न पुत्रो वित्तसंयुतः ॥ १० ॥
कालेनैव मृतो विप्रो हृतं तेन धनं घनम् । मिथ्याभिशंसनैर्वाक्यैः क्रोधभर्त्सनतर्जनैः ॥ ११ ॥
अपुत्रश्च मृतो विप्रो सर्वस्वमहरच्छठः । निराधाराः सुता जाता न कृतं द्विजभोजनम् ॥ १२ ॥
क्रियाकर्म कृतं नैव सर्वं राज्ञा हृतं च यत् । एवं कृतापराधोऽसौ क्षत्रियो दूतिकया सह ॥ १३ ॥
किञ्चित्कालानन्तरं वै दस्युकर्मरतोऽभवत् । म्लेच्छैर्विनिहतो मार्गे गतोऽसौ यमशासनम् ॥ १४ ॥
केचित्केचिद्विपच्यन्ते नरके भृशदारुणे । दृष्ट्वा भुक्त्वा यातना वा इह जन्मनि मानद ॥ १५ ॥
विप्रवंशे समुत्पन्नः कस्माच्चित्सुकृतात्स हि । इदं द्वितीयं वै जन्म विप्रत्वं यत्र तस्य वै ॥ १६ ॥
पूर्वकर्मविपाकेन कन्यापत्यं प्रजायते । ब्रह्मस्वहरणाच्चैव मृतपुत्रः प्रजायते ॥ १७ ॥
नानापत्यान पच्यन्ते नानाकर्मार्जितानि हि । पुराकृतानि कर्माणि भुज्यन्ते जन्मजन्मनि ॥ १८ ॥

अरुण उवाच ।

प्रायश्चित्तं वद स्वामिन्येन जीवेच्चिरं सुतः । कन्यापत्यप्रशमनं बहुपुत्रकरं तथा ॥ १९ ॥

श्रीसूर्य उवाच ।

सुशुभे भूमिदेशे तु गोमयाद्युपलिप्तके । तत्रोपर्याविकं स्तीर्याथवा चाजिनकं शुभम् ॥ २० ॥
छादयेच्छुक्लवस्त्रेण तण्डुलद्रोणपर्वतम् । तत्रोपरि न्यसेत्पात्रं ताम्रं दशकपालिकम् ॥ २१ ॥
स्थापयेत्काञ्चयीं मूर्तिं सौवर्णीं शुभलक्षणाम् । मुक्तायज्ञोपवीताढ्यां निष्कसौवर्णनिर्मिताम् २२
दधानां करयुग्मेन चाक्षमालां कमंण्डलुम् । काञ्चयीं वामभागेन त्वदितिं विश्वमातरम् ॥ २३ ॥
सौवर्णीं स्थापयेत्सूत सुवर्णद्वयनिर्मिताम् । आसने वै समास्थाय ततो द्रोणाद्दिशंदिशम् ॥ २४ ॥
हारकेयूरमुकुटकुण्डलाभरणान्वितौ । एवं तौ दम्पती सम्यगर्चयेत्पर्वतोपरि ॥ २५ ॥

कृत्वा प्रतिष्ठितप्राणां पूजयेद्विविधैर्गुणैः । नानाफलयुतं चाध्य दत्त्वा पुष्पः प्रपूजयेत् ॥ २६ ॥
अभ्यर्च्य दम्पती तौ तु मन्त्रमेतमुदीरयेत् ॥ २७ ॥

मंत्रः ।

"यन्मया पूर्वजनुषि विप्राणां वधबन्धने । कृते कृतं दौत्यमुग्रं वाक्यदोषादि यत्कृतम् ॥ २८ ॥
तत्सर्वं क्षम्यतान्देव तव मूर्तिं ददाम्यहम्" । अदितिं च प्रणम्याथ कृताञ्जलिरिदं ब्रुवन् ॥ २९ ॥
"अदिते विश्वमातस्त्वं शरण्या शरणार्थिनाम् । प्रियादुःखौघसंतप्तहृदयं मामवेश्वरि ॥ ३० ॥
सम्प्रणाशाय दुःखस्य प्रजान्देहि यशस्विनि ।" एवं कृत्वा तु विसृजेद्ब्राह्मणान्भोजयेत्ततः॥३१॥
शालग्रामशिलां शुद्धां सोमकान्तमणिं तथा । चन्द्रसूर्योपरागे तु ब्राह्मणाय समर्पयेत् ॥ ३२ ॥
एवं कृतविधिः सूत कृष्णां गां दापयेत्ततः । सर्पिष्यात्मानमालोक्य भोजयेच्च समृद्धिभिः॥३३॥
ऐहिकं लक्षणं तस्य शरीरेप्युपजायते । काष्ठलोष्टादिशस्त्राद्यैः करपादव्रणं वदेत् ॥ ३४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्युत्तरपञ्चशताधिकसहस्रतमः ॥ १९०३ ॥

श्रीसूर्य उवाच ।

राजानं घातयेद्यस्तु पुरुषः प्राग्भवेण्डज । स राजयक्ष्मरोगेण युक्तः स्यादिह जन्मनि ॥ १ ॥
तस्मिन्वयसि पक्षीन्द्र सोऽपि प्राणैर्वियुज्यते । महापापोद्भवाद्रोगान्नचोक्ता निष्कृतिर्मया ॥ २ ॥
अपि ज्ञानकृतंपापंरिष्टरूपेण काश्यपे । नाशयत्यमरं सिद्धं पूर्णायुष्कमपि ध्रुवम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरुत्तरपञ्चशताधिकसहस्रतमः ॥ १९०४ ॥

श्रीसूर्य उवाच ।

परगर्भन्तु यः कश्चिद्घातयेज्ज्ञानवर्जितः । जलन्धरेण सततं रोगेणेह प्रपीड्यते ॥ १ ॥
जलधेनुप्रदानेन विधिना गरुडाग्रज । ताम्ररूप्यसुवर्णानां दानात्पापप्रणाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चोत्तरपञ्चशताधिकसहस्रतमः ॥ १९०५ ॥

श्रीसूर्य उवाच ।

ब्राह्मणोऽभूत्कुरुक्षेत्रे कृषिकृद्वेदपारगः । स्वज्ञातीयस्य चान्यत्र वृत्तिलोपं चकार सः ॥ १ ॥
तत्सम्बन्धेऽभवद्युद्धं द्वयोरेको मृतस्तदा । वृत्तिलोपी द्विजः काले गतो हि यमशासनम् ॥ २ ॥
भुक्त्वा तत्पापजं सर्वं शतद्रुनिकटे त्विह । स हि जातो द्विजश्चात्र युवभावे खगाधिप ॥ ३ ॥
तत्पापनाशनं सर्वं प्रायश्चित्तं प्रवक्ष्यहम् । वेदाभ्यासाद्दृढात्सूत सावित्रीजपतस्तथा ॥ ४ ॥
गङ्गायां वासतो वापि सर्वपापात्प्रमुच्यते । न कुष्ठवृद्धिरत्रास्ति स्थितस्य शमनं भवेत् ॥ ५ ॥
जीवेत्पष्टिमिताब्दान्तं रिष्टं चैव प्रणश्यति । गतिस्तस्य महाभाग वेदाभ्यासाज्जपात्तथा ॥ ६ ॥
भविष्यति शुभा लोके परत्र च खगेश्वर ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडुत्तरपञ्चशताधिकसहस्रतमः ॥ १९०६ ॥

श्रीसूर्य उवाच ।

कुलद्वयानन्दकरी पूर्वजन्मनि वैश्यजा । बभूव भर्तुः सुखदा तदाज्ञापालिनी सती ॥ १ ॥
इह जन्मनि सा विप्रा काश्यां जाता हि सुव्रत । व्रतदानपरा चापि भर्तृतोषणसंयुता ॥ २ ॥

पञ्चपञ्चाशदण्डान्तं प्रवेक्ष्यत्यत्र जन्मनि । स्वर्गकामा चिताग्नौ तु नात्र कार्या विचारणा ॥ ३ ॥
सा गमिष्यति वै स्वर्गमन्यजन्मनि वै नरः । भविष्यति महाराजकुले राजातिधार्मिकः ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तोत्तरपञ्चशताधिकसहस्रतमः ॥ १५०७ ॥

श्रीसूर्य उवाच ।

पीड्यते वातरोगेण दारुणेन खगाधिप । पूर्वजन्मनि यश्चाद्याद्रसानिभ्यगृहाश्रितः ॥ १ ॥
प्रायश्चित्तं परं तस्य व्रतं चान्द्रायणं स्मृतम् । व्रतान्ते कपिलां दद्यात्सर्वपापापनुत्तये ॥ २ ॥
पापक्षये क्षयं याति रोगस्तत्पापजस्त्विह ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टोत्तरपंचशताधिकसहस्रतमः ॥ १५०८ ॥

श्रीसूर्य उवाच ।

स्वगर्भं पातयेत्पूर्वं या नारी पापमोहिता । जलोदरकृता पीडा जायते चात्र जन्मनि ॥ १ ॥
रजतस्वर्णताम्राणां दानाद्रोगविनाशनम् । जलधेनुप्रदानेन तथैव विनतासुत ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवोत्तरपंचशताधिकसहस्रतमः ॥ १५०९ ॥

श्रीसूर्य उवाच ।

अस्त्यत्र सुमुखी सूत सदा भर्तृपरायणा । दानधर्मरता भव्या सुभगा पुत्रवर्जिता ॥ १ ॥
पूर्वमासीच्च मुखजा सगर्भा फललालसा । त्रोटितं चान्यस्य फलं भोक्तुं चौर्येण वै तया ॥ २ ॥
तेन कर्मविपाकेन फलहीनात्र जन्मनि । भवन्ति खलु ये पुत्रा अर्वाग्वर्षाष्टतोऽण्डज ॥ ३ ॥
पञ्चत्वं प्राप्नुवन्त्यत्र कस्मादकृतनिष्कृतेः । निष्कृतिं तां प्रवक्ष्यामि पूर्वपापप्रणाशिनीम् ॥ ४ ॥
शनिवारेऽण्डजश्रेष्ठ यत्रास्तेऽश्वत्थकं सुत । तत्तले ब्राह्मणान्सूर्यदिने षष्ठ्यान्तु भोजयेत् ॥ ५ ॥
नानाफलैस्तथा पक्वैः सापूपैरससंयुतैः । फलानि विकिरेत्तत्र कृत्वाश्वत्थं प्रदक्षिणम् ॥ ६ ॥
पूजयेत्तं महाभाग जीवेत्तस्याश्च वै सुतः ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो दशोत्तरपंचशताधिकसहस्रतमः ॥ १५१० ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि या काचिद्घातयेद्ब्राह्मणान्सुत । सात्र जन्मनि कुष्ठेन तस्मिन्वयसि पीडिता ॥ १ ॥
जायते म्रियते चात्र गलत्कुष्ठेन चाण्डज । पापाज्ज्ञानकृतात्पूर्वान्नचोक्ता निष्कृतिर्मया ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकादशोत्तरपञ्चशताधिकसहस्रतमः ॥ १५११ ॥

श्रीसूर्य उवाच ।

देवो हि यामुने ह्यासीत्पूर्वं वाहुजसंज्ञके । गङ्गास्नानं कृतं तेन वाहुजानां सहायतः ॥ १ ॥
शकटेन कुटुम्वस्य पालनं वै चकार सः । एकस्मिन्वै दिने गत्वा ददाह सद्मं वनम् ॥ २ ॥
वलंदेवस्य सम्प्राप्तो जीवा दग्धा भयाकुलाः । वन्धोः साहाय्यतस्तत्र कृतं कर्मातिदारुणम् ॥ ३ ॥
शुभाच्छुभफलं भुक्त्वा पापाच्च नरकांस्तथा । माघे तु जाह्नवीस्नानात्स जातः शूद्रसत्तमः ॥ ४ ॥
विपाशानिकटे देशे योजने सप्तसम्मिते । भव्यो महोद्यमी गौरः कृशाङ्गो लोचनेऽल्पदृक् ॥ ५ ॥
वहुलोभी वहुस्त्रीको देवतातिथिपूजकः । भ्रातृहीनः शठो धूर्तः पुत्रसन्ततिवर्जितः ॥ ६ ॥
पञ्चमे भवने राहुर्भौमयुक्तोऽल्पसन्ततिः । लक्षणैर्लक्षितश्चोक्तैरवेहि गरुडाग्रज ॥ ७ ॥
बन्धोः साहाय्यतः पापात्पूर्वजन्मसमुद्भवात् । तस्माद्भ्रात्रा च पुत्रैश्च हीनश्चैहैव जन्मनि ॥ ८ ॥

अरुण उवाच ।

निष्कृतिं वद देवेश सुतसौख्यविवर्धनीम् । सर्वपापप्रशमनां लोकानां हितकाम्यया ॥ ९ ॥

श्रीसूर्य उवाच ।

निष्कृतिं तां प्रवक्ष्यामि जन्तुदाहविनाशनीम् । वनदेवी तदा कार्या पलेनार्धपलेन वा ॥ १० ॥
हिरण्मयी शुभालेख्या पत्रे वै चतुरस्रक । वनजीवास्तथा लेख्याः सर्वे तद्रूपसंज्ञकाः ॥ ११ ॥
प्रजापतिस्तथा कार्यो मापत्रयविनिर्मितः । राजतं पलमानन्तु गणाध्यक्षं शिवात्मकम् ॥ १२ ॥
संपूज्य गन्धपुष्पाद्यैः सा देवी कार्यसाधिनी । देया वेदविधिज्ञाय सर्वपापापनुत्तये ॥ १३ ॥
प्रजापतिस्तथा देयः सर्वकल्मषनाशनः । शृणुयाद्धारतं वापि पारायणविधानतः ॥ १४ ॥
अष्टाक्षरं तथा मन्त्रं प्रजपेद्विधिपूर्वकम् । दशायुतं तदर्धं वा तदर्धं विनतासुत ॥ १५ ॥
होमयेत्तद्दशांशेन तद्दशांशेन भोजंयेत् । तावन्मितं सूर्यमन्त्रं प्रजपेद्विधिपूर्वकम् ॥ १६ ॥
विप्रेभ्यो दक्षिणां दद्यात्तस्मात्पापात्प्रमुच्यते । य एवं कुरुते सूत पूर्वपापप्रणाशनम् ॥ १७ ॥
तस्य पुत्रविवृद्धिः स्यादिह जन्मनि निश्चितम् । अकृते तु यथाशक्ति रिष्टं षट्पञ्चकेब्दके ॥१८॥
प्रायश्चित्ते कृते सूत जीवनं नवसप्ततिम् । जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् ॥ १९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वादशोत्तरपञ्चशताधिकसहस्रतमः ॥ १९१२ ॥

श्रीसूर्य उवाच ।

देवमूर्तिश्च यः कश्चिद्देवागारे स्थितां सुत । भग्नां कुर्यान्नरो मोहात्परेण स्थापितां पुरा ॥ १ ॥
अप्रतिष्ठा भवेत्तस्य जन्मनीह खगाधिप । वर्षत्रयं तथाश्वत्थपूजनात्पापनाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोदशोत्तरपञ्चशताधिकसहस्रतमः ॥ १९१३ ॥

श्रीसूर्य उवाच ।

यश्चाचरेद्राजवधं मोहात्पूर्वभवे नरः । स राजयक्ष्मी विज्ञेयो घोरपापसमुद्भवः ॥ १ ॥
प्रायश्चित्तं महाभाग शृणु चात्र प्रयत्नतः । गोभूहिरण्यमिष्टान्नतिलवस्त्रान्नदानतः ॥ २ ॥
घृतधेनुप्रदानेन क्षयरोगं न पश्यति । दानं यथानुमानेन सर्वस्वार्धं तदर्धकम् ॥ ३ ॥
देयं द्विजवधादौ तु विचार्यात्र प्रयत्नतः । तत्क्षणे काश्यपे चेह क्षयरोगप्रशान्तये ॥ ४ ॥
रिष्टेनैव विनाशः स्यात्तस्य चाकृतनिष्कृतेः ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्दशोत्तरपञ्चशताधिकसहस्रतमः ॥ १९१४ ॥

श्रीसूर्य उवाच ।

या नारी घातयेत्काचित्परगर्भं खगाधिप । जलोदरेण रोगेण पीड्यते चेह जन्मनि ॥ १ ॥
गङ्गास्नानेन सततं विधिनार्कं मृगे स्थिते । तथा तज्जलपानेन तस्मात्पापाद्विमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचदशोत्तरपञ्चशताधिकसहस्रतमः ॥ १९१५ ॥

श्रीसूर्य उवाच ।

वस्तिरोधी भवेद्यश्च पूर्वजन्मनि वादकृत् । सोऽत्र जन्मनि मूकत्वं व्रजत्येव न संशयः ॥ १ ॥
मोहादिदं चरेत्सूत दद्याद्दानं द्विजातये । वेदानां पुस्तकं रम्यं पूजयित्वा विधानतः ॥ २ ॥
संछाद्य वन्धनैः शुद्धैः क्षौमजैर्गरुडाग्रज । तत्पापनाशनं सर्वं प्राग्जं प्रोक्तं परन्तप ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षोडशोत्तरपंचशताधिकसहस्रतमः ॥ १९१६ ॥

श्रीसूर्य उवाच।

इह जन्मन्यसौ वन्ध्या प्राग्भवेऽभूद्व्रतान्विता। जातायोध्यायान्तु सुभूर्धनभर्तृसमन्विता ॥ १ ॥
पूर्वपापप्रभावेण सपत्न्या गर्भनाशनात्। जातेयं पादजा चेह दुःखार्ता सुतवर्जिता ॥ २ ॥
प्रायश्चित्तं प्रवक्ष्यामि सर्वपापप्रणाशनम्। काश्यां गत्वा च विधिना शिवमाराधयेत्ततः ॥ ३ ॥
व्रतैर्दानैर्महापुण्यैर्नानाविभवविस्तरैः। शिवरात्रौ ततः पश्चाद्दीपमालादिनेंडज ॥ ४ ॥
अर्धरात्रे महानद्यां मध्ये स्नानन्तु कारयेत्। मन्त्रैर्वरुणसूक्तैश्च नौकायां वा खगाधिप ॥ ५ ॥
या चैवं कुरुते सम्यक्तस्याः स्यात्सन्ततिर्ध्रुवम् ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तदशोत्तरपंचशताधिकसहस्रतमः ॥ १९१७ ॥

श्रीसूर्य उवाच।

परनिन्दान्तु यः कश्चित्प्राग्भवे विनतासुत। कुर्याद्दुर्मतिमापन्नः स्वल्पाङ्गो जायतेऽधुना ॥ १ ॥
दद्यात्स कपिलां धेनुं सर्वोपस्करसंयुताम्। ब्राह्मणाय दरिद्राय तस्माद्दोषात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टादशोत्तरपंचशताधिकसहस्रतमः ॥ १९१८ ॥

श्रीसूर्य उवाच।

या काचित्प्राग्भवे नारी कुर्याद्राजवधं सुत। सेह जन्मनि तत्काले क्षयरोगातिपीडिता ॥ १ ॥
यक्ष्मणात्र क्षयं यान्ति धातवः सर्वदेहिनाम्। धातुक्षये क्षयं याति तच्छरीरमशाश्वतम् ॥ २ ॥
दृढकर्मकृतं पापं प्रायश्चित्तं न विद्यते। पापनाशकरः कश्चिदुपायो नेह जन्मनि ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनविंशत्युत्तरपञ्चशताधिकसहस्रतमः ॥ १९१९ ॥

श्रीसूर्य उवाच।

या वाग्विरोधिनी नारी भर्तुः पूर्वभवे सुत। मूकत्वं जायते तस्याश्चेह जन्मनि निश्चयात् ॥ १ ॥
तत्पापशमनं दानं दद्याद्वेदस्य पुस्तकम्। ब्राह्मणे वेदविदुषे पूर्वपापात्प्रमुच्यते ॥ २ ॥
पूजयेच्च तिलान्भक्त्या भोजयेद्ब्राह्मणांस्तथा ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः विंशत्युत्तरपञ्चशताधिकसहस्रतमः ॥ १९२० ॥

श्रीसूर्य उवाच।

या काचिद्भञ्जनं कुर्यान्नारी पूर्वभवेऽण्डज। प्रतिमां देवतागारे स्थापितामपरेण च ॥ १ ॥
अप्रतिष्ठान्विता सेह जायते वै खगाधिप। वर्षत्रयं ब्रह्मवृक्षपूजनात्पापनाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकविंशत्युत्तरपञ्चशताधिकसहस्रतमः ॥ १९२१ ॥

श्रीसूर्य उवाच।

कश्चिद्द्विजो महाभाग ह्यासीद्वङ्गे हि धार्मिकः। गयायां द्वादशे वर्षे कृतं श्राद्धं विधानतः ॥ १ ॥
विधिना तत्र दत्तानि काम्यश्राद्धानि मानद। ततो भाविवलात्सूत ब्राह्मणेन तपस्विना ॥ २ ॥
स्थापितं तद्गृहे द्रव्यं लोभाद्दत्तं न तद्धनम्। सर्वैर्मिलित्वा तद्धृत्तं स्त्रीपुत्रभ्रातृभिः सह ॥ ३ ॥
ततो बहुतिथे काले गतो हि यमशासनम्। शुभात्स्वर्गफलं भुक्तं पापाच्च नरकं भृशम् ॥ ४ ॥
पूर्वपुण्यप्रभावेण स जातोऽत्रापि वै द्विजः। मथुरामण्डले देशे रम्ये पुण्यस्थले शुभे ॥ ५ ॥
विशालाक्षो धनी मानी सुरूपोऽमितदो घृणी। बहुदेशेऽधिकाराढ्यः पुण्यात्सर्वं फलं त्विदम् ॥६॥

लोभी क्रूरो महाक्षुद्रः सदा चिन्तासमन्वितः । सन्तानसुखहीनश्च सुरूपस्त्रीसुखोज्झितः ॥ ७ ॥
बन्धुहीनो व्ययी तीक्ष्णः सर्वं स्यात्पापतः फलम् । वक्ष्यामि निष्कृतिं तस्य पवित्रां पापशोधिनीम्;
कुबेरप्रतिमां रौक्मीं पञ्चस्वर्णमितां शुभाम् । तदर्धमितिकां वापि निजवित्तानुसारतः ॥ ९ ॥
संपूज्य गन्धपुष्पाद्यैः सा देया ब्राह्मणाय च । लक्ष्मीनारायणं दद्याद्वेदस्वर्णपलात्मकम् ॥ १० ॥
शुभं लेख्यं पवित्रं च पुत्रसन्ततिवर्धनम् । य एवं कुरुते भक्त्या तस्यारिष्टं न लिप्यते ॥ ११ ॥
प्रायश्चित्ते कृते त्वत्र चायुः सप्ततिवर्षकम् ॥ १२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वाविंशत्युत्तरपंचशताधिकसहस्रतमः ॥ १९२२ ॥

अरुण उवाच ।

भूमिदेवकुलोत्पन्नो वाताधिकशरीरवान् । क्षामाङ्गः क्षीणवर्णश्च स्वल्पवृत्त्या च जीवनम् ॥ १ ॥
देवब्राह्मणभक्तश्च किञ्चिद्वेदपरायणः । करे पादे कुशस्त्रेण दंष्ट्रिशृंगिविषानतः ॥ २ ॥
व्रणोतिदीर्घस्तस्यास्ति नेत्रतोदो विरश्मिता । परोक्षमपवादश्च लोका ब्रूयुर्निरन्तरम् ॥ ३ ॥
प्रिया तस्य शुभाचारा पतिभक्तिपरायणा । अनृतं भाषते किञ्चित्किञ्चित्क्लेशस्य कारिणी॥ ४ ॥
अपत्यानि म्रियन्ते च एकं द्वे त्रीणि वा सुत । वर्षत्रयमिता बाला म्रियन्ते मासमम्मिताः ॥५॥
केन कर्मविपाकेन मृतापत्यत्वतानघ । उदरे च स्थितो गर्भो न प्रसूतिर्न पातनम् ॥ ६ ॥
पृथगेवं कुभ्रातॄणां मृतापत्यत्वमेव हि । गते बहुतिथे काले कस्येदं कर्मणः फलम् ॥ ७ ॥

श्रीसूर्य उवाच ।

अतः पूर्वं वैनतेय तृतीये चैव जन्मनि । क्षात्रे कुले समुत्पन्नः कश्चिद्भूमिपतिस्तथा ॥ ८ ॥
दानव्रतदयायुक्तः प्रियाप्रीतिः परस्परम् । तस्य चापरमातुस्तु पुत्रः परमसुन्दरः ॥ ९ ॥
एको वै पादचारस्तु तृतीयश्च स्तनन्धयः । गर्भयुक्तश्चतुर्थस्तु पिता मृत्युवशं गतः ॥ १० ॥
क्रियाकर्मकृतं पुत्रैः स्ववृत्तेः सदृशं खग । मासैस्त्रिभिर्व्यतिक्रान्तैर्ज्येष्ठेनैव दुरात्मना ॥ ११ ॥
निहता भ्रातरः सर्वे भाविनोऽर्थस्य वै बलात् । मात्रा शोकेनार्तया च हृदयं ताडितं भृशम् ॥१२॥
अभिघाताच्छिलीभूता गर्भयुक्ता दिवं गता । अचिरेणैव कालेन ज्येष्ठश्चोरेण घातितः ॥ १३ ॥
जन्म चेदं द्वितीयं वै मृतापत्यत्वकारकम् । पुराकृतानि कर्माणि भुज्यन्ते चेह मानवैः ॥ १४ ॥

अरुण उवाच ।

प्रायश्चित्तं वद स्वामिन्येन पापक्षयो भवेत् । गर्भस्थस्य मृतस्याथ लघोरलघुकस्य च ॥ १५ ॥

श्रीसूर्य उवाच ।

सौम्यायने तु सम्प्राप्ते सानुकूलग्रहे दिने । सपत्नीकः शुचिः स्नातः पञ्चगव्येन चांजसा ॥१६॥
उपोषणं दिवा रात्रौ प्रातश्चानुदिते रवौ । सुरभेर्वै सगर्भाया गोमयेनोपलेपयेत् ॥ १७ ॥
सुशुभे भूप्रदेशे तु कुंकुमाद्युपचर्चिते । कुर्यादष्टफलं पद्मं चित्रवर्णं सुशोभनम् ॥ १८ ॥
तन्मध्ये रुक्मिणीयुक्तं माधवं कलशेऽर्चयेत् । सौवर्णे राजते पद्मे सायुधं सचतुर्भुजम् ॥ १९ ॥
उपचारैः शुभैर्गन्धैर्धूपैश्च कुसुमादिभिः । जनन्या सह संभूतान्प्रद्युम्नाद्यांस्तथार्चयेत् ॥ २० ॥
चारुदेहं सुवेषश्च चारुगुप्तं यशोन्वितम् । इभबाहुं चारुबाहुं सुचारुं पूजयेत्क्रमात् ॥ २१ ॥
पूजनं विष्णुसूक्तेन तथा श्रीरसकोविदैः । पुष्पस्रग्धूपगन्धाद्यैरर्चयेद्विविधैर्गुणैः ॥ २२ ॥
तद्विप्रासोऽथ तद्विष्णोरतोदेवाभिपूजयेत् । शतमष्टोत्तरं हुत्वा चरुणा पायसेन वै ॥ २३ ॥
होमान्ते विप्रभोज्यान्ते मन्त्रमेतमुदीरयेत् ॥ २४ ॥

मन्त्रः ।

"यन्मया पापकं कर्म कृतं वै पूर्वजन्मनि । सपत्न्यां चैकजायायां परपत्न्यां तथैव च ॥ २५ ॥
स्वकुल्यहननाद्वापि भूमिद्रव्यादिलिप्सया । लघूनामलघूनां च हननात्पूर्वजन्मनि ॥ २६ ॥
ततोऽद्य वै मया प्राप्तं दुःखं नानाविधं त्विदम् । तत्तदेनोविनाशाय दानं सम्प्रददे त्विदम्"॥२७॥
स्वस्त्यस्तु चेति तत्रोक्ता कोऽदादिति विसर्जयेत् । सर्पिष्यात्मानमालोक्य भुञ्जीत स्वेष्टबन्धुभिः२८
ऐहिकं लक्ष्म विज्ञेयं पूर्वकर्माभिसंशनम् । काष्ठलोष्टादिशस्त्राद्यैर्घातः स्याद्बालक्रीडनात् ॥ २९ ॥
जलादग्न्यादिना बाधा व्रणो वा तस्य जायते । स्त्रीणां दैवकृतो व्याधिर्मुखे तिलव्रणादिकम्३०॥
पितृजामातुलान्यादेर्नेत्रतोदो विरश्मिता । स्वस्रमातृष्वस्रादीनां बाल्ये वैधव्यता तथा ॥ ३१ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोविंशत्युत्तरपंचशताधिकसहस्रतमः ॥ १९२३ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे मोहात्परनिन्दां चकार वै । खल्वाटरुग्युता सा च जायतेऽत्रैव जन्मनि ॥ १ ॥
धेनुं दद्यान्महाभाग विधियुक्तां सकम्बलाम् । तस्माद्रोगाद्विमुच्येत नात्र कार्या विचारणा ॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्विंशत्युत्तरपंचशताधिकसहस्रतमः ॥ १९२४ ॥

श्रीसूर्य उवाच ।

कुलटेयं महादुष्टा पूर्वमासीत्खगाधिप । नानापापवशात्सेयं मानुषी सङ्करा स्मृता ॥ १ ॥
धनपुत्रविहीना सा चात्र जन्मनि दृश्यते । निष्कृतिं तु प्रवक्ष्यामि प्रयागे मरणं सुत ॥ २ ॥
वारात्तत्पापस्य हानिः पूर्वजन्मकृतस्य वै ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचविंशत्युत्तरपंचशताधिकसहस्रतमः ॥ १९२५ ॥

श्रीसूर्य उवाच ।

पक्षघातं तु यः कुर्यात्सभायां ब्राह्मणस्य च । पक्षाघातेन रोगेण पीडितोऽत्रैव जायते ॥ १ ॥
दद्यान्निष्कत्रयं स्वर्णं ब्राह्मणाय कुटुम्बिने । तस्माद्रोगाद्विमुच्येत पक्षाघातात्पतत्रिप ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षड्विंशत्युत्तरपंचशताधिकसहस्रतमः ॥ १९२६ ॥

श्रीसूय उवाच ।

अभक्ष्यं भक्षयेत्पूर्वं या नारी द्विजवल्लभा । गण्डमालाख्यरोगेण संयुक्ता जायते त्विह ॥ १ ॥
पुण्यदेशे महाभाग संक्रान्त्यादिषु पर्वसु । पूर्वपापहरं पुण्यं दद्यादत्र च कम्बलम् ॥ २ ॥
नवं शुद्धं कुलीनाय तस्मात्पापात्प्रमुच्यते । द्विजानामिच्छया दद्याद्भोजनं पापनाशनम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तविंशत्युत्तरपंचशताधिकसहस्रतमः ॥ १९२७ ॥

श्रीसूर्य उवाच ।

बालकं योऽवधीत्कश्चिद्ब्राह्मणस्य खगाधिप । वंगदेशे वसन्पूर्वे चेह जन्मनि सोण्डज ॥ १ ॥
धीरः सर्वकलाभिज्ञो नाल्पशास्त्रविशारदः । धनधान्यरतश्चात्र बहुस्त्रीसुखभोगभाक् ॥ २ ॥
विद्यादानात्कृतात्पूर्वं शृणु पापफलं तथा । क्षयरोगाकुलः क्षीणः पुत्रसन्ततिवर्जितः ॥ ३ ॥
बालघातनजात्पापाद्ब्राह्मणस्य खगाधिप । महाक्रोधपरो लोभी नानादुःखैस्तथाकुलः ॥ ४ ॥
वक्ष्यामि निष्कृतिं तस्य ब्रह्मघातविमोचनीम् । प्रयागे वा कुरुक्षेत्रे पुष्करे वा महास्थले ॥ ५॥

नैमिषारण्यके क्षेत्रे पूजयेद्विधिवच्छिवान् । गन्धपुष्पैस्तथा धूपैर्लक्षसंख्यान् विधानतः ॥ ६ ॥
ब्रह्मचर्यरतो नित्यं तदन्ते होमयेत्तथा । षडस्रे चतुरस्रे वा कुण्डे वाज्यतिलाञ्शुभान् ॥ ७ ॥
शक्त्या च भोजयेद्विप्राञ्शैवान्कासारलड्डुकैः । नानाभक्ष्यफलैश्चैव वस्त्रैर्माल्यैस्तथार्चयेत् ॥ ८ ॥
विविधां दक्षिणां दद्यादुद्रप्रीतिकरीं तथा । यश्चानेन विधानेन प्रायश्चित्तं समाचरेत् ॥ ९ ॥
स बालघातजात्पापान्मुच्यतेऽत्र ममाज्ञया । चतुर्दश्यां महाष्टम्यां नक्तं कुर्याद्विधानतः ॥ १० ॥
ममध्यानपरो सूत नित्यं भूत्वा ममाग्रतः । पूजयेदर्घ्यपाद्यैर्नैवेद्यैर्विविधैस्तथा ॥ ११ ॥
तं तु तत्सर्वपापेभ्यो मोचयामि खगेश्वर । आयुस्तस्य शतं प्रोक्तं पञ्चाब्दैराधिकं खग ॥ १२ ॥
प्रायश्चित्ते कृते तत्तु पञ्चम्यां चन्द्रवासरे । विन्मये त्वत्कृते सूत चत्वारिंशन्मिताब्दके ॥ १३ ॥
रिष्टं स्यात्क्षयरोगेण बालघाताद्विनिश्चितम् । ब्रह्मघातान्महापापात्पूर्वजन्मकृताद्दृढात् ॥ १४ ॥
न मुच्यते महादानैः सप्तजन्मकृतैरपि । बाध्यते क्षयरोगेण सप्तजन्मनि निश्चयात् ॥ १५ ॥
ब्रह्महा क्षयरोगी स्यादिति वेदविदो विदुः । नहीदृशं महापुण्यं क्षयरोगविनाशनम् ॥ १६ ॥
पुत्रवृद्धिकरं चात्र यथा प्रोक्तं शिवार्चनम् ॥ १७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाविंशत्युत्तरपंचशताधिकसहस्रतमः ॥ १५२८ ॥

श्रीसूर्य उवाच ।

विनापराधं या नारी परपक्षं च घातयेत् । पक्षाघातेन रोगेण पीडितात्रैव जायते ॥ १ ॥
तथा निष्कत्रयं स्वर्णं देयं पापविशुद्धये । मुच्यतेऽत्र महारोगात्पक्षाघातान्न संशयः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनत्रिंशदुत्तरपञ्चशताधिकसहस्रतमः ॥ १५२९ ॥

श्रीसूर्य उवाच ।

यो द्विजः प्राग्भवे मोहात्सुरां त्रिविधजां पिबेत् । मूत्रकृच्छ्रेण रोगेण पीडितः सोऽत्र जायते ॥१॥
गृहवित्तानुसारेण पलेनार्धपलेन च । कुर्याद्धिरण्मयं पद्मं चाष्टपत्रसमन्वितम् ॥ २ ॥
आब्रह्मन्निति ब्रह्माणं स प्रभुं चोपचारकैः । पूजयित्वा तु गन्धाद्यैर्दद्याद्विप्राय यत्नतः ॥ ३ ॥
दानेनानेन सततं मूत्रकृच्छ्रं न पश्यति ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिंशदुत्तरपञ्चशताधिकसहस्रतमः ॥ १५३० ॥

श्रीसूर्य उवाच ।

वैकुण्ठादागतस्तत्र मथुरायां खगाधिप । जातोऽयं पुण्डरीकाक्षः सर्वभूताभयप्रदः ॥ १ ॥
घोरे कलियुगे प्राप्ते पापाक्रान्ते महाबले । भारावतारणार्थाय क्षत्रियाणां क्षयाय च ॥ २ ॥
कृत्वा तु दुष्करं कर्म पुनर्यास्यति वै दिवि ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकत्रिंशदुत्तरपञ्चशताधिकसहस्रतमः ॥ १५३१ ॥

श्रीसूर्य उवाच ।

स्वर्णापहारी सततं पुरुषः प्राग्भवेऽण्डज । कुलघ्नो जायते चात्र महापापेन लाञ्छितः ॥ १ ॥
सुवर्णदशकं दद्यात्स तद्दोषविनाशनम् । चान्द्रायणत्रयं कुर्यात्तदा तद्दोषशान्तये ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वात्रिंशदुत्तरपञ्चशताधिकसहस्रतमः ॥ १५३२ ॥

श्रीसूर्य उवाच ।

राजघातकरी प्रोक्ता पूर्वं या घातयेत्तु तम् । राजयक्ष्मान्विता सात्र तस्मिन्वयसि भामिनी ॥ १ ॥
प्रायश्चित्तं परं तस्याः शृणु पुत्र खगेश्वर । यस्मिन्कृते च विधिना पूर्वजन्माघनाशनम् ॥ २ ॥
स्वर्णं गोभूमिमिष्टान्नं घृतधेनुतिलांस्तथा । देया वै श्रद्धया सूत क्षयरोगापनुत्तये ॥ ३ ॥
रिष्टं त्रिंशन्मितेऽब्दे तु प्रायश्चित्ते कृते त्विह ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयस्त्रिंशदुत्तरपञ्चशताधिकसहस्रतमः ॥ १५३३ ॥

श्रीसूर्य उवाच ।

मेरोः समागता चेयं प्राप्ता माथुरमण्डले । सर्वभूतोपकाराय दुष्टनाशकराय च ॥ १ ॥
प्राप्ते कलियुगेत्रैव सर्वं पापविवर्जितम् । कृत्वा चाद्भुतकर्माणि पुनस्तत्रैव यास्यति ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुस्त्रिंशदुत्तरपञ्चशताधिकसहस्रतमः ॥ १५३४ ॥

श्रीसूर्य उवाच ।

यो मोहाद्घातयेद्वैश्यमन्यजन्मनि मानवः । सोऽत्र जन्मनि विज्ञेयो रक्तार्बुदसमन्वितः ॥ १ ॥
प्राजापत्यचतुष्केण व्रतेन नियमेन च । सप्तधान्यप्रदानेन पूर्वजन्माघनाशनम् ॥ २ ॥
पापक्षये महाभाग क्षयः पापरुजस्त्विह ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचत्रिंशदुत्तरपञ्चशताधिकसहस्रतमः ॥ १५३५ ॥

श्रीसूर्य उवाच ।

या काचिद्ब्राह्मणी पूर्वभवे मोहात्सुरां पिबेत् । सात्र जन्मनि मूत्रस्य कृच्छ्रेणातिप्रपीड्यते ॥ १ ॥
प्रायश्चित्तं परं तस्याः घोरपापहरं शृणु । सुवर्णपद्मदानं च सपत्रं ब्रह्मदैवतम् ॥ २ ॥
ब्राह्मणाय विधिज्ञाय पूजिताय निवेदयेत् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्त्रिंशदुत्तरपंचशताधिकसहस्रतमः ॥ १५३६ ॥

अरुण उवाच ।

कश्चिद्विप्रोत्तमो जातः किञ्चिद्वित्तसमन्वितः । कासश्वासादिना बाधा ह्युदरार्तिः प्रजायते ॥ १ ॥
क्रयविक्रयकर्ता च कृषिवाणिज्यजीविकः । प्रिया प्रीतिपरा तस्य व्रतानामनुकांक्षिणी ॥ २ ॥
किञ्चिल्लोभाभिभूता च कुवाक्यानां च वादिनी । उदरे वातजा रोगाः शिरोऽर्तिर्नेत्रतोदकृत् ॥ ३ ॥
अपत्यानि म्रियन्ते च एको द्वौ त्रय एव वा । रजोदोषात्प्रपीड्येत वेदना विविधास्तथा ॥ ४ ॥
केन कर्मविपाकेन सत्यं कथय भास्कर ॥ ५ ॥

श्रीसूर्य उवाच ।

भर्तृकर्मकृतं नैव स्त्रीकृतं नात्र संशयः । पूर्वजन्मनि शूद्री सा द्विजभक्तिपरायणा ॥ ६ ॥
व्रतानि विविधान्येव कृतानि भुवि मानद । स्वगृहे धान्यराशेस्तु भक्षणायागतां शुभाम् ॥ ७ ॥
सवत्सां गां ब्राह्मणस्य धान्यभक्षणतत्पराम् । सा वै गृहीत्वा लकुटिं भृशं कुक्षावताडयत् ॥ ८ ॥
सगर्भा सुरभिर्वत्स गर्भः कुक्ष्युपघातनात् । मृतासावामगर्भस्य प्रसवादुःखिता भृशम् ॥ ९ ॥
शिशुदुःखेन सुरभिर्भृशमाक्रन्दती मृता । तेन कर्मविपाकेन नरकं प्राप्य दारुणम् ॥ १० ॥
पश्चान्मानुष्यमापन्ना तत्र दानप्रभावतः । तृतीयं जन्म चैतद्वै मृतापत्यत्वकारकम् ॥ ११ ॥
सप्तजन्मसु दुःखी वै गोस्त्रीब्रह्मप्रघातकः । भवेन्नानाप्रकारेण नानापत्यार्थदोषकृत् ॥ १२ ॥

अरुण उवाच ।

प्रायश्चित्तं वद स्वामिन्येनापत्यं हि जीवति । अनुग्राह्योस्म्यहं देव लोकानां हितकाम्यया ॥१३॥

श्रीसूर्य उवाच ।

मासे नभसि संप्राप्ते सानुकूलग्रहेऽहनि । सपत्नीकः शुचिः स्नात औषधैः स्नानमन्त्रतः ॥ १४ ॥
उपोषणं दिवारात्रौ त्रयोदश्यामतन्द्रितः । पूर्णमास्यां दिनं प्राप्य प्रातश्चानुदिते रवौ ॥ १५ ॥
सुरभ्यास्तु सगर्भाया गोमयेनोपलेपयेत् । तस्योपरि गवां स्थान उदगास्यः समाविशेत् ॥ १६ ॥
अर्हणाद्युपहारैश्च कुंकुमैरुपचर्चयेत् । कुर्यादष्टदलं पद्मं चित्रवर्णं सुशोभनम् ॥ १७ ॥
तस्योपरि न्यसेद्देवं माधवं कलशेऽर्चयेत् । सौवर्णे राजते पद्मे सायुधं सचतुर्भुजम् ॥ १८ ॥
उपचारैः शुभैर्गन्धैर्धूपैश्च कुसुमादिभिः । विष्णुसूक्तेन सूक्तेन श्रियः सूक्तेन पूजनम् ॥ १९ ॥
पुष्पैश्च धूपगन्धाद्यैरर्चयेद्विविधैर्गुणैः । रुद्रैकादशनीभिश्च जपेद्रुद्रविधानतः ॥ २० ॥
पूजालक्षमितैः पुष्पैरर्चयेद्गन्धवारिभिः । शतमष्टोत्तरं हुत्वा चरुणा पायसेन च ॥ २१ ॥
रुद्रस्यायुतहोमश्च समध्वाज्यसमाहुतिः । एवं पृथग्विधानेन विष्णुरुद्रादिपूजनम् ॥ २२ ॥
होमान्ते विप्रभोज्यान्ते मन्त्रमेतमुदीरयेत् ॥ २३ ॥

मन्त्रः ।

"यन्मया कर्मवशतः पूर्वजन्मनि दुर्धिया । सगर्भायाः कृतं गोश्च लकुटया कुक्षिताडनम् ॥२४॥
तत्कर्मवशतः प्राप्तं मृतगर्भादिकं भृशम् । मृतसन्ततिदुःखानि प्राप्यन्ते वहुपातकात् ॥ २५ ॥
तत्तदेनोविनाशार्थं दानं सम्प्रददे त्विदम्" ॥ २६ ॥

स्वस्त्यस्तु चेति तत्रोक्त्वा कोऽदादिति विसर्जयेत् । सर्पिष्यात्मानमालोक्य ह्यन्यान्वै तोषयेद्द्विजान् ।
भूमिद्रविणवासांसि दानं दत्त्वा विधानतः । व्रतान्ते सुरभिं दत्त्वा देयं द्रव्यादिशक्तितः ॥ २८ ॥
अहःशेषं नयेत्सर्वमिष्टवन्ध्वादिभोजनैः । ऐहिकं लक्षणं तस्य शरीरेऽप्युपजायते ॥ २९ ॥
काष्ठलोष्टादिशस्त्राद्यैर्घातः स्यादुपलेखनात् । शृङ्गिणां चोपघातश्च जायन्ते व्रणजातयः ॥ ३० ॥
जलाकुलत्वं स्पर्शोग्नेः कदाचित्तत्र जायते । नार्यङ्गे विकृतिव्याधी मुखे तिलव्रणादिकम् ॥३१॥
पितृजामातुलान्यादोर्विधवार्तिःस्नुषादिषु ॥ ३२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्रिंशदुत्तरपञ्चशताधिकसहस्रतमः ॥ १५३७ ॥

श्रीसूर्य उवाच ।

या काचिद्ब्राह्मणी पूर्वभवे मोहात्सुरां पिवेत् । प्रदरेणातितीव्रेण सात्र जन्मनि पीड्यते ॥ १ ॥
प्रायश्चित्तं परं तस्याः प्रदरस्य विनाशनम् । दद्याद्रुक्मभयं पद्मं सा तत्र ब्रह्मदैवतम् ॥ २ ॥
ब्राह्मणाय दरिद्राय पूजिताय निवेदयेत् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टत्रिंशदुत्तरपञ्चशताधिकसहस्रतमः ॥ १५३८ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि यो विप्रस्त्रिविधां वै सुरां पिवेत् । मूत्रावरोधरोगेण सोऽत्र मृत्युवशं व्रजेत् ॥ १ ॥
चिह्नं तस्य पदे तेन लक्षितः पादजः सदा । सप्तजन्मनि रोगेण मूत्रकृच्छ्रेण नश्यति ॥ २ ॥
दृढप्राक्पातकस्यात्र प्रायश्चित्तं न विद्यते । पापक्षये च शेषे तु कृच्छ्रं सान्तपनं चरेत् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनचत्वारिंशदुत्तरपञ्चशताधिकसहस्रतमः ॥ १५३९ ॥

श्रीसूर्य उवाच ।

अकामतस्तु या नारी वैश्यघातनतत्परा । बभूव प्राक्च पक्षीन्द्र सात्र जन्मनि निश्चयात् ॥ १॥
रक्तार्बुदसमाक्रान्ता दुष्टपापप्रपीडिता । महारिष्टेन सा याति यमलोकं खगाधिप ॥ २ ॥
चत्वारिंशन्मिते वर्षे सत्यंसत्यं वदाम्यहम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चत्वारिंशदुत्तरपञ्चशताधिकसहस्रतमः ॥ १९४० ॥

श्रीसूर्य उवाच ।

काचित्पूर्वभवे पुण्या मुखजा चेह बाहुजा । देशे सारस्वते प्राप्ता सर्वधर्मान्विता सती ॥ १ ॥
क्षयरोगयुता चात्र युवभावे खगाधिप । प्राक्पापाद्दुस्तरात्सूत कण्ठपादादिसम्भवात् ॥ २ ॥
निष्कृतिं कपिलां दद्याद्गां स्वर्णत्रयसंयुताम् । भोजयेद्ब्राह्मणान्पश्चाद्देवपूजनतत्परान् ॥ ३ ॥
या त्वेवं कुरुते भक्त्या कपिलादानमुत्तमम् । न पश्येत्सा क्षयरुजमपि प्राणप्रणाशनीम् ॥ ४ ॥
आयुर्वर्षाणि सा भुंक्ते त्वब्दसप्ततिसंख्यकम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकचत्वारिंशदुत्तरपंचशताधिकसहस्रतमः ॥ १९४१ ॥

श्रीसूर्य उवाच ।

यो नरोऽतिबलोत्कर्षात्स्वस्त्रियं कामयेत्पुरा । इह वै यौवने प्राप्ते स उन्मादी भवेद्भृशम् ॥ १ ॥
दद्यात्प्रजापतिन्देवं सौवर्णं शक्तितोऽडज । मृगं स्वर्णमयं तद्वत्पूजयित्वा विधानतः ॥ २ ॥
भोजयेद्ब्राह्मणाञ्शक्त्या होमयेच्च जपेत्तथा । गायत्रीं विधिना सूत सोन्मादान्मुच्यते त्विह ॥ ३ ॥

इते श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विचत्वारिंशदुत्तरपंचशताधिकसहस्रतमः ॥ १९४२ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे सूत परस्वर्णापहारिणी । सेह जन्मनि रोगेण कुनखत्वेन बाध्यते ॥ १ ॥
दद्यात्सुवर्णशतकं विप्राय विनतात्मज । सुवर्णस्तेयपापेन मुच्यते चेह जन्मनि ॥ २ ॥
चान्द्रायणत्रयं चैव कुर्यान्मासे तु कार्तिके ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिचत्वारिंशदुत्तरपंचशताधिकसहस्रतमः ॥ १९४३ ॥

श्रीसूर्य उवाच ।

वैश्यहन्त्री च या पूर्वभवे नारी पतिव्रता । रक्तार्बुदेन रोगेण बाध्यते सेह जन्मनि ॥ १ ॥
व्रतं चरेन्महाभाग प्राजापत्यचतुष्टयम् । सप्तधान्येन दानेन रक्तार्बुदविनाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुश्चत्वारिंशदुत्तरपंचशताधिकसहस्रतमः ॥ १९४४ ॥

श्रीसूर्य उवाच ।

रौप्यहारी च पुरुषश्चित्रकुष्ठी प्रजायते । स तत्पापविशुद्ध्यर्थं ब्राह्मणाय प्रदापयेत् ॥ १ ॥
स्वर्णं पलत्रयं शुद्धं कुरुक्षेत्रे खगाधिप । प्राजापत्यत्रयं सूत चरेत्पापप्रणाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायःपञ्चचत्वारिंशदुत्तरपंचशताधिकसहस्रतमः ॥ १९४५ ॥

श्रीसूर्य उवाच ।

कश्चिन्म्लेच्छकुलोत्पन्नो बहुद्रव्ययुतः सुधीः । स्वधर्मनिरतश्चापि दयालुः सत्यसंयुतः ॥ १ ॥
त्यागी शूरो महोग्रश्च देशे केरलके सुत । स्वाभिधर्मपरो नित्यं सपत्नीकः सपुत्रकः ॥ २ ॥

प्रजाः पालयतस्तस्य शूरस्यापि महात्मनः । दुष्टाः प्रजाः क्रोधयुक्ता बभूवुर्विमुखास्तथा ॥ ३ ॥
तस्मिन्काले ह्यभूद्युद्धं घोरं तस्मिन्पुरे सुत । संग्रामभूमौ स मृतो यवनश्च सपुत्रकः ॥ ४ ॥
तस्य पत्नी महाभाग साध्वी पतिपरायणा । तस्मिन्मृते मृता सा तु भर्तुः प्राणावलम्बिनी ॥५॥
घातयित्वा तु शस्त्रेण स्वशरीरं पतिव्रता । मृते पत्यौ न जीवामीत्युक्त्वा मृतवती तदा ॥ ६ ॥
तद्वृणा चान्तकालेऽपि दिवि प्राप्ता सभर्तृका । भुक्त्वा तत्र महाभोगान्पूर्वं सा स्वामिधर्मतः ॥७॥
नानाप्रजाघातनजात्पापात्पूर्वसमुद्भवात् । क्षीणात्पुण्यात्तथा सूत म्लेच्छदेशे ह्यजायत ॥ ८ ॥
सिन्धोः पश्चिमभागे तु शतयोजनसम्मिते । गौरः सुरूपो दीर्घश्च बहुविद्याविशारदः ॥ ९ ॥
नानाभोगसुखैर्युक्तो गजयूथैः समावृतः । पत्त्यश्वरथसंकीर्णस्तथा भैरवशासनः ॥ १० ॥
महोग्रः पुत्रपौत्राढ्यश्चाद्यन्तसुखसंयुतः । देशेदेशेऽधिकाराढ्यः स म्लेच्छः पृथिवीपतिः ॥ ११ ॥
स्त्रीसाहाय्यान्महाभाग तथा पुत्रसहायतः । सुखैश्वर्ययुता सापि यवनी तद्वशा त्विह ॥ १२ ॥
अपुत्रः प्राक्सहायाच्च सोऽप्यत्रैव महाप्रभुः । एवं जन्मफलं प्रोक्तं ससहायं पतत्रिप ॥ १३ ॥
स्वामिकर्मयुतात्पुण्यात्तदर्थमरणात्तथा । भविष्यति गतिस्तेषां पूर्वपुण्यात्पतत्रिप ॥ १४ ॥
पञ्चाशीतिमितायुः स्यान्न च रिष्टेन तन्मृतिः । रिष्टं पञ्चाशदब्दे तु स्वदेहान्तसमं सुत ॥ १५ ॥
शस्त्रप्रहारैर्विविधैः प्राप्तं त्वत्र रणाङ्गणे । प्रजापीडनजात्पापात्तद्वर्षं नात्र संशयः ॥ १६ ॥
दद्यात्कालनरं तत्र ब्राह्मणाय कुटुम्बिने । देयं हिरण्मयं तत्र बहु शतपलात्मकम् ॥ १७ ॥
कुरुक्षेत्रादितीर्थेषु संक्रान्त्यादिषु पर्वसु । सर्वोपस्करसंयुक्तं देयमेतत्तुपुत्रक ॥ १८ ॥
महारिष्टहरं प्रोक्तं प्रायश्चित्तं परं खग । नातः परतरं प्रोक्तं दानात्कालनरात्क्वचित् ॥ १९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्चत्वारिंशदुत्तरपञ्चशताधिकसहस्रतमः ॥ १५४६ ॥

श्रीसूर्य उवाच ।

या काचिद्यौवने नारी रमते स्वेच्छया परम् । बलात्कारेण पुरुषं सा चोन्मादेन पीडिता ॥ १ ॥
तत्पापनाशनं सर्वमुपायं शृणु यत्नतः । कृत्वा सुवर्णजं वायुं मृगं हैमं च वाहनम् ॥ २ ॥
सर्वोपस्करसंयुक्तं दद्याद्विप्राय धीमते । न प्राप्नोति तदोन्मत्तभावं दानप्रभावतः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तचत्वारिंशदुत्तरपञ्चशताधिकसहस्रतमः ॥ १५४७ ॥

श्रीसूर्य उवाच ।

त्रपुहारी च यः पूर्वजन्मन्यत्रैव जन्मनि । श्लेष्मरोगेण सततं बाध्यते विनतासुत ॥ १ ॥
दद्यात्तत्पापनाशाय त्रपु विप्राय धीमते । पलानां त्रिंशतं शुद्धं तस्माद्रोगात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टचत्वारिंशदुत्तरपञ्चशताधिकसहस्रतमः ॥ १५४८ ॥

श्रीसूर्य उवाच ।

अविपन्ने यया पत्यौ जाराद्गर्भो धृतः पुरा । शापाच्च जारजाद्दुष्टान्न च गर्भं दधाति वै ॥ १ ॥
काश्यां वासान्महाभाग श्रद्धया रुद्रपूजनात् । कन्याविवाहात्सततं दरिद्रद्विजपालनात् ॥ २ ॥
धारयिष्यति सा गर्भं प्रायश्चित्तान्मयोदितात् । प्रायश्चित्तेऽकृते रिष्टं चत्वारिंशन्मितेऽब्दके ॥ ३ ॥
प्रायश्चित्ते कृते सूत षडशीत्यब्दजीवनम् ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनपंचाशदुत्तरपञ्चशताधिकसहस्रतमः ॥ १५४९ ॥

श्रीसूर्य उवाच ।

आखेटकं विना यस्तु हस्तिनं घातयेत्पुरा । सोऽत्र जन्मनि जायेत सर्वकार्येष्वसिद्धिकृत् ॥ १ ॥
तस्मिन्नेव हि काले च तस्य रिष्टं प्रकीर्तितम् । विंशेऽब्दे चैव पक्षीन्द्र कालशस्त्रान्मृतिर्भवेत् ॥ २॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चाशदुत्तरपंचशताधिकसहस्रतमः ॥ १९५० ॥

श्रीसूर्य उवाच ।

यः कश्चिद्ब्राह्मणीं सूत वलोत्कर्षेण मन्दधीः । रमयेत्प्राग्भवे सोऽत्र महोन्मादी प्रजायते ॥ १ ॥
म्रियते रिष्टयोगेन सोन्माद्यत्रैव जन्मनि ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकपंचाशदुत्तरपंचशताधिकसहस्रतमः ॥ १९५१ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि या नारी मोहाल्लोभाद्धरेत्रपु । सेह जन्मनि पक्षीन्द्र श्लेष्मरुक्संयुता भवेत् ॥ १ ॥
शतत्रयपलं दद्यात्रपु तत्पापशुद्धये । तस्मिन्पापे क्षयं याते श्लेष्मरोगस्य नाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विपंचाशदुत्तरपंचशताधिकसहस्रतमः ॥ १९५२ ॥

अरुण उवाच ।

विप्रवंशे समुत्पन्नः शक्तिमान्वेदपारगः । धनधान्यसमायुक्तश्चैर्ष्यालुश्च जनान्वितः ॥ १ ॥
सुव्रतः शक्तिमान्धीरः किञ्चिद्व्याधिसमन्वितः । इन्द्रियाणां वलं हृत्वा मेहरोगेण पीड्यते ॥ २॥
उदरार्तिरसृग्वातः किंचिद्देहे प्रवर्तते । तस्य प्रिया शुभाचारा पतिभक्तिपरायणा ॥ ३ ॥
सत्यवाक्सत्यकृल्लोके व्रतानामनुकांक्षिणी । वहुकालं च सुषुवेऽपत्यानि शुभलक्षणा ॥ ४ ॥
सर्वाण्यपि मृतानीह ह्यपुत्रा जीविता सती । केन कर्मविपाकेन सत्यं वद दिवस्पते ॥ ५ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि विप्रस्तु सञ्जातः पश्चिमे किल । तस्य गेहे चिराज्जाता कन्या भुवनसुन्दरी ॥ ६ ॥
भूमिद्रविणलोभेन वृद्धविप्राय सार्पिता । तस्य गेहे स्थितं यच्च सर्वस्वं श्वशुरोऽहरत् ॥ ७ ॥
यावत्कन्या भवेत्प्रौढा वरार्थं गुणशालिनी । पतिभक्तिपरा नित्यं तावत्कन्या सुतार्थिनी ॥ ८ ॥
किंचिद्वर्षे व्यतिक्रान्ते वृद्धविप्रो मृतश्च वै । सा वालविधवा जाता पत्यपत्यार्थदुःखिनी ॥ ९ ॥
व्रततीर्थरता नित्यं सत्यानामनुकांक्षिणी । वहुवर्षैस्तया वत्स नियमैः शोषितं वपुः ॥ १० ॥
तस्या निर्धनतां प्रेक्ष्य पिता पुत्र्यै धनं ददौ । किञ्चित्काले व्यतीते वै मृता सा ब्राह्मणी खग ११
सा पुत्री ह्युदरे भूत्वा ह्यगमज्जन्मजन्मनि । कन्या वहुविधास्तस्य निराधारा मृताश्च वै ॥ १२॥
तेन कर्मविपाकेन पूर्वपापाद्वहुप्रजाः । तस्य भर्तुर्गृहे गर्भस्रावतो मृतिमिच्छति ॥ १३ ॥
पुनर्जन्म पुनर्मृत्युरेवं वै निष्कृतिं विना । कन्याविक्रयकर्ता च रौरवे नरके गतः ॥ १४ ॥
यातना वहुधा भुक्त्वा वर्षाणाश्च सहस्रकम् । पश्चान्मानुष्यमापन्नो व्रतदानप्रभावतः ॥ १५ ॥
इदं चतुर्थकं जन्म वहुपुत्री स वै स्मृतः । मृतः पुत्रो मृतो गर्भस्तेन पापेन तस्य वै ॥ १६ ॥
भार्या तस्यापि विप्रस्य पूर्वजन्मनि मानद । भर्तृविद्वेषिणी नित्यं चिरात्पत्यनुगामिनी ॥ १७ ॥
तेन कर्मविपाकेन कन्या भूरि मृताः सुत ॥ १८ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं देव येन पापं प्रशाम्यति । निष्कृतिं वद विश्वात्मन्पृथक्त्वं मे प्रकाशय ॥ १९ ॥

श्रीसूर्य उवाच ।

पुत्रिका यस्य जीवन्ति पुत्राणां नाशनं भवेत् । कर्मभेदेन येनेह शृणु त्वं कश्यपात्मज ॥ २० ॥
स्वकन्यां वरयुक्तां सा चिन्तयित्वा समागमम् । दशाब्दान्वितमानेन यथाभावं यथामति॥२१॥
कन्यां रूपवतीं शान्तां समस्तगुणशालिनीम् । अलंकृतां यथाशक्ति वराय गुणशालिने ॥२२॥
ब्राह्मेण विधिना सूत दद्याच्च बहुदक्षिणाम् । महापापौघशमनं कन्यादानमतन्द्रितः ॥ २३ ॥
कन्याविवाहसमये महाशान्तिविधिश्चरेत् । एवं कृतविधिः सूत कन्यां दत्त्वा विधानतः ॥ २४ ॥
शान्तिकर्माणि सर्वत्र विस्तरेद्दत्विगादिकान् । भूमिद्रविणवासांसि कन्यावासांसि दापयेत्॥ २५ ॥
गृहदानं ततो दद्याद्यथोपस्करसंयुतम् । वर्षेवर्षे तु सम्पूर्णैः व्रतं कृत्वा तु पोषयेत् ॥ २६ ॥
एवं कृतविधिः सूत बहुपुत्रा यशस्विनी । पापं पुत्रविनाशाय कन्यापत्यादिषु त्रिषु ॥ २७ ॥
तत्पापस्य प्रणाशार्थं कन्यादानादिकं चरेत् । नाशयेत्तानि पापानि द्विजानां विधिपूजनात्॥२८॥
यजन्यज्ञविधानेन ब्राह्मणान्स्वस्ति वाचयेत् । विनायकाम्बिकामूर्तीर्हेमनिष्कप्रमाणतः ॥ २९ ॥
आचार्याय ददेत्ते तु नानाकर्मोपशान्तये । ऐहिकं लक्षणं तस्या शरीरे चोपजायते ॥ ३० ॥
जिह्वारदनदन्तेषु व्रणा वातादिदोषतः । नृपचौराग्निहानिश्च वित्तानां च यतस्ततः ॥ ३१ ॥
तप्यमानं मनश्चैव जायते भृशमाधिना । सर्पिष्यात्मानमालोक्य प्रायश्चित्तं तयोर्विधिः ॥ ३२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिपंचाशदुत्तरपञ्चशताधिकसहस्रतमः ॥ १९५३ ॥

श्रीसूर्य उवाच ।

यात्प्रहारिणी नारी लोभात्पूर्वभवे सुत । औदुम्बरेण रोगेण पीड्यते बहुपीडया ॥ १ ॥
पापं विचार्य यत्नेन ताम्रं दद्याच्च शक्तितः । तस्माद्दानान्महाभाग पापं नश्यति तत्क्षणात् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःपंचाशदुत्तरपञ्चशताधिकसहस्रतमः ॥ १९५४ ॥

श्रीसूर्य उवाच ।

गर्भं तु वहती या वै भुक्ता पूर्वं हि मानद । गर्भसत्रमकृत्वैवाविधिना गर्भधारणात् ॥ १ ॥
तेन कर्मविपाकेन बाहुजा सा प्रकीर्तिता । पूर्वजन्मन्यसौ विप्रा न च गर्भं दधात्यलम् ॥ २ ॥
प्रायश्चित्तमिदं तस्याः सर्वपापप्रमोचनम् । कुर्याच्च गर्भसंयुक्तां राजतीमबलामिह ॥ ३ ॥
वैश्वानरस्तथा कार्यः पञ्चमाषैर्हिरण्मयः । पूजयित्वा ततो दद्याद्विजाय विधिनांडज ॥ ४ ॥
एवं कुर्याद्विधानेन सर्वपापापनोदनम् । तस्याः पुत्रविवृद्धिः स्यादिह जन्मनि वै ध्रुवम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायःपंचपंचाशदुत्तरपञ्चशताधिकसहस्रतमः ॥ १९५५ ॥

श्रीसूर्य उवाच ।

मृगयां प्राप्य पक्षीन्द्र गजराजवधे पुरा । जायते गजचर्मा वै स नरोऽत्रैव जन्मनि ॥ १ ॥
गणेशप्रतिमां दद्यात्सौवर्णीं द्विपलात्मिकाम् । गन्धपुष्पैश्च सम्पूज्य तस्माद्रोगाद्विमुच्यते ॥ २ ॥
कारयेद्गणनाथस्य लक्षजाप्यं विधानतः । होमयेत्तद्दशांशेन मुच्यते पूर्वकिल्बिषात् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्पञ्चाशदुत्तरपंचशताधिकसहस्रतमः ॥ १९५६ ॥

श्रीसूर्य उवाच ।

यो हरेत्परसिद्धान्नं क्षुत्पीडाभिः प्रपीडितः । सोऽत्र जन्मनि पक्षीन्द्र शूलरुक्पीडितो भवेत् ॥ १॥
अन्नदानेन विप्राणां रसदानाद्विशेषतः । मुच्यते शूलजाद्रोगान्नात्र कार्या विचारणा ॥ २ ॥

सुवर्णशूलदानाद्वा विप्रायात्र कुटुम्बिने। शूलरोगोपशमनमिह जन्मनि वै ध्रुवम् ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तपञ्चाशदुत्तरपंचशताधिकसहस्रतमः ॥ १९५७ ॥

श्रीसूर्य उवाच।

मूर्धाभिषिक्तः प्राक्सूत बभूव पुरुषोत्तमः। स्वजातिषु महाभाग दृढकर्मक्रियापरः ॥ १ ॥
वैराटदेशे निवसन्राजकार्ये रतः सदा। कृतवान्गोग्रहं तत्र शत्रूणां भयदायकः ॥ २ ॥
बालवत्सा मृतास्तत्र पुरे गावः खगोत्तम। पापमाचरितं तेन नृपाज्ञाकारिणा दृढम् ॥ ३ ॥
ततो यमपुरं प्राप्तो भुक्त्वा भोगांस्तु तत्र वै। विष्णुपूजनजात्पुण्याज्जातोऽत्र यमुनातटे ॥ ४ ॥
चारणो धर्मनिरतो बहुद्रव्यसमन्वितः। नानासुखैश्वर्ययुतो गजाश्वरथवाहनैः ॥ ५ ॥
बन्धुभृत्याधिकाढ्यो वस्त्रभूषणभूषितः। सर्वं विष्णुप्रसादाच्च सुखं पापफलं शृणु ॥ ६ ॥
धूर्तो मिथ्यापवादी च बहुलोभसमन्वितः। जातसन्ततिदुःखार्तो बालवत्सवधादिह ॥ ७ ॥
नेत्ररोगान्वितो नित्यं शृणु चिह्नं खगाधिप। चत्वारिंशन्मिते वर्षे सर्वसन्ततिनाशनम् ॥ ८ ॥
गृहपापान्महाभाग वृष्टिरिष्टसमुद्भवा। पूर्वपापफलस्यात्र भोगादेव क्षयः स्मृतः ॥ ९ ॥

अरुण उवाच।

निष्कृतिं वद मे स्वामिन्बालवत्साघनाशिनीम्। यां कृत्वा विधिवज्जन्तुः पूर्वपापात्प्रमुच्यते १०॥

श्रीसूर्य उवाच।

प्रायश्चित्तं शृणोत्वत्र तद्वर्षानन्तरं सुत। तस्मिन्वर्षे महाभाग प्रायश्चित्तं न विद्यते ॥ ११ ॥
दृढकर्मार्जितात्पापान्न चोक्तं पापशोधनम्। श्रवणाद्धरिवंशस्य वैशाखे विधिनाण्डज ॥ १२ ॥
माघे वा कार्तिके वापि दशावृत्त्या विधानतः। ततस्तु भोजयेद्विप्रान्होमयेच्च स्वशक्तितः ॥ १३ ॥
कोटिलक्षायुतं सूत रुद्राध्यायं जपेत्तथा। धेनूनां दशकं दद्यात्सवत्साभरणान्वितम् ॥ १४ ॥
दद्याच्च कपिलामेकां स्वर्णशृंगीं पयस्विनीम्। प्रायश्चित्तमिदं वत्स चेत्कुर्याद्विधिपूर्वकम् ॥ १५ ॥
तस्य पुत्रविवृद्धिः स्याद्विवाहादपरात्सुत। मृत्युः पञ्चाशदब्दे तु खग चाकृतनिष्कृतेः ॥ १६ ॥
प्रायश्चित्ते कृते त्वत्र नवत्यब्दमितं यथा। द्वियुक्तमायुः कथितं तीर्थं पुण्याश्रयेऽण्डज ॥ १७ ॥
जीवे कर्कटगे तत्र चन्द्रे मकरराशिगे। त्रयोदश्यां दिवा भूमौ ऋक्षे मृगशिराभिधे ॥ १८ ॥
निर्याणं कथितं तस्य विष्णुपूजनजात्फलात्। भविष्यति न सन्देहः पुनर्विष्णुप्रपूजनात् ॥१९॥
मृत्युस्तृतीये जनुषि भविता गोग्रहात्सुत। सर्वपापाद्विशुद्धिः स्यात्पुनर्मोक्षमवाप्नुयात् ॥ २० ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टपञ्चाशदुत्तरपञ्चशताधिकसहस्रतमः ॥ १९५८ ॥

श्रीसूर्य उवाच।

पिङ्गलाक्षो भवेदत्र पूर्वं रीत्यपहारकः। तेन तत्पापशुद्ध्यर्थं देयं रीतिपलं शतम् ॥ १ ॥
गायत्र्या होमयेत्पश्चात्तिलान्विप्रांश्च भोजयेत्। मुच्यतेऽत्र महाभाग तद्रोगात्पापजाद्ध्रुवम् ॥२॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनषष्ट्युत्तरपञ्चशताधिकसहस्रतमः ॥ १९५९ ॥

श्रीसूर्य उवाच।

वैनतेय महाभाग खररोमात्र जायते। पूर्वजन्मनि यो हन्यात्खरं पापाद्विमोहितः ॥ १ ॥
प्रायश्चित्तं परं तस्य पापस्य शृणु तत्त्वतः। निष्कत्रयं सुवर्णस्य दद्याद्दोषोपशान्तये ॥ २ ॥
ब्राह्मणाय दरिद्राय वेदवेदाङ्गवेदिने ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षष्ट्युत्तरपंचाशताधिकसहस्रतमः ॥ १९६० ॥

श्रीसूर्य उवाच ।

प्राग्भुक्तं गर्भवृद्ध्यर्थं कुक्कुटाण्डं खगेश्वर । इह जन्मनि सा जाता संकरा लोभसंयुता ॥ १ ॥
धनधान्यसमायुक्ता पूर्वपुण्यादिहाण्डज । न चं गर्भं दधात्येषा प्राक्पापादण्डभक्षणात् ॥ २ ॥
कृत्वाण्डं विधिना तद्वद्धैरण्यं द्विपलात्मकम् । तदर्धमितिकं वापि निजवित्तानुसारतः ॥ ३ ॥
दद्याद्विजाय विधिना ह्याचरेच्छाङ्करं व्रतम् । फाल्गुनादौ चतुर्दश्यां कृष्णायां मासिमासि तु ॥४॥
पूजयेच्छङ्करं रात्रौ तथा जागरणेन च । भवन्ति सुलभाः पुत्राः सततं कृतनिष्कृतेः ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकषष्ट्युत्तरपंचशताधिकसहस्रतमः ॥ १९६१ ॥

श्रीसूर्य उवाच ।

शृणु सूत महाभाग कर्म यत्कृतवान्पुरा । जीवो हि तत्फलं चात्र प्रवक्ष्यामि समासतः ॥ १ ॥
अभवत्प्राग्भवे विप्रो धर्मशास्त्रार्थकोविदः । राजप्रचारी बलवान्क्रूरो मन्त्री महायशाः ॥ २ ॥
सन्धिविग्रहसंयुक्तो दाता भोक्ता प्रियंवदः । गत्वा त्वरिपुरं तेन घातिताः शत्रवः पुरा ॥ ३ ॥
विश्वासाद्राजकार्येषु कृतं कर्मातिदुष्करम् । लुण्ठितं तत्पुरं तेन लोभोपहतचेतसा ॥ ४ ॥
पीडिता बहवो लोका द्रव्यलोभाकुलीकृताः । स तेन कर्मणा युक्तः प्राप्तस्तु यमशासनम् ॥५॥
भुक्त्वा तु दारुणान्सूत नरकान्घोरदर्शनान् । तथा पुण्यफलात्पुण्यं प्राप्य मोदं विशेषतः ॥ ६ ॥
स्वर्णकारकुले जातो धूर्तो लोभपरः सदा । नानाचौर्यक्रियायुक्तो लोकवञ्चनतत्परः ॥ ७ ॥
महाभिमाननिरतः प्रियो राजजनेष्वपि । सुखैश्वर्यधनैर्युक्तः कुटुम्बभरणे दृढः ॥ ८ ॥
नानास्त्रीसुखसंयुक्तस्तथा पुत्रविवर्जितः । वक्ष्यामि निष्कृतिं सूत सर्वपापनिकृन्तनीम् ॥ ९ ॥
प्रयागे त्वथवा काश्यां स्थाप्य लिङ्गं सुशोभनम् । पूजयेत्तु त्रिवर्षान्तं मन्त्रैस्तल्लिङ्गजैस्तथा ॥ १०॥
गन्धपुष्पोपचारैश्च नैवेद्यैर्बहुदीपकैः । संपूज्य विधिवद्देवं तदन्ते भोजयेद्द्विजान् ॥ ११ ॥
शिवभक्तांस्तथा शान्तान्पूजयेद्दक्षिणादिभिः । नानाहिरण्यैर्विधिवत्तथा चाभरणैः शुभैः ॥ १२ ॥
अथवा शृणुयात्तत्र यजुर्वेदं विधानतः । ब्रह्मचर्येण सततं प्रायश्चित्तमिदं परम् ॥ १३ ॥
य एवं कुरुते भक्त्या पूर्वपापप्रणाशनम् । सम्प्राप्यात्र च निर्याणे शिवलोकं हि गच्छति ॥ १४॥
कर्तव्यं ब्राह्मणद्वारा सर्वमेतद्धि काश्यप । नाधिकारोऽत्र शूद्रस्य वेदस्य श्रवणे क्वचित् ॥ १५ ॥
तप्ता शलाका देया वै श्रुते कर्णेतिदारुणा । श्रुतं पारायणं येन पापेनाक्रान्तचेतसा ॥ १६ ॥
आयुरब्दशतं तस्य कृतनिष्कृतिकस्य वै । प्रायश्चित्तेऽकृते रिष्टं जायते षष्टिवत्सरे ॥ १७ ॥
एतज्जन्मफलं प्रोक्तं सविधानं समासतः ॥ १८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विषष्ट्युत्तरपंचशताधिकसहस्रतमः ॥ १९६२ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे हन्यात्खरमत्रैव जन्मनि । खररोमसमानानि रोमाणि प्रभवन्ति हि ॥ १ ॥
ब्राह्मणाय ततो दद्यात्स्वर्णं निष्कत्रयं सुत । जायते सूक्ष्मरोमा सा विनतानन्दवर्धन ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिषष्ट्युत्तरपंचशताधिकसहस्रतमः ॥ १९६३ ॥

श्रीसूर्य उवाच ।

या पुरा तु हरेद्रीतिं नारी सा च खगाधिप । पिङ्गाक्षी जायते चात्र प्रायश्चित्तं परं शृणु ॥ १ ॥

रीतिं दद्यात्पलशतं तथा ब्राह्मणभोजनम्। गायत्र्या जुहुयाच्छक्त्या तिलान्रोगविनाशनम् ॥२॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःषष्ट्युत्तरपञ्चशताधिकसहस्रतमः ॥ १९६४ ॥

श्रीसूर्य उवाच।

प्राग्भवे वनिता या च परसिद्धान्नहारिणी। सेह जन्मनि शूलेन रोगेणैव च बाध्यते ॥ १ ॥
सिद्धान्नस्य च विप्रेभ्यो दीनेभ्योऽथ खगाधिप। भिक्षुभ्यश्च तथा दानाद्रसदानाच्च शक्तितः ॥२॥
न जायते शूलपीडा तस्याश्च कृतनिष्कृतेः। प्रायश्चित्ते कृतेऽत्रैव म्रियते शूलपीडया ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचषष्ट्युत्तरपञ्चशताधिकसहस्रतमः ॥ १९६५ ॥

श्रीसूर्य उवाच।

शृणु चात्र खगश्रेष्ठ प्राणिनश्च विचेष्टितम्। बभूव गौडदेशे तु शूरो धनसमन्वितः ॥ १ ॥
ग्रामाधिपो महाशूरो राज्यमान्यः प्रतापवान्। दत्तानि तेन दानानि ब्राह्मणेभ्योऽतिशक्तितः ॥२॥
पुण्यतीर्थेषु स्नानानि कृतवान्धर्मबुद्धितः। अथो भाविबलात्सूत कृतवान्दुष्कृतं महत् ॥ ३ ॥
सहायैः पञ्चभिस्तेन मिलित्वा कर्म दारुणम्। कृतं यत्तदहं वक्ष्ये क्षेत्रकर्माणि लोभतः ॥ ४ ॥
ददाह क्रूरबुद्ध्या च वनं जन्तुसमाकुलम्। वनजीवास्तथा दग्धा मृगसर्पादिजातयः ॥ ५ ॥
पापमाचरितं तेन भाविनोऽर्थस्य गौरवात्। स तेन कर्मणा युक्तो गत्वा तु यमशासनम् ॥ ६ ॥
पुण्यात्पुण्यफलं भुक्त्वा स जातो मुखजोऽधुना। पूर्वपुण्यविशेषेण गिरौ केदारमण्डले ॥ ७ ॥
हिमालये पुण्यदेशे गौरो भव्यश्च बुद्धिमान्। नातिह्रस्वो नातिदीर्घो सर्वकार्यविचक्षणः ॥ ८ ॥
गतागतधनैर्युक्तो बलवाञ्जनवल्लभः। पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् ॥ ९ ॥
गूढचेष्टो महामानी दाक्षिण्यरहितैर्युतः। मनोदुःखसमाक्रान्तः कापट्येन च संयुतः ॥ १० ॥
प्राग्भवे वनदाहे तु ये स्युस्तस्य सहायकाः। अत्र जन्मनि ते पुत्रा मृतास्तत्प्राणिनोंऽज ॥ ११ ॥
तस्य प्रिया सदाचारा रोगक्लेशैश्च संयुता। लक्षणैरभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥ १२ ॥
वनदेवी तथा कार्या पलेनैकेन शोभना। हिरण्मयी तथा लेख्या पत्रे च चतुरस्रके ॥ १३ ॥
तदर्धामितिका वापि निजवित्तानुसारतः। वनजीवास्तथा लेख्याः पत्रे रजतसम्भवे ॥ १४ ॥
पलमात्रे महाभाग गन्धैः पुष्पैश्च पूजयेत्। माषत्रयमितो वह्निस्तथा चैव हिरण्मयः ॥ १५ ॥
आहूय ब्राह्मणान्भक्त्या तेभ्यो देया विधानतः। गायत्रीमष्टसाहस्रं त्र्यम्बकं द्विविधं तथा ॥१६॥
अग्निन्दूतं द्विसाहस्रं जपेदष्टाक्षरन्तथा। होमयेत्तद्दशांशेन शक्त्या विप्रांश्च भोजयेत् ॥ १७ ॥
पार्थिवान्पूजयेद्यत्नान्महादेवान्प्रयत्नतः। अयुतं संख्यया भक्त्या भद्दिने व्रतमाचरेत् ॥ १८ ॥
मन्मूर्तिं पूजयेन्नित्यं मम भक्तिपरायणः। प्रायश्चित्तमिदं प्रोक्तं पूर्वजन्माघनाशनम् ॥ १९ ॥
एवं कृते महाभाग प्रायश्चित्ते विधानतः। तस्य सन्ततिवृद्धिः स्याज्जायन्ते सम्पदश्च वै ॥२० ॥
नाधयो व्याधयस्तस्य न च शत्रुभयं भवेत्। न पुत्रमरणं किञ्चिन्न च रिष्टभयं क्वचित् ॥ २१ ॥
द्व्यशीतिमितवर्षान्तं सुखी जीवति मानवः। नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् ॥२२॥
न सुखं लभते क्वापि रिष्टं नैव मृतिर्भवेत् ॥ २३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्षष्ट्युत्तरपंचाशताधिकसहस्रतमः ॥ १९६६ ॥

श्रीसूर्य उवाच।

बभूव यामुने देशे वैश्यो व्यापारवान्भुवि। विप्रभक्तिपरो नित्यं कृषिवाणिज्यतत्परः ॥ १ ॥

धनवान्राजसम्मानी भार्यापुत्रसुहृद्युतः । सहोदरयुतो मानी धर्मकर्मार्थसाधकः ॥ २ ॥
कृतवान्कपिलादानं ब्राह्मणेभ्योतिभक्तितः । कार्तिके मधुपुर्यां वै स्वर्णदानं चकार वै ॥ ३ ॥
घृतप्रज्वालितान्दीपान्दत्तवान्यमुनाजले । ब्राह्मणेभ्यो ददावन्नशय्यावसनकम्बलान् ॥ ४ ॥
अथो भाविवलात्सूत कृतं यत्कर्म दारुणम् । व्यभिचारभवं सूत भार्यायां प्रतिवेशिनः ॥ ५ ॥
ब्राह्मणस्य खगश्रेष्ठ सात्त्विकस्य महात्मनः । अप्रसूता प्रिया तस्य चपला चारुलक्षणा ॥ ६ ॥
वैश्यस्तां कामयामास लोभमोहादिविभ्रमैः । अज्ञानात्कामयिच्छन्तावुभावपि बलीयसः ॥ ७ ॥
कामस्य वशमापन्नौ ब्राह्मणो जनताङ्कतः । स वैश्यो दैवयोगाच्च भाविनोर्थस्य वै बलात् ॥ ८ ॥
सतीं वै धर्षयामास बहुकालं खगेश्वर । व्यभिचारवशात्तस्य चान्योन्यैस्तद्धृतं धनम् ॥ ९ ॥
गृहीतं तद्धनं चैव तेन धूर्तेन मानद । ततो लोकापवादेन ब्राह्मणीमत्यजद्द्विजः ॥ १० ॥
ततः सा निधनं प्राप्ता ब्राह्मणी दुःखतोण्डज । निर्वंशो ह्यभवत्तस्य ब्राह्मणस्य खगेश्वर ॥ ११ ॥
ब्राह्मणोऽपि मृतस्तत्र तद्दुःखेन खगाधिप । ततो बहुतिथे काले वैश्यस्तु यमशासनम् ॥ १२ ॥
गत्वा पापफलं पापात्पुण्यात्स्वर्गञ्च शाश्वतम् । भुक्त्वा पुण्यप्रभावाच्च स जातो ब्राह्मणस्त्विह १३
हिमालये पुण्यदेशे गङ्गा वहति यत्र वै । इदं चतुर्थं वै जन्म ब्रह्मवंशसमुद्भवम् ॥ १४ ॥
मध्ये जन्मत्रये प्राप्तं यद्दुःखं तन्महोल्वणम् । नोक्तं मया खगश्रेष्ठ चतुर्थे जन्मनि ध्रुवम् ॥ १५ ॥
स्यात्कृष्णगौरो मतिमान्राजमान्यः प्रियंवदः । विद्यावान्मितवाक्शूरो नात्युच्चो न लघुर्घृणी १६ ॥
दयावान्वैदिकाचारो वेदद्विजपरायणः । ग्रामाधिपः सुभोक्ता च पौत्रभ्रातृसुतान्वितः ॥ १७ ॥
यशस्वी सत्यवाङ्मानी कृती बहुजनप्रियः । सन्धिविग्रहसंयुक्तो धनी बन्धुप्रियः सुखी ॥ १८ ॥
नैकस्त्रीसंयुतः कामी मितदो बहुमित्रभाक् । पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् ॥ १९ ॥
मनोदुःखैः समाक्रान्तो ह्युदरे वातशूलयुक् । गतागतधनैर्युक्तो दायादकलहैर्युतः ॥ २० ॥
मिथ्यापवादशङ्काभिः शंकितः कपटैर्युतः । अनागसः स्वभार्यायास्त्यागात्सङ्काद्विजस्त्रियाः ॥ २१ ॥
ब्रह्मस्वभक्षणात्पापाद्वंशच्छेदोऽत्र दृश्यते । भार्यावियोगमाप्नोति नैकभार्यां स विन्दति ॥ २२ ॥
महोद्विग्नमनाः सोऽपि न रतिं लभते क्वचित् । किं मया दुष्कृतं पूर्वं कृतं चिन्तयति स्वयम् ॥ २३ ॥
अहो दैवमहो दैवं चिन्तयन्गुप्तदुःखभाक् । न सुखं भ्रातृपुत्रोत्थं न पित्रोर्नसुताभवम् ॥ २४ ॥
कुटुम्बकलहो दौस्थ्यं स्त्रिया दुःखं मुहुर्मुहुः । द्विपञ्चाशद्वर्षके वै जातपुत्रविनाशकः ॥ २५ ॥
लग्नाङ्के पञ्चमे द्यूने क्रूरग्रहनिरीक्षिते । त्रिग्रहैरीक्षिते तत्र त्रिधा स्त्रीपुत्रनाशनम् ॥ २६ ॥
इदं जीवेदिदं जीवेदित्याशाखिन्नमानसः । ब्राह्मणतल्पगात्पापाद्वामाङ्के लक्ष्मसंयुतः ॥ २७ ॥
एवं तु लक्षणैर्युक्तः कुर्यात्पापविशोधनम् । प्रायश्चित्ते कृते सूत भार्यास्थितिर्भविष्यति ॥ २८ ॥
पुत्रपौत्राभिवृद्धिश्च वंशवृद्धिर्भवेत्तथा ॥ २९ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं स्वामिन्येन दुःखं विनश्यति । स्त्रियाः स्थितिर्भवेत्स्वामिन्वंशवृद्धिर्भवेत्प्रभो ॥ ३० ॥
संसारार्णवमग्नानां प्रसीद परमेश्वर । कथयस्व दिवानाथ भुक्तिमुक्तिप्रदो भव ॥ ३१ ॥

श्रीसूर्य उवाच ।

साधु पृष्टं महाबाहो कथयिष्ये तवाखिलम् ॥ ३२ ॥
तस्येदं कर्ममानेन प्रायश्चित्तं यथोदितम् । तेनेदं मुनिभिः प्रोक्तं प्रायश्चित्तं यथा तथा ॥ ३३ ॥
उमामहेश्वरौ देवौ सौवर्णौ कारयेच्छुभौ । पलद्वयमितौ कार्यौ विधानेन प्रपूजितौ ॥ ३४ ॥

नानाचन्दनचर्चाभिः पुष्पधूपैर्मनोहरैः । सौभाग्याष्टकसंयुक्तपूजनाच्च शुभानना ॥ ३५ ॥
उमामहेश्वरप्रीत्यै दम्पती परिधापयेत् । ततो हिरण्मयौ देवौ ब्राह्मणाय समर्पयेत् ॥ ३६ ॥
यथा त्वमुमया देव सभार्योऽसि महेश्वर । तथा तव प्रसादेन सभार्यं कुरु मां प्रभो ॥ ३७ ॥
यथा त्वं पुत्रयुक्तो मां पुत्रवन्तं तथा कुरु । ततस्तिलाचले द्रोणे शुक्ले द्वादशमापिकाम् ॥ ३८ ॥
तिलपूर्णे न्यसेन्नार्याः प्रतिमां वस्त्रसंयुताम् । सुवर्णमितिकां वापि सर्वभूषणभूषिताम् ॥ ३९ ॥
कृत्वा प्रतिष्ठितप्राणां विप्राय गुणशालिने । दद्याद्दक्षिणया युक्तां विधिवद्विहितार्हणाम् ॥
श्रद्धया दैववित्प्रोक्तं मन्त्रमेतं समुच्चरेत् ॥ ४० ॥

मन्त्रः ।

"यन्मया प्राचि जनुषि ब्राह्मणीं संयतेन्द्रियाम् ॥ ४१ ॥
पतिव्रतपरां नारीं बलेनाक्रम्य भुञ्जता । पापं नार्या वियोगाख्यमिदं प्राप्तं सुदुःसहम् ॥ ४२ ॥
ब्रह्मस्वभक्षणाज्जातपुत्रनाशाख्यकिल्बिषम् । मद्दैनसोऽस्य नाशाय सौवर्णीं योषिताकृतिः॥ ४३ ॥
तिलाचलोपरि भ्राजच्छुक्लपात्रे तिलैर्भृते । समारोप्य मया दत्ता तुभ्यं विष्णुस्वरूपिणे ॥ ४४ ॥
दानेनानेन मे ब्रह्मन्महैनस्तद्विनश्यतु" । त्रिर्वदन्निति सम्पूज्य चैवमस्त्विति वादिनम् ॥ ४५ ॥
अग्नेनयेति मन्त्रेण प्रणिपत्य विसर्जयेत् । द्विसुवर्णेन मन्मूर्तिं दैवज्ञाय निवेदयेत् ॥ ४६ ॥
ततस्तु भोजयेत्तस्मिन्दिने नानाविधाङ्गनाः । एवं कृते सभार्यः स्यात्पुत्रपौत्रसमन्वितः ॥ ४७ ॥
भक्तियुक्तेन मनसा किल्बिषान्मुच्यतेऽचिरात् । गायत्रीमष्टसाहस्रं त्र्यम्बकन्तु तथा जपेत् ॥४८॥
हामयेत्तद्दशांशेन शक्त्या विप्रांश्च भोजयेत् । श्रवणं हरिवंशस्य वंशवृद्धिकरं परम् ॥ ४९ ॥
अन्नैर्नानाविधैर्भक्ष्यैर्नवोढां हितदम्पतीन् । भोजयेद्विधिवच्चार्च्य श्रद्धया परया युतः ॥ ५० ॥
गामेकां दक्षिणां दद्यात्सर्वाभरणभूषिताम् । सर्पिष्यात्मानमालोक्य भोजयेदिष्टबन्धुभिः ॥५१ ॥
एवं कृतविधेः सूत पूर्वजन्माघनाशनम् । नाधयो व्याधयस्तस्य न च मृत्युभयं भवेत् ॥ ५२ ॥
नच शत्रुकृता पीडा न पुत्रमरणं भवेत् । न भार्यामरणं तत्र प्रायश्चित्ते कृतेऽधुना ॥ ५३ ॥
आयुरूनशताब्दान्तं भवत्येव न संशयः । अकृते तु यथाशक्त्या प्रायश्चित्ते खगाधिप ॥ ५४ ॥
भार्यापुत्रसुखं तस्य न भवेदत्र जन्मनि । सप्तपञ्चाशदब्दे तु रिष्टं भवति दारुणम् ॥ ५५ ॥
जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् । यद्यदन्तर्गतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥५६॥

इति श्रीवृद्धसूर्यऋिणसंवादे कर्मविपाकेऽध्यायः सप्तषष्ट्युत्तरपंचशताधिकसहस्रतमः ॥ १९६७ ॥

श्रीसूर्य उवाच ।

वैनतेय शृणु त्वं हि प्राणिनस्तस्य चेष्टितम् । आसीत्क्षत्री महाभाग प्रयागे देशके शुभे ॥ १ ॥
धनवान्भोगयुक्प्राज्ञो भृत्यवाहनसंयुतः । राजसेवापरो मन्त्री धर्मशास्त्रार्थकोविदः ॥ २ ॥
अहंयुः कीर्तिमाञ्छूरो ब्राह्मणातिथिपूजकः । परोपकारनिरतो वैद्यविद्याविशारदः ॥ ३ ॥
गोरोगभञ्जनश्चक्रे देशे मण्डलके तथा । दिव्यौषधीनां योगैश्च नानोपायैः प्रयत्नतः ॥ ४ ॥
दत्तानि तेन दानानि प्रयागे मृगगे रवौ । सुवर्णरत्नभूषान्नवसनाच्छादनानि च ॥ ५ ॥
अथो पापं भृशं चक्रे जात्यहंकारबुद्धितः । पितृमातृगुरूणाञ्च निन्दाञ्चैव चकार ह ॥ ६ ॥
बान्धवानाञ्च वृद्धानामवहेलनकर्मतः । बाल्यमारभ्य नियतं पित्रोरुल्लंघ्य शासनम् ॥ ७ ॥
उच्छृंखलतया चक्रे यद्यत्कर्म स बाहुजः । ततो भाविबलात्सूत गुरोरपि महात्मनः ॥ ८ ॥
विद्यामभ्यस्य तस्यैव निन्दाञ्चक्रेऽल्पबुद्धितः । ततो बहुतिथे काले सम्प्राप्य यमशासनम् ॥ ९ ॥

पुण्यात्पुण्यफलं भुक्त्वा पापाच्च नरकांस्तथा । पूर्वपुण्यप्रभावेण स जातो ब्राह्मणोऽधुना ॥ १० ॥
वाराणसीमहाक्षेत्रे पुण्ये शम्भुसमाश्रिते । नात्युच्चो नातिदीर्घश्च रक्तवर्णः प्रतापवान् ॥ ११ ॥
बुद्धिमान्नीतिमान्वाग्मी पाता भोक्ता जनप्रियः । लग्नात्पञ्चमगैः क्रूरैः शुभैः पञ्चभिराश्रितः॥१२॥
ब्रह्मसंस्कारयुक्तश्च गुणी मानी यशोन्वितः । पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित्॥१३॥
पितृमातृगुरुभ्रातृबन्धुस्त्रीनिन्दया पुरा । तैर्विहीनोऽत्र जनुषि पुत्रस्त्रीसुखवर्जितः ॥ १४ ॥
चतुर्थाश्रमसंयुक्तो नैकवासी जितेन्द्रियः ॥ १५ ॥

अरुण उवाच ।

प्रायश्चित्तं कथन्देव तस्य जन्तोरिह ध्रुवम् । किं कर्तव्यं समाचक्ष्व प्राणिनां हितकाम्यया ॥१६॥

श्रीसूर्य उवाच ।

साधु पृष्टं त्वया सूत वक्ष्ये तत्पापशोधनम् । गायत्रीदशसाहस्रं त्र्यम्बकं च तथा जपेत् ॥ १७ ॥
अष्टाक्षरं महामन्त्रं चतुर्विंशत्सहस्रकम् । जपेन्नियमयुक्प्राज्ञो गङ्गातीरे महौजसि ॥ १८ ॥
होमयेत्तद्दशांशेन शक्त्या विप्राँश्च भोजयेत् । रुद्रैकादशिनीभिश्च रुद्रैकादशकेन च ॥ १९ ॥
पूजयेच्च महारुद्रं रुद्रमेकादशात्मकम् । एवं कृतविधेः सूत पूर्वजन्माघनाशनम् ॥ २० ॥
सद्गतिस्तस्य जायेत चान्ते मोक्षमवाप्नुयात् । नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् ॥२१॥
त्रिहीने षष्टिसंख्येब्दे रिष्टेनैव मृतिर्भवेत् । सद्गतिं नैव चाप्नोति जन्मजन्मनि दुःखभाक् ॥ २२ ॥
प्रायश्चित्ते कृते पुत्र शतं च चतुरुत्तरम् । वर्षाणि जीवनं तस्य प्रोक्तं चैव महात्मनः ॥ २३ ॥
अन्ते सद्गतिमाप्नोति यत्र देवो महेश्वरः । जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् ॥ २४ ॥
यद्यदन्तर्गतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ २५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोष्टषष्ट्युत्तरपंचशताधिकसहस्रतमः ॥ १५६८ ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम् । गौडदेशे बभूवासौ प्राग्भवे विनतात्मज ॥ १ ॥
बाहुजानां कुले प्राज्ञो धर्मवित्संयतेन्द्रियः । धनवाहनभोगाढ्यो राजसेवापरः सुखी ॥ २ ॥
सन्धिविग्रहसंयुक्तः क्लीबो धर्मविदुत्तमः । स्वगोत्रजासहायाच्च प्रयागे गरुडाग्रज ॥ ३ ॥
मधुधेनुमहादानं ब्राह्मणाय प्रदत्तवान् । विष्णुपूजारतो नित्यं सर्वजीवदयापरः ॥ ४ ॥
अथो भाविवलात्सूत कृतवान्कर्म दारुणम् । राजाज्ञया रिपूणाञ्च देशं लुण्ठितवान्खग ॥ ५ ॥
तत्र गोग्रहणं सूत कृतवान्पौरुषप्रियः । तत्रैका गौर्महाभाग ह्यासन्नप्रसवा स्थिता ॥ ६ ॥
शीघ्रं गन्तुमशक्ता सा ताडिता तेन वै भृशम् । तेन गर्भाच्च्युतो वत्सो मृता सा गर्भपीडया॥७॥
गोघातनान्महाभाग घोरं पापमुपार्जितम् । ततो बहुतिथे काले स गत्वा यमशासनम् ॥ ८ ॥
पुण्यात्पुण्यफलं भुक्त्वा पापात्पापफलन्तथा । पूर्वपुण्यप्रभावेण स जातो बाहुजोऽधुना ॥ ९ ॥
केदारमण्डलप्रान्ते गङ्गातीरे हिमालये । स कृष्णगौरो मतिमान्सेनानीः प्रियदर्शनः ॥ १० ॥
नात्युच्चो नातिदीर्घश्च नातिस्थूलः कृशो न च । बहुग्रामाधिपः शूरो मितवाग्ब्राह्मणप्रियः ॥११॥
राजप्रियो नीतिविच्च नैकस्त्रीसङ्गयुक्सुखी । सन्धिविग्रहसंयुक्तो दाता भोक्ता प्रियम्वदः ॥ १२ ॥
धनवान्वाहनोपेतो भृत्यैश्च परिवारितः । पशुदासीसुसंयुक्तो बन्धुमित्रसुसंयुतः ॥ १३ ॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । प्राग्भवे गोवधात्पापाज्जातपुत्रविनाशकः ॥ १४ ॥
द्विचत्वारिंशदब्दान्तं कदाचित्क्रोधसंयुतः । गोवधाच्च महापापात्स्त्रीसुखं नैव विन्दति ॥ १५ ॥

गूढचेष्टो वक्रमतिः कुक्षौ गोताडनात्सुत । कुक्षिशूलयुतः क्वापि क्वापि दन्तरुजान्वितः ॥ १६ ॥
जन्माङ्गात्पञ्चमे द्यूने क्रूरग्रहविलोकिते । कदाचित्कण्ठरुक्चास्य ह्यन्नपाकस्तथा न च ॥ १७ ॥
वातरुक्संयुतो वापि गृहे कलहसंयुतः । दाने या स्त्री सहायासीत्सात्र माता प्रकीर्तिता ॥ १८ ॥
यो वत्सो गोश्च्युतो गर्भात्स सुतोऽभून्मृतिं गतः । लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदामि ते॥ १९॥
पलत्रयमिता कार्या सौवर्णी वत्ससंयुता । लेख्या पत्रे शुभे धेनुर्गन्धपुष्पार्चनादिभिः ॥ २० ॥
सम्पूज्य विधिना सूत सा देया ब्राह्मणाय वै । रजतेन च कर्तव्यो दण्डः पञ्चपलैः शुभः ॥२१ ॥
माषसप्तमितो वह्निः सौवर्णो विधिना सुत । देयो विप्राय विदुषे दारिद्राय कुटुम्बिने ॥ २२ ॥
गायत्रीमष्टसाहस्रं त्र्यम्बकन्तु तथा जपेत् । अष्टाक्षरस्तथा जप्यश्चतुर्विंशतिसंख्यया ॥ २३ ॥
होमयेत्तद्दशांशेन तिलैराज्यपरिप्लुतैः । ब्राह्मणान्भोजयेत्पश्चात्सर्पिष्यात्मानमीक्षयेत् ॥ २४ ॥
लक्षं पार्थिवलिङ्गानां पूजयेत्पुत्रवृद्धये । महिने तु व्रतं कुर्यात्सर्वपापापनुत्तये ॥ २५ ॥
एवं कृतविधेः सूत पूर्वपापौघनाशनम् । नाधयो व्याधयस्तत्र न शत्रुभयमावहेत् ॥ २६ ॥
न पुत्रमरणं तस्य न स्त्रीमरणमेव च । सम्पदस्तस्य जायन्ते पुत्रपौत्राभिवृद्धितः ॥ २७ ॥
द्व्यशीतिमितवर्षान्तमायुस्तस्य प्रकीर्तितम् । नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् ॥ २८ ॥
सुखं न लभते क्वापि नरकञ्च प्रपद्यते । पञ्चाशद्वर्षके रिष्टं तेनैव मरणं भवेत् ॥ २९ ॥
जन्मादिमरणान्तञ्च स्वल्पमेवात्र सूचितम् । यद्यदन्तर्गतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ ३० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनसप्तत्युत्तरपंचशताधिकसहस्रतमः ॥ १९६९ ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम् । क्षत्रियस्य कुले भूत्वा सेनापत्यसुखान्वितः ॥ १ ॥
ब्राह्मणान्बाधते यो हि तत्फलं श्रूयतां खग । एकदाथ महालोभात्सेनापत्यमदान्धतः ॥ २ ॥
ब्राह्मणस्य गृहे गत्वा प्रार्थयामास तद्धनम् । तदा विप्रस्य गेहे वै वर्तते याज्ञिकी क्रिया ॥ ३ ॥
तत्तत्कर्माकुलत्वेन दत्तवानुत्तरं न सः । ततः सञ्जातकोपेन क्षत्रियेण दुरात्मना ॥ ४ ॥
महापातकिना तेन कृतो यज्ञस्य संक्षयः । ब्राह्मणास्तत्र होतारो वेदशास्त्रविशारदाः ॥ ५ ॥
हता यष्टिप्रहारेण यज्ञवाटीबहिःकृताः । सर्वास्तत्रोपहारांश्च क्षिप्तवान्सर्वतो दिशः ॥ ६ ॥
रुद्रकुम्भः समुत्थाप्य निक्षिप्तः कुण्डमध्यतः । तत्कुम्भजलसम्पर्काच्छमितोऽग्निश्च संस्कृतः॥७॥
तदा स कुपितो वह्नी रुद्रेणापि समन्वितः । एवं स दारुणं कर्म कृत्वा तापमुपागतः ॥ ८ ॥
पश्चात्तापसमायुक्त आत्मानमशपत्ततः । हा देवि किं कृतं पापं मया दुर्बुद्धिना भृशम् ॥ ९ ॥
ब्राह्मणा निहताः कस्मात्कस्माद्वै ध्वंसितो मखः । कस्माद्रुद्रघटः क्षिप्तः कस्माद्वह्निर्विदूषितः१०
एवं सञ्चिन्त्य बहुधा ह्यात्मानमशपत्ततः । संन्यस्तः स ततो भूत्वा पुण्यं वै कृतवान्बहु ॥ ११ ॥
तीर्थानि बहुधा गत्वा मृतः कालविपर्ययात् । स तत्पुण्यवशेनाथ जातो वै धनिनां कुले ॥१२॥
तस्मिन्वयसि सम्प्राप्ते तत्कृतं तमनुव्रजेत् । महाज्वरो भवेत्तस्य ह्यन्तर्दाहसमन्वितः ॥ १३ ॥
हृन्मूर्छनाभराक्रान्तो न शर्म लभते क्वचित् । भूयो भूयो भवत्येष पुनः शान्तिमुपैति च ॥१४॥
अन्तर्हृच्च समाविश्य महादाहं करोत्यसौ । खदिराङ्गारवत्तीक्ष्णो मेदोमांसबलानि च ॥ १५ ॥
प्रत्यहं शोषयेज्जन्तुं यतमानं न मुञ्चति । दिनैर्मासैश्च गच्छद्भिः शोफो हस्तोदरांघ्रिषु ॥ १६ ॥
कासश्वासाग्निमान्द्यानि कृच्छ्रातीसारमेहकाः । पीनत्वमुदरे चास्य कृशत्वं हस्तपादयोः ॥ १७ ॥
अङ्गाराग्निभिरेवास्य हृदयं परितप्यते । मुहुस्तृषापि वमनं शेते पश्चान्मुहुर्मुहुः ॥ १८ ॥

औषधैर्यास्यते शान्तिं भिषग्भिरुपकल्पितैः । कर्मणा तेन तस्यैव पूर्वजन्मकृतेन वै ॥ १९ ॥
म्रियते च स रोगेण ज्वरेण दुःसहेन सः । एवं स वेदनायुक्तः सप्तजन्मनि वै खग ॥ २० ॥
यावन्न कुरुते तस्य निष्कृतिं कर्मणश्च सः । विधिवद्ब्राह्मणंस्पृष्ट्वा तावत्कर्म न मुञ्चति ॥ २१ ॥
एवं स कर्मणि ज्ञाते प्रायश्चित्तं समाचरेत् । सुशुभे भूप्रदेशे तु गोमयेनोपलेपयेत् ॥ २२ ॥
आस्तीर्य कम्बलं प्रौढं स्थापयेत्पञ्च पर्वतान् । मध्ये तिलाचलं दिक्षु प्रादक्षिण्येन चापरान् ॥२३॥
द्रोणद्वितयमानाढ्यान्फलपुष्पसमन्वितान् । मद्विधीन्द्रमहेशानधातॄणां प्रतिमाः शुभाः ॥ २४ ॥
शुद्धवर्णसुवर्णस्य प्रत्येकं हस्तमानतः । यथोक्तेन विधानेन प्रतिष्ठापूजनादिभिः ॥ २५ ॥
दैवज्ञादिकविप्रेभ्यो यथावत्प्रतिपादयेत् ॥ २६ ॥

मंत्रः ।

"यन्मया प्राचि जन्मुषि यज्ञलोपं वितन्वता । महादाहज्वरमयं दुःखमाप्तमरुन्तुदम् ॥ २७ ॥
भवन्मूर्तिप्रदानेन भवेयं ज्वरवर्जितः" । इत्युक्त्वाशिष आदाय विप्रानन्यांश्च दापयेत् ॥ २८ ॥
मृत्युञ्जयं जपेल्लक्षं जुहुयात्तद्दशांशतः । सहस्रकलशैरीशं स्नापयेन्मौनमुद्वहन् ॥ २९ ॥
त्र्यक्षरं त्र्यम्बकाख्यं ततोऽसौ विज्वरो भवेत् ॥ ३० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्युत्तरपंचशताधिकसहस्रतमः ॥ १५७० ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम् । गौडदेशेऽतिविख्यातः क्षत्रियो विनतासुत ॥ १ ॥
देशेदेशेऽधिकाढ्यः स्त्रीपुत्रधनसंयुतः । दत्तानि तेन दानानि ब्राह्मणेभ्यः खगाधिप ॥ २ ॥
शालग्रामहिरण्यानि वस्त्रान्नादीनि चाण्डज । अथो भाविबलात्सूत पापं चक्रेऽतिदारुणम् ॥ ३ ॥
ब्रह्मस्वहरणाख्यन्तु ब्रह्मघातसमं सुत । यूनिभावे महाभाग केनचिद्ब्राह्मणेन च ॥ ४ ॥
धनं घटस्थं निक्षिप्तं तद्गृहे गरुडाग्रज । राजभीत्या गतः सोऽपि विदेशे द्विजसत्तमः ॥ ५ ॥
क्षत्रियेण ततस्तेनाप्यसहायेन लोभतः । भुक्तं तद्धनमज्ञानात्सर्वं हि गरुडाग्रज ॥ ६ ॥
ततो द्विजः समासाद्य धनं याचितवान्स्वकम् । वृद्धभावे खगश्रेष्ठ तेन दत्तं न तद्धनम् ॥ ७ ॥
क्षुधितः स मृतो विप्रो घोरं पापमुपार्जितम् । ब्रह्मघातसमं सूत भाविनोऽर्थस्य गौरवात् ॥ ८ ॥
ततो बहुतिथे काले स गत्वा यमशासनम् । भुक्त्वा पापफलं पापात्पुण्यात्स्वर्गांश्च शाश्वतान् ॥९॥
पूर्वपुण्यप्रभावेण जातः सोऽत्र महीतले । केदारदेशे विख्याते पुण्ये चोच्चकुले महान् ॥ १० ॥
स कृष्णगौरो मतिमान्राजमान्यः प्रियम्वदः । नात्युच्चो नातिह्रस्वश्च दृढाङ्गः सुन्दराननः ॥११॥
शूरो मन्त्री महामानी देवद्विजपरायणः । सेनाधिपो महाप्राज्ञो राजसेवासु तत्परः ॥ १२ ॥
सन्धिविग्रहसंयुक्तो दाता मन्त्री विशालदृक् । पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् ॥१३॥
क्रोधी दुर्व्यसनैर्युक्तः क्वचित्कार्यस्य हानिकृत् । ब्रह्मस्वहरणात्पापात्तथा ब्राह्मणघातनात् ॥१४॥
स्त्रीपुत्रसुखमत्रापि लभते नैव सर्वतः । उदरे वातजैः रोगैः शूलेनापि च संयुतः ॥ १५ ॥
मन्दाग्निर्जायते तस्य जठरे क्रिमिभिः सदा । सदा चिन्तावृतो भूत्वा तथाऽप्राप्तमनोरथः ॥ १६ ॥
रोगक्लेशादिसंयुक्तः शत्रुपीडाभिरन्वितः । लग्नाङ्गात्पञ्चमे भावे जायास्थाने विशेषतः ॥ १७ ॥
क्रूरदृष्टियुतो वापि सौम्यैश्चापि च संयुतः । लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदामि ते ॥ १८ ॥
पलैः पञ्चमितैः कार्यो ब्राह्मणस्तु हिरण्मयः । लक्ष्मीनारायणश्चापि पलत्रयमितः शुभः ॥ १९ ॥
यजेत्तल्लिङ्गकैर्मन्त्रैः षोडशोपचारकैः । गणेशार्कमहेशाग्निभौमाः कार्या हिरण्मयाः ॥ २० ॥

त्रित्रिमापमितैः सम्यक्पूर्ववत्परिपूज्य च । दैवज्ञादिद्विजेभ्यो वै देयाश्च विधिना खग ॥ २१ ॥
चतुर्विंशतिसाहस्रं गायत्रीं विधिना जपेत् । अष्टाक्षरं महामन्त्रं जपेदयुतसंख्यया ॥ २२ ॥
अन्यासां देवतानां च मन्त्रांस्त्रित्रिसहस्रकान् । होमयेत्तद्दशांशेन शक्त्या विप्रांश्च भोजयेत् २३ ॥
ताम्रपात्रं शतपलसंमितं घृतपूरितम् । सुवर्णपञ्चसंयुक्तं दद्याद्विप्राय धीमते ॥ २४ ॥
ब्रह्मस्वहरणात्पापान्मुच्यते नात्र संशयः । नाधयो व्याधयस्तस्य न च शत्रुभयं भवेत् ॥ २५ ॥
न पुत्रमरणं किंचिन्नरोगभयमुल्वणम् । नापमृत्युभयं तस्य स सर्वत्र जयी भवेत् ॥ २६ ॥
एधन्ते सम्पदस्तस्य शतं वर्षाणि जीवति । स सप्तदशकानीह चान्ते सद्गतिमाप्नुयात् ॥ २७ ॥
नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् । न सुखं लभते क्वापि चाधिव्याधिसमन्वितः २८ ॥
रिष्टेनैव मृतिस्तस्य त्रयस्त्रिंशाब्दके ध्रुवम् । जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् ॥ २९ ॥
यद्यदन्तर्गतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ ३० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकसप्तत्युत्तरपंचशताधिकसहस्रतमः ॥ १५७१ ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम् । गौडदेशेऽतिविख्यातो द्विजश्रेष्ठः पुराऽभवत् ॥ १ ॥
धर्मशास्त्रक्रियायुक्तो राजमान्यः प्रतापवान् । धनवाहनभोगाढ्यो ग्रामपो विश्रुतो महान् ॥ २ ॥
सन्धिविग्रहसंयुक्तो दाता भोक्ता प्रियंवदः । दत्तानि तेन दानानि पर्वस्वपि च शक्तितः ॥ ३ ॥
विविधानि च गोदानं ब्राह्मणेभ्योतिशक्तितः । शिवपूजारतश्चैव ह्यतिथीनां च पूजनम् ॥ ४ ॥
कृतवाञ्च्छ्रद्धया युक्तो भक्ष्यभोज्यानि दत्तवान् । यूनि भावे खगश्रेष्ठ पापमुग्रमुपार्जितम् ॥ ५ ॥
राजाज्ञया गतः सूत राज्ञो दायादकं खग । क्षत्रियं हतवान्द्वाभ्यां सहायाभ्यां समन्वितः ॥ ६ ॥
छलेन महताविष्टो भाविनोऽर्थस्य वै बलात् । ततो यमपुरं प्राप्तो भुक्त्वा तु यमशासनम् ॥ ७ ॥
तथा पुण्यात्पुण्यफलं पूर्वपुण्यावशेषतः । जातोऽत्र पर्वते देशे पुण्ये केदारमण्डले ॥ ८ ॥
स रक्तवर्णो मतिमान् राजकार्येषु तत्परः । नात्युच्चो नातिदीर्घश्च नातिस्थूलशरीरवान् ॥ ९ ॥
राजप्रियो महात्यागी महाभोक्ता प्रियंवदः । नैकस्त्रीसंयुतः कामी तथा सर्वजनप्रियः ॥ १० ॥
देशे देशेऽतिविख्यातो बहुग्रामाधिपो महान् । राजकार्योपयुग्विद्याकुशलो धनवान्सुखी ॥ ११ ॥
बहुमित्रजनैर्युक्तो बहुभृत्यसमन्वितः । शत्रुतोऽपि भयाक्रान्तो भ्रातॄणां सुखवर्जितः ॥ १२ ॥
बाल्ये पितृसुखैर्हीनो मध्ये मातृविवर्जितः । हठस्वभावयुङ्नित्यं तथाऽप्राप्तमनोरथः ॥ १३ ॥
ईर्ष्यालू राजघाताच्च पापात्सर्वविदूषकः । जनानामप्रियकरो बहुशत्रुभयान्वितः ॥ १४ ॥
स्वकार्यनिरतो नित्यं परकार्यविनाशकः । बहुपुत्रसुखैर्हीनोऽप्येकपुत्रेण संयुतः ॥ १५ ॥
जन्माङ्गात्पञ्चमे क्रूरग्रहयुक्तोऽत्र जन्मनि । गतागतधनैर्युक्तः शंकामात्सर्यसंयुतः ॥ १६ ॥
लक्षणैरेभिराढ्यस्य प्रायश्चित्तं शृणुष्व वै । पलैरष्टमितैः कार्यो बाहुजस्तु हिरण्मयः ॥ १७ ॥
गन्धपुष्पैः समभ्यर्च्य विधानेन खगाधिप । कर्मप्रकाशिने भक्त्या देयो वै पूजकाय च ॥ १८ ॥
लक्ष्मीनारायणः कार्यः पलत्रयमितः शुभः । तथैवोमामहेशश्च हिरण्येन यथाविधि ॥ १९ ॥
षोडशोपचारैश्च पूजयित्वा विधानतः । माषत्रयमितो वह्निः सूर्यः सौवर्णसंमितः ॥ २० ॥
ब्राह्मणेभ्यो विधिज्ञेभ्यो देयाः श्रद्धाविधानतः । इदं सूक्तं जपेत्पश्चात्सहस्रावृत्तितो भृशम्॥२१॥
गायत्रीं दशसाहस्रीं त्र्यम्बकन्तु तथा जपेत् । उमामहेश्वरादीनां मन्त्रांस्तत्संख्यया जपेत्॥२२॥
होमयेत्तद्दशांशेन तिलैर्दद्याच्च दक्षिणाम् । ब्राह्मणान्भोजयेत्पश्चात्सर्पिष्यात्मानमीक्षयेत् ॥ २३ ॥

एवं कृतविधेः सूत प्रायश्चित्तं यथोदितम् । नाधयो व्याधयस्तस्य न च शत्रुभयं भवेत् ॥ २४ ॥
पुत्रपौत्राभिवृद्धिश्च सम्पदो वृद्धिमाप्नुयुः । नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् ॥ २५ ॥
प्रायश्चित्ते कृते तस्य जीवनं समुदाहृतम् । नवाशीतिमिताब्दान्तमन्ते सद्गतिमाप्नुयात् ॥ २६ ॥
जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् । यद्यदन्तर्गतं तच्च जन्मशास्त्राद्विलोकयेत् ॥ २७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विसप्तत्युत्तरपंचशताधिकसहस्रतमः ॥ १५७२ ॥

श्रीसूर्य उवाच ।

बभूव यामुने देशे पूर्वजन्मनि बाहुजः । राजमान्यः सुखैश्वर्यधनवाहनसंयुतः ॥ १ ॥
सन्धिविग्रहसंयुक्तो दाता भोक्ता प्रियंवदः । दत्तानि तेन दानानि पर्वस्वपि च भक्तितः ॥ २ ॥
वस्त्रान्नशय्यागोभूपासुवर्णानि यथाविधि । कार्तिक्यां पूर्णमास्यां च यमुनायां विशेषतः ॥ ३ ॥
दीपा दत्ताः खगश्रेष्ठ श्रद्धया घृतपूरिताः । अथो भाविबलात्सूत कृतं कर्मातिदारुणम् ॥ ४ ॥
द्विजस्य यज्ञविघ्नं हि कृतवान् दर्पमोहितः । ततो बहुतिथे काले मृतिं प्राप्य यमालये ॥ ५ ॥
पुण्यात्पुण्यफलं भुक्त्वा पापाच्च नरकं तथा । पूर्वपुण्यावशेषेण स जातोऽत्र हिमालये ॥ ६ ॥
गंगायाः पूर्वभागे च पुण्यदेशेऽतिविश्रुते । राज्ञां वंशे खगश्रेष्ठ गौरवर्णः प्रतापवान् ॥ ७ ॥
नात्युच्चो नातिह्रस्वश्च नातिस्थूलो न सूक्ष्मकः । देवद्विजगुरूणाञ्च पितुर्भक्तोऽतिबुद्धिमान् ॥८॥
बहुभृत्यधनैश्वर्यसुखवाहनसंयुतः । देशेदेशेऽधिकाराढ्यः श्रीमान्भोक्ता प्रियंवदः ॥ ९ ॥
सन्धिविग्रहसंयुक्तो बहुविद्यासमाश्रयः । राजप्रियो नीतिविच्च सर्वशत्रुनिबर्हणः ॥ १० ॥
पुत्रमित्रकलत्राद्यैर्युक्तः सर्वजनप्रियः । नैकस्त्रीसंयुतः कामी मातुराज्ञाप्रवर्तकः ॥ ११ ॥
जन्माङ्गात्पञ्चमे द्यूने शुभग्रहविलोकिते । यूकस्थे चन्द्रमसि च पितृस्थाने खगाधिप ॥ १२ ॥
क्रूरावलोकनयुते स जातो मानवोऽत्र च । पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् ॥ १३ ॥
यज्ञविघ्नोत्थपापाद्वै बाल्ये पितृसुखोज्झितः । विक्षिप्तोऽभूत्पिता तस्य यूनि भावे मृतोऽत्र च॥ १४ ॥
पुण्यापवादसंयुक्तस्तथा चिन्तासमन्वितः । शत्रुभीशङ्कया युक्तो गूढचेष्टोऽतिकोपनः ॥ १५ ॥
मानापमानसाम्यश्च चित्तक्लेशैः समन्वितः । चित्तस्थिरत्वरहितो गतागतधनैर्युतः ॥ १६ ॥
लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् । पलैस्त्रिस्त्रिर्मिताः कार्या ब्रह्मविष्णुमहेश्वराः ॥ १७ ॥
यजेत्तल्लिङ्गकैर्मन्त्रैर्गन्धपुष्पोपचारकैः । हिरण्मयविधानेन विधिज्ञेभ्यश्च शक्तितः ॥ १८ ॥
प्रदद्याद्विनतापुत्र पूर्वपापैः प्रमुच्यते । रविर्मासमितो वह्निस्तथा सूर्यश्च वै खग ॥ १९ ॥
हिरण्मयश्च दातव्यस्तदर्द्धमितिकोऽपि वा । तत्तन्मन्त्राञ्जपेद्भक्त्या ह्ययुतस्य च संख्यया ॥ २० ॥
होमयेत्तदशांशेन शक्त्या विप्राँश्च भोजयेत् । सर्पिष्यात्मानमालोक्य भोजयेदिष्टबन्धुभिः ॥२१॥
एवं निष्कृतिमापन्नः सर्वपापापनोदिनीम् । नाधयो व्याधयस्तस्य न च शत्रुभयं क्वचित् ॥२२॥
सर्वे मनोरथाः पूर्णा भविष्यन्तीह जन्मनि । चतुस्त्रिंशन्मिते वर्षे रिष्टं तस्य न जायते ॥ २३ ॥
पञ्चवेदमितेब्दे च रिष्टं नैव खगाधिप । द्विसप्ततिमितायुः स्यादन्ते सद्गतिरिष्यते ॥ २४ ॥
नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् । चतुर्विधं महारिष्टं भविष्यति न संशयः ॥ २५ ॥
उदरे वातशूलेन मृतिस्तस्य भवेद्ध्रुवम् । प्रायश्चित्ते कृते त्वत्र सर्वरोगैः प्रमुच्यते ॥ २६ ॥
जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् । यद्यदन्तर्गतञ्चैव तन्मच्छास्त्राद्विलोकयेत् ॥ २७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिसप्तत्युत्तरपंचशताधिकसहस्रतमः ॥ १५७३ ॥

श्रीसूर्य उवाच।

बभूव प्राग्भवे सूत देशे गौडाभिधे खग। वाहुजो धर्मकर्माढ्यो बहुद्रव्यसमन्वितः ॥ १ ॥
दत्तानि तेन दानानि ब्राह्मणेभ्योऽतिशक्तितः। स्वर्णभूषणवस्त्रान्नगवादीनि प्रयत्नतः ॥ २ ॥
अथो भाविबलात्सूत ब्राह्मणेन तपस्विना। स्थापितं तद्गृहे द्रव्यं घटस्थं विनतात्मज ॥ ३ ॥
व्यतीते बहुकाले तु ब्राह्मणेन महात्मना। याचितं तद्धनं तेन न दत्तं लोभमोहतः ॥ ४ ॥
तदा तेन महाक्रोधाच्छापो दत्तः सुदारुणः। जन्मजन्मनि ते पाप वंशहानिर्भविष्यति ॥ ५ ॥
ततोऽसौ मृतिमापन्नो ब्राह्मणो विनातात्मज। वाहुजोऽपि मृतस्तत्र कुष्ठेन च दिनान्तरे ॥ ६ ॥
यमलोकं समासाद्य भुक्त्वा पापफलं तथा। पुण्यात्पुण्यफलं भुक्त्वा पूर्वपुण्यावशेषतः ॥ ७ ॥
हिमालये पुण्यदेशे जातः केदारमण्डले। वाहुजो राजसम्मानी किंचिद्वित्तसमन्वितः ॥ ८ ॥
नात्युच्चो नातिदीर्घश्च कृशाङ्गो रक्तपाण्डुरः। जनप्रियोऽतिमतिमान्सन्धिविग्रहसंयुतः ॥ ९ ॥
पुत्रभ्रातृसुखैर्युक्तो मितदो दीर्घदर्शनः। पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् ॥ १० ॥
मनोदुःखैः समायुक्तो दीर्घमात्सर्यसंयुतः। गतागतधनैर्युक्तस्तथा प्राप्तमनोरथः ॥ ११ ॥
बाल्ये सुखसमायुक्तो युवभावेऽतिक्लेशभाक्। वार्धके सुखसंयुक्तो मध्ये मध्यसुखान्वितः ॥ १२ ॥
ब्रह्मस्वहरणात्पापस्तच्छापात्तन्मृतेरपि। अपुत्रः पुत्रदुःखार्तो मृतभार्यः कदाचन ॥ १३ ॥
जन्माङ्गात्पञ्चमे भावे द्यूने भाग्ये खगाधिप। क्रूरग्रहेण संयुक्तदृष्टो पुण्यस्थिते विधौ ॥ १४ ॥
जातोऽत्यन्तारिपुक्लेशोदरवातसमन्वितः। लक्षणैरेभिराढ्यस्य प्रायश्चित्तं शृणुष्व तत् ॥ १५ ॥
पलमात्रेण कर्तव्यो ब्राह्मणस्तु हिरण्मयः। गन्धपुष्पोपहारैश्च पूज्यो वै भक्तिभावतः ॥ १६ ॥
कर्मप्रकाशिने सूत देयोऽभ्यर्च्य विधानतः। घृतपूर्णं घटं ताम्रमयं पलशतात्मकम् ॥ १७ ॥
पलमात्रसुवर्णेन युक्तं पूजासमन्वितम्। दद्याद्विदुषे सूत पूर्वपापापनुत्तये ॥ १८ ॥
गायत्रीमष्टसाहस्रं त्र्यम्बकन्तु तथा जपेत्। तथा वै ब्रह्मजज्ञानं जपेन्नियमपूर्वकम् ॥ १९ ॥
होमयेत्तद्दशांशेन तिलैराज्यपरिप्लुतैः। ब्राह्मणान्भोजयेत्तत्र शुभान्वेदविदस्तथा ॥ २० ॥
पार्थिवान्पूजयेल्लक्षमहादेवान्प्रयत्नतः। तद्दशांशेन होतव्यं तद्दशांशेन वै द्विजान् ॥ २१ ॥
भोजयेद्विधिवद्भक्त्या दद्याच्च बहुदक्षिणाम्। महिने तु व्रतं कुर्यान्मद्भक्तो मत्परायणः ॥ २२ ॥
सर्पिष्पात्मानमालोक्य भोजयेदिष्टबन्धुभिः। एवं कृतविधेः सूत पूर्वजन्माघनाशनम् ॥ २३ ॥
न तस्य प्राप्तदोषोऽपि न चारिष्टभयं क्वचित्। नाधयो व्याधयस्तस्य न वा शत्रुभयं भवेत्॥२४॥
न दारिद्र्यभयं किञ्चिन्न वातजभयं तथा। पुत्रपौत्राभिवृद्धिश्च जायते सम्पदेधते ॥ २५ ॥
स्त्रीसुखञ्च तथाप्नोति जन्मन्यत्रैव चाण्डज। आयुरारोग्यमैश्वर्यमित्रबन्धुसमाकुलम् ॥ २६ ॥
दासदासीपशुबहुघोटकैर्धान्यगोधनैः। महिषीछागवर्गैश्च सौभाग्यैरपि संकुलम् ॥ २७ ॥
जायते तद्गृहं रम्यं स भवेद्राजवल्लभः। सुपुत्रबन्धुमान्सोऽपि कीर्तिमाप्नायतेऽचिरात् ॥ २८ ॥
नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम्। न पुत्रसुखमत्रैव लभते विनतासुत ॥ २९ ॥
पञ्चाशद्वर्षके रिष्टं स प्राप्नोति चतुर्विधम्। प्रायश्चित्ते कृते त्वायुः कुसप्ततिमिताब्दके ॥ ३० ॥
जन्मादिमरणान्तं च स्वल्पमेवात्र सूचितम्। यद्यदन्तर्गतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ ३१ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः चतुःसप्तत्युत्तरपंचशताधिकसहस्रतमः ॥ १९७४ ॥

श्रीसूर्य उवाच ।

सतीं स्वभार्यां परमां साध्वीं सन्त्यज्य दुर्मतिः । प्रमादात्प्राग्भवे गच्छेदन्यस्त्रीं काममोहितः॥१॥
सोऽत्र जन्मनि भोः सूत ग्रहणीरोगसंयुतः । जायते म्रियतेऽवश्यं ब्राह्मणीगमनादिह ॥ २ ॥
तदस्य पापशमनं मया नोक्तं खगाधिप । तस्मिन्वयसि तद्दिष्टं भविष्यति न संशयः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चसप्तत्युत्तरपंचशताधिकसहस्रतमः ॥ १५७५ ॥

श्रीसूर्य उवाच ।

या काचिद्वनिता सूत प्राग्भवे कांस्यहारिणी । सेह जन्मनि पक्षीन्द्र शीर्षरोगप्रपीडिता ॥ १ ॥
दद्यात्पलशतं सूत ब्राह्मणाय कुटुम्बिने । तत्काले शीर्षजाद्रोगान्मुच्यते नात्र संशयः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्सप्तत्युत्तरपञ्चशताधिकसहस्रतमः ॥ १५७६ ॥

श्रीसूर्य उवाच ।

या नारी ह्यवधीत्पूर्वं मोहादण्डं खगाधिप । सेह जन्मनि पक्षीन्द्र जायते विकृतस्वरा ॥ १ ॥
सरस्वत्याश्च प्रतिमां सौवर्णीं राजतीं तथा । दद्याद्वेदविधिज्ञाय तदा स्यात्सुस्वराण्डज ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तसप्तत्युत्तरपंचशताधिकसहस्रतमः ॥ १५७७ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि यः कश्चिन्मोहात्परधृतं हरेत् । नेत्ररोगयुतः सोऽपि जायतेऽत्रैव जन्मनि ॥ १ ॥
घृतधेनुप्रदानाच्च विधिना वेदपारगे । मुच्यते नेत्ररोगाच्च जन्मन्यत्र खगाधिप ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टसप्तत्युत्तरपञ्चशताधिकसहस्रतमः ॥ १५७८ ॥

श्रीसूर्य उवाच ।

स्वकं पतिं परित्यज्य या गच्छेत्पूर्वजन्मनि । परपुंसि महाभाग ग्रहणीरुग्युतात्र सा ॥ १ ॥
प्रायश्चित्तं परं तस्या व्रतं चान्द्रायणं त्विह । वैशाखे माघमासे वा तस्मात्पापात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनाशीत्युत्तरपंचशताधिकसहस्रतमः ॥ १५७९ ॥

अरुण उवाच ।

विप्रवंशे समुत्पन्नो वातरक्ताक्षदर्शनः । उदरे वातजान्रोगान्किञ्चिच्छस्त्रोपवातनम् ॥ १ ॥
किञ्चिक्रोधश्च लोभश्च किञ्चिद्वित्तसमन्वितः । तस्य प्रिया सदाचारा पतिभक्तिपरायणा ॥ २ ॥
एकापत्यं भवेत्तस्य जायते मृतपुत्रकः । आदिपुत्रो मृतश्चास्यापत्यं भूयो न जायते ॥ ३ ॥
केन कर्मविपाकेन सत्यं कथय भास्कर ॥ ४ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि मेधाविञ्शूद्रवंशसमुद्भवः । व्यापारकृषिवाणिज्यं ब्रह्मवित्तेन स व्यधात् ॥ ५ ॥
व्यवहारादिना तद्वै ह्यवर्धयदतन्द्रितः । कालेनैव मृतो विप्रो धनं शूद्रेण वञ्चितम् ॥ ६ ॥
नार्पितं ब्रह्मपुत्राय ब्रह्मस्वं च गृहे स्थितम् । ब्रह्मस्वं भक्षितं तेन बहुकालं खगेश्वर ॥ ७ ॥
पश्चान्मृत्युवशं प्राप्तो नरके रौरवे गतः । ब्रह्मस्वभक्षणात्सूत वर्षाणां च सहस्रकम् ॥ ८ ॥
पतितो नरके घोरे यातना बहु भुक्तवान् ॥ ९ ॥
पश्चान्मानुष्यमापन्नो ब्रह्मद्रव्यप्रभावतः । इदं तृतीयं वै जन्म ब्रह्मवंशसमुद्भवम् ॥ १० ॥

निक्षेपहरणाद्वापि मृतपुत्रः प्रजायते । ब्राह्मणस्य विशेषेण ब्रह्मस्वं विषतोऽधिकम् ॥ ११ ॥
ऋणं प्रसह्य वै भुक्तमपि कल्पशताधिकम् । नरके पातयत्येव ब्राह्मणस्य विशेषतः ॥ १२ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं देव येन पुत्रः प्रजायते । नारीणाञ्च नराणाञ्च निष्कृतिं सौख्यहेतवे ॥ १३ ॥

श्रीसूर्य उवाच ।

महापापहरो देवः स वै कामहरः प्रभुः । पूजनीयो महारुद्रः सन्ततिश्रेय इच्छता ॥ १४ ॥
यजुर्वेदमयं देवं यजुर्भिः शतरुद्रजैः । यजन्वै मुच्यते शीघ्रं पापादाकल्पसम्भवात् ॥ १५ ॥
रुद्रैकादशनीभिस्तु रुद्रैकादशकेन वा । जप्तेन तोषयेदेनं रुद्रमेकादशात्मकम् ॥ १६ ॥
तदंशांशेन होतव्यं द्रव्यं श्रद्धासमन्वितम् । विधिवज्जुहुयाद्वह्नौ तिलैस्त्रिमधुराप्लुतैः ॥ १७ ॥
हरितालिपलाशाश्वत्थसमिधो हवै हुनेत् । प्रतिरुद्रं प्रदातव्यं गोयुग्मं रसनान्वितम् ॥ १८ ॥
केयूरकुण्डलाकल्पा मन्त्रपुस्तकमण्डलुः । प्रतिरुद्रं शतं विप्रान्भोजयेत्सुसमाहितः ॥ १९ ॥
निष्कं दद्यात्सुवर्णस्य दद्याद्वा मुख्यदक्षिणाम् । एवं रुद्रविधिं कृत्वा त्रिविधं नाशयेदघम् ॥२०॥
इतिहासपुराणोक्तसूक्तानि विविधानि च । शृणुयाद्विधिवत्ताक्ष्यं सभार्यः प्रीतिमावहन् ॥ २१ ॥
देवर्षिपितृमर्त्यानामृषीणाञ्च महीक्षिताम् । देवदानवगन्धर्वपिशाचोरगरक्षसाम् ॥ २२ ॥
सर्वेषां जीवजातीनामुत्पत्तिं शृणुयादपि । ऋषीणामृषिपत्नीनां वंशान्सर्वानुदीरितान् ॥ २३ ॥
एवं स त्रिविधात्पापान्मुच्यतेऽपत्यदुःखदात् । गुरून्देवान्द्विजान्सम्यक्श्रद्धया समुपाचरेत् ॥२४॥
एवं कृतविधिः सूत हरिवंशश्रुतार्थवान् । वाचकोपरि सन्तुष्टो भूमिद्रविणवासकैः ॥ २५ ॥
मुद्राकर्णीकृतवरां गां दत्त्वा च पयस्विनीम् । भूमिद्रविणवासाद्यैस्तोषयेदन्यब्राह्मणान् ॥ २६ ॥
निष्कृतिं चैव कृत्वा तु सर्पिष्यात्मानमीक्षयेत् । ऐहिकं लक्षणं तस्य शरीरे चोपजायते ॥ २७ ॥
जन्मक्रमेण जायन्ते दुःखान्यकृतनिष्कृतेः । दुष्टरुक्चानपत्यश्च प्रमेहार्तोऽप्यकिञ्चनः ॥ २८ ॥
कुनखी दद्रुलः पाण्डुरोगी जन्मक्रमाद्भवेत् । जलाग्निभीतिश्चोराच्च राज्ञो वित्तव्ययाधिकम् ॥२९॥
लकुटग्रावशस्त्राद्यैर्जायंते व्रणजार्तयः ॥ ३० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽशीत्युत्तरपंचशताधिकसहस्रतमः ॥ १९८० ॥

श्रीसूर्य उवाच ।

अथ पूर्वदिने सूत प्राप्य भूमिं श्मशानजाम् । मृतप्रेतं समालोक्य रात्रौ गत्वा ह्यतन्द्रितः ॥१॥
पूजयित्वा चितां तस्य वलिमष्टविधं सृजेत् । स्नानं कृत्वा मृदालम्भैर्यन्त्रैर्लक्षोद्भवैस्तथा ॥ २ ॥
शताच्छिद्रघटं प्राप्य नानातीर्थोद्भवैर्जलैः । दीपमालादिनेवापि प्रयोगं विधिनाचरेत् ॥ ३ ॥
हरिवंशं ततः पश्चाच्छृणुयाद्विधिपूर्वकम् । दद्याद्विजेभ्यो विधिना नानाभक्ष्यफलानि च ॥ ४ ॥
स्वेच्छया भोजनं तेभ्यो दद्याद्दोषापनुत्तये । प्रयोगेऽनेन नार्यत्र वन्ध्या याति सपुत्रताम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकाशीत्युत्तरपंचशताधिकसहस्रतमः ॥ १९८१ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यसौ वैश्यो ह्यत्र जन्मनि बाहुजः । देवद्रव्यापहरणात्प्रागत्राक्षिप्रपीडनम् ॥ १ ॥
विंशद्वर्षे व्यतीते तु नेत्रभङ्गः प्रजायते । तद्रक्षार्थमहं वक्ष्ये दानं पापहरं परम् ॥ २ ॥
कृत्वा देवगृहं रम्यं प्रतिष्ठाप्य सुराधिपम् । गन्धैः पुष्पैः समभ्यर्च्य दीपा देयाः सुवर्णजाः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्यशीत्युत्तरपंचशताधिकसहस्रतमः ॥ १९८२ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यसौ शूद्रश्चक्रे मुष्कनिकृन्तनम् । वृषभस्य महाभाग स्वार्थसाधनतत्परः ॥ १ ॥
तेन कर्मार्जितेनात्र षंढश्चैवापवर्णजः । गवां पालनजात्पुण्यात्प्रागत्र सुखसंयुतः ॥ २ ॥
गोपीडनान्महापापात्तस्य नैवात्र निष्कृतिः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्यशीत्युत्तरपंचशताधिकसहस्रतमः ॥ १५८३ ॥

श्रीसूर्य उवाच ।

या काचिद्योषित्पूर्वं वै मोहात्परघृतं हरेत् । सात्र जन्मनि रोगेण नेत्रोत्थेन प्रपीडचते ॥ १ ॥
कुरुक्षेत्रादितीर्थेषु घृतधेनुप्रदानतः । मुच्यते सा महारोगान्नेत्रजान्नात्र संशयः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरशीत्युत्तरपंचशताधिकसहस्रतमः ॥ १५८४ ॥

श्रीसूर्य उवाच ।

महिषीमवधीत्पूर्वे भवे यो वै नराधिपः । सोऽत्र जन्मनि पक्षीन्द्र कृष्णगुल्मयुतो भवेत् ॥ १ ॥
स्वर्णशृङ्गीं रौप्यखुरां घंटाभरणभूषिताम् । सूक्ष्मकम्बलयुक्ताश्च दद्याद्वेदविदे सुत ॥ २ ॥
कृष्णगुल्मोद्भवां पीडां नरश्चात्र न पश्यति ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाशीत्युत्तरपंचशताधिकसहस्रतमः ॥ १५८५ ॥

श्रीसूर्य उवाच ।

प्राग्भवे याभवत्काचित्स्वर्णकारी खगाधिप । स्वधर्मनिरता सर्वदानधर्मपरायणा ॥ १ ॥
तद्गृहे धान्यराशिं तु चरन्ती गौः समागता । ताडिता कुक्षिभागे तु लगुडेन भृशं सुत ॥ २ ॥
तत्ताडनान्महादुःखं प्राप्ता गर्भातिभारतः । मृता च तेन दुःखेन गर्भपातसमन्विता ॥ ३ ॥
तेन कर्मविपाकेन सम्प्राप्योचितशासनम् । पुनः शूद्राभवच्चैव गौरवर्णा शुभानना ॥ ४ ॥
धनभृत्याश्वभोगाद्यैर्नानाविभवसंयुता । पुत्रसन्ततिहीना सा प्राग्गोघातादिपापतः ॥ ५ ॥
प्रायश्चितं प्रवक्ष्यामि सर्वपापविनाशनम् । कुर्याद्वापीमरण्ये तु देशे लोकाकुले तथा ॥ ६ ॥
मार्गे तु धर्मतो यत्नात्प्रतिष्ठां कारयेद्बुधः । संस्थाप्य च शिवां तत्र विधिना विनतासुत ॥ ७ ॥
होमयेच्च ततस्तत्र तिलानाज्ययुतानिह । भोजयेद्ब्राह्मणान्भक्त्या शिवपूजनतत्परान् ॥ ८ ॥
दद्यात्तथैव कपिलां सर्वपापप्रणाशिनीम् । प्रायश्चित्तमिदं सूत पूर्वजन्माघनाशनम् ॥ ९ ॥
नैवं या कुरुते श्रुत्वा तस्याः सन्ततिवर्जनम् ॥ १० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडशीत्युत्तरपंचशताधिकसहस्रतमः ॥ १५८६ ॥

श्रीसूर्य उवाच ।

यः कश्चित्प्राग्भवे सूत दुग्धं हरति मानवः । तत्काले पापवशतो बहुमूत्री प्रजायते ॥ १ ॥
दुग्धधेनुप्रदानाच्च विधिना त्वत्र जन्मनि । बहुमूत्रान्महारोगान्मुच्यते गरुडाग्रज ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्ताशीत्युत्तरपंचशताधिकसहस्रतमः ॥ १५८७ ॥

श्रीसूर्य उवाच ।

दुग्धं हरति या नारी कथञ्चित्पापमोहिता । पूर्वजन्मनि सात्रैव बहुमूत्ररुजाकुला ॥ १ ॥

दुग्धधेनुः प्रदातव्या वेदवेदाङ्गपारगे । विधिना काश्यपेयात्र न पश्येद्भ्रूमूत्रताम् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाशीत्युत्तरपंचशताधिकसहस्रतमः ॥ १९८८ ॥

श्रीसूर्य उवाच ।

यो मोहाद्घातयेत्सूत महिषीं नवयौवनाम् । प्राग्भवे नियतं सूत कृष्णगुल्मैः स बाध्यते ॥ १ ॥
स नरो रत्नदानेन विधिना गरुडाग्रज । नाशयेत्कृष्णगुल्मोत्थां पीडामत्रैव जन्मनि ॥ २ ॥
अथवा महिषीदानाद्विप्राय विधिनाण्डज । महिषीपापजाद्रोगात्सुखी भवति मानवः ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोननवत्युत्तरपंचशताधिकसहस्रतमः ॥ १९८९ ॥

श्रीसूर्य उवाच ।

यः कुर्यात्पापलोभेन पूर्वं मुष्कनिकृंतनम् । ब्रह्मपुत्रस्य पण्ढः स्यादत्र जन्मनि निश्चयात् ॥ १ ॥
ज्ञानाज्ञानकृते वापि निष्कृतिर्नात्र विद्यते । ब्रह्मघातान्महापापात्पढः स्याद्भुजन्मनि ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवत्युत्तरपंचशताधिकसहस्रतमः ॥ १९९० ॥

श्रीसूर्य उवाच ।

बभूव फलहृत्काचित्प्रमादाद्विनतासुत । पूर्वजन्मनि पुण्यापि बहुदानरता सती ॥ १ ॥
इह सा क्षत्रिया जाता प्रागपि क्षत्रियाण्डज । इह पुत्रविहीना सा फलहृत्पापजाद्दृढात् ॥ २ ॥
फलानां बहुदानाच्च चातुर्मास्येऽत्र नित्यशः । भोजनन्तु तदा पश्चात्कारयेत्स्वेच्छया द्विजान्॥३॥
प्रायश्चित्तं परं तस्मात्फलहृत्पापनाशनम् । अमायां नारिकेलानि देयानि खलु शक्तितः ॥ ४ ॥
एवं हि सुतवृद्धिः स्याज्जीवनं चाब्दसप्ततिम् ॥ ५ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकनवत्युत्तरपंचशताधिकसहस्रतमः ॥ १९९१ ॥

श्रीसूर्य उवाच ।

दधिहारी पुमान्पूर्वं जन्मन्यत्र खगेश्वर । जायते मेदसा युक्तस्तदुःखेन प्रपीडितः ॥ १ ॥
कार्तिक्यामथ वैशाख्यां दधिधेनुप्रदानतः । तस्माद्रोगाद्विमुच्येत तत्काले गरुडाग्रज ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विनवत्युत्तरपंचशताधिकसहस्रतमः ॥ १९९२ ॥

श्रीसूर्य उवाच ।

महिषीं घातयेन्नारी प्राग्भवे विनतासुत । अत्र जन्मनि पक्षीन्द्र कृष्णगुल्मेन पीडयते ॥ १ ॥
दद्यात्साभरणां सूत महिषीं यमदैवताम् । युगकम्बलसंच्छन्नां विधिनाः नवयौवनाम् ॥ २ ॥
सा मुच्यते महापापान्महिषीवधजात्सुत । दानेन तेन वै सूत कृष्णगुल्मं न पश्यति ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिनवत्युत्तरपंचशताधिकसहस्रतमः ॥ १९९३ ॥

श्रीसूर्य उवाच ।

वेधात्प्राग्वृषभानां च नासाग्रस्य खगाधिप । नासाछेदोऽत्र तस्यास्ति यूनि भावे विनिश्चयात्॥१॥
नास्ति तन्निष्कृतिः क्वापि दत्तैर्दानशतैरपि ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्नवत्युत्तरपंचशताधिकसहस्रतमः ॥ १९९४ ॥

श्रीसूर्य उवाच ।

कश्चिदासीन्महाभागश्चारणोऽतिप्रियंवदः । कवित्वशक्तिनिरतो बहुचारणसंयुतः ॥ १ ॥
प्रेरितो दैवयोगेन गतो राजाश्रयं प्रति । तत्र वै निरतः सोथ चिरकालमुपस्थितः ॥ २ ॥
अथ तत्र महावादे कवीनां हि खगेश्वर । महाघोरमभूद्युद्धं राजद्वारे भयप्रदम् ॥ ३ ॥
स चारणो महाक्रोधात्कृतवानात्मघातनम् । परपक्षे कृते सूत स्वशरीरमथात्यजत् ॥ ४ ॥
तेन कर्मविपाकेन महाचौर्येण चाण्डज । भुक्त्वा स्वर्गफलं पुण्यादात्मघातात्परिच्युतः ॥ ५ ॥
महाभूमिभुजां वंशे म्लेच्छानां चाजनि स्वयम् । सिन्धोः पश्चिमभागेऽत्र शतयोजनसम्मिते॥६॥
देशे कर्कटगे जीवे लग्नस्थे चन्द्रसंयुते । गौराङ्गः पृथुलो धूर्तः सर्वविद्याविशारदः ॥ ७ ॥
सुखैश्वर्यसमाक्रान्तो धनवाहनभोगभाक् । शूरः सुविद्योऽतिक्रूरो बहुपालनतत्परः ॥ ८ ॥
पापाल्लोभरतः क्रोधी नानाभैरवशासनः । रिष्टं षष्टिमिते पञ्चहीने वर्षे खगाधिप ॥ ९ ॥
महाकालनराद्दानात्सुवर्णस्य खगाधिप । सर्ववित्तषडंशेन महारिष्टहरं परम् ॥ १० ॥
पञ्चाशीतिमितायुः स्याद्दत्ते कालनरेण्डज । प्रायश्चित्तेऽकृते त्वत्र रिष्टं स्यात्प्रोक्तवत्सरे ॥ ११ ॥
कालशेषेण रिष्टेन तत्क्षणं मरणं स्मृतम् । महाघोराहवे सूत चात्मघातादिदं फलम् ॥ १२ ॥
चिह्नं तत्र प्रवक्ष्यामि ह्यात्मघातसमुद्भवम् । हृदि स्थलं शुभं पुत्र षडंगुलमितं शुभम् ॥ १३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचनवत्युत्तरपंचशताधिकसहस्रतमः ॥ १५९५ ॥

श्रीसूर्य उवाच ।

दधिप्रहरणान्नारी प्राग्भवे त्वत्र जन्मनि । मेदसा पीड्यते सा तु विनतानन्दवर्धन ॥ १ ॥
दधिधेनुप्रदानाच्च ब्राह्मणाय कुटुम्बिने । मुच्यतेऽत्र महारोगान्नात्र कार्या विचारणा ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षण्णवत्युत्तरपंचशताधिकसहस्रतमः ॥ १५९६ ॥

श्रीसूर्य उवाच ।

तरक्षौ निहतेः पूर्वभवे च गरुडाग्रज । अत्र जन्मनि नेत्रेषु कातरत्वं प्रजायते ॥ १ ॥
रत्नधेनुमहादानाद्विधिना ब्राह्मणाय च । न पश्यत्यक्षिजं रोगं कातरत्वं हि काश्यप ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तनवत्युत्तरपंचशताधिकसहस्रतमः ॥ १५९७ ॥

श्रीसूर्य उवाच ।

प्राग्भवे सुमुखी काचिद्गता देवालयेऽण्डज । दीपा धातुमयास्तत्र चान्यदत्ता हृतास्तया ॥ १ ॥
सा तद्दानान्महाभाग धनपुत्रसमन्विता । चन्द्रग्रहे महादानात्प्राक्कृतात्तु खगाधिप ॥ २ ॥
तेन कर्मफलेनात्र चक्षुःपीडातिदारुणा । त्रिदोषैर्दूषिता चात्र युवभावे खगेश्वर ॥ ३ ॥
प्रायश्चित्तं प्रवक्ष्यामि दीपहृत्पापशोधनम् । दीपा देया घृतेनात्र पूजयित्वा सुवर्णजाः ॥ ४ ॥
द्विसुवर्णमिता भव्याः सम्पूज्याथ महेश्वरम् । गन्धपुष्पैस्तथा दीपैर्भक्ष्यैर्भोज्यैः प्रयत्नतः ॥ ५ ॥
दद्याद्द्विजेभ्यो बहुशस्तस्मात्पापात्प्रमुच्यते ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टनवत्युत्तरपंचशताधिकसहस्रतमः ॥ १५९८ ॥

श्रीसूर्य उवाच ।

दुष्टगन्धियुतः सूत जायते सोऽत्र जन्मनि । मधुहारी च यः पूर्वं प्रायश्चित्तं परं शृणु ॥ १ ॥

मधुधेनुप्रदानाद्वै ब्राह्मणाय खगाधिप। दुष्टगन्धिकृताद्दोषान्मुच्यते नात्र संशयः ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवनवत्तरपंचशताधिकसहस्रतमः ॥ १९९९ ॥

श्रीसूर्य उवाच।

तरक्षुं घातयेत्पूर्वं या नारी गरुडाग्रज। कांतरक्षी प्रजायेत चक्षूरोगात् खगाधिप ॥ १ ॥
धेनुं रत्नमयीं दद्यात्सुवर्णां विधानतः। न पश्यत्यक्षिरोगं सा तद्दत्तेन महाद्भुतम् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्शताधिकसहस्रतमः ॥ १६०० ॥

श्रीसूर्य उवाच।

यः प्राग्जन्मन्यभूत्काश्चिन्नरो गजक्रियान्वितः। नानावाहनभोगाढ्यो दानात्सर्वमिदं सुत ॥ १ ॥
सप्तजन्मन्यसौ षण्ढो भविष्यति खगेश्वर ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोत्तरषट्शताधिकसहस्रतमः ॥ १६०१ ॥

अरुण उवाच।

क्षात्रे कुले समुत्पन्नः शौर्यौदार्ययशोधनी। राजमानविरोधी च नानासौख्यरतः सदा ॥ १ ॥
किंचिद्घातादिना पीडा जायते तस्य चोदरे। वातरक्तादि शिरसि जायते पक्षसंख्यया ॥ २ ॥
तस्य भार्या शुभाचारा सुरूपा गुणशालिनी। प्रियभक्तिरता नित्यं दानदाक्षिण्यवर्तिनी ॥ ३ ॥
एकपुत्रप्रसूतिश्चाप्यन्यपुत्रमुपागता। पश्चात्पुष्पं गतं शान्तिमपत्यं नैव जायते ॥ ४ ॥
केन कर्मविपाकेन पापं शाम्यति तत्स्त्रियाः। विधानं च हितार्थाय सत्यं ब्रूहि दिवाकर ॥ ५ ॥

श्रीसूर्य उवाच।

पूर्वं वर्णोत्तरे जातो धनुःकांस्यादिकारकः। ब्राह्मणो मित्रतां यातो बहुद्रव्यसमाकुलः ॥ ६ ॥
क्रयविक्रयकर्ता स विप्रद्रव्येण वर्धितः। कालेन महता वत्स स विप्रो निधनं गतः ॥ ७ ॥
भुक्तं सर्वं धनं तेन न तु किञ्चित्समर्पितम्। ब्रह्मस्वं भक्षितं तेन वंशवृद्धिविनाशनम् ॥ ८ ॥
तेन कर्मविपाकेन नानासन्ततिनाशनम्। ये चैतस्य मृताः पुत्राः स जातो ब्राह्मणः स्वयम् ॥९॥
इदं चतुर्थं वै जन्म ब्रह्मवंशसमुद्भवम्। भार्या दुःखकरी ह्येवं पुत्रहीना खगाधिप ॥ १० ॥

अरुण उवाच।

प्रायश्चित्तं कथन्देव येन पापक्षयो भवेत्। निष्कृतिं ब्रूहि देवेश सन्ततेः सौख्यहेतवे ॥ ११ ॥

श्रीसूर्य उवाच।

ब्रह्मस्वं विषतुल्यं हि पुत्रपौत्रादिनाशनम्। विषेणैकोऽपि म्रियते ब्रह्मस्वं कुलभक्षकम् ॥ १२ ॥
तस्य सन्तिवृद्ध्यर्थं कारयेन्निष्कृतिं शुभाम्। सुशुभे भूप्रदेशे तु गोमयेनोपलेपयेत् ॥ १३ ॥
कुर्यादष्टदलं पद्मं राजतं शुक्लतण्डुलैः। तन्मध्ये स्थापयेत्कुम्भमव्रणं शुभलक्षणम् ॥ १४ ॥
सुशीतसलिलैः पूर्णं सरत्नौषधिपल्लवम्। नानाफलाक्षतोपेतं पूर्णपात्रोपशोभितम् ॥ १५ ॥
तस्योपरि न्यसेत्पात्रं वैणवं वर्तुलाकृति। सप्तधान्यफलोपेतं वस्त्रस्रक्चन्दनान्वितम् ॥ १६ ॥
तन्मध्ये स्थापयेद्रुद्रमूर्तिं निष्कद्वयात्मिकाम्। सुवर्णस्य विशुद्धाश्च दद्याद्वै वेदवादिने ॥ १७ ॥
प्रतिष्ठां पूजनं कृत्वा ततो गां वै सवत्सकाम्। शतमष्टोत्तरं विप्रान्द्रोणाः सप्तैव निर्मिताः ॥ १८ ॥
जातीपुष्पैः शुभैश्चैव लक्षपूजां शिवोपरि। सङ्कृष्टान्मोचयेद्धेनुं दम्पती परिधापयेत् ॥ १९ ॥
एवंकृतविधेः सूत निश्चला सन्ततिर्भवेत् ॥ २० ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्युत्तरषट्शताधिकसहस्रतमः ॥ १६०२ ॥

श्रीसूर्य उवाच ।

या काचिद्वनिता मोहात्प्राग्भवे माक्षिकं हरेत् । सात्र जन्मनि पक्षीन्द्र दुर्गन्धाढ्या प्रजायते ॥१॥
मधुधेनुप्रदानात्तु व्यतीपातादिपर्वसु । दुर्गन्धरोगात्सततं मुच्यतेऽत्र खगाधिप ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्युत्तरषट्शताधिकसहस्रतमः ॥ १६०३ ॥

श्रीसूर्य उवाच ।

षण्ढस्तु राजसन्मानी चेह जन्मनि चाण्डज । महादुष्टक्षयान्मुक्तो वधबन्धनतत्परः ॥ १ ॥
प्राक्कृतात्तु महादानात्सुखैश्वर्यधनान्वितः । महामानी महाधूर्तः षण्ढोऽगम्यातिसेवनात् ॥ २ ॥
नात्र जन्मनि भोः सूत प्रायश्चित्तं मयोदितम् । अगम्यागमनं पापं प्रायश्चित्तविवर्जितम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरुत्तरषट्शताधिकसहस्रतमः ॥ १६०४ ॥

श्रीसूर्य उवाच ।

ब्रह्मघ्नी सा मया प्रोक्ता या पूर्वं घातयेद्विजम् । सर्वं विचेष्टितं यस्माच्छृणु चात्र खगाधिप ॥१॥
अनया द्रव्यलोभेन सपत्न्या घातितः सुतः । प्राग्भवे विषदानेन कुमारो दोषवर्जितः ॥ २ ॥
तस्याः क्षिप्रं महादुष्टा वाल्ये कुष्ठान्विता सुत । अचिराज्जायते खर्जूः पितृगेहे स्थिताण्डज ॥३॥
महादोषवती पापाज्जातात्र यवनी खशे । भविष्यति महारिष्टमग्निदाहेन चाण्डज ॥ ४ ॥
चतुर्विंशन्मिते वर्षे मरणं कीर्तितं ध्रुवम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चोत्तरषट्शताधिकसहस्रतमः ॥ १६०५ ॥

श्रीसूर्य उवाच ।

वराहं यो नरो हन्यात्प्राग्भवे विनतासुत । जायते दन्तुरः सोऽपि काले तत्पापचिह्नितः ॥ १ ॥
धृतकुम्भं यथाशक्ति दद्याद्विप्राय धीमते । सुवर्णसहितं तेन तस्मात्पापात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडुत्तरषट्शताधिकसहस्रतमः ॥ १६०६ ॥

श्रीसूर्य उवाच ।

यो हरेत्प्राग्भवे सूत गुडं मोहान्नराधमः । गुल्मोदरेण रोगेण सोऽत्र जन्मनि पीड्यते ॥ १ ॥
गुडधेनुप्रदानाच्च ब्राह्मणाय च धीमते । गुल्मोदरसमुद्भूता पीडा नश्यति तत्क्षणात् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तोत्तरषट्शताधिकसहस्रतमः ॥ १६०७ ॥

श्रीसूर्य उवाच ।

अथो काचित् सती नारी कर्मिष्ठा प्रियवादिनी । स्वामिना प्रेरिता पूर्वं शत्रोर्दग्धं तया गृहम् १॥
तद्दाहाच्च महाभाग दग्धं सर्वं पुरं तदा । मृता सा यमराजस्य नियोगान्नरकं गता ॥ २ ॥
भुक्त्वा फलानि वै तत्र पुण्यपापोद्भवानि हि । सा शूद्री यमुनातीरे जाताऽत्र पतिसेवया ॥ ३ ॥
कुष्ठरोगयुता वाल्ये निष्कृतिं पापनाशिनीम् । वक्ष्यामि वृषभं दद्यात्सर्वोपस्करसंयुतम् ॥ ४ ॥
कुष्ठरोगात्प्रमुच्येत नात्र कार्या विचारणा ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टोत्तरषट्शताधिकसहस्रतमः ॥ १६०८ ॥

श्रीसूर्य उवाच ।

प्रागासीद्ब्राह्मणः कश्चित्कृषिकर्मरतस्सदा । पूजकश्चातिथीनां च भिक्षुकाणाञ्च यत्नतः ॥ १ ॥

तद्गृहे वृष उन्मत्तस्तीक्ष्णशृङ्गो भयानकः । तेन तद्वृषभस्यापि प्राग्भवे विनतासुत ॥ २ ॥
छित्त्वा नासाग्रमुष्कौ तु कृतं कर्मातिदारुणम् । तत्र जन्मनि तद्भुक्त्वा फलं पापसमुद्भवम् ॥ ३ ॥
जातोऽत्र यवनः सिन्धुमण्डले पर्वताश्रिते । षण्ढस्तु तेन पापेन स च तत्र खगाधिप ॥ ४ ॥
धर्मात्पूर्वकृतात्सोऽपि सुखैश्वर्यधनान्वितः । दृढार्जितस्य पापस्य प्रायश्चित्तं न विद्यते ॥ ५ ॥
पूजनादतिथीनाञ्च भविष्यति च तद्गतिः । तीर्थाश्रयेऽत्र जनुषि मृत्युस्तस्य प्रकीर्तितः ॥ ६ ॥
आयुः षष्टिमिताब्दान्तं रिष्टं पञ्चाशदब्दके ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवोत्तरषट्शताधिकसहस्रतमः ॥ १६०९ ॥

श्रीसूर्य उवाच ।

घातयेद्या पुरा नारी वराहं गरुडाग्रज । दन्तुरा सा भवेच्चेह तत्काले घातसम्भवे ॥ १ ॥
ताम्रकुम्भं सुवर्णाढ्यं घृतपूर्णं सदक्षिणम् । तद्दोषशमनायैव दद्याच्छक्त्या विधानतः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो दशोत्तरषट्शताधिकसहस्रतमः ॥ १६१० ॥

श्रीसूर्य उवाच ।

तैलहारी तु यः कश्चिद्भवेल्लोभात्पुराभवे । कण्डूरोगेण सततं पीड्यते चात्र जन्मनि ॥ १ ॥
स कुर्यात्तैलदानञ्च ब्राह्मणाय खगाधिप । कण्डूरोगप्रशमनं दत्त्वा तैलघटद्वयात् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकादशोत्तरषट्शताधिकसहस्रतमः ॥ १६११ ॥

श्रीसूर्य उवाच ।

काचिच्छुभानना पूर्वभवे चारणवल्लभा । भर्तृत्यक्ताधिविन्ना सा महारोषवती भवेत् ॥ १ ॥
तया महौषधीर्दग्ध्वैः पत्युः पुंस्त्वं विनाशितम् । तेन पापप्रभावेण जातोऽत्रायं नपुंसकः ॥ २ ॥
धूर्तः पापरतो दुष्टः सर्वधर्मविवर्जितः । रोगयुक्तोऽतिदुःखार्तो न शुभां लभते गतिम् ॥ ३ ॥
बहुजन्मस्वसौ पापान्मुक्तो वै भविताण्डज ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वादशोत्तरषट्शताधिकसहस्रतमः ॥ १६१२ ॥

श्रीसूर्य उवाच ।

स्वभक्ष्यार्थं महाभाग यो हन्याद्वायुवाहनम् । इह जन्मनि षण्ढः स्यान्नात्र कार्या विचारणा ॥१॥
न तस्य निष्कृतिः प्रोक्ता जन्मनीह खगाधिप । स्वशरीरविवृद्ध्यर्थं येन भुक्तो मृगः पुरा ॥ २॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोदशोत्तरषट्शताधिकसहस्रतमः ॥ १६१३ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे मोहाद्गुडं हरति कस्यचित् । गुल्मोदरेण रोगेण पीड्यते सेह जन्मनि ॥ १ ॥
गङ्गायां हि महाभाग गुडधेनुप्रदानतः । तत्र स्नानान्महापुण्यात्तस्माद्रोगात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्दशोत्तरषट्शताधिकसहस्रतमः ॥ १६१४ ॥

श्रीसूर्य उवाच ।

कश्चिद्वैश्योऽभवत्पूर्वभवे नेपालविश्रुते । बहुमित्रसुखैराढ्यो हठी व्यसनसंयुतः ॥ १ ॥
आराधनन्तु कृतवान्देव्या यः पूर्वजन्मनि । स्वस्त्रियं च सुरूपां च परित्यज्य शुभाननाम् ॥२॥
अन्यस्त्रियं वा अगमद्वध्यमिचारपरो दृढः । स तेन कर्मणा युक्तो गतो धर्मपुरं प्रति ॥ ३ ॥

शुभाशुभानि वै भुक्त्वा फलानीह महीतले । जातो भव्यो महाज्ञानी महाविभवसंयुतः ॥ ४ ॥
देशे देशेऽतिविख्यातो घृणी धीमान्महायशाः । स्वस्त्रीत्यागान्महापापाज्जायते स्त्रीविवर्जितः ॥५॥
निष्कृतिं च वदामीह स्त्रीप्राप्तिसुखकारिणीम् । पार्वतीप्रतिमां कृत्वा हैमिकां कार्यकारिणीम् ॥६॥
पलपञ्चमितां लेख्यां रत्नैर्माल्यैरलंकृताम् । दद्याद्वेदविधिज्ञाय सत्कुलीनाय चार्थिने ॥ ७ ॥
प्रजापतिं तथा दद्याद्राजतं त्रिपलात्मकम् । ब्रह्मदैवतमन्त्रेण गृह्णाति स महाद्विजः ॥ ८ ॥
पश्चादष्टाक्षरं मन्त्रं सहस्रं पापशोधनम् । जपेद्दशसहस्रन्तु सूर्यमन्त्रं महाबलम् ॥ ९ ॥
होमयेत्तद्दशांशेन तद्दशांशेन तर्पयेत् । एवं यः कुरुते सूत सर्वपापविनाशनम् ॥ १० ॥
प्रापश्चित्तं परं तत्र तस्मात्पापात्प्रमुच्यते । नैवं करोति यो मोहाज्जडधीर्दैवघातितः ॥ ११ ॥
स्त्रीसुखं लभते नैव रिष्टं षड्वेदकेन्दके । प्रायश्चित्ते कृते सूत जीवनं चाब्दसप्ततिम् ॥ १२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचदशोत्तरषट्शताधिकसहस्रतमः ॥ १६१५ ॥

श्रीसूर्य उवाच ।

नृपं विना प्राग्यो हन्यान्मृगं हि विनतासुत । षण्ढः स्यादत्र जनुषि तत्काले मृगघातजे ॥ १ ॥
पापनाशकरीं तस्य निष्कृतिं वक्ष्यहं सुत । दद्यादुष्ट्रं नवं तत्र स्वर्णनिष्कयुतं शुभम् ॥ २ ॥
सहासनं सालंकारं पूजयित्वा विधानतः । वेदज्ञाय महाबाहो नानाशास्त्रविधानतः ॥ ३ ॥
नाशमेष्यति खंजत्वं दानस्यास्य प्रभावतः ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षोडशोत्तरषट्शताधिकसहस्रतमः ॥ १६१६ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे सूत परतैलापहारिणी । सेह जन्मनि पक्षीन्द्र कण्डूरोगप्रपीडिता ॥ १ ॥
यथाशक्तिसुवर्णाढ्या तैलदानाद्विशेषतः । सा मोक्ष्यते महाभाग कण्डूरोगात्खगाधिप ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तदशोत्तरषट्शताधिकसहस्रतमः ॥ १६१७ ॥

श्रीसूर्य उवाच ।

राजप्रचारी वै कश्चिच्चारणः पूर्वजन्मनि । भव्यमूर्तिर्दृढो धीरः शिवपूजनतत्परः ॥ १ ॥
राजपत्न्या महाबाहो रतिं चक्रे ह्यधर्मतः । गर्भं दधार वै राज्ञी भाविनोऽर्थस्य वै बलात् ॥ २ ॥
पापात्पापफलं भुक्त्वा यमलोके खगाधिप । शिवपूजनजात्पुण्यात्सोऽत्र जातो हि पादजः ॥ ३ ॥
देशे जाङ्गलजे षण्डः सर्वधर्मबहिष्कृतः । शिवपूजारतो यस्मात्प्रागत्र धनभोगभाक् ॥ ४ ॥
स्त्रीपुत्रसुखहीनोऽत्र प्रायश्चित्तं न विद्यते ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टादशोत्तरषट्शताधिकसहस्रतमः ॥ १६१८ ॥

श्रीसूर्य उवाच ।

गर्भाढ्यां वडवां या वै हन्यात्पूर्वभवेऽडज । गर्भपातनदुःखार्ता खञ्जोऽपि स्यात्तदेनसः ॥ १ ॥
तत्पापनाशनं सूत शृणु वक्ष्यामि तत्त्वतः । दद्याद्विप्राय तुरगं युवानं भूषणान्वितम् ॥ २ ॥
स्वर्णनिष्कयुतं चात्र पूर्वपापात्प्रमुच्यते । न पश्यति च गर्भोत्थां पीडामत्रैव जन्मनि ॥ ३ ॥
दानप्रभावात्पक्षीन्द्र खञ्जत्वं नाप्नुयादिह ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनविंशत्युत्तरषट्शताधिकसहस्रतमः ॥ १६१९ ॥

अरुण उवाच ।

क्षात्रे कुले समुत्पन्नो दानदाक्षिण्यतत्परः । मेहादिपीडितोऽत्यर्थं कृशाङ्गः पाण्डुरद्युतिः ॥ १ ॥
ऊर्ध्ववातादिना पीडा बाल्ये स्याद्ग्रहणीगदः । तस्य भार्या सदाचारा विनीता भर्तृभक्तितः ॥ २ ॥
रक्तस्रावादिना पीडा जायते चोदरानिलः । गर्भश्च तस्या उदरे पिधानं प्रकरोति हि ॥ ३ ॥
द्वित्रैश्च पञ्चभिर्मासैश्चतुर्भिः सप्तभिस्तथा । केन कर्मविपाकेन गर्भो न स्थिरतां व्रजेत् ॥ ४ ॥

श्रीसूर्य उवाच ।

वैनतेय महाभाग शृणु तस्या विचेष्टितम् । व्यभिचारभयाद्वापि तया गर्भश्च पातितः ॥ ५ ॥
अतिकष्टाद्वैनतेय गर्भपातकृतागसः । अपरञ्च कृतं कर्म व्यभिचार इतस्ततः ॥ ६ ॥
नानाद्रव्यापहरणं कुलटावाक्यलङ्घनात् । चौर्यवृत्त्या च तद्भर्त्रा दस्युसङ्गाच्च वै वहु ॥ ७ ॥
वहुवारं हि यद्द्रव्यं हृतं तस्करबुद्धिना । भुक्तं ताभ्यां वैनतेय ब्रह्मस्वं तत्र जन्मनि ॥ ८ ॥
कालेन तद्धनं भुक्त्वा पीडितौ दारुणैर्ग्रहैः । यातना वहुधा प्राप्ताः पश्चान्मानुष्यतां गतौ ॥ ९ ॥
किञ्चित्पुण्यप्रभावेण पापस्यास्य क्षयो भवेत् । निष्कृतिं तां वदामीह येन गर्भः स्थिरो भवेत् ॥ १० ॥
पूर्वजन्मनि या नारी नानागर्भान्हिनस्ति वै साऽवश्यमिह संतप्ता पापाद्वै निष्कृतिं चरेत् ॥ ११ ॥
नारी नियमसंवीता ध्रुवं स्याद्व्रतकांक्षिणी । सौम्यायनं समासाद्य मासे पक्षे शुभेऽहनि ॥ १२ ॥
तस्य पापस्य शान्त्यर्थं नानाव्रतमुपाचरेत् । पयः स्रवन्तीं शान्तां वा सुरभिं शुभलक्षणाम् ॥ १३ ॥
गृहमानीय विधिवत्पूजयेत्तां समाहिता । इष्टतद्यवसैः पानैर्भक्ष्यैः कण्डूयनैरपि ॥ १४ ॥
रुचिरैश्चैव गोष्ठानैः स तां परिचरेत्सदा । रात्रौ दीपावलीभिश्च गन्धस्रक्चन्दनादिभिः ॥ १५ ॥
सुगीतमङ्गलस्नानैस्तदधःशायिनी भुवि । प्राणयात्रां प्रकुर्वीत तस्यास्तु पयसाहनि ॥ १६ ॥
तस्यास्तु पञ्चगव्यानि यथान्यायं समश्नती । एवंव्रतपरा नारी मासिमासि तु संयता ॥ १७ ॥
तस्या धेनोः सवत्साया इष्टं समभिकाङ्क्षिणी । व्रतान्ते द्विजमाकार्य समस्तगुणशालिनम् ॥ १८ ॥
अभ्यर्च्य पूजयेद्भक्त्या वस्त्रदानविभूषणैः । सम्यगभ्यर्च्य तां धेनुं मानयन्ती स्तनन्धयम् ॥ १९ ॥
कृत्वा च विधिवत्तस्मै तां दद्यादितिभाषिणी ॥ २० ॥

मंत्रः ।

"सुवर्णं शुद्धमाग्नेयं मापषोडशसंमितम् । ददेऽहं गां सवत्साञ्च सर्वपापापनुत्तये ॥ २१ ॥
यन्मया कुलटावृत्त्या नाना गर्भा विघातिताः । नानाभेदैः पातिताश्च गर्भा वै वहवो भुवि ॥ २२ ॥
कर्मभिस्तैश्च सम्प्राप्तं गर्भपातारव्यदूषणम् । एनसस्तस्य नाशाय सवत्सां गां ददे प्रभो ॥ २३ ॥
इह जन्मनि वन्ध्यात्वं नाशमेतु समन्ततः । दानेनानेन सुरभेर्गोपालः प्रीयतां मम ॥ २४ ॥
भवेच्च त्वत्प्रसादेन गर्भो मे सुभगा यतः" ॥ २५ ॥
एवमस्त्विति तां धेनुं समादाय सदक्षिणाम् । हिरण्यं रजतं ताम्रं विविधानि फलानि च ॥ २६ ॥
दापयेद्द्विजमुख्याय भूरिद्रविणदानतः । भोजयेच्च शतं विप्रान्नानान्नैः सक्तुपायसैः ॥ २७ ॥
एवं कृतविधिः सूत नारी स्याद्दुःखनाशिनी । वन्ध्यात्वान्मुच्यते सूत पुत्रप्राप्तिर्यशस्विनी ॥ २८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो विंशत्युत्तरषट्शताधिकसहस्रतमः ॥ १६२० ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि यः कश्चित्तुरगं घातयेन्नरः । वक्रकण्ठेन रोगेण पीडितोऽत्र प्रजायते ॥ १ ॥

स्वर्णाश्वदानाद्विधिवत्सर्वोपस्करसंयुतात् । वक्रकण्ठसमुद्भूतां पीडां नाप्नोति मानवः ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकविंशत्युत्तरषट्शताधिकसहस्रतमः ॥ १६२१ ॥

श्रीसूर्य उवाच ।

सृगालघाती पुरुषः प्राग्जनुष्यत्र जन्मनि । पादहीनो भवेत्सूत भृशं वा कृतनिष्कृतिः ॥ १ ॥
दद्यादश्वं सुवर्णाढ्यं सर्वोपस्करसंयुतम् । ब्राह्मणाय प्रयत्नेन सर्वपापापनुत्तये ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वाविंशत्युत्तरषट्शताधिकसहस्रतमः ॥ १६२२ ॥

श्रीसूर्य उवाच ।

संकरः प्राग्भवे सूत बभूव धनसंयुतः । तीर्थवासी विरक्तश्च लोभी धर्मक्रियान्वितः ॥ १ ॥
क्रूरकर्म कृतं तेन दुष्टसङ्गेन चाण्डज । चौर्येण गां परां नीत्वा क्षुधितोऽभक्षयत्पुरा ॥ २ ॥
मृतः स तेन पापेन नानायोनिमुपागतः । स तीर्थमृत्युवशतो गङ्गातीरेऽत्र पादजः ॥ ३ ॥
तीर्थमृत्युप्रसादाच्च धनपुत्रसमन्वितः । युवभावेण्डजश्रेष्ठ चक्षुर्हीनो भविष्यति ॥ ४ ॥
प्रायश्चित्तं प्रवक्ष्यामि दशस्वर्णैस्तु सम्मिताम् । निर्मितां गां विधानेन पूजयित्वा विधानतः ॥ ५ ॥
दद्याद्वै वेदविदुषे पूर्वपापविशुद्धये । गायत्रीं च जपेत्तत्र नियुतं वायुतद्वयम् ॥ ६ ॥
होमयेच्च यथाशक्ति भोजयेच्च ततो द्विजान् । यः कुर्याद्विधिनैवेदमात्मदोषात्प्रमुच्यते ॥ ७ ॥
स दिव्यचक्षुषा युक्तो जायतेऽत्रैव जन्मनि ॥ ८ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोविंशत्युत्तरषट्शताधिकसहस्रतमः ॥ १६२३ ॥

श्रीसूर्य उवाच ।

आसीत्क्षत्री महाभाग पाञ्चाले देशके शुभे । नानाधर्मसमायुक्तो ग्रामताविश्रुतो महान् ॥ १ ॥
दुष्कृतं चरितं तेन भाविनोऽर्थस्य वै बलात् । शूद्रायां च कृतो गर्भः कामलोभेन निश्चयात्॥२ ॥
यत्नः कृतो महांस्तेन नाभूद्गर्भस्य पातनम् । तया हालाहलं पीतं लोकभीतेस्तु सा मृता ॥ ३ ॥
गर्भपीडामहत्युग्रा बालकोऽपि मृतस्ततः । सहायपञ्चकेनेदं कृतं प्राक्कर्म दारुणम् ॥ ४ ॥
कर्मणां संग्रहश्चायं गर्भनाशसमुद्भवः । ततो हि मरणं प्राप्ता वाहुजोऽद्य सहाययुक् ॥ ५ ॥
सूर्यलोकं ततो गत्वा भुक्त्वा भोगांश्च शाश्वतान् । अशुभान्नरकान्भुक्त्वा स्वकृताद्दृढकर्मजात् ॥
सोपप्लवे महादानात्पूर्वजन्मनि मानद । स जातो यमुनातीरे वाहुजोऽप्यत्र जन्मनि ॥ ७ ॥
गौरः कृशाङ्गो लम्बश्च धनसौख्यसमन्वितः । पितृमातृविहीनश्च लोभमोहरतः सदा ॥ ८ ॥
नैकस्त्रीसंयुतः कामी नानाविभवसंयुतः । धर्मादिदं तथा पापाद्धूर्तः पापरतः शठः ॥ ९ ॥
सकन्यो हृदि रुग्णश्च मनोदुःखसमन्वितः । शूद्रायां वीर्यदानात्प्राक्तद्वधाच्चाप्यपुत्रकः ॥ १० ॥
ऐहिकं लक्षणं तस्य शरीरे चोपजायते ॥ ११ ॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन्सर्वपापापनोदिनीम् । पुत्रवृद्धिकरीं धन्यां लोकानां हितकाम्यया ॥१२॥

श्रीसूर्य उवाच ।

वक्ष्यामि निष्कृतिं तस्य शृणु सूत प्रयत्नतः । पूर्वपापविशुद्ध्यर्थं गर्भधारणकारिणीम् ॥ १३ ॥
शूद्रायाः प्रतिमा कार्या पलैः पञ्चमितैः शुभा । हिरण्मयी सगर्भा च पत्रलेख्या विधानतः॥१४॥
तदर्धेनाथवा कार्या निजवित्तानुसारतः । गन्धपुष्पैरलंकृत्य सा देया पापनाशिनी ॥ १५ ॥

मापपञ्चमितो विष्णुः सर्वपापप्रणाशनः । प्रजापतिं तथा दद्यात्सौवर्णं पञ्चमाषकम् ॥ १६ ॥
राजतं च तथा दद्यात्सोमं सार्धपलात्मकम् । गायत्रीं दशसाहस्रं जप्त्वा तु विधिपूर्वकम् ॥ १७ ॥
होमयेत्तण्डुलैः साज्यैः सर्षपैः सतिलैस्तथा । ब्राह्मणान्भोजयेत्पश्चात्पूर्वपापात्प्रमुच्यते ॥ १८ ॥
एवं कृतविधेः सूत पूर्वपापविनाशनम् । तस्य पुत्रविवृद्धिः स्यादिह जन्मनि वै ध्रुवम् ॥ १९ ॥
अकृते तु यथाशक्ति प्रायश्चित्ते यथोदिते । रिष्टं षष्टिमिते वर्षे दारुणं शत्रुवैकृतम् ॥ २० ॥
प्रायश्चित्ते कृते सूत जीवनं वर्षसप्ततिम् । जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् ॥ २१ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्विंशत्युत्तरषट्शताधिकसहस्रतमः ॥ १६२४ ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्या विचेष्टितम् । जाता सिंहलके देशे वैश्यपुत्री शुभानना ॥ १ ॥
पत्युः सहायतस्तत्र तया दत्तानि चाण्डज । कार्तिक्यां पौर्णमास्यां वै राहुग्रस्ते निशाकरे ॥ २ ॥
भक्ष्यभोज्यानि वस्त्राणि सुवर्णाभरणानि च । भक्तियुक्तेन मनसा ब्राह्मणेभ्योऽतिभक्तितः ॥ ३ ॥
ततो बहुतिथे काले व्यापारार्थं गतः पतिः । समुद्रे नौकया सार्धं निमज्य मरणं गतः ॥ ४ ॥
ततः सा स्त्रीसहायत्वात्प्रतिवेशिद्विजातिना । तद्धामवासिनैकेन कामिता कामलोभतः ॥ ५ ॥
तयापि स्वीकृतो विप्रश्चान्योन्यप्रीतिभावतः । वैश्यायाः प्रीतिवशतो विप्रेण स्त्री विमानिता ॥ ६ ॥
अनादरेण महता ब्राह्मणी शोकपीडिता । मृता हालाहलं पीत्वा ततो लोकापवादतः ॥ ७ ॥
पूर्वस्त्रियाश्च साहाय्याद्विप्रस्त्यक्तस्तयाण्डज । ग्रामाध्यक्षो मृतस्तत्र तच्छोकाद्विप्रपुङ्गवः ॥ ८ ॥
तद्रूपं वर्णयन्सोऽपि पञ्चत्वं प्राप्तवान्खग । ततो बहुतिथे काले वैश्यापि निधनं गता ॥ ९ ॥
पुण्यात्पुण्यफलं भुक्तं पापाच्च नरकं तथा । पूर्वपुण्यप्रभावेण सा जाता मुखजाधुना ॥ १० ॥
गङ्गायाः पूर्वभागे च खशप्रान्ते हिमालये । गौरा सुरूपा नात्युच्चा नातिह्रस्वा शुचिस्मिता ११ ॥
प्रियंवदा शुभाङ्गी च व्रतानामनुकाङ्क्षिणी । सुशीला चतुरा दक्षा पितृमातृसुखान्विता ॥ १२ ॥
भगिनीसोदरैर्युक्ता देवद्विजपरायणा । पुण्यादिदं तथा पापाल्लोभयुक्ताल्पपापकृत् ॥ १३ ॥
मनोदुःखैः समायुक्ता तथाऽप्राप्तमनोरथा । प्राग्भवे ब्राह्मणीत्यागात्पापात्तन्मरणोद्भवात् ॥ १४ ॥
ब्रह्महत्यासमाद्घोरात्पतित्यक्ता किशोरके । ईर्ष्यामात्सर्ययुक्ता च गूढचेष्टाभिरन्विता ॥ १५ ॥
लक्षणैरेभिराढ्यायाः प्रायश्चित्तं वदामि ते । पलेनैकेन कर्तव्यो ब्राह्मणस्तु हिरण्मयः ॥ १६ ॥
गन्धपुष्पैरलंकृत्य स देयो ब्राह्मणाय वै । गायत्रीदशसाहस्रं जपेन्मृत्युञ्जयं तथा ॥ १७ ॥
होमयेत्तद्दशांशेन शक्तया विप्रांश्च भोजयेत् । अश्वत्थसेवनं कुर्यान्मद्दिने व्रतमाचरेत् ॥ १८ ॥
पार्थिवान्पूजयेल्लक्षं महादेवान्विधानतः । एवंकृतविधेः सूत पूर्वजन्माघनाशनम् ॥ १९ ॥
पतिपुत्रवती चासाविहैव भवति ध्रुवम् । नैवं करोति या मोहाल्लोभाद्वा पापशोधनम् ॥ २० ॥
भर्तुः सुखं न लभते चान्ते च नरकं व्रजेत् । पञ्चचत्वारिंशकेऽब्दे रिष्टं चाकृतनिष्कृतेः ॥ २१ ॥
घटे भौमयुते लग्ने सूर्ये सुखसमाश्रिते । चापे राहौ च जननं चापे राहौ मृतिस्तथा ॥ २२ ॥
त्रिसप्तत्यब्दमायुः स्याद्ध्रुवं च कृतनिष्कृतेः । रिष्टेनैव मृतिस्तस्या भृशं चाकृतनिष्कृतेः ॥ २३ ॥
जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् । यद्यदन्तर्गतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ २४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचविंशत्युत्तरषट्शताधिकसहस्रतमः ॥ १६२५ ॥

श्रीसूर्य उवाच ।

शूद्रोऽभवन्महाभाग प्राग्जन्मन्यत्र कोविदः । ग्रामवासी सदा सौम्यः शतद्रुनिकटे द्विजः ॥ १ ॥
शूद्रकन्या च तेनैव हृद्या षोडशवार्षिकी । भुक्तातिकामलोभेन बलात्कारेण दूषिता ॥ २ ॥
स चाथ धर्मपुत्रस्य भुक्त्वा भैरवशासनम् । पूजनाच्छिवलिङ्गानां प्रागत्रापि च सङ्करः ॥ ३ ॥
षण्ढस्तेन विपाकेन प्राप्तसर्वमनोरथः । राजप्रचारको धीमान्गजाश्वप्रतिपालकः ॥ ४ ॥
महांधनो महोत्साहो महाविभवविस्तरः । मृत्युश्चास्यात्र गङ्गायां पुण्याच्च शिवपूजनात् ॥ ५ ॥
भविष्यति महाभाग पापान्ते चात्र सद्गतिः ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षड्विंशत्युत्तरषट्शताधिकसहस्रतमः ॥ १६२६ ॥

श्रीसूर्य उवाच ।

पादरोगयुतः सूत जायते सोऽत्र जन्मनि । यो मार्गहा पुरा लोके परलुण्ठनतत्परः ॥ १ ॥
सोऽश्वदानाद्विधानेन ब्राह्मणाय खगाधिप । न पश्यति महापीडां पापजां पादसम्भवाम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तविंशत्युत्तरषट्शताधिकसहस्रतमः ॥ १६२७ ॥

श्रीसूर्य उवाच ।

यो घातयेदजं ज्ञानात्प्राग्भवे विनतासुत । भक्ष्यार्थं सोऽत्र जन्तुषि पुरुषोङ्गाधिको भवेत् ॥ १ ॥
न तस्य निष्कृतिर्दुष्टपापस्यात्र च काश्यपे । आरब्धस्य क्षयो नास्ति विन्मये शतधा कृते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाविंशत्युत्तरषट्शताधिकसहस्रतमः ॥ १६२८ ॥

श्रीसूर्य उवाच ।

शृणु सूत प्रवक्ष्यामि पृच्छकस्य विचेष्टितम् । प्राग्भवे यामुने देशे वाहुजो धर्मसंयुतः ॥ १ ॥
राजप्रचारी शूरश्च मन्त्रकार्यविचक्षणः । स्त्रीपुत्रधनसंयुक्तो भृत्यवाहनसंयुतः ॥ २ ॥
राजसेवापरो नित्यं सन्धिविग्रहसंयुतः । दत्तानि तेन दानानि ब्राह्मणेभ्योऽतिशक्तितः ॥ ३ ॥
सिद्धान्नानि महाभाग भिक्षुकेभ्योऽतिभक्तितः । वदान्यो नीतिवित्प्राज्ञो वृद्धशिष्टैः समन्वितः॥४॥
कृतवान्ब्राह्मणोद्वाहं विधानेन खगाधिप । अथो भाविबलात्सूत कृतं कर्मातिदारुणम् ॥ ५ ॥
बालकेनाष्टवर्षेण राजाश्रितपुरोधसः । क्रीडने प्रस्तरक्षेपान्मारितो राजबालकः ॥ ६ ॥
ततो राजाज्ञया क्षत्री विपदानेन बालकम् । ब्राह्मणस्य जघानाथ ब्राह्मणः पुत्रशोकतः ॥ ७ ॥
मृतस्तेन महाभाग घोरं पापमुपार्जितम् । स तेन कर्मणा युक्तो गतो वै यमशासनम् ॥ ८ ॥
पुण्यात्पुण्यफलं भुक्तं पापात्पापफलं तथा । पूर्वपुण्यप्रभावेण स जातः पर्वते त्विह ॥ ९ ॥
राजपुत्रोह्युग्रसंज्ञो गङ्गायाः पूर्वभागतः । जन्मलग्नादितो राशौ रन्ध्रे पापग्रहान्वितः ॥ १० ॥
अजे शुधांशौ नीचस्थे जीवे वृषगते शनौ । नातिकृशो नातिगौरो वदान्यः प्रियभाषणः ॥११॥
सर्वैश्वर्ययुतो धीरः शोभनो राजवल्लभः । पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् ॥ १२ ॥
कदाचिद्रोगयुक्तश्च चपलोऽल्पाशनोण्डज । लक्षणैरेभिराढ्यस्य प्रायश्चित्तमथो शृणु ॥ १३ ॥
पलमानं सुवर्णेन कुर्याद्ब्राह्मणबालकम् । तथा पञ्चपलैः सोमो रजतस्य नराधिप ॥ १४ ॥
दशमांशमितः केतुर्विधानेन हिरण्मयः । षोडशोपचारैस्तु पूजयित्वा विधानतः ॥ १५ ॥
कर्मप्रकाशकं विप्रं पूजयित्वातिभक्तितः । तस्मै दद्यात्सुवर्णाद्यैर्वस्त्राद्यैर्भूषिताय च ॥ १६ ॥
तदर्धमितकं वापि निजवित्तानुसारतः । महामृत्युञ्जयं मन्त्रं लक्षमानं जपेत्तथा ॥ १७ ॥

तदर्धं वा महाभाग सोममन्त्रं जपेत्तथा । गायत्रीमष्टसाहस्रं तद्दशांशेन होमयेत् ॥ १८ ॥
कुण्डे वा स्थण्डिले वापि तिलैस्त्रिमधुराप्लुतैः। ब्राह्मणान्भोजयेच्छक्त्या तेभ्यो दद्याच्च दक्षिणाम् १९
प्रायश्चित्तमिदं प्रोक्तं पूर्वजन्माघनाशनम् । आयुःकीर्तिधनारोग्यविद्यालक्ष्मीयशःप्रदम् ॥ २० ॥
सर्वारिष्टहरं पुण्यमाधिव्याधिविनाशनम् । नैवं करोति यो मोहाल्लोभाद्वा पापमोहितः ॥ २१ ॥
तस्यारिष्टभयं घोरमष्टमेऽब्दे मृतिप्रदम् । नवाशीतिमितायुः स्यात्प्रायश्चित्ते कृते त्विह ॥ २२ ॥
भागीरथीतटे पुण्ये वैशाखे निधनं ध्रुवम् । अकृते तु यथाशक्ति प्रायश्चित्ते खगाधिप ॥ २३ ॥
रिष्टेनैव विनाशः स्यान्न गतिं च शुभां लभेत् । जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् २४

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनत्रिंशदुत्तरषट्शताधिकसहस्रतमः ॥ १६२९ ॥

श्रीसूर्य उवाच ।

शृणु सूत प्रवक्ष्यामि कर्मणां कारणं महत् । पृच्छकस्य खगश्रेष्ठ पूर्वकर्मविचेष्टितम् ॥ १ ॥
जातोऽसौ यामुने देशे शूद्रवंशसमुद्भवः । धातुकांस्यादिकर्ता च कृषिवाणिज्यकारकः ॥ २ ॥
ब्राह्मणस्य धनेनैव सर्वं वै वर्धितं धनम् । ब्राह्मणे मित्रसम्भूते विनतानन्दवर्धन ॥ ३ ॥
पुण्यक्षेत्रेषु तीर्थेषु स्नानदानादिशक्तितः । कृतवानुपकारं च ब्राह्मणानां प्रयत्नतः ॥ ४ ॥
अथ तन्मित्रसम्भूतो द्विजो हि निधनं गतः । तद्धनं तस्य पुत्रेभ्यो न दत्तं द्रव्यलोभतः ॥ ५ ॥
ब्रह्मस्वहरणं तेन कृतं वै लुब्धचेतसा । महापापं कृतं तेन ब्रह्मस्वहरणाभिधम् ॥ ६ ॥
क्षुधया दुःखिता बाला द्विजस्य हि मृतिं गताः । ततो बहुतिथे काले शूद्रोऽपि निधनं गतः॥७॥
भुक्त्वा पापात्पापफलं पुण्यात्स्वर्गं च शाश्वतम् । पूर्वपुण्यप्रभावेण जातोत्र स वणिक्सुतः ॥ ८ ॥
हिमालये पुण्यदेशे गङ्गायाः पूर्वभागतः । स कृष्णगौरो मतिमान्नात्युच्चो न लघुर्वृणी ॥ ९ ॥
धनवाहनसंयुक्तो भृत्यदासीसुखान्वितः । स्वधर्मनिरतो दक्षो राजमान्यो बहुप्रियः ॥ १० ॥
सहोदरयुतो धीरो बन्धुस्त्रीमित्रसंयुतः । पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् ॥ ११ ॥
धूर्तः शठो महाक्रोधी मनोदुःखसमन्वितः । ब्रह्मस्वहरणात्पूर्वं जातपुत्रविनाशकः ॥ १२ ॥
लक्षणैरेभिराढ्यस्य प्रायश्चित्तमतः शृणु । लक्ष्मीनारायणं कुर्यात्रिपलैश्च हिरण्मयम् ॥ १३ ॥
तथा पलेन विघ्नेशं तथा सूर्यं खगाधिप । षोडशोपचारैश्च समभ्यर्च्य यथाविधि ॥ १४ ॥
दद्याद्विधिविदे सूत ब्राह्मणाय कुटुम्बिने । गायत्रीमष्टसाहस्रं जपेन्मृत्युञ्जयं तथा ॥ १५ ॥
अष्टाक्षरं तथा मन्त्रं गाणपत्यं खगेश्वर । तथा जपेत्सूर्यमन्त्रं तदन्ते होमयेत्तिलैः ॥ १६ ॥
तत्तद्दशांशतो विप्रान्भोजयेच्छक्तितोऽण्डज । पूजयेल्लक्षरुद्रान्वै पार्थिवान्विधिना खग ॥ १७ ॥
महिने तु व्रतं कुर्याद्भक्तिश्रद्धासमन्वितः । एवं कृते खगश्रेष्ठ प्रायश्चित्ते विधानतः ॥ १८ ॥
न तस्य पुत्रमरणं नाधयो व्याधयोऽपि च । त्रिसप्ततिमितायुः स्याद्धनवाञ्जायतेऽत्र च ॥ १९ ॥
नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् । तस्य पुत्रा न जीवन्ति निर्धनोऽत्रैव जायते ॥२०॥
द्यूनपञ्चाशदब्दे तु रिष्टेनैव विनश्यति । प्रायश्चित्ते कृते सूत रिष्टं नैव प्रबाधते ॥ २१ ॥
सिंहे शनौ तथा जातो मकरस्थे मृतिर्भवेत् ॥ २२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिंशदुत्तरषट्शताधिकसहस्रतमः ॥ १६३० ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु चास्य विचेष्टितम् । प्राग्भवे यामुने देशे वैश्यो हि धनवान्सुधीः ॥ १ ॥
शिवपूजारतो नित्यमन्नदानाद्ययानिधिः । व्यापारः फलितस्तस्य भृत्यवाहनसंयुतः ॥ २ ॥

स्त्रीभ्यां तत्सोदराभ्यां हि युक्तो नीतिविचक्षणः । पण्ढोऽपि पूर्वपापाच्च स्त्रीसङ्गतिविवर्जितः ॥३॥
अथो भाविबलात्सूत कृतं कर्मातिदारुणम् । ब्राह्मणस्य च शिष्टस्य साहाय्येन हि यः कृतः॥४॥
व्यापारो ब्राह्मणद्रव्यैः स्वधनं वर्धितं खग । ततोऽसौ वञ्चितो विप्रो धनं किञ्चिन्न दापितम् ॥५॥
स्त्रियोः सोदरयुग्मेन मिलित्वा पापमोहितः । ततो बहुतिथे काले स गत्वा यमशासनम् ॥ ६ ॥
पुण्यात्पुण्यफलं भुक्त्वा पापाच्च नरकं तथा । पूर्वपुण्यप्रभावेण स जातो मुखजस्त्विह ॥ ७ ॥
हिमालये पुण्यदेशे गङ्गायाः पूर्वभागतः । पापे पञ्चमभावस्थे जीवे कर्कटगे तनौ ॥ ८ ॥
द्वादशस्थे सुधांशौ तु नात्युच्चो न लघुर्घृणी । श्यामगौरस्वरूपश्च मितदो लोभवर्जितः ॥ ९ ॥
शिवपूजनजात्पुण्याद्राजमान्यो यशोन्वितः । पित्रोः सुखयुतो भृत्यदासीमित्रसुसंयुतः ॥ १० ॥
धनी वाहनभोगाढ्यो बहुग्रामाधिपः सुखी । अन्नदानान्महापुण्यो विद्यावान्नीतिवित्तमः ॥ ११ ॥
बहुस्त्रीसुखसंयुक्तो ब्रह्मण्योऽतिप्रियंवदः । पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् ॥ १२ ॥
ब्रह्मस्वहरणात्पापाज्जातपुत्रविनाशकः । यौ सहायौ महाभाग ब्रह्मस्वहरणे खग ॥ १३ ॥
तौ तु गर्भाच्च्युतौ वत्स स्त्रियौ तेऽपि तथा मृते । ब्रह्मस्वं पक्षिशार्दूल स्त्रीपुत्राणां विनाशकम्॥१४॥
हठी पापक्रियायुक्तो धूर्तो मानी रुजान्वितः । द्वाविंशतिमिताब्दे वै जातपुत्रविनाशकः ॥ १५ ॥
लक्षणैरेभिराढ्यस्य प्रायश्चित्तमतः शृणु । लक्षं पार्थिवलिङ्गानां पूजयेत्पुत्रपौत्रदम् ॥ १६ ॥
लक्ष्मीनारायणं कुर्यात्पलत्रयमितं शुभम् । हिरण्मये तथालेख्यपत्रे च चतुरस्रके ॥ १७ ॥
माषपञ्चमितो वह्निस्तथा चैव हिरण्मयः । गन्धपुष्पैस्तथा धूपैर्दीपैर्वस्त्रैर्विशेषतः ॥ १८ ॥
पूजयित्वा प्रतिष्ठाप्य श्रद्धाभक्तिसमन्वितः । ब्राह्मणाय प्रदद्याद्वै पूजयित्वा कुटुम्बिने ॥ १९ ॥
गायत्रीमष्टसाहस्रं जपेन्मृत्युञ्जयं तथा । होमयेत्तद्दशांशेन शक्त्या विप्रांश्च भोजयेत् ॥ २० ॥
मद्दिने तु विशेषेण व्रतं कुर्यात्समाहितः । अथवा हरिवंशं तु दशावृत्त्या विधानतः ॥ २१ ॥
शृणुयाद्वाचकायापि गोभूवस्त्राणि दापयेत् । एवं कृतविधेः सूत न पुत्रमरणं भवेत् ॥ २२ ॥
नाधयो व्याधयस्तस्य न च शत्रुभयं भवेत् । जरायां यत्कृतं पापं ब्रह्मस्वहरणात्मकम् ॥ २३ ॥
तत्कृतं न महारिष्टं द्विचत्वारिंशकेब्दके । न प्राप्नोति गतिस्तस्य शुभा चैव भवेत्तथा ॥ २४ ॥
वेदाशीतिमिताब्दायुर्विनतानन्दवर्धन । नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् ॥ २५ ॥
रिष्टेन निधनं याति न च पुत्रसुखं लभेत् ॥ २६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकत्रिंशदुत्तरषट्शताधिकसहस्रतमः ॥ १६३१ ॥

श्रीसूर्य उवाच ।

भगवन्प्राग्भवे विप्रो ग्रामवासी जनाश्रितः । चोराधिपो महोग्रश्च तत्संसर्गी खगाधिप ॥ १ ॥
दत्तानि तेन ग्रहणे दानानि विनतासुत । गोभूम्यश्वादिकान्येव ब्राह्मणेभ्योऽतिशक्तितः ॥ २ ॥
स भुक्त्वा नरकान्घोरान्पापात्पुण्याच्च शाश्वतान् । स्वर्गात्पर्वतभागे तु स जातः पादजोऽधुना ३ ॥
वामनो राजसम्मानी महोग्रो मन्त्रपारगः । पुत्रहीनोऽप्यसौ शूद्रः परवित्तस्य लुण्ठनात् ॥ ४ ॥
भवन्त्यत्र च वै पुत्रा म्रियन्ते नात्र संशयः । प्रायश्चित्तं प्रवक्ष्यामि येन पापं प्रशाम्यति ॥ ५ ॥
कृत्वा वेदघटान्सूत सौवर्णान्घृतपूरितान् । तदभावे राजतांश्च विप्रेभ्यः प्रतिपादयेत् ॥ ६ ॥
हरिवंशं विधानेन शृणुयाद्भक्तितोण्डज । रौद्रव्रतं चरेत्पश्चात्पूर्वपापविशुद्धये ॥ ७ ॥

यो न कुर्यादिदं श्रुत्वा नरः पुत्रविवर्जितः । जायतेऽत्रैव पक्षीन्द्र कुर्याच्च सुतवर्धनम् ॥ ८ ॥
अष्टाशीत्यब्दमायुर्वै जायते कृतनिष्कृतेः ॥ ९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वात्रिंशदुत्तरषट्शताधिकसहस्रतमः ॥ १६३२ ॥

अरुण उवाच ।

क्षात्रवंशे समुत्पन्नो देहे वातरुजा युतः । गुल्माद्या ह्युदरे बाधा शिरोर्तिर्जायते तदा ॥ १ ॥
व्यापारो निष्फलस्तस्य किञ्चित्सेवादिना भवेत् । तस्य भार्याद्वयं चास्ति किञ्चिद्भक्तिपरायणम् २॥
अन्योन्यद्वेषभावाच्च किञ्चित्प्रीतिकरी परा । मृतवत्सा कथं जाता सत्यं कथय भास्कर ॥ ३ ॥
एको गर्भे स्थिरीभूतो न प्रसूतिर्न पातनम् । केन पापप्रभावेण कथय त्वं दिवाकर ॥ ४ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि शूद्रस्तु क्रयविक्रयकारकः । दानधर्मपरो नित्यं वेददेवपरायणः ॥ ५ ॥
अन्योन्यद्वेषभावाच्च वर्तते च निरन्तरम् । कश्चिद्विप्रस्तदभ्याशे वेदशास्त्रार्थसाधकः ॥ ६ ॥
कदाचिद्दैवयोगाच्च भाविनोऽर्थस्य वै बलात् । तं द्विजं लंघयामास शूद्रो म्लेच्छजनैः सह ॥ ७ ॥
किंकर्तव्यविमूढस्तु ब्राह्मणो भार्यया सह । भर्त्सनैस्तर्जनाद्यैस्तु तद्धनं शूद्रकोऽहरत् ॥ ८ ॥
दिनैः कतिपयैरेव भूयो वै ब्राह्मणस्य हि । लंघनाय मतिं चक्रे ब्राह्मणो भार्यया सह ॥ ९ ॥
म्लेच्छभीतिसमाविष्टो विशेषक्रोधसंकुलः । तदर्थमपि प्राप्तश्च ह्यात्मघातं चकार ह ॥ १० ॥
गर्भयुक्ता ब्राह्मणी वै भर्तारं पृष्ठतोन्वगात् । हृतं तस्यापि सर्वस्वं म्लेच्छराजेन वै तदा ॥११॥
किञ्चित्कालानन्तरं वै शूद्रो म्लेच्छेन मारितः । तेनैव कर्मणा वत्स वर्षार्बुदसहस्रशः ॥ १२ ॥
पपात नरके घोरे शूद्रो पीडायुतस्तदा । पश्चान्मानुष्यमापन्नो दानधर्मप्रभावतः ॥ १३ ॥
इदन्तु तृतीयं जन्म शूद्रवंशसमुद्भवम् । तेन वै कर्मणा युक्तो ह्यपत्यं नैव जायते ॥ १४ ॥

अरुण उवाच ।

प्रायश्चित्तं वद स्वामिन्येन पापक्षयो भवेत् । निष्कृतिं सकलां ब्रूहि नारीणां हितकाम्यया ॥१५॥

श्रीसूर्य उवाच ।

तीर्थे सम्वत्सरं सेवां कुरुतं तौ च दम्पती । श्रवणं हरिवंशस्य विप्रस्योद्वाहनं तथा ॥ १६ ॥
तावन्निष्कृतयो भूयः कर्तव्याः क्रमतः शुभाः । सुशुभे भूप्रदेशे तु गोमयाद्युपचर्चिते ॥ १७ ॥
कुर्यादष्टदलं पद्मं चित्रवर्णं सुशोभनम् । तन्मध्ये रुक्मिणीयुक्तं माधवं कलशेर्चयेत् ॥ १८ ॥
सौवर्णं राजतं पद्मं सायुधं सचतुर्भुजम् । उपचारैः शुभैर्धूपैर्गन्धैश्च कुसुमादिभिः ॥ १९ ॥
जनन्या सहितं भूपं प्रद्युम्नाद्यांस्तथार्चयेत् । चारुदेहं चारुबाहुं चारुगुप्तं यशस्विनम् ॥ २० ॥
श्रीवत्सांकं पीतवस्त्रं सुबाहुं पूजयेत्क्रमात् । पूजनं विष्णुसूक्तेन तथा श्रीरसिकोविदैः ॥ २१ ॥
पुष्पैः स्रग्गन्धधूपैश्च ह्यर्चयेद्विष्णुधारणैः । तद्विप्रासोथतद्विष्णोर्विष्णोः कर्माणि नित्यशः ॥२२॥
तद्विप्रासोथ तद्विष्णारतो देवास्तथा विभोः । अतो देवा अवंत्विति भावेनाष्टोत्तरं हुनेत् ॥
होमान्ते विप्रभोज्यान्ते मन्त्रमेतमुदीरयेत् ॥ २३ ॥

मन्त्रः ।

"यन्मया पापभावेन कर्मांधेन दुरात्मना ॥ २४ ॥
म्लेच्छराज्ये तु व्यापारे बहु वै दुष्कृतं कृतम् । ब्राह्मणानां हृतं द्रव्यं भयभर्त्सनतर्जनैः ॥
द्रव्यापहरणात्प्राप्तं दुःखं नानाभवान्तरे ॥ २५ ॥

स्थिरगर्भमृतापत्यत्वादि प्राप्तं सुदुःसहम् । तत्तदेनोविनाशाय दानं सम्प्रददे त्विदम् " ॥२६॥
स्वस्त्यस्त्विति च तत्रोक्त्वा कोदादिति विसर्जनम् । सर्पिष्यात्मानमालोक्य भोजयेदिष्टबन्धुभिः
ऐहिकं लक्षणं तस्य शरीरे चोपजायते । हृद्दुःखं दीर्घनिःश्वासो लोचने चाश्रुकर्शिते ॥ २८ ॥
काष्ठलोष्टादिशस्त्राद्यैर्घातः स्यादुपलेखनात् । जलाकुलत्वं स्पर्शोग्नेस्तादृशा व्रणसम्भवाः ॥ २९ ॥
नार्यङ्गे विकृतव्याधी मुखे तिलव्रणादिकम् । पितृष्वसृमातुलान्योर्विधवार्तिः स्नुषादिषु ॥ ३० ॥
स्वकुले प्रेतजा पीडा दुःखं चैव ह्यपत्यजम् । कर्मानुसारजो व्याधिश्चिह्नं तस्य सहायवत् ॥ ३१ ॥
स्वकुले वापि वर्तन्ते पतिता ब्रह्मचारिणः । एवं तु लक्षणैर्व्याप्तं प्रायश्चितं ततो वदेत् ॥ ३२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयस्त्रिंशदुत्तरषट्शताधिकसहस्रतमः ॥ १६३३ ॥

श्रीसूर्य उवाच ।

पूर्वे ह्याभीरजा काचिदभूद्भर्तृपरायणा । महद्भिर्गोधनैर्युक्ता गवां पालनतत्परा ॥ १ ॥
गावस्तृषार्ताः सततं प्रपायां प्रेरितास्तया । निदाघकाले सम्प्राप्ते बहिर्ग्रामाज्जलाश्रये ॥ २ ॥
अथान्यगावः सततं तस्मिन्नेव जलाशये । शनैः पानं प्रकुर्वन्त्यो जलं शीतलमुत्तमम् ॥ ३ ॥
ताडितास्ता भृशं गावो लकुटेन दृढेन वै । तत्रैका तृषया युक्ता ताडितापि भृशं तया ॥ ४ ॥
नच त्यक्तं जलं सूत गर्भभारान्विता यतः । तस्मिन्काले तदीयस्तु पतितो गर्भसंस्थितः ॥ ५ ॥
वत्सस्तत्ताडनादाशु मृतश्चाप्यबलः क्षणात् । विचेष्टितमिदं यस्याः सा वै जाता भवेऽधुना ॥ ६ ॥
नानाविभूतिसंयुक्ता नानापशुभिरन्विता । सुखभोगधनैर्धान्यैर्वाञ्छितार्थान्विता सुत ॥ ७ ॥
प्राग्गोसेवनजात्पुण्यात्सर्वं पुण्यफलं त्विदम् । अथात्र गर्भपूर्णत्वे युवभावे खगाधिप ॥ ८ ॥
न धारयति सा गर्भं तद्दुःखेनाकुला भृशम् । एवं वर्षत्रयं यावन्मोचयिष्यति वै सुत ॥ ९ ॥
रिष्टमब्दत्रये सूत बालवत्सवधादिह ॥ १० ॥

अरुण उवाच ।

प्रायश्चित्तं वद स्वामिन्येन पापक्षयो भवेत् । उपकाराय लोकानां यतस्त्वं सर्वदर्शिवान् ॥ ११ ॥

श्रीसूर्य उवाच ।

दद्याद्गां कपिलामेकां स्वर्णशृंगादिकान्विताम् ॥ १२ ॥
विप्राय वेदविदुषे तद्दोषशमनाय च । सुवर्णार्धमितां तद्वल्लेख्यां गां गर्भसंयुताम् ॥ १३ ॥
दद्याद्वेदविधिज्ञाय पूर्वपापात्प्रमुच्यते । भोजयेत्तु यथाशक्ति विप्रान्वै होमयेत्तिलान् ॥ १४ ॥
मुच्यते गर्भदोषाच्च नात्र कार्या विचारणा ॥ १५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुस्त्रिंशदुत्तरषट्शताधिकसहस्रतमः ॥ १६३४ ॥

श्रीसूर्य उवाच ।

बभूव पादजः कश्चिद्दुर्जरे विनतासुत । धर्माधर्मसमायुक्तो देवतातिथिपूजकः ॥ १ ॥
पितृभक्तिरतो नित्यं दानानि विधिपूर्वकम् । दत्तानि तेन शिष्टेभ्यो ब्राह्मणेभ्योऽतिशक्तितः॥२॥
दैवाच्छत्रुगृहं गत्वा कृतं कर्म सुदारुणम् । वैरिपुत्रः पुरा सूत ! पादभागे तु घातितः ॥ ३ ॥
कुन्तेनापि च तीक्ष्णेन दिवा वै क्रूरकर्मणा । स मृतस्तेन दुःखेन तन्माता ह्येकपुत्रिणी ॥ ४ ॥
पुत्रदुःखान्मृता सापि ददौ शापं हि दारुणम् । यथा पुत्रविहीनाहं गच्छामि च यमालयम् ५ ॥
तथैव पुत्रशोकार्तो जन्मजन्मनि यास्यति । ततो बहुतिथे काले गतोऽसौ यमशासनम् ॥ ६ ॥

धर्मात्स्वर्गफलं भुक्त्वा पापाच्च नरकं तथा। पूर्वपुण्यप्रभावेण स जातो मुखजोऽधुना ॥ ७ ॥
विपाशानिकटे देशे वृषलग्ने विधौ स्थिते। श्यामाङ्गो धूसरः क्षीणः प्रभुर्देशाटने रतः ॥ ८ ॥
बहुसङ्गेन संयुक्तो मित्रप्रियसमन्वितः। मानभोगसुखैश्वर्यसम्पन्नो लोभसंयुतः ॥ ९ ॥
धर्मात्स्वर्गफलं सूत भृशं पापफलं शृणु। क्रूरचेष्टो महालोभी सदा मात्सर्यसंयुतः ॥ १० ॥
जातपुत्रविहीनोऽसाविह जन्मनि जायते। प्रायश्चित्तं प्रवक्ष्यामि सर्वपापविशोधनम् ॥ ११ ॥
लोकानामुपकाराय शृणु सूत प्रयत्नतः। पलैर्दशमितैः कुर्याद्राजतं बाहुजं सुत ॥ १२ ॥
तन्मातरं च सौवर्णीं पलैकेन मितां शुभाम्। पत्रे लेख्यां शुभाकारां यथोपस्करसंयुताम् ॥ १३ ॥
पूजयित्वा तु गन्धाद्यैः षोडशोपचारकैः। सूर्यभक्ताय शान्ताय तां दद्याद्धि कुटुम्बिने १४ ॥
पलपञ्चमितं रौक्मं कुर्याद्धरिहरात्मकम्। तथैव गणनाथं च लेख्यं पञ्चोपचारकैः ॥ १५ ॥
संपूज्य विधिवद्दद्यात्सर्वपापविशुद्धये। अष्टाक्षरं तथा मन्त्रं वैदिकं सूर्यदैवतम् ॥ १६ ॥
जपेदष्टसहस्रं तु यथाप्रणवपूर्वकम्। गायत्रीं पञ्चसाहस्रं दुष्टपापविमोचनीम् ॥ १७ ॥
कुर्याद्धोमं दशांशेन पश्याद्ब्राह्मणभोजनम्। एवं कुर्याद्विधानेन प्रायश्चित्तं यथाविधि ॥ १८ ॥
न प्राप्नोति तदा रिष्टं षट्त्रिंशाब्दे प्रकीर्तितम्। पञ्चवेदमिताब्दान्तमायुस्तस्य प्रकीर्तितम् ॥ १९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचत्रिंशदुत्तरषट्शताधिकसहस्रतमः ॥ १६३५ ॥

श्रीसूर्य उवाच।

अज्ञानादवधीद्यश्च पूर्वजन्मन्यजां शुभाम्। भविष्यत्यत्र पुरुषोऽभ्यधिकाङ्गः कदाचन ॥ १ ॥
कस्तूरिकापलं दद्यात्स तत्पापविनाशनम्। अजमेकं च वज्राद्यं मुच्यते च तदेनसः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्त्रिंशदुत्तरषट्शताधिकसहस्रतमः ॥ १६३६ ॥

श्रीसूर्य उवाच।

लोहहारी तु पुरुषश्चेह जन्मनि मानद। बर्बराङ्गाख्यरोगेण पीड्यते नात्र संशयः ॥ १ ॥
दद्यात्पलशतं लोहं विधिना पापशोधनम्। प्राजापत्यं चरेदेकं ततो वानशनं परम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्रिंशदुत्तरषट्शताधिकसहस्रतमः ॥ १६३७ ॥

श्रीसूर्य उवाच।

सर्वैर्मनोरथैर्युक्ता काचिदासीन्मनोरमा। प्राग्भवेण्डजः तत्सर्वं चेष्टितं शृणु साम्प्रतम् ॥ १ ॥
नकुलानां बिले गत्वा चालिता वह्निवालुका। पूरितं च तथा सर्वं तद्वत्तद्वेष्टितं तृणैः ॥ २ ॥
मृतः स तेन दाहेन नकुलः सकुलः खग। सापि मृत्युवशं प्राप्ता भुक्त्वा तु यमशासनम् ॥ ३ ॥
पूर्वं शातद्रुजे देशे ह्यभूत्तत्र च पर्वते। पूर्वं राजकुले जातात्रापि राजकुले सुत ॥ ४ ॥
दानव्रतादिजात्पुण्यादथ पापफलं शृणु। सर्वे तद्वंशजाः सूत तदग्रे मरणं गताः ॥ ५ ॥
जीवनं दुःखपूर्णाया वर्षमष्टोत्तरं शतम्। न मुच्यते महापापाद्दृढाज्जन्मत्रयेऽपि वा ॥ ६ ॥
कुरुक्षेत्रादिवासाच्च पापं नश्यति साम्प्रतम् ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टत्रिंशदुत्तरषट्शताधिकसहस्रतमः ॥ १६३८ ॥

श्रीसूर्य उवाच।

लोहं हरति या यस्य नारी बुद्धिविवर्जिता। इह जन्मनि सा नारी बर्बरांगान्विता भवेत् ॥ १ ॥

दद्यात्पलशतं लोहं ससुवर्णं द्विजातये । मुच्यते पापजाद्रोगाद्धर्वराख्यान्न संशयः ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनचत्वारिंशदुत्तरषट्शताधिकसहस्रतमः ॥ १६३९ ॥

श्रीसूर्य उवाच ।

मोहात्प्राग्याऽवधीत्सूत नार्यजं विधिवर्जितम् । सांगाधिकात्र जनुषि भविष्यति वरानना ॥ १ ॥
अजं दद्याद्विधानेन कस्तूरीपलसंयुतम् । सवस्त्रं वेदविदुषे तद्दोषशमनं त्विह ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चत्वारिंशदुत्तरषट्शताधिकसहस्रतमः ॥ १६४० ॥

अरुण उवाच ।

क्षात्रे कुले समुत्पन्नो गुल्मवातोदरामयः । वित्तमः कृपणश्चैव सहोदरसमन्वितः ॥ १ ॥
धनधान्यसुखोपेतः किञ्चिद्व्यापारवान्भुवि । दायादाच्छत्रुवत्पीडा मिथ्या क्लेशश्च जायते ॥ २ ॥
नार्योस्तस्य द्वयं वापि स जातश्चारुजन्मनि । वहुपुत्र्यः प्रसूताश्च न च पुत्रः प्रजायते ॥ ३ ॥
कदाचिज्जायमानस्तु मृतः पुत्रोऽग्निमासकः । एका पुत्रवती भार्या संजाता तस्य भास्कर ॥ ४ ॥
केन कर्मविपाकेन सत्यं कथय सादिने ॥ ५ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि क्षात्रस्तु किञ्चिद्भूमिपतिस्तथा । प्रावर्ततार्थलुब्धस्तु ग्रामाधीशः प्रतापवान् ॥ ६ ॥
ग्राममध्ये स्थितिं चक्रे ब्राह्मणो ज्ञानिसत्तमः । पुत्र्यः पञ्च तथा सप्त ह्यपुत्रो वित्तसंयुतः ॥ ७ ॥
कालेन मृत्युमापन्नो धनलुब्धो निराधिकः । तस्य भार्या महासाध्वी साहसं कृतवत्यथ ॥ ८ ॥
क्रियाकर्मादिकं तस्य सा चकारौर्द्धदेहिकम् । क्षत्रियाणां चिन्तयित्वा ह्यपुत्रस्य च जन्मिनः॥९॥
द्रव्यं वै क्षत्रियो राजा गृह्णीयादिति दुर्मतिः । स वै विप्रस्य सर्वस्वं हृतवानर्थलोलुपः ॥ १० ॥
ब्राह्मणी च तथा पुत्र्यो धनाभावेन दुःखिताः । सर्वाः कन्या निराधाराः पित्रभावेन दुःखिताः११
सर्वस्वहरणाद्वापि गताः कन्या इतस्ततः । काचिन्मातुर्गता पक्षे काचित्पित्र्ये तथा गता ॥ १२ ॥
प्रादुर्भावः क्षत्रगृहे प्रजातस्तस्य कर्मणः । यो वै क्षात्रगृहे पुत्रः स वै जज्ञे हि ब्राह्मणः ॥ १३ ॥
योऽसौ तस्य मृतः पुत्रो धनलुब्धः स एव हि । एवं पुत्रो यदा स्याद्व ह्युत्तमर्णः स वै स्मृतः ॥ १४ ॥
एवं ब्रह्मस्वकं प्राप्तं पुत्रपुत्रीस्वरूपधृक् । पुराकृतानि कर्माणि भुज्यन्ते चेह मानवैः ॥ १५ ॥
तेन कर्मविपाकेन कन्या जाता मृतास्तथा । तस्य पापस्य नाशाय निष्कृतिः क्रियते शुभा॥१६॥

अरुण उवाच ।

का तस्य निष्कृतिः स्वामिन्येन पापक्षयो भवेत् । सन्ततेः स लभेत्सौख्यं लोकानां हितकाम्यया १७

श्रीसूर्य उवाच ।

शुभे त्ववसरे प्राप्ते ह्ययने शुभवासरे । प्रारभेद्धरिभक्तश्च सँवत्सरविधिः स्मृतः ॥ १८ ॥
प्रत्यहं परमेशानं विष्णुमव्यक्तमव्ययम् । पौरुषेणेह सूक्तेन अर्चयेन्मासमासकम् ॥ १९ ॥
कुंकुमागरुकर्पूरैश्चन्दनैस्तुलसीदलैः । पुष्पैर्धूपैश्च दीपैश्च ह्युपचारैः पृथक्पृथक् ॥ २० ॥
भौमाप्यनाभसैस्तेजोवायव्यैः पञ्चभिस्तथा । एवं व्रतपरा नारी भर्तृभक्तिपरायणा ॥ २१ ॥
अर्चयन्ती हरिं पूर्णं वर्षावधि समाचरेत् । शुभे मासे शुभे पक्षे चैकादश्यामुपोषिता ॥ २२ ॥
शुभनक्षत्रयुक्तायां द्वादश्यां पुत्रकाम्यया । पूर्ववद्धरिमभ्यर्च्य ऋग्भिः षोडशभिः प्रभुम् ॥ २३ ॥
विधिवद्वह्निमास्थाय ह्यर्चयेद्वैष्णवं चरुम् । आज्यभागावसाने तु कपिलाज्याहुतिर्हविः ॥ २४ ॥

पौरुषेण तु सूक्तेन यावत्षोडशसंख्यया । अश्वत्थसमिधस्तिस्रो जुहुयात्षोडशैव तु ॥ २५ ॥
पुनराज्यं ततो हुत्वा जुहुयाच्च चरुन्तथा । होमान्ते द्विजभोज्यान्ते दानमेतत्समाचरेत् ॥ २६ ॥
हिरण्यामूर्तिं वासांसि धेनुं वत्ससमन्विताम् । विप्रस्योद्वाहनं कृत्वा कन्यां चालंकृतामपि ॥ २७ ॥
दक्षिणां प्रतिपद्याथ छलकैतित्यवर्जितः । प्राश्नीयात्तं हविश्शेषं सह पत्न्या हरिं स्मरेत् ॥ २८ ॥
इति कृत्वा विधिं नारी पुत्रं प्राप्नोति वैष्णवम् । सुभगा शुद्धरूपा च न च वेष्टितालिपा ॥ २९ ॥
ऐहिकं लक्षणं चिंत्यं पूर्वकर्मानुसारतः । गुल्मार्शसां तथा बाधा गुदान्तर्व्रणजार्तयः ॥ ३० ॥
वातरक्तादिशिरसो नेत्रमर्मार्तिनो व्रणः । स्तनोपगौरवं दद्रुरेवं तत्पादवैकृतिः ॥ ३१ ॥
जनश्रुतिं हि लोका वै ब्रुवते कारणं विना । हानिस्तु सर्ववस्तूनां द्रव्यनाशनजं भयम् ॥ ३२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकचत्वारिंशदुत्तरषट्शताधिकसहस्रतमः ॥ १६४१ ॥

श्रीसूर्य उवाच ।

काचिच्छूद्रकुले पूर्वमासीत्पुण्या वराङ्गना । तदा दानरता जाता कुरुक्षेत्रे खगाधिप ॥ १ ॥
सर्वैः सुखैः सदोपेता सर्वसम्पत्तिसंयुता । तदा कृतं महापापं भाविनोऽर्थस्य गौरवात् ॥ २ ॥
सर्मीपे वासिनश्चास्या ब्राह्मणस्य नवं गृहम् । निर्दग्धं वह्निदाहेन वैरिभावात्खगाधिप ॥ ३ ॥
तत्र दग्धा महाभाग गौरपापा गृहे स्थिता । कृत्वैवमद्भुतं कर्म भुक्त्वा तु नरकान्सुत ॥ ४ ॥
दानधर्मकृतात्पुण्यात्सात्र जाता हि वाहुजा । माथुरे मण्डले पुण्ये वृषलग्रोपलक्षिते ॥ ५ ॥
सुखदुःखसमाक्रान्ता जातसन्ततिनाशकृत् । दुःखैरनेकैर्युक्ता च मध्यभागे खगाधिप ॥ ६ ॥
प्रायश्चित्तं परं चास्या गङ्गायां पितृतर्पणम् । कुरुक्षेत्रादिवसनं प्राक्पापानां विनाशनम् ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विचत्वारिंशदुत्तरषट्शताधिकसहस्रतमः ॥ १६४२ ॥

श्रीसूर्य उवाच ।

चक्रपादरुजा युक्तश्चात्र जन्मनि जायते । पूर्वजन्मनि यो मोहाद्ध्याच्छ्वानं खगाधिप ॥ १ ॥
निष्कत्रयं प्रदातव्यं सुवर्णं वेदवेदिने । दानेनानेन विधिना पूर्वपापापनोदनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिचत्वारिंशदुत्तरषट्शताधिकसहस्रतमः ॥ १६४३ ॥

श्रीसूर्य उवाच ।

यः शूद्रं घातयेन्मोहात्पूर्वजन्मनि मानवः । दन्तपातनजाद्रोगात्पीडामाप्नोति निश्चयात् ॥ १ ॥
दद्याद्धेनुं सवत्सां च सर्वालङ्कारभूषिताम् । प्राजापत्यं चरेदेकं विधिना रोगनाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुश्चत्वारिंशदुत्तरषट्शताधिकसहस्रतमः ॥ १६४४ ॥

श्रीसूर्य उवाच ।

या नारी मोहतो हन्याच्छानं हि गरुडाग्रज । पूर्वजन्मनि सा चात्र चक्रपादेन पीड्यते ॥ १ ॥
तथा तत्पापशुद्ध्यर्थं स्वर्णं निष्कत्रयं सुत । देयं विप्राय विधिना चक्रपादप्रणाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायःपञ्चचत्वारिंशदुत्तरषट्शताधिकसहस्रतमः ॥ १६४५ ॥

श्रीसूर्य उवाच ।

शूद्रघातकरी पूर्वं या काचित्पापमोहिता । सात्र जन्मनि दुःखाच्च दन्तपातनजात्कृशा ॥ १ ॥
विधिवद्धेनुदानाच्च ब्राह्मणाय कुटुम्बिने । प्राजापत्याद्व्रतादेकात्तस्मात्पापात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्चत्वारिंशदुत्तरषट्शताधिकसहस्रतमः ॥ १६४६ ॥

श्रीसूर्य उवाच ।

कश्चिदासीत्पुरा सूत चारणो ज्ञानदुर्बलः । शिवभक्तिपरो नित्यं देवतातिथिपूजकः ॥ १ ॥
देशे मालवके पुण्ये स्थले पूर्वभवेण्डज । तत्र दानानि दत्तानि ब्राह्मणस्य करग्रहे ॥ २ ॥
स कदाचिन्महाभाग पापं वै कृतवान्भृशम् । दधार गर्भं स्वज्ञात्यां कामलोभेन निश्चयात् ॥ ३ ॥
यत्ने कृतेऽपि तत्रैव नासीद्गर्भस्य पातनम् । मृता सा तेन दुःखेन गर्भपातेन चाण्डज ॥ ४ ॥
एवं बहुतिथे काले गता सा यमशासनम् । भुक्त्वा पापफलं दुःखं पुण्याल्लोकाञ्छुभानिह ॥ ५ ॥
पूर्वपुण्यप्रभावेण जातो वै पादजस्त्विह । गोदावर्याः समीपे तु देशे रम्ये जलाश्रये ॥ ६ ॥
स रक्तकृष्णो मतिमान्दीर्घो मध्यः पृथुः सुधीः । आदिभागे धनी भोगी मध्यमेत्यन्तसौख्यभाक् ॥
पुण्यादिदं तथा पापाल्लोभी पापरतः सदा । चिन्तादिसहितश्चात्र दाने स्वल्पमतिः शठः ॥ ८ ॥
स्वज्ञात्यां वीर्यदानाच्च जातपुत्रविनाशकः । लक्ष्मैतदण्डजश्रेष्ठ जन्माङ्गात्षष्ठभावगः ॥ ९ ॥
भौमः सुतेश्वरे पापग्रहैर्युतनिरीक्षितः । लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥ १० ॥
पलद्वयमिता कार्या बाहुजा गर्भसंयुता । सर्वावयवसंयुक्ता सौवर्णी भूषणान्विता ॥ ११ ॥
तदर्धमितिका वापि निजवित्तानुसारतः । सम्पूज्य वेदविदुषे दद्याद्दोषापनुत्तये ॥ १२ ॥
माषसप्तमितो देयो भौमः स्वर्णमयः शुभः । गायत्रीमयुतं जप्त्वा त्र्यम्बकन्तु सहस्रकम् ॥१३॥
होमयेत्तद्दशांशेन कपिलैकां प्रदापयेत् । य एवं कुरुते सूत प्रायश्चित्तं च पापनुत् ॥ १४ ॥
तस्य पुत्रविवृद्धिः स्याज्जन्मन्यत्रैव निश्चयात् । नैवं करोति यो मोहाल्लोभात्पापविशोधनम् ॥१५॥
न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः । आयुरष्टाद्रिवर्षाणि प्रायश्चित्ते कृते त्विह ॥ १६ ॥
प्रायश्चित्तेऽकृते रिष्टं पञ्चाशन्मितकेब्दके ॥ १७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तचत्वारिंशदुत्तरषट्शताधिकसहस्रतमः ॥ १६४७ ॥

श्रीसूर्य उवाच ।

यश्च बभ्रुं महाभाग हन्यान्मोहान्नराधमः । बभ्रुमण्डलरोगार्तः सोऽत्र जन्मनि जायते ॥ १ ॥
निष्कद्वयसुवर्णस्य कृत्वात्र नकुलं शुभम् । बभ्रुमण्डलनाशाय ब्राह्मणाय प्रदापयेत् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टचत्वारिंशदुत्तरषट्शताधिकसहस्रतमः ॥ १६४८ ॥

श्रीसूर्य उवाच ।

काचिच्चारणजा नारी बभूव प्रियवादिनी । व्रतदानरता साध्वी पूर्वजन्मनि चाण्डज ॥ १ ॥
तया ग्रामान्तरे गत्वा निर्दग्धं गह्वरं वनम् । निर्दग्धा बहवस्तत्र जीवास्तस्याश्रयं गताः ॥ २ ॥
ततो बहुतिथे काले प्राप्य तज्जनितं फलम् । तत्र दानवशात्पूर्वमत्र सा पादजा स्मृता ॥ ३ ॥
जीवघातात्तथा पूर्वपापादत्रैव जन्मनि । जातसन्ततिहीना सा कुष्ठरोगेण पीडिता ॥ ४ ॥
प्रायश्चित्तं प्रवक्ष्यामि येन सम्पद्यते सुखम् । गृहवित्तषडंशेन देया जीवाः सुवर्णजाः ॥ ५ ॥
घटयित्वा विधानेन नानारूपा गृहोरगाः ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनपंचाशदुत्तरषट्शताधिकसहस्रतमः ॥ १६४९ ॥

श्रीसूर्य उवाच ।

शघाती महाभाग कुब्जकर्णः प्रजायते । निष्कृतिं तस्य पापस्य शृणु चात्र खगाधिप ॥ १ ॥

शय्यां सोपस्करां दद्याद्वेदवेदाङ्गपारगे। तस्माद्दोषात्प्रमुच्येत नात्र कार्या विचारणा ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चाशदुत्तरषट्शताधिकसहस्रतमः ॥ १६५० ॥

श्रीसूर्य उवाच।

कश्चिच्छूद्रोऽभवत्पूर्वं दानधर्मक्रियापरः। द्विजानां पूजको दक्षः सिन्धुमण्डलजोऽण्डज ॥ १ ॥
देवद्रव्यविहीनोऽभूत्कृतं कर्मातिदारुणम्। स्वपत्नी स्थापितां पण्यशालायां हि खगाधिप॥ २ ॥
पण्यस्त्रीकर्मतश्चासौ चकार ह्युपजीवनम्। ततो मृत्युवशं प्राप्तो भुक्त्वा तत्पापजं फलम् ॥ ३ ॥
प्राग्दानवशतश्चात्र जन्मन्यास्ते स पापकृत्। शूद्राऽधमोऽथ वै पंढः पूर्वपापात्खगेश्वर ॥ ४ ॥
निष्कृतिस्तस्य पापस्य नोक्ता पापाद्दृढात्सुत ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकपंचाशदुत्तरषट्शताधिकसहस्रतमः ॥ १६५१ ॥

श्रीसूर्य उवाच।

या नारी नकुलं पूर्वं घातयेद्विनतासुत। सोऽत्र जन्मनि रोगेण वह्निमण्डलजेन च ॥ १ ॥
पापोद्भवेन सततं पीडिता भवति ध्रुवम्। तद्रोगनाशनं दद्याद्भक्तं निष्कद्वयस्य च ॥ २ ॥
ब्राह्मणान्भोजयेत्पश्चात्पूर्वपापोपनोदनम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विपंचाशदुत्तरषट्शताधिकसहस्रतमः ॥ १६५२ ॥

अरुण उवाच।

कश्चित्क्षात्रकुले जातो नानावृत्त्यातिलाभवान्। नानासन्धिभवा बाधा ह्युदरार्तिः प्रजायते ॥ १ ॥
मेहो वै कुरुते नित्यं नेत्रतोदं विरश्मिताम्। कटिपृष्ठोरुपीडा वै बाल्ये स्याद्ग्रहणीगदः ॥ २ ॥
तस्य भार्या सदाचारा विज्ञेया व्रतकारिणी। सौभाग्यसुखसम्पन्ना पितृमातृसुखोज्झिता ॥ ३ ॥
कथं सन्ततिहीना च कथं कर्मणि लिप्यते ॥ ४ ॥

श्रीसूर्य उवाच।

पूर्वं वर्णोत्तरो जातस्तस्करो वस्त्रहारकः। निषादैः सह संभूय जातस्तत्कर्मतत्परः ॥ ५ ॥
वनानामन्तरे प्राप्ते कश्चिद्विप्रः समागतः। गृहीत्वा तस्य सर्वस्वं यत्किञ्चिच्चार्जनं कृतम् ॥ ६ ॥
तत्र वै निहतो विप्रस्तस्करेण दुरात्मना। तस्करोऽसौ मृतश्चापि जातो वै वनपन्नगः ॥ ७ ॥
स पश्चान्नरके घोरे पतितोऽयुतसंख्यया। पश्चान्मानुष्यमापन्नः किञ्चित्पुण्यप्रभावतः ॥ ८ ॥
स्वर्णकारगृहे जातः पूर्वजन्मनि मानद। इदं चतुर्थं वै जन्म वंध्यात्वं चोपजायते ॥ ९ ॥
व्यभिचारवशाज्जातस्तस्करः पूर्वजन्मनि। केन कर्मविपाकेन स्त्रीपुंसोर्जायते त्विह ॥ १० ॥
पुत्रहीनत्वमिह वै वन्ध्यात्वं जन्मजन्मनि ॥ ११ ॥

अरुण उवाच।

प्रायश्चित्तं कथं देव येन पापक्षयो भवेत्। सन्ततेः सुखमाप्नोति वंध्या तद्ब्रूहि भास्कर ॥ १२ ॥

श्रीसूर्य उवाच।

शुभे त्ववसरे प्राप्ते शुभतीर्थादिसङ्गमे। विधाय विधिवत्पूर्वं कृत्यं स्मृत्याभिभाषितम् ॥ १३ ॥
विप्रस्योद्वाहनं कृत्वा ग्रहदानं यथाविधि। धनधान्यादिकं दत्त्वा तोषयेद्विप्रयाजकान् ॥ १४ ॥
विष्टिपाते व्यतीपाते संक्रान्तौ ग्रहणाहनि। पुण्याहविधिमातिष्ठेदनपत्याघनाशनम् ॥ १५ ॥
सुशुभे भूप्रदेशे तु समे कम्बलविस्तृते। विदधीत तिलद्रोणैस्त्रिभिः पर्वतमुत्तमम् ॥ १६ ॥

परितोऽरत्निमात्रं तु द्रोणमानं सुतण्डुलैः । विदध्यात्पर्वतारामान्देवद्रुमविभूषितान् ॥ १७ ॥
ततस्तौ दम्पती शुद्धौ स्नातावहतवाससौ । दधानौ शुभभूषादि चिन्तयन्तौ प्रजापतिम् ॥ १८॥
तस्यादितेश्च तत्पत्न्याः कुर्यान्मूर्तिं प्रजापतेः । शुद्धवर्णसुवर्णस्य निष्कद्वयविनिर्मिताम् ॥ १९॥
हेमयज्ञोपवीतां च साक्षमालाकमण्डलुम् । अदितेरपि केयूरहारग्रैवेयभूषिताम् ॥ २० ॥
तदर्धस्य विभागेन तनुं तस्याः शुभाकृतिम् । स शैवीमर्चयेन्मूर्तिं विष्णोर्वामनरूपिणः ॥ २१ ॥
मन्मूर्तित्रितयं सम्यक्कृतसंस्कारमर्चयेत् । कृत्वा प्रतिष्ठितप्राणं जातकर्माथ पुंस्त्रियोः ॥ २२ ॥
बाललीलाधरं विष्णुं वामनं सुविचिन्तयेत् । मातरं द्रष्टुमिच्छन्तं हरिं नमनकांक्षया ॥ २३ ॥
ततस्तदाश्रमाच्चैव सुमेरोस्तिलपर्वतात् । प्रत्यन्तगिरिमायान्तं मार्गैः स्वपदभूषितैः ॥ २४ ॥
अदितिं समपश्यन्तीं विरहाकुलचेतसम् । रुदतीमिति तंद्रष्टुं तत्परर्पीन्समीक्षतीम् ॥ २५ ॥
एवं ध्यात्वाथ तां मन्त्रैर्मन्त्रार्थोदितलक्षणाम् । प्रसूनधूपगन्धाद्यैरर्चयेदितिविह्वलाम् ॥ २६ ॥
तद्विप्रासोऽथ तद्विष्णोर्विष्णोः कर्माणि पश्यत । ततस्तां वैष्णवीं मूर्तिं मातुरुत्सङ्गगामिनीम्॥२७॥
कृत्वा तस्याः प्रतिष्ठान्तं लब्धपुत्रान्विचिन्तयेत् । अपश्यन्ती त्विमं मन्त्रं मन्त्रार्थगतलक्षणम्॥२८॥
सुपुत्रसहितां देवीमर्चयेद्विविधैर्गुणैः । ततो ब्राह्मणमध्यात्तु समाहूय गुणान्वितम् ॥ २९ ॥
तस्मै तां प्रतिमां दद्यात्सुपुत्रां मुदिताननाम् ॥ ३० ॥

मन्त्रः ।

"यन्मया निहतो विप्रो धनं हृत्वा घने वने । तस्करासङ्गमे पापं प्राप्तमेवोल्बणं महत् ॥ ३१ ॥
तस्य पापस्य नाशाय दानमेतद्दाम्यहम् । सौवर्णीं प्रतिमामेनामनघास्यामहं त्विति" ॥ ३२ ॥
भोजयेच्च शतं विप्रान्सर्पिष्यात्मानमीक्षयेत् ॥ ३३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिपंचाशदुत्तरषट्शताधिकसहस्रतमः ॥ १६५३ ॥

श्रीसूर्य उवाच ।

उलूकघातने पूर्वजन्मनीह च पुत्रक । पाण्डुरोगेण सततं पीडितो वै भवेद्भृशम् ॥ १ ॥
कस्तूरिकापलं चैकं दद्याद्विप्राय पर्वणि । उलूकघातजं पापं सर्वं नश्यति तत्क्षणात् ॥ २ ॥
तत्पापस्योपशमने पाण्डुरोगो विनश्यति ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःपंचाशदुत्तरषट्शताधिकसहस्रतमः ॥ १६५४ ॥

श्रीसूर्य उवाच ।

या नारी घातयेत्काचिदुलूकं पूर्वजन्मनि । पाण्डुरोगेण सततं पीडयते चात्र जन्मनि ॥ १ ॥
दद्यादत्र विधिज्ञाय पलमेकं खगाधिप । कस्तूरिकाया विप्रस्य पाण्डुरुङ्नाशनं परम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायःपंचपंचाशदुत्तरषट्शताधिकसहस्रतमः ॥ १६५५ ॥

श्रीसूर्य उवाच ।

वैनतेय महाभाग शृणु प्राक्कर्मणः फलम् । पुरा कश्चित्कलिङ्गेऽभूद्विजो धर्मक्रियापरः ॥ १ ॥
बहुस्त्रीबालसंयुक्तो गोधनैश्च समन्वितः । गयायां कृतवाञ्छ्राद्धं विधिना च समन्वितम् ॥ २ ॥
स ततः कृतवान्पापं कामलोभेन निश्चयात् । ज्येष्ठां त्यक्त्वा ऋतुप्राप्तां धर्मिष्ठां प्रियवादिनीम्॥३॥
रतिं ददौ कनिष्ठायां वातितस्त्रीविमोहितः । जीवित्वा सुचिरं कालं पश्चान्मृत्युमुपागतः ॥ ४ ॥
शुभाच्छुभफलं भुक्त्वा पापान्नरकयातनाः । गयाश्राद्धप्रभावेण जातश्चात्रापि वै द्विजः ॥ ५ ॥

देशे रम्यस्थले पुण्ये नदे लोहितसंज्ञके । मध्ये वयसि स्त्रीयुक्तो धनबुद्धिसमन्वितः ॥ ६ ॥
शुभादिदं तथा पापान्नानादुःखसमन्वितः । मूलं तं नरकस्यैकं स्त्रीवशित्वं गमिष्यति ॥ ७ ॥
सहित्वा ह्यपमानं वै पूर्वपापावशेषतः । ब्राह्मणो योगयुक्तश्च भविष्यति कलौ युगे ॥ ८ ॥
काश्यां मृत्युवशादन्ते शिवत्वमुपयास्यति ॥ ९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्पञ्चाशदुत्तरषट्शताधिकसहस्रतमः ॥ १६९६ ॥

श्रीसूर्य उवाच ।

यः कामतश्चरेत्पूर्वं ब्रह्महत्यां नराधमः । क्षयरोगान्वितः सोऽपि जायते चेह जन्मनि ॥ १ ॥
ब्रह्महत्यासमुद्भूतात्पापाद्दुःखप्रदात्सुत । प्रायश्चित्तं मया नोक्तं पापान्मुक्तिस्त्रिजन्मसु ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तपञ्चाशदुत्तरषट्शताधिकसहस्रतमः ॥ १६९७ ॥

श्रीसूर्य उवाच ।

ब्राह्मणं घातयेद्यस्तु पूर्वजन्मनि मानवः । मोहादकामतः सोऽपि क्षयरोगसमन्वितः ॥ १ ॥
क्षयेणात्र क्षयं यान्ति धातवः सर्वदेहिनाम् । धातुक्षयेऽतिकष्टेन नष्टायुर्जायते पुमान् ॥ २ ॥
सर्वस्वदानादत्रैव क्षयरोगः प्रशाम्यति । कुरुक्षेत्रादितीर्थेषु सत्पात्रेषु विधानतः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टपञ्चाशदुत्तरषट्शताधिकसहस्रतमः ॥ १६९८ ॥

श्रीसूर्य उवाच ।

कश्चिद्विप्रो महासाधुश्चारुवर्णः प्रतापवान् । आचारकुलधर्मज्ञो देवाग्निद्विजवत्सलः ॥ १ ॥
संयुतो वायुपित्ताभ्यां किञ्चिद्वित्तसमन्वितः । तस्य भार्या सदाचारा किञ्चिच्च क्लेशकारिणी ॥२॥
पतिभक्ता पतिप्राणा व्रतानामनुकांक्षिणी । ऋतुहीना कथं जाता कस्येदं कर्मणः फलम् ॥ ३ ॥

श्रीसूर्य उवाच ।

नारीणां जारगर्भाणामसतीनां कुलच्छिदाम् । यद्वाऽचिरप्रसूतानां शीघ्रं गर्भः समुद्भवेत् ॥ ४ ॥
औषधैश्छेदनैर्दुष्टैः प्रलेपैर्दुष्टभक्षणैः । संवाहनैस्तथा घातैरन्यैर्वा वस्तिकर्मभिः ॥ ५ ॥
गर्भस्य पातनोपायं करोत्यपि च कीर्तितम् । पुंस्कृतं नैव तत्कर्म स्त्रीकृतं नात्र संशयः ॥ ६ ॥
नारी जन्मान्तरे प्राप्ते न सा गर्भं बिभर्ति हि । पूर्वं वैश्यकुले जाता सपत्नीसहिता खग ॥ ७ ॥
अनया चेर्ष्यया सूत सन्ततेर्नाशनाय च । औषधैश्छेदनाद्यैस्तु तस्यार्थे कल्पितो गदः ॥ ८ ॥
सपत्न्यै प्रेरयामास विधिना चैव तं गदम् । तया वै ऋतुभावाच्च परिपीतं तदौषधम् ॥ ९ ॥
पुष्पं प्रणाशितं तस्यास्तस्मिञ्जन्मनि मानद । ऋतावृतौ च सम्प्राप्ते जातासौ विविधातुरा ॥१०॥
वेदना वै समभवन्नस्रग्वातोदरामयाः । पुष्पे नष्टे फलं नष्टं कदाचिद्गर्भपातनम् ॥ ११ ॥
एतत्कर्मकृतं चैव त्रिविधं गर्भदोषकृत् । तथापि फलहन्तॄणां द्वितीयं सुकृतं चरेत् ॥ १२ ॥
ऋतुघातो दुष्टबुद्ध्या कृतो वै पूर्वजन्मनि । तेनैव कर्मणा वत्स विविधं पुष्पवन्ध्यनम् ॥ १३ ॥
गर्भाशयमधिश्रित्य स्रवति शोणितं बहु । छिद्यन्त इव चान्त्राणि सूचीभिरिव भिद्यते ॥ १४ ॥
वेदना याः पुराऽभूवंस्त्रीणां गर्भनिपातने । तावत्कालं तथैवेह तासां गर्भं निपातयेत् ॥ १५ ॥
तथाविधं सर्वदुःखं गर्भपातनजं भवेत् । एवं तु लक्षणैर्ज्ञात्वा कर्माणि स्त्री समाचरेत् ॥ १६ ॥
एकवासोविधिं चैव दम्पती तीर्थसङ्गमे । सुशुभे भूप्रदेशे तु पुराणोक्तविधानतः ॥ १७ ॥
सम्प्रणाशाय दुष्टस्य प्रायश्चित्तमिहैनसः । प्रौष्ठपद्यां तृतीयायां शुक्लायां व्रतमाचरेत् ॥ १८ ॥

एकवासोविधिं चैव दम्पती तीर्थसङ्गमे । यत्नेन गार्भिकं धीमानुपोषणपरायणः ॥ १९ ॥
पुष्पैर्नानाविधैः शुभ्रैरर्चयेद्गिरिजाप्रियम् । केतकैर्गर्भसंयुक्तैश्चम्पकैः कुमुदोत्पलैः ॥ २० ॥
सौवर्णीं राजतीं ताम्रीं मूर्तिं गौर्याः प्रकल्पयेत् । हारनूपूरमुकुटकुण्डलाभरणादिकम् ॥ २१ ॥
नैवेद्यैः सुखकासारमोदकापूपपायसैः । उपातिष्ठेत विधिवद्भवानीप्रियवल्लभम् ॥ २२ ॥
पतिपुत्रवतीभिस्तु स्त्रीभिः सह शुचिस्मिता । रात्रौ जागरणं कुर्याद्गीतनृत्यादिपूर्वकम् ॥ २३ ॥
फलैर्नानाविधैरर्घ्यं दद्यान्मन्त्रपुरःसरम् । फलपुष्पाक्षतोपेतमंजलिं मूर्ध्नि निक्षिपेत् ॥ २४ ॥

मन्त्रः ।

"नमस्तेऽस्तु महादेवि नमस्ते गिरिशप्रिये । गृहाणार्घ्यमिमन्देहि पुत्रान्मह्यं यशस्विनः" ॥२५॥
पतिपुत्रवती नारी गिरिजावत्प्रसूयते । एवं रात्रौ विधानेन पूजयेत्परमेश्वरीम् ॥ २६ ॥
ततः प्रभाते विमले कृतप्रातःक्रिया सती । देवीमुद्दिश्य विधिवद्भोजयेत्षोडश स्त्रियः ॥ २७ ॥
नानाविधैर्भक्ष्यभोज्यैर्ब्राह्मणानथ षोडश । प्रत्येकं वैणवं पात्रं सप्तधान्यसमन्वितम् ॥ २८ ॥
सौभाग्याष्टकसंयुक्तं वस्त्रयुग्मेन संयुतम् । दातव्यं गिरिजाप्रीत्यै पुत्रसौभाग्यकाम्यया ॥ २९ ॥
सगर्भां च वृषोपेतां सिताङ्गां वस्त्रसंयुताम् । साहिरण्यां ततो दद्याद्विप्रायः गुणशालिने ॥ ३० ॥

दानमन्त्रः ।

"पातयन्ती पुरा गर्भं दुष्टस्त्रीणां वशं गता । स एव वन्ध्यताहेतुस्तन्मां मोचय चाम्बिके ॥
तव दानेन पुत्रा मे भवेयुः सुभगाः सति" ॥ ३१ ॥
इमं मन्त्रं समुच्चार्य दत्त्वा विप्रं विसर्जयेत् । एवं व्रतपरा नारी गर्भपातं न पश्यति ॥ ३२ ॥
युज्यते पुत्रपौत्राद्यैः सा पत्या सह मोदते । न लभेद्गर्भपातं सा पतिपुत्रसुखं च वै ॥ ३३ ॥
तृतीये वा चतुर्थे वा मासि गर्भं सुविन्दति । रजतस्य पलाभ्यां वै कोशं गर्भाश्रयाकृतिम् ॥ ३४ ॥
प्रार्थयेत ततो भक्त्या ध्यायती गिरिजां सतीम् । सुवर्णनिष्कगर्भं च कृत्वा दत्त्वा द्विजन्मने ३५
"गर्भपातं प्रकुर्वन्त्या मया प्राक्तनजन्मनि । यदघं वन्ध्यकृत्प्राप्तं तस्मान्मोच्येह जन्मनि" ॥
जन्मजात्यादिकं वत्स न वदेदिह कर्मणाम् ॥ ३६ ॥
इदं चतुर्थं वै जन्म भूमिदेवकुलोद्भवम् । सपत्नीसादिता पूर्वं सा वै गर्भस्य दोषकृत् ॥ ३७ ॥
तस्या इमानि वोध्यानि लक्षणानीह जन्मनि । यस्याः प्राक्पातितो गर्भः सपत्न्याः पतिवर्जिता३८
दीनानाथविरोधः स्यात्सविरोधात्तया सुत । अनुमन्ता प्रयोक्ताऽपि पितृमातृसुखोज्झितः ॥३९॥
वन्धुसन्ततिदुःखी स्यात्सर्वस्तस्मै विरुद्ध्यति । शोकः स्यादुदरे बाधा तद्वत्प्लीहादिविभ्रमः॥४०॥
अन्तरा स्यन्दमानो वा गर्भः सन्नोपलक्ष्यते । पाणिमुष्टितलाघाताज्जानुनी विकृतिं गते ॥ ४१ ॥
दोषो ज्वराग्निजो वापि शस्त्रजोऽश्मादिजोऽपि वा । ब्राह्मणान्भोजयेद्भक्त्या सर्पिष्यात्मानमीक्षयेत्४२

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनषष्ट्युत्तरषट्शताधिकसहस्रतमः ॥ १६५९ ॥

श्रीसूर्य उवाच ।

सीमावादरतः कश्चिद्ब्राह्मणः पूर्वजन्मनि । तेन तत्र द्विजः सूत घातितो भूमिलोभतः ॥ १ ॥
सहायपञ्चयुक्तेन कृतं कर्मातिदारुणम् । तत्पापजान्महाघोरान्नरकान्प्राप्य दारुणान् ॥ २ ॥
तथा चिरं च तिर्यक्त्वं विभुज्याधर्मतः स्वयम् । कर्मक्षयेऽतिपुण्यात्प्राक्सोऽत्र जातो हि बाहुजः॥३॥
क्षयरोगयुतः सूत कृशोदरसमन्वितः । लग्ने कुम्भाभिधे सूत भौमश्चन्द्रयुतोण्डज ॥ ४ ॥

रिष्टं षष्टिमिते वर्षे जायते विन्मयेऽकृते। सहायाः पूर्वजा ये तु तेषां वक्ष्यामि लक्षणम् ॥ ५ ॥
तदग्रे तु मृताश्चात्र पुत्रक्षयरुजान्विताः। रिष्टेन वायुषो भङ्गो दृढपापान्न निष्कृतिः ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षष्ट्युत्तरषट्शताधिकसहस्रतमः ॥ १६६० ॥

श्रीसूर्य उवाच।

राजपुत्रोऽभवत्कश्चिद्धर्मशास्त्रार्थकोविदः। गत्वा शत्रुपुरं सूत कदाचिन्मदसंयुतः ॥ १ ॥
ददाह तत्पुरं शत्रोस्तत्क्षणे लुण्ठितं पुनः। तत्रैको ब्राह्मणो दग्धो वृद्धो विद्याविशारदः ॥ २ ॥
पापमाचरितं तेन चाज्ञानाद्ब्रह्मघातजम्। अथो यमाज्ञया सर्वा भुक्त्वा नरकयातनाः ॥ ३ ॥
पुण्यशेषादथोऽत्रापि स जातः क्षत्रियाधमः। देशेऽयोध्याभिधे गौरो लघुर्दक्षो महोद्यमी ॥ ४ ॥
युवभावे महान्धेन ब्राह्मणा वै प्रपीडिताः। ब्रह्महा क्षयरोगी स्यादिति वेदविदो विदुः ॥ ५ ॥
निष्कृतिं तां प्रवक्ष्यामि यां कृत्वा मुच्यते त्विह। कार्यास्तत्र त्रिदेवानां मूर्तयस्तु यथोदिताः ॥६॥
ब्रह्मविष्णुमहेशानां सर्वरोगविनाशिकाः। सुवर्णजास्तथा कार्या कदली पत्रसंयुता ॥ ७ ॥
यथावित्तानुसारेण शाठ्यं द्रव्ये विवर्जयेत्। देयास्ता विप्रमुख्येभ्यो क्षयरोगोपशान्तये ॥ ८ ॥
ब्राह्मणान्भोजयेच्छक्त्या होमयेच्च जपेत्तथा। गायत्रीं विधिना सूत पूर्वपापापनुत्तये ॥ ९ ॥
एवं कृते महाबाहो क्षयस्तस्योपशाम्यति। नैवं कुर्यात्तु यो मृत्युरष्टाविंशन्मितेब्दके ॥ १० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाके ऽध्याय एकषष्ट्युत्तरषट्शताधिकसहस्रतमः ॥ १६६१ ॥

श्रीसूर्य उवाच।

या योषिदाचरेत्काचित्पूर्वजन्मनि निश्चयात्। ब्रह्महत्यां तु विज्ञेया सा चेह क्षयरुग्युता ॥ १ ॥
न तस्याः पापशमनं यथोक्तं च खगाधिप। महापापकृताद्रोगान्मृत्युरेव न संशयः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विषष्ट्युत्तरषट्शताधिकसहस्रतमः ॥ १६६२ ॥

श्रीसूर्य उवाच।

स्वसृघाती च पुरुषो पूर्वजन्मनि मानद। वधिरो जायते त्वत्र प्रायश्चित्तं च तच्छृणु ॥ १ ॥
चान्द्रायणं व्रतं कुर्यात्सुवर्णपलसंयुतम्। पुस्तकं विधिवद्दद्यात्तस्मात्पापात्प्रमुच्यते ॥ २ ॥
भोजयेच्च यथाशक्ति द्विजांस्तदनु होमयेत् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिषष्ट्युत्तरषट्शताधिकसहस्रतमः ॥ १६६३ ॥

श्रीसूर्य उवाच।

या काचिदाचरेन्नारी पापं प्राग्ब्रह्मघातनम्। अज्ञानादत्र जनुषि क्षयरुक्पीडिता हि सा ॥ १ ॥
महापापकृताद्घोरात्तस्मात्सर्वस्वदानतः। क्षयरोगात्प्रमुच्येत नात्र कार्या विचारणा ॥ २ ॥
प्रयागे मकरस्थेऽर्के स्नानादत्रैव जन्मनि। काश्यां वासात्तथा सूत मुच्यते ब्रह्महत्यया ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःषष्ट्युत्तरषट्शताधिकसहस्रतमः ॥ १६६४ ॥

श्रीसूर्य उवाच।

मूकः प्रजायते जन्तुर्यः पूर्वं भ्रातृघातकः। बभूव कामतः सूत प्रायश्चित्तं न तत्समम् ॥ १ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचषष्ट्युत्तरषट्शताधिकसहस्रतमः ॥ १६६५ ॥

श्रीसूर्य उवाच ।

कलिङ्गदेशे प्राक्सूत काचिद्विजवरा स्मृता । पतिप्रिया धर्मशीला दानभोगरता सदा ॥ १ ॥
सा नार्यघातयत्पूर्वभवे मोहाच्च कुक्कुटम् । नासावक्रत्वमाप्नोति सात्र जन्मनि निश्चयात् ॥ २ ॥
हेमनिष्कत्रयं दद्याद्यावत्सैव प्रयत्नतः । ब्राह्मणाय महाभाग पापनाशकरं परम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्षष्ट्युत्तरषट्शताधिकसहस्रतमः ॥ १६६६ ॥

श्रीसूर्य उवाच ।

बभूव बाहुजः कश्चिद्देशे पञ्चनदे शुभे । धनधान्यसमायुक्तः पापकर्मा महोद्यमी ॥ १ ॥
विप्रोत्सङ्गगतः सोऽथ प्रयागे गरुडाग्रज । सुस्नातो मृगगे भानौ धूर्तकर्मा क्रियोज्झितः ॥ २ ॥
स प्राप्य स्वगृहं शीघ्रं कृतवान्कर्म दारुणम् । ग्रामे निवासिनोऽन्यस्य क्षत्रियस्य खगाधिप ३ ॥
ददाह भवनं रम्यं वैरभावात्पुरानघ । एका वत्सतरी दग्धा जीवाश्चापि विशेषतः ॥ ४ ॥
कालयोगेन सम्प्राप्तः स गतो यमशासनम् । भुक्त्वा पापफलं पापात्पुण्यात्पुण्यफलं तथा ॥ ५ ॥
पूर्वपुण्यप्रभावेण स जातः पादजोऽधुना । गङ्गायाः प्रान्तरे देशे शतयोजनसम्मिते ॥ ६ ॥
स मध्यरूपो बलवान्धर्मे स्वल्पमतिः शठः । बुद्ध्याधिकप्रचारी च पैतृकस्वल्पवित्तभाक् ॥ ७ ॥
सकन्यश्च सपत्नीको बन्धुभृत्यसमन्वितः । पुण्यादिदं फलं पूर्वात्पापादथ फलं शृणु ॥ ८ ॥
स बालवत्सकवधाज्जीवघातादपुत्रकः । सप्तवेदमिताब्दान्तं जातपुत्रविनाशकः ॥ ९ ॥
गोराशिगे शनौ भानौ षष्ठे जीवे मृगस्थिते । लक्ष्मैतदण्डजश्रेष्ठ पृच्छकस्येह जन्मनि ॥ १० ॥
पूर्वं या स्त्री सहायासीन्मृतवत्सात्र सा सुत ॥ ११ ॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन्सर्वपापनिषूदिनीम् । पुत्रवृद्धिकरीं धन्यामत्र जन्मनि निश्चयात् ॥ १२ ॥

श्रीसूर्य उवाच ।

शृणु सूत प्रवक्ष्यामि निष्कृतिं पापशोधिनीम् । पञ्चस्वर्णमिता कार्या सुरभी च हिरण्मयी १३॥
तदर्धमितिका वापि निजवित्तानुसारतः । सम्पूज्य विधिवन्मन्त्रैर्देया विप्राय धीमते ॥ १४ ॥
मार्षैर्वह्निमितैर्देयस्तथा पशुपतिः सुत । मापाभ्यां च तथा वह्निर्जीवा मापचतुष्कजाः ॥ १५ ॥
देयाश्च विधिना सूत पूर्वपापापनुत्तये । जपेत्पशुपतेर्मन्त्रं सहस्रं रिष्टनाशनम् ॥ १६ ॥
होमयेदष्टशतकं रुद्रस्याग्रे प्रयत्नतः । शृणुयाद्धरिवंशं वा दशावृत्त्या विधानतः ॥ १७ ॥
यः कुर्याद्विधिवत्सूत प्रायश्चित्तं विधानतः । जीविष्यन्ति च तत्पुत्रा जन्मन्यत्र ममाज्ञया ॥१८॥
नैवं कुर्याच्च यः शक्त्या त्रिधैवं पापशोधनम् । न जीवन्ति सुतास्तस्मिञ्जीवितेनात्र संशयः ॥१९॥
नवसप्ताब्दमायुः स्यात्प्रायश्चित्ते कृते त्विह । सप्तवेदमिते वर्षे रिष्टं चाकृतनिष्कृतेः ॥ २० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तषष्ट्युत्तरषट्शताधिकसहस्रतमः ॥ १६६७ ॥

श्रीसूर्य उवाच ।

काश्मीरमण्डले पूर्वं काचिद्विजवरांगना । पतिप्रिया शीलयुक्ता दानभोगरता सदा ॥ १ ॥
वैरिभावात्तयां स्मृत्या गृहं दग्धं द्विजस्य च । वैरिणस्तु सुतो दग्धो गृहदाहे खगाधिप ॥ २ ॥
सहायात्स्वामिनः सर्वं प्राग्भवे समुपार्जितम् । तत्पापजान्महाघोरात्फलं प्राप्य वियोनिजम् ॥३॥
सैव जाता विराटेऽत्र पतिशुश्रूषणात्सुत । क्षत्रिया धर्ममर्मज्ञा पूर्वपुण्यात्तथा सती ॥ ४ ॥

क्षयरोगयुता बाल्ये बालघातादपुत्रिणी । महाग्निदाहपापाच्च प्रायश्चित्तं न तत्समम् ॥ ५ ॥
त्रयोविंशमिते वर्षे रिष्टेनैवात्र नश्यति । सहायकः पतिश्चात्र पुत्रहीनः क्षयान्वितः ॥ ६ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टषष्ट्युत्तरषट्शताधिकसहस्रतमः ॥ १६६८ ॥

श्रीसूर्य उवाच ।

सारिकां यो महाभाग निहन्यात्पापमोहितः । तस्य च स्खलिता वाणी भवत्यत्रैव जन्मनि ॥१॥
दद्याद्धिरण्मयीं तत्र सारिकां शुभलक्षणाम् । तथात्र पुस्तकं दद्याद्यस्तस्य विधिनाण्डज ॥ २ ॥
पूर्वपापात्प्रमुच्येत नरोऽत्र गतकिल्बिषः ॥ ३ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनसप्तत्युत्तरषट्शताधिकसहस्रतमः ॥ १६६९ ॥

श्रीसूर्य उवाच ।

सारिकां घातयेन्नारी पूर्वं पापविमोहिता । सात्र जन्मनि जायेत वचनस्खलिताण्डज ॥ १ ॥
तया देया सुवर्णस्य सारिका ब्राह्मणाय वै । पूर्वपापात्प्रमुच्येत प्रयत्नाद्विनतासुत ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्युत्तरषट्शताधिकसहस्रतमः ॥ १६७० ॥

श्रीसूर्य उवाच ।

बकघाती च पुरुषः पूर्वजन्मनि मानद । लम्बकण्ठः प्रजायेत सोऽत्र जन्मनि निश्चयात् ॥ १ ॥
गां दद्याद्विधिवच्छ्वेतां सर्वाभरणभूषिताम् । मुच्यते कण्ठजाद्रोगान्नात्र कार्या विचारणा ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकसप्तत्युत्तरषट्शताधिकसहस्रतमः ॥ १६७१ ॥

श्रीसूर्य उवाच ।

या नारी पूर्वजनुषि घातयेद्गरुडाग्रज । बकं सा कण्ठरोगेण बाध्यते चात्र जन्मनि ॥ १ ॥
गां दद्याद्विधिना सूत श्वेतामत्र पयस्विनीम् । यथोपस्करसंयुक्तां तस्मात्पापात्प्रमुच्यते ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विसप्तत्युत्तरषट्शताधिकसहस्रतमः ॥ १६७२ ॥

अरुण उवाच ।

कश्चिद्द्विजकुले जातो धर्मिष्ठो वित्तसंयुतः । उदरे वातजा रोगा गुल्माद्याश्चोर्ध्वहृद्व्यथाः ॥ १ ॥
मोहाद्याः स्वल्पवीर्याश्च नेत्रपाण्डूदरामयाः । जायते शीर्षजा पीडा बाल्ये स्याद्ग्रहणीगदः॥ २ ॥
शरीरे जायते वह्नेरुपघातो व्रणादिकम् । पौत्राणां मातुलानाञ्च स्वस्रादेर्विधवाव्यथा ॥ ३ ॥
दायादाच्छत्रुवत्पीडा भूमिद्रव्यविलिप्सया । ऐहिकानि च लक्ष्माणि तस्य देहे भवन्ति हि ॥४॥
तस्य भार्या सदाचारा कदाचिद्रोषवादिनी । गौरवर्णा शुभा वाणी सन्तोषप्रियकारिणी ॥ ५ ॥
मृतवत्सा कथं जाता स्थिरगर्भमवाप्नुयात् । दशमासानतिक्रम्य गर्भश्चोदरसौख्यभाक् ॥
केन कर्मविपाकेन सत्यं कथय भास्कर ॥ ६ ॥

श्रीसूर्य उवाच ।

पुंस्कृतं नैव तत्कर्म स्त्रीकृतं नात्र संशयः ॥ ७ ॥
पूर्वजन्मनि सा क्षात्रा सञ्जाता विनतासुत । अज्ञानतिमिरान्ध्येन स्त्रीणां कर्म दुरात्मनाम् ॥ ८ ॥
अजानती कुलस्त्रीणामाचारमनुकम्पकम् । सर्वभूतेषु चात्मानं स्थावरेषु चरेषु च ॥ ९ ॥
प्रमादाद्दीपिनं हत्वा सदा निष्ठुरमानसा । तस्या गेहाश्रिता नित्यं मार्जारशुनपूर्वकाः ॥ १० ॥

पलालक्रीडनपरा गेहे सङ्कुलिता भृशम् । ते तप्तवालुकाग्न्यम्बुतुषभस्मचयादिषु ॥ ११ ॥
आविक्षिप्ता तया चाग्नौ दयारहितचित्तया । बालगर्भाशयान्बालानविस्पष्टाखिलेन्द्रियान् ॥ १२ ॥
पापा प्रचिक्षेप वह्नौ पाषाणकठिनाशया । मातृभिः सहिता बाला बालगर्भगतास्तथा ॥ १३ ॥
अन्ये च बहवो जीवा भस्मसाद्वै कृतास्तया । विनिघ्नन्ति प्रमादाद्ये परांस्ते दुःखभागिनः ॥१४॥
सन्ततिर्दूषिता यैस्तु नानादुःखौघगाश्च ते । अनाय्याग्निं च ये दग्धास्ते वै तन्नाशनाय हि॥१५॥
तथाभिधेषु जीवेषु जायन्तेऽपि च तद्वशात् । म्रियन्ते शिशवस्तेऽपि तस्मात्तद्दोषचिह्निताः ॥१६॥
पलालक्रीडनपरा बहवो लघुप्राणिनः । मारिता गर्भयुक्ताश्च मातृभिः सहितास्तथा ॥ १७ ॥
लभंते चैव नो मार्गं मृतास्ते दुष्टजन्तवः । तेन कर्मविपाकेन स्थिरगर्भा मृतप्रजा ॥ १८ ॥
त्रिविधापत्यजा बाधाः प्राप्यन्ते जतुरन्तरे । जन्तवो गर्भगा ह्येके सुकृतात्कर्मबन्धनात् ॥१९ ॥
यथा कर्म तथाऽपत्यमुभयोस्तत्प्रयोजनम् । इदन्तु तृतीयं जन्म ब्रह्मवंशसमुद्भवम् ॥ २० ॥
स्थिरगर्भा मृतापत्या पुत्रहीना खगाधिप ॥ २१ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं नाथ येन गर्भः प्रजायते । ममोपरि कृपां कृत्वा सत्यं वद दिवस्पते ॥ २२ ॥

श्रीसूर्य उवाच ।

सुदिने समनुप्राप्ते सुग्रहे च शुभोदये । प्रागुदक्प्रवणे देशे गोमयाद्युपलिप्तके ॥ २३ ॥
तत्रोपर्याविकं स्तीर्य नानाचित्रविचित्रकम् । द्रोणमानं तिलानां तु मध्ये गर्भं प्रपूरयेत् ॥ २४ ॥
निष्कमानसुवर्णस्य फलं वै मध्यतः क्षिपेत् । तस्य पूर्वे च दिग्भागे तण्डुलद्रोणपर्वते ॥ २५ ॥
शुद्धं सोमप्रभं ताम्रपात्रं दशपलोन्मितम् । स्थापयेद्राजतं पद्मं तन्मध्ये पलनिर्मितम् ॥ २६ ॥
पूजयेच्च सपत्नीकं कश्यपं च प्रजापतिम् । करे साक्षकरे दक्षे वामे चाथ कमण्डलुम् ॥ २७ ॥
कृत्वा प्रतिष्ठितप्राणां मूर्तिं तां शुभलक्षणाम् । अर्चयेद्गन्धपुष्पाद्यैरुपचारैः पृथक्पृथक् ॥ २८ ।
सम्यक्श्रद्धावती नारी त्रिविधापत्यदुःखिनी । विप्राय वेदविदुषे पूजयेद्विविधैर्धनैः ॥ २९ ॥
ततस्तं तु सपत्नीकं मुनीनां प्रवरं नमेत् ॥ ३० ॥

मंत्रः ।

"निर्मिता वै जगत्स्रष्ट्रा पत्नी हि तपसो बलात् । ता मया तीव्रदाहे तु वह्नौ क्षिप्ता अनेकशः३१
लंघिताः स्त्रीजनाचारा अजानन्त्या दयादिकान् । नाशयेस्तस्य पापस्य देवप्राप्तं विगर्हितम्" ३२
सम्यक्श्रद्धावती नारी मृतसन्ततिदुःखिनी । सपत्नीकं तु सौवर्णं कश्यपं सम्यगर्चितम् ॥ ३३ ॥
विप्राय वेदविदुषे प्रदद्याद्गुणशालिने । एवमाश्राव्य तां मूर्तिं समादाय पृथक्पृथक् ॥ ३४ ॥
प्रदद्याद्दानविधिना श्रद्धया च सदक्षिणाम् । दानान्ते कीर्तयेन्मन्त्रं तिष्ठन्ती विहिताञ्जलिः ३५॥

मंत्रः ।

"यन्मया पूर्वजनुषि दयारहितचित्तया । प्राप्तं वै ह्यशुभं स्वामिंश्छिन्धि तं कर्मकारणम्"३६॥
दत्त्वा दानञ्च विप्राय सर्पिष्यात्मानमीक्षयेत् ॥ ३७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिसप्तत्युत्तरषट्शताधिकसहस्रतमः ॥ १६७३ ॥

श्रीसूर्य उवाच ।

काकघाती महाभाग प्राग्भवे चेह जन्मनि । कूर्चहीनो भवेन्मर्त्यः स च तत्पापलाञ्छितः ॥१ ॥

कृष्णधेनुप्रदानेन विधिनात्र खगाधिप । मुच्यते दुष्टपापाच्च कूर्चयुक्चात्र जन्मनि ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः चतुःसप्तत्युत्तरषट्शताधिकसहस्रतमः ॥ १६७४ ॥

श्रीसूर्य उवाच ।

या नारी घातयेत्काकं विनतानन्दवर्धन । साऽत्र जन्मनि पक्षीन्द्र कूर्चयुक्ता भवेदलम् ॥ १ ॥
कृष्णधेनुप्रदानेन यथोक्त्या गरुडाग्रज । पूर्वपापविशुद्धिः स्यादत्र जन्मनि निश्चयात् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चसप्तत्युत्तरषट्शताधिकसहस्रतमः ॥ १६७५ ॥

श्रीसूर्य उवाच ।

अभक्ष्यभक्षको यस्तु भवेत्प्राग्ज्ञानतोऽण्डज । सोऽत्र जन्मनि पक्षीन्द्र जायते कृमिलोदरः ॥ १ ॥
स भीष्मपञ्चकादत्र व्रतात्पुण्यसमर्जनात् । मुच्यते पूर्वरोगात्तु दुष्टात्क्रिम्युदरात्खग ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्सप्तत्युत्तरषट्शताधिकसहस्रतमः ॥ १६७६ ॥

श्रीसूर्य उवाच ।

याऽभक्ष्यं भक्षयेन्नारी प्राग्भवे गरुडाग्रज । जायते जठरे तस्याः क्रिमिजा रुग्भृशं सुत ॥ १ ॥
तत्पापनाशनं कार्यं भीष्मपञ्चव्रतं शुभम् । कार्तिके शुक्लपक्षे च प्रांतस्थदिनपञ्चके ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तसप्तत्युत्तरषट्शताधिकसहस्रतमः ॥ १६७७ ॥

श्रीसूर्य उवाच ।

दुष्टस्पर्शेन यो मोहाद्भक्षयेद्विधिवर्जितः । सिद्धान्नं ना पुरा सूत जायतेऽत्र कृशोदरः ॥ १ ॥
विष्णुव्रतान्महापुण्यात्सर्वपापप्रणोदनम् । तदा कृशोदरत्वं च नात्र पश्यति पुण्यकृत् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टसप्तत्युत्तरषट्शताधिकसहस्रतमः ॥ १६७८ ॥

श्रीसूर्य उवाच ।

भुक्तं पापं पुरा सूत सिद्धान्नं द्विजभार्यया । दुष्टस्पर्शेन सततं सात्र स्याच्च कृशोदरी ॥ १ ॥
सा वैष्णवव्रतात्पुण्यात्तस्मात्पापात्प्रमुच्यते । कृशोदरव्यथा नश्येत्तत्पापस्य प्रणाशनात् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनाशीत्युत्तरषट्शताधिकसहस्रतमः ॥ १६७९ ॥

श्रीसूर्य उवाच ।

द्विजः पूर्वभवे कश्चिदासीद्धर्मान्वितः सदा । सभार्यो नर्मदातीरे धनसौख्यसमन्वितः ॥ १ ॥
कृतानि तेन दानानि नानापर्वसु शक्तितः । वेदयुक्तेषु विप्रेषु सत्पात्रेषु विधानतः ॥ २ ॥
अथो पापं भृशं चक्रे व्यभिचारसमुद्भवम् । ज्येष्ठां त्यक्त्वा ऋतुप्राप्तां धर्मशीलयुतां प्रियाम् ॥३॥
रतिं ददौ कनिष्ठायामनृतावपि मोहितः । ततो यमपुरं प्राप स तत्पापाद्विजोत्तमः ॥ ४ ॥
भुक्त्वा पापफलं पापात्पुण्यात्स्वर्गफलं तथा । श्राद्धदानवशात्सोऽत्र गङ्गायाः पूर्वभागतः ॥ ५ ॥
सिंहस्थेऽर्के सुखे राहौ जीवे कर्केऽलिगे भृगौ । स रक्तगौरो मतिमान्बंधुस्त्रीसुखसंयुतः ॥ ६ ॥
लघुर्घृणीति मितदो द्विजवंशसमुद्भवः । सर्वमेतत्फलं दानात्स्त्रीत्यागान्मृतपुत्रकः ॥ ७ ॥
स्त्रीत्यागी भ्रूणहा लोके इति पौराणिका विदुः । योषासहायतः पूर्वं शृणु त्वं विनतासुत ॥ ८ ॥
प्राग्भवे या कनिष्ठात्र सा ज्येष्ठात्र गतप्रजा । गर्भदोषयुता चेति लक्षणैर्लक्षयेत्खगः ॥ ९ ॥
वक्ष्यामि निष्कृतिं तस्याः पूर्वपापविनाशिनीम् । कुर्यात्पलैर्वेदमितैर्गणेशं विघ्ननाशनम् ॥
तदर्धमितकं देवं निजवित्तादिमं पठन् ॥ १० ॥

मन्त्रः ।

"त्यक्त्वा वराननां शुद्धां पूर्वं पापं समर्जितम् । तत्पापस्य विनाशाय ददेऽहं गणनायकम् ॥ ११ ॥
मापसप्तमिता लक्ष्मीः शुभा लेख्या हिरण्मयी । ददेऽहं विप्रमुख्याय वेदशास्त्रविशारद" ॥ १२ ॥
ब्राह्मणान्वरयेत्तत्र शक्त्या दद्याच्च दक्षिणाम् ॥ १३ ॥
एवं विधानं यः कुर्याज्जीविष्यन्ति च तत्सुताः । श्रुत्वैनं शक्तिमान्यस्तु न कुर्यात्पापशोधनम् १४
स पुत्रान्नोपलभते रिष्टं पञ्चाशदब्दके । प्रायश्चित्ते कृते त्वत्र जीवनं वर्षसप्ततिम् ॥ १५ ॥
अन्यज्जन्मादितो ज्ञेयं विस्तरान्नोदितं मया ॥ १६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽशीत्युत्तरषट्शताधिकसहस्रतमः ॥ १९८० ॥

श्रीसूर्य उवाच ।

देशे पश्चनदे जाता वाहुजा पूर्वजन्मनि । सात्र जन्मनि वै विप्र संजाता विप्रपूजनात् ॥ १ ॥
सकृत्तया कृतं कर्म शृणु चात्र खगेश्वर । ब्राह्मणेन महद्द्रव्यं तद्गृहे स्थापितं च यत् ॥ २ ॥
न तद्दत्तं पुनस्तस्म भुक्तं सर्वमशेषतः । मृतो द्विजस्तद्दुःखेन क्षुधितस्तु खगाधिप ॥ ३ ॥
पापमाचरितं पूर्वं ब्रह्मघातसमं तया । पञ्चत्ववशतां प्राप्ता भुक्तातियमशासनम् ॥ ४ ॥
पुत्रसन्ततिहीनात्र पूर्वभावे क्षयान्विता । निष्कृतिं परमां तस्या वक्ष्येऽहं पापनाशिनीम् ॥ ५ ॥
सर्वस्वेन तदर्धेन कार्या स्वर्णमयी शुभा । कदली पत्रसंयुक्ता देया विप्राय धीमते ॥ ६ ॥
दानेनानेन सुप्रीता ब्रह्मविष्णुमहेश्वराः । क्षयनाशकराः पूर्वे भविष्यन्त्यत्र जन्मनि ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकाशीत्युत्तरषट्शताधिकसहस्रतमः ॥ १९८१ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि भोः सूत चोच्छिष्टं भक्षयेत्तु यः । रात्र्यन्धो जायते सोऽपि जन्मन्यत्र च मानवः ॥ १ ॥
भोजयेद्ब्राह्मणाञ्छक्त्या गोमूत्रं प्राशयेत्तथा । मुच्यते तत्क्षणात्सूत नक्तान्धत्वान्न संशयः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्यशीत्युत्तरषट्शताधिकसहस्रतमः ॥ १९८२ ॥

श्रीसूर्य उवाच ।

या भक्षयेत्पुरा नारी शुनोच्छिष्टं शुभानना । नक्तान्धा जायते पुत्र व्यथिता नेत्रपीडया ॥ १ ॥
गोमूत्रप्राशनादत्र ब्राह्मणानां च भोजनात् । नक्तान्धरोगान्मुक्तिः स्यादत्र जन्मनि सुव्रत ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्यशीत्युत्तरषट्शताधिकसहस्रतमः ॥ १९८३ ॥

श्रीसूर्य उवाच ।

बिडालोच्छिष्टभोजी च रात्र्यन्धो जायतेऽधुना । स तत्पापविशुद्ध्यर्थं गोमूत्रं विधिवत्पिबेत् ॥ १ ॥
भोजयेच्च तथा विप्राञ्छक्त्या दद्याच्च दक्षिणाम् । रात्र्यन्धरोगात्सततं मुक्तो भवति मानवः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरशीत्युत्तरषट्शताधिकसहस्रतमः ॥ १९८४ ॥

श्रीसूर्य उवाच ।

बिडालोच्छिष्टभुङ्नारी प्राग्भवे विनतासुत । रात्र्यन्धरोगयुक्ता सा चात्र जन्मनि जायते ॥ १ ॥
द्विजानां भोजनाच्चैव गोमूत्रप्राशनात्तथा । मुच्यते पूर्वपापात्सा बिडालोच्छिष्टभोजनात् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाशीत्युत्तरषट्शताधिकसहस्रतमः ॥ १९८५ ॥

श्रीसूर्य उवाच।

चाण्डाल्या गमने पूर्वभवे चारुण जायते। मूढो ह्यजगरश्चापि जातो जन्मनिजन्मनि ॥ १ ॥
चान्द्रायणव्रतादत्र दशावृत्त्या कृतात्सुत। मुच्यतेऽजगरत्वाच्च शुभबुद्धिर्भवेदिह ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडशीत्युत्तरषट्शताधिकसहस्रतमः ॥ १९८९ ॥

श्रीसूर्य उवाच।

या काचित्साहसान्नारी प्राग्भवे विनतासुत। चाण्डालगमनं कुर्यात्सात्राऽजगरतां व्रजेत् ॥ १ ॥
प्राजापत्यव्रतं कुर्याद्यत्नात्पश्चापवर्तनैः। मुच्यते पूर्वपापात्सा जन्मन्यत्र खगाधिप ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्ताशीत्युत्तरषट्शताधिकसहस्रतमः ॥ १९८७ ॥

श्रीसूर्य उवाच।

परान्नविघ्नकारी तु यो भवेत्पूर्वजन्मनि। सोऽजीर्णेनातिरोगेण जन्मन्यत्र प्रपीड्यते ॥ १ ॥
विधिना लक्षहोमेन ब्राह्मणानाञ्च भोजनात्। मुच्यतेऽजीर्णजाद्रोगादत्र जन्मनि वै ध्रुवम् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाशीत्युत्तरषट्शताधिकसहस्रतमः ॥ १९८८ ॥

श्रीसूर्य उवाच।

विघ्नं प्रकुरुते सूत या नारी पूर्वजन्मनि। परान्नेषु महामोहाच्छृणु तत्र खगाधिप ॥ १ ॥
साजीर्णेनैव रोगेण बाध्यते पीडया सदा। लक्षहोमेन विधिवत्तत्पापान्मुच्यते त्विह ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोननवत्युत्तरषट्शताधिकसहस्रतमः ॥ १९८९ ॥

अरुण उवाच।

भूमिदेवकुलोत्पन्नो धर्मिष्ठो धर्मवत्सलः। सत्यनित्यसदाचारः साधुसेवनसंयुतः ॥ १ ॥
तस्य देहे भवेच्चिह्नं पापजं चात्र जन्मनि। किलासो दद्रुकण्डूश्च नेत्रतोदो विरश्मिता ॥ २ ॥
किंचिच्चिह्नानि जायंते स ब्रूते कारणं विना। तस्य भार्या सुतन्वङ्गी स्त्रीधर्मव्रतकारिणी ॥ ३ ॥
उदरे वै व्यथा वातान्मूर्ध्नि पीडा प्रजायते। मृतवत्सा कथं जाता पुत्रो पुत्री मृते तथा ॥ ४ ॥
केन कर्मविपाकेन सत्यं कथय भास्कर ॥ ५ ॥

श्रीसूर्य उवाच।

पूर्वं वैश्यसमुत्पन्ना काले शूद्रप्रतारिता। बहुव्यापारनिरता बहुद्रव्यसमन्विता ॥ ६ ॥
शूद्राज्जातश्च सम्बन्धो बहुकालं गतागतम्। अन्योन्यं प्रीतिवशतः किञ्चित्कालो गतस्तयोः॥७॥
उभयोर्लोलुपत्वाद्वै धनसंग्रहणे रतिः। व्यवर्धत ततस्तस्य पापबुद्धिरभूत्खग ॥ ८ ॥
ब्राह्मणस्य सुतः श्रेष्ठः स्वर्णालङ्करणैर्युतः। धनलोभात्तथा तेन मारितो भाविनो बलात् ॥ ९ ॥
तस्यापि मातापितरौ पुत्रदुःखेन दुःखितौ। द्वित्रिवर्षैस्तथा मासैः सुतशोकाद्दिवं गतौ ॥ १० ॥
धनलोभवशाच्चैव दुष्टचित्तो हि घातकः। अचिराच्च मृतस्तत्र गतो वै यमशासनम् ॥ ११ ॥
यद्घोरकर्मणा तेन ब्राह्मणस्य हतः सुतः। तेन कर्मविपाकेन नरके पाचितो भृशम् ॥ १२ ॥
पश्चान्मानुष्यमापन्नो व्रतदानप्रभावतः। इदं चतुर्थकं जन्म मृतापत्यकरं खग ॥ १३ ॥
द्वित्र्यादिमासजाता वै मृता द्वित्र्यादिहायनाः। मृतपुत्रो भवेद्वै स जाताजातसुतस्तथा ॥ १४ ॥
इदं जीवेदिदं जीवेदित्याशामयजीवने। जातंजातं विनश्यन्ति तस्य चाकृतनिष्कृतेः ॥ १५ ॥

एवं यदि चिरं तिष्ठेदचिरान्म्रियते तराम् । सुगुणश्च सुरूपश्च लालनाच्चाटुकारिणः ॥ १६ ॥
नश्यत्सु जातजातेषु जन्मजन्मसु तेषु च । व्याध्यन्तरे भवेद्व्याधिग्रासो व्यसनवानयम् ॥ १७ ॥
नास्ति सौख्यं क्वचित्तस्य नानाशंकितचेतसः । भवेच्च सुमहद्दुःखं परापत्यानि पश्यतः ॥ १८ ॥
लक्षणानि पुरोक्तानि तस्येमान्यपि कीर्तयेत् । उदरे म्रियते बालः स वै ब्राह्मण उच्यते ॥१९॥
मृतवत्सोद्भवं चिह्नं पूर्ववत्प्रतिपादयेत् । स्ववंशस्यापि विच्छेदो द्रव्यहानिर्यतस्ततः ॥ २० ॥
दौर्मनस्यं महानाधिः शोक एवोपजायते । अदृष्टगुणलावण्या ह्यदृष्टाननकान्तयः ॥ २१ ॥
म्रियन्ते जातमात्रा ये पुत्रा अकृतचाटवः । एवन्तु कर्मणि ज्ञाते प्रायश्चित्तमथाचरेत् ॥ २२ ॥

अरुण उवाच ।

का तस्य निष्कृतिः स्वामिन्निह कर्मनिषूदनी । कथ्यतां दिवसेशान नारीणां हितकाम्यया २३॥

श्रीसूर्य उवाच ।

शृणु सूत प्रवक्ष्यामि मृतवत्साघनाशिनीम् । निष्कृतिं विधिवत्ताक्ष्यं सन्ततेः सौख्यहेतवे ॥ २४॥
यजमानः सपत्नीको विधिवद्विधिमाचरेत् । पठद्भिः शान्तिसूक्तानि ब्राह्मणैः सहितोऽर्थवित् २५॥
सिद्धार्थाक्षतदूर्वाभिः कृतरक्षं प्रतिष्ठितम् । स्नापयेदौषधैर्मन्त्रैर्विष्णुसूक्तादिभिस्तथा ॥ २६ ॥
सुदिने सुशुभे देशे गोमयाद्युपलिप्तके । तत्रोपर्याविकं स्तीर्यं कृष्णाजिनमथापि वा ॥ २७ ॥
द्रोणमानं तिलानान्तु कृष्णवस्त्रेण संयुतम् । स्थापयेद्राजतं पद्मं तन्मध्ये पलनिर्मिताम् ॥ २८ ॥
सौवर्णीं प्रतिमां तत्र बालगोपालकस्य हि । कृत्वा प्रतिष्ठितप्राणां मूर्तिं तां शुभलक्षणाम् ॥२९ ॥
अर्चयेद्गन्धपुष्पाद्यैरुपचारैर्यथाविधि । सम्यक्श्रद्धावती नारी मृतसन्ततिदुःखिनी ॥ ३० ॥
अग्ने नयेति चावाह्य विदुषो वेदवादिनः । अलोलुपाः सदाचाराः पूज्या अर्घ्यादिकैस्तथा ॥३१॥

मन्त्रः ।

" यन्मयाचरितो द्रोहो मोहाद्वै परसूनुषु । भूमिद्रविणहेमादिलिप्सया स विनश्यतु ॥ ३२ ॥
नाशयेत्तं हि पापं वै मूर्तिस्ते शुभलक्षणा । यदनिष्टं मया प्राप्तं मृतसन्ततिकारकम् ॥ ३३ ॥
तस्मान्मोच्यो महाभागार्पितगोदानपुण्यतः " ॥ ३४ ॥

इति तं त्रिः परिक्रम्य त्रिस्तेनोक्तेऽवतिष्ठति । अग्ने नयेति मन्त्रेण विसृज्यैतदुदीरयेत् ॥ ३५ ॥
धेनुं दद्यात्सवत्सां च सहिरण्यां यथाविधि । ब्राह्मणान्भोजयेत्सम्यक्शतं साग्रं यथाविधि ॥ ३६॥
सर्पिष्यात्मानमालोक्य भुंजीतेष्टैश्च बन्धुभिः । इहैव लक्षणं ज्ञेयं मातृवन्धुसुखोज्झितम् ॥ ३७ ॥
स्वसुतासुतसौख्यानां सन्तोषाभाव एव च । विरुध्यन्तेऽप्यपत्यानि तादृशानि मिथः कियत्॥३८॥
विकारः प्रकृतौ चैव गमने पादवैकृतम् । पितृष्वसुर्मातुलान्याः कासगुल्मार्तित्वग्व्यथाः ॥ ३९ ॥
मृतापत्यार्तिदस्तेषामनुमन्त्रादिभेदतः । तस्यापत्यान्नदुःखानि जायन्ते च मुहुर्मुहुः ॥ ४० ॥
पूर्वकर्मार्जितं पापं चिह्नं तस्य सहायवत् ॥ ४१ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवत्युत्तरषट्शताधिकसहस्रतमः ॥ १६९० ॥

श्रीसूर्य उवाच ।

विप्राय यो विषं दद्याद्धातार्थं पूर्वजन्मनि । सोऽत्र जन्मनि पक्षीन्द्र च्छर्दीरोगेण बाध्यते ॥ १ ॥
निष्कृतिर्नास्ति तस्यात्र पापस्य दृढकर्मणः । छर्दीरोगेण सततं पीडिता नाशमाप्नुयात् ॥ २ ॥
प्रायश्चित्तं न तस्यात्र दानैरपि सहस्रशः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकनवत्युत्तरषट्शताधिकसहस्रतमः ॥ १६९१ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे सूत विषं दद्याद्विजातये । छर्दीरोगेण सात्रैव निश्चितं नाशमाप्नुयात् ॥ १ ॥
न पापशोधनं प्रोक्तं तस्यास्तु गरुडाग्रज । ब्राह्मणस्य वधस्यैव प्रायश्चित्तं न विद्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विनवत्युत्तरषट्शताधिकसहस्रतमः ॥ १६९२ ॥

श्रीसूर्य उवाच ।

परस्य यो विषं दद्यात्पूर्वजन्मनि मानद । छर्दीरोगेण सोऽत्रैव बाध्यते पीडया सदा ॥ १ ॥
न पापशोधनं प्रोक्तं तस्यास्तु गरुडाग्रज । धेनूनां दशकं दद्यात्सर्वोपस्करसंयुतम् ॥ २ ॥
मुच्यते सर्वरोगाच्च जन्मन्यत्र खगाधिप ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिणवत्युत्तरषट्शताधिकसहस्रतमः ॥ १६९३ ॥

श्रीसूर्य उवाच ।

मूकोऽत्र जायते जन्तुर्यः पूर्वं भ्रातृघातकः । बभूव कामतः सूत प्रायश्चित्तं न तत्समम् ॥ १ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्णवत्युत्तरषट्शताधिकसहस्रतमः ॥ १६९४ ॥

श्रीसूर्य उवाच ।

या काचिन्मागधी नारी जाता ब्रह्महदे सुत । सा चात्र पर्वते देशे शुभे पञ्चनदेण्डज ॥ १ ॥
पुत्राभिलाषिणी पूर्वं याभजद्यवनं पुरा । सा चेह यवनी जाता पुत्रसन्ततिवर्जिता ॥ २ ॥
नानाधनयुता दात्री कुरुक्षेत्रे पुरानघ । शिवभक्तिपरा तस्मात्सुखैश्वर्यसमन्विता ॥ ३ ॥
इह जन्मनि सा साध्वी रुद्रपूजाव्रतादिना । पुत्रपौत्रयुता शान्ता भविष्यति न संशयः ॥ ४ ॥
अथवा हरिवंशस्य शतावृत्त्या विधानतः । श्रवणात्पूर्वजात्पापान्मुच्यते विनतासुत ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचनवत्युत्तरषट्शताधिकसहस्रतमः ॥ १६९५ ॥

श्रीसूर्य उवाच ।

देवालयेऽवसत्काश्चिद्ब्राह्मणः पूर्वजन्मनि । विष्णुपूजारतो नित्यं द्रव्यलोभेन चाण्डज ॥ १ ॥
चौर्येण निर्हितं द्रव्यं यत्स्थितं देवताश्रये । तेनेदं दुष्कृतं सूत कृतं कर्मातिदारुणम् ॥ २ ॥
स तेन कर्मणा युक्तो भुक्त्वातियमशासनम् । जातो गङ्गाश्रये क्षत्री पूर्वं विष्णोः प्रपूजनात् ॥ ३ ॥
बहुद्रव्यान्वितो भूयः सर्वरोगसमन्वितः । बाल्ये हि पाण्डुरोगार्तश्चात्र जन्मनि सुव्रत ॥ ४ ॥
देवद्रव्यापहारी तु पाण्डुरोगी प्रजायते । तत्पापनाशनं पुण्यं पक्षीन्द्र शृणु तत्त्वतः ॥ ५ ॥
कुर्याद्धिरण्मयीं पृथ्वीं ससमुद्रां पलात्मिकाम् । सवनां सागरोपेतां सप्तद्वीपां वसुन्धराम् ॥ ६ ॥
गन्धपुष्पैरलंकृत्य दद्याद्विप्राय धीमते । पाण्डुरोगाद्विमुक्तः स्यादत्र जन्मनि मानवः ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षण्णवत्युत्तरषट्शताधिकसहस्रतमः ॥ १६९६ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे प्रादाद्विषं कस्यापि काश्यपे । सात्र जन्मनि रोगेणच्छर्दिसंज्ञेन पीडयते ॥ १ ॥
धेनूनां दशकं दद्यादशक्तौ गरुडाग्रज । सवत्सां कपिलां दद्यात्सा तद्दोषात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तनवत्युत्तरषट्शताधिकसहस्रतमः ॥ १६९७ ॥

श्रीसूर्य उवाच ।

कश्चिद्विप्रो ह्यभूदङ्ग प्राग्भवे धर्मसंयुतः । स चचार वने सूत मार्गलुण्ठनतत्परः ॥ १ ॥
काचित्सुनयना तत्र प्राप्ता भाविबलाद्दृढात् । नानाभरणसंयुक्ता पूर्णगर्भसमन्विता ॥ २ ॥
सा लुण्ठितात्र त्रसिता तेन पापधियाण्डज । सहायैः सा परित्यक्ता ताडनादाकुला महत् ॥ ३ ॥
तद्गर्भाद्वै च्युतो बालः पापमाचरितं त्विदम् । ततो धर्मपुरं प्राप्तो पुण्यपापसमन्वितः ॥ ४ ॥
पुण्यात्पुण्यफलं भुक्त्वा पापात्पापं खगाधिप । परकन्याविवाहेन स जातो बाहुजोऽधुना ॥ ५ ॥
गङ्गायाः पूर्वभागे तु दशयोजनसम्मिते । गौरः सुरूपः क्षीणाङ्गो बहुद्रव्यपराक्रमः ॥ ६ ॥
पित्ताधिकोऽतिमतिमान्बहुपुत्रीभिरन्वितः । जातपुत्रा मृताः सप्त पूर्वपापात्तथाण्डज ॥ ७ ॥
निष्कृतिं तां प्रवक्ष्यामि येन पापात्प्रमुच्यते । पलार्धमितिका कार्या भव्या सुघटिता सुत ॥ ८ ॥
बाहुजा गर्भसंयुक्ता सौवर्णैर्भूषणैर्युता । पूर्वपापविनाशाय सा देया ब्राह्मणाय वै ॥ ९ ॥
गन्धैः पुष्पैः समभ्यर्च्य मन्त्रैः प्रणवपूर्वकैः । वेधसं तत्र सौवर्णं सुवर्णैकमितं सुत ॥ १० ॥
जपेच्च ब्राह्मान्मन्त्रांश्च तल्लिङ्गान्विधिपूर्वकम् । होमयेच्च यवांस्तत्र सतण्डुलसुसर्षपान् ॥ ११ ॥
ब्राह्मणान्भोजयेत्पश्चात्तेभ्यो दद्याच्च दक्षिणाम् । शृणुयाद्धरिवंशं वा शतावृत्त्या विधानतः॥ १२ ॥
गायत्र्यष्टशतं जप्त्वा तस्माद्दोषात्प्रमुच्यते । लभते पुत्रसौख्यं स चात्र जन्मनि वै ध्रुवम् ॥ १३ ॥
रिष्टं पञ्चाशदब्दे तु प्रायश्चित्तेऽकृते सुत । सप्तसप्तमिताब्दायुः प्रायश्चित्ते कृतेऽत्र वै ॥ १४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टनवत्युत्तरषट्शताधिकसहस्रतमः ॥ १६९८ ॥

श्रीसूर्य उवाच ।

व्यभिचाररता पूर्वं यात्रापि व्यभिचारिणी । सा गता नरकान्घोरांश्चिरं दुःखं समश्नुते ॥ १ ॥
न शुद्ध्यत्यशुभाचारा प्रायश्चित्तैः शतैरपि । वाराणस्यां गतिश्चास्या वासाच्च विनतासुत ॥ २ ॥
मोक्ष्यते सर्वपापाच्च पूर्वजन्मकृताद्दृढात् । वाराणस्यां चतुर्दश्यां शिवपूजाव्रतादिना ॥ ३ ॥
महापापान्महाभाग पूर्वं चेहापि बाहुजा । वंध्या जाता तथा दुःखाकुला च दयितोज्झिता ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवनवत्युत्तरषट्शताधिकसहस्रतमः ॥ १६९९ ॥

श्रीसूर्य उवाच ।

यः कृत्वा धूर्ततां पूर्वं वञ्चयेद्ब्राह्मणं सुत । सोऽत्रापस्माररोगेण पीड्यते बहुपीडया ॥ १ ॥
तेनैव पापरोगेण म्रियतेऽत्र खगाधिप । प्रायश्चित्तं मया नोक्तं पापे ब्राह्मणवन्धने ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तशताधिकसहस्रतमः ॥ १७०० ॥

श्रीसूर्य उवाच ।

या भ्रातृघातिनी नारी प्राग्भवे विनतासुत । सात्र जन्मनि मूकत्वं भजत्येव न संशयः ॥ १ ॥
ज्ञानान्महापापकृतान्न चोक्ता निष्कृतिर्मया । ज्ञात्वा ब्रह्मवधात्सूत प्रायश्चित्तं न तत्समम् ॥२ ॥
सप्तजन्मनि मूकत्वं जायते च तदेनसः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोत्तरसप्तशताधिकसहस्रतमः ॥ १७०१ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यसौ विप्रश्चात्र जन्मनि बाहुजः । देवद्रव्यापहरणात्प्रागत्राक्षिप्रपीडनम् ॥ १ ॥
विंशे वर्षे व्यतीते च नेत्रभङ्गो जनिष्यते । तद्रक्षार्थमहं वक्ष्ये दानं पापहरं परम् ॥ २ ॥

कृत्वा देवगृहं रम्यं प्रतिष्ठाप्य सुराधिपम् । गन्धपुष्पैः समभ्यर्च्य दीपा देयाः सुवर्णजाः ॥ ३ ॥
राजताश्च महाभाग न रोगं स हि पश्यति । भोजयेच्छक्तितो विप्रान्वैष्णवाञ्छ्रद्धया सुत ॥ ४ ॥
कृत्वानेन विधानेन रिष्टं नैव प्रपश्यति ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्युत्तरसप्तशताधिकसहस्रतमः ॥ १७०२ ॥

श्रीसूर्य उवाच ।

ब्राह्मणं घातयेत्कश्चिद्दुष्टो यः पूर्वजन्मनि । सोऽत्र जन्मनि जायेत क्षयरोगप्रपीडितः ॥ १ ॥
प्रायश्चित्तं परं तस्य वित्ततुर्यांशभागतः । कालचक्राभिधं दानं दद्याद्दोषोपशान्तये ॥ २ ॥
ब्राह्मणान्भोजयेत्पश्चाद्धोमयेच्च स्वशक्तितः । कालचक्राख्यदानेन रोगा नश्यन्ति पापजाः ॥३॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्युत्तरसप्तशताधिकसहस्रतमः ॥ १७०३ ॥

श्रीसूर्य उवाच ।

ब्रह्मवादरता ह्यत्र या पूर्वेऽभूत्पतिव्रता । शापप्रभावाद्धि गतिं सा वै प्राप्ता हि मानुषीम् ॥ १ ॥
त्यक्त्वा शरीरं सा देवी मोदतेऽस्त्रिकयां सह । भुनक्ति भोगान्सर्वान्वै पतिं प्राप्य तपस्विनी ॥२॥
गच्छेत्सा परमं स्थानं यत्र देवो महेश्वरः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरुत्तरसप्तशताधिकसहस्रतमः ॥ १७०४ ॥

श्रीसूर्य उवाच ।

योऽज्ञानात्कृतवान्सूत प्राग्भवे भ्रातृघातनम् । सोऽत्र जन्मनि मूकत्वं व्रजति क्वापि मानवः ॥ १ ॥
चान्द्रायणव्रतं कुर्यात्सुवर्णपलसंयुतम् । एवं यः कुरुते सूत स तत्पापात्प्रमुच्यते ॥ २ ॥
न जायतेऽस्य मूकत्वं कदाचिद्धितनासुत ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चोत्तरसप्तशताधिकसहस्रतमः ॥ १७०५ ॥

श्रीसूर्य उवाच ।

या धूर्ता वञ्चयेत्काचिल्लोकान्पूर्वभवेण्डज । प्रायश्चित्तं प्रवक्ष्यामि पापनाशकरं सुत ॥ १ ॥
ब्रह्मकूर्चत्रयं कुर्याद्दद्याद्धेनुं पयस्विनीम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडुत्तरसप्तशताधिकसहस्रतमः ॥ १७०६ ॥

श्रीसूर्य उवाच ।

कश्चिद्वर्णोत्तमो जातो धर्मिष्ठो वित्तसंयुतः । उदरे वायुरल्पीयाञ्छिरोर्तिश्चैव जायते ॥ १ ॥
शरीरे जायते चिह्नं किञ्चिद्वर्णसमन्वितम् । दद्रुकण्डूकिलासानां गमने पादवैकृतिः ॥ २ ॥
कर्मानुसारजो व्याधिश्चिह्नं तस्य सहायवत् । भार्या प्रीतिपरा नित्यं कदाचित्कलहप्रिया ॥ ३ ॥
दोषयुक्ता प्रायशस्तु प्रदरार्तिः प्रजायते । मृतवत्सा कथं जाता कस्येदं कर्मणः फलम् ॥ ४ ॥

अरुण उवाच ।

स स्त्रिया सहितो विप्रः कुलीनो वहुवाचकः । गता चैव महारण्ये तत्रारौ गर्भसंयुता ॥ ५ ॥
वहुभिश्च समायातैः शत्रुभिः परिवेष्टितौ । तत्रासाद्विप्रवालाया वेदना ह्युदरेऽभवत् ॥ ६ ॥
गर्भपातोऽभवच्चापि मृतः पूर्णाङ्गकः शिशुः । तेन कर्मविपाकेन म्रियन्ते तस्य वालकाः ॥ ७ ॥
केचिज्जीवन्ति षण्मासं केचिद्वर्षाधिकं भृशम् । वहुकालं न कश्चिद्वै मृतानां स्थितिरीदृशी ॥ ८ ॥

श्रीसूर्य उवाच ।

साधु पृष्टं महाबाहो प्रश्नश्चायं सुदुर्लभः । तेनेह मुनिभिः प्रोक्तं प्रायश्चित्तं विशोधनम् ॥ ९ ॥
गां वै सवर्णवत्सां च सौवर्णं निष्कसंमितम् । पुष्पितं फलितं वृक्षं वस्त्रयुग्मं गुरोरपि ॥ १० ॥
कर्मप्रकाशकं विप्रं पूजयेद्विधिपूर्वकम् । एवं प्रकुरुते वत्स निष्कृतिं कर्मणः फलम् ॥ ११ ॥
पुत्रपौत्रादिसंयुक्तो धनधान्यसमन्वितः । न करोति च यो मोहाल्लोभाद्वा कर्मनिष्कृतिम् ॥१२॥
स याति पापदोषेण भुवि जन्मनि जन्मनि । एवं यः कुरुते भक्त्या प्राप्नोति पुत्रपौत्रकम् ॥ १३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तोत्तरसप्तशताधिकसहस्रतमः ॥ १७०७ ॥

श्रीसूर्य उवाच ।

यो लोकान्वञ्चयेत्कश्चित्पुरा धौर्त्येन मानवः । सोऽत्र जन्मन्यपस्माररोगेण महताकुलः ॥ १ ॥
धेनुं दद्यान्महाभाग सवत्सां विधिसंयुताम् । ब्रह्मकूर्चत्रयं कुर्यात्स तत्पापात्प्रमुच्यते ॥ २ ॥
न भवेत्तस्य रोगस्य वेदना पापशोधनात् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टोत्तरसप्तशताधिकसहस्रतमः ॥ १७०८ ॥

श्रीसूर्य उवाच ।

अस्त्यत्र चन्द्रवदना गौराङ्गी पतिवल्लभा । धनधान्यसमायुक्ता स्वर्णकारी सुखान्विता ॥ १ ॥
रता भर्तृहिते नित्यं पूर्वं सा हितवल्लभा । स्वर्णापहारजात्पापात्प्राप्ता सा स्वर्णकारताम् ॥ २ ॥
पुत्रहीना महाभाग परद्रव्यापहारतः । कुरुक्षेत्रे शशिग्रस्ते स्वर्णं दद्याच्च शक्तितः ॥ ३ ॥
तद्दत्त्वाशु लभेत्पुत्रानत्र जन्मनि वै सुत ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवोत्तरसप्तशताधिकसहस्रतमः ॥ १७०९ ॥

श्रीसूर्य उवाच ।

अन्नहृत्प्राग्भवे वत्स ज्ञानादत्र खगाधिप । सोऽजीर्णेनैव रोगेण पीड्यते बहुपीडया ॥ १ ॥
अन्नदानाच्च विप्रेभ्यो रसदानाच्च शक्तितः । सावित्रीजपतो होमात्पूर्वपापात्प्रमुच्यते ॥ २ ॥
पापक्षये क्षयं यान्ति रोगाः पापसमुद्भवाः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो दशोत्तरसप्तशताधिकसहस्रतमः ॥ १७१० ॥

श्रीसूर्य उवाच ।

या काचिन्मोहतश्चक्रे नारी भ्रातृवधं पुरा । सात्र जन्मनि मूकत्वं भजेत्कापि शुभानना ॥ १ ॥
प्रयश्चित्तं प्रवक्ष्यामि तस्याश्चान्द्रायणं व्रतम् । वेदपुस्तकदानञ्च पलस्वर्णयुतं त्विह ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकादशोत्तरसप्तशताधिकसहस्रतमः ॥ १७११ ॥

श्रीसूर्य उवाच ।

बालघाती भवेद्यस्तु पूर्वजन्मनि मानवः । वैतनेयात्र जनुषि मृतपुत्रः प्रजायते ॥ १ ॥
श्रवणाद्धरिवंशस्य विधिवच्चात्र जन्मनि । ब्राह्मणोद्वाहनाच्चैव पूजनाच्छङ्करस्य च ॥ २ ॥
जीविष्यन्ति च तत्पुत्रा नात्र कार्या विचारणा ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वादशोत्तरसप्तशताधिकसहस्रतमः ॥ १७१२ ॥

श्रीसूर्य उवाच।

शूकरी याऽभवत्पूर्वं निषादी पुनरेव सा। शूद्राधमा पञ्चनदे जातात्र विनतासुतः॥ १॥
पुत्रपौत्रधनैर्धान्यैर्गजाश्वोष्ट्रादिवाहनैः। युक्ता सा यवनी सूत तीर्थराजस्य सेवनात्॥ २॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोदशोत्तरसप्तशताधिकसहस्रतमः॥ १७१३॥

श्रीसूर्य उवाच।

कश्चित्प्रागभवद्विप्रः सर्वविद्याविशारदः। वेदाभ्यासरतः श्रीमान्प्राप्तसर्वमनोरथः॥ १॥
तुलाधृतानि चिह्नानि विप्राणां स्नेहभागिनाम्। गृहीतान्यतिचौर्येण लोभयुक्तेन चेतसा॥ २॥
यस्माज्ज्ञानकृते चैव प्राग्भवे तत्फलं शृणु। सोऽत्र जन्मनि विप्रस्तु द्विजो वेदविदां वरः॥ ३॥
धनपुत्रसमायुक्तः क्षयरोगसमन्वितः। वेदाभ्यासात्तथा दानात्तीर्थराजाधिवासनात्॥ ४॥
नाशः स्यात्क्षयरोगस्य चात्र जन्मनि चाण्डज। दोषात्स्वल्पात्फलैर्युक्तो जीवेद्वर्षशतं ध्रुवम्॥५॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्दशोत्तरसप्तशताधिकसहस्रतमः॥ १७१४॥

श्रीसूर्य उवाच।

पूर्वजन्मन्यभूत्कश्चिद्वाहुजो धर्मसंयुतः। ग्रामाध्यक्षः प्रतापाढ्यो भ्रातुः पुत्रसमाकुलः॥ १॥
दत्तानि तेन दानानि ब्राह्मणेभ्योऽतिशक्तितः। पर्वस्वपि च भूस्वर्णगोश्वशय्यासनादिकम्॥२॥
तिलपात्राणि भक्ष्याणि वस्त्राणि विविधानि च। सर्वरत्नानि पात्राय हव्यकव्यानि चाण्डज॥३॥
पापमाचरितं चापि भाविनोऽर्थस्य गौरवात्। ग्रामान्तरे स्थितस्यास्य शत्रोः सीमापहारिणः॥४॥
निर्दग्धं भवनं तस्य रात्रौ वै चौर्यकर्मणा। तस्मिन्दग्धे महाभाग दग्धः क्षात्रशिशुस्तथा॥ ५॥
बहवो गृहजा जीवा दग्धाश्चैव मृता ध्रुवम्। वैरभावात्सहाढ्यैः पापमुग्रमुपार्जितम्॥ ६॥
एवं बहुतिथे काले सम्प्राप्तो यमशासनम्। पुण्यात्स्वर्गांश्च विविधान्भुक्त्वा पापात्तथेतरान्॥ ७॥
पूर्वपुण्यप्रभावेण स जातो बाहुजोऽधुना। कुरुक्षेत्रात्परे भागे दशयोजनसम्मिते॥ ८॥
स रक्तगौरो मतिमान्स्वच्छो बहुधनैर्युतः। यशस्वी भ्रातृमित्राढ्यः पितृभक्तो दयापरः॥ ९॥
सुस्त्रीभृत्यसुखैश्वर्यनानावाहनभोगभाक्। बुद्ध्याधिकप्रचारी च पितृभाग्यविवृद्धिदः॥ १०॥
ह्रस्वः कृशोदरो बन्धुमान्यो वै मितदः प्रभुः। आदिमध्यावसाने च सुखैश्वर्यसमाकुलः॥ ११॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित्। बहुचिन्तातुरो धूर्तो दाने चाल्पमतिस्तथा॥ १२॥
पीड्यमानस्तथा रोगैर्यूनि वाय्वादिसम्भवैः। नानाभयैर्मनोदुःखैः क्वापि क्षीणो विकारवान्॥ १३॥
बालघातात्पुरा पापाज्जातपुत्रविनाशकः। चिह्नमत्र जनुर्लग्नाद्रुरुभावस्तु पञ्चमे॥ १४॥
गुरुत्वादेनसश्चन्द्रो नीचः केन्द्रे शुभान्वितः। सहायलक्षणं सर्वं वक्ष्याम्यत्र खगाधिप॥ १५॥
या स्त्री पूर्वं सहायासीद्ग्रामदाहेऽतिनिष्ठुरा। सा ज्येष्ठा प्रष्टुरत्रास्ति मृतवत्सा खगेश्वर॥ १६॥
योऽभूदुत्साहकः पूर्वभवे स मृतबालकः। सहाया येऽपरे तेत्र मृतपुत्रीभिरन्विताः॥ १७॥
अन्ये ये बान्धवा भृत्याः सहायाः षण्मिताः पुरा। प्रष्टुस्तेऽत्र सुता जाता मृतापत्यत्वदुःखदाः॥
लक्षणैरेभिराढ्यस्य प्रष्टुरत्रैव जन्मनि। प्रायश्चित्तं प्रवक्ष्यामि येन पापक्षयो भवेत्॥ १९॥
पुण्यक्षेत्रेऽष्टभिर्विप्रैः पञ्चभिस्त्रिभिरेव च। कारयेत्पार्थिवाँल्लिङ्गानेकादशशतैर्मितान्॥ २०॥
गन्धपुष्पोपचारैस्तु मन्त्रैरेव प्रपूजयेत्। ततश्चाष्टपलैः कुर्याद्वै हेमजं शुभम्॥ २१॥
सपत्नीकं यथाकारं सर्वावयवसंयुतम्। तदर्धमितकं वापि निजवित्तानुसारतः॥ २२॥

पूजयित्वा तु गन्धाद्यैर्विधिज्ञाय प्रदापयेत् । हिरण्मयं तथा चाग्निं माषपञ्चमितैः शुभम् ॥ २३ ॥
राजते च तथा पत्रे पलद्वयमिते शुभे । लेख्या जीवास्तथाकारा दग्धा ये च गृहाश्रिताः ॥२४॥
ब्राह्मणाय ततो देया दाहदोषोपशान्तये । लक्ष्मीनारायणं तद्वत्पलाष्टकमितं सुत ॥ २५ ॥
राजतं विधिवद्दद्यात्सर्वदोषापनुत्तये । गायत्र्यष्टसहस्रं तु सहस्रं द्वादशाक्षरम् ॥ २६ ॥
अष्टाक्षरं त्रिसाहस्रं जप्त्वा शुद्धिं समाचरेत् । होमयेत्तद्दशांशेन शक्त्या विप्रांश्च भोजयेत् ॥ २७ ॥
शृणुयाद्धरिवंशं वा दशावृत्त्या विधानतः । य एवं कुरुते सूत द्वयोः पापविशोधनम् ॥ २८ ॥
तस्य पुत्रविवृद्धिः स्यात्स्त्रीभ्यामत्रैव जन्मनि । नाधयो व्याधयस्तस्य नवा रिष्टभयं क्वचित् २९
नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् । न जीवन्ति सुतास्तस्मिञ्जीविते नात्र संशयः ३० ॥
पञ्चत्रिंशन्मिते वर्षे रिष्टं देहधनादिजम् । त्रिसप्ततिमिताब्दायुः प्रायश्चित्ते कृते त्विह ॥ ३१ ॥
गतिस्तस्योत्तमा लोके ह्यन्यथा त्वाततायिनाम् । जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम्॥३२॥
यद्यदन्तर्गतं सूत तन्मच्छास्त्राद्विचिन्तयेत् ॥ ३३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचदशोत्तरसप्तशताधिकसहस्रतमः ॥ १७१५ ॥

श्रीसूर्य उवाच ।

यस्तु पृच्छति धर्मात्मा सर्वपापविशोधनम् । यजेद्देवानृषींश्चैव पितॄन्वै श्रद्धयान्वितः ॥ १ ॥
गयाश्राद्धादिभिः सर्वैर्दानैर्हव्यैर्विधानतः । पूर्वपापविनिर्मुक्तो याति ब्रह्म सनातनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षोडशोत्तरसप्तशताधिकसहस्रतमः ॥ १७१६ ॥

श्रीसूर्य उवाच ।

कश्चिच्छूद्रो महाभाग बभूव प्राग्भवे धनी । व्यापारनिरतो दक्षो क्रयविक्रयकर्मसु ॥ १ ॥
नीता सर्वरसास्तेन मिलित्वा चार्धसीरणा । कालेन ते हृता लोभात्स्नेहान्मौल्याधिकाः सुत॥२॥
भुक्त्वा पापफलं घोरं भ्रमरत्वमुपागतः । ततः पुण्याच्छुभं भुक्त्वा पुण्याज्जातोऽत्र पर्वते ॥ ३ ॥
शूद्रो युद्धकलायुक्तो भूमिदानात्सुरार्चनात् । स्नेहहारी यतः पूर्वं राजयक्ष्मप्रपीडितः ॥ ४ ॥
सर्वस्नेहातिदानाद्वै स्ववित्तात्तुर्यभागतः । स्वर्णदानात्तथा चात्र क्षयरोगाद्विमुच्यते ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तदशोत्तरसप्तशताधिकसहस्रतमः ॥ १७१७ ॥

श्रीसूर्य उवाच ।

विषं दत्त्वा पतिं सूत प्राग्या जाराश्रिताऽसती । पतिघ्नी सा महादुष्टा बाल्येऽत्र विधवा सुत ॥१॥
विष्णोराराधनादत्र गङ्गायाश्चैव सेवनात् । गतिं शुभां सा प्राप्नोति व्रतकृच्छ्रोपसेवनात् ॥ २ ॥
धर्मादत्र महाभाग परत्र च शुभा गतिः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टादशोत्तरसप्तशताधिकसहस्रतमः ॥ १७१८ ॥

श्रीसूर्य उवाच ।

देवागारं दारयेत्तु प्राग्जन्मन्यथ पुत्रक । रक्तातिसाररोगेण बाध्यतेऽत्रैव जन्मनि ॥ १ ॥
तद्देवदानाद्विप्राय स्थापनाद्वा विधानतः । मुच्यते पापजाद्रोगादतीसाराद्धि निश्चितम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनविंशत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७१९ ॥

श्रीसूर्य उवाच ।

मूर्धाभिषिक्तो यः कश्चिन्मथुरायामभूत्सुधीः । राजसेवी महाशूर आखेटकरतः सदा ॥ १ ॥
मृगयायां गतो दैवाद्धातिता मृगशूकराः । तत्रैका हरिणी सूत घातिता गर्भसंयुता ॥ २ ॥
तद्गर्भजौ हतौ तत्र शुभौ द्वौ मृगशावकौ । सहायाभ्यां युतेनैव कृतं कर्म दुरात्मना ॥ ३ ॥
ताभ्यां मिलित्वा तौ भुक्त्वामायां चाण्डजाधिप । सोऽथ काले महाभाग प्राप्तः शत्रुपुरं पुरा ४॥
स शौर्यकर्मणा सूत घातयित्वा रिपून्बहून् । घातितश्चापि रिपुभिः प्रहारैरतिदारुणैः ॥ ५ ॥
सङ्ग्रामभूमौ स मृतः प्राप्तः स्वर्गपुरं तदा । भुक्त्वा नानाविधान्भोगान्स जातो ब्राह्मणस्त्विह॥६॥
देशे प्रयागनिकटे सर्वशास्त्रार्थकोविदः । जातः कर्कटगे जीवे लग्नस्थे हि महातपाः ॥ ७ ॥
धनैर्नानाविधैर्युक्तो गौराङ्गो रक्तलोचनः । शिवपूजनजात्पुण्यात्प्राक्कृतात्सकलैः सुखैः ॥ ८ ॥
महामनोरथैश्चापि पूर्णश्चात्रैव जन्मनि । राज्यप्रचार्यत्युग्रश्च पुण्यात्पापफलं शृणु ॥ ९ ॥
धूर्तः शठः सर्वभक्षः स्वल्पपापरतः क्वचित् । सहायलक्षणं सूत शृणु पुत्र यथातथा ॥ १० ॥
द्वाभ्यां मिलित्वा भुक्तौ द्वौ मृगशावौ खगाधिप । पृच्छकस्य च तौ पुत्रावुभौ ज्येष्ठकनिष्ठकौ ११
अपस्मारेण रोगेण मृतौ चात्रैव जन्मनि एव सन्ततिदुःखार्तः स विप्रो विधिवर्जनात् ॥१२॥
प्रतिमासोत्थपापस्य प्रायश्चित्तं वदाम्यहम् । पूजयेच्छिवलिङ्गानां लक्षमर्धं तदर्धकम् ॥ १३ ॥
हिरण्मयौ तथा देयौ द्वावत्र मृगशावकौ । पूजयेच्च तथा वायुं विधिना मृगदैवतम् ॥ १४ ॥
तन्मन्त्रैर्धूपगन्धाद्यैर्नानाभक्ष्यैर्विधानतः । प्रायश्चित्तं परं तस्य पापस्य क्षयकारकम् ॥ १५ ॥
अथवा भोजयेद्विप्रान्सहस्रद्वयसम्मितान् । पुत्रपौत्रविवृद्धिः स्यात्प्रायश्चित्ते कृते त्विह ॥ १६ ॥
प्रायश्चित्तेऽकृते सूत नच पुत्रसुखं लभेत् । रिष्टेन मरणं चापि वर्षे वेदाब्धिकेऽण्डज ॥ १७ ॥
प्रायश्चित्ते कृते तस्य जीवनं चाब्दसप्ततिम् । चैत्राष्टम्यां च निधनं शुक्लायां गरुडाग्रज ॥१८॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो विंशत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७२० ॥

श्रीसूर्य उवाच ।

गर्भपातनपापाढ्या बभूव प्राग्भवेण्डज । सेह वै तेन पापेन गर्भपातनदुःखिनी ॥ १ ॥
विप्रकन्याविवाहाद्यै विधिवच्चात्र जन्मनि । मुच्यते तेन पापेन गर्भस्थैर्यं भवेदिह ॥ २ ॥
अथवा पार्वतीं दद्याद्देवीं दशसुवर्णजाम् । युक्तां गणेशस्कन्दाभ्यां नानाभरणभूषिताम् ॥ ३ ॥
तदर्धमितिकां वापि पूजयित्वा विधानतः । मुच्यते पूर्वपापाच्च गर्भपातनजात्सुत ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकविंशत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७२१ ॥

श्रीसूर्य उवाच ।

या काचिद्दाह्येन्नारी देवागारं खगाधिप । सातिसारेण महता पीड्यते चेह भामिनी ॥ १ ॥
शङ्करप्रतिमादानान्मूर्त्तेर्विष्णोर्द्विजार्पणात् । न जायते महापीडा रक्तातीसारसंभवा ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वाविंशत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७२२ ॥

श्रीसूर्य उवाच ।

ब्रह्महा प्राग्भवे सूत तिर्यक्त्वं प्राप्य निश्चयात् । सम्पर्कान्दारुणांश्चैव भुनक्त्यत्रैव जन्मनि ॥ १ ॥
कर्मक्षये तु कुष्ठेन सोत्र जन्मनि पीड्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोविंशत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७२३ ॥

श्रीसूर्य उवाच ।

या काचिद्धातयेन्नारी पत्युर्मित्रं च प्राग्भवे । नियतं वायुरोगेण पीड्यते बहुपीडया ॥ १ ॥
पापं प्रतीक्ष्य विप्रादेः सर्वस्वार्धतदर्धजम् । वायुं हिरण्मयं कुर्यान्मृगं विहितलक्षणम् ॥ २ ॥
पूजयित्वा विधानेन गन्धैर्वस्त्रैर्विशेषतः । मन्त्रैश्च वायुजैः सूत दद्याद्विप्राय धीमते ॥ ३ ॥
वायुरोगस्य शमनं दानेनानेन जायते ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्विंशत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७२४ ॥

श्रीसूर्य उवाच ।

अज्ञानादथ या नारी गोत्रघातकरी पुरा । बभूव सततं चात्र लूतारोगप्रपीडिता ॥ १ ॥
श्रवणादितिहासानां प्राजापत्याद्व्रतात्सुत । लूतारोगं न पश्येत सात्र जन्मनि चाण्डज ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचविंशत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७२५ ॥

अरुण उवाच ।

भूमिदेवकुलोत्पन्नः किञ्चिद्वित्तसमन्वितः । संयुतो वायुपित्ताभ्यां नेत्रतोदशिरोर्तिमान् ॥ १ ॥
सद्वृत्तश्च सुखी धीमान्धर्मिष्ठो धर्मवत्सलः । व्रणो रेखा शराद्वापि बाल्ये स्याद्ग्रहणीगदः ॥ २ ॥
कटिपृष्ठाभिघाताद्वा व्रणो वाताग्निदर्शनम् । परोक्षमतिवादं च ब्रुवते कारणं विना ॥ ३ ॥
तस्य प्रिया शुभाचारा सती व्रतपरायणा । काकवंध्या कथं जाता कस्येदं कर्मणः फलम् ॥ ४ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि रूपाढ्या भार्या विप्रस्य सात्त्विकी । प्रतिवेश्मस्थितो वैश्यो ब्राह्मणो ज्ञानिसत्तमः॥५॥
अप्रसूता प्रिया तस्य चपला चारुलक्षणा । वैश्येन कामिता सा वै लोभमोहादिविभ्रमैः ॥ ६ ॥
अज्ञानात्काममिच्छन्ती भाविना वै बलीयसा । तावत्कालवशेनैव ब्राह्मणो जनतां गतः ॥ ७ ॥
स वैश्यो दैवयोगाच्च भाविनोऽर्थस्य वै बलात् । सुतनुं धर्षयामास बहुकालं खगेश्वर ॥ ८ ॥
व्यभिचारवशात्तत्र ह्यन्योन्यं तद्धृतं धनम् । गृहीतं तद्धनं सर्वं धूर्तया लुब्धचेतसा ॥ ९ ॥
ब्राह्मणो धनितां प्राप्तो लोके जग्राह विश्रुतिम् । पुंश्चल्या निन्द्यवृत्त्या वै विप्रोऽयं धनवानिति ॥
तेन दुःखेन विप्रो वै ब्राह्मणीमत्यजत्पुरा । सा चापि कुलटा दुष्टा भास्करेः सदनं गता ॥ ११॥
निर्वंशो जायते तत्र ब्राह्मणस्य खगेश्वर । तेन कर्मविपाकेन तादृशं च भवेदिह ॥ १२ ॥
पश्चान्मानुष्यमापन्नो बहुशोकाकुलो भृशम् । इदं द्वितीयं वै जन्म ब्रह्मवंशसमुद्भवम् ॥ १३ ॥
एकापत्यभवं दुःखमनपत्यत्वमेव वा ॥ १४ ॥
मार्गशीर्षे शुभे मासे शुक्लपक्षादितः खग । प्रत्यक्षं भाग्यसौख्याप्तिव्रतं तु प्रतिवत्सरम् ॥ १५ ॥
षोडशाब्दानि नारीभिः कर्तव्यं विधिपूर्वकम् । गौरीव्रतमिदं दीक्षाक्षतसौख्यफलप्रदम् ॥ १६ ॥
प्रातर्नियममास्थाय दन्तधावनपूर्वकम् । अद्याहं शिवयोः प्रीतिमाचरिष्ये शुभव्रतम् ॥ १७ ॥
स्थानप्रवासनिरतं निशि जागरतत्परा । ततो मध्याह्नसमये स्नात्वा कुंकुमवाससी ॥ १८ ॥
परिधायार्चयेद्गौरीं पतिपुत्रवतीं स्त्रियम् । कुंकुमैः कज्जलैश्चालंकरणैः पुष्पमालया ॥ १९ ॥
ताम्बूलैस्तु सकर्पूरैः सौभाग्याष्टकवस्तुना । ततश्चास्तमिते भानौ वर्तिं षोडशतन्तुभिः ॥ २० ॥
विधाय तिलतैलेन दीपं कुर्याच्छिवाग्रतः । गीतवाद्यनिर्घोषपुराणश्रवणादिभिः ॥ २१ ॥
नैवेद्यं विधिवत्कुर्यादपूपैरतलतण्डुलैः । तथा षोडशसंख्यानि वेणुशूर्पाणि कारयेत् ॥ २२ ॥

सप्तधान्यफलोपेतान्यष्टसौभाग्यवन्ति हि । एवं विधिं समास्थाय भोजयेद्दम्पतीञ्शुभान् ॥ २३ ॥
दानभोज्यैस्तथा पुष्पैः पक्षिभ्यो वलिमाहरेत् । दीनान्धकृपणेभ्योऽन्नं सर्पिष्यात्मानमीक्षयेत् २४
एतद्गौरीव्रतं नाम मार्गशीर्षे समाचरेत् । एवं कृतविधेः सूत प्राप्यते पुत्रपौत्रकम् ॥ २५ ॥
नारी नियमसम्पूर्णा व्रतं कुर्यात्प्रयत्नतः । सुतसौभाग्ययुक्ता सा पतिपुत्रसुखाप्तये ॥ २६ ॥
ऐहिकं लक्षणं तस्या नार्या वै जायते त्विह । स्वसुर्मातृष्वसुर्वापि सपत्न्याः शोक एव च ॥२७॥
उदरार्तिरसृग्वातः पार्ष्णिषादादिवेदना । वाक्याभिशंसनं चापि वाक्यदोषो धनच्युतिः ॥ २८ ॥
स्वशक्तिनिन्दा हीनत्वं परेभ्यो मर्मतोदनम् ॥ २९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चविंशत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७२६ ॥

श्रीसूर्य उवाच ।

शकृन्मूत्रं सृजेद्यस्तु देवागारे नराधमः । गुदरोगमवाप्नोति सोऽत्र जन्मनि मानवः ॥ १ ॥
सोऽप्येकं पूजयेद्विष्णुं शिवं वा विधिनाण्डज । प्राजापत्यं चरेत्कृच्छ्रं दद्याद्गोमिथुनं सुत ॥ २ ॥
न पश्यति तदा पीडां गुदजामत्र जन्मनि ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तविंशत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७२७ ॥

श्रीसूर्य उवाच ।

वातयेद्यः पुमान्नारीमज्ञानात्पूर्वजन्मनि । सोऽत्र जन्मनि जायेत कृशो वलविवर्जितः ॥ १ ॥
शर्कराधेनुदानेन दशसंख्येन चाण्डज । विमुच्यते कृशत्वाच्च शतब्राह्मणभोजनात् ॥ २ ॥
होमात्स्वस्त्ययनाज्जापाद्गायत्रीजपतोऽत्र च । तीर्थस्नानादाज्यदानाद्वलीभवति नान्यथा ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाविंशत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७२८ ॥

श्रीसूर्य उवाच ।

देवद्रव्यं हरेत्सूत पूर्वजन्मनि यो नरः । सोऽत्र जन्मनि जायेत वायुपीडाभिरन्वितः ॥ १ ॥
प्रायश्चित्तमिदं वायोर्नाशनं तस्य वच्म्यहम् । जपेन्मृत्युञ्जयं मन्त्रं सावित्रीं च विशेषतः ॥ २ ॥
होमयेत्तद्दशांशेन ब्राह्मणान्भोजयेत्तथा । वायुरोगोपशान्त्यर्थं शक्त्या दद्याच्च दक्षिणाम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनत्रिंशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७२९ ॥

श्रीसूर्य उवाच ।

देवागारे तु या काचित्प्राग्भवे विनतासुत । सृजेन्मूत्रं पुरीषं च मोहादत्रैव जन्मनि ॥ १ ॥
गुदरोगयुता सा वै भविष्यति न संशयः । गुदरोगविनाशाय पूर्वपापक्षयाय वै ॥ २ ॥
सा वै गोमिथुनं दद्यात्प्राजापत्यं चरेद्व्रतम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिंशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७३० ॥

श्रीसूर्य उवाच ।

वभूव मुखजः कश्चिद्विद्याधनसमन्वितः । नानाकलासु कुशलो विष्णुभक्तिपरायणः ॥ १ ॥
राहुग्रस्ते प्रयागे तु सर्वस्वं दत्तवान्सुत । तत्र भाविवलात्सूत पापमाचरितं त्विदम् ॥ २ ॥
धर्षिता क्षत्रिया यूनि कामलोभाच्छुभानना । प्रताडितः पतिस्तस्यास्तेन दैवहतेन तु ॥ ३ ॥
ततो मृत्युवशं प्राप्तः स गत्वा यमशासनम् । शुभाच्छुभफलं भुक्त्वा चाशुभादतिदारुणम् ॥ ४ ॥

अन्यजन्मनि दानेन स जातः क्षत्रियाधरः । देशे विपाशानिकटे सप्तयोजनसम्मिते ॥ ५ ॥
सुरूपदेहः सद्बुद्धिः स्त्रीपुत्रधनसंयुतः । शूरो दाता प्रधानश्च देशेदेशेऽतिविश्रुतः ॥ ६ ॥
किञ्चित्पापरतो धूर्तो मनोदुःखाकुलो भृशम् । धर्षणात्क्षत्रियायास्तु भर्तृसन्ताडनात्तथा ॥ ७ ॥
वार्धके कण्डुरोगार्तो निश्चयादत्र जन्मनि । लक्ष्मैतदण्डजश्रेष्ठ सूर्यशुक्रौ चतुर्थगौ ॥ ८ ॥
वक्ष्यामि तस्य पापस्य निष्कृतिं पापशोधिनीम् । लक्ष्मीनारायणं दद्यात्पलेनार्धपलेन वा ॥ ९ ॥
हिरण्मयं सुघटितं सर्वाभरणभूषितम् । पूजयित्वा तु गन्धैश्च पुष्पैर्नानाविधैस्तथा ॥ १० ॥
दीपैर्विचित्रैर्विधिना दद्याद्विप्राय धीमते । गणनाथं तथा दद्यात्सौवर्णं दशमाषकम् ॥ ११ ॥
एवं विधानं यः कुर्यात्पूर्वपापविशोधनम् । न तस्य दद्रुः कण्डूश्च तस्माद्दोषात्प्रमुच्यते ॥ १२ ॥
अकालमरणं तस्य प्रायश्चित्तेऽकृतेऽत्र च । प्रायश्चित्ते कृते त्वत्र जीवनं सप्तसप्ततिम् ॥ १३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकत्रिंशदुत्तरसप्तशतांधिकसहस्रतमः ॥ १७३१ ॥

श्रीसूर्य उवाच ।

देवागारे तु या काचित्प्राग्भवे विनतासुत । सृजेन्मूत्रपुरीषं च मोहादत्रैव जन्मनि ॥ १ ॥
गुदरोगान्विता सा तु नारीपापप्रणाशनम् । वत्सगोमिथुनं दद्यात्प्राजापत्यव्रतं चरेत् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वात्रिंशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७३२ ॥

श्रीसूर्य उवाच ।

घातयेद्यः स्त्रियं साध्वीं कामात्पापविमोहितः । प्राग्भवे नियतं सोऽत्र कासं भजति जन्मतः॥१॥
तेनैव मृत्युमाप्नोति रोगेण हि खगाधिप । प्राप्ते रिष्टेऽथ षष्ट्यब्दे प्रायश्चित्तं न तत्समम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयस्त्रिंशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७३३ ॥

श्रीसूर्य उवाच ।

कन्यकावधजात्पूर्वं तस्मात्कन्या प्रजायते । जन्मन्यत्र महाभाग पूर्वपापादिदं फलम् ॥ १ ॥
पूजनाल्लक्ष्मरुद्राणां तदर्धानां तथार्चनात् । मुच्यते पूर्वपापाच्च घोरात्कन्यावधादिह ॥ २ ॥
अथवा विधिना सूत तडागोत्सर्गपुण्यतः । विप्राणां भोजनात्तस्मिंस्तडागे गोप्रदानतः ॥ ३ ॥
पूर्वपापात्प्रमुच्येत नात्र कार्या विचारणा ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुस्त्रिंशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७३४ ॥

श्रीसूर्य उवाच ।

कश्चित्क्षात्रकुले सूत पूर्वजन्मन्यभूद्ध्रुवम् । गिरिवासी महादुष्टश्चौर्यकर्मरतो दृढः ॥ १ ॥
लुण्ठितो ब्राह्मणस्तेन मार्गे सन्ताडितो भृशम् । तत्ताडनान्महाबाहो मृतः काले द्विजोत्तमः २॥
गते वहुतिथे काले स जातो ब्रह्महाऽधुना । गङ्गायमुनयोर्मध्ये क्रूरकर्मा महोद्यमी ॥ ३ ॥
प्राक्शिवाराधनात्पुण्याद्बाहुजः कुष्ठसंयुतः । वक्ष्यामि निष्कृतिं तस्य सर्वपापौघनाशिनीम् ॥ ४॥
तेन सर्वस्वतः कार्यो वृषभोऽत्र हिरण्मयः । क्षौमवस्त्रयुतो भव्यः शृङ्गाभ्यां संयुतो महान् ॥ ५ ॥
स देयो वेदविदुषे कुष्ठदोषोपशान्तये । दानेनानेन सततं प्रीतो भवति वै शिवः ॥ ६ ॥
तस्माच्छिवप्रसादेन कुष्ठं तस्य प्रशाम्यति ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चत्रिंशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७३५

श्रीसूर्य उवाच।

प्रागासीद्ब्राह्मणी काचिद्भर्तुः प्रियरता सदा। दानधर्मरता साध्वी विप्राणां भोजने रता ॥ १ ॥
तदा दैवात्सा सुभगा द्रव्यलोभरता सदा। सपत्नीपुत्रमददद्विषं चैतद्भशानुगम् ॥ २ ॥
मृतस्तद्विषयोगेन गृहीतं तद्धनं तया। तद्दुःखेन पतिस्तस्या मृतः पुत्रशुचान्वितः ॥ ३ ॥
पापमाचरितं चोग्रं स्वपुत्रवधघातजम्। गतो यमपुरं भुक्त्वा पूर्वपुण्यफलं शुभम् ॥ ४ ॥
तद्वत्पापफलं सूत घोरान्नरकसंज्ञकान्। पूर्वपुण्यप्रभावेण सा जाता वर्ततेऽधुना ॥ ५ ॥
क्षात्रे कुले महापुण्ये राज्ञस्त्रास्ति खगाधिप। सा रक्तगौरा धर्मज्ञा सदा पुण्यपरायणा ॥ ६ ॥
मध्यस्वरूपा सिद्धार्था सुशीला गौरवान्विता। नातिव्ययायुता पुण्यात्स्वकुलेष्टा प्रियंवदा ॥ ७ ॥
पतिप्रियरता धीरा सुखैश्वर्यधनान्विता। पुण्यादिदं तथा पापाल्लोभाढ्या नष्टपुत्रका ॥ ८ ॥
स्वल्पसौख्ययुता काले कुष्ठव्याधिसमन्विता। यौवने भर्तृसंयुक्ता वार्धके सुखवर्जिता ॥ ९ ॥
सपत्नीपुत्रवधजात्पूर्वपापात्खगाधिप। लक्षणैरेभिराढ्यायाः प्रायश्चित्तं वदाम्यहम् ॥ १० ॥
विष्णुः कार्यः शतैर्माषैः सौवर्णैर्विश्वयोनिभृत्। तद्वन्महेश्वरं कुर्याद्गन्धैः पुष्पैरलङ्कृतम् ॥ ११ ॥
देयौ विप्रेषु पात्रेषु पूर्वपापापनुत्तये। जपेदष्टाक्षरं मन्त्रमयुतं होमयेत्ततः ॥ १२ ॥
गायत्रीं च जपेत्तद्वद्दद्याद्गावस्तथा सुत। भोजयेच्छक्तितो विप्रांस्तेभ्यो दद्याच्च दक्षिणाम् ॥ १३ ॥
एवं कुर्यात्प्रयत्नेन पूर्वपापविशोधनम्। न तस्याः पुत्रमरणं तदग्रे जायते ध्रुवम् ॥ १४ ॥
नैवं या कुरुते नारी प्रायश्चित्तं विधानतः। प्राक्सपत्नीसुताघातात्तस्याः पुत्रविनाशनम् ॥ १५ ॥
विप्राणां पूजनाद्दानात्तस्याः सन्ततिवर्द्धनम्। जीवितं कथितं तस्या वर्षाणामष्टसप्ततिम् ॥ १६ ॥
रिष्टं षष्टिमिताब्दे तु ध्रुवं चाकृतनिष्कृतेः ॥ १७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्त्रिंशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७३६ ॥

अरुण उवाच।

कश्चिद्विप्रकुलोत्पन्नो देहावयवकार्श्ययुक्। सदाचारः सुशोभाढ्यो दयानियमतत्परः ॥ १ ॥
क्रयविक्रयकर्ता च किञ्चिद्व्यापारवान्भुवि। तस्य प्रिया शुभाचारा पतिभक्तिपरायणा ॥ २ ॥
मातृपक्षमनास्तस्याः प्रीतिर्वै मातुलादिषु। असृग्वातगदार्ता सा बाल्ये स्याद्ग्रहणीगदः ॥ ३ ॥
काष्ठलोष्टाश्मशस्त्राद्यैर्घातः स्यात्करपादयोः। बहुपुत्राः प्रसूताश्च ह्यपुत्रस्तु तथाप्यसौ ॥ ४ ॥
एतस्य मृतपुत्रत्वं कर्मणा केन जायते। जातमात्रा मृताः केचित्केचित्यौगण्डमाश्रिताः ॥ ५ ॥
केचिद्दृष्टाननाश्चैव मृतः पुत्रोऽग्निमासकः। असृक्स्रावाद्भृशं पीडा जायते मासिमासि च ॥ ६ ॥
केन कर्मविपाकेन सत्यं वद दिवस्पते ॥ ७ ॥

श्रीसूर्य उवाच।

पूर्वं क्षात्रसमुत्पन्नः किञ्चिद्भूमिपतिस्तथा। तावज्जन्मनि वैश्यस्तु परवित्तापहारकः ॥ ८ ॥
एको ग्रामेऽवसद्विप्रः शान्तो दान्तः क्षमी सदा। पुत्र्यः पञ्च तथा सप्त ह्यपुत्रो मित्रसंयुतः ॥ ९ ॥
कालेनासौ मृतो विप्रो हृतं तेन धनं महत्। क्रियाकर्म कृतं नैव सर्वं राज्ञा हृतञ्च तत् ॥ १० ॥
एवं कृतापराधोऽसौ दूत्या सह स क्षात्रियः। किञ्चित्कालानन्तरं च देशान्तरगतीच्छया ॥ ११ ॥
म्लेच्छैर्विनिहतो मार्गे गतोऽसौ यमशासनम्। केचित्केचिद्विपच्यंते नरके भृशदारुणे ॥ १२ ॥
दानधर्मादिना किंचिदिह जन्मनि मानद। विप्रवंशे समुत्पन्नो जातो वै चेह जन्मनि ॥ १३ ॥

इदं द्वितीयं वै जन्म विप्रत्वं यत्र तस्य वै । पूर्वकर्मविपाकेन कन्यापत्यं प्रजायते ॥ १४ ॥
ब्रह्मस्वहरणाच्चैव मृतपुत्रः प्रजायते । नानापत्यानि पच्यन्ते नानाकर्मानुगानि हि ॥ १५ ॥
पुराकृतानि कर्माणि भुज्यन्ते जन्मजन्मनि ॥ १६ ॥

अरुण उवाच ।

प्रायश्चित्तं वद स्वामिन्येन सौख्यं चिरम्भवेत् । कन्यापत्यप्रशमनं बहुपुत्रप्रदायकम् ॥ १७ ॥

श्रीसूर्य उवाच ।

सुशुभे भूप्रदेशे तु गोमयाद्युपलेपयेत् । तत्रोपर्याविकं स्तीर्यमथवाजिनकं शुभम् ॥ १८ ॥
छादयेच्छुक्लवस्त्रेण कुर्याद्वै द्रोणपर्वतम् । तस्योपरि न्यसेत्पात्रं ताम्रं दशकपालिकम् ॥ १९ ॥
स्थापयेत्काञ्चपीं मूर्तिं सौवर्णीं शुभलक्षणाम् । मुक्तायज्ञोपवीताढ्यां निष्कसौवर्णनिर्मिताम्॥२०॥
दधानां करयुग्मेन चाक्षमालां कमण्डलुम् । कश्यपाद्वामभागे च त्वदितिं विश्वमातरम् ॥ २१ ॥
सौवर्णीं स्थापयेत्सूत सुवर्णद्वयनिर्मिताम् । आसने च समास्थाय ततो द्रोणा दिशं दिशम् ॥२२॥
हारकेयूरमुकुटकुण्डलाभरणादिकम् । एवं तौ दम्पती सम्यगर्चयेत्पर्वतोपरि ॥ २३ ॥
कृत्वा प्रतिष्ठितप्राणौ पूजयेद्विविधैर्गुणैः । नानार्घफलपुष्पादि चार्पयेत्सुसमाहितः ॥ २४ ॥
अभ्यर्च्य दम्पती तौ तु मन्त्रमेतमुदीरयेत् ॥ २५ ॥

मंत्रः ।

" यन्मया पूर्वजनुषि विप्राणां च धनं हृतम् । दूतिकाकर्मनिरतो वाक्यदोषादि यत्कृतम् ॥
तत्सर्वं क्षम्यतां देव तव मूर्तिं ददाम्यहम् " ॥ २६ ॥
अदितिं च प्रणम्याथ कृताञ्जलिरिदं ब्रुवन् । अदिते विश्वमातस्त्वं शरण्या शरणार्थिनाम् ॥२७॥
प्रजादुःखौघसन्तप्तहृदयं मामवेश्वरि । सम्प्रणाशय दुःखं मे प्रजां देहि यशस्विनीम् ॥ २८ ॥
एवंकृतविसर्गस्तु ब्राह्मणान्भोजयेत्ततः । शालग्रामशिलां शुद्धां सोमकान्तमणिं तथा ॥ २९ ॥
चन्द्रसूर्योपरागे तु ब्राह्मणाय प्रदापयेत् । एवंकृतविधिः सूत कृष्णं गां दापयेत्ततः ॥ ३० ॥
सर्पिष्यात्मानमालोक्य भोजयेच्च समृद्धिभिः । ऐहिकं लक्षणं तस्य शरीरेऽप्युपजायते ॥ ३१ ॥
काष्ठलोष्टाश्मशस्त्राद्यैः करपादव्रणं वेदत् ॥ ३२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्रिंशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७३७ ॥

श्रीसूर्य उवाच ।

राजानं घातयेद्यस्तु पुरुषः प्राग्भवेण्डज । स राजयक्ष्मरोगेण युक्तः स्यादत्र जन्मनि ॥ १ ॥
तस्मिन्वयसि पक्षीन्द्र सोऽपि प्राणैर्वियुज्यते । महापापोत्थरोगस्य न चोक्ता निष्कृतिर्मया॥२॥
अपि ज्ञानकृतं पापं रिष्टरूपेण काश्यपे । नाशयत्यमरं सिद्धं पूर्णायुष्कमपि ध्रुवम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टत्रिंशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७३८ ॥

श्रीसूर्य उवाच ।

परगर्भं तु यः कश्चिद्घातयेज्ज्ञानवर्जितः । जलोदरेण सततं रोगेणात्र स्वपीड्यते ॥ १ ॥
जलधेनुप्रदानेन विधिना गरुडाग्रज । ताम्ररूप्यसुवर्णस्य दानात्पापप्रणाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनचत्वारिंशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७३९ ॥

श्रीसूर्य उवाच ।

ब्राह्मणोऽभूत्कुरुक्षेत्रे कृषिकृद्वेदपारगः । स्वज्ञातीयस्य चान्यस्य वृत्तिलोपमकारयत् ॥ १ ॥
तत्सम्बद्धमभूद्युद्धं द्वयोरेको मृतस्तदा । वृत्तिलोपी द्विजः काले गतो हि यमशासनम् ॥ २ ॥
भुक्त्वा तत्पापजं सर्वं शतदुनिकटेऽधुना । सहि जातो द्विजश्चात्र वेदाभ्यासाच्च पुत्रक ॥ ३ ॥
कुष्ठक्षयान्वितश्चात्र युवभावे खगाधिप । तत्पापनाशनं सर्वं प्रायश्चित्तं प्रवक्ष्यहम् ॥ ४ ॥
वेदाभ्यासाच्च महतः सावित्रीजापतस्तथा । गङ्गायां वासतो वापि सर्वपापात्प्रमुच्यते ॥ ५ ॥
न कुष्ठवृद्धिरत्रास्ति तद्रूतैः शमनं भवेत् । जीवेत्षष्टिमिताब्दान्तं रिष्टं चैव प्रशाम्यति ॥ ६ ॥
गतिस्तस्य महाभाग विद्याभ्यासाच्च या तथा । भविष्यति शुभा लोके परत्र च खगेश्वर ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चत्वारिंशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७४० ॥

श्रीसूर्य उवाच ।

कुलद्वयानन्दकरी पूर्वजन्मनि वैश्यजा । बभूव भर्तृसुहृदामाज्ञापालनतत्परा ॥ १ ॥
अत्र जन्मनि सा विप्र काश्यां जाता हि सुव्रत । व्रतदानपरा चापि भर्तृतोषणसंयुता ॥ २ ॥
पञ्चपञ्चाशदब्दान्तं प्रवेक्ष्यत्यत्र जन्मनि । स्वर्गकामा चिताग्नौ तु नात्र कार्या विचारणा ॥ ३ ॥
सा गमिष्यति वै स्वर्गं भुक्त्वा भोगांस्तु तत्र वै । भविष्यति महाराजकुले राजातिधार्मिकः ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकचत्वारिंशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७४१ ॥

श्रीसूर्य उवाच ।

पीड्यते वातरोगेण दारुणेन खगाधिप । सोऽत्र जन्मनि यश्चाद्यात्पूर्वं शूद्रगृहाश्रितः ॥ १ ॥
प्रायश्चित्तं परं वै स व्रतं चान्द्रायणं चरेत् । व्रतान्ते कपिलां दद्यात्सर्वपापापनुत्तये ॥ २ ॥
पापक्षये क्षयं याति रोगस्तत्पापजस्त्विह ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विचत्वारिंशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७४२ ॥

श्रीसूर्य उवाच ।

अस्त्यत्र सुमुखी सूत सदा भर्तृपरायणा । दानधर्मरता भव्या सुभगा पुत्रवर्जिता ॥ १ ॥
पूर्वमासीच्च मुखजा सगर्भा फललालसा । त्रोटितान्यफलं पक्वं भक्ष्यार्थं चौर्यकर्मणा ॥ २ ॥
तेन कर्मविपाकेन फलहीनात्र जन्मनि । भवन्ति खलु ये पुत्रा अर्वाग्वर्षाष्टतोऽण्डज ॥ ३ ॥
प्राप्स्यन्ति चैव पञ्चत्वं तस्याश्चाकृतनिष्कृतेः । निष्कृतिं तां प्रवक्ष्यामि पूर्वपापप्रणाशिनीम् ॥ ४ ॥
शनिवारेऽण्डजश्रेष्ठ निमन्त्र्याश्वत्थकं सुत । तत्तले ब्राह्मणी सूर्यदिने षष्ठ्यां तु भोजयेत् ॥ ५ ॥
नानाफलैस्तथा पक्वैरपूपैरससंयुतैः । फलानि विकिरेत्तत्र कृत्वाश्वत्थप्रदक्षिणाम् ॥ ६ ॥
पूजयेत्तु महाभाग जीवेत्तस्याश्च वै सुतः ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिचत्वारिंशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७४३ ॥

श्रीसूर्य उवाच ।

देशे हि यामुने ह्यासीत्पूर्वं वाहुजसंज्ञकः । गङ्गास्नानं कृतं तेन वाहुजानां सहायतः ॥ १ ॥
शकटेन कुटुम्बस्य पालनं ह्यकरोत्सदा । एकस्मिन्वै दिने गत्वा ददाह वनमद्भुतम् ॥ २ ॥
वलं दैवस्य सम्प्राप्य जीवा दग्धा अनेकशः । वन्धोः सहायतस्तेन कृतं कर्मातिदारुणम् ॥ ३ ॥
शुभाच्छुभफलं भुक्त्वा पापाच्च नरकांस्तथा । माघे तु जाह्नवीस्नानात्स जातः शूद्रवंशके ॥ ४ ॥

विपाशानिकटे देशे योजने सप्तसम्मिते । भव्यो महोद्यमी गौरः कृशाङ्गो लोचनेल्पदृक् ॥ ५ ॥
राजमान्यो बहुस्त्रीको देवतातिथिपूजकः । भ्रातृहीनः शठो धूर्तः पुत्रसन्ततिवर्जितः ॥ ६ ॥
पञ्चमे भवने राहुर्भौमयुक्तोल्पसन्ततिः । लक्षणैर्लक्षितश्चोग्रैरवेहि गरुडाग्रज ॥ ७ ॥
बन्धोः साहाय्यतः पापात्पूर्वजन्मसमुद्भवात् । तस्माज्जातः पुत्रहीनो स पापोऽत्रैव जन्मनि ॥८॥

अरुण उवाच ।

निष्कृतिः कथ्यतां देव सुखसौख्यविवर्धिनी । सर्वपापप्रशमनी लोकानां हितकारिणी ॥ ९ ॥

श्रीसूर्य उवाच ।

निष्कृतिं तां प्रवक्ष्यामि जन्तुदग्धविनाशिनीम् । वनदेवी तत्र कार्या पलेनार्धपलेन वा ॥ १० ॥
हिरण्मयी शुभालेख्या पत्रे तच्चतुरस्रके । वनजीवास्तथा लेख्याः सर्वे तद्रूपसंज्ञकाः ॥ ११ ॥
प्रजापतिस्तथा कार्यो माषत्रयविनिर्मितः । राजतं पलमेकं तु गणाध्यक्षं शिवात्मकम् ॥ १२ ॥
सम्पूज्य गन्धपुष्पाद्यैः सा देवी कार्यसाधिनी । देया वेदविधिज्ञाय सर्वपापापनुत्तये ॥ १३ ॥
प्रजापतिस्तथा देयः सर्वकल्मषनाशनः । शृणुयाद्वारतं वापि पारायणसुभाषितम् ॥ १४ ॥
अष्टाक्षरं तथा मन्त्रं जपेच्च विधिपूर्वकम् । दशायुतं तदर्धं वा तदर्धं विनतासुत ॥ १५ ॥
होमयेत्तद्दशांशेन तद्दशांशेन भोजनम् । तावन्मितं सूर्यमन्त्रं जपेत्प्रणवपूर्वकम् ॥ १६ ॥
विप्रेभ्यो दक्षिणां दद्यात्तस्मात्पापात्प्रमुच्यते । य एवं कुरुते सूत पूर्वपापप्रणाशनम् ॥ १७ ॥
तस्य पुत्रविवृद्धिः स्यादिह जन्मनि निश्चितम् । अकृते तु यथाशक्ति रिष्टं पष्टिमितेब्दके॥ १८ ॥
प्रायश्चित्ते कृते सूत जीवनं चाब्दसप्ततिम् । जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् ॥१९॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुश्चत्वारिंशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७४४ ॥

श्रीसूर्य उवाच ।

परान्नं या हरेन्नारी पूर्वजन्मनि सुव्रत । सात्र रोगेण जीर्णेन दुःखिता जायते ध्रुवम् ॥ १ ॥
कुर्यान्नानाविधं चान्नं रसैः सर्वैः समन्वितम् । विप्रेभ्यो भोजनं दद्याच्छक्त्या दद्याच्च दक्षिणाम्२
होमयेच्च तथा चात्र गायत्र्या त्र्यम्बकेण तु । मुच्यते जीर्णरोगाच्च पूर्वपापाच्च पुत्रक ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचचत्वारिंशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७४५ ॥

श्रीसूर्य उवाच ।

देवमूर्तिं च यः कश्चिद्देवागारस्थितां सुत । भग्नां कुर्यान्नरो मोहात्परेण स्थापितां पुरा ॥ १ ॥
अप्रतिष्ठो भवेदत्र जन्मन्यथ खगाधिप । वर्षत्रयं तदाशून्यपूजनात्पापनाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्चत्वारिंशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७४६ ॥

श्रीसूर्य उवाच ।

यश्चाचरेद्राजवधं मोहात्पूर्वभवे नरः । स राजयक्ष्मी विज्ञेयो घोरपापसमुद्भवः ॥ १ ॥
प्रायश्चित्तं महाभाग शृणु चात्र प्रयत्नतः । गोभूहिरण्यमिष्टान्नातिलवस्त्रान्नदानतः ॥ २ ॥
घृतधेनुप्रदानेन क्षयरोगं न पश्यति । दानं यथानुमानेन सर्वस्वार्धतदर्धकम् ॥ ३ ॥
देयं द्विजवधादौ हि विचार्यात्र प्रयत्नतः । तत्क्षणे काश्यपे चात्र क्षयरोगः प्रशाम्यति ॥ ४ ॥
रिष्टेनैव विनाशः स्यात्तस्य चाकृतनिष्कृतेः ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तचत्वारिंशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७४७ ॥

श्रीसूर्य उवाच ।

या नारी घातयेत्काचित्परगर्भं खगाधिप । जलोदरेण रोगेण पीड्यते चात्र जन्मनि ॥ १ ॥
गङ्गास्नानेन सततं विधिनार्के मृगस्थिते । तथा तज्जलपानेन तस्मात्पापाद्विमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टचत्वारिंशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७४८ ॥

श्रीसूर्य उवाच ।

या नारी घातयेत्काचित्परगर्भं खगाधिप । जलोदरेण रोगेण पीड्यते बहुजन्मनि ॥ १ ॥
गङ्गास्नानेन सततं विधिनार्के मृगस्थिते । तथा तज्जलपानेन तस्मात्पापाद्विमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनपंचाशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७४९ ॥

श्रीसूर्य उवाच ।

यः कश्चिद्वाग्विरोधी च पूर्वजन्मनि वादिनः । सोऽत्र जन्मनि मूकत्वं भजत्येव न संशयः ॥ १ ॥
मोहादिदं चरेत्सूत देयं दानं द्विजातये । वेदानां पुस्तकं रम्यं पूजयित्वा विधानतः ॥ २ ॥
संछाद्य वन्धनैः शुद्धैः क्षौमजैर्गरुडाग्रज । प्राग्जातपापशमनं सर्वं प्रोक्तं परन्तप ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चाशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७५० ॥

श्रीसूर्य उवाच ।

अत्र जन्मन्यसौ वन्ध्या प्राग्भवेऽभूत्सुतान्विता । अयोध्यायान्तु सुमुखी धनभ्रातृसमन्विता ॥१॥
पूर्वपापप्रभावेण सपत्न्या गर्भनाशनात् । जातेयं पादजात्रैव दुःखार्ता सुतवर्जिता ॥ २ ॥
प्रायश्चित्तं प्रवक्ष्यामि सर्वं पापप्रणोदनम् । काश्यां गत्वा च विधिना शिवमाराध्य यत्नतः ॥३ ॥
व्रतैर्दानैर्महापुण्यैर्नानाविभवविस्तरैः । शिवरात्रौ ततः पश्चाद्दीपमालादिनेण्डज ॥ ४ ॥
तत्र रात्रौ महानद्यां मध्ये स्नानं तु कारयेत् । मन्त्रैर्वरुणसूक्तैश्च नौकायां वा खगाधिप ॥ ५ ॥
य एवं कुरुते सम्यक्तस्याः स्यात्सन्ततिर्ध्रुवम् ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकपञ्चाशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७५१ ॥

श्रीसूर्य उवाच ।

परनिन्दान्तु यः कुर्यात्प्राग्भवे विनतासुत । दद्यात्स कपिलां धेनुं सर्वोपस्करसंयुताम् ॥ १ ॥
ब्राह्मणाय दरिद्राय तस्माद्दोषात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विपंचाशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७५२ ॥

श्रीसूर्य उवाच ।

या कांचित्प्राग्भवे नारी कुर्याद्राजवधं सुत । सात्र जन्मनि तत्काले क्षयरोगनिपीडिता ॥ १ ॥
यक्ष्मणात्र क्षयं यान्ति धातवः सर्वदेहिनाम् । धातुक्षये क्षयं याति तच्छरीरमशाश्वतम् ॥ २ ॥
दृढकर्मकृतं पापं तस्मान्नोक्तं खगाधिप । पापनाशकरं किञ्चित्प्रायश्चित्तं हि काश्यपे ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिपंचाशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७५३ ॥

श्रीसूर्य उवाच ।

या वाग्विरोधिनी भर्तुः पूर्वभावे खगाधिप । मूकत्वं जायते तस्याश्चेह जन्मनि निश्चयात् ॥ १ ॥

तत्पापनाशनं दानं दद्याद्वेदस्य पुस्तकम् । ब्राह्मणे वेदविदुषे पूर्वपापात्प्रमुच्यते ॥ २ ॥
होमयेच्च तिलान्भक्त्या भोजयेद्ब्राह्मणांस्तथा ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःपंचाशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७५४ ॥

श्रीसूर्य उवाच ।

या काचिद्भञ्जयेन्नारी पूर्वभावे खगाधिप । प्रतिमां देवतागारे स्थापितामपरेण च ॥ १ ॥
अप्रतिष्ठान्विता सात्र जायते वै खगाधिप । वर्षत्रयं ब्रह्मवृक्षपूजनात्पापनाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायःपंचपंचाशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७५५ ॥

श्रीसूर्य उवाच ।

कश्चिद्द्विजो महाभाग ह्यासीद्वङ्गे हि धार्मिकः । गयायां द्वादशे वर्षे कृतं श्राद्धं विधानतः ॥ १ ॥
विधिना चैव प्रदत्तानि काम्यश्राद्धानि मानद । ततो भाविवलात्सूत ब्राह्मणेन तपस्विना ॥ २ ॥
स्थापितं तद्गृहे द्रव्यं लोभाद्दत्तं न तद्धनम् । सर्वैर्मिलित्वा तद्भक्तं स्त्रीपुत्रभ्रातृभिः सह ॥ ३ ॥
ततो बहुतिथे काले गतो हि यमशासनम् । शुभात्स्वर्गफलं भुक्त्वा पापाच्च नरकं भृशम् ॥ ४ ॥
पूर्वपुण्यप्रभावेण स जातोऽत्रापि वै द्विजः । मथुरामण्डले देशे पुण्ये रम्यस्थले शुभे ॥ ५ ॥
विशालाक्षो धनी मानी सुरूपो मितदो घृणी । बहुदेशाधिकाराढ्यः पुण्यात्स्वर्गफलं त्विदम् ॥६॥
लोभी क्रूरो महाक्षुद्रः सदा चिन्तासमन्वितः । सन्तानसुखहीनस्तु परुषः स्त्रीसुखोज्झितः ॥७॥
बन्धुहीनो व्ययी क्षीणः सर्वं तत्पापतः फलम् । वक्ष्यामि निष्कृतिं तस्य पवित्रां पापशोधिनीम् ८
कुबेरप्रतिमां रौक्मीं पञ्चस्वर्णामितां शुभाम् । तदर्धमितिकां वापि निजवित्तानुसारतः ॥ ९ ॥
सम्पूज्य गन्धपुष्पाद्यैः सा देया ब्राह्मणाय च । लक्ष्मीनारायणं दद्यात्सुवर्णपलसम्मितम् ॥१०॥
पत्रालेख्यं पवित्रं वा पुत्रसन्ततिवर्धनम् । य एवं कुरुते सूत तस्य रिष्टं न जायते ॥ ११ ॥
प्रायश्चित्ते कृते त्वत्र चायुः सप्ततिवत्सरम् ॥ १२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्पञ्चाशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७५६ ॥

अरुण उवाच ।

भूमिदेवकुलोत्पन्नो वाताधिकशरीरवान् । क्षामाङ्गः क्षितिवर्णश्च स्वल्पवृत्त्या च जीवति ॥ १ ॥
देवब्राह्मणभक्तश्च किञ्चिद्वादपरायणः । करे पादे कुशस्त्रेण दंष्ट्राशृङ्गविधानतः ॥ २ ॥
व्रणो वै जायते दीर्घो नेत्रतोदो विरश्मिता । परोक्षमपवादं च ब्रुवते तस्य वै सदा ॥ ३ ॥
प्रिया तस्य शुभाचारा पतिभक्तिपरायणा । अनृतं वक्ति वै किञ्चित्किञ्चित्क्लेशस्य कारिणी ॥४॥
अपत्यानि म्रियन्ते च एकं द्वे त्रीणि तस्य वै । वर्षत्रयमिता बाला म्रियन्ते मासमिताः ॥५॥
केन कर्मविपाकेन मृतापत्यत्वमेव हि । एकोदरे स्थितो गर्भो न प्रसूतिर्न पातनम् ॥ ६ ॥
पृथगेवं कुभ्रातॄणां मृतापत्यत्वमेव च । गते बहुतरे काले कस्येदं कर्मणः फलम् ॥ ७ ॥

श्रीसूर्य उवाच ।

अत्रः पूर्वं वैनतेय तृतीयेऽत्रैव जन्मनि । क्षात्रे कुले समुत्पन्नः कश्चिद्भूमिपतिस्तथा ॥ ८ ॥
दानवृत्तिर्दयायुक्तः प्रियाप्रीतिः परस्परम् । तस्याप्यपरमातुस्तु पुत्रः परमसुन्दरः ॥ ९ ॥
एको वै पादचारस्तु तृतीयश्च स्तनन्धयः । गर्भयुक्तश्चतुर्थस्तु पिता मृत्युवशं गतः ॥ १० ॥
तस्यौर्ध्वदेहिकं कर्म कृतं पुत्रैः स्वशक्तितः । मासैके तु व्यतिक्रान्ते पुत्रेणैव दुरात्मना ॥ ११ ॥

निहता भ्रातरः सर्वे भाविनोऽर्थस्य वै वलात् । खिन्नया पुत्रदुःखेन मात्रा वै ताडितं ह्युरः१२॥
अवघाताच्छिलाभूता गर्भयुक्ता दिवं गता । अचिरादेव कालेन ज्येष्ठश्चोरेण घातितः ॥ १३ ॥
इदं द्वितीयं वै जन्म मृतापत्यं प्रजायते । पुराकृतानि कर्माणि भुज्यन्ते चेह मानवैः ॥ १४ ॥

अरुण उवाच ।

प्रायश्चित्तं वद स्वामिन्येन पापक्षयो भवेत् । गर्भस्थानां मृतानाञ्च लघूनां वृहतां तथा ॥ १५ ॥
तस्य पापस्य शुद्ध्यर्थं निष्कृतिं वद मे प्रभो ॥ १६ ॥

श्रीसूर्य उवाच ।

सौम्यायने तु सम्प्राप्ते सानुकूलग्रहेऽहनि । सपत्नीकः शुचिः स्नातः पञ्चगव्येन चांजसा ॥१७॥
उपोषणं दिवारात्रौ प्रातश्चानुदिते रवौ । सुरभेर्वै सगर्भायाः गोमयेनोपलेपयेत् ॥ १८ ॥
सुशुभे भूप्रदेशे तु कुंकुमाद्युपचर्चिते । कुर्यादष्टदलं पद्मं चित्रवर्णं सुशोभनम् ॥ १९ ॥
तन्मध्ये रुक्मिणीयुक्तं माधवं कलशेर्चयेत् । सौवर्णे राजते पद्मे सायुधं च चतुर्भुजम् ॥ २० ॥
उपचारैः शुभैर्गन्धैर्धूपैश्च कुसुमादिभिः । जनन्या सह संभूतं प्रद्युम्नाद्यांस्तथार्चयेत् ॥ २१ ॥
चारुदेहं सुवेषं च चारुगुप्तं यशोऽन्वितम् । इभवाहं चारुवाहं सुचारुं पूजयेत्क्रमात् ॥ २२ ॥
पूजनं विष्णुसूक्तेन तथा श्रीरसकोविदैः । पुष्पस्रग्धूपगन्धाद्यैरर्चयेद्विविधैर्गुणैः ॥ २३ ॥
तद्विप्रासोथ तद्विष्णोरतो देवाभिपूजयेत् । शतमष्टोत्तरं हुत्वा चरुणा पायसेन वै ॥ २४ ॥
होमान्ते विप्रभोज्यांते मन्त्रमेतमुदीरयेत् ॥ २५ ॥

मन्त्रः ।

"यन्मया पापकृत्कर्म कृतं वै पूर्वजन्मनि । सपत्न्याश्चैव वालस्तु निहतः क्रूरचेष्टया ॥ २६ ॥
स्वकुल्यहननं चापि भूमिद्रव्याभिलिप्सया । लघवोऽलघवश्चापि हता वै पूर्वजन्मनि ॥ २७ ॥
ततोऽघं वै मया प्राप्तं दुःखं नानाविधं त्विदम् । तत्तदेनोविनाशाय दानं सम्प्रददे त्विदम्" ॥२८॥
स्वस्त्यस्तु चोति तत्रोक्ता कोऽदादिति विसर्जयेत् । सर्पिष्यात्मानमालोक्य भुञ्जीत स्वेष्टवन्धुभिः२९
ऐहिकं लक्ष्म विज्ञेयं पूर्वकर्माभिशंसनम् । काष्ठलोष्टादिशस्त्राद्यैर्घातः स्याद्बालक्रीडनात् ॥ ३० ॥
जलादग्न्यादिना वाधा व्रणो वा तस्य जायते । नार्यङ्गे विकृतव्याधी मुखे तिलव्रणादिकम् ॥३१॥
पितृष्वसृमातुलान्योर्नेत्रतोदो विरश्मिता । स्वसुर्मातृष्वसुश्चापि वाल्ये वैधव्यताऽथवा ॥ ३२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तपञ्चाशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७५७ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे मोहात्परनिन्दां च कारयेत् । वागिन्द्रियवियुक्ता सा चेह जन्मनि जायते ॥१॥
धेनुं दद्यान्महाभाग विधियुक्तां सकम्वलाम् । तस्माद्रोगाद्विमुच्येत नात्र कार्या विचारणा ॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टपञ्चाशदुत्तरसप्तशताधिकसहस्रतमः ॥ १७५८ ॥

श्रीसूर्य उवाच ।

अभक्ष्यं भक्षयेद्यस्तु पूर्वजन्मनि मानवः । गण्डमालाख्यरोगेण संयुक्तो जायते त्विह ॥ १ ॥
पुण्यदेशे महाभाग संक्रान्त्यादिषु पर्वसु । गृहीत्वा कम्वलं शुद्धं विधिवद्वेदवेदिने ॥ २ ॥
कुटुम्बिने दरिद्राय दद्याद्दोषापनुत्तये । गण्डमालाहरन्त्वेतद्दानमुक्तं मया त्विह ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनषष्ट्युत्तरसप्तशताधिकसहस्रतमः ॥ १७५९ ॥

श्रीसूर्य उवाच ।

कुलस्त्रीयं महादुष्टा पूर्वमासीत्खगाधिप । अत्र पूर्वकृतात्पापान्मानुषी सङ्करा स्मृता ॥ १ ॥
धनपुत्रविहीना सा चेह जन्मनि जायते । निष्कृतिं तां प्रवक्ष्यामि प्रयागे मरणं सुत ॥ २ ॥
वासात्पापं क्षयं याति पूर्वजन्मकृतं दृढम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षष्ट्युत्तरसप्तशताधिकसहस्रतमः ॥ १७६० ॥

श्रीसूर्य उवाच ।

अभक्ष्यं भक्षयेत्पूर्वं या नारी द्विजवल्लभा । गण्डमालाख्यरोगेण संयुक्तो वाहुजोऽधुना ॥ १ ॥
पुण्यदेशे महाभाग संक्रान्त्यादिषु पर्वसु । पूर्वपापहरं पुण्यं दद्यात्तत्र च कम्बलम् ॥ २ ॥
नवं शुद्धं कुलीनाय तस्मात्पापात्प्रमुच्यते । द्विजानामिच्छया दद्याद्भोजनं पापनाशनम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकषष्ट्युत्तरसप्तशताधिकसहस्रतमः ॥ १७६१ ॥

श्रीसूर्य उवाच ।

जघान वालकं कश्चिद्ब्राह्मणस्य खगाधिप । वङ्गदेशे वसन्पूर्वं चात्र जन्मनि गौडजः ॥ १ ॥
धीरः सर्वकलाभिज्ञो नानाशास्त्रविशारदः । धनधान्ययुतश्चात्र वहुस्त्रीसुखभोगभाक् ॥ २ ॥
विद्यादानात्कृतात्पूर्वाच्छृणु पापफलं तथा । क्षयरोगाकुलः क्षीणः पुत्रसन्ततिवर्जितः ॥ ३ ॥
बालघातनजात्पापाद्ब्राह्मणस्य विहङ्गम । महाक्रोधपरो लोभी नानादुःखैस्तथाकुलः ॥ ४ ॥
वक्ष्यामि निष्कृतिं तस्य ब्रह्मघातविमोचनीम् । प्रयागे वा कुरुक्षेत्रे पुष्करे च महास्थले ॥ ५ ॥
नैमिषारण्यके क्षेत्रे पूजयेद्विधिवच्छिवान् । गन्धपुष्पैस्तथा धूपैर्लक्षसंख्यान्विधानतः ॥ ६ ॥
ब्रह्मचर्यरतो नित्यं तदन्ते होमयेत्तथा । षडस्रे चतुरस्रे वा कुण्डे चाज्यतिलाञ्छुभान् ॥ ७ ॥
शक्त्या च भोजयेद्विप्राञ्शैवान्कासारलड्डुकान् । नानाभक्ष्यफलैश्चैव वस्त्रैर्माल्यैस्तथार्चयेत् ॥८॥
विविधां दक्षिणां दद्याद्रुद्रप्रीतिकरीं तथा । यश्चानेन विधानेन प्रायश्चित्तं समाचरेत् ॥ ९ ॥
स वालघातजात्पापान्मुच्यतेऽत्र ममाज्ञया । चतुर्दश्यामथाष्टम्यां नक्तं कुर्याद्विधानतः ॥ १० ॥
मम ध्यानपरः सूत नित्यं भूत्वा ममाग्रतः । पूजयेदर्घपाद्यैर्नैवेद्यैर्विविधैस्तथा ॥ ११ ॥
तन्तु तत्सर्वपापेभ्यो विमोक्ष्यामि खगेश्वर । आयुस्तस्य शतं चाब्दं पञ्चहीनं च पुत्रक ॥ १२ ॥
प्रायश्चित्तं कृतं येन पञ्चम्यां चन्द्रवासरे । प्रायश्चित्तेऽकृते सूत चत्वारिंशन्मिताब्दके ॥ १३ ॥
रिष्टं स्यात्क्षयरोगेण वालघाताच्च निश्चितम् । ब्रह्मघातान्महापापात्पूर्वजन्मकृतादृढात् ॥ १४ ॥
न मुच्यते महादानैः सप्तजन्मकृतैरपि । वाध्यते क्षयरोगेण पूर्वजन्मनि निश्चयात् ॥ १५ ॥
ब्रह्महा क्षयरोगी स्यादिति वेदविदो विदुः । नहीदृशं महापुण्यं क्षयरोगविनाशनम् ॥ १६ ॥
पुत्रवृद्धिकरञ्चात्र यथा प्रोक्तं शिवार्चनम् ॥ १७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विषष्ट्युत्तरसप्तशताधिकसहस्रतमः ॥ १७६२ ॥

श्रीसूर्य उवाच ।

विनापराधं या नारी परपक्षं च कारयत् । पक्षाघातेन रोगेण पीडितात्रैव जायते ॥ १ ॥
तया निष्कमितं स्वर्णं देयं पापविशुद्धये । मुच्यतेऽत्र महारोगात्पक्षाघातान्न संशयः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिषष्ट्युत्तरसप्तशताधिकसहस्रतमः ॥ १७६३ ॥

श्रीसूर्य उवाच।

यो द्विजः प्राग्भवे मोहात्सुरां वै त्रिविधां पिबेत्। मूत्रकृच्छ्रेण रोगेण पीडितः सोऽत्र जायते १॥
गृहवित्तानुसारेण पलेनार्धपलेन वा। कुर्याद्धिरण्मयं पद्मं चाष्टपत्रसमन्वितम् ॥ २ ॥
आवाह्य तत्र ब्रह्माणं प्रभुं सर्वोपचारकैः। पूजयित्वा तु गन्धाद्यैर्दद्याद्विप्राय यत्नतः ॥ ३ ॥
दानेनानेन सततं मूत्रकृच्छ्रं न पश्यति ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःषष्ट्युत्तरसप्तशताधिकसहस्रतमः ॥ १७६४ ॥

श्रीसूर्य उवाच।

वैकुण्ठादागतस्तत्र मथुरायां खगाधिप। जातोऽयं पुण्डरीकाक्षः सर्वभूताभयप्रदः ॥ १ ॥
घोरे कलियुगे प्राप्ते पापाक्रान्ते महीतले। भारावतारणार्थाय क्षत्रियाणां क्षयाय च ॥ २ ॥
कृत्वा तु दुष्करं कर्म पुनर्यास्यति वै दिवि ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचषष्ट्युत्तरसप्तशताधिकसहस्रतमः ॥ १७६५ ॥

श्रीसूर्य उवाच।

स्वर्णापहारी सततं पुरुषः प्राग्भवेऽण्डज। कुनखी जायते चात्र महापापेन लाञ्छितः ॥ १ ॥
सुवर्णशतकं दद्यात्स तद्दोषविनाशनम्। चान्द्रायणव्रतं कुर्यात्तत्तद्दोषोपशान्तये ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्षष्ट्युत्तरसप्तशताधिकसहस्रतमः ॥ १७६६ ॥

श्रीसूर्य उवाच।

राजघातकरी प्रोक्ता या पूर्वं घातयेन्नृपम्। राजयक्ष्मान्विता सात्र तस्मिन्वयसि भामिनी ॥१॥
प्रायश्चित्तं परं तस्याः शृणु चात्र खगेश्वर। यत्कृते विधिना सर्वं पूर्वजन्माघनाशनम् ॥ २ ॥
स्वर्गगोभूमिमिष्टान्नं घृतधेनुतिलानि च। देयानि श्रद्धया सूत क्षयरोगापनुत्तये ॥ ३ ॥
रिष्टं त्रिंशन्मितेब्दे तु प्रायश्चित्तेऽकृते त्विह ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तषष्ट्युत्तरसप्तशताधिकसहस्रतमः ॥ १७६७ ॥

श्रीसूर्य उवाच।

विनापराधं यः कश्चिद्वैश्यं हन्यात्खगेश्वर। प्राग्जन्मन्यथ युक्तः स्याद्रक्तार्बुदरुजा भृशम् ॥१॥
भविष्यति न सन्देहस्तस्य मृत्युः खगाधिप। तस्य दानशतैर्वापि दत्तैरत्रैव जन्मनि ॥ २ ॥
त्रिंशवर्षे महारिष्टं रक्ताधिक्यान्महाबलात् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टषष्ट्युत्तरसप्तशताधिकसहस्रतमः ॥ १७६८ ॥

श्रीसूर्य उवाच।

मेरोः समागता येयं शक्तिर्माथुरमण्डले। सर्वभूतोपकाराय दुष्टनाशकराय च ॥ १ ॥
प्राप्ते कलियुगेऽत्रैव सर्वपापविवर्जितम्। कृत्वा चाद्भुतकर्माणि पुनस्तत्रैव यास्यति ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनसप्तत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७६९ ॥

श्रीसूर्य उवाच ।

यो मोहाद्घातयेद्वैश्यं पूर्वजन्मनि मानवः । सोऽत्र जन्मनि विज्ञेयो रक्तार्बुदसमन्वितः ॥ १ ॥
प्राजापत्यचतुष्केण व्रतेन नियमेन च । सप्तधान्यप्रदानेन पूर्वजन्माघनाशनम् ॥ २ ॥
पापक्षये महाभाग क्षयः पातकजो भवेत् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७७० ॥

श्रीसूर्य उवाच ।

या काचिद्ब्राह्मणी पूर्वभवे मोहात्सुरां पिबेत् । सात्र जन्मनि मूत्रस्य कृच्छ्रेणातिप्रपीड्यते ॥ १ ॥
प्रायश्चित्तं परं तस्या घोरपापहरं सुत । सुवर्णपत्रदानञ्च सपद्मं ब्रह्मदैवतम् ॥ २ ॥
ब्राह्मणाय विधिज्ञाय पूजिताय निवेदयेत् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकसप्तत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७७१ ॥

अरुण उवाच ।

कश्चिद्विप्रोत्तमो जातः किञ्चिद्वित्तसमन्वितः । कासश्वासादिना बाधा ह्युदरार्तिः प्रजायते ॥ १ ॥
क्रयविक्रयकर्ता च कृषिवाणिज्यसंयुतः । प्रिया प्रीतिपरा तस्या व्रतानामनुकाङ्क्षिणी ॥ २ ॥
किञ्चित्क्रोधान्विता सा वै कुवाक्यानां च भाषिणी । उदरे वातजा रोगाः शिरोर्तिर्नेत्रतोदकृत् ॥ ३ ॥
अपत्यानि म्रियन्ते च एकोऽपि द्वित्रयोऽपि च । रजोदोषात्प्रपीड्येत वेदना विविधाःकृताः ॥ ४ ॥
केन कर्मविपाकेन सत्यं कथय भास्कर ॥ ५ ॥

श्रीसूर्य उवाच ।

भर्तृकर्मकृतं नैव स्त्रीकृतं नात्र संशयः । पूर्वजन्मनि शूद्री सा द्विजभक्तिपरायणा ॥ ६ ॥
कृतानि विविधान्येव दानानि भुवि मानद । स्वगृहे धान्यराशिं सा प्रसारितवती खग ॥ ७ ॥
सवत्सा गौर्ब्राह्मणस्य धान्यराशिमभक्षयत् । तया गृहीत्वा लकुटिं भृशं कुक्षौ प्रताडिता ॥ ८ ॥
सगर्भा सुरभिर्वत्स गर्भः कुक्ष्युपघातनात् । मृतोऽसौ तेन पापेन ब्राह्मणी दूषिता भृशम् ॥ ९ ॥
शिशुदुःखेन सुरभिर्भृशमाक्रन्दती मृता । तेन कर्मविपाकेन नरकं प्राप्य दारुणम् ॥ १० ॥
पश्चान्मानुष्यमापन्ना व्रतदानप्रभावतः । इदं चतुर्थकं जन्म मृतापत्यं खगेश्वर ॥ ११ ॥
सप्तजन्मसु जायेत गोस्त्रीब्रह्मप्रघातकः । नानाकर्मवशादेव नानापत्यार्थदुःखभुक् ॥ १२ ॥

अरुण उवाच ।

प्रायश्चित्तं वद स्वामिन्येनापत्यं प्रजीवति । अनुग्राह्योऽस्म्यहं देव लोकानां हितकाम्यया ॥ १३ ॥

श्रीसूर्य उवाच ।

मासे नभसि सम्प्राप्ते सानुकूलग्रहेऽहनि । सपत्नीकः शुचिः स्नातश्चौषधैः स्नानमन्त्रतः ॥ १४ ॥
उपोषणं दिवारात्रौ त्रयोदश्यामतन्द्रितः । पूर्णमासीदिनं प्राप्य तस्यां चानुदिते रवौ ॥ १५ ॥
सुरभ्यास्तु सगर्भाया गोमयेनोपलेपयेत् । तत्रोपरि गवां स्थानं चोदङ्मुखसमाश्रितम् ॥ १६ ॥
अर्हणाद्युपचारैश्च कुंकुमाद्युपचर्चयेत् । कुर्यादष्टदलं पद्मं चित्रवर्णं सुशोभनम् ॥ १७ ॥
तत्रोपरि न्यसेद्देवं माधवं कलशेर्चयेत् । सौवर्णे राजते पद्मे माधवं सुचतुर्भुजम् ॥ १८ ॥
उपचारैः शुभैर्गन्धैर्धूपैश्च कुसुमादिभिः । ब्रह्मसूक्तेन सूक्तेन श्रियः सूक्तेन पूजनम् ॥ १९ ॥
पुष्पैश्च धूपगन्धाद्यैरर्चयेद्विविधैर्गुणैः । रुद्रैकादशनीभिश्च जपेद्रुद्रविधानतः ॥ २० ॥

पूजालक्षमितैः पुष्पैरर्चयेद्गन्धवारिभिः। शतमष्टोत्तरं हुत्वा चरुणा पायसेन वा ॥ २१ ॥
रुद्रस्यायुतहोमश्च समिदाज्यसमाहुतिः। एवं पृथग्विधानेन विष्णुरुद्रादिपूजनम् ॥ २२ ॥
होमान्ते विप्रभोज्यान्ते मन्त्रमेतमुदीरयेत् ॥ २३ ॥

मन्त्रः।

"यन्मया कर्मवशतः प्राग्जन्मनि दुरात्मना। सगर्भा गौर्घातिता च लकुट्या कुक्षिताडनात् २४॥
तेन वै कर्मणा प्राप्तं मृतगर्भादिकं भृशम्। मृतसन्ततिदुःखानि प्राप्यन्ते च तदेनसः ॥ २५ ॥
तत्तदेनोविनाशार्थं दानं सम्प्रददे त्विदम्" ॥ २६ ॥
स्वस्त्यस्तु चेति तत्रोक्ता कोऽदादिति विसर्जयेत्। सर्पिष्यात्मानमालोक्य ह्यन्यान्वै तोषयेद्द्विजान् २७
भूमिद्रविणवासांसि दानं दत्त्वा विधानतः। व्रतान्ते सुरभिं दद्याद्धेमद्रव्यादि शक्तितः ॥ २८ ॥
अहःशेषं ततः सर्वं भोजयेदिष्टबन्धुभिः। ऐहिकं लक्षणं तस्य शरीरेऽप्युपजायते ॥ २९ ॥
काष्ठलोष्टादिशस्त्राद्यैर्घातः स्यादुपलेखनात्। शृङ्गाणां चोपघातश्च जायन्ते व्रणजार्तयः ॥ ३० ॥
जलाकुलत्वं स्पर्शोऽग्नेस्तादृशं तत्र जायते। नार्यङ्गे विकृतिर्व्यांधी मुखे तिलव्रणादिकम् ॥ ३१ ॥
पितृष्वसुर्मातुलान्या विधवार्तिः स्नुषादिषु ॥ ३२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विसप्तत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७७२ ॥

श्रीसूर्य उवाच।

या काचिद्ब्राह्मणी पूर्वभवे मोहात्सुरां पिबेत्। प्रदरेणातिदुःखेन सात्र जन्मनि पीड्यते ॥ १ ॥
प्रायश्चित्तं परं तस्याः प्रदरस्य विनाशनम्। दद्याद्ब्रुक्ममयं पद्मं सपत्रं ब्रह्मदैवतम् ॥ २ ॥
ब्राह्मणाय सुशीलाय पूजिताय निवेदयेत् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिसप्तत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७७३ ॥

श्रीसूर्य उवाच।

पूर्वजन्मनि यो विप्रो त्रिविधां वै सुरां पिबेत्। मूत्रावरोधरोगेण सोऽत्र मृत्युवशं व्रजेत् ॥ १ ॥
चिह्नेन श्यावदन्तेन जानीयात्तस्य लक्षणम्। सप्तजन्मसु रोगेण मूत्रकृच्छ्रेण नश्यति ॥ २ ॥
दृढात्प्राक्पापजात्सूत प्रायश्चित्तं न विद्यते। पापक्षयावशेषे च कृच्छ्रं सांतपनं चरेत् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः चतुःसप्तत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७७४ ॥

श्रीसूर्य उवाच।

अकामतश्च या नारी वैश्यघातनतत्परा। बभूव प्राक्च पक्षीन्द्र सात्र जन्मनि निश्चयात् ॥ १ ॥
रक्तार्बुदसमाक्रान्ता दुष्टपापप्रयोजिता। महारिष्टेन सा याति यमलोकं खगेश्वर ॥ २ ॥
चत्वारिंशन्मिते वर्षे सत्यंसत्यं वदाम्यहम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चसप्तत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७७५ ॥

श्रीसूर्य उवाच।

काचित्पूर्वभवे पुण्या मुखजात्र च बाहुजा। देशे सारस्वते प्राप्ता सर्वधर्मान्विता सती ॥ १ ॥
क्षयरोगयुता चात्र युवभावे खगाधिप। प्राक्पापाद्दुस्तरात्सूत कण्ठपादादिसम्भवात् ॥ २ ॥
निष्कृतिं कदलीं दद्यात्सुवर्णत्रयसंयुताम्। भोजयेद्ब्राह्मणान्पश्चाच्छिवपूजनतत्परान् ॥ ३ ॥

या त्वेवं कुरुते भक्त्या कदलीदानमुत्तमम् । नश्येच्च क्षयरुक्तस्यास्तथा पापप्रणाशनम् ॥ ४ ॥
आयुर्वर्षाणि संभुंक्ते ह्यत्र सप्तातिकानि वै ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्सप्तत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७७६ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे सूत परस्वर्णापहारिणी । सात्र जन्मनि रोगेण कुनखत्वेन बाध्यते ॥ १ ॥
दद्यात्सुवर्णशतकं विप्राय विनतात्मज । सुवर्णस्तेयपापेन मुच्यतेऽत्रैव जन्मनि ॥ २ ॥
चान्द्रायणत्रयं चैव कुर्यान्मासे तु कार्तिके ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तसप्तत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७७७ ॥

श्रीसूर्य उवाच ।

वैश्यहन्त्री च या पूर्वभवे नारी पतिव्रता । रक्तार्बुदेन रोगेण बाध्यते चात्र जन्मनि ॥ १ ॥
व्रतं चरेन्महाभाग प्राजापत्यचतुष्टयम् । सप्तधान्यस्य दानेन रक्तार्बुदविनाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टसप्तत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७७८ ॥

श्रीसूर्य उवाच ।

रौप्यहारी च पुरुषश्चित्रकुष्ठी प्रजायते । स तत्पापविशुद्ध्यर्थं ब्राह्मणाय प्रदापयेत् ॥ १ ॥
स्वर्णं पलत्रयं शुद्धं कुरुक्षेत्रे खगेश्वर । प्राजापत्यव्रतं सूत चरेत्पापप्रणाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनाशीत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७७९ ॥

श्रीसूर्य उवाच ।

कश्चिन्म्लेच्छकुलोत्पन्नो बहुद्रव्यान्वितः सुधीः । स्वधर्मनिरतश्चापि दयालुः सत्यसंयुतः ॥ १ ॥
त्यागी शूरो महोत्साही देशे केरलके सुत । स्वामिधर्मपरो नित्यं सपत्नीकः सपुत्रकः ॥ २ ॥
प्रजाः पालयतस्तस्य शूरस्यापि महात्मनः । दुष्टाः प्रजाः क्रोधयुक्ता बभूवुर्विमुखास्तदा ॥ ३ ॥
तस्मिन्काले ह्यभूद्युद्धं घोरं तस्मिन्पुरे सुत । संग्रामभूमौ स मृतो यवनश्च सपुत्रकः ॥ ४ ॥
तस्य पत्नी महाभाग साध्वी पतिपरायणा । तस्मिन्मृते मृता सा तु भर्तुः प्राणावलम्बिनी ॥५॥
घातयित्वा तु शस्त्रेण स्वशरीरं पतिव्रता । मृते पत्यौ न जीवामीत्युक्त्वा मृतवती तदा ॥ ६ ॥
तद्गुणा सान्तकालेऽपि दिवं प्राप्ता सभर्तृका । भुक्त्वा तत्र महाभोगानपूर्वान्स्वामिधर्मतः ॥ ७ ॥
नानाप्रजाघातनजात्पापात्पूर्वसमुद्भवात् । क्षीणात्पुण्यात्तथा सूत म्लेच्छदेशे समुद्भवौ ॥ ८ ॥
सिन्धोः पश्चिमभागे तु शतयोजनसम्मिते । गौरः सुरूपो दीर्घश्च बहुविद्याविशारदः ॥ ९ ॥
नानाभोगसुखैर्युक्तो गजयूथैः समावृतः । पत्त्यश्वरथसंकीर्णस्तथा भैरवशासनः ॥ १० ॥
महोग्रः पुत्रपौत्राढ्यश्चाद्यन्तसुखसंयुतः । देशेदेशेऽधिकाराढ्यः स म्लेच्छः पृथिवीपतिः ॥ ११ ॥
स्त्रीसहायान्महाभाग तथा पुत्रसहायतः । सुखैश्वर्ययुता सापि यवनी तद्वशादिह ॥ १२ ॥
सपुत्रः प्राक्सहायाच्च सोऽप्यत्रैव महाप्रभुः । एवं जन्मफलं प्रोक्तं ससहायं खगेश्वर ॥ १३ ॥
स्वामिधर्मकृतात्पुण्यात्तदर्थमरणात्तथा । भविष्यति गतिस्तेषां पूर्वपुण्यात्खगाधिप ॥ १४ ॥
पञ्चाशीत्यब्दमायुःस्यान्न च रिष्टेन तन्मृतिः । रिष्टं पञ्चाशदब्दे तु स्वदेहान्तसमं सुत ॥ १५ ॥
शस्त्रप्रहारैर्विविधैः प्राप्ते त्वत्र रणाङ्गणे । प्रजापीडनजात्पापात्तद्वर्षे नात्र संशयः ॥ १६ ॥
दद्यात्कालनरं तत्र ब्राह्मणाय कुटुम्बिने । देयं हिरण्मयं तद्वत्पञ्चाशत्पलसम्मितम् ॥ १७ ॥

कुरुक्षेत्रादितीर्थेषु संक्रान्त्यादिषु पर्वसु । सर्वोपस्करसंयुक्तं देयमेतच्च पुत्रक ॥ १८ ॥
महारिष्टहरं प्रोक्तं प्रायश्चित्तं परं खग । नातः परतरं प्रोक्तं दानात्कालनरात्क्वचित् ॥ १९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽशीत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७८० ॥

श्रीसूर्य उवाच ।

या काचिद्यौवने नारी रमते स्वेच्छया परम् । बलात्कारेण सततं सोन्मादेन प्रपीड्यते ॥ १ ॥
तत्पापनाशनं सर्वमुपायं शृणु यत्नतः । कृत्वा स्वर्णमयं वायुं मृगं हैमञ्च वाहनम् ॥ २ ॥
सर्वोपस्करसंयुक्तं दद्याद्विप्राय धीमते । न प्राप्नोति तदोन्मत्तभावं दानप्रभावतः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकाशीत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७८१ ॥

श्रीसूर्य उवाच ।

त्रपुहारी च यः पूर्वं जन्मन्यत्र हि जन्मनि । श्लेष्मरोगेण सततं बाध्यते विनतासुत ॥ १ ॥
दद्यात्तत्पापनाशाय त्रपु विप्राय धीमते । पलानां त्रिशतं शुद्धं तस्माद्रोगाद्विमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्यशीत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७८२ ॥

श्रीसूर्य उवाच ।

पत्यौ हि विद्यमाने तु जाराद्गर्भो धृतो यया । सा चात्र पादजा दुष्टा न च गर्भं दधाति वै ॥ १ ॥
काश्यां वासान्महाभाग श्रद्धया रुद्रपूजनात् । कन्याविवाहात्सततं दरिद्रद्विजपालनात् ॥ २ ॥
धारयिष्यति सा गर्भं प्रायश्चित्ताद्यथोदितात् । प्रायश्चित्तेऽकृते रिष्टं चत्वारिंशन्मितेब्दके ॥ ३ ॥
प्रायश्चित्ते कृते सूत षडशीत्यब्दजीवनम् ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्यशीत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७८३ ॥

श्रीसूर्य उवाच ।

आखेटकं विना यस्तु हस्तिनं घातयेत्पुरा । सोऽत्र जन्मनि जायेत सर्वकार्येष्वसिद्धिकृत् ॥ १ ॥
तस्मिन्नेव हि काले च तस्य रिष्टं प्रकीर्तितम् । विंशत्यब्दे च पक्षीन्द्र कालशस्त्रान्मृतिर्भवेत् ॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरशीत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७८४ ॥

श्रीसूर्य उवाच ।

यः कश्चिद्ब्राह्मणीं सूत बलोत्कर्षेण मन्दधीः । रमयेत्पाग्भवे सोऽत्र महोन्मादी प्रजायते ॥ १ ॥
अत्युग्रपापात्तस्यात्र रोगमुक्तिर्न जायते । म्रियते रिष्टयोगेन सोन्माद्यत्रैव जन्मनि ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाशीत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७८५ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि या नारी लोभान्मोहाद्धरेत्रपु । सात्र जन्मनि पक्षीन्द्र श्लेष्मरुक्संयुता भवेत् ॥ १ ॥
शतत्रयपलं दद्यात्रपु तत्पापशुद्धये । तत्पापस्य क्षये सूत श्लेष्मरोगस्य नाशनम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडशीत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७८६ ॥

श्रीसूर्य उवाच ।

विप्रवंशे समुत्पन्नः शक्तिमान्वेदपारगः । धनधान्यसमायुक्तश्चेर्ष्यालुश्चार्जवान्वितः ॥ १ ॥

सुव्रतः शक्तिमान्धीरः किञ्चिद्व्याधिसमन्वितः । इन्द्रियाणां वलं हत्वा मेहस्तस्य व्यजायत॥२॥
उदरार्तिरसृग्वातः किञ्चिद्देहे प्रवर्तते । तस्य प्रिया शुभाचारा पतिभक्तिपरायणा ॥ ३ ॥
सत्यवाक्सत्यजा लोके व्रतानामनुनुकांक्षिणी । बहुपुत्र्यः प्रसूताश्च नैव पुत्रः प्रजायते ॥ ४ ॥
अथवा मृतपुत्रा च पुत्रीषु जीवितास्वपि । केन कर्मविपाकेन सत्यं वद दिवस्पते ॥ ५ ॥
पूर्वजन्मनि विप्रस्तु सञ्जातः पश्चिमे पुरा । तस्य गेहे सुनयना कन्या प्रौढिमुपागता ॥ ६ ॥
भूरिद्रविणलोभेन वृद्धविप्राय सार्पिता । तत्पित्रा वै हृतं वित्तं जामातुस्तद्वशादपि ॥ ७ ॥
सुदती सा ह्यतिप्रौढा परार्धगुणशालिनी । पतिभक्तिपरा नित्यं सञ्जाता सा सुतार्थिनी ॥ ८ ॥
किञ्चित्काले व्यतिक्रान्ते वृद्धविप्रो मृतश्च वै । सा वाला विधवा जाता पुत्रपत्यर्थदुःखिनी ॥ ९ ॥
व्रततीर्थरता नित्यं सत्यानामनुकाङ्क्षिणी । बहुदर्षैस्तया वत्स नियमैः शोषितं वपुः ॥ १० ॥
पित्रा धनं गृहे भूरि तस्या वै त्वर्पितं भृशम् । किञ्चित्काले ह्यतिक्रान्ते मृता सा ब्राह्मणी वरा ११
सा पुत्री ह्युदरे भूत्वा ह्यगमज्जन्मजन्मनि । कन्या बहुविधास्तस्य निराधारा मृताश्च वै ॥ १२ ॥
तेन कर्मप्रभावेण पूर्वं कन्या मृता बहु । तस्य नार्याश्च गर्भे सा ह्यायाति मृतिमिच्छति ॥ १३ ॥
पुनर्जन्म पुनर्मृत्युस्तत्कर्मनिष्कृतिं विना । कन्याविक्रयकर्ता च रौरवे नरके गतः ॥ १४ ॥
यातना बहुधा भुक्त्वा वर्षाणां च सहस्रकम् । पश्चान्मानुष्यमापन्नो व्रतदानप्रभावतः ॥ १५ ॥
इदं चतुर्थकं जन्म पुत्रीबाहुल्यमंत्रवै । मृतः पुत्रो मृतो गर्भस्तेन वै कर्मणा खग ॥ १६ ॥
भार्या तस्यापि विप्रस्य पूर्वजन्मनि मानद । भर्तृविद्वेषिणी नित्यं न वै पत्यनुगामिनी ॥ १७ ॥
तेन कर्मविपाकेन कन्या भूरि मृताः सुत ॥ १८ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं देव येन पापं प्रशम्यति । निष्कृतिं वद विश्वात्मन्पृथक्त्वेन प्रकाशय ॥ १९ ॥

श्रीसूर्य उवाच ।

कन्यका यस्य जीवन्ति पुत्राणां नाशनं भवेत् । कर्मभेदेन येनेह तस्य शान्तिं समाचरेत् ॥२०॥
स्वकन्यां वरयोग्यां स चिन्तयित्वा शुभं दिनम् । अष्टवर्षवयस्कां वै यथाभावं यथामति ॥ २१ ॥
कन्यां रूपवतीं शान्तां समस्तगुणशालिनीम् । ब्राह्मेण विधिना सूत दद्याच्च बहुदक्षिणाम् ॥२२॥
महापापोपशमनं कन्यादानमतन्द्रितः । कन्याविवाहसमये महाशान्तिर्विधिं चरेत् ॥ २३ ॥
एवं कृतविधेः सूत कन्याकृत्यविधानतः । शान्तिकर्मणि सर्वत्र विस्तरेद्दत्तिवर्गादिकान् ॥ २४ ॥
भूमिद्रविणवासांसि कन्यावासांसि दापयेत् । गृहदानं ततो दद्याद्यथोपस्करसंयुतम् ॥ २५ ॥
वर्षेवर्षे तु संपूर्णे ह्यन्नवस्त्रादि दापयेत् । एवं कृतविधेः सूत बहुपुत्रा यशस्विनः ॥ २६ ॥
पापं पुत्रविनाशाख्यं कन्यापत्याह्वयं च यत् । तत्पापस्य प्रणाशार्थं कन्यादानादि निश्चितम्२७॥
नाशयेत्तन्महत्पापं द्विजानां विधिपूजनात् । यजन्यज्ञविधानेन ब्राह्मणान्स्वस्ति वाचयेत् ॥२८॥
विनायकाम्बिकामूर्तीं हेमनिष्कप्रमाणतः । आचार्याय ददेत्ते च नानापापविनाशिके ॥ २९ ॥
ऐहिकं लक्षणं तस्य शरीरे चोपजायते । जिह्वारदनतालोष्ठव्रणो वातादिदोषकृत् ॥ ३० ॥
नृपचौराग्निहानिश्च वित्तानां च यतस्ततः । दह्यमानेन मनसा भृशमाधिः प्रजायते ॥ ३१ ॥
सर्पिष्यात्मानमालोक्य प्रायश्चित्तं समापयेत् ॥ ३२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्ताशीत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७८७ ॥

श्रीसूर्य उवाच ।

या ताम्रहारिणी नारी लोभात्पूर्वभवे सुत । औदुम्बरेण रोगेण पीड्यते बहुपीडया ॥ १ ॥
पापं विचार्य यत्नेन ताम्रं दद्याच्च शक्तितः । तस्माद्दानान्महाभाग पापं नश्यति नश्यति ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽष्याये ऽष्टाशीत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७८८ ॥

श्रीसूर्य उवाच ।

गर्भवत्या यया भुक्ता पूर्वजन्मनि मानद । गर्भासन्ना ह्यजा बद्धा विधिना गर्भधारिणा ॥ १ ॥
तेन कर्मविपाकेन बाहुजा सात्र कीर्तिता । पूर्वजन्मन्यसौ विप्रा न च गर्भं दधार वै ॥ २ ॥
प्रायश्चित्तं तस्य चात्र वक्ष्मि सर्वाघमोचनम् । कृत्वाजां गर्भसंयुक्तां राजतीं षट्पलात्मिकाम् ॥ ३ ॥
वैश्वानरस्तथा कार्यः पञ्चमाषैर्हिरण्मयः । पूजयित्वा ततो दद्याद्विजाय विधिनाण्डज ॥ ४ ॥
एवं कुर्याद्विधानेन सर्वपापापनोदनम् । तस्याः पुत्रविवृद्धिः स्यादिह जन्मनि वै ध्रुवम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोननवत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७८९ ॥

श्रीसूर्य उवाच ।

मूर्धाभिषिक्तः प्राक्सूत बभूव पुरुषोत्तमः । स्वज्ञातिषु महाभागो दृढधर्मक्रियापरः ॥ १ ॥
वैराटदेशे निवसन्राजकार्यरतः सदा । कृतवान्गोग्रहं तत्र शत्रूणां भयदायकः ॥ २ ॥
बालवत्सा मृता गौर्वै पुरे तस्मिन्खगोत्तम । पापमाचरितं तेन नृपाज्ञाकारिणा दृढम् ॥ ३ ॥
ततो यमपुरं प्राप्तो भुक्त्वा भोगांस्तदुक्तवत् । विष्णुपूजनजात्पुण्यात्प्राप्तोऽत्र यमुनातटे ॥ ४ ॥
चारणो धर्मनिरतो बहुद्रव्यसमन्वितः । नानासुखैश्वर्ययुतो गजाश्वरथवाहनैः ॥ ५ ॥
बन्धुभृत्याधिकाराढ्यो वस्त्रभूषणभूषितः । सर्वं विष्णुप्रसादाच्च सुखं पापफलं शृणु ॥ ६ ॥
धूर्तो मिथ्यापवादी च बहुलोभसमन्वितः । जातसन्ततिदुःखार्तो बालवत्सवधादिह ॥ ७ ॥
नेत्ररोगान्वितो नित्यं शृणु पुत्र खगाधिप । चत्वारिंशन्मितेवर्षे सर्वसन्ततिनाशनम् ॥ ८ ॥
ग्रहप्राप्तान्महाभाग वृष्टिरिष्टसमुद्भवात् । पूर्वपापफलस्यात्र भोगादेव क्षयः स्मृतः ॥ ९ ॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन्बालवत्साघनाशिनीम् । यां कृत्वा विधिवज्जन्तुः पूर्वपापात्प्रमुच्यते ॥ १० ॥

श्रीसूर्य उवाच ।

प्रायश्चित्तं शृणु खग तद्वर्षानन्तरं सुत । तस्मिन्वर्षे महारिष्टं प्रायश्चित्तं न विद्यते ॥ ११ ॥
दृढकर्मार्जितात्पापान्नचोक्तं पापशोधनम् । शृणुयाद्धरिवंशं च वैशाखे विधिनाण्डज ॥ १२ ॥
माघे वा कार्तिके वापि दशावृत्त्या विधानतः । ततस्तु भोजयेद्विप्रान्होमयेच्च स्वशक्तितः ॥ १३ ॥
कोटिलक्षायुतं सूत रुद्राध्यायं जपेत्तथा । धेनूनां दशकं दद्यात्सवत्साभरणान्वितम् ॥ १४ ॥
दद्याच्च कपिलामेकां स्वर्णशृङ्गीं पयस्विनीम् । प्रायश्चित्तमिदं पुत्र यः कुर्याद्विधिपूर्वकम् ॥ १५ ॥
तस्य पुत्रविवृद्धिः स्याद्विवाहादपरात्सुत । मृत्युः पञ्चाशदब्दे तु खग चाकृतनिष्कृतेः ॥ १६ ॥
प्रायश्चित्ते कृते त्वत्र नवत्यब्दमितं तथा । द्वियुक्तमायुः कथितं तीर्थं पुण्याश्रयेण्डज ॥ १७ ॥
जीवे कर्कटगे तत्र चन्द्रे मकरराशिगे । त्रयोदश्यां दिवा भूमावृक्षे मृगशिरोभिधे ॥ १८ ॥
निर्याणं कथितं तस्य विष्णुपूजाप्रभावतः । भविष्यति गतिस्तस्य पुनर्विष्णुं प्रपूजयेत् ॥ १९ ॥
तथा तृतीये जन्मनि मरणं गोग्रहात्सुत । सर्वपापाविशुद्धः स्यात्पुनर्मोक्षमवाप्नुयात् ॥ २० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७९० ॥

श्रीसूर्य उवाच ।

पिङ्गलाक्षो भवेदत्र पूर्वं रीत्यपहारकः । तेन तत्पापशुद्ध्यर्थं देयं रीतिपलं शतम् ॥ १ ॥
गायत्र्या होमयेत्पश्चात्तिलान्विप्रांश्च भोजयेत् । मुच्यतेऽत्र महाभाग तद्रोगात्पापजाद्ध्रुवम् ॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकनवत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७९१ ॥

श्रीसूर्य उवाच ।

वैनतेय महाभाग खररोमा प्रजायते । पूर्वजन्मनि यो हन्यात्खरं पापविमोहितः ॥ १ ॥
प्रायश्चित्तं परं तस्य पापस्य शृणु तत्त्वतः । निष्कत्रयं हिरण्यं च दद्याद्दोषोपशान्तये ॥ २ ॥
ब्राह्मणाय दरिद्राय वेदवेदाङ्गवेदिने ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विनवत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७९२ ॥

श्रीसूर्य उवाच ।

प्राग्भुक्तं गर्भपुष्ट्यर्थं कुक्कुटाडं खगेश्वर । अत्र जन्मनि सा जाता संकरा लोभसंयुता ॥ १ ॥
धनधान्यसमायुक्ता पूर्वपुण्यादिहाण्डज । न च गर्भं धारयति प्राक्पापात्पण्डभक्षणात् ॥ २ ॥
कृत्वाण्डं विधिना तद्वद्धैरण्यं द्विपलात्मकम् । तदर्धमितकं वापि निजवित्तानुमानतः ॥ ३ ॥
दत्त्वा द्विजाय विधिना ह्याचरेच्छङ्करव्रतम् । पूजादानादिकं कृत्वा सा भवेत्पुत्रिणी खग ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिणवत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७९३ ॥

श्रीसूर्य उवाच ।

अवन्त्यां राजसम्मानी देवद्विजपरायणः । वैश्यजातौ समुत्पन्नः कश्चिदासीद्विलासवान् ॥ १ ॥
कृषिवाणिज्यतस्तेन धनानां सञ्चयः कृतः । प्रतिवेशे स्थिता तस्य हरिणाक्षी हि शूद्रजा ॥ २ ॥
बलात्सा धर्षिता तेन हृतान्याभरणानि च । कामलोभाच्चञ्चलाक्षी स्त्रीस्वभावाच्च तद्वशा ॥ ३ ॥
लोकलज्जाभयात्तेन गर्भस्तस्याः प्रपातितः । तदुग्रपापादधमो राजयक्ष्मप्रपीडितः ॥ ४ ॥
अवन्तीवासकृच्चापि भ्रूणहा स नराधमः । देशान्तरे मृतिं प्राप प्राप्तस्तु यमशासनम् ॥ ५ ॥
भुक्त्वातिदारुणान्सूत नरकान्घोरदर्शनान् । फलानि भुक्त्वा पुण्यानां चान्ते पुण्यावशेषतः ॥ ६ ॥
स्वर्णकारकुले जातो धूर्तो लोभरतस्सदा । नानाचौर्यकलायुक्तो लोभवञ्चनतत्परः ॥ ७ ॥
महाभिमाननिरतः प्रियो राजजनेष्वपि । सुखैश्वर्यधनैर्युक्तो कुटुम्बभरणे दृढः ॥ ८ ॥
नानास्त्रीसुखसंयुक्तस्तथा पुत्रविवर्जितः । वक्ष्यामि निष्कृतिं सूत सर्वपापनिकृन्तनीम् ॥ ९ ॥
प्रयागे त्वथवा काश्यां स्थाप्य लिङ्गं सुशोभनम् । पूजयेत्तत्त्रिवर्षांतं मन्त्रैस्तल्लिङ्गजैस्तथा ॥१०॥
गन्धपुष्पोपचारैश्च नैवेद्यैर्बहुदीपकैः । सम्पूज्य विधिवद्देवं तदन्ते भोजयेद्द्विजान् ॥ ११ ॥
शिवभक्तांस्तथा शान्तान्पूजयेद्दक्षिणादिभिः । नानाहिरण्यैर्विविधैस्तथा चाभरणैः शुभैः ॥ १२ ॥
अथवा शृणुयात्तत्र यजुर्वेदं विधानतः । ब्रह्मचर्येण सततं प्रायश्चित्तमिदं परम् ॥ १३ ॥
य एवं कुरुते भक्त्या पूर्वपापौघनाशनम् । सम्प्राप्य तत्र निर्याणं शिवलोकं हि गच्छति ॥ १४ ॥
कर्तव्यं ब्राह्मणद्वारा सर्वमेतद्धि काश्यपे । नाधिकारोऽत्र शूद्रस्य वेदस्य श्रवणे क्वचित् ॥ १५ ॥
तप्ता शलाका देया वै शूद्रकर्णेऽतिदारुणा । श्रुतं पारायणं येन पापेनाक्रान्तचेतसा ॥ १६ ॥

आयुरब्दशतं तस्य कृतनिष्कृतिमानसः । प्रायश्चित्तेऽकृते रिष्टं जायते षष्टिवत्सरे ॥ १७ ॥
एतज्जन्मफलं प्रोक्तं सविधानं समासतः ॥ १८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्णवत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७९४ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे हन्यात्खरमत्रैव जन्मनि । खररोमसमान्यस्या रोमाण्यत्र भवन्ति च ॥ १ ॥
ब्राह्मणाय तथा दद्यात्स्वर्णनिष्कत्रयं सुत । जायते सूक्ष्मरोमा सा विनतानन्दवर्धन ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचनवत्युत्तरसप्तशतांधिकसहस्रतमः ॥ १७९५ ॥

श्रीसूर्य उवाच ।

या नारी च हरेर्द्रातिं ध्रुवं सा च खगेश्वर । पिङ्गाक्षी जायते चात्र प्रायश्चित्तं परं शृणु ॥ १ ॥
रीतिं दद्यात्पलशतं तथा ब्राह्मणभोजनम् । गायत्र्या जुहुयाच्छक्त्या तिलान्रोगविनाशनम् ॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षण्णवत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७९६ ॥

श्रीसूर्य उवाच ।

प्राग्भवे वनिता या च परासिद्धान्नहारिणी । सात्र जन्मनि शूलेन रोगेणैव च बाध्यते ॥ १ ॥
सिद्धान्नदानं विप्रेभ्यो दीनेभ्योऽथ खगेश्वर । भिक्षुभ्यश्च तथा दानाद्रसदानाच्च शक्तितः ॥ २ ॥
न जायते शूलपीडा तस्याश्च कृतनिष्कृतेः । प्रायश्चित्तेऽकृतेऽत्रैव म्रियते शूलपीडया ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तनवत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७९७ ॥

श्रीसूर्य उवाच ।

उष्ट्रघाती भवेत्पूर्वजन्मन्यथ खगाधिप । सोऽत्र जन्मनि जायेत नरश्च विकृतस्वरः ॥ १ ॥
वक्ष्यामि तस्य पापस्य नाशनं चात्र जन्मनि । कर्पूरं त्रिपलं दद्याद्विप्रेभ्यो शक्तितोण्डज ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टनवत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७९८ ॥

श्रीसूर्य उवाच ।

वंध्येयं या महाभाग पृच्छति स्वं प्रयोजनम् । गर्भपातरता पूर्वं जनुष्यत्र फलं त्विदम् ॥ १ ॥
सुखजा प्राग्भवे ह्यत्र तत्पापाद्यवनी हि सा । निष्कृतिं तां प्रवक्ष्यामि गङ्गायां हि खगेश्वर॥२॥
पूजयेल्लक्षरुद्रांश्च तदर्द्धं वा तदर्धकम् । शक्त्याथ भोजयेद्विप्रान्होमयेच्च स्वशक्तितः ॥ ३ ॥
अनेन विधिना या च प्रायश्चित्तं समाचरेत् । जायते सन्ततिस्तस्या इह जन्मनि वै ध्रुवम् ॥४॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवनवत्युत्तरसप्तशताधिकसहस्रतमः ॥ १७९९ ॥

श्रीसूर्य उवाच ।

कांस्यहारी तु पुरुषः प्राग्भवे विनतासुत । धर्मकर्मात्मको भक्तः पितृपुत्रधनान्वितः ॥ १ ॥
दत्तानि तेन दानानि ब्राह्मणेभ्योहि शक्तितः । पर्वस्वपि च पात्रेभ्यो गोभूम्यश्वादिकानि च ॥२ ॥
पापमाचरितं तेन भाविनोऽर्थस्य वै बलात् । स्ववंशजस्य कस्यापि गृहं शत्रोर्मनोहरम् ॥ ३ ॥
निर्दग्धं वैरभावेन रात्रौ भार्यासहायतः । तस्मिन्दाहे महावाहो निर्दग्धं वृषभद्वयम् ॥ ४ ॥
गृहस्थाश्चाल्पजीवाश्च घातिताः क्रूरकर्मणा । ततो बहुतिथे काले गतः स यमसादनम् ॥ ५ ॥
सस्त्रीकः स्वफलं भुक्त्वा पापादुष्टं शुभात्तथा । शुभं चपुण्यात्प्राचि देशे स जातो बाहुजाधरः॥६॥

मध्यस्वरूपो मतिमान्कुलेष्टः पुरुषो दृढः । रक्तो नोचो नातिनीचो बहुकन्यः पृथुर्विभुः ॥ ७ ॥
यौवनस्थः सुखैश्वर्यधनैस्थानैर्युतायुतः । मितदो भोगभाग्याढ्यः कृती मानी जनप्रियः ॥ ८ ॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । चिन्तातुरोक्षधूर्तश्च दुःखार्तो मानवर्जितः ॥ ९ ॥
गोघातादग्निदाहाच्च जातपुत्रविनाशकः । सहायलक्षणं सर्वं कथयामि खगेश्वर ॥ १० ॥
या स्त्री पूर्वं सहायासीद्दाहकर्मणि चाण्डज । सा ज्येष्ठा प्रष्टुरेवास्ति मृतपुत्रात्र जन्मनि ॥ ११ ॥
लक्ष्मैतदण्डजश्रेष्ठ जन्माङ्गे वृषभे शनिः । लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥ १२ ॥
कारयित्वा शिवं साङ्गं पलैर्वेदमितैः शुभैः । हिरण्मयं महाभाग पत्रे लेख्यं शिवान्वितम् ॥ १३ ॥
तदर्धमितकं वापि निजवित्तानुसारतः । पूजयित्वा तु गन्धाद्यैः षोडशोरूपचारकैः ॥ १४
सस्थाप्य पशुपं पश्चाद्गोरथे सुमनोहरे । सर्वोपस्करसंयुक्ते वितानाम्बरभूषिते ॥ १५ ॥
दद्याद्वेदविधिज्ञाय मन्त्रमेतमुदीरयेत् ॥ १६ ॥

मन्त्रः ।

" मोहात्पूर्वं महापापमग्निदाहाद्यदर्जितम् । तन्नाशय ददेऽहं तु शिवं गोरथसंयुतम् " ॥ १७ ॥
गोधिकाद्यास्तथा जीवाः पत्रे लेख्यास्तु राजते । शिवपत्रमिदं दद्याद्ये चान्ये घातिताः पुरा ॥ १८ ॥
पञ्चमाषमितो वह्निर्देयो हेममयोऽधुना । गायत्र्यष्टसहस्रं तु रौद्रं जप्त्वा सहस्रकम् ॥ १९ ॥
अष्टाक्षरं द्विसाहस्रं होमयेद्घोजयेद्विजान् । य एवं कुरुते सूत प्रायश्चित्तं विधानतः ॥ २० ॥
न तस्य पुत्रमरणं तद्ग्रे जायते क्वचित् । जायन्ते सुलभाः पुत्राश्चाधिव्याधिविवर्जिताः ॥ २१ ॥
नैवं करोति मोहाद्यः स तु पुत्रविवर्जितः । चत्वारिंशन्मितैकोने वर्षे रिष्टं प्रकीर्तितम् ॥ २२ ॥
पञ्चाशन्मितके चैव रिष्टं चाकृतनिष्कृतेः । प्रायश्चित्ते कृते ह्यायुश्चतुरष्टमिताब्दकम् ॥ २३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टशताधिकसहस्रतमः ॥ १८०० ॥

श्रीसूर्य उवाच ।

कांस्यहारी तु पुरुषः प्राग्भवे विनतासुत । शीर्षरोगेण सततं पीडितो जायते त्विह ॥ १ ॥
दानात्पलशतादत्र सीसकस्याण्डजोत्तम । विप्राय वेदविदुषे दरिद्राय कुटुम्बिने ॥ २ ॥
नीरोगः स्यात्तथा यस्तु न कुर्यात्पापशोधनम् । न तस्य पापशमनं मया प्रोक्तं खगाधिप ॥
तस्मिन् वयसि तद्रिष्टं भविष्यति न संशयः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोत्तराष्टशताधिकसहस्रतमः ॥ १८०१ ॥

श्रीसूर्य उवाच ।

या काचिद्वनिता सूत प्राग्भवे कांस्यहारिणी । सात्र जन्मनि पक्षीन्द्र शीर्षरोगप्रपीडिता ॥ १ ॥
तत्काले शीर्षजाद्रोगान्मुच्यते नात्र संशयः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्युत्तराष्टशताधिकसहस्रतमः ॥ १८०२ ॥

श्रीसूर्य उवाच ।

या नारी त्ववधीत्पूर्वं मोहादुष्ट्रं खगाधिप । सात्र जन्मनि पक्षीन्द्र जायते विकृतस्वरा ॥ १ ॥
सरस्वत्याश्च प्रतिमां सौवर्णीं राजतीं तथा । दद्याद्वेदविधिज्ञाय तदा स्यात्सुस्वराण्डज ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्युत्तराष्टशताधिकसहस्रतमः ॥ १८०३ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि यः कश्चिन्मोहात्परघृतं हरेत् । नेत्ररोगयुतः सोऽपि जायतेऽत्रैव जन्मनि ॥ १ ॥
घृतधेनुप्रदानाच्च विधिना वेदपारगे । मुच्यते नेत्ररोगाच्च जन्मन्यत्र खगाधिप ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरुत्तराष्टशताधिकसहस्रतमः ॥ १८०४ ॥

श्रीसूर्य उवाच ।

स्वकं पतिं परित्यज्य या गच्छेत्पूर्वजन्मनि । परपुंसि महाभाग ग्रहिणीरुग्युतात्र सा ॥ १ ॥
प्रायश्चित्तं परं तस्या व्रतं चान्द्रायणं त्विह । वैशाखे माघमासे वा तस्मात्पापात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चोत्तराष्टशताधिकसहस्रतमः ॥ १८०५ ॥

श्रीसूर्य उवाच ।

विप्रवर्णकुलोत्पन्नो वातरक्ताक्षदर्शनः । उदरे वाजतान्रोगान्किञ्चिच्छस्त्रोपघातकान् ॥ १ ॥
किञ्चित्क्रोधी च लोभी च किञ्चिद्वित्तसमन्वितः । तस्य प्रिया शुभाचारा पतिभक्तिपरायणा॥२॥
एकापत्यं भवेत्तस्य स जातो मृतपुत्रकः । आदिपुत्रो मृतस्तस्य ह्यपत्यं नैव जायते ॥ ३ ॥
केन कर्मविपाकेन सत्यं कथय भास्कर ॥ ४ ॥

श्रीसूर्य उवाच ।

पूर्वं भवे महावाहो शूद्रवंशसमुद्भवः । व्यापारकृषिवाणिज्यं ब्रह्मवित्तेन चाकरोत् ॥ ५ ॥
व्यवहारादिकं कृत्वा ब्रह्मस्वेन ह्यवर्धयत् । कालेनैव मृतो विप्रो धनं शूद्रेण वञ्चितम् ॥ ६ ॥
ब्राह्मणायार्पितं नैव ब्रह्मस्वं च गृहे स्थितम् । ब्रह्मस्वं भक्षितं तेन बहुकालं खगेश्वर ॥ ७ ॥
पश्चान्मृत्युवशं प्राप्तो नरके रौरवे गतः । ब्रह्मस्वभक्षणाच्चैव वर्षाणाञ्च सहस्रकम् ॥ ८ ॥
पतितो नरके घोरे पच्यते चेह कर्मणा । व्रतदानप्रभावेण जातोत्तमकुले च वै ॥ ९ ॥
इदं तृतीयं वै जन्म ब्रह्मवंशसमुद्भवम् । निक्षेपहरणाद्वापि मृतपुत्रः प्रजायते ॥ १० ॥
ब्राह्मणस्य विशेषात्तु ब्रह्मस्वं विषमेव हि । ऋणं प्रसह्य वै प्रोक्तमसह्यं तत्र जायते ॥ ११ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं देव येन पुत्रः प्रजायते । नारीणां न भवेन्मृत्युर्निष्कृतिं सौख्यहेतवे ॥ १२ ॥

श्रीसूर्य उवाच ।

महापापहरो देवः सर्वकार्यकरः प्रभुः । पूजनीयो महारुद्रः सन्ततिश्रेय इच्छता ॥ १३ ॥
यजुर्वेदमयं देवं यजुर्भिः शतरुद्रजैः । पूजयित्वा विमुच्येत पापादाकल्पसम्भवात् ॥ १४ ॥
रुद्रैकादशनीभिश्च रुद्रकादशकेन वा । जपेन तोषयेद्देवं रुद्रमेकादशात्मकम् ॥ १५ ॥
तद्दशांशेन होतव्यं रुद्रं श्रद्धासमन्वितम् । विधिवज्जुहुयाद्वह्नौ तिलैस्त्रिमधुराप्लुतैः ॥ १६ ॥
हरितालीपलाशोत्थसमिधोऽत्र हविर्हुताः । प्रतिरुद्रं प्रदातव्यं गोयुगं रशनान्वितम् ॥ १७ ॥
केयूरकुण्डलाकल्पास्तत्र पुस्तकमण्डलुम् । प्रतिरुद्रं शतं विप्रान्भोजयेत्सुसमाहितः ॥ १८ ॥
निष्कं दद्यात्सुवर्णस्य दद्याद्वा मुख्यदक्षिणाम् । एवं रुद्रविधिं कृत्वा त्रिविधं नाशयेदघम् ॥१९॥
इतिहासपुराणोक्तीः सूक्तानि विविधानि च । शृणुयाद्विधिवत्तार्क्ष्य सभार्यः प्रीतितोऽन्वहम्॥२०॥
देवर्षिपितृमर्त्यानामृषीणाञ्च महीक्षिताम् । देवदानवगन्धर्वपिशाचोरगरक्षसाम् ॥ २१ ॥

पूर्वसंजीवजातीनामुत्पत्तिं शृणुयादपि । ऋषीणामृषिपत्नीनां वंशान्सर्वानुदीरितान् ॥ २२ ॥
कृष्णगुल्मोत्थितां पीडां नरश्चात्र न पश्यति ॥ २३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडुत्तराष्टशताधिकसहस्रतमः ॥ १८०६ ॥

श्रीसूर्य उवाच ।

प्राग्भवे या भवेत्काचित्स्वर्णकारी खगेश्वर । स्वधर्मनिरता सा च दानधर्मपरायणा ॥ १ ॥
तद्गृहे धान्यराशिं तु चरन्ती गौः स्वभावतः । ताडिता कुक्षिभागे तु लकुटेन भृशं सुत ॥ २ ॥
तत्ताडनान्महादुःखं प्राप्ता गर्भातिभारतः । मृता च तेन दुःखेन गर्भजातसमन्विता ॥ ३ ॥
तेन वै कर्मणा युक्ता सम्प्राप्योचितशासनम् । पुनः शूद्रीसमाजाता गौरवर्णा शुभानना ॥ ४ ॥
धनभृत्याश्वभोगाद्यैर्नानाविभवसंयुता । पुत्रसन्ततिहीना सा प्राग्गोघातासम्भवात् ॥ ५ ॥
प्रायश्चित्तं प्रवक्ष्यामि सर्वपापविनाशकम् । कुर्याद्वापीमरण्ये तु देशे लोकाकुले तथा ॥ ६ ॥
मार्गे हि धर्मतो यत्नात्प्रतिष्ठां कारयेत्ततः । संस्थाप्य च शिवं तत्र विधिना विनतासुत ॥ ७ ॥
होमयेच्च ततस्तत्र तिलान्नाज्ययुतानिह । भोजयेद्ब्राह्मणाञ्छक्त्या शिवपूजनतत्परान् ॥ ८ ॥
दद्यात्तथैकां कपिलां सर्वपापप्रणाशिनीम् । प्रायश्चित्तमिदं सूत पूर्वजन्माघनाशनम् ॥ ९ ॥
नैवं या कुरुते श्रुत्वा तस्याः सन्ततिजं भयम् ॥ १० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तोत्तराष्टशताधिकसहस्रतमः ॥ १८०७ ॥

श्रीसूर्य उवाच ।

यः कश्चित्प्राग्भवे सूत दुग्धं हरति मानवः । तत्काले तेन पापेन बहुमूत्रः प्रजायते ॥ १ ॥
दुग्धधेनुप्रदानाच्च विधिना त्वत्र जन्मनि । बहुमूत्रान्महारोगान्मुच्यते गरुडाग्रज ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टोत्तराष्टशताधिकसहस्रतमः ॥ १८०८ ॥

श्रीसूर्य उवाच ।

दुग्धं हरति या नारी कस्यचित्पापमोहिता । पूर्वजन्मनि सात्रैव बहुमूत्ररुजाकुला ॥ १ ॥
दुग्धधेनुप्रदानाच्च वेदवेदाङ्गपारगे । विधिना काश्यपे चात्र न पश्येद्बहुमूत्रताम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवोत्तराष्टशताधिकसहस्रतमः ॥ १८०९ ॥

श्रीसूर्य उवाच ।

यो मोहाद्घातयेत्सूत महिषीं नवयौवनाम् । प्राग्भवे नियतं सोऽपि कृष्णगुल्मेन बाध्यते ॥ १ ॥
स नानाव्रतदानेन विधिना गरुडाग्रज । नाशयेत्कृष्णगुल्मोत्थां पीडामत्रैव जन्मनि ॥ २ ॥
अथवा महिषीदानाद्विप्राय विधिनाण्डज । महिषीघातजाद्रोगात्सुखी भवति मानवः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो दशोत्तराष्टशताधिकसहस्रतमः ॥ १८१० ॥

श्रीसूर्य उवाच ।

यः कुर्यात्पापलोभेन पूर्वं मुष्कातिकुट्टनम् । ब्रह्मपुत्रस्य षण्ढः स्यादत्र जन्मनि निश्चयात् ॥ १ ॥
ज्ञानाज्ञानकृतस्यास्य निष्कृतिर्नात्र विद्यते । ब्रह्मघातान्महापापात्षण्ढः स्याद्धरु जन्मसु ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकादशोत्तराष्टशताधिकसहस्रतमः ॥ १८११ ॥

श्रीसूर्य उवाच ।

वभूव फलहृत्काचित्प्रमादाद्विनतासुत । अत्र सा क्षत्रिया जाता प्रागपि क्षत्रियाण्डज ॥ १ ॥
अत्र पुत्रविहीना सा फलहृत्पापजाद्दृढात् । फलानां बहुदानाच्च चातुर्मास्येऽत्र नित्यशः ॥ २ ॥
भोजनन्तु तदा पश्चात्कारयेत्स्वेच्छया द्विजान् । प्रायश्चित्तं परं तस्मात्फलहृत्पापनाशनम् ॥ ३ ॥
अमायां नारिकेलानि देयानि खलु शक्तितः । तत्कृते सुतवृद्धिः स्याज्जीवनं चाब्दसप्ततिम् ॥४॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वादशोत्तराष्टशताधिकसहस्रतमः ॥ १८१२ ॥

श्रीसूर्य उवाच ।

दधिहारी पुमान्पूर्वं जन्मन्यत्र खगेश्वर । जायते मेदसा युक्तस्तद्दुःखेन प्रपीडितः ॥ १ ॥
कार्तिक्यामथ वैशाख्यां दधिधेनुप्रदानतः । तस्माद्रोगाद्विमुच्येत तत्काले गरुडाग्रज ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोदशोत्तराष्टशताधिकसहस्रतमः ॥ १८१३ ॥

श्रीसूर्य उवाच ।

महिषीं घातयेन्नारी प्राग्भवे विनतासुत । अत्र जन्मनि पक्षीन्द्र कृष्णगुल्मेन पीड्यते ॥ १ ॥
दद्यात्साभरणां सूत महिषीं यमदैवताम् । युगकम्बलसंछन्नां विधिना नवयौवनाम् ॥ २ ॥
सा मुच्यते महापापान्महिषीवधजात्सुत । तस्मिन्दाने कृते तत्र कृष्णगुल्मं न पश्यति ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्दशोत्तराष्टशताधिकसहस्रतमः ॥ १८१४ ॥

श्रीसूर्य उवाच ।

वेधात्प्राग्वृषभानाञ्च नासाग्रस्य खगेश्वर । नासाछेदोऽत्र तस्यास्ति यूनि भावे विनिश्चयात् ॥१॥
नास्ति तन्निष्कृतिः क्वापि दत्तैर्दानशतैरपि ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचदशोत्तराष्टशताधिकसहस्रतमः ॥ १८१५ ॥

श्रीसूर्य उवाच ।

कश्चिदासीन्महाभाग चारणोऽतिप्रियंवदः । कवित्वशक्तिनिरतो बहुचारणसंयुतः ॥ १ ॥
प्रेरितो दैवयोगेन गतो राजाश्रयं प्रति । तत्सेवानिरतो नित्यं चिरकालमुपस्थितः ॥ २ ॥
अथ तत्र महाबाहो कवीनां हि खगेश्वर । महाघोरमभूद्युद्धं राजद्वारे भयप्रदम् ॥ ३ ॥
स चारणो महाक्रोधात्कृतवानात्मघातनम् । परघातकृते सूत स्वशरीरमथात्यजत् ॥ ४ ॥
तेन कर्मविपाकेन महाचौर्येण चाण्डज । भुक्त्वा स्वर्गफलं पुण्यादात्मघातात्परिच्युतः ॥ ५ ॥
महाभूमिभुजां वंशे म्लेच्छानां जनित स्त्वयम् । सिन्धोः पश्चिमभागे च शतयोजनसम्मिते॥६ ॥
देशे कर्कटगे जीवे लग्नस्थे चन्द्रसंयुते । गौराङ्गः पृथुलो धूर्तः सर्वविद्याविशारदः ॥ ७ ॥
सुखैश्वर्यसमाक्रान्तो धनवाहनभोगभाक् । शूरः सुवेषोऽतिक्रूरो बहुपालनतत्परः ॥ ८ ॥
पापाल्लोभरतः क्रोधी नानाभैरवशासनः । रिष्टं षष्टिमिते वर्षे पञ्चहीने खगेश्वर ॥ ९ ॥
महाकालनराद्दानात्सुवर्णस्य खगाधिप । सर्ववित्तषडंशेन महारिष्टहरं परम् ॥ १० ॥
पञ्चाशीतिमितायुः स्याद्दत्ते कालनरेऽण्डज । प्रायश्चित्तेऽकृते त्वत्र रिष्टं स्यात्प्रोक्तवत्सरे ॥११॥
कालरूपेण शस्त्रेण तत्क्षणं मरणं स्मृतम् । महाघोराहवे सूत चात्मघातादिदं फलम् ॥ १२ ॥
चिह्नं तस्य प्रवक्ष्यामि ह्यात्मघातसमुद्भवम् । दृष्टिस्थं लशुनं पुत्र षडंगुलिमितं शुभम् ॥ १३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षोडशोत्तराष्टशताधिकसहस्रतमः ॥ १८१६ ॥

श्रीसूर्य उवाच ।

दधिप्रहरणान्नारी प्राग्भवे त्वत्र जन्मनि । मेदसा पीड्यतेऽवश्यं विनतानन्दवर्धन ॥ १ ॥
दधिधेनुप्रदानाच्च ब्राह्मणाय कुटुम्बिने । मुच्यतेऽत्र महारोगान्नात्र कार्या विचारणा ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तदशोत्तराष्टशताधिकसहस्रतमः ॥ १८१७ ॥

श्रीसूर्य उवाच ।

तरक्षौ निहते पूर्वं भवे च गरुडाग्रज । अत्र जन्मनि नेत्रेषु कातरत्वं प्रजायते ॥ १ ॥
रत्नधेनुमहादानाद्विधिना ब्राह्मणाय च । न पश्यत्यक्षिजं रोगं कातरोत्थं हि काश्यपे ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टादशोत्तराष्टशताधिकसहस्रतमः ॥ १८१८ ॥

श्रीसूर्य उवाच ।

प्राग्भवे सुमुखी काचिद्गता देवालयेऽण्डज । दीपा धातुमयास्तत्र चान्यदत्ता हृतास्तया ॥ १ ॥
सा शूद्रा वै महाभाग धनपुत्रसमन्विता । चन्द्रग्रहे महादानात्प्राक्कृताद्विनतात्मज ॥ २ ॥
तेन कर्मफलेनात्र चक्षुःपीडातिदारुणा । त्रिदोषैर्दूषिता चात्र युवभावे खगेश्वर ॥ ३ ॥
प्रायश्चित्तं प्रवक्ष्यामि दीपकृत्पापशोधनम् । दीपा देया घृतेनात्र पूरयित्वा सुवर्णजाः ॥ ४ ॥
सुवर्णविहिता भव्याः सम्पूज्याथ महेश्वरम् । गन्धपुष्पैरतथा दीपैर्भक्ष्यैर्भोज्यैः प्रयत्नतः ॥ ५ ॥
दद्याद्विजेभ्यो बहुशस्तस्मात्पापात्प्रमुच्यते ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनविंशत्युत्तराष्टशताधिकसहस्रतमः ॥ १८१९ ॥

श्रीसूर्य उवाच ।

दुष्टगन्धयुतः सूत जायते सोऽत्र जन्मनि । मधुहारी च यः पूर्वं प्रायश्चित्तं परं शृणु ॥ १ ॥
मधुधेनुप्रदानाद्वै ब्राह्मणाय खगेश्वर । दुष्टगन्धयुतादोषान्मुच्यते नात्र संशयः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो विंशत्युत्तराष्टशताधिकसहस्रतमः ॥ १८२० ॥

श्रीसूर्य उवाच ।

तरक्षुं घातयेत्पूर्वं या नारी गरुडाग्रज । कच्चराक्षी प्रजायेत चक्षूरोगा त्खगाधिप ॥ १ ॥
धेनुं रत्नमयीं दद्यात्ससुवर्णां विधानतः । न पश्यत्यक्षिरोगं सा तद्दत्तेन महाद्भुतम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकविंशत्युत्तराष्टशताधिकसहस्रतमः ॥ १८२१ ॥

श्रीसूर्य उवाच ।

यः प्राग्जन्मन्यभूत्कश्चिन्नरो दानक्रियान्वितः । दण्डाधिकारवाञ्शूरो दृढो ब्राह्मणपूजकः ॥ १ ॥
नानादानरतस्तत्र भोगाढ्योऽपि विशेषतः । व्यभिचाररतस्यैकब्राह्मणस्य खगेश्वर ॥ २ ॥
लोभाच्चकारासौ तत्र ह्यण्डच्छेदं च तत्क्षणात् । स तेन कर्मणा युक्तो भुक्त्वातियमशासनम् ॥ ३ ॥
देशे पञ्चनद ह्यत्र जातः शूद्रोऽतिचाधमः । स चास्त्यत्र विवर्णस्तु षण्ढः पापमतिः सुखी ॥ ४ ॥
सकलैश्वर्यसम्पन्नो नानाधनसमन्वितः । नानावाहनभोगाढ्यो दानात्सर्वमिदं सुत ॥ ५ ॥
सप्तजन्मस्वसौ षण्ढो भविष्यति खगेश्वर ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वाविंशत्युत्तराष्टशताधिकसहस्रतमः ॥ १८२२ ॥

अरुण उवाच।

क्षात्रे कुले समुत्पन्नः शौर्योदार्यशोधनी। राजमान्यविरोधी च नानासौख्यरतः सदा ॥ १ ॥
किञ्चिद्घातादिना पीडा जायते चोदरे भृशम्। वातरक्तादि शिरसि जायते पक्षसंख्यया ॥ २ ॥
तस्य भार्या शुभाचारा सुरूपा गुणशालिनी। प्रियभक्तिपरा नित्यं दानदाक्षिण्यवर्तिनी ॥ ३ ॥
एकपुत्रप्रसूता चाप्यन्यपुत्रमुपागता। पश्चात्पुष्पं रतं शान्तमपत्यं नैव जायते ॥ ४ ॥
केन कर्मविपाकेन पापं शाम्यति तत्स्त्रियाः। विधानं च हितार्थाय सत्यं ब्रूहि दिवाकर ॥ ५ ॥

श्रीसूर्य उवाच।

पूर्वं वर्णोत्तरे जातो धातुकांस्यादिकारकः। ब्राह्मणो मित्रतां यातो बहुद्रव्यसमाकुलः ॥ ६ ॥
क्रयविक्रयकर्ता च विप्रद्रव्येण वर्धितः। कालेन महता वत्स स विप्रो निधनं गतः ॥ ७ ॥
वाञ्छितं तद्धनं सर्वं न तु किञ्चित्प्रदापितम्। ब्रह्मस्वं भक्षितं तेन वंशवृद्धिविनाशनम् ॥ ८ ॥
तेन कर्मविपाकेन नानासन्ततिनाशनम्। यो वै तस्य मृतः पुत्रः संजातो ब्राह्मणश्च सः ॥ ९ ॥
इदं चतुर्थं वै जन्म ब्रह्मवंशसमुद्भवम्। भार्या दुःखकरी ह्येवं पुत्रहीना खगेश्वर ॥ १० ॥

अरुण उवाच।

प्रायश्चित्तं कथं देव येन पापक्षयो भवेत्। निष्कृतिं ब्रूहि देवेश सन्ततेः सौख्यहेतवे ॥ ११ ॥

श्रीसूर्य उवाच।

ब्रह्मस्वं विषतुल्यं हि पुत्रपौत्रादिनाशनम्। विषेणैको हि म्रियते ब्रह्मस्वात्सुतसन्ततिः ॥ १२ ॥
तस्य सन्तत्यनाशाय कारयेन्निष्कृतिं शुभाम्। सुशुभे भूप्रदेशे तु गोमयेनोपलेपयेत् ॥ १३ ॥
कुर्यादष्टदलं पद्मं राजतं शुक्लतण्डुलैः। तन्मध्ये स्थापयेत्कुम्भमव्रणं शुभलक्षणम् ॥ १४ ॥
सुशीतसलिलैः पूर्णं सरत्नौषधिपल्लवम्। नानाफलाक्षतोपेतं पूर्णपात्रोपशोभितम् ॥ १५ ॥
तस्योपरि न्यसेत्पात्रं वैणवं वर्तुलाकृति। सप्तधान्यफलोपेतं वस्त्रस्रक्चन्दनान्वितम् ॥ १६ ॥
तन्मध्ये स्थापयेन्मूर्तिं निष्कद्वयविनिर्मिताम्। सुवर्णस्य विशुद्धां च दापयेद्वेदवादिने ॥ १७ ॥
प्रतिष्ठापूजनं कृत्वा ततो गां वै सवत्सकाम्। सम्पूज्य दद्याद्विप्राय द्रोणान्सप्तैव निर्मितान्॥ १८॥
जातीपुष्पसमुद्भूतां लक्षपूजां शिवोपरि। संकष्टान्मोचयेद्धेनुं दम्पती परिधापयेत् ॥ १९ ॥
एवं कृतविधेः सूत निश्चला सन्ततिर्भवेत् ॥ २० ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोविंशत्युत्तराष्टशताधिकसहस्रतमः ॥ १८२३ ॥

श्रीसूर्य उवाच।

पण्ढोऽस्ति राजसन्मानी ह्यत्र जन्मनि चाण्डज। महादुष्टक्रियायुक्तो वधबंधनतत्परः ॥ १ ॥
प्राक्कृतात्तु महादानात्सुखैश्वर्यधनान्वितः। महामानी महाधूर्तः पण्ढो दास्यतिसेवनात् ॥ २ ॥
नात्र जन्मनि भोः सूत प्रायश्चित्तं मयोदितम्। अगम्यागमनं पापं प्रायश्चित्तविवर्जितम् ॥ ३ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्विंशत्युत्तराष्टशताधिकसहस्रतमः ॥ १८२४ ॥

श्रीसूर्य उवाच।

ब्रह्मघ्नी सा मया प्रोक्ता या पूर्वं घातयेद्विजम्। सर्वं विचेष्टितं यस्माच्छृणु चात्र खगेश्वर ॥ १ ॥
अनया द्रव्यलोभेन सपत्न्या घातितः सुतः। प्राग्भवे विषदानेन कुमारो दोषवर्जितः ॥ २ ॥

तस्मादियं महादुष्टा बाल्ये कुष्ठान्विता सुत । अतिबाधायुता पूर्वं पितृगेहे स्थिताण्डज ॥ ३ ॥
महादोषवती पापादिह सम्प्राप्य यातनाः । चतुर्विंशमिते वर्षे मरणं कीर्तितं ध्रुवम् ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचविंशत्युत्तराष्टशताधिकसहस्रतमः ॥ १८२५ ॥

श्रीसूर्य उवाच ।

वराहं यो नरो हन्यात्प्राग्भवे विनतासुत । जायते दन्तुरः सोऽपि काले तत्पापचिह्नितः ॥ १ ॥
घृतकुम्भान्यथाशक्ति दद्याद्विप्राय धीमते । सुवर्णसहितं तेन तस्मात्पापात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षड्विंशत्युत्तराष्टशताधिकसहस्रतमः ॥ १८२६ ॥

श्रीसूर्य उवाच ।

यो हरेत्प्राग्भवे सूत गुडं मोहान्नराधमः । गुल्मोदरेण रोगेण सोऽत्र जन्मनि पीड्यते ॥ १ ॥
गुडधेनुप्रदानाच्च विधिना ब्राह्मणाय च । गुल्मोदरसमुद्भूता पीडा नश्यति तत्क्षणात् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तविंशत्युत्तराष्टशताधिकसहस्रतमः ॥ १८२७ ॥

श्रीसूर्य उवाच ।

अथ काचित्सती नारी धर्मिष्ठा प्रियवादिनी । स्वामिना प्रेरिता पूर्वं शत्रोर्दग्धं तया गृहम् ॥१॥
तद्दाहाच्च महाभाग दग्धं सर्वं पुरं तदा । ब्राह्मणस्यैकवाला च निर्दग्धा दोषवर्जिता ॥ २ ॥
ततो ब्रह्मवधात्सा वै किञ्चित्कालेऽथ वै मृता । भुक्त्वा फलानि सर्वाणि पुण्यपापोद्भवानि ह ॥३ ॥
सा शूद्री यमुनातीरे जातात्र पतिसेवया । कुष्ठरोगयुता बाल्ये निष्कृतिं पापनाशिनीम् ॥ ४ ॥
वक्ष्यामि वृषभं दद्यात्सर्वोपस्करसंयुतम् । कुष्ठरोगात्प्रमुच्येत नात्र कार्या विचारणा ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाविंशत्युत्तराष्टशताधिकसहस्रतमः ॥ १८२८ ॥

श्रीसूर्य उवाच ।

घातयेद्या पुरा नारी वराहं गरुडाग्रज । दन्तुरा सा भवेदत्र तत्काले घातसम्भवे ॥ १ ॥
ताम्रकुम्भं सुवर्णाढ्यं घृतपूर्णं सदक्षिणम् । तद्दोषशमनायैव दद्याच्छक्त्या विधानतः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनत्रिंशदुत्तराष्टशताधिकसहस्रतमः ॥ १८२९ ॥

श्रीसूर्य उवाच ।

तैलहारी तु यः कश्चिद्भवेल्लोभात्पुरा भवे । कण्डूरोगेण सततं पीड्यते चात्र जन्मनि ॥ १ ॥
तद्दोषशमनायैव ब्राह्मणाय खगेश्वर । कण्डूरोगप्रशमनं दानात्तैलघटद्वयात् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिंशदुत्तराष्टशताधिकसहस्रतमः ॥ १८३० ॥

श्रीसूर्य उवाच ।

काचिच्छुभानना पूर्वभवे चारणवल्लभा । भर्तृत्यक्तात्र विधिना महारोपवती ह्यभूत् ॥ १ ॥
तया महौषधैर्दिव्यैः पत्युः पुंस्त्वं विनाशितम् । तेन पापप्रभावेण जातोऽत्रायं नपुंसकः ॥ २ ॥
द्यूतः पापरतो दुष्टः सर्वधर्मविवर्जितः । वर्णबाह्योऽतिदुःखार्तो न शुभां लभते गतिम् ॥ ३ ॥
बहुजन्मसु भविता पापान्मुक्तिः खगाधिप ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकत्रिंशदुत्तराष्टशताधिकसहस्रतमः ॥ १८३१ ॥

श्रीसूर्य उवाच ।

स्वभक्ष्यार्थं महाभाग यो हन्याद्वायुवाहनम् । अत्र जन्मनि खंजोऽपि नात्र कार्या विचारणा॥ १॥
न तस्य निष्कृतिः प्रोक्ता चेह जन्मनि चाण्डज । स्वशरीरविवृद्ध्यर्थं येन भुक्तो मृगः पुरा॥ २॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वात्रिंशदुत्तराष्टशताधिकसहस्रतमः ॥ १८३२ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे चौर्याद्गुडं हरति कस्यचित् । गुल्मोदरेण रोगेण पीड्यते सात्र जन्मनि ॥ १॥
गङ्गायां हि महाभाग गुडधेनुप्रदानतः । तत्र स्नानान्महापुण्यात्तस्माद्रोगाद्विमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयस्त्रिंशदुत्तराष्टशताधिकसहस्रतमः ॥ १८३३ ॥

श्रीसूर्य उवाच ।

कश्चिद्वैश्योऽभवत्सूत देशे नेपालविश्रुते । बहुमित्रसुखैराढ्यो हठी व्यसनसंयुतः ॥ १ ॥
आराधनं च कृतवान्देव्या यः पूर्वजन्मनि । स्वस्त्रियं तु सुरूपां च परित्यज्य शुभाननाम् ॥२॥
अन्यस्त्रियं समगमद्व्यभिचारपरो दृढः । स तेन कर्मणा युक्तो गतो धर्मपुरं प्रति ॥ ३ ॥
फलानि शुभपापानि भुक्त्वा जातोऽत्र पर्वते । गौरो भव्यो महाज्ञानी महाविभवसंयुतः ॥ ४ ॥
देशे देशेऽतिविख्यातो घृणी स्वल्पो महायशाः । स्वस्त्रीत्यागान्महापापाद्भविता स्त्रीविवर्जितः॥५॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन्स्त्रीप्राप्तिसुखकारिणीम् ॥ ६ ॥

श्रीसूर्य उवाच ।

पार्वतीप्रतिमां कृत्वा हैमिकीं कार्यकारिणीम् । पलपञ्चमितां लेख्यांगधैर्माल्यैरलंकृताम् ॥ ७ ॥
दद्याद्वेदविधिज्ञाय सुकुलीनाय चार्थिने । प्रजापतिं तथा दद्याद्राजतं त्रिपलात्मकम् ॥ ८ ॥
ब्रह्मदैवतमन्त्रेण गृह्णीयात्स महाद्विजः । पश्चादष्टाक्षरं मन्त्रं सहस्रं पापशोधनम् ॥ ९ ॥
जपेदष्टसहस्रं तु सूर्यमन्त्रं महाबलम् । होमयेत्तद्दशांशेन तद्दशांशेन तर्पयेत् ॥ १० ॥
य एवं कुरुते सूत सर्वपापविनाशनम् । प्रायश्चित्तं परं त्वत्र तस्मात्पापात्प्रमुच्यते ॥ ११ ॥
नैवं करोति यो मोहाज्जडधीर्दैवघातितः । स्त्रीसुखं नेह लभते रिष्टं तत्त्वाब्दके ध्रुवम् ॥ १२ ॥
प्रायश्चित्ते कृते सूत जीवनं पञ्चसप्ततिम् ॥ १३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुस्त्रिंशदुत्तराष्टशताधिकसहस्रतमः ॥ १८३४ ॥

श्रीसूर्य उवाच ।

नृपं विना प्राग्यो हन्यान्मृगं हि विनतासुत । खञ्जः स्यादन्यजन्तुषि तत्काले मृगघातजे ॥ १ ॥
पापनाशकरीं तस्य निष्कृतिं वच्म्यहं सुत । दद्यादश्वं नवं तत्र स्वर्णनिष्कयुतं शुभम् ॥ २ ॥
सहासनं सालङ्कारं पूजयित्वा विधानतः । विधिज्ञाय महाबाहो नानाशास्त्रविधानतः ॥ ३ ॥
न पश्यति च खञ्जत्वं दानस्यास्य प्रभावतः ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चत्रिंशदुत्तराष्टशताधिकसहस्रतमः ॥ १८३५ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे सूत परतैलापहारिणी । सात्र जन्मनि पक्षीन्द्र कण्डूरोगप्रपीडिता ॥ १ ॥

सा मुच्यते महाभाग दानात्तैलघटद्वयात् । ससुवर्णाद्यथाशक्ति तैलदानाद्विशेषतः ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्त्रिंशदुत्तराष्टशताधिकसहस्रतमः ॥ १८३६ ॥

श्रीसूर्य उवाच ।

राजप्रचारी वै कश्चिच्चारणः पूर्वजन्मनि । भव्यमूर्तिर्दृढो धीरो शिवपूजनतत्परः ॥ १ ॥
राजभृत्यां महाबाहो दधारासावधर्मतः । गर्भं च कामलोभेन भाविनोऽर्थस्य वै बलात् ॥ २ ॥
पापात्पापफलं भुक्त्वा यमलोके खगाधिप । शिवपूजनजात्पुण्यात्सोऽत्र जातो हि पादजः ॥ ३ ॥
देशे जाङ्गलके पण्ढः सर्वधर्मबहिष्कृतः । शिवपूजारतश्चैव प्रागत्र धनभोगभाक् ॥ ४ ॥
स्त्रीपुत्रसुखहीनोऽत्र प्रायश्चित्तं न विद्यते ॥ ५ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्रिंशदुत्तराष्टशताधिकसहस्रतमः ॥ १८३७ ॥

श्रीसूर्य उवाच ।

गर्भाढ्या यावधीत्पूर्वं मृगं हि वनिताण्डज । स्वगर्भपालने दक्षा जन्मन्यत्र गतिं शृणु ॥ १ ॥
तद्घातकाले खज्ञा सा भविष्यति शुभानना । गर्भपातनदुःखार्ता तथैव हि तदेनसः ॥ २ ॥
तत्पापनाशनं सूत शृणु वक्ष्यामि तत्त्वतः । दद्याद्विप्राय तुरगं युवानं भूषणान्वितम् ॥ ३ ॥
स्वर्णनिष्कयुतं चात्र पूर्वपापात्प्रमुच्यते । न पश्यति च गर्भोत्थां पीडामत्रैव जन्मनि ॥ ४ ॥
दानप्रभावात्पक्षीन्द्र खज्ञत्वं नाप्नुयादिह ॥ ५ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोष्टत्रिंशदुत्तराष्टशताधिकसहस्रतमः ॥ १८३८

अरुण उवाच ।

क्षात्रे कुले समुत्पन्नो दानदाक्षिण्यतत्परः । मेहादिपीडितो नित्यं कृशाङ्गः पाण्डुरद्युतिः ॥ १ ॥
ऊर्ध्ववातादिना पीडा बाल्ये स्याद्गृहर्णागदः तस्य भार्या शुभाचारा सुस्नेहा भर्तृभक्तितः ॥ २ ॥
रक्तस्रावादिना पीडा जायते चोदरानिलः । गर्भस्तस्या रक्षितोपि पातं कुर्याच्च दृष्टितः ॥ ३ ॥
द्वित्रैश्च पञ्चभिर्मासैश्चतुर्भिः सप्तभिस्तथा । केन कर्मविपाकेन गर्भो न स्थिरतां व्रजेत् ॥ ४ ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्या विचेष्टितम् । व्यभिचारभयाद्वापि तया गर्भश्च पातितः ॥ ५ ॥
अतिकष्टाद्वैनतेय गर्भपातकृतागसः । अपरं च कृतं कर्म व्यभिचार इतस्ततः ॥ ६ ॥
नानाद्रव्यापहर्त्री च कुलटावाक्यलंघनात् । भर्तुस्तस्याश्चोरवृत्तिर्दुष्टसङ्गस्य दोषतः ॥ ७ ॥
तेन दुष्टेन यद्द्रव्यं द्यूततस्करबुद्धिना । हृतं भुक्तं च ताभ्यां वै ब्रह्मस्वं तत्र जन्मनि ॥ ८ ॥
कालेन तद्धनं भुक्त्वा पीडितो दारुणैर्ग्रहैः । यातना बहुधा प्राप्ताः पश्चान्मानुष्यमाप्य वै ॥ ९ ॥
क्षित्रियत्वुष्यभावेण क्षात्रोऽयं साम्प्रतं भुवि । इदं चतुर्थकं जन्म गर्भपातोऽभिजायते ॥ १० ॥
उभाभ्यां च कृतं कर्म भुज्यते जन्मजन्मनि ॥ ११ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं देव येन पापक्षयो भवेत् । निष्कृतिं ब्रूहि विश्वेश येन गर्भः स्थिरो भवेत् ॥ १२ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि या नारी नानागर्भान्हिनस्ति वै । तस्याः शुद्ध्यै निष्कृतिस्तु श्रूयतां कश्यपात्मज १३
सा नारी यावकेहला वै व्रतकांक्षिणी । सौम्यायने समापूर्यमाणे पक्षे शुभेऽहनि ॥ १४ ॥

तस्य पापस्य शान्त्यर्थं नानाव्रतमुपाचरेत् । पयः स्रवन्तीं शान्तां च सुरभिं शुभलक्षणाम् ॥ १५ ॥
गृहमानीय विधिवत्पूजयेत्तां समाहितः । इष्टैस्तु यवसैः पानैर्भक्ष्यैः कण्डूयनैरपि ॥ १६ ॥
रुचिरैस्तु सुगोष्ठान्नैः सा तां परिचरेत्सदा । वलिपुष्पादिभी रात्रौ दीपैः स्रक्चन्दनादिभिः ॥ १७ ॥
सुगीतगङ्गलध्वानैः स्यादधःशायिनी भुवि । प्राणयात्रां प्रकुर्वीत तस्यास्तु पयसा हविः ॥ १८ ॥
तस्यास्तु पञ्चगव्यानि यथान्यायमथाश्नती । एवं व्रतपरा नारी मासेमासे तु संयता ॥ १९ ॥
तस्या धेनोः सवत्साया इष्टं समभिकाङ्क्षिणी । व्रतान्ते द्विजमाकार्य समस्तगुणशालिनम् ॥ २० ॥
अभ्यर्च्य पूजयेद्भक्त्या वस्त्रस्रक्दामभूषणैः । सम्यगभ्यर्च्य तां धेनुं मानयन्ती स्तनंधयम् ॥ २१ ॥
कृत्वा च विधिवत्तस्मै तां दद्यादितिभाषिणी । सुवर्णं शुद्धमाग्नेयं माषषोडशसंमितम् ॥ २२ ॥
ददीत गां सवत्सां च पूर्वपापापनुत्तये ॥ २३ ॥

मन्त्रः ।

"यन्मया कुलटावृत्त्या नानागर्भा विघातिताः । नानाभेदैः पातिताश्च गर्भा वै बहवो भुवि ॥ २४ ॥
तत्कर्मणार्जितं पापं गर्भपातादिदूषणम् । एनसस्तस्य नाशाय सवत्सां गामिमां ददे ॥ २५ ॥
इह जन्मनि वन्ध्यात्वं नाशय त्वं शुभानने । दानेनानेन सुरभेरनघा ससुता तथा ॥ २६ ॥
भवेयं त्वत्प्रसादेन सगर्भा सुभगा प्रभो ।" एवमस्त्विति तां धेनुं समादाय सदक्षिणाम् ॥ २७ ॥
हिरण्यं रजतं ताम्रं गृह्णीयाद्वै फलानि च । एवंकृतविधेः सूत नारी स्याद्दुःखनाशिनी ॥ २८ ॥
वंध्यात्वान्मुच्यते सूत पुत्रप्राप्तिर्यशस्विनी ॥ २९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनचत्वारिंशदुत्तराष्टशताधिकसहस्रतमः ॥ १८३९ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि यः कश्चित्तुरगं घातयेन्नरः । वक्रकण्ठेन रोगेण पीडितोऽत्र प्रजायते ॥ १ ॥
स्वर्णाश्वदानाद्विधिवत्सर्वोपस्करसंयुतात् । वक्रकण्ठसमुद्भूतां पीडां नाप्नोति मानवः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चत्वारिंशदुत्तराष्टशताधिकसहस्रतमः ॥ १८४० ॥

श्रीसूर्य उवाच ।

शृगालघाती पुरुषः प्राग्जनुष्यत्र जन्मनि । पादहीनो भवेत्सूत भृशं वा कृतनिष्कृतेः ॥ १ ॥
दद्यादश्वं सुवर्णाढ्यं सर्वोपस्करसंयुतम् । ब्राह्मणाय प्रयत्नेन पूर्वपापापनुत्तये ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकचत्वारिंशदुत्तराष्टशताधिकसहस्रतमः ॥ १८४१ ॥

श्रीसूर्य उवाच ।

सङ्करः प्राग्भवे सूत बभूव धनसंयुतः । तीर्थवासी विरक्तश्च लोभी धर्मक्रियान्वितः ॥ १ ॥
क्रूरकर्म कृतं तेन दुष्टसङ्गेन चाण्डज । चौर्येण गां पुरा नीत्वा क्षुधितैर्भक्षिता पुरा ॥ २ ॥
मृतास्ते तेन पापेन नानायोनिमुपागताः । स तीर्थमृत्युवशतो गङ्गातीरेऽत्र पादजः ॥ ३ ॥
नानाविभवसम्पन्नो धनपुत्रसमन्वितः । युवभावेण्डजश्रेष्ठ चक्षुर्हीनोऽत्र जायते ॥ ४ ॥
प्रायश्चित्तं प्रवक्ष्यामि दशस्वर्णैस्तु सम्मिता । लिखित्वा गौर्विधानेन पूजयित्वा विधानतः ॥ ५ ॥
सा देया वेदविदुषे पूर्वपापविशुद्धये । गायत्रीं च जपेत्तत्र नियुतं चायुतद्वयम् ॥ ६ ॥
होमयेच्च यथाशक्ति भोजयेच्च ततो द्विजान् । यः कुर्याद्विधिना चेदं स तद्दोषात्प्रमुच्यते ॥ ७ ॥
स दिव्यचक्षुषा युक्तो जायतेऽत्रैव जन्मनि ॥ ८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विचत्वारिंशदुत्तराष्टशताधिकसहस्रतमः ॥ १८४२ ॥

श्रीसूर्य उवाच ।

या काचिद्घातयेन्नारी शृगालं पूर्वजन्मनि । सा तत्र पुरुषं वापि घातार्थमुपदेशयेत् ॥ १ ॥
अत्र जन्मनि वै चोर्ध्वात्स्थानाच्च बहु वैकृतम् । पादभङ्गो भवेत्तस्मात्पापाच्चैव खगाधिप ॥ २ ॥
करोति तस्य पापस्य निष्कृतिं विधिनात्र चेत् । तस्मात्पापात्प्रमुच्येत गत्वोर्ध्वात्पतनं तथा ॥३॥
अश्वं दद्यात्स्वर्णयुग्मनिर्मितं पापशोधनम् ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिचत्वारिंशदुत्तराष्टशताधिकसहस्रतमः ॥ १८४३ ॥

श्रीसूर्य उवाच ।

या नारी घातयेदश्वं प्राग्भवे सात्र जन्मनि । महापर्वसु गङ्गादिपुण्यतीर्थेषु दापयेत् ॥ १ ॥
सर्वोपस्करसंयुक्तं स्वर्णाढ्यं विधिसंयुतम् । सा मुच्यते वक्रकण्ठपीडनाद्विनतासुत ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुश्चत्वारिंशदुत्तराष्टशताधिकसहस्रतमः ॥ १८४४ ॥

श्रीसूर्य उवाच ।

आसीत्क्षत्री महाभाग पाञ्चाले देशके शुभे । नानाधर्मसमायुक्तः प्राग्भवे विश्रुतो महान् ॥ १ ॥
दुष्कृताचरितं चक्रे भाविनोऽर्थस्य वै बलात् । शूद्रायां च धृतो गर्भः कामलोभेन निश्चयात् २॥
कृतः प्रयत्नो हि महान्नाभूद्गर्भस्य पातनम् । तया हालाहलं पीतं लोकलज्जातुरा मृता ॥ ३ ॥
गर्भे पीडा महत्युग्रा बालकोऽपि मृतस्ततः । सहायपञ्चयुक्तेन कृतं कर्मातिदारुणम् ॥ ४ ॥
कर्मणां संग्रहश्चायं गर्भनाशसमुद्भवः । ततो वै मरणम्प्राप्तो बाहुजोऽथ सहाययुक् ॥ ५ ॥
सूर्यलोकं तदा गत्वा भुक्त्वा भोगाँश्च शाश्वतान् । अशुभान्नरकान्भुक्त्वा स्वकृताद्दुष्कर्मणः ॥ ६ ॥
सोपप्लवे महादानात्पूर्वजन्मनि मानद । स जातो यमुनातीरे बाडुजश्चेह जन्मनि ॥ ७ ॥
गौरः कृशाङ्गो लम्बश्च धनसौख्यसमन्वितः । पितृभ्रातृविहीनश्च मितदो लोभमोहकृत् ॥ ८ ॥
नैकस्त्रीसंयुतः कामी नानाविभवसंयुतः । आद्यन्तसुखयुक्तश्च बुद्धिमान्देशविश्रुतः ॥ ९ ॥
धर्मादिदं तथा पापाद्दूरतः पापरतः शठः । सकन्यो हृदि रुग्णश्च मनोदुःखसमन्वितः ॥ १० ॥
शूद्रायां वीर्यदानात्प्राक्तद्वधादनपत्यकः । ऐहिकं लक्षणं तस्य शरीरे चोपजायते ॥ ११ ॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन्सर्वपापापनोदिनीम् । पुत्रवृद्धिकरीं धन्यां लोकानां हितकाम्यया॥१२॥

श्रीसूर्य उवाच ।

वक्ष्यामि निष्कृतिं तस्य शृणु सूत प्रयत्नतः । पूर्वपापविशुद्ध्यर्थं गर्भधारणकारिणीम् ॥ १३ ॥
शूद्रायाः प्रतिमा कार्या पलैः पञ्चभिरन्विता । हिरण्मयी सगर्भा च पत्रे लेख्या विधानतः॥१४॥
तदर्धेनाथवा कार्या निजवित्तानुमानतः । गन्धपुष्पैरलङ्कृत्य सा देया पापनाशिनी ॥ १५ ॥
पञ्चमाषैः कृतो विष्णुः सर्वपापप्रणाशनः । प्रजापतिं तथा दद्यात्सौवर्णं दशमाषकम् ॥ १६ ॥
राजतं च तथा दद्यात्सोमं सार्धपलात्मकम् । गायत्रीदशसाहस्रं जपेच्च विधिपूर्वकम् ॥ १७ ॥
होमयेच्चण्डुलैः साज्यैः सर्षपैः सतिलैस्तथा । ब्राह्मणान्भोजयेत्पश्चात्पूर्वपापात्प्रमुच्यते ॥ १८ ॥
एवंकृतविधेः सूत सर्वपापविनाशनम् । तस्य पुत्रविवृद्धिः स्यादिह जन्मनि निश्चितम् ॥ १९ ॥
अकृते तु यथाशक्ति प्रायश्चित्ते यथोदिते । रिष्टं षष्टिमिते वर्षे दारुणं शत्रुवैकृतम् ॥ २० ॥
प्रायश्चित्ते कृते सूत जीवनं चाब्दसप्ततिम् । जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् ॥ २१ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायःपञ्चचत्वारिंशदुत्तराष्टशताधिकसहस्रतमः ॥ १८४५ ॥

श्रीसूर्य उवाच ।

शूद्रोऽभवन्महाभाग प्राग्जन्मन्यतिकोविदः । ग्रामवासी सदा सौम्यः शतद्रुनिकटेण्डज ॥ १ ॥
शूद्रकन्या च तेनैव हृद्या षोडशवार्षिकी । भुक्तातिकामलोभेन बलात्कारेण दूषिता ॥ २ ॥
स चातिधर्मपुत्रस्य भुक्त्वा रौरवयातनाः । पूजनाच्छिवलिङ्गानां प्रागत्रापि च सङ्करः ॥ ३ ॥
पण्ढस्तेन विपाकेन प्राप्तसर्वमनोरथः । राज्यप्रचारको धीमान्गजाश्वपतिपालकः ॥ ४ ॥
महाधनो महोत्साहो महाविभवविस्तरः । मृतिं प्राप्स्यति गङ्गायां पुण्याच्च शिवपूजनात् ॥ ५ ॥
भविष्यति महाभाग पापान्ते चास्य सद्गतिः ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्चत्वारिंशदुत्तराष्टशताधिकसहस्रतमः ॥ १८४६ ॥

श्रीसूर्य उवाच ।

पादरोगयुतः सूत जायते सोऽत्र जन्मनि । यो मार्गहा पुरा लोके परलुण्ठनतत्परः ॥ १ ॥
सोऽश्वदानाद्विधानेन ब्राह्मणाय खगाधिप । न पश्यति महापीडां पापजां पादसम्भवाम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तचत्वारिंशदुत्तराष्टशताधिकसहस्रतमः ॥ १८४७ ॥

श्रीसूर्य उवाच ।

अभवत्प्राग्भवे विप्रो ग्रामवासी वनाश्रितः । चोराधिपो महोग्रश्च तत्संसर्गी खगाधिप ॥ १ ॥
दत्तानि तेन ग्रहणे दानानि विनतासुत । गोभूम्यश्ववृषादीनि ब्राह्मणेभ्योऽतिशक्तितः ॥ २ ॥
स भुक्त्वा नरकान्घोरान् पापात्पुण्याच्च शाश्वतान् । स्वर्गात्पर्वतभागे तु सञ्जातो बाहुजोऽधुना ३॥
बुद्धिमान्राजसम्मानी महोग्रो मन्त्रपारगः । पुत्रहीनस्त्वसौ सूत परवित्तस्य लुण्ठनात् ॥ ४ ॥
भवन्त्यत्र च य पुत्रा म्रियन्ते नात्र संशयः । प्रायश्चित्तं प्रवक्ष्यामि येन पापं प्रशाम्यति ॥ ५ ॥
कृत्वा वेदघटान्सूत सौवर्णान्घृतपूरितान् । तदभावे राजतांश्च विप्रेभ्यः प्रतिपादयेत् ॥ ६ ॥
हरिवंशं विधानेन शृणुयाद्भक्तितोऽण्डज । रौद्रं व्रतं चरेत्पश्चात्पूर्वपापविशुद्धये ॥ ७ ॥
नैतत्प्रकुर्याद्यः श्रुत्वा स नरः पुत्रवर्जितः । जायतेऽत्रैव पक्षीन्द्र कुर्याच्च पुत्रवर्धनम् ॥ ८ ॥
अष्टाशीत्यब्दमायुः स्यात्सन्ततिःकृतनिष्कृतेः ॥ ९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टचत्वारिंशदुत्तराष्टशताधिकसहस्रतमः ॥ १८४८ ॥

अरुण उवाच ।

क्षात्रवंशे समुद्भूतो वातदेहरुजाकरः । गुल्माद्या ह्युदरे बाधा शिरोऽर्तिर्जायते तदा ॥ १ ॥
व्यापारो निष्फलस्तस्य किञ्चित्सेवादिना भवेत् । तस्य भार्याद्वयंचास्ति किंचिद्भक्तिपरायणम् ॥ २॥
अन्योन्यद्वेष्यभावाच्च किञ्चित्प्रीतिकरं परम् । मृतवत्सा कथं जाता सत्यं कथय भास्कर ॥ ३ ॥
उदरश्च स्थिरीभूतो न प्रसूतिर्न पातनम् । केन पापप्रभावेण कथय त्वं दिवाकर ॥ ४ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि विप्रस्तु क्रयविक्रयकारकः । दानधर्मपरो नित्यं वेददेवपरायणः ॥ ५ ॥
अन्योन्यद्वेष्यभावाच्च वर्तते च विधिः सुत । कश्चिद्विप्रो धर्मपरो वेदशास्त्रार्थसाधकः ॥ ६ ॥
कदाचिद्दैवयोगाच्च भाविनोऽर्थस्य वै बलात् । तद्वित्तं ग्राहयामास शूद्रो म्लेच्छजनैः सह ॥ ७ ॥
लंघनाय मतिं चक्रे ब्राह्मणो भार्यया सह । भर्त्सनैस्तर्जनाद्यैस्तु न शूद्रेणार्पितं धनम् ॥ ८ ॥
दिनैः कतिपयैरेव शूद्रो हि यवनैः सह । ब्राह्मणं भर्त्सयामास ब्राह्मणः क्रोधसंकुलः ॥ ९ ॥

तदर्थमपि प्राप्तश्च स्वात्मघातं चकार ह । गर्भयुक्ता तु भार्या वै भर्तारं पृष्ठतोऽन्वगात् ॥ १० ॥
हृतं तस्यापि सर्वस्वं म्लेच्छराजेन तत्तदा । किञ्चित्काले गते कैश्चिच्छूद्रो म्लेच्छैर्हि घातितः ॥११॥
ततो वै निरये वत्स वर्षायुतसहस्रकम् । पपाच नरके घोरे शूद्रो देहेन वै तदा ॥ १२ ॥
पश्चान्मानुष्यमापन्नो दानधर्मप्रभावतः । तत्र यत्नशतेनापि ह्यपत्यं नैव जायते ॥ १३ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं स्वामिन्येन पापक्षयो भवेत् । निष्कृतिं सकलां ब्रूहि नारीणां हितकाम्यया॥१४॥

श्रीसूर्य उवाच ।

तीर्थे संवत्सरं सेवा ह्येकचित्तेन दम्पती । श्रवणं हरिवंशस्य विप्रस्योद्वाहनं तथा ॥ १५ ॥
तावन्निष्कृतयो भूयः क्रमेणानेन यास्तदा । सुशुभे भूप्रदेशे तु गोमयाद्युपचर्चिते ॥ १६ ॥
कुर्यादष्टदलं पद्मं चित्रवर्णं सुशोभनम् । तन्मध्ये रुक्मिणीयुक्तं माधवं कलशेर्चयेत् ॥ १७ ॥
सौवर्णं राजतं पद्मं सायुधं सचतुर्भुजम् । उपचारैः शुभैर्गन्धैर्धूपैश्च कुसुमादिभिः ॥ १८ ॥
जनन्यासहितं भूयः प्रद्युम्नाद्यांस्तथार्चयेत् । चारुदेहं चारुबाहुं चारुगुप्तं यशस्विनम् ॥ १९ ॥
श्रीवत्सांकं पीतवस्त्रं सुचारुं पूजयेत्क्रमात् । पूजनं विष्णुसूक्तेन तथा श्रीरुक्मकोविदैः ॥ २० ॥
पुष्पैः सगन्धधूपैश्च ह्यर्चयेद्विष्णुधारणैः । तद्विप्रासोऽथ तद्विष्णोरतोदेवादिभिस्तथा ॥ २१ ॥
शतमष्टोत्तरं हुत्वा चरुं द्रव्यसमन्वितम् । नानासुखैश्वर्ययुतो गजाश्वरथवाहनैः ॥ २२ ॥
बन्धुभृत्याधिकाराढ्यो वस्त्रभूषणभूषितः । सर्वं विष्णुप्रसादाच्च सुखं पापफलं शृणु ॥ २३ ॥
द्यूतो मिथ्याप्रवादी च बहुलोभसमन्वितः । जातसन्ततिदुःखार्तो बालवत्सवधादिह ॥ २४ ॥
नेत्ररोगान्वितो नित्यं शृणु चिह्नं खगेश्वर । चत्वारिंशन्मिते वर्षे सर्वसन्ततिनाशनम् ॥ २५ ॥
गृहपापान्महाभाग वृष्टिरिष्टसमुद्भवात् । पूर्वपापफलस्यात्र भोगादेव क्षयः स्मृतः ॥ २६ ॥

अरुण उवाच ।

निष्कृतिं वद मे स्वामिन्बालवत्सावनाशिनीम् । यां कृत्वा विधिवज्जन्तुः पूर्वपापात्प्रमुच्यते॥२७॥

श्रीसूर्य उवाच ।

प्रायश्चित्तं सुत शृणु तद्वर्षानन्तरं सुत । तस्मिन्वर्षे महाभाग प्रायश्चित्तं न विद्यते ॥ २८ ॥
दृढकर्मार्जितात्पापान्न चोक्तं पापशोधनम् । श्रवणाद्धरिवंशस्य वैशाखे विधिनाण्डज ॥ २९ ॥
माघे वा कार्तिके वापि दशावृत्त्या विधानतः । ततस्तु भोजयेद्विप्रान्होमयेच्च स्वशक्तितः ॥ ३०॥
कोटिलक्षायुतं सूत रुद्राध्यायं जपेत्तथा । धेनूनां दशकं दद्यात्सवत्साभरणान्वितम् ॥ ३१ ॥
दद्याच्च कपिलामेकां स्वर्णशृङ्गीं पयस्विनीम् । प्रायश्चित्तमिदं पुत्र यः कुर्याद्विधिपूर्वकम् ॥३२॥
तस्य पुत्रविवृद्धिः स्याद्विवाहादपरात्सुत । मृत्युः पञ्चाशदब्दे तु खग चाकृतनिष्कृतेः ॥ ३३ ॥
प्रायश्चित्ते कृते त्वत्र नवत्यब्दमितं तथा । द्वियुक्तमायुः कथितं तीर्थपुण्याश्रयेण्डज ॥ ३४ ॥
जीवे कर्कटगे तत्र चन्द्रे मकरराशिगे । त्रयोदश्यां दिवाभूमौ ऋक्षे मृगशिरोभिधे ॥ ३५ ॥
निर्याणं कथितं तस्य विष्णुपूजनजात्फलात् । भविष्यति गतिस्तस्य शुभा विष्णुप्रपूजनात्॥३६॥
तथा तृतीये जनुषि मरणं गोग्रहात्सुत । सर्वपापविशुद्धः स्यात्पुनर्मोक्षमवाप्नुयात् ॥ ३७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनपंचाशदुराष्टशताधिकसहस्रतमः ॥ १८४९ ॥

श्रीसूर्य उवाच।

वैनतेय महाभाग खररोमा प्रजायते। पूर्वजन्मनि यो हन्यात्स्वरं पापविमोहितः ॥ १ ॥
प्रायश्चित्तं परं तस्य पापस्य शृणु तत्त्वतः। निष्कत्रयं हिरण्यं च दद्याद्दोषोपशान्तये ॥ २ ॥
ब्राह्मणाय दरिद्राय वेदवेदाङ्गवेदिने ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाशदुत्तराष्टशताधिकसहस्रतमः ॥ १८९० ॥

श्रीसूर्य उवाच।

प्राग्भुक्तं गर्भपुष्ट्यर्थं कुक्कुटाण्डं खगेश्वर। न गर्भं धारयत्येषा प्राक्पापाद्दण्डभक्षणात् ॥ १ ॥
कृत्वाण्डं विधिना तद्वद्धैरण्यं द्विपलात्मकम्। तदर्धमितकं वापि निजवित्तानुमानतः ॥ २ ॥
दत्त्वा द्विजाय विधिना आचरेच्छाङ्करं व्रतम्। फाल्गुनादौ चतुर्दश्यां कृष्णायां मासिमासि तु ३
पूजयेच्छंकरं रात्रौ तथा जागरणेन च। भवन्ति सुलभाः पुत्राः सततं कृतनिष्कृतेः ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकपंचाशदुत्तराष्टशताधिकसहस्रतमः ॥ १८९१ ॥

श्रीसूर्य उवाच।

शृणु सूत महाभाग यत्कर्म कृतवान्पुरा। जीवोऽयं तत्फलं चात्र प्रवक्ष्यामि समासतः ॥ १ ॥
अभवत्प्राग्भवे विप्रो धर्मशास्त्रार्थकोविदः। राज्यप्रचारी बलवाञ्शूरो मन्त्री महायशाः ॥ २ ॥
संधिविग्रहसंयुक्तो दाता भोक्ता प्रियंवदः। गत्वा त्वरिपुरं तेन घातिताः शत्रवः पुरा ॥ ३ ॥
विश्वासाद्राजकार्येषु कृतं कर्मातिदुष्कृतम्। लुण्ठितं तत्पुरं तेन लोभोपहतचेतसा ॥ ४ ॥
पीडिता बहवो लोका द्रव्यलोभाकुलेन वै। स तेन कर्मणा युक्तः प्राप्तस्तु यमशासनम् ॥ ५ ॥
भुक्त्वातिदारुणान्सूत नरकान्घोरदर्शनान्। तथा पुण्यफलं पुण्यात्प्राप्य पुण्यावशेषतः ॥ ६ ॥
स्वर्णकारकुले जातो धूर्तो लोभपरः सदा। नानाचौर्यक्रियायुक्तो लोभवञ्चनतत्परः ॥ ७ ॥
महाभिमाननिरतः प्रियो राजजनेष्वपि। सुखैश्वर्यधनैर्युक्तो कुटुम्बभरणे दृढः ॥ ८ ॥
नानास्त्रीसुखसंयुक्तस्तथा पुत्रविवर्जितः। वक्ष्यामि निष्कृतिं सूत सर्वपापनिकृन्तनीम् ॥ ९ ॥
प्रयागे त्वथवा काश्यां स्थाप्य लिङ्गन्तु शोभनम्। पूजयेत्तु त्रिवर्षान्तं मन्त्रैस्तल्लिङ्गजैस्तथा १०॥
गन्धपुष्पोपचारैश्च नैवेद्यैर्बहुदीपकैः। सम्पूज्य विधिवद्देवं तदन्ते भोजयेद्द्विजान् ॥ ११ ॥
शिवभक्तांस्तथा शान्तान्पूजयेद्दक्षिणांशुकैः। नानाहिरण्यैर्विविधैस्तथा चाभरणैः शुभैः ॥ १२ ॥
अथवा शृणुयात्तत्र यजुर्वेदं विधानतः। ब्रह्मचर्येण सततं प्रायश्चित्तमिदं परम् ॥ १३ ॥
य एवं कुरुते भक्त्या पूर्वपापौघनाशनम्। सम्प्राप्य तत्र निर्याणं शिवलोकं हि गच्छति ॥ १४ ॥
कर्तव्यं ब्राह्मणद्वारा पूर्वमेतद्धि काश्यपे। नाधिकारोऽत्र शूद्रस्य वेदस्य श्रवणे क्वचित् ॥ १५ ॥
तप्ता शलाका देया वै शूद्रकर्णेऽतिदारुणा। श्रुतं पारायणं येन पापेनाक्रान्तचेतसा ॥ १६ ॥
आयुरब्दशतं तस्य कृतनिष्कृतिकस्य हि। प्रायश्चित्ते कृते रिष्टं जायते षष्टिवत्सरे ॥ १७ ॥
एतज्जन्मफलं प्रोक्तं सविधानं समासतः ॥ १८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विपंचाशदुत्तराष्टशताधिकसहस्रतमः ॥ १८९२ ॥

श्रीसूर्य उवाच।

या नारी प्राग्भवे हन्यात्खरमत्रैव जन्मनि। खररोमसमान्यस्या रोमाणीह भवन्ति च ॥ १ ॥
ब्राह्मणाय तदा दद्यात्स्वर्णनिष्कत्रयं सुत। जायते सूक्ष्मरोमा सा विनतानन्दवर्धन ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिपंचाशदुत्तराष्टशताधिकसहस्रतमः ॥ १८९३ ॥

श्रीसूर्य उवाच ।

या पुरा हारयेद्रीतिं नारी सा च खगाधिप । पिङ्गाक्षी जायते चात्र प्रायश्चित्तं परं शृणु ॥ १ ॥
रीतिं दद्यात्पलशतं तथा ब्राह्मणभोजनम् । गायत्र्या जुहुयाच्छक्त्या तिलान्रोगविनाशनम्॥२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःपंचाशदुत्तराष्टशताधिकसहस्रतमः ॥ १८५४ ॥

श्रीसूर्य उवाच ।

प्राग्भवे वनिता या च परसिद्धान्नहारिणी । सात्र जन्मनि शूलेन रोगेणैव च बाध्यते ॥ १ ॥
सिद्धान्नदानाद्विप्रेभ्यो दीनेभ्योऽथ खगेश्वर । भिक्षुभ्यश्च तथा दानाद्रसदानाच्च शक्तितः ॥ २ ॥
न जायते शूलपीडा तस्याश्च कृतनिष्कृतेः । प्रायश्चित्तेऽकृतेऽत्रैव म्रियते शूलपीडया ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायःपंचपंचाशदुत्तराष्टशताधिकसहस्रतमः ॥ १८५५ ॥

श्रीसूर्य उवाच ।

उष्ट्रघाती भवेत्पूर्वं जन्मन्यथ पतत्रिण । सोऽत्र जन्मनि जायेत नरश्च विकृतस्वरः ॥ १ ॥
वक्ष्यामि तस्य पापस्य नाशनं चात्र जन्मनि । कर्पूरं त्रिपलं दद्याद्विप्रेभ्यः शक्तितोऽण्डज ॥३॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्पञ्चाशदुत्तराष्टशताधिकसहस्रतमः ॥ १८५६ ॥

श्रीसूर्य उवाच ।

वंध्येयं या महाभाग पृच्छति स्वं प्रयोजनम् । गर्भपातरता पूर्वं जनुष्यत्र फलं त्विदम् ॥ १ ॥
मुखजा प्राग्भवे त्वत्र तत्पापाद्यवनी हि सा । तन्निष्कृतिं प्रवक्ष्यामि गङ्गायां हि खगाधिप ॥२॥
पूजयेल्लक्षरुद्रांस्तु तदर्द्धं वा तदर्धकम् । शक्त्याथ भोजयेद्विप्रान्होमयेच्च स्वशक्तितः ॥ ३ ॥
अनेन विधिना या च प्रायश्चित्तं समाचरेत् । जायते सन्ततिस्तस्या इह जन्मनि वै ध्रुवम् ॥४॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तपंचाशदुत्तराष्टशताधिकसहस्रतमः ॥ १८५७ ॥

श्रीसूर्य उवाच ।

कांस्यहारी तु पुरुषो प्राग्भवे विनतासुत । शीर्षरोगेण सततं पीडितो जायतेऽधुना ॥ १ ॥
दानात्पलशतादत्र सीसकादण्डजोत्तम । विप्राय वेदविदुषे शीर्षरोगं न पश्यति ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टपञ्चाशदुत्तराष्टशताधिकसहस्रतमः ॥ १८५८ ॥

श्रीसूर्य उवाच ।

बभूव वाहुजः कश्चिद्देशे कीराभिधे सुत । धर्मकर्मा साधुभक्तः पितृपुत्रधनान्वितः ॥ १ ॥
दत्तानि तेन दानानि ब्राह्मणेभ्यो हि शक्तितः । सर्वाण्यपि च पात्रेभ्यो गोभूम्यश्वादिकानि च॥२॥
पापमाचरितं तेन भाविनोऽर्थस्य वै बलात् । स्ववंशीयस्य कस्यापि गृहं शत्रोर्मनोहरम् ॥ ३ ॥
निर्दग्धं वैरिभावात्तु रात्रौ भार्यासहायतः । तस्मिन्दग्धे महावाहो निर्दग्धं वृषभद्वयम् ॥ ४ ॥
गृहस्थाः स्वल्पजीवाश्च घातिताः क्रूरकर्मणा । ततो वहुतिथे काले गतः स यमशासनम् ॥ ५ ॥
सस्त्रीकः स्वफलं भुक्त्वा पापाद्दुष्टं शुभाच्छुभम् । ततः पञ्चनदे देशे स जातो वाहुजाधरः ॥ ६ ॥
मध्यस्वरूपो मतिमान्कुलेष्टः पुरुषो दृढः । गौररक्तो नातिनीचो वहुकन्यः पृथुर्विभुः ॥ ७ ॥
यौवने तु सुखैश्वर्यधनैः स्थानैर्युतायुतः । मितदो भोगभाग्याढ्यः कृती मानी जनप्रियः ॥८॥

पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित्। चिन्तातुरश्च धूर्तश्च दुःखार्तो मानवर्जितः ॥ ९ ॥
गोघातादग्निदाहाच्च जातपुत्रविनाशकः। सहायलक्षणं सर्वं कथयामि खगेश्वर ॥ १० ॥
या स्त्री पूर्वं सहायासीद्दाहकर्मणि चाण्डज। सा ज्येष्ठा प्रभुरेवात्र मृतपुत्रात्र जन्मनि ॥ ११ ॥
लक्ष्मैतदण्डजश्रेष्ठ जन्माङ्गाद्भृपभे शनिः। लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥ १२ ॥
कारयित्वा शिवं साङ्गं पलैर्वेदमितैः शुभैः। हिरण्मयं महाभाग पत्रे लेख्यं शिवान्वितम् ॥ १३ ॥
तदर्धमितकं वापि निज वित्तानुमानतः। पूजयित्वा तु गन्धाद्यैः षोडशोपचारकैः ॥ १४ ॥
संस्थाप्य विश्रुतं पश्चाद्गोरथे सुमनोरमे। सर्पोपस्करसंयुक्ते वितानाम्बरभूषिते ॥ १५ ॥
दद्याद्वेदविधिज्ञाय मन्त्रमेतमुदीरयन् ॥ १६ ॥

मंत्रः।

"मोहात्पूर्वं महापापमग्निदाहाद्यदर्जितम्। तन्नाशय ददेऽहं तु शिवं गोरथसंस्थितम्" ॥ १७ ॥
गोधिकाद्यास्तथा जीवाः पत्रे लेख्यास्तु राजते। शिवपत्रमिदं दद्याद्ये चान्ये घातिताः पुरा ॥ १८ ॥
पञ्चमाषमितो वह्निर्देयो हेममयः शुभः। गायत्र्यष्टसहस्रं तु रौद्रं जप्त्वा सहस्रकम् ॥ १९ ॥
अष्टाक्षरं द्विसाहस्रं होमयेद्भोजयेद्द्विजान्। य एवं कुरुते सूत प्रायश्चित्तं विधानतः ॥ २० ॥
न तस्य पुत्रमरणं तदग्रे जायते क्वचित्। जायंते सुलभाः पुत्रा आधिव्याधिविवर्जिताः ॥ २१ ॥
चत्वारिंशन्मितैर्कोने वर्षे रिष्टं प्रकीर्तितम्। पञ्चाशन्मितकेऽब्दे वा रिष्टं चाकृतनिष्कृतेः ॥ २२ ॥
प्रायश्चित्ते कृते त्वायुश्चतुःसप्तमिताब्दकम् ॥ २३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनपष्ट्युत्तराष्टशताधिकसहस्रतमः ॥ १८९९ ॥

श्रीसूर्य उवाच।

कांस्यहारी तु पुरुषः प्राग्भवे विनतासुत। शीर्षरोगेण सततं पीडितो जायते त्विह ॥ १ ॥
दानात्पलशतादत्र सीसकस्याण्डजोत्तम। विप्राय वेदविदुषे शीर्षरोगं न पश्यति ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षष्ट्युत्तराष्टशताधिकसहस्रतमः ॥ १८९० ॥

श्रीसूर्य उवाच।

वन्ध्यायाश्च महाभाग प्रायश्चित्तमतः शृणु। शूलोद्भिन्नतनुं चौरं मृतं प्राप्य खेर्दिने ॥ १ ॥
तत्तले तु तदा कुर्याद्वन्ध्या स्नानं शतौषधैः। पत्रैर्वृक्षोद्भवैः सूत तथा मृद्भिश्च सप्तभिः ॥ २ ॥
तीर्थोदकैः समन्त्रैश्च तं पूज्य प्रथमं सुत। विधिनानेन या कुर्याद्वन्ध्या पुत्रं लभेद्ध्रुवम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकषष्ट्युत्तराष्टशताधिकसहस्रतमः ॥ १८९१ ॥

श्रीसूर्य उवाच।

सतीं स्वभार्यां परमां साध्वीं सन्त्यज्य दुर्मतिः। प्रमादात्प्राग्भवे गच्छेदन्यां स्त्रीं काममोहितः १
सोऽत्र जन्मनि भोः सूत ग्रहणीरोगसंयुतः। जायते म्रियतेऽवश्यं ब्राह्मणीगमनादिह ॥ २ ॥
न तस्य पापशमनं मया प्रोक्तं खगाधिप। तस्मिन्वयसि वै रोगी भविष्यति न संशयः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विषष्ट्युत्तराष्टशताधिकसहस्रतमः ॥ १८९२ ॥

श्रीसूर्य उवाच।

या काचिद्वनिता सूत प्राग्भवे कांस्यहारिणी। सात्र जन्मनि पक्षीन्द्र शीर्षरोगप्रपीडिता ॥ १ ॥

दद्यात्पलशतं सीसं ब्राह्मणाय कुटुम्बिने । तत्काले शीर्षजाद्रोगान्मुच्यते नात्र संशयः ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिषट्युत्तराष्टशताधिकसहस्रतमः ॥ १८९३ ॥

श्रीसूर्य उवाच ।

या नारी ह्यवधीत्पूर्वं मोहादुष्ट्रं खगाधिप । सात्र जन्मनि पक्षीन्द्र जायते विकृतस्वरा ॥ १ ॥
सरस्वत्याश्च प्रतिमां सौवर्णीं राजतीं तथा । दद्याद्विद्वद्विधिज्ञाय तदा स्यात्सुस्वराण्डज ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःषट्युत्तराष्टशताधिकसहस्रतमः ॥ १८९४ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि यः कश्चिन्मोहात्परवृतं हरेत् । नेत्ररोगयुतः सोऽपि जायतेऽत्रैव जन्मनि ॥ १ ॥
घृतधेनुप्रदानाच्च विधिना वेदवेदिने । मुच्यते नेत्ररोगाच्च जन्मनीह खगेश्वर ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचषट्युत्तराष्टशताधिकसहस्रतमः॥ १८९५ ॥

श्रीसूर्य उवाच ।

स्वकं पतिं परित्यज्य या गच्छेत्पूर्वजन्मनि । परपुंसि महाभाग ग्रहणीरुग्युतात्र सा ॥ १ ॥
प्रायश्चित्तं परं तस्या व्रतं चान्द्रायणं त्विह । वैशाखे माघमासे वा तस्मात्पापात्प्रमुच्यते ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्षट्युत्तराष्टशताधिकसहस्रतमः ॥ १८९६ ॥

अरुण उवाच ।

विप्रवर्णकुलोत्पन्नो वातरक्ताक्षदर्शनः । उदरे वातजा रोगाः किञ्चिच्छस्रोपघातवान् ॥ १ ॥
किञ्चित्क्रोधश्च लोभश्च किञ्चिद्वित्तसमन्वितः । तस्य प्रिया शुभाचारा पतिभक्तिपरायणा ॥ २ ॥
एकापत्यं भवेत्तस्य तच्च वै मृतपुत्रकः । आदिपुत्रो मृतस्तस्यापत्यं नान्यत्प्रजायते ॥ ३ ॥
केन कर्मविपाकेन सत्यं कथय भास्कर ॥ ४ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मनि सद्बुद्धे शूद्रवंशसमुद्भवः । व्यापारकृषिवाणिज्यं ब्रह्मवित्तेन चाकरोत् ॥ ५ ॥
व्यवहारादिना तद्वै ब्रह्मवित्ताद्धनवर्धयत् । कालेनैव मृतो विप्रो धनं शूद्रेण वञ्चितम् ॥ ६ ॥
नार्पितं ब्रह्मपुत्राय ब्रह्मस्वं च गृहे स्थितम् । ब्रह्मस्वं भक्षितं तेन बहुकालं खगेश्वर ॥ ७ ॥
पश्चान्मृत्युवशं प्राप्तो नरके रौरवे गतः । ब्रह्मस्वभक्षणाच्चैव वर्षाणाञ्च सहस्रकम् ॥ ८ ॥
पतितो नरके घोरे पक्कस्तत्र स्वकर्मणा । पश्चान्मानुष्यमापन्नो व्रतदानप्रभावतः ॥ ९ ॥
इदं तृतीयं वै जन्म ब्रह्मवंशसमुद्भवम् । निक्षेपहरणाद्वापि मृतपुत्रः प्रजायते ॥ १० ॥
ब्राह्मणस्य विशेषेण ब्रह्मस्वं विषमेव हि । ऋणं प्रसह्य वै प्रोक्तमपि कल्पशताधिकम् ॥ ११ ॥
तस्माद्विप्रर्णदोषाद्वै ह्यपत्यं नैव जायते ॥ १२ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं देव येन पुत्रः प्रजायते । नारीणां च नराणाञ्च निष्कृतिं श्रेयसे वद ॥ १३ ॥

श्रीसूर्य उवाच ।

महापापहरो देवः सर्वकामप्रदः प्रभुः । पूजनीयो महारुद्रः सन्ततिश्रेय इच्छता ॥ १४ ॥
यजुर्वेदमयं देवं यजुर्भिः शतरुद्रियैः । यजमानः प्रमुच्येत पापादाकल्पसम्भवात् ॥ १५ ॥
रुद्रैकादशनीभिश्च रुद्रैकादशकेन वा । यत्नतस्तोषयेद्देवं रुद्रमेकादशात्मकम् ॥ १६ ॥

तद्दशांशेन होतव्यं द्रव्यं श्रद्धासमन्वितम् । विधिवज्जुहुयाद्वह्नौ तिलैस्त्रिमधुराप्लुतैः ॥ १७ ॥
हरितालीपलाशोत्थाः समिधोऽत्र हुनेत्सुधीः । प्रतिरुद्रं प्रदातव्यं गोयुगं रशनान्वितम् ॥ १८ ॥
केयूरकुण्डलाकल्पमन्त्रपुष्पकमण्डलु । प्रतिरुद्रं शतं विप्रान्भोजयेत्सुसमाहितः ॥ १९ ॥
निष्कं दद्यात्सुवर्णस्य दद्याद्वा मुख्यदक्षिणाम् । एवं रुद्रविधिं कृत्वा त्रिविधं नाशयेदघम् ॥२०॥
इतिहासपुराणोक्तीः सूक्तानि विविधानि च । शृणुयाद्विधिवत्कर्ता सभार्यः प्रीतितोऽन्वहम् २१ ॥
देवर्षिपितृमर्त्यानामृषीणाञ्च महीक्षिताम् । देवदानवगन्धर्वपिशाचोरगरक्षसाम् ॥ २२ ॥
सर्वासां जीवजातीनामुत्पत्तिं शृणुयादपि । ऋषीणामृषिपत्नीनां वंशान्सर्वानुदीरितान् ॥ २३ ॥
एवं वै त्रिविधात्पापान्मुच्यतेऽपत्यदुःखदात् । गुरून्देवाद्विजान्सम्यक् श्रद्धया समुपाचरेत्॥२४॥
एवंकृतविधिः सूत हरिवंशश्रुतार्थकः । वाचकोपरि सन्तुष्टो भूमिद्रविणवस्त्रकैः ॥ २५ ॥
मुद्राकर्णकतुरगं गां दत्त्वा तु पयस्विनीम् । भूमिद्रविणदानाद्यैस्तोष्येद्विजपुङ्गवान् ॥ २६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तषष्ट्युत्तराष्टशताधिकसहस्रतमः ॥ १८६७ ॥

श्रीसूर्य उवाच ।

ब्रह्मस्वं भक्षितं तेन वंशवृद्धिविनाशनम् । तेन कर्मविपाकेन नानासन्ततिनाशनम् ॥ १ ॥
यो वै तस्य सुतः पुत्रः सञ्जातो ब्राह्मणः स च । इदं चतुर्थं वै जन्म ब्रह्मवंशसमुद्भवम् ॥ २ ॥
भार्या दुःखकरी नित्यं पुत्रहीना खगाधिप ॥ ३ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं देव येन पापक्षयो भवेत् । निष्कृतिं ब्रूहि देवेश सन्ततेः सौख्यहेतवे ॥ ४ ॥

श्रीसूर्य उवाच ।

ब्रह्मस्वं विषतुल्यं हि पुत्रपौत्रादिनाशनम् । विषेणैको हि म्रियते ब्रह्मस्वात्सुतसन्ततिः ॥ ५ ॥
तस्य सन्ततिरक्षार्थं कारयेन्निष्कृतिं शुभाम् । सुशुभे भूप्रदेशे तु गोमयेनोपलेपयेत् ॥ ६ ॥
कुर्यादष्टदलं पद्मं राजतं शुक्लतण्डुलैः । तन्मध्ये स्थापयेत्ताम्रमयं वै कुम्भमव्रणम् ॥ ७ ॥
सुशीतसलिलापूर्णं सर्वौषधिपल्लवम् । नानाफलाक्षतोपेतं पूर्णपात्रोपशोभितम् ॥ ८ ॥
तस्योपरि न्यसेत्पात्रं वैणवं वर्तुलाकृति । सप्तधान्यफलोपेतं वस्त्रसक्चन्दनान्वितम् ॥ ९ ॥
तन्मध्ये स्थापयेन्मूर्तिं निष्कद्वयविनिर्मिताम् । सुवर्णस्य विशुद्धां च दद्यात्तां वेदवादिने ॥१० ॥
प्रतिष्ठापूजने कृत्वा ततो गां वै सवत्सकाम् । शतमष्टोत्तरं हुत्वा द्रोणाः सप्तैव निर्मिताः ॥११ ॥
जातीलक्षप्रसूनैस्तु कुर्य्यात्पूजां शिवोपरि । संकष्टान्मोचयेद्धेनुं दम्पतीः परिधापयेत् ॥ १२ ॥
एवं कृतविधेः सूत निश्चला सन्ततिर्भवेत् ॥ १३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टषष्ट्युत्तराष्टशताधिकसहस्रतमः ॥ १८६८ ॥

श्रीसूर्य उवाच ।

या काचिद्वनिता मोहात्माक्षवे भक्षिकं हरेत् । सात्र जन्मनि पक्षीन्द्र दुर्गन्धाढ्या प्रजायते ॥१॥
मधुधेनुप्रदानाच्च व्यतीपातादिपर्वसु । दुर्गन्धरोगात्सततं मुच्यते सा खगेश्वर ॥ २ ॥
षण्ढश्च राजसम्मानी चेह जन्मनि जायते । महादुष्टक्रियायुक्तो वधबंधनतत्परः ॥ ३ ॥
स कृताच्चु महादानात्पुत्रैश्वर्यधनान्वितः । महामानी महाधूर्तः षण्ढोऽगम्यातिसेवनात् ॥ ४ ॥
नेह जन्मनि [illegible] प्रायश्चित्तं मयोदितम् । अगम्यागमनं पापं प्रायश्चित्तविवर्जितम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनसप्तत्युत्तराष्टशताधिकसहस्रतमः ॥ १८६९ ॥

श्रीसूर्य उवाच ।

ब्रह्मघ्नी सा समाख्याता या पूर्वं घातयेद्द्विजम् । सर्वं विचेष्टितं तस्याः शृणु चेह खगाधिप ॥ १ ॥
अनया द्रव्यलोभेन सपत्न्या घातितः सुतः । प्राग्भवे विषदानेन सर्वदोषविवर्जितः ॥ २ ॥
तस्मादियं महादुष्टा बाल्ये कुष्ठान्विता सुत । अविवाह्या यतः सर्वैः पितृगेहे स्थिताण्डज ॥ ३ ॥
महादोषवती पापाज्जातात्र यवनी सुत । भविष्यति महारिष्टमग्निदाहेन चाण्डज ॥ ४ ॥
चतुर्विंशे तथा वर्षे मरणं कीर्तितं ध्रुवम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्युत्तराष्टशताधिकसहस्रतमः ॥ १८७० ॥

श्रीसूर्य उवाच ।

वराहं यो नरो हन्यात्प्राग्भवे विनतासुत । जायते दन्तुरः सोऽपि काले तत्पापचिह्नितः ॥ १ ॥
घृतकुम्भं स वै दद्याच्छक्त्या विप्राय धीमते । सुवर्णसहितं तेन तस्मात्पापात्प्रमुच्यते ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकसप्तत्युत्तराष्टशताधिकसहस्रतमः ॥ १८७१ ॥

श्रीसूर्य उवाच ।

यो हरेत्प्राग्भवे सूत गुडं मोहान्नराधमः । गुल्मोदरेण रोगेण सोऽत्र जन्मनि पीड्यते ॥ १ ॥
गुडधेनुप्रदानाच्च विधिना ब्राह्मणाय च । गुल्मोदरसमुद्भूता पीडा नश्यति तत्क्षणात् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विसप्तत्युत्तराष्टशताधिकसहस्रतमः ॥ १८७२ ॥

श्रीसूर्य उवाच ।

अथ काचित्सती नारी धर्मिष्ठा प्रियवादिनी । स्वामिप्रेरितया शत्रोः पूर्वं दग्धं तया गृहम् ॥ १ ॥
तदाहाच्च महाभाग दग्धं सर्वं पुरं तदा । ब्राह्मणस्यैकबाला च निर्दग्धा दोषवर्जिता ॥ २ ॥
ततो ब्रह्मवधात्तत्र किञ्चित्कालेऽपि सा मृता । भुक्त्वा फलानि सर्वाणि पुण्यपापभवानि वै ॥ ३ ॥
सा शूद्री यमुनातीरे जातेह पतिसेवया । कुष्ठरोगयुता बाल्ये निष्कृतिं पापनाशिनीम् ॥ ४ ॥
वक्ष्यामि वृषभं दद्यात्सर्वोपस्करसंयुतम् । कुष्ठरोगात्प्रमुच्येत नात्र कार्या विचारणा ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिसप्तत्युत्तराष्टशताधिकसहस्रतमः ॥ १८७३ ॥

श्रीसूर्य उवाच ।

प्रागासीद्ब्राह्मणः कश्चित्कृषिकर्मरतस्तदा । पूजकश्चातिथीनां च भिक्षुकाणां च यत्नतः ॥ १ ॥
तद्गृहे वृषभो मत्तो तीक्ष्णशृङ्गो भयानकः । तेन तद्वृषभस्यापि प्राग्भवे विनतासुत ॥ २ ॥
छित्त्वा नासाग्रमुष्कौ तु कृतं कर्मातिदारुणम् । तत्र तज्जनितं भुक्त्वा फलं पापसमुद्भवम् ॥ ३ ॥
जातोऽत्र यवनः सिन्धुमण्डले पर्वताश्रिते । षण्ढस्तु तेन पापेन स चास्त्यत्र खगेश्वर ॥ ४ ॥
धर्मात्पूर्वकृतात्सोऽपि सुखैश्वर्यधनान्वितः । दृढार्जितस्य पापस्य प्रायश्चित्तं न विद्यते ॥ ५ ॥
पूजनादतिथीनाञ्च भविष्यति च सद्गतिः । तीर्थाभिषेकेऽत्र जलुधि मृत्युस्तस्य प्रकीर्तितः ॥ ६ ॥
आयुर्द्वात्रिंशमितावदान्तं रिष्टं पश्चाद्वृद्धके ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः चतुःसप्तत्युत्तराष्टशताधिकसहस्रतमः ॥ १८७४ ॥

श्रीसूर्य उवाच ।

घातयेद्या पुरा नारी वराहं गरुडाग्रज । दन्तुरा सा भवेदत्र तत्काले घातसम्भवे ॥ १ ॥
ताम्रकुम्भं सुवर्णाढ्यं घृतपूर्णं सदक्षिणम् । तद्दोषशमनायैव दद्याच्छक्त्या विधानतः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चसप्तत्युत्तराष्टशताधिकसहस्रतमः ॥ १८७५ ॥

श्रीसूर्य उवाच ।

तैलहारी तु यः कश्चिद्भवेल्लोभात्पुराभवे । कण्डूरोगेण सततं पीड्यते चात्र जन्मनि ॥ १ ॥
शक्त्या तैलप्रदानाच्च ब्राह्मणाय खगेश्वर । कण्डूरोगप्रशमनं दानात्तैलघटद्भवात् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्सप्तत्युत्तराष्टशताधिकसहस्रतमः ॥ १८७६ ॥

श्रीसूर्य उवाच ।

काचिच्छुभानना पूर्वभवे चारणवल्लभा । भर्तृत्यक्ताधिविन्ना सा महारोषवती ह्यभूत् ॥ १ ॥
तया महौषधैर्दिव्यैः पत्युः पुस्त्वं विनाशितम् । तेन पापप्रभावेण जातोऽत्रायं नपुंसकः ॥ २ ॥
धूर्तः पापरतो दुष्टः सर्वधर्मविवर्जितः । वर्णबाह्योऽतिदुःखार्तो न शुभां लभते गतिम् ॥ ३ ॥
बहुजन्मस्वसौ पापान्मुक्तो भवति चाण्डज ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तसप्तत्युत्तराष्टशताधिकसहस्रतमः ॥ १८७७ ॥

श्रीसूर्य उवाच ।

स्वभक्ष्यार्थं महाभाग यो हन्याद्वायुवाहनम् । अत्र जन्मनि खज्ञोऽपि नात्र कार्या विचारणा ॥ १ ॥
न तस्य निष्कृतिः प्रोक्ता जन्मनीह खगाधिप । स्वशरीरविवृद्ध्यर्थं येन भुक्तो मृगः पुरा ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टसप्तत्युत्तराष्टशताधिकसहस्रतमः ॥ १८७८ ॥

श्रीसूर्य उवाच ।

या नारी प्राग्भवे मोहाद्गुडं हरति कस्यचित् । गुल्मोदरेण रोगेण पीड्यते सात्र जन्मनि ॥ १ ॥
गङ्गायां हि महाभाग गुडधेनुप्रदानतः । निष्कृतिं सा चरेत्सूत सर्पिष्यात्मानमीक्षयेत् ॥ २ ॥
ऐहिकं लक्षणं तस्याः शरीरे चोपजायते । जन्मक्रमेण जायन्ते दुःखान्यकृतनिष्कृतेः ॥ ३ ॥
कुष्ठरुक्चानपत्यत्वं प्रमेहार्तिर्धनक्षतिः । कुनखी दर्दुलः पाण्डुरोगी जन्मक्रमाद्भवेत् ॥ ४ ॥
भीतिरग्नेश्चोरतश्च राज्ञो वित्तव्ययादिकम् । लकुटग्रावशस्त्राद्यैर्जायन्ते व्रणजार्तयः ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनाशीत्युत्तराष्टशताधिकसहस्रतमः ॥ १८७९ ॥

श्रीसूर्य उवाच ।

अथ सूर्यदिने सूत प्राप्य भूमिं श्मशानजाम् । मृतप्रेतं समालोक्य रात्रौ गच्छेदतन्द्रितः ॥ १ ॥
पूजयित्वा चितां तस्य बलिमष्टविधं सृजेत् । स्नानं कृत्वा मृदालम्भैः पत्रैर्वृक्षोद्भवैस्तथा ॥ २ ॥
शतच्छिद्रघटस्थैस्तु नानातीर्थोद्भवैर्जलैः । दीपमालादिने वापि प्रयोगं विधिना चरेत् ॥ ३ ॥
हरिवंशं ततः पश्चाच्छृणुयाद्विधिपूर्वकम् । दत्त्वा द्विजेभ्यो विधिना नानाभक्ष्यफलानि च ॥ ४ ॥
स्वेच्छया भोजनं तेभ्यो दद्याद्दोषापनुत्तये । नारी प्रयोगेणानेन वंध्या याति सपुत्रताम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽशीत्युत्तराष्टशताधिकसहस्रतमः ॥ १८८० ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यसौ वैश्यश्चात्र जन्मनि बाहुजः । देवद्रव्यापहरणात्प्रागत्राक्षिप्रपीडितः ॥ १ ॥
विंशे वर्षे व्यतीते च नेत्रभंगो जनिष्यते । तद्रक्षार्थमहं वक्ष्ये दानं पापहरं परम् ॥ २ ॥
कृत्वा देवगृहं रम्यं प्रतिष्ठाप्य सुराधिपम् । गन्धपुष्पैः समभ्यर्च्य दीपा देयाः सुवर्णजाः ॥३॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकाशीत्युत्तराष्टशताधिकसहस्रतमः ॥ १८८१ ॥

श्रीसूर्य उवाच ।

पूर्वजन्मन्यसौ विप्रश्चक्रे मुष्कनिकृन्तनम् । वृषभस्य महाभाग स्वार्थसाधनतत्परः ॥ १ ॥
तेन वै कर्मणा सोत्र षण्ढश्चैवापवर्णजः । गवां पालनजात्पुण्यादत्रासौ सुखसंयुतः ॥ २ ॥
गोपीडनान्महापापात्तस्य नैवात्र निष्कृतिः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्यशीत्युत्तराष्टशताधिकसहस्रतमः ॥ १८८२ ॥

श्रीसूर्य उवाच ।

या काचिल्ललना पूर्वं मोहात्परघृतं हरेत् । सात्र जन्मनि रोगेण नेत्रोत्थेन प्रपीड्यते ॥ १ ॥
कुरुक्षेत्रादितीर्थेषु घृतधेनुप्रदानतः । मुच्यते सा महारोगान्नेत्रजान्नात्र संशयः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्यशीत्युत्तराष्टशताधिकसहस्रतमः ॥ १८८३ ॥

श्रीसूर्य उवाच ।

महिषीमवधीत्पूर्वभवे यो वै नराधमः । सोऽत्र जन्मनि पक्षीन्द्र कृष्णगुल्मयुतो भवेत् ॥ १ ॥
स्वर्णशृङ्गीं रौप्यखुरां घण्टाभरणभूषिताम् । सूक्ष्मकम्बलयुक्तां च दद्याद्वेदविदे सुत ॥ २ ॥
कृष्णगुल्मोत्थितां पीडां नरश्चात्र न पश्यति ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरशीत्युत्तराष्टशताधिकसहस्रतमः ॥ १८८४ ॥

श्रीसूर्य उवाच ।

प्राग्भवे या भवेत्काचित्स्वर्णकारी खगेश्वर । तद्गृहे धान्यराशिं तु चरन्ती गौः स्वभावतः ॥ १ ॥
ताडिता कुक्षिभागे तु लकुटेन भृशं सुत । तत्ताडनान्महादुःख प्राप्ता गर्भातिभारतः ॥ २ ॥
मृता च तेन दुःखेन गर्भजातसमन्विता । तेन वै कर्मणा मुक्ता सम्प्राप्तोचिताशासनम् ॥ ३ ॥
पुनः शूद्री हि संजज्ञे गौरवर्णा शुभानना । धनभृत्यैश्च भोगाद्यैर्विभवैः संयुता हि सा ॥ ४ ॥
पुत्रसन्ततिहीना वै प्राग्गोघाताघसम्भवात् । प्रायश्चित्तं प्रवक्ष्यामि सर्वपापविनाशनम् ॥ ५ ॥
कुर्याद्वापीमरण्ये तु देशे लोकाकुले तथा । मार्गे हि धर्मतो यत्नात्प्रतिष्ठां कारयेत्ततः ॥ ६ ॥
संस्थाप्य च शिवं तत्र विधिना विनतासुत । होमयेच्च चरूंस्तत्र तिलाज्याक्षयुतानिह ॥ ७ ॥
भोजयेद्ब्राह्मणान्भक्त्या शिवपूजनतत्परान् । दद्यात्तथैकां कपिलां सर्वपापप्रणाशिनीम् ॥ ८ ॥
प्रायश्चित्तमिदं सूत पूर्वजन्माघनाशनम् । एवं यो कुरुते श्रुत्वा तस्याः सन्ततिजं भयम् ॥ ९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचाशीत्युत्तराष्टशताधिकसहस्रतमः ॥ १८८५ ॥

श्रीसूर्य उवाच ।

यः कश्चित्प्राग्भवे सूत दुग्धं हरति मानवः । तत्काले पाप्मनस्तस्य बहुमूत्री प्रजायते ॥ १ ॥
दुग्धधेनुप्रदानाच्च विधिना त्वत्र जन्मनि । बहुमूत्रान्महारोगान्मुच्यते गरुडाग्रज ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडशीत्युत्तराष्टशताधिकसहस्रतमः ॥ १८८६ ॥

श्रीसूर्य उवाच।

दुग्धं हरति या नारी कस्यचित्पापमोहिता। पूर्वजन्मनि सात्रैव बहुमूत्ररुजाकुला ॥ १ ॥
दुग्धधेनुप्रदानाच्च वेदवेदाङ्गवेदिने। विधिना काश्यपे चात्र न पश्येद्बहुमूत्रकम् ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्ताशीत्युत्तराष्टशताधिकसहस्रतमः ॥ १८८७ ॥

श्रीसूर्य उवाच।

यो मोहाद्घातयेत्सूत महिषीं नवयौवनाम्। प्राग्भवे नियतं सूत कृष्णगुल्मात्प्रबाध्यते ॥ १ ॥
स नरो रत्नदानेन विधिना गरुडाग्रज। नाशयेत्कृष्णगुल्मोत्थां पीडामत्रैव जन्मनि ॥ २ ॥
अथवा महिषीदानाद्विप्राय विधिनाण्डज। महिषीपापजाद्रोगात्सुखी भवति मानवः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाशीत्युत्तराष्टशताधिकसहस्रतमः ॥ १८८८ ॥

श्रीसूर्य उवाच।

यः कुर्यात्पापलोभेन पूर्वं मुष्कनिकुट्टनम्। ब्रह्मपुत्रस्य षण्ढः स्यादत्र जन्मनि निश्चयात् ॥ १ ॥
ज्ञानाज्ञानकृतं वापि निष्कृतिर्नात्र विद्यते। ब्रह्मघातान्महापापात्षण्ढः स्याद्बहुजन्मसु ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोननवत्युत्तराष्टशताधिकसहस्रतमः ॥ १८८९ ॥

श्रीसूर्य उवाच।

बभूव फलहृत्कांचित्प्रमादाद्विनतासुत। पूर्वजन्मनि पुण्यापि बहुदानरता सती ॥ १ ॥
अत्र सा क्षत्रिया जाता प्रागपि क्षत्रियाण्डज। अत्र पुत्रविहीना सा फलहृत्पापतो ध्रुवम् ॥ २ ॥
फलानां बहुदानाच्च चातुर्मास्येऽत्र नित्यशः। भोजनं तु तदा पश्चात्कारयेत्स्वेच्छया द्विजान्॥ ३॥
प्रायश्चित्तं परं तस्मात्फलहृत्पापनाशनम्। अमायां नारिकेलानि देयानि खलु शक्तितः ॥ ४ ॥
तत्कृते सुतवृद्धिः स्याज्जीवनं चाब्दसप्ततिम् ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवत्युत्तराष्टशताधिकसहस्रतमः ॥ १८९० ॥

श्रीसूर्य उवाच।

दधिहारी पुमान्पूर्वे जन्मन्यत्र खगेश्वर। जायते मेदसा युक्तस्तद्दुःखेन प्रपीडितः ॥ १ ॥
कार्तिक्यामथ वैशाख्यां दधिधेनुप्रदानतः। तस्माद्रोगाद्विमुच्येत तत्काले गरुडाग्रज ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकनवत्युत्तराष्टशताधिकसहस्रतमः ॥ १८९१ ॥

श्रीसूर्य उवाच।

महिषीघातनान्नारी प्राग्भवे विनतासुत। अत्र जन्मनि पक्षीन्द्र कृष्णगुल्मेन पीड्यते ॥ १ ॥
दद्यात्साभरणां सूत महिषीं यमदैवताम्। युतकम्बलसंछन्नां विधिना नवयौवनाम् ॥ २ ॥
सा मुच्यते महापापान्महिषीवधजात्सुत। तस्मिन्नेव कृते दाने कृष्णगुल्मं न पश्यति ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विनवत्युत्तराष्टशताधिकसहस्रतमः ॥ १८९२ ॥

श्रीसूर्य उवाच।

विद्धे प्राग्वृषभाणाञ्च नासाग्रे गरुडाग्रज। नासाछेदोऽत्र तस्यास्ति यूनि भावे विनिश्चयात् ॥ १ ॥
नास्ति तन्निष्क्रिया क्वापि दत्तैर्दानशतैरपि ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिणवत्युत्तराष्टशताधिकसहस्रतमः ॥ १८९३ ॥

श्रीसूर्य उवाच ।

कश्चिदासीन्महाभाग चारणोऽतिप्रियंवदः । कवित्वशक्तिनिरतो बहुचारणसंयुतः ॥ १ ॥
प्रेरितो दैवयोगेन गतो राजाश्रयं प्रति । तत्सेवानिरतो नित्यं चिरकालमुपस्थितः ॥ २ ॥
अथ तत्र महावादे कवीनां हि खगेश्वर । महाघोरमभूद्युद्धं राजद्वारे भयप्रदम् ॥ ३ ॥
स चारणो महाक्रोधात्कृतवानात्मघातनम् । परघातकृते सूत स्वशरीरमथात्यजत् ॥ ४ ॥
तेन कर्मविपाकेन महाचौर्येण चाण्डज । भुक्त्वा स्वर्गफलं पुण्यमात्मघातात्परिच्युतः ॥ ५ ॥
महाभूमिभुजां वंशे म्लेच्छानां जनितः स्वयम् । सिन्धोः पश्चिमभागे तु शतयोजनसम्मिते ६ ॥
देशे कर्कटगे जीवे लग्नस्थे चंद्रसंयुते । गौराङ्गः पृथुलो धूर्तः सर्वविद्याविशारदः ॥ ७ ॥
सुखैश्वर्यसमाक्रान्तो धनवाहनभोगभाक् । शूरः सुवेषोऽतिक्रूरो बहुपालनतत्परः ॥ ८ ॥
पापाल्लोभरतः क्रोधी नानाभैरवशासनः । रिष्टं षष्टिमिते वर्षे पञ्चहीने खगेश्वर ॥ ९ ॥
सर्ववित्तषडंशेन प्रायश्चित्तं समाचरेत् । पञ्चाशीतिमितायुः स्यादन्ते कालनरेण्डज ॥ १० ॥
प्रायश्चित्ते कृते ह्यत्र रिष्टं स्यात्प्रोक्तवत्सरे । कालरूपेण शस्त्रेण तत्क्षणे मरणं स्मृतम् ॥ ११ ॥
महाघोराहवे सूत चात्मघातादिदं फलम् । चिह्नं तस्य प्रवक्ष्यामि ह्यात्मघातसमुद्भवम् ॥ १२ ॥
हृदिस्थं लशुनं पुत्र षडंगुलमितं शुभम् ॥ १३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्णवत्युत्तराष्टशताधिकसहस्रतमः ॥ १८९४ ॥

श्रीसूर्य उवाच ।

दधिप्रहरणे नारी प्राग्भवे त्वत्र जन्मनि । मेदसा पीडयते सूत विनतानन्दवर्धन ॥ १ ॥
दधिधेनुप्रदानाच्च ब्राह्मणाय कुटुम्बिने । मुच्यते तन्महारोगान्नात्र कार्या विचारणा ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचनवत्युत्तराष्टशताधिकसहस्रतमः ॥ १८९५ ॥

श्रीसूर्य उवाच ।

तरक्षौ निहते पूर्वभवे च गरुडाग्रज । अत्र जन्मनि नेत्रेषु कातरत्वं प्रजायते ॥ १ ॥
रत्नधेनुमहादानाद्विधिना ब्राह्मणाय च । न पश्यत्यक्षिजं रोगं कातरोत्थं हि काश्यपे ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षण्णवत्युत्तराष्टशताधिकसहस्रतमः ॥ १८९६ ॥

श्रीसूर्य उवाच ।

प्राग्भवे सुमुखी काचिद्गता देवालयेण्डज । दीपा धातुमयास्तत्र चान्यदत्ता हृतास्तया ॥ १ ॥
सा शूद्रात्र महाभाग धनपुत्रसमन्विता । चन्द्रग्रहे महादानात्प्राक्कृतात्तु खगेश्वर ॥ २ ॥
तेन कर्मफलेनैव चक्षुःपीडातिदारुणा । त्रिदोषैर्दूषिता चात्र युवभावे खगेश्वर ॥ ३ ॥
प्रायश्चित्तं प्रवक्ष्यामि दीपहृत्पापशोधनम् । दीपा देया घृतेनात्र पूरयित्वा सुवर्णजाः ॥ ४ ॥
सुवर्णनिर्मिता भव्याः सम्पूज्याथ महेश्वरम् । गन्धपुष्पैस्तथा दीपैर्भक्ष्यैर्भोज्यैः प्रयत्नतः॥ ५ ॥
दद्याद्विजेभ्यो बहुशस्तस्मात्पापात्प्रमुच्यते ॥ ६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तनवत्युत्तराष्टशताधिकसहस्रतमः ॥ १८९७ ॥

श्रीसूर्य उवाच ।

दुष्टगन्धयुतः सूत जायते सोऽत्र जन्मनि । मधुहारी च यः पूर्वं प्रायश्चित्तं परं शृणु ॥ १ ॥

मधुधेनुप्रदानाद्वै ब्राह्मणाय खगेश्वर। दुष्टगन्धिकृतादोषान्मुच्यते नात्र संशयः ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टनवत्युत्तराष्टशताधिकसहस्रतमः ॥ १८९८ ॥

श्रीसूर्य उवाच।

तस्मिं घातयेत्पूर्वं या नारी गरुडाग्रज। कातराक्षी प्रजायेत चक्षूरोगात्खगेश्वर ॥ १ ॥
धेनुं रत्नमयीं दद्यात्सुवर्णां विधानतः। नश्येद्वै चक्षुषो रोगस्तद्दानेन महाद्भुतम् ॥ २ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवनवत्युत्तराष्टशताधिकसहस्रतमः ॥ १८९९ ॥

श्रीसूर्य उवाच।

प्राग्जन्मन्यप्यभूत्कश्चिन्नरो राजकृपान्वितः। दण्डाधिकारवाञ्छूरो दृढो ब्राह्मणपूजकः ॥ १ ॥
नानादानरतस्तत्र लोभाढ्योऽपि विशेषतः। व्यभिचाररतस्यैकब्राह्मणस्य खगेश्वर ॥ २ ॥
लोभाच्चकारासौ तत्र ह्यण्डच्छेदं च तत्क्षणात्। स तेन कर्मणा युक्तो भुक्त्वा तु यमशासनम् ॥ ३ ॥
देशे पञ्चनदे ह्यत्र जातः शूद्रोऽति चाधमः। स चास्त्यत्र विवर्णस्तु षण्ढः पापमतिः सुखी ॥ ४ ॥
सकलैश्वर्यसम्पन्नो नानाधनसमन्वितः। नानावाहनभोगाढ्यो दानात्सर्वमिदं सुत ॥ ५ ॥
सप्तजन्मस्वसौ षण्ढो भविष्यति खगेश्वर ॥ ६ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोनवशताधिकसहस्रतमः ॥ १९०० ॥

अरुण उवाच।

क्षात्रे कुले समुत्पन्नो शौर्यौदार्ययशोधनी। राजमान्यविरोधी च नानासौख्यरतः सदा ॥ १ ॥
किञ्चिद्घातादिना पीडा जायते चोदरे भृशम्। वातरक्तेन शिरसि महापीडा प्रजायते ॥ २ ॥
तस्य भार्या शुभाचारा सुरूपा गुणशालिनी। विप्रभक्तिरता नित्यं दानदाक्षिण्यवर्तिनी ॥ ३ ॥
एकपुत्रं प्रसूयाथ नान्यपुत्रमुपागमत्। पश्चात्पुष्पांतरं शान्तमपत्यं नैव जायते ॥ ४ ॥
केन कर्मविपाकेन पापं शाम्यति तत्स्त्रियाः। विधिना च हितार्थाय सत्यं ब्रूहि दिवाकर ॥ ५ ॥

श्रीसूर्य उवाच।

पूर्वं वर्णोत्तरे जातो धातुकांस्यादिकारकः। ब्रह्मास्य मित्रताज्ञातो बहुद्रव्यसमाकुलः ॥ ६ ॥
क्रयविक्रयकर्ता च विप्रद्रव्यैरवर्धत। कालेन महता वत्स स विप्रो निधनं गतः ॥ ७ ॥
वञ्चितं तद्धनं सर्वं न तु किञ्चित्प्रदत्तवान्। ब्रह्मस्वं भक्षितं तेन वंशवृद्धिविनाशनम् ॥ ८ ॥
तेन कर्मविपाकेन नानासन्ततिनाशनम्। यौवनेऽमृततत्पुत्रः स वै ब्राह्मण उच्यते ॥ ९ ॥
इदं जन्म चतुर्थं च ब्रह्मवंशसमुद्भवम्। भार्या दुःखकरी ह्येवं पुत्रहीना खगाधिप ॥ १० ॥

अरुण उवाच।

प्रायश्चित्तं कथं देव येन पापक्षयो भवेत्। निष्कृतिं ब्रूहि मां वैश्यसन्ततेः सौख्यहेतवे ॥ ११ ॥

श्रीसूर्य उवाच।

ब्रह्मस्वं विषसन्तुल्यं पुत्रपौत्रविनाशनम्। विषेणैकोऽपि म्रियते ब्रह्मस्वैः सुतसन्ततिः ॥ १२ ॥
तस्य सन्ततिनाशाय कारयेन्निष्कृतिं शुभाम्। सुशुभे भूमिदेशे तु गोमयेनोपलेपयेत् ॥ १३ ॥
कुर्यादष्टदलं पद्मं राजतं शुक्लतण्डुलैः। तन्मध्ये स्थापयेत्कुम्भमव्रणं शुभलक्षणम् ॥ १४ ॥
सुशीतसलिलैः पूर्णं सरत्नौषधिपल्लवम्। नानाफलाक्षतोपेतं पूर्णपात्रोपशोभितम् ॥ १५ ॥

तस्योपरि न्यसेत्पात्रं वैणवं वर्तुलाकृति । सप्तधान्यफलोपेतं वस्त्रस्रक्चन्दनान्वितम् ॥ १६ ॥
तन्मध्ये स्थापयेन्मूर्तिं निष्कद्वयविनिर्मिताम् । सुवर्णस्य विशुद्धां च प्रदद्याद्वेदवादिने ॥ १७ ॥
प्रतिष्ठां पूजनं कृत्वा ततो गा वै सवत्सिकाः । विप्रेभ्योऽष्टोत्तरशतं ज्ञातकौम्भविनिर्मिताः॥१८॥
जातीपुष्पैः प्रकुर्य्याच्च लक्षैः पूजा महेशितुः । संकष्टान्मोचयेद्धेनुं दम्पती परिधापयेत् ॥ १९ ॥
एवं कृतविधेः सूत निश्चला सन्ततिर्भवेत् ॥ २० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोत्तरनवशताधिकसहस्रतमः ॥ १९०१ ॥

अरुण उवाच ।

यथायथा च दोषाणां मोक्षः प्राणभृतां भवेत् । दानं व्रतं तथा कर्म येन सौख्यं जनो व्रजेत्॥१॥
सर्वलक्षणसम्पूर्णो दृश्यते भुवि मानवः । तथापि कर्मणा केन ह्यभिज्ञानं तु कारयेत् ॥ २ ॥

श्रीसूर्य उवाच ।

पुरा जन्मनि येनैव कृतं शशकघातनम् । तेनैव कर्मदोषेण कुब्जः काणो भवेन्नरः ॥ ३ ॥
ऐहिकान्यपि लक्ष्माणि शरीरे सम्भवन्ति च । परापवादनिरतो लम्बो वञ्चनतत्परः ॥ ४ ॥
गात्रपीडा च महती बाल्ये वयसि सम्भवेत् । न बन्धुः पृष्ठतस्तस्य न च बन्धुसुखं सुत ॥ ५॥
अग्रतो नापि नश्यन्ति बालकाः खगघातनात् । राजदण्डो ज्ञानदण्डो मानभङ्गो भवेदिति॥६ ॥
प्रेर्यते येन कर्मार्थे स वै व्यङ्गो भवेदिति । गुह्यतो वदने चैव मशकानाञ्च पादयोः ॥ ७ ॥
शस्त्राग्निपीडनं कुक्षौ प्लीहतो हि प्रजायते । एवं स बहुशस्स्वीयैर्लक्षणैरिति लक्ष्यते ॥ ८ ॥
कर्मणस्तस्य निर्हारं प्रायश्चित्तं समाचरेत् । तस्य दोषस्य शान्त्यर्थमाचरेत्तु हरेर्व्रतम् ॥ ९ ॥
शय्यां दद्याच्च विप्राय सोपधानां सतूलिकाम् । हरिमान्दोलयेत्तत्र चैत्रे चैव विधानतः ॥ १० ॥
लक्ष्मीनारायणौ कार्यौ हेमनिष्कप्रमाणतः । महत्या पूजयेल्लक्ष्म्या महोत्सवसमन्वितम् ॥ ११ ॥
द्वादश ब्राह्मणांश्चापि भोजयेद्भक्ष्यभोज्यकैः । व्रतस्य च विधिं सूत कथयामि समासतः ॥१२॥
दमनारोपणं चैव रोगमुक्तिहिताय वै । चैत्रे मासि शुभे पक्षे शुभवारे तथा तिथौ ॥ १३ ॥
दशम्यामधिवासं तु कुर्याद्दमनकाय वै । सँवत्सरकृता पूजा येन पूर्णा भवेत्खग ॥ १४ ॥
तपसो भङ्गमकरोज्जीवस्यास्याभवत्तदा । भस्मीभूते तदा पत्यौ रतिः प्रीतिश्च दुःखिते ॥ १५ ॥
तन्नेत्रवारिसम्भूता दमनस्य लता भवेत् । सौरभ्यं च सुसौभाग्यं महदासीत्सुशोभनम् ॥ १६ ॥
तेन सन्तुष्टहृदयो स भवेद्यः शिवः स्वयम् । रत्यै प्रीत्यै च तत्सोऽयं दमनः प्रवरीकृतः ॥ १७ ॥
दमनेन च यो मन्त्री वर्षमध्ये न पूजयेत् । तस्य सांवत्सरी पूजा दमनाय भविष्यति ॥ १८ ॥
तस्मै दत्तो वरो धात्रा त्वत्पूजादौ भविष्यति । तस्माद्दमनपूजादौ कर्तव्या लोकवन्दिता ॥ १९॥
अन्येषां पूजनं पश्चादिह लोके च जायते । समूलं दमनं सूत स्थापयेत्पत्रके वटे ॥ २० ॥
दमनं नवधा कृत्वा पूजयेत्तदनन्तरम् । आनंदेश्वरीबीजेन ततोभिन्नेन सुन्दरि ॥ २१ ॥
आनन्देश्वरीबीजेन नवधा विन्दुना सह । नवप्रकारभिन्नं तु दमनं पूजयेत्क्रमात् ॥ २२ ॥
अघोरविद्यया पश्चादभिषिञ्चेत्ततो जनम् । पूर्वोक्तया दक्षिणस्यां दिशि संस्थापयेद्व्रती ॥ २३ ॥
शस्त्रेण रक्षणं कुर्यात्कवचेन ततः परम् । बद्ध्वात्र मूलमुद्रां तु भ्रामयेद्दमनोपरि ॥ २४ ॥
चैत्रे सितैकादश्यान्तु दमनारोपणं भवेत् । उद्धरेदस्त्रमन्त्रेण हृदयेन च लेपयेत् ॥ २५ ॥
श्रीखण्डघनसौरस्तु ह्यधिवासं च कारयेत् । प्रथमे दिवसे कुर्यादधिवासनमुत्तमम् ॥ २६ ॥

सद्योऽधिवासनं वापि वर्षपूजाप्रसिद्धये । नवकोणं च विख्यातं सिन्दूरेण समप्रभम् ॥ २७ ॥
कलशान्नव संस्थाप्य हेमपात्रादिपूरितान् । एकं वा कलशं रम्यं स्थापयेद्देशिकोत्तमः ॥ २८ ॥
दक्षिणे मण्डलं कुर्यात्कुङ्कुमाद्यैर्विचित्रितम् । अशोकतरुमालिख्य त्रिकोणं मण्डलं लिखेत्२९
तन्मध्ये स्थापयेत्कामं पञ्चबाणं धनुर्धरम् । वसन्तसहितं तं वै पूजयेत्सिद्धिहेतवे ॥ ३० ॥
वाग्बीजैर्भुवनेशानीं श्रीकामायुक्तबीजकैः । कामाय नम आलिख्य विधेयं रुद्रवर्णकम् ॥ ३१ ॥
कामबीजत्रयं प्रोक्तं पूर्वमेव समुच्चरेत् । रत्यै नमश्चाष्टवर्णास्तदन्ते च समुद्धरेत् ॥ ३२ ॥
प्रीतिबीजं रतिस्थाने प्रीतिस्थानेऽष्टवर्णकान् । गौरीं श्यामां रतिप्रीती क्रमेण परिपूजयेत् ॥३३॥
पद्मताम्बूलहस्तेन रक्तवस्त्रविराजितैः । दिव्यैराभरणैः सूत रतिप्रीती प्रपूजयेत् ॥ ३४ ॥
वामदक्षिणयोर्ध्यात्वा कामस्य तदनन्तरम् । सुवस्ते पुष्पसमये साङ्गं कामं प्रपूजयेत् ॥ ३५ ॥
धूपदीपादिनैवेद्यैर्दमनाद्यैश्च पूजयेत् । सर्वकार्यसुसिद्ध्यर्थं पूजयेन्मधुसूदनम् ॥ ३६ ॥
क्रमेण पूजयेत्सर्वं वैष्णवान्भोजयेद्बहून् । सुवासिनीश्च सम्पूज्य योगिमण्डलमर्चयेत् ॥ ३७ ॥
श्रद्धया परिपूज्याथनानादेशीयमानवान् । पूजयेच्च शुभं पश्चाद्गुरुं रत्नादिभूषणैः ॥ ३८ ॥
स्वर्णभारसहस्रैस्तु दिव्यवस्त्रैर्मनोहरैः । पूजयित्वा ततो विप्रान्पूर्णाहुतिमथाचरेत् ॥ ३९ ॥
अनेन विधिना देवं दमनारोपणे यजेत् । तस्य कर्मकृता बाधा शरीरे नैव जायते ॥ ४० ॥
पूर्णा मनोरथास्तस्य जायन्ते नात्र संशयः । शुद्धवर्णसुवर्णेन कृत्वा मन्मूर्तिमुत्तमाम् ॥ ४१ ॥
अर्चितां गन्धपुष्पाद्यैर्दैवज्ञाय निवेदयेत् । तस्यैहिकमिदं चिह्नं भवेद्दुर्निपीडनम् ॥ ४२ ॥
जानुजंघे तथा कुब्जे पीडनं तूदरे भवेत् । यजमानविरोधं च बुद्धिहीनोऽनुविन्दति ॥ ४३ ॥
तेपुतेषु कृता बाधा स्वेस्वे चैव प्रजायते । कौलीन्यकुलटादिभ्यो यौवने सा विगर्हिता ॥ ४४ ॥
कुलाकुलत्वं भूम्यादिघातः स्यादुपलेखनात् । दंष्ट्रिशृङ्गिकृता बाधा मातुर्जनिकृताः पुनः ॥४५॥
हसन्त्याश्चैव नार्याश्च गुह्यतो गुरुरोगकाः । इत्यादिवेदनास्तस्य शरीरे सम्भवन्ति वै ॥ ४६ ॥
सदैवोद्विग्नचित्तत्वाद्वेदना सौम्य जायते ॥ ४७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्युत्तरनवशताधिकसहस्रतमः ॥ १९०२ ॥

अरुण उवाच ।

क्वचिद्वर्णे समुत्पन्नः कश्चित्पुरुषसत्तमः । संयुतो वायुपित्ताभ्यां गौरवर्णः प्रतापवान् ॥ १ ॥
कृषिकर्म प्रकुर्वाणो धर्मिष्ठो धर्मवत्सलः । धनधान्यसमायुक्तः किञ्चिद्व्यापारवान्भुवि ॥ २ ॥
भार्याद्वयं तु तस्यासीदेका वै मृत्युमागता । अपरा रोगसंयुक्ता किञ्चित्क्लेशस्य कारिणी ॥ ३ ॥
प्रदरार्तिश्च हृच्छूलं निद्रालस्याग्निमन्दताः । हृदये क्रमहल्लासौ श्वयथुः करपादयोः ॥ ४ ॥
इत्येतैर्लक्षणैः स्वामिन्भार्या वै ज्वरपीडिता । तयोर्मिथो महाप्रीतिर्भवेन्नापत्यजं सुखम् ॥ ५ ॥
मृतभार्यः पुमान्सोऽपि यथा च्युतगृहाश्रमः । सर्वकर्मणामाधारभूतः स्यात्स्वगृहाश्रमः ॥ ६ ॥
मृतभार्यस्य तन्नाशे ह्यग्निहोत्रादिहानिकृत् । तस्मात्तु कर्मणा येन भार्या भर्तुर्भवेत्तृणाम् ॥ ७ ॥
अतिदुःखकरी घोरा तस्य कर्माणि मे वद ॥ ८ ॥

श्रीसूर्य उवाच ।

सापत्यस्यानपत्यस्य धनिनो निर्धनस्य वा । यूनो वा स्थविरस्येति यो योगः कर्मणा भवेत्॥९॥
हन्तुश्च परसौख्यानां मृतभार्यस्य लक्षणम् । विशेषेण परांश्चापि कीर्त्यमानाञ्छृणुष्व भोः॥१०॥

यथायथा स लोकानां सौख्यानि विविधानि च । पुण्यकर्मभिराप्नोऽपि विविधैः श्रद्धया कृतैः ११
अपत्यस्त्रीधनयशोविद्याभिः सम्भृतो भवेत् । स्वं जहाराऽसहिष्णुत्वादाभिजात्यादथेर्ष्यया १२॥
शून्यादपवादैश्च नानामिथ्याभिशंसनैः । तथा यूनोऽस्य धनिनः सापत्याश्च स्त्रियो मृताः १३॥
मिथ्यापमृत्युकैर्वीन न सौख्यमिह जायते । तदादिभिर्महादुःखैर्युज्यते योऽन्यसौख्यहृत् ॥१४॥
रुदत्सु शिशुषु प्रायो प्रीतिमान्हृदि जायते । तदादि च महद्दुःखैर्युज्यते सौख्यवन्धुषु ॥ १५ ॥
भार्याकार्येषु च तथा विनश्यत्सु दिनेदिने । दुःखाब्धौ मज्जमानोऽसौ प्रत्यहं मृत्युमिच्छति १६
अहं ममेति सौख्यार्थी मिथ्यावादैः स दुर्मतिः । स्त्रीणां च मृत्युकौलीन्यात्स्वहानिः स्यादितस्ततः
पुनर्भवति तस्य स्त्रीप्राप्तिः कष्टाद्धतव्ययात् । अपत्नेः स्त्रीभवा प्रीतिर्नास्य तस्य प्रजायते ॥१८॥
निर्धनस्य च यूनश्च पञ्चधापत्यदुःखिनः । रोगग्रस्ता चिरं भार्या कष्टान्मरणमिच्छति ॥ १९॥
स चापि सुचिरं काले नानारोगैः प्रपीड्यते । जीवत्यपि तया सार्धं जातिप्रीतिपरो भवेत् २०॥
न गार्हस्थ्यभवं किञ्चित्सुखमाप्नोति दुर्मतिः । कलहश्च स्त्रिया वर्गे निर्निमित्तं क्वचिद्भवेत् ॥२१॥
नातिप्रीतिर्भवेत्तस्य भार्यया ऽथ तया सह । अल्पापत्यानपत्या वा कदपत्याथ सा भवेत् ॥२२ ॥
आधिश्चापत्यचिन्तोत्थो नित्यं तं वै प्रबाधते । लक्षणैरिति निश्चित्य कर्मनिष्कृतिमाचरेत् २३ ॥
फाल्गुने मासि सम्प्राप्ते शुक्लपक्षे चतुर्दशी । तिथौ प्रातः समुत्थाय सुस्नातः शुचिवस्त्रधृक् २४॥
शिवस्यालयमासाद्य दैवज्ञेन समन्वितः । स्नापयेत्तु शिवं सम्यक्पञ्चामृतपुरःसरम् ॥ २५ ॥
अर्चयेच्च ततः पुष्पमाल्यगन्धानुलेपनैः । धूपैर्दीपैश्च नैवेद्यैर्विधिना विधिकोविदः ॥ २६ ॥
चतुरस्रं चतुःपादं कुम्भस्योद्धरणक्षमम् । षट्त्रिंशदङ्गुलोच्छ्रायं लिङ्गस्योपरि धारयेत् ॥ २७ ॥
तस्योपरि न्यसेत्कुम्भं सुगन्धशिशिराम्भसा । पूर्णं मध्ये कृताच्छिद्रं तत्प्रोता वस्त्रवर्तिका ॥२८ ॥
तदग्रे विगलज्जोषं कराग्रं लिङ्गमूर्धनि । विदधद्विधिमेनं तु दैवज्ञादेशतत्परः ॥ २९ ॥
त्रिकालं प्रणमेद्देवं दण्डवन्नियतव्रतः । कुम्भं जलेन ह्यसकृत्सुगन्धशिशिराम्भसा ॥ ३० ॥
पूजयेन्नियतं प्रातःस्नायी विधिमिमं चरेत् । पठेन्मन्त्रं शिवस्याग्रे दैवज्ञेन समीरितः ॥ ३१ ॥

मन्त्रः ।

"यन्मया पूर्वसौख्यानि निघ्नता दुष्टबुद्धिना । जन्तूनामप्यजन्तूनां नानामिथ्योक्तियुक्तिभिः॥३२॥
मृतभार्याख्यमेतन्मे पापं तत्कर्मसंभवम् । अतिदुःसहदुःखाढ्यं यत्पापमितरत्सुखैः ॥ ३३ ॥
ज्वालाभिर्दह्यमानोऽहं स्त्रीवियोगानलस्य वै । सुशीतलाम्भसः सेकैस्तपसा सौख्यकारिभिः ॥
अभिषिञ्चे महादेवं महापापहरो भव " ॥ ३४॥
उच्चरन्निति तं देवं प्रणम्य च मुहुर्मुहुः । गृहमागत्य भुञ्जीत पतितालापवर्जितः ॥ ३५ ॥
एवं स चतुरो मासांस्त्रिकालं विदधद्विभुः । भवेदतः परो यावच्छुचिशुक्लचतुर्दशि ॥ ३६ ॥
तत्र मध्याह्नसमये कृत्वा नित्यविधिक्रमम् । शिवयोः प्रीतये दद्याद्दोयुगं शुभलक्षणम् ॥ ३७ ॥
ब्राह्मणाय सुव्रताय मन्त्रं पूर्वोक्तमुच्चरेत् । शुद्धवर्णसुवर्णस्य माषषोडशसम्मितम् ॥ ३८ ॥
ताम्रपात्रेचितं कृत्वा दैवज्ञाय निवेदयेत् । ततस्तु भोजयेद्विप्राञ्छतार्द्धं शतमेव वा ॥ ३९ ॥
तोषयेच्च द्विजानन्यान्दक्षिणाभिः स्वशक्तितः । विधिमेनमकुर्वाणो मृतभार्यः सुसौख्यहा ॥४०॥
भूयः स मृतभार्योपि न सुखं विन्दति क्वचित् । प्रयोजकानुमन्त्राद्यं प्रतिवेशादिकं च यत् ॥४१॥
प्रश्रयादवगंतव्यं गतेष्यादविचारतः । लक्ष्मैहिकमिदं वाच्यं दैवज्ञेन सुमेधसा ॥ ४२ ॥
विवाहसमये किञ्चित्कलहाद्विभ्रमोऽभवत् । वाग्दानमत्र चान्यत्र विवाहोऽन्येन वै भवेत् ॥ ४३ ॥

तस्यामुदूढमात्रायां विविधा दुःखसन्ततिः । एवं कृतविधिः सम्यग्भुञ्जीत सह बन्धुभिः ॥४४॥
भुंक्ते भोगान्स्वपत्न्या वै लक्षसंख्यान्खगेश्वर ॥ ४५ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्युत्तरनवशताधिकसहस्रतमः ॥ १९०३ ॥

अरुण उवाच ।

कश्चिच्छूद्रकुले जातो गौरवर्णः प्रतापवान् । पुत्रीपुत्रसमाकीर्णः किञ्चिद्वित्तसमन्वितः ॥ १ ॥
प्रिया तस्यापि सौम्या च पतिभक्तिपरायणा । प्रमादी दैववादी च किञ्चिद्व्यापारवान्भुवि ॥२॥
श्वासयुक्तः सभार्यस्तु हेमन्तप्रावृषोस्तथा । भ्रमयुक्तं शरीरं तु शिरोर्तिर्जायते क्वचित् ॥ ३ ॥
केन कर्मविपाकेन सत्यं कथय भास्कर । ममोपरि कृपां कृत्वा प्राणिनां सौख्यहेतवे ॥ ४ ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्यापि चेष्टितम् । पूर्वजन्मनि शूद्रस्तु बहुचिन्ताकुलोऽभवत् ॥ ५ ॥
स राजकुलमान्यश्च बहुव्यापारवांस्तथा । कारागृहे गृहीतस्तु मोहात्कश्चिद्द्विजोत्तमः ॥ ६ ॥
ताडितस्तेन बहुधा यदा च क्रन्दति द्विजः । तदा तस्य द्विजस्यैव श्वासरोधं चकार ह ॥ ७ ॥
घटीद्वित्रिचतुर्भिस्तु द्विजः श्वासं मुमोच वै । दिनैः कतिपयैरेव एवं कर्म चकार ह ॥ ८ ॥
पश्चाद्व्याजेन निर्मुक्तो ब्राह्मणस्तेन वित्तमः । तेन कर्मविपाकेन ह्यसौ श्वासेन पीड्यते ॥ ९ ॥
पुराकृतानि कर्माणि शुभानि ह्यशुभानि च । इह जन्मनि भुज्यंते प्राणा नित्यं विशंकिताः॥१०॥

अरुण उवाच ।

जीवितं कष्टसहितं न तु जीवेन मुच्यते । ममोपरि कृपां कृत्वा येन कष्टाद्विमुच्यते ॥ ११ ॥
विशेषं कथय स्वामिन्प्राणिनां हितकाम्यया । कर्मणस्तस्य लक्ष्माणि विस्तरेण वद प्रभो॥१२॥

श्रीसूर्य उवाच ।

द्विजस्य मर्महृद्भेदान्मदस्तस्याशु रुद्ध्यते । यथा स खिन्नकण्ठोभूत्तथा कण्ठोस्य शुष्यति ॥१३॥
विनिद्रो विमुखो दीनो न शेते शयने नरः । तदवस्थस्तथैवास्य शयने न सुखं भवेत् ॥ १४ ॥
खिद्यते गह्वरे रुद्धस्तापार्तिभृशदुःखितः । ताप्यते तापनैर्दुःखैर्निर्वाऽते सोपि रोदिति ॥ १५ ॥
स च तत्र निरुद्धस्तु ज्वरादिव्याधिसम्भवे । ज्वरादिरपि सोद्वेगं विशेषात्तं समर्दयेत् ॥ १६ ॥
नष्टसंज्ञश्चोर्ध्वमुख ऊर्ध्वमुद्वितरोमकः । भिन्नवाग्दीनवदनो क्षीणशब्दो गतद्युतिः ॥ १७ ॥
रतिं न लभत शुष्कवक्त्रो विकुरुते भृशम् । मुहुर्मोहमुपैत्येवं महायत्नेन शाम्यति ॥ १८ ॥
एवं दैवविनिर्धारं कृत्वा वै प्रयतः पुमान् । आचरेन्निष्कृतिं सोऽथ व्याधीनां क्षयकारिणीम् १९॥
शुभे मासेऽसिते पक्षे सानुकूलग्रहे दिने । आहूय विधिवद्विप्रान्दैवज्ञान्वेदवादिनः ॥ २० ॥
घृतं तेभ्यः प्रदातव्यं सहस्रपलसम्मितम् । वित्तशाठ्यं न कर्तव्यं यथाशक्ति चरेद्विधिम् ॥२१॥
लक्षसंख्यैस्तु संपूज्यो रुद्रो रुद्रगणावृतः । शिवपूजाविधानं च कर्तव्यं शुभमिच्छता ॥ २२ ॥
ब्राह्मणान्भोजयेत्पश्चात्प्राजापत्यचतुष्टयम् । तेभ्योऽपि दक्षिणां दद्यात्सर्वपापविनाशिनीम् ॥२३॥
एका गौरपि दातव्या किञ्चित्स्वर्णसमन्विता । एवं कृते वैनतेय सर्वपापैः प्रमुच्यते ॥ २४ ॥
मद्भिम्बं शुद्धसावण सुवर्णत्रयनिर्मितम् । स्वर्चितं गन्धपुष्पाद्यैस्ताम्रपात्रे स्थितं तथा ॥ २५ ॥
तण्डुलोपरि न्यस्तं च दैवज्ञाय निवेदयेत् ॥ २६ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरुत्तरनवशताधिकसहस्रतमः ॥ १९०४ ॥

श्रीसूर्य उवाच ।

वैनतेय महाभाग शृणु तस्य विचेष्टितम् । वभूव यामुने देशे चाम्बष्ठः पूर्वजन्मनि ॥ १ ॥
राजमान्यः सुखैश्वर्यधनवाहनभोगभाक् । दत्तानि तेन दानानि ब्राह्मणेभ्यो विजानता ॥ २ ॥
विधिवत्कपिलादानं ब्राह्मणाय कुटुम्बिने । कार्तिक्यां स्वर्णदानं तु मथुरायां खगेश्वर ॥ ३ ॥
कालिन्द्यां श्रद्धया युक्तो दीपांश्च घृतवोधितान् । दत्तवान्स्वर्णरत्नानि गोभूम्यश्वादिकानि च॥४॥
पर्वस्वपि च भक्त्या वै विनतानन्दवर्धन । अथो पापं शृशं चक्रे भाविनोऽर्थस्य वै वलात् ॥ ५ ॥
ब्राह्मणी धर्षिता तेन तत्पतिश्चापि घातितः । ब्रह्मस्वं लुण्ठितं भुक्तं कामलोभेन मोहितः ॥ ६ ॥
अन्नसत्राधिकारे तु द्विसहाययुतेन च । वह्वन्नं चोरितं तेन राजकीयं खगेश्वर ॥ ७ ॥
ब्राह्मण्या धारितो गर्भो वहुपापैश्च पातनम् । गर्भस्य विकृतं तेन छेदनैरौषधैरपि ॥ ८ ॥
ततो वहुतिथे काले स गत्वा यमशासनम् । भुक्त्वा पापफलं पापात्पुण्यात्स्वर्गं च शाश्वतम् ॥९॥
पूर्वपुण्यावशेषेण स जातोत्र हिमालये । स रक्तगौरो मतिमान्धनवाहनभोगभाक् ॥ १० ॥
वातपित्तयुतः सौम्यो राजकार्येषु तत्परः । जन्माङ्गात्पञ्चमो भावो धर्मः क्रूरावलोकितः ॥ ११ ॥
पादजातो महाधीरोऽपत्यैश्वर्यसमन्वितः । अमात्यकल्पविभवो वहुग्रामाधिपत्ययुक् ॥ १२ ॥
वहूद्यमयुतो भोगी व्रतानामनुपालकः । नात्युच्चो नातिह्रस्वश्च न स्थूलो न कृशो महान् ॥१३॥
वातपित्तसुखैर्युक्तः किशोरे तत्सुखोज्झितः । यूनैश्वर्यसुखैर्युक्तः सर्वलोकप्रियङ्करः ॥ १४ ॥
धनधान्ययशोयुक्तो वहुग्रामाधिपो महान् । देशेदेशेऽधिकाराढ्यः सन्धिविग्रहसंयुतः ॥ १५ ॥
पुण्यादिदं महापापाल्लोभी पापरतः क्वचित् । चिन्ताक्लेशभयैर्युक्तो धृतिमानपि दुःखभाक् ॥१६॥
अकारणोद्वेगयुतः कालहानिकरः सदा । कर्णामयी वातरोगी पित्तवाती सुखोज्झितः ॥ १७ ॥
सदा शत्रुभयाविष्टः क्षणोद्विग्नः क्षणं सुखी । ब्राह्मणीधर्षणात्पापात्तथा तद्गर्भपातनात् ॥ १८ ॥
पुत्रान्तरसुखं नैव जातुचिल्लभते नरः । विप्रकुम्भस्य चादानात्सजातः कुम्भलग्नके ॥ १९ ॥
भौमयुक्ते शनिक्रान्ते चापे जीवेक्षिते सुते । सितेश्वरे जीवयुक्ते स्थिरांगे चन्द्रवीक्षिते ॥ २० ॥
लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् । पलद्वयमिता कार्या ब्राह्मणी तु हिरण्मयी ॥ २१ ॥
गन्धपुष्पैः समभ्यर्च्य देया वेदविदे खग । सोमस्य प्रतिमा कार्या पलमात्रा हिरण्मयी॥ २२ ॥
लक्ष्मीनारायणस्यापि तथा कार्या विधानतः । सूर्यस्य प्रतिमा कार्या पलद्वयमिता शुभा॥२३॥
षोडशोरूपचारैश्च पूजयित्वा विधानतः । देया प्रयत्नाद्विप्रेभ्यो गायत्रीमयुतं जपेत् ॥ २४ ॥
त्र्यम्बकं तु तथा जप्त्वा तन्मन्त्रांश्च तथा जपेत् । होमयेत्तद्दशांशेन शतं विप्रांश्च भोजयेत्॥२५॥
नाधयो व्याधयस्तस्य नच शत्रुभयं भवेत् । पुत्रपौत्राभिवृद्धिश्च जायते सम्पदोऽनिशम् ॥ २६ ॥
पलत्रयसुवर्णेन शूलं कुर्यात्प्रयत्नतः । शुभवस्त्रेण संवेष्ट्य तिलानामुपरि न्यसेत् ॥ २७ ॥
तिलानां परिमाणं तु द्रोणं चापि तदर्धकम् । तदर्धं वा यथाशक्ति पूजयेद्ब्राह्मणः शुचिः ॥२८॥
शैवं पञ्चाक्षरं मन्त्रमथवा त्र्यम्बकं जपेत् । अयुतं तद्दशांशं तु तिलैर्हवनमाचरेत् ॥ २९ ॥
ततो हुतवते शूलं पूजयित्वा स्वशक्तितः । दद्यात्तु दक्षिणां तान्तु प्राङ्मुखायाप्युदङ्मुखः॥३०॥

मन्त्रः ।

त्वं शूल ब्रह्मणा सृष्टं त्रिपुराणां विनाशनम् । दैत्यानां दानवानाञ्च शंकरस्यायुधं तथा ॥ ३१ ॥
कुक्षिस्थमथ पार्श्वस्थमथ वा पृष्ठसङ्गतम् । श्वासकासकृतान्कष्टान्मोचय त्वं महायुध " ॥३२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चोत्तरनवशताधिकसहस्रतमः ॥ १९०५ ॥

श्रीसूर्य उवाच ।

ब्राह्मणं योषितं धेनुं हुतमाग्निं तपस्विनम् । क्रुद्धो नृशंसो दौरात्म्याद्धन्यात्पादेन यः पुरा ॥ १ ॥
पादौ च मर्दयन्वातव्याधिस्तु चरणे भवेत् । पादस्योर्ध्वं गुल्फपार्श्वाच्छूलैः शोफः प्रसर्पति ॥२॥
समुत्पन्नेऽखिले शोफे पादः कूर्मोदरायते । मृदुलोऽतीव पीडाकृद्गमनेऽर्तिकरो भृशम् ॥ ३ ॥
द्विन्यादिपञ्चपर्वस्रैर्मासैरब्दैर्ज्वरोऽस्थिगः । अन्नारुची रसेनेह पक्वान्नादिषु च स्पृहा ॥ ४ ॥
देहस्याभ्यन्तरे देशे पादे शोफसमुद्भवः । शरा इव प्रसर्पति तत्र तत्राङ्गमोटनम् ॥ ५ ॥
स्कन्धग्रीवादिपुरतो व्रणा अल्पफलोपमाः । लक्ष्मैहिकमिदं तस्य विज्ञेयं कर्मसूचकम् ॥ ६ ॥
पादेन निहते विप्रे फलहानिर्धनक्षयः । योषिति प्राग्यतायान्तु न कौलीनफलात्क्वचित् ॥ ७ ॥
धेनौ तल्लत्तयाऽऽघातो वृषाच्छृङ्गावहेलनम् । हुताग्नावग्नितो बाधा जठरांघ्रिकरादिषु ॥ ८ ॥
तपस्विनि प्रमेहार्तिर्गुह्यपीडा व्रणार्तयः । अपत्यजमहद्दुःखं धान्यवाणिज्यतोऽव्ययः ॥ ९ ॥
एवं ज्ञात्वा निजं दैवं तत्तन्निष्कृतिमाचरेत् । तज्जन्मनि शुभाकारा सुवर्णत्रयनिर्मिता ॥ १० ॥
कृताग्न्युत्तारसंस्काराः स्वर्चिताः सुप्रतिष्ठिताः । विप्राय वेदविदुषे देयाश्च बहुदक्षिणाः ॥ ११ ॥
उमामहेश्वरयुगं धेनुद्वयमनन्तरम् । आमान्नविंशतिं दद्यात्तं च कर्मणि शान्तये ॥ १२ ॥
चतुःसौवर्णिकीं कृत्वा मन्मूर्तिं शुभलक्षणाम् । रथे रौप्ये प्रतिष्ठाप्य चतुःपलविनिर्मिते ॥ १३ ॥
सौवर्णारुणसूत्रेण सहितां दैववेदिने । भूरिद्रविणसंयुक्तां दद्यान्मन्त्रं समुच्चरन् ॥ १४ ॥

मंत्रः ।

"भगवन्देववेदेश कर्मसाक्षिञ्जगत्प्रभो । सौवर्णिस्ते कृता मूर्ती रथसूतसमन्विता ॥ १५ ॥
सदक्षिणा मया दत्ता देवज्ञाय सुमेधसे । दानेनानेन मे शोफः क्षिप्रं नश्यतु पादजः ॥ १६ ॥
विप्रादिमूर्तयः पञ्च सुवर्णत्रयनिर्मिताः । तत्तल्लत्तादिघातोत्थपादशोफस्य शान्तये ॥ १७ ॥
भूदेवा वो मया दत्ता दानाद्रोगः प्रशाम्यतु " ॥ १८ ॥
जन्मप्रजात्यादिकं सर्वं पूर्ववत्समयाद्वदेत् ॥ १९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडुत्तरनवशताधिकसहस्रतमः ॥ १९०६ ॥

श्रीसूर्य उवाच ।

वैनतेय महाभाग शृणु तस्य विचेष्टितम् । बभूव यामुने देशे पूर्वजन्मनि बाहुजः ॥ १ ॥
राजमान्यः सुखैश्वर्यधनवाहनभोगभाक् । दत्तानि तेन दानानि ब्राह्मणेभ्यो विजानता ॥ २ ॥
सुवर्णरत्नमहिषीगोभूम्यश्वादिकानि च । पर्वस्वपि च भक्त्या वै विनतानन्दवर्धन ॥ ३ ॥
अथो पापं भृशं चक्रे भाविनोऽर्थस्य गौरवात् । ब्राह्मणी धर्षिता तेन तत्पतिश्चापि घातितः ॥४॥
ब्रह्मस्वं लुण्ठितं भुक्तं कामलोभेन मोहतः । ब्राह्मण्यां धारितो गर्भो बहूपायैश्च पातनम् ॥ ५ ॥
गर्भस्य च कृतं तेन छेदनैरौषधैरपि । ततो बहुतिथे काले स गत्वा यमशासनम् ॥ ६ ॥
भुक्त्वा पापफलं पापात्पुण्यात्स्वर्गांश्च शाश्वतान् । पूर्वपुण्यावशेषेण स जातोऽत्र हिमालये ॥ ७ ॥
गौरवर्णो धनैश्वर्यसुखवाहनभोगभाक् । जन्माङ्गात्पञ्चमे भावे धर्मे क्रूरावलोकितः ॥ ८ ॥
अमात्यवंशजो धीरो बाल्ये भ्रातृसुखोज्झितः । यून्यैश्वर्यसुखैर्युक्तः सर्वरोगभयंकरः ॥ ९ ॥
धनधान्ययशोयुक्तो बहुग्रामाधिपो महान् । देशेदेशेऽधिकाराढ्यः सर्वविग्रहसंयुतः ॥ १० ॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । वित्तक्लेशमनोयुक्तो धनवानपि दुःखभाक् ॥ ११ ॥
सहोदरसुतैर्भृत्यैः कलत्रैर्मित्रबान्धवैः । अकारणोद्वेगयुतः कलहाविष्कृतः सदा ॥ १२ ॥

कर्णामयी वातरोगी पित्तवाती सुखोज्झितः । सदा शत्रुभयाविष्टः क्षणोद्विग्नः क्षणं सुखी ॥१३॥
ब्राह्मणीधर्षणात्पापात्तथा तद्गर्भपातनात् । पुत्रान्तरसुखं नैव लभते न कदाचन ॥ १४ ॥
लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् । पलत्रयमिता कार्या ब्राह्मणी तु हिरण्मयी ॥ १५ ॥
तदर्धामितिका वापि निजवित्तानुसारतः । गन्धपुष्पैः समभ्यर्च्य देया वेदविदे खग ॥ १६ ॥
सोमस्य प्रतिमा कार्या पलमात्रा हिरण्मयी । लक्ष्मीनारायणस्यापि तथा कार्या विधानतः॥१७॥
सूर्यस्य प्रतिमा कार्या पलद्वयमिता शुभा । षोडशोरूपचारैस्तु पूजयित्वा विधानतः ॥ १८ ॥
देया प्रयत्नाद्विप्रेभ्यो गायत्रीमयुतं जपेत् । त्र्यम्बकं तु तदा जप्त्वा तन्मन्त्रांस्तु तदा जपेत् १९॥
होमयेत्तद्दशांशेन शतं विप्रांश्च भोजयेत् । नाधयो व्याधयस्तस्य न च शत्रुभयं भवेत् ॥ २० ॥
पुत्रपौत्राभिवृद्धिश्च जायन्ते सम्पदोऽनिशम् । शत्रुतो न भयं तस्य नरस्य कृतनिष्कृतेः ॥ २१ ॥
कुसप्ततिमितायुः स्यात्प्रायश्चित्ते कृते खग । चतुर्विधमहारिष्टं पञ्चाशन्मितवत्सरे ॥ २२ ॥
जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् । यद्यदन्तर्गतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ २३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तोत्तरनवशताधिकसहस्रतमः ॥ १९०७ ॥

श्रीसूर्य उवाच ।

यः पुरा मद्गवाभ्यां परद्रोहाभितापवान् । कणरत्नादिना वापि चाहार्यवसनादिभिः ॥ १ ॥
तन्तुकर्मोपभोगार्थं पीडयेद्दुर्धरज्वरः । तस्य पापस्य शान्त्यर्थं निष्कृतिं शृणु सारथे ॥ २ ॥
चिरज्वरामयाशोफतन्द्रालस्यादिवग्रहैः । अन्नारुचिपिपासाद्यैः प्रस्वेदग्लानिभिस्तथा ॥ ३ ॥
अक्ष्युग्रेण दवथुना कम्पनात्तोदतस्तथा । क्वचित्तापः क्वचिच्छीतं पर्वभेदैस्तु सन्धिषु ॥ ४ ॥
न सुखं लभते क्वापि महौषधिशतैरपि । अपाकश्चिरपाको वा दुश्चिकित्स्यो भिषग्वरैः ॥ ५ ॥
हीनसाम्यादिकाद्यैश्च लक्षणानि विभावयेत् । दैवजो विद्यतेः व्याधिर्ज्वरार्तिः परमा तदा ॥ ६ ॥
ज्वरयति च सर्वेषां दुस्थदोषेण पाप्मनाम् । मासात्पक्षादिकं चापि दुर्ज्वरो विषमो भवेत् ॥ ७ ॥
निष्कृतिस्तस्य वक्तव्या यथाश्रुति मयोदिता । सुशुभे भूप्रदेशे तु गोमयाद्युपलिप्तके ॥ ८ ॥
तत्रोपर्याविकं स्थाप्य स्थापयेत्तु तिलाचलम् । तत्रोपरि न्यसेदीशं गौर्या सह विनायकम् ॥ ९ ॥
हेम्ना हेमविधासंख्यायथाव्याधिप्रपञ्चकम् । कृत्वा प्रतिष्ठितप्राणं यजेद्रुद्रं विधानतः ॥ १० ॥
पूजामर्चादिकं कृत्वा तर्पयेच्छतरुद्रियम् । तर्पणस्यावसाने तु वसनं द्रव्यपूर्वकम् ॥ ११ ॥
प्रत्येकं गोयुतं दद्यात्कर्मणामपनुत्तये । जुहुयाद्यज्ञमानेन चरुणा पायसेन च ॥ १२ ॥
होमान्ते भोज्यसंख्या तु रुद्रसंख्यानुसारतः । एकद्वित्रिचतुर्भेदा यथाव्याधिवलेऽणम् ॥ १३ ॥
एवं विधिं समासाद्य मोचयेज्ज्वरदारुणात् । मूर्त्यादिकं च तत्सर्वं दापयेद्ब्राह्मणाय वै ॥ १४ ॥

मंत्रः ।

"यन्मया लोभबुद्ध्या वै हृतं परधनं छलात् । लक्षकोटिल्पबुद्ध्या वा कणरत्नादिनाथ वा॥१५॥
तत्तत्पापार्जिता लोके प्राप्तो वै दुःसहज्वरः । एतदेनोविनाशाय मूर्तिं ते शुभलक्षणाम् ॥ १६ ॥
ददे मोच्या महापापाद्दुःसहाद्विजसत्तम । दानहोमादिना तेन कर्मणा वः प्रसादतः" ॥ १७ ॥
एवमुक्त्वा ततस्तान्स प्रणमेद्वसुधासुरान् । स्तुतिमेनां समभ्यर्च्य विधिवद्विहिताञ्जलिः ॥ १८ ॥
विसर्पविधिना पूर्वं विप्राणां भोजनार्चनम् । वर्जयेद्दम्भमात्सर्यं सर्वेभ्यो हितमाचरेत् ॥ १९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टोत्तरनवशताधिकसहस्रतमः ॥ १९०८ ॥

श्रीसूर्य उवाच।

यः पुरा मदमात्सर्यैः सत्कर्मोपरि घातकृत्। विषमज्वरभेदेन भिद्यते भेद्यदारुणैः ॥ १ ॥
लक्षणं तस्य वक्ष्येऽहं यथाज्वरप्रसूचकम्। अन्नारुचिः पिपासार्तिः पार्श्वांसे करपादयोः ॥ २ ॥
दह्यते कम्पते गात्रं क्वचिच्छोफोदरादिषु। श्वासयन्मूर्धगो भूत्वा तदन्तर्ज्वरतोदकृत् ॥ ३ ॥
कामला पाण्डुहृत्पीडा मुष्कावदरणं वसा। अपाकश्चिरपाको वा दुश्चिकित्स्यो भिषग्वरैः ॥ ४ ॥
न शाम्यति न शाम्यति महौषधिशतैरपि। न सुखं लभते क्वापि न दिवा निशि यत्क्वचित् ॥ ५ ॥

अरुण उवाच।

का तस्य निष्कृतिः स्वामिन्येन पापक्षयो भवेत् ॥ ६ ॥

श्रीसूर्य उवाच।

शुभे त्ववसरे प्राप्ते सानुकूले ग्रहर्क्षके ॥
यत्रास्ते शुभतीर्थं वै सङ्गमोत्तमसत्सरित्। तत्र गत्वा च स्नात्वा च पीत्वा च परमौषधम् ॥ ७ ॥
पडङ्गमाचरेच्छुद्धिं शुद्धः शुद्धाभिसन्धिकः। श्रुतिस्मृतिसदाचारो वाङ्मनःकायशुद्धधीः ॥ ८ ॥
एवमाहूय सद्विप्रान्यजेद्रुद्रविधानतः। पादार्घ्याचमसंवीतो रुद्रं जप्त्वा यथाविधि ॥ ९ ॥
लक्षमेकादशं ज्ञेयं यज्ञे रोगार्तिदुःखहृत्। तद्दशांशेन होतव्यं मधुरत्रयसंयुतैः ॥ १० ॥
भोजयेत्परमं भक्त्या प्रतिरुद्रं शतावधि। तत्रस्थमाचरेदत्र ह्यश्वत्थतिलतर्पणम् ॥ ११ ॥
कलशैः शतसाहस्रै रुद्रसूक्तं परं जपन्। भोज्यान्ते ह्युच्चरेन्मत्रं प्राचीनं यच्छुभाशुभम् ॥ १२ ॥

मन्त्रः।

"यन्मया द्रोहबुद्ध्या वा लोभार्तिभयदेन हि। वञ्चिताः प्रत्यहं लोका मात्सर्यमपि यत्कृतम् १३॥
एनसा तेन हृत्पीडा ज्वरार्तिः परमा मम। याया प्राप्ता तया चाहं मोच्यो हीह स्वकर्मणा" ॥१४॥
एतद्रुद्रविधानेन वाध्यते न नरः क्वचित्। यजेदत्र ज्वरार्तिस्थो सोनिर्दिष्टैस्तु नामभिः ॥ १५ ॥
तर्पणान्ते च निर्दिष्टे सोमो धेन्वेति मन्त्रतः। आशिषं परमं गृह्य ऋत्विजोक्तां शुभां हविः॥१६॥
एतत्कर्मविशुद्ध्यर्थं यतीनां भोजनं हितम्। दानहोमादिना तेन कर्मणा वः प्रसादतः ॥ १७ ॥
एवमुक्त्वा ततस्तान्स प्रणमेद्वसुधासुरान्। एवं स्तुतिं त्रिरुच्चार्य कोऽदादिति विसर्जयेत् ॥ १८ ॥
पूर्ववद्विसृजेत्तान्वै सर्वेषां स्तुतिमाचरेत्। सर्पिष्यात्मानमालोक्य ततः शुद्धो ज्वरार्तिमान् ॥ १९॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो नवोत्तरनवशताधिकसहस्रतमः ॥ १९०९ ॥

अरुण उवाच।

यस्यास्थिसन्धिशीर्षेषु रुग्वै परमदारुणा। कण्ठोष्ठतालुके वक्त्रे शोषस्तन्द्रा तमो भ्रमः ॥ १ ॥
नेत्रे रक्तेऽथ कलुषे आभुग्नेऽस्रवतोऽपि च। कासश्वासौ गले शूकं दाहः शीतं क्षणेक्षणे ॥ २ ॥
वचोविपर्ययः स्याद्वै गोत्रहास्यादि वैकृतम्। कुरुते ह्यनिशं निद्रा व्यत्ययो हृदये व्यथा ॥ ३ ॥
ष्ठीवनं चापि रक्तस्य शिरोलोठं मुहुर्मुहुः। एवमादीनि चिह्नानि जायन्ते यस्य रोगिणः ॥ ४ ॥
उपायैर्भिषजां वापि ज्वरो यस्य न शाम्यति। तस्य कर्मप्रकाशं मे कथयस्व दिवाकर ॥ ५ ॥

श्रीसूर्य उवाच।

क्रूरकर्माऽभवत्सूत स पापः पूर्वजन्मनि। प्राणिनामतुदच्छीर्षे सन्धिपार्श्वेषु तोदनैः ॥ ६ ॥
शीतेनाप्यर्दयञ्शैत्ये तापेनापि तपत्यपि। प्राणानां नोद्यमानानां यथा कण्ठोष्ठशोषणम् ॥ ७ ॥

निःश्वासशून्यता व्यर्थवचो हास्यादि रोदनम् । यद्यद्विरचितं तेषां तत्तदस्यापि दुर्मतम् ॥ ८ ॥
पैशुन्यं विवदन् मिथ्याव्यवहारवचांसि यत् । वचो वैयर्थ्यमस्त्यस्य भ्रममोहादिकं तथा ॥ ९ ॥
अन्नारुचिर्बुभुक्षाणां पिपासानां निरोधनम् । तेनारुचिश्च तृष्णा च बाध्येते ते पुनःपुनः ॥ १० ॥
प्रत्यक्षमपि तस्यैतच्चिह्नमैहिकमिष्यते । स तस्करनृपादिभ्यस्तद्वत्तोदनमाप्नुयात् ॥ ११ ॥
देहस्यावश्यंपोष्यस्य तेषुतेषु महाव्यथा । जायते तृणकाष्ठाश्मविषशस्त्रव्रणाग्निजा ॥ १२ ॥
जन्मजात्यादिकं सर्वं पूर्ववत्प्रश्नयाद्वदेत् ॥ १३ ॥

अरुण उवाच ।

का तस्य निष्कृतिस्तात कर्मणः सततोदिता । यथा स मुच्यते दुष्टात्कर्मणोऽस्मात्सुखी भवेत्१४

श्रीसूर्य उवाच ।

तां सर्वदुर्गतरणीं सर्वपापनिबर्हिणीम् । स जातवेदसं सम्यक्शतमष्टोत्तरायुतम् ॥ १५ ॥
जपेच्च तद्दशांशेन जुहुयाज्जातवेदसम् । सहस्रकलशैर्देवं स्नापयेद्भोजयेद्द्विजान् ॥ १६ ॥
वित्तव्याधिबलं वीक्ष्य कुर्यात्कल्पोक्तराधराम् ॥ १७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो दशोत्तरनवशताधिकसहस्रतमः ॥ १९१० ॥

अरुण उवाच ।

ज्वरिणो यस्य तावन्त्यः प्रागुक्ताः सन्ति वेदनाः । ज्वरेणातिप्रतप्ताङ्गो रतिं न लभते क्षणम् ॥१॥
दिवा वा यदि वा रात्रौ प्रत्यहं हीयते बलात् । तापतृष्णादितोऽत्यन्तमौषधैर्न च तच्छमः ॥२॥
ज्वरिणो यस्य लक्ष्मैतत्तस्य किं कर्म कीर्तय ॥ ३ ॥

श्रीसूर्य उवाच ।

आततायी स पूर्वेऽभूज्जन्मन्यसहनः परान् । सदामर्षतयान्यस्य ददाह सदनं पुरा ॥ ४ ॥
तेनैव स नरः शर्म न च किञ्चित्प्रविन्दति । ऐहिकं लक्ष्म तस्यापि गृहदाहादिकं भवेत् ॥ ५ ॥
यवव्रीहितिलक्षौद्रपयस्तैलघृतादिनाम् । दहनान्तकवस्तूनां तेषां हानिमवाप्नुयात् ॥ ६ ॥
निष्कृतिं शृणु तस्यापि कर्मणः क्षतिकारिणीम् । तैलक्षौद्रपयः सर्पिः पूर्णकुम्भाद्रुडेन च ॥ ७॥
जुहुयाच्च यथाशक्ति वह्नौ विप्रांश्च भोजयेत् । धान्यान्यपि च माषादीन्यस्मिन्दद्याद्द्विजन्मने ॥८॥
सितवस्त्रयुगं दद्यात्सितपुष्पैस्तथार्चयेत् । अथवा स्वर्णजां मूर्तिं विष्णोः कृत्वा विधानतः ॥९॥
शङ्खचक्रगदापद्महस्तां वै शुभलक्षणाम् । पलेन वा तदर्धेन निर्मितां गरुडाग्रज ॥ १० ॥
कृतप्राणप्रतिष्ठां च पूजितां विविधार्हणैः ॥ १० ॥
वस्त्रयुग्मेन संछन्नां ताम्रपात्रोपरिस्थिताम् । दद्याद्दक्षिणया युक्तां दक्षिणां स्वर्णसंयुताम् ॥ ११ ॥
उदङ्मुखोपविष्टाय प्राङ्मुखः प्रयतः शुचिः ॥ १२ ॥

मन्त्रः ।

"देवदेव जगन्नाथ शंखचक्रगदाधर । तव मूर्तिप्रदानेन ज्वरं नाशय मे विभो" ॥ १३ ॥
एवं दत्त्वा विसृज्याथ मुच्यते महतो ज्वरात् । ब्राह्मणान्भोजयेच्चापि वित्तव्याधिबलेच्छया ॥१४॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकादशोत्तरनवशताधिकसहस्रतमः ॥ १९११ ॥

अरुण उवाच ।

यस्तु ज्वरभराक्रान्तो बहिरन्तश्च शीतभाक् । सङ्कोचयतिगात्राणि वेपते च मुहुर्मुहुः ॥ १ ॥
चेतना दह्यते चाम्भो न रतिं कुरुते मनाक् । यत्कर्मतो ज्वरस्तस्य सत्यं वद दिवाकर ॥ २ ॥

श्रीसूर्य उवाच ।

पूर्वं स पितृदेवानामर्चने सति वै धने । अकरोत्स च संकोचं वित्तव्ययभयार्दितः ॥ ३ ॥
सुगन्धिजलसम्पूर्णैः सहस्रकलशैर्विभुम् । स्थाप्य सम्पूजयेद्विष्णुं कमलैस्तुलसीदलैः ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वादशोत्तरनवशताधिकसहस्रतमः ॥ १९१२ ॥

अरुण उवाच ।

दिनमेकमतिक्रम्य ज्वरोऽन्यदिवसे पुनः । प्रत्येकं वा चतुर्थेऽह्नि पक्षे मासेऽपि वा पुनः ॥ १ ॥
अहनी द्वे अतिक्रम्य द्वेऽहनि प्रतिबाध्यते । दिनमेकमथो हित्वा परेऽहनि च बाध्यते ॥ २ ॥
लक्षणं रोगिणोऽप्येवं शीर्षसन्ध्यस्थिवेदना । पिपासाग्लानिरङ्गानां शीतमन्तर्महोल्बणम् ॥ ३ ॥
संकोच्य सर्वगात्राणि दन्तवाणी पिधाय वै । अतिभारभराक्रान्तो रतिं न प्रतिपद्यते ॥ ४ ॥
माकरीं कुरुते चेष्टामल्पे पयसि दुःस्थिताम् । पुनः शान्तिं प्रपद्येत विना पथ्यैर्विनौषधैः ॥ ५ ॥
प्राप्ते काले पुनर्दत्ते स्वरूपमतिभीषणम् । अनुवेलं समाक्रामत्यनुवेलं निवर्तते ॥ ६ ॥
वेलेव च समुद्रस्य पुनरायाति याति च । यद्दिने कर्मगाः सर्वे तद्दिने दोषसम्भवः ॥ ७ ॥
तत्तदेवाह्निकं तेषां कर्मदोषपरिक्षयः । दुःखभोगाद्यदि स्याद्वा वक्तव्यः पुनरुद्भवः ॥ ८ ॥

श्रीसूर्य उवाच ।

य एतेऽत्र समाख्याता ज्वराः परमदारुणाः । विषमज्वरसंज्ञास्ते प्राणिनां भयदायकाः ॥ ९ ॥
तेन प्रोक्तजनाः कृत्स्ना न च तद्दोषसम्भवः । तेषामिह समुत्पत्तिरैहिकैरेव कर्मभिः ॥ १० ॥
येषां सुतो न च भ्राता गोत्रिणो दुःखदा नराः । येषां विनापि सत्कर्म भवेन्नियममोचनम् ११
चिरकालात्प्रमुच्यन्ते निरयान्ते शिवाज्ञया । भूतप्रेतपिशाचत्वं गताः स्युस्ते व्रजा ग्रहाः ॥ १२॥
तेषामधिपतिः शम्भुर्भूतनाथः स्वयं प्रभुः । शिवालये जले तीर्थे पुण्यवृक्षे चतुष्पथे ॥ १३ ॥
अश्वत्थे च नदीतीरे न्यग्रोधे पितृकानने । सुरालयेषु सर्वेषु येषां वासः शिवोदितः ॥ १४ ॥
भूताष्टम्योर्नवम्यां च चतुर्थ्यां निशि सन्ध्ययोः । मध्याह्ने च निशीथे च ह्यकाले सर्वपर्वसु॥ १५॥
स्थानेषु चैव मुख्येषु प्रसर्पन्तीह ये नराः । असङ्गता अशुचयो भीरवो विगतायुधाः ॥ १६ ॥
अस्मरन्तो हरिं रुद्रं दुर्गां दुर्गौघतारिणीम् । विसृजन्ति मलं मूत्रं नृत्यन्ति च हसन्ति च १७॥
रमन्ते तांश्च भञ्जन्ति ष्ठीवन्ति च रुदन्ति च । तेभ्यस्तत्र मृतास्ते च प्रकुप्यन्ति शिवाज्ञया १८
ते क्रुद्धास्तान्प्रगृह्णन्ति विशंसंति च तांस्तदा । ज्वररूपं समास्थाय पीडयन्ति महाग्रहाः ॥१९॥
तेषामोजो बलं वीर्यं सत्त्वमादाय सर्वशः । विनमन्ति यदा तेभ्यस्तदा तेस्युर्गतज्वराः ॥ २० ॥
पुनः काले प्रवर्तते पुनश्च विरमन्ति च । एवं ते कथितास्तात दारुणा विषमज्वराः ॥ २१ ॥
तेषामप्रार्थनोत्थत्वान्न पुनश्च्युतिरीरिता । अदोषसम्भवत्वाच्च सिद्धयो न भिषक्क्रियाः ॥२२ ॥
ऐहिकैरेव तैरेतैः कर्मभिस्तत्समुद्भवः ॥ २३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोदशोत्तरनवशताधिकसहस्रतमः ॥ १९१३ ॥

अरुण उवाच ।

प्रायश्चित्तेन भिषजामुपयोगेन तच्छमः । कथं तेषां भवेत्तात शान्तिर्दुःखौघनाशिनी ॥ १ ॥

श्रीसूर्य उवाच ।

तेषां च शान्तये सम्यग्भूतनाथान्प्रपूजयेत् । तेभ्योऽपि विविधा देया बलयो मद्यमांसलाः ॥ २ ॥
यजुर्वेदं जपेत्सूक्तं शतरुद्रीयमीश्वरः । प्रपूर्णैर्गन्धतोयानां सहस्रकलशैः शिवम् ॥ ३ ॥
सम्पूजयेत्तश्च लक्षपुष्पैः सुमनसं प्रभुम् । गुग्गुलं सर्षपैराज्यं जुहुयाच्च तिलान्हविः ॥ ४ ॥
रविवारे ज्वरस्यैव दिने च भूतशासितुः । होमान्ते स ज्वरी गत्वा ह्यश्वत्थं देवरूपिणम् ॥ ५ ॥
शुचिः शुक्लाम्बरधरः प्रदक्षिणक्रमात्क्रमेत् । अष्टाधिकशतं कृत्वा कुर्यात्तत्रापि तर्पणम् ॥ ६ ॥
तावन्तश्च परीरंभाः कार्या विष्णुधिया दृढम् । सुगन्धिसलिलं सम्यक्सर्वौषधिसमन्वितम् ॥ ७ ॥
तन्मूले च प्रदातव्यमेकविंशतिकुम्भकैः । होमं त्र्यम्बकमन्त्रेण तर्पणाद्यं पुराणजैः ॥ ८ ॥
मन्त्रैरेभिः प्रकुर्वीत श्रद्धाभक्तिसमन्वितः । ॐनमो बोधिरूपाय विष्णुरूपाय ते नमः ॥ ९ ॥
ज्वरं हर महाभाग तृतीयं मम बाधकम् । महाज्वर महाभाग महाबलपराक्रम ॥ १० ॥
त्यज्यतां भूतभव्येश पिप्पलेऽस्मिंस्थिरो भव । तन्मूलेऽप्यसितं कुम्भं सुगन्धाम्भःप्रपूरितम्॥ ११॥
रक्तस्रग्धूपवसनधूपैर्विधिवदर्चितम् । रक्तपुष्पैः कदम्बेन समं भूतशरावकम् ॥ १२ ॥
दद्यादनेन मन्त्रेण ज्वरी श्रद्धासमन्वितः ॥ १३ ॥

मंत्रः ।

"प्रतिगृह्ण बलिं चैव तृतीयकमहाज्वर । आतुरस्य सुखं सिद्धिं प्रयच्छस्व महाबल" ॥ १४ ॥
ततो विप्रांश्च सन्तर्प्य विधिवद्भूरिभोजनैः । कापालिकांश्च भिक्षूंश्च दीनान्धकृपणानपि ॥ १५ ॥
कृतमन्नं च तैलेन स्थापयेत्करवीरके । सम्पूज्य विविधैस्तोत्रैः स्तुत्वा गृहमथो व्रजेत ॥ १६ ॥
ध्यायन्कपिपतिं शम्भुं न पृष्ठमवलोकयेत् । अथवा बलिमुत्तीर्य कृसरौदनपूर्वकम् ॥ १७ ॥
माषान्नमद्यतैलादिप्लुतं सकरवीरकम् । दीपमालाकुलं रात्रौ दद्यात्तेभ्यश्च तुष्टये ॥ १८ ॥
अथवा यद्यदिच्छेच्च भोजनं ज्वरितो नरः । पुष्पचन्दनताम्बूलं तत्तदस्मै प्रदापयेत् ॥ १९ ॥
दत्त्वा सतण्डुलं कांस्यपात्रं ससलिलं घटम् । कृसरापायसापूपमत्स्यमांससुरासवैः ॥ २० ॥
वैणवे सह हेम्ना तान्पात्रे न्यस्य घटोपरि । घटं दीपावलीयुक्तं मूर्ध्नि कृत्वा महाज्वरी ॥ २१ ॥
श्मशानं प्रापयेदन्यैस्ततः स लभते सुखम् । ज्वरात्प्रलापकाख्यातः शीतार्तेश्च महाज्वरात्॥२२॥
मुच्यते बलिदानेन विधिना विहितेन तु । शीतोष्णाधिकयोगाच्च बलिं विष्णुशिवालये ॥२३ ॥
ग्रहजेषु ज्वरेष्वेवं रुद्रपूजा विशिष्यते । जपेद्रौद्रं यथाशक्ति जपं ज्वरविनाशनम् ॥ २४ ॥
तदशांशेन जुहुयात्तिलगुग्गुलुसर्षपान् । दातव्यं कनकं लोहं भोक्तव्याः साधवो द्विजाः ॥ २५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्दशोत्तरनवशताधिकसहस्रतमः ॥ १९१४ ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम् । बभूव यामुने देशे प्राग्भवे पादजः प्रभुः ॥ १ ॥
धर्मकर्मसमायुक्तो देवद्विजपरायणः । दत्तानि तेन दानानि पर्वस्वपि च भक्तितः ॥ २ ॥
सत्पात्रेभ्यः सुवर्णं च गोभूवस्त्रान्नकानि च । अथो पापं भृशं चक्रे भाविनोऽर्थस्य वै बलात्॥३॥
वाणिज्यादिप्रसङ्गेन कृतवान्वैश्यमारणम् । विनापराधं दर्पेण विनतानन्दवर्धन ॥ ४ ॥

ततो बहुतिथे काले प्राप्तस्तु यमशासनम् । पूर्वं पुण्यफलं भुक्त्वा पश्चात्पापफलं तथा ॥ ५ ॥
पूर्वपुण्यप्रभावेण स जातो बाहुजोऽधुना । गङ्गायाः पूर्वभागे च पुण्यदेशे हिमालये ॥ ६ ॥
नात्युच्चो नातिह्रस्वश्च गौरवर्णः प्रतापवान् । राज्ञां वंशे समुत्पन्नः सर्वलोकप्रियङ्करः ॥ ७ ॥
सर्वैश्वर्ययुतो धीरो धनवाहनभोगभाक् । प्राग्भवे यूनिभावे च सत्कर्मकृतवान्स्वयम् ॥ ८ ॥
तथैव यूनि भावे च सोऽपि राजा भविष्यति । महोग्रदण्डनपरस्तथा भैरवशासनः ॥ ९ ॥
विद्यावांश्चतुरः शूरोऽखिलशत्रुनिबर्हणः । ब्रह्मण्यो धर्मवित्प्राज्ञो नीतिशास्त्रविशारदः ॥ १० ॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । प्राग्भवे वैश्यहननाल्लग्नात्षष्ठस्थितो बुधः ॥ ११ ॥
तुलया कृतवान्घातं तुलास्थो ज्ञोयुतस्तथा । लग्ने शशी तथा पुत्रे रविः पापनिरीक्षितः ॥ १२ ॥
अल्पपुत्रः सुखी रोगी पित्तवातामयी सदा । उदरे वातपीडायुग्घठी मानी च चञ्चलः ॥ १३ ॥
चतुर्विंशन्मिताब्दान्तं जातपुत्रविनाशकः । गुप्तचेष्टो महाक्रूरस्तथा विश्वासघातकः ॥ १४ ॥
लक्षणैरेभिराढ्यस्य प्रायश्चित्तमथो शृणु । पलैः पञ्चमितैः कार्यो वैश्यः स्वर्णमयः शुभः ॥१५॥
षोडशोरूपचारैस्तु पूजयित्वा विधानतः । विधिज्ञाय प्रदातव्यो ब्राह्मणाय कुटुम्बिने ॥ १६ ॥
लक्ष्मीनारायणो देवस्तथा पशुपती रविः । पलैस्त्रिस्त्रिमिताः कार्या देयाः प्राग्वद्विधानतः ॥१७॥
तल्लिङ्गमन्त्रान्गायत्रीं द्विविधं त्र्यम्बकं जपेत् । तिलैस्त्रिमधुरोपेतैर्ब्राह्मणानपि भोजयेत् ॥ १८ ॥
मद्दिने तु व्रतं कुर्यान्मद्भक्तो मत्परायणः । एवं कृतविधेः सूत पूर्वजन्माघनाशनम् ॥ १९ ॥
नाधयो व्याधयस्तस्य न च शत्रुभयं भवत् । न पुत्रमरणं किञ्चिन्नचारिष्टभयं क्वचित् ॥ २० ॥
नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् । रिष्टं वसुमितेऽब्दे तु स प्राप्नोति यमोपमम् ॥२१॥
अथवा द्वादशाब्दे तु षोडशे वा विनश्यति । प्रायश्चित्ते कृते ह्यायुः खभूतामितसवत्सरान् ॥२२॥
जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् । यद्यदन्तर्गतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ २३ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचदशोत्तरनवशताधिकसहस्रतमः ॥ १९१५ ॥

श्रीसूर्य उवाच ।

बभूव प्राग्भवे सूत कश्चिद्वैश्यसुतः कृती । करहाटाभिधे देशे धर्मकर्मात्मकः सदा ॥ १ ॥
वाणिज्यनिपुणो दक्षो किञ्चिद्वित्तसमन्वितः । कृतवानन्नदानं हि विप्रेभ्यः पूर्णपीठके ॥ २ ॥
अथो पापं भृशं चक्रे भाविनोऽर्थस्य वै बलात् । दर्पेण वचनैर्दुष्टैः सद्वृत्तानप्यतापयत् ॥ ३ ॥
परमर्माणि वा सम्यक्पीड्यंते स्वजना अपि । वचोभिः परमर्माणां भेदकोऽभूत्खगाधिप ॥ ४ ॥
जनानां नाशनं तेन कृतवान्कृतिनां सताम् । ततो बहुतिथे काले प्राप्तवान्यमशासनम् ॥ ५ ॥
पापात्पापफलं भुक्त्वा पुण्यात्स्वर्गांश्च शाश्वतान् । पूर्वपुण्यप्रभावेण स जातः पादजोऽधुना ॥ ६॥
हिमालये पुण्यदेशे गङ्गायाः पूर्वभागतः । स तु मन्त्रविदां श्रेष्ठो जीवे कर्के च संस्थिते ॥ ७ ॥
लग्ने कर्कगते मंदे नात्युच्चो न लघुर्घृणी । सुरूपो मतिमान्दक्षो धनवाहनभोगभाक् ॥ ८ ॥
नैकस्त्रीसंयुतः कामी कृषिवाणिज्यतत्परः । पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् ॥ ९ ॥
अस्थिभेदार्तिदेनैव ज्वरेण महताकुलः । तस्य यत्करणैरन्यैर्महौषधशतैरपि ॥ १० ॥
न शाम्यति महाव्याधिर्निष्कृतेः कारणं विना । लिङ्गं स्रवति तत्रादौ दह्यते कंपते बलात् ॥११॥
तदस्थिपूर्वभेदोयं मुष्कमेहनशूलयुक् । अन्तस्तु कूजितं वाताद्वेपथुः श्वासदोषतः ॥ १२ ॥
क्लिन्नाक्षिनखत्वङ्मूत्रस्वेदा गात्रं च दह्यते । एतत्पूर्वार्जितादोषाद्दुःश्चिकित्स्यो भिषग्वरैः ॥ १३ ॥
तेषां कल्पादिना भेदैर्बाध्यते जन्मजन्मनि ॥ १४ ॥

अरुण उवाच ।

का तस्य निष्कृतिः स्वामिन्येनार्तिज्वरनाशनम् । वद विस्तरतः स्वामिन्रोगिणां हितकाम्यया१५

श्रीसूर्य उवाच ।

सुदिष्टे समनुप्राप्ते शुभे सौम्यायने तथा । प्रारभेदानसद्वृत्तिमन्तःशुद्धिकृतात्मना ॥ १६ ॥
हैम्नं शक्त्यनुकूलं तु मकरं श्रद्धया युतम् । सा वालालंकृताऽऽभीरी दुकूलैः परिवेष्टयेत् ॥ १७ ॥
कांस्यपात्रोपरि क्षिप्य घृतं पूर्णशतं पलम् । रत्नलांगूलनेत्रं च यथाश्रुत्युदितौषधि ॥
दापयेत्परया भक्त्या ब्राह्मणाय कुटुम्बिने ॥ १८ ॥

मंत्रः ।

" यन्मया वचसा तुल्यं पीडिता बहवो जनाः ॥ १९ ॥
छिद्रैश्च शतसाहस्रैर्नानाकर्मप्रकाशनैः । तदर्जनेन सम्प्राप्तं दारुणं पातकं महत् ॥ २० ॥
ज्वरो ह्युग्रोतिसारात्मा चापदस्तु ततो मया । एतत्पापविशुद्ध्यर्थं दानं सम्प्रददे त्विदम् ॥ २१ ॥
तत्तदेनोविनाशाय मकरं पलसम्मितम् । तत्तदेनोविनाशाय मत्स्यरूपं ददाम्यहम्" ॥ २२ ॥
तस्मान्मोच्यो महापापाद्दुःसहाद्द्विजसत्तम । होमयेच्चरुणा रुद्रं घृताक्तमधुना स्रुतैः ॥ २३ ॥
होमान्ते विप्रभोज्यान्ते सर्पिष्याननकं स्पृशेत् । वर्जयेदहितासाध्यं सर्वेभ्यो हितमाचरेत् ॥२४॥
रथं सोपस्करं दद्याद्यथाविधि पुराणतः । सर्पी रत्नानि पात्रीयं देयं निर्जलके स्थले ॥ २५ ॥
एवं कृतविधेः सूत पूर्वजन्मार्जनाशनम् । ज्वराद्विमुक्तो जायेत प्रायश्चित्तेऽकृते त्विह ॥ २६ ॥
ज्वरेणैव विनाशः स्याद्यूनि भावे खगाधिप ॥ २७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षोडशोत्तरनवशताधिकसहस्रतमः ॥ १९१६ ॥

अरुण उवाच ।

ब्रह्मक्षत्रियविट्शूद्राः कथं वर्णान्तरं खग । प्राप्नुवन्ति दिवानाथ कर्मणा केन तद्वद ॥ १ ॥
अग्निष्टोमरतो नित्यं सदाचारो जितेन्द्रियः । बाल्ये च वार्द्धके विप्रो यौवने सर्वधर्मवित् ॥ २ ॥
अकस्मान्म्लेच्छतां याति तन्मे वद दिवाकर ॥ ३ ॥

श्रीसूय उवाच ।

पुरा जनुषि यैः सूत यज्ञकर्मणि पावने । आमिषास्वादने सोमपाने निंदा कृता भवेत् ॥ ४ ॥
धिगुच्छिष्टं द्विजातीनां यत्सोमं यज्ञकर्मणि । तस्मात्कर्मवशादत्र म्लेच्छत्वं प्राप्यते नरैः ॥ ५ ॥

अरुण उवाच ।

कस्मिन्देशे कृतं कर्म कस्यां भूमौ कृतं कुतः । प्रयोजकानुमन्ता च वयोलक्ष्मादिभिः कृतः॥६॥
विस्तरेण पृथक्त्वेन कथयस्व दिवाकर ॥ ७ ॥

श्रीसूर्य उवाच ।

दाक्षिणात्ये जनपदे तीर्थे चापि महत्तमे । कावेर्याः पश्चिमे तीरे ह्यग्निष्टोमे द्विजोत्तम ॥ ८ ॥
सोमीयस्य कृता निन्दा तेनाप्तं जन्म निन्दितम् । म्लेच्छत्वं च द्वितीयेऽपि तृतीयेऽथ चतुर्थके९॥
त्रिषु कुष्ठाश्रयत्वं च पञ्चमे भाववद्विजः । षष्ठे नतः सप्तमके महानद्यास्तु दक्षिणं ॥ १० ॥
वेदाग्निसम्मितेऽब्देति म्लेच्छत्वं स्याच्च सारथे । ऋत्विजोऽप्युरगाः सर्वेऽभ्यवधानपरायणाः॥११॥
लक्षणानि खगश्रेष्ठ शृणु तस्य विभागतः । मस्तके वामपादेऽस्यादधः पादे व्रणो भवेत् ॥ १२ ॥

भार्याश्चतस्रस्तासां स्यादेका चाग्निपराङ्मुखा । पूर्वं पुत्रस्तथा पुत्री पुनरेव यतस्ततः ॥ १३ ॥
वर्णान्तरं भवेत्काले प्रहारा मृत्युदायकाः। भवन्ति बुद्धिरुत्पत्तिर्जायतेऽदः कथं कृतम् ॥ १४ ॥
शिरसो गौरवं ग्लानिः किञ्चिन्नयनवैकृतिः। प्राग्भवे युवतिस्तस्य ग्रामीणान्या यशस्विनी ॥१५॥
भ्रातरः स्युस्त्रयस्तेषु मृतसन्तानपीडिताः। भयदुःखसमाक्रान्तास्तस्य भार्या सहायिनी ॥ १६ ॥
विषशस्त्राग्निघातः स्यादालस्यं चाऽग्निमांद्यता। जलघातो भवेत्तस्य पितुर्भ्रातृत्रयं वदेत् ॥ १७ ॥
गेहेतिमहती हानिः स्वर्णभूषणजा खग। तिस्रो भगिन्यः सततं भागिनेयो रुजार्दितः ॥ १८ ॥
गृध्रश्च कफजो व्याधिर्विश्वासो नैव जायते। दंष्ट्रिशृङ्गिविषाणिभ्यो व्रणः स्याद्विग्रहे खग ॥ १९ ॥
स्तनोपदेशे मशको लाञ्छनं साक्षिकेऽथ वा। ऋतौ षट्पञ्चदिवसे न्यूनेऽस्रक्स्रुतिरद्भुता ॥ २० ॥
दिनेषु तेषु चालस्यमदमेहभ्रमादयः। पादयोर्गतिरंगुल्या व्रजन्त्या नावनिं स्पृशेत् ॥ २१ ॥
भवन्ति मारुतास्तस्य चत्वारोऽत्र सहायिनः। पितृतीर्थे भवेन्मृत्युस्तस्य मीनगते रवौ ॥ २२ ॥
पुनर्जगति जातो वै जन्म तस्य च लक्ष्मवत्। दण्डांकुशौ महच्चक्रं चापादि च भवेत्करे ॥२३॥
स्त्रियौ वा तावदेकापि भगिन्यौ द्वे खगोत्तम। सुरगुरुर्ज्ञात्तृतीयो तस्य जन्मनि वै भवेत् ॥ २४॥
व्याधियुक्तो भवेन्नित्यं तस्मात्पञ्चमके विधौ। इत्येवमादिभिर्ज्ञेयं लक्ष्मभिः कर्म सारथे ॥ २५॥
स तत्पापविशुद्ध्यर्थं प्रायश्चित्तं समाचरेत्। शुभे मासे सिते पक्षे सानुकूलग्रहे दिने ॥ २६ ॥
नद्यास्तीरे शुभे देशे वेदिकां कारयेत्खग। कलशं विन्यसेत्तत्र भूरसीत्यादिभिस्ततः ॥ २७ ॥
तत्र रुक्ममयं पद्मं नवमापमितं शुभम्। पलद्वयेन वार्द्धेन तदर्धेनाथवा पुनः ॥ २८ ॥
स्वर्णेनापि विशुद्धेन कारयेन्मूर्तिमुत्तमाम्। पूजयेत्परया भक्त्या नानापुष्पैः सुशोभितैः ॥ २९ ॥
तदग्रे हवनं कार्यं तिलैरष्टोत्तरं शतम्। ब्राह्मणं सर्वतत्त्वज्ञं सर्वशास्त्रविशारदम् ॥ ३० ॥
समाहूय गृहे पुष्पैर्नानावर्णविचित्रकैः। शालतालतमालैश्च जातीवकुलपाटलैः ॥ ३१ ॥
पूजयेत्पापहं विष्णुं बालगोपालसंज्ञकम्। साङ्गमन्त्रमिमं प्रोच्य दद्याद्वेदविदे खग ॥ ३२ ॥

मन्त्रः।

" यन्मया पूर्वजनुषि यज्ञकर्मणि चाद्भुतम्। सोमनिन्दात्मकं कर्म कृतं तेनेह जन्मनि ॥
वर्णान्तरं गतः पापात्पुनातु जगदीश्वरः " ॥ ३३ ॥

मन्त्रमेतं समुच्चार्य प्रतिमां हरिरूपिणीम्। तां मूर्तिं च करे गृह्य दैवज्ञाय निवेदयेत् ॥ ३४ ॥
नानापुष्पैः सुगन्धैश्च पूजयेच्छशिशेखरम्। रुद्रमेकादशं कुर्याद्भोजयेच्च शतं द्विजान् ॥ ३५ ॥
सर्पिःपूर्णे शुल्वपात्रे वीक्ष्य दद्याद्विजन्मने ॥ ३६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तदशोत्तरनवशताधिकसहस्रतमः ॥ १९१७ ॥

श्रीसूर्य उवाच।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम्। विन्ध्याद्रिदक्षिणे भागे चन्द्रदेशे खगोत्तम ॥ १ ॥
कश्चिद्वैश्यः शुभाचारो राजमान्यः प्रतापवान्। क्रयविक्रयकर्ता च बहुद्रव्यसमन्वितः ॥ २ ॥
वित्तेन च समायुक्तो ज्ञातिव्यापारवान्भुवि। बहु पुत्र्योऽस्य जाताश्च द्वौ पुत्रौ च खगेश्वर ॥ ३ ॥
तस्य भार्या शुभाचारा पतिभक्तिपरायणा। गौरवर्णा च सुश्रोणी व्रतानामनुकांक्षिणी ॥ ४ ॥
तस्य गृहसमीपे तु ब्राह्मणी चावसत्पुरा। धनहीना पुत्रयुक्ता बहुद्रव्यैश्च संयुता ॥ ५ ॥
तेन वैश्येन विश्वास्य हृतं तस्यास्तु तद्धनम्। साहाय्यात्प्रतिवेशिन्या ब्राह्मण्याः पतगेश्वर ॥ ६ ॥
बहुकालं समासाद्य लंघनायोद्यताभवत्। कृतं तया महत्कष्टं नार्पितं तेन तद्धनम् ॥ ७ ॥

सा विषं भक्षयित्वा तु चात्मघातं चकार वै । तस्यास्तु पुत्राश्च चिरं बहुदुःखेन पीडिताः ॥ ८ ॥
वर्षैः कतिपयैरेव सर्वे पञ्चत्वमागताः । वैश्यस्तु निरयं प्राप्तो विद्युत्पातहतश्चिरात् ॥ ९ ॥
यातना बहुधा भुक्त्वा पश्चान्मानुष्यमाप्नुयात् । दाक्षिणात्ये जनपदे गोदावर्यास्तटे शुभे ॥ १० ॥
पुण्ये गोदावरीयाम्ये रवियोजनसम्मिते । इदं च पञ्चमं जन्म ब्रह्मवंशसमुद्भवम् ॥ ११ ॥
मध्यजन्मत्रयं यच्च तिर्यग्योनिभवं च तत् । निरयान्ते च तद्भुक्तं पुत्रपापमशेषतः ॥ १२ ॥
पूर्वपुण्यावशेषेण मानुष्ये ब्रह्मवंशजः । स मध्यरूपो मतिमान्कृशाङ्गः श्यामलच्छविः ॥ १३ ॥
विद्यावान्धर्मनिरतो धीरो मन्त्री महायशाः । धनवाहनभोगाढ्यो राजमान्यः प्रतापवान् ॥ १४ ॥
प्राग्भवे कपिलादानं प्रददौ सूर्यपूजनात् । तद्व्रताचरणात्पुण्यादन्नदानात्खगोत्तम ॥ १५ ॥
बहुविद्याधनैश्वर्यदासीदासजनान्वितः । देवब्राह्मणभक्तश्च विद्याभ्यासरतः सुखी ॥ १६ ॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । कैशोरे क्लेशभाक्चैव मनोदुःख्यतिरोगभाक् ॥ १७ ॥
चपलो दुष्टचित्तश्च तथाप्राप्तमनोरथः । ब्रह्मस्वहरणात्पापाद्ब्राह्मणीमरणादपि ॥ १८ ॥
खवेदमितवर्षान्तं जातपुत्रविनाशकः । जन्मलग्नात्सुते द्यूने क्रूरग्रहविलोकिते ॥ १९ ॥
ततः पञ्चमभावे च कीटस्थे च बृहस्पतौ । वृषे शनैश्चरात्सप्तमस्थानस्थे त्वगौ विधौ ॥ २० ॥
तुलास्थे प्रथमे लग्ने जातोऽयं ब्राह्मणोऽधुना । ब्राह्मण्याः पुत्रपुत्र्यश्च ब्राह्मणीमरणात्सुत ॥ २१ ॥
इतस्ततो विनाशं वै गताश्च विनतात्मज । पितृमातृकलत्राद्यैर्विमुक्तो वै किशोरके ॥ २२ ॥
युवभावेऽन्यदेशेयं युवस्त्रीसुखभोगभाक् । किलासदद्रुकण्ड्वादिरोगयुक्तोऽरिभीतियुक् ॥ २३ ॥
मिथ्याभिशंसनैर्वादैरपवादैश्च संयुतः । लघुचित्तो महच्चित्तो विरक्तो रक्त एव च ॥ २४ ॥
क्षणवित्तेनाल्पयुक्तः पूर्वपापात्खगेश्वर । सहायलक्षणं तस्य शृणु वक्ष्यामि सारथे ॥ २५ ॥
पूर्वे ब्रह्मस्वहरणे सहाया सिद्धिजाङ्गना । सा ज्येष्ठा प्रेष्टुरेवात्र परित्यक्ता सुखोज्झिता ॥ २६ ॥
या तस्य धर्मपत्न्यासीत्प्राग्भवे कश्यपात्मज । सोऽत्र जन्मनि पक्षीन्द्र कनिष्ठसुतशोकभाक् ॥ २७ ॥
लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् । पलमात्रा च कर्तव्या ब्राह्मणी पुत्रसंयुता ॥ २८ ॥
हिरण्मयी तदर्धेन तदर्धेनाथवा पुनः । यथावित्तानुसारेण षोडशोरूपचारकैः ॥ २९ ॥
सम्पूज्य देया विप्राय विधिज्ञाय खगोत्तम । रविर्मासमितः सोमः सुवर्णमितको रविः ॥ ३० ॥
देयं च कपिलादानं ब्राह्मणेभ्योऽतिभक्तितः । घृतपूर्णं शतपलैर्मितं ताम्रस्य भाजनम् ॥ ३१ ॥
सुवर्णद्वयसंयुक्तं दद्याद्विप्राय मानद । गायत्रीमष्टसाहस्रं त्र्यम्बकं तु तथा जपेत् ॥ ३२ ॥
ब्रह्मविष्णुमहेशानां मन्त्रांस्तत्संख्यया जपेत् । रविसोमात्मकौ तद्वज्जाप्यौ वै तद्दशांशतः ॥ ३३ ॥
होमयेत्तर्पयेद्विप्रान्भोजयेद्दक्षिणां दिशेत् । लक्षं पार्थिवलिङ्गानां पूजयेत्सुसमाहितः ॥ ३४ ॥
तदर्धं वायुतं वापि भक्तिश्रद्धासमन्वितः । अथवा शृणुयाद्भक्त्या हरिवंशं विशुद्धधीः ॥ ३५ ॥
पुत्रपौत्राभिवृद्ध्या च ह्येधन्ते संपदोऽन्वहम् । नाधयो व्याधयस्तस्य न शत्रुभयमावहेत् ॥ ३६ ॥
खनागाब्दमितायुः स्यान्मुनिवेदमितेब्दके । रिष्टं नाप्नोति स प्राणी सुखी जीवति निश्चयात् ३७
प्रायश्चित्तद्वयेऽप्येकं नाचरेल्लोभमोहतः । इह लोके महादुःखी परत्र निरयं व्रजेत् ॥ ३८ ॥
प्रायश्चित्ते कृते तस्य तीर्थमृत्युर्न संशयः । जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् ॥ ३९ ॥
यद्यदन्तर्गतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ ४० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टादशोत्तरशततमाधिकसहस्रतमः ॥ १९१८ ॥

श्रीसूर्य उवाच ।

नारिकेलफलस्यापि हर्तुः स्यान्मस्तकव्रणः । शुक्लपक्षे चतुर्दश्यां विशेषेण विधानतः ॥ १ ॥
शङ्करस्यालयं गत्वा व्रणी विधिमिमं चरेत् । शंकरं स्नानविधिना पूजयित्वा विधानतः ॥ २ ॥
परितो लिङ्गमीशस्य नारिकेलफलैर्वलिम् । कल्पयित्वार्चयेद्गौरीं यथावत्पूर्वमर्चिताम् ॥ ३ ॥
विप्रेभ्यो दक्षिणां दद्यात्सुवर्णरचितां वहु । ततः कृताञ्जलिर्भूत्वा व्रणी मन्त्रमिमं पठेत् ॥ ४ ॥

मन्त्रः ।

"यन्मया नारिकेलानि हृत्वा पापमुपार्जितम् । अर्चितो भगवान्रुद्रो भवान्या भयभञ्जनः ॥ ५ ॥
यथाशक्ति च दानाद्यैर्भवन्तोपि च पूजिताः । कर्मणानेन मे नाशमुपैतु शिरसो व्रणः" ॥ ६ ॥
एवमादीनि तैरुक्तः शंकरं सह भार्यया । प्रणम्य विप्रान्भूयः स श्रद्धया गृहमाव्रजेत् ॥ ७ ॥
ब्राह्मणान्भोजयेत्तत्र दद्याच्छक्त्या च दक्षिणाम् ॥ ८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनविंशत्युत्तरनवशताधिकसहस्रतमः ॥ १९१९ ॥

श्रीसूर्य उवाच ।

सर्वसाधारणान्म्लेच्छान्पुरा जन्मनि योऽगमत् । तिलजीति च शूकोत्थो व्रणः स्यात्तस्य शेफसि ?
स तद्दोषविनाशार्थमाचरेदिति निष्कृतिम् । द्वादश्यां शुक्लपक्षे तु तमुद्दिश्य जलाधिपम् ॥ २ ॥
दद्याद्धेनुं सुविप्राय ब्राह्मणाय यजुर्विदे । पूर्वोक्तेन विधानेन दैवज्ञादेशतत्परः ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो विंशत्युत्तरनवशताधिकसहस्रतमः ॥ १९२० ॥

श्रीसूर्य उवाच ।

अदत्त्वा वेतनं वेश्यां यः पुरा निरवासयत् । तस्य स्यात्सार्षपी सूत व्रणो घोरोऽत्र शेफसि ॥ १ ॥
वापीकूपतडागादिनिपानान्यजने पथि । निर्मीयमाणानि परैः शक्तितो विसृजेद्वसु ॥ २ ॥
दत्ते व्रणोत्पत्तिर्नस्याज्जातस्य च विनाशनम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकविंशत्युत्तरनवशताधिकसहस्रतमः ॥ १९२१ ॥

श्रीसूर्य उवाच ।

भिल्लकैवर्तवरटचर्मकृत्तन्तुवायिनाम् । अन्येषामपि कारूणां सङ्गम्य च स्त्रियो वलात् ॥ १ ॥
भावशूकव्रणो लिङ्गे जायते तस्य निष्कृतिः । नरस्तद्दोषनाशाय दद्याद्धेनुं द्विजन्मने ॥ २ ॥
सुवृत्ताय सुशीलाय सुशान्ताय पयस्विनीम् ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वाविंशत्युत्तरनवशताधिकसहस्रतमः ॥ १९२२ ॥

श्रीसूर्य उवाच ।

विवाहेऽपि च यज्ञादौ पुण्यकर्मणि चाखिले । विघ्नकर्तुर्वदेच्चिह्नं मन्त्रवृद्धमतः खग ॥ १ ॥
निष्कद्वयसुवर्णेन उमामाहेश्वरस्य च । प्रतिमां कारयित्वा तु सम्पूज्य विधिवच्छुभाम् ॥ २ ॥
तन्मितेन सुवर्णेन दद्याद्विप्राय वै खग । अंत्रवृद्धिकरो रोगस्तत्क्षणादेव नश्यति ॥ ३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयोविंशत्युत्तरनवशताधिकसहस्रतमः ॥ १९२३ ॥

श्रीसूर्य उवाच ।

यो नरः कामतप्ताङ्गो ह्यनिच्छन्तीं पतिव्रताम् । कामाकुलितया दृष्ट्या पुराऽपश्यत्परस्त्रियम् ॥ १ ॥

तस्य नेत्रामयोऽत्र स्याद्व्याधिर्वातविपर्ययात्। उपोष्य च त्रिरात्रं स नियतो विष्णुसन्निधौ ॥२॥
भूमिशायी त्रिरवणस्नायी देवं स्मरन्हरिम् । चतुर्थे दिवसे प्राप्ते भोजयेद्विजपुङ्गवान् ॥ ३ ॥
ततः स प्रणिपत्यामूनिदं वचनमीरयेत् ॥ ४ ॥

मंत्रः ।

" यन्मया मूढभावेन दृग्विक्षेपं परस्त्रियाम् । कुर्वता भ्रूविलासाद्यमकामायां वितन्वता ॥ ५ ॥
नेत्रामयो महाघोरः प्राप्तो वातविपर्ययः। प्रसादाद्वै च विप्राणां स मे नश्यतु दुर्ग्रहः " ॥ ६ ॥
इति विज्ञाप्य तान्नत्वा विसृजेद्विनयान्वितः। अग्ने नयेति मन्त्रेण स्वर्चितात्कुसुमादिभिः ॥ ७ ॥
ततः स्ववन्धुभिः सर्वं कुर्याद्वै पारणाविधिम् ॥ ८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुर्विंशत्युत्तरनवशताधिकसहस्रतमः ॥ १९२४ ॥

श्रीसूर्य उवाच ।

यः पुरा हरते तैलं लोभोपहतचेतसा । सोऽत्र जन्मनि पक्षीन्द्र पापरुक्पीडितोधुना ॥ १ ॥
आयसस्य घटं तैलं पूर्णं दद्याद्विजन्मने ॥ २ ॥

मन्त्रः ।

यन्मया हरितं तैलमङ्गवैकृतमुल्वणम् । प्राप्तं पापाभिधं तस्मान्मुच्येयं दर्शनाच्च वः " ॥ ३ ॥
एवमस्त्विति तैरुक्तः स्वयं भुञ्जीत वाग्यतः ॥ ४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चविंशत्युत्तरनवशताधिकसहस्रतमः ॥ १९२५ ॥

अरुण उवाच ।

कश्चिद्वर्णोत्तरे जातो धर्मिष्ठो धर्मवत्सलः । कृषिकर्म प्रकुर्वाणो वातरक्तादिदर्शनम् ॥ १ ॥
हस्तयोर्वामपार्श्वे तु क्षुक्षिभागे व्रणाकुलः । भार्या प्रीतिकरी नित्यमुभे वा तिस्र एव च ॥ २ ॥
परस्परं महाप्रीतिर्व्रतानामपि काङ्क्षिणी । प्रदरार्तिवशात्तस्या गर्भो याति विलीयते ॥ ३ ॥
केन कर्मविपाकेन सत्यं कथय भास्कर ॥ ४ ॥

श्रीसूर्य उवाच ।

स्त्रीकृतं कर्मणां हेतुः पुंरकृतं नैव सारथे । पूर्वं वर्णोत्तरे जातो बहुवित्तसमाकुलः ॥ ५ ॥
कामुकः कृपणश्चैव परदाररतः सदा । कदाचित्कालयोगेन भाविनोर्थस्य वै बलात् ॥ ६ ॥
एका स्त्री ब्राह्मणी पूर्वं बाल्ये वैधव्यतां गता । चपला रूपसम्पन्ना नारीणामपि मोहिनी ॥ ७ ॥
सा चकार महाप्रीतिमनेन कामुकेन च । चिरकालं काश्यपे वै बहुगर्भनिकृन्तनम् ॥ ८ ॥
लोकापवादभीत्या च औषधीभिः कृतं पुरा । मासत्रये ह्यतिक्रान्ते गर्भपातनतत्परः ॥ ९ ॥
बहुकालं काश्यपे सा क्रीडित्वा यथेप्सितम् । पश्चान्मृतिं समापन्नो दुष्टविप्लवयोगतः ॥ १० ॥
पतितो नरके घोरे वर्षायुतसहस्रशः । इदं च पञ्चमं जन्म वर्णोत्तरसमुद्भवम् ॥ ११ ॥
पूर्वपुण्योपभोगेन मानुषत्वं हि जन्मनि । तेन कर्मविपाकेन गर्भो याति विलीयते ॥ १२ ॥

अरुण उवाच ।

प्रायश्चित्तं कथं देव येन गर्भः स्थिरो भवेत् । जन्तूनां कृपणार्दीनां रूपं कृत्वा दिनेश्वर ॥ १३ ॥

श्रीसूर्य उवाच ।

तीर्थस्यावहनं कृत्वा सम्वत्सरप्रमाणतः । पश्चाद्गेहे समागम्य प्रायश्चित्तं समाचरेत् ॥ १४ ॥

विप्रस्योद्वाहनं कृत्वा गृहदानं समापयेत्। कुर्याद्धैनायकीं शान्तिं विप्राणां भोजयेच्छतम् ॥ १५ ॥
एवं कृतविधेः सूत मोचयेद्वां यथोदिताम्। सर्पिष्यात्मानमालोक्य पलषोडशसंख्यया ॥ १६ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षड्विंशत्युत्तरनवशताधिकसहस्रतमः ॥ १९२६ ॥

श्रीसूर्य उवाच।

वैनतेय महाबाहो शृणु तस्यापि चेष्टितम्। बभूव यामुने देशे ब्राह्मणी लोकवन्दिता ॥ १ ॥
पतिव्रता सदाचारा पतिभक्तिपरायणा। तया दत्तानि दानानि ब्राह्मणेभ्योऽतिभक्तितः ॥ २ ॥
नानाफलानि दिव्यानि सुगन्धीनि च पर्वसु। खेटयज्ञादिके यानि ऋत्विग्भ्यः कथितानि च॥३॥
अन्नभूषणवस्त्राश्वभूषाशय्यासनानि च। अथो भाविबलात्सूत कृतं यत्कर्म दारुणम् ॥ ४ ॥
विषं दत्त्वा जघानासौ सपत्नीवशगं पतिम्। ततो बहुतिथे काले सा गत्वा यमशासनम्॥ ५ ॥
पुण्यात्पुण्यफलं भुक्त्वा पापाच्च नरकांस्तथा। पूर्वपुण्यप्रभावेण सा जातात्र हिमालये ॥ ६ ॥
गङ्गायाः पूर्वभागे च राजवंशे महाद्भुते। नातिह्रस्वा नातिदीर्घा गौरवर्णा कृशोदरी ॥ ७ ॥
पितृमातृसुखैर्युक्ता बाल्ये भ्रातृसुखान्विता। पितृमातृसुखैर्हीना किशोरे क्लेशसंयुता ॥ ८ ॥
यूनि भ्रातृसुखैर्हीना दानशीला प्रियम्वदा। देवद्विजानां पूजायां श्रद्धाभक्तिसमन्विता ॥ ९ ॥
गतागतधनैर्युक्ता व्रतानामनुकांक्षिणी। भ्रातृगे राज्ञि सततं श्रेयसामनुकांक्षिणी ॥ १० ॥
पुण्यादिदं तथा पापाल्लोभयुक्तात्पपापकृत्। किं कृतं विधिना मह्यमितिचिन्तासमन्विता॥११॥
जन्मलग्नात्सुते यूने क्रूरग्रहविलोकिते। कीटस्थेऽथ शनौ जाता मनोदुःखैः समन्विता ॥ १२ ॥
पूर्वे पत्युश्च हननात्सपत्नीवैरभावतः। पापादिह महाभाग घोरादस्याः खगेश्वर ॥ १३ ॥
सहस्रोपायकैश्चापि पतिर्न घटते खग। यूनि भावेऽण्डजश्रेष्ठ प्राक्कृतात्पापतस्त्विह ॥ १४ ॥
यूनि सा पतिदुःखार्ता मम जन्म निरर्थकम्। जल्पन्तीति च दुःखार्ता सत्कृते निजवंशजा॥१५॥
लक्षणैरेभिराढ्यायाः प्रायश्चित्तं शृणुष्वथ। पलत्रयेण कर्तव्यो ब्राह्मणस्तु हिरण्मयः ॥ १६ ॥
षोडशोरूपचारैश्च पूजयित्वा विधानतः। विधिज्ञाय प्रदातव्यो गां स्वर्णाभरणैर्युताम् ॥ १७ ॥
तथा तन्मितिकः सोमः सुवर्णमितिको रविः। रविर्मापमितः शम्भुर्देयो भक्त्या विधानतः॥१८॥
गायत्रीं दशसाहस्रं व्यवकन्तु तथा जपेत्। जपेत्सोमादिमन्त्रांश्च पञ्चपञ्चसहस्रकम् ॥ १९ ॥
लक्षं पार्थिवलिङ्गानां पूजयेत्सुसमाहिता। कुर्यादयुतसंख्या वै पिप्पलस्य प्रदक्षिणाः ॥ २० ॥
मद्दिने तु व्रतं कुर्यान्मम भक्तिपरायणा। होमयेत्तद्दशांशेन तिलैः क्षौद्रघृतप्लुतैः ॥ २१ ॥
ब्राह्मणान्भोजयेच्छक्त्या सर्पिष्यात्मानमीक्षयेत्। प्रायश्चित्तमिदं प्रोक्तं पूर्वजन्मार्जनाशनम् ॥२२॥
नाधयो व्याधयस्तस्या न दारिद्र्यभयं क्वचित्। प्रायश्चित्ते कृते ह्यायुरशीतिश्चतुरुत्तरम् ॥२३॥
पतिपुत्रवती चासाविहैव भवति ध्रुवम्। रिष्टं नाप्नोति नियतं चत्वारिंशन्मितेब्दके ॥ २४ ॥
प्रायश्चित्तेऽकृते तस्या रिष्टेनैव विनाशनम्। अन्ते च निरयं प्रोक्तमपतिर्जन्मजन्मनि ॥ २५ ॥
तीर्थे मृत्युमवाप्नोति कृते प्राक्पापशोधने। जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् ॥ २६ ॥
यद्यदन्तर्गतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ २७ ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तविंशत्युत्तरनवशताधिकसहस्रतमः ॥ १९२७ ॥

श्रीसूर्य उवाच।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम्। आसीत्सिंहलके देशे द्विजपुत्री वरानना ॥ १ ॥
सैरन्ध्रीकर्मकुशला वसन्ती राजवेश्मनि। राजराज्ञीप्रियकरी चारुभूषणभूषिता ॥ २ ॥

वदान्या च सुशीला च पितृमातृसुखान्विता । पूर्वपापात्पतित्यक्ता कुशला राजकर्मणि ॥ ३ ॥
तया दत्तानि दानानि सुवर्णाभरणानि च । पर्वस्वपि च विप्रेभ्यो वस्त्रशय्यासनानि च ॥ ४ ॥
अथो भाविबलात्सूत कृतं यत्कर्म दारुणम् । विवाहयज्ञकर्मादौ विघ्न आचरितस्तया ॥ ५ ॥
गते वह्नितिथे काले गत्वा तु यमशासनम् । पुण्यपापफलं भुक्त्वा पूर्वपुण्यावशेषतः ॥ ६ ॥
वर्णोत्तरे कुले जाता देशे पुण्यजनाश्रिते । हिमालये महाभाग नात्युच्चा न लघुस्तथा ॥ ७ ॥
सुशीलाकृष्टगौराङ्गी दानशीला प्रियम्वदा । सन्धिविग्रहकर्त्री च राजवेश्माश्रया सदा ॥ ८ ॥
पितृमातृसुखैर्युक्ता कैशोरे तत्सुखोज्झिता । धनवाहनभोगाढ्या देवद्विजपरायणा ॥ ९ ॥
पुण्यादिदं तथा पापाल्लोभयुक्तातिपापकृत् । विवाहविघ्नजात्पापान्नेत्रसंज्ञाकृतात्सुत ॥ १० ॥
केकराक्षी ह्यपतिका मनोदुःखैः समन्विता । जन्मलग्नात्सप्तमके दुष्टखेटैः समन्वितैः ॥ ११ ॥
जाता जन्मस्थिते मन्दे किशोरे क्लेशसंयुता । रोगयुक्ता तथा यूनि क्लेशभाग्धनवत्यपि ॥ १२ ॥
लक्षणैरेभिराढ्यायाः प्रायश्चित्तं वदामि ते । पलमात्रेण कर्तव्या रविमूर्तिर्हिरण्मयी ॥ १३ ॥
प्रतिष्ठापूजनं कृत्वा दद्याद्विधिविदे सुत । स्वर्णालंकरणैर्युक्तां दद्याद्गां च पयस्विनीम् ॥ १४ ॥
पिप्पलस्यायुतं सूत परिक्रमणमाचरेत् । ब्राह्मणान्भोजयेत्पश्चात्तेभ्यो दद्याच्च दक्षिणाम् ॥ १५ ॥
प्रायश्चित्तमिदं सूत पूर्वपापविनाशनम् । एवं कृते महाभाग नारी सद्गतिमाप्नुयात् ॥ १६ ॥
रिष्टं नाप्नोति खाम्भोधिमिते वर्षे महाद्भुतम् । कुसप्ततिमितायुः स्यात्क्लेशान्सैव न पश्यति १७ ॥
प्रायश्चित्तेऽकृते तस्या रिष्टेन मरणं ध्रुवम् । सद्गतिं नैव साप्नोति जन्मजन्मनि निश्चयात् ॥ १८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टाविंशत्युत्तरनवशताधिकसहस्रतमः ॥ १९२८ ॥

श्रीसूर्य उवाच ।

वैनतेय महाभाग शृणु तस्या विचेष्टितम् । प्रागासीत्क्षत्रिया काचिद्देशे यामुनसंज्ञके ॥ १ ॥
भर्तुः प्रियरता नित्यं दानधर्मरता सती । गुरूणां देवतानां च विप्राणां पूजने रता ॥ २ ॥
सदा दैवात्सा सुभगा द्रव्यलोभरता सदा । सपत्नीपुत्रजद्दाह्यं चैतद्वशानुगम् ॥ ३ ॥
मृतस्तद्विषयोगेन गृहीतं तद्धनं तया । तद्दुःखेन पतिस्तस्या मृतः पुत्रशुचान्वितः ॥ ४ ॥
पापमाचरितं चोग्रं स्वपुत्रधवघातजम् । प्राप्ता यमपुरं भुक्त्वा पुण्याच्छुभफलानि सा ॥ ५ ॥
तद्वत्पापफलानीह नरकान्घोरसंज्ञकान् । पूर्वपुण्यप्रभावेण सा जाता पर्वतेऽधुना ॥ ६ ॥
क्षात्रे कुले महापुण्ये राज्ञस्त्रास्ति खगाधिप । सा रक्तगौरा भर्मज्ञा सदा पुण्यपरा खग ॥ ७ ॥
मध्यस्वरूपा सिद्धार्था सुशीला गौरवान्विता । नातिव्ययरुता पुण्यात्स्वकुलेषु प्रियम्वदा ॥ ८ ॥
पतिप्रियरता बाल्ये सुखैश्वर्यधनान्विता । पुण्यादिदं तथा पापाल्लोभाढ्या स्वल्पपुत्रका ॥ ९ ॥
स्वल्पपापरता बाल्ये चाधिव्याव्याधिसमन्विता । किशोरे भर्तृसंत्यक्ता सन्तानसुखवर्जिता ॥ १० ॥
यौवने क्लेशयुक्ता च मनोदुःखैः समन्विता । बन्धनात्पितुरप्येवं यतस्तत्सुखवर्जिता ॥ ११ ॥
मिथ्याभिसंशनैर्घोरैरपवादैश्च संयुता । जन्मलग्नात्सप्तमके क्रूरग्रहविलोकिते ॥ १२ ॥
जातेयं पतगश्रेष्ठ सपत्नीपुत्रमारणात् । पूर्वपापान्महाभाग किशोरे मातृवर्जिता ॥ १३ ॥
लक्षणैरेभिराढ्यायाः प्रायश्चित्तं वदाम्यहम् । विष्णुः कार्यः शतैर्माषैः सौवर्णो विश्वयोनिभृत् १४
तद्वन्महेश्वरं कुर्याद्गन्धैः पुष्पैरलंकृतम् । देया विप्रेषु पात्रेषु विधिज्ञेषु खगोत्तम ॥ १५ ॥
जपेदष्टाक्षरं मन्त्रमयुतं होमयेत्ततः । गायत्रीं च जपेच्चाष्टसहस्रावस्तथा सुत ॥ १६ ॥
भोजयेच्छक्तितो विप्रांस्तेभ्यो दद्याच्च दक्षिणाम् । एवं कुर्यात्प्रयत्नेन पूर्वपापविशोधनम् ॥ १७ ॥

न तस्याः पुत्रमरणं तदग्रे जायते क्वचित् । कुसप्तत्यब्दमायुः स्यात्खवेदमितवत्सरे ॥ १८ ॥
रिष्टं नाप्नोति सन्तानसुखं पतिसुखं लभेत् । नैवं या कुरुते नारी प्रायश्चित्तं विधानतः ॥ १९ ॥
स्वपुत्रमारणोत्पन्नात्पापात्पुत्रसुखं न हि । विप्राणां पूजनाद्दानात्तस्याः सन्ततिवर्द्धनम् ॥ २० ॥
अकृते तु यथाशक्ति प्रायश्चित्ते मयोदिते । रिष्टेनैव विनाशः स्यात्तस्याश्च विनतासुत ॥ २१ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनत्रिंशदुत्तरनवशतांधिकसहस्रतमः ॥ १९२९ ॥

श्रीसूर्य उवाच ।

वैनतेय महाभाग शृणु तस्य विचेष्टितम् । बभूव यामुने देशे क्षत्रिया पतिवल्लभा ॥ १ ॥
धनपुत्रवती चारुशीला चारुविभूषणा । पितृमातृसुखैर्युक्ता देवद्विजपरायणा ॥ २ ॥
तया दत्तानि दानानि पर्वस्वपि च भक्तितः । विप्रेभ्यः कपिलादानमन्नदानन्तु शक्तितः ॥ ३ ॥
कार्तिके च तथा स्वर्णं शय्याभूषासनानि च । दीपांश्च मथुरायां वै घृतेनापूर्य बोधितान् ॥४॥
यमुनायां जले चैव दीपा दत्ता विशेषतः । सहायाद्भर्तुरनिशं तया वै कश्यपात्मज ॥ ५ ॥
अथो पापं भृशं चक्रे भाविनोऽर्थस्य वै बलात् । भर्तुराज्ञां समुल्लंघ्य व्रतोपोषणकानि च ॥ ६ ॥
पुराणश्रवणं चैव तीर्थयात्रादि शक्तितः । भर्तृसेवां परित्यज्य विरक्ता साऽभवत्खग ॥ ७ ॥
यूनो भर्तुः समुल्लंघ्य शासनां युवतिस्त्वसौ । निजधर्मपरित्यागं चक्रे वैराग्यमुल्वणम् ॥ ८ ॥
ततो बहुतिथे काले तद्दुःखेन मृतः पतिः । सा चक्रे चानुगमनं भर्तुर्वै विनतात्मज ॥ ९ ॥
पुत्रेण च गवां गत्वा श्राद्धं दत्तं विधानतः । ततस्ते सूर्यलोके तु भुक्त्वा भोगांश्च शाश्वतान् ॥
वर्षाणामयुतं सूत स जातो राजनन्दनः । आसीत्सा धर्मपत्न्यस्य स पुत्रः पुत्रतां गतः ॥११॥
हिमालये पुण्यदेशे सर्वदेवनमस्कृते । यत्र गङ्गा प्रवहति रम्ये हरिहराश्रमे ॥ १२ ॥
सा मध्यरूपा तन्वङ्गी गौरवर्णा शुभानना । चतुरा दानशीला च व्रतानामनुकांक्षिणी ॥ १३ ॥
पतिभक्तिपरा नित्यं देवद्विजपरायणा । पितृमातृसुखैर्युक्ता बाल्ये सर्वप्रियम्वदा ॥ १४ ॥
सत्पुत्रपौत्रसंयुक्ता धनवाहनभोगभाक् । देशेदेशेऽधिकाराढ्या पुत्रयुक्ता कृशोदरी ॥ १५ ॥
भृत्यदासीधनैर्धान्यैः संयुक्ता चारुलक्षणा । राज्ञां हितकरी शीला सन्धिविग्रहसंयुता ॥ १६ ॥
पुण्यादिदं तथा पापादल्पपापाल्पलोभयुक् । मनोदुःखेन संयुक्ता चिन्तायुक्तारिभीतियुक् १७ ॥
भर्तृसेवापरित्यागाच्चदुःखात्तन्मृतेः खग । दुरितात्प्राक्कृतादत्र भर्तृत्यक्ता किशोरके ॥ १८ ॥
यामवस्थां तु सम्प्राप्य प्राग्भवे सा पतिप्रिया । विरक्तासीदिहैवास्याः पतिर्वैराग्यमाप्नुयात् ॥ १९ ॥
विरक्ती भवन्तं तं सा दृष्ट्वा क्लेशवती ह्यभूत् । धनपुत्रवती चापि भर्तृदुःखेन दुःखिता ॥ २० ॥
प्राग्भवे यूनि भावे च यतस्तद्दुःखतो मृतः । पतिस्तथेह यून्येव जाता सा विधवाङ्गना ॥ २१ ॥
जन्मसप्तमभावे च क्रूरग्रहविलोकिते । युग्मकीटकसन्दिस्थे देवार्हे कश्यपात्मज ॥ २२ ॥
युग्मसंस्थे चन्द्रभसि दुष्टखेटैर्विलोकिते । कुंभराशौ शनौ जाता वातरोगप्रपीडिता ॥ २३ ॥
श्लेष्मलोदररुग्युक्ता प्राग्जाताद्दुरितात्खग । लक्षणैरेभिराढ्यायाः प्रायश्चित्तं वदाम्यहम् ॥ २४ ॥
पलत्रयेण कर्तव्यो रविः स्वर्णमयः शुभः । भौमोऽपि च तथा कार्यो निष्केण च हिरण्मयः ॥२५॥
सुवर्णमितकः शम्भुर्मकरस्तु तथा खग । षोडशोपचारैस्तु पूजयित्वा विधानतः ॥ २६ ॥
ब्राह्मणेभ्यस्तथा देया दश गावस्तिलास्तथा । गायत्रीमष्टसाहस्रं त्र्यम्बकन्तु तथा जपेत् ॥२७॥
रविभौमशिवानां च वरुणस्य तथैव च । मन्त्रांस्तत्संख्यया जप्याद्धोमयेत्तद्दशांशतः ॥ २८ ॥
लक्षार्धं पार्थिवानां च रुद्राणां पूजनं चरेत् । ब्राह्मणान्भोजयेत्पश्चात्सर्पिष्यात्मानमीक्षयेत् ॥२९॥

मद्दिने तु व्रतं कुर्यान्मद्भक्ता मत्परायणा । प्रायश्चित्तमिदं प्रोक्तं पूर्वपापप्रणाशनम् ॥ ३० ॥
एवं निष्कृतिमासाद्य सद्गतिं लभतेऽङ्गना । शत्रुभीतिं न चाप्नोति दुःखं नाप्नोति रोगजम् ॥३१॥
पुत्रपौत्राभिवृद्ध्या च ह्येधते सम्पदन्वहम् । तस्यारिष्टभयं नास्ति मुनिभूतमिताब्दकं ॥ ३२ ॥
अशीतिमितवर्षाणि जीवनं समुदाहृतम् । अन्ते सद्गतिमाप्नोति यत्र देवः सनातनः ॥ ३३ ॥
नैवं करोति या मोहाल्लोभाद्वा पापशोधनम् । रिष्टैनैव विनाशः स्यादन्ते च निरयं व्रजेत् ॥३४॥
भर्तृप्रयुक्तदुःखं सा जन्मजन्मनि चाप्नुयात् । चतुर्विधं महारिष्टं मुनिभूतमिताब्दके ॥ ३५ ॥
प्राग्भवाद्दुरितादत्र प्राप्नुयाद्विनतात्मज । जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् ॥ ३६ ॥
यद्यन्तर्गतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ ३७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिंशदुत्तरनवशताधिकसहस्रतमः ॥ १९३० ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम् । बभूव वङ्गदेशे तु ब्राह्मणो वित्तसंयुतः ॥ १ ॥
राजमान्यो धनैश्वर्यदासदासीजनान्वितः । दत्तानि तेन दानानि तीर्थे स्नानानि पर्वसु ॥ २ ॥
कृतानि स्वर्णमन्नं च विप्रेभ्यः श्रद्धयान्वितः । अथो भाविबलात्सूत कृतं यत्कर्म दारुणम्॥३॥
कुसीदत्वेन यद्दत्तं द्रव्यं तद्याचयन्मुहुः । लंघनानि ततश्चक्रे पञ्चषट्सप्तकानि च ॥ ४ ॥
वृद्धिं प्राप्तं तु दास्यामि द्रव्यं दत्तं दिनान्तरे । इदानीं न च दास्यामीत्युत्तरं निष्ठुरं वचः ॥ ५ ॥
ऋणिना चैव यद्दत्तं तेन क्रोधेन स द्विजः । कृतवान्स्वशिरःस्फोटं ततः पञ्चत्वमाप वै ॥ ६ ॥
पुण्यात्पुण्यफलं भुक्तं पापाच्च नरकं तथा । पूर्वपुण्यप्रभावेण स जातो ब्राह्मणोऽधुना ॥ ७ ॥
देशे कौंकणसंज्ञे तु कीटस्थेऽथ बृहस्पतौ । नात्युच्चो नातिदीर्घश्च गौरवर्णः प्रतापवान् ॥ ८ ॥
बाल्ये पितृसुखैर्युक्तो गुरुबन्धुजनैर्युतः । पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् ॥ ९ ॥
प्राग्भवे स्वात्मघाताच्च स्वजनान्भ्रातृबान्धवान् । सन्त्यज्य सञ्चरन्देशेदेशेऽप्राप्तमनोरथः ॥ १० ॥
हठी मानी सुखैर्युक्तः कैशोरे क्लेशभाग्नरु । न लेभे स्त्रीसुखं क्वापि कदाचिद्रोगभाग्नरः ॥ ११ ॥
नैकविधो नैकवासो विरक्तो रक्त एव च । स्त्रियान्तु विद्यमानायामपि तत्सुखवर्जितः ॥ १२ ॥
यूनि भावे खगश्रेष्ठ विदेशगमने रतः । लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥ १३ ॥
शुभे मासे शुभे पक्षे शुभे सौम्यायने खग । मद्दिने तु समारभ्य पिप्पलस्य प्रदक्षिणाम् ॥१४॥
अष्टोत्तरशतावृत्त्या कुर्याच्छतदिनावधि । ब्राह्मणान्भोजयेच्छक्त्या दशांशेन विधानतः ॥ १५ ॥
अथवा श्रद्धया युक्तः प्रयागे मृगगे रवौ । स्नायाज्जपेच्च गायत्रीं लक्षार्धं च विधानतः ॥ १६ ॥
मद्दिने तु व्रतं कुर्यान्मद्भक्तो मत्परायणः । एवं कृतविधेः सूत पूर्वजन्माघनाशनम् ॥ १७ ॥
न दारिद्र्यभयं तस्य न वियोगोऽपि बन्धुभिः । नारिष्टभयमाप्नोति पञ्चाशन्मितवत्सरे ॥ १८ ॥
पुत्रपौत्राभिवृद्धिः स्याद्धनैर्धान्यैः सुखं भवेत्। अब्धिनागमितायुः स्यादन्ते सद्गतिमाप्नुयात्॥१९॥
प्रायश्चित्तद्वयेऽप्येकं नाचरेल्लोभमोहतः । प्रोक्तं सुखं न लभते दुःखं स्याज्जन्मजन्मनि ॥ २० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकत्रिंशदुत्तरनवशताधिकसहस्रतमः ॥ १९३१ ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम् । दाक्षिणात्ये जनपदे मलयाचलसंश्रिते ॥ १ ॥
बभूव ब्राह्मणो विद्वान्धर्मशास्त्रार्थकोविदः । राजमान्यो धनैर्धान्यैः संयुतो जनवल्लभः ॥ २ ॥

दत्तानि तेन दानानि पर्वस्वपि च भक्तितः। वस्त्रभूषणशय्यान्नधनानि च विशेषतः ॥ ३ ॥
सत्पात्रेषु विधानेन ब्राह्मणेषु च शक्तितः। अथो भाविबलात्सूत कृतं यत्कर्म दारुणम् ॥ ४ ॥
यज्ञविघ्नाभिधं घोरं पापमाचरितं खग। ततो वहुतिथे काले प्राप्तस्तु यमशासनम् ॥ ५ ॥
पुण्यात्पुण्यफलं भुक्त्वा पापाच्च नरकं तथा। पूर्वपुण्यप्रभावेण स जातोऽत्रापि कौंकणे ॥ ६ ॥
कर्के जीवेऽथ लग्नस्थे लग्नात्पञ्चमगे त्वगौ। वृषे क्रूरग्रहैः सर्वैर्नात्युच्चैर्न लघुर्वृणी ॥ ७ ॥
स तु मध्यमरूपाढ्यो गौरवर्णः प्रतापवान्। विद्यावाञ्छौर्यगाम्भीर्यधैर्यादिगुणसंयुतः ॥ ८ ॥
धनवाहनभोगाढ्यो वन्धुस्त्रीजनसंयुतः। लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥ ९ ॥
अग्नेर्मूर्तिश्च कर्तव्या पलद्वयमिता शुभा। हिरण्मयी प्रतिष्ठाप्य देया विप्राय धीमते ॥ १० ॥
पार्थिवानां शिवानां च लक्षं सम्पूजयेत्ततः। गायत्रीमष्टसाहस्रं त्र्यम्बकं तु तथा जपेत् ॥ ११ ॥
होमयेत्तद्दशांशेन ब्राह्मणान्भोजयेत्ततः। सर्पिष्यात्मानमालोक्य भुंजीत सह वन्धुभिः ॥ १२ ॥
एवंकृतविधेः सूत पूर्वजन्माघनाशनम्। न पुत्रमरणं तस्य न रोगभयमेव च ॥ १३ ॥
सम्पदस्तस्य जायंते धनपुत्रयुतो भवेत्। स्वभूतमितवर्षे तु रिष्टं नाप्नोति निश्चयात् ॥ १४ ॥
अशीतिमितवर्षाणां जीवितं समुदाहृतम्। नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् ॥ १५ ॥
रिष्टेनैव विनाशः स्यात्तस्य चाकृतनिष्कृतेः ॥ १६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्वात्रिंशदुत्तरनवशताधिकसहस्रतमः ॥ १९३२ ॥

श्रीसूर्य उवाच।

वनतेय महाभाग शृणु तस्य विचेष्टितम्। आसीत्क्षत्री महाभागः प्रयागे देशके शुभे ॥ १ ॥
धनधान्यसमायुक्तो राजमान्यः प्रतापवान्। क्रयविक्रयकर्ता च कृषिवाणिज्यतत्परः ॥ २ ॥
दत्तानि तेन दानानि पर्वस्वपि च भक्तितः। प्रयागे मृगगे भानौ गोशय्यावसनानि च ॥ ३ ॥
अन्नदानं च विप्रेभ्यः श्रद्धाभक्तिसमन्वितम्। पापमाचरितं तेन भाविनोऽर्थस्य वै वलात् ॥४॥
अरुन्तुदो महानासीत्सतां वै नियतो भृशम्। मिथ्याभिशंसनैर्वादैः पैशून्येन नृणां सताम्॥५॥
वृत्तिच्छेदस्ततश्चक्रे क्षत्रियेण दुरात्मना। गते वहुतिथे काले स गत्वा यमशासनम् ॥ ६ ॥
पुण्यात्पुण्यफलं भुक्त्वा पापाच्च नरकं तथा। पूर्वपुण्यप्रभावेण स जातोऽत्रापि मानवः ॥ ७ ॥
वाराणस्यां महाक्षेत्रे पुण्ये शम्भुसमाश्रिते। स मध्यरूपो मतिमान्वेदविच्च प्रतापवान् ॥ ८ ॥
पितृभ्रातृसुखैर्युक्तो वाल्ये सर्वजनप्रियः। सहायान्मातुलस्यायं कैशोर्ये धनवान्सुखी ॥ ९ ॥
वाणिज्यनिरतो धीरो वैदिकैः पण्डितैर्युतः। सर्वधर्मप्रवेत्ता च गतागतधनैर्युतः ॥ १० ॥
यौवनान्ते कलत्रेण संयुतोऽभून्महायशाः। पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् ॥११॥
मर्मच्छेदनजात्पापात्प्राक्सतां विनतासुत। मर्मच्छेदकृता चैव रोगेण महताकुलः ॥ १२ ॥
प्रमेहज्वरकण्डूवादिज्वरव्रणयुतः क्वचित्। विषमज्वरसंयुक्तो मनोभयसमन्वितः ॥ १३ ॥
पित्तवाताश्रितो नित्यं पुत्रहीनः खगाधिप। लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥ १४ ॥
पलमात्रेण कर्तव्या ज्वरमूर्तिर्हिरण्मयी। षोडशोपचारैश्च पूजयित्वा विधानतः ॥ १५ ॥
सा देया वै विधिज्ञाय पिप्पलस्य प्रदक्षिणाम्। अष्टोत्तरशतावृत्त्या कुर्यात्त्रिंशद्दिनावधि ॥ १६ ॥
प्रागुक्तशर्कराकुम्भं दद्याद्विप्राय धीमते। ब्राह्मणान्भोजयेच्छक्त्या सर्पिष्यात्मानमीक्षयेत् १७ ॥
गायत्रीदशसाहस्रं त्र्यम्बकन्तु तथा जपेत्। होमयेत्तद्दशांशेन तद्दशांशेन भोजयेत् ॥ १८ ॥
एवं कृतविधेः सूत पूर्वजन्माघनाशनम्। नाधयो व्याधयस्तस्य न च ज्वरभयं भवेत ॥ १९ ॥

पुत्रपौत्राभिवृद्ध्या च ह्येधन्ते सम्पदोऽन्वहम् । सप्तपञ्चाशदब्दे तु रिष्टं नाप्नोति मानवः ॥ २० ॥
नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् । व्याधिग्रस्तो भवेन्नित्यं सुखं नाप्नोत्यहर्निशम् २१॥
रिष्टेनैव विनाशः स्यात्सत्यं सत्यं न संशयः । खनागमितवर्षान्तमायुः स्यात्कृतनिष्कृतेः ॥२२॥
जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् । यद्यदन्तर्गतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ २३॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रयस्त्रिंशदुत्तरनवशताधिकसहस्रतमः ॥ १९३३ ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम् । आसीद्वैश्यो महाभागो ह्यंध्रदेशे खगोत्तम ॥ १ ॥
क्रयविक्रयकर्ता च राजमान्यः प्रतापवान् । धनवाहनभोगाढ्यो यशस्वी सर्वधर्मवित् ॥ २ ॥
कृतवान्पुण्यतीर्थेषु स्नानं दानं च शक्तितः । अथो भाविबलात्सूत कृतवानुग्रपातकम् ॥ ३ ॥
विवाहादिषु यज्ञेषु दानेषु च्छलभावतः । विघ्नं तु कृतवान्सूत घोरं पापमुपार्जितम् ॥ ४ ॥
ततो बहुतिथे काले प्राप्तस्तु यमशासनम् । पुण्यात्पुण्यफलं भुक्त्वा पापाच्च नरकांस्तथा ॥ ५ ॥
भुक्त्वा पुण्यावशेषेण स जातो ब्राह्मणोऽधुना । पुण्ये गोदावरीतीरे सर्वदेवनमस्कृते ॥ ६ ॥
मध्यस्वरूपो मतिमान्कृष्णवर्णः प्रतापवान् । नात्युच्चो न लघुः स्थूलो दक्षः सर्वक्रियासु च॥७॥
जनप्रियो बन्धुमित्रसंयुतोऽतिप्रियम्वदः । पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् ॥ ८ ॥
विवाहविघ्नजात्पापात्प्राक्कृतात्पुत्रवर्जितः । तस्य भार्या सुतन्वङ्गी पतिभक्तिपरायणा ॥ ९ ॥
तयापि प्राग्भवे मूढ कृतं यद्गर्भपातनम् । तस्मात्पापान्महाभाग स्थिरगर्भवशात्त्विह ॥ १० ॥
बहुकाले व्यतीते तु न प्रसूतिर्न पातनम् । लग्नात्पञ्चमके सूने क्रूरग्रहविलोकिते ॥ ११ ॥
स जातो ब्राह्मणः सूत चिन्ताक्लेशसमन्वितः । बाल्ये कौमारके चैव सुखी सूनि खगाधिप॥१२॥
क्लेशभाग्भ्रातृदुःखेन युक्तोऽप्राप्तमनोरथः । देशेदेशे रटञ्जन्तुर्न सुखं लभते क्वचित् ॥ १३ ॥
लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् । रुद्रैकादशनीभिश्च रुद्रमेकादशात्मकम् ॥ १४ ॥
पूजयेच्च महारुद्रं सर्वान्कामानिहाप्नुयात् । अथवा शृणुयाद्भक्त्या हरिवंशं विधानतः ॥ १५ ॥
गायत्रीमिष्टसाहस्रं त्र्यम्बकंद्विविधं जपेत् । माद्दिने तु व्रतं कुर्यान्नक्तभुक्तो मत्परायणः ॥ १६ ॥
ब्राह्मणान्भोजयेत्पश्चात्सर्पिष्यात्मानमीक्षयेत् । एवं कृते महाभाग विधिवत्पापशोधने ॥ १७ ॥
पुत्रवान्धनवाँश्चैव जायतेऽसौ सुनिश्चयात् । पञ्चषष्टिमिते वर्षे रिष्टं नाप्नोति मानवः ॥ १८ ॥
आयुस्तस्य तु वर्षाणामशीतिश्चतुरुत्तरम् । नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् ॥ १९ ॥
अनुजः क्लेशभाक्स स्यादरिद्रो जन्मजन्मनि ॥ २० ॥
इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुस्त्रिंशदुत्तरनवशताधिकसहस्रतमः ॥ १९३४ ॥

श्रीसूर्य उवाच ।

वैनतेय महाभाग शृणु तस्य विचेष्टितम् । बभूव चार्बुदे देशे पादजो धर्मकर्मवित् ॥ १ ॥
कृषिवाणिज्यकर्ता च किञ्चिद्वित्तसमन्वितः । राजसेवापरो धीरो मन्त्री शूरो महायशाः ॥ २ ॥
सन्धिविग्रहकर्ता च दाता भोक्ता प्रियम्वदः । दत्तानि तेन दानानि प्रयागे गरुडाग्रज ॥ ३ ॥
गोभूशय्यासनाश्वपक्षाभरणानि च । प्रयागे मृगगे भानौ सत्पात्रेषु विधानतः ॥ ४ ॥
अथो भाविबलात्सूत कृतं यत्कर्मदारुणम् । ब्राह्मणी धर्षिता तेन कामाद्वै कश्यपात्मज ॥ ५ ॥
तत्पतिं घातयामास विषदानेन यत्नतः । तद्द्रव्यं लुण्ठयामास कामलोभेन पापभृत् ॥ ६ ॥

ततो वहुतिथे काले प्राप्तस्तु यममन्दिरम्। भुक्त्वा पुण्यफलं पुण्यात्पापात्पापफलं तथा ॥ ७ ॥
भुक्त्वा पुण्यावशेषेण स जातोऽत्र हिमालये। कृष्णो गौरो मध्यरूपो वर्णोत्तरकुले नरः ॥ ८ ॥
जन्मलग्नात्सुते शुक्रो मित्रस्थे भास्करे तथा। देवार्होऽस्तगतः पुत्रे दुष्टग्रहविलोकिते ॥ ९ ॥
राजसेवापरो मन्त्री शूरो गाम्भीर्यसंयुतः। नात्युच्चो न लघुर्धीरो कृशाङ्गः स्निग्धलोचनः ॥१०॥
सेनापतिर्धनैर्धान्यैर्भृत्यैश्चापि सुसंयुतः। वहुग्रामाधिपो राजप्रियो वाहनसंयुतः ॥ ११ ॥
नैकस्त्रीसंयुतः कामी खड्गजीवनतत्परः। पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् ॥ १२ ॥
चिन्ताक्लेशसमायुक्तस्तथाऽप्राप्तमनोरथः। वाल्ये पित्रोः सुखैर्युक्तः कैशोर्ये तत्सुखोज्झितः १३
गतागतधनैर्युक्तस्तथाब्दशितवत्सरात्। सुखदुःखसमाक्रान्तो रिपुभीत्यावशङ्कितः ॥ १४ ॥
प्राग्भवे ब्राह्मणीसङ्गात्तथा तत्पतिघातनात्। स्वबंशच्छेदको नूनं जातपुत्रविनाशकः ॥ १५ ॥
अहो दैवमहो दैवमिति चिन्तापरोऽनिशम्। लक्षणैरेभिराढ्यस्य प्रायश्चित्तं शृणुष्वथ ॥ १६ ॥
पलमात्रेण कर्तव्यो ब्राह्मणस्तु हिरण्मयः। ब्राह्मणी च तथा सोमस्तथा नारायणस्तथा ॥ १७ ॥
षोडशोरूपचारैस्तु पूजयित्वा विधानतः। ब्राह्मणेभ्यः प्रदेया वै पञ्च गावस्तथा दिशेत् ॥ १८ ॥
गायत्रीमष्टसाहस्रं त्र्यम्बकन्तु तथा जपेत्। सोमसूक्तं तथा जप्त्वा तद्दशांशेन होमयेत्॥ १९ ॥
पार्थिवानां तथा लक्षं शिवानां पूजनं चरेत्। ब्राह्मणान्भोजयेत्पश्चात्सर्पिष्यात्मानमीक्षयेत्॥२०॥
एवंकृतविधेः सूत पूर्वजन्मार्जनाशनम्। न पुत्रमरणं तस्य न रोगभयमेव च ॥ २१ ॥
पुत्रपौत्राभिवृद्ध्या च क्षेधन्ते सम्पदोऽस्य तु। सप्तविंशे तथा वर्षे रिष्टं नैव प्रपद्यते ॥ २२ ॥
आयुस्तस्य त्रिसप्ताब्दं तथाऽप्याकृतनिष्कृतेः। रिष्टेनैव विनाशः स्यात्सत्यं सत्यं न संशयः ॥२३॥
जन्मादिमरणान्तं हि स्वलग्नेशाच्च सूचितम्। यद्यदन्तर्गतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ २४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चत्रिंशदुत्तरनवशताधिकसहस्रतमः ॥ १९३५ ॥

श्रीसूर्य उवाच।

सांयात्रिकाणां यो वित्तभागादभ्यधिकं धनम्। पुरा जग्राह दन्तोत्थकीलितोद्विजते सुत ॥१॥
नीतिशास्त्रोपनिर्णीतव्यवहारपरिच्युतः। दन्तपुष्पाढको नाम तं वाधेत मुखामयः ॥ २ ॥
स गच्छेदुदधेः कूलं सोमपर्वणि च द्विजः। तत्र स्नात्वा च विधिवत्सन्तर्प्य पितृदेवताः ॥ ३ ॥
अभ्यर्च्य विधिना विप्रांस्तेभ्यो दद्याद्विधानतः। फलान्युच्चावचान्यन्तः स्मरन् विष्णुं शिवं च माम्॥४
प्रत्येकं शतशो वापि वित्तव्याधिबलेच्छया। क्रमुकाक्षोटखर्जूरनारिकेलादिकानि च ॥ ५ ॥
एलामरिचमुख्यानि उद्देश्यानि यानि च। तथान्यद्धनधान्यादि श्रद्धया परयान्वितः ॥ ६ ॥
शिवस्यायतने विष्णोर्मम वापि गृहेऽपि वा। कुर्याच्च विधिना सम्यङ्निजपापापनुत्तये ॥ ७ ॥
एवं कृतविधिः सूत मुच्यते मुखरोगतः ॥ ८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्त्रिंशदुत्तरनवशताधिकसहस्रतमः ॥ १९३६ ॥

श्रीसूर्य उवाच।

छिद्राणामप्रकाश्यानां मर्मणां यः प्रकाशकः। विद्वेषणाच्च पैशुन्यात्साधूनामकृतागमम् ॥ १ ॥
शोणितस्तं प्रवाधेत वदनव्याधिरुल्वणः। माघमासे चतुर्दश्यां शुक्लायां नियतः शुचिः ॥ २ ॥
शिवस्यायतने कुर्याज्जपहोमादिसत्क्रियाम्। ते गामिति च मन्त्रेण मर्माणीति च मन्त्रतः॥ ३ ॥
गव्येन सर्पिषा हुत्वा शतमष्टोत्तरं ततः। निवेद्य देवताभ्यान्तां जपहोमादिसत्क्रियाम् ॥ ४ ॥
मुखामयी पुरः स्थित्वा तथा च विहिताञ्जलिः ॥ ५ ॥

मन्त्रः ।

"यन्मया शोषिरो व्याधिः सम्प्राप्तो मुखदूषणः । स मे नश्यतु विश्वेशौ युवयोश्च प्रसादतः"॥६॥
एवमुक्त्वा तयोरग्रे दण्डवत्प्रणमेद्भुवि । ब्राह्मणान्भोजयेत्पश्चात्सर्पिष्यात्मानमीक्षयेत् ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्रिंशदुत्तरनवशताधिकसहस्रतमः ॥ १९३७ ॥

श्रीसूर्य उवाच ।

परैरकृतदोषाणां महतां यः प्रकाशकः । दन्तरक्तं स्रवेत्तस्य मुखदौर्गन्ध्यकारकम् ॥ १ ॥
कुर्यात्प्रतिकृतिं सम्यगादिष्टो दैववेदिना । भोजयेच्च शतं विप्रान्सर्वोपस्करकेण च ॥ २ ॥
अभ्यर्च्य विधिवत्तांस्तु पुरः स्थित्वेति कीर्तयेत् ॥ ३ ॥

मन्त्रः ।

"यन्मया मूढभावेन दौरात्म्यादसतां स्तुतेः। सतां गुणवतां दोषाः संसत्स्वपि पुरस्कृताः ॥४॥
मया प्राप्तो महारोगो मुखदन्तक्षताभिधः । सम्प्रणश्यतु युष्माकं प्रसादाद्धो नमाम्यहम्" ॥५॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टत्रिंशदुत्तरनवशताधिकसहस्रतमः ॥ १९३८ ॥

श्रीसूर्य उवाच ।

भेषजस्यापहर्ता यः शिरोरोगी भवेत्तु सः । पलमात्रेण कर्तव्यं सूर्यबिम्बं हिरण्मयम् ॥ १ ॥
सम्पूज्य विधिवद्भक्त्या दैवज्ञाय निवेदयेत् ॥ २ ॥

मन्त्रः ।

"यन्मया भेषजं ब्रह्मन्हरता पूर्वजन्मनि । सूर्यापराधजं पापं सूर्यावर्तगदाह्वयम् ॥ ३ ॥
तद्विनाशाय तद्बिम्बं सौवर्णं प्रददेऽत्र ते । सूर्यापराधतो व्याधिर्दानेनानेन नश्यतु" ॥ ४ ॥
इत्युक्त्वा ततो दद्याद्ब्राह्मणान्भोजयेत्ततः । सर्पिष्यात्मानमालोक्य भोजयेदिष्टबन्धुभिः ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनचत्वारिंशदुत्तरनवशताधिकसहस्रतमः ॥ १९३९ ॥

श्रीसूर्य उवाच ।

अनिच्छया प्रमादेन प्राणिनेत्रोपघातजः । गम्भीरो जायते व्याधिरव्यथो नेत्रनाशकः ॥ १ ॥
सुवर्णद्वयमात्रेण विष्णुमूर्तिं च निर्मिताम् । दद्याद्वेदविधिज्ञाय नेत्ररोगप्रशान्तये ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चत्वारिंशदुत्तरनवशताधिकसहस्रतमः ॥ १९४० ॥

श्रीसूर्य उवाच ।

हंसहन्तुश्च पक्षीन्द्र श्वेतकुष्ठं प्रसर्पति । तेन यत्नेन कर्तव्यो राजतो हंस उत्तमः ॥ १ ॥
त्रिंशत्पलमितः सम्यक्पूजितो ब्रह्मदैवतः । दद्यात्तं च विधिज्ञाय श्वेतकुष्ठस्य शान्तये ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकचत्वारिंशदुत्तरनवशताधिकसहस्रतमः ॥ १९४१ ॥

श्रीसूर्य उवाच ।

श्वेतवस्त्रापहर्ता च श्वेतमण्डलवान्भवेत् । राजतं च रथं दद्यात्पलषोडशसम्मितम् ॥ १ ॥
श्वेतमण्डलनाशाय दैवज्ञाय कुटुम्बिने ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विचत्वारिंशदुत्तरनवशताधिकसहस्रतमः ॥ १९४२ ॥

श्रीसूर्य उवाच।

प्राग्भवे कांस्यहारी यः पुरुषोऽप्यत्र जन्मनि। पुण्डरीकाख्यकुष्ठेन पीड्यते बहुपीडया ॥ १ ॥
स हि दद्याद्विधानेन स्थूलं वै कांस्यभाजनम्। द्विपञ्चाशत्पलमितं पुण्डरीकस्य शान्तये ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽष्टाचत्वारिंशदुत्तरनवशताधिकसहस्रतमः ॥ १९४३ ॥

श्रीसूर्य उवाच।

ताम्बूलानि बहून्येव वैष्णवेभ्यः प्रदापयेत्। विष्णुप्रीत्यै खगश्रेष्ठ श्वेतकुष्ठस्य शान्तये ॥ १ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽष्टाचत्वारिंशदुत्तरनवशताधिकसहस्रतमः ॥ १९४४ ॥

अरुण उवाच।

आधिव्याधिर्महादुःखं येन येन च कर्मणा। तत्सर्वं विस्तराद्ब्रूहि देवानामग्रणीर्मम ॥ १ ॥

श्रीसूर्य उवाच।

साधुसङ्गसमायुक्तो देवब्राह्मणपूजकः। मन्यते सर्वदा सम्यग्यैः कैरादेशकारिभिः ॥ २ ॥
तदान्यो गीतकीर्तिश्च सततं राजपूजितः। यत्किञ्चिद्दृश्यते वह्निर्यत्प्रोक्तमिव जायते ॥ ३ ॥
नानादुःखसमायुक्ता दृश्यन्ते विविधा रुजः। क्षात्रवंशसमुद्भूतः स्वग्रामाद्यधिपो भवेत् ॥ ४ ॥
न लभ्यते क्वचिद्ग्रासं क्षत्रियो धर्मसाधनैः। ग्रामः प्रज्वलितस्तस्य ज्वलिता बालगोसुताः ॥५॥
तस्यापि ज्वलनोद्भोरान्नरकं प्राप्य दारुणम्। किंचित्कालक्रमेणैव भुवि स प्राप्स्यति क्रमात्॥६॥
भुक्तशेषावसाने तु भुवि जातो विहङ्गमः। त्रिषु जन्मस्वनपत्यः कुष्ठभाग्व्रणवान्सदा ॥ ७ ॥
चतुर्थे काकवन्ध्याया मृतापत्यं भविष्यति। पञ्चमे जन्तुपि प्राप्ते जायते विकृतिः प्रजा ॥ ८ ॥
ज्वलिताग्नेरिदं चिह्नं मन्दाग्निस्तस्य जायते। शोथमन्दाग्निशूलादि कुष्ठं गोवधतो भवेत् ॥ ९ ॥
वातोऽग्निना च जायेत नानावायुविधायकः। शिशूनां तस्य जायंते ह्यतीसारादिका गदाः॥ १० ॥
जायते यौवने पुत्रः परं पुत्रो न दृश्यते। मातुलान्याः स्वगोत्राणां पतिताचारवर्तनम् ॥ ११ ॥

अरुण उवाच।

एवं च कर्मणां तेषां निष्कृतिं चाञ्जसा प्रभो। समस्तपापशान्त्यर्थं ब्रूहि विस्तरतो मम ॥१२॥

श्रीसूर्य उवाच।

साधु पृष्टं महाबाहो प्रश्नो लोके हि दुर्लभः। तेनतेन त्वियं कार्या निष्कृतिर्यांधुनोच्यते ॥ १३॥
हैरण्यां प्रददेद्धेनुं वत्सं तं च तुरीयकम्। श्रवणं हरिवंशस्य पुस्तकं वा द्विजन्मने ॥ १४ ॥
पूर्वकर्मविनाशाय पूजयेच्च यथाविधि। भोजयेच्च शतं विप्रान्नानान्नरसपायसैः ॥ १५ ॥
एवं यः कुरुते वत्स धर्मं कर्म सुसिद्ध्यति। न करोति यदा मोहान्न सिद्ध्यन्ति तदाशयाः १६

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायःपञ्चचत्वारिंशदुत्तरनवशताधिकसहस्रतमः ॥ १९४५ ॥

श्रीसूर्य उवाच।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम्। देशे प्रयागसंज्ञे तु ब्राह्मणो धर्मवित्तमः ॥ १ ॥
दत्तानि तेन दानानि गोभूद्रव्यश्वासनानि च। प्रयागे मृगगे भानौ ब्राह्मणेभ्यः स्वशक्तितः ॥२॥
अथो भाविबलात्सूत कृतं कर्मातिदारुणम्। अर्थलुब्धेन मनसा मारितः स्वसहोदरः ॥ ३ ॥
ततो बहुतिथे काले स गत्वा यमशासनम्। पुण्यपापफलं भुक्त्वा पूर्वपुण्यावशेषतः ॥ ४ ॥
काश्यां जातो द्विजश्रेष्ठो मेषे लग्ने खगाधिप। लग्नात्पञ्चमभावस्थे दुष्टखेटैर्विलोकिते ॥ ५ ॥

स मध्यरूपो मतिमान्किञ्चिद्वचापारसंयुतः । नात्युच्चो नातिदीर्घश्च गौरवर्णः प्रतापवान् ॥ ६ ॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । प्राग्भवे मातृहननात्तथा तद्द्रव्यहारणात् ॥ ७ ॥
तेन कर्मविपाकेन मृतवत्सोऽत्र जन्मनि । स स्वकर्मविशुद्ध्यर्थं प्रायश्चित्तं च कारयेत् ॥ ८ ॥
पलेन तु सुवर्णेन धेनुं कुर्याद्धिरण्मयीम् । गन्धपुष्पैः समभ्यर्च्य विधिज्ञाय प्रदापयेत् ॥ ९ ॥
भूमिदानं ततः कुर्याद्वेदवेदांगपारगे । वस्त्रैकविधिना स्नायाद्गृहं दत्त्वा द्विजातये ॥ १० ॥
शतं च भोजयेद्विप्रान्गां दद्यात्स पयस्विनीम् । एवं यः कुरुते पक्षिंस्तस्य पापं व्यपोहति ॥ ११ ॥
जीवत्पुत्रः सुदीर्घायुः पितृभक्तिपरायणः । कुसप्ततिमितायुः स्यात्प्रायश्चित्ते कृते त्विह ॥ १२ ॥
प्रायश्चित्तेऽकृते सूत मुनिभूतामितेऽब्दके । रिष्टेनैव विनाशः स्याद्ध्रुवं चाकृतनिष्कृतेः ॥ १३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्चत्वारिंशदुत्तरनवशताधिकसहस्रतमः ॥ १९४६ ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम् । आसीत्क्षत्री महाभाग प्रयागे देशके शुभे ॥ १ ॥
धर्मकर्मसमायुक्तो राजमान्यः प्रतापवान् । दत्तानि तेन दानानि प्रयागे मृगगे रवौ ॥ २ ॥
सुवर्णाभरणानाञ्च गोशय्यावसनानि च । अथो भाविबलात्सूत कृतं कर्मातिदारुणम् ॥ ३ ॥
अमात्यतामदेनैव राजानेनापमानितः । पुत्रैः सार्धं मतं कृत्वा स राजा विनिपातितः ॥ ४ ॥
विशेषेण प्रपञ्चेन घोरं पापमुपार्जितम् । ततो बहुतिथे काले स गत्वा यमशासनम् ॥ ५ ॥
पुण्यपापफलं भुक्त्वा स जातोऽत्रापि बाहुजः । वृषे लग्ने सुतस्थाने क्रूरग्रहविलोकिते ॥ ६ ॥
क्रूरयुक्ते च पक्षीन्द्र वाराणस्यां प्रतापवान् । स तु मध्यमरूपाढ्यो धनवान्भ्रातृसंयुतः ॥ ७ ॥
नात्युच्चो न लघुः स्थूलो गौरवर्णोऽतिबुद्धिमान् । पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित्॥८॥
चिन्ताक्लेशसमायुक्तस्तथाऽप्राप्तमनोरथः । प्राग्राजघातजात्पापात्सन्तानसुखवर्जितः ॥ ९ ॥
क्षयरोगान्वितो दुःखी धीरोऽपि धनवानपि । लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥१०॥
निष्कत्रयं सुवर्णस्य दशनिष्कं च राजतम् । देयं यत्नाद्द्विजातिभ्यस्तस्य पापं विनश्यति ॥ ११ ॥
वस्त्रैकविधिना स्नायान्महारुद्रजपादिकम् । कारयेद्धोमयेद्धुत्तया शतं विप्रांश्च भोजयेत् ॥ १२ ॥
प्रदद्याद्दक्षिणां तेभ्यो गां दद्यात्स पयस्विनीम् । य एवं कुरुते तार्क्ष्य सर्वपापैः प्रमुच्यते ॥१३॥
सुतं च लभते तत्र गुणयुक्तं चिरायुषम् । नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् ॥ १४ ॥
अपुत्रो रोगभाग्नित्यं पञ्चाशन्मितवत्सरे । रिष्टेन वै विनाशः स्याद्दुःखीस्याज्जन्मजन्मनि ॥ १५ ॥
प्रायश्चित्ते कृते ह्यायुस्त्रिसप्तत्यब्दसम्मितम् ॥ १६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तचत्वारिंशदुत्तरनवशताधिकसहस्रतमः ॥ १९४७ ॥

श्रीसूर्य उवाच ।

वैनतेय महाभाग शृणु तस्य विचेष्टितम् । बभूव वैश्यो धनवान्प्रयागे देशके शुभे ॥ १ ॥
धर्मकर्मसमायुक्तः कृषिवाणिज्यतत्परः । प्रयागे वृगगे भानौ स्नानं दानं च शक्तितः ॥ २ ॥
कृतवान्स व्यतीते तु किञ्चित्काले खगोत्तम । कृतवान्दारुणं कर्म जघान द्विजबालकम् ॥ ३ ॥
वयोवर्षाणि चत्वारि सप्त मासा दिनत्रयम् । लोभमोहवशाद्भक्त्या कृता जग्राह भूषणम् ॥ ४ ॥
ततो बहुतिथे काले स गतो यमशासनम् । पुण्यात्पुण्यफलं भुक्त्वा पूर्वपुण्यावशेषतः ॥ ५ ॥
जातो वाराणसीक्षेत्रे वैश्यो धनसमन्वितः । स तु मध्यमरूपाढ्यो गौरवर्णः प्रतापवान् ॥ ६ ॥

श्लेष्मलोऽप्यनिलव्याधिसंयुतो बुद्धिमान्खग । जातोऽत्र मिथुने लग्ने लग्नात्पञ्चमसप्तमे ॥ ७ ॥
कर्मस्थाने क्रूरखेटैर्दृष्टे वाथ सुसंयुते । पितृमातृसुखैर्युक्तो भ्रातृबन्धुसुहृद्युतः ॥ ८ ॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । विप्रपुत्रवधात्पापात्प्राग्भवे कश्यपात्मज ॥ ९ ॥
तद्द्रव्यहरणात्सूत मृतवत्सोऽत्र जन्मनि । चिन्ताक्लेशसमायुक्तस्तथाऽप्राप्तमनोरथः ॥ १० ॥
लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् । महारुद्रजपं कुर्याद्गायत्रीं त्र्यम्बकं तथा ॥ ११ ॥
श्रवणं हरिवंशस्य कुर्यात्पुष्करिणीं ततः । प्रतिस्थाप्य विधानेन होमयेत्तद्दशांशतः ॥ १२ ॥
हेमनिष्कचतुष्कं तु दद्याद्वेदविदे खग । शतं च भोजयेद्विप्रान्गां दद्यात्स पयस्विनीम् ॥ १३ ॥
एवं कृत्वा खगाधीश स्वस्य पापं व्यपोहति । लभते च सुतांस्तार्क्ष्य सुखं प्राप्नोति वाञ्छितम् १४
खनागमितवर्षान्तमायुस्तस्य प्रकीर्तितम् । नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् ॥ १५ ॥
खभूतमितवर्षे तु रिष्टेनैव विनश्यति ॥ १६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टचत्वारिंशदुत्तरनवशताधिकसहस्रतमः ॥ १९४८ ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम् । बभूव पादजः सूत प्रयागे देशके शुभे ॥ १ ॥
धर्मकर्मसमायुक्तो गवां पालनतत्परः । कृषिवाणिज्यकर्ता च किंचिद्वित्तसमन्वितः ॥ २ ॥
प्रयागे मृगगे भानौ स्नानं दानं च शक्तितः । कृतवान्भाविनोऽर्थस्य वैभवात्कर्म दारुणम् ॥ ३ ॥
कृतवान् पक्षिराजेन्द्र गवां घातकरो भवेत् । सन्ध्याकाले तु सम्प्राप्ते स्वागतं गोधनं गृहे ॥ ४ ॥
स्ताश्च गा आश्रमं प्राप्ता एकां कण्ठे बबन्ध ह । खुराग्रैश्चूर्णिते पादे स्वपादेनाहनत्तदा ॥ ५ ॥
रोषयुक्तेन मनसा भृशमापीडिता खग । मुसलेन तु पक्षीन्द्र पुनरेवापि सा हता ॥ ६ ॥
तत्काले सा मृता गौश्च पापमुग्रमुपार्जितम् । ततो बहुतिथे काले प्राप्य धर्मपुरं नरः ॥ ७ ॥
पुण्यात्पुण्यफलं भुक्त्वा पापात्पापफलं तथा । भुक्त्वा पुण्यावशेषेण स जातोऽत्रापि पादजः ॥८॥
वाराणस्यां महाक्षेत्रे पुण्ये शम्भुसमाश्रिते । कर्कलग्ने सुतस्थाने दुष्टखेटावलोकिते ॥ ९ ॥
स मध्यरूपो मतिमान्पितृमातृसुखान्वितः । गौरो धनसमायुक्तो भृत्यवाहनसंयुतः ॥ १० ॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । पूर्वं गोघातजात्पापान्मृतापत्योऽत्र जन्मनि ॥११॥
चिन्ताक्लेशसमायुक्तस्तथाऽप्राप्तमनोरथः । लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥ १२ ॥
चतुर्निष्कसुवर्णेन धेनुं वै कारयेद्दृढाम् । तुर्यांशवत्ससंयुक्तां वस्त्रालंकारभूषिताम् ॥ १३ ॥
दद्याद्वेदविधिज्ञाय दरिद्राय कुटुम्बिने । वस्त्रैकविंधिना स्नायाद्वेदोक्तविधिकाम्यया ॥ १४ ॥
शतं च भोजयेद्विप्रान्गां दद्यात्स पयस्विनीम् । य एवं कुरुते वत्स तस्य पापं व्यपोहति ॥ १५॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनपंचाशदुत्तरनवशताधिकसहस्रतमः ॥ १९४९ ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम् । ब्राह्मणोऽभूत्खगश्रेष्ठ प्रयागे देशके शुभे ॥ १ ॥
धर्मकर्मसमायुक्तो देवद्विजपरायणः । प्रयागे मृगगे भानौ स्नानं दानं च शक्तितः ॥ २ ॥
कृतवान्भाविनोऽर्थस्य वै बलात्कर्म दारुणम् । कृतवान्पक्षिशार्दूल तापसो गृहमागतः ॥ ३ ॥
जितेन्द्रियोऽपि सधनो धनं तस्मै समर्पितम् । तीर्थावगाहनान्ते च ह्यागतः पुनराश्रमम् ॥ ४ ॥
धनं च प्रार्थितं तेन न च तत्संप्रदापितम् । चौरेण तद्धृतं सर्वं तस्याग्रे भाषितं तदा ॥ ५ ॥

विश्वामित्रो गतो योगी शापं दत्त्वा सुदुःसहम् । वंशच्छेदो भवेच्छीघ्रं न पुनर्जीवते शिशुः ॥६॥
दिनान्तरे च संप्राप्तो मम पुत्रगृहं प्रति । पुण्यपापफलं भुक्त्वा पूर्वपुण्यावशेषतः ॥ ७ ॥
काश्यां जातो महाभागो ब्राह्मणो धर्मकर्मवित् । सिंहलग्ने सुतस्थाने दुष्टखेटैः समन्विते ॥ ८ ॥
स तु मध्यमरूपाढ्यो गौरवर्णः प्रतापवान् । धनवाहनभोगाढ्यो दासीदासजनान्वितः ॥ ९ ॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । प्राग्भवे तापसधनहरणोद्भवपापतः ॥ १० ॥
तच्छापात्पतगश्रेष्ठ मृतपुत्रोऽत्र जन्मनि । लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥ ११ ॥
निष्कद्वयं सुवर्णं च दत्त्वा वेदांगपारगे । ताम्रं शतपलं दद्यात्कमण्डलुनिमित्तकम् ॥ १२ ॥
वस्त्रैकविधिना स्नायाद्रुद्रैकादशकं जपेत् । धेनुं दद्याद्विधिज्ञाय सवत्सां च पयस्विनीम् ॥ १३ ॥
शतं च भोजयेद्विप्राञ्छक्त्या पञ्चाशदेव वा । एवं कृत्वा खगश्रेष्ठ सन्तानं लभते ध्रुवम् ॥ १४ ॥
जीवत्पुत्रः सुदीर्घायुः पितृभक्तं गुणान्वितम् । त्रिसप्ततिमिताब्दायुः स्यादेव विनतात्मज ॥ १५ ॥
रिष्टेन षष्टिवर्षे तु नश्यत्यकृतनिष्कृतिः ॥ १६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चाशदुत्तरनवशताधिकसहस्रतमः ॥ १९५० ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम् । आसीद्बाहुजवंशीयः प्रयागे देशके शुभे ॥ १ ॥
धर्मकर्मसमायुक्तः कृषिवाणिज्यतत्परः । दत्तानि तेन दानानि प्रयागे मृगगे रवौ ॥ २ ॥
गोभूशय्यासनाद्यन्नवसनाभरणानि च । अथो भाविबलात्सूत कृतं कर्मातिदारुणम् ॥ ३ ॥
भगिनीपतिघाताख्यं चकारासौ सुदुष्करम् । दन्तोच्छिष्टेन दोषेण पाषाणेनाहनत्पुरा ॥ ४ ॥
ज्ञात्वा मृत्युवशं प्राप्तमात्मघातं चकार ह । स गत्वा धर्मसदनं भुक्त्वा पुण्यफलं तदा ॥ ५ ॥
पापात्पापफलं भुक्त्वा पूर्वपुण्यावशेषतः । काश्यां जातो महाभागो बाहुजोऽतिप्रतापवान् ॥ ६ ॥
कन्यालग्ने सुतस्थाने दुष्टवेटसमन्विते । स तु मध्यमरूपाढ्यो धनवाहनभोगयुक् ॥ ७ ॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् मनोदुःखैः समायुक्तस्तथाऽप्राप्तमनोरथः ॥ ८ ॥
प्राग्भवे चात्मघाताच्च भगिनीपतिघातजात् पापादत्र खगश्रेष्ठ मृतवत्सोऽपि दुर्मनाः ॥ ९ ॥
लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् । गर्भो न वर्धते तस्य जीवन्वा म्रियते पुनः ॥ १० ॥
तस्य कर्मविशुद्ध्यर्थं प्राजापत्यानि वै दश । श्रवणं हरिवंशस्य महारुद्रजपादिकम् ॥ ११ ॥
ब्राह्मणोद्वाहनं कुर्यात्कन्यादानेन शुद्ध्यति । शतं च भोजयेद्विप्रान्दद्याद्गां सुपयस्विनीम् ॥ १२ ॥
एवं कृत्वा खगाधीश पुत्रं प्राप्नोति वाञ्छितम् । पितृभक्तं गुणाढ्यञ्च जीवंतञ्छतवत्सरान् ॥ १३ ॥
अकृत्वा तु खगश्रेष्ठ विधिना पापशोधनम् । रिष्टेनैव विनाशः स्यात्पञ्चाशन्मितवत्सरे ॥ १४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकपंचाशदुत्तरनवशताधिकसहस्रतमः ॥ १९५१ ॥

श्रीसूर्य उवाच ।

वैनतेय महाभाग शृणु तस्य विचेष्टितम् ।
बभूव पतगश्रेष्ठ प्रयागे शुभदेशके । वैश्यो धनसमृद्धस्तु भृत्यवाहनसंयुतः ॥ १ ॥
दत्तानि तेन दानानि पर्वस्वपि च शक्तितः । प्रयागे मृगगे भानौ गोभूशय्यासनानि च ॥ २ ॥
अथो भाविबलात्सूत कृतं कर्मातिदारुणम् । चौरैः सह मिलित्वा तु द्विजगोहरणं कृतम् ॥ ३ ॥
नवप्रसूतिकालाच्च वासरे चोनविंशके । वनमध्यगता गाव आहारार्थं च काश्यपे ॥ ४ ॥

निर्गतो वनमध्ये च स च गोहरणं चरेत्। स्तनपानवियोगेन तस्या वत्सो मृतस्तदा ॥ ५ ॥
गवां वत्सवियोगेन महत्पापमुपार्जितम्। ततो वहुतिथे काले स गत्वा यमशासनम् ॥ ६ ॥
पुण्यपापफलं भुक्त्वा पूर्वपुण्यावशेषतः। काश्यां जातो वणिक्श्रेष्ठस्तुलालग्ने सुते त्वगौ ॥ ७ ॥
स तु मध्यमरूपाढ्यो गौरवर्णः प्रतापवान्। पितृमातृसुतैर्युक्तो भ्रातृवन्धुसमन्वितः ॥ ८ ॥
पुण्यादिदं तथा पापाल्लोभयुक्तोऽल्पधर्मकृत्। गवां वत्सवियोगाख्यपापात्प्राग्भवजात्सुत ॥ ९ ॥
मृतवत्सो रोगयुक्तः क्लेशभाग्धनवानपि। लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥ १० ॥
पलेन तु सुवर्णेन धेनुं कुर्याद्धिरण्मयीम्। चतुर्थांशेन वत्सां वै कृत्वालङ्कारभूषणैः ॥ ११ ॥
ब्राह्मणोद्वाहनं कुर्याद्वुद्रैकादशकं जपेत्। पयस्विनीं च गां दद्यात्पञ्चाशद्विजभोजनम् ॥ १२ ॥
वस्त्रैकविधिना स्नानं यथोक्तविधिना चरेत्। एवं कृत्वा खगश्रेष्ठ सन्तानं लभते ध्रुवम् ॥ १३ ॥
जीवत्पुत्रः स दीर्घायुः सुखसन्तानवान्भवेत्। खवेदमितके वर्षे रिष्टं नाप्नोति तस्य तु ॥ १४ ॥
त्रिसप्ततिमितायुः स्यादकृते पापशोधने। रिष्टेनैव विनाशः स्यादकृते पापशोधने ॥ १५ ॥
रिष्टेनैव विनाशः स्याद्दुःखी स्याज्जन्मजन्मनि ॥ १६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विपंचाशदुत्तरनवशताधिकसहस्रतमः ॥ १९५२ ॥

श्रीसूर्य उवाच।

वैनतेय महाभाग शृणु तस्य विचेष्टितम्। आसीत्प्रयागदेशे तु पादजो धर्मकर्मवित् ॥ १ ॥
दत्तानि तेन दानानि प्रयागे मृगगे रवौ। वस्त्रभूषणशय्यान्नसुवर्णाभरणानि च ॥ २ ॥
अथो भाविवलात्सूत पत्नीं हत्वा स गर्भिणीम्। स्त्रीहत्यया महापापं घोरमाप विमूढधीः ॥ ३ ॥
भ्रूणहत्याभिधं पापं कृतं कर्मातिदारुणम्। भार्याद्वयं पूर्वभवे ह्यभवत्साम्यवर्जितम् ॥ ४ ॥
तयोर्विरोधादेकां तु सोऽवधीद्वै सुगर्भिणीम्। अकृपा च कनिष्ठायां ज्येष्ठा च कृपयान्विता ॥५॥
कृपावत्या कृतं कूटं कनिष्ठा चैव घातिता। गर्भयुक्ता च सा नारी सहसा मरणं गता ॥ ६ ॥
ततो वहुतिथे काले स गत्वा यमशासनम्। पुण्यपापफलं भुक्त्वा पूर्वपुण्यावशेषतः ॥ ७ ॥
काश्यां जातो महाभाग पादजो धर्मकर्मवित्। लग्ने वृश्चिकसंज्ञे तु सुतभावे त्वगौ विधौ ॥ ८ ॥
स तु मध्यमरूपाढ्यो पितृमातृसुखोज्झितः। पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् ॥ ९ ॥
चिन्ताक्लेशसमायुक्तो वाल्ये पित्रोः सुखोज्झितः। प्राग्भवे गर्भिणीघातपातकान्नास्ति तत्सुतः१०
मृतवत्सोऽत्र जनुषि दुःखभाग्धनवानपि। लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् ॥ ११ ॥
वस्त्रैकविधिना स्नानं महारुद्रजपादिकम्। श्रवणं हरिवंशस्य कुर्याद्धेनुं हिरण्मयीम् ॥ १२ ॥
पलमात्रं प्रदद्याच्च विधिज्ञाय खगाधिप। शतं च भोजयेद्विप्रान्गां दद्याच्च पयस्विनीम् ॥ १३ ॥
एवं कृत्वा पक्षिराज पुत्रं च लभते ध्रुवम्। जीवत्पुत्रः स दीर्घायुः पितृभक्तो गुणान्वितः ॥ १४॥
कुसप्ततिमितायुः स्यात्सुखी भवति मानवः। नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् ॥१५॥
खभूतामितवर्षे तु रिष्टेनैव विनश्यति। प्रायश्चित्ते कृते सूत रिष्टं नाप्नोति निश्चितम् ॥ १६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिपंचाशदुत्तरनवशताधिकसहस्रतमः ॥ १९५३ ॥

श्रीसूर्य उवाच।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम्। बभूव ब्राह्मणो विद्वान्प्रयागे देशके शुभे ॥ १ ॥
धनधान्यसमायुक्तो ज्ञानवान्धर्मकर्मवित्। दत्तानि तेन दानानि प्रयागे मृगगे रवौ ॥ २ ॥

पर्वस्वापे च विप्रेभ्यः स्वर्णान्नवसनानि च । अथो भाविवलात्सूत कृतं कर्मातिदारुणम् ॥ ३ ॥
ब्राह्मणी विधवाप्येका वसन्ती प्रतिवेशके । वृद्धा तस्यास्तु गौरेका हृता तेन तु मानद ॥ ४ ॥
अप्रसूता च पुष्टाङ्गी एका सा द्वितीया न हि । तस्या धेनोर्वियोगेन मृता शोकप्रपीडिता ॥ ५ ॥
ततो वहुतिथे काले प्राप्तस्तु यमशासनम् । पुण्यपापफलं भुक्त्वा पूर्वपुण्यावशेषतः ॥ ६ ॥
वाराणसीमहाक्षेत्रे धनुर्लग्ने सुते त्वगौ । ब्राह्मणो मध्यरूपाढ्यो नात्युच्चो न लघुर्घृणी ॥ ७ ॥
धनवाहनभोगाढ्यो गौरवर्णः प्रतापवान् । पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् ॥ ८ ॥
चिन्ताक्लेशसमायुक्तो हरणात्तत्र गोरिह । मृतवत्सोग्निमान्द्याख्यरुग्युक्तोऽभूत्स्वगेश्वर ॥ ९ ॥
जातमात्रास्तु नश्यन्ति द्वित्रिमासगतास्तथा ॥ १० ॥

अरुण उवाच ।

वृथा गृहं धनं धान्यं पुत्रजन्म विनाखिलम् । प्रायश्चित्तं कथन्देव येन पुत्रः प्रजायते ॥ ११ ॥

श्रीसूर्य उवाच ।

तस्य कर्मविशुद्ध्यर्थं प्राजापत्यानि वै दश । वस्त्रैकविधिना स्नायाद्रुद्रैकादशकं जपेत् ॥ १२ ॥
सदुग्धां चैव गां दद्यात्पञ्चाशद्विजभोजनम् । एवं कृते तु पक्षीन्द्र पुत्रवान्धनवान्भवेत् ॥ १३ ॥
जीवत्पुत्रः सुदीर्घायुरशीतिमितवत्सरम् । अकृते तु यथाशक्ति प्रायश्चित्ते यथोदिते ॥ १४ ॥
रिष्टेन निधनं याति पञ्चाशन्मितवत्सरे ।

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःपंचाशदुत्तरनवशताधिकसहस्रतमः ॥ १९५४ ॥

श्रीसूर्य उवाच ।

वैनतेय महाभाग शृणु तस्य विचेष्टितम् । आसीत्क्षत्री महावाहो प्रयागे देशके शुभे ॥ १ ॥
धर्मकर्मसमायुक्तः कृषिवाणिज्यतत्परः । प्रयागे मृगगे भानौ गोशय्यावसनानि च ॥ २ ॥
दत्तवान्ब्राह्मणेभ्यश्च ह्यन्नदानं स्वशक्तितः । ततो भाविवलात्सूत मृगीं हत्वा तु गर्भिणीम् ॥ ३ ॥
कान्तया प्रेरितस्तेन ह्यामिषार्थं च काश्यपे । स्त्रिया च प्रेर्यमाणेन ह्यामिषार्थं धृता सती ॥ ४ ॥
सगर्भा च सुपुष्टाङ्गी द्वौ गर्भावुदरे स्थितौ । शरं सुमोच रोषेण वाणो लग्नश्च लक्ष्मणात् ॥ ५ ॥
शरीरे भिद्यमाने च सहसा मरणं गता । ततो वहुतिथे काले स गत्वा यमशासनम् ॥ ६ ॥
पुण्यपापफलं भुक्त्वा पूर्वपुण्यावशेषतः । काश्यां जातो महाक्षेत्रे मृगलग्ने च वाहुजः ॥ ७ ॥
लग्नात्पञ्चमभावे च सप्तमे क्रूरखेटकैः । विलोकिते गौरकृष्णो मध्यरूपः प्रतापवान् ॥ ८ ॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । प्राग्भवे गर्भिणीघातात्तस्या मांसस्य भक्षणात् ॥ ९ ॥
तद्वत्सभक्षणात्पापात्स जातो गर्भनाशयुक् । तस्य भार्यायाश्च वहु गर्भनाशस्ततोऽण्डज ॥ १० ॥
तस्य कर्मविशुद्ध्यर्थं प्रायश्चित्तं च कारयेत् । निष्कत्रयसुवर्णेन वायुं कृत्वा तु दापयेत् ॥ ११ ॥
विधिज्ञाय सुवर्णेन पलमात्रेण काश्यपे । गां कृत्वा शिशुयुतां दद्याद्वेदाङ्गपारगे ॥ १२ ॥
वस्त्रैकविधिना स्नायाद्रुद्रैकादशकं जपेत् । श्रवणं हरिवंशस्य विप्रोढाहं च कारयेत् ॥ १३ ॥
शतं च भोजयेद्विप्रान्प्राग्गां दद्यात्पयस्विनीम् । य एवं कुरुते कर्म तस्य पापं व्यपोहति ॥ १४ ॥
लभते स सुतांस्ताक्ष्यं निरामयसुरूपिणः । त्रिसप्ततिमिताब्दायुः प्रायश्चित्ते कृतेऽधुना ॥ १५ ॥
मुनिवेदमिताब्दे तु रिष्टेन निधनं व्रजेत् ॥ १६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायःपंचपंचाशदुत्तरनवशताधिकसहस्रतमः ॥ १९५५ ॥

श्रीसूर्य उवाच।

वैनतेय महावाहो शृणु तस्य विचेष्टितम्। प्रयागे देशके पुण्ये वैश्यो धनसमन्वितः॥ १॥
बभूव कृषिवाणिज्यबहुगोपालने रतः। दत्तवान्मृगगे भानौ प्रयागे गरुडाग्रज॥ २॥
अन्नदानं हि विप्रेभ्यो गोशय्यावसनानि च। अथो भाविबलात्सूत कृतं कर्मातिदुष्करम्॥ ३॥
रोषयुक्तेन मनसा वृषभस्तेन मारितः। गावश्चापि सगर्भाश्च पालितो वृषभस्तदा॥ ४॥
पाषाणेन हतस्तत्र वृषभो निधनं गतः। स तेन कर्मणा युक्तः प्राप्तो धर्मपुरं प्रति॥ ५॥
पुण्यपापफलं भुक्त्वा पूर्वपुण्यावशेषतः। काश्यां जातो वणिक्पुत्रः कुम्भलग्ने सुते ग्रहैः॥ ६॥
दुष्टैर्विलोकिते भृत्यधनवाहनसंयुतः। पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित्॥ ७॥
प्राग्भवे वृषघाताच्च सन्तानं नैव पश्यति। तस्य कर्मविशुद्ध्यर्थं प्रायश्चित्तं च कारयेत्॥ ८॥
वापीकूपतडागादि कुर्यात्पुष्करिणीं तथा। निष्कत्रयं सुवर्णस्य दत्त्वा वेदाङ्गपारगे॥ ९॥
वस्त्रैकविधिना स्नायाद्रुद्रैकादशकं जपेत्। वृषभं दापयेत्तत्र सर्वोपस्करसंयुतम्॥ १०॥
शतं च भोजयेद्विप्रान्गां दद्यात्स पयस्विनीम्। य एवं कुरुते सूत सन्तानं लभते ध्रुवम्॥ ११॥
जीवत्पुत्रः स दीर्घायुः सुखसौभाग्यवान्भवेत्। अशीत्यब्दायुरुरगाच्चौराच्च मृतिरन्यथा॥ १२॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्पञ्चाशदुत्तरनवशताधिकसहस्रतमः॥ १९९६॥

श्रीसूर्य उवाच।

वैनतेय महावाहो शृणु तस्य विचेष्टितम्। बभूव क्षत्रियो धीरो प्रयागे देशके शुभे॥ १॥
धनवाहनभोगाढ्यो राजमान्यः प्रतापवान्। दत्तानि तेन दानानि प्रयागे मृगगे रवौ॥ २॥
गोभूशय्यासनान्नाश्ववसनाभरणानि च। अथो भाविबलात्सूत कृतं कर्मातिदारुणम्॥ ३॥
तद्गृहस्य समीपे तु ब्राह्मणी विधवाऽवसत्। स च कामवशात्तस्यामकरोद्व्यभिचारकम्॥ ४॥
पश्चाद्दैववशात्तस्या गर्भो जातः खगाधिप। पञ्चमासात्मको गर्भो लोके प्राकट्यमाप वै॥ ५॥
औषधस्य प्रपञ्चेन गर्भपातं चकार ह। स्वभार्यायाः प्रपञ्चेन तेन गर्भस्तु पातितः॥ ६॥
स तेन कर्मणा युक्तः प्राप्तस्तु यमशासनम्। पुण्यपापफलं भुक्त्वा पूर्वपुण्यावशेषतः॥ ७॥
काश्यां जातो मुखोद्भूतो मीनलग्ने खगाधिप। लग्नात्पञ्चमगे क्रूरे सप्तमे क्रूरभावतः॥ ८॥
स तु मध्यमरूपाढ्यो विद्वान्सर्वप्रियम्वदः। धनी मानी महाप्राज्ञो गौरवर्णः प्रतापवान्॥ ९॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित्। प्राग्भवे विधवायां तु व्यभिचारात्तु मानद॥ १०॥
तद्गर्भपातजात्पापात्सं गर्भं नैव पश्यति। म्रियन्ते बालकाः सर्वे वंशच्छेदः प्रजायते॥ ११॥
तस्य पापविशुद्ध्यर्थं प्रायश्चित्तं च कारयेत्। श्रवणं हरिवंशस्य महारुद्रजपादिकम्॥ १२॥
ब्राह्मणोद्वाहनं चैव कुर्यात्पुष्करिणीं तथा। पलेन तु सुवर्णेन धेनुं कुर्यात्सवत्सकाम्॥ १३॥
दद्याद्वेदविधिज्ञाय दरिद्राय कुटुम्बिने। शतं च भोजयेद्विप्रान्गां दद्यात्स पयस्विनीम्॥ १४॥
य एवं कुरुते तार्क्ष्य जीवत्पुत्रः प्रजायते। लभते स सुतान्सर्वान्सुखसौभाग्यदायकान्॥ १५॥
द्व्यशीतिमितवर्षाणि चायुस्तस्य प्रकीर्तितम्। खभूते वत्सरे रिष्टैर्मृतिश्चाकृतनिष्कृतेः॥ १६॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तपञ्चाशदुत्तरनवशताधिकसहस्रतमः॥ १९९७॥

श्रीसूर्य उवाच।

वैनतेय महावाहो शृणु तस्य विचेष्टितम्। देशे सिंहलसंज्ञे तु वैश्यो वाणिज्यतत्परः॥ १॥

धनवान्राजमान्यश्च मतिमान्कृषितत्परः । कृतानि तेन दानानि सर्वाण्यपि च भक्तितः ॥ २ ॥
सुवर्णगोमहीवस्त्रशय्यान्नवसनानि च । अथो भाविबलात्सूत कृतं कर्मातिदारुणम् ॥ ३ ॥
ब्राह्मणो वेदपाठज्ञः सुशीलः पापवर्जितः । तस्य वृत्तिहरश्चैव द्वेषभावेन निर्दयः ॥ ४ ॥
व्यापारी च मदान्धश्च पत्नीवचनसाधकः । स्त्रिया वाक्येन तस्यापि वृत्तिलोपं चकार ह ॥ ५ ॥
स्त्रीणाञ्चैव पितुः स्थाने द्वेषितो द्विज उत्तमः । ततो विप्रेण तस्यापि लोपितं वचनं तदा ॥ ६ ॥
तेन द्वेषेण नारीणां भर्ता न प्रेषितस्तदा । रोषदुष्टेन मनसा ब्राह्मणश्चापमानितः ॥ ७ ॥
ततो वहुतिथे काले स गत्वा यमशासनम् । पुण्यपापफलं भुक्त्वा स जातोऽत्र हिमालये ॥ ८ ॥
खशप्रान्ते महाभाग गौरकृष्णः प्रतापवान् । लग्ने सप्तमके भूतेः खेटैर्दुष्टैर्विलोकिते ॥ ९ ॥
स तु मध्यमरूपाढ्यो नात्युच्चो न लघुर्घृणी । भ्रातृपुत्रकलत्राद्यैर्युक्तः पित्तानिली क्वचित् ॥१०॥
धनैश्वर्यसुखैर्युक्तो देवद्विजपरायणः । पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् ॥ ११ ॥
रोगयुक्तो भ्रान्तमतिर्गतागतधनैर्युतः । स्ववंशवणिजां मध्ये श्रेष्ठोऽपि कलहाकुलः ॥ १२ ॥
स्वभूतमितवर्षान्तमल्पस्त्रीसुखभोगभाक् । लग्नात्सप्तमके खेटैर्दुष्टैश्चापि विलोकिते ॥ १३ ॥
द्विधाविलोकिते चापि द्विधा स्त्रीपुत्रनाशनम् । त्रिभिर्विलोकिते चापि त्रिधा स्त्रीपुत्रनाशनम्॥१४॥
स्वल्पसन्तानसुखभाक्स्वल्पस्त्रीसुखभागपि । विपद्यन्ते स्त्रिया पुत्रास्तस्य सूत मुहुर्मुहुः ॥ १५ ॥
भार्या तस्य शुभाचारा पतिभक्तिपरायणा । रोगयुक्ता सदा तेन दुःखभाग्धनवानपि ॥ १६ ॥
व्यापारस्तस्य फलति कदाचिन्न फलत्यपि । शत्रुतो भयमाप्नोति तद्भयेनापि शङ्कितः ॥ १७ ॥
लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् । निष्कमेकं सुवर्णस्य चतुर्निष्कं तु राजतम् ॥ १८ ॥
उमामहेश्वरं कृत्वा विधिज्ञाय प्रदापयेत् । दम्पती पूजयित्वा तु वस्त्रैश्च परिधापयेत् ॥ १९ ॥
वस्त्रैकविधिना स्नायात्पञ्चाशद्विजभोजनम् । पयस्विनीं च गां दद्याद्ब्राह्मणाय कुटुम्बिने ॥२०॥
एवं कृत्वा खगश्रेष्ठ जीवत्पुत्रकलत्रभाक् । शत्रुभीतिं न चाप्नोति पुत्रशोकं कदापि न ॥ २१ ॥
व्यापारे फलमाप्नोति द्विगुणं त्रिगुणं सदा । त्रिसप्तत्यब्दमायुः स्यादाधिव्याधिविवर्जितम्॥२२॥
न करोति यदा मोहाल्लोभात्पापविशोधनम् । कलत्रपुत्रशोकन्तु प्राप्नुयाज्जन्मजन्मनि ॥ २३ ॥
त्रिपञ्चाशन्मिताब्दे तु रिष्टेनैव विनश्यति ॥ २४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टपञ्चाशदुत्तरनवशताधिकसहस्रतमः ॥ १९५८ ॥

श्रीसूर्य उवाच ।

वैनतेय महावाहो शृणु तस्य विचेष्टितम् । आसीद्गौडाभिधे देशे वाहुजो धर्मकर्मवित् ॥ १ ॥
कृषिवाणिज्यकर्ता च राजमान्यः प्रतापवान् । दत्तानि तेन दानानि पर्वस्वपि च भक्तितः ॥ २ ॥
वस्त्रभूषणशय्यान्नदासीदासफलानि च । अथो भाविबलात्सूत कृतं कर्मातिदारुणम् ॥ ३ ॥
केनचित्स्थापितं द्रव्यं ब्राह्मणेन तपस्विना । दिनान्तरे समागत्य याचितं तेन तद्वसु ॥ ४ ॥
तेन द्रव्यं गृहीत्वा तु ब्राह्मणश्चापलापितः । लंघनानि ततश्चक्रे द्वित्रिपञ्चाथ सप्त च ॥ ५ ॥
ततः प्राणान्मुमोचायं शापं दत्त्वा सुदारुणम् । ततो वहुतिथे काले प्राप्तस्तु यमशासनम् ॥ ६ ॥
पुण्यात्पुण्यफलं भुक्त्वा पापात्पापफलं तथा । पूर्वपुण्यप्रभावेण स जातोऽत्र हिमालये ॥ ७ ॥
केदारमण्डले दिव्ये स तु मध्यमरूपकः । कृष्णगौरो महात्यागी नात्युच्चो न लघुर्घृणी ॥ ८ ॥
वाणिजामन्वये श्रेष्ठः पितृभ्रातृसुखैर्युतः । धनवाहनभोगाढ्यो राजमान्यः प्रतापवान् ॥ ९ ॥

सन्धिविग्रहकर्ता च बहुमित्रसमाकुलः । पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् ॥ १० ॥
जन्मलग्नात्सुते द्यूने क्रूरखेटसमन्वितः । कौमारे जननीसौख्ययुग्यूनि तत्सुखोज्झितः ॥ ११ ॥
प्राग्भवे ब्राह्मणद्रव्यहरणाद्धातजात्सुत । पापादिह महाभाग सन्तानसुखवर्जितः ॥ १२ ॥
शत्रुभीतियुतः सर्वलोकेषु प्रियवागपि । श्लेष्मलो वातरुग्युक्तः कदाचित्पित्तकोपनः ॥ १३ ॥
लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् । पलमात्रेण कर्तव्यो ब्राह्मणस्तु हिरण्मयः ॥ १४ ॥
गन्धपुष्पैः समभ्यर्च्य विधिज्ञाय प्रदापयेत् । पलैः शतमितैः शुल्वघटं घृतमुपूरितम् ॥ १५ ॥
सुवर्णपलसंयुक्तं दद्याद्वेदविदे सुत । सोमस्य प्रतिमा कार्या सुवर्णद्वयसम्मिता ॥ १६ ॥
यथा रविश्च कर्तव्यो ब्राह्मणेभ्यो निवेदयेत् । गायत्रीमष्टसाहस्रं त्र्यम्बकं तु तथा जपेत् ॥ १७ ॥
आप्यायस्वेतिमन्त्रं च सूर्यमन्त्रं तथैव च । होमयेत्तद्दशांशेन शक्त्या विप्रांश्च भोजयेत् ॥ १८ ॥
द्विजोद्वाहं ततः कुर्यात्सर्वोपस्करसंयुतम् । श्रवणं हरिवंशस्य कुर्याद्वै विनतात्मज ॥ १९ ॥
एवं निष्कृतिमापन्नः पुत्रपौत्रसुखं लभेत् । नाधयो व्याधयस्तस्य न च शत्रुभयं लभेत् ॥ २० ॥
कुसप्तत्यब्दकं चायुर्मुनिवेदमितेऽब्दके । रिष्टं नाप्नोति नैवं च कुर्याद्यो लोभमोहतः ॥ २१ ॥
जन्मजन्मनि दुःखी स्याद्रिष्टेनैव विनश्यति ॥ २२ ॥

इति श्रीबृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनपञ्चोत्तरनवशताधिकसहस्रतमः ॥ १९५९ ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम् । बभूव यामुने देशे बाहुजो धर्मकर्मवित् ॥ १ ॥
कृषिवाणिज्यकर्ता च सन्धिविग्रहसंयुतः । दत्तानि तेन दानानि पर्वस्वपि च शक्तितः ॥ २ ॥
गोभूशय्यासनान्नाश्ववसनाभरणानि च । अथो भाविबलात्सूत कृतं कर्मातिदारुणम् ॥ ३ ॥
ब्राह्मण्यां धारितो गर्भस्तत्पतिश्चैव घातितः । विषेण तु प्रपञ्चेन ततो लोकापवादतः ॥ ४ ॥
औषधैश्छेदनैश्चापि मर्दनैश्च प्रयत्नकैः । गर्भश्च पातितस्तस्याः सापि मृत्युवशं गता ॥ ५ ॥
तद्दुःखेनाण्डजश्रेष्ठ ततस्स तु दिनान्तरे । कष्टान्मृत्युवशं प्राप्तो भुक्त्वा तु यमशासनम् ॥ ६ ॥
पापात्पुण्याच्च स्वर्गांश्च भुक्त्वा पुण्यावशेषतः । हिमालये पुण्यदेशे स जातोऽत्र वणिक्सुतः ॥ ७ ॥
धनवाहनभोगाढ्यो वंशश्रेष्ठोऽतिधर्मवित् । पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् ॥ ८ ॥
चिताक्लेशसमायुक्तो यत्किंचिद्धनवानपि । जन्मलग्नात्सुते द्यूने क्रूरग्रहविलोकिते ॥ ९ ॥
मन्दसन्धिगते कन्यातुलयोर्जन्म तस्य तु । प्राग्भवे ब्राह्मणी या सा धर्षिता तेन काश्यपे ॥ १० ॥
सैवेह जाता ह्यस्यैव ज्येष्ठपत्नी मृतिं गता । तस्याश्चोपायकैः सूत यो गर्भो विनिपातितः ॥ ११ ॥
सा कन्याभूत्खगश्रेष्ठ गता निर्वेशतामिह । शत्रुभीतियुतो दुःखी गतागतधनैर्युतः ॥ १२ ॥
व्यापारोऽस्य फलत्येव कदाचिन्न फलत्यपि । कनिष्ठास्य महाभाग जाया या प्राग्भवे ह्यभूत् ॥ १३ ॥
ब्राह्मणी गर्भपाते तु याकरोन्महदुद्यमम् । तेन पापेन सापीह रोगयुक्ता खगाधिप ॥ १४ ॥
तद्दुःखेन महादुःखी सन्तानसुखवर्जितः । खगवर्षमिब्दान्तं जातसन्तानवर्जितः ॥ १५ ॥
लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् । सुवर्णद्वयकेनैव ब्राह्मणीं कारयेच्छुभाम् ॥ १६ ॥
तथा वै ब्राह्मणः कार्यो गन्धपुष्पैः समर्च्य च । विधिज्ञाय प्रदद्याद्वै सुवर्णमितिको रविः ॥ १७ ॥
निष्कद्वयेन सोमः स्याद्राजतो ब्राह्मणाय वै । देयो रुद्रजपं कुर्याद्गां दद्यात्स पयस्विनीम् ॥ १८ ॥
शतं वै भोजयेद्विप्रान्सर्पिष्यात्मानमीक्षयेत् । एवंकृतविधेः सूत पूर्वजन्माघनाशनम् ॥ १९ ॥
न पुत्रमरणं तस्य न जायामरणं भवेत् । जीवत्पुत्रः स दीर्घायुरशीतिमितवत्सरान् ॥ २० ॥

नाधयो व्याधयस्तस्य न च शत्रुभयं भवेत् । पुत्रपौत्राभिवृद्ध्या च ह्येधन्ते सम्पदोऽस्य तु ॥२१॥
नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् । जन्मजन्मनि दुःखी स्यादन्ते च नरकं व्रजेत्॥२२॥
खवेदसम्मिते वर्षे रिष्टेनैव विनश्यति ॥ २३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्युत्तरनवशताधिकसहस्रतमः ॥ १९६० ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम् । आसीत्सिंहलके देशे वैश्यः परमधार्मिकः ॥ १ ॥
कृषिव्यापारसंयुक्तो राजमान्यः प्रतापवान् । तस्य भार्या सुतन्वङ्गी पापबुद्धिवशं गता ॥ २ ॥
अथो भाविबलात्सूत तया पापमुपार्जितम् । पूर्वजन्मनि पक्षीन्द्रावधीद्वत्सयुतां शुनीम् ॥ ३ ॥
गृहस्य पश्चिमे भागे प्रसूता शुनकी च सा । भस्मोदरं सुतीक्ष्णं वा अग्निमस्यां च साऽक्षिपत् ४॥
सा शुनी च स्वभावेन घुर्घुरी चावतिष्ठते । सा भीता गृहनारी तु पापबुद्धिवशं गता ॥ ५ ॥
दुष्टेन मनसा तत्र तस्या उपरि निःक्षिपेत् । सापि मृत्युवशं प्राप्ता शुनकी सह बालकैः ॥ ६ ॥
प्रीत्या तस्यै पुनर्नोक्तं भर्त्रा चैव खगाधिप । ततो बहुतिथे काले स गत्वा यमशासनम् ॥ ७ ॥
पुण्यपापफलं भुक्त्वा स जातोऽत्र हिमालये । खशप्रान्ते तु मुखजः सा जाया तस्य वै खग ॥ ८॥
गौरो मध्यमरूपाढ्यो राजमान्यः प्रतापवान् । नातिस्थूलो नातिह्रस्वो धनवाहनभोगभाक् ॥९॥
बाल्ये पितृसुखैर्युक्तः कौमारे तत्सुखोज्झितः । प्राग्भवे शुनकीघातात्तद्वत्सानां च घातनात् १०॥
अत्र जन्मनि तस्यैव म्रियन्ते बालकास्तथा । चिन्ताक्लेशसमायुक्तो रिपुभीत्या च संयुतः ॥११॥
लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् । पलेन तु सुवर्णेन धेनुं कुर्यात्सवत्सकाम् ॥ १२ ॥
प्रदद्यात्तां विधिज्ञाय वैष्णवं भोजयेत्तथा । वस्त्रैकविधिना स्नायान्महारुद्रजपादिकम् ॥ १३ ॥
ब्राह्मणोद्वाहनं कुर्याद्दक्षीणां व्रतमाचरेत् । शतं च भोजयेद्विप्रान्गां दद्यात्स पयस्विनीम् ॥ १४ ॥
एवं कुर्यात्खगश्रेष्ठ पुत्रमाप्नोति वाञ्छितम् । जीवत्पुत्रः स दीर्घायुः पितृभक्तो गुणोत्तमः॥१५॥
नाधयो व्याधयस्तस्य न च शत्रुभयं भवेत् । त्रिसप्तत्यब्दमायुः स्यात्पञ्चाशन्मितवत्सरे ॥ १६ ॥
रिष्टं नाप्नोति स प्राणी यथोक्ते पापशोधने । न करोति यदा मोहाल्लोभाद्वा जन्मजन्मनि ॥१७॥
दुःखी स्यान्निधनं तस्य रिष्टेनैव खगेश्वर । लग्ने राहुशनिभ्यां च संयुते सप्तमे सुते ॥ १८ ॥
दृष्टे जातः पुमानत्र विनतानन्दवर्धन ॥ १९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकषट्युत्तरनवशताधिकसहस्रतमः ॥ १९६१ ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम् । बभूव यामुने देशे ब्राह्मणो धर्मकर्मवित् ॥ १ ॥
दत्तानि तेन दानानि पर्वस्वपि च शक्तितः । गोशय्यावसनान्नानि श्रद्धाभक्तिसमन्वितम् ॥ २ ॥
बाल्ये तेन कृतं कर्म पापमुग्रमुपार्जितम् । वक्ष्यामि शृणु तत्कर्म सत्यमेव खगाधिप ॥ ३ ॥
तत्प्रिया चैव पक्षीन्द्र कुमारी नववत्सरा । वर्षैकादशकोऽयं हि कुमारो बालयौवनः ॥ ४ ॥
बालबुद्धी च तौ द्वौ तु पापं पुण्यमजानतौ । चटकाबालकं दृष्ट्वा प्रसूतां च विहङ्गमाम् ॥ ५ ॥
क्रीडार्थं च ततो भग्नो ह्याश्रमोस्य खगस्य तु । शिशवोऽपि निवृत्तास्तु पतिता भूमिमण्डले ॥ ६॥
अग्निमध्ये तु चुल्ल्यां वै न्यक्षिपत्त्रींश्च बालकान् । पश्चात्कालान्तरेणैव तेनोद्वाहः कृतस्तदा ॥ ७ ॥
तेन कर्मविपाकेन सोऽभूच्च मृतवत्सकः । म्रियन्ते जातमात्रेण वर्षद्वयत्रिवत्सराः ॥ ८ ॥

ततो बहुतिथे काले स गत्वा यमशासनम् । पुण्यात्पुण्यफलं भुक्त्वा स जातोऽत्र हिमालये ॥९॥
लग्नस्थाने शनिश्चैव चतुर्थे च विलोकिते । जातोऽयं गौरवर्णस्तु बाल्ये पितृसुखैर्युतः ॥ १० ॥
नातिस्थूलो नातिह्रस्वो मतिमान्सुप्रतापवान् । पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् ॥११॥
प्राग्भवे मृतवत्सोऽभूत्तथात्र मृतवत्सकः ॥ १२ ॥

अरुण उवाच ।

कर्मसाक्षिञ्जगन्नाथ कृपां कृत्वा ममोपरि । तस्य कर्मविशुद्ध्यर्थं प्रायश्चित्तं कथं चरेत् ॥ १३ ॥

श्रीसूर्य उवाच ।

प्रायश्चित्तं प्रवक्ष्यामि शृणु तस्य द्विजस्य च । निष्कद्वयस्य हेम्नस्तु कुर्याद्धेनुं दृढां शुभाम्॥१४॥
गन्धपुष्पैः समभ्यर्च्य दैवज्ञाय प्रदापयेत् । वस्त्रैकविधिना स्नायाद्गां दद्यात्स पयस्विनीम् ॥१५ ॥
लोहेन तु तदा द्रोणलवणं दापयेच्छुभम् । ब्राह्मणान्भोजयेत्पश्चाद्यथावित्तानुसारतः ॥ १६ ॥
य एवं कुरुते पक्षिन्पुत्रानाप्नोति निश्चितम् । जीवत्पुत्रः स दीर्घायुरशीतिमितवत्सरान् ॥ १७ ॥
नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् । रिष्टेन मृतिमाप्नोति खवेदमितवत्सरे ॥ १८ ॥
जन्मजन्मनि पक्षीन्द्र दुःखी स्यान्नात्र संशयः ॥ १९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विषष्ट्युत्तरनवशताधिकसहस्रतमः ॥ १९६२ ॥

अरुण उवाच ।

लग्नस्थाने शनिश्चैव चतुर्थे वा विलोकितः । तस्य कर्मविचारं तु सत्यं कथय मे प्रभो ॥ १ ॥
मृतवत्सा च या नारी कुतो जीवेत्कुतो मृतिः । किं कृतं तु तया पापं सत्यं वद दिवाकर ॥ २ ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्या विचेष्टितम् । बभूव यामुने देशे वैश्यपुत्री शुभानना ॥ ३ ॥
पतिभक्तिपरा नित्यं पितृमातृसुखान्विता । तया दत्तानि दानानि पर्वस्वपि च शक्तितः ॥ ४ ॥
वस्त्रभूषणशय्यान्नान्येवं पतिसहायतः । तया भाविबलात्सूत कृतं कर्मातिदारुणम् ॥ ५ ॥
बिडालीघातिनी साभूद्या पृष्टा विनतात्मज । मार्जारी गर्भसंयुक्ता क्षुधार्ता चाश्रमं गता ॥ ६ ॥
त्रींस्तु बालान्प्रसूता सा चतुर्थश्चोदरे स्थितः । तया दृष्टं गृहं शून्यं तत्र भाण्डं च दूषितम् ॥७॥
तत्रागता गृहान्नारी ह्यासनेनापि घातिता । सा मृता गर्भसंयुक्ता मृतं बालत्रयं पुनः ॥ ८ ॥
ततो बहुतिथे काले सा गत्वा यमशासनम् । पुण्यपापफलं भुक्त्वा सा जातेह हिमालये ॥ ९ ॥
गौरीमध्यमरूपा सा पतिभक्तिपरायणा । देवद्विजपरा नित्यं व्रतानामनुकांक्षिणी ॥ १० ॥
पितृमातृसुखैर्युक्ता सुखजा भ्रातृसंयुता । धनवाहनभोगाढ्या सर्वलोकप्रियम्वदा ॥ ११ ॥
पुण्यादिदं तथा पापाल्लोभयुक्ताल्पपापकृत् । मार्जारीघातजात्पापात्तद्बालकवधादपि ॥ १२ ॥
सात्र जन्मनि पक्षीन्द्र मृतवत्सातिदुःखभाक् । लक्षणैरेभिराढ्यायाः प्रायश्चित्तं वदाम्यहम् ॥१३॥
कृष्णवर्णां सदुग्धां च तरुणीं रूपसंयुताम् । दद्यात्तां विदुषे धेनुं वस्त्रालंकारसंयुताम् ॥ १४ ॥
निष्कद्वयं सुवर्णस्य दत्त्वा वेदाङ्गपारगे । वस्त्रैकविधिना स्नायाद्गुह्यैकादशकं जपेत् ॥ १५ ॥
महादानाष्टकं दत्त्वा पञ्चाशद्द्विजभोजनम् । एवं कृत्वा खगश्रेष्ठ तस्याः पापं व्यपोहति ॥ १६ ॥
जीवत्पुत्रा तु सततं सुखसौभाग्यमाप्नुयात् । त्रिसप्तत्यब्दमायुः स्यात्प्रायश्चित्ते कृतेऽधुना ॥१७॥
सप्तत्रिंशन्मिताब्दे तु रिष्टेनैव विनश्यति ॥ १८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिषष्ट्युत्तरनवशताधिकसहस्रतमः ॥ १९६३ ॥

अरुण उवाच ।

लग्ने चन्द्रो बुधश्चैव सप्तमे वा विलोकितः । तस्य कर्मविचारस्तु कथ्यतां मे दिवाकर ॥ १ ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम् । बभूव यामुने देशे ब्राह्मणो धर्मकर्मवित् ॥ २ ॥
कृषिवाणिज्यकर्ता च किञ्चिद्वित्तसमन्वितः । अथो भाविबलात्सूत कृतं कर्मातिदारुणम् ॥ ३ ॥
दुष्करं तु खगश्रेष्ठ ब्राह्मणो गृहमाश्रितः । समीपे तु गृहं कृत्वा कुटुम्बं परिपालयेत् ॥ ४ ॥
वर्षाकालसमायोगे रोपयित्वा लता बहु । कूष्माण्डी पालिता तत्र सुपुष्टैरुत्तमैः फलैः ॥ ५ ॥
दुष्टबुद्धिमना नारी फलं विप्रस्य साहरत् । प्रभातसमय तार्क्ष्य शाकार्थं सुन्दरी गता ॥ ६ ॥
कूष्माण्डं हारितं दृष्ट्वा तया तस्मै निवेदितम् । घुर्घुरेण च वाक्येन ब्राह्मणी च विशेषतः ॥७ ॥
पश्चाद्रात्रिसमायोगे सर्वा उत्थापिता लताः । पत्या पत्नीमतं कृत्वा विप्रः सन्ताडितो बहु ॥ ८ ॥
तस्य विप्रो गृहं त्यक्त्वा ह्यन्यस्थाने गतस्तदा । तदा बहुतिथे काले स गत्वा यमशासनम् ॥९॥
पुण्यपापफलं भुक्त्वा स जातोऽत्र हिमालये । ब्राह्मणो मतिमाञ्श्रेष्ठो राजमान्यः प्रतापवान् १०॥
गौरो मध्यमरूपाढ्यो धनी मानी महायशाः । पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् ११॥
धूर्तो दुष्टजनैर्युक्तः पितृमातृसुखोज्झितः । कदाचिद्रोगयुक्तश्च कदाचित्कलहप्रियः ॥ १२ ॥
कूष्माण्डहरणात्पापात्तथा ब्राह्मणताडनात् । म्रियन्ते बालकास्तस्य पुत्रशोकातुरस्य च ॥१३॥
तस्य कर्मविशुद्ध्यर्थं प्राजापत्यं च कारयेत् । गृहदानं ततः कुर्यात्सर्वोपस्करसंयुतम् ॥ १४ ॥
ब्राह्मणाय ततो दद्याद्दम्पती परिधापयेत् । निष्कद्वयं सुवर्णस्य चतुर्निष्कं तु राजतम् ॥ १५ ॥
गोलिका मृन्मयाश्चैव नारिकेलेन संयुताः । कूष्माण्डानि सद्रव्याणि दत्त्वा चैवं त्रयोदश ॥१६॥
शतं च भोजयेद्विप्रान् गां दद्यात्स पयस्विनीम् । य एवं कुरुते तार्क्ष्य पुत्रपौत्रैश्च वर्धते ॥ १७ ॥
अशीत्यब्दमितायुः स्यात्प्रायश्चित्ते कृतेऽधुना । सप्तपञ्चाशदब्दे तु रिष्टेनैव विनश्यति ॥ १८ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुःषष्ट्युत्तरनवशताधिकसहस्रतमः ॥ १९६४ ॥

अरुण उवाच ।

लग्नस्थाने दिवानाथे चतुर्थे वा विलोकिते । तस्यैव कीदृशं कर्म कथयस्व दिवाकर ॥ १ ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम् । करहाटाभिधे देशे ब्राह्मणो राजपूजितः ॥ २ ॥
दत्तानि तेन दानानि पर्वस्वपि च भक्तितः । गोशय्यागृहवस्त्रान्नभूषणानि प्रयत्नतः ॥ ३ ॥
अथो भाविबलात्सूत कृतं कर्मातिदारुणम् । चौराधिपस्य सङ्गं तु कृतवान्युवभावतः ॥ ४ ॥
एकस्मिन्दिवसे सूत विप्रं हत्वा स्त्रिया सह । अरण्ये निर्जले देशे चोररूपेण शब्दितः ॥ ५ ॥
तेन मार्गेण विप्रः स सपत्नीकः समागतः । तेन चौरेण तस्याश्च गृहीतं बहुभूषणम् ॥ ६ ॥
पत्नीपुत्रेण संयुक्ता कोलाहलनिपीडिता । अचेतना च सा नारी तद्धस्तात्पतितः शिशुः ॥ ७ ॥
चतुर्मासस्ततो बालः सहसा मरणं गतः । सा स्त्री पुत्रस्य शोकेन सद्यः प्राणान्समत्यजत् ॥ ८॥
जायां पुत्रं मृतं दृष्ट्वा प्राणांश्चाघातयद्द्विजः । ततो बहुतिथे काले स गत्वा धर्ममन्दिरम् ॥ ९ ॥
पुण्यपापफलं भुक्त्वा स जातोऽत्र हिमालये । मुखजो मध्यरूपाढ्यो गौरवर्णः प्रतापवान् ॥१० ॥
नातिस्थूलो नातिह्रस्वो राजमान्यो धनी महान् । पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित्११
उदरे वातरोगी च गतागतधनैर्युतः । प्राग्भवे चौरवृत्त्या च ब्रह्मस्वस्य च लुण्ठनात् ॥ १२ ॥

तथा तद्वधजात्तस्य पुत्रपत्न्योश्च मारणात्। पापादिह महाभाग मृतवत्सः प्रजायते ॥ १३ ॥
तस्य कर्मविशुद्ध्यर्थं प्रायश्चित्तं च कारयेत्। पलेन तु सुवर्णेन धेनुं कुर्यात्सुशोभनाम् ॥ १४ ॥
चतुर्थांशेन वत्सं च कृत्वालंकारभूषणैः। विधिज्ञाय ततो दद्याद्भूमिदानं प्रयत्नतः ॥ १५ ॥
वस्त्रैकविधिना स्नायान्महारुद्रजपादिकम्। द्रोणसंख्यानि धान्यानि सप्तापि परिदापयेत् ॥ १६ ॥
उमामाहेश्वरं दानं पलस्वर्णेन दापयेत्। दम्पती परिधाप्याथ शतं विप्रांश्च भोजयेत् ॥ १७ ॥
सर्वोपस्करसंयुक्तां गां दद्यात्तु पयस्विनीम्। य एवं कुरुते तार्क्ष्य तस्य पापं व्यपोहति ॥ १८ ॥
जीवत्पुत्रश्च दीर्घायुः सुखसौभाग्यवान्भवेत्। अशीत्यब्दमितायुः स्यात्प्रायश्चित्ते कृतेऽधुना ॥ १९ ॥
जन्मजन्मनि दुःखी स्यान्मुनिवेदमितेब्दके। रिष्टेनैव विनाशः स्यात्सत्यंसत्यं न संशयः ॥ २० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पंचषष्ट्युत्तरनवशताधिकसहस्रतमः ॥ १९६५ ॥

अरुण उवाच।

मूढगर्भा च या नारी कर्मणा केन बाध्यते। एष मे संशयो देव कथयस्व दिवाकर ॥ १ ॥

श्रीसूर्य उवाच।

वैनतेय महाभाग शृणु तस्या विचेष्टितम्। बभूव यामुने देशे ब्राह्मणी च पतिप्रिया ॥ २ ॥
धर्मकर्मसमायुक्ता पतिपुत्रवती च सा। तया दत्तानि दानानि पर्वस्वपि विशेषतः ॥ ३ ॥
अन्नगोमहिषीवस्त्राण्येव पत्युः सहायतः। अथो भावित्वलात्सूत तया पापं महत्कृतम् ॥ ४ ॥
ब्राह्मणो वेदपाठज्ञः सुशीलः पापवर्जितः। तेन द्रव्यं तथा हेम सस्या हस्ते समर्पितम् ॥ ५ ॥
पठनार्थं गतो विप्रो नागतः पुनराश्रमम्। तयोपजीवितं द्रव्यं पत्या पुत्रेण वै सह ॥ ६ ॥
तद्द्रव्यं ब्राह्मणेभ्यश्च न दत्तं लोभमोहतः। ततो बहुतिथे काले सा गत्वा यमशासनम् ॥ ७ ॥
पुण्यपापफलं भुक्त्वा सा जातात्र हिमालये। गौरवर्णा सुभूषाढ्या पतिभक्तिपरायणा ॥ ८ ॥
धनवाहनभोगाढ्या पितृमातृसुखैर्युता। पुण्यादिदं तथा पापाल्लोभयुक्ताल्पपापकृत् ॥ ९ ॥
प्राग्भवे न्यासहरणाद्गर्भे नैव प्रमुञ्चति। न्यासापहारिणी नारी मूढगर्भा प्रजायते ॥ १० ॥
बहुक्लेशयुता सा स्यादिति वेदविदो विदुः। लग्नस्थाने यदा राहुश्चतुर्थे वावलोकिते ॥ ११ ॥
जातेयं ब्राह्मणी सूत प्राक्पापात्तस्य निष्कृतिः। षण्णिष्काणि सुवर्णस्य दश निष्कं तु राजतम् १२
विधिज्ञाय प्रदद्याद्वै दरिद्राय कुटुम्बिने। ब्राह्मणोद्वाहनं कुर्याद्द्वैकादशकं जपेत् ॥ १३ ॥
श्रवणं हरिवंशस्य कुर्यात्पुष्करिणीं तथा। शतं च भोजयेद्विप्रान्गां दद्यात्स पयस्विनीम् ॥ १४ ॥
या ह्येवं कुरुते तार्क्ष्य मूढगर्भं विमोचयेत्। ध्रुवं च जनयेत्पुत्रं चिरायुःपितृभक्तकम् ॥ १५ ॥
त्रिसप्तत्यब्दमायुः स्यात्प्रायश्चित्ते कृतेऽधुना। मुनिवेदमिताब्दे तु रिष्टेनैव विनश्यति ॥ १६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्षष्ट्युत्तरनवशताधिकसहस्रतमः ॥ १९६६ ॥

अरुण उवाच।

आद्ये स्मरे खगे वेदे नैव पश्यन्ति खेचराः। तस्य कर्म कथं देव ब्रूहि सत्यं दिवाकर ॥ १ ॥

श्रीसूर्य उवाच।

वैनतेय महाबाहो शृणु तस्या विचेष्टितम्। पूर्वजन्मनि सा वत्स नीचकर्मसमाश्रिता ॥ २ ॥
ब्राह्मणी भर्तृसंयुक्ता करहाटाख्यदेशके। तीर्थयात्राप्रसङ्गेन प्रायेण भर्तृसंयुता ॥ ३ ॥
बहुभिर्मिलितैश्चोरस्तस्या जग्राह भूषणम्। तेन कोलाहलो जातः सानार्यबलचेतना ॥ ४ ॥

कृष्टापि कटिवस्त्रं च लज्जिता सा न मुञ्चति । वर्णक्षेपोदरे हत्वा पतिता सा महीतले ॥ ५ ॥
तस्या उदरसंस्थस्तु गर्भश्च पञ्चमासिकः । दिनत्रये महत्कष्टं तया प्राप्तं च दुःखदम् ॥ ६ ॥
ततो बहुतिथे काले सा गत्वा यममन्दिरम् । पुण्यपापफलं भुक्त्वा सा जाताऽत्र महीधरे ॥ ७ ॥
ब्राह्मणी गौरकृष्णा च पतिभक्तिपरायणा । धनवाहनभोगाढ्या पितृमातृसुखान्विता ॥ ८ ॥
पुण्यादिदं तथा पापाल्लोभाढ्यात्यल्यपापकृत् । प्राग्भवे गर्भपाताच्च स्वगर्भस्य विनाशनम् ॥ ९ ॥
पूर्वजन्मकृतं पापं भुज्यते चेह मानवैः ॥ १० ॥

अरुण उवाच ।

वृथा तस्या गृहं धान्यं धनं तस्याश्च निष्फलम् । अपुत्राया वद स्वामिन्निष्कृतिं पुत्रसौख्यदाम्११

श्रीसूर्य उवाच ।

पलेन तु सुवर्णेन धेनुं कृत्वा सवत्सकाम् । प्रदद्याद्वै विधिज्ञाय सर्वालङ्कारभूषिताम् ॥ १२ ॥
श्रवणं हरिवंशस्य चैकचित्तेन मानद । वस्त्रैकविधिना स्नायाद्वुद्वैकादशकं जपेत् ॥ १३ ॥
पञ्चरत्नसमायुक्तं घृतं कुम्भञ्च दापयेत् । शतं च भोजयेद्विप्रान्गां दद्यात्सा पयस्विनीम् ॥ १४॥
या ह्येवं कुरुते तार्क्ष्य सन्तानं लभते ध्रुवम् । जीवत्पुत्रा च दीर्घायुस्त्रिसप्ततिमिताब्दकम् ॥१५॥
नैवं करोति या मोहाल्लोभाद्वा पापशोधनम् । सप्तत्रिंशन्मिताब्दे तु रिष्टैनैव विनश्यति ॥ १६ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तषष्ट्युत्तरनवशताधिकसहस्रतमः ॥ १९६७ ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम् । बभूव यामुने देशे बाहुजो धर्मकर्मवित् ॥ १ ॥
पितृमातृसुखैर्युक्तो देवद्विजपरायणः । दत्तानि तेन दानानि ब्राह्मणेभ्योऽतिभक्तितः ॥ २ ॥
कार्तिके मथुराक्षेत्रे दीपदानानि भक्तितः । गोभूशय्यासनान्यश्ववसनाभरणानि च ॥ ३ ॥
मातृवैराग्यदुःखेन मृतस्य पितुरादरात् । सहानुगाया मातुश्च गयाश्राद्धानि भक्तितः ॥ ४ ॥
कृतवान्पितृभक्त्यर्थं पितृभक्तिपरायणः । अथो भाविबलात्सूत कृतं कर्मातिदारुणम् ॥ ५ ॥
द्विजस्य यज्ञविघ्नं हि कृतवान्दर्पमोहितः । ततो बहुतिथे काले स गत्वा यमशासनम् ॥ ६ ॥
पुण्यात्पुण्यफलं भुक्त्वा पापाच्च नरकं तथा । भुक्तपुण्यावशेषेण स जातोऽत्र हिमालये ॥ ७ ॥
यमुनायाः पूर्वभागे पुण्यदेशेऽतिविश्रुते । राज्ञां वंशे खगश्रेष्ठ गौरवर्णः प्रतापवान् ॥ ८ ॥
नात्युच्चो नातिह्रस्वश्च नातिस्थूलो न सूक्ष्मकः । देवद्विजगुरूणां च भक्तः पित्रनुगस्तथा ॥ ९ ॥
बहुभृत्यधनैश्वर्योबहुवाहनसंयुतः । देशेदेशेऽधिकाराढ्यः श्रीमान् भोक्ता प्रियम्वदः ॥ १० ॥
सन्धिविग्रहसंयुक्तो बहुविद्यासमाश्रयः । राजप्रियो नीतिविच्च राजकार्येषु तत्परः ॥ ११ ॥
राज्ञां हितकरो नित्यं देवद्विजपरायणः । राजार्थेऽर्थानसून्स्वस्य गणयन्तृणवत्कृती ॥ १२ ॥
गुरुभक्तो यशस्वी च दम्भलाभविवर्जितः । पुत्रमित्रकलत्राद्यैर्युक्तः सर्वजनप्रियः ॥ १३ ॥
नैकस्त्रीसंयुतः कामी मातुराज्ञाप्रवर्तकः । जन्माङ्गात्पञ्चमे द्यूने शुभक्रूरविलोकिते ॥ १४ ॥
संयुते वा पितृस्थाने मेषसंस्थे कलाधरे । क्रूरावलोकिते सूत स जातो मानवोऽत्र च ॥ १५ ॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । यज्ञविघ्नकृतात्पापाद्बाल्ये पितृसुखोज्झितः ॥ १६ ॥
मातृवैराग्यजात्पापात्प्राक्कृताद्गरुडाग्रज । विक्षिप्तोऽभूत्पिता तस्य युवभावे मृतेऽपि च ॥ १७ ॥
परापवादसंयुक्तः सदा चिन्तासमन्वितः । शत्रुभीशंकया युक्तो गूढचेष्टोऽतिकोपनः ॥ १८ ॥

मानापमानसाम्येन चित्तक्लेशसमन्वितः । चित्तास्थिरत्वरहितो गतागतयनैर्युतः ॥ १९ ॥
वातरुक्संयुतो नित्यं कदाचिच्छूलरोगभाक् । लक्षणैरेभिराढ्यश्चेत्प्रायश्चित्तं वदाम्यहम् ॥ २० ॥
पलैस्त्रिस्त्रिमिताः कार्या ब्रह्मविष्णुमहेश्वराः । तदर्धामितिका वाथ निजवित्तानुमानतः ॥ २१ ॥
हिरण्मया यथाकाराः पत्रेषु लिखिताः क्रमात् । यजेत्तल्लिङ्गकैर्मन्त्रैस्तान्गन्धाद्युपचारतः ॥२२॥
विधिना च विधिज्ञाय भक्तिश्रद्धासमन्वितः । प्रदद्याद्विनतापुत्र पूर्वपापैः प्रमुच्यते ॥ २३ ॥
रविर्मापमितो वह्निस्तथा सूर्यो हिरण्मयः । विप्रराजश्च कर्तव्यः पलेन च हिरण्मयः ॥ २४ ॥
वेदविद्भ्यः प्रदेया वै कुटुम्बिभ्यो विधानतः । गायत्रीं दशसाहस्रं त्र्यम्बकं द्विविधं तथा ॥२५॥
ब्रह्मविष्णुमहेशानां तथाग्नेर्भास्करस्य च । गणेशस्य च मन्त्रान्वै प्रजपेत्तद्विधानतः ॥ २६ ॥
ब्रह्मजज्ञानमन्त्रं च विधिवत्संख्यया जपेत् । होमयेत्तद्दशांशेन दश विप्रांश्च भोजयेत् ॥ २७ ॥
गां च दद्याद्विधिज्ञाय स्वर्णालङ्कारसंयुताम् । सवत्सां स्वर्णसंयुक्तां युवतीं च पयस्विनीम् ॥२८॥
सर्पिष्यात्मानमालोक्य भोजयेदिष्टबन्धुभिः । एवं निष्कृतिमापन्नः पूर्वपापापनोदिनीम् ॥ २९ ॥
आधिं व्याधिं रिपूणां च भयं नाप्नोति मानवः । सर्वे मनोरथाः पूर्णा भविष्यन्तीह तस्य तु ३०
चतुस्त्रिंशन्मिते वर्षे रिष्टं तस्य न जायते । पञ्चवेदमितेब्दे वा भविष्यत्यस्य निश्चयात् ॥ ३१ ॥
उदरे वातशूलेन मृतिस्तस्य भवेद्ध्रुवम् । प्रायश्चित्ते कृते त्वत्र नाधयो व्याधयोऽपि च ॥३२॥
न चारिष्टभयं तस्य न च रोगभयं तथा । शत्रवो विलयं यान्ति सूर्येणेव तमो यथा ॥ ३३ ॥
मद्दिने तु व्रतं कुर्यान्मद्भक्तो मत्परायणः । ग्रहदोषैर्न लिप्येत सत्यं सत्यं न संशयः ॥ ३४ ॥
मदुक्तां निष्कृतिं सूत कृत्वा सम्यग्विधानतः । अश्वत्थसेवनं कुर्यादप्रतिष्ठोपशान्तये ॥ ३५ ॥
जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् । यद्यदन्तर्गतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥३६॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽष्टाषष्ट्युत्तरनवशताधिकसहस्रतमः ॥ १९६८ ॥

श्रीसूर्य उवाच ।

या काचिद्वनिता सूत प्राग्भवे कांस्यहारिणी । सात्र जन्मनि पक्षीन्द्र शीर्षरोगप्रपीडिता ॥ १ ॥
दद्यात्पलशतं सीसं ब्राह्मणाय कुटुम्बिने । तत्काले शीर्षजाद्रोगान्मुच्यते नात्र संशयः ॥ २ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽष्टाय एकोनसप्तत्युत्तरनवशताधिकसहस्रतमः ॥ १९६९ ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्या विचेष्टितम् । करहाटाभिधे देशेऽम्बष्ठवंशे खगोत्तम ॥ १ ॥
बभूवेयमतिप्राज्ञा चतुरा गुणशालिनी । धर्मकर्मसमायुक्ता भर्तुरादरणैर्युता ॥ २ ॥
धनवाहनभूषाढ्या दासीदाससमन्विता । प्राग्गर्भपातजाद्रोगाद्वन्ध्यैवापुत्रिणी च सा ॥ ३ ॥
स्वाश्रितानां द्विजानां च पालनं तत्पदार्चनम् । अकरोत्पथिकानां च प्रपादानमनुत्तमम् ॥ ४ ॥
तदर्चनं च रुद्राणां पूजनं वै तया कृतम् । दत्तं द्विजेभ्यो पांथेभ्यो वासांसि च धनादिकम् ॥५॥
ददौ सा रुद्रपूजायै सोपस्करमतन्द्रिता । अथो भाविवलात्सूत तया पापं सुदारुणम् ॥ ६ ॥
कृतं शूद्रो महाभाग पथिको दुष्टकर्मकृत् । कश्चिदागत्य तद्वारि स्थितो दैवनियन्त्रितः ॥ ७ ॥
मिलित्वा तेन साकं सा स्वदास्या प्रेरिता सती । विषं दत्त्वा पतिं सूत जघानाज्ञानतो जले ॥८॥
युवभावे कृतवती पापं जाराश्रिता सती । पतिघ्नीयं महादुष्टेत्येवं लोकैस्तु निन्दिता ॥ ९ ॥
तया रुद्रालये सूत दीपनिर्वापणं तथा । कृतं जारोक्तितः पश्चाद्व्यतीते समये तदा ॥ १० ॥

निधनं प्राप्य सा सूत क्रिमियुक्तव्रणेन च । पुण्यात्स्वर्गफलं भुक्त्वा पापाच्च नरकं तथा ॥ ११ ॥
पूर्वपुण्यावशेषेण सा जातात्र हिमालये । पर्णविक्रयिणां वंशे पादजाता खगेश्वर ॥ १२ ॥
तुलालग्ने तमोदेवगुरुभ्यां संयुते सुत । द्वितीये शनिसोमाभ्यां संयुक्ते संस्थिते मयि ॥ १३ ॥
तृतीये संस्थिते चन्द्रे केतौ सप्तमभावगे । मद्गृहात्सप्तमे भावे चाश्रिते भूमिनन्दने ॥ १४ ॥
तमसा संवृते दैत्यपूज्ये खगकुलोत्तम । गौराङ्गी सुस्मितमुखी नात्युच्चा समकायभाक् ॥ १५ ॥
नातिह्रस्वा प्रलम्बोष्ठी व्रतानामनुकांक्षिणी । गतप्रियोत्सवरता स्नानदानपरा सदा ॥ १६ ॥
पुण्यादिदं तथा पापाल्लोभपापरता क्वचित् । विषं दत्त्वा पतिं सूत यतः प्राग्जारसंश्रिता ॥ १७ ॥
निजघान महादुष्टा यून्यत्र विधवा सुत । सत्यासत्यपरिज्ञानरहिता चञ्चला सदा ॥ १८ ॥
स्थैर्यमानपरित्यक्ता दुष्टबुद्ध्युपपादिनी । गार्हस्थ्यशीलरहिता नानाक्लेशनिवासिनी ॥ १९ ॥
यतः प्राग्रुद्रभवने जारोक्त्या दीपनाशकृत् । एकाक्षी दुःखसंप्राप्ता दरिद्रा दुर्मनास्ततः ॥ २० ॥
लोकापवादनिन्दाद्यैरन्विता पिशुना तथा । संयुता वातपित्ताभ्यां क्वचिद्व्रणाथ पापकृत् ॥ २१ ॥
हा पते हापतिरिति चिन्तयन्ती मुहुर्मुहुः । क्व यामि क्व मरिष्यामि क्व तिष्ठामीति वै सुत ॥ २२ ॥
लक्षणैरेभिराढ्या चेत्प्रायश्चित्तं वदामि ते । विष्णोराराधनादत्र व्रतकृच्छ्रोपसेवनात् ॥ २३ ॥
धर्मादत्र महाभाग गङ्गाया उपसेवनात् । प्रयागादिषु तीर्थेषु वासात्प्राप्नोति सद्गतिम् ॥ २४ ॥
प्रयागे श्रद्धया युक्ता त्रिवर्षं निवसेद्यदि । गतिं शुभां सा प्राप्नोति परत्र च शुभां मतिम् ॥ २५ ॥
एवं या कुरुते सूत प्रायश्चित्तमतन्द्रिता । चतुर्विंशतिवर्षान्तं सुखयुक्तात्र जीवति ॥ २६ ॥
गतिं शुभां सा नाप्नोति यत्र देशे महेश्वरः । प्रायश्चित्तमकृत्वा तु भ्रमते यदि कीटवत् ॥ २७ ॥
पञ्चोनपञ्चाशद्वर्षैः रिष्टेनैव विनश्यति । गतिं शुभां सा नाप्नोति विधवा सप्तजन्मसु ॥ २८ ॥
जन्मादिमरणान्तं वै मया किंचित्प्रकाशितम् । यद्यदन्तर्गतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ २९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तत्युत्तरनवशताधिकसहस्रतमः ॥ १९७० ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु चास्य विचेष्टितम् । बभूव यामुने देशे शूरसेनाभिधे सुत ॥ १
धर्मकर्मसमायुक्ता शुभा सा क्षत्रियाङ्गना । विप्रगोपालनेयुक्ता पशुधान्यधनैर्युता ॥ २ ॥
पुत्रभ्रातृसुहृद्युक्ता दासीदाससमन्विता । प्रयागे च महातीर्थे राहुग्रस्ते निशाकरे ॥ ३ ॥
ब्राह्मणेभ्यो ददौ भूरि वासोधान्यधनादिकम् । तत आगत्य पत्या च कृतं कर्मातिदारुणम् ॥ ४ ॥
सहायेनैककेनाथ वृत्तं शृणु खगेश्वर । सपत्नीवैरभावेन विषेण पतिरेव च ॥ ५ ॥
मारितो वै प्रयत्नेन घोरं पापं कृतं तया । अथ काले व्यतीते तु निधनं प्राप्य साऽसती ॥ ६ ॥
पुण्यात्पुण्यफलं भुक्त्वा पापाच्च नरकानपि । पूर्वपुण्यावशेषेण सञ्जाताऽत्र हिमालये ॥ ७ ॥
ब्राह्मणानां कुले सा तु धर्मकर्मसमन्विता । गौराङ्गी कृष्णगात्री च नात्युच्चा गुणशालिनी ॥ ८ ॥
देवपूजारता नित्यं व्रतानामनुकांक्षिणी । पुण्यादिदं तथा पापाल्लोभपापरता क्वचित् ॥ ९ ॥
विषं दत्त्वा तु भर्तारं जघान प्राग्यतस्ततः । पतिघ्नीयं महादुष्टा बाल्येऽत्र विधवासुत ॥ १० ॥
विष्णोराराधनादत्र गङ्गायाउपसेवनात् । गतिं शुभां सा प्राप्नोति व्रतकृच्छ्रोपसेवनात् ॥ ११ ॥
धर्मादत्र महाभाग परत्र च शुभा गतिः ॥ १२ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकसप्तत्युत्तरनवशताधिकसहस्रतमः ॥ १९७१ ॥

श्रीसूर्य उवाच ।

व्यभिचाररता या प्राक्सात्रापि व्यभिचारिणी । एतस्या निष्कृतिं सूत नैवात्राहं वदामि ते ॥१॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्विसप्तत्युत्तरनवशताधिकसहस्रतमः ॥ १९७२ ॥

श्रीसूर्य उवाच ।

वैनतेय महावाहो शृणु तस्य विचेष्टितम् । बभूव यामुने देशे बाहुजो धर्मकर्मवित् ॥ १ ॥
राजमान्यः सदाचारः शूरो मन्त्री महायशाः । धनवाहनभोगाढ्यो ब्राह्मणातिथिपूजकः ॥ २ ॥
सन्धिविग्रहसंयुक्तः स्त्रीपुत्रसुखसंयुतः । दत्तानि तेन दानानि मथुरायां महास्थले ॥ ३ ॥
कार्तिके शुक्लपक्षे च व्रतिना नियतात्मना । विधिवत्कपिलादानं ब्राह्मणेभ्योऽतिभक्तितः ॥ ४ ॥
सुवर्णानि खगश्रेष्ठ ह्येकोत्तरविधानतः । प्रतिपद्दिनतो यावत्पूर्णिमा गरुडाग्रज ॥ ५ ॥
पूर्णिमायां विधानेन गोघृतेन प्रबोधिताः । समर्पिताः प्रदीपा वै यमुनायां विशेषतः ॥ ६ ॥
स्वस्थानं प्राप्य वै सूत ततः सा क्षत्रियोत्तमा । कृतवान्दारुणं कर्म भाविनोऽर्थस्य वै बलात् ७
ब्राह्मणी विधवा वन्ध्या चासीत्तत्प्रतिवेशिनी । युवती बाहुजस्यास्य मन्दिरे चागतागतम् ॥ ८ ॥
कुर्वन्ती तद्गृहे चैकब्राह्मणेन तपस्विना । एकदा दैवयोगेन राजोपद्रवभीतितः ॥ ९ ॥
घटस्थं स्थापितं द्रव्यं ततः सा ब्राह्मणी खग । बाहुजं बोधयित्वा तु विषयोगप्रपञ्चतः ॥ १० ॥
ब्राह्मणं घातयामास द्रव्यलोभेन मानद । ततस्तेन क्षत्रियेण ब्राह्मण्या सह कामतः ॥ ११ ॥
भुक्तं तद्द्रव्यमखिलं घोरं पापमुपार्जितम् । ततो बहुतिथे काले स गत्वा यमशासनम् ॥ १२ ॥
पुण्यात्पुण्यफलं भुक्त्वा पापात्पापफलं तथा । भुक्तपुण्यावशेषेण स जातोऽत्र हिमालये ॥ १३ ॥
गङ्गायाः पूर्वभागे च पुण्ये च वणिजां कुले । स रक्तकृष्णो मतिमान्राजमान्यः प्रतापवान्॥१४॥
नातिह्रस्वो नातिदीर्घो न स्थूलो न कृशः सुखी । सन्धिविग्रहसंयुक्तो दाता भोक्ता प्रियम्वदः१५
धनवाहनभोगाढ्यो वाग्मी निजकुलाग्रणीः । पितृभ्रातृसुखैर्युक्तो बंधुमित्रसुसंयुतः ॥ १६ ॥
देवब्राह्मणभक्तश्च यशस्वी धर्मनीतिमान् । प्रतिष्ठाकामुकः श्रीमान्राजकार्येषु तत्परः ॥ १७ ॥
परोपकारनिरतो ब्राह्मणातिथिपूजकः । प्राग्भवे कपिलादानात्स्वर्णदानात्तथाण्डज ॥ १८ ॥
दीपदानान्मत्सुतायामत्र जन्मनि वै खग । राज्ञीप्रधानवर्गेषु मुख्योऽसौ पार्थिवप्रियः ॥ १९ ॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । मनःक्लेशसमायुक्तो गतागतधनैर्युतः ॥ २० ॥
सदा रिपुभयोद्विग्नचित्तोऽप्राप्तमनोरथः । प्रतिष्ठाभङ्गसन्दिग्धो मानी कापट्यसंयुतः ॥ २१ ॥
कदाचिद्बृहिणीरक्तो विरक्तश्च कदापि च । कौमारे सुखयुक्तोऽपि कैशोरे क्लेशसंयुतः ॥ २२ ॥
यूनि मातृसुखैर्हीनः परमर्मनिकायभित् । प्रियम्वदोऽपि बहुभिः शत्रुभिश्चातिदुःखितः ॥ २३ ॥
प्राग्भवे सुखजायाश्च विधवायाश्च सङ्गतः । सर्वागव्यथया युक्तस्तथा ब्राह्मणघातनात् ॥ २४ ॥
पापात्कफरुजा युक्तः कदाचिज्ज्वरवानपि । ब्रह्मस्वहरणात्पापात्पुमपत्यविवर्जितः ॥ २५ ॥
वातपित्तकफैर्युक्तश्चोपायैश्च भिषक्कृतैः । कदाचिद्बुक्शमं याति पुनरुत्पद्यते शनैः ॥ २६ ॥
कदाचित्पित्तवांश्चैव कदाचिद्वातरोगयुक् । सर्वदा श्लेष्मलः सोऽपि श्लेष्मवृद्धियुगण्डज ॥ २७ ॥
सन्दिग्धचित्तो लोकेषु नृपसभ्यसमाकुले । यशस्विताभिवृद्ध्यर्थं निजसम्पत्तिनाशकः ॥ २८ ॥
स्वजातिमध्ये श्रेष्ठोऽपि स्वजातीयविरोधभाक् । पितृभ्रातृसुखैर्युक्तोऽप्यमीभिः कलहाकुलः ॥२९॥
पूर्वे या स्त्री सहायासीद्ब्रह्मस्वहरणे वधे । सात्र जन्मनि पक्षीन्द्र ज्येष्ठा मृत्युवशं गता ॥ ३० ॥

या स्त्री प्रागस्य भार्यासीत्सा कनिष्ठात्र जन्मनि । साध्वी पतिप्रिया नित्यं देवब्राह्मणपूजने॥३१॥
रता सुशीला सततं पतिशुश्रूषणे रता । ब्रह्मस्वभक्षणात्सा तु मनोदुःखसमन्विता ॥ ३२ ॥
कदाचित्त्रिकपीडायुगुदरव्यथया युता । पुमपत्याशयाक्रान्ता परापत्यान्विलोक्य च ॥ ३३ ॥
प्राग्भवे द्वे भगिन्यौ तु धर्मकार्ये सहायिके । जाते तेऽत्र भवे सूत पुत्रौ जातेऽस्य वै खग ॥३४॥
प्राग्भवे सदसत्कर्म युवभावे यदर्जितम् । तदत्र तेन वै सूत युवभावेऽनुभूयते ॥ ३५ ॥
जन्माङ्गात्पञ्चमे द्यूने क्रूरग्रहविलोकिते । क्रूरखेटैर्युते वापि मत्सुतस्थानगे विधौ ॥ ३६ ॥
लक्षणैरेभिराढ्यश्चेत्प्रायश्चित्तं वदाम्यहम् । पलद्वयेन कर्तव्यो ब्राह्मणस्तु हिरण्मयः ॥ ३७ ॥
षोडशोरूपचारैश्च पूजयित्वा विधानतः । समर्प्यो वै विधिज्ञाय ब्राह्मणाय महात्मने ॥ ३८ ॥
पलमात्रमितः सोमस्तथा सूर्यो गणेशिता । लक्ष्मीनारायणश्चैव पलार्धेन प्रजापतिः ॥ ३९ ॥
ब्राह्मणेभ्यः प्रदेया वै पूर्वपापापनुत्तये । तदर्धमितिका वापि निजवित्तानुमानतः ॥ ४० ॥
गायत्रीं दशसाहस्रं त्र्यम्बकं द्विविधं तथा । सोमसूर्यगणेशानां मन्त्रानष्टाक्षरं जपेत् ॥ ४१ ॥
ब्रह्मजज्ञानमिति च मन्त्रं तत्संख्यया जपेत् । जुहुयात्तद्दशांशेन तिलैस्त्रिमधुराप्लुतैः ॥ ४२ ॥
ब्राह्मणान्भोजयेत्पश्चाच्छतं सार्धशतं नु वा । नियुतं पार्थिवानां च शिवानां पूजनं चरेत् ॥४३॥
मद्दिने तु व्रतं कुर्यान्मद्भक्तो मत्परायणः । घटं ताम्रमयं कृत्वा पलैः शतमितैः शुभम् ॥४४॥
गोघृतेन प्रपूर्याथ पलस्वर्णेन संयुतम् । वस्त्रेणाच्छाद्य संपूज्य ब्राह्मणाय कुटुम्बिने ॥ ४५ ॥
दद्यात्तं च विधानेन भक्तिश्रद्धासमन्वितः । ब्रह्मस्वहरणात्पापान्मुच्यते नात्र संशयः ॥ ४६ ॥
एवं कृते तथा सूत प्रायश्चित्ते मयोदिते । नाधयो व्याधयस्तस्य न च शत्रुभयं भवेत् ॥ ४७ ॥
पुत्रपौत्राभिवृद्ध्या च ह्येधन्ते सम्पदोऽन्वहम् । षट्चत्वारिंशदब्दे तु रिष्टं चापि न जायते ॥४८॥
रसनागमितायुः स्यादन्ते सद्गतिमाप्नुयात् । नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् ॥४९॥
षट्चत्वारिंशदब्दे तु रिष्टेनैव विनश्यति । व्याधिग्रस्तो भवेन्नित्यं लभते नैव सन्ततिम् ॥ ५० ॥
जन्मजन्मनि दुःखी स्यात्प्रायश्चित्ते कृतेऽधुना । व्याधयस्तस्य नश्यन्ति सूर्येणैव तमो यथा ५१
पुत्रद्वयं स लभते दीर्घायुश्चिरजीवितः । धर्मकर्मसमायुक्तं पितृभक्तं गुणाधिकम् ॥ ५२ ॥
अथ वा शृणुयाद्भक्त्या हरिवंशं विधानतः । दशावृत्त्या खगश्रेष्ठ पूर्वपापं प्रणश्यति ॥ ५३ ॥
प्रायश्चित्तं द्वयेऽप्येकं कुर्यात्पापापनुत्तये । प्रायश्चित्तं विधायाथ गां दोग्ध्रीं समलङ्कृताम् ॥५४॥
सवत्सां युवतिं सूर्यमाषस्वर्णैस्तु संयुताम् । प्रदद्यात्तां विधानेन ब्राह्मणाय कुटुम्बिने ॥ ५५ ॥
रुद्रपूजां ततः कृत्वा सर्पिष्यात्मानमीक्षयेत् । ततः शुद्धो भवेन्मर्त्यो नात्र कार्या विचारणा॥५६॥
मदुक्तां निष्कृतिं सूत यो न कुर्याच्च मानवः । तं विद्धि घोरदुरितैराक्रान्तं दैवघातितम् ॥५७॥
जन्मजन्मनि दुःखौघैराक्रान्तं निरयातिथिम् । जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम्॥५८॥
यद्यदन्तर्गतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ ५९ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्रिसप्तत्युत्तरनवशताधिकसहस्रतमः ॥ १९७३ ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम् । बभूव गौडदेशे तु ब्राह्मणो धर्मकर्मवित् ॥ १ ॥
दत्तानि तेन दानानि ब्राह्मणेभ्योऽतिभक्तितः । सुवर्णगोमहीशय्यावसनाभरणानि च ॥ २ ॥
अथो भाविबलात्सूत कृतं कर्मातिदारुणम् । एकदा पक्षिशार्दूल तापसो गृहमागतः ॥ ३ ॥

जितेन्द्रियोऽपि सधनो धनं तस्मै समर्पितम् । तीर्थावगाहनान्ते च ह्यागतः पुनराश्रमम् ॥ ४ ॥
धनं च प्रार्थितं तेन न च तस्मै स दत्तवान् । चौरेण तद्धृतं सर्वं तस्याग्रे भाषितं तदा ॥ ५ ॥
विश्वासतो गतो योगी शापं दत्त्वा सुदुःसहम् । वंशच्छेदो भवेच्छीघ्रं न पुनर्जीवते शिशुः ॥ ६ ॥
जन्मजन्मनि ते विप्र वंशच्छेदो भविष्यति । इति तेन खगश्रेष्ठ शापो दत्तः सुदारुणः ॥ ७ ॥
तेन विप्रेण तत्सर्वं ब्रह्मस्वं भुक्तमण्डज । ततो वहुतिथे काले स गत्वा यमशासनम् ॥ ८ ॥
पुण्यात्पुण्यफलं भुक्त्वा पापाच्च नरकं तथा । भुक्तपुण्यावशेषेण स जातोऽत्र हिमालये ॥ ९ ॥
ब्राह्मणो धनधान्यादियुक्तो ज्ञानी प्रतापवान् । नात्युच्चो नातिह्रस्वश्च गौरवर्णः प्रियम्वदः॥१०॥
राजमान्यो यशस्वी च देवब्राह्मणपूजकः । व्रतानामनुकांक्षी च भ्रातृमित्रसुसंयुतः ॥ ११ ॥
धनवाहनभोगाढ्योऽखिललोकवशंकरः । धर्मादिदं तथा पापाल्लोभी पापरतः क्वचित् ॥ १२ ॥
सिंहलग्ने स्थिते सोमे सुते पापसमन्विते । द्यूने पापग्रहैर्दृष्टे प्राग्भवे घटगं धनम् ॥ १३ ॥
भुक्तं तत्पापतः सूत जायास्थाने घटोऽभवत् । सुते क्रूरयुते सूत जातोऽयं ब्राह्मणोऽधुना ॥१४॥
प्राग्भवे तापसद्रव्यहरणोद्भवपापतः । तच्छापात्पतगश्रेष्ठ सन्तानसुखवर्जितः ॥ १५ ॥
कैशोरे भ्रातृजनकसुखयुक्तोऽथ यौवने । एकभ्रातृसुखैर्हीनो जनकस्य सुखैस्तथा ॥ १६ ॥
रहितोथोन्यसहजसन्तानसुखवर्जितः । सन्दिग्धः शत्रुभीत्या च चिन्ताक्लेशसमन्वितः ॥ १७ ॥
वातरोगेण संयुक्तः सदोदररुजान्वितः । कदाचिज्ज्वरयुक्तोऽपि गतागतधनैर्युतः ॥ १८ ॥
तस्य भ्रातापि रुग्युक्तो जायासुखविवर्जितः । भ्रातृपुत्रोऽपि रुग्युक्तो वंशस्य क्षतिरीदृशी ॥१९॥
लक्षणैरेभिराढ्यस्य प्रायश्चित्तं वदाम्यहम् । निष्कद्वयं सुवर्णस्य ताम्रं शतपलं तथा ॥ २० ॥
घृतं तथा शतपलं संपूज्य विधिवत्ततः । प्रदद्याद्वै विधिज्ञे हि ब्राह्मणे गरुडाग्रज ॥ २१ ॥
वस्त्रैकविधिना स्नायाद्रुद्रैकादशिनीं जपेत् । धेनुं दद्याद्विधिज्ञाय सवत्सां च पयस्विनीम् ॥ २२ ॥
शतं च भोजयेद्विप्राञ्शतं पञ्चाशदेव वा । एवं कृत्वा खगश्रेष्ठ सन्तानं लभते ध्रुवम् ॥ २३ ॥
जीवत्पुत्रः स दीर्घायुः पितृभक्तः गुणान्वितम् । त्रिसप्ततिमिताब्दायुः स्यादेवं विनतात्मज ॥२४॥
नाधयो व्याधयस्तस्य न च शत्रुभयं भवेत् । पुत्रपौत्राभिवृद्ध्यास्य ह्येधन्ते सम्पदोऽन्वहम्॥२५॥
नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् । सन्तानं न लभेत्क्वापि जन्मजन्मनि दुःखभाक् २६
विपदंगमितेऽब्दे तु रिष्टेनैव विनश्यति । प्रायश्चित्ते कृते सूत पुत्रपौत्रसमन्वितः ॥ २७ ॥
तदग्रे निधनं याति त्रिसप्ततिमिताब्दके । सौम्यायने सिते पक्षे गङ्गायां नात्र संशयः ॥ २८ ॥
सप्ततिं समवाप्नोति यत्र देवो महेश्वरः । जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् ॥ २९ ॥
यद्यदन्तर्गतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ ३० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः चतुःसप्तत्युत्तरनवशताधिकसहस्रतमः ॥ १९७४ ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम् । बभूव यामुने देशे बाहुजो धर्मकर्मवित् ॥ १ ॥
कृषिवाणिज्ययुक्प्राज्ञो ब्राह्मणातिथिपूजकः । दत्तानि तेन दानानि पर्वस्वपि च शक्तितः ॥ २ ॥
गोभूशय्यासनान्नाश्ववसनाभरणानि च । अथो भाविवलात्सूत कृतं कर्मातिदारुणम् ॥ ३ ॥
भगिनीपतिघातारव्यं तेन चातिसुदुःसहम् । दन्तोच्छिष्टेन दोषेण पाषाणेनाहनत्पुरा ॥ ४ ॥
ज्ञात्वा मृत्युवशं प्राप्तमात्मघातं चकार ह । ततो वहुतिथे काले स गत्वा यमशासनम् ॥ ५ ॥

पुण्यपापफलं भुक्त्वा पूर्वपुण्यावशेषतः । जातो हि हिमवच्छैले पुण्यकेदारमण्डले ॥ ६ ॥
ब्राह्मणो धर्मकर्माढ्यो भृत्यदासीसुखान्वितः । स्त्रीपुत्रसुखसंयुक्तो दाताभोक्ता प्रियम्वदः ॥ ७ ॥
वहुव्यापारवान्श्रेष्ठः सन्धिविग्रहसंयुतः । देशेदेशेऽधिकाराढ्यो वहुग्रामाधिपो धनी ॥ ८ ॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । जन्मलग्नात्सुते यूने क्रूरग्रहविलोकिते ॥ ९ ॥
जातोऽयमधिकाराच्च वहुदेवसमन्वितः । वातरुग्युङ्मनोदुःखैर्युतोप्राप्तमनोरथः ॥ १० ॥
वाल्ये पितृसुखैर्युक्तः कौमारे सुखवर्जितः । अधिकारप्रसङ्गेन निजद्रव्यविनाशकः ॥ ११ ॥
प्राग्योऽधर्मे सहायोऽस्य सोऽत्र ज्येष्ठसुतः खग । प्राग्भवे चात्मघाताच्च गतागतधनैर्युतः ॥१२॥
अधिकाराच्च्युतोऽपि स्यात्कदाचित्तत्समन्वितः । अस्थिरामात्यतायुक्तो वुद्धिमान्गूढभाववान्॥१३॥
पूर्वं यो घातितोऽनेन भगिनीपतिरत्र च । कनिष्ठोऽस्य सुतो भूत्वा पञ्चत्वं प्राप्तवान्खग ॥१४॥
लक्षणैरेभिराढ्यश्चेत्प्रायश्चित्तं वदाम्यहम् । पलद्वयेन कर्तव्यो वाहुजस्तु हिरण्मयः ॥ १५ ॥
गन्धपुष्पैः समभ्यर्च्य विधिज्ञाय प्रदापयेत् । तथा सूर्यः प्रकर्तव्यः सुवर्णपलमात्रतः ॥ १६ ॥
दद्याद्वेदविदे तश्च ब्राह्मणाय कुटुम्विने । गायत्रीं दशसाहस्रं त्र्यम्वकन्तु तथा जपेत् ॥ १७ ॥
होमयेत्तद्दशांशेन तिलैराज्यपरिप्लुतैः । सुवर्णाभरणैर्युक्तां गां च दद्यात्पयस्विनीम् ॥ १८ ॥
शतं वै भोजयेद्विप्रान्सर्पिष्यात्मानमीक्षयेत् । एवं कृते खगश्रेष्ठ विधिना पापशोधने ॥ १९ ॥
रिष्टेनैव विनाशः स्याद्दुःखी स्याज्जन्मजन्मनि । प्रायश्चित्ते कृते ह्यायुः शतागमितवत्सरम् ॥२०॥
जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् । यद्यदन्तर्गतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ २१ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चसप्तत्युत्तरनवशताधिकसहस्रतमः ॥ १९७५ ॥

श्रीसूर्य उवाच ।

वैनतेय महाभाग शृणु तस्य विचेष्टितम् । सौराष्ट्रे देशके पुण्ये वाहुजो धर्मकर्मवित् ॥ १ ॥
धनवाहनभोगाढ्यो राजमान्यः प्रतापवान् । दत्तानि तेन दानानि पर्वस्वपि च शक्तितः ॥ २ ॥
गोभूशय्यासनान्नाश्ववसनाभरणानि च । विधिवत्कपिलादानं ब्राह्मणाय कुटुंविने ॥ ३ ॥
अथो भाविवलात्सूत कृतं कर्मातिदारुणम् । कुलीनां युवतीं त्यक्त्वा वेश्यासक्तो वभूव सः॥४॥
स्वधर्मवोधकान्भ्रातृपितृवृद्धान्गुरूनपि । वञ्चयित्वा तु मोहेन पतिताचारवान्स्वयम् ॥ ५ ॥
निन्द्यामास दुष्टात्मा सङ्गत्या गरुडाग्रज । ततो वहुतिथे काले स गत्वा यमशासनम् ॥ ६ ॥
पुण्यपापफलं भुक्त्वा पूर्वपुण्यावशेषतः । जातोऽत्र केरले देशे ब्राह्मणो धर्मकर्मवित् ॥ ७ ॥
दाता भोक्ता दृढांगश्च नात्युच्चो न लघुर्घृणी । श्यामवर्णो विशालाक्षो देवब्राह्मणपूजकः ॥ ८ ॥
मातृभ्रातृसुखैर्युक्तो धनवाहनभोगभाक् । प्राग्भवे कपिलादानाद्गोभूम्यन्नप्रदानतः ॥ ९ ॥
पुण्यात्तु पूजको जातो नरनारायणाश्रमे । सकलैश्वर्यसंयुक्तो दासदासीजनान्वितः ॥ १० ॥
राजकल्पो धनाध्यक्षो वहुग्रामाधिपः सुखी । पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित्॥११॥
स्वस्त्रीं पतिव्रतां त्यक्त्वा प्राग्वेश्यासङ्गजेन सः । अत्र स्त्रीपुत्रजनकसुखैर्हीनः खगाधिप ॥ १२ ॥
वाल्ये पितृसुखैर्हीने दुःखभाक्स्यात्किशोरके । यूनि स्वदेशसन्त्यागी देशेदेशे रटन्नपि ॥ १३ ॥
प्राग्भवे गुरुवृद्धांश्च मातृभ्रातृस्वगोत्रजान् । उल्लंघ्य पतिताचारचरणोद्भवपापतः ॥ १४ ॥
तैर्विहीनोऽत्र जन्तुपि विप्रोऽपि क्षत्रधर्मभाक् । नैकस्त्रीसंयुतः कामी सत्यवाग्रहितः सदा ॥ १५ ॥
मनोभयैर्महाक्लेशैः कपटैः क्रूरकर्मभिः । शत्रुभीत्या च संयुक्तो विश्वासी स्वजनेष्वपि ॥ १६ ॥

सदा शत्रुभयाक्रान्तः कदाचिद्रोगवानपि । वातरक्तसंयुतो भूमि क्लेशभाङ्मध्यमे धनी ॥ १७ ॥
वार्धके वयसि प्राप्ते पुनः क्लेशैश्च संयुतः । बिभेति निजभृत्येभ्यश्च पैशुन्यगुणसंयुतः ॥ १८ ॥
स्वभृत्यभेदकर्ता च क्रोधयुग्भयसंयुतः । मेषे लग्नेऽब्धिगे सोमे सूने मन्देऽस्य जन्म तु ॥ १९ ॥
लक्षणैरभिराढ्यश्चेन्निष्कृतिं कथयाम्यहम् । पलत्रयेण कर्तव्या ब्राह्मणी च हिरण्मयी ॥ २० ॥
षोडशोपचारैश्च पूजयित्वा विधानतः । देया सा च विधिज्ञाय पूर्वपापापनुत्तये ॥ २१ ॥
पलैकेन तथा सोमस्तथा सूर्यो गणेशिता । तथा ब्रह्मा महेशश्च लक्ष्मीनारायणस्तथा ॥ २२ ॥
देयाः सम्पूज्य विप्रेभ्यो गाश्च दद्यात्पयस्विनीः । गायत्रीमष्टसाहस्रं त्र्यम्बकं तु तथा जपेत् २३
सोमसूर्यगणेशानां ब्रह्मेश्वरसुरद्विषाम् । मन्त्राञ्शरसहस्राणि प्रत्येकं प्रजपेत्तदा ॥ २४ ॥
होमयेत्तद्दशांशेन तिलैराज्यपरिप्लुतैः । ब्राह्मणान्भोजयेत्पश्चाच्छतं साग्रं विधानतः ॥ २५ ॥
सर्पिष्यात्मानमालोक्य भोजयेद्दिष्टबन्धुभिः । एवंकृतविधेः सूत पूर्वजन्माघनाशनम् ॥ २६ ॥
नाधयो व्याधयस्तस्य न च शत्रुभयं भवेत् । त्रिषष्टिमितके वर्षे रिष्टं नाप्नोति तस्य तु ॥ २७ ॥
गजनागमिताब्दान्तमायुस्तस्य प्रकीर्तितम् । नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् ॥२८॥
न तस्य गतिरुक्तात्र स्वाधिकारच्युतिर्भवेत् । शत्रुभीत्या समायुक्तो जन्मजन्मनि दुःखभाक् २९
जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् । यद्यदन्तर्गतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ ३० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षट्सप्तत्युत्तरनवशताधिकसहस्रतमः ॥ १९७६ ॥

श्रीसूर्य उवाच।

शूद्रोऽभवन्महाभाग प्राग्जन्मन्यतिकोविदः। ग्रामवासी सदा सौम्यः शतद्वनिकेऽण्डज ॥ १ ॥
शूद्रकन्या त्वनेनैव ह्यूढा षोडशवार्षिकी । भुक्तातिकामलोभेन बलात्कारेण दूषिता ॥ २ ॥
स चात्र धर्मपुत्रस्य भुक्त्वा भैरवशासनाः । पूजनाच्छिवलिङ्गानां प्रागत्रापि च सङ्करः ॥ ३ ॥
मथुरामण्डले दिव्ये जातोऽसौ धर्मकर्मवित् । षण्ढस्तेन विपाकेन प्राप्तसर्वमनोरथः ॥ ४ ॥
महोत्साहो महामानी महाविभवविस्तरः । मृत्युश्चास्यात्र गङ्गायां पुण्यादत्र शिवार्चनात् ॥ ५ ॥
भविष्यति महाभाग पापान्ते चास्य सद्गतिः । खनागमितवर्षान्तमायुस्तस्य प्रकीर्तितम् ॥ ६ ॥
जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् ॥ ७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्तसप्तत्युत्तरनवशताधिकसहस्रतमः ॥ १९७७ ॥

श्रीसूर्य उवाच।

वैनतेय महाबाहो शृणु तस्या विचेष्टितम् । बभूव यामुने देशे बाहुजा पतिवल्लभा ॥ १ ॥
तया दत्तानि दानानि ब्राह्मणेभ्योऽतिभक्तितः । कार्तिक्यां पौर्णमास्यां वै शशांकग्रहणेऽपि च२॥
भक्ष्यभोज्यानि वस्तूनि मथुरायां खगाधिप । दीपा दत्ता महाभाग घृतेन परिपूरिताः ॥ ३ ॥
मत्पुत्राः श्रद्धया सूत ह्येकोत्तरशतं खग । अथो पापं शृशं चक्रे भाविनोऽर्थस्य वैभवात् ॥ ४ ॥
देवद्रव्यं द्विजद्रव्यं हृत्वैकादशभिः सह । पूजकस्य स्त्रियौ द्वे च तत्कुमारौ सहोदरौ ॥ ५ ॥
स्वभ्रातरो पतिश्चैव ह्यन्यौ द्वौ प्रतिवेशिनौ । सर्वैर्मिलित्वा तद्भुक्तं देवद्रव्यं खगाधिप ॥ ६ ॥
घटसंस्थं परद्रव्यं भुक्तं तत्केवलं तया । स्वामिद्रोहात्मकं पापं दारुणं समुपार्जितम् ॥ ७ ॥
ततो बहुतिथे काले गत्वा तु यमशासनम् । पुण्यात्स्वर्गफलं भुक्त्वा पापाच्च नरकांस्तथा ॥ ८ ॥
भुक्त्वा पुण्यावशेषेण सा जातात्र हिमालये । गौराङ्गी पतिभक्ता च राजकार्येषु तत्परा ॥ ९ ॥
नातिस्थूला नातिकृशा नातिह्रस्वा प्रियम्वदा । राज्ञां हितकरी नित्यं व्रतानामनुकांक्षिणी ॥१०॥
प्राग्भवे मथुरायां तु कार्तिक्यां पूर्णमातिथौ । दीपदानात्खगश्रेष्ठ राजमान्ययुता त्विह ॥ ११ ॥

धनवाहनभोगाढ्या भृत्यदासीमहीयुता । बाहुजा स्वर्णभूषाङ्गी बहुग्रामाधिपा तथा ॥ १२ ॥
प्राग्भवे यः पतिश्चास्याः सोऽत्रापि पतिरीरितः । सुतबन्धुसमायुक्ता राजपत्नी कृपान्विता॥१३॥
पुण्यादिदं तथा पापाल्लोभाढ्या स्वल्पपापकृत् । चिन्ताक्लेशसमायुक्ता गतागतधनैर्युता ॥ १४॥
प्राग्देवद्रव्यहरणात्क्षुद्रकार्ये नियोजिता । तथा नृपैर्नियुक्तोऽस्ति तत्पापादेव तत्प्रियः ॥ १५ ॥
प्राग्भवे या सहायासीद्देवद्रव्यापहारणे । सास्या ज्येष्ठा मृतिं प्राप्ता विनतानन्दवर्धन ॥ १६ ॥
तथैव ये सहायाः स्युः पुरुषाः पापकर्मणि । ते पुत्रा निधनं प्राप्ता ये च धर्मे सहायकाः ॥१७॥
ते पुत्रा अत्र जीवन्ति तत्पत्युः पतगेश्वर । वातपित्तात्मिका नित्यं त्रिकपीडा सुसंयुता ॥ १८ ॥
कदाचिद्रोगयुक्ता च कदाचित्कलहाकुला । कापट्येन समायुक्ता शत्रुभीत्या च दुःखिता ॥१९॥
मानापमानसाम्येन दुःखिता प्रभुवेश्मनि । घटस्थं यत्परद्रव्यं भुक्तं प्रागनया सुत ॥ २० ॥
घटलग्ने त्वियं जाता तत्पापात्पुत्र दुःखिता । पञ्चमाधिपतिस्तस्या यतोऽस्तं गतवानिह ॥ २१ ॥
बाल्ये सुखसमायुक्ता कैशोर्ये क्लेशभागिह । युवभावे सुखैश्वर्ययुक्तापि पतगेश्वर ॥ २२ ॥
पुत्रशोकैः समायुक्ता स्वात्मानमपि नेच्छति । लग्नात्पञ्चमके द्यूने शुभैः क्रूरैर्विलोकिते ॥ २३ ॥
जातेयं पतगश्रेष्ठ पूर्वपापैस्तु दुःखिता । शंकालुः सर्वकार्येषु स्वकीयेषु विशेषतः ॥ २४ ॥
लक्षणैरेभिराढ्या चेत्प्रायश्चित्तं वदाम्यहम् । पलैः शतमितैः कार्यो घटस्ताम्रमयः शुभः ॥२५॥
गोघृतेन समापूर्यो वस्त्रद्वयविभूषितः । सुवर्णद्विमिता कार्या महेशप्रतिमा शुभा ॥ २६ ॥
घटोपरि सुसंस्थाप्य पूज्या सर्वोपचारकैः । विधिज्ञाय प्रदेया सा सघटा पूजिताय वै ॥ २७ ॥
देवस्वहरणात्पापान्मुच्यते नात्र संशयः । अग्नेस्तु प्रतिमा कार्या सुवर्णमितिका शुभा ॥ २८ ॥
देया वेदविदे सूत पूजिताय महात्मने । दुष्टसङ्गतिजात्पापाद्विमुक्ता स्यात्खगाधिप ॥ २९ ॥
रवेस्तु प्रतिमा तद्वत्सुवर्णमितिका शुभा । पञ्चाशत्पलमानेन कुर्यात्ताम्रमयं घटम् ॥ ३० ॥
घृतपूर्णं तत्र सूर्यप्रतिमां स्थाप्य यत्नतः । पूजयित्वा सवस्त्रां तु दद्याद्वेदविदे सुत ॥ ३१ ॥
परस्वहरणात्पापान्मुच्यते नात्र संशयः । महारुद्रविधानेन महारुद्रं प्रपूजयेत् ॥ ३२ ॥
शतं च भोजयेद्विप्रान्गां च दद्यात्पयस्विनीम् । एवं निष्कृतिमापन्ना जीवेत्सप्ततिवर्षकम् ॥ ३३ ॥
न तस्याः पुत्रमरणं नाधयो व्याधयो न च । न शत्रुतो भयं तस्या नापमानभयं क्वचित्॥३४॥
पुत्रपौत्राभिवृद्ध्या च ह्येधन्ते सम्पदोऽन्वहम् । कुबेदमितवर्षे तु रिष्टं तस्या न जायते ॥ ३५ ॥
पुत्रत्रयं चिरंजीवेदिहैव पतगेश्वर । नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् ॥ ३६ ॥
रिष्टेनैव विनाशः स्याच्चातुर्विध्येन वै सुत । प्रायश्चित्ते कृते सूत महत्सौख्यवती भवेत् ॥ ३७ ॥
अन्ते सद्गतिमाप्नोति यत्र देवो महेश्वरी । अकृते तु यथाशक्ति प्रायश्चित्ते मयोदिते ॥ ३८ ॥
जन्मजन्मनि दुःखी स्यादन्ते च निरयं व्रजेत् । मदुक्तां निष्कृतिं सूत कृत्वा भक्त्या समन्विता३९
सर्पिष्यात्मानमालोक्य भोजयेद्दिष्टबन्धुभिः । जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् ॥४०॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽष्टसप्तत्युत्तरनवशताधिकसहस्रतमः ॥ १९७८ ॥

श्रीसूर्य उवाच ।

ब्राह्मणं विद्यया युक्तं स्वाचारं संयतेन्द्रियम् । सर्वशास्त्रप्रवक्तारं प्रतिग्रहपराङ्मुखम् ॥ १ ॥
दान्तं कुलीनं धर्मज्ञमनुद्वेगकरं नृणाम् । अधोलोभविहीनं च सर्वशास्त्रार्थकोविदम् ॥ २ ॥
गृहमाहूय भक्त्या तं यथाविधि समर्चयेत् । केयूरैः कटकैर्वस्त्रैर्माल्यैश्चैवाङ्गुलीयकैः ॥ ३ ॥

दानप्रकारमाह ।

उदङ्मुखोपविष्टाय विष्णो रुद्रस्य सन्निधौ । प्राङ्मुखो बोधितो दद्यान्मन्त्रेणानेन धर्मतः ॥४॥

मन्त्रहीनं न दातव्यं विधिलोपो यतो भवेत् । अतो मन्त्रं प्रवक्ष्यामि पुण्यदं पापहानिदम् ॥ ५ ॥
गोत्रार्थशर्मनामान्तान्पितॄन्स्वस्य द्विजस्य च । असावहं समुच्चार्य वदेद्दानगुणांस्ततः ॥ ६ ॥
अभिलाषसमृद्ध्यर्थममुकस्मै द्विजाय ते । इष्टदेवस्वरूपाय तुभ्यं सम्प्रददे वदेत् ॥ ७ ॥
मा मे भवन्तु रोगाश्च ह्याधयो मा भवन्तु मे । नान्तः पीडा च मे काचिन्मानहीनं नमेद्विजम् ८
गृह्णीष्व दानमेतद्वै मम रोगः प्रणश्यतु । इत्युक्त्वा द्विजवर्याय पूजयित्वा विधानतः ॥ ९ ॥
सर्वदानेष्विमं मन्त्रं वदेद्दानविधानवित् । इति संश्राव्य तं विप्रं मत्स्वरूपं विचिन्तयेत् ॥ १० ॥
कुशपुष्पाक्षतोपेतं तज्जलं तत्करे क्षिपेत् । इदमों प्रतिगृह्णामि स्वस्ति तेऽस्त्विति कीर्तयेत् ॥११॥
अनेन विधिना सूत दद्याद्दानं द्विजातये । ततो दानं गृहीत्वा तु द्विजो दत्त्वाशिषं व्रजेत् ॥ १२ ॥
विमुक्तोऽहमसार्नीति निरेनास्मीति तं वदेत् । एवमस्तु त्रिरुच्चार्य दत्ताशीः प्रतिगृह्य च ॥ १३ ॥
तस्येष्टमभिसन्ध्यायन्व्रजेद्विप्रः स्वमाश्रमम् । तं व्रजन्तं पुनस्तुत्य रोगी मां हृदये स्मरन् ॥१४॥
अग्ने नयेति मन्त्रान्ते पुनर्नल्वनसं स्पृशेत् । ततो मामीक्ष्य विधिवत्सर्पिः स्पृश्य यथाविधि१५॥
मम मूर्तिप्रदानं च शृणु तार्क्ष्य समाहितः । अदृष्टेनावृते देशे विदध्याद्गोमुखं कृती ॥ १६ ॥
वर्तुलं पृथुलं गौर्य्या गोमयेन शुभाकृति । तत्रोदयगिरिं कुर्याद्रक्तशालीयतण्डुलैः ॥ १७ ॥
द्रोणेनास्तीर्यवसनं रक्तं श्यामोत्तरायणम् । गिरेस्तु पूर्वदिग्भागे रथं रजतनिर्मितम् ॥ १८ ॥
पलेन वा तदर्धेन तदर्धेनाथवा कृतम् । एकचक्रं सप्तचक्रं सप्तधैकेन योजितम् ॥ १९ ॥
निष्कमानसुवर्णेन तदर्धेनाथ वा खग । मापैः षोडशभिः कार्या मम मूर्तिः सुशोभना ॥ २० ॥
अग्न्युत्तारेण मन्त्रेण विधिना सम्प्रतिष्ठिता । कर्तव्या द्विभुजा तार्क्ष्य पंकजद्वयधारिणी ॥ २१॥
रक्तक्षौमावृते तस्मिन्रथे स्थाप्य समर्चिता । ततो रथे च संस्थाप्य वर्तुले ताम्रभाजने ॥ २२ ॥
पलेन वा तदर्धेन तदर्धेनाथवा कृते । तण्डुलद्रोणे संस्थाप्य ताम्रपात्रोपरि स्थिता ॥ २३ ॥
प्रत्यङ्मुखाचले स्थाप्या रक्तचन्दनचर्चिता । मामभिष्टूय संवीक्ष्य प्रणम्येदमुदीरयेत् ॥ २४ ॥
नमो विवस्वते तुभ्यं सूर्यायामिततेजसे । प्रणमय्य च दारिद्र्यव्याधिदुःखविनाशिने ॥ २५ ॥
पुराकृतानां सर्वेषां कर्मणामिह साक्षिणे । ताम्रमूर्तिप्रदानेन विपाटगुणशालिने ॥ २६ ॥
उल्लाघश्च सुरूपश्च कृतकृत्यो भवाम्यहम् । अलंकृताय विप्राय दद्यान्मन्त्रमुदीरयेत् ॥ २७ ॥

मन्त्रः ।

" ये मां रोगाः प्रबाधन्ते देहस्थाः सततं द्विज । भगः पूषा च सप्ताश्वो द्वादशात्मा त्रयीतनुः ॥
स्वर्णमूर्तिप्रदानेन प्रीतस्तरणिरस्तु मे " । इत्युक्त्वा विधिवत्तार्क्ष्य दैवज्ञाय निवेदयेत् ॥ २९ ॥
वाढमित्येव तां मूर्तिं गृह्णीयाद्दैववित्तमः । इति संश्राव्य तं विप्रं मत्स्वरूपं विचिन्तयन् ॥ ३० ॥
कुशपुष्पाक्षतोपेतं तज्जलं तत्करे क्षिपेत् । इदमों प्रतिगृह्णामि स्वस्ति तेऽस्त्विति कीर्तयेत् ३१ ॥
सद्यस्तु रोगी दानाच्च दीर्घायुश्च प्रपद्यते । पुण्याहवाचनं कार्यं ब्राह्मणैर्वेदपारगैः ॥ ३२ ॥
स विशुद्धे ततः कांस्यपात्रे सर्पिःप्रपूरिते । सहिरण्ये मुखं पश्येद्धस्ते कृत्वा सुयत्नतः ॥ ३३॥
मन्त्रमेनं वदन्रोगी स्ववपुः प्रविलोकयेत् ॥ ३४ ॥

मंत्रः ।

"आज्य त्वमसि तेजोऽसि देवानां प्रियमप्यसि । वीर्यमोजोऽसि सर्वेषां त्वमेवामृतमप्यसि॥३५॥
यदेतदेनः सुमहन्मयाप्तं पूर्वजन्मनि । एनसो व्याधिरूपं यत्ततो मुच्ये सुरप्रिय ॥ ३६ ॥
सहेन्नस्तस्य संस्पर्शान्नश्यन्तु दुरितानि मे" ॥ ३७ ॥

इति सम्प्रार्थ्य तत्पात्रं दैवज्ञाय निवेदयेत् । ततो प्राप्तीक्ष्य सुरभिं दैवज्ञज्ञानवेदिनः ॥ ३८ ॥
ब्राह्मणान्प्रणिपत्याथ शक्त्या दानं समाचरेत् । भूमिद्रविणवासांसि धेनुं च समलङ्कृताम्॥३९॥
सुरभिं च ततो दद्याद्ब्राह्मणानां विशेषतः । कृताभिषेकः स्वगृहं गत्वा भुञ्जीत बन्धुभिः ॥४०॥
तस्मिन्दिने स मधुरं गव्येनाज्येन संप्लुतम् । हविः शुद्धं समश्नीयात्कदम्बलवणोज्झितम् ॥४१॥
पुत्रो वा यदि वा भ्राता पिता वा गुरुरेव च । कर्मकर्तुमशक्यस्य कुर्यात्तन्नाम कीर्तयेत् ॥४२॥
इत्येतत्कथितं सूत किमन्यत्परिपृच्छसि ॥ ४३ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकोनाशीत्युत्तरनवशताधिकसहस्रतमः ॥ १९७९ ॥

श्रीसूर्य उवाच ।

सम्भवन्ति निमित्तानि भाविनः कर्मणः पुरा । सुखदुःखमयान्येव दैवस्येह वशादिह ॥ १ ॥
निमित्तशकुनस्वप्नशरीरेणाद्भुतानि च । सुरभी सौरभी नारी वडवादिप्रसूतयः ॥ २ ॥
विकृते दुष्टदिष्टे वा जायन्ते दुःखसूचकाः । ग्रहाणां प्रातिकूल्यं च मनोबुद्धिविपर्ययः ॥ ३ ॥
विविधोऽतिबलीयोपि विवादोचितकर्मणः । आरम्भोऽपि च कार्याणां कर्मणामयथाविधि ॥४॥
सशिल्पे सदने चासौ दुष्टादिष्टाद्यशाकुनैः । कारूत्थमपि दैवज्ञमिति विभ्रमदूषिते ॥ ५ ॥
अभिचारप्रयोगाद्यं तस्योपरि च तेन वा । सुप्रसुप्तं विपर्येति कृत्या करणमेव च ॥ ६ ॥
इत्याद्यैरितरैश्चापि निमित्तैर्दैवनोदितैः । विविधैश्च महोत्पातैः स्वस्वकाले फलप्रदैः ॥ ७ ॥
अचेतना सं पूर्वं तच्चिरकालानुबन्ध्यति । कर्म कर्तारमन्वेति वार्यतेऽत्र न केनचित् ॥ ८ ॥
तान्त्रिका ये न मन्यन्ते कर्म शाश्वतमीश्वरम् । कालाख्यस्येश्वरस्यैते मायाविभ्रममोहिताः ॥९॥
कर्मैव कारणं सूत सर्वेषां सुखदुःखयोः । अपवर्गस्य स्वर्गस्य नात्र कार्या विचारणा ॥ १० ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायोऽशीत्युत्तरनवशताधिकसहस्रतमः ॥ १९८० ॥

अरुण उवाच ।

शल्यं विधिं किमुक्तं तद्गृहस्थं गृहमेधिनः । कथमर्दयति ज्ञातुं शक्यं तत्केन तद्वद ॥ १ ॥

श्रीसूर्य उवाच ।

शल्यमष्टविधं सूत गृहमध्यगतं नृणाम् । नानाविधानि दुःखानि प्रापयेद्गृहमेधिनः ॥ २ ॥
यथा तत्ते प्रवक्ष्यामि सद्यः प्रत्ययकारकम् । तुषपाषसमङ्गारं तथा भसितसम्भवम् ॥ ३ ॥
कपालं दारवं चास्थिशकलं चाश्मलोष्टकम् । शल्यानि दैवसंयोगाद्गृहाभ्यन्तर्गतान्यपि ॥ ४ ॥
दैवेनोत्पत्स्यमानानां दुःखानामाशिकारणम् । भवन्ति सर्वदा सूत भोगकाल उपस्थिते ॥ ५ ॥
फलान्यपि च ते तेषां प्रवदामि पृथक्पृथक् । धनधान्यसमृद्धीनां नाशकृत्तुषसम्भवम् ॥ ६ ॥
शल्यं वेश्मगतं सूत तदङ्गे त्वचि दोषकृत् । कुर्यात्तदङ्गे वैकल्यमग्निशस्त्रव्रणादिभिः ॥ ७ ॥
आयसं कलहं घोरं स्वजनान्यजनैः सह । अङ्गारदाहो बाधिर्यं दुष्टग्रहगदादिभिः ॥ ८ ॥
तदङ्गे कुरुते पीडां भयं वह्नेर्मुहुर्मुहुः । भस्मव्रजाङ्गदोषादि वैवर्ण्यं दारुरुग्भयम् ॥ ९ ॥
कुरुते सततं सर्वरसानामपि शोषणम् । कपालश्च तदङ्गस्य नानारोगकरं परम् ॥ १० ॥
कुरुते विविधां पीडां मृतिर्गृहपतेरिति । दारवं चार्थनाशायं भवेच्च पशुनाशनम् ॥ ११ ॥
तदङ्गतोदवेदार्द्यं काष्ठघातनिमित्ततः । अस्थिजं विविधान्रोगान्करोति प्रतिहायनम् ॥ १२ ॥
शिशूनां च महापीडां कुर्यान्मृतिमपि ध्रुवम् । अश्मलोष्टकजं शल्यं वृत्तमुन्नतमायतम् ॥ १३ ॥
उदरे कुरुते ग्रन्थिं प्लीहगुल्मभ्रमावहम् । अन्तर्गतानि चैतानि गृहभूमेर्गृहेशितुः ॥ १४ ॥

कुर्वन्ति विविधान्दोषान्वित्तसौख्यविनाशकान्। प्रत्यक्षं भूर्वहिर्भागे नानाव्याधिप्रसूचकम् १५॥
शल्यं भवति तन्नेह कथयाम्यतिदुःखदम्। गृहमर्मसु सर्वेषु आस्थितं दुःखदोपकृत् ॥ १६ ॥
कुसूलोलूखलभ्राष्ट्रलोहं लवणभाजनम्। ईषद्भग्नाशुचिस्निग्धभाण्डं च भ्रमकृच्च यत् ॥ १७ ॥
वीभत्सं चातिदुर्गन्धं वस्तुमर्मणि दुःखदम्। विद्धमन्तर्वहिर्भागं कालस्तम्भभ्रमादिभिः ॥ १८॥
विविधान्यतिदुःखानि स्त्रीणां यच्छति तद्गृहम्। अदृष्टान्यपि चैतानि दैवज्ञः शास्त्रकोविदः॥१९॥
गृहस्थस्याङ्गपीडादिदर्शनेनैव पश्यति। उद्धृत्य तानि विधिवत्तच्छान्तिषु च तत्परः ॥ २० ॥
प्रश्नभारोपितमतिर्दैवज्ञो विन्दते यशः ॥ २१ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्याय एकाशीत्युत्तरनवशताधिकसहस्रतमः ॥ १९८१ ॥

श्रीसूर्य उवाच।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम्। बभूव यामुने देशे बाहुजो धर्मकर्मवित् ॥ १ ॥
परोपकारनिरतो राजमान्यः प्रतापवान्। दत्तानि तेन दानानि पर्वस्वपि च शक्तितः ॥ २ ॥
गोभूशय्यासनान्नाश्ववसनाभरणानि च। मथुरायां महाभाग कार्तिके मासि सङ्गतः ॥ ३ ॥
पौर्णमास्यां विशेषेण दीपाश्च घृतपूरिताः। समर्पिताः खगश्रेष्ठ यमुनायां च भक्तितः ॥ ४ ॥
अथो भाविबलात्सूत पापमुग्रमुपार्जितम्। यूनि भावे खगश्रेष्ठ सहायैः पञ्चभिर्युतः ॥ ५ ॥
पुरुषः स्त्रीसहायेन देवद्रव्यापहारणम्। परस्वहरणं चैव कृतं तच्छृणु साम्प्रतम् ॥ ६ ॥
भार्याद्वयं पूजकस्य तत्र द्वाभ्यां समायुतः। देवद्रव्यमशेषं च गृहीतं भुक्तमप्यथ ॥ ७ ॥
तिसृणां भ्रातृभिः सार्धं त्रिभिस्तेन दुरात्मना। परद्रव्यं गृहीतं वै लोभमोहसमाकुलम् ॥ ८ ॥
ततो बहुतिथे काले गत्वा तु यमशासनम्। पुण्यात्पुण्यफलं भुक्त्वा पापात्पापफलं तथा ॥ ९ ॥
पूर्वपुण्यावशेषेण स जातोऽत्र हिमालये। गौरो मध्यमरूपाढ्यो नात्युच्चो न लघुर्घृणी ॥ १० ॥
राजमान्यः प्रतापी च शूरो भव्योऽत्र बाहुजः। सन्धिविग्रहसंयुक्तो दाता भोक्ता प्रियम्वदः॥११॥
धनवाहनभोगाढ्यो राजकार्येषु तत्परः। भ्रातृपुत्रसुखैर्युक्तो राज्ञां हीनकरः सदा ॥ १२ ॥
प्राग्भवे दीपदानाच्च यमुनायां तु भक्तितः। अत्र राजकृपायुक्तो बहुस्त्रीसुखभोगभाक् ॥ १३ ॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित्। तथा कापट्यसंयुक्तो वातपित्ताश्रयः सदा ॥१४ ॥
गतागतधनैर्युक्तः क्वचिद्बन्धुवियोगवान्। देवस्वहरणात्पापात्क्षुद्रकर्मनियोजितः ॥ १५ ॥
शङ्कालुः सर्वकार्येषु स्वस्त्रीषु च विशेषतः। प्राग्भवे ये स्त्रियौ तस्य देवस्वहरणे खग ॥ १६ ॥
जाते सहाये ते त्वत्र द्वे भार्ये निधनं गते। सहायाः पुरुषा आसन् येऽस्य प्राग्जन्मनि ध्रुवम् १७
परद्रव्यापहरणे तेऽत्र पुत्रा मृतिं गताः। प्राग्भवे धर्मकार्ये तु येऽस्य साहाय्यमादरात् ॥ १८ ॥
कृतवन्तोऽत्र ते सूत पुत्रा जीवन्ति तस्य तु। चिन्ताक्लेशसमायुक्तो रोगार्तः क्वचिदेव हि ॥१९॥
जन्माङ्गात्पञ्चमे द्यूने शुभैः क्रूरैर्विलोकिते। सप्तमे भावके क्रूरे द्वित्रैर्दृष्टे खगाधिप ॥ २० ॥
युते वा स्त्रीद्वयं नष्टं शुभेनैकेन संयुते। दृष्टेनैवात्र जनुषि जीवत्येव न संशयः ॥ २१ ॥
पुत्रभावे शुभैरेव दृष्टे पञ्चभिरादरात्। जीवेयुः पञ्च पुत्रास्तु यावद्भिः क्रूरखेचरैः ॥ २२ ॥
तावन्तो निधनं याता विनतानन्दवर्धन। लक्षणैरेभिराढ्यश्चेत्प्रायश्चित्तं वदाम्यहम् ॥ २३ ॥
पलैः शतमितैः कार्यो घटस्ताम्रमयः शुभः। गोघृतेन समापूर्यो वस्त्रद्वयविभूषितः ॥ २४ ॥
सुवर्णद्विमिता कार्या महेशप्रतिमा शुभा। घटोपरि सुसंस्थाप्य पूज्या सर्वोपचारकैः ॥ २५ ॥
विधिज्ञाय प्रदेया सा सघटा पूजिताय वै। देवस्वहरणात्पापान्मुच्यते नात्र संशयः ॥ २६ ॥
अग्नेस्तु प्रतिमा कार्या सुवर्णमितिका शुभा। देया वेदविदे सूत पूजिताय महात्मने ॥ २७ ॥

दुष्टसङ्गतिजात्पापाद्विमुक्तः स्यात्खगाधिप । खेस्तु प्रतिमा तद्वत्सुवर्णमितिका शुभा ॥ २८ ॥
देया वेदविदे सूत पूजिताय महात्मने । दुष्टसङ्गतिजात्पापाद्विमुक्तः स्यात्खगाधिप ॥ २९ ॥
पञ्चाशत्पलमानेन कुर्यात्ताम्रमयं घटम् । घृतपूर्णं तत्र सूर्यप्रतिमां स्थाप्य यत्नतः ॥ ३० ॥
पूजयित्वा सवस्त्रं तु दद्याद्वेदविदे सुत । परस्वहरणात्पापान्मुच्यते नात्र संशयः ॥ ३१ ॥
महारुद्रविधानेन महादेवं प्रपूजयेत् । शतं च भोजयेद्विप्रान्गां च दद्यात्पयस्विनीम् ॥ ३२ ॥
एवं निष्कृतिमापन्नो जीवेच्चाशीतिवर्षकम् । न तस्य पुत्रमरणं न स्त्रीमरणमेव च ॥ ३३ ॥
नाधयो व्याधयस्तस्य न च शत्रुभयं भवेत् । पुत्रपौत्राभिवृद्ध्या च ह्येधन्ते सम्पदोऽन्वहम् ३४॥
त्रिषष्टिमितिके वर्षे रिष्टं तस्य न जायते । नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् ॥ ३५ ॥
रिष्टेनैव विनाशः स्याच्चातुर्विध्येन वै सुत । जन्मादिमरणान्तं हि स्वल्पमेवात्र सूचितम् ॥ ३६ ॥
यद्यदन्तर्गतं सूत तन्मच्छास्त्राद्विलोकयेत् ॥ ३७ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायो द्व्यशीत्युत्तरनवशताधिकसहस्रतमः ॥ १९८२ ॥

श्रीसूर्य उवाच ।

वैनतेय महावाहो शृणु तस्य विचेष्टितम् । बभूव बर्बरे देशे पादजो धर्मकर्मवित् ॥ १ ॥
कृषिवाणिज्यनिरतो ब्राह्मणातिथिपूजकः । दत्तानि तेन दानानि पर्वस्वपि च शक्तितः ॥ २ ॥
युवभावे खगश्रेष्ठ ब्राह्मणानां सहायतः । अथो भाविबलात्सूत कृतं कर्मातिदारुणम् ॥ ३ ॥
वनन्तु ज्वालितं तेन क्षेत्रीकरणहेतवे । वनजीवास्तथा दग्धाः पापमुग्रमुपार्जितम् ॥ ४ ॥
ततो वहुतिथे काले स गत्वा यमशासनम् । पुण्यात्पुण्यफलं भुक्त्वा पूर्वपुण्यावशेषतः ॥ ५ ॥
जातो गोदावरीदेशे ह्यष्टयोजनसम्मिते । स तु मध्यमरूपाढ्यः श्यामवर्णः प्रतापवान् ॥ ६ ॥
नात्युच्चो नातिदीर्घश्च पितृमातृसुखैर्युतः । प्रियवाग्वहुमित्रश्च ब्राह्मणातिथिपूजकः ॥ ७ ॥
व्रतानामनुकांक्षी च तीर्थयात्रापरो नरः । पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् ॥ ८ ॥
निर्धनो वन्धुहीनश्च स्त्रीपुत्रसुखवर्जितः । देशेदेशे रटन्भ्रान्तः पूर्वपापात्खगाधिप ॥ ९ ॥
लक्षणैरेभिराढ्यश्चेत्प्रायश्चित्तं वदाम्यहम् । वनदेवी तथा कार्या सुवर्णमितिका शुभा ॥ १० ॥
तदर्धमितिका वापि निजवित्तानुसारतः । सम्पूज्य भक्तियुक्तेन मनसाद्युपचारकैः ॥ ११ ॥
विधिज्ञाय प्रदेया सा पूर्वपापापनुत्तये । गोदावर्यां ततः स्नायान्मृगगेर्यां भक्तितः ॥ १२ ॥
एवं कृते भवेत्सूत पूर्वपापप्रणाशनम् । धनधान्यसुखैर्युक्तः पुत्रवानिह जायते ॥ १३ ॥
नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् । चतुस्त्रिंशन्मिते वर्षे रिष्टेनैव विनश्यति ॥ १४ ॥
प्रायश्चित्ते कृते ह्यायुरशीतिमितवत्सरम् । कर्के राहावयं जातो मीनस्थे निधनं भवेत् ॥ १५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायस्त्र्यशीत्युत्तरनवशताधिकसहस्रतमः ॥ १९८३ ॥

श्रीसूर्य उवाच ।

वैनतेय महावाहो शृणु तस्य विचेष्टितम् । बभूव यामुने देशे ब्राह्मणो धर्मकर्मवित् ॥ १ ॥
राजमान्यः प्रतापी च धनपुत्रसुखैर्युतः । दत्तानि तेन दानानि पर्वस्वपि च शक्तितः ॥ २ ॥
गोभूशय्यासनान्नानि मथुरायां विशेषतः । अथो भाविबलात्सूत कृतं कर्मातिदारुणम् ॥ ३ ॥
ब्राह्मणी धर्षिता तेन कामलोभेन मोहिता । पतिव्रता स्वभार्या वै त्यक्ता पापधिया खग ॥४॥
ततो वहुतिथे काले स गत्वा यमशासनम् । पुण्यपापफलं भुक्त्वा पूर्वपुण्यावशेषतः ॥ ५ ॥
हिमालये पुण्यदेशे जातोऽत्र मुखजोऽधुना । नात्युच्चो नातिदीर्घश्च गौरवर्णः प्रतापवान् ॥ ६ ॥

देवब्राह्मणभक्तश्च विद्याभ्यासरतः सुखी । राजमान्यः सुवाक्सत्यमतिः सर्वप्रियम्वदः ॥ ७ ॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । चिन्ताक्लेशसमायुक्तो स्वल्पवित्तेन संयुतः ॥ ८ ॥
बाल्ये पितुः सुखैर्हीनो दुःखभाक्स किशोरके । प्राग्भवे स्वस्त्रियास्त्यागादत्र स्त्रीपुत्रवर्जितः ॥९ ॥
ब्राह्मणी धर्षणात्पूर्वं वातामयसुपीडितः ॥ १० ॥

अरुण उवाच ।

लक्षणं वद विश्वात्मन्ब्राह्मणस्त्रीनिपेविणः । सर्वाङ्गवेदनार्तस्य जन्तोरनुजिघृक्षया ॥ ११ ॥

श्रीसूर्य उवाच ।

शृणु सूत प्रवक्ष्यामि द्विजस्त्रीमभिजग्मुषः । लक्षणं निष्कृतिं चापि यथावद्विधिनोदिताम् ॥१२॥
यथायथा स वै कामान्कुमतिर्द्विजयोषितम् । अकालयत्तदस्य स्यादिह बुद्धिविपर्ययः ॥ १३ ॥
विविधो लिङ्गजो व्याधिर्महमूत्रार्तिपूर्वकः । आलिङ्गयेद्यथा बुद्ध्या बाहुभ्यां तद्भुजान्तरम् ॥१४॥
तदस्य बाहुहृत्क्रोडस्तम्बयुक्तीव्रवेदना । जानुजंघांघ्रिगुह्येषु विविधा वातजा रुजः ॥ १५ ॥
मिथ्यापवादनाच्छंका नानान्नेष्वरुचिर्भवेत् । धनस्योपचितस्यापि भवेदथ व्ययो मृषा ॥ १६ ॥
अङ्गेष्वस्पृश्यता दुःखात्तोदभेदादिकार्तयः । अङ्गानामप्रसारित्वं ग्रीवापृष्ठत्रिकग्रहः ॥ १७ ॥
दवथुश्च शिरस्तापः शूलः शोफः क्वचित्क्वचित् । अङ्गशोषोऽथ वैनिद्र्यं कुक्षितोदोह्यसृक्च्युतिः १८
वातान्मूत्रविड्विसर्गो वैषम्यमतिकोपिता । लक्षणैरेभिराढ्यश्चेत्प्रायश्चित्तं वदाम्यहम् ॥ १९ ॥
सर्वाङ्गवेदनार्तिश्च दैवज्ञोक्तविधिं चरेत् । सुदिष्टे समनुप्राप्ते विशिष्टपाद्यदूषिते ॥ २० ॥
निष्केण शुद्धवर्णस्य सुवर्णस्याथकल्पयेत् । तदर्धमितकेनापि निजवित्तानुसारतः ॥ २१ ॥
स्त्रियाः प्रतिकृतिं रम्यां सुरूपां गुणशालिनीम् । अलंकृतां स्वर्णमयैर्भूषणैर्मणिमौक्तिकैः ॥२२॥
दूकूलवासिनी पुष्पस्रग्भिः सम्भूषितां शुभाम् । तिलद्रोणाचले शुक्लशयने स्वासने न्यसेत् ॥२३॥
ततः प्रतिष्ठितप्राणां तस्मै तां प्रतिपादयेत् । तदग्रेंजलिमाधाय तिष्ठन्मन्त्रमिमं वदेत् ॥ २४ ॥

मन्त्रः ।

" यन्मया गच्छतो बालां प्रबलेनाङ्गपीडया । श्रद्धया ज्ञानतः सम्यङ्महापापमनुष्ठितम् ॥२५॥
तेन पापेन गात्रेषु वातपीडा सुदुस्तरा । जाता तत्पापनाशाय सौवर्णीं योषिदाकृतिम् ॥ २६ ॥
प्रयच्छामि च तां तुभ्यं मम पापं व्यपोहतु " ॥ २७ ॥
त्रिर्वदेच्च ततो विप्रस्तथैवास्त्विति त्रिर्वदेत् । प्रणिपत्य पुनर्भक्त्या प्रादक्षिण्यं परीत्य च ॥ २८ ॥
अग्ने नयेति मन्त्रेण विसृज्यैनं खगाधिप । ततोऽन्यानपि विप्रान्स भूरिद्रविणदानतः ॥ २९ ॥
सन्तोष्य विविधैर्दानैर्भोजयेत्सुसमाहितः । एवं निष्कृतिमापन्नः पूर्वपापात्प्रमुच्यते ॥ ३० ॥
न तस्य वातजा पीडा नाधयो व्याधयो नच । न शत्रुतो भयं तस्य न दारिद्र्यभयं क्वचित् ३१॥
चतुस्त्रिंशन्मिते वर्षे रिष्टं तस्य न जायते । स्त्रीपुत्रसुखयुक्तः संश्चिरं जीयात्खगाधिप ॥ ३२ ॥
त्रिसप्तत्यब्दमायुः स्यात्प्रायश्चित्ते कृतेऽधुना । नैवं करोति यो मोहाल्लोभाद्वा पापशोधनम् ॥३३॥
रिष्टेनैव विनाशः स्याज्जन्मजन्मनि दुःखभाक् ॥ ३४ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायश्चतुरशीत्युत्तरनवशताधिकसहस्रतमः ॥ १९८४ ॥

श्रीसूर्य उवाच ।

वैनतेय महाबाहो शृणु तस्य विचेष्टितम् । बभूव गौडदेशे तु ब्राह्मणो धर्मकर्मवित् ॥ १ ।
दत्तानि तेन दानानि पर्वस्वर्पि च शक्तितः । अथो भाविबलात्सूत कृतं कर्मातिदारुणम् ॥ २
क्षेत्रीकरणहेत्वर्थं ज्वालितं वनमद्भुतम् । वनजीवास्तथा दग्धा भूयांसोऽपि विहङ्गमाः ॥ ३

पञ्चभिर्मिलितस्तद्वत्पापमुग्रमुपार्जितम् । ततो वहुतिथे काले स गत्वा यमशासनम् ॥ ४ ॥
पुण्यात्स्वर्गफलं भुक्त्वा पापाच्च नरकं तथा । पूर्वपुण्यप्रभावेण स जातोऽत्र हिमालये ॥ ५ ॥
गौरो भव्यो महाज्ञानी नात्युच्चो न लघुर्घृणी । सन्धिविग्रहसंयुक्तो सर्वलोकप्रियङ्करः ॥ ६ ॥
देवब्राह्मणभक्तश्च राजकार्येषु तत्परः । स्त्रीपुत्रसुखसंयुक्तो बुद्धिमान्प्रियदर्शनः ॥ ७ ॥
पुण्यादिदं तथा पापाल्लोभी पापरतः क्वचित् । मिथ्याभिशंसनैर्युक्तो बाल्ये पितृसुखोज्झितः॥८॥
कापट्येन सुसंयुक्तो निर्धनो नीतिमानपि । प्राग्भवे वनदाहे तु ये स्युस्तस्य सहायकाः ॥ ९ ॥
तेऽत्र जन्मनि भोः सूत पुत्राश्च निधनं गताः । कदाचिद्रोगसंयुक्तो वातपित्तात्मकः सदा ॥१०॥
कीटलग्ने तु सञ्जातो लग्नात्पञ्चमगो झषः । तस्य प्रिया सदाचारा पतिभक्तिपरायणा ॥ ११ ॥
विनीता सत्त्वसम्पन्ना देवद्विजपराऽभवत् । परं सन्तानदुःखार्ता न रतिं हि लभेत वै ॥ १२ ॥
कदाचिद्दैवयोगेन मतिस्तस्याः शुभाऽभवत् । जगत्कारणमीशानं पुत्रकामा समूजयत् ॥ १३ ॥
अनन्यभावेन जपं गिरिजायाश्चकार वै । कालेनाल्पेन सा सुभ्रूः पुत्रयुक्ता बभूव हि ॥ १४ ॥
ईश्वरस्मरणं सर्वसिद्धिदं परिकीर्तितम् ॥ १५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः पञ्चाशीत्युत्तरनवशताधिकसहस्रतमः ॥ १९८५ ॥

श्रीसूर्य उवाच ।

वभूव यामुने देशे क्षत्रियोऽतिविचक्षणः । धनाढ्यः सुन्दरः सौम्यः पुत्रपौत्रादिसंयुतः ॥ १ ॥
जलधेनुप्रदानं हि कृतवान्भक्तितत्परः । शिवस्य देवदेवस्य पूजाकर्मणि तत्परः ॥ २ ॥
अथो भाविवलात्सूत कृतं कर्मातिदारुणम् । परस्त्रीसुरतं चक्रे परनिन्दां च दुःखदाम् ॥ ३ ॥
ततो वहुतिथे काले स गत्वा यमशासनम् । पुण्यात्पुण्यफलं भुक्त्वा पापात्पापफलं तथा ॥ ४ ॥
शिवपूजनजात्पुण्यात्स जातोऽत्र हिमालये । पुण्यदेशे च गङ्गायां पादजो धनवान्सुखी ॥ ५ ॥
नात्युच्चो नातिह्रस्वश्च लोभी पापरतः क्वचित् । स रक्तगौरो मतिमान्वान्धवैः संयुतस्तथा॥ ६ ॥
व्यभिचाररतश्चैव निन्दकः पापवुद्धिमान् । वहुपुत्रैश्च संयुक्तो कुण्डजातिस्तवसौ खग ॥ ७ ॥
कदाचिद्वातरोगेण जाठरेण च पीडितः । लक्षणैरेभिराढ्यश्चेत्प्रायश्चित्तं वदाजि ते ॥ ८ ॥
द्रोणद्वयप्रमाणं हि लवणं विदुषे ददेत् । सालङ्कारां सवत्सां च गां च दद्यात्पयस्विनीम् ॥ ९ ॥
यः करोति नरो मोहात्प्रायश्चित्तं खगेश्वर । चत्वारिंशन्मिते वर्षे प्राप्नोति निधनं ध्रुवम् ॥ १० ॥
जन्मादिमरणान्तं च स्वल्पमेवात्र सूचितम् । यद्यदन्तर्गतं सूत तन्मच्छास्त्राद्विलोकयेत ॥ ११ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः षडशीत्युत्तरनवशताधिकसहस्रतमः ॥ १९८६ ॥

श्रीसूर्य उवाच ।

क्षात्रे कुलेऽभवत्पूर्वं मरुदेशे खगेश्वर । पुण्यात्मा सुखसंयुक्तो पुत्रस्त्रीसुखवान्धनी ॥ १ ॥
दशधेनुप्रदानं हि चकार प्राग्भवे खग । मत्पूजने रतो नित्यमधुना सोऽभवद्द्विज ॥ २ ॥
हिमालये पुण्यदेशे गङ्गा वहति यत्र वै । स रक्तगौरो मतिमान् धनाढ्योऽतिप्रियम्वदः ॥ ३ ॥
राजमान्यः प्रतापी च पित्तरोगेण पीडितः । पित्तरोगस्य नाशाय दश गावः सदक्षिणाः ॥ ४ ॥
ब्राह्मणेभ्यः प्रदातव्या भक्तिभावेन चाण्डज ॥ ५ ॥

इति श्रीवृद्धसूर्यारुणसंवादे कर्मविपाकेऽध्यायः सप्ताशीत्युत्तरनवशताधिकसहस्रतमः ॥ १९८७ ॥

AGADGURU VISHWARADHYA
A SIMHASAN JNANAMANDIR
LIBRARY.
[illegible], VARANASI

समाप्तश्चायं ग्रन्थः ।

पुस्तकमिलनेका ठिकाना—
खेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" स्टीम्-यन्त्रालयाध्यक्ष-मुम्बई.